THE BOOK WAS DRENCHED

UNIVERSAL
LIBRARY
OU_184354
UNIVERSAL
LIBRARY

S81 PG S1628
गीताप्रेस ग्रन्थमाला
श्रीमन्महाभारतम्
अनुशासनपर्वणि
1933.
23 DEC 1982

OUP—390—29-4-72—10,000

OSMANIA UNIVERSITY LIBRARY

Call No 581 M21S Accession No PG S1628

Author

Title श्रीमन्महाभारतम् · 1933 ·
षष्ठभागः — अनुशासनपर्वम् ·

This book should be returned on or before the date last marked below

23 DEC 1982

Shriman
MAHĀBHĀRATAM
Part VI
XIII Anushāsanaparvan

WITH

Bharata Bhawadeepa By Nilkantha.

Edited by

Pandit Ramachandrashastri Kinjawadekar.

PRINTED & PUBLISHED

BY

SHANKAR NARAHAR JOSHI

Chitrashala Press, 1026 Sadashiv Peth, Poona City.

Shake 1855.] *First Edition.* [*A. D. 1933*

All Rights Reserved



श्रीमन्महाभारतम्।

षष्ठभागे—अनुशासनपर्व।

चतुर्धरवंशावतंसश्रीमन्नीलकण्ठविरचित-भारतभावदीपाख्यटीकया समेतम्।


पण्डित रामचंद्रशास्त्री किंजवडेकर इत्येतैः पाठान्तर-टिप्पण्यादियोजनया समलङ्कृतम्।



तच्च

पुण्याख्यपत्तने

१०२६ सदाशिववीथ्यां चित्रशालाख्ये मुद्रणालये 'शंकर नरहर जोशी' इत्येतैः संमुद्र्य प्रकाशितम्।



शालिवाहनशकाब्दाः १८५५] • प्रथमं संस्करणम्। [ख्रिस्ताब्दाः १९३३

अस्य ग्रन्थस्य सर्वेऽधिकाराः प्रकाशयित्रा स्वायत्तीकृताः ।

प्रास्ताविकम् ।



ॐ पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते ।
पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते ॥

ॐ शान्तिः शान्तिः शान्तिः ।

श्रीमतः करुणावरुणालयस्य यस्य भगवतो रमाजानेः कृपापाङ्गात्समासिमगमच्छ्रीमन्महाभारतस्य नीलकण्ठीयभारतभावदीपाख्यटीकासमन्वितस्य प्रकाशनमिति प्रथम तमेव परमेशं हृदि भावयाम । तत एतत्कार्यसंपादने यै खलु आरम्भप्रभृत्येतत्क्षणपर्यन्तं साहाय्यमाचरितं तेभ्यः कृतज्ञताभराक्रान्ता वयं परस्सहस्रान् धन्यवादान् वितराम । अस्य महाभारतस्य सशोधनकर्मणि यानि किलादर्शपुस्तकान्यस्माभि स्वीकृतानि तेषा निर्देशो द्वितीयभागे व्यधायि । तदपेक्षया तु द्वे पुस्तके आधिक्येऽस्माभिर्लब्धे, तयोर्नामनी—**अर्जुनमिश्रविरचित**टीकासवलित महाभारतं, कलिकाताया बेंगाल एशियाटिक सोसायटी सस्थया १८३७ तमे ख्रिस्ताब्दे मुद्रितं मूलमात्रं महाभारतम् । तत्राद्यं पुस्तक त्वपूर्णमितरत्तु पूर्णम् । द्वितीयभागप्रदर्शितपुस्तकवदनयोरप्यादर्शपुस्तकयो. संशोधनेऽस्माकं साहाय्यमभूत अत एतत्पुस्तकद्वयाधिपतीना नैकविधप्राच्यहस्तालिखितपुस्तकसंग्रहपराणा **डॉ. न. गो. सरदेसाई** महोदयानामुपकृतिभरं शिरसि धारयाम । अपि चाधुनापि कालेये कलकलबहुले काले सोद्वाऽपि महान्तं द्रविणव्ययम्, अविगणय्य च प्रत्यवायस्तोमान् यदेतत् प्रायः सप्रति दुष्प्रापस्य नीलकण्ठकृतव्याख्यासहितस्य महाभारतस्य मुद्रणं प्रकाशन च **चित्रशाला**संस्थाव्यवस्थापकै श्रीमद्भिर्महामहिमशालिभिर्यदद्य संपूर्णता नीतं यत्सत्य तेन जगदुपकारिणा कार्येण सर्वेऽपि विद्वासोऽधमर्णीकृता इति निश्चप्रचम् । अतश्चित्रशालाव्यवस्थापकेभ्यः सुकृतिभ्यः श्रीशो दीर्घमायु· स्थान्नुतम विपुल च यशो वितरत्विति भूयो भूय प्रार्थये ।

आर्ये प्रेष्ठाश्चित्रशालासस्थाप्रणयिनो विद्वासः । यथा खलु **चित्रशाला**कार्यधूर्वहैरिदं संपूर्ण, नैकविधचित्रचित्रित, सटीक महाभारत भवद्भ्य उपहारीकृतं तथैवाचिरादेवाल्पमूल्येन नीलकण्ठीयव्याख्यासंवलितो '**हरिवंशः**' '**महाभारतभूमिका**' इत्येतद्ग्रन्थद्वय यथाक्रमं संमुद्य प्रकटीक्रियेत इति निवेदयन्तो वयमति हि नाम प्रमोदामहे । तदेतद्ग्रन्थद्वयसाजिघृक्षुभिस्तत्रभवद्भि· स्वीयं नामादि यथायथ **चित्रशालाव्यवस्थापक**सविधे प्रेषणीयम्। अन्ततश्च पाठकमहोदयेभ्य. साञ्जलिबन्धं सप्रश्रयं चेदमप्यवश्यं विज्ञाप्यं यदस्मिन्ग्रन्थपरिशोधनकर्माणि दृष्टिदोषवशात्, प्रमादाद्वा, व्युत्पत्त्यपरिकराद्वा, अक्षरयोजकश्रमाद्वा, मुद्रायन्त्रसघर्षाद्वा यदि कानिचन स्खलितानि नयनसरणिमवतरेयुस्तदपि भ्रान्तेः पुरुषधर्मत्वमाकलय्य क्षन्तव्योऽयं जन इति निवेदयति—

विद्वज्जनविधेयः
किंजवडेकरोपाह्वो रामचंद्रशास्त्री
पुण्यपत्तनस्थभुवनभारतीनिवासी

आषाढ वदि पचम्याम्
शा. शाके १८५५

आदर्शपुस्तकोल्लेखपात्रिका ।

१ (क) कलकत्तानगरे मुद्रितं मूलमात्रम् ।

२ (ख) कुम्भघोणनगरे दाक्षिणात्यकोशानुसारे मुद्रितं सटिप्पणम् ।

३ (ग) मोहमय्या ' गोपाळ नारायण ' इत्येतैर्मुद्रितं सटीकम् ।

४ (घ) पुण्यपत्तनस्थ—मीमांसाविद्यालयस्थं लिखितं सटीकम् ।

५ (ङ) मोहमय्या ' गणपत कृष्णाजी ' इत्येतैर्मुद्रित सटीकम् ।

६ (च) मोहमय्या गुजराथ प्रिंटिंग प्रेसद्वारा मुद्रित सटीकमपूर्णम् ।

७ (छ) अर्जुनमिश्रटीकासवलित लिखितमपूर्णम् ।

८ (ज) बेंगालएशियाटिकसंस्थया मुद्रित मूलमात्रम् ।

॥ श्रीभारती जयतु ॥

॥ महाभारतम् ॥

अनुशासनपर्व ।

-१३-

विषयानुक्रमणिका ।

अ०	श्लो०	विषय	पृष्ठम्
१	८३	'शमो बहुविधाकारः (१) इत्यादिना हतान्भीष्मादीनुद्दिश्य विलपता युधिष्ठिरेण 'नूनं हि पापकर्माणः' (१३) इत्यादिना किल्बिषाद्यथा मुच्येम तथाऽनुशाधि इत्यनुयुक्तो भीष्मो मृत्युगौतमीकालंलुब्धकपन्नगसंवादरूपमितिहासंव्याजहार । कस्याश्चिद्गौतम्याः पुत्रं घातितवन्तं सर्पं, पाशेन बद्ध्वा तेन सह गौतमीसमीपमागत्य लुब्धकः 'अयं ते पुत्रहा पन्नगाधमः' (१९) इत्याद्युवाच। गौतमीलुब्धकयोः संवदतोर्गौतमी स्वस्य सर्पहननाभावाभिप्रायं प्रकटीचकार। सर्पलुब्धकयोः संवदतोर्गौतमीलुब्धकपन्नगसमीपमागतो मृत्युः पन्नगं प्रति 'प्रचोदितोऽहं कालेन' (५०) इत्याद्युवाच । सर्पश्च 'निर्दोषं दोषवन्तं वा' (५८) इत्यादिना मृत्युं प्रत्युक्त्वा लुब्धकं प्रति 'श्रुतं ते मृत्युभाषितम्'·(६१) इत्याद्युक्तवतो लुब्धकस्य मृत्युना सह संवादे प्रवृत्ते समागतः कालो लुब्धकादीन् प्रति 'न ह्ययं नाप्ययं मृत्युः'(७०) इत्याद्याचष्ट। कालवाक्यं श्रुत्वा लुब्धकं प्रति	३	६
२	९६	'केन मृत्युर्गृहस्थेन धर्ममाश्रित्य निर्जितः।इत्येतत्सर्वमाचक्ष्व तत्त्वेनापि च पार्थिव' (३) इति युधिष्ठिरेणानुयुक्तो भीष्म इक्ष्वाकुवंशविस्तारमभिधाय तद्वंश्याद्दुर्योधनात्सुदर्शनानाम्न्याः कन्यायाजन्मादिवृत्तान्तमवदत् । सुदर्शनारूपेण मोहितोऽग्निर्ब्राह्मणरूपेण तां याचमानो दुर्योधनेन प्रत्याख्यातो वितते ऽस्य यज्ञे विनाशमवाप। नष्टेऽग्नौ राजप्रार्थनयाग्निं शरणं गतैर्ब्राह्मणैस्तस्याभिप्रायमवबुद्ध्य स्थापितो राजा हृष्टः सन्नग्नेर्नित्यसान्निध्यरूपं शुल्कमवाप्य विधिपूर्वकं तस्मै कन्यां ददौ। अग्नेः सकाशात्सुदर्शनायामुत्पन्नः सुदर्शन ओघवतो नृपस्यौघवतीं कन्यां परिणीय गृहस्थधर्मानाचरन् कदाचित् 'गृहस्थभावजेष्यामि मृत्युमित्येष'	६

अ०	श्लो०	विषय	पृष्ठम्
		(४१) इति प्रतिज्ञायौघवतीं प्रति 'अतिथेः प्रतिकूलं ते न कर्तव्यम्' (४२)इत्याद्यादिश्य समिदाहरणार्थं जगाम । सुदर्शनप्रतिज्ञाभवणेन तद्गन्धान्वेषिणि मृत्यौ तस्मिन्समिदाहरणार्थं धर्मो ब्राह्मणरूपेण तद्गृहमागत्य 'प्रदानेनात्मनो रात्रिं कर्तुमर्हसि मे प्रियम्' (५४) इत्युवाच, सा च भर्तृवाक्यं स्मृत्वा तथाऽकरोत् । समिधो गृहीत्वा गृहमागत्यौघवतीमाह्वयति सुदर्शने लज्जया प्रत्युत्तरमददत्यां तस्यामतिथिना निःशङ्कं लज्जाकारणे निवेदितेऽपि ईर्ष्यारहितं यथा स्यात्तथा तदभिनन्दति सति तं प्रति धर्मः 'धर्मोऽहमस्मि भद्रं ते' (७९) इत्यादिना स्वप्रत्यभिज्ञाकथनपूर्वकं 'विजितश्च त्वया मृत्युः' इत्याद्युवाच । भीष्म 'एतत्ते कथितं पुत्र' (९४) इत्यादिना गृहस्थस्यातिथिसत्कारं विना नान्यत्किमप्याचरणीयमित्याद्युवाच ९
३	१९	त्रिभिर्वर्णैर्यदि दुष्प्राप ब्राह्मण्य तर्हि विश्वामित्रेण कथं तत्प्राप्तम् ? इत्यादीन् प्रश्नांश्चकार युधिष्ठिरः १०
४	६२	'श्रूयतां पार्थ तत्त्वेन' (१) इत्यारभ्य क्षत्रियः सोऽप्यथ तथा ब्रह्मवंशस्य कारकः' (४८) इत्यन्तेन ग्रन्थेन विश्वामित्रोपाख्यानमाख्याय 'तस्य पुत्रा महात्मानः' (४९) इत्यादिना गोत्रप्रवर्तकान्मधुच्छन्दःप्रभृतींस्तत्पुत्रान्नामतोऽकथयद्भीष्मः. . . १२
५	३२	'आनृशंस्यस्य भक्तजनस्य गुणान् श्रोतुमिच्छामि' इति युधिष्ठिरेणापृष्टो भीष्मो वासवशुकसंवादेतिहासकथनेनोत्तरमाह स्म, काशिराजविषयस्थेन लुब्धकेन सविषबाणेन विद्धे महति वृक्षे शोषमापद्यत्यपि तत्कोटरस्थः शुको यदा भक्त्या तं नाजहात्तदा तेन सह शुष्यन्तं तं दृष्ट्वा चिंतयन्निन्द्रो ब्राह्मणवेषेणागत्य 'कस्मादेनं न त्यजसि' (१३) इति पप्रच्छ। उत्तरं ददतः शुकस्य 'अनतिक्रमणीयानि' (२१) इत्यादिकं वाक्यं श्रुत्वा तुष्टेनेन्द्रेणोज्जीवितो वृक्षः श्रीमत्तामवाप। शुकोऽप्यायुषोऽन्ते स्वर्गमवाप १४
६	४९	'दैवे पुरुषकारे च किंस्विच्छ्रेष्ठतरं भवेत्' (१) इति युधिष्ठिरप्रश्ने भीष्मः पुरुषकारस्य श्रैष्ठ्यं प्रतिपादयितुं वसिष्ठब्रह्मणोः संवादरूपमितिहासं व्याजहार । दैवपुरुषकारयोः श्रेष्ठत्वविषये वसिष्ठेन पृष्टो ब्रह्मा 'नाबीजं जायते किञ्चित्' (५) इत्यादिना कर्मणः श्रेष्ठत्वमभिधाय पुण्यपापकर्मणोर्गतिं ययातिप्रभृतिनिदर्शनं दर्शयित्वा कर्मव्यतिरेकेण धनाद्युपभोगाभावमभिदधाति स्म १६
७	२९	'कर्मणां च समस्तानां शुभानां भरतर्षभ । फलानि महतां श्रेष्ठ प्रब्रूहि परिपृच्छतः' (१) इति युधिष्ठिरप्रश्ने भीष्मस्तान्युपदिश्य 'या दुस्त्यजा दुर्मतिभिर्या न जीर्यति जीर्यतः । योऽसौ प्राणान्तिको रोगस्तां तृष्णां त्यजतः सुखम्' (२१) इत्यादिनाऽऽशात्यागमुपदिदेश. . . १८
८	२९	'के पूज्याः के नमस्कार्याः' (१) इत्यादिके युधिष्ठिरप्रश्ने 'स्पृहयामि द्विजातिभ्यः' (३) इत्यादिना ब्राह्मणानां पूज्यत्वादिकमभ्यभाषत भीष्मः १९
९	२८	'ब्राह्मणेभ्यः प्रतिश्रुत्य ये न ददति तेषां का गतिः' (१) इति पृच्छन्तं युधिष्ठिरं प्रति प्रतिश्रुत्यादा-	

अ०	श्लो०	विषय	पृष्ठम्
		तुर्गतिमभिधातुं शृगालवानरसंवादरूपमितिहासमुदैरयद्भीष्मः। पूर्वजन्मनि सखिभावापन्नयोः केनचित्कर्मणा शृगालवानरयोनी प्राप्नुवतोः कदाचित् श्मशाने मृतमांसं भक्षयञ्शृगालो वानरेण 'किं त्वया पापकं पूर्वं कृतं कर्म सुदारुणम्' (११) इति पृष्टः सन् 'ब्राह्मणस्य प्रतिश्रुत्य न मया तदुपाहृतम्' (१२) इत्याद्युवाच। एवमेव शृगालेन पृष्टो वानरः 'सदा चाहं फलाहारो ब्राह्मणानां प्लवङ्गमः' (१५) इत्याद्याख्याय ब्राह्मणस्वं कदापि न हर्तव्यमित्याह स्म। इत्यभिधाय भीष्मो युधिष्ठिरं प्रति 'न हर्तव्य विप्रधनं क्षन्तव्यं तेषु नित्यशः'(१८) इत्याद्युपदिदेश	२१
१०	७५	'हीनजातेरुपदेशं कुर्वतो दोषो भवति वा न वा' (१) इति युधिष्ठिरप्रश्ने राजपुरोहितसंवादरूपमितिहासं व्याहरन्नुत्तरमाह स्म भीष्मः। हिमालयस्य पार्श्वे पूर्वमेकदा ब्रह्माश्रमे तपस्यन्तं कुलपतिं प्रति कश्चिच्छूद्रः आगत्य 'त्वं मां प्रति धर्मान्वक्तुं प्रव्राजयितुं चार्हसि' (१५)इत्युवाच ततः कुलपतिना 'न शक्यमिह शूद्रेण लिंगमाश्रित्य वर्तितुम्' (१६) इत्यादिना प्रत्याख्यातः शूद्रः स्थानान्तरे आश्रमं निर्माय तत्र तपश्चचार। ततः कदाचिद्दधिरेकस्तदाश्रम आजगाम। ततः स ऋषिः 'अहं श्राद्धं करोम्यनुगृहाण' (२७) इति शूद्रेण प्रार्थितः सन् पित्र्ये कर्मणि तमादिदेश। कालान्तरेण तपःप्रभावात्स शूद्रो राजाऽभूत ब्राह्मणश्च तत्पुरोहितोऽभवत्। राजपुरोहितभावेन वर्तमानयोस्तयोः पुण्याहकर्मणि पुरोहितं दृष्ट्वा सर्वदा	
अ०	श्लो०	विषय	पृष्ठम्
		राजा हसन्पुरोहितेनैकान्ते पृष्टः पूर्वजन्मवृत्तान्तमाख्याय 'पुरोहितत्वमुत्सृज्य यतस्व त्वं पुनर्भवे' (६१) इत्याद्युपदिदेश। एवमुपशिक्षितो बहु धनं दत्वा राज्ञा विसर्जितः पुरोहितस्तीर्थादिषु ब्राह्मणेभ्यो गवादीनि दत्वा तपः कुर्वन्सिद्धिमवाप। इमामितिहासमाख्याय भीष्मोऽधमं प्रत्युपदेशो न कर्तव्यः इत्याद्युपदिदेश	२३
११	२१	'कीदृशे पुरुषे कीदृश्यां स्त्रियां वा लक्ष्मीर्वसति' (१) इति युधिष्ठिरेण पृष्टो भीष्मः श्रीरुक्मिणीसंवादरूपमितिहासं कथयति स्म। श्रीकृष्णाङ्गगता श्रीः रुक्मिण्या 'कानीह भूतान्युपसेवसे त्वम्' (४) इत्यादि पृष्टा सती 'वसामि नित्यं सुभगे प्रगल्भे' (६) इत्यादिना स्वनिवासयोग्यानि स्थानान्याचख्यौ	२५
१२	५४	'स्त्रीपुंसयोः संप्रयोगे स्पर्शः कस्याधिको भवेत्' (१) इति युधिष्ठिरेण पृष्टो भीष्मो भंगास्वनशक्रसंवादरूपमितिहासं व्याहरन्नुत्तरमाह स्म--शक्रमायया स्त्रीत्वं प्राप्तो भङ्गास्वनश्चिन्तयन्पौरान्प्रति स्त्रीत्वप्राप्तिवृत्तान्तमाख्याय पुत्रेषु राज्यं न्यस्य वनं जगाम। राज्यं कुर्वत्सु भङ्गास्वनपुत्रेषु वैरमुत्पाद्य तान्नाशयामासेन्द्रस्तच्छ्रुत्वा शोचन्ती तापसी ब्राह्मणरूपिणा तेन पृष्टा स्वस्य पूर्ववृत्तान्तं कथयति स्म। पूर्ववृत्तान्तं कथयित्वा प्रणामपूर्वकं क्षमां याचित इन्द्रः प्रसन्नः सन् 'स्त्रीभावे जातान्पुत्रान्स्त्रीवयाम्युत पुरुषभावे जातान्' (४३)इति पृष्टा स्त्रीभावे जातान्पुत्रान्स्त्रीवयेत्युवाच तापसी। 'स्त्रीभावे जातेषु पुत्रेषु कथमभ्यधिकः स्नेहः' (४६) इती	

अ०	श्लो०	विषय	पृष्ठम्
		न्द्रेण पृष्टा तापसी 'स्त्रियास्त्वभ्यधिकः स्नेहो न तथा पुरुषस्य' (४७) इत्युवाच । तापसीवाक्येन तुष्टो देवेन्द्रः सर्वान्पुत्रान्सञ्जीव्य 'पुनः स्त्रीत्वं पुरुषत्वं वा वृणु'(४९) इति तेन उक्ता सा स्त्रीत्वमेव वव्रे । तत इन्द्रेण 'पुरुषत्वं कथ त्यक्त्वा स्त्रीत्वं चोदयसे' (५१) इति पृष्टा सा 'स्त्रियाः पुरुषसंयोगे प्रीतिरभ्यधिका सदा' (५२) इत्युवाच	२७
१३	६	'किं कर्तव्यं मनुष्येण लोकयात्राहितार्थिना ' (१) इत्यादिके युधिष्ठिरप्रश्ने भीष्मः 'कायवाङ्मनोभिरशुभं कदापि न विधेयम्' (२-६) इत्याद्युपदिदेश ...	२७
१४	४२९	'त्वयाऽऽपगेय नामानि' (१)इत्यादिना महादेवस्य नामानि कथयेत्यनुयुक्तो भीष्मः स्वस्य महादेवगुणकथनासामर्थ्यमुद्भाव्य तत्कथनार्थं श्रीकृष्णं प्रेरयति स्म। भीष्मेण प्रेरितः श्रीकृष्णः श्रीमहादेवस्य माहात्म्यं कथयन् जाम्बवत्या पुत्रार्थं प्रार्थितस्य स्वस्योपमन्योराश्रमे गमनं कथयति स्म । तत्र गतं मां प्रत्युपमन्युर्महादेवमाराधय तत्प्रसादात्ते पुत्रो भविष्यति इत्युक्त्वा तस्य माहात्म्यं कथयन् महादेवाराधनाद्धिरण्यकशिपुप्रभृतीनां वरलाभादिकमाख्याय 'पुरा कृतयुगे तात ऋषिरासीन्महायशाः' (१११) इत्यारभ्य 'ईशानः स वरान् दत्वा तत्रैवान्तरधीयत' (३६३) इत्यन्तेन ग्रन्थेन जनन्युपदेशात्स्वस्य महादेवाराधनं, तत्स्तवनं, तुष्टात्तस्माद्वरलाभादिकं चोदीर्य त्वमपि षष्ठे मासि षोडश वरान् सपत्नीकात्तस्मात्प्राप्स्यसि; जप्यमुपदेक्ष्यामीत्युक्त्वा मां दीक्षयामास,	

अ०	श्लो०	विषय	पृष्ठम्
		उपमन्युना दत्तदीक्षस्य मम तपसा तुष्टः प्रत्यक्षमागतो महादेवो 'नमोऽस्तु ते शाश्वत सर्वयोने' (४०७)इत्यादिना स्तुतः सन् 'वृणीष्वाष्टौ वरान्कृष्ण' (४२९) इत्याद्यभ्यधान्माम् ..	४५
१५	११	'धर्मे दृढत्वम्' (२) इत्यादिषु मत्प्रार्थितेष्वष्टसु वरेषु शिवेन दत्तेषु तदनन्तरमुमापि मत्प्रार्थितान् 'द्विजेष्वकोपम्' (६) इत्यादीनष्ट वरानदात् । तत उभयोरन्तर्हितयोः सतोरुपमन्युर्मत्कथितं वरवृत्तं श्रुत्वा 'नास्ति शर्वसमो देवः' (११) इत्याद्युवाच..	४६
१६	७६	पूर्वं जप्यमुपदेक्ष्यामीत्यनेन प्रतिज्ञातं शिवसहस्रनामस्तोत्रमाख्यातुमुपोद्घाततया तण्डिनस्तपःकरणं 'पवित्राणां पवित्रस्त्वम्' (१२) इत्यारभ्य 'यत्पुरा लोककृज्जगौ' (६६) इत्यन्तेन तत्कृतं स्तवमभिधाय विशेषेण शिवदत्तवरादिकं चाचष्टोपमन्युः	५०
१७	१८२	उपमन्युः सहस्रनाम्नां वेदसारत्वं ब्रह्मलोकात्प्रथमं तण्डिना प्राप्तत्वात्तंडिकृतत्वादिकं चोदीर्य 'स्थिरः स्थाणुः' (३१) इत्यारभ्य 'श्रीवर्धनो जगत्' (१५३) इत्यन्तेन तान्युपदिश्यैतत्प्रशंसापूर्वकं प्राप्तिपरंपरां चाख्यायैतत्पाठफलमन्वाचष्ट .	७८
१८	८३	'महायोगी ततः प्राह कृष्णद्वैपायनो मुनिः । पठस्व पुत्र भद्रं ते प्रीयतां ते महेश्वरः' (१) इत्यादिनाऽध्यायेन व्यासादीनां शिवमाहात्म्यकथनं कृष्णस्य च तत्कथनपूर्वकं सहस्रनामपाठफलकथनं चाख्यातवान्वैशम्पायनः ..८१-	
१९	१०३	'यदिदं सहधर्मेति प्रोच्यते भरतर्षभ। पाणिग्रहणकाले तु स्त्रीणा-	

अ०	श्लो०	विषय	पृष्ठम्
		मेतत्कथं स्मृतम्' (१) इत्यादिके युधिष्ठिरप्रश्ने भीष्मो दिशाष्टावक्रसंवादरूपमितिहासमभिदधदुत्तरमाह स्म--वदान्यनामकः कश्चिदृषिः स्वकन्यां याचितुमागतायाष्टावक्राय 'उत्तरां दिशं गत्वा तत्र स्थितां वृद्धां स्त्रियं दृष्ट्वा ततो विनिवृत्तो मत्कन्यायाः पाणिं ग्रहीष्यसि' (२४) इत्यभ्यभाषत। वदान्यवाक्यान्निर्गतोऽष्टावक्र उत्तरस्यां हिमालयमारभ्य कैरातस्थानपर्यंतं गत्वा ततोऽधस्ताद्रमणीये वनोद्देशे काञ्चनगृहमपश्यत्। कुत्र मम वासो भवेदिति चिन्तनपूर्वकं काञ्चनगृहद्वार्यागतस्याष्टावक्रस्य 'अतिथिं समनुप्राप्तम्' (६७) इत्यादिकं वाक्यं श्रुत्वा पूर्वोक्तादृगृहान्निर्गताः सप्त कन्या 'गृहं प्रविश' इत्यूचुस्त प्रति। ततोन्तर्गृहगतोऽष्टावक्रः स्ववाक्यान्निर्गतासु कन्यासु निद्रां कुर्वंस्तत्र स्थितामेकाकिनीं वृद्धां प्रति 'रजन्यतिवर्तते त्वमपि स्वपिहि' (७६) इत्युवाच, तच्छ्रुत्वा सापि द्वितीये शयने सुष्वाप। रात्रौ शीतजामार्तिं व्यपदिश्याष्टावक्रशयनमारुह्य तमालिंग्य मां भजस्वेत्याद्युक्तवतीं 'परदारानहं भद्रे' (८८) इत्यादिना प्रत्याख्याय 'वत्स्येऽहं यावदुत्साहः' (९७) इत्यादिना तत्र निवासमंगीकृत्य 'देवतेयं गृहस्यास्य' (१००) इत्यादि चिन्तयंस्तां रात्रिमतिवाहयति स्म	८५
२०	२६	ततः प्रभाते स्त्रिया आनीतेनोदकादिना स्नानादि विधाय रात्रौ शयने सुप्तेऽष्टावक्रे पुनस्तच्छयनमागताया वृद्धायास्तस्य चोक्तिप्रत्युक्तयः	८७
२१	१९	'न बिभेति कथं सा स्त्री शापाच्च	

अ०	श्लो०	विषय	पृष्ठम्
		परमद्युतेः' (१) इत्यादिके युधिष्ठिरप्रश्ने तदुत्तरमाह भीष्मः। 'रूपं विकुरुषे कथम्' (२) इत्यष्टावक्रेण पृष्टा वृद्धा 'जिज्ञासेयं प्रवृत्ता मे' (४) इत्यादिना त्वद्बुद्धिस्थिरीकरणार्थमागता मामुत्तरां दिशं विद्धि स्त्रीणां चापलं त्वया दृष्ट, कन्यापित्रा प्रेषिताहं त्वामुपदिष्टवती, गच्छ इत्यद्युवाच। तच्छ्रुत्वा परावृत्तोऽष्टावक्रो वदान्यकन्यां परिणीय स्वाश्रमे सुखं वसति स्म	८८
२२	४१	'किमाहुर्भरतश्रेष्ठ पात्रं विप्राः सनातनाः। ब्राह्मण लिङ्गिनं चैव ब्राह्मणं वाऽप्यलिंगिनम् (१) इति युधिष्ठिरप्रश्ने भीष्मः 'स्ववृत्तिमभिपन्नाय लिङ्गिने चेतराय च' (२) इत्यादिना ब्राह्मणानां पात्रत्वं तद्विषये पृथ्वीकाश्यपाग्निमार्कण्डेयानां मतं व्याजहार। 'यदि ते ब्राह्मणा लोके' (१६) इत्यादिनाऽध्यायशेषेण युधिष्ठिरभीष्मयोः प्रश्नोत्तराणि	९०
२३	१०३	'श्राद्धकाले च दैवे च पित्र्येऽपि च पितामह। इच्छामीह त्वयाऽऽख्यातं विहितं यत्सुरर्षिभिः' (१) इति युधिष्ठिरप्रश्ने भीष्मो दैवादिकर्मणां कालम्, श्राद्धे योग्यायोग्यब्राह्मणान्, श्राद्धे अदेयं द्रव्यम्, श्राद्धाद्यवसाने ब्राह्मणदेयप्रतिवचने विशेषं, दातृप्रतिग्रहीत्रोर्धर्माधर्मौ च निरूपयति स्म। 'दैवं पित्र्यं वा केषु दत्तं महाफलम्' (४८) इति युधिष्ठिरप्रश्ने भीष्मो दानयोग्यं पात्रं, निरयस्वर्गयोः साधनभूतानि कर्माणि चाचष्ट	९५
२४	१२	'हिंसां विनाऽपि केन कर्मणा ब्रह्महत्या भवति' (१) इति युधिष्ठिरप्रश्ने ब्राह्मणघातिनो जनाख्यरूपयद्भीष्म	९५

अ०	श्लो०	विषयः	पृष्ठम्
२५	७१	'पृथिव्यां यानि तीर्थानि तानि वक्तुमर्हसि' (१) इति युधिष्ठिरप्रश्ने भीष्मो गौतमगिरःसंवादमुखेन तान्यभ्यधात्	९८
२६	१०६	शरशय्याधिष्ठितं भीष्मं द्रष्टुमागतानत्रिवसिष्ठप्रभृतीनभिवाद्य युधिष्ठिरः 'के देशाः के जनपदाः' (२५) इत्यादि पप्रच्छ भीष्मं प्रति। भीष्मः शिलोञ्छवृत्तिसिद्धयोः संवादमुखेन सर्वप्रश्नोत्तराण्यभिधाय तदृष्टान्तेन युधिष्ठिरमुपदिदेश . .	१०२
२७	३०	युधिष्ठिरो भीष्मं प्रशस्य 'ब्राह्मण्य प्राप्नुयाद्येन तन्मे व्याख्यातुमर्हसि' (३) इति पप्रच्छ। भीष्मो ब्राह्मणस्य दुष्प्राप्यत्वमाख्याय बहुषु योनीषु भ्रमतः कस्मिंश्चिज्जन्मनि तत्प्राप्यते इत्येतद्विषये मतगगर्दभीसंवादरूपमितिहासं व्याजहार। गर्दभयुक्ते रथे स्थित्वा गच्छन् मतङ्गो गर्दभं नासिकायां प्रतोदेनातुदत्तदा दुःखव्याकुला गर्दभी 'मा शुचः पुत्र चाण्डालस्त्वधितिष्ठति' (११) इत्याद्युवाच गर्दभं प्रति। मतङ्गः प्रश्नमुखेन स्वजन्मवृत्तान्तं तस्याः श्रुत्वा स्वगृहमागत्य स्वपित्रे तन्निवेद्य तपश्चचार। तपसा तुष्ट इन्द्रो ब्राह्मण्यं वृणवानं तं प्रत्याचख्यौ . . .	१०४
२८	१६	पुनर्ब्राह्मण्यप्रेप्सया कठोरं तपः कुर्वन्तं मतंङ्गं प्रति पुनरिन्द्र आगत्य ब्राह्मण्यं प्राप्ते दौर्लभ्यं प्रत्यपादयत	१०५
२९	२६	पुनस्तपः कुर्वन् मतंगः 'चण्डालयोनौ जातेन नावाप्यं वै कथञ्चन' (४)इतीन्द्रेणोक्तस्तं 'किं मां तुदसि दुःखार्तम्' (१३) इत्याद्युवाच। वरार्थं प्रार्थितेनेन्द्रेण वृणीष्वेत्युक्तो मतंगः 'यथा कामविहारी स्याम्'(२२)इत्यादिकं वरं ययाचे। 'छन्दोदेव इति ख्यातः' (२४)इत्यादिना छंदोदेवनाम्ना प्रासिद्धः स्त्रीणां पूज्यो भविष्यसीति वरं दत्वेन्द्रोऽन्तर्दधे १०६	
३०	६७	'वीतहव्यश्च नृपतिः श्रुतो मे विप्रतां गतः। तदेव तावद्वाङ्क्ष्ये श्रोतुमिच्छाम्यहं विभो' (३) इत्यादियुधिष्ठिरप्रश्ने तत्कथयति स्म भीष्मः। मनुवंशे शर्यातिमारभ्य प्रचलिते तत्र सुदेवस्य तनयो दिवोदासो राज्येऽभिषिक्तो वैतहव्यैः पराजितः पलायमानो भरद्वाजाश्रमं जगाम। तत्र गत्वा दिवोदासेन 'भगवन्वैतहव्यैर्मे युद्धे वशः प्रणाशितः। अहमेकः परिद्यूनो भवन्तं शरण गतः'(२६)इत्युक्तो भरद्वाजः पुत्रेष्टिं चकार। तत्प्रसादाद्दिवोदासादुत्पन्नः प्रतर्दननामा पुत्रो जातमात्रस्त्रयोदशवर्षवयस्को वैतहव्यैः सह युद्धार्थं जगाम। वैतहव्यैः सह युद्धे प्रवृत्ते प्रतर्दनेन पराजितो वीतहव्यो भृगोराश्रम जगाम। तमनुगच्छता प्रतर्दनेन 'विसृज वीतहव्यम्'(५०) इत्युक्तो भृगुः 'नात्र कश्चित्क्षत्रियः' (५३)इत्युवाच। भृगुवाक्यं श्रुत्वा 'मया स्वजातिं त्याजितो वीतहव्यः' (५६)इति सहर्षं वदन् प्रतर्दनो भृगुणानुमोदितो यथागतमगच्छत्। भृगुवचनात्प्राप्तब्राह्मण्याद्वीतहव्याद्गृत्समदमारभ्य शौनकपर्यन्तां ब्राह्मणसृष्टिमभिधायैवमित्यादिनोपसंजहार भीष्मः .	१०८
३१	३६	'के पूज्या वै त्रिलोकेऽस्मिन्' (१) इति युधिष्ठिरेणानुयुक्तो भीष्मो नारदवासुदेवसंवादानुवादमुखेनोत्तरमभ्याचष्ट। ब्राह्मणान्	

अ०	श्लो०	विषय	पृष्ठम्
		संपूज्य बद्धाञ्जलिर्नारदः श्रीकृष्णेन 'भगवन्कान्नमस्यसि' (३) इति पृष्टो नमस्करणयोग्यान् निर्दिश्य तेषां पूजनार्थमुपदिदेश	१०९
३२	३९	'शरणागतं ये रक्षंति'(२)इत्यनेन शरणागतरक्षकस्य किं फलमिति पृच्छति युधिष्ठिरे भीष्मः श्येनकपोतीयाख्यानं विवृण्वन्नुत्तरमुदैरयत् । श्येनभयात्स्वसमीपे शरणागत कपोतं मोचयितुं वृषदर्भे राजनि श्येन प्रार्थयति स तं प्रति 'एतत्तुल्यं तुलया धृत स्वमासं देहि'(२२) इत्युवाच। तथा कर्तुं प्रवृत्तो राजा यदा स्वमांसं तत्पर्याप्तं नाभवत्तदा स्व देहं तुलायामधृत। तेन तुष्टैरिन्द्रादिभिरमृतवर्षणेनोज्जीवितो राजा विमानमारुह्य स्वर्गं जगाम । एतदृष्टान्तेनान्यस्यापि शरणागतरक्षकस्यैवं फलं भविष्यतीत्युक्त्वैतदाख्यानश्रवणपठनफलमपि — व्यादिशद्भीष्मः	१११
३३	५७	'किं राज्ञः सर्वकृत्यानां गरीयः' (१) इति पृच्छत युधिष्ठिरं प्रति भीष्मो ब्राह्मणपूजायाः कृत्यतमं वक्तुं ब्राह्मणानां पूज्यत्व विवृण्वन् प्रशंसामाहस्म...	११२
३४	३१	पुनर्ब्राह्मणानां माहात्म्यं कथयन् भीष्मो 'मातर सर्वभूतानाम्'(२१) इत्यादिनाऽध्यायशेषेण वासुदेवपृथ्वीसंवादरूपामितिहासमाख्यायैतन्निदर्शनेन 'त्वमपि ब्राह्मणान् पूजयेथाः' (३१) इत्युपादिदेश	११३
३५	२३	'जन्मनैव महाभागो ब्राह्मणो नाम जायते । नमस्यः सर्वभूतानामतिथिः प्रस्तुताग्रभुक्' (१)इत्यादिनाऽध्यायेन ब्राह्मणानेव प्रशशंस भीष्मः	११४
३६	१९	पुनर्ब्राह्मणप्रशंसामेव कुर्वन्नसुराणामपि श्रीर्ब्राह्मणप्रसादलभ्येत्य-	
अ०	श्लो०	विषयः	पृष्ठम्
		भिप्रायेण शक्रशंबरसंवादरूपमितिहासं व्याजहार भीष्मः	११५
३७	२८	'अपूर्वश्च भवेत्पात्रम्' (१) इत्यादिना पात्रविशेषं पृच्छति युधिष्ठिरे भीष्मः 'क्रिया भवति केषांचित्' इत्यादिना अपूर्वादीनां सर्वेषां पात्रत्वमाख्यातवान्।'अपीडया च भूतानां इत्यादिना' दीयमानद्रव्याभिमानिनी देवता न दुःखं कुर्यात्तादृशं पात्रं किमिति पृच्छन्तं युधिष्ठिरं प्रति भीष्मः 'ऋत्विक्पुरोहिताचार्याः'(६)इत्यनेन मुख्यं तथाविधं पात्रमभिधाय 'अतोऽन्यथावर्तमानाः' (७) इत्यादिनाऽपात्रतावीजं च विवृत्य एवं नरो वर्तमानः' इत्यादिनोपसंजहार	१२६
३८	३०	'स्त्रीणां स्वभाव श्रोतुमिच्छामि' (१) इति युधिष्ठिरप्रश्ने तदुत्तरं वदन् भीष्मो नारदपञ्चचूडासंवादमुदीरयति स्म। स्त्रीस्वभावं परिज्ञातु नारदेन पृष्टा पञ्चचूडा स्त्रीणां स्वभावमकथयत् .	११८
३९	१४	'इमे वै मानवा लोके'(१) इत्यादिना स्त्रीनिंदापूर्वकं 'कस्ताः शक्तो रक्षितु स्यात्' (१३) इति युधिष्ठिरः पप्रच्छ	११८
४०	६०	पूर्वाध्यायगतप्रश्नोत्तरं वदन् भीष्मः स्त्रीणां स्वभावादिकं विवृत्य 'प्रमदाश्च यथा सृष्टाः' (३) इत्यादिना तासां सर्जनादिविधानं सकारणमभिधाय तद्रक्षणस्याशक्यत्वं निरूप्य 'यथा रक्षा कृता पूर्वम्'(१६)इत्यादिना विपुलकृतगुरुस्त्रीरक्षणाख्यानमाचख्यौ। देवशर्मा कश्चिदृषिर्यज्ञार्थमन्यत्र गच्छन् स्वभार्यां रुचिनाम्नीमिन्द्राद्रक्षितुं स्वाशिष्यं विपुलमादिश्येन्द्रस्य वञ्चकत्वत्वस्फुटीकरणार्थं तस्यानेकवि-	

अ०	श्लो०	विषय	पृष्ठम्
		धानि रूपाणि दधाचख्यौ। गुरुवाक्यं श्रुत्वा रुचिरक्षणोपायं चिन्तयन् विपुलो योगधारणया तस्याः शरीरमलक्षितः प्रविश्य सर्वाण्यङ्गान्यरुणत्. . . .	१२०
४१	३६	देवशर्मण आश्रममागत इन्द्रो विपुलयोगबलेन रुद्धाया रुच्या उत्थानाद्यसामर्थ्यं दृष्ट्वा दिव्यचक्षुषा तच्छरीरे विपुलमालोच्य शापभीतः 'अजितेन्द्रिय दुर्बुद्धे' (२०) इत्यादिकं विपुलवाक्यं श्रुत्वाऽन्तर्दधे। इन्द्रे गते मुहूर्तानन्तर यज्ञं निर्वर्त्याश्रममागताय देवशर्मणे शरीरप्रवेशवर्ज्यं सर्वमिन्द्रवृत्तं निवेद्य भार्यामनिन्दितां न्यवेदयद्विपुलः। तेन तुष्टेन गुरुणा वरदानपूर्वकमनुज्ञातोऽनुत्तमं तपश्चचार	१२१
४२	३३	अथ कदाचिद्रुचिभगिन्या चित्ररथपत्न्या प्रभावत्या विवाहोत्सवार्थमाहूता रुचिर्गच्छन्ती मध्यमार्गे कस्याश्चिद्विहायसा गच्छन्त्या अप्सरसः शरीरात्पतितानि दिव्यपुष्पाणि धृत्वा तद्गृहमगमत्। तया धृतानि पुष्पाणि दृष्टवत्या भगिन्या प्रेरिता सा भर्तारं व्यजिज्ञपत्। तद्वाक्याद्देवशर्मा पुष्पाण्यानेतुं स्वशिष्यं विपुलमाददेश। गुरुणा प्रेरितो विपुलः पुष्पपतनदेशं गत्वा स्वतपःप्रभावात्पुष्पाण्यादाय परावृत्तः पथि विवदमानस्य मिथुनस्य 'यद्यावयोर्मध्ये योऽनृतं ब्रूयात्स विपुलप्राप्यां गतिं गच्छेत्' (२१) इति शपथं श्रुत्वाग्रे गच्छन्नक्षैर्दीव्यमानानां षण्णां पुरुषाणां तथैव शपथं श्रुत्वाऽनुतप्तश्चंपानगरीमेत्य गुरवे पुष्पाणि ददाति स्म	१२३
४३	२७	मार्गे त्वया किं दृष्टमिति गुरुणा पृष्टो विपुलो 'ब्रह्मर्षे मिथुन किं	
		तत्के च ते पुरुषा विभो' (३) इत्याद्युवाच। शिष्योक्तिं श्रुत्वा देवशर्मा 'यद्वैतन्मिथुन ते राज्यहनी, ये च ते पुरुषास्ते षट् ऋतवः; एते पुरुषस्य रहस्यकृतं जानन्ति' (७) इत्याद्याख्याय भार्यया शिष्येण च सह स्वर्गमास्थाय मुमोद। भीष्म इदमाख्यानं मार्कण्डेयेन मा प्रति कथितमित्युक्त्वा स्त्रीणां रक्षणस्यावश्यकर्तव्यत्वमुपदिश्य पुनः स्त्रीरक्षणस्याशक्यत्वमभिदधाति स्म. .	१२४
४४	५६	'यन्मूलं सर्वधर्माणाम्' (१) इत्यादिके युधिष्ठिरप्रश्ने भीष्मः शीलवृत्तादिसम्पन्नाय कन्या देयेति प्रतिपाद्य ब्राह्मादीन् विवाहभेदान् ब्राह्मणादिवर्णान् विवाहसंख्यादिकं चाचष्ट। 'शुल्कमन्येन दत्त स्यात्' (१९) इत्यादिके युधिष्ठिरप्रश्ने 'यत्किञ्चित्कर्म मानुष्यम्' (२१) इत्यादिनोत्तरं व्याजहार भीष्मः। कन्यायां प्राप्तशुल्कायाम्' (२८) इत्यादि पृच्छन्तं युधिष्ठिरं प्रति 'नैव निष्ठाकरं शुल्कम्' (३१) इत्यादिना विवाहनिष्ठां प्रतिपाद्य 'अह विचित्रवीर्यस्य (३८) इत्यादिना वीर्यस्यापि शुल्कत्वं निरूप्य बाह्लीकेनोक्त सत्यवज्जनसवादं कथयति स्म भीष्मः . ..	१२७
४५	२३	'कन्यायाः शुल्कं दत्वा तत्पतिर्नागतश्चेत्तदा तस्याः का गतिः?' (१) इति युधिष्ठिरप्रश्ने 'याऽपुत्रकस्य ऋद्धस्य' (२) इत्यादिना तदुत्तरमभ्यभाषत भीष्मः। 'अथ केन प्रमाणेन' (१०) इत्यादिना कन्यायाः पितृधनहारित्वविषयके युधिष्ठिरप्रश्ने 'यथैवात्मा तथा पुत्रः' (११) इत्यादिना तदुत्तर कथयन्भीष्मः कन्यायाः पुत्रतुल्यत्वेन त-	

अ०	श्लो०	विषय	पृष्ठम्
		स्यास्तत्पुत्रस्य दौहित्रस्य च धनहारित्वं प्रतिपाद्य विक्रयपूर्वकमासुरेण विधिना परिणीतायां कन्यायां तत्पुत्रो धनहारी नेत्युक्त्वाऽऽसुरविवाहनिन्दाविषये यमगीतां गाथामाह स्म	१२९
४६	२५	'प्राचेतसस्य वचनम्'(१)इत्यादिना कन्याज्ञातयो धनं स्वय न गृह्णन्ति किन्तु कन्यालङ्काराद्यर्थं विनियुञ्जते स न विक्रय इति प्रतिपाद्य 'पितृभिर्भ्रातृभिश्चैव' (२) इत्यादिना स्त्रियं प्रशशस भीष्मः	१३०
४७	६१	'यथा नरेण कर्तव्यम्' (३) इत्यादिना ब्राह्मणस्य वर्णचतुष्टयसम्बन्धिनीषु चतसृषु भार्यासूत्पन्नानां पुत्राणां कथ दायभागत्वमिति पृच्छति युधिष्ठिरे भीष्मस्तत्प्रकारं कथयित्वा तत्र शूद्रापुत्रस्य दशमभागहारित्वमाख्याय स्त्रीणां भर्तृदाय उपभोगफल इत्याद्याह स्म । 'शूद्रायां जातस्य कथ दशमो भागः' (२७) इति युधिष्ठिरेण पृष्टो भीष्मो 'दारा इत्युच्यते लोके नाम्नैकेन परन्तप। प्रोक्तेन चैव नाम्नाऽयं विशेषः सुमहान् भवेत्' (३०) इत्यादिना शूद्या अपि दारत्वाविशेषात्तत्पुत्रस्य दशमभागहारित्वमिति फलतोऽभिधाय युधिष्ठिरप्रश्नानुरोधेन क्षत्रियादीनामपि विभागनियमं व्याजहार	१३२
४८	५०	'अर्थालोभाद्वा कामाद्वा' (१) इत्यादिना वर्णसंकरकारणकथनपूर्वकं संकरजातानां धर्म-कर्मविषयेऽनुयुञ्जाने युधिष्ठिरे भीष्मो 'भार्याश्च तस्रः' (४) इत्यादिना पारशवादि नामकथनपूर्वकं संकरजातीयानाख्याय तद्धर्माणामनियतत्वं प्रदर्श्य 'आनृशंस्यमनुक्रोशः' (३४) इत्यादिना तेषां साधारणधर्मानाभाष्य स्त्रीषु प्रसङ्गवर्जनमुपदिशति स्म । 'सङ्करयोनिजो नरः कथं ज्ञेयः' (३९) इति युधिष्ठिरप्रश्ने भीष्मः कर्मानुरोधेन योनिशुक्ल्यादिकं जानीयादित्याचष्ट	१३५
४९	२८	'ब्रूहि तात कुरुश्रेष्ठ वर्णानां त्वं पृथक् पृथक्। कीदृश्याः कीदृशाश्चापि पुत्राः कस्य च के च ते' (१) इति युधिष्ठिरप्रश्ने भीष्म 'आत्मा पुत्रश्च विज्ञेयः' (३)इत्यादिना विंशतिप्रकारान् पुत्रान् प्रदर्श्य पुनः प्रश्नोत्तरभावेन तेषां स्वरूपादिकं वर्णयति स्म .	१३७
५०	९७	'दर्शने कीदृशः स्नेहः' (१) इत्यादिना परपीडादर्शने परैः सह संवासे च कीदृशः स्नेह आनृशंस्यं च कर्तव्य तत् गवा माहात्म्यं चेति युधिष्ठिरेण कृते प्रश्नद्वये तत्रेणोभयोरुत्तरं वदन्नहुषच्यवनसंवादरूपमितिहासं व्याहरद्भीष्मः । द्वादशवर्षपर्यन्तं जले निरुध्य तपः कुर्वंश्च्यवनः कदाचिन्निषादैर्जाल प्रसार्य मत्स्यैः सहाकृष्टो व्याकुलान्मत्स्यानालोक्य कृपाविष्टो बभूव । च्यवनं दृष्ट्वा प्रसादं प्रार्थयन्तो निषादाः 'प्राणोत्सर्ग विसर्ग वा मत्स्यैर्यास्याम्यहं सह' (२५) इत्यादिक तद्वाक्यं श्रुत्वा नहुषाय राज्ञे न्यवेदयन्	१३८
५१	४८		निषादवाक्यं श्रुत्वा च्यवनसमीपमागत्य 'करवाणि प्रियं किं ते' (४)इत्याद्यभिदधानो नहुषो 'मूल्यं दत्वा निषादेभ्यो मां मोचय' (५) इति तेनोक्तो मूल्यत्वेन स्वराज्यं सर्वं कल्पयति स्म। 'समग्रमपि ते राज्यं न मम मूल्यमतोऽपि भूयः प्रकल्पय' (१३) इत्युक्तवति च्यवने तद्वाक्यं श्रुत्वा चि-

अ०	श्लो०	विषय	पृष्ठम्
		न्तयति नहुषे तं प्रति गवि जातो वनचरो मुनिरागत्य गां मूल्यत्वेन कल्पयेत्यब्रवीत्। गवि जातस्य मुनेरुपदेशाद्गृष्टेन नहुषेणागत्य 'उत्तिष्ठोत्तिष्ठ विप्रर्षे गवा क्रीतोऽसि भार्गव' (२५) इत्युक्तश्च्यवनस्तदङ्गीकृत्य गोमाहात्म्यं वर्णयामास। च्यवनप्रसादान्मत्स्यैः सह निषादेषु स्वर्गं गतेषु-विस्मितो नहुषश्च्यवनगविजाताभ्यां वरं लब्ध्वा स्वकीयं पुर जगाम	१४०
५२	३९	'सशयो मे महाप्राज्ञ' (१) इत्यादिना परशुरामविश्वामित्रयोरुत्पत्तिविषये पृष्टो भीष्मश्च्यवनकुशिकसंवादरूपमितिहासं कथयितुमारेभे। च्यवनः स्ववंशे क्षत्रधार्मिणो रामस्य जननं कुशिकवंशे ब्राह्मणस्य विश्वामित्रस्य जननं च पूर्वमेवागत्य कुशिकवंशं दग्धुकामः कुशिकमागत्य त्वद्गृहे वस्तुमिच्छामीत्यवादीत्। तच्छ्रुत्वा कुशिकेन मधुपर्कसमर्पणादिना सत्कृत्य प्रार्थितश्च्यवनः 'अहं कंचिन्नियममारप्स्ये' (२१) इत्याद्युवाच। दंपतीभ्यां तदङ्गीकृत्य निवेदिते गृहोद्देश प्रवेशितश्च्यवनो रात्रौ स्वाभिलषितमन्नं भुक्त्वा स्वप्स्याम्यहं युवाभ्यां पादसंवाहनं कार्यं न चाह बोधयितव्यः' (३१) इत्युक्त्वा सुष्वाप, तौ च यथाज्ञप्तमकुरुताम्। एवमेकविंशतिदिनान्येकपार्श्वे सुप्तो निराहाराभ्यां दम्पतीभ्यां सेव्यमानोऽकस्मादुत्थाय गृहान्निष्क्रम्य ताभ्यामनुगतो गच्छन्नकस्मादन्तर्हितो बभूव ...	१४१
५३	६८	च्यवनेऽन्तर्हिते राजा किमकरोदिति युधिष्ठिरप्रश्ने भीष्मस्तदुत्तरमाह—अन्तर्हिते च्यवने त	
अ०	श्लो०	विषय	पृष्ठम्
		गवेषयन्तौ दम्पती श्रान्तौ यदा स्वगृहमागत्य पश्यतस्तदा शयनस्थ त दृष्ट्वा पूर्ववदेव तत्पादसंवाहनं चक्रतुः। पुनः प्रतिबुद्धश्च्यवनः स्वाज्ञया राजानीतामभ्यङ्गसामग्रीमनादृत्यान्तर्धाय पुनः स्नातं सिंहासनारूढमात्मानं दर्शयन् राज्ञा प्रार्थनापूर्वकं समानीतान्नानाविधान्भोज्यपदार्थान् शयनासनादिभिः सह दाहयामास। एवमप्यविकृतौ तौ दंपती दृष्ट्वा भार्यया सह त्व मां साग्रामिक_ रथेन वह' (२७) इत्याज्ञप्तेन राज्ञा सज्जीकृते रथे आरुह्य तौ दंपती धुर्यस्थाने संयोज्य गच्छन् कशाप्रहारादिक सहन्तावपि निर्विकारौ तावालोच्य राज्ञोऽनेकविधं वसु विततार। एवमप्यविकृतौ तावालोक्य प्रसन्नश्च्यवनो 'रमणीये गंगातीरेऽद्य वसामि त्वं गृहं गच्छ श्वो मामत्रैव द्रक्ष्यसि'(५७) इत्युक्तो राजा भार्यया सह गृहं गत्वा सुख सुष्वाप	१४३
५४	४०	प्रातरुत्थितो राजा भार्यया सह पूर्वसङ्केतिते वने यावदागच्छति तावत्तस्मिन्वने दिव्य प्रासादं पर्वतसरिद्वृक्षप्रभृतीन् दिव्यभावसमन्वितान् दृष्ट्वा भार्यायै तत्रत्यमाश्चर्य कथयति स्म। अनेकेषु स्थलेषु दृश्यमान पुनर्वनादिना सहान्तर्हितमालोच्य विस्मितं राजानमाहूय वरं याचस्वेत्युवाच च्यवनः। कुशिकस्तु 'अग्निमध्य इव त्वत्सन्निधौ वसन्नदग्धो यच्च मे कुलं तत्त्वया त्रातमयमेव मे वरः' (३७) इत्यभिधाय यदि प्रसन्नस्त्वं तर्हि मे कश्चित्संशयोऽस्ति तं व्याख्यातुमर्हसीत्युवाच .	१४५
५५	३७	' 'वरश्च गृह्यतां मत्तः' (१) इत्यादि च्यवनवाक्यं श्रुत्वा 'यदि	

अ०	श्लो०	विषय	पृष्ठम्
		प्रीतोऽसि भगवन्' (२) इत्यादिना स्वगृहवासादिविषये कारणं पृच्छति कुशिके च्यवनः 'शृणु सर्वमशेषेण' (१०) इत्यादिना तत्कथयित्वा 'एवमेतद्यथाऽऽत्थ त्वम्' (३०)इत्यादिना त्वत्तस्तृतीयो ब्राह्मणो भविष्यतीत्याह। मे कुलं विप्रत्वं कथमेष्यतीति पप्रच्छ कुशिकश्च्यवनम्	१४६
५६	२१	'अवश्यं कथनीयं मे' इत्यादिना च्यवनस्तत्कथयति सर्वम्	१४७
५७	४४	'मुह्यामीव निशम्याद्य' (१) इत्यादिना अनुतापपूर्वकं 'शरीरं योक्तुमिच्छामि'(५) इत्यादि युधिष्ठिरवाक्यं श्रुत्वा भीष्मो 'रहस्यमद्भुतं चैव' (७) इत्यादिना मरणानन्तरं यत्फलं येन साधनेन प्राप्यते तत्कथयामीति प्रतिजज्ञे। 'तपसा प्राप्यते स्वर्गः' (८) इत्यादिना तपःफलं 'पानीयस्य प्रदानेन' (२०) इत्यादिना पानीयदानादिफलं 'सुवर्णशृङ्गैस्तु' (२७) इत्यादिना गवादिदानफलं चाभ्यधाद्भीष्मः	१४९
५८	३३	'आरामाणां तडागानाम्' (१) इत्यादिना आरामतडागादिकरणे फल पृच्छति युधिष्ठिरे भीष्मस्तडागकरणफलमभिधाय 'अत ऊर्ध्वं प्रवक्ष्यामि' (२२) इत्यादिना षड्विधवृक्षजातीनां रोपणे फलं चोक्त्वा तडागारामयज्ञानां करणस्य स्वर्गावाप्तिरूप फलमुपदिदेश	१५०
५९	४१	'यानीमानि बहिर्वेद्याम्' (१) इत्यादिना दानानां मध्ये श्रेष्ठतमं दान किमिति युधिष्ठिरानुयुक्तो भीष्मः 'अभय सर्वभूतेभ्यः'(३) इत्यादिना श्रेष्ठानि दानान्यभिधाय दानपात्रत्वेन ब्राह्मणानां श्रैष्ठ्यं वर्णत्रयपूज्यत्वं चाभ्यभाषत	१५२
६०	२०	आचरणादिना तुल्ययोर्याचमानायाचमानयोर्मध्ये कस्मै दानं श्रेष्ठमिति युधिष्ठिरेणानुयुक्तो भीष्मोऽयाचमानाय यद्दानं तच्छ्रेष्ठमित्याचख्यौ	१५३
६१	३८	'दानयज्ञयोर्मध्ये परलोके महाफल किम्' (१) इत्यादिके युधिष्ठिरप्रश्ने भीष्मो दानश्रैष्ठ्यकथनपूर्वक 'समृद्धः संप्रयच्छ त्वम्' (१२) इत्यादिना देयानि दानान्याख्याय राज्ञोऽवश्यकर्तव्यं चोपदिश्यारक्षतो राज्ञः पापचतुर्थांशभागित्वं जगाद	१५४
६२	९६	'इदं देयमिदं देयम्' (१) इत्यादिना बहुदेयानां राज्ञां किंस्विच्छ्रेष्ठं दानमिति युधिष्ठिरेणापृष्टो भीष्मो भूमिदानस्य श्रेष्ठत्वमभिदधत्तद्विषये भूमिगीता गाथाः शक्रबृहस्पतिसंवादरूपमितिहासं भूमिदानफलादिकं चाचष्ट	१५७
६३	५२	'कानि दानानि लोकेऽस्मिन्' इत्यादिके युधिष्ठिरप्रश्ने भीष्मो नारदोपदिष्टमन्नदानस्य श्रेष्ठत्वमुपदिश्य त्वमप्येतत्कुर्वित्यभिधायान्नदानप्राप्यान् लोकान् कथयति स्म	१५९
६४	३	'नक्षत्रयोगस्येदानी दानकल्पं ब्रवीहि मे' (१) इति पृच्छन्तं युधिष्ठिरं प्रति भीष्मो देवकीनारदसंवादेतिहासकथनमुखेन तमुपादिक्षत	१६०
६५	१९	सुवर्णादिदानफलानि	१६०
६६	६५	उपानद्दानविषये युधिष्ठिरप्रश्ने तत्फलमभिधाय पुनर्युधिष्ठिरप्रश्नानुरोधेन तिलोत्पत्तिकथनपूर्वक तिलदानफलं ब्रह्मदत्तभूमिभागे देवानां यज्ञकथनपूर्वकं भूमिदानफलं गोदानफलमन्नदानफल चाभ्यधाद्भीष्मः	१६३
६७	१९	विस्तरेणान्नादिदानफलं श्रोतु	

अ०	श्लो०	विषय	पृष्ठम्
		युधिष्ठिरेण पृष्टो भीष्मस्तदब्रवीत्	१६४
६८	३४	तिलादीनां दानफलश्रवणार्थं पुनर्युधिष्ठिरेणानुयुक्तो भीष्मस्तद्विषये यमब्राह्मणसंवादरूपमितिहासमाचख्यौ। मध्यदेशे गङ्गायमुनयोर्मध्ये पर्णशालाख्यग्रामे निवसन्तं शर्मिनामानं ब्राह्मणमानय, तन्निकटवासिनं तत्सदृशं तन्नामानं नानय' (७) इति यमाज्ञां गृहीत्वा निर्गतेन दूतेनाज्ञाविपरीतमानीतं ब्राह्मणं संपूज्य तत्प्रश्नानुरोधेन तिलदानादिमाहात्म्यमुपदिश्य तं विसर्जयति स्म यमः। पुनरानीतमभीष्टं शर्मिणं प्रतिपूज्य तथैवोपदिश्य विसर्जयित्वा दीपादिदान प्रशशास यमः .	१६५
६९	२२	'भूय एव कुरुश्रेष्ठ दानानां विधिमुत्तमम् । कथयस्व महाप्राज्ञ भूमिदानं विशेषतः' (१) इत्यादिके युधिष्ठिरप्रश्ने गोभूमिसरस्वतीनादाने तुल्यफलत्वमभिधाय गोदानं प्रशशंस। 'देयाः किंलक्षणा गावः' (१४) इत्यादिना किंलक्षणा देयाः कीदृशा न देया इत्यनुयुञ्जाने युधिष्ठिरे 'असदृत्ताय पापाय लुब्धायानृतवादिने। हव्यकव्यव्यपेताय न देया गौः कथञ्चन' (१५) इत्यादिनान्त्ययोरुत्तरमभिधाय ब्राह्मणस्वापहारे दोषमाह स्म	१६६
७०	३३	ब्राह्मणस्वापहारविषये नृगोपाख्यानमाख्यायान्ते यादवान्प्रति 'ब्राह्मणस्वं न हर्तव्यम्' (३१) इत्यादिकं श्रीकृष्णेन कृतमुपदेशं कथयति स्म भीष्मः...	१६८
७१	५७	विस्तरेण गोदानफल श्रोतुं युधिष्ठिरेण पृष्टो भीष्म उद्दालकनाचिकेतसंवादरूपमितिहासं व्याजहार। कदाचिदुद्दालको नियमं समाप्य 'नदीतीरे विस्मृतं मदीयमिध्मादिकमानय' (५) इत्याज्ञापयत्स्वपुत्र नाचिकेतम् । स च नद्या प्लावितं तदनुपलभ्यागत्य 'तत्र तन्न पश्यामि' (६) इत्युवाच पितरम्। ततः स क्रुद्धेन पित्रा यमं पश्येत्याज्ञप्तो तं जगाम। ततः पिताऽनुतप्तः सन् यावदभ्यूष्यमुञ्चत्तावद्यमेन सत्कारपूर्वकं विसर्जितो नाचिकेत आजगाम। ततः पित्रा पृष्टस्तत्रत्य यमसवादादिकं तत्र यमेनोक्तं गोदानमाहात्म्य गवामभावे घृतधेन्वादिदानादिकं च व्याजहार नाचिकेतः	१७०
७२	१२	'उक्तं ते गोप्रदान वै' (१) इत्यादिनोक्तानुवादपूर्वकं गोप्रदातॄणां प्राप्यान् लोकान् ज्ञातु युधिष्ठिरेण पृष्टो भीष्मः शक्रब्रह्मसंवादरूपमितिहासमाख्यत्। 'स्वर्लोकवासिनां लक्ष्मीम्' (६) इत्यादिना 'कीदृशा गवां लोकाः (७) इत्यादीन् प्रश्नांश्चकारेन्द्रः.	१७१
७३	५०	एतत्प्रश्नाभिनन्दनपूर्वकमुत्तरं ददद्ब्रह्मा गोलोकं तत्र वसता सुखं च निरूप्य तत्र गमनागमनाधिकारिणो गोप्रदानफलं, गोदानपात्रमनडुद्दान तत्फलं चाख्यातवान्	१७३
७४	१५	'जानन् यो गामपहरेत्' (१) इति शक्रप्रश्ने ब्रह्मा गवामपहारादौ दोषमभिधाय गोदाने दक्षिणात्वेन सुवर्णं देयमित्यब्रवीत्। भीष्म एतदाख्यानप्राप्तिपरम्परामाख्यायैतत्पठनफलं कथयति स्म युधिष्ठिरं प्रति..	१७४
७५	४१	'व्रतानां किं फलं प्रोक्तम्' (२) इत्यादिना युधिष्ठिरेण कृतानां	

अ०	श्लो०	विषय	पृष्ठम्
		प्रश्नानां भीष्मेण दत्तान्युत्तराणि	१७५
७६	३१	गोदानविधिश्रवणार्थं युधिष्ठिरेणानुयुक्तो भीष्मो गोदानं प्रशस्य तद्विधिमाख्याय गोदातुः फलं तद्विषये निदर्शनार्थमुशीनरादीनां गोदानेन स्वर्गप्राप्तिं चाभ्याचष्ट ...	१७८
७७	३५	'गोप्रदानगुणान् सम्यक् पुनर्मे ब्रूहि भारत' (१) इति युधिष्ठिरेणानुयुक्तो भीष्मो 'वत्सलां गुणसम्पन्नाम्' (४) इत्यादिनोत्तरं वदन् कपिलादानस्य श्रैष्ठ्यमाह। कपिलादानस्य विशेषफलश्रवणार्थं युधिष्ठिरानुयोगे भीष्मस्तत्कथयन्कपिलाया गोरुत्पत्त्यादिविषये वृद्धकथितमितिहासमाह। अमृतं पिबता प्रजापतिना निर्मितया सुरभ्या सौरभेयीषु निर्मितासु तद्वत्समुखनिर्गते फेने महादेवस्य शिरसि पतिते क्रुद्धं तं ध्वजवाहनयोर्वृषप्रदानेन पशुपतिं चक्रे प्रजापतिः। 'एवमव्यग्रवर्णानाम्' (३०) इत्यादिना कपिलादानमाहात्म्यमाख्यायोत्पत्त्याख्यानपठने फलं व्याजहार भीष्मः	१७९
७८	२५	एतद्विषय एव भीष्मो वसिष्ठसौदाससंवादरूपमितिहासमाचष्ट। 'त्रैलोक्ये परमं पवित्रं किम्' (३) इति सौदासेन पृष्टो वसिष्ठो गवां परमपवित्रत्वं व्याहृत्य तद्दानफलमभिदधाति स्म	१८०
७९	२७	श्रेष्ठत्वप्राप्त्यर्थं गवां तपश्चरणं ताभ्यः प्रजापतेर्वरदानं चाख्याय कपिलादिगोदानफलं कथयति स्म वसिष्ठः ...	१८१
८०	१७	'घृतक्षीरप्रदा गावः' (१) इत्यादिना पुनर्वसिष्ठेन कथितं गोदानमाहात्म्यं श्रुत्वा सौदासो ब्राह्मणेभ्यो बहु धनं दत्वा लोकानवापेत्याह भीष्मः	१८२
८१	४७	'पवित्राणां पवित्रं यत्' (१) इत्यादिके युधिष्ठिरप्रश्ने भीष्मो गवां परमपवित्रत्वं प्रतिपाद्य तद्विषये व्यासशुकसंवादरूपमितिहासं व्याजहार	१८४
८२	२७	गवा पुरीषस्य पावित्र्यमुद्दिश्य युधिष्ठिरेणापृष्टो भीष्मो गोभिः श्रियाः संवादरूपमितिहासमभ्यधात्। गोभिः 'काऽसि देवि कुतो वा त्वम्' (४) इति पृष्टा श्रीः स्ववृत्तान्तमाख्याय स्वनिवासार्थं स्थानमयाचत। गवां श्रियाश्चोक्तिप्रत्युक्त्यनन्तरमस्मच्छकृन्मूत्रयोर्निवस (२४) इति गोभिरुक्ता श्रीः सहर्षं तदङ्गीचकार	१८५
८३	५२	भीष्मः पुनर्गोदानं प्रशस्य गवां परमपवित्रत्वविषये पितामहशक्रसंवादरूपमितिहासमाचष्ट। 'गवां लोको देवानामुपरिष्टात्कृतः' (१३) इति शक्रेण पृष्टो ब्रह्मा दक्षदुहितुः सुरभ्यास्तत्पश्चरणं वरप्रदानादिकं चाचख्यौ तच्छ्रुत्वेन्द्रोऽपि गाः संमानयति स्म	१८७
८४	८२	'उक्तं पितामहेनेदम्' (१) इत्यादिना पूर्वोक्तानुवादपूर्वकं सुवर्णस्योत्पत्त्यादिविषयके युधिष्ठिरानुयोगे भीष्मः सुवर्णोत्पत्तिकथनं प्रतिज्ञाय स्वस्य शांतनौ मृते तत्पिण्डदानार्थं गंगाद्वारगमनं पिण्डग्रहणार्थं भुवं भित्त्वा पित्रा निष्कासितो हस्तं शास्त्रविचारेणानादृत्य कृतं दर्भेषु पिण्डदानं तेन तुष्टानां पितॄणां स्वप्ने दर्शनं तत्कथितं पितृद्धारफलकं स्वर्णदानं च कथयित्वा तदुपदेशेनाहं तथाऽकरवमित्युक्त्वैतद्विषये एव जामदग्न्यर्षिसंवादेतिहासमाह ।	

अ०	श्लो०	विषय	पृष्ठम्
		जामदग्न्य एकविंशतिवारं निःक्षत्रियां पृथ्वीं विधाय पावनार्थं हयमेधेनेष्ट्वाऽप्यात्मनोऽपावित्र्यं मन्वानो मुनीनापृच्छ्य तदनुज्ञया वसिष्ठादीन् प्रति स्वपावित्र्यसाधन पप्रच्छ। वसिष्ठादयः प्रशंसापूर्वकं सर्वदानेभ्यः श्रेष्ठ सुवर्णदान पावित्र्यहेतुत्वेनाभिधाय सुवर्णमाहात्म्यविषये इतिहासं कथयन्तो हिमालये शिवपार्वत्योर्विवाहे निर्वृत्ते तत उभयोः समागमे उत्पद्यमानादपत्यात्पराभवमाशङ्कमानैर्देवैः प्रार्थिते रुद्रे ऊर्ध्वरेतसि संपन्ने प्रजोत्पादननिरोधेन कुपितायाः पार्वत्या अग्निरहितान् देवान् प्रति प्रजोच्छेदरूपं शापं चाभ्यदधुः। रुद्रेण धृतं रेतः किञ्चिद्भुवि स्कन्नमग्नौ पतितं सद्भवृधे। एतस्मिन्काले तारकासुरतापिता देवा ब्रह्माणं शरणं जग्मुः ...	१८९
८५	१६८	तारकासुरवृत्तान्तं श्रुतवता ब्रह्मणा 'हुताशनो न तत्रासीत्' (८) इत्यादिना पार्वतीशापकालेऽग्निस्तत्र नासीदिति 'सोऽपत्यमुत्पाद्य युष्माकं कार्यं करिष्यति' (१२) इति कथितं श्रुत्वाऽग्निशोधार्थं देवा निर्जग्मुः। अग्निमन्विष्यन्तो देवा जलेऽश्वत्थे शमीगर्भे चाग्निस्थितिं क्रमेणाख्यातवतोऽग्निशप्तान् मण्डूकाद्विरदशुकान्वरदानेनानुगृह्य शमीगर्भेऽग्निं ददृशुः। 'ब्रूत यद्भवतां कार्यम्' (५०) इत्याद्यग्निवाक्यं श्रुत्वा दैत्यवधसमर्थापत्योत्पादनार्थं देवैः प्रार्थितेनाग्निना गङ्गया मिश्रीभूय निहित गर्भं सोढुमसमर्था सा मेरुपर्वते तमुत्सृज्याग्निप्रज्ञानुरोधेन 'जातरूपः स गर्भो वै' (७२) इत्यादिना तद्वृत्तान्तमाख्यायान्तरधात्। अग्निरपि देवकार्यं विधायेष्टं देशं जगाम। स एव गर्भः शरवण प्राप्य वृद्धः सन् स्कन्नत्वात्स्कन्द इति कृत्तिकाभिः पोषितत्वात्कार्तिकेय इति गुहावासाद्गुहावास इति नामान्यवापेत्यभिधाय 'एव सुवर्णमुत्पन्नम्' (८३) इत्यादिना सुवर्णोत्पत्तिमुपसजहार वसिष्ठः। 'अपि चेद पुरा राम श्रुत मे ब्रह्मदर्शनम्' (८७) इत्यादिना वारुणीं तनुं बिभ्रतो युधिष्ठिरस्य यज्ञवृत्तान्तं तत्र प्रकारान्तरेणाग्नेः सकाशात्सुवर्णोत्पत्तिं चाभिधाय सुवर्णदान प्रशस्य कार्तिकेयस्य सेनापतित्वेन तत्कृत तारकासुरवधवृत्तान्तं वरणं चाचष्ट वसिष्ठः। एवं वसिष्ठेनोपदिष्टं सुवर्णदानं विधाय जामदग्न्यो निष्किल्बिषोऽभवदित्याह भीष्मः	१८५
८६	३५	तारकासुरवधप्रकार श्रोतुं युधिष्ठिरेणापृष्टो भीष्मस्तं कथयति स्म .	१९६
८७	१९	श्राद्धविधिशुश्रूषया युधिष्ठिरेण प्रश्ने कृते भीष्मः श्राद्धविधिं प्रशस्य प्रतिपदादितिथिषु श्राद्धकरणे फलानि कथयति स्म	१९७
८८	१५	'किं स्विदत्तं पितृभ्यो वै' (१) इत्यादिके युधिष्ठिरप्रश्ने भीष्मो द्रव्यविशेषेण पितॄणां तृप्तिविशेषमाख्याय 'अपि नः स्वकुले' (१२) इत्यादिकाः पितृगीता गाथाः कथयति स्म	१९८
८९	१५	भीष्मो यमेन शशबिन्दवे कथितानि कृत्तिकादिभरण्यन्तेषु कर्तव्यानि काम्यानि श्राद्धानि व्याजहार ...	१९८
९०	५४	'कीदृशेभ्यः प्रदातव्यम्' (१) इत्यादिके युधिष्ठिरप्रश्ने श्राद्धे वर्जनीयत्वेनापांक्तेयान्ब्राह्मणानु-	

अ०	श्लो०	विषय	पृष्ठम्
		कृत्वा 'इमे तु भरतश्रेष्ठ'(२४) इत्यादिना पंक्तिपावनान्ब्राह्मणांश्चाभिधीयोभयोः श्राद्धे नियोजने दोषादोषावभ्यधाद्भीष्मः	२०१
९१	४५	'केन संकल्पितं श्राद्धम्' (१) इत्यादिके युधिष्ठिरप्रश्ने भीष्मः श्राद्धोत्पत्तिं कथयति स्म। स्वायम्भुवस्यात्रेः पुत्रस्य दत्तात्रेयस्य पुत्रो निमिः श्रीमन्नामान स्वपुत्रं मृतमुद्दिश्य शोचन् फलमूलादिभिरमावास्याया श्राद्ध चकार। कृत्वा चैतद्यावधि ऋषिभिरनाचीर्ण मया चरितमिति चिन्तयान त प्रत्यत्रिरागत्य श्राद्धविधिं श्राद्धभागार्हाणा देवाना नामान्यश्राद्धेयानि धान्यादीनि चाकथयत्	२०२
९२	२३	निमिप्रवर्तित श्राद्धविधिं कुर्वाणेषु मुनिषु निवापान्नं निषेद्यजीर्णेन पीडिता देवाः पितरश्च सोमप्रेरणया ब्रह्माणं गत्वा निवापान्नेन वय पीड्यामह इत्यूचुः। ततोऽग्निर्युष्मच्छ्रेयो विधास्यतीति तद्वाक्यं श्रुतवतोऽग्नेः 'सहितास्तात भोक्ष्यामः' (१०) इत्यादि वाक्य श्रुत्वा सर्वे विज्वरा अभवन्। अतो हेतोः 'पूर्वमग्नये ददति' (११) इत्यभिधाय पिण्डदानक्रमं चान्वाख्याय 'रजस्वला च या नारी' (१५) इत्यादिना रजस्वलादर्शननिषेधादिकं कथयतिस्म भीष्मः ...	२०३
९३	१४९	'द्विजातयो व्रतोपेताः' (१) इत्यादिना युधिष्ठिरभीष्मयोरुक्तिप्रत्युक्त्योः प्रवृत्तयोः 'दातृप्रतिग्रहीत्रोर्वै को विशेषः पितामह' (१८) इति युधिष्ठिरप्रश्ने तदुत्तर वदन् भीष्मो वृषादर्भे राज्ञः सप्तर्षीणा च संवादरूपमितिहासमाचष्ट।	२०४

अ०	श्लो०	विषय	पृष्ठम्
		कश्यपात्रिवसिष्ठभरद्वाजगौतमविश्वामित्रजमदग्नयः सप्तर्षयोऽरुन्धती चेत्येते गण्डानाम्न्या दास्या पशुसखनामकपतिसहितया सह महत्यामनावृष्ट्या क्षुधापीडिता भ्रमन्तः पूर्व कस्मिंश्चिद्यज्ञे शैब्येन दक्षिणात्वेन दत्तं मृत पुत्र परिवार्य स्वशरीराणि रक्षितुं तमपचन्त। एतस्मिन्काले शैब्यो राजा वृषादर्भिरागत्य परिग्रहस्तारयति पुष्टिर्वै प्रतिगृह्यताम्। मयि यद्विद्यते वित्त तच्छृणुध्वं तपोधनाः' (३०) इत्याद्युवाच। तच्छ्रुत्वा राजप्रतिग्रह विनिन्द्य 'कुशल सह दानेन' (३७) इत्यादिना राजोक्तं प्रत्याख्यायापक्वं राजपुत्रमांस परित्यज्याहारकांक्षिणो निर्जग्मुः। राजाज्ञया तन्मंत्रिषु हिरण्यगर्भाण्युदुम्बरफलान्यर्पयत्सु तानि गुरूणि दृष्ट्वा इमान्युपधियुक्तानीत्युक्त्वा तानि परित्यज्य ययुः। राजा च मन्त्रिभिराख्यातमिमं वृत्तान्तं श्रुत्वा क्रुद्धः सन्नभिचारेण कृत्या निर्माय तेषां नामानि ज्ञात्वा सर्वान्मारयेत्यादिदेश तां प्रति। सा च राजाज्ञया यत्र वने सप्तर्षयो विचेरुस्तद्वनं जगाम। वने चरतो मुनीन् प्रति कश्चित्परिव्राट् शुना सहित आजगाम। तं दृष्ट्वाऽरुन्धत्या पृष्टास्ते तस्य परिव्राजः पीनत्वकारणान्याख्याय तेन प्रार्थितां स्वपरिचर्यामङ्गीकृत्य भ्रमन्तो घनवृक्षमध्यस्थां पद्मयुतां पद्मिनीं दृष्ट्वा तत्रागत्य तद्रक्षणकर्त्रीं राक्षसीं दृष्ट्वा का त्वमित्यादिप्रश्नपूर्वकं बिसान्ययाचन्त। तया राक्षस्या 'स्वस्वनामानि कथयित्वा यथेच्छं बिसान्याहरत' (८४) इत्युक्तास्ते सर्वे गण्डातत्पतिपशुसख-	२०५

अ०	श्लो०	विषय	पृष्ठम्
		सहिताः स्वस्वनामनिर्वचनान्याचख्युः। सा च नामार्थमनवबुद्ध्यानुजज्ञे। एवं शुनः सखेनापि स्वनाम्नि कथिते सत्यपि पुनः कथयेत्युक्तवती राक्षसी त्रिदण्डप्रहारेण घातयति स्म सः। तत ऋषयो बिसान्याहृत्य तीरे निक्षिप्य तर्पणं कृत्वा बहिरागतास्तान्यपश्यन्तोऽभिशंकमानाः शपथांश्चक्रुः। तथैव शुनः सखस्य शपथं श्रुत्वा तस्मिन् बिसस्तैन्यमारोपयामासुः। सोऽपि तदङ्गीकृत्य 'अहं युष्मत्परीक्षार्थमागतो वृषादर्भिप्रयुक्तां कृत्यामहनं, मां वासवं वित्त, लोभपरित्यागेन संपादितान् लोकानवाप्नुत' (१४३) इत्याद्युवाच। ते चेन्द्रेण सह स्वर्गं जग्मुः। स्वधर्मनिष्ठः कुप्रतिग्रहपराङ्मुखो निषिद्धवर्जितो मुख्य पात्रमित्यध्यायतात्पर्यम्	२११
९४	५४	शपथेन निषिद्धार्थप्रकाशनविषये ब्रह्मर्षिराजर्ष्यादितीर्थयात्रेतिहासमकथयद्भीष्मः। प्रभासक्षेत्रे मिलिताः शुक्राङ्गिरःप्रभृतयो ब्रह्मर्षयो नारदप्रभृतयो देवर्षयः शिबिप्रभृतयो राजर्षयश्च पृथ्वीतीर्थयात्रां सङ्कल्प्य निर्गतास्तीर्थान्यटन्तो ब्रह्मसरः प्राप्य तत्र बिसादीनि भुक्त्वाऽगस्त्याहृतं पुष्करमिन्द्रेण ह्रियमाणं ददृशुः। पुष्करमपश्यतागस्त्येनापहारशङ्कया ऽऽक्षिप्तेषु शुक्रप्रभृतिषु देवर्षिब्रह्मर्षिराजर्षिषु शपथान्विदधत्सु इष्ट इन्द्र 'अध्वर्यवे दुहितरं ददातु' (४४) इत्याशीरूपं शपथमकरोत्। 'आशीर्वादस्त्वया प्रोक्तः' (४६) इत्यादिनाऽगस्त्येन पुष्करं याच्यमान इन्द्रो 'न मया भगवँल्लोभात्' (४७) इत्यादिना क्षमापनपूर्वकं	
९५	२८	श्राद्धादिषु छत्रोपानहदानं केन प्रवर्तितमित्यादिकेषु युधिष्ठिरप्रश्नेषु भीष्मस्तदुत्तराभिधानं प्रतिज्ञाय जमदग्निसूर्यसंवादरूपमितिहासमुवाच। पुरा किल जमदग्निर्धनुषा क्रीडन् संधाय संधाय शरान्मुमोच रेणुका च क्षिप्तान् क्षिप्तान् शरानानीय तस्मै प्रादात्। एवं क्रीडायां प्रवृत्तायां शरानानयन्ती रेणुका सूर्यतापव्याकुला किञ्चिच्छायायां विश्रम्यागता कुद्धेन तेनाक्षिप्ता सती 'सूर्यतापतप्ताहं किञ्चिद्विश्राममकरवम्' (१७) ततः क्रुद्धो जमदग्निः सूर्यं हन्तुं बाणं यावत्संदधे तावद्भीतः सूर्यो ब्राह्मणरूपेणागत्य 'किं ते सूर्योपराध्यते' (२०) इत्यादिना तं प्रसादयामास	२१५
९६	२५	जमदग्निसूर्ययोरुक्तिप्रत्युक्त्योः प्रचलितयोः सूर्यस्य 'अपकारिणं मां विद्धि' (७) इति वाक्यं श्रुत्वा प्रसन्नेन जमदग्निना 'यथा सुखगमः पन्थाः' (१२) तापनिवृत्त्युपाययोजने प्रेरितः सूर्यस्तस्मै छत्रं चर्मपादुके च दत्वा तद्दानं प्रशशंस। भीष्मश्चैतदाख्याय त्वमपि छत्रोपानहदानं कुर्वित्युपदिदेश युधिष्ठिरं प्रति।	२१६
७	२५	गृहस्थधर्मं जिज्ञासोर्युधिष्ठिरस्य प्रश्ने भीष्मो वासुदेवपृथिवसंवादरूपेतिहासं व्याहृत्य तमुपदिदेश	२१७
९८	६६	आलोकदानस्योत्पत्त्यादिशुश्रूषया युधिष्ठिरेण पृष्टो भीष्मस्तदुत्तरं कथयन् मनुसुवर्णर्षिसंवादरूपमितिहासमाचचक्षे। 'सुम-	

अ०	श्लो०	विषय	पृष्ठम्
		नोर्भिर्देवतार्चनं कथमुत्पन्नम्' (९) इति सुवर्णार्षिणा पृष्टो मनुः शक्रबलिसंवादरूपेतिहासनिदर्शनेन तदुत्तरमाह स्म। 'सुमनोधूपदीपानां प्रदाने किं फलम्' (१५) इति बलिनाऽनुयुक्तः शक्रः सुमनसामुत्पत्त्यादिकमसुरादिप्रियत्वेन तद्भेदान् धूपाना नानाप्रकारान् दीपदानस्य फलादिकं बलिकर्मगुणाश्चाब्रवीत	२१९
९९	२९	पुनः पुष्पादिदानफलशुश्रूषया युधिष्ठिरेण पृष्टो भीष्मोऽगस्त्यनहुषसंवादेतिहासं कथयन्नुत्तरमाह स्म। स्वर्गं गत्वा देवराज्यमनुप्राप्तो नहुषो दैवीर्मानुषीश्च क्रिया दीपदानादिकं च कुर्वन् देवेन्द्रोऽहमित्यभिमानमावहन् सर्वक्रियाभ्यो भ्रंश प्राप्त ऋषीन् वाहयामास। ऋषिवाहनक्रमेणागस्त्यस्य पर्याये प्राप्ते भृगुस्तदाश्रममागत्य 'एव वयमसत्कारम्' (१५) इत्याद्युवाच। अगस्त्येन नहुषस्य वरप्रदानादिकथनपूर्वकं तद्भ्रंशस्याशक्यत्वेऽभिहिते ततो भृगुः पुनस्तद्भ्रंशकरणं प्रतिजज्ञे	२२०
१००	४१	'कथं वै स विपन्नश्च' (१) इत्यादिना युधिष्ठिरेणानुयुक्तो भीष्मो नहुषभ्रंशप्रकारं ब्रवीति स्म। वाहनार्थं नहुषेणाहूतोऽगस्त्यः स्वजटानिविष्टभृगुस्तं प्रत्यागत्य क्षिप्रं मां योजयेत्युवाच। ततो योजितेऽगस्त्ये तेन शिरसि पादेन ताडिते तत्स्थो भृगुः 'सर्पो भूत्वा महीं गच्छ' (२५) इति तं शशाप। ततोऽगस्त्यद्वारा तेन प्रसादितो भृगुः शापान्तमभिधाय ब्रह्माणं प्रति जगाम। स च तच्छ्रुत्वेन्द्र स्वाराज्येऽभिषिषेच	२२१
१०१	२९	'ब्राह्मणस्वापहारिणां का गतिः' (१) इति युधिष्ठिरानुयुक्तो भीष्मः क्षत्रबन्धुचाण्डालसंवादेतिहासकथनेन तदुत्तरमाह स्म। 'श्वखररजोव्याप्तशरीरस्त्वं गोरजो व्याप्तं शरीरं किमिति क्षालयसि' (३-४) इति राजन्येन पृष्टश्चाण्डालो गोग्रहे हृताना ब्राह्मणगवीनां दुग्धेन मिश्रीभूतेन रजसा व्याप्तं सोमं पिबताभूत्विजां दीक्षितस्य राज्ञश्च नरकपात गोहर्तृपुरे वसनां दुग्धमोक्तृणामल्पायुष्ट्वादिकं तत्र स्थितस्य ब्रह्मचारिणः स्वस्य तद्रजोमिश्रभिक्षाभक्षणेन चाण्डालत्वप्राप्तिं चाख्याय ब्रह्मस्वहरणदोषानुद्भाव्य चाण्डालयोनित. स्वमुक्त्युपायं प्रश्नमुखेन राज्ञः सकाशाच्छ्रुत्वा ब्राह्मणार्थे स्वशरीरं परित्यज्येष्टा गतिमवाप	२२३
१०२	६३	'सुकृतिनामेके लोका उत भिन्नाः' (१) इति युधिष्ठिरेण पृष्टो भीष्मः कर्मानुरोधेन लोकानां नानात्वमभिधाय तदेव विवरीतु गौतमवासवसंवादरूपमितिहासमाख्याय तन्मुखेन ब्रह्मलोकं गतमपि ब्राह्मणस्वं न मुञ्चतीति तात्पर्यविधयाऽऽह	२२६
१०३	४५	'दानं बहुविधाकारम्' (१) इत्यादिनोक्तानुवादपूर्वकं तपसां मध्ये यत्पर तत्कथयेति युधिष्ठिरेणानुयुक्तो भीष्मोऽनशनस्य परमतपस्त्वमाख्याय तद्विषये भगीरथब्रह्मणोः सवादं कथयति स्म। ब्रह्मलोक गतो भगीरथः 'केन साधनेनात्र त्वमगाः' (७) 'निष्काणां वै ह्याददं ब्राह्मणेभ्यः शतम्' (८) इत्यादिना 'साधनान्तराणि निरस्यान्तेऽनशनं परमं तपः' (४२) एतदाख्याय भीष्मः 'तस्मा-	

अ०	श्लो०	विषय	पृष्ठम्
		दनशनैः' (४४) इत्यादिना युधिष्ठिरमुपदिदेश	२२८
१०४	१५७	'शतायुरुक्तः पुरुषः शतवीर्यश्च जायते' (१) इत्यादिना आयुष्मान् केन भवत्यल्पायुश्च केन भवतीत्यादिके युधिष्ठिरप्रश्ने भीष्मः 'आचाराल्लभते ह्यायुराचाराल्लभते श्रियम्। आचारात्कीर्तिमाप्नोति पुरुषः प्रेत्य चेह च' (६) इत्यादिना आचारस्यायुःश्रीकीर्तिकामहेतुत्वमनाचारस्यायुरादिनाशकत्वं चाभिधाय 'ब्राह्मे मुहूर्ते बुद्ध्येत धर्मार्थौ चानुचिन्तयेत्। उत्थायाचम्य तिष्ठेत पूर्वां सन्ध्यां कृताञ्जलिः'(१६) इत्यादिनाऽऽचारलक्षणं प्रतिपादयन् मध्ये आयुरादिनाशहेतूनप्याख्यायान्ते 'एष ते लक्षणोद्देशः' (५४) इत्यादिनोपसंजहार। ...	२३३
१०५	१९	'यथा ज्येष्ठः कनिष्ठेषु' (१) इत्यादिके युधिष्ठिरप्रश्ने 'ज्येष्ठवत्तात वर्तस्व' (२) इत्यादिना ज्येष्ठकनिष्ठयोर्वर्तनमभिदधाति स्म भीष्मः	२३४
१०६	७२	'सर्वेषामेव वर्णानाम्' (१) इत्यादिके युधिष्ठिरप्रश्ने भीष्मोऽङ्गिरसा कथितमुपवासविधिं व्याजहार ...	२३७
१०७	१४४	'पितामहेन विधिवद्यज्ञाः प्रोक्ता महात्मना। गुणाश्चैषां यथातथ्यं प्रेत्य चेह च सर्वशः' (१) इत्यादिनोक्तयज्ञानुवादपूर्वकं दरिद्राणामर्थन्यूनत्वादिविशिष्टानां कर्तुं योग्यं यज्ञतुल्यफलकं विधिं कथयेति युधिष्ठिरेणानुयुक्तो भीष्मो 'यस्तु कल्यं तथा सायं भुंजानो नान्तरा पिबेत्। अहिंसानिरतो नित्यं जुह्वानो जातवेदसम्' (६) इत्यादिनाऽध्यायशेषेण तथाविधमुपवास-	
		विधिं व्याजहार .	२४१
१०८	२१	'यद्वरं सर्वतीर्थानां, यत्र चैव परं शौचं तन्मे व्याख्यातुमर्हसि' (१) इति युधिष्ठिरेण पृष्टो भीष्मो 'अगाधे विमले शुद्धे' (३) इत्यादिना प्रश्नद्वयस्योत्तरं जगाद	२४१
१०९	१७	'सर्वेषामुपवासानां यच्छ्रेयः सुमहत्फलम्। यच्चाप्यसदृशं लोके तन्मे व्याख्यातुमर्हसि' (१) इति युधिष्ठिरप्रश्ने तदुत्तरमभिधास्यन् भीष्मः स्वयंभुगीतकथनमुखेन मार्गशीर्षप्रभृतिद्वादशमासेषु केशवादिद्वादशनामभिरर्चनादि कथयित्वा 'अतःपर नोपवासः' (१७) इत्यादिनोपसजहार	२४२
११०	१०	'अङ्गानां रूपसौभाग्यम्' (१) इत्यादिके युधिष्ठिरप्रश्ने तदुत्तरं कथयन् भीष्मो 'मार्गशीर्षस्य मासस्य' (३) इत्यादिना चान्द्रव्रतमुपदिदेश .	२४३
१११	१३३	'श्रोतुमिच्छामि मर्त्यानां संसारविधिमुत्तमम्' (१) इत्यादिषु युधिष्ठिरप्रश्नेषु भीष्मस्तत्कालमागच्छन्तं बृहस्पतिं दृष्ट्वैनमनुयुंक्ष्वेत्यब्रवीत्। तत आगतं बृहस्पतिं संपूज्य 'मर्त्यस्य कः सहायो वै' (९)इत्यादिना मर्त्यस्य कः सहायः को वैन मृतमनुगच्छतीति पृच्छन्त युधिष्ठिर प्रति सः 'एकः प्रसूयते राजन्' (११) इत्यादिनाऽसहायत्वं प्रतिपाद्य 'धर्म एकोऽनुगच्छति' (१४)इत्युवाच। 'शरीरनिचयं ज्ञातुं बुद्धिस्तु मम जायते' (२०)इत्यादिना धर्मानुगमनमाक्षिपति युधिष्ठिरे 'पृथिवी वायुराकाशमापो ज्योतिर्मनोन्तगः। बुद्धिरात्मा च सहिता धर्मं पश्यन्ति नित्यदा' (२१) इत्यादिना तदुपपत्तिं व्याजहार बृहस्पतिः।	

अ०	श्लो०	विषय	पृष्ठम्
		'कथं रेतः प्रवर्तते' (२७) इति युधिष्ठिरेणापृष्टो बृहस्पतिः 'अन्नमश्नन्ति यद्देवाः' (२८) इत्यादिना रेतःप्रादुर्भावादिकमाचचक्षे। 'जातः पुरुषो यथा प्रपद्यते तदुच्यताम्' (३१) इति युधिष्ठिरेण पृष्टो बृहस्पतिः 'आसन्नमात्रः पुरुषः' (३२) इत्यादिना तदुत्तरमाह स्म। 'जीवः स भगवन्कस्यः सुखदुःखे समश्नुते' (३४) इति युधिष्ठिरेण पृष्टो बृहस्पतिः 'कर्मणा येन येनेह यस्यां योनौ प्रजायते। जीवो मोहसमायुक्तस्तन्मे निगदतः शृणु' (४१) इत्यादिना जीवस्य सुखदुःखभागित्वमाख्याय कर्मानुरोधेन प्राप्यान् गतिविशेषानप्याचष्ट	२४७
११२	३१	'धर्मस्य गतिं श्रोतुमिच्छामि' (१) इति युधिष्ठिरेणानुयुक्तो बृहस्पतिः 'कृत्वा पापानि कर्माणि' (३) इत्यादिनाऽधर्मगतिमनूद्य धर्मगतिं प्रदर्श्य दानप्रशंसापूर्वकमन्नदानादिना शुभगतिप्राप्त्यादिकं व्याहार्षीत्..	२४८
११३	११	'अहिंसादीनां मध्ये किं श्रेयः' (१) इति पृच्छन्तं युधिष्ठिरं प्रति 'सर्वाण्येतानि धर्म्याणि' (२) इत्याद्यभिधाय स्वर्गं जगाम बृहस्पतिः .	२४९
११४	१९	'कर्मणा मनसा वाचा' हिंसां कुर्वन् कथं दुःखान्मुच्यते' (२-३) इति युधिष्ठिरेण पृष्टो भीष्मः 'चतुर्विधेयं निर्दिष्टा' (४) इत्यादिना अहिंसाधर्ममाख्याय मांसभक्षणनिषेधं तद्भक्षणे दोषं चाभ्यधात्	२५०
११५	८५	'अहिंसा परमो धर्मः' (१) इत्यादिना इदानीमहिंसाधर्मं प्रतिपादयतः पूर्वं मांसैर्बहुविधैः श्राद्धविधिं प्रतिपादितवतश्च विरोधमुद्भाव्य 'दोषो भक्षयतः कः स्यात्' (३) इत्यादि पृच्छति युधिष्ठिरे भीष्मः 'मांसस्याभक्षणाद्राजन्' (७) इत्यादिना अहिंसाधर्मं प्रतिपादयन्मांसभक्षणाभक्षणयोर्दोषगुणावभ्यधात्	२५३
११६	४२	'इमे वै मानवा लोके' (१) इत्यादिना मांसाभक्षणे ये गुणास्तद्भक्षणे ये च दोषास्तान् कथयेति पुनर्युधिष्ठिरप्रश्ने भीष्मः 'न मांसात्परम किंचित्' (७) इत्यादिना मांसस्य गुणान् 'विवर्जिते तु बहवः' (१०) इत्यादिना तद्विवर्जने गुणास्तद्भक्षणे बहून् दोषाश्चाभिधाय मृगयाया क्षत्रियाणां तद्भक्षणे दोषाभावं सर्वेषु दयावतः प्रशंसापूर्वकं मांसमभक्षयतः स्वर्गादिफलं च प्रतिप्राद्य 'अहिंसा परमो धर्मः' (३८) इत्याद्युपदिदेश...	२५४
११७	२९	युद्धे मृतानां गतिज्ञानार्थं युधिष्ठिरेण पृष्टो भीष्मः 'समृद्धौ वाऽसमृद्धौ वा' (३) इत्यादिनाऽस्मिन्संसारे समायाताः प्राणिनो येन भावेन शुभे वाऽशुभे वा निरतास्तत्र कारणं कथयामीति प्रतिज्ञायैतद्विषये व्यासकीटसंवादरूपमितिहासमाह स्म। शकटमार्गे संत्रस्तो धावन् कीटः सर्वज्ञेन व्यासेन 'कीट संत्रस्तरूपोऽसि' (९) इति पृष्टः 'शकटो मां न हन्यादिति भयेन पलायनं करोमि' (११) इत्युवाच। पुनः 'कीटयोनौ ते कुतः सुखम्' (१५) इति व्यासेन पृष्टः स तद्योनावपि सुखं प्रतिपाद्य स्वस्य पूर्वजन्मनो वृत्तान्तं तत्स्मृतिकारणं चाख्याय स्वस्यागामिसुखं पप्रच्छ ..	२५५
११८	२४	'शुभेन कर्मणा यद्वै' (१) इत्यादिना व्यासेनोपदिष्टः कीटश्चक्रेण	

अ०	श्लो०	विषय	पृष्ठम्
		भिन्नशरीरः क्षत्रियकुले जन्म प्राप। तत्रापि पुनर्व्यास आगत्य 'गोब्राह्मणकृते संग्रामे प्राणांस्त्यक्त्वा ब्राह्मण्यं प्राप्य ब्रह्मभूतो भविष्यसि (२२-२३) इत्युवाच	२५६
११९	१५	व्यासप्रसादाद्राजत्वं प्राप्तः कीटस्तपस्यस्तुष्टेन व्यासेन प्रजापालने नियुक्तस्तत्कुर्वंस्ततो वनगतः प्रेत्य ब्राह्मण्यमवाप। तत्रापि व्यासोपदेशाद्धर्माचरणं कुर्वन्सनातनं ब्रह्म प्राप	२५७
१२०	२७	'विद्यातपोदानानां किं विशिष्यते' (१) इति युधिष्ठिरानुयुक्तो भीष्मो मैत्रेयव्याससंवादरूपेतिहासकथनमुखेनोत्तरमाह स्म। यदृच्छया चरन्व्यासः कदाचिद्वाराणस्यां मैत्रेयमागत्य तेन सत्कारपूर्वकं दत्तमन्नं भुक्त्वा विस्मितः सन्प्रातिष्ठत। तदा तेन विस्मयकारणं पृष्टस्तदाख्याय दानं प्रशशंस ...	२५८
१२१	१७	व्यासादनुज्ञां संप्रार्थ्य भाषमाणो मैत्रेयः 'निर्दोषं निर्मलं चैवं वचनं दानसंहितम्' (४) इत्यादिना पात्रगुणाधीनत्वं दानफलस्याभिधाय 'तपः श्रुतं च योनिश्च' (७) इत्यादिना तात्पर्यविधया तपःश्रुते प्रशशंस .	२५९
१२२	२०	व्यासो मैत्रेयप्रसंसापूर्वकम् 'अह दानं प्रशंसामि' (५) इत्यादिना तपोविद्ये अपि प्रशस्य दानप्रशंसापूर्वक पुनरूपादिदेश। मैत्रेयश्च त प्रणम्य प्रदक्षिणीकृत्य च गमनमनुजज्ञे	२६०
१२३	२२	'सत्स्त्रीणां समुदाचारम्' (१) इत्यादिना सत्स्त्रीसमुदाचारं पृच्छति युधिष्ठिरे भीष्मः सुमनानाम्न्याः कैकेय्याः शाण्डिल्याश्च संवाद द्वारीकृत्य तं व्याजहार	२६१
१२४	३९	'सामदानयोर्मध्ये किं ज्यायः' (१) इति युधिष्ठिरेण पृष्टो भीष्मः साम्नो गुणानभिधाय तद्विषये केनचिद्रक्षसा धृतस्य साम प्रयोजयतो ब्राह्मणस्य 'केनास्मि हरिणः कृशः' (७) इति राक्षसप्रश्नोत्तर दानाख्यानमाख्याति स्म	२६२
१२५	८४	'श्रेयोर्थिना दरिद्रेण किं कर्तव्यम्' (१) इति युधिष्ठिरेणानुयुक्तो भीष्मः 'शृणुष्वावहितो राजन् धर्मगुह्यानि भारत' (४) इत्यादिना धर्मगुह्यानि कथयन् देवदूतपितृसंवादमुखेन श्राद्धविधिं शक्रविद्युत्प्रभबृहस्पतिवाक्यानि तथा देवतर्षिपितृसंवादमुखेन पितृतृप्तिप्रदं नीलवृषोत्सर्गं तद्विधिं चाचष्ट	२६५
१२६	५०	'केन ते च भवेत्प्रीतिः' (१) इत्यादिनेन्द्रविष्णुसंवादमुखेन ब्राह्मणादिपूजनस्य विष्णुतुष्टिहेतुत्वं बलदेववाक्यात्प्रातर्गवादिस्पर्शस्य पापनाशहेतुत्वं देवानां वाक्यादुपवासग्रहणव्रतसंकल्पादिविधिं धर्मवाक्यादतिथिपूजनमग्निवाक्याद्गोब्राह्मणाग्नीनां पादस्पर्शनिषेधं विश्वामित्रवाक्याद्गजच्छायाश्राद्धमाहात्म्यं गोवाक्यात् 'बहुले समङ्गे' (३८) इति मन्त्रेण गोवन्दनादिकं सप्तर्षिब्रह्मसंवादमुखेन दरिद्रस्य यज्ञफलप्राप्तिसाधनं चाभिदधाति स्म भीष्मः ..	२६७
१२७	१९	विभावसुवाक्येन सोमस्यार्घ्यदानादिकं, श्रीवाक्येन प्रकीर्णभाजनादिवर्जनमगिरोवाक्येन सुर्वचलामूलहस्तेन करञ्जके संवत्सरं दीपदानस्य प्रजावर्धकत्वं, गार्ग्यवाक्येनातिथ्यदीपदानादिक, धौम्यवाक्येन भिन्नभाण्डा-	

अ०	श्लो०	विषय	पृष्ठम्
		दिवर्जनं, जमदग्निवाक्येन हृदयशुद्धेः कर्मफलशुद्धिहेतुत्वं चाभ्यधाद्भीष्मः	२६८
१२८	११	'किञ्चिद्धर्मं प्रवक्ष्यामि' (१) इत्यादिना वायूक्तं मनुष्यसुखावह धर्मरहस्यमब्रवीद्भीष्मः	२६९
१२९	१२	लोमशोक्त परदारवर्जनादिकं धर्मरहस्यम्	२६९
१३०	४०	अरुंधतीकथित कपिलादानादिकं धर्मरहस्यम्। ऋषीन्प्रति यमेनाभिहित चित्रगुप्तोक्तधर्मरहस्यम्	२७१
१३१	१२	देवर्षिपितृप्रश्नानुरोधेन प्रमथैः कथितं धर्मरहस्यम्	२७१
१३२	१७	रेणुकप्रश्नानुरोधेन दिग्गजैः कथित धर्मरहस्यम् .	२७१
१३३	९	महादेवाभिहितं धर्मरहस्यम्	२७२
१३४	१७	स्कंदेनोपदिष्टं धर्मरहस्य विष्णुकथितं सर्वधर्मरहस्यश्रवणफलं च	२७२
१३५	२१	'के भोज्या ब्राह्मणस्येह' (१) इत्यादिना युधिष्ठिरेणानुयुक्तो भीष्मो ब्राह्मणादीना भोज्यानाख्याय शूद्राद्यन्नभोजने दोषानप्यभ्यधात्	२७४
१३६	२५	ब्राह्मणस्य हव्यकव्ययोः प्रतिग्रहे भोज्ये च प्रायश्चित्तानि शुश्रूषुर्युधिष्ठिरो यदपृच्छत्तस्योत्तरं वदन्भीष्मो घृतादिप्रतिग्रहप्रायश्चित्तान्याख्याय मृतकस्य तृतीयदिनभोजनादीना तान्याचष्ट	२७५
१३७	३२	'दानेन वर्ततेत्याह' (१) इत्यादिना दानपतसोर्मध्ये किं श्रेष्ठमित्यभिप्रायके युधिष्ठिरप्रश्ने भीष्मः 'शृणु यैर्धर्मनिरतैः' इत्यादिना दानं प्रशंसंस्तेनात्रेयादीनामुत्तमलोकावाप्तिमाख्यत्	२७६
१३८	११	'दानं कतिविधं देयम्' (२) इत्यादिना युधिष्ठिरेण कृतेषु प्रश्नेषु भीष्मः 'शृणु तत्त्वेन कौन्तेय' (४) इत्यादिना दानस्य पंचविधत्वकथनपूर्वक तत्फलादिकं व्याजहार .	२७७
१३९	५०	'पितामह महाप्राज्ञ' (१) इत्यादिना प्रशसापूर्वक युधिष्ठिरेणोक्तो भीष्मस्तद्वाक्यं श्रुत्वा 'अस्य विष्णोः शंकरस्य च प्रभावं रुद्ररुद्राणीसंवाद च कथयामि' (८-९) इति प्रतिजज्ञे। द्वादशवार्षिक व्रत चरन्तं श्रीकृष्ण द्रष्टु नारदादय आजग्मुः, ते च श्रीकृष्णेन सत्कृतास्तत्समीप उपविश्य मधुरा धर्मसहिताः कथाश्चक्रुः। एतदन्तेरऽकस्माद्भगवन्नेत्रनिर्गतो वह्निः सर्वं पर्वत दग्ध्वा भगवत्पादावस्पृशत्। भगवाश्चाग्निना दग्धं पर्वत सौम्यैर्दृष्टिपातैः पुनः प्रकृतिस्थं चकार। एतदाश्चर्यदर्शनेन विस्मिता मुनयो भगवता विस्मयकारणं पृष्टाः सन्त. 'प्रथम वह्नेर्निर्गमनादिक ब्रूहि पश्चाद्यच्छ्रुतं यच्च दृष्टं तद्वक्ष्यामहे' (२६-२९) इत्युचुः। भगवान्वासुदेवः 'व्रतचर्यापरीतस्य' (३२) इत्यादिना आत्मसमपुत्रलाभार्थं व्रत चरितवतो ममायमात्मा मद्वक्त्रादग्निरूपेण निःसृत्य ब्रह्माण द्रष्टु गतस्तेन 'तेजसोऽर्धेन पुत्रस्ते भवितेतिवृषध्वज.' इत्युक्तो ममातिकमागत्य शान्तोऽभूदित्याख्याय तान्प्रति यच्छ्रुतं यच्च वो दृष्ट तद्ब्रुवन्तु भवन्त इत्युवाच। तैश्च तत्कथयितु प्रेरितो नारदो वक्तुमुपचक्रमे	२७९
१४०	५१	पुण्ये हिमवति गिरौ तपश्चरन् महादेवो महर्षिभिरभिवंदितचरणः सभायामुपविवेश। तदोमापार्श्वत आगत्य नर्मार्थं महादेव-	

अ०	श्लो०	विषय	पृष्ठम्
		स्य नेत्रे पाणिभ्यां समावृणोत्। तदा सर्वस्मिँल्लोके नष्टालोकेऽकस्मात्तस्य ललाटे तृतीयं नेत्रं समभूत्। तत्तेजसा दग्धं हिमालयं पुनरुमाप्रार्थनया भगवान्प्रकृतिस्थं चक्रे। तत उमाप्रश्नानुरोधेन तृतीयनेत्रोत्पत्तिकारणादिकमभिधाय 'भगवन् केन ते वक्त्रम्' (४६) इत्यादिना पुनरुमयाऽनुयुक्तो महादेवस्तदाख्यातुमुपचक्रमे	२८०
१४१	११५	उमया पृष्टो महादेवः 'तिलोत्तमा नाम पुरा' (१) इत्यादिना स्वस्य वक्त्रचतुष्टयप्रादुर्भावकारणं जटिलत्वनीलकण्ठत्वकारणे वृषभध्वजत्वकारणं चाख्यातवान। 'निवासा बहुरूपास्ते' (१३) इत्यादिनोमया श्मशाननिवासकारणे पृष्टे महादेवो 'मेध्यान्वेषी' (१६) इत्यादिना तदब्रवीत्। 'धर्मः किंलक्षणः प्रोक्तः' (२३) इत्यादिना धर्मलक्षणे उमया पृष्टे महादेवः 'अहिंसा, सत्यवचनम्' (२५) इत्यादिना धर्मस्य पञ्चविधत्वमाख्याय पुनरुमाप्रश्नानुरोधेन 'रहस्यश्रवणं धर्मः' (३५) इत्यादिना चातुर्वर्ण्यधर्मानाचष्ट। सर्वसाधारणं धर्मं श्रोतुमुमया पृष्टो महेश्वरः 'ब्राह्मणा लोकसारेण' (६२) इत्यादिना ब्राह्मणधर्मकथनपुरःसर त्रिवर्गसाधारणं धर्ममाख्याय मोक्षसाधनभूतं निवृत्तिधर्मं 'निवृत्तिलक्षणस्त्वन्यः' (८०) इत्यादिना बभाषे। ऋषिधर्मं श्रोतुमुमया पृष्टो महेश्वरो 'हन्त तेऽहं प्रवक्ष्यामि' (९५) इत्यादिना तमब्रवीत्	२८४
१४२	५९	'देशेषु रमणीयेषु' (१) इत्यादिना वानप्रस्थधर्मेषु मया पृष्टेषु महादेवः 'वानप्रस्थेषु यो धर्मः' (४) इत्यादिना तमुदैरयत्। 'ज्ञानगोष्ठीषु ये संसिद्धा वनवासिनः। स्वैरिणो दारसंयुक्तास्तेषां धर्मं कथय' (२०-२१) इत्युमयाऽनुयुक्तो महेश्वरः 'स्वैरिणस्तपसा देवि सर्वे दाविहारिणः' (२२) इत्यादिना तमभ्यधात्। 'आश्रमाभिरतास्तापसादयः केन कर्मणा फलं प्राप्नुवन्ति' (३४) इत्यादिके उमाप्रश्ने 'उपवासव्रतैर्दान्ता' (३८) इत्यादिनोत्तरमाह स्म महादेवः	२८६
१४३	५९	'केन कर्मविपाकेन वैश्यो गच्छति शूद्रताम्' (२) इत्यादिना केन कर्मविपाकेन वैश्यः शूद्रतां, क्षत्रियो वैश्यतां, द्विजः क्षत्रियतां, विप्रः शूद्रतां, क्षत्रियश्च शूद्रतां, यातीत्यादिके उमाप्रश्ने 'ब्राह्मण्यं देवि दुष्प्रापम्' (६) इत्यादिना ब्राह्मणादिकर्मकथनपूर्वकं तत्तत्कर्मव्यत्ययादिना तत्तदन्नभक्षणादिना च प्रातिलोम्यं भवतीत्याह स्म महादेवः ..	२८८
१४४	६०	'धर्माधर्मौ नृणां ब्रूहि' (१) इत्यादिनोमया कृतेषु प्रश्नेषु तदुत्तरं वदन्महादेवः 'देवि धर्मार्थतत्त्वज्ञे' (४) इत्यादिना कर्मबन्धनिवृत्तिहेतूनि कर्माण्यभिदधदर्थात्तद्विपरीतानि बन्धहेतूनीत्यभ्यधात्। 'वाचा तु बध्यते येन' (१८) इत्यादिनोमया पृष्टो महादेवः 'आत्महेतोः परार्थे वा' (१९) इत्यादिना बंधनिवृत्तिहेतुं वाचमभिदधदर्थात्तद्विपरीतां बन्धहेतुं व्याजहार। 'मनसा बध्यते येन' (२८) इत्यादिनोमया पृष्टो महादेवः 'मानसेनेह धर्मेण' (२९) इत्यादिना बन्धनिवृत्तिहेतून् मानसव्यापारानभिदधदर्थात्तद्विपरीतान्बन्धहेतूनवोचत्। 'केनायुर्लभते दीर्घम्' (४२) इत्यादिना दीर्घायुष्ट्वाल्पायुष्ट्वादिकारणे उमया	

अ०	श्लो०	विषय	पृष्ठम्
		पृष्टे महादेवः 'हन्त तेऽहं प्रवक्ष्यामि' (४८) इत्यादिना तत्कथयति स्म	२९०
१४५	६४	'किंशीलः किंसमचारः' (१) इत्यादिना पार्वत्या पृष्टो महादेवः 'दाता ब्राह्मणसत्कर्ता' (२) इत्यादिना स्वर्गगामिनस्तत्प्रसंगेन निरयगामिनश्चाचष्ट। 'इमे मनुष्या दृश्यन्ते' (४३) इत्यादिना केन कर्मविशेषेण प्रज्ञावदादयो भवन्तीति पार्वतीप्रश्ने महादेवः 'ब्राह्मणान्वेदविदुषः' (४७) इत्यादिना तदुत्तरमाख्याय 'सावद्य किंतु वै कर्म' (५४) इत्यादि पार्वतीप्रश्ने पुनस्तदुत्तर पुनः 'अपरे स्वल्पविज्ञानाः' इत्यादिप्रश्ने तदुत्तर चाचख्यौ	२९२
१४६	६१	स्त्रीधर्मान् ज्ञातुं महादेवेन पृष्टा पार्वती 'त्वद्दर्शनार्थमागताभिर्गंगादिभिः सह विचार्य कथयामि' (१३-१४) इत्यभिधाय ततो गङ्गयाऽनुज्ञाता सती स्त्रीधर्मान् कथयति स्म . ..	२९४
१४७	६२	'वासुदेवस्य माहात्म्यं श्रोतुमिच्छामः' (१) इति मुनिभिः पृष्टो महादेवो ब्रह्माणमारभ्य वसुदेवपर्यन्त वंशपरपरामभिधाय वसुदेवात्कृष्णजन्मादिवृत्तान्तं चाख्याय 'तस्मात्स वाग्मी धर्मज्ञः' (४५) इत्यादिना नमस्यत्वादिकमवादीत्	२९६
१४८	६६	'अथ व्योम्नि महाञ्शब्दः' (१) इत्यादिना नारदेन शिवपार्वतीसंवादकथनोपसंहारे कृते मुनयः श्रीकृष्णं प्रणम्य प्रदक्षिणीकृत्य जग्मुः। भीष्म एतत्सर्वमाख्याय 'सोऽयं नारायणः' (१९) इत्यादिना श्रीकृष्णमाहात्म्यमभिधाय 'भगवांश्चाप्यार्जवपरः' (३७) इत्यादिना युधिष्ठिरमुपदिश्य 'एतदत्यद्भुतं वृत्तम्' (५४) इत्यादिनोपसञ्जहार। एतदाकर्ण्य धृतराष्ट्रादयो जहृषुः	२९८
१४९	१४२	'किमेकं दैवतं लोके' (२) इत्यादिषु युधिष्ठिरप्रश्नेषु भीष्मः 'जगत्प्रभुं देवदेवम्' (४) इत्यादिनोत्तराण्यभिधाय 'विष्णोर्नामसहस्रं मे'(१२)इत्याद्युक्त्वा 'ॐ विश्वं विष्णुर्वषट्कारः' (२४) इत्यादिना विष्णुसहस्रनामान्याख्याय तच्छ्रवणादिफलं चाचख्यौ ...	३०३
१५०	८२	'किं जप्यं जपतो नित्य भवेद्धर्मफलं महत्' (१) इत्यादिके युधिष्ठिरप्रश्ने भीष्मो 'व्यासप्रोक्ता सावित्रीं शृणु' (४) इत्युक्त्वा 'नमो वसिष्ठाय' (१०) इत्यारभ्य 'पापस्य सुकृतस्य च' (५८) इत्यन्तेन सावित्रीमुपदिश्य एतान्वै कल्यमुत्थाय' (५९) इत्यादिना तत्पाठफलमब्रवीत्	३०५
१५१	२३	'के पूज्याः के नमस्कार्याः' (१) इत्यादिना युधिष्ठिरेणानुयुक्तो भीष्मो 'ब्राह्मणाना परिभवः' (२) इत्यादिना प्रशंसापूर्वकं ब्राह्मणानां पूज्यत्वादिकमनुजगाद	३०६
१५२	२८	'का तु ब्राह्मणपूजायाम्' (१) इत्यादिना कि फल क च कर्मोदयं दृष्ट्वा ब्राह्मणानर्चयसीति युधिष्ठिरस्यानुयोगे भीष्मः 'अत्राप्युदाहरन्तीमम्' (२) इत्यादिना ब्राह्मणाना पूज्यत्वे पवनार्जुनसवादेतिहास कथयति स्म। दत्तात्रेयवरप्रदानेन लब्धसहस्रबाहुरर्जुनो वीर्यमदात् 'को वाऽस्ति सदृशो मम' (१२) इत्याद्युवाच। तद्वाक्यान्ते 'न त्वं मूढ विजानीषे' (१४) इत्याद्याकाशवाणीं श्रुत्वा 'कुर्या भूतानि तुष्टोऽहम्' (१५) इत्यादिना तामाक्षिपन्तं तं प्रत्यन्तरिक्षस्थो वायुः 'त्यजैनं	३०८

अ०	श्लो०	विषय	पृष्ठम्
		कलुष भावम्' (२४) इत्याद्युवाच। तेन पुनः कस्त्वमित्युक्तो वायुरात्मानं कथयति स्म। स च पुनस्तं पप्रच्छ . .	३०७
१५३	१९	'शृणु मूढ गुणान् कांश्चित' (१) इत्यादिना कश्यपादिनिदर्शनकथनपूर्वकं ब्राह्मणान् प्रशशंस वायुः .	३०८
१५४	३२	'इमां भूमिं द्विजातिभ्यो दित्सुर्वै दक्षिणां पुरा' (१) इत्यादिनाङ्गराजेन द्विजातिभ्यो दक्षिणात्वेन दीयमाना पृथ्वी क्रुद्धा सती स्थूलं स्वशरीरं त्यक्त्वा यदा ब्रह्मलोकं जगाम तदा कश्यपो मह्या त्यक्तं देह योगबलेन प्राविश्य दिव्यानि त्रिंशद्वर्षसहस्राणि स्वय भूमिरभूत्। ततः प्रभृति भूः काश्यपी जज्ञे इत्याख्यायिकामाह वायुः। पुनर्वायुरुतथ्यकथां कथयन् वरुणकृतमुतथ्यभार्याहरणमुतथ्यप्रेषितस्य नारदस्य वरुणकृतं प्रत्याख्यानमुतथ्यदत्त वरुणशापं शापभीतेन वरुणेन कृतमुतथ्याय तद्भार्यासमर्पणमुतथ्यकृतवरुणमोचनादिकं चाख्यायोतथ्यो वरः क्षत्रियो वा वर इति ब्रूहीत्युवाच	३१०
१५५	२६	तूष्णीभूते सहस्रार्जुने वायुर्देवप्रार्थनयाऽगस्त्येन स्वतेजसा कृतं दानवहनन तथा इन्द्रप्रार्थितेन वसिष्ठेन कृतं खलिदानवहननादिकं चाभिधाय वसिष्ठो वरः क्षत्रियो वा वर इति वदेत्यवादीत् . .	३१०
१५६	३५	तूष्णीभूतेऽर्जुने पुनर्वायुस्तमसि प्रवृत्ते दानवैर्युध्यमाना देवा यदा पराबभूवुस्तदेन्द्रप्रार्थनयाऽग्निः सोमसूर्यात्मको भूत्वा दानवान्ददाह । तत्तेजसा देवा	
१५७	२७	अपि तान् जघ्नुरित्युक्त्वा च्यवनेऽश्विनोः सोमग्रह दातुं प्रवृत्ते तं हन्तुमिन्द्रेणोद्यतं वज्र स्तम्भयित्वेन्द्रपराभवार्थं तत्कृतं मदासुरनिर्माणादिक चाख्याय 'ब्रवीम्यहं ब्रूहि वा त्व क्षत्रियं ब्राह्मणाद्वरम्' (३५) इत्युवाच .	३१२
		तूष्णीभूतेऽर्जुने पुनर्वायुः 'मदास्यगतेषु देवेषु तत्काले च्यवनेन भूमौ हृताया देवा ब्रह्माणं शरणं गत्वा द्यौः कपैराक्रान्ता भूश्च च्यवनेनाक्रान्ता' इत्याचख्युः। ततो ब्राह्मणान् शरणं गच्छतेति ब्रह्माज्ञया शरणमागत्य देवैः कपहननार्थं प्रार्थिता ब्राह्मणा ज्वलितानग्नीन् पृष्ट्वा कपान् जघ्नुरित्याद्याह स्म । वायूपदेशादर्जुनो 'जीवाम्यह ब्राह्मणार्थम्' (२४) इत्याद्युवाच । वायुश्च त प्रति ब्राह्मणान् क्षात्रधर्मेण इत्याद्युवाच	३१३
१५८	४६	'ब्राह्मणानर्चसे राजन्' (१) इत्यादिके युधिष्ठिरप्रश्ने भीष्मः 'एष ते केशवः सर्वमाख्यास्यति महामतिः' (३) इत्याद्युक्त्वा भगवन्माहात्म्यं व्याजहार	३१६
१५९	५६	'ब्रूहि ब्राह्मणपूजायां व्युष्टिं त्वं मधुसूदन। वेत्ता त्वमस्य चार्थस्य वेद त्वां हि पितामहः' (१) इति युधिष्ठिरेण पृष्टः कृष्णः 'प्रद्युम्न प्रति यदहमब्रुवं तत्कथयामि' (३-६) इत्याह स्म। 'किं फलं ब्राह्मणेष्वस्ति' (३) इत्यादि पृच्छन्त प्रद्युम्नं प्रति 'व्युष्टिं ब्राह्मणपूजायाम्' (७) इत्याद्युक्त्वा ब्राह्मणान् प्रशस्य 'अवसन्मद्गृहे तात ब्राह्मणो हरिपिङ्गलः' (१४) इत्याद्यवोचम्। 'दुर्वाससं वासयेत्को ब्राह्मणं सत्कृतं गृहे' (१६)इत्यादिगाथा गायन्तं दुर्वाससमहं स्वगृहे	

अ०	श्लो०	विषय	पृष्ठम्
		ऽवासयं स च कदाचिद्बहूनां सहस्राणामन्न बुभुजे, कदाचित्स्वल्पम् । कदाचित्स गृहान्निर्गतो न पुनराजगाम । कदाचिद्गृहमागत्य सशय्यास्तरणं गृहं दग्ध्वा निर्गतः पुनरागत्य 'कृष्ण पायसमिच्छामि' (२२) इत्युवाच । ततो मया निवेदितं पायसं भुक्त्वा अवशिष्टेन पायसेनाङ्गानि लिम्पस्व इति तेनाज्ञप्तोऽविमृश्याङ्गानि न्यलेपयं तदनुज्ञया त्वन्मातू रुक्मिण्या अप्यङ्गानि न्यलेपयम्। उभावप्यावां रथे धुर्यवद्योजयित्वा स्वयरथारूढो रुक्मिणी प्रतोदेन तुदन् राजमार्गेण निर्जगाम । व्रजति तस्मिन्श्रमाद्रुक्मिण्यां स्खलितायां रथात्प्रस्कद्योत्पथेन धावन्तं तमन्वहमप्यधावम् । तदा जितक्रोधं मां दृष्ट्वा सुप्रसन्नो मह्यं रुक्मिण्यै च वरान् दत्वाऽन्तर्दधे । अहं च 'यत्किंचिद्ब्राह्मणो ब्रूयात्तत्सर्वं कुर्याम्' (५१) इत्येतद्व्रतं कृत्वा गृहं प्राविशम् ...	३१८
१६०	४४	'दुर्वाससः प्रसादाद्यद्विज्ञानं प्राप्त तदाख्यातुमर्हसि' (१) इति युधिष्ठिरप्रश्ने प्रातः स्वेन क्रियमाणं शतरुद्रीयजपं दक्षयज्ञविध्वंसनप्रकारं, त्रिपुरहननप्रकार, चाचष्ट श्रीकृष्णः	३१९
१६१	२९	पुनः श्रीकृष्णो 'युधिष्ठिरमहाबाहो' (१) इत्यादिना रुद्रस्य महाभाग्य निबोधेत्युक्त्वा तस्य घोरसौम्ये तनू निरूप्येश्वरादिनाम्नां निर्वचनादिकं व्यवृणोत् ...	३२०
१६२	६३	'निर्णयविषये प्रत्यक्षागमयोर्मध्ये किं कारणम्' (२) इति युधिष्ठिरानुयोगे 'नास्त्यत्र सशयः कश्चिदिति मे वर्तते मतिः । शृणु वक्ष्यामि ते प्राज्ञ सम्यक्त्वं मेऽनुपृच्छसि' (३) इत्यादिनाऽऽगमबलीयस्त्वतात्पर्यकमुत्तरं जगाद भीष्मः । प्रत्यक्षानुमानागमानां मध्ये किं प्रबलं प्रमाणमिति युधिष्ठिरप्रश्ने भीष्मो 'धर्मस्य ह्रियमाणस्य' (११) इत्यादिना वेदस्यैव मुख्यं प्रामाण्यं प्रत्यक्षानुमानयोर्व्यभिचारित्वादित्येतत्तात्पर्यकमुत्तरमब्रवीत् । 'वेदप्रत्यक्षाचाररूपप्रमाणत्रैविध्ये धर्मस्यैकत्वं कथम्' (१७-१८) इति युधिष्ठिरेण पृष्टो भीष्मो 'धर्मस्य ह्रियमाणस्य बलवद्भिर्दुरात्मभिः । यद्येवं मन्यसे राजन्त्रिधा धर्मविचारणा' (१९) इत्यादिना एक एव धर्मः प्रमाणत्रितयसंवादेन परीक्षणीय एत्येतत्तात्पर्यकमुत्तरमदात् । धर्ममसूयतां तत्पर्युपासकानां च गतिं पृष्टो भीष्मो 'रजसा तमसा चैव' (२८) इत्यादिना तां कथयति स्म। युधिष्ठिरस्यासाधुसाधुरूपादिजिज्ञासया प्रश्ने 'दुराचाराश्च दुर्धर्षाः' (३३) इत्यादिनोत्तरमभिदधदसाधून् साधूंश्चाख्याय तेषामाचरणं चाह भीष्मः . .	३२३
१६३	१४	'नाभागधेयः प्राप्नोति धनं सुबलवानपि' इत्याद्यभिदधानं युधिष्ठिरं प्रति भीष्मः ईहमानः समारम्भानित्यादिना सुखाद्यास्तौ प्रमाणं कर्मैवेति बुद्ध्वा स्थिरो भवेत्युवाच च	३२४
१६४	१५	'कार्यते यच्च क्रियते' (१) इत्यादिनाऽध्यायेन धर्मप्रशंसापूर्वकं भीष्मस्योपदेशः ...	३२५
१६५	८	'किं श्रेयः पुरुषस्येह किं कुर्वन्सुखमेधते । विपाप्मा स भवेत्केन किं वा कल्मषनाशनम्' (२) इति युधिष्ठिरानुयुक्तो भीष्मो 'अयं दैवतवशो वै' (३) इत्यादिना	

अ०	श्लो०	विषय	पृष्ठम्
		त्रिसन्ध्यं पठनात्कलमषहरं दैवतवंशं गङ्गादिनदीर्हिमवदादिपर्वतान्पूर्वादिदिगवस्थितान्यवक्रीतादिऋषीन् नृगादिराजर्षीश्चाकथयत्	३२७
१६६	१७	जनमेजयस्य 'शरतल्पगते भीष्मे' (१) इत्यादिके प्रश्ने वैशम्पायनः 'अभून्मुहूर्त स्तिमितम्' (४) इत्यादिना सर्वेषु तुष्णीं भूतेषु व्यासप्रेरितेन भीष्मेणानुज्ञातो युधिष्ठिरो धृतराष्ट्रादीन् पुरस्कृत्य हस्तिनापुर जगामेत्याह स्म	३२७

(२) भीष्मस्वर्गारोहणपर्व ३२८–३३२

१६७	५२	युधिष्ठिरो हस्तिनापुरमागत्य नारीः सान्त्वयित्वा उदगयने प्रवृत्ते भीष्मसस्कारार्थं सामग्रीसहितो निर्गत्य भीष्मं प्रति 'युधिष्ठिरोऽहं नृपते' (१९) इत्याद्युवाच। भीष्मो भारतादीन्दृष्ट्वा युधिष्ठिरं प्रति 'दिष्ट्या प्राप्तोऽसि कौन्तेय' (२६) इत्याद्यभिधाय धृतराष्ट्रं प्रति 'राजन्विहितधर्मोऽसि' (३०) इत्याद्युपदिश्य श्रीकृष्णं प्रति 'भगवन्देवदेवेश' (३७) इत्यादिना 'त्वयाऽहं समनुज्ञातो गच्छेयं परमां गतिम्' (४५) इत्यन्तमभ्यधात्। वसुलोकप्राप्त्यर्थं श्रीकृष्णेन प्रशंसापूर्वकमनुज्ञातो भीष्मः पाण्डवान्प्रति 'प्राणानुत्सृष्टुमिच्छामि' (४९) इत्याद्युवाच. . . .	३२९
१६८	३७	योगेन प्राणधारणां कृत्वा भीष्मे स्वर्गमारूढे युधिष्ठिरादयश्चन्दनादिना भीष्मशरीर दाहेन संस्कृत्योदकदानार्थं गङ्गां जग्मुः। युधिष्ठिरादिभिरुदकदाने कृते उदकान्निर्गत्य भीष्मपराक्रमकथनपूर्वकं विलापं कुर्वती गङ्गा कृष्णव्यासाभ्यां बोधिता विशोका सती पुनर्जलं प्राविवेश। गङ्गयाऽनुज्ञाताश्च सर्वे न्यवर्तन्त	३३१

॥ इत्यनुशासनपर्वविषयानुक्रमणिका समाप्ता ॥



॥ महाभारतम् ॥

अनुशासनपर्व ।

-१३-

दानधर्मपर्व १

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ १

युधिष्ठिर उवाच ।

शमो बहुविधाकारः सूक्ष्म उक्तः पितामह ।
न च मे हृदये शान्तिरस्ति श्रुत्वेदमीदृशम् १

अस्मिन्नर्थे बहुविधा शान्तिरुक्ता पितामह ।
स्वकृते का नु शान्तिः स्याच्छमाद्बहुविधादपि

॥ श्रीगणेशाय नमः ॥

यज्ज्योतिस्तमसः परं महदहो
निर्माय रूपाणि त-
न्मायानि प्रविभज्य च व्यवहर-
त्येतैर्गुहायां गतम् ॥
आनन्दैकरस तदद्वयमथो
तन्मायया देवकी-
कुन्तीसत्यवतीषु जन्म धृतवत
कृष्णत्रयं पातु नः ॥ १ ॥
गोपाल-नारायण-लक्ष्मणार्यान्
धीरेश-गंगाधर-नीलकण्ठान् ॥
चिन्तामणिं साम्बशिवं च नत्वा
व्याकुर्महे भारतदानधर्मान् ॥ २ ॥

धर्मं त्रिषु द्रविणमुष्टसु कामम्मोक्षा-
वेकत्र पर्वणि निरूपितवान्मुनीन्द्रः ।
तत्साधनानि सुबहूनि सहप्रमाणा-
न्यत्रानुशासनिकपर्वणि वर्णितानि ३

तत्र पूर्वस्मिन्पर्वणि शोकतरणोपाय सम्यङ्निरूपि-तस्तथाऽपि दृष्टदु खं निदिध्यासनमन्तरेण न निवर्तत इति तत्प्रधानं प्रकरणमारभमाण पूर्वं तावत्कृताकृतसंताप-निमित्त कर्तृत्वाभिमानं त्याजयितुं प्रथममध्यायमारभते । तत्रापि युक्तिशतेनापि कर्तृत्वाभिमानस्य दुस्त्यजत्वं युधिष्ठिरप्रश्नमुखेनावतारयति-**युधिष्ठिर उवाच शमो बहुविधाकार इत्यादिना** । शम. शोकतरणोपाय. बहुविध कालादृष्टेश्वराद्यधीनोऽयं लोको न किंचित्कर्तुमीष्ट इत्यादिविवेकप्रकार बह्वाकार सर्वसकल्पसंन्यासादिस्वरूप सूक्ष्मो निर्विकल्पक उक्त । तथापि तत्साक्षात्काराभावात् कृतं गोत्रवधाख्यं पापं मा तप्त्येव तस्मात्कर्तृत्वादिदोषमपनेतुं निदिध्यासनाधिकारासिद्धयर्थं चेत शुद्धिकरान्धर्मान् ब्रूहि यैर्विना पूर्वोक्तं सर्वं हृदये नावतिष्ठत इत्यभिप्राय· ॥१॥

अस्मिन्निति। यद्धि अचिंतितमेव जायते तत्कालादिकृत-

शराचितशरीरं हि तीव्रव्रणमुदीक्ष्य च ।
शर्म नोपलभे वीर दुष्कृतान्येव चिन्तयन् ३
रुधिरेणावसिक्ताङ्गं प्रस्रवन्तं यथाचलम् ।
त्वां दृष्ट्वा पुरुषव्याघ्र सीदे वर्षाम्बिवांबुजम् ४
अतः कष्टतरं किं नु मत्कृते यत्पितामहः ।
इमामवस्थां गमितः प्रत्यमित्रै रणाजिरे ॥ ५
तथा चान्ये नृपतयः सहपुत्राः सबान्धवाः ।
मत्कृते निधनं प्राप्ताः किं नु कष्टतरं ततः ६
वयं हि धार्तराष्ट्राश्च कालमन्युवशंगताः ।
कृत्वेदं निन्दितं कर्म प्राप्स्यामः कां गतिं नृप
इदं तु धार्तराष्ट्रस्य श्रेयो मन्ये जनाधिप ।
इमामवस्थां संप्राप्तं यदसौ त्वां न पश्यति ८
सोऽहं तव ह्यन्तकरः
सुहृद्वधकरस्तथा ।
न शान्तमधिगच्छामि
पश्यंस्त्वां दुःखितं क्षितौ ॥ ९
दुर्योधनो हि समरे सहसैन्यः सहानुजः ।
निहतः क्षत्रधर्मेऽस्मिन्दुरात्मा कुलपांसनः ॥
न स पश्यति दुष्टात्मा
त्वामद्य पतितं क्षितौ ।
अतः श्रेयो मृत मन्ये
नेह जीवितमात्मनः ॥ ११
अहं हि समरे वीर
गमितः शत्रुभिः क्षयम् ।
अभविष्यं यदि पुरा
सह भ्रातृभिरच्युत ॥ १२
न त्वामेवं सुदुःखार्तमद्राक्षं सायकार्दितम् ।
नूनं हि पापकर्माणो धात्रा सृष्टाः स्म हे नृप
अन्यस्मिन्नापे लोके वै
यथा मुच्येम किल्बिषात् ।
तथा प्रशाधि मां राजन्
मम चेदिच्छसि प्रियम् ॥ १४
भीष्म उवाच ।
परतन्त्रं कथं हेतु-
मात्मानमनुपश्यसि ।
कर्मणां हि महाभाग
सूक्ष्मं ह्येतदतीन्द्रियम् ॥ १५
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
संवादं मृत्युगौतम्योः काललुब्धकपन्नगैः १६
गौतमी नाम कौन्तेय स्थविरा शमसंयुता ।
सर्पेण दष्टं स्वं पुत्रमपश्यदूनचेतनम् ॥ १७
अथ तं स्नायुपाशेन बद्ध्वा सर्पममर्षितः ।
लुब्धकोऽर्जुनको नाम गौतम्याः समुपानयत्
स चाब्रवीदयं ते स पुत्रहा पन्नगाधमः ।
ब्रूहि क्षिप्रं महाभागे वध्यतां केन हेतुना १९
अग्नौ प्रक्षिप्यतामेष छिद्यतां खण्डशोऽपि वा
न ह्ययं बालहा पापश्चिरं जीवितुमर्हति ॥ २०
गौतम्युवाच ।
विसृजैनमबुद्धिस्त्व-
मवध्योऽर्जुनक त्वया ।
को ह्यात्मान गुरुं कुर्यात्
प्राप्तक्षयमविचिन्तयन् ॥ २१
प्लवन्ते धर्मलघवो
लोकऽम्भसि यथा प्लवाः ।
मज्जन्ति पापगुरवः
शस्त्रं स्वकृतमेवोदके ॥ २२

मिति मत्वा न धीमता शोकाय भवति यत्तु बुद्धिपूर्वं पापं कृतं तत्कथं मादृशान् आस्तिकान् शाब्दिकविवेकमात्रेण न तपेत् अपरोक्षस्य कर्तृत्वादिप्रत्ययस्य परोक्षेणाकर्तृत्वादिज्ञानेन निवर्तयितुमशक्यत्वादिति भाव ॥ २ ॥ एतदेव शोककारणं विवृणोति—**शरैरिति**। त्वामिति शेष ॥३॥ सीदे सीदामि ॥ ४ ॥ मत्कृते मन्निमित्तं प्रत्यमित्रै अमित्राणा प्रतिकूलैरस्मदीयैरर्जुनशिखण्डिप्रभृतिभि ॥५॥**वयं हीति**। हिंशब्दार्थे काल ईश्वर मन्यु क्रोध का गतिमूर्ध्वलोकं प्राप्स्यामो न कामपीत्यर्थ ॥७॥ अयशोग्रस्तानामस्माकं त्वयमपि लोको नष्टो न तु परेषामित्याह—**इदं त्वित्यादिना** ८ अभविष्यं ईश्वरश्चेत्स्याम्॥ १२ ॥ **अन्यस्मिन्निति**। जन्मान्तरेऽपि येन किल्बिषात् रागादिदोषान्मुच्येम तादृशं धर्मं ब्रूहि। शोकनाशकस्य तत्त्वज्ञानस्यानेकजन्मसाध्यत्वादिति भाव. ॥ १४ ॥ यदुक्तं स्वकृते का नु शांतिरिति तत्राह—**परेति** परतंत्र कलहेश्वराधीनमात्मानं त्वं कथं कर्मणा हेतुं पुण्यपापयो कारण अनुपश्यसि न कथंचिदात्मन कर्तृत्व संभवतीति भाव ।कुतस्त्यं हं करोमीत्यनुभव इत्याशंक्याह—**सूक्ष्म ह्येति**। आत्मन कर्तृत्वमकर्तृत्वं न मानसप्रत्यक्षं किं त्वतींद्रियं। मनस्तु चक्षुरादिवदृष्टं सदन्यथा संतमात्मानमन्यथा प्रतिपद्यत इति भाव ॥ १५ ॥ कर्मप्रयोजकं देहेंद्रियादिसंघात प्रयोज्यस्तयोश्च बीजाकुरवदन्योन्यजन्यजनकत्वं परिशेषात्तु आत्मनोऽकर्तृत्व सिद्धयतीत्यस्मिन्नर्थे आख्यायिकामाह—**अत्रापीति**॥१६॥ हेतुमेवाह—**अग्नाविति**॥२०॥ गुरुं पापभरेण नरके मज्जनयोग्यं प्राप्तव्यं लोकम्॥२१॥ **प्लवन्ते** दु खर्णवं तरन्ति **मज्जन्ति** च तत्रैव ॥२२॥

हत्वा चैनं नामृतः स्यादयं मे
जीवत्यस्मिन्कोऽत्ययः स्यादयं ते।
अस्योत्सर्गे प्राणयुक्तस्य जन्तो-
र्मृत्योर्लोकं को नु गच्छेदनन्तम् ॥२३
लुब्धक उवाच।
जानाम्यहं वेवि गुणागुणज्ञे
सर्वार्तियुक्ता गुरवो भवन्ति।
स्वस्थस्यैते तूपदेशा भवन्ति
तस्मात्क्षुद्रं सर्पमेनं हनिष्ये ॥ २४
शमार्थिनः कालगतिं वदन्ति
सद्यः शुचं त्वर्थविदस्त्यजन्ति।
×श्रेयःक्षयं शोचति नित्यमोहा-
त्तस्माच्छुचं मुञ्च हते भुजङ्गे ॥ २५
गौतम्युवाच।
आर्तिर्नैवं विद्यतेऽस्मद्विधानां
धर्मात्मानः सर्वदा सज्जना हि।
नित्यायस्तो बालकोऽप्यस्य तस्मा-
दीशे नाहं पन्नगस्य प्रमाथे ॥ २६
न ब्राह्मणानां कोपोऽस्ति
कुतः कोपाच्च यातनाम्।
मार्दवात्क्षम्यतां साधो
मुच्यतामेष पन्नगः ॥ २७
लुब्धक उवाच।
हत्वा लाभः श्रेय एवाव्ययः स्या-
ल्लभ्यो लाभ्यः स्याद्बलिभ्यः प्रशस्तः।
कालाकाङ्क्षी यस्तु सत्यो भवेत
श्रेयोलाभः कुत्सितेऽस्मिन्न ते स्यात्
गौतम्युवाच।
का नु प्राप्तिर्गृह्य शत्रुं निहत्य
का कामाप्तिः प्राप्य शत्रुं न मुक्त्वा।
कस्मात्सौम्याहं न क्षमे नो भुजङ्गे
मोक्षार्थे वा कस्य हेतोर्न कुर्याम् २९
लुब्धक उवाच।
अस्मादेकाद्बहवो रक्षितव्या
नैको बहुभ्यो गौतमि रक्षितव्यः।
कृतागसं धर्मविदस्त्यजन्ति
सरीसृपं पापमिमं जहि त्वम् ॥ ३०
गौतम्युवाच।
नास्मिन् हत पन्नगे पुत्रको मे
सम्प्राप्स्यते लुब्धक जीवितं वै।
गुणं चान्य नास्य वधे प्रपश्ये
तस्मात्सर्पं लुब्धक मुञ्च जीवम् ॥३१
लुब्धक उवाच।
वृत्रं हत्वा देवराट् श्रेष्ठभाग्वै
यज्ञं हत्वा भागमवाप चैव।
शूली देवो देवपुत्तं चर त्वं
क्षिप्र सर्पं जहि मा भूत्ते विशङ्का ३२
भीष्म उवाच।
असकृत्प्रोच्यमानाऽपि
गौतमी भुजगं प्रति।
लुब्धकेन महाभागा
पापे नैवाकरोन्मतिम् ॥ ३३
ईषदुच्छ्वसमानस्तु कृच्छ्रात्सस्तभ्य पन्नगः।
उत्ससर्ज गिरं मन्दां मानुषीं पाशपीडितः॥

हत्वेति।।करणत्व क्त्वार्थः। भुक्त्वैव हि तृप्तो न तु पीत्वेतिवत्। एनं हत्वा एतस्य हननेनाय मे पुत्रो नामृत स्यात्किंतु मृत स मृत एव अस्मिन् जीवति ते तव कोऽयं अत्ययो नाश स्यान्न कोपीत्यर्थः। उत्सर्गे प्राणोत्सर्गे मृत्योर्लोकं नरकम् ॥ २३ ॥ सर्वार्तियुक्ता सर्वेषा पीडया पीडिता स्वस्थस्यैव न तु दुःखितस्य ॥ २४ ॥ **शमेति**। शमयुक्ता कालेनैवायं नाशित इति मत्वा शोकं त्यजन्ति। अर्थविदः प्रतीकारज्ञा शत्रु हत्वैव सद्य शोकं त्यजन्तीत्यर्थः अन्यस्तु श्रेय क्षय सुखनाशं नित्यं मोहाच्छोचति ॥ २५ ॥ आर्तिः पुत्रशोकजा पीडा नित्यायस्तो नित्यमृत न ईशे न समर्थोऽस्मि ॥ २६ ॥ यातना पीडा परस्य ते कुत कुर्युर्न कुताश्चिदित्यर्थः। मार्दवात् मार्दवमवलम्ब्य ॥ २७ ॥ श्रेय परलोकहितं तदेव अव्ययो लाभ स च शत्रून् हत्वैव लभ्य इत्यध्याहृत्य योज्यम्। यथा यजमान पशुं निघ्नन्पशुमात्मानं च स्वर्गे नयत्येवं शूर परं स्वं चेत्यर्थः। ततश्च लाभ्यो लाभार्हः पुमाश्च बलिभ्य सर्वेभ्य प्रशस्त श्रेष्ठश्च स्यात्, शत्रुवधाल्लोकत्रयेऽपि मान्यो भवतीत्यर्थः। यस्तु अस्मिन्सर्पे कुत्सिते बहूपकारिणि हन्तव्ये कालाकाङ्क्षाभोऽस्य मरणादिष्टसिद्धिं स एव सत्यः शाश्वत श्रेयोलाभ स च ते तव एन हन्तुमनिच्छन्न्या न स्यात्, तस्माद्धन्तव्य एवायमित्यर्थः ॥ २८ ॥ गृह्य निगृह्य कामाप्ति इष्टलाभ न मुक्त्वा दृढं बद्ध्वा नोऽस्माकमशत्रौ भुजगे कस्मादहं न क्षमे अपि तु क्षमे एव। मोक्षणार्थ श्रेय कुर्यामेवेत्यर्थः ॥२९॥ त्यजन्ति नाशयन्ति ३० मे पुत्रको जीवतं न संप्राप्स्यते गुणं पुण्यं जीवं जीवन्तम् ॥३१॥ शूली यज्ञं हत्वेति संबध ॥३२॥ संस्तभ्य धैर्यमालंब्य ॥३४॥ ×'श्रिय क्षय शोचता नित्यशोहि' इतिपा.

सर्प उवाच ।
को न्वर्जुनक दोषोऽत्र विद्यते मम बालिश
अस्वतन्त्रं हि मां मृत्युर्विवशं यदचूचुदत् ३५
तस्यायं वचनाद्दष्टो न कोपेन न काम्यया ।
तस्य तत्किल्बिषं लुब्ध विद्यते यदि किल्बिषं
लुब्धक उवाच ।
यद्यन्यवशगेनेदं कृतं ते पन्नगाशुभम् ।
कारणं वै त्वमप्यत्र तस्मात्त्वमपि किल्बिषी॥
मृत्पात्रस्य क्रियायां हि दण्डचक्रादयो यथा ।
कारणत्वे प्रकल्प्यन्ते तथा त्वमपि पन्नग॥ ३८
किल्बिषी चापि मे वध्यः
किल्बिषी चासि पन्नग ।
आत्मानं कारणं ह्यत्र
त्वमाख्यासि भुजङ्गम ॥ ३९
सर्प उवाच ।
सर्व एते ह्यस्ववशा दण्डचक्रादयो यथा ।
तथाऽहमपि तस्मान्मे नैष दोषो मतस्तव ॥
अथवा मतमेतत्ते तेऽप्यन्योन्यप्रयोजकाः ।
कार्यकारणसन्देहो भवत्यन्योन्यचोदनात्॥
एवं सति न दोषो मे
नास्मि वध्यो न किल्बिषी ।
किल्बिषं समवाये स्या-
न्मन्यसे यदि किल्बिषम् ॥ ४२
लुब्धक उवाच ।
कारणं यदि न स्याद्वै
न कर्ता स्यात्त्वमप्युत ।
विनाशकारणं त्वं च
तस्माद्वध्योऽसि मे मतः ॥ ४३
असत्यपि कृते कार्ये नेह पन्नग लिप्यते ।
तस्मान्नात्रैव हेतुः स्याद्वध्यः किं बहु मन्यसे ॥
सर्प उवाच ।
कार्याभावे क्रिया न स्या-
त्सत्यसत्यपि कारणे ।
तस्मात्समेऽस्मिन्हेतौ मे
वाच्यो हेतुर्विशेषतः ॥ ४५
यद्यहं कारणत्वेन मतो लुब्धक तत्त्वतः ।
अन्यः प्रयोगे स्यादत्र किल्बिषी जन्तुनाशने
लुब्धक उवाच ।
वध्यस्त्वं मम दुर्बुद्धे बालघाती नृशंसकृत ।
भाषसे किं बहु पुनर्वध्यः सन्पन्नगाधम ॥ ४७
सर्प उवाच ।
यथा हवींषि जुह्वाना मखे वै लुब्धकर्त्विजः
न फलं प्राप्नुवन्त्यत्र फलयोगे तथा ह्यहम् ४८
भीष्म उवाच ।
तथा ब्रुवति तस्मिंस्तु पन्नगे मृत्युचोदिते ।
आजगाम ततो मृत्युः पन्नगं चाब्रवीदिदम् ॥

अचुचूदत् प्रेरितवान् ॥ ३५ ॥ किल्बिषं चेदस्ति तर्हि प्रयोक्तुरेव न प्रयोज्यस्य मम शरस्येवेत्यर्थ ॥३६॥ **यदीति**। प्रयोजकवत्प्रयोज्योऽपि वधकारणत्वाद्वध्य एवेत्यर्थ ॥३७॥ **मृदिति** । यद्यपि दंडादिवत्त्व अन्यवशस्तथाऽपि चेतनत्वात्किल्बिषीत्यवश्यं वध्योऽसीत्यर्थ ॥ ३८॥ **सर्व इति** चेतनत्वेपि गजादिवत्परप्रेर्यत्वेनावशत्वाद्दण्डादितुल्यत्वमेव ममेत्यर्थ ॥ ४० ॥ **अथवेति**। तेऽपि आयुधादयोऽपि। अयमर्थ —आयुधं हि अयस्कान्तवत्प्रहर्तार प्रयोजयति तेनायुधकर्तापि प्रयोजकस्तस्य चार्यं कारयिता प्रहर्तुकाम प्रयोजक इत्यन्योन्यप्रयोज्यत्वान्न कस्यचिद्धन्तृत्वमित्यर्थ ॥४१॥ फलितमाह-**एवमिति**। चेतनत्वाद्वध्यत्वं मम चेन्मन्यसे तर्ह्येकस्मिन्वधकार्ये साक्षात्परंपरया बहूना प्रयोजकत्वमस्तीति सर्वेषु यथाविभाग किल्बिषं न मय्येवेत्यर्थ। समवाये समुदाये ॥४२॥ कर्ता प्रस्तुतक्रियाया त्वमेव वध्योऽसीत्यर्थ ॥४३॥ **असतीति**। यत कृतेऽपि असति दुष्टे कार्ये दोषे हेतु कर्ता न लिप्यते तव मते। तस्मात् चोरादिरत्रैव राज्ञा वध्य प्रायश्चित्ती च न स्यात्। तथा च शास्त्रानर्थक्यं प्रेत्य खादन्ति ते च तानित्यादेरप्रामाण्यं च स्यादिति भाव ॥ ४४ ॥ **कार्येति**। कारणे कर्तरि सति कुठारोद्यमनादिकार्येण छिदिक्रिया जायते असत्यपि कर्तरि तरुशाखान्तनिघर्षेण कार्येण तज्जेनाग्निना वनदाहक्रिया जायते। तस्माच्छाखाया इव ममापि कर्तृत्वं अप्रयोजकत्वान्न दोषहेतु विशेषाभावादित्यर्थः ॥ ४५ ॥ यदीति कारणत्वेन प्रेयाज्यकर्तृत्वेन तव मतोहं तर्हि शाखाया वायुरिव ममापि प्रयोगे प्रवर्तनेऽन्योस्ति कर्ता स एव जंतुनाशने किल्बिषी भवेत्। वस्तुतस्तु वायोरिव तस्यापि न किल्बिषित्वमिति भाव ॥ ४६ ॥ वध्य इति। धीपूर्वकारी हिंस्रस्वभावस्त्वं कृतैर्वैतृक्षसाधर्म्यमात्मनो ब्रुवाणो दुर्बुद्धित्वाद्वद्ध्योऽसीत्यर्थ ॥४७॥ एवमृत्विगादिवदन्यप्रेर्यत्वान्नाहं किल्बिषी किंतु मम प्रयोजक एव। शास्त्रफलं प्रयोक्तरीति न्यायादिति सर्प उवाच-**यथेति** ॥४८॥ यथा स्तेनं गजो हन्ति गज च महामात्र प्रेरयति महामात्रं च प्रभु प्रयुंक्ते प्रभुं च स्तेनापराध इति स्तेन स्वापराधेनव हन्यते। न त्रि राजमहामात्रगजाना दोषगंधोऽस्ति। एवं

मृत्युरुवाच ।
प्रचोदितोऽहं कालेन पन्नग त्वामचूचुदम् ।
विनाशहेतुर्नास्य त्वमहं न प्राणिनः शिशोः
यथा वायुर्जलधरान्विकर्षति ततस्ततः ।
तद्वज्जलदवत्सर्प कालस्याहं वशानुगः ॥ ५१
सात्त्विका राजसाश्चैव तामसा ये च केचन ।
भावाः कालात्मकाः सर्वे प्रवर्तन्ते ह जन्तुषु
जङ्गमाः स्थावराश्चैव दिवि वा यदि वा भुवि
सर्वे कालात्मकाः सर्प कालात्मकमिदं जगत्
प्रवृत्तयश्च लोकेऽस्मिंस्तथैव च निवृत्तयः ।
तासां विकृतयो याश्च सर्वे कालात्मक स्मृतं
आदित्यश्चन्द्रमा विष्णुरापो वायुः शतक्रतुः ।
अग्निः खं पृथिवी मित्रः पर्जन्यो वसवोऽदितिः
सरितः सागराश्चैव भावाभावौ च पन्नग ।
सर्वे कालेन सृज्यन्ते ह्रियन्ते च पुनः पुनः ५६
एवं ज्ञात्वा कथ मां त्वं सदोषं सर्प मन्यसे ।
अथ चैवगते दोषे मयि त्वमपि दोषवान् ५७
सर्प उवाच ।
निर्दोषं दोषवन्तं वा न त्वां मृत्यो ब्रवीम्यहम्
त्वयाऽहं चोदित इति ब्रवीम्येतावदेव तु ५८
यदि काले तु दोषोऽस्ति यदि तत्रापि नेष्यते
दोषो नैव परीक्ष्यो मे न ह्यत्राधिकृता वयम्
निर्मोक्षस्त्वस्य दोषस्य मया कार्यो यथा तथा
मृत्योरपि न दोषः स्यादिति मेऽत्र प्रयोजनम्
भीष्म उवाच ।
सर्पोऽथार्जुनकं प्राह शृणु ते मृत्युभाषितम् ।
नानागस मां पाशेन सन्तापयितुमर्हसि ॥ ६१
लुब्धक उवाच ।
मृत्योः श्रुतं मे वचनं तव चैव भुजङ्गम ।
नैव तावददोषत्वं भवति त्वयि पन्नग ॥ ६२
मृत्युस्त्वं चैव हेतुर्हि बालस्यास्य विनाशने ।
उभयं कारणं मन्ये न कारणमकारणम् ॥ ६३
धिङ्मृत्युं च दुरात्मानं क्रूरं दुःखकरं सताम्
त्वां चैवाहं वधिष्यामि पापं पापस्य कारणम्
मृत्युरुवाच ।
विवशौ कालवशगावावां निर्दिष्टकारिणौ
नावां दोषेण गन्तव्यौ यदि सम्यक्प्रपश्यसि
लुब्धक उवाच ।
युवामुभौ कालवशौ यदि मे मृत्युपन्नगौ ।
हर्षक्रोधौ यथा स्यातामेतदिच्छामि वेदितुम्
मृत्युरुवाच ।
या काचिदेव चेष्टा स्यात्सर्वा कालप्रचोदिता
पूर्वमेवैतदुक्तं हि मया लुब्धक कालतः ॥ ६७
तस्मादुभौ कालवशावावां निर्दिष्टकारिणौ ।
नावां दोषेण गन्तव्यौ त्वया लुब्धक कर्हिचित्
भीष्म उवाच ।
अथोपगम्य कालस्तु तस्मिन् धर्मार्थसंशये
अब्रवीत्पन्नग मृत्युं लुब्धं चार्जुनकं तथा ॥६९
काल उवाच ।
न ह्यहं नाप्ययं मृत्युर्नायं लुब्धक पन्नगः ।
किल्बिषी जन्तुमरणे न वयं हि प्रयोजकाः ॥

भीष्मादीनिघ्नतोऽपि तत्र गजस्येव न दोषोऽस्तीति शेषग्रन्थतात्पर्यम्। मृत्यु प्राणानामपहर्त्री देवता ॥ ४९ ॥ कालेन ईश्वरेण ॥ ५० ॥ कालात्मका कालस्येव आत्मा स्वभावो येषा ते कालानुसारिण इत्यर्थ ॥५२॥ भावाभावौ ऐश्वर्यानैश्वर्ये ॥ ५६ ॥ आर्त्विज्यमित्यौडुलोमिरिति न्यायेन आत्मने च यजमानाय च य काम कामयते तमागायतीति श्रुतेश्चात्मवदृत्विजोऽपि फलाशभाक्त्वमतो मृत्युसर्पौ वधस्य कारणं सन्तौ न अकारणं भवत इत्याह-**मृत्युरिति**॥६३॥ आवा दोषेण द्वेषादिना युक्ता त्वया न मन्तव्यौ किंतु विवशौ अत ह्रतोरप्यावयोर्गजमहामात्रयोरिव न किल्बिषमस्तीत्याहतु -**विवशाविति** ऋत्विजोऽपि फलरागिण एव फलमस्ति न विरक्तस्येति भाव ॥ ६५ ॥ **युवामिति**। भो मृत्युपन्नगौ यदि युवा कालवशौ तर्हि मे मम तटस्थस्य परोपकर्तरि हर्ष अपकर्त्रोश्च युवयोरुपरि द्वेषो वा यथा स्याता तथा ब्रूतम्। एतत् अहं वेदितुमिच्छामित्यध्याहारपूर्वकं योज्यम्। एवं सर्वस्य परवशत्वे उपकर्त्रपकर्त्रोः स्तुतिनिंदे न स्यातामिति भाव ॥ ६६ ॥ परमार्थत परिहारमाह— **येति**। ईश्वराधीनो जन सदसद्वा कुर्वाणो न स्तुत्यौ न वा निंद्य इति भाव ॥६७॥ व्यवहारतस्तु मृत्यु पूर्वोक्तमेव परिहारमाह-**तस्मादिति**। दोषेण युक्ताविति शेष। गन्तव्यौ ज्ञातव्यौ यो हि रागादिमान् हन्ति स पापेन लिप्यते त प्रति शास्त्र प्रवर्तते यस्तु न तथा नासौ दोषभाग्भवति यथोक्तं भगवता 'यस्य नाहंकृतो भावो बुद्धिर्यस्य न लिप्यते । हत्वाऽपि स इमाँल्लोकान्न हन्ति न निबध्यते' इति ॥ ६८ ॥ प्राणिकर्मानुरोधात्मदसद्वा फल ददत् ईश्वरस्तत्प्रयुक्ता अन्ये वा न वैषम्यादिभाजो भवन्तीत्याह-**अथेत्यादिना**। धर्मस्यार्थ फलं तत्र विषये सर्वस्य कर्तु परवशत्वाद धर्मवद्धर्मोपि किं फलं ददाति न वेति संशये छेत्तव्य अब्रवीत्कालः ॥ ६९ ॥ सज्ञिनामेव धर्माधर्मफल भवति न त्वसज्ञानामस्माकमित्याशयवानाह-**न हीति** ॥ ७० ॥

अकरोद्यदयं कर्म तस्मोऽर्जुनक चोदकम् ।
विनाशहेतुर्नान्योऽस्य वध्यतेऽयं स्वकर्मणा ॥
यदनेन कृतं कर्म तेनायं निधनं गतः ।
विनाशहेतु· कर्मास्य रूवें कर्मवशा वयम् ७२
कर्मदायादवाँल्लोकः कर्मसम्बन्धलक्षणः ।
कर्माणि चोदयन्तीह यथाऽन्योन्यं तथा वयम्
यथा कृतिपिण्डतः कर्ता कुरुते यद्यदिच्छति
एवमात्मकृतं कर्म मानव· प्रतिपद्यते ॥ ७४
यथा च्छायातपौ नित्य
सुसम्बद्धौ निरन्तरम् ।
तथा कर्म च कर्ता च
सबद्धावात्मकर्मभिः ॥ ७५
एवं नाहं न वै मृत्युर्न सर्पो न तथा भवान् ।
न चेयं ब्राह्मणी वृद्धा शिशुरेवात्र कारणम्७६
तस्मिंस्तथा ब्रुवाणे तु ब्राह्मणी गौतमी नृप ।
स्वकर्मप्रत्ययाँल्लोकान्मत्वाऽर्जुनकमब्रवीत् ७७

गौतम्युवाच ।
नैव कालो न भुजगो न मृत्युरिह कारणम्
स्वकर्मभिरयं बालः कालेन निधनं गतः ७८
मया च तत्कृतं कर्म येनायं मे मृतः सुतः ।
यातु कालस्तथा मृत्युर्मुञ्चार्जुनक पन्नगम्॥ ७९

भीष्म उवाच ।
ततो यथागतं जग्मुर्मृत्युः कालोऽथ पन्नगः
अभूद्विशोकोऽर्जुनको विशोका चैव गौतमी ॥
एतच्छ्रुत्वा शमं गच्छ मा भूः शोकपरो नृप ।
स्वकर्मप्रत्ययाँल्लोकान् सर्वे गच्छन्ति वै नृप
नैव त्वया कृतं कर्म नापि दुर्योधनेन वै ।
कालेनैतत्कृतं विद्धि निहता येन पार्थिवाः ॥

वैशम्पायन उवाच ।
इत्येतद्वचनं श्रुत्वा बभूव विगतज्वरः ।
युधिष्ठिरो महातेजाः पप्रच्छेदं च धर्मवित्८३

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि गौतमीलुब्धककालमृत्युकालसंवादे प्रथमोऽध्यायः ॥ १ ॥



२

युधिष्ठिर उवाच ।
पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
श्रुतं मे महदाख्यानमिदं मतिमतां वर ॥ १
भूयस्तु श्रोतुमिच्छामि धर्मार्थसहितं नृप ।
कथ्यमानं त्वया किञ्चित्तन्मे व्याख्यातुमर्हसि
केन मृत्युर्गृहस्थेन धर्ममाश्रित्य निर्जितः ।
इत्येतत्सर्वमाचक्ष्व तत्त्वेनापि च पार्थिव ॥ ३

भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यथा मृत्युर्गृहस्थेन धर्ममाश्रित्य निर्जितः ४
मनोः प्रजापते राजन्निक्ष्वाकुरभवत्सुतः ।
तस्य पुत्रशतं जज्ञे नृपतेः सूर्यवर्चसः ॥ ५
दशमस्तस्य पुत्रस्तु दशाश्वो नाम भारत ।
माहिष्मत्यामभूद्राजा धर्मात्मा सत्यविक्रमः ६
दशाश्वस्य सुतस्त्वासीद्राजा परमधार्मिकः ।
सत्ये तपसि दाने च यस्य नित्यं रतं मनः ७
मदिराश्व इति ख्यातः पृथिव्यां पृथिवीपतिः ।
धनुर्वेदे च वेदे च निरतो योऽभवत्सदा ८
मदिराश्वस्य पुत्रस्तु द्युतिमान्नाम पार्थिवः ।
महाभागो महातेजा महासत्त्वो महाबलः ९

कर्मैव दायादः पुत्रवत्तारक तद्वान् कर्मसबंध कर्मफलयोग तदेव लक्षणं पुण्यपापवताज्ञापकं यस्य तथा ॥ ७३ ॥ कर्मैव प्रत्यय· कारणं येषा तान् लोकान् स्वर्गनरकादीन्॥७७॥तत्कर्म पुत्रशोकप्रदम् ॥ ७९ ॥ आख्यायिकाफलमाह द्वाभ्या— एतदिति ॥८१॥ इति श्रीमहाभारते आनु० प० दानधर्मपर्वणि नैलकण्ठीये भारतभावदीपे प्रथमोऽध्याय ॥१॥

२

अनिवार्यस्यापि मृत्योर्जेयमूर्ध्वरेता करोति गृहस्थस्त्वतिथिभक्त्यैव तं जयतीत्यातिथ्यप्रशंसार्थोऽयमध्याय **पितामहेत्यादिः** ॥१॥ धर्मेणैव अर्थ प्रयोजन यत्र तादृशया कथया सहित किञ्चिदाख्यानं श्रोतुमिच्छामीत्यर्थ ॥ २ ॥ तत्त्वेन याथातथ्येन। न त्वात्मवपोत्खननादिवदभूतार्थत्वेन३

पुत्रो धृतिमतस्त्वासीद्राजा परमधार्मिकः।
सर्वलोकेषु विख्यातः सुधीरो नाम नामतः॥
धर्मात्मा कोषवांश्चापि देवराज इवापरः।
सुवीरस्य तु पुत्रोऽभूत्सर्वसंग्रामदुर्जयः॥ ११
स दुर्जय इति ख्यातः रूर्वशरूभृतां वरः।
दुर्जयस्येन्द्रवपुषः पुत्रोऽग्निसदृशद्युतिः॥ १२
दुर्योधनो नाम महान् राजा राजर्षिसत्तमः।
तस्येन्द्रसमवीर्यस्य संग्रामेष्वनिवर्तिनः १३
विषये वासवस्तस्य सम्यगेव प्रवर्षति।
रत्नैर्धनैश्च पशुभिः सस्यैश्चापि पृथग्विधैः १४
नगरं विषयश्चास्य प्रतिपूर्णस्तदाऽभवत्।
न तस्य विषये चाभूत्कृपणो नापि दुर्गतः १५
व्याधितो वा कृशो वाऽपि
तस्मिन्नाभून्नरः क्वचित।
सुदक्षिणो मधुरवागनसूर्युर्जितेन्द्रियः।
धर्मात्मा चानृशंसश्च
विक्रान्तोऽथाविकत्थनः। १६
यज्वा च दान्तो मेधावी
ब्रह्मण्यः सत्यसङ्गरः।
न चावमन्ता दाता च
वेदवेदाङ्गपारगः॥ १७
तं नर्मदा देवनदी पुण्या शीतजला शिवा।
चकमे पुरुषव्याघ्र स्वेन भावेन भारत॥ १८
तस्यां जज्ञे तदा नद्यां कन्या राजीवलोचना
नाम्ना सुदर्शना राजन् रूपेण च सुदर्शना १९
तादृग्रूपा न नारीषु भूतपूर्वा युधिष्ठिर।
दुर्योधनसुता यादृगभवद्वरवर्णिनी॥ २०
तामग्निश्चकमे साक्षाद्राजकन्यां सुदर्शनाम्।
भूत्वा च ब्राह्मणो राजन्वरयामास तं नृपम्
दरिद्रश्चासवर्णश्च ममायामिति पार्थिवः।
न दित्सति सुतां तस्मै तां विप्राय सुदर्शनाम्
ततोऽस्य वितते यज्ञे नष्टोऽभूद्धव्यवाहनः।
ततः सुदुःखितो राजा वाक्यमाह द्विजांस्तदा
दुष्कृतं मम किं नु स्याद्भवतां वा द्विजर्षभाः
येन नाश जगामाग्निः कृतं वा पुरुषेष्विव २४
न ह्यल्पं दुष्कृतं नोस्ति येनाग्निर्नाशमागतः
भवतां चाथवा मह्यं तत्त्वेनैतद्विमृश्यताम् २५
तत्र राज्ञो वचः श्रुत्वा विप्रास्ते भरतर्षभ।
नियता वाग्यताश्चैव पावकं शरणं ययुः २६
तान् दर्शयामास तदा भगवान् हव्यवाहनः
स्वं रूपं दीप्तिमत्कृत्वा शरदर्कसमद्युतिः २७
ततो महात्मा तानाह दहनो ब्राह्मणर्षभान्।
वरयाम्यात्मनोऽर्थाय दुर्योधनसुतामिति॥ २८
ततस्ते कल्यमुत्थाय तस्मै राज्ञे न्यवेदयन्।
ब्राह्मणा विस्मिताः सर्वे यदुक्तं चित्रभानुना
ततः स राजा तच्छ्रुत्वा वचनं ब्रह्मवादिनाम्।
अवाप्य परमं हर्षं तथेति प्राह बुद्धिमान्॥ ३०
अयाचत च तं शुल्कं भगवन्तं विभावसुम्।
नित्यं सान्निध्यमिह ते चित्रभानो भवेदिति
तमाह भगवानग्निरेवमस्त्विति पार्थिवम्।
ततः सान्निध्यमद्यापि माहिष्मत्यां विभावसोः
दृष्ट हि सहदेवेन दिशं विजयता तदा।
ततस्ता समलंकृत्य कन्यामाहृतवाससम् ३३
ददौ दुर्योधनो राजा पावकाय महात्मने।
प्रतिजग्राह चाग्निस्तु राजकन्यां सुदर्शनाम्
विधिना वेददृष्टेन वसोर्धारामिवाध्वरे।
तस्या रूपेण, शीलेन, कुलेन, वपुषा, श्रिया,
अभवत्प्रीतिमानग्निर्गर्भे चास्या मनो दधे।
तस्याः समभवत्पुत्रो नाम्नाऽऽग्नेयः सुदर्शनः
सुदर्शनस्तु रूपेण पूर्णेन्दुसदृशोपमः।
शिशुरेवाध्यगात्सर्वं परं ब्रह्म सनातनम् ३७
अथौघवान्नाम नृपो नृगस्यासीत्पितामहः।
तस्यौघवती कन्या पुत्रश्चौघरथोऽभवत ३८
तामोघवान् ददौ तस्मै स्वयमोघवतीं सुताम्
सुदर्शनाय विदुषे भार्यार्थे देवरूपिणीम् ३९
स गृहस्थाश्रमरतस्तया सह सुदर्शनः।
कुरुक्षेत्रेऽवसद्राजन्नोघवत्या समन्वितः॥ ४०
गृहस्थश्चावजेष्यामि मृत्युमित्येव स प्रभो।
प्रतिज्ञामकरोद्धीमान् दीप्ततेजा विशांपते ४१
तामथौघवती राजन् स पावकसुतोऽब्रवीत्।
अतिथेः प्रतिकूलं ते न कर्तव्यं कथञ्चन॥ ४२

दुर्गतः दरिद्रि ॥ १५ ॥ चकमे कामयामास ॥ २१ ॥ असवर्ण अक्षात्रिय न दित्सति न दातुमिच्छति ॥ २२ ॥ विततेत्रेताग्निसाध्ये नष्ट अदर्शनं गत ॥२३॥ कल्यं प्रात ॥२९॥ दिश दक्षिणां विजयता विजेतुमिच्छता आहृतं नवं वासो यस्यास्ताम्॥३३॥ वसोर्धारा सन्तता घृतधाराम्॥३५॥ गर्भे पुत्रप्रदाने ॥३६॥ दृशाभ्या दृभ्या सहितं सदृशं वक्त्रं पूर्णेन्दोरेव वक्त्रे उपमा सादृश्य यस्य पूर्णेन्दुसदृशोपम ॥३७॥ गृहस्थश्च गृहस्थ एव ४१ प्रतिज्ञामेवाह–अतिथेरिति४२

येन येन च तुष्येत नित्यमेव त्वयाऽतिथिः ।
अध्यात्मनः प्रदानेन न ते कार्या विचारणा
एतद्व्रतं मम सदा हृदि संपरिवर्तते ।
गृहस्थानां च सुश्रोणि नातिथेर्विद्यते परम् ॥
प्रमाणं यदि वामोरु वचस्ते मम शोभने ।
इदं वचनमव्यग्रा हृदि त्वं धारयेः सदा ४५
निष्क्रान्ते मयि कल्याणि तथा संनिहितेऽनघे
नातिथिस्तेऽवमन्तव्यः प्रमाणं यद्यहं तव॥४६
तमब्रवीदोघवती तथा मूर्ध्नि कृताञ्जलिः ।
न मे त्वद्वचनात्किंचिन्न कर्तव्यं कथञ्चन ४७
जिगीषमाणस्तु गृहे तदा मृत्युः सुदर्शनम् ।
पृष्ठतोऽन्वगमद्राजन्नन्ध्रान्वेषी तदा सदा ४८
इध्मार्थे तु गते तस्मिन्नग्निपुत्रे सुदर्शने।
अतिथिर्ब्राह्मणः श्रीमांस्तामाहौघवती तदा
आतिथ्यं कृतमिच्छामि त्वयाऽद्य वरवर्णिनि
प्रमाणं यदि धर्मस्ते गृहस्थाश्रमसंमतः ॥ ५०
इत्युक्त्वा तेन विप्रेण राजपुत्री यशस्विनी ।
विधिना प्रतिजग्राह वेदोक्तेन विशांपते ५१
आसनं चैव पाद्यं च तस्मै दत्वा द्विजातये ।
प्रोवाचौघवती विप्रं केनार्थः किं ददामि ते ॥
तामब्रवीत्ततो विप्रो राजपुत्री सुदर्शनाम् ।
त्वया ममार्थः कल्याणि निर्विशङ्कैतदाचर ।
यदि प्रमाणं धर्मस्ते गृहस्थाश्रमसंमतः ।
प्रदानेनात्मनो राज्ञि कर्तुमर्हसि मे प्रियम् ५४
स तया छन्द्यमानोऽन्यैरीप्सितैर्नृपकन्यया ।
नान्यमात्मप्रदानात्स तस्या वव्रे वरं द्विजः ५५
सा तु राजसुता स्मृत्वा भर्तुर्वचनमादितः ।
तथेति लज्जमाना सा तमुवाच द्विजर्षभम् ५६
ततो विहस्य विप्रर्षिः सा चैवाथ विवेश ह ।
संस्मृत्य भर्तुर्वचनं गृहस्थाश्रमकाङ्क्षिणः ॥ ५७
अथेध्मानमुपादाय स पावकिरुपागमत् ।
मृत्युना रौद्रभावेन नित्यं बन्धुरिवान्वितः ॥
ततस्त्वाश्रममागम्य स पावकसुतस्तदा ।
तां व्याजहारौघवतीं क्वासि यातेति चासकृत
तस्मै प्रतिवचः सा तु भर्त्रे न प्रददौ तदा ।
कराभ्यां तेन विप्रेण स्पृष्टा भर्तृव्रता सती ॥
उच्छिष्टाऽस्मीति मन्वाना लज्जिता भर्तुरेव च
तूष्णीं भूताऽभवत्साध्वी न चोवाचाथ किञ्चन
अथ तां पुनरेवेदं प्रोवाच स सुदर्शनः ।
क्व सा साध्वी क्व सा याता गरीयः किमतो मम
पतिव्रता सत्यशीला नित्यं चैवाजवे रता ।
कथं न प्रत्युदेत्यद्य स्मयमाना यथा पुरा ६३
उटजस्थस्तु न विप्रः प्रत्युवाच सुदर्शनम् ।
अतिथिं विद्धि सप्राप्तं ब्राह्मणं पावकं च माम्
अनया छन्द्यमानोऽहं भार्यया तव सत्तम ।
तैस्तैरतिथिसत्कारैर्ब्रह्मन्नेषा वृता मया ॥ ६५
अनेन विधिना सेयं मामर्छति शुभानना ।
अनुरूपं यदत्रान्यत्तद्भवान्कर्तुमर्हति ॥ ६६
कूटमुद्गरहस्तस्तु मृत्युस्तं वै समन्वगात् ।
हीनप्रतिज्ञमत्रैन वधिष्यामीति चिन्तयन् ६७
सुदर्शनस्तु मनसा, कर्मणा, चक्षुषा, गिरा ।
त्यक्तेर्ष्यस्त्यक्तमन्युश्च स्मयमानोऽब्रवीदिदम्
सुरत तेऽस्तु विप्राग्र्य प्रीतिर्हि परमा मम ।
गृहस्थस्य हि धर्मोऽग्र्यः संप्राप्तातिथिपूजनम्
अतिथिः पूजितो यस्य गृहस्थस्य तु गच्छति
नान्यस्तस्मात्परो धर्म इति प्राहुर्मनीषिणः ॥
प्राणा हि मम दाराश्च यच्चान्यद्विद्यते वसु ।
अतिथिभ्यो मया देयमिति मे व्रतमाहितम् ॥
निःसंदिग्धं यथा वाक्यमेतन्मे समुदाहृतम् ।
तेनाहं विप्र सत्येन स्वयमात्मानमालभे ॥ ७२
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ।
बुद्धिरात्मा मनः कालो दिशश्चैव गुणा दश७३

आत्मन शरीरस्य ॥ ४३ ॥ प्रमाण हितज्ञापकम् ॥ ४५ ॥ किञ्चिन्न कर्तव्यमिति न अपि तु कर्तव्यमेव ॥ ४७ ॥ पृष्ठत तस्याप्रत्यक्ष गृहेऽन्वगमत् तदा गार्हस्थ्यकाले तदा इध्माहरणकाले ॥ ४८ ॥ ब्राह्मणस्तद्रूपी मृत्यु ॥ ४९ ॥ **तामिति** । एतत् रतप्रदानम् ॥ ५३ ॥ राज्ञि राजकन्ये ॥ ५४ ॥ छंद्यमान प्रलोभ्यमान ॥ ५५ ॥ भर्तुर्वचन येन येन तु तुष्येत नित्यमेव सदाऽतिथि । अध्यात्मन प्रदानेन न ते कार्या विचारणेति पूर्वोक्तम् ॥ ५६ ॥ विवेश गृहमिति शेष । विहस्येत्यत्र रह स इति पाठ स्पष्टार्थ ॥ ५७ ॥ ऋषेरपीर्ष्या नासीदित्याह—**अथेति** ॥ ५८ ॥ अनया त्वद्भार्यया छद्यमान प्रार्थ्यमान इति वैपरीत्योक्ति ॥ ६५ ॥ अनेन मैथुनरूपेण मामर्च्छति मा आयाति अनुरूपं स्त्रीदूषणानुगुण दण्डम् ॥ ६६ ॥ **कूटमुद्गरो** लोहदण्ड **हीनप्रतिज्ञं** त्यक्तातिथिव्रतम् ॥ ६७॥ गुणा इन्द्रियाणि तदभिमानिन्यो देवता पृथिव्याद्या इत्यर्थ ॥ ७३॥

नित्यमेव हि पश्यन्ति देहिनां देहसंश्रिताः ।
सुकृतं दुष्कृतं चापि कर्म धर्मभृतां वर ॥ ७४
यथैषा नानृता वाणी मयाऽद्य समुदीरिता ।
तेन सत्येन मां देवाः पालयन्तु दहन्तु वा ७५
ततो नादः समभवद्दिक्षु सर्वासु भारत ।
असकृत्सत्यमित्येवं नैतन्मिथ्येति सर्वतः ७६
उटजात्तु ततस्तस्मान्निश्चक्राम स वै द्विजः ।
वपुषा द्यां च भूमिं च व्याप्य वायुरिवोद्यतः
स्वरेण विप्रः शैक्षेण त्रीन् लोकाननुनादयन्
उवाच चैनं धर्मज्ञं पूर्वमामंत्र्य नामतः ॥ ७८
धर्मोऽहमस्मि भद्रं ते जिज्ञासार्थं तवानघ ।
प्राप्तः सत्यं च ते ज्ञात्वा प्रीतिर्मे परमा त्वयि
विजितश्च त्वया मृत्युर्योऽयं त्वामनुगच्छति
रन्ध्रान्वेषी तव सदा त्वया धृत्या वशी कृतः
न चास्ति शक्तिस्त्रैलोक्ये कस्यचित्पुरुषोत्तम
पतिव्रतामिमां साध्वीं तवोद्वीक्षितुमप्युत ८१
रक्षिता त्वद्गुणैरेषा पतिव्रतगुणैस्तथा ।
अधृष्या यदियं ब्रूयात्तथा तन्नान्यथा भवेत् ॥
एषा हि तपसा स्वेन संयुक्ता ब्रह्मवादिनी ।
पावनार्थं च लोकस्य सरिच्छ्रेष्ठा भविष्यति
अर्धेनौघवती नाम त्वामर्धेनानुयास्यति ।
शरीरेण महाभागा योगो ह्यस्या वशे स्थितः
अनया सह लोकांश्च गन्ताऽसि तपसार्जितान्
यत्र नावृत्तिमभ्येति शाश्वतांस्तान्सनातनान्
अनेन चैव देहेन लोकांस्त्वमभिपत्स्यसे ।
निर्जितश्च त्वया मृत्युरैश्वर्यं च तवोत्तमम् ८६
पञ्चभूतान्यतिक्रान्तः स्ववीर्याच्च मनोजवः ।
गृहस्थधर्मेणानेन कामक्रोधौ च ते जितौ ८७
स्नेहो रागश्च तन्द्री च मोहो द्रोहश्च केवलः
तव शुश्रूषया राजन् राजपुत्र्या विनिर्जिताः

भीष्म उवाच ।

शुक्लानां तु सहस्रेण वाजिनां रथमुत्तमम् ।
युक्तं प्रगृह्य भगवान् वासवोऽप्याजगाम तम्
मृत्युरात्मा च लोकाश्च जिता भूतानि पञ्च च
बुद्धिः कालो मनो व्योम कामक्रोधौ तथैव च
तस्माद् गृहाश्रमस्थस्य नान्यद्दैवतमस्ति वै ।
ऋतेऽतिथिं नरव्याघ्र मनसैतद्विचारय ॥ ९१
अतिथिः पूजितो यद्धि ध्यायते मनसा शुभम्
न तत्क्रतुशतेनापि तुल्यमाहुर्मनीषिणः ॥ ९२
पात्रं त्वतिथिमासाद्य
शीलाढ्यं यो न पूजयेत् ।
स दत्त्वा दुष्कृतं तस्मै
पुण्यमादाय गच्छति ॥ ९३
एतत्ते काथितं पुत्र मयाऽऽख्यानमनुत्तमम् ।
यथा हि विजितो मृत्युर्गृहस्थेन पुराऽभवत् ॥
धन्यं यशस्यमायुष्यामिदमाख्यानमुत्तमम् ।
बुभूषताऽभिमन्तव्यं सर्वदुश्चरितापहम् ॥ ९५
इदं यः कथयेद्विद्वानहन्यहनि भारत ।
सुदर्शनस्य चरितं पुण्यांल्लोकानवाप्नुयात् ॥ ९६

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि सुदर्शनोपाख्याने द्वितीयोऽध्यायः ॥ २ ॥




शैक्षेण उदात्तादिधर्मवता ॥७८॥ **अर्धेनेति** । ओघवती नाम नदी भविष्यतीति शेष । **योगो हीति** । योगसिद्धेयमत शरीरद्वय करिष्यतीत्यर्थ ॥ ८४ ॥ पञ्चेति स्थूलभूतान्यतिक्रम्य आतिवाहिकान् सूक्ष्मभूतमयान् लोकान् प्राप्स्यसीत्यर्थ ॥ ८७ ॥ राजन्नित्यृषिराजत्वात् राजजामातृत्वाद्वा सम्बोधनम् ॥ ८८ ॥ बुद्धिरित्यादावपि जितेत्यनुषङ्ग ॥ ९० ॥ आख्यायिकातात्पर्यमाह—**तस्मादिति** ॥९१॥ क्रतुशतेनापि न तुल्य किन्तु ततोऽप्यधिकमित्यर्थ । यद्वा तत्क्रतुशतेनेति । प्रथमातृतीययोर्व्यत्यास तेन क्रतुशतमपि न तुल्यमित्यर्थ ॥ ९२ ॥ सः अतिथि यो न पूजयेतस्मै दुष्कृतं दत्त्वा ॥ ९३ ॥ बुभूषता भूतिमिच्छता ॥ ९५ ॥ इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि नैलकण्ठीये भारतभावदीपे द्वितीयोऽध्यायः ॥ २ ॥

३

युधिष्ठिर उवाच ।

ब्राह्मण्यं यदि दुष्प्राप्यं त्रिभिर्वर्णैर्नराधिप ।
कथं प्राप्तं महाराज क्षत्रियेण महात्मना ॥ १
विश्वामित्रेण धर्मात्मन् ब्राह्मणत्वं नरर्षभ ।
श्रोतुमिच्छामि तत्त्वेन तन्मे ब्रूहि पितामह ॥ २
तेन ह्यमितवीर्येण वसिष्ठस्य महात्मनः ।
हतं पुत्रशतं सद्यस्तपसाऽपि पितामह ॥ ३
यातुधानाश्च बहवो राक्षसास्तिग्मतेजसः ।
मन्युनाऽऽविष्टदेहेन सृष्टाः कालान्तकोपमाः ४
महान्कुशिकवंशश्च ब्रह्मर्षिशतसंकुलः ।
स्थापितो नरलोकेऽस्मिन्विद्वद्ब्राह्मणसंस्तुतः ॥
ऋचीकस्यात्मजश्चैव शुनःशेपो महातपाः ।
विमोक्षितो महासत्रात्पशुतामुपागतः ॥ ६
हरिश्चन्द्रकृतौ देवांस्तोषयित्वाऽऽत्मतेजसा ।
पुत्रतामनुसंप्राप्तो विश्वामित्रस्य धीमतः ॥ ७
नाभिवादयते ज्येष्ठं देवरातं नराधिप ।
पुत्राः पञ्चाशदेवापि शप्ताः श्वपचतां गताः ८
त्रिशङ्कुर्बन्धुभिर्मुक्त
ऐक्ष्वाकः प्रीतिपूर्वकम् ।
अवाक्शिरा दिवं नीतो
दक्षिणामाश्रितो दिशम् ॥ ९
विश्वामित्रस्य विपुला नदी देवर्षिसेविता ।
कौशिकी च शिवा पुण्या ब्रह्मर्षिसुरसेविता ॥
तपोविघ्नकरी चैव पञ्चचूडा सुसंमता ।
रम्भा नामाप्सराः शापाद्यस्य शैलत्वमागता
तथैवास्य भयाद्भीता
वसिष्ठः सलिले पुरा ।
आत्मानं मज्जयन् श्रीमान्
विपाशः पुनरुत्थितः ॥ १२
तदाप्रभृति पुण्या हि विपाशाऽभून्महानदी
विख्याता कर्मणा तेन वसिष्ठस्य महात्मनः ॥
वाग्भिश्च भगवान्येन देवसेनाग्रगः प्रभुः ।
स्तुतः प्रीतमनाश्चासीच्छापाच्चैनममुञ्चत ॥ १४
ध्रुवस्यौत्तानपादस्य
ब्रह्मर्षीणां तथैव च ।
मध्ये ज्वलति यो नित्य-
मुदीचीमाश्रितो दिशम् ॥ १५
तस्यैतानि च कर्माणि तथान्यानि च कौरव
क्षत्रियस्येत्यतो जातमिदं कौतूहलं मम ॥ १६
किमेतदिति तत्त्वेन ब्रूहि भरतर्षभ ।
देहान्तरमनासाद्य कथं स ब्राह्मणोऽभवत् १७
एतत्तत्त्वेन मे तात सर्वमाख्यातुमर्हसि ।
मतङ्गस्य यथातत्त्वं तथैवैतद्वदस्व मे ॥ १८
स्थाने मतङ्गो ब्राह्मण्य नालभद्भरतर्षभ ।
चण्डालयोनौ जातो हि कथं ब्राह्मण्यमाप्तवान्

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि विश्वामित्रोपाख्याने तृतीयोऽध्यायः ॥ ३ ॥



३

ब्राह्मण्यमिति ॥ १ ॥ ऋचीकस्यात्मज इत्यत्र अजीगर्तात्मज इति बोध्यम् । सोऽजीगर्तः सौयवसिमृषिमशनया परीतं तस्य ह त्रय पुत्रा आसु शुन पुच्छ शुन शेप शुनो लागूल इति श्रुते । शुन शेपस्य पिताऽजीगर्त इत्यवगमात् । कल्पान्तराभिप्रायेण वा इदं ज्ञेयम् ॥ ६ ॥ देवास्तोषयित्वा तैर्मोक्षित. सन्पुत्रता विश्वामित्रस्यानुसंप्राप्त इति सम्बन्ध ॥ ७ ॥ नाभिवादयते न नमस्कुर्वन्ति । अनुस्वारलोप आष । देवरातं देवैर्विश्वामित्राय दत्तं तेन च ज्येष्ठं कृतं सन्तम् । शप्ता येनेति शेष ॥ ८ ॥ बन्धुभिर्मुक्त वसिष्ठशापेन चाण्डालतां गतत्वात् दिवं येन नीत ॥ ९ ॥ पञ्चचूडा वलयभेदा यस्या सा । चूडा वलयभेदे स्यादिति **मेदिनी** ॥ ११ ॥

वाग्भिरिति । त्रिशंकुं याजयन्विश्वामित्रो वसिष्ठपुत्रैः शप्त श्वपचस्य याजकस्त्वं श्वपचो भविष्यसीति तं शापमृतं कर्तुं विश्वामित्र वस्याश्चिदापदि श्वजाघनीं चौर्येणार्जयित्वा पक्तुमारेभे तामिन्द्र श्येनरूपेण हृतवान् तावतैवायं शापान्मुक्तो ववर्ष चेन्द्र इति देवसेनानामग्रग श्रेष्ठ इन्द्र. ॥ १४ ॥ ज्वलति तारारूपेण ॥ १५ ॥ मतङ्गस्य ब्राह्मण्यां शूद्राजातस्य चाण्डालस्य यथा महताऽपि तपसा ब्राह्मण्यमप्राप्यं जातं तथैवैतन्मम भाति त्वं तु यथा जातं तथा वदस्व ॥ १७ ॥ स्थाने युक्तं कथं ब्राह्मण्य प्राप्तवान्विश्वामित्र इति शेष ॥ १९ ॥ इति श्रीमहाभारते अनुशासनपर्वणि दान० नैलकण्ठीये भारतभावदीपे तृतीयोऽध्याय ॥ ३ ॥

४

भीष्म उवाच ।
श्रूयतां पार्थ तत्त्वेन विश्वामित्रो यथा पुरा।
ब्राह्मणत्वं गतस्तात ब्रह्मर्षित्वं तथैव च ॥ १
भरतस्यान्वये चैवाजमीढो नाम पार्थिवः ।
बभूव भरतश्रेष्ठ यज्वा धर्मभृतां वरः ॥ २
तस्य पुत्रो महानासीज्जह्नुर्नाम नरेश्वरः ।
दुहितृत्वमनुप्राप्ता गङ्गा यस्य महात्मनः ॥ ३
तस्यात्मजस्तु ह्यरुणः सिन्धुद्वीपो महायशाः
सिन्धुद्वीपाच्च राजर्षिर्बलाश्वो महाबलः ॥४
वल्लभस्तस्य तनयः साक्षाद्धर्म इवापरः ।
कुशिकस्तस्य तनयः सहस्राक्षसमद्युतिः ॥ ५
कुशिकस्यात्मजः श्रीमान्
गाधिर्नाम जनेश्वरः ।
अपुत्रः प्रसवेनार्थी
वनवासमुपावसत् ॥ ६
कन्या जज्ञे सुतात्तस्य वने निवसतः सतः ।
नाम्ना सत्यवती नाम रूपेणाप्रतिमा भुवि ७
तां वव्रे भार्गवः श्रीमांऋ्यवनस्यात्मसंभवः ।
ऋचीक इति विख्यातो विपुले तपसि स्थितः
स ता न प्रददौ तस्मै ऋचीकाय महात्मने ।
दरिद्र इति मत्वा वै गाधिः शत्रुनिबर्हणः ॥ ९
प्रत्याख्याय पुनर्यातमब्रवीद्राजसत्तमः ।
शुल्कं प्रदीयतां मह्यं ततो वत्स्यसि मे सुताम्
ऋचीक उवाच ।
किं प्रयच्छामि राजेन्द्र तुभ्यं शुल्कमहं नृप।
दुहितुर्दूह्यसंसक्तो माऽभूत्तत्र विचारणा ॥ ११
गाधिरुवाच ।
चन्द्ररश्मिप्रकाशाना हयानां वातरंहसाम् ।
एकतः श्यामकर्णानां सहस्रं देहि भार्गव ॥१२
भीष्म उवाच ।
ततः स भृगुशार्दूलऋ्यवनस्यात्मजः प्रभुः ।
अब्रवीद्वरुणं देवमादित्यं पतिमम्भसाम् ॥ १३
एकतः श्यामकर्णानां हयानां चन्द्रवर्चसाम् ।
सहस्रं वातवेगानां भिक्षे त्वां देवसत्तम॥ १४
तथेति वरुणो देव आदित्यो भृगुसत्तमम् ।
उवाच यत्र ते च्छन्दस्तत्रोत्थास्यंति वाजिनः
ध्यातमात्रं ऋचीकेन हयानां चन्द्रवर्चसाम् ।
गङ्गाजलात्समुत्तस्थौ सहस्रं विपुलौजसाम्१६
अदूरे कान्यकुब्जस्य गङ्गायास्तीरमुत्तमम् ।
अश्वतीर्थं तदद्यापि मानवैः परिचक्ष्यते ॥ १७
ततो वै गाधये तात सहस्रं वाजिनां शुभम् ।
ऋचीकः प्रददौ प्रीतः शुल्कार्थं तपता वरः ॥
ततः स विस्मितो राजा गाधिःशापभयेन च
ददौ ता समलङ्कृत्य कन्या भृगुसुताय वै ॥
जग्राह विधिवत्पाणिं तस्या ब्रह्मर्षिसत्तमः ।
सा च तं पतिमासाद्य परं हर्षमवाप ह । २०
स तुतोष च ब्रह्मर्षिस्तस्या वृत्तेन भारत ।
छन्दयामास चैवैनां वरेण वरवर्णिनीम् ॥ २१
मात्रे तत्सर्वमाचख्यौ सा कन्या राजसत्तम।
अथ तामब्रवीन्माता सुता किञ्चिदवाङ्मुखी
ममापि पुत्रि भर्ता ते प्रसादं कर्तुमर्हति ।
अपत्यस्य प्रदानेन समर्थश्च महातपाः ॥ २३
ततः सा त्वरितं गत्वा तत्सर्वं प्रत्यवेदयत् ।
मातुश्चिकीर्षितं राजन् ऋचीकस्तामथाब्रवीत्
गुणवन्तमपत्यं सा अचिराज्जनयिष्यति ।
मम प्रसादात्कल्याणि माऽभूत्ते प्रणयोऽन्यथा
तव चैव गुणश्लाघी पुत्र उत्पत्स्यते महान् ।
अस्मद्वंशकरः श्रीमान्सत्यमेतद्ब्रवीमि ते ॥ २६
ऋतुस्नाता च साऽश्वत्थं त्वं च वृक्षमुदुम्बरम्
परिष्वजेथाः कल्याणि तत एवमवाप्स्यथः ॥
चरुद्वयमिदं चैव मन्त्रपूतं शुचिस्मिते ।
त्वं च सा चोपभुञ्जीतं ततः पुत्राववाप्स्यथः ॥
ततः सत्यवती हृष्टा मातरं प्रत्यभाषत ।
यदृचीकेन कथितं तच्चाचख्यौ चरुद्वयम् २९
तामुवाच ततो माता सुतां सत्यवतीं तदा ।
पुत्रि पूर्वोपपन्नायाः कुरुष्व वचनं मम ॥ ३०

४

श्रूयतामिति । ब्राह्मणेष्वपि ऋषित्व मन्त्रद्रष्टृत्वं गोत्रप्रवर्तकत्व वा ॥ १ ॥ वल्लभो नाम ॥ ५ ॥ प्रसवेन सोमाभिषवनिमित्तेन अर्थी पुत्रार्थी ॥ ६ ॥ सुतात् सोमाभिषवोपलक्षिताद्यज्ञात् वन्यद्रव्यविहितात्तादृशी वनवासयोग्यैव कन्या जज्ञे ॥ ७ ॥ भार्गवो भृगोर्गोत्रापत्यम् ॥८॥ वत्स्यसि उद्वाहेन प्राप्स्यसि ॥ १० ॥ असंसक्तो नि संशय ॥ ११ ॥ एकत एकम् ॥ १२ ॥ आदित्यं अदिते पुत्रम् ॥ १३ ॥ छन्द इच्छा ॥ १५ ॥ वरेण पुत्रं ते दास्यामीत्यनुग्रहेण ॥२१॥ पूर्वोपपन्नाया भर्तु सम्बन्धात्पूर्व उपपन्नायाः

भर्त्रा य एष दत्तस्ते चरुर्मन्त्रपुरस्कृतः ।
एनं प्रयच्छ मह्यं त्वं मदीयं त्वं गृहाण च ३१
व्यत्यास वृक्षयोश्चापि करवाव शुचिस्मिते ।
यदि प्रमाणं वचनं मम मातुरनिन्दिते ॥ ३२
स्वमपत्यं विशिष्टं हि सर्वं इच्छत्यनाविलम् ।
व्यक्तं भगवता चात्र कृतमेव भविष्यति ॥ ३३
ततो मे त्वच्चरौ भावः पादपे च सुमध्यमे ।
कथं विशिष्टो भ्राता मे भवेदित्येव चिन्तय ॥
तथा च कृतवत्यौ ते माता सत्यवती च सा ।
अथ गर्भावनुप्राप्ते उभे ते वै युधिष्ठिर ॥ ३५
दृष्ट्वा गर्भमनुप्राप्तां भार्यां स च महानृषिः ।
उवाच तां सत्यवतीं दुर्मना भृगुसत्तम ॥ ३६
व्यत्यासेनोपयुक्तस्ते चरुर्व्यक्तं भविष्यते ।
व्यत्यासः पादपे चापि सुव्यक्तं ते कृतः शुभे
मया हि विश्वं यद्ब्रह्म त्वच्चरौ सन्निवेशितम् ।
क्षत्रवीर्यं च सकलं चरौ तस्या निवेशितम् ॥
त्रैलोक्यविख्यातगुणं त्वं विप्र जनयिष्यसि ।
सा च क्षत्रं विशिष्टं वै तत एतत्कृतं मया ३९
व्यत्यासस्तु कृतो यस्मात्त्वया मात्रा च ते शुभे
तस्मात्सा ब्राह्मणं श्रेष्ठं माता ते जनयिष्यति
क्षत्रियं तूग्रकर्माणं त्वं भद्रे जनयिष्यसि ।
न हि ते तत्कृतं साधु मातृस्नेहेन भाविनि ४१
सा श्रुत्वा शोकसंतप्ता पपात वरवर्णिनी ।
भूमौ सत्यवती राजञ्छिन्नेव रुचिरा लता ॥
प्रतिलभ्य च सा संज्ञा शिरसा प्रणिपत्य च
उवाच भार्या भर्तारं गाधेयी भार्गवर्षभम् ॥ ४३
प्रसादयन्त्यां भार्यायां मयि ब्रह्मविदांवर ।
प्रसादं कुरु विप्रर्षे न मेस्यात्क्षत्रियः सुतः ४४
कामं ममोग्रकर्मा वै पात्रो भवितुमर्हति ।
न तु मे स्यात्सुतो ब्रह्मन्नेष मे दयितो वरः ४५
एवमस्त्विति होवाच स्वां भार्यां सुमहातपाः ।
ततः सा जनयामास जमदग्निं सुतं शुभम् ४६
विश्वामित्रं चाजनयद्राधिभार्या यशस्विनी ।
ऋषेः प्रसादाद्राजेन्द्र ब्रह्मर्षेर्ब्रह्मवादिनम् ॥ ४७
ततो ब्राह्मणतां यातो विश्वामित्रो महातपाः ।
क्षत्रियः सोऽथ तथा ब्रह्मवंशस्य कारकः ॥
तस्य पुत्रा महात्माना ब्रह्मवंशविवर्धनाः ।
तपस्विनो ब्रह्मवादो गोत्रकर्तार एव च ॥ ४९
मधुच्छन्दश्च भगवान् देवरातश्च वीर्यवान् ।
अक्षीणश्च शकुन्तश्च बभ्रुः कालपथस्तथा ॥ ५०
याज्ञवल्क्यश्च विख्यातस्तथा स्थूणो महाव्रतः
उलूको यमदूतश्च तथार्षेः सैन्धवायनः ॥ ५१
वलगुर्जङ्घश्च भगवान् गालवश्च महानृषिः ।
ऋषेर्वज्रस्तथा ख्यातः सालंकायन एव च ॥
लीलाक्ष्यो नारदश्चैव तया कूर्चमुखः स्मृतः ।
वादुलिर्पुष्कलश्चैव वक्षोग्रीवस्तथैव च ॥ ५३
आंघ्रिको नैकदृक्चैव शिलायूपः शिनः शुचिः ।
चक्रको मारुतन्तव्यो वातघ्नोऽथाश्वलायनः ५४
श्यामायनोऽथ गार्ग्यश्च जाबालेः सुश्रुतस्तथा
कारीषिरथ सश्रुत्यः परपौरवतन्तवः ॥ ५५
महानृषिश्च कपिलस्तार्क्षेस्ताडकायनः ।
तथैव चोपगहनस्तर्क्षेश्चासुरायणः ॥ ५६
मार्दमर्षेर्हिरण्याक्षो जङ्घारेर्बाभ्रवायणिः ।
भूतिर्विभूतिः सूतश्च सुरकृत्त तथैव च ॥ ५७
अराडेर्नाचिकश्चैव चांपेयोज्जयनौ तथा ।
नवतन्तुर्बकनखः सेयनो यानेरेव च ॥ ५८
अम्भोरुहश्चारुमत्स्यः शिरीषी चाथ गार्दभिः
ऊर्जयानिरुदापेक्षी नारदी च महानृषिः ५९
विश्वामित्रात्मजाः सर्वे मुनयो ब्रह्मवादिनः
तथैव क्षत्रियो राजन् विश्वामित्रो महातपाः
ऋचीकेनाहृतं ब्रह्म परमेतद्युधिष्ठिर ।
एतत्ते सर्वमाख्यातं तत्त्वेन भरतर्षभ ॥ ६१
विश्वामित्रस्य वै जन्म सोमसूर्याग्नितेजसः ।
यत्र यत्र च सन्देहो भूयस्ते राजसत्तम ।
तत्र तत्र च मां ब्रूहि च्छेत्ताऽस्मि तव संशयम्

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि विश्वामित्रोपाख्याने चतुर्थोऽध्यायः ॥ ४ ॥

गुरुत्वेन प्राप्तायां तव भर्त्रपेक्षयाऽह गरीयसीत्यर्थः ॥ ३० ॥ क्षत्रिय क्षत्रियवदुग्रकर्मा ॥ ४४ ॥ विश्वामित्रात्मजा इति क्षत्रियात् ब्रह्मवादिन कथमुत्पन्ना इत्याशङ्क्याह— **ऋचीकेनेति**। चरौ पूर्वं ब्रह्मैवाहित अत क्षत्रबीजोद्भवस्यापि ब्राह्मण्यलाभो जात । बीजापेक्षया सस्कारस्य बलवत्त्वात्। तथाहि। दावाग्निदग्धेभ्यो वेत्रबाजेभ्य कदलीकाण्डोत्पत्तिमुदाहरन्ति न ब्राह्मण्यं क्षत्रियाद्यैस्तप कोट्यापि लभ्यते। विश्वामित्रस्य तत्प्राप्तिर्मात्रा ब्रह्मौदनाशनात् ॥ ६१ ॥ इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्थोऽध्याय ॥ ४ ॥ * द्विषष्टिसंख्याकाः

५

युधिष्ठिर उवाच ।
आनृशंस्यस्य धर्मस्य गुणान् भक्तजनस्य च ।
श्रोतुमिच्छामि धर्मज्ञ तन्मे ब्रूहि पितामह १

भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
वासवस्य च संवादं शुकस्य च महात्मनः २
विषये काशिराजस्य ग्रामान्निष्क्रम्य लुब्धकः
सविषं काण्डमादाय मृगयामास वै मृगम् ३
तत्र चामिषलुब्धेन लुब्धकेन महावने ।
अविदूरे मृगान् दृष्ट्वा बाणः प्रतिसमाहितः ४
तेन दुर्वारितास्त्रेण निमित्तचपलेषुणा ।
महान्वनतरुस्तत्र विद्धो मृगजिघांसया ॥ ५
स तीक्ष्णविषदिग्धेन शरेणातिबलात्क्षतः ।
उत्सृज्य फलपत्राणि पादपः शोषमागतः ६
तस्मिन्वृक्षे तथाभूते कोटरेषु चिरोषितः ।
न जहाति शुको वासं तस्य भक्त्या वनस्पतेः
निष्पचारो निराहारो ग्लानः शिथिलवागपि
कृतज्ञः सह वृक्षेण धर्मात्मा सोऽप्यशुष्यत ८
तमुदारं महासत्त्वमतिमानुषचेष्टितम् ।
समदुःखसुखं दृष्ट्वा विस्मितः पाकशासनः ९
ततश्चिन्तामुपगतः शक्रः कथमयं द्विजः ।
तिर्यग्योनावसंभाव्यमानृशंस्यमवस्थितः ॥
+अथवा नात्र चिन्त्यं हि अभवद्वासवस्य तु ।
प्राणिनामपि सर्वेषां सर्वं सर्वत्र दृश्यते ॥ ११
ततो ब्राह्मणवेषेण मानुषं रूपमास्थितः ।
अवतीर्य महीं शक्रस्तं पक्षिणमुवाच ह ॥ १२
शुक भो पक्षिणां श्रेष्ठ दाक्षेयी सुप्रजा त्वया
पृच्छे त्वां शुकमेनं त्वं कस्मान्न त्यजसि द्रुमम्
अथ पृष्टः शुकः प्राह मूर्ध्ना समभिवाद्य तम्
स्वागतं देवराज त्वं विज्ञातस्तपसा मया १४
ततो दशशताक्षेण साधु साध्विति भाषितम्
अहो विज्ञानमित्येवं मनसा पूजितस्ततः १५
तमेवं शुभकर्माणं शुकं परमधार्मिकम् ।
विजानन्नपि ना प्रीतिं पप्रच्छ बलसूदनः १६
निष्पत्रमफलं शुष्कमशरण्यं पतत्रिणाम् ।
किमर्थं सेवसे वृक्षं यदा महदिदं वनम् ॥ १७
अन्येऽपि बहवो वृक्षाः पत्रसंच्छन्नकोटराः ।
शुभाः पर्याप्तसञ्चारा विद्यन्तेऽस्मिन्महावने
गतायुषमसामर्थ्यं क्षीणसारं हतश्रियम् ।
विमृश्य प्रज्ञया धीर जहीमं स्थाविरं द्रुमम् १९

भीष्म उवाच ।
तदुपश्रुत्य धर्मात्मा शुकः शक्रेण भाषितम्
सुदीर्घमांतानिःश्वस्य दीनो वाक्यमुवाच ह २०
अनतिक्रमणीयानि दैवतानि शचीपते ।
यत्राभवत्तव प्रश्नस्तन्निबोध सुराधिप ॥ २१
अस्मिन्नहं द्रुमे जातः साधुभिश्च गुणैर्युतः ।
बालभावेन संगुप्तः शकुनिभिश्च न धर्षितः २२
किमनुक्रोश्य वैफल्यमुत्पादयसि मेऽनघ ।
आनृशंस्याभियुक्तस्य भक्तस्यानन्यगस्य च ॥
अनुक्रोशो हि साधूनां महद्धर्मस्य लक्षणम् ।
अनुक्रोशश्च साधूना सदा प्रीतिं प्रयच्छति २४
त्वमेव दैवतैः सर्वैः पृच्छ्यसे धर्मसंशयात् ।
अतस्त्वं देवदेवानामाधिपत्ये प्रतिष्ठितः ॥२५
नार्हसे मां सहस्राक्ष द्रुमं त्याजयितुं चिरात्
समर्थमुपजीव्येमं त्यजेयं कथमद्य वै ॥ २६
तस्य वाक्येन सौम्येन हर्षितः पाकशासनः
शुकं प्रोवाच धर्मात्मा आनृशंस्येन तोषितः
वरं वृणीष्वेति तदा स च वव्रे वरं शुकः ।
आनृशंस्यपरो नित्यं तस्य वृक्षस्य संभवम् ॥

५


एव दुष्प्रापमपि ब्राह्मण्यमानृशंस्य विना व्यर्थमित्याशयवानानृशंस्याध्यायमारभते—**आनृशंस्येति** ॥१॥ विषये देशे काण्डं बाणम् ॥ ३ ॥ तत्र मृगयायाम् ॥४॥ दुर्वारितास्त्रेण दुर्वार्यशस्त्रेण निमित्ताल्लक्ष्याच्चपलश्चलित इषुर्यस्य तेन ॥५॥ दिग्धेन लिप्तेन ॥ ६ ॥ द्विज पक्षी आनृशंस्य परदुःखेन दुःखित्वम् ॥ १० ॥ चिन्त्य आश्चर्यं सर्वेषा नृतिर्यगादीना सर्वत्र जातौ सर्वं कृपानैष्ठुर्यादिकम् ॥ ११ ॥ दाक्षेयी दक्षदौहित्री शुकी नाम ॥ १३ ॥ तपसा ज्ञानदृष्ट्या ॥ १४ ॥ ता प्रीतिं वृक्षे तत् सौहार्दम् ॥ १६ ॥ अनुक्रोश्य कृपायित्वा वैफल्यं जन्मन इति शेष ॥ २३ ॥ संशयात् सशयं प्राप्य अत संशयच्छेत्तृत्वात् ॥ २५ ॥ अद्य असामर्थ्यकाले ॥ २६ ॥ संभवं सम्यगैश्वर्यं वरं वव्रे ॥ २८ ॥

+ 'अथवा नात्र चित्रं हीत्यभवद्वासवस्य तु' इति पाठ ।

विदित्वा च दृढां भक्तिं तां शुके शीलसम्पदम्
प्रीतः क्षिप्रमथो वृक्षममृतेनावसिक्तवान् २९
ततः फलानि पत्राणि शाखाश्चापि मनोहराः
शुकस्य दृढभक्तित्वाच्छ्रीमत्तां प्राप स द्रुमः

शुकश्च कर्मणा तेन आनृशंस्यकृतेन वै ।
आयुषोऽन्ते महाराज प्राप शक्रसलोकताम्॥
एवमेव मनुष्येन्द्र भक्तिमन्तं समाश्रितः ।
सर्वार्थसिद्धिं लभते शुकं प्राप्य यथा द्रुमः ३२

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि शुकवासवसंवादे पञ्चमोऽध्यायः ॥ ५ ॥



६

युधिष्ठिर उवाच ।
पितामह महाप्राज्ञ सर्वशास्त्रविशारद
दैवे पुरुषकारे च किंस्विच्छ्रेष्ठतरं भवेत् ॥ १

भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
वसिष्ठस्य च संवादं ब्रह्मणश्च युधिष्ठिर ॥ २
दैवमानुषयोः किंस्वित्कर्मणोः श्रेष्ठमित्युत ।
पुरा वसिष्ठो भगवान् पितामहमपृच्छत ३
ततः पद्मोद्भवो राजन् देवदेवः पितामहः ।
उवाच मधुरं वाक्यमर्थवद्धेतुभूषितम् ॥ ४

ब्रह्मोवाच ।
नाबीजं जायते किञ्चिन्न बीजेन विना फलम्
बीजाद्बीजं प्रभवति बीजादेव फलं स्मृतम् ५
यादृशं वपते बीजं क्षेत्रमासाद्य कर्षकः ।
सुकृते दुष्कृते वापि तादृशं लभते फलम् ६
यथा बीजं विना क्षेत्रमुप्तं भवति निष्फलम् ।
तथा पुरुषकारेण विना दैवं न सिध्यति ७
क्षेत्रं पुरुषकारस्तु दैवं बीजमुदाहृतम् ।
क्षेत्रबीजसमायोगात्ततः सस्यं समृद्ध्यते ॥ ८
कर्मणः फलनिर्वृत्तिं स्वयमश्नाति कारकः ।
प्रत्यक्षं दृश्यते लोके कृतस्यापकृतस्य च ॥ ९
शुभेन कर्मणा सौख्यं दुःखं पापेन कर्मणा ।
कृतं फलति सर्वत्र नाकृतं भुज्यते क्वचित् १०
कृती सर्वत्र लभते प्रतिष्ठां भाग्यसंयुताम् ।
अकृता लभते भ्रष्टः क्षते क्षारावसेचनम् ११
तपसा रूपसौभाग्यं रत्नानि विविधानि च
प्राप्यते कर्मणा सर्वं न दैवादकृतात्मना १२
तथा स्वर्गश्च भोगश्च निष्ठा या च मनीषिता ।
सर्वं पुरुषकारेण कृतेनेहोपलभ्यते ॥ १३
ज्योतींषि त्रिदशा नागा यक्षाश्चन्द्रार्कमारुताः
सर्वे पुरुषकारेण मानुष्यादेवतां गताः ॥ १४
अर्थो वा मित्रवर्गो वा ऐश्वर्यं वा कुलान्वितम्
श्रीश्चापि दुर्लभा भोक्तुं तथैवाकृतकर्मभिः १५
शौचेन लभते विप्रः क्षात्रियो विक्रमेण तु ।
वैश्यः पुरुषकारेण शूद्रः शुश्रूषया श्रियम् १६
नादातारं भजन्त्यर्था न क्लीबं नापि निष्क्रियम्
नाकर्मशीलं नाशूरं तथा नैवातपस्विनम् १७
येन लोकास्त्रयः सृष्टा दैत्याः सर्वाश्च देवताः
स एष भगवान्विष्णुः समुद्रे तप्यते तपः १८

आनृशंस्यफलमाह—**शुकश्चेति** ॥ ३१ ॥ आख्यायिकातात्पर्यमाह—**एवमिति** ॥ ३२ ॥ इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चमोऽध्याय ॥ ५ ॥

६


पितामहेत्यादिरध्यायो दैवमूलमपीदं सर्वं पुरुषकाराद्ते न सिध्यतीत्यवश्यं पुरुषकारे भोगमोक्षार्थिना यतितव्यमित्येवंपर द्वयो श्रेष्ठयोर्मध्ये किमतिश्रेष्ठमित्यर्थ ॥ १ ॥ दैव प्राक्कर्म मानुष साम्प्रतिकं कर्म ॥ ३ ॥ दैवश्रैष्ठ्यमाह—**नाबीजमिति** ॥ ५ ॥ सुकृते बीजभूते सति ॥ ६ ॥ पुरुषकारश्रैष्ठ्यमाह-**यथेति**॥ ७ ॥ उद्यमापेक्षायामाह-**क्षेत्रमिति** ॥ ८ ॥ सिद्धान्त **कर्मण इत्यादिना** निर्वृतिं सिद्धिम् ९ ॥ कर्मदैवयो प्राबल्यदौर्बल्ये उपसंहरति-**प्राप्यत इति**॥ १२ मानुष्यात् मानुष्यमुद्ध्य ॥ १४ ॥ लभते श्रियमिति सर्वत्र संबन्धः ॥ १६ ॥ शिष्टाचारोऽपि कर्मणा प्राबल्ये मानमित्याह-**येनेति** ॥ १८ ॥

स्वं चेत्कर्मफलं न स्यात्सर्वमेवाफलं भवेत् ।
लोको दैवं समालक्ष्य उदासीनो भवेन्ननु १९
अकृत्वा मानुषं कर्म यो दैवमनुवर्तते ।
वृथा भ्राम्यति संप्राप्य पतिं क्लीबमिवाङ्गना
न तथा मानुषे लोके भयमस्ति शुभाशुभे ।
यथा त्रिदशलोके हि भयमन्येन जायते २१
कृतः पुरुषकारस्तु दैवमेवानुवर्तते ।
न दैवमकृते किञ्चित्कस्याचिद्दातुमर्हति ॥ २२
यथा स्थानान्यनित्यानि दृश्यन्ते दैवतेष्वपि
कथं कर्म विना दैवं स्थास्यति स्थापयिष्यतः
न दैवतानि लोकेऽस्मिन्
व्यापारं यान्ति कस्यचित् ।
व्यासङ्गं जनयन्त्युग्र-
मात्माभिभवशङ्कया ॥ २४
ऋषीणां देवतानां च सदा भवति विग्रहः ।
कस्य वाचा ह्यदैवं स्याद्यतो दैवं प्रवर्तते २५
कथं तस्य समुत्पत्तिर्यतो दैवं प्रवर्तते ।
एवं त्रिदशलोकेऽपि प्राप्यन्ते बहवो गुणाः ॥
आत्मैव ह्यात्मनो बन्धुरात्मैव रिपुरात्मनः ।
आत्मैव ह्यात्मनः साक्षा कृतस्याप्यकृतस्य च
कृतं चाप्यकृतं किञ्चित्कृते कर्मणि सिद्ध्यति
सुकृतं दुष्कृतं कर्म न यथार्थे प्रपद्यते ॥ २८
देवानां शरणं पुण्यं सर्वं पुण्यैरवाप्यते ।
पुण्यशीलं नरं प्राप्य किं दैवं प्रकरिष्यते२९
पुरा ययातिर्विभ्रष्टश्च्यावितः पतितः क्षितौ
पुनरारोपितः स्वर्गं दाहित्रैः पुण्यकर्मभिः ३०
पुरूरवाश्च राजर्षिर्द्विजैरभिहितः पुरा ।
ऐल इत्यभिविख्यातः स्वर्गं प्राप्तो महीपतिः
अश्वमेधादिभिर्यज्ञैः सत्कृतः कोसलाधिपः
महर्षिशापात्सौदासः पुरुषादत्वमागतः ३२
अश्वत्थामा च रामश्च मुनिपुत्रौ धनुर्धरौ ।
न गच्छतः स्वर्गलोकं सुकृतेनेह कर्मणा ३३
वसुर्यज्ञशतैरिष्ट्वा द्वितीय इव वासवः ।
मिथ्याभिधानेनैकेन रसातलतलं गतः ३४
बलिर्वैरोचनेर्बद्धो धर्मपाशेन दैवतैः ।
विष्णोः पुरुषकारेण पातालसदनं कृतः ३५
शक्रस्योद्वस्य चरणं प्रस्थितो जनमेजयः ।
द्विजस्त्रीणां वधं कृत्वा किं दैवेन न वारितः
अज्ञानाद्ब्राह्मणं हत्वा स्पृष्टो बालवधेन च ।
यैशम्पायनिरेवर्षिः किं दैवेन न वारितः ॥ ३७
गोप्रदानेन मिथ्या च ब्राह्मणेभ्यो महामखे ।
पुरा नृगश्च राजर्षिः कृकलासत्वमागतः ॥३८
धुन्धुमारश्च राजर्षिः सत्रेष्वेव जरां गतः ।
प्रीतिदायं परित्यज्य सुष्वाप स गिरिव्रजे ३९
पाण्डवानां हृतं राज्यं धार्तराष्ट्रैर्महाबलैः ।
पुनः प्रत्याहृतं चैव न दैवाद्भुजसंश्रयात् ॥ ४०

मनु निश्चितम् ॥१९॥ **अकृत्वेति** । केवलं दैवं निष्फलमित्यर्थः ॥ २० ॥ **न तथेति** । दैवदौस्थ्ये ऐहिकी हानिं सुसहा पुरुषकारदौस्थ्ये तु परलोकहानिर्दुरन्तेत्यर्थः अन्येन पापेन ॥ २१ ॥ अकृते कर्माभावे सति आकस्मिकानिधिलाभादावपि किंचित्कर्मास्त्येवेति भावः ॥ २२ ॥ **यथेति** । स्थानानि इंद्रादिलोकाः अग्न्यनित्या दृश्यन्ते तारारूपिणां देवानामधःपातदर्शनादित्यर्थः । कर्म विना पुण्येन कर्मणा विना दैवं देवसमूहः कथं स्थास्यति दैवमपि कर्ममूलमेवेत्यर्थः ॥२३॥ व्यापारं पुण्यरूपं यान्ति अनुमोदन्ते उग्रं धर्मविघ्नकरम् ॥२४॥ विग्रहो वैरं तथाहि ऋषीणां तपसि देवा विघ्नमाचरन्ति । ऋषयश्च च्यवनादय इंद्रादीनामभिभवं कुर्वन्तीति **सौकन्ये** प्रसिद्धम् । यद्यप्येवं कर्मपरत्वं देवर्षीणामस्ति तथापि अदैव दैवाभावो न वक्तुं शक्य इत्यर्थः ॥२५॥ अत्र मानमाह-**कथमिति**। यतो यस्माद्दैवं प्रवर्तते तस्य कर्मणोऽपि दैवं विना कथमुत्पत्तिः स्यान्न कथमपि पुण्यवन्त एव धर्मे प्रवर्तन्ते धर्माच्च पुण्यं वर्धते। अन्यथा सर्वेऽपि धर्मे प्रवर्तेरन्नित्यर्थः ।एवं लोकवदेव स्वर्गेऽपि गुणा भोगाः यथा बहुधनो भूयसा वाणिज्येन भूयांसं लाभं लभते नेतर इतिदृष्टमिति भावः ॥ २६ ॥ **आत्मेति** । एवं श्रुतेरपि दैवाधीनत्वेऽपि कर्मैव कर्तव्यमित्यर्थः कृतस्य पुण्यपापादेः ॥ २७ ॥ **कृतमिति** । पुण्यमपि पापेन प्रतिहन्यते पापमपि पुण्येनेति तयोः फलं यथोक्तं स्वर्गं नरकं वा न प्राप्नोतीत्यर्थः ॥ २८ ॥ शरणं गृहं यथा ह्यस्तनोऽपराह्ण श्वस्तनेन सत्कारेणापनीयते एवं दैवमपि पुण्यातिशयात्प्रतिहन्यते इत्यर्थः ॥ २९ ॥ अत्रैवार्थे दृष्टान्तानाह-**पुरेत्यादिना** ॥३०॥ विपर्ययेऽपि दृष्टान्तमाह-**अश्वेति** ॥ ३२ ॥ मिथ्याभिधानेन पशुयज्ञश्रुतिप्रमाणमित्येवरूपेण रसातलस्य भूमेस्तलमधोभागम् ॥ ३४ ॥ पापमपि तेजीयसा न दोषायेत्याह-**शक्रस्येति द्वाभ्याम्** चरणं द्विजस्त्रीदूषणरूपं कर्म कृत्वा प्रस्थित इति सबंधः ॥३६॥ पुण्यमपि केषांचिन्न त्राणायेत्याह-**गोप्रदानेनेति**। कृकलासत्वं सरटत्वम्॥३८॥ प्रीतिदायं देवैर्दत्तं वरं सुष्वाप सत्रफलं नाप्तवानित्यर्थः ॥ ३९ ॥ न दैवात् प्रत्याहृतमपि तु भुजसंश्रयादेवेत्यर्थः ॥ ४० ॥

तपोनियमसंयुक्ता मुनयः संशितव्रताः ।
किं त दैवबलाच्छापमुत्सृजन्ते न कर्मणा ४१
पापमुत्सृजते लोके सर्वं प्राप्य सुदुर्लभम् ।
लोभमोहसमापन्नं न दैवं त्रायते नरम् ॥ ४२
यथाऽग्निः पवनोद्धूतः सुसूक्ष्मोऽपि महान्भवेत
तथा कर्मसमायुक्तं दैवं साधु विवर्धते॥ ४३
यथा तैलक्षयाद्दीपः प्रन्हासमुपगच्छति ।
तथा कर्मक्षयाद्दैवं प्रन्हासमुपगच्छति ॥ ४४
विपुलमपि धनौघं प्राप्य भोगान् स्त्रियो वा
पुरुष इह न शक्तः कर्महीनो हि भोक्तुम् ।
सुनिहितमपि चार्थं दैवतै रक्ष्यमाणं
पुरुष इह महात्मा प्राप्नुते नित्ययुक्तः ॥ ४५
व्ययगुणमपि साधुं कर्मणा संश्रयन्ते
भवति मनुजलोकाद्देवलोको विशिष्टः ।
बहुतरसुसमृद्ध्या मानुषाणां गृहाणि
पितृवनभवनाभं दृश्यते चामराणाम् ॥४६
न च फलति विकर्मा जीवलोके न दैवं
व्यपनयति विमार्गं नास्ति दैवे प्रभुत्वम् ।
गुरुमिव कृतमध्यं कर्म संयाति दैवं
नयति पुरुषकारः सञ्चितस्तत्र तत्र ॥ ४७
एतत्ते सर्वमाख्यातं मया वै मुनिसत्तम ।
फलं पुरुषकारस्य सदा संदृश्य तत्त्वतः ॥ ४८
अभ्युत्थानेन दैवस्य समारब्धेन कर्मणा ।
विधिना कर्मणा चैव स्वर्गमार्गमवाप्नुयात् ४९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि दैवपुरुषकारनिर्देशे षष्ठोऽध्यायः ॥ ६ ॥



७

युधिष्ठिर उवाच ।
कर्मणां च समस्तानां शुभानां भरतर्षभ । फलानि महतां श्रेष्ठ ब्रूहि परिपृच्छतः ॥ १

किं दैवबलाच्छापमुत्सृजन्ते कर्मणा न अपि तु कर्मणैवोत्सृजन्ते न तु दैवबलादित्यर्थ ॥ ४१ ॥ पाप पापिनं प्रति सर्वं ऐश्वर्यादिकं गुणजात लोके प्राप्य उपेत्यापि तं उत्सृजते इति योजना । तथा चाभाणक दैवेन दत्त कर्मणा नाशितामिति । एतदेव स्पष्टयति-**लोभेति** ॥४२॥ दैवस्य कर्माधीनत्वमाह द्वाभ्या-**यथेति** ॥ ४३ ॥ कर्महीन पाकरत्यादावप्रवृत्त सुनिहित पातालस्थ निधि नित्ययुक्त अंजनादिसाधनोयुक्त ॥ ४५ ॥ व्यय एव गुण स्वभावो यस्य तं रिक्त व्ययगतमितिपाठेपि स एवार्थ । निर्धनत्वान्नैस्त्यक्तमपि साधु कर्मणा सदाचारेण निमित्तेन श्रद्धैकाप्रिया देवा सश्रयन्ते स्वस्वभागार्थमुपजीवन्तीत्यर्थ । ततश्च श्रेष्ठि फलैरेनं योजयन्तीत्याह-**भवतीति** विशिष्टत्वमेवाह-**बहुरिति**। समृद्धया उपेत गृहाणि गृहं बहुत्वमार्ष पितृवनभवनाभ श्मशानगृहतुल्यं अमराणा अमरै ॥ ४६ ॥ विकर्मा कर्महीन न च फलति फलं तृप्त्यादिकं न प्राप्नोति नापि केवल दैव विमार्गगामिन नर व्यपनयति विमार्गादन्यत्र नयति अत एव दैवे प्रभुत्वं नास्ति। किं तु दैवं कर्तृ कर्म संयाति पुरुषकारमनुसरति गुरु शिष्य इवेत्यर्थ । अत एव पुरुषकारो यत्र यत्र विषये संचित सम्यगनुष्ठितस्तत्र तत्र दैव नयति आविर्भावयति पुरुषकारेण सिद्धैर्ये लोको दैवानुकूल्यादेतत्सिद्धमिति वदतीत्यर्थ । गुरुमित्यत्र अनुपहतमदीन कामकारेण दैवमिति पाठे कामकारेण इच्छया यत्र पुरुषकारसचितस्तत्रैव दैव अदीनमनुपहतं चेति नयति ज्ञापयतीत्यर्थ ॥ ४७ ॥ संदृश्य सम्यक् योगजदृष्ट्याऽनुभूय ॥ ४८ ॥ ननु कृषिपर्जन्यन्यायेन दैवापेक्षा कर्मसिद्धिर्न कर्मापेक्षं दैवमिति प्रत्यक्षं तत्कथं विपरीतमुच्यत इत्याशङ्क्याह-**अभीति** । दैवस्य प्राक्कर्मण अभ्युत्थानं व्यापारो द्विविध । संचितरूपेणावस्थानं एक ,भोगार्थ समारंभरूपो द्वितीय । तत्र समारब्धेन उत्थानेन तदनुकूलेन कर्मणा च ऐहिक फलमाप्नुयात्। विधिना शास्त्रेण कर्मणा च तदनुसारिणा स्वर्गमार्गमवाप्नुयात् । **दैवाधीनो भोगः, कर्माधीनः संचय** इति निष्कर्ष । **कृष्यादावपि दैवप्रतीक्षण कापुरुषकर्म** सेचनादिनापि फलस्योत्पादयितुं शक्यत्वादिति भाव ॥ ४९ ॥ इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि नैलकण्ठीये भारतभावदीपे षष्ठोऽध्याय ॥ ६ ॥

७

अद्विषन् गौतमीवारीन् ज्ञात्वा दुःखं स्वदोषजम् ।
दत्वाऽपि दारानतिथीन्सुदर्शन इवार्चयन् ॥ १ ॥

भीष्म उवाच ।

हन्त ते कथयिष्यामि यन्मां पृच्छसि भारत
रहस्यं यद्दृषीणां तु तच्छृणुष्व युधिष्ठिर ।
या गतिः प्राप्यते येन प्रेत्यभावे चिरेप्सिता २
येन येन शरीरेण यद्यत्कर्म करोति यः ।
तेन तेन शरीरेण तत्तत्फलमुपाश्नुते ॥ ३
यस्यां यस्यामवस्थायां यत्करोति शुभाशुभम्।
तस्यां तस्यामवस्थायां भुंक्ते जन्मनि जन्मनि
न नश्यति कृतं कर्म सदा पञ्चेन्द्रियैरिह ।
ते ह्यस्य साक्षिणो नित्यं षष्ठ आत्मा तथैव च
चक्षुर्दद्यान्मनो दद्याद्वाचं दद्याच्च सूनृताम् ।
अनुव्रजेदुपासीत स यज्ञः पञ्चदक्षिणः ॥ ६
यो दद्यादपरिक्लिष्टमन्नमध्वनि वर्तते ।
श्रान्तायादृष्टपूर्वाय तस्य पुण्यफलं महत् ॥ ७
स्थण्डिलेषु शयानानां गृहाणि शयनानि च ।
चीरवल्कलसंवीते वासांस्याभरणानि च ॥ ८
वाहनानि च यानानि योगात्मनि तपोधने ।
अग्नीनुपशयानस्य राज्ञः पौरुषमेव च ॥ ९
रसानां प्रतिसंहारे सौभाग्यमनुगच्छति ।
आमिषप्रतिसंहारे पशून्पुत्रांश्च विन्दति ॥ १०
अवाक्शिरास्तु यो लम्बेदुदवासं च यो वसेत्
सततं चैकशायी यः स लभेतेप्सितां गतिम् ॥
पाद्यमासनमेवाथ दीपमन्नं प्रतिश्रयम् ।
दद्यादतिथिपूजार्थं स यज्ञः पञ्चदक्षिणः ॥ १२
वीरासनं वीरशय्यां वीरस्थानमुपागतः ।
अक्षयास्तस्य वै लोकाः सर्वकामगमास्तथा ॥
धनं लभेत दानेन मौनेनाज्ञां विशांपते ।
उपभोगांश्च तपसा ब्रह्मचर्येण जीवितम् ॥ १४
रूपमैश्वर्यमारोग्यमहिंसाफलमश्नुते ।
फलमूलाशिनो राज्यं स्वर्गः पर्णाशिनां भवेत्
प्रायोपवेशिनो राजन्सर्वत्र सुखमुच्यते ।
गवाह्यः शाकदीक्षायां स्वर्गगामी तृणाशनः
स्त्रियस्त्रिषवणं स्नात्वा
वायु पीत्वा क्रतुं लभेत् ।
स्वर्गं सत्येन लभते
दीक्षया कुलमुत्तमम् ॥ १७
सलिलाशी भवेद्यस्तु सदाग्निः संस्कृतो द्विजः
मनुं साधयतो राज्यं नाकपृष्ठमनाशके ॥ १८
उपवासं च दीक्षायामभिषेकं च पार्थिव ।
कृत्वा द्वादश वर्षाणि वीरस्थानाद्विशिष्यते ॥
अधीत्य सर्ववेदान्वै सद्यो दुःखाद्विमुच्यते ।
मानसं हि चरन् धर्मं स्वर्गलोकमुपाश्नुते ॥ २०
या दुस्त्यजा दुर्मतिभि-
र्या न जीर्यति जीर्यतः ।
योऽसौ प्राणान्तिको रोग-
स्तां तृष्णां त्यजतः सुखम् ॥ २१
यथा धेनुसहस्रेषु वत्सो विन्दति मातरम् ।
एवं पूर्वकृतं कर्म कर्तारमनुगच्छति ॥ २२
अचोद्यमानानि यथा पुष्पाणि च फलानि च
स्वकालं नातिवर्तन्ते तथा कर्म पुरा कृतम् २३

ब्राह्मण्यं दुर्लभं जानन् विश्वामित्रनिदर्शनात् आनृशस्यपरो धर्म इति य. शुकवत् स्थित ॥२॥ दैवेन रक्ष्यते देह इति धर्मैऽतियत्नवान् धर्माधिकारी षट्सूक्तो धर्मोथ मुनिनोच्यते ॥३॥ धर्मात्सुखं भवतीत्युक्त तत्र को धर्म किं फलमिति जिज्ञासुर्युधिष्ठिर उवाच-**कर्मणामिति** ॥१॥ गति फलं येन कर्मणा प्रेत्यभावे मरणोत्तरं देहान्तरप्राप्तौ ॥ २ ॥ **येनेति** । मनसा कृतस्य कर्मण फलं मनसैव स्वप्नादौ भुङ्क्ते । कायेन कृतस्य फलं कायेनैव भुङ्क्ते जाग्रदादावित्यर्थ ॥ ३ ॥ अवस्थाया बाल्ययौवनादिरूपाया आपद्यनापदि वा ॥ ४ ॥ **नेति** । नाशो नैष्फल्य अस्य कर्तु साक्षिणामभावे हि कृतं वृथैव स्यान्न तु तत्सत्त्वे इति भाव ॥ ५ ॥ दद्यादभ्यागतायेति शेष ॥६॥ महत् अपरिमितम् ॥७॥ वानप्रस्थधर्माणा फलान्याह-**स्थंडिलेष्वित्यादिना** ॥ ८ ॥ योगात्मनि योगयुक्तचित्ते ॥ ९ ॥ एकशायी ब्रह्मचर्यवान् ॥११॥ वीरा आसतेऽस्मिन्निति वीरासनं रणदेश उपेत्य वीरशय्या तत्र दीर्घनिद्रा च प्राप्य वीरस्थान स्वर्गलोकं य उपागतो भवति तस्याक्षया लोका इत्यर्थ ॥ १३ ॥ आज्ञा अविच्छिन्नामिति शेष । तपसा कृच्छ्रादिना जीवितं आयु ॥१४॥ शाकदीक्षाया शाकमात्राशनानियमे ॥ १६ ॥ स्त्रियः स्त्रियं न्यक्त्वेत्यर्थ । क्रतुं सकल्पं सत्यसंकल्पत्वामिति यावत् दीक्षया यज्ञेन ॥ १७ ॥ सदाग्नि अविच्छिन्नाग्निहोत्र मनुं गायत्र्यादिमंत्रं पाठान्तरे भेरुस्थानं तपोविशेष अनाशके हितमितमेध्याशनेऽनशने वा ॥ १८ ॥ द्वादशवार्षिक्या दीक्षाया उपवास व्रतार्थं क्षीराद्याहार व्रतं च। 'पयो ब्राह्मणस्य व्रत यवागू राजन्यस्याभिक्षा वैश्यस्य' इति श्रुतिप्रसिद्ध अभिषेक द्वादशवार्षिकं तीर्थाटनं वा वीरस्थानात्स्वर्गादपि विशिष्यते ब्रह्मलोकप्रदमेतत् द्वयमित्यर्थ ॥१९॥ कायिकं धर्ममुक्त्वा वाचिकमाह-**अधीत्येति** २० मानसं धर्म विवृणोति-**येति** २१

जीर्यन्ति जीर्यतः केशा
दन्ता जीर्यन्ति जीर्यतः ।
चक्षुःश्रोत्रे च जीर्येते
तृष्णैका न तु जीर्यते ॥ २४

येन प्रीणाति पितरं तेन प्रीतः प्रजापतिः ।
प्रीणाति मातरं येन पृथिवी तेन पूजिता ।
येन प्रीणात्युपाध्यायं तेन स्याद्ब्रह्म पूजितम् ॥
सर्वे तस्याद्दता धर्मा यस्यैते त्रय आद्दताः ।
अनाद्दतास्तु यस्यैते सर्वास्तस्याफलाः क्रियाः

वैशम्पायन उवाच ।
भीष्मस्यैतद्वचः श्रुत्वा विस्मिताः कुरुपुङ्गवाः
आसन् प्रहृष्टमनसः प्रीतिमन्तोऽभवंस्तदा २७

यन्मन्त्रे भवति वृथोपयुज्यमाने
यत्सोमे भवति वृथाभिषूयमाणे ।
यच्चाग्नौ भवति वृथाभिहूयमाने
तत्सर्वं भवति वृथाभिधीयमाने ॥ २८

इत्येतदृषिणा प्रोक्तमुक्तवानस्मि यद्विभो ।
शुभाशुभफलप्राप्तौ किमतः श्रोतुमिच्छसि २९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि कर्मफलिकोपाख्याने सप्तमोऽध्यायः ॥ ७ ॥



८

युधिष्ठिर उवाच ।
के पूज्याः के नमस्कार्याः
कान्नमस्यसि भारत ।
एतन्मे सर्वमाचक्ष्व
येभ्यः स्पृहयसे नृप ॥ १

उत्तमापद्गतस्यापि यत्र ते वर्तते मनः ।
मनुष्यलोके सर्वस्मिन् यदमुत्रेह चाप्युत ॥ २

भीष्म उवाच ।
स्पृहयामि द्विजातिभ्यो येषां ब्रह्म परं धनम्
येषां स्वप्रत्ययः स्वर्गस्तपःस्वाध्यायसाधनम् ३
येषां बालाश्च वृद्धाश्च पितृपैतामहीं धुरम् ।
उद्वहन्ति न सीदन्ति तेभ्यो वै स्पृहयाम्यहम्
विद्यास्नभिविनीतानां
दान्तानां मृदुभाषिणाम् ।
श्रुतवृत्तोपपन्नानां
सदाक्षरविदां सताम् ॥ ५

संसत्सु वदतां तात हंसानामिव सत्वशः ।
मङ्गल्यरूपा रुचिरा दिव्यजीमूतनिःस्वनाः ६
सम्यगुच्चरिता वाचः श्रूयन्ते हि युधिष्ठिर ।
शुश्रूषमाणे नृपतौ प्रेत्य चेह सुखावहाः ॥ ७
ये चापि तेषां श्रोतारः सदा सदसि संमताः
विज्ञानगुणसंपन्नास्तेभ्यश्च स्पृहयाम्यहम् ॥ ८
सुसंस्कृतानि प्रयताः शुचीनि गुणवन्ति च ।
ददत्यन्नानि तृप्त्यर्थं ब्राह्मणेभ्यो युधिष्ठिर ॥ ९
ये चापि सततं राजंस्तेभ्यश्च स्पृहयाम्यहम् ।
शक्यं ह्येवाहवे योद्धुं न दातुमनसूयितम् १०
शूरा वीराश्च शतशः सन्ति लोके युधिष्ठिर ।
येषां सख्यायमानानां दानशूरो विशिष्यते ॥
धन्यः स्यां यद्यहं भूयः
सौम्य ब्राह्मणकोऽपि वा ।
कुले जातो धर्मगति-
स्तपोविद्यापरायणः ॥ १२


मंत्रोच्चारण जिगीषार्थं वृथा सोमाभिषवो दक्षिणा विना वृथा होमो मत्र विना वृथा । एतैस्त्रिभिर्यत्पाप तत्सर्व मिथ्यावादिनो भवतीत्यर्थ ॥२८॥ प्राप्तौ प्राप्त्यर्थम्॥२९॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तमोऽध्याय ॥७॥ 'वृथापयुज्यमाने' इति पाठ ।

८

के पूज्या इत्यादिना पूर्वोक्तधर्मान् विवृणोति तत्रापि चक्षुर्दद्यादित्यादिना आतिथ्य कर्तव्यमुक्तं तद्विवृणोत्यध्यायेन ॥ १ ॥ यदमुत्रेह च हितं तद्वदेति शेष ॥२॥ ब्रह्म आनंदात्मा स्वर्गः सत्यसकल्पत्वादिसिद्धि तप स्वाध्यायौ साधनं यस्य स्वर्गस्य यस्तमात्मानमनुविद्य विजानाति सर्वाश्च लोकानाप्नोति सर्वाश्च कामानिति श्रुते स स्वप्रत्यय ॥३॥ अक्षरं ब्रह्म तद्विदाम् ॥ ५ ॥ हंसमादत्ते क्षीरनीरयोरिवात्मानात्मनोर्विवेचनात् ॥ ६ ॥ नृपतौ नृपते समीपे उच्चरिता ॥ ७ ॥ अनसूयितं असूयावर्ज्यं यथा स्यात्तथा ॥ १० ॥ ब्राह्मणक कुत्सितब्राह्मणोऽपि यद्यहं स्या तर्हि धन्य किमुत कुले जात ॥ १२ ॥

न मे त्वत्तः प्रियतरो लोकेऽस्मिन्पांडुनन्दन
त्वत्तश्चापि प्रियतरा ब्राह्मणा भरतर्षभ ॥ १३
यथा मम प्रियतमास्त्वत्तो विप्राः कुरूत्तम ।
तेन सत्येन गच्छेयं लोकान्यत्र स शान्तनुः ॥
न मे पिता प्रियतरो ब्राह्मणेभ्यस्तथाऽभवत् ।
न मे पितुः पिता वापि ये चान्येऽपि सुहृज्जनाः
न हि मे वृजिनं किञ्चिद्विद्यते ब्राह्मणेष्विह ।
अणु वा यदि वा स्थूलं विद्यते साधु कर्मसु ॥
कर्मणा मनसा वापि वाचा वापि परन्तप
यन्मे कृतं ब्राह्मणेभ्यस्तेनाद्य न तपाम्यहम् १७
ब्रह्मण्य इति मामाहुस्तया वाचाऽस्मि तोषितः
एतदेव पवित्रेभ्यः सर्वेभ्यः परमं स्मृतम् १८
पश्यामि लोकानमला-
ञ्छुचीन्ब्राह्मणयायिनः ।
तेषु मे तात गन्तव्य-
मह्नाय च चिराय च ॥ १९
यथा भर्त्राश्रयो धर्मः स्त्रीणां लोके युधिष्ठिर ।
स देवः सा गतिर्नान्या क्षत्रियस्य तथा द्विजाः
क्षत्रियः शतवर्षी च दशवर्षी द्विजोत्तमः ।
पितापुत्रौ च विज्ञेयौ तयोर्हि ब्राह्मणो गुरुः २१
नारी तु पत्यभावे वै देवरं कुरुते पतिम् ।
पृथिवी ब्राह्मणाभावे क्षत्रियं कुरुते पतिम् २२
पुत्रवच्च ततो रक्ष्या उपास्या गुरुवच्च ते ।
अग्निवच्चोपचर्या वै ब्राह्मणाः कुरुसत्तम ॥ २३
ऋजून्सतः सत्यशीलान्सर्वभूतहिते रतान् ।
आशीविषानिव क्रुद्धान् द्विजान्परिचरेत्सदा
तेजस्तपसश्चैव नित्यं बिभ्येद्युधिष्ठिर ।
उभे चैते परित्याज्ये तेजश्चैव तपस्तथा ॥ २५
व्यवसायस्तयोः शीघ्रमुभयोरेव विद्यते ।
हन्युः क्रुद्धा महाराज ब्राह्मणा ये तपस्विनः ॥
भूयः स्यादुभयं दत्तं ब्राह्मणाद्यदकोपनात् ।
कुर्यादुभयतः शेषं दत्तशेष न शेषयेत् ॥ २७
दण्डपाणिर्यथा गोषु पालो नित्यं हि रक्षयेत
ब्राह्मणा ब्रह्म च तथा क्षत्रियः परिपालयेत् २८
पितेव पुत्रान् रक्षेथा ब्राह्मणान् धर्मचेतसः ।
गृहे चैषामवेक्षेथाः किंस्विदस्तीति जीवनम्

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि
अष्टमोऽध्यायः ॥ ८ ॥



९

युधिष्ठिर उवाच ।
ब्राह्मणानां तु ये लोकाः प्रतिश्रुत्य पितामह
न प्रयच्छन्ति मोहात्ते के भवन्ति महाद्युते १
एतन्मे तत्त्वतो ब्रूहि धर्म धर्मभृतां वर ।
प्रतिश्रुत्य दुरात्मानो न प्रयच्छन्ति ये नराः

व्रजिन सकटं फलाशेति यावत् पूज्यत्वादेव तान्पूजयामि न तु फलायेत्यर्थः ॥ १६ ॥ तेन ब्राह्मणाराधनेन अद्य शरपजरस्थोऽपि न तपामि न व्यथा प्राप्नोमीति स्वानुभव दर्शयति ॥ १७ ॥ ब्रह्मण्यो ब्रह्मजातौ आसक्त ॥ १८ ॥ यायिनोऽनुचरस्य मे ॥ १९ ॥ **तेजस** इति । ब्राह्मणाद्बिभ्येत् न तु तत्र तेजस्तपसी स्वीये प्रकाशयेदित्यर्थ । तेज क्षोबबलम् तपो योगबलम् ॥२५॥ तयोस्तपस्तेजसोर्ब्राह्मणक्षत्रियस्थयोर्व्यवसायः फलं अभिभवरूप शीघ्र तीव्र तथापि तपस्विन एवेतरान् हन्युर्न तेजस्विन इत्यर्थ ॥ २६ ॥ **भूय इति** । त्यब्लोपे पचमी अकोपन ब्राह्मण प्राप्य यद्भूय. बहुतर उभयं तपस्तेज आख्य स्यात् तद्दत्तं खडितं भवतीति शेष । क्षमावन्तु प्रयुक्त तत्तेजो बह्वपि तूलराशिवत्क्षयो नश्यतीत्यर्थ उभयत उभयं चेत् शेषं कुर्यात् न तद्दत्तशेष शेषयेदित्यन्वय । द्वाभ्या अन्योन्यास्मिन्प्रयुक्त तेज आदिद्वयं न नि शेष नश्यति किंतु शेष क्षमावता खंडितस्य तस्यावशिष्टं तु न शेषयेन्न शिष्यते अपि तु नि शेषमेव नश्यतीत्यर्थ ॥ २७ ॥ **अस्तीति** । अभावे तद्देयामित्यर्थ· ॥ २९ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टमोऽध्याय ॥ ८ ॥

९

ब्राह्मणानामिति ॥ १ ॥

भीष्म उवाच ।
यो न दद्यात्प्रतिश्रुत्य
स्वल्पं वा यदि वा बहु ।
आशास्तस्य हताः सर्वाः
क्लीबस्येव प्रजाफलम् ॥ ३
यां रात्रिं जायते जीवो
यां रात्रिं च विनश्यति ।
एतस्मिन्नन्तरे यद्यत्
सुकृतं तस्य भारत ॥ ४
यच्च तस्य हुतं किञ्चिद्दत्तं वा भरतर्षभ ।
तपस्तप्तमथो वापि सर्वं तस्योपहन्यते ॥ ५
अथैतद्वचनं प्राहुर्धर्मशास्त्रविदो जनाः ।
निशम्य भरतश्रेष्ठ बुद्ध्या परमयुक्तया ॥ ६
अपि चोदाहरन्तीमं धर्मशास्त्रविदो जनाः ।
अश्वानां श्यामकर्णानां सहस्रेण समुच्यते ७
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
शृगालस्य च संवादं वानरस्य च भारत ॥ ८
तौ सखायौ पुरा ह्यास्तां मानुषत्वे परन्तप ।
अन्यां योनिं समापन्नौ शार्गाली वानरी तथा
ततः परासून् खादन्तं शृगालं वानरोऽब्रवीत्
श्मशानमध्ये संप्रेक्ष्य पूर्वजातिमनुस्मरन् १०
किं त्वया पापकं पूर्वं
कृतं कर्म सुदारुणम् ।
यस्त्वं श्मशाने मृतकान्
पूतिकानत्सि कुत्सितान् ॥ ११
एवमुक्तः प्रत्युवाच शृगालो वानरं तदा ।
ब्राह्मणस्य प्रतिश्रुत्य न मया तदुपाहृतम् १२
तत्कृते पापकीं योनिमापन्नोऽस्मि प्लवङ्गम ।
तस्मादेवंविधं भक्ष्यं भक्षयामि बुभुक्षितः १३
भीष्म उवाच ।
शृगालो वानरं प्राह पुनरेव नरोत्तम ।
किं त्वया पातकं कर्म कृतं येनासि वानरः ॥
वानर उवाच ।
सदा चाहं फलाहारो ब्राह्मणानां प्लवङ्गमः
तस्माच्च ब्राह्मणस्वं तु हर्तव्यं विदुषा सदा ।
समं विवादो मोक्तव्यो दातव्यं च प्रतिश्रुतम्
भीष्म उवाच ।
इत्येतद्ब्रुवतो राजन्ब्राह्मणस्य मया श्रुतम् ।
कथां कथयतः पुण्यां धर्मज्ञस्य पुरातनीम् १६
श्रुतश्चापि मया भूयः कृष्णस्यापि विशांपते ।
कथां कथयतः पूर्वं ब्राह्मणं प्रति पाण्डव ॥१७
न हर्तव्यं विप्रधनं क्षन्तव्यं तेषु नित्यशः ।
बालाश्च नावमन्तव्या दरिद्राः कृपणा अपि ॥
एवमेव च मां नित्यं ब्राह्मणाः सन्दिशन्ति वै
प्रतिश्रुत्य भवेद्देयं नाशा कार्या द्विजोत्तमे १९
ब्राह्मणो ह्याशया पूर्वं कृतया पृथिवीपते ।
सुसमिद्धो यथा दीप्तः पावकस्तद्विधः स्मृतः
यं निरीक्षेत संक्रुद्ध आशया पूर्वजातया ।
प्रदहेच्च हि तं राजन् कक्षमक्षय्यभुग्यथा २१
स एव हि यदा तुष्टो वचसा प्रतिनन्दति ।
भवत्यगदसंकाशो विषये तस्य भारत ॥ २२
पुत्रान् पौत्रान् पशूंश्चैव
बान्धवान् सचिवांस्तथा ।
पुरं जनपदं चैव
शान्तिरिष्टेन पोषयेत् ॥ २३
एतद्धि परमं तेजो ब्राह्मणस्येह दृश्यते ।
सहस्रकिरणस्येव सवितुर्धरणीतले ॥ २४
तस्माद्दातव्यमेवेह प्रतिश्रुत्य युधिष्ठिर ।
यदीच्छेच्छोभनां जातिं प्राप्तुं भरतसत्तम २५
ब्राह्मणस्य हि दत्तेन ध्रुवं स्वर्गो ह्यनुत्तमः ।
शक्यः प्राप्तुं विशेषेण दानं हि महती क्रिया ।
इतो दत्तेन जीवन्ति देवताः पितरस्तथा ।
तस्माद्दानानि देयानि ब्राह्मणेभ्यो विजानता ॥
महद्धि भरतश्रेष्ठ
ब्राह्मणस्तीर्थमुच्यते ।
वेलाया न तु कस्यांचि-
द्गच्छेद्विप्रो ह्यपूजितः ॥ २८

निशम्य विचार्य ॥ ६ ॥ **अपि चेति** । तत्र प्रायश्चित्तं सहस्रश्यामकर्णदानं अशक्यमनुष्ठातुमत एतत् पापं दुर्जरमिति भाव ॥ ७ ॥ अत्रैव प्रतिश्रुतस्य अप्रदाने विषये ॥ ८ ॥ ब्रुवतोऽध्यापकस्य कथा कथयतो मुखात् श्रुतम् ॥ १६ ॥ श्रुतश्चायमितिहास कृष्णस्य व्यासस्य नृगकथा कथयतो वासुदेवस्य वा मुखात् श्रुतोऽयमर्थ ॥ १७ ॥ आशा वंध्याशा ॥ १९ ॥ अक्षय्यं पित्रर्थमुद्दिष्टं दानं भुक्ते इत्यक्षय्यभुगग्नि ॥ २१ ॥ अगदसंकाश चिकित्सकतुल्यः ॥२२॥ शान्तिरिष्टेन शान्त्या हितेन क्षेमेण । रिष्टं क्षेमे इति **मेदिनी** ॥२३॥ इत अस्मिन्लोके ब्राह्मण एव दानपात्रमिति प्रघट्टकार्थं ॥ २७ ॥ तीर्थमपि ब्राह्मण एवेत्याह— **महदिति** ॥ २८ ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि शृगालवानरसंवादे नवमोऽध्यायः ॥ ९ ॥



१०

युधिष्ठिर उवाच ॥

मित्रसौहार्दयोगेन उपदेशं करोति यः ।
जात्याऽधरस्य राजर्षे दोषस्तस्य भवेन्न वा ॥
एतदिच्छामि तत्त्वेन व्याख्यातुं वै पितामह ।
सूक्ष्मा गतिर्हि धर्मस्य यत्र मुह्यंति मानवाः २

भीष्म उवाच ॥

अत्र ते वर्तयिष्यामि शृणु राजन् यथाक्रमम्
ऋषीणां वदता पूर्वं श्रुतमासीत् यथा पुरा ३
उपदेशो न कर्तव्यो जातिहीनस्य कस्यचित् ।
उपदेशे महान् दोष उपाध्यायस्य भाष्यते ४
निदर्शनमिदं राजन् शृणु मे भरतर्षभ ।
दुरुक्तवचने राजन् यथापूर्वं युधिष्ठिर ॥ ५
ब्रह्माश्रमपदे वृत्ते पार्श्वे हिमवतः शुभे ।
तत्राश्रमपदं पुण्यं नानावृक्षगणायुतम् ॥ ६
नानागुल्मलताकीर्णं मृगद्विजनिषेवितम् ।
सिद्धचारणसंयुक्तं रम्यं पुष्पितकाननम् ॥ ७
व्रतिभिर्बहुभिः कीर्णं तापसैरुपसेवितम् ।
ब्राह्मणैश्च महाभागैः सूर्यज्वलनसन्निभैः ॥ ८
नियमव्रतसम्पन्नैः समाकीर्णं तपस्विभिः ।
दीक्षितैर्भरतश्रेष्ठ यताहारैः कृतात्मभिः ॥ ९
तपोऽध्ययनघोषैश्च नादितं भरतर्षभ ।
बालखिल्यैश्च बहुभिर्यतिभिश्च निषेवितम् १०
तत्र कश्चित्समुत्साहं कृत्वा शूद्रो दयान्वितः ।
आगतो ह्याश्रमपदं पूजितश्च तपस्विभिः ॥११
तांस्तु दृष्ट्वा मुनिगणान्देवकल्पान्महौजसः ।
विविधां वहतो दीक्षां संप्राहृष्यत भारत १२
अथास्य बुद्धिरभवत्तपस्ये भरतर्षभ ।
ततोऽब्रवीत्कुलपतिं पादौ संगृह्य भारत ॥१३
भवत्प्रसादादिच्छामि धर्मं वक्तुं द्विजर्षभ ।
तन्मां त्वं भगवन्वक्तुं प्रव्राजयितुमर्हसि ॥ १४
वर्णावरोऽहं भगवन् शूद्रो जात्यास्मि सत्तम
शुश्रूषां कर्तुमिच्छामि प्रपन्नाय प्रसीद मे ॥१५

कुलपतिरुवाच ।

न शक्यमिह शूद्रेण लिंगमाश्रित्य वर्तितुम्
आस्यतां यदि ते बुद्धिः शुश्रूषानिरतो भव१६
शुश्रूषया परांल्लोकानवाप्स्यसि न संशयः १७

भीष्म उवाच ॥

एवमुक्तस्तु मुनिना स शूद्रो चिंतयन्नृप ।
कथमत्र मया कार्या श्रद्धा धर्मपरा च मे ॥१८
विज्ञातमेवं भवतु करिष्ये प्रियमात्मनः ।
गत्वाऽऽश्रमपदाद्दूरमुटजं कृतवांस्तु सः ॥१९
तत्र वेदीं च भूमिं च देवतायतनानि च ।
निवेश्य भरतश्रेष्ठ नियमस्थोऽभवन्मुनिः २०
अभिषेकांश्च नियमान् देवतायतनेषु च ।
बलिं च कृत्वा हुत्वा च देवतां चाप्यपूजयत्२१

इति श्रीमहाभारते अनुशासनपर्वणि नीलकण्ठीये भारतभावदीपे नवमोऽध्याय ॥ ९ ॥

१०

मित्रसौहार्दत्यध्यायेन नीचाय धर्मरहस्य न दद्यादित्युक्तं मित्रं उपकारमपेक्ष्य उपकर्ता। **सुहृत्** उपकारमनपेक्ष्योपकर्ता लोभात् कृपया वेत्यर्थ ॥ १ ॥ उपाध्यायस्य उपदेशकर्तु भाष्यते न शूद्राय मतिं दद्यादित्यादिशास्त्रेण ॥४॥ दुरुक्तं दु खस्थ नीच प्रति उक्तं वचनम् ॥५॥ व्रतिभिर्ब्रह्मचारिभि तापसैर्वानप्रस्थै ॥ ८ ॥ यतिभि सन्यासिभि ॥ १० ॥ दयान्वित सर्वभूताभयदानेन प्रव्रज्या कृतवानित्यर्थ ॥ ११ ॥ दीक्षा नियमम् ॥१२॥ तपस्ये तप करिष्ये ॥१३॥ वक्तु अविगतु वज गताविति अस्य रूप प्रव्राजयितु विधिवत् स्वोचित कर्म त्याजयितुम् ॥१४॥ लिंग संन्यासिचिन्ह सेवकस्य तव प्रव्रज्यानाधिकारान्न युक्तम् ॥ १६ ॥ आत्मन प्रिय विक्षेपकस्य शुश्रूषाख्यस्य स्वधर्मस्य त्यागं लिंगधारणानधिकारेऽपि त्यागमात्रे सर्वस्याधिकारात् उटज पर्णशालाम् ॥ १९ ॥ वेदीं पूजार्थं भूमिं शयनार्थम् ॥ २० ॥ अभिषेकान् त्रिसध्य स्नानानि ॥ २१ ॥ सक-

संकल्पनियमोपेतः फलाहारो जितेंद्रियः ।
नित्यं सन्निहिताभिस्तु ओषधीभिः फलैस्तथा
अतिथीन्पूजयामास यथावत्समुपागतान् ।
एवं हि सुमहान्कालो व्यत्यक्रामत तस्य वै २३
अथास्य मुनिरागच्छत्संगत्या वै तमाश्रमम् ।
संपूज्य स्वागतेनर्षिं विधिवत्समतोषयत् ॥ २४
अनुकूलाः कथाः कृत्वा यथागतमपृच्छत ।
ऋषिः परमतेजस्वी धर्मात्मा संशितव्रतः २५
एवं सुबहुशस्तस्य शूद्रस्य भरतर्षभ ।
सोऽगच्छदाश्रममृषिः शूद्रं द्रष्टुं नरर्षभ ॥ २६
अथ तं तापसं शूद्रः सोऽब्रवीद्भरतर्षभ ।
पितृकार्यं करिष्यामि तत्र मेऽनुग्रहं कुरु ॥२७
बाढमित्येव तं विप्र उवाच भरतर्षभ ।
शुचिर्भूत्वा स शूद्रस्तु तस्यर्षेः पाद्यमानयत् २८
अथ दर्भांश्च वन्याश्च ओषधीर्भरतर्षभ ।
पवित्रमासनं चैव बृसीं च समुपानयत् ॥ २९
अथ दक्षिणमावृत्य बृसीं चरमशैर्षिकीम् ।
कृतामन्यायतो दृष्ट्वा तं शूद्रमृषिरब्रवीत् ॥३०
कुरुष्वैतां पूर्वशीर्षां भवाञ्छोदङ्मुखः शुचिः ।
स च तत्कृतवान् शूद्रः सर्वं यदृषिरब्रवीत ३१
यथोपदिष्टं मेधावी दर्भार्घादि यथातथम् ।
हव्यकव्यविधिं कृत्स्नमुक्तं तेन तपस्विना ३२
ऋषिणा पितृकार्यं च स च धर्मपथे स्थितः ।
पितृकार्ये कृते चापि विसृष्टः स जगाम ह ३३
अथ दीर्घस्य कालस्य स तप्यन् शूद्रतापसः ।
वने पञ्चत्वमगमत्सुकृतेन च तेन वै ॥ ३४
अजायत महाराज वंशे स च महाद्युतिः ३५
तथैव स ऋषिस्तात कालधर्ममवाप ह ॥ ३६
पुरोहितकुले विप्र आजातो भरतर्षभ ।
एवं तौ तत्र संभूतावुभौ शूद्रमुनी तदा ॥ ३७
क्रमेण वार्धितौ चापि विद्यासु कुशलावुभौ ।
अथर्ववेदे वेदे च बभूवर्षिः सुनिष्ठितः ।
कल्पप्रयोगे चोत्पन्ने ज्योतिषे च पर गतः ॥३८
सांख्ये चैव परा प्रीतिस्तस्य चैवं व्यवर्धत ।
पितर्युपरते चापि कृतशौचस्तु पार्थिवः ॥३९॥
अभिषिक्तः प्रकृतिभी राजपुत्रः स पार्थिवः ।
अभिषिक्तेन स ऋषिरभिषिक्तः पुरोहितः ॥४०
स तं पुरोधाय सुखमवसद्भरतर्षभ ।
राज्यं शशास धर्मेण प्रजाश्च परिपालयन् ४१
पुण्याहवाचने नित्यं धर्मकार्येषु चासकृत् ।
उत्स्मयन्प्राहसच्चापि दृष्ट्वा राजा पुरोहितम् ॥
एवं स बहुशो राजन् पुरोधसमुपाहसत् ।
लक्षयित्वा पुरोधास्तु बहुशस्तं नराधिपम् ॥
उत्स्मयन्तं च सततं दृष्ट्वाऽसौ मन्युमाविशत् ।
अथ शून्ये पुरोधास्तु सह राज्ञा समागतः ४४
कथाभिरनुकूलाभी राजानं चाभ्यरोचयत् ।
ततोऽब्रवीन्नरेन्द्रं स पुरोधा भरतर्षभ ॥ ४५
वरमिच्छाम्यहं त्वेकं त्वया दत्तं महाद्युते ॥४६

राजोवाच ।

वराणां ते शतं दद्यां किं बतैक द्विजोत्तम ।
स्नेहाच्च बहुमानाच्च नास्त्यदेयं हि मे तव ४७

पुरोहित उवाच ।

एकं वै वरमिच्छामि यदि तुष्टोऽसि पार्थिव
प्रतिजानीहि तावत्त्वं सत्यं यद्वद नानृतम् ४८

भीष्म उवाच ।

बाढमित्येव तं राजा प्रत्युवाच युधिष्ठिर ।
यदि ज्ञास्यामि वक्ष्यामि अजानन्न तु संवदे ॥

पुरोहित उवाच ।

पुण्याहवाचने नित्य
धर्मकृत्येषु चासकृत ।
शान्तिहोमेषु च सदा
किं त्वं हससि वीक्ष्य माम् ॥ ५०
सव्रीडं वै भवति हि मनो मे हसता त्वया ।
कामया शापितो राजन्नान्यथा वक्तुमर्हसि५१
सुव्यक्तं कारणं ह्यत्र न ते हास्यमकारणम् ।
कौतूहलं मे सुभृश तत्त्वेन कथयस्व मे ॥ ५२

राजोवाच ।

एवमुक्ते त्वया विप्र यदवाच्यं भवेदपि ।
अवश्यमेव वक्तव्यं शृणुष्वैकमना द्विज ॥ ५३
पूर्वदेहे यथा वृत्तं तन्निबोध द्विजोत्तम ।
जातिं स्मराम्यहं ब्रह्मन्नवधानेन मे शृणु ॥ ५४
शूद्रोऽहमभवं पूर्वं तापसो भृशसंयुतः ।
ऋषिरुग्रतपास्त्वं च तदाऽभूर्द्विजसत्तम ॥ ५५
प्रीयता हि तदा ब्रह्मन्ममानुग्रहबुद्धिना ।
पितृकार्ये त्वया पूर्वमुपदेशः कृतोऽनघ ॥ ५६
बृस्यां दर्भेषु हव्ये च कव्ये च मुनिसत्तम ।
एतेन कर्मदोषेण पुरोधास्त्वमजायथाः ॥ ५७

त्पस्य नियमो निग्रह चित्तवृत्तिनिरोध इति यावत् तेन उपेत ॥२२॥ बृसी चरमशैर्षिकी आसनकर्त्रे पश्चिमाग्रम् ॥३०॥ वेदे ऋग्वेदादित्रये कल्पप्रयोगे सूत्रोक्तयज्ञप्रयोगे ॥ ३८ ॥

अहं राजा च विप्रेन्द्र पश्य कालस्य पर्ययम् ।
मत्कृतस्योपदेशस्य त्वयाऽऽवाप्तमिदं फलम्
एतस्मात्कारणाद्ब्रह्मन्प्रहसे त्वां द्विजोत्तम।
न त्वां परिभवन्ब्रह्मन्प्रहसामि गुरुर्भवान् ५९
विपर्ययेण मे मन्युस्तेन सन्तप्यते मनः ।
जातिं स्मराम्यहं तुभ्यमतस्त्वां प्रहसामि वै ॥
एवं तवोग्रं हि तप उपदेशेन नाशितम् ।
पुरोहितत्वमुत्सृज्य यतस्व त्वं पुनर्भवे ॥ ६१
इतस्त्वमधमामन्यां मा योनिं प्राप्स्यसे द्विज ।
गृह्यतां द्रविणं विप्र पूतात्मा भव सत्तम ६२

भीष्म उवाच ।

ततो विसृष्टो राज्ञा तु विप्रो दानान्यनेकशः ।
ब्राह्मणेभ्यो ददौ वित्तं भूमिं ग्रामांश्च सर्वशः
कृच्छ्राणि चीर्त्वा च ततो
यथोक्तानि द्विजोत्तमैः ।
तीर्थानि चापि गत्वा वै
दानानि विविधानि च ॥ ६४
दत्त्वा गाश्चैव विप्रेभ्यः पूतात्माऽभवदात्मवान्
तमेव चाश्रमं गत्वा चचार विपुलं तपः ॥६५
ततः सिद्धिं परां प्राप्तो ब्राह्मणो राजसत्तम ।
संमतश्चाभवत्तेषामाश्रमे तन्निवासिनाम् ॥६६
एवं प्राप्तो महत्कृच्छ्रमृषिः सङ्गपसत्तम ।
ब्राह्मणेन न वक्तव्यं तस्माद्वर्णावरे जने ॥ ६७
ब्राह्मणाः क्षत्रिया वैश्यास्त्रयो वर्णा द्विजातयः ।
एतेषु कथयन्राजन्ब्राह्मणो न प्रदुष्यति ॥ ६८
तस्मात्सद्भिर्न वक्तव्यं कस्यचित्किंचिदग्रतः ।
सूक्ष्मा गतिर्हि धर्मस्य दुर्ज्ञेया ह्यकृतात्मभिः ॥
तस्मान्मौनेन मुनयो दीक्षां कुर्वन्ति चादृताः
दुरुक्तस्य भयाद्राजन्नाभाषन्ते च किञ्चन॥७०
धार्मिका गुणसंपन्नाः सत्यार्जवसमन्विताः ।
दुरुक्तवाचाभिहितैः प्राप्नुवन्तीह दुष्कृतम् ७१
उपदेशो न कर्तव्यः कदाचिदपि कस्यचित् ।
उपदेशाद्धि तत्पाप ब्राह्मणः समवाप्नुयात् ७२
विमृश्य तस्मात्प्राज्ञेन वक्तव्यं धर्ममिच्छता ।
सत्यानृतेन हि कृत उपदेशो हिनस्ति हि ॥७३
वक्तव्यमिह पृष्टेन विनिश्चित्य विनिश्चयम् ।
स चोपदेशः कर्तव्यो येन धर्ममवाप्नुयात्॥७४
एतत्ते सर्वमाख्यातमुपदेशकृते मया ।
महान् क्लेशो हि भवति तस्मान्नोपदिशेदिह७५

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि शूद्रमुनिसंवादे दशमोऽध्यायः ॥ १० ॥

११

युधिष्ठिर उवाच ।

कीदृशो पुरुषे तात
स्त्रीषु वा भरतर्षभ ।
श्रीः पद्मा वसते नित्यं
तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

अत्र ते वर्णयिष्यामि यथावृत्तं यथाश्रुतम् ।
रुक्मिणी देवकीपुत्रसन्निधौ पर्यपृच्छत ॥ २
नारायणस्याङ्कगतां ज्वलन्तीं
दृष्ट्वा श्रियं पद्मसमानवर्णाम् ।
कौतूहलाद्विस्मितचारुनेत्रा
पप्रच्छ माता मकरध्वजस्य ॥ ३
कानीह भूतान्युपसेवसे त्वं
सन्तिष्ठसे कानिव सेवसे त्वम् ।
तानि त्रिलोकेश्वरभूतकान्ते
तत्त्वेन मे ब्रूहि महर्षिकल्पे ॥ ४

मत्कृतस्य मद्य कृतस्य ॥ ५८ ॥ विपर्ययेण शूद्रोऽप्यहं जातिस्मरो जात मुनिरपि त्व पुरोहितो जात इति वैपरीत्येन मन्युर्दैन्यम् ॥ ६० ॥ भवं भवनिमित्तम् ॥ ६१ ॥ सत्यानृतेन वाणिज्येन धनलोभेनेत्यर्थ । सत्यानृतं तु वाणिज्यमिति स्मृति ॥ ७३ ॥ विनिश्चय निश्चेतव्यम् ॥ ७४ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे दशमोऽध्याय ॥ १० ॥

११

कीदृशो इति । श्रीमानेव ददातीति श्रीकरान्योगान् कथयितुमध्याय । श्री रूपौदार्यादिशोभा तद्युता पद्मा धनसमृद्धि श्री पद्मेत्युच्यते ॥ १ ॥ पर्यपृच्छत श्रियमित्यपकृष्यते ॥ २ ॥ उपसेवसे गजतुरगादिरूपेण सतिष्ठसे वैर्यौदार्यसौदर्यशौर्यादिरूपेण पुरुषे वससि ॥ ४ ॥ 'कानि च' इत्यपि पाठ ।

एवं तदा श्रीरभिभाष्यमाणा
देव्या समक्षं गरुडध्वजस्य ।
उवाच वाक्यं मधुराभिधान
मनोहरं चन्द्रमुखी प्रसन्ना ॥ ५
श्रीरुवाच ।
वसामि नित्यं सुभगे प्रगल्भे
दक्षे नरे कर्मणि वर्तमाने ।
अक्रोधने देवपरे कृतज्ञे
जितेन्द्रिये नित्यमुदीर्णसत्त्वे ॥ ६
नाकर्मशीले पुरुषे वसामि
न नास्तिके साङ्करिके कृतघ्ने ।
न भिन्नवृत्ते न नृशंसवर्णे
न चापि चौरे न गुरुष्वसूये ॥ ७
ये चाल्पतेजोबलसत्त्वमानाः
क्लिश्यन्ति कुप्यन्ति च यत्र तत्र ।
न चैव तिष्ठामि तथाविधेषु
नरेषु संगुप्तमनोरथेषु ॥ ८
यश्चात्मनि प्रार्थयते न किञ्चि-
द्यश्च स्वभावोपहतान्तरात्मा ।
तेष्वल्पसन्तोषपरेषु नित्यं
नरेषु नाहं निवसामि सम्यक् ॥ ९
स्वधर्मशीलेषु च धर्मवित्सु
वृद्धोपसेवानिरते च दान्ते ।
कृतात्मनि क्षान्तिपरे समर्थे
क्षान्तासु दान्तासु तथाऽबलासु १०
सत्यस्वभावार्जवसंयुतासु
वसामि देवद्विजपूजिकासु ।
प्रकीर्णभाण्डामनपेक्ष्यकारिणीं
सदा च भर्तुः प्रतिकूलवादिनीम् ॥ ११
परस्य वेश्माभिरतामलज्जा-
मेवंविधां तां परिवर्जयामि ।
पापामचोक्षामवलेहिनीं च
व्यपेतधैर्यां कलहप्रियां च ॥ १२
निद्राभिभूतां सततं शयानां
एवंविधां तां परिवर्जयामि ॥
सत्यासु नित्यं प्रियदर्शनासु
सौभाग्ययुक्तासु गुणान्वितासु ॥ १३
वसामि नारीषु पतिव्रतासु
कल्याणशीलासु विभूषितासु ।
यानेषु कन्यासु विभूषणेषु
यज्ञेषु मेघेषु च वृष्टिमत्सु ॥ १४
वसामि फुल्लासु च पद्मिनीषु
नक्षत्रवीथीषु च शारदीषु ॥
गजेषु गोष्ठेषु तथाऽऽसनेषु
सरःसु फुल्लोत्पलपङ्कजेषु ॥ १५
नदीषु हंसस्वननादितासु
क्रौञ्चावघुष्टस्वरशोभितासु ॥
विकीर्णकूलद्रुमराजितासु
तपस्विसिद्धद्विजसेवितासु ॥ १६
वसामि नित्यं सुबहूदकासु ॥
सिंहैर्गजैश्चाकुलितोदकासु ॥
मत्ते गजे गोवृषभे नरेन्द्रे
सिंहासने सत्पुरुषेषु नित्यम् ॥ १७
यस्मिन् जनो हव्यभुजं जुहोति
गोब्राह्मणं चार्चति देवताश्च ॥
काले च पुष्पैर्बलयः क्रियन्ते
तस्मिन् गृहे नित्यमुपैमि वासम् ॥ १८
स्वाध्यायनित्येषु सदा द्विजेषु
क्षत्रे च धर्माभिरते सदैव ॥
वैश्ये च कृष्याभिरते वसामि
शूद्रे च शुश्रूषणनित्ययुक्ते ॥ १९
नारायणे त्वेकमना वसामि
सर्वेण भावेन शरीरभूता ॥
तस्मिन् हि धर्मः सुमहान्निविष्टो
ब्रह्मण्यता चात्र तथा प्रियत्वम् ॥ २०

देव्या रुक्मिण्या ॥ ५ ॥ प्रगल्भे वाग्मिनि दक्षे अनलसे देवपरे देवाराधननिष्ठे ॥ ६ ॥ नृशंसवर्णे निष्ठुराक्षरभाषिणि असूये असूयावति ॥ ७ ॥ तेज शौर्यं सत्त्वं बुद्धि यत्र तत्र विशिष्टपुरुषे संगुप्तमनोरथेषु अन्यत् ध्यायन्त्यन्यदर्शयन्ति तादृशेषु ॥ ८ ॥ स्वभावेत्यादेर्मौढ्योपहतचित्त इत्यर्थः ॥ ९ ॥ **स्वधर्मेति** । सार्द्धश्लोक ॥ १० ॥ पापा निर्दया अवेक्षा अशुचिं अवलेहिनी सक्किणीं लेलिहाना सदा कुद्धामित्यर्थः ॥ १२ ॥ यानादिषु रमणीयेषु सर्वेषु वसामीत्यर्थः ॥ १४ ॥ **यस्मिन्निति** । लक्ष्मी प्राप्तुमुपाया एत इत्यर्थः ॥ १८ ॥ भावेन आदरेण शरीरभूता शरीरवती ॥ २० ॥

नाहं शरीरेण वसामि देवि
नैवं मया शक्यमिहाभिधातुम्॥
भावेन यस्मिन्निवसामि पुंसि
स वर्धते धर्मयशोर्थकामैः ॥ २१ ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि श्रीरुक्मिणीसंवादे एकादशोऽध्यायः ॥ ११ ॥



१२

युधिष्ठिर उवाच ॥
स्त्रीपुंसयोः संप्रयोगे स्पर्शः कस्याधिको भवेत्
एतस्मिन् संशये राजन् यथावद्वक्तुमर्हसि ॥ १
भीष्म उवाच ॥
अत्राप्युदाहरंतीममितिहासं पुरातनम् ।
भंगास्वनेन शक्रस्य यथा वैरमभूत्पुरा ॥ २
पुरा भंगास्वनो नाम राजर्षिरतिधार्मिकः ।
अपुत्रः पुरुषव्याघ्र पुत्रार्थं यज्ञमाहरत् ॥ ३
अग्निष्टुतं स राजर्षिरिंद्रद्विष्टं महाबलः ॥
प्रायश्चित्तेषु मर्त्यानां पुत्रकामेषु चेष्यते ॥ ४
इन्द्रो ज्ञात्वा तु तं यज्ञं महाभागः सुरेश्वरः ।
अन्तरं तस्य राजर्षेरन्विच्छन्नियतात्मनः ॥ ५
न चैवास्यान्तरं राजन् स ददर्श महात्मनः ।
कस्यचित्त्वथ कालस्य मृगयां गतवान्नृपः ॥ ६
इदमन्तरमित्येव शक्रो नृपममोहयत् ।
एकाश्वेन च राजर्षिर्भ्रान्त इंद्रेण मोहितः ॥ ७
न दिशोऽविन्दत नृपः क्षुत्पिपासार्दितस्तदा
इतश्चेतश्च वै राजन् श्रमतृष्णान्वितो नृप ॥ ८
सरोऽपश्यत्सुरुचिरं पूर्णं परमवारिणा ।
सोऽवगाह्य सरस्तात पाययामास वाजिनं ९
अथ पीतोदकं सोऽश्वं वृक्षे बध्वा नृपोत्तमः ।
अवगाह्य ततः स्नातस्तत्र स्त्रीत्वमवाप्तवान्१०
आत्मानं स्त्रीकृतं दृष्ट्वा व्रीडितो नृपसत्तमः ।
चिन्तानुगतसर्वात्मा व्याकुलेन्द्रियचेतनः॥११
आरोहिष्ये कथं त्वश्वं कथ यास्यामि वै पुरम्
इष्टेनाग्निष्टुता चापि पुत्राणां शतमौरसम् ॥१२
जातं महाबलानां मे तान्प्रवक्ष्यामि किं त्वहम्
दारेषु चात्मकीयेषु पौरजानपदेषु च ॥ १३
मृदुत्वं च तनुत्वं च विक्लवत्वं तथैव च ।
स्त्रीगुणा ऋषिभिः प्रोक्ता धर्मतत्त्वार्थदर्शिभिः॥
व्यायामे कर्कशत्वं च वीर्यं च पुरुषे गुणाः ।
पौरुषं विप्रनष्टं वै स्त्रीत्वं केनापि मेऽभवत् १५
स्त्रीभावात्पुनरश्वं तं कथमारोदुमुत्सहे ।
महता त्वथ यत्नेन आरुह्याश्वं नराधिपः ॥१६
पुनरायात्पुरं तात स्त्रीकृतो नृपसत्तमः ।
पुत्रा दाराश्च भृत्याश्च पौरजानपदाश्च ते ॥१७
किंत्विदं त्विति विज्ञाय विस्मयं परमं गताः
अथोवाच स राजर्षिः स्त्रीभूतो वदतां वरः१८
मृगयामस्मि निर्यातो बलैः परिवृतो दृढम् ।
उद्भ्रान्तः प्राविशं घोरामटवीं दैवचोदितः॥१९
अटव्यां च सुघोरायां तृष्णार्तो नष्टचेतनः ।
सरः सुरुचिरप्रख्यमपश्यं पक्षिभिर्वृतम् ॥ २०

नाहमिति । नारायणादन्यत्र धर्मादिबुद्धिरूपेणैव वसामि न शरीरेणेत्यर्थः ॥२१॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकादशोऽध्यायः ॥ ११ ॥

१२

स्त्रीपुंसयोरिति । पूर्वाध्यायान्ते स वर्द्धते धर्मयशोर्थकामैरिति कामसुखबुद्धिरपि लक्ष्मीवत्स्वस्तात्युक्त तत्र स्त्रीषु पुमर्थेऽक्षया काममुखबुद्धिरस्तीति लक्ष्मीकामेन कार्मिन्य प्रीतिमत्यो लक्ष्मीबुद्ध्या पूजनीया इत्यध्यायतात्पर्यम् । स्पर्श वैषयिक सुखम् ॥ १ ॥ वैरमूलमाह-**अग्निष्टुतमिति** । त्रिगुणितोऽग्निष्टोमोऽग्निष्टुत् तत्र त्र्यग्निरेव स्तूयते स च 'पुत्र ददाति दाशुष' इति मन्त्रवर्णात्पुत्रप्रद क्रतु स चेन्द्रद्विष्टस्तत्रेन्द्रस्य प्राधान्याभावात् ॥ ४ ॥ यज्ञ कृतमिति शेष ॥ ५ ॥ मृदुत्वादय स्त्रीगुणा आगता ॥ १४ ॥ कर्कशत्वादय पुरुषगुणा नष्टा केन निमित्तेन मे मम स्त्रीत्वमभवदिति सम्बन्ध ॥ १५ ॥ स्त्रीकृत इन्द्रेण स्त्रीत्व प्रापित ॥ १७ ॥

तत्रावगाढः स्त्रीभूतो दैवेनाहं कृतः पुरा।
नामगोत्राणि चाभाष्य दाराणां मंत्रिणां तथा
आह पुत्रांस्ततः सोऽथ स्त्रीभूतः पार्थिवोत्तमः
संप्रीत्या भुज्यतां राज्यं वनं यास्यामि पुत्रकाः
एवमुक्त्वा पुत्रशतं वनमेव जगाम ह।
गत्वा चैवाश्रमं सा तु तापस प्रत्यपद्यत ॥२३
तापसेनास्य पुत्राणामाश्रमेष्वभवच्छतम्।
अथ साऽऽदाय तान्सर्वान् पूर्वपुत्रानभाषत२४
पुरुषत्वे सुता यूयं स्त्रीत्वे चेमे शतं सुताः।
एकत्र भुज्यतां राज्यं भ्रातृभावेन पुत्रकाः २५
सहिता भ्रातरस्तेऽथ राज्यं बुभुजिरे तदा।
तान् दृष्ट्वा भ्रातृभावेन भुंजानान् राज्यमुत्तमं
चिन्तयामास देवेन्द्रो मन्युनाऽथ परिप्लुतः।
उपकारोऽस्य राजर्षेः कृतो नापकृतं मया २७
ततो ब्राह्मणरूपेण देवराजः शतक्रतुः।
भेदयामास तान् गत्वा नगरं वै नृपात्मजान्२८
भ्रातॄणां नास्ति सौभ्रात्रं येष्येकस्य पितुःसुताः
राज्यहेतोर्विवादिताः कश्यपस्य सुरासुराः २९
यूयं भङ्क्ष्यनापत्यास्तापसस्येतरे सुताः।
कश्यपस्य सुराश्चैव असुराश्च सुतास्तथा ॥ ३०
युष्माकं पैतृकं राज्यं भुज्यते तापसात्मजैः।
इन्द्रेण भेदितास्ते तु युद्धेऽन्योन्यमपातयन्॥
तच्छ्रुत्वा तापसी चापि संतप्ता प्ररुरोद ह।
ब्राह्मणच्छद्मनाभ्येत्य तामिन्द्रोऽथान्वपृच्छत
केन दुःखेन संतप्ता रोदिषि त्वं वरानने।
ब्राह्मणं तं ततो दृष्ट्वा सा स्त्री करुणमब्रवीत् ३३
पुत्राणां द्वे शते ब्रह्मन् कालेन विनिपातिते।
अहं राजाऽभवं विप्र तत्र पूर्वं शतं मम ॥ ३४
समुत्पन्नं स्वरूपाणां पुत्राणां ब्राह्मणोत्तम।
कदाचिन्मृगयां यात उद्भ्रान्तो गहने वने ३५
अवगाढश्च सरसि स्त्रीभूतो ब्राह्मणोत्तम।
पुत्रान् राज्ये प्रतिष्ठाप्य वनमस्मि ततो गतः
स्त्रियाश्च मे पुत्रशतं तापसेन महात्मना।
आश्रमे जनितं ब्रह्मन्नीतं तन्नगरं मया ॥ ३७
तेषां च वैरमुत्पन्नं कालयोगेन वै द्विज।
एतच्छोचाम्यहं ब्रह्मन् दैवेन समभिप्लुता ३८

इन्द्रस्तां दुःखितां दृष्ट्वा अब्रवीत्परुषं वचः।
पुरा सुदुःसहं भद्रे मम दुःखं त्वया कृतम् ॥
इन्द्रद्विष्टेन यजता मामनाहूय धिष्ठितम्।
इन्द्रोहमस्मि दुर्बुद्धे वैरं ते पातितं मया॥ ४०
इन्द्रं दृष्ट्वा तु राजर्षिः पादयोः शिरसा गतः।
प्रसीद त्रिदशश्रेष्ठ पुत्रकामेन स क्रतुः॥ ४१
इष्टस्त्रिदशशार्दूल तत्र मे क्षन्तुमर्हसि।
प्रणिपातेन तस्येन्द्रः परितुष्टो वरं ददौ ॥ ४२
पुत्रास्ते कतमे राजन् जीवन्त्वेतत्प्रचक्ष्व मे।
स्त्रीभूतस्य हि ये जाताः पुरुषस्याथ येऽभवन्
तापसी तु ततः शक्रमुवाच प्रयताञ्जलिः।
स्त्रीभूतस्य हि ये पुत्रास्ते मे जीवन्तु वासव॥
इन्द्रस्तु विस्मितो दृष्ट्वा स्त्रियं पप्रच्छ तां पुनः
पुरुषोत्पादिता ये ते कथं द्वेष्याः सुतास्तव॥

स्त्रीभूतस्य हि ये जाताः
स्नेहस्तेभ्योऽधिकः कथम्।
कारणं श्रोतुमिच्छामि
तन्मे वक्तुमिहार्हसि॥ ४६

ह्युवाच।

स्त्रियास्त्वभ्यधिकः स्नेहो
न तथा पुरुषस्य वै।
तस्मात्ते शक्र जीवन्तु
ये जाताः स्त्रीकृतस्य वै॥ ४७

भीष्म उवाच।

एवमुक्तस्ततस्त्विन्द्रः प्रीतो वाक्यमुवाच ह
सर्वे एवेह जीवन्तु पुत्रास्ते सत्यवादिनि॥४८
वरं च वृणु राजेन्द्र यं त्वमिच्छसि सुव्रत।
पुरुषत्वमथ स्त्रीत्वं मत्तो यदभिकांक्षसे॥ ४९

ह्युवाच।

स्त्रीत्वमेव वृणे शक्र पुंस्त्वं नेच्छामि वासव।
एवमुक्तस्तु देवेन्द्रस्तां स्त्रियं प्रत्युवाच ह॥५०
पुरुषत्वं कथं त्यक्त्वा स्त्रीत्वं चोदयसे विभो
एवमुक्तः प्रत्युवाच स्त्रीभूतो राजसत्तमः ५१
स्त्रियाः पुरुषसंयोगे प्रीतिरभ्यधिका सदा।
एतस्मात्कारणाच्छक्र स्त्रीत्वमेव वृणोम्यहम्
रमिताऽभ्यधिकं स्त्रीत्वे सत्यं वै देवसत्तम।
स्त्रीभावेन हि तुष्यामि गम्यतां त्रिदशाधिप

प्रत्यपद्यत भर्तृत्वेन स्वीकृतवती ॥ २३ ॥ स्त्रीत्वदानेन द्विगुणितपुत्रप्राप्तिरूप उपकार एव जातो न स्त्रीत्वकृतोपकार इत्यर्थ ॥२७॥ स्वरूपाणा स्वस्येव रूपं येषा तेषाम् ॥३५॥ स्त्रिया स्त्रीभूतस्य मे मम ॥ ३७॥ इन्द्रद्विष्टेन अभिष्टुता यज्ञेन धिष्ठितं अधिष्ठित क्रतूनिति शेष ॥ ४०॥ अभ्यायतात्पर्यमाह—स्त्रिया इति ॥ ५२ ॥

एवमस्त्विति चोक्त्वा ता-
मापृच्छ्य त्रिदिव गतः ।
एवं स्त्रिया महाराज
अधिका प्रीतिरुच्यते ॥ ५४

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि भङ्गास्वनोपाख्याने द्वादशोऽध्यायः ॥ १२ ॥

१३

युधिष्ठिर उवाच ।
किं कर्तव्यं मनुष्येण लोकयात्राहितार्थिना।
कथं वै लोकयात्रा तु किंशीलश्च समाचरेत
भीष्म उवाच ।
कायेन त्रिविधं कर्म वाचा चापि चतुर्विधम्
मनसा त्रिविधं चैव दशकर्मपथांस्त्यजेत् ॥ २
प्राणातिपातः स्तैन्यं च परदारानथापि च ।
त्रीणि पापानि कायेन सर्वतः परिवर्जयेत् ३
असत्प्रलाप पारुष्यं पैशुन्यमनृतं तथा ।
चत्वारि वाचा राजेन्द्र न जल्पेन्नानुचिन्तयेत्
अनभिध्या परस्वेषु सर्वसत्त्वेषु सौहृदम् ।
कर्मणां फलमस्तीति त्रिविधं मनसा चरेत् ५
तस्माद्वाक्कायमनसा
नाचरेदशुभ नरः ।
शुभाशुभान्याचरन् हि
तस्य तस्याश्नुते फलम् ॥ ६

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि लोकयात्राकथने त्रयोदशोऽध्यायः ॥ १३ ॥

१४

युधिष्ठिर उवाच ।
त्वयाऽऽपगेय नामानि श्रुतानीह जगत्पतेः । पितामहेशाय विभो नामान्याचक्ष्व शंभवे॥१

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्वादशोऽध्याय ॥ १२ ॥

१३

तदेवं गौतमीसुदर्शनशुकप्रभृतीनामाख्यानैर्यदुच्छोपगतेषु दुःखेषु अनुद्विग्नमना अतिथिभक्त आनृशंस्यादिधर्मवान् श्रियं प्राप्नोति तस्याश्च फलं काम इन्द्रियप्रीतिरूप सा च स्त्रीणामेव भूयसी पुंसस्त्वत्पतेरत्येतावता ग्रन्थेनोक्तम् । तमिमं काम तुच्छीकृत्य परमसुखावाप्तिकामस्य पूर्वोक्तानुद्वेगादीनुपासीनस्य वक्ष्यमाणविधिना परमेश्वरमाराधयिष्यतो हेयं दोषजातं वक्तुमयमध्याय आरभ्यते—**किमिति** । लोकयात्रा ऐहिकशिष्टव्यवहार , हित च पारलौकिकं श्रेयस्तदर्थिना किं कर्तव्यं किमवश्यमनुष्ठेय लोकयात्रा लोकद्वयश्रेय साधनम्॥१॥ कर्मपथान् स्वाभाविककर्ममार्गान् ॥ २ ॥ प्राणातिपातो **हिंसा** ॥ ३ ॥ **असत्प्रलापं** ग्राम्यवार्तादिं **पारुष्यं** निष्ठुरभाषण **पैशुन्यं** राजद्वारादौ परदोषसूचन **अनृतं** मिथ्यावाद परपीडाकर मनसाप्येव वदिष्यामीति नानुचिन्तयेत ॥ ४॥ **अनभिध्येति** श्लोकेन परद्रव्येष्वभि यानि परस्यानिष्टचिन्तनं वेदवादेषु नास्तिक्यमिति त्रीणि त्याज्यानि लभ्यते दश त्यजेदित्युपक्रमात् ॥५॥ शुभ अहिंसादि आस्तिक्यान्तं अशुभं हिंसादि नास्तिक्यान्तं फलं अभयदु खादि स्वर्गनरकान्तम् ॥ ६ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्रयोदशोऽध्याय ॥ १३ ॥

१४

अशुभानि परित्यज्य शुभान्याचरता यज्जप्तव्य तज्जानन् स्वयमेव पृच्छति—**त्वयेति** । आपगेय गाङ्गेय पितामहस्यापि ईशाय अन्तर्यामिणे सर्वत्र षष्ठ्यर्थे चतुर्थी शं सुखं भवत्यस्मादित्यानन्दायेत्यर्थः ॥१॥

अग्नये विश्वरूपाय महाभाग्यं च तत्त्वतः ।
सुरासुरगुरौ देवे शंकरेऽव्यक्तयोनये ॥ २

भीष्म उवाच ।

अशक्तोऽहं गुणान्वक्तुं महादेवस्य धीमतः ।
यो हि सर्वगतो देवो न च सर्वत्र दृश्यते ॥३
ब्रह्मविष्णुसुरेशानां स्रष्टा च प्रभुरेव च ।
ब्रह्मादयः पिशाचान्ता यं हि देवा उपासते ४

प्रकृतीनां परत्वेन
पुरुषस्य च यः परः ।
चिन्त्यते यो योगविद्भि-
र्ऋषिभिस्तत्त्वदर्शिभिः ॥
अक्षरं परमं ब्रह्म
असच्च सदसच्च यः ॥ ५

प्रकृतिं पुरुषं चैव क्षोभयित्वा स्वतेजसा ।
ब्रह्माणमसृजत्तस्माद्देवदेवः प्रजापतिः ॥ ६
को हि शक्तो गुणान्वक्तुं देवदेवस्य धीमतः ।
गर्भजन्मजरायुक्तो मर्त्यो मृत्युसमन्वितः ॥७
को हि शक्तो भवं ज्ञातुं मद्विधः परमेश्वरम् ।
ऋते नारायणात्पुत्र शंखचक्रगदाधरात् ॥ ८

एष विद्वान् गुणश्रेष्ठो विष्णुः परमदुर्जयः ।
दिव्यचक्षुर्महातेजा वीक्ष्यते योगचक्षुषा ॥ ९
रुद्रभक्त्या तु कृष्णेन जगद्व्याप्तं महात्मना ।
तं प्रसाद्य तदा देवं बदर्यां किल भारत ॥१०
अर्थात्प्रियतरत्वं च सर्वलोकेषु वै तदा ।
प्राप्तवानेव राजेन्द्र सुवर्णाक्षान्महेश्वरात्॥११
पूर्णं वर्षसहस्रं तु तप्तवानेष माधवः ।
प्रसाद्य वरदं देव चराचरगुरुं शिवम् ॥ १२
युगे युगे तु कृष्णेन तोषितो वै महेश्वरः ।
भक्त्या परमया चैव प्रीतश्चैव महात्मनः॥ १३
ऐश्वर्यं यादृशं तस्य जगद्योनेर्महात्मनः ।
तदयं दृष्टवान् साक्षात्पुत्रार्थे हरिरच्युतः ॥१४
यस्मात्परतरं चैव नान्यं पश्यामि भारत ।
व्याख्यातुं देवदेवस्य शक्तो नामान्यशेषतः १५
एष शक्तो महाबाहुर्वक्तुं भगवतो गुणान् ।
विभूतिं चैव कात्स्न्र्येन सत्यां माहेश्वरीं नृप

वैशम्पायन उवाच ।

एवमुक्त्वा तदा भीष्मो वासुदेवं महायशाः
भवमाहात्म्यसंयुक्तमिदमाह पितामहः ॥ १७

बभ्रवे विशालाय । बभ्रुर्वैश्वानर इत्यादिर्विशाले पिप्पलेऽन्यवदिति मेदिनी, महाभाग्य ऐश्वर्यं गुरावित्यादि सप्तम्यपि षष्ठ्यर्थे अव्यक्तं जगत्कारण अव्याकृताख्यं तस्य योनये उत्पत्तिप्रलयस्थानाय ॥२॥ **यो हीति** । सर्वगत सर्वोपादानत्वात् सर्वत्र न दृश्यते दृङ्मात्रशरीरत्वादात्मत्वाच्च ॥ ३ ॥ ब्रह्मा विराट् विष्णु सूत्रात्मा सुरेश प्राज्ञ तेषा स्रष्टा उपादानं प्रभुर्निमित्त उपासते स्वस्वोपाधित्यागेन अधिच्छन्ति ॥४॥ प्रकृतीना पञ्चतन्मात्राहङ्कारमहदव्यक्ताना विश्वकारणाना पुरुषस्य जीवात् भोक्तुरित्यर्थ । पञ्चम्यर्थे षष्ठी ।

' इंद्रियाणि पराण्याहुरिन्द्रियेभ्य परं मन ।
मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान्पर ॥
महत परमव्यक्तमव्यक्तात्पुरुष पर ।
पुरुषान्न पर किञ्चित्सा काष्ठा सा परा गति ' इति ।

' आत्मेन्द्रियमनोयुक्त भोक्तेत्याहुर्मनीषिण ' इति च श्रुतेभ्यस्तत्त्वेभ्य पर निष्कल ' चिन्त्यते न किञ्चिदपि चिन्तयेत् ' इति स्मृते सर्वचिन्तात्यागेन प्राप्यते योगविद्भि योगो बुद्ध्याद्यसङ्गस्तद्वद्भि अक्षरं अपरिणामि परमं ब्रह्म अत्यन्तं परिच्छेदत्रयशून्यम् । तदेव असत् अव्याकृतद्रव्यं कारणम् । सत् रज्जुसर्पवद्भ्रासमानमप्यसदनिर्वचनीयमित्यर्थ ॥ ५ ॥ प्रकृतिं माया पुरुषं तत्र प्रतिबिम्बितं चैतन्य मायाशबलमव्याकृतामित्यर्थ । क्षोभयित्वा प्राणिकर्मानुरोधेन साम्यावस्थात प्रच्याव्य स्वतेजसा स्वसत्तास्फूर्तिप्रदानेन ब्रह्माणं महान्तमसृजत् । तस्मान्महत सकाशात् देवाना सूर्यादीना देव स्वामी प्रजापतिश्चतुर्मुख अभवदिति शेष ॥ ६ ॥ यः असृजतस्य गुणान्वक्तुं क शक्त इति योजना । धीमत धिया बुद्ध्याऽहमिति मतो ज्ञातोऽहंप्रत्ययगम्यो जीव इत्यर्थ । नहि बुद्ध्यादिपरिच्छिन्नस्तदगोचरं ब्रह्म परिच्छेत्तुमीष्टे इत्यर्थ ॥ ७ ॥ भक्त्या आराधनेन व्योमाद्यष्टमूर्तैर्ध्यानेन तद्भाव गत्वा जगद्व्याप्तमित्यर्थ ॥ १० ॥ **अर्थादिति** । अर्थ्यत इत्यर्थो भोग्यवस्तुजातम । तावत्प्रियं ततोऽपि प्रियतर प्रत्यगात्मा तत्त्वं सर्वेषामन्तरात्मत्वं प्राप्त इत्यर्थ । 'ब्रह्मविद्ब्रह्मैव भवति' इति श्रुतेस्तादात्म्यं प्राप्त इति भाव । अन्नादिति पाठेऽपि स एवार्थ सुवर्णाक्षात् दिव्यदृष्टे ॥ ११ ॥ शिव प्रसाद्य तप्तवान् तपोऽपि शिवप्रसादं विना कर्तु दु शकमित्यर्थ ॥ १२ ॥ तोषोऽलंबुद्धि प्रीति प्रसादोन्मुखत्वं तदुभय प्रापित ॥१३॥ पुत्र साम्ब तत्प्राप्त्यर्थं तपस्यन् ॥ १४॥ यस्मात् ऐश्वर्यात् नमन्त्येभिरीश्वर भक्ता इति नामानि शाम्भवान् मन्त्रान् व्याख्यातु अर्थतो विवरीतु तत्र हेतु ॥१५॥ **यतो गुणान्वक्तुं शक्त इति** । विभूतिं ऐश्वर्य कात्स्न्र्येन गुणज्ञानं त्वात्मनो वा अरे दर्शनेन श्रवणेन मत्या विज्ञानेनेद सर्व विदितामिति श्रुतेरात्मज्ञस्यैव भवति तथाविधोऽयमेव न त्वन्य इत्यर्थ ॥१६॥

भीष्म उवाच ।

सुरासुरगुरो देव विष्णो त्वं वक्तुमर्हसि ।
शिवाय विष्णुरूपाय यन्मां पृच्छद्युधिष्ठिरः ॥
नाम्नां सहस्रं देवस्य तंडिना ब्रह्मयोनिना ।
निवेदितं ब्रह्मलोके ब्रह्मणो यत्पुराऽभवत् ॥१९
द्वैपायनप्रभृतयस्तथा चेमे तपोधनाः ।
ऋषयः सुव्रता दान्ताः शृण्वन्तु गदतस्तव २०
ध्रुवाय नंदिने होत्रे गोप्त्रे विश्वसृजेऽग्नये ।
महाभाग्यं विभोर्ब्रूहि मुंडिनेऽथ कपर्दिने ॥२१

वासुदेव उवाच ।

न गतिः कर्मणां शक्या वेत्तुमीशस्य तत्त्वतः
हिरण्यगर्भप्रमुखा देवाः सेन्द्रा महर्षयः ॥२२
न विदुर्यस्य भवनमादित्याः सूक्ष्मदर्शिनः ।
स कथं नरमात्रेण शक्यो ज्ञातुं सतां गतिः२३
तस्याहमसुरघ्नस्य कांक्षिद्भगवतो गुणान् ।
भवतां कीर्तयिष्यामि व्रतेशाय यथातथम् २४

वैशम्पायन उवाच ।

एवमुक्त्वा तु भगवान् गुणांस्तस्य महात्मनः
उपस्पृश्य शुचिर्भूत्वा कथयामास धीमतः २५

वासुदेव उवाच ।

शुश्रूषध्वं ब्राह्मणेद्रास्त्वं च तात युधिष्ठिर
त्वं चापगेय नामानि शृणुष्वेह कपर्दिने ॥ २६
यदवाप्तं च मे पूर्वं सांबहेतोः सुदुष्करम् ।
यथावद्भगवान् दृष्टो मया पूर्वं समाधिना २७
शंबरे निहते पूर्वं रौक्मिणेयेन धीमता ।
अतीते द्वादशे वर्षे जांबवत्यब्रवीद्धि माम् २८
प्रद्युम्नचारुदेष्णादीन्रुक्मिण्या वीक्ष्य पुत्रकान्
पुत्रार्थिनी मामुपेत्य वाक्यमाह युधिष्ठिर २९
शूरं बलवतां श्रेष्ठं कान्तरूपमकल्मषम् ।
आत्मतुल्यं मम सुतं प्रयच्छाच्युत माचिरम् ॥
न हि तेऽप्राप्यमस्तीह त्रिषु लोकेषु किञ्चन ।
लोकान् सृजेस्त्वमपरानिच्छन्यदुकुलोद्वह३१
त्वया द्वादशवर्षाणि व्रतीभूतेन शुष्यता ।
आराध्य पशुभर्तारं रुक्मिण्यां जनिताः सुताः
चारुदेष्णः सुचारुश्च चारुवेशो यशोधरः ।
चारुश्रवाश्चारुयशाः प्रद्युम्नः शंभुरेव च ॥३३

विष्णुरूपायेत्यनेन शिवाभिन्नो विष्णुरेव शिवस्य गुणान्वक्तुमीष्टे तयोरैकात्म्यात् भिन्नत्वे तु लोकेऽपीतरगुणानितरो न जानाति किमुत ईश्वरस्येति भाव । विश्वरूपायेति पाठेऽपि विश्वं विष्णुरेव नारायण सर्वमिदं पुराण नारायण एवेदं सर्वं विश्वं विष्णुरित्यादिश्रुतिस्मृतिभ्य पृच्छत अपृच्छत् ॥ १८ ॥ **नाम्नामिति** । यद्यपि मोक्षधर्मेषु शिवसहस्रनामस्तोत्रमुक्तमत एतत्कथनमनर्थकप्रायं तथापि तत्र चतुरधिकानि षट्शतानि नामानि सन्ति तेषामुक्तसख्यापूरणमपि तत्रैव त्रिसुपर्ण तथा ब्रह्मयजुषा शतरुद्रियमिति वाक्यात्तत्रैव श्रुताभ्रिसुपर्णशतरुद्रियाभ्यामुक्तम् । अतस्तत् स्तोत्रं मोक्षाधिकारपाठात् वेदमन्त्रगर्भितत्वाच्च नात्रैवर्णिकस्य ब्रह्मलोकान्तफलार्थिनो ध्येयं युक्तमिति। एतद्दानधर्मप्रसङ्गात् काम्यं 'वेदान् कृत्स्नान् ब्राह्मण प्राप्नुयात्तु जपेन्नृप पार्थ महीं च कृत्स्नां वैश्यो लाभं प्राप्नुयाच्चैपुर्ण च शूद्रो गतिं प्रेत्य तथा सुखं च'इत्युपसंहारात् सर्ववर्णाधिकारिकं च तत पृथक् पठितम्। एवं 'विश्व विष्णुर्वषट्कार ' इत्यादि विष्णुसहस्रनामापि ज्ञेयम् । तत्रापि शूद्र सुखमवाप्नुयादित्यन्ते स्मरणात् न तेनैतद्व्रतार्थमिति पुनरत्रापि शिवाराधनमुक्तमित्याशय ॥ १९ ॥ ध्रुवाय कूटस्थाय नंदिने आनंदमयाय होत्रे कर्तृरूपाय विज्ञानमयाय गोप्त्रे कर्मफलप्रदानद्वारा रक्षित्रे विश्वसृजे दक्षादिरूपाय अग्नये गार्हपत्यादिरूपाय षष्ठ्यर्थे चतुर्थ्य महाभाग्यं ऐश्वर्यं मुंडिने वस्तुतो निश्चूडाय कपर्दिने उपाधितश्चूडावते । अय भाव –'तदा द्रष्टु स्वरूपेऽवस्थानं वृत्तिसारूप्यमितरत्र'इति योगसूत्राभ्या यदा सर्वासा चित्तवृत्तीनामभावस्तदा चितिर्निश्चूडेव स्वरूपमात्रेणावातिष्ठते यदा तु तत्तद्वृत्तिसारूप्य भजते तदा चूडावती विशेषविज्ञानरूपा भवतीति तदिदमुक्त–मुंडिनेऽथ कपर्दिने इति ॥ २१ ॥ भवनं हार्दाकाशाख्य शंभुराकाशमध्य इति श्रुते ।आदित्या इंद्रियाख्या देवा निधनमादिं वेति पाठे लयमुदयं चेत्यर्थ २३ व्रतेशाय व्रतपूर्वकाणा यज्ञादीना फलप्रदात्रे ॥२४॥ धीमतः विया ब्रह्मविद्यया मतो ज्ञात ॥२५॥ गीतासु–'तमेव चाद्यं पुरुषं प्रपद्ये' 'तमेव शरण गच्छ' इति प्रोक्ताय कपर्दिने सगुणायैव । निर्गुणस्यतु गौणाना नाम्नामभावादित्यर्थः२६यदर्शनं सुदुष्करं दुर्लभं समाधिना योगेन ॥२७॥ **आराध्येति** । आराध्यस्य माहात्म्यं वासुदेव उवाच शुश्रूषध्वमित्यादिना । ननु 'मन्मना भव' 'मामेव शरणं व्रज' इति स्वस्यैवोपेयत्वं वदत कथमन्य आराध्य स्यादिति चेन्न मामेव विजानीहीतिवत् शास्त्रदृष्टया परमात्मनोऽप्यस्मदर्थत्वोपपत्तेर्मामुपास्वेति वदत इंद्रस्येव देवस्योपेयत्वाभावात् उपाधिनिकृष्टस्योपेयत्व त्वस्मदादिसाधारणं न वासुदेवस्योत्कर्षमर्हतीति शैवा। वस्तुतस्तु यत्सर्वोपाधिशून्यं ब्रह्म अस्मदाद्यंतरतरं तदेव मुख्यमस्मच्छब्दालम्बनं वासुदेवशब्दित मायया मानुषवदूभूत्वा स्वप्राप्त्युपायभूतमुपास्यरूपमात्मन. स्वशास्त्रतत्त्वं स्वयमेव लोकानुग्रहार्थमुपदिशतीति न तयोर्भेदगन्धोऽपीति

यथा ते जनिताः पुत्रा रुक्मिण्यां चारुविक्रमाः
तथा ममापि तनयं प्रयच्छ मधुसूदन ॥ ३४
इत्येवं चोदितो देव्या तामवोचं सुमध्यमाम् ।
अनुजानीहि मां राज्ञि करिष्ये वचनं तव३५
सा च मामब्रवीद्गच्छ शिवाय विजयाय च ।
ब्रह्मा शिवः काश्यपश्च नद्यो देवा मनोनुगाः
क्षेत्रौषध्यो यज्ञवाहाश्छंदांस्यृषिगणाध्वराः ।
समुद्रा दक्षिणास्तोभा ऋक्षाणि पितरो ग्रहाः
देवपत्न्यो देवकन्या देवमातर एव च ।
मन्वन्तराणि गावश्च चन्द्रमाः सविता हरिः ॥
सावित्री ब्रह्मविद्या च ऋतवो वत्सरास्तथा
क्षणा लवा मुहूर्ताश्च निमेषा युगपर्ययाः ॥३९
रक्षन्तु सर्वत्र गतं त्वां यादव सुखाय च ।
अरिष्टं गच्छ पंथानमप्रमत्तो भवानघ ॥ ४०

एवं कृतस्वस्त्ययनस्तयाऽहं
ततोऽभ्यनुज्ञाय नरेन्द्रपुत्रीम् ।
पितुः समीपं नरसत्तमस्य
मातुश्च राज्ञश्च तथाऽऽहुकस्य ॥ ४१
गत्वा समावेद्य यदब्रवीन्मां
विद्याधरेन्द्रस्य सुता भृशार्ता ।
तानभ्यनुज्ञाय तदातिदुःखा-
द्दं तथैवातिबलं च रामम् ।
अथोचतुः प्रीतियुतौ तदानीं
तपःसमृद्धिर्भवतोस्त्वविघ्नम् ॥ ४२

प्राप्यानुज्ञां गुरुजनाद्दं तार्क्ष्यमचिन्तयम् ।
सोऽवहद्धिमवन्तं मां प्राप्य चैनं व्यसर्जयम्
तत्राहमद्भुतान् भावानपश्यं गिरिसत्तमे ।
क्षेत्रं च तपसां श्रेष्ठं पश्याम्यद्भुतमुत्तमम् ४४
दिव्यं वैयाघ्रपद्यस्य उपमन्योर्महात्मनः ।
पूजितं देवगन्धर्वैर्ब्राह्म्या लक्ष्म्या समावृतम्

धव-ककुभ-कदंब-नारिकेलैः
कुरबक-केतक-जंबु-पाटलाभिः ।
वट-वरुणक-वत्सनाभ-बिल्वैः
सरल-कपित्थ-प्रियाल-साल-तालैः ॥
बदरी कुंद-पुन्नागैरशोकाम्रातिमुक्तकैः ।
मधूकैः कोविदारैश्च चंपकैः पनसैस्तथा ॥ ४७
वन्यैर्बहुविधैर्वृक्षैः फलपुष्पप्रदैर्युतम् ।
पुष्पगुल्मलताकीर्णं कदलीषंडशोभितम् ॥ ४८
नानाशकुनिसंभोज्यैः फलैर्वृक्षैरलंकृतम् ।
यथास्थानविनिक्षिप्तैर्भूषितं भस्मराशिभिः ४९
रुरु-वानर-शार्दूल-सिंह-द्वीपि-समाकुलम् ।
कुरङ्ग-बर्हिणाकीर्णं मार्जार-भुजगावृतम् ।
पूगैश्च मृगजातीनां महिषर्क्षनिषेवितम् ॥ ५०

सकृत्प्रभिन्नैश्च गजैर्विभूषितं
प्रहृष्टनानाविधपक्षिसेवितम् ।
सुपुष्पितैरम्बुधरप्रकाशै-
र्महीरुहाणां च वनैर्विचित्रैः ॥ ५१

नानापुष्परजोमिश्रो गजदानाधिवासितः ।
दिव्यस्त्रीगीतबहुलो मारुतोऽभिमुखो ववौ ॥

धारानिनादैर्विहगप्रणादैः
शुभैस्तथा बृंहितैः कुञ्जराणाम् ।
गीतैस्तथा किन्नराणामुदारैः
शुभैः स्वनैः सामगानां च वीर ५३
अर्चित्य मनसाऽप्यन्यैः सरोभिः समलंकृतम्
विशालैश्चाग्निशरणैर्भूषितं कुसुमावृतैः ॥ ५४

विभूषितं पुण्यपवित्रतोयया
सदा च जुष्टं नृप जन्हुकन्यया ।
विभूषितं धर्मभृतां वरिष्ठै-
र्महात्मभिर्वन्हिसमानकल्पैः ॥ ५५
वाग्वाहारैरंबुपैर्जप्यनित्यैः
संप्रक्षालैर्योगिभिर्ध्याननित्यैः ।
धूमप्राशैरूष्मपैः क्षीरपैश्च
संजुष्टं च ब्राह्मणेन्द्रैः समंतात् ॥ ५६
गोचारिणोऽथाश्मकुट्टा दन्तोलूखलिकास्तथा
मरीचिपाः फेनपाश्च तथैव मृगचारिणः ॥५७
अश्वत्थफलभक्षाश्च तथा ह्रदकशायिनः ।
चीरचर्माम्बरधरास्तथा वल्कलधारिणः ५८

ते त्वया ॥ ३४ ॥ **यज्ञवाहा** इति च्छंदसामेव विशेषणं छदासि वै देवेभ्यो हव्यमूढेति ब्राह्मणात् तेषा यज्ञवाहत्वसिद्धि स्तोभा सामपूरणान्यक्षराणि हुं मा इत्यादीनि ॥ ३७ ॥ नरेन्द्रपुत्रीं अभ्यनुज्ञाय स्थितं मामिति शेषः अथोचतुरित्यर्ध ॥ ४२ ॥ तपसा धर्माणा तपस्विना वा ॥ ४४ ॥ भस्मराशिभिरिति भस्मच्छन्नैरग्निभि ॥ ४९ ॥ सप्रक्षालै मैत्र्यादिभिश्चित्तशोधनं कुर्वद्भि ॥ ५६ ॥ गोचारिण गोवन्मुखेनैव चरन्त हस्तव्यापारशून्या इत्यर्थ मरीचिपाश्चंद्ररश्मिपानेनैव जीवन्त ॥ ५७ ॥

सुदुःखान्नियमांस्तांस्तान्वहतः सुतपोधनान्।
पश्यन् मुनीन्बहुविधान् प्रवेष्टुमुपचक्रमे ॥ ५९
सुपूजितं देवगणैर्महात्मभिः
शिवादिभिर्भारत पुण्यकर्मभिः।
रराज तच्चाश्रममंडलं सदा
दिवीव राजन् शशिमंडलं यथा ॥६०
क्रीडन्ति सर्पैर्नकुला मृगैर्व्याघ्राश्च मित्रवत्।
प्रभावाद्दीप्ततपसां सन्निकर्षान्महात्मनाम् ६१
तत्राश्रमपदे श्रेष्ठे सर्वभूतमनोरमे।
सेविते द्विजशार्दूलैर्वेदवेदाङ्गपारगैः ॥ ६२
नानानियमविख्यातैर्ऋषिभिः सुमहात्मभिः।
प्रविशन्नेव चापश्यं जटाचीरधरं प्रभुम् ॥ ६३
तेजसा तपसा चैव दीप्यमानं यथाऽनलम्।
शिष्यैरनुगतं शान्तं युवानं ब्राह्मणर्षभम् ॥६४
शिरसा वन्दमानं मामुपमन्युरभाषत ॥ ६५
स्वागतं पुंडरीकाक्ष सफलानि तपांसि नः।
यः पूज्यः पूजयसि मां द्रष्टव्यो द्रष्टुमिच्छसि
तमहं प्राञ्जलिर्भूत्वा मृगपक्षिष्वथाग्निषु।
धर्मे च शिष्यवर्गे च समपृच्छमनामयम् ॥६७
ततो मां भगवानाह साम्ना परमवल्गुना।
लप्स्यसे तनयं कृष्ण आत्मतुल्यमसंशयम् ६८
तपः सुमहदास्थाय तोषयेशानमीश्वरम्।
इह देवः सपत्नीकः समाक्रीडत्यधोक्षज ॥६९
इहैनं दैवतश्रेष्ठं देवाः सर्षिगणाः पुरा।
तपसा ब्रह्मचर्येण सत्येन च दमेन च ॥ ७०
तोषयित्वा शुभान्कामान् प्राप्तवन्तो जनार्दन
तेजसां तपसां चैव निधिः स भगवानिह ७१
शुभाशुभान्वितान् भावा-
न्विसृजन् संक्षिपन्नपि।
आस्ते देव्या सदाचिन्त्यो
यं प्रार्थयसि शत्रुहन् ॥ ७२
हिरण्यकशिपुर्योऽभूद्दानवो मेरुकम्पनः।
तेन सर्वामरैश्वर्यं शर्वात्प्राप्तं समार्बुदम् ॥ ७३
तस्यैव पुत्रप्रवरो मंदारो नाम विश्रुतः।
महादेववराच्छक्रं वर्षार्बुदमयोधयत् ॥ ७४
विष्णोश्चक्रं च तद्घोरं वज्रमाखण्डलस्य च।
शीर्णं पुराऽभवत्तात ग्रहस्याङ्गेषु केशव ॥ ७५
यत्तद्भगवता पूर्वं दत्तं चक्रं तवानघ।
जलान्तरचरं हत्वा दैत्यं च बलगर्वितम् ७६
उत्पादितं वृषाङ्केन दीप्तज्वलनसन्निभम्।
दत्तं भगवता तुभ्यं दुर्धर्षं तेजसाऽद्भुतम् ॥७७
न शक्य द्रष्टुमन्येन वर्जयित्वा पिनाकिनम्।
सुदर्शनं भवत्येवं भवेनोक्तं तदा तु तत् ॥ ७८
सुदर्शनं तदा तस्य लोके नाम प्रतिष्ठितम्।
तज्जीर्णमभवत्तात ग्रहस्याङ्गेषु केशव ॥ ७९
ग्रहस्यातिबलस्याङ्गे वरदत्तस्य धीमतः।
न शस्त्राणि वहन्त्यङ्गे चक्रवज्रशतान्यपि ८०
अर्द्यमानाश्च विबुधा ग्रहेण सुबलीयसा।
शिवदत्तवरान् जघ्नुरसुरेन्द्रान् सुरा भृशम् ॥
तुष्टो विद्युत्प्रभस्यापि त्रिलोकेश्वरतां ददौ।
शतं वर्षसहस्राणां सर्वलोकेश्वरोऽभवत् ॥८२
ममैवानुचरो नित्यं भवितासीति चाब्रवीत्।
तथा पुत्रसहस्राणामयुतं च ददौ प्रभुः ॥ ८३
कुशद्वीपं च स ददौ राज्येन भगवानजः।
तथा शतमुखो नाम धात्रा सृष्टो महासुरः ८४
येन वर्षशतं साग्रमात्ममांसैर्हुतोऽनलः।
तं प्राह भगवांस्तुष्टः किं करोमीति शङ्करः ८५
तं वै शतमुखः प्राह योगो भवतु मेऽद्भुतः।
बलं च दैवतश्रेष्ठ शाश्वतं संप्रयच्छ मे ॥ ८६
तथेति भगवानाह तस्य तद्वचनं प्रभुः।
स्वायंभुवः क्रतुश्चापि पुत्रार्थमभवत्पुरा ॥ ८७

तास्तान्महत इति पाठे वहत इत्यध्याहारः ॥ ५९ ॥ **क्रीडन्तीति**। 'अहिंसाप्रतिष्ठाया तत्सन्निधौ वैरत्यागः' इति योगसूत्रात् सर्पनकुलादीनां वैरत्यागलिंगेन तत्रस्थानां मुनीनां अत्यंतं अहिंसादियमनियमनिष्ठावत्त्वं दर्शितम् ॥ ६१ ॥ नियमा अबुपानादयस्तैरेवाबुपै. क्षरिपैरित्यादिनामभिः ख्यातैः प्रविशन्नेवापश्यं उपमन्युमिति शेषः ॥ ६३ ॥ पूज्य सगुण द्रष्टव्यो निर्गुण ॥६६॥ भावान् शमकामादीन् चित्ताभिप्रायान् सृजन्नित्यनेनातर्यामित्वं दर्शितम् ॥ ७२ ॥ समाना संवत्सराणामर्बुदं समार्बुदम् ॥ ७३ ॥ ग्रहस्य मदारनाम्न ॥ ७५ ॥ भगवता महादेवेन ॥ ७६ ॥ उत्पादितं तस्यैव दैत्यस्य हननार्थम् ॥ ७७ ॥ न द्रष्टुं शक्य दुर्दर्शत्वात् ॥ ७८ ॥ जीर्णं जीर्णतृणवद्व्यर्थमित्यर्थः ॥७९॥ वरदत्तस्य सर्वशस्त्रावध्यत्वं भवेति दत्तवरस्य ॥८०॥ अर्द्यमाना सुरा असुरेन्द्रान् जघ्नुतेऽन्योन्यं कलहमकुर्वन्नित्यर्थः ॥८१॥ **योगः** चंद्रसूर्यपर्जन्यपृथिव्यादिसृष्टिसामर्थ्यं शाश्वतं बलं ब्रह्मविद्योत्थम्॥८६॥

आविश्य योगेनात्मानं त्रीणि वर्षशतान्यपि ।
तस्य चोपददौ पुत्रान्सहस्रं क्रतुसंमितान् ८८
योगेश्वर देवगतिं वेत्थ कृष्ण न संशयः ।
याज्ञवल्क्य इति ख्यात ऋषिः परमधार्मिकः
आराध्य स महादेवं प्राप्तवानतुलं यशः ।
वेदव्यासश्च योगात्मा पराशरसुतो मुनिः ९०
सोऽपि शङ्करमाराध्य प्राप्तवानतुलं यशः ।
बालखिल्या मघवता ह्यवज्ञाताः पुरा किल ॥
तैः ऋद्धैर्भगवान् रुद्रस्तपसा तोषितो ह्यभूत् ।
तांश्चापि दैवतश्रेष्ठः प्राह प्रीतो जगत्पतिः ९२
सुपर्णं सोमहर्तारं तपसोत्पादयिष्यथ ।
महादेवस्य रोषाच्च आपो नष्टाः पुराऽभवन् ॥
ताश्च सप्तकपालेन दैवैरन्याः प्रवर्तिताः ।
ततः पानीयमभवत्प्रसन्ने त्र्यंबके भुवि ॥ ९४
अत्रेर्भार्याऽपि भर्तारं सन्त्यज्य ब्रह्मवादिनी ।
नाहं तस्य मुनेर्भूयो वशगा स्यां कथञ्चन ९५
इत्युक्त्वा सा महादेवमगच्छच्छरणं किल ।
निराहारा भयाद्देव्याः वर्षाणि वर्षशतान्यपि ९६
अशेत मुसलेष्वेव प्रसादार्थं भवस्य सा ।
तामब्रवीद्धसन्देवो भविता वै सुतस्तव ॥ ९७
विना भर्त्रा च रुद्रेण
भविष्यति न संशयः ।
वंशे तवैव नाम्ना तु
ख्यातिं यास्यति चेप्सिताम् ॥ ९८
विकर्णश्च महादेवं तथा भक्तसुखावहम् ।
प्रसाद्य भगवान् सिद्धिं प्राप्तवान्मधुसूदन ९९
शाकल्यः संशितात्मा वै नववर्षशतान्यपि ।
आराधयामास भवं मनोयज्ञेन केशव ॥ १००
तं चाह भगवान्तुष्टो ग्रन्थकारो भविष्यसि ।
वत्साक्षया च ते कीर्तिस्त्रैलोक्ये वै भविष्यति
अक्षयं च कुलं तेऽस्तु महर्षिभिरलङ्कृतम् ।
भविष्यति द्विजश्रेष्ठः सूत्रकर्ता सुतस्तव ॥ १०२
सावर्णिश्चापि विख्यात ऋषिरासीत्कृते युगे
इह तेन तपस्तप्तं षष्टिवर्षशतान्यथ ॥ १०३
तमाह भगवान् रुद्रः साक्षात्तुष्टोऽस्मि तेऽनघ
ग्रन्थकृल्लोकविख्यातो भविताऽस्यजरामरः ॥
शक्रेण तु पुरा देवो वाराणस्यां जनार्दन ।
आराधितोऽभूद्भक्तेन दिग्वासा भस्मगुण्ठितः
आराध्य स महादेवं देवराजमवाप्तवान् ।
नारदेन तु भक्त्याऽसौ भव आराधितः पुरा
तस्य तुष्टो महादेवो जगौ देवगुरुर्गुरुः ।
तेजसा तपसा कीर्त्या त्वत्समो न भविष्यति
गीतेन वादितेनैव नित्यं मामनुयास्यसि ।
मयाऽपि च यथा दृष्टो देवदेवः पुरा विभो ८
साक्षात्पशुपतिस्तात तच्चापि शृणु माधव ।
यदर्थं च मया देवः प्रयतेन तथा विभो ॥ ९
प्रबोधितो महातेजास्तं चापि शृणु विस्तरम्
यदवाप्तं च मे पूर्वं देवदेवान्महेश्वरात् ॥ १०
तत्सर्वं निखिलेनाद्य कथयिष्यामि तेऽनघ ।
पुरा कृतयुगे तात ऋषिरासीन्महायशाः ११
व्याघ्रपाद इति ख्यातो वेदवेदाङ्गपारगः ।
तस्याहमभवं पुत्रो धौम्यश्चापि ममानुजः १२
कस्यचित्त्वथ कालस्य धौम्येन सह माधव ।
आगच्छमाश्रमं क्रीडन्मुनीनां भावितात्मनाम्
तत्रापि च मया दृष्टा दुह्यमाना पयस्विनी ।
लक्षितं च मया क्षीरं स्वादुतो ह्यमृतोपमम् ॥
ततोऽहमब्रुवं बाल्याज्जननीमात्मनस्तथा ।
क्षीरौदनसमायुक्तं भोजनं हि प्रयच्छ मे ॥ १५
अभावाच्चैव दुग्धस्य दुःखिता जननी तदा ।
ततः पिष्टं समालोड्य तोयेन सह माधव १६
आवयोः क्षीरमित्येव पानार्थं समुपानयत् ।
अथ गव्यं पयस्तात कदाचित्प्राशितं मया ॥
पित्राऽहं यज्ञकाले हि नीतो ज्ञातिकुलं महत्
तत्र सा क्षरते देवी दिव्या गौः सुरनन्दिनी
तस्याहं तत्पयः पीत्वा रसेन ह्यमृतोपमम् ।
ज्ञात्वा क्षीरगुणांश्चैव उपलभ्य हि संभवम् ॥
स च पिष्टरसस्तात न मे प्रीतिमुपावहत् ।
ततोऽहमब्रुवं बाल्याज्जननीमात्मनस्तदा ॥ २०
नेदं क्षीरोदनं मातर्यत्त्वं मे दत्तवत्यसि ।
ततो मामब्रवीन्माता दुःखशोकसमन्विता ॥

आत्मानं हिरण्यगर्भं आविश्याभवत् आविष्टोऽभूत् सूत्रात्मनो ध्यानं कुर्वन्नित्यर्थ ॥ ८८॥ सप्तकपालेन त्र्यंबकदैवत्येन हेतुना देवैः सप्तकपालेन रुद्रमिष्ट्वा आपो निर्मिता इत्यर्थ । देवेनेति पाठे इंद्रेण ॥ ९४ ॥ अत्रेरिति । पतिद्वेषिण्योऽपि स्त्रियो महादेवं प्राप्य कृतकृत्या भवन्तीति भाव॰ ॥ ९५ ॥ मुसलेषु अयोग्रेषु काष्ठकीलेषु 'अयोग्रे मुसलं मतम्' इति विश्वलोचन ॥९७॥ विनेति । चरुद्रचरोर्द्रव. मंड इति यावत् चरुशब्दपूर्वाद्द्रवतेरन्येभ्योऽपि दृश्यत इति ड. । भर्तारं विनापि चरुद्रवपानमात्रेण तव पुत्रो भविष्यतीत्यर्थ । तवैव नाम्ना आनसूयव इति ॥९८॥

पुत्रस्नेहात्परिष्वज्य मूर्ध्नि चाघ्राय माधव ।
कृतः क्षीरोदनं वत्स मुनीनां भावितात्मनाम्
वने निवसतां नित्यं कन्दमूलफलाशिनाम् ।
आस्थितानां नदीं दिव्यां वालखिल्यैर्निषेवितां
कृतः क्षीरं वनस्थानां मुनीनां गिरिवासिनाम्
पावनानां वनाशानां वनाश्रमनिवासिनाम्॥
ग्राम्याहारनिवृत्तानामारण्यफलभोजिनाम् ।
नास्ति पुत्र पयोऽरण्ये सुरभीगोत्रवर्जिते २५
नदीगह्वरशैलेषु तीर्थेषु विविधेषु च ।
तपसा जप्यनित्यानां शिवो नः परमा गतिः॥
अप्रसाद्य विरूपाक्षं वरदं स्थाणुमव्ययम् ।
कुतः क्षीरोदनं वत्स सुखानि वसनानि च ॥
तं प्रपद्य सदा वत्स सर्वभावेन शङ्करम् ।
तत्प्रसादाच्च कामेभ्यः फलं प्राप्स्यसि पुत्रक॥
जनन्यास्तद्वचः श्रुत्वा तदाप्रभृति शत्रुहन् ।
प्राञ्जलिः प्रणतो भूत्वा इदमम्बामचोदयम्२९
कोऽयमम्ब महादेवः स कथं च प्रसीदति ।
कुत्र वा वसते देवो द्रष्टव्यो वा कथञ्चन॥ ३०
तुष्यते वा कथं शर्वो रूपं तस्य च कीदृशम् ।
कथं ज्ञेयः प्रसन्नो वा दर्शयेज्जननि मम ॥ ३१
एवमुक्ता तदा कृष्ण माता मे सुतवत्सला ।
मूर्धन्याघ्राय गोविन्द सबाष्पाकुललोचना ॥
प्रमार्जन्ती च गात्राणि मम वै मधुसूदन ।
दैन्यमालम्ब्य जननी इदमाह सुरोत्तम ॥ ३२

अम्बोवाच ।

दुर्विज्ञेयो महादेवो दुराधारो दुरन्तकः ।
दुराबाधश्च दुर्ग्राह्यो दुर्दृश्यो ह्यकृतात्मभिः ॥
यस्य रूपाण्यनेकानि प्रवदन्ति मनीषिणः ।
स्थानानि च विचित्राणि प्रसादाश्चाप्यनेकशः॥
को हि तत्त्वेन तद्वेद ईशस्य चरितं शुभम् ।
कृतवान्यानि रूपाणि देवदेवः पुरा किल ।
क्रीडते च तथा शर्वः प्रसीदति यथा च वै ३६
हृदिस्थः सर्वभूतानां विश्वरूपो महेश्वरः ।
भक्तानामनुकम्पार्थं दर्शनं च यथाश्रुतम् ॥ ३७
मुनीनां ब्रुवतां दिव्यमीशानचरितं शुभम् ।
कृतवान्यानि रूपाणि कथितानि दिवौकसैः ॥
अनुग्रहार्थं विप्राणां शृणु वत्स समासतः ।
तानि ते कीर्तयिष्यामि यन्मा त्वं परिपृच्छसि

अम्बोवाच ।

ब्रह्मविष्णुसुरेन्द्राणां रुद्रादित्याश्विनामपि
विश्वेषामपि देवानां वपुर्धारयते भवः ॥ ४०
नराणां देवनारीणां तथा प्रेतपिशाचयोः ।
किरातशबराणां च जलजानामनेकशः ॥४१
करोति भगवान् रूपमाटव्यशबराण्यपि ।
कूर्मो मत्स्यस्तथा शङ्खः प्रवालाङ्कुरभूषणः॥
यक्षराक्षससर्पाणां दैत्यदानवयोरपि ।
वपुर्धारयते देवो भूयश्च बिलवासिनाम् ॥४३
व्याघ्रसिंहमृगाणां च तरक्षुवृक्षपतत्रिणाम् ।
उलूकश्वशृगालानां रूपाणि कुरुतेऽपि च ४४
हंसकाकमयूराणां कुकलासकसारसाम् ।
रूपाणि च बलकानां गृध्रचक्रांगयोरपि ४५
करोति वा स रूपाणि धारयत्यपि पर्वतम् ।
गोरूपं च महादेवो हस्त्यश्वोष्ट्रखराकृतिः ४६
छागशार्दूलरूपश्च अनेकमृगरूपधृक् ।
अंडजानां च दिव्यानां वपुर्धारयते भवः ४७
दंडी छत्री च कुंडी च द्विजानां वारणस्तथा
षण्मुखो वै बहुमुखस्त्रिनेत्रो बहुशीर्षकः ॥ ४८
अनेककटिपादश्च अनेकोदरवक्त्रधृक् ।
अनेकपाणिपार्श्वश्च अनेकगणसंवृतः ॥ ४९
ऋषिगन्धर्वरूपश्च सिद्धचारणरूपधृक् ।
भस्मपाण्डुरगात्रश्च चन्द्रार्धकृतभूषणः ॥ ५०
अनेकरावसंघुष्टश्चानेकस्तुतिसंस्कृतः ।
सर्वभूतान्तकः सर्वः सर्वलोकप्रतिष्ठितः ॥५१
सर्वलोकान्तरात्मा च सर्वगः सर्वबाह्यपि ।
सर्वत्र भगवान् ज्ञेयो हृदिस्थः सर्वदेहिनाम् ५२

पावनाना पवनाशिना वनाशाना अम्भक्षाणाम् ॥ २४ ॥ प्रपद्य प्रपन्नो भव ॥ २८ ॥ दुर्विज्ञेय शास्त्रतोऽपि ज्ञातुमशक्य. दुराधार शास्त्रत् ज्ञातोऽपि मनसि धर्तुमशक्य दुराबाध. घ्रियमाणोऽपि लयविक्षेपादिविघ्नै. संकट । यतो दुरंतक· दुष्टानि अंतकानि बंधकानि यस्मिन् विज्ञाभावेऽपि दुर्ग्राह्यः दिव्यविषयवैवश्येन परवैराग्याभावात् सत्यपि वैराग्ये दुर्दृश्य आत्मनीव प्रकृतावपि चेतसो लयस्य संभवात् ॥ ३४ ॥ एवं निर्विशेषरूपस्य दुर्ज्ञेयत्वमुक्त्वा सविशेषमेव रूपमाह–**यस्य रूपाण्यनेकानीत्यादिना** ॥ ३५ ॥ दिवौकसैर्देवै. ॥ ३८ ॥ अनुग्रहार्थमेव नीरूपस्यापि रूपधारण न स्वत ॥ ३९ ॥ ब्रह्मादिपुत्रिकान्तमस्यैव रूपमित्याह–**ब्रह्मेत्यादिना** ४० **कूर्मो मत्स्य इति** । अवतारान्तराणामुपलक्षणम्। प्रवालांकुरभूषणो वसंत. तेन कालोऽप्ययमेवेत्यर्थ· ॥ ४२ ॥

यो हि यं कामयेत्कामं यस्मिन्नर्थेऽर्च्यते पुनः
तत्सर्वं वेत्ति देवेशस्तं प्रपद्य यदीच्छसि ५३
नन्दते कुप्यते चापि तथा हुङ्कारयत्यपि ।
चक्री शूली गदापाणिर्मुसली खड्गपट्टिशी ५४
भूधरो नागमौञ्जी च नागकुण्डलकुण्डली ।
नागयज्ञोपवीती च नागचर्मोत्तरच्छदः ॥ ५५
हसते गायते चैव नृत्यते च मनोहरम् ।
वादयत्यपि वाद्यानि विचित्राणि गणैर्युतः ५६
वल्गते जृम्भते चैव रुदते रोदयत्यपि ।
उन्मत्तमत्तरूपं च भाषते चापि सुस्वरः ॥ ५७
अतीव हसते रौद्रस्त्रासयन्नयनैर्जनम् ।
जागर्ति चैव स्वपिति जृम्भते च यथासुखम्॥
जपते जप्यते चैव तपते तप्यते पुनः ।
ददाति प्रतिगृह्णाति युञ्जते ध्यायतेऽपि च ५९
वेदीमध्ये तथा यूपे गोष्ठमध्ये हुताशने ।
दृश्यते दृश्यते चापि बालो वृद्धो युवा तथा६०
क्रीडते ऋषिकन्याभिर्ऋषिपत्नीभिरेव च ।
ऊर्ध्वकेशो महाशेफो नग्नो विकृतलोचनः ६१

गौरः श्यामस्तथा कृष्णः
पाण्डुरो धूमलोहितः ।
विकृताक्षो विशालाक्षो
दिग्वासाः सर्ववासकः ॥ ६२

अरूपस्याद्यरूपस्य अतिरूपाद्यरूपिणः ।
अनाद्यन्तमजस्यान्तं वेत्स्यते कोऽस्य तत्त्वतः
हृदि प्राणो मनो जीवो योगात्मा योगसञ्ज्ञितः
ध्यानं तत्परमात्मा च भावग्राह्यो महेश्वरः६४
वादको गायनश्चैव सहस्रशतलोचनः ।
एकवक्त्रो द्विवक्त्रश्च त्रिवक्त्रोऽनेकवक्त्रकः
तद्भक्तस्तद्गतो नित्यं तन्निष्ठस्तत्परायणः ।
भज पुत्र महादेवं ततः प्राप्स्यसि चेप्सितम् ॥
जनन्यास्तद्वचः श्रुत्वा तदाप्रभृति शत्रुहन्
मम भक्तिर्महादेवे नैष्ठिकी समपद्यत ॥ ६७
ततोऽहं तप आस्थाय तोषयामास शङ्करम् ।
एकं वर्षसहस्रं तु वामाङ्गुष्ठाग्रविष्ठितः ॥ ६८
एकं वर्षशतं चैव फलाहारस्ततोऽभवम् ।
द्वितीयं शीर्णपर्णाशी तृतीयं चाम्बुभोजनः६९
शतानि सप्त चैवाहं वायुभक्षस्तदाऽभवम् ।
एकं वर्षसहस्रं तु दिव्यमाराधितो मया ॥७०
ततस्तुष्टो महादेवः सर्वलोकेश्वरः प्रभुः ।
एकभक्त इति ज्ञात्वा जिज्ञासा कुरुते तदा७१
शक्ररूपं स कृत्वा तु सर्वैर्देवगणैर्वृतः ।
सहस्राक्षस्तदा भूत्वा वज्रपाणिर्महायशाः ७२
सुधावदातं रक्ताक्षं स्तब्धकर्णं मदोत्कटम् ।
आवेष्टितकरं घोरं चतुर्दंष्ट्रं महागजम् ॥ ७३
समास्थितः स भगवान् दीप्यमानः स्वतेजसा
आजगाम किरीटी तु हारकेयूरभूषितः ॥ ७४
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
सेव्यमानोऽप्सरोभिश्च दिव्यगन्धर्वनादितैः ॥
ततो मामाह देवेन्द्रस्तुष्टस्तेऽहं द्विजोत्तम।
वरं वृणीष्व मत्तस्त्व यत्ते मनसि वर्तते ॥७६
शक्रस्य तु वचः श्रुत्वा नाहं प्रीतमनाऽभवम्
अब्रुवंश्च तदा हृष्टो देवराजामिदं वचः ॥ ७७
नाहं त्वत्तो वरं कांक्षे नान्यस्मादपि दैवतात्
महादेवादृते सौम्य सत्यमेतद्ब्रवीमि ते ॥ ७८
सत्यं सत्यं हि नः शक्र वाक्यमेतत्सुनिश्चितम्
न यन्महेश्वरं मुक्त्वा कथाऽन्या मम रोचते ॥

नन्दते आनन्दयते कुप्यते कोपं करोति मित्रामित्ररूपेणाप्ययमेवानुगृह्णाति निगृह्णाति चेत्यर्थ ॥५४॥ भूधर शेषनाग ॥ ५५ ॥ महाशेफो महालिंग ॥ ६१ ॥ सर्ववासक सर्वस्याच्छादक ॥ ६२ ॥ अरूपस्य निष्कलस्य आद्यरूपस्य मायाविन अतिरूपस्य नानाकार्याकारस्य आद्यरूपिणो हिरण्यगर्भस्य अनाद्य कारणशून्यम्। अजस्य अन्त को वेद न कोऽपीत्यर्थ ,तस्य नाशकाभावादन्तो नास्तीत्यर्थ.६३अयमेव प्रत्यगात्मेत्याह- हृदीति । अत्र हृदादिशब्दै क्रमेणान्नमयप्राणमयमनोमयविज्ञानमया कोशा उच्यन्ते।योगश्चित्तवृद्धिर्ग्रन्थिस्तदात्मा आनन्दमय स एव योगसञ्ज्ञितो योगी युक्त शुद्धस्त्वंपदार्थ इत्यर्थ । ध्यान योग तत्परं शुद्धस्त्वंपदार्थावसानम्। महेश्वर मायावी तत्पदार्थ ।भावेन सूक्ष्मया चेतोवृत्त्या ग्राह्य । किं दृश्यत्वेन-नेत्याह। आत्मा प्रत्यग्रूप इत्यर्थ । एतेनायमात्मा ब्रह्मेति महावाक्यार्थो दर्शित ६४ ब्रह्मदाशा ब्रह्मदासा इत्यादिश्रुतेरर्थमाह—वादक इति । वादकादि सर्वोऽपि जीवो ब्रह्मैवेत्यर्थ । एकवक्त्र आनन्दमुक् चेतोमुख प्राज्ञस्तृतीय पाद इत्यर्थ । द्विवक्त्र लिंगदेहो जीवश्चेति द्वे वक्त्रे सुखग्राहके यस्य स तैजस त्रिवक्त्र स्थूलदेहेन सार्द्ध पूर्वे द्वे चेति त्रीणि वक्त्राणि यस्य स विश्व अनेकवक्त्रको विराट् स एव सहस्रं शतानि लक्षं अनन्तमिति यावत्। तावन्ति लोचनानि यस्य ।।६५॥ एकभक्त मुख्यो भक्त ॥ ७१ ॥ अभवं संधिरार्ष ॥ ७७ ॥

पशुपतिवचनाद्भवामि सद्यः
कृमिरथवा तरुरप्यनेकशाखः ।
अपशुपतिवरप्रसादजा मे
त्रिभुवनराज्यविभूतिरप्यनिष्टा ॥८०
जन्म श्वपाकमध्येऽ-
पि मेऽस्तु हरचरणवन्दनरतस्य
मा वाऽनीश्वरभक्तो
भवानि भवनेऽपि शक्रस्य
वाय्वम्बुभुजोऽपि सतो
नरस्य दुःखक्षयः कुतस्तस्य ।
भवति हि सुरासुरगुरौ
यस्य न विश्वेश्वरे भक्तिः ॥ ८२
अलमन्याभिस्तेषां
कथाभिरप्यन्यधर्मयुक्ताभिः ।
येषां न क्षणमपि रुचितो
हरचरणस्मरणविच्छेदः ॥ ८३
हरचरणनिरतमतिना
भवितव्यमनार्जवं युगं प्राप्य ।
संसारभयं न भवति
हरभक्तिरसायनं पीत्वा ॥ ८४ ॥
दिवसं दिवसार्धं वा मुहूर्तं वा क्षणं लवम् ।
न ह्यलब्धप्रसादस्य भक्तिर्भवति शङ्करे ॥ ८५
अपि कीटः पतङ्गो वा भवेयं शङ्करेच्छया ।
न तु शक्र त्वया दत्तं त्रैलोक्यमपि कामये ८६
श्वाऽपि महेश्वरवचना-
द्भवामि स हि नः परः कामः ।
त्रिदशगणराज्यमपि खलु
नेच्छाम्यमहेश्वराङ्गसम् ॥ ८७ ॥
न नाकपृष्ठं न च दवराज्यं
न ब्रह्मलोकं न च निष्कलत्वम् ।
न सर्वकामानखिलान् वृणोमि
हरस्य दासत्वमहं वृणोमि ।। ८८ ॥
यावच्छशाङ्कधवलामलबद्धमौलि-
र्न प्रीयते पशुपतिर्भगवान्ममेशः ।
तावज्जरामरणजन्मशताभिघातै-
र्दुःखानि देहविहितानि समुद्वहामि
दिवसकरशशाङ्कवह्निदीप्तं
त्रिभुवनसारमसारमाद्यमेकम् ।
अजरममरमप्रसाद्य रुद्रं
जगति पुमानिह को लभेत शान्तिम्
यदि नाम जन्म भूयो
भवति मदीयैः पुनर्दोषैः ।
तस्मिंस्तस्मिन् जन्मनि
भवे भवेन्मेऽक्षया भक्तिः ॥ ९१ ॥

शक्र उवाच ।

कः पुनर्भवने हेतुरीशे कारणकारणे ।
येन शर्वादृतेन्यस्मात्प्रसादं नाभिकांक्षसि ९२

उपमन्युरुवाच ।

सदसद्व्यक्तमव्यक्तं यमाहुर्ब्रह्मवादिनः ।
नित्यमेकमनेकं च वरं तस्माद्वृणीमहे ॥ ९३

पशुपतिवचनादित्यादेर्ग्रन्थस्य तात्पर्यम्—परमकारणस्य भगवतो महादेवस्यानुग्रहे सति तिर्यग्योनिप्राप्तावपि भयं नास्ति यथा काकस्य भुशुण्डस्य । इंद्रेण तु स्वय नष्टप्रायेण दत्तं त्रैलोक्यराज्यमपि महाभयजनकं यथा नहुषस्येति ॥ ८० ॥ मा वा मैव भवानि भूयासम् ॥ ८१ ॥ अनार्जवं वक्रं युगं कलियुगम् ॥ ८४ ॥ असार नास्ति सारो यस्मादन्य केवलानन्द इत्यर्थस्तम् ॥ ९० ॥ **क इति** । ईशे ईशस्य भवने सत्ताया को हेतु का युक्ति । ईशस्त्वे प्रमाण नास्तीत्यर्थ । तत्र हेतु —**कारणकारणे इति** । कारणं हि कलशस्य कपालकुलालादिवत् जगत परमाणुमहेश्वरादिकं वा त्रिगुणात्मकं प्रधानं वा क्षीरादिवज्जगदाकारेण परिणममाणं तादृशकार्यद्वाराऽनुमातुं शक्यम् । कारणकारणं तु न क्वचित्प्रसिद्धं नापि कल्पयितुं शक्य कारणकल्पनयैव अर्थापत्तिपरिक्षयादिति भाव । पुन शब्दो वाक्यालंकारे । सप्तमी षष्ठ्यर्थे, भवने इति भावे ल्युट । येन यतो हेतो शर्वात् श्रृणाति हिनस्ति प्रलयकाले कृत्स्नं संहरति तस्मात् । वर काङ्क्षति तस्मात् दाहोपशात्यै वन्हिमिव संहर्तारं वरार्थमाराधयन् मूढोऽसीति भाव ॥ ९२ ॥ एतद्दूषयन्नुपमन्यु· **सदसदिति** । सदिति प्रवाहानादित्वं **मीमांसकमतम्** । असदिति शून्यं **माध्यमिकमतं** व्यक्तं परमाणव **तार्किकमतं** अव्यक्त प्रधान **सांख्यमतं** एतच्चतुष्कमपि यदभिन्नमाहु तत् नित्यं अविनाशि एकं असंहतं परमाशीवाख्यम् । अनेकं कार्यकारणात्मक तस्माद्वरं वृणीमहे । अयं भाव —यथा बीजशक्तेर्विलसितं अंकुरकाडस्कंधशाखापल्लवपत्रपुष्पफलबीजान्त विकार उत्पात्तिप्रलयवान् तस्य च प्रकृतिरेका नित्या सर्वविशेषशून्या मृदस्ति सा च बीजशक्त्यस्पृष्टाऽनेकरूपा च भवति । एवं अव्यक्तादिकं सर्व बीजादिस्थानीयं यत्र लीयते तत्परमशिवाख्यं तत्त्वं कारणकारणमस्तीति न तदपन्होतुं शक्यमिति ॥ ९३ ॥

अनादिमध्यपर्यन्तं ज्ञानैश्वर्यमचिन्तितम् ।
आत्मानं परमं यस्माद्वरं तस्माद्वृणीमहे ॥ ९४
ऐश्वर्यं सकलं यस्मादनुत्पादितमव्ययम् ।
अबीजाद्बीजसंभूतं वरं तस्माद्वृणीमहे ॥ ९५
तमसः परमं ज्योतिस्तपस्तद्वृत्तिनां परम् ।
यं ज्ञात्वा नानुशोचन्ति वरं तस्माद्वृणीमहे ९६
भूतभावनभावज्ञं सर्वभूताभिभावनम् ।
सर्वगं सर्वदं देवं पूजयामि पुरन्दर ॥ ९७
हेतुवादैर्विनिर्मुक्तं सांख्ययोगार्थदं परम् ।
यमुपासंति तत्त्वज्ञा वरं तस्माद्वृणीमहे ॥ ९८
मघवन्मघवात्मानं यं वदंति सुरेश्वरम् ।
सर्वभूतगुरुं देवं वरं तस्माद्वृणीमहे ॥ ९९
यत्पूर्वमसृजद्देवं ब्रह्माणं लोकभावनम् ।
अण्डमाकाशमापूर्य वरं तस्माद्वृणीमहे ॥२००
अग्निरापो निलः पृथ्वी खं बुद्धिश्च मनो महान्
स्रष्टा चैषां भवेद्योन्यो ब्रूहि कः परमेश्वरात् १
मनो मतिरहंकारस्तन्मात्राणीन्द्रियाणि च ।
ब्रूहि चैषां भवेच्छक्र कोन्योस्ति परमं शिवात्
स्रष्टारं भुवनस्येह वदन्तीह पितामहम् ।
आराध्य स तु देवेशमश्नुते महतीं श्रियम्॥ ३
भगवत्युत्तमैश्वर्यं ब्रह्मविष्णुपुरोगमम् ।
विद्यते वै महादेवाद्ब्रूहि कः परमेश्वरात् ॥ ४

अचिन्तितं चिन्तया निर्वृत्तं ज्ञेयं ईशितव्यं च ताभ्यां रहितं स्वरूपभूतमेव ज्ञानैश्वर्यम्। परमं च आत्मानं यस्मात्तमाहुर्ब्रह्मवादिनोऽतस्तस्माद्वरं वृणीमहे। इतरत् ज्ञानैश्वर्यं त्वनात्मभूतमित्यर्थः ॥९४॥ एतदेवाह–**ऐश्वर्यमिति**। बीजं मायाशक्त्यवच्छिन्नं चैतन्यं तस्माज्जातं सकलं ऐश्वर्यं बीजसंभूतं ईशेशितव्यसापेक्षम्। तच्चाव्ययं संसारप्रवाहाविच्छेदात् अत एतत् यस्मात् शिवात् अबीजात् बीजादन्यस्मान्मृत्सामान्यस्थानीयात् अनुत्पादितं तस्मादीश्वरप्रासस्तुरीय इति श्रुतिप्रसिद्धात् वरं वृणीमहे। तथा च श्रुतौ–सर्वं ह्येतद्ब्रह्मायमात्मा ब्रह्मेति। समष्टिव्यष्टिब्रह्मणी उपक्षिप्य स्थूलसूक्ष्मकारणोपाधित्वसामान्यात्। व्यष्टौ समष्टिमन्तर्भाव्य विश्वतैजसप्राज्ञान् चतुष्पद आत्मन त्रीन्पादान्निरूप्य प्राज्ञं तृतीयं पादं प्रक्रम्य-एष सर्वेश्वर एष सर्वज्ञ एषोन्तर्याम्येष योनि सवस्य प्रभवाप्ययौ हि भूतानामिति प्राज्ञस्यैवं योन्यपरपर्यायं बीजत्वमुक्तम्। तथा चतुर्थं पादं अबीजं सर्वोपाध्युपहितभिन्नं पंचदशभिर्विशेषणै पृथग्दर्शयति श्रुति –'नान्त प्रज्ञ न बहिप्रज्ञं नोभयत प्रज्ञं न प्रज्ञं नाप्रज्ञ न प्रज्ञाघनं अदृष्टमव्यवहार्यमग्राह्यमलक्षणमचिन्त्यमव्यपदेश्य एकात्मप्रत्ययसारं प्रपंचोपशमं शिवमद्वैतं चतुर्थं मन्यन्ते स आत्मा स विज्ञेय 'इति। अत्र जलचन्द्रन्यायेन षडुपहितचैतन्यानि षडुपाधयश्च तेषा मध्ये नान्त प्रज्ञमिति समष्टिसूक्ष्मोपाध्युपहितस्य सूत्रात्मनो निरास । न बहि प्रज्ञमिति विराज. नोभयत प्रज्ञमित्यात्मनो निष्कलत्वं सकलत्वं च जानत ईश्वरस्य। न प्रज्ञमिति विशेषविज्ञानवतो विश्वस्य नाप्रज्ञमिति प्रज्ञभिन्नत्वेऽपि तत्सदृशस्य तैजसस्य। न प्रज्ञानघनमिति प्राज्ञस्य। तथा अदृष्टमिति सर्वेन्द्रियग्राह्यस्य विराडुपाधे. अव्यवहार्यमिति वाचिकव्यवहारार्हस्य सूत्रोपाधे। अग्राह्यमिति योगिग्राह्यस्य ईश्वरोपाधे अलक्षणमिति शिर पाण्यादिलक्षणवतो विश्वोपाधे· अचिन्त्यमिति चिन्तनमात्रनिर्वृत्तस्य तैजसोपाधे । अव्यपदेश्यमिति अहमज्ञ इति व्यपदेशार्हस्य ज्ञानस्य प्राज्ञोपाधेश्च निरास । एकात्मप्रत्ययसारमिति षण्णामुपहिताना प्रपंचोपशम इति षण्णामुपाधीना अद्वैतमिति सर्वेषा निरास । शिवं सर्वबाधावधिभूतमानन्दमात्रं परिशिनष्टि तस्माद्युक्तमुक्तं सकलमैश्वर्यं अबीजादनुत्पादितं बीजसंभूत चेति। तस्मात्कारणकारणस्य शिवस्य सत्त्वे युक्ति श्रुतिश्च प्रमाणमस्तीति भावः ९५ एवमीशस्य कारणकारणत्व निरूप्य इदानीं कारणत्वं कार्यत्वं च निरूपयति–**भूतभावनेत्यादिना**। भूताना खादीना जीवाना च भावनं रचन भावमभिप्रायं सर्वज्ञं सर्वशक्तिं चेत्यर्थ ९७ यत्पुनरुक्त ईशसत्ताया को हेतुरिति तत्राह–**हेत्विति**। कारणात्माऽपि श्रुतिं विना युक्तिमात्रेण न सिध्यति किंपुन कारणकारणमित्याशय.। साख्ययोगयो सम्यगालोचनं साख्यं वृत्तिनिरोधो योगस्तयोरर्थ प्रयोजनं तत्त्वसाक्षात्कारस्तत्प्रद अत एव उपास्यम्९८ मघवतस्तवैव आत्मानं जीवानामन्तरात्मानमित्यर्थ । मघवात्मानमिति वर्णलोप आर्ष नान्तमेव वा प्रातिपदिकम् ॥ ९९ ॥ यत् वस्तु मृत्स्थानीयं तदेव आकाशं बीजभूतमव्याकृतं आपूर्य स्वसत्तया व्याप्य तद्वारा पाञ्चभौतिकं अण्डं ब्रह्माण्डं सृष्ट्वा तदन्तर्ब्रह्माणमसृजदित्यन्वय ॥ २०० ॥ अण्डसृष्टिक्रममेवाह—**अग्निरिति**। अन्यादिशब्दैरत्र पञ्च तन्मात्राणि शब्दतन्मात्रादीनि सूक्ष्मभूतान्युच्यन्ते। बुद्धिरित्यहंकार । मन इत्यव्यक्तं,एषा अण्डोपादानभूतानाम्॥१॥ यत्र मन शब्दितमव्यक्तमुक्तं तदेव महच्छब्दिता मतिरहङ्कारादिकं च तदेवेत्यर्थ । एषा मनआदीना परमं परायणं य भवेत् स शिवादन्य कोऽस्तीति योजना। यथा बीजशक्त्युपहिता मृदेव वृक्ष एवमज्ञानशक्त्युपहित· शिव एव सर्व अतो वृक्षस्य मृदिव सर्वस्य शिव एव परायणमपीति भाव. ॥२॥ ब्रह्मादिष्वपि जगत्कर्तृत्वासिद्धि शिवप्रसादायतैवेत्याह– **स्रष्टारमिति**। एतन भौतिकार्थस्रष्टृत्वमपि शिवस्यैवेति दर्शितम् ॥ ३ ॥

दैत्यदानवमुख्यानामाधिपत्यारिमर्दनात् ।
कोऽन्यः शक्नोति देवेशादितेः संपादितुं सुतान्
दिक्कालसूर्यतेजांसि ग्रहवाय्विन्दुतारकाः ।
विद्धि त्वेते महादेवाद्बूहि कः परमेश्वरात् ॥६
अथोत्पत्तिविनाशे वा यज्ञस्य त्रिपुरस्य वा ।
दैत्यदानवमुख्यानामाधिपत्यारिमर्दनः ॥ ७
किं चात्र बहुभिः सूक्तैर्हेतुवादैः पुरन्दर ।
सहस्रनयनं दृष्ट्वा त्वामेव सुरसत्तम ॥ ८
पूजितं सिद्धगन्धर्वैर्देवैश्च ऋषिभिस्तथा ।
देवदेवप्रसादेन तत्सर्वं कुशिकोत्तम ॥ ९
अव्यक्तमुक्तकेशाय सर्वगस्येदमात्मकम् ।
चेतनाचेतनाद्येषु शक्र विद्धि महेश्वरात् ॥ १०
भुवाद्येषु महान्तेषु लोकालोकान्तरेषु च ।
द्वीपस्थानेषु मेरोश्च विभवेष्वन्तरेषु च
भगवन्मघवन्देवं वदन्ते तत्त्वदर्शिनः । ११
यदि देवाः सुराः शक्र पश्यन्त्यन्यां भवाकृतिं
किं न गच्छन्ति शरणं मर्दिताश्चासुरैः सुराः।
अभिघातेषु देवानां सयक्षोरगरक्षसाम् ॥ १३
परस्परविनाशेषु स्वस्थानैश्वर्यदो भवः ।
अन्धकस्याथ शुक्रस्य दुन्दुभेर्महिषस्य च १४
यक्षेन्द्रबलरक्षःसु निवातकवचेषु च ।
वरदानावघाताय ब्रूहि कोऽन्यो महेश्वरात्१५
सुरासुरगुरोर्वक्त्रे कस्य रेतः पुरा हुतम् ।
कस्य वाऽन्यस्य रेतस्तद्येन हैमो गिरिः कृतः
दिग्वासाः कीर्त्यते कोऽन्यो
लोके कश्चोर्ध्वरेतसः ।
कस्य चार्धे स्थिता कान्ता
अनङ्गः केन निर्जितः ॥ १७
ब्रूहीन्द्र परमं स्थानं कस्य देवैः प्रशस्यते ।
श्मशाने कस्य क्रीडार्थं नृत्ते वा कोभिभाष्यते
कस्यैश्वर्यं समानं च भूतैः को वाऽपि क्रीडते
कस्य तुल्यबला देवगणाश्चैश्वर्यदर्पिताः ॥ १९
घुष्यते ह्यचलं स्थानं कस्य त्रैलोक्यपूजितम् ।
वर्षते तपते कोऽन्यो ज्वलते तेजसा च कः
कस्मादोषधिसंपत्तिः को वा धारयते वसु ।
प्रकामं क्रीडते को वा त्रैलोक्ये सचराचरे२१
ज्ञानसिद्धिक्रियायोगैः सेव्यमानश्च योगिभिः
ऋषिगन्धर्वसिद्धैश्च विहितं कारणं परम् २२
कर्मयज्ञक्रियायोगैः सेव्यमानः सुरासुरैः ।
नित्यं कर्मफलैर्हीनं तमहं कारणं वदे ॥ २३

भगवति एकैकगुणप्रधानोपाधीना ब्रह्मविष्णुरुद्राणा स्रष्टरि सर्वगुणोपाधौ तुर्यमूर्तौ महेश्वरेऽपि यदुत्तममैश्वर्यं विद्यते तदपि महादेवादेव तेन प्राप्तमतः कस्तस्मात्परमेश्वरादन्य ईश्वरोऽस्तीति ब्रूहि न कोऽप्यस्तीति भाव ॥ ४ ॥ दिते सुतान् हिरण्याक्षादीन् संपादितुं ऐश्वर्येण योजयितुं दैत्यादीना च यत्परपीडानुग्रहसामर्थ्यं तत्सर्वमीश्वरायत्तमेवेति भाव ॥ ५ ॥ यज्ञत्रिपुरयोरुत्पत्तौ विनाशे च तथा दैत्यादीनामुपरि आधिपत्य एत्य जित्वा अरिमर्दन परमेश्वरादन्य कोऽस्तीति पूर्वेण संबंध ॥७॥ **किंचेति**। देवप्रसादाद्वै पूजितं त्वा दृष्ट्वा बहुभि सूक्तै किमिति द्वयो संबंध ॥ ८ ॥ **अव्यक्तेति**। एषु लोकेषु सर्वगस्य व्यापकस्य इदमात्मकं व्याप्यं कृत्स्नं दृश्यं चेतनाचेतनादि सजीव निर्जीव आदिपदात् परोक्षं स्वर्गादि अहमर्थश्च देहेंद्रियादि एतत्सर्वं भोग्यं महेश्वरात् महेश्वरानुग्रहात् अव्यक्तमुक्तकेशाय जीवाय जीवार्थं तस्य भोगाय भवतीति विद्धि हे शक्र अव्यक्तं अस्पष्टं यथा स्यात्तथा मुक्त भ्रान्तितिरोहितं नित्यमुक्तत्वमस्येत्यर्थ ।स चासौ केश इव केश शिवांश इति अव्यक्तमुक्तकेश । यत्किंचिद्भोग्यं य कश्चन जतु । शिवादेवाप्नोति नान्यो भवदादिस्तत्प्रद इति भाव. ॥१०॥ एष्विति पदं व्याचष्टे-**भुवाद्येष्विति**। भूरादिष्विति द्रष्टव्यं तेन भूर्भुव स्वर्मह शब्दिता लोका भूरिति वा अयं लोक इत्यादिश्रुतिप्रसिद्धा । तथा आलोका भूरिति वा अग्नि भूरिति वा ऋच इत्यादिश्रुतिप्रसिद्धा । तथा अंतरा भूरिति वै प्राण इत्याद्या सूर्यचन्द्रब्रह्मान्नातास्तेषु विभवेषु दिव्यप्रदेषु। अथ यदत परो दिवो ज्योतिर्दीप्यते विश्वत पृष्ठेषु सर्वत पृष्ठेष्वनुत्तमेषूत्तमेषु लोकेष्विति श्रुतं ज्योति शब्दितं देवं वदंते तत्त्वदर्शिनो वैदिका इत्यर्थ सार्ध श्लोक ॥ ११ ॥ भवाकृतिं भवतुल्या मूर्त्ति शरणं तामेवेति शेष ॥ १२ ॥ अभिघातेषु युद्धेषु अन्योन्यं विनाशवत्सु ऐश्वर्य नास्ति किंतु विनाश एवास्तीत्यर्थ. । अत स्वस्थाने वाऽभिलक्ष्य भव ऐश्वर्यदो भवतीति भाव ॥१३॥ वरदानसहितोऽवघातोऽवमर्दनं तस्मै समर्थ इति शेष ॥ १५ ॥ **सुरेति**। रुद्रस्य रेतोवन्हौ स्कन्नं तेन च दूरीकृतं सत् कनकत्वं प्राप्तमिति पुराणान्तरस्था कथा सूचिता ॥ १६ ॥ **दिग्वासा इति**। विग्रहवतोऽपि शिवस्य चरितं निरुपमं किमुताविग्रहस्येति शेषग्रन्थतात्पर्यम् ॥ १७ ॥ श्मशाने द्वे अविमुक्ते मुक्तिस्थाने अधिलोकं वाराणसी अध्यात्मं भ्रूघ्राणमध्ये कस्य क्रीडार्थं शास्त्रे क्वप्ते इति शेष ।१८। **घुष्यते इति**। अचलं कैलासम् ॥ २० ॥ विहितं अज्ञातं सत् ज्ञापितं परं कारणं अव्यक्तस्यापि कारणम् ॥ २२ ॥ कर्मफलै शरीरैस्तत्संबन्धिभि सुखदु खैश्च हीनम्। अशरीरं वाव संतं न प्रियाप्रिये स्पृशत इति श्रुत्युक्तोयमर्थ ॥ २३ ॥ गुणिन ईश्वरात् परं

स्थूलं सूक्ष्ममनौपम्यमग्राह्यं गुणगोचरम् ।
गुणहीनं गुणाध्यक्षं परं माहेश्वरं पदम् ॥ २४
विश्वेशं कारणगुरुं लोकालोकान्तकारणम् ।
भूताभूतभविष्यच्च जनकं सर्वकारणम् ॥ २५
अक्षराक्षरमव्यक्तं विद्याविद्ये कृताकृते ।
धर्माधर्मौ यतः शक्र तमहं कारणं ब्रुवे ॥ २६
प्रत्यक्षमिह देवेन्द्र पश्य लिङ्गं भगाङ्कितम् ।
देवदेवेन रुद्रेण सृष्टिसंहारहेतुना ॥ २७
मात्रा पूर्वं ममाख्यातं कारणं लोकलक्षणम् ।
नास्ति चेशात्परं शक्र तं प्रपद्य यदीच्छसि२८
प्रत्यक्षं ननु ते सुरेश विदितं
संयोगलिंगोद्भवम् ।
त्रैलोक्यं सविकारनिर्गुणगणं
ब्रह्मादिरेतोद्भवम् ॥
यद्ब्रह्मेन्द्रहुताशविष्णुसहिता
देवाश्च दैत्येश्वरा ।
नान्यत्कामसहस्रकल्पितधियः
शंसन्ति ईशात्परम् ॥
तं देवं सचराचरस्य जगतो
ख्याख्यातवेद्योत्तमम् ।
कामार्थी वरयामि संयतमना
मोक्षाय सद्यः शिवम् ॥ २९
हेतुभिर्वा किमन्यैस्तैरीशः कारणकारणम् ।
न शुश्रुम यदन्यस्य लिङ्गमभ्यर्चितं सुरैः ॥३०
कस्यान्यस्य सुरैः सर्वैर्लिङ्गं मुक्त्वा महेश्वरम्
अर्च्यतेऽर्चितपूर्वं वा ब्रूहि यद्यस्ति ते श्रुतिः॥
यस्य ब्रह्मा च विष्णुश्च त्वं चापि सह दैवतैः ।
अर्चयध्वं सदा लिंगं तस्माच्छ्रेष्ठतमो हि सः३२
न पद्मांका न चक्रांका न वज्रांका यतः प्रजाः
लिंगांका च भगाङ्का च तस्मान्माहेश्वरी प्रजा
देव्याः कारणरूपभावजनिताः
सर्वा भगाङ्काः स्त्रियो
लिंगेनापि हरस्य सर्वपुरुषाः
प्रत्यक्षचिह्नीकृताः ।
योऽन्यत्कारणमीश्वरात् प्रवदते
देव्या च यन्नाङ्कितम् ।
त्रैलोक्ये सचराचरे स तु पुमान्
बाह्यो भवेद्दुर्मतिः ॥ ३४

श्रेष्ठं अत एव गुणहीनम् । तथापि अयस्कान्तन्यायेन गुणाध्यक्षं गुणाना नियामकं माहेश्वरं महेश्वरस्यापि पदं पदनीयम् । ईश्वरग्रास इति श्रुते ॥ २४ ॥ कारणस्य ईश्वरस्य गुरुं नियन्तारं लोकश्च लोकान्तश्च तयो कारणं अभूतं वर्तमानम् २५ अक्षरं जीवस्ततोप्यक्षरं शिव स एवाक्षराक्षर अव्यक्तं प्रधानं यत उपादानादक्षरादिकं भवति तमहं कारणं ब्रुवे २६ **प्रत्यक्षमिति** । लिंग शिवमूर्तेर्ज्ञापकं विग्रह भगेन अंकित प्रत्यक्षं पश्य । पिंडिका लिंगाकारा जलधारा च भगाकारेति लौकिकं प्रत्यक्षम् । शास्त्रीयं प्रत्यक्ष तु श्रुति प्रामाण्यं प्रत्यनपेक्षत्वात् तच्च पदं यद्विष्णोरुपमं निधायि तेन पासि गुह्यं नाम गोनामिति । अस्यार्थ -यत् यतो हेतो विष्णो. पदं स्थान प्रतिमेति यावत् तत स्त्रयुपस्थ विष्णुर्योनिं कल्पयत्विति मंत्रवर्णात् उपमं निकटे स्थित्वा माति वेष्टयतीत्युपमं कृत्वा निधायि निहितं अडभावश्छादस तेन हेतुना त्वं गोना इंद्रियाणा मध्ये यद्गोप्यमवाच्यमिन्द्रियं भगं लिंगं पासि रक्षसि तन्नाम च पासि । तत्रापि भगयोगात् भगवानिति नाम धारयसि लिंगरूपत्वाच्च लिंगमिति विवेक. । भगलिंगसमुदायेऽपि लिंगमिति नाम च्छत्रिणो यातीतिवल्लिंगसमवायादेव ज्ञेयं तच्च **भगांकितं** लिंगं रुद्रेण रुद्रात्मनाविर्भूतम् ॥२७॥ एतदेव विवृणोति । **मात्रेत्यादिना** लोको भगलिंगसंयोगजो यस्माद्दृश्यते तस्मादस्य कारणमपि तादृशमेवानुमेयमित्यर्थ । लक्षणं ज्ञापकम् ॥२८॥ **प्रत्यक्षमिति** । सार्धं सयोगलिंगोद्भव भगलिंगयो. सयोगात्मक यल्लिंग तदुद्भव विकारो माया भगं निर्गुणं चैतन्यं तयोर्गण समुदाय ईश्वरस्तत्सहितं सविकारनिर्गुणं त्रैलोक्यं ब्रह्मादीना रेतसा उद्भवो यस्य तत्तथा संधिरार्ष.। ननु मनो प्राक् साकल्पिकी सृष्टिस्तत ऊर्ध्वं मैथुनी स्मर्यते तत्कथ ब्रह्मादिरेतोद्भवमिति तत्राह-कामसहस्रकल्पितधिय इति । तत्रापि काम इच्छा तया सह संभूय इच्छावता ब्रह्ममहेंद्रादिना पुरुषेण वियोमात्रा पुत्रादय कल्पिता इति कामो योनि कामी बीजप्रद इति अस्ति लिंगोद्भवत्वमित्यर्थ । अतस्ते ब्रह्मादयोऽपि ईशाद्भगलिंगसघातरूपात्परं कारण स्वरूपमात्रं न शंसन्ति असंविरार्ष फलितमाह-**तामिति** ॥ २९ ॥ शिष्टैरभ्यर्चनीयत्वादपि लिंगस्य कारणत्वमित्याह-**हेतुभिरिति** ३० उक्तमर्थं निगमयति—**नेति** । ननु भगलिंगवत् पद्मचक्रवज्राणा शरीरावयवत्वाभावात्तदंकितत्वं प्रजासु असक्तमेव कथं निषिध्यते इति चेत् शृणु एव हि पुराणातरे उपाख्यायते कामं वध्वा दिगंबरे भवानीशे भिक्षामटति सति कदाचिदृषिपत्न्या पतत्वेंतत्तव लिंगमप्रच्छादितमिति उक्ते शिवस्य लिंग पतितं तेन च त्रैलोक्ये व्याकुलीकृते सति चिरकामप्रतप्तया देव्या योनिरूपं गृहीत्वा तल्लिंगं रुद्धमिति तेन तयोरपि पद्मादिवत्पृथग्भूतत्वाविशेषात्तदंकिता प्रजा माहेश्वर्यैव अयं च भग्नलिंगयो पृथग्भावः शूलं शूलाद्विनिष्कृष्येतिवददोष अन्यथा निर्लिंगत्वमन्यजन्यत्वं वा प्रजाया आपद्येतेति दिक् ॥ ३३ ॥

पुंलिंगं सर्वमीशानं स्त्रीलिंगं विद्धि चाप्युमाम्
द्वाभ्यां तनुभ्यां व्याप्तं हि चराचरमिदं जगत्
तस्माद्वरमहं कांक्षे निधनं वाऽपि कौशिक।
गच्छ वा तिष्ठ वा शक्र यथेष्टं बलसूदन ॥ ३६
काममेष वरो मेऽस्तु शापो वाऽथ महेश्वरात्
न चान्यां देवतां कांक्षे सर्वकामफलामपि ३७
एवमुक्त्वा तु देवेन्द्रं दुःखादाकुलितेन्द्रियः।
न प्रसीदति मे देवः किमेतदिति चिन्तयन्॥
अथापश्यं क्षणेनैव तमेवैरावतं पुनः।
हंसकुन्देन्दुसदृशं मृणालरजतप्रभम् ॥ ३९
वृषरूपधरं साक्षात् क्षीरोदमिव सागरम्।
कृष्णपुच्छं महाकायं मधुपिङ्गललोचनम् ४०
वज्रसारमयैः शृंगैर्निष्टप्तकनकप्रभैः।
सुतीक्ष्णैर्भृदुरक्ताग्रैरुत्किरन्तमिवावनिम् ॥४१
जाम्बूनदेन दाम्ना च सर्वतः समलंकृतम्।
सुवक्त्रखुरनासं च सुकर्णं सुकटीतटम् ॥ ४२
सुपार्श्वं विपुलस्कन्धं सुरूपं चारुदर्शनम्।
ककुद तस्य चाभाति स्कंधमापूर्य धिष्ठितम्॥
तुषारगिरिकूटाभं सिताभ्रशिखरोपमम्।
तमास्थितश्च भगवान् देवदेवः सहोमया ४४
अशोभत महादेवः पौर्णमास्यामिवोडुराट्।
तस्य तेजोभवो वन्हिः समेघः स्तनयित्नुमान्
सहस्रमिव सूर्याणां सर्वमापूर्य धिष्ठितः।
ईश्वरः सुमहातेजाः संवर्तक इवानलः॥ ४६
युगान्ते सर्वभूतानां दिधक्षुरिव चोद्यतः।
तेजसा तु तदा व्याप्तं दुर्निरीक्ष्यं समन्ततः॥
पुनरुद्विग्नहृदयः किमेतदिति चिन्तयम्।
मुहूर्तमिव तत्तेजो व्याप्य सर्वा दिशो दश ४८
प्रशान्तं दिक्षु सर्वासु देवदेवस्य मायया।
अथापश्यं स्थितं स्थाणुं भगवन्तं महेश्वरम्॥४९
नीलकण्ठं महात्मानमसक्तं तेजसां निधिम्।
अष्टादशभुजं स्थाणुं सर्वाभरणभूषितम् ॥ ५०
शुक्लाम्बरधरं देवं शुक्लमाल्यानुलेपनम्।
शुक्लध्वजमनाधृष्यं शुक्लयज्ञोपवीतिनम् ॥ ५१
गायद्भिर्नृत्यमानैश्च वादयद्भिश्च सर्वशः।
वृतं पार्श्वचरैर्दिव्यैरात्मतुल्यपराक्रमैः॥ ५२
बालेन्दुमुकुटं पाण्डुं शरच्चन्द्रमिवोदितम्।
त्रिभिर्नेत्रैः कृतोद्योतं त्रिभिः सूर्यैरिवोदितैः॥
अशोभतास्य देवस्य माला गात्रे सितप्रभे।
जातरूपमयैः पद्मैर्ग्रथिता रत्नभूषिता ॥ ५४
मूर्तिमन्ति तथाऽस्त्राणि सर्वतेजोमयानि च।
मया दृष्टानि गोविन्द भवस्यामिततेजसः॥
इन्द्रायुधसवर्णाभं धनु तस्य महात्मनः।
पिनाकमिति विख्यातमभवत्पन्नगो महान् ॥
सप्तशीर्षो महाकायस्तीक्ष्णदंष्ट्रो विषोल्बणः।
ज्यावेष्टितमहाग्रीवः स्थितः पुरुषविग्रहः ५७
शरश्च सूर्यसकाशः कालानलसमद्युतिः।
एतदस्त्रं महाघोरं दिव्यं पाशुपतं महत् ॥ ५८
अद्वितीयमनिर्देश्यं सर्वभूतभयावहम्।
सस्फुलिङ्गं महाकायं विसृजन्तमिवानलम् ॥
एकपादं महादंष्ट्रं सहस्रशिरसोदरम्।
सहस्रभुजजिह्वाक्षमुद्विरन्तमिवानलम् ॥ ६०
ब्राह्मान्नारायणाच्चैन्द्रादाग्नेयादपि वारुणात्।
यद्विशिष्टं महाबाहो सर्वशस्त्रविघातनम्॥६१
येन तत्त्रिपुरं दग्ध्वा क्षणाद्भस्मीकृतं पुरा।
शरेणैकेन गोविन्द महादेवेन लीलया ॥ ६२
निर्दहेत च यत्कृत्स्नं त्रैलोक्यं सचराचरम्।
महेश्वरभुजोत्सृष्टं निमेषार्धान्न संशयः ॥ ६३
नावध्यो यस्य लोकेस्मिन् ब्रह्मविष्णुसुरेष्वपि
तदहं दृष्टवांस्तत्र आश्चर्यमिदमुत्तमम् ॥ ६४
गुह्यमस्त्रवरं नान्यत्तत्तुल्यमधिकं हि वा।
यत्तच्छूलमिति ख्यातं सर्वलोकेषु शूलिनः॥
दारयेद्यां महीं कृत्स्नां शोषयेद्वा महोदधिम्।
संहरेद्वा जगत्कृत्स्नं विसृष्टं शूलपाणिना ६६
यौवनाश्वो हतो येन मान्धाता सबलः पुरा
चक्रवर्ती महातेजास्त्रिलोकविजयी नृपः॥ ६७
महाबलो महावीर्यः शक्रतुल्यपराक्रमः।
करिष्येनैव गोविन्द लवणस्येह रक्षसः ॥ ६८
तच्छूलमतितीक्ष्णाग्रं सुभीमं लोमहर्षणम्।
त्रिशिखां भ्रुकुटिं कृत्वा तर्जमानमिव स्थितम्
विधमं सार्चिषं कृष्णं कालसूर्यमिवोदितम्।
सर्पहस्तमनिर्देश्यं पाशहस्तमिवान्तकम् ७०
दृष्टवानस्मि गोविन्द तदस्त्रं रुद्रसन्निधौ।
परशुस्तीक्ष्णधारश्च दत्तो रामस्य यः पुरा ७१

समेघ इति मेघादीन् व्याप्य स्थित इत्यर्थं ॥४५॥ भूतानामिति कर्माणि षष्ठी ॥४६॥ शुक्लध्वजं शुक्लवृषभध्वजम्॥५१॥ अस्त्राणि अष्टादशभुजस्थानि तावन्त्येवायुधानि तेषा मध्ये धनु शरौ शूलसर्पौ परशुश्च कण्ठोक्ता। खट्वांगखड्गचर्मपाशाकुशडमरुगदाशक्तिभिन्दिपालतोमरमुसलमुद्गरादीनि यथासंभवं ग्रन्थान्तरतोऽवगम्यानि ॥ ५५॥

महादेवेन तुष्टेन क्षत्रियाणां क्षयंकरः ।
कार्तवीर्यो हतो येन चक्रवर्ती महामृधे ॥ ७२
त्रिःसप्तकृत्वः पृथिवी येन निःक्षत्रिया कृता ।
जामदग्न्येन गोविन्द रामेणाक्लिष्टकर्मणा ७३
दीप्तधारः सुरौद्रास्यः सर्पकण्ठाग्रधिष्ठितः ।
अभवच्छूलिनोऽभ्याशे दीप्तवन्हिशतोपमः ॥
असंख्येयानि चास्त्राणि
तस्य दिव्यानि धीमतः ।
प्राधान्यतो मयैतानि
कीर्तितानि तवानघ ॥ ७५
सव्यदेशे तु देवस्य ब्रह्मा लोकपितामहः ।
दिव्यं विमानमास्थाय हंसयुक्तं मनोजवम् ॥
वामपार्श्वगतश्चापि तथा नारायणः स्थितः ।
वैनतेयं समारुह्य शङ्खचक्रगदाधरः ॥ ७७
स्कन्दो मयूरमास्थाय स्थितो देव्याः समीपतः
शक्तिघण्टे समादाय द्वितीय इव पावकः ॥
पुरस्ताच्चैव देवस्य नन्दिं पश्याम्यवस्थितम् ।
शूलं विष्टभ्य तिष्ठन्तं द्वितीयमिव शङ्करम् ७९
स्वायंभुवाद्या मनवो भृग्वाद्या ऋषयस्तथा ।
शक्राद्या देवताश्चैव सर्व एव समभ्ययुः ॥ ८०
सर्वभूतगणाश्चैव मातरो विविधाः स्थिताः ।
तेऽभिवाद्य महात्मानं परिवार्य समंततः ८१
अस्तुवन्विविधैः स्तोत्रैर्महादेवं सुरास्तदा ।
ब्रह्मा भवं तदाऽस्तौषीद्रथन्तरमुदीरयन् ॥८२
ज्येष्ठसाम्ना च देवेशं जगौ नारायणस्तदा ८३
गृणन्ब्रह्म परं शक्रः शतरुद्रियमुत्तमम् ।
ब्रह्मा नारायणश्चैव देवराजश्च कौशिकः॥ ८४
अशोभन्त महात्मानस्त्रयस्त्रय इवाग्नयः ।
तेषां मध्यगतो देवो रराज भगवाञ्छिवः ८५
शरदभ्रविनिर्मुक्तः परिधिस्थ इवांशुमान् ।
अयुतानि च चन्द्रार्कानपश्यं दिवि केशव ८६
ततोऽहमस्तुवं देवं विश्वस्य जगतः पतिम् ।
उपमन्युरुवाच।
नमो देवाधिदेवाय महादेवाय ते नमः ८७
शक्ररूपाय शक्राय शक्रवेषधराय च ।
नमस्ते वज्रहस्ताय पिङ्गलायारुणाय च ॥ ८८
पिनाकपाणय नित्यं शङ्खशूलधराय च ।
नमस्ते कृष्णवासाय कृष्णकुञ्चितमूर्धजे ॥ ८९
कृष्णाजिनोत्तरीयाय कृष्णाष्टमिरताय च ।
शुक्लवर्णाय शुक्लाय शुक्लाम्बरधराय च ॥ ९०
शुक्लभस्मावलिप्ताय शुक्लकर्मरताय च ।
नमोऽस्तु रक्तवर्णाय रक्ताम्बरधराय च ॥९१
रक्तध्वजपताकाय रक्तस्रगनुलेपिने ।
नमोऽस्तु पीतवर्णाय पीताम्बरधराय च ॥९२
नमोऽस्तूच्छ्रितच्छत्राय किरीटवरधारिणे ।
अर्धहारार्धकेयूर अर्धकुण्डलकार्णिने ॥ ९३
नमः पवनवगाय नमो देवाय वै नमः ।
सुरेन्द्राय मुनीन्द्राय महेन्द्राय नमोऽस्तु ते९४
नमः पद्मार्धमालाय उत्पलैर्मिश्रिताय च ।
अर्धचन्दनलिप्ताय अर्धस्रगनुलेपिने ॥ ९५
नम आदित्यवक्त्राय आदित्यनयनाय च ।
नम आदित्यवर्णाय आदित्यप्रतिमाय च ९६
नमः सोमाय सौम्याय सौम्यवक्त्रधराय च
सौम्यरूपाय मुख्याय सौम्यदंष्ट्राविभूषिणे ॥
नमः श्यामाय गौराय अर्धपीतार्धपाण्डवे ।
नारीनरशरीराय स्त्रीपुंसाय नमोऽस्तु ते ॥९८
नमो वृषभवाहाय गजेन्द्रगमनाय च ।
दुर्गमाय नमस्तुभ्यमगम्यागमनाय च ॥ ९९
नमोऽस्तु गणगीताय गणवृन्दरताय च ।
गणानुयातमार्गाय गणनित्यव्रताय च ॥ ३००
नमः श्वेताभ्रवर्णाय संध्यारागप्रभाय च ।
अनुद्दिष्टाभिधानाय स्वरूपाय नमोऽस्तु ते ॥१
नमो रक्ताग्रवासाय रक्तसूत्रधराय च ।
रक्तमालाविचित्राय रक्ताम्बरधराय च ॥ २
मणिभूषितमूर्धाय नमश्चन्द्रार्धभूषिणे ।
विचित्रमणिमूर्धाय कुसुमाष्टधराय च ॥ ३
नमोऽग्निमुखनेत्राय सहस्रशशिलोचने ।
अग्निरूपाय कान्ताय नमोऽस्तु गहनाय च ॥४
खचराय नमस्तुभ्यं गोचराभिरताय च ।
भूचराय भुवनाय अनन्ताय शिवाय च ॥ ५
नमो दिग्वाससे नित्यमधिवाससुवाससे ।
नमो जगन्निवासाय प्रतिपत्तिसुखाय च ६
नित्यमुद्बद्धमुकुटे महाकेयूरधारिणे ।
सर्पकंठोपहाराय विचित्राभरणाय च ७
नमस्त्रिनेत्रनेत्राय सहस्रशतलोचने ।
स्त्रीपुंसाय नपुंसाय नमः सांख्याय योगिने ८

रथन्तरज्येष्ठे सामनी ॥८२॥ शुक्लं कर्म हिंसारहितो ध्यानादिधर्म ॥ ९१ ॥ मिश्रिताय मिश्रितमालाय ॥ ९५ ॥ अधिवासेन पुष्पादिवासनावासिततया सुवाससे प्रतिपत्तिर्ज्ञानं सुखं च तदुभयात्मने ॥ ६ ॥ मुकुटे मुकुटाय ॥७॥ त्रीणि नेत्राणीव नेत्राणि लोकयात्रानिर्वाहकानि अग्निचन्द्रसूर्याख्यानि नेत्राणि यस्य तस्मै त्रिनेत्रनेत्राय लोचने लोचनाय८

शंयोरभिस्रवन्ताय अथर्वाय नमो नमः ।
नमः सर्वार्तिनाशाय नमः शोकहराय च ९
नमो मेघनिनादाय बहुमायाधराय च ।
बीजक्षेत्राभिपालाय स्रष्ट्राय नमो नमः १०
नमः सुरासुरेशाय विश्वेशाय नमो नमः ।
नमः पवनवेगाय नमः पवनरूपिणे ११
नमः काञ्चनमालाय गिरिमालाय वै नमः ।
नमः सुरारिमालाय चण्डवेगाय वै नमः १२
ब्रह्मशिरोपहर्ताय महिषघ्नाय वै नमः ।
नमः स्त्रीरूपधाराय यज्ञविध्वंसनाय च १३
नमस्त्रिपुरहर्ताय यज्ञविध्वंसनाय च ।
नमः कामाङ्गनाशाय कालदण्डधराय च १४
नमस्कन्दविशाखाय ब्रह्मदण्डाय वै नमः ।
नमो भवाय शर्वाय विश्वरूपाय वै नमः १५
ईशानाय भवघ्नाय नमोऽस्त्वन्धकघातिने ।
नमो विश्वाय मायाय चित्याचित्याय वै नमः
त्वं नो गतिश्च श्रेष्ठश्च त्वमेव हृदयं तथा ।
त्वं ब्रह्मा सर्वदेवानां रुद्राणां नीललोहितः१७
आत्मा च सर्वभूतानां सांख्ये पुरुष उच्यते ।
ऋषभस्त्वं पवित्राणां योगिनां निष्कलः शिवः
गृहस्थस्त्वमाश्रमिणामीश्वराणां महेश्वरः ।
कुबेरः सर्वयक्षाणां क्रतूनां विष्णुरुच्यते १९
पर्वतानां भवान्मेरुर्नक्षत्राणां च चन्द्रमाः ।
वसिष्ठस्त्वमृषीणां च ग्रहाणां सूर्य उच्यते२०
आरण्यानां पशूनां च सिंहस्त्वं परमेश्वरः ।
ग्राम्याणां गोवृषश्चासि भवाँल्लोकप्रपूजितः
आदित्यानां भवान्विष्णुर्वसूनां चैव पावकः ।
पक्षिणां वैनतेयस्त्वमनन्तो भुजगेषु च ॥ २२
सामवेदश्च वेदानां यजुषां शतरुद्रियम् ।
सनत्कुमारो योगानां सांख्यानां कपिलो ह्यसि
शक्रोऽसि मरुतां देव पितॄणां हव्यवाडसि ।
ब्रह्मलोकश्च लोकानां गतीनां मोक्ष उच्यसे२४
क्षीरोदःसागराणां च शैलानां हिमवान्गिरिः
वर्णानां ब्राह्मणश्चासि विप्राणां दीक्षितो द्विजः
आदित्स्त्वमसि लोकानां संहर्ता काल एव च
यच्चान्यदपि लोके वै सर्वतेजोधिक स्मृतम् ॥

तत्सर्वं भगवानेव इति मे निश्चिता मतिः ।
नमस्ते भगवन् देव नमस्ते भक्तवत्सल ॥ २७
योगेश्वर नमस्तेऽस्तु नमस्ते विश्वसंभव ।
प्रसीद मम भक्तस्य दीनस्य कृपणस्य च ॥२८
अनैश्वर्येण युक्तस्य गतिर्भव सनातन ।
यच्चापराधं कृतवानज्ञात्वा परमेश्वर ॥ २९
मद्भक्त इति देवेश तत्सर्वं क्षन्तुमर्हसि ।
मोहितश्चास्मि देवेश त्वया रूपविपर्ययात् ३०
नार्घ्यं ते न मया दत्तं पाद्यं चापि महेश्वर ।
एवं स्तुत्वाऽहमीशानं पाद्यमर्घ्यं च भक्तितः३१
कृताञ्जलिपुटो भूत्वा सर्वं तस्मै न्यवेदयम् ।
ततः शीतांबुसंयुक्ता दिव्यगन्धसमन्विता ३२
पुष्पवृष्टिः शुभा तात पपात मम मूर्धनि ।
दुन्दुभिश्च तदा दिव्यस्ताडितो देवकिङ्करैः ।
ववौ च मारुतः पुण्यः शुचिगन्धः सुखावहः ॥
ततः प्रीतो महादेवः सपत्नीको वृषध्वजः ।
अब्रवीन्मदशांस्तत्र हर्षयन्निव मां तदा ॥ ३४
पश्यध्वं त्रिदशाः सर्वे उपमन्योर्महात्मनः ।
मयि भक्तिं परां नित्यमेकभावादवस्थिताम्३५
एवमुक्तास्तदा कृष्ण सुरास्ते शूलपाणिना ।
ऊचुः प्राञ्जलयः सर्वे नमस्कृत्वा वृषध्वजम् ॥
भगवन् देवदेवेश लोकनाथ जगत्पते ।
लभतां सर्वकामेभ्यः फलं त्वत्तो द्विजोत्तमः॥
एवमुक्तस्ततः शर्वः सुरैर्ब्रह्मादिभिस्तथा ।
आह मां भगवानीशः प्रहसन्निव शङ्करः ॥३८

भगवानुवाच ।

वत्सोपमन्यो तुष्टोऽस्मि पश्य मां मुनिपुङ्गव
दृढभक्तोऽसि विप्रर्षे मया जिज्ञासितो ह्यसि
अनया चैव भक्त्या ते
अत्यर्थं प्रीतिमानहम् ।
तस्मात्सर्वान् ददाम्यद्य
कामांस्तव यथेप्सितान् ॥ ४०
एवमुक्तस्य चैवाथ महादेवेन धीमता ।
हर्षादश्रूण्यवर्तन्त रोमहर्षस्तवजायत ॥ ४१
अब्रुवं च तदा देवं हर्षगद्गदया गिरा ।
जानुभ्यामवनीं गत्वा प्रणम्य च पुनः पुनः ॥

शंयोर्यज्ञसाद्गुण्यकर्त्र्या देवताया अभिस्रवन्ताय प्रसादरूपाय ॥ ९ ॥ स्रष्ट्राय औणादिक. सृजेस्तारन् स्रष्ट्रे इत्यर्थः ॥ १० ॥ गिरिमालाय गिरौ क्रीडापराय ॥ १२ ॥ हर्ताय हर्त्रे ॥ १४ ॥ मायाय मायाविने ॥ १६ ॥ गति प्राप्यं स्थान श्रेष्ठ पूज्यतम· ब्रह्मादिस्तव विभूतिर्विशेषाभिव्यक्तिस्थानम् ॥ १७ ॥ कामेभ्य कामान् काम्यमानान् अर्थान् ॥ ३७ ॥

अद्य जातो ह्यहं देव सफलं जन्म चाद्य मे ।
सुरासुरगुरुर्देवो यस्तिष्ठति ममाग्रतः ॥ ४३
यं न पश्यन्ति चैवाद्धा देवा ह्यमितविक्रमम् ।
तमहं दृष्टवान् देवं कोऽन्यो धन्यतरो मया ॥
एवं ध्यायन्ति विद्वांसः परं तत्त्वं सनातनम् ।
तद्विशेषमिति ख्यातं यदजं ज्ञानमक्षरम् ॥४५
स एष भगवान् देवः सर्वसत्त्वादिरव्ययः ।
सर्वतत्त्वविधानज्ञः प्रधानपुरुषः परः ॥ ४६
योऽसृजद्दक्षिणादङ्गाद्ब्रह्माणं लोकसंभवम् ।
वामपार्श्वात्तथा विष्णुं लोकरक्षार्थमीश्वरः४७
युगान्ते चैव संप्राप्ते रुद्रमीशोऽसृजत्प्रभुः ।
स रुद्रः संहरन् कृत्स्नं जगत्स्थावरजङ्गमम् ४८
कालो भूत्वा महातेजाः संवर्तक इवानलः ।
युगान्ते सर्वभूतानि ग्रसन्निव व्यवस्थितः ४९
एष देवो महादेवो जगत्सृष्ट्वा चराचरम् ।
कल्पान्ते चैव सर्वेषां स्मृतिमाक्षिप्य तिष्ठति
सर्वगः सर्वभूतात्मा सर्वभूतभवोद्भवः ।
आस्ते सर्वगतो नित्यमदृश्यः सर्वदैवतैः ॥५१
यदि देयो वरो मह्यं यदि तुष्टोऽसि मे प्रभो ।
भक्तिर्भवतु मे नित्यं त्वयि देव सुरेश्वर ॥ ५२
अतीतानागतं चैव वर्तमानं च यद्विभो ।
जानीयामिति मे बुद्धिः प्रसादात्सुरसत्तम॥५३
क्षीरोदनं च भुञ्जीयामक्षयं सह बान्धवैः ।
आश्रमे च सदाऽस्माकं सान्निध्यं परमस्तु ते
एवमुक्तः स मां प्राह भगवाँल्लोकपूजितः ।
महेश्वरो महातेजाश्चराचरगुरुः शिवः ॥ ५५

श्रीभगवानुवाच ।

अजरश्चामरश्चैव भव त्वं दुःखवर्जितः ।
यशस्वी तेजसा युक्तो दिव्यज्ञानसमन्वितः ॥
ऋषीणामभिगम्यश्च मत्प्रसादाद्भविष्यसि ।
शीलवान् गुणसंपन्नः सर्वज्ञः प्रियदर्शनः ॥५७
अक्षयं यौवनं तेऽस्तु तेजश्चैवानलोपमम् ।
क्षीरोदः सागरश्चैव यत्र यत्रेच्छसि प्रियम् ५८
तत्र ते भविता कामं सान्निध्यं पयसो निधेः।
क्षीरोदनं च भुंक्ष्व त्वममृतेन समन्वितम् ५९
बंधुभिः सहितः कल्पं ततो मामुपयास्यसि ।
अक्षया बान्धवाश्चैव कुलं गोत्रं च ते सदा ६०
भविष्यति द्विजश्रेष्ठ मयि भक्तिश्च शाश्वती ।
सान्निध्यं चाश्रमे नित्यं करिष्यामि द्विजोत्तम
तिष्ठ वत्स यथाकामं नोत्कण्ठां च करिष्यसि
स्मृतस्त्वया पुनर्विप्र करिष्यामि च दर्शनम् ॥
एवमुक्त्वा स भगवान् सूर्यकोटिसमप्रभः ।
ईशानः स वरान् दत्वा तत्रैवान्तरधीयत ॥६३
एवं दृष्टो मया कृष्ण देवदेवः समाधिना ।
तदवाप्तं च मे सर्वं यदुक्तं तेन धीमता ॥ ६४
प्रत्यक्षं चैव ते कृष्ण पश्य सिद्धान्व्यवस्थितान्
ऋषीन् विद्याधरान् यक्षान् गंधर्वाप्सरसस्तथा
पश्य वृक्षलतागुल्मान् सर्वपुष्पफलप्रदान् ।
सर्वर्तुकुसुमैर्युक्तान्सुखपत्रान् सुगन्धिनः ॥ ६६
सर्वमेतन्महाबाहो दिव्यभावसमन्वितम् ।
प्रसादाद्देवदेवस्य ईश्वरस्य महात्मनः॥ ६७

वासुदेव उवाच ।

एतच्छ्रुत्वा वचस्तस्य प्रत्यक्षमिव दर्शनम्
विस्मयं परमं गत्वा अब्रुवं तं महामुनिम्॥६८

धन्यस्त्वमसि विप्रेन्द्र
कस्त्वदन्योऽस्ति पुण्यकृत् ।
यस्य देवाधिदेवस्ते
सान्निध्यं कुरुतेऽऽश्रमे ॥ ६९
अपि तावन्ममाप्येवं दद्यात्स भगवाञ्छिवः ।
दर्शनं मुनिशार्दूल प्रसादं चापि शंकरः ॥ ७०

उपमन्युरुवाच ।

द्रक्ष्यसे पुंडरीकाक्ष महादेवं न संशयः ।
अचिरेणैव कालेन यथा दृष्टो मयाऽनघ ॥ ७१
चक्षुषा चैव दिव्येन पश्याम्यमितविक्रमम् ।
षष्ठे मासि महादेवं द्रक्ष्यसे पुरुषोत्तम ॥ ७२
षोडशाष्टौ वरांश्चापि प्राप्स्यसि त्वं महेश्वरात्
सपत्नीकाद्यदुश्रेष्ठ सत्यमेतद्ब्रवीमि ते ॥ ७३
अतीतानागतं चैव वर्तमानं च नित्यशः ।
विदितं मे महाबाहो प्रसादात्तस्य धीमतः७४
एतान्सहस्रशश्चान्यान्समनुध्यातवान्हरः ।
कस्मात्प्रसादं भगवान्न कुर्यात्तव माधव ॥ ७५

एवं पुरोवर्तिमूर्तिरूपं यत् अजं अनाविर्भूतं अक्षरं व्यापकं ज्ञानं तदेव इति एवंप्रकारेण ख्यात प्रथां गतं विशेषं विशिष्टं देवतान्तरापेक्षया **सनातनमिति** मूर्तेरपि नित्यत्वं व्यवहारापेक्षया प्रोक्तम् ॥ ४५ ॥ षोडश वरान् सपत्नीकात् महेश्वरात् तत्रापि अष्टौ महेश्वरात् परिशेषादष्टौ पत्नीत इति षोडशेत्यर्थ । यद्वाऽष्टौ पत्नीत प्रार्थिता अष्टौ तया स्वयं दत्ता इति षोडश अष्टौ चेत्यर्थ ॥ ७२ ॥ एतान् इहस्थान् मुनीन् समनुध्यातवान् कृपया आलोचितवान् एतेष्वपि दयावास्त्वयि आत्मनि दया कथं न करिष्यतीत्यर्थ ॥ ७५ ॥

त्वादृशेन हि देवानां श्लाघनीयः समागमः ।
ब्रह्मण्येनानृशंसेन श्रद्दधानेन चाप्युत ॥ ७६
जप्यं तु ते प्रदास्यामि येन द्रक्ष्यसि शंकरम् ।

श्रीकृष्ण उवाच ।

अब्रुवं तमहं ब्रह्मन् त्वत्प्रसादान्महामुने ७७
द्रक्ष्ये दितिजसंघानां मर्दनं त्रिदशेश्वरम् ।
एवं कथयतस्तस्य महादेवाश्रिता कथाम् ७८
दिनान्यष्टौ ततो जग्मुर्मुहूर्तमिव भारत ।
दिनेऽष्टमे तु विप्रेण दीक्षितोऽहं यथाविधि ॥
दंडी मुंडी कुशी चीरी घृताक्तो मेखली कृतः
मासमेकं फलाहारो द्वितीयं सलिलाशनः८०
तृतीयं च चतुर्थं च पंचमं चानिलाशनः ।
एकपादेन तिष्ठंश्च ऊर्ध्वबाहुरतन्द्रितः ॥ ८१
तेजः सूर्यसहस्रस्य अपश्यं दिवि भारत ।
तस्य मध्यगतं चापि तेजसः पाण्डुनन्दन ॥८२
इन्द्रायुधपिनद्धाङ्गं विद्युन्मालागवाक्षकम् ।
नीलशैलचयप्रख्यं बलाकाभूषिताम्बरम् ॥ ८३
तत्र स्थितश्च भगवान् देव्या सह महाद्युतिः ।
तपसा तेजसा कान्त्या दीप्तया सह भार्यया
रराज भगवांस्तत्र देव्या सह महेश्वरः ।
सोमेन सहितः सूर्यो यथा मेघस्थितस्तथा॥८५
संहृष्टरोमा कौन्तेय विस्मयोत्फुल्ललोचनः ।
अपश्यं देवसंघानां गतिमार्तिहरं हरम् ॥ ८६
किरीटिनं गदिनं शूलपाणिं
व्याघ्राजिनं जटिलं दण्डपाणिम् ।
पिनाकिनं वज्रिणं तीक्ष्णदंष्ट्रं
शुभाङ्गदं व्यालयज्ञोपवीतम् ८७
दिव्यां मालामुरसाऽनेकवर्णां
समुद्वहन्तं गुल्फदेशावलम्बाम् ।
चन्द्रं यथा परिविष्टं ससन्ध्यं
वर्षात्यये तद्वदपश्यमेनम् ॥ ८८
प्रमथानां गणैश्चैव
समन्तात्परिवारितम् ।
शरदीव सुदुष्प्रेक्ष्यं
परिविष्टं दिवाकरम् ॥ ८९
एकादशशतान्येवं
रुद्राणां वृषवाहनम् ।
अस्तुवं नियतात्मानं
कर्मभिः शुभकर्मिणम् ॥ ९०
आदित्या वसवः साध्या
विश्वेदेवास्तथाऽश्विनौ ।
विश्वाभिस्तुतिभिर्देव
विश्वदेव समस्तुवम् ॥ ९१
शतक्रतुश्च भगवान् विष्णुश्चादितिनन्दनौ ।
ब्रह्मा रथन्तरं साम ईरयन्ति भवान्तिके ॥९२
योगीश्वराः सुबहवो योगदं पितरं गुरुम् ।
ब्रह्मर्षयश्च ससुतास्तथा देवर्षयश्च वै ॥ ९३
पृथिवी चान्तरिक्षं च
नक्षत्राणि ग्रहास्तथा ।
मासार्धमासा ऋतवो
रात्रिः संवत्सराः क्षणाः ॥ ९४
मुहूर्ताश्च निमेषाश्च तथैव युगपर्ययाः ।
दिव्या राजन्नमस्यन्ति विद्याः सत्त्वविदस्तथा
सनत्कुमारो देवाश्च इतिहासास्तथैव च ।
मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः ॥
मनवः सप्त सोमश्च अथर्वा सबृहस्पतिः ।
भृगुर्दक्षः कश्यपश्च वसिष्ठः काश्य एव च९७
छन्दांसि दीक्षा यज्ञाश्च
दक्षिणाः पावको हविः ।
यज्ञोपगानि द्रव्याणि
मूर्तिमन्ति युधिष्ठिर ॥ ९८
प्रजानां पालकाः सर्वे सरितः पन्नगा नगाः।
देवानां मातरः सर्वा देवपत्न्यः सकन्यकाः॥
सहस्राणि मुनीनां च अयुतान्यर्बुदानि च ।
नमस्यन्ति प्रभुं शान्तं पर्वताः सागरा दिशः
गन्धर्वाप्सरसश्चैव गीतवादित्रकोविदाः ।
दिव्यतालेषु गायन्तः स्तुवन्ति भवमद्भुतम् १

तेजो वर्णयति **इन्द्रेति**। यस्य तेजसो मध्येऽनेकानि इंद्रधनूंषि विद्युतो नीलमेघा श्वेतमेघाश्च पर्वतबलाकाकारा भान्ति तादृशं चित्ररूपं तेज इत्यर्थ ॥ ८३ ॥ **रराजेति**। नीले तेजसि सोमसूर्यप्रभौ भवानीशंकरौ प्रतिभात इत्यर्थ ॥८४॥ परिविष्टं परिवेषवन्तम् ॥ ८८ ॥ विश्वाभि ब्रह्मपरत्वेन स्तुतिरेव कृत्स्नस्तुति, इतरा तु एकदेशस्तुतिरित्यर्थः विश्वदेवं सर्वेश्वरम् ॥ ९१ ॥ पृथिव्यादयोऽत्र मूर्तिमन्तो ज्ञेया ॥ ९४ ।

विद्याधरा दानवाश्च गुह्यका राक्षसास्तथा ।
सर्वाणि चैव भूतानि स्थावराणि चराणि च
नमस्यन्ति महाराज वाङ्मनःकर्मभिर्विभुम् २
पुरस्ताद्विष्ठितः शर्वो ममासीन्निर्दशेश्वरः ।
पुरस्ताद्विष्ठितं दृष्ट्वा ममेशानं च भारत ॥ ३
सप्रजापतिशक्रान्तं जगन्मामभ्युदैक्षत ।
ईक्षितुं च महादेवं न मे शक्तिरभूत्तदा ॥ ४
ततो मामब्रवीद्देवः पश्य कृष्ण वदस्व च ।
त्वया ह्याराधितश्चाहं शतशोऽथ सहस्रशः ५

त्वत्समो नास्ति मे कश्चि-
न्त्रिषु लोकेषु वै प्रियः ।
शिरसा वन्दिते देवे
देवी प्रीता ह्युमा तदा ।
ततोऽहमब्रुवं स्थाणुं
स्तुतं ब्रह्मादिभिः सुरैः ॥ ६

कृष्ण उवाच ।

नमोऽस्तु ते शाश्वत सर्वयोने
ब्रह्माधिपं त्वामृषयो वदन्ति ।
तपश्च सत्त्वं च रजस्तमश्च
त्वामेव सत्यं च वदन्ति सन्तः ॥ ७
त्वं वै ब्रह्मा च रुद्रश्च
वरुणोऽग्निर्मनुर्भवः ।
धाता त्वष्टा विधाता च
त्वं प्रभुः सर्वतोमुखः ॥ ८
त्वत्तो जातानि भूतानि
स्थावराणि चराणि च ।
त्वया सृष्टमिदं कृत्स्नं
त्रैलोक्यं सचराचरम् ॥ ९
यानीन्द्रियाणीह मनश्च कृत्स्नं
ये वायवः सप्त तथैव चाग्नयः ।
य देवसंस्थास्तवदेवताश्च
तस्मात्परं त्वामृषयो वदन्ति ॥ १०
वेदाश्च यज्ञाः सोमश्च दक्षिणा पावको हविः
यज्ञोपगं च यत्किञ्चिद्भगवांस्तदसंशयम् ११
इष्टं दत्तमधीतं च
व्रतानि नियमाश्च ये ।
ह्रीः कीर्तिः श्रीर्द्युतिस्तुष्टिः
सिद्धिश्चैव तदर्पणी ॥ १२
कामः क्रोधो भय लोभो
मदः स्तम्भोऽथ मत्सरः ।
आधयो व्याधयश्चैव
भगवंस्तनवस्तव ॥ १३
कृतिर्विकारः प्रणयः प्रधानं बीजमव्ययम् ।
मनसः परमा योनिः प्रभावश्चापि शाश्वतः ॥
अव्यक्तः पावनोऽचिन्त्यः सहस्रांशुर्हिरण्मयः
आदिर्गणानां सर्वेषां भवान्वै जीविताश्रयः ॥
महानात्मा मतिर्ब्रह्मा
विश्वः शम्भुः स्वयंभुवः ।
बुद्धिः प्रज्ञोपलब्धिश्च
संवित्ख्यातिर्धृतिः स्मृतिः ॥ १६

शाश्वतोऽपरिणामी सन् सर्वयोनि ब्रह्मणो वेदस्याधिप स्तव्य तप चित्तेन्द्रियाणामैकाग्र्यम् ॥ ७ ॥ धाता ईश्वर त्वष्टा रूपनिर्माता विधाता धर्माधर्मरूपं कर्म ॥ ८ ॥ स्थावराणि चिरकालस्थायीनि महदादीनि चराणि स्थूलभूतादीनि चराचर लोकप्रसिद्धम् ॥ ९ ॥ यागव पञ्चप्राणा सप्ताग्नय गार्हपत्यदक्षिणाग्न्याहवनीय-सभ्यावसथ्या. पञ्च श्रौता स्मार्त षष्ठ. लौकिक सप्तम । यद्वा सप्तवायव आवहाद्या अतरिक्षे ये भुवआदीन् सत्यान्तान् लोकान् धारयंति। अग्नय आदित्यादिज्योतींषि एतेसर्वेऽन्ये च ये देवसंस्था देवे सूत्रात्मनि सस्था समाप्तियेषा ते तथा। स्तवदेवता स्तुतियोग्या देवा तस्मात् एतेषा समुदायात् परं वाचामगोचरं रूपादिहीनं **त्वां ऋषयो वदन्ति** ॥ १० ॥ स्रुक्स्रुवसमित्कुशदेशकालादिकं यज्ञोपगं यज्ञोपयोगि ॥ ११ ॥ सिद्धिर्योगपरिपाक तदर्पणी तस्य त्वत्स्वरूपस्य प्रापिका ॥१२॥ कृति क्रिया विकारस्तत्फलभूतो हर्षादि प्रणयस्तदभाव प्रधीयतेऽस्मिन्सर्वमिति प्रधान वासनाबीजं अज्ञानं तदेवाव्यय मनसो योनिश्च। अग्नमय ९ साम्य मन इति श्रुतेरन्नस्यापि मनोयोनित्वं उपष्टंभकत्वमात्रेण न तु मुख्यमिति वक्तुं-**परमेति** योनिविशेषणं प्रभाव ऐश्वर्य शाश्वत अकमज ॥ १४ ॥ हिरण्मय चिज्ज्योतीरूप गण्यते सख्यायत इति गणास्तत्त्वानि अव्यक्तादीनि तेषामादि जीविताश्रय नदीसमुद्रवज्जीवस्य प्राप्यं स्थानम् ॥ १५ ॥ **महानिति** महदाद्यैश्चतुर्दशभि पर्यायशब्दै वेदे महानात्मा भवानेव विभाव्यते विचार्यते वेदार्थविद्भि एतै शब्दैस्त्वां वेदाद्गुह्या **मोहं** संसारमूलं अज्ञानं नियच्छति नितरां नाशयति ॥ १६ ॥

पर्यायवाचकैः शब्दै-
र्महानात्मा विभाव्यते ।
त्वां बुद्ध्वा ब्राह्मणो वेदा-
त्प्रमोहं विनियच्छति । १७
हृदयं सर्वभूतानां क्षेत्रज्ञस्त्वमृषिस्तुतः ।
सर्वतः पाणिपादस्त्वं सर्वतोक्षिशिरोमुखः ॥
सर्वतः श्रुतिमाँल्लोके सर्वमावृत्य तिष्ठसि ।
फलं त्वमसि तिग्मांशोर्निमेषादिषु कर्मसु १९
त्वं वै प्रभार्चिः पुरुषः सर्वस्य हृदि संश्रितः ।
अणिमा महिमा प्राप्तिरीशानो ज्योतिरव्ययः
त्वयि बुद्धिर्मतिर्लोकाः
प्रपन्नाः संश्रिताश्च ये ।
ध्यानिनो नित्ययोगाश्च
सत्यसत्त्वा जितेन्द्रियाः ॥ २१
यस्त्वां ध्रुवं वेदयते गुहाशयं
प्रभुं पुराणं पुरुषं च विग्रहम् ।
हिरण्मयं बुद्धिमतां परां गतिं
स बुद्धिमान् बुद्धिमतीत्य तिष्ठति २२
विदित्वा सप्त सूक्ष्माणि षडङ्गं त्वां च मूर्तितः
प्रधानविधियोगस्थस्त्वामेव विशते बुधः २३
एवमुक्ते मया पार्थ भवे चार्तिविनाशने ।
चराचरं जगत्सर्वं सिंहनादं तदाऽकरोत् २४
तं विप्रसंघाश्च सुरासुराश्च
नागाः पिशाचाः पितरो वयांसि ।
रक्षोगणा भूतगणाश्च सर्वे
महर्षयश्चैव तदा प्रणेमुः ॥ २५
मम मूर्ध्नि च दिव्यानां
कुसुमानां सुगन्धिनाम् ।
राशयो निपतन्ति स्म
वायुश्च सुसुखो ववौ ॥ २६
निरीक्ष्य भगवान् देवी
ह्युमां मां च जगद्धितः ।
शतक्रतुं चाभिवीक्ष्य
स्वयं मामाह शङ्करः ॥ २७
विदुः कृष्ण परां भक्ति-
मस्मासु तव शत्रुहन् ।
क्रियतामात्मनः श्रेयः
प्रीतिर्हि त्वयि मे परा ॥ २८
वृणीष्वाष्टौ वरान् कृष्ण
दाताऽस्मि तव सत्तम ।
ब्रूहि यादवशार्दूल
यानिच्छसि सुदुर्लभान् ॥ ४२९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि मेघवाहनपर्वाख्याने चतुर्दशोऽध्यायः ॥ १४ ॥



हृदयं हृदयस्थ क्षेत्रं महाभूतादि धृत्यंतं तज्ज्ञस्तत्प्रकाशक ऋषिभिर्मैत्रै स्तुत स्तुतिमेवाह–**सर्वत इति** ॥ १८ ॥ तिग्मांशो कर्मसु फलं स्वर्गसुख च त्वमसि ॥१९॥ तिग्मांशो प्रभार्चिश्च अणिमा दुर्लक्ष्यसन्मात्रम् । महिमा त्रिविधपरिच्छेदशून्यं सत्तामात्रं अत्र प्रकृत्यर्थो दुर्लक्ष्यत्वादि प्रत्ययार्थ **सत्त्वेति** विवेक ॥२०॥ सत्यसत्वा. सत्यसंकल्पा २१ **य इति**। वेदयते जानाति ज्ञात्वा शिष्यान् ज्ञापयतीति वा विग्रहं विशिष्टानुभवरूपं निष्कलज्ञप्तिमात्रमित्यर्थ ॥२२॥ विदित्वा उपास्य सप्तसूक्ष्माणि महदहंकारपञ्चतन्मात्राणि षडंगं 'सर्वज्ञता तृप्तिरनादिबोध· स्वतन्त्रता नित्यमलुप्तशक्ति अनंतशक्तिश्च विभोर्विभुज्ञा षडाहुरंगानि महेश्वरस्य' इति अंगषट्कमुक्तं, प्रधानं चित्तसत्त्व तस्य आत्माभिमतत्वेन नित्यं गृहीतस्य पृथक्त्वेनाज्ञातस्य ज्ञापनं विधि सत्त्वस्य पुरुषात् भिन्नत्वेन ज्ञानं तद्यस्मात्तादृशो योगो वृत्तिनिरोधस्तत्रस्थस्तन्मात्रनिष्ठस्त्वा निष्कलं विशते आरोहक्रमेण योगी भूम्यादीनि महदंतानि तत्त्वानि जित्वा जयसाधन धीस्त्वमप्यात्मनः पृथक्त्वेन ज्ञात्वा प्रत्यक् तत्वमात्रनिष्ठो निलीने **सत्त्वे** परं ब्रह्म संपद्यत इत्यर्थ ॥२३॥ मेघवाहन इंद्ररूपी महादेव तस्य माहात्म्यप्रतिपादकं पर्व मेघवाहनपर्व तत्रायमध्याय । इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्दशोऽध्यायं ॥ १४ ॥

१५

कृष्ण उवाच ।

मूर्ध्नां निपत्य नियतस्तेजःसन्निचये ततः ।
परमं हर्षमागत्य भगवन्तमथाब्रुवम् ॥ १
धर्मे दृढत्वं युधि शत्रुघातं
यशस्तथाऽक्षयं परमं बलं च ।
योगप्रियत्वं तव सन्निकर्षं
वृणे सुतानां च शतं शतानि ॥ २
एवमस्त्विति तद्वाक्यं मयोक्तः प्राह शङ्करः ।
ततो मां जगतो माता धारिणी सर्वपावनी ३
उवाचोमा प्रणिहिता शर्वाणी तपसां निधिः
दत्तो भगवता पुत्रः साम्बो नाम तवानघ ॥ ४
मत्तोप्यष्टौ वरानिष्टान् गृहाण त्वं ददामि ते
प्रणम्य शिरसा सा च मयोक्ता पाण्डुनन्दन ५
द्विजेष्वकोपं पितृतः प्रसाद्
शतं सुतानां परमं च भोगम् ।
कुले प्रीतिं मातृतश्च प्रसादं
शमप्राप्तिं प्रवृणे चापि दाक्ष्यम् ॥ ६
उमोवाच ।
एवं भविष्यत्यमरप्रभाव
नाह मृषा जातु वदे कदाचित् ।
भार्यासहस्राणि च षोडशैव
तासु प्रियत्वं च तथाऽक्षयं च ॥ ७
प्रीतिं चाभ्यां बान्धवानां सकाशा-
ददामि तेऽहं वपुषः काम्यतां च ।
भोक्ष्यन्ते वै सप्तति वै शतानि
गृहे तुभ्यमतिथीनां च नित्यम् ॥ ८
वासुदेव उवाच
एवं दत्वा वरान् देवो
मम देवी च भारत ।
अन्तर्हितः क्षणे तस्मिन्
सगणो भीमपूर्वज ॥ ९
एतदत्यद्भुत पूर्वं ब्राह्मणायातितेजसे ।
उपमन्यवे मया कृत्स्न व्याख्यातं पार्थिवोत्तम
नमस्कृत्वा तु स प्राह देवदेवाय सुव्रत ॥ १०
उपमन्युरुवाच ।
नास्ति शर्वसमो देवो
नास्ति शर्वसमा गतिः ।
नास्ति शर्वसमो दाने
नास्ति शर्वसमो रणे ॥ ११

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि मेघवाहनपर्वाख्याने पञ्चदशोऽध्यायः ॥ १५ ॥



१६

उपमन्युरुवाच ।

ऋषिरासीत्कृते तात तण्डिरित्येव विश्रुतः
दशवर्षसहस्राणि तेन देवः समाधिना ॥ १
आराधितोऽभूद्भक्तेन तस्योदर्कं निशामय ।
स दृष्टवान्महादेवमस्तौषीच्च स्तवैर्विभुम् ॥ २

१५

मूर्ध्नेति । सन्निचये स्थितमिति शेष ॥१॥ योगेन सहितं प्रियत्वं इति द्वौ वरौ ॥ २ ॥ धारिणी पोषिका ॥३॥ एवं भविष्यतीति प्रार्थितान्वरानभ्यनुज्ञाय स्वयं भवानी वराष्टकं ददाति तत्रामरप्रभावेति सबोधनेनैको वर सूचित । नाहं मृषा जातु वदे इति त्वमपि मृषा मा वदेति द्वितीय । षोडशसहस्रभार्या इति तृतीय । तासु प्रियत्वमिति चतुर्थ । पूर्वोक्तात्सवेप्रियत्वादन्य अक्षयं धनधान्यादीत्यर्थादिति पञ्चम ॥ ७ ॥ अन्यत् त्रय स्पष्टार्थ एवं च उपक्रमस्थाना षोडशाष्टाना वचनमुपपद्यते ॥ ८ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चदशोऽध्याय १५

१६

ऋषिरिति । अयमध्यायो यत्पूर्वमुपमन्युना कृष्णं प्रत्युक्तं जप्यं तु ते प्रदास्यामीति तत् जप्यं शिवसहस्रनामस्तोत्रं विवक्षुरुपमन्युमुखेन तदुपोद्घातार्थमारभ्यते समाधिना ध्यानयोगेन ॥ १ ॥ उदर्कं फलोदयम् ॥ २ ॥

इति तण्डिस्तपोयोगात्परमात्मानमव्ययम्।
चिन्तयित्वा महात्मानमिदमाह सुविस्मितः
यं पठन्ति सदा सांख्याश्चिन्तयन्ति च योगिनः
परं प्रधानं पुरुषमधिष्ठातारमीश्वरम् ॥ ४
उत्पत्तौ च विनाशे च कारणं यं विदुर्बुधाः।
देवासुरमुनीनां च परं यस्मान्न विद्यते ॥ ५
अजं तमहमीशानमनादिनिधनं प्रभुम्।
अत्यन्तसुखिनं देवमनघं शरणं व्रजे ॥ ६
एवं ह्युवाचेव तदा ददर्श तपसां निधिम्।
तमव्ययमनौपम्यमचिन्त्यं शाश्वतं ध्रुवम् ॥ ७
निष्कलं सकलं ब्रह्म निर्गुणं गुणगोचरम्।
योगिनां परमानन्दमक्षरं मोक्षसञ्ज्ञितम् ॥ ८
मनोरिन्द्राग्निमरुतां विश्वस्य ब्रह्मणो गतिम्।
अग्राह्यमचलं शुद्धं बुद्धिग्राह्यं मनोमयम् ॥ ९
दुर्विज्ञेयमसंख्येयं दुष्प्रापमकृतात्मभिः।
योनिं विश्वस्य जगतस्तमसः परतः परम् १०
यः प्राणवन्तमात्मानं ज्योतिर्जीवस्थितं मनः
तं देवं दर्शनाकांक्षी बहून्वर्षगणान्ऋषिः।
तपस्युग्रे स्थितो भूत्वा दृष्ट्वा तुष्टाव चेश्वरम्११

तण्डिरुवाच।

पवित्राणां पवित्रस्त्व गतिर्गतिमतां वर॥
अत्युग्रं तेजसां तेजस्तपसां परमं तपः।
विश्वावसुहिरण्याक्षपुरुहूतनमस्कृत ॥ १३
भूरिकल्याणद विभो परं सत्यं नमोऽस्तु ते।
जातीमरणभीरूणां यतीनां यततां विभो १४
निर्वाणद सहस्रांशो नमस्तेऽस्तु सुखाश्रय।
ब्रह्मा शतक्रतुर्विष्णुर्विश्वेदेवा महर्षयः ॥ १५
न विदुस्त्वां तु तत्त्वेन कुतो वेत्स्यामहे वयम्
त्वत्तः प्रवर्तते सर्वं त्वयि सर्वं प्रतिष्ठितम् १६
कालाख्यः पुरुषाख्यश्च ब्रह्माख्यश्च त्वमेव हि।
तनवस्ते स्मृतास्तिस्रः पुराणज्ञैः सुरर्षिभिः१७
अधिपौरुषमध्यात्ममधिभूताधिदैवतम्।
अधिलोकाधिविज्ञानमधियज्ञस्त्वमेव हि १८
त्वां विदित्वात्मदेहस्थं दुर्विदं दैवतैरपि।
विद्वांसो यान्ति निर्मुक्ताः परं भावमनामयम्
अनिच्छतस्तव विभो जन्ममृत्युरनेकतः।
द्वारं तु स्वर्गमोक्षाणामाक्षेप्ता त्वं ददासि च२०

इदं वक्ष्यमाणप्रकारेण ॥ ३ ॥ यं पठंतीत्यादि श्लोकत्रयं ध्यानबलात्तण्डिना दृष्टं तदुच्चारणस्य फलमाह-**एवमिति**। अन्योप्येते श्लोकै स्तुवन्वक्ष्यमाणरूपमीश्वरं पश्यतीति भाव। शाश्वत शश्वद्भवं ध्रुव कूटस्थम् ॥ ७ ॥ निष्कलत्वादेर्व्याख्यानं निर्गुणत्वादि अक्षर अविनाशि ॥ ८ ॥ मनोमय मनसो धर्मै कर्तृत्वादिभिर्वशीकृत जलचद्रवत् ॥ ९ ॥ य इति सार्ध श्लोक। यो देव आत्मानं प्राणवंत जीवरूपिण कृत्वा तत्र आवृते जीवे मनोरूपं ज्योतिर्भूत्वा जीवस्थितं बभूव त देवं दृष्ट्वा तुष्टावेति सबध ॥ ११ ॥ पवित्राणा पावनाना गगादीनामपि पावनम् ॥ १२ ॥ तेजसां चक्षुरादीनामपि तेज प्रकाशकम् ॥ १३ ॥ भूरिकल्याण मोक्षस्तत्प्रद पर सत्य अत्यन्त अबाध्यम् ॥ १४ ॥ तिस्रस्तनव कालाख्या एव ब्रह्मविष्णुरुद्रा वा ॥ १७ ॥ **अधीति**। अत्र सप्ताभिरधिपौरुषादिसंहिताभिकृत्स्न हेयमुपादेय च त्वमेवेति कथ्यते—तथा हि पुरुष शिर पाण्यादिमान् देहस्तमधिकृत्य प्रवृत्तं विज्ञानं अधिपौरुष तत्र च माता पूर्वरूपं पितोतररूप प्रजा सन्धि। प्रजनन ऽसन्धानमिति श्रुतौ क्षेत्रबीजरूपाभ्या मातापितृभ्या सकाशादन्योन्यमिथुनीभावेन निमित्तेन अंकुररूपा प्रजा जायते एवं प्रकृतिपुरुषाभ्यां जगदिति तत्र मिथुनीभावस्याभावेन ब्रह्मचर्येण प्रजावज्जगन्नोत्पद्यत इति पुंप्रकृत्योर्विवेकमिच्छता उपस्थनिग्रह कर्तव्य इति विधीयते। एव अध्यात्मं आत्मनि देहे अधरा हनुपूर्वरूप उत्तरा हनुरुत्तररूप वाक्सन्धि जिह्वा सन्धानमिति श्रुतौ जिह्वानिग्रहेण तूष्णीभावोऽपि पूर्वोक्तविवेकार्थं विधीयते अन्यथा वागादीन् प्रवर्तयतो विवेको न सपद्यतेऽपि तु ससार एवानवच्छिन्नोनुतन्यते इति एता सहिता वेदितव्या। तथा अधिभूताधिदैवतं भूताना देहाद्यारम्भकाणा देवताना प्राणचक्षुराद्यधिष्ठात्रीणा भूतदेवताना चान्योन्याश्रयेण मिथुनीभावेनावस्थानं संसार तन्मूलं च अधिलोकाधिविज्ञानं लोक्यत इति लोको भूतमात्रा दशशब्दादयो विषया। विज्ञान प्रज्ञामात्रा दश श्रोत्रादीनींद्रियाणि ज्ञानकरणानि उभयेषा मिथुनीभावो यदि भूतमात्रा न स्युर्न प्रज्ञामात्रा स्युर्यदि प्रज्ञामात्रा न स्युर्न भूतमात्रा स्युर्न ह्यन्यतरतो रूप किञ्चन सिध्यतीति श्रुतिप्रसिद्ध। ततश्च ब्रह्मचर्यपूर्वक वागादिनिग्रहे क्रियमाणे जीवब्रह्मणोर्भेदहेतूनामधिभूताधिदैवानामनुत्पत्तेरधियज्ञो घटनाशे घटाकाशमहाकाशयोरिव तयो संगतिकरणे एकीभावलक्षणो यज्ञो मोक्षापरनामा सिध्यति। एतत्सर्वं त्वमेवेति श्लोकार्थ ॥१८॥ तव त्वा अनिच्छत ज्ञातुमिति शेष। जन्म मृत्युश्च अनेकतो अनन्त पुन पुनर्भवतीत्यर्थ ॥ २० ॥

त्वं वै स्वर्गश्च मोक्षश्च कामः क्रोधस्त्वमेव च
सत्त्वं रजस्तमश्चैव अधश्चोर्ध्वं त्वमेव हि २१
ब्रह्मा भवश्च विष्णुश्च स्कन्देन्द्रौ सविता यमः
वरुणेन्दू मनुर्धाता विधाता त्वं धनेश्वरः २२
भूर्वायुः सलिलाग्निश्च
खं वाग्बुद्धिः स्थितिर्मतिः
कर्म सत्यानृते चोभे
त्वमेवास्ति च नास्ति च ॥ २३
इन्द्रियाणीन्द्रियार्थाश्च प्रकृतिभ्यः परं ध्रुवम्।
विश्वाविश्वपरो भावश्चिन्त्याचिन्त्यस्त्वमेव हि
यच्चैतत्परमं ब्रह्म यच्च तत्परमं पदम् ।
या गतिः सांख्ययोगानां स भवान्नात्र संशयः
नूनमद्य कृतार्थाः स्म नूनं प्राप्ताः सतां गतिम्
यां गतिं प्रार्थयन्तीह ज्ञाननिर्मलबुद्धयः ॥ २६
अहो मूढाः स्म सुचिरमिमं कालमचेतसा ।
यन्न विद्मः परं देवं शाश्वतं यं विदुर्बुधाः २७
सेयमासादिता साक्षात्त्वद्भक्तिर्जन्मभिर्मया ।
भक्तानुग्रहकृद्देवो य ज्ञात्वाऽमृतमश्नुते ॥ २८
देवासुरमुनीना तु यच्च गुह्यं सनातनम् ।
गुहायां निहितं ब्रह्म दुर्विज्ञेय मुनेरपि ॥ २९
स एष भगवान् देवः सर्वकृत्सर्वतोमुखः ।
सर्वात्मा सर्वदर्शी च सर्वगः सर्ववेदिता ३०
देहकृद्देहभृद्देही देहभुग्देहिनां गतिः ।
प्राणकृत्प्राणभृत्प्राणी प्राणदः प्राणिनां गतिः
अध्यात्मगतिरिष्टानां ध्यायिनामात्मवेदिनाम्
अपुनर्भवकामानां या गतिः सोऽयमीश्वरः ३२
अयं च सर्वभूतानां शुभाशुभगतिप्रदः ।
अयं च जन्ममरणे विदध्यात्सर्वजन्तुषु ।
अयं संसिद्धिकामानां या गतिः सोऽयमीश्वरः
भूराद्यान्सर्वभुवनानुत्पाद्य सदिवौकसः ।
दधाति देवस्तनुभिरष्टाभिर्यो बिभर्ति च ३४
अतः प्रवर्तते सर्वमस्मिन्सर्वं प्रतिष्ठितम् ।
अस्मिंश्च प्रलयं याति अयमेकः सनातनः ३५
अयं स सत्यकामानां सत्यलोकः परं सताम् ।
अपवर्गश्च मुक्तानां कैवल्यं चात्मवेदिनाम् ३६
अयं ब्रह्मादिभिः सिद्धैर्गुहाया गोपितः प्रभुः ।
देवासुरमनुष्याणामप्रकाशो भवेदिति ॥ ३७
तं त्वां देवासुरनरास्तत्त्वेन न विदुर्भवम् ।
मोहिताः खल्वनेनैव हृदिस्थेनाप्रकाशिना ३८
ये चैनं प्रतिपद्यन्ते भक्तियोगेन भाविताः ।
तेषामेवात्मनाऽऽत्मानं दर्शयत्येष हृच्छयः ३९
यं ज्ञात्वा न पुनर्जन्म मरणं चापि विद्यते ।
यं विदित्वा परं वेद्यं वेदितव्यं न विद्यते ४०
यं लब्ध्वा परमं लाभं नाधिकं मन्यते बुधः
यां सूक्ष्मां परमां प्राप्तिं गच्छन्नव्ययमक्षयम् ४१
यं सांख्या गुणतत्त्वज्ञाः
सांख्यशास्त्रविशारदाः ।
सूक्ष्मज्ञानतराः सूक्ष्मं
ज्ञात्वा मुच्यन्ति बन्धनैः ॥ ४२
यं च वेदविदो वेद्यं वेदान्ते च प्रतिष्ठितम् ।
प्राणायामपरा नित्यं यं विशन्ति जपन्ति च ॥

अस्ति च नास्ति चेति रज्जुभुजङ्गाभं प्रतीतितोऽस्ति स्वतो नास्ति तादृशं जगत्कारणमज्ञानमुच्यते ॥२२॥ विश्वाविश्वपर कार्यकारणाभ्यामन्य भाव सत्तामात्ररूप चिन्त्याचिन्त्यश्च चिन्त्य सोपाधिकरूपेण आचिन्त्यो निरुपाधिकेन ॥ २४ ॥ अचेतसा अज्ञानेन यत्परं देव न विद्म अतो मूढा स्म ॥२७॥ देहकृत् यज्ञादि देहभृत् देहपोषकोऽज्ञादि देही जीव. देहभुक् देहसंहर्ता प्राणो लिङ्गशरीरं तस्यानादित्वेऽपि तत्कर्तृत्वं तदाविर्भावनिमित्तत्वं दृष्टिसृष्टिन्यायेन मुख्यं वा ज्ञेयम्॥३१॥अष्टाभि भूम्यम्बुवन्हिवायुर्व्योमसूर्यचन्द्रयजमानाख्याभि ॥३४॥ **अयमिति**। सत्यं अव्यभिचारि वेदोक्तं कर्मफलं स्वर्ग. सता ऊर्ध्वरेतसा परं स्वर्लोकादुपरि महर्लोकादि अपवर्गः क्रममुक्तिस्थानं ब्रह्मलोकाख्यं मुक्ताना विदेहाख्यानां योगिविशेषाणा कैवल्यं मुख्या मुक्ति ॥ ३६ ॥ गुहायां शास्त्रे गोपित तत्र हेतुमाह—**देवेति**। उक्तोऽपि सुखज्ञेयो माभूदिति भिन्नयन्तरेण निरूपित ब्रह्माद्यैर्मन्त्रव्याख्यातृभि तथाहि-चत्वारि शृङ्गेति मन्त्रो यास्केन यज्ञपरतया, पतञ्जलिना शब्दपरतया,गौतमेन तटस्थेश्वरपरतया,च व्याख्यात। वस्तुतस्त्वध्यात्मपरोस्तीति स्पष्टम् ॥३७॥ अनेन अहकारेण अप्रकाशिना जडेन जडात्मतरूपस्याप्यस्य चित्सद्रूपेण त्वयैव प्रकाश सत्ता च भवतीति भाव । तथा च मंत्रवर्ण —अयं रोचयदरुचो रुचानोऽयं वासयद्यृतेन पूर्वीरिति। अय आत्मा रोचयत् प्रकाशयति अरुच अप्रकाशान् अहंकारादीन् रुचानः स्वयंप्रकाशमान अयं आत्मा पूर्वी अहमादिसृज्यानि विशेषत पृथक् विविक्ततया ऋतेन स्वसत्तया वासयत् आच्छादयति अनृतानप्येतान् स्वसत्तयैव सत्तावत. करोति रज्जुरिव सर्पादीनिति मंत्रपदानामर्थ ॥ ३८ ॥ गच्छन् गच्छति तं बुध ॥ ४१ ॥ सूक्ष्मं लिङ्गं ज्ञानेन तरन्ति अतिक्रम्य गच्छन्ति ते सूक्ष्मज्ञानतरा । सूक्ष्माज्ञानेति पाठे प्रकृतिं तीर्त्वा गता इत्यर्थ । सूक्ष्मं पुरुषम् ॥४२॥

ओंकाररथमारुह्य ते विशन्ति महेश्वरम् ।
अयं स देवयानानामादित्यो द्वारमुच्यते ॥४४
अयं च पितृयानानां चंद्रमा द्वारमुच्यते ।
एष काष्ठा दिशश्चैव संवत्सरयुगादि च ॥ ४५
दिव्यादिव्यः परो लाभ अयने दक्षिणोत्तरे ।
एनं प्रजापतिः पूर्वमाराध्य बहुभिः स्तवैः ४६
प्रजार्थं वरयामास नीललोहितसंज्ञितम् ।
ऋग्भिर्यमनुशासन्ति तत्त्वे कर्माणि बह्वृचाः ॥
यजुर्भिर्यज्ञिधा वेद्यं जुह्वत्यध्वर्यवोऽध्वरे ।
सामभिर्यं च गायन्ति सामगाः शुद्धबुद्धयः ॥
ऋतं सत्यं परं ब्रह्म स्तुवन्त्याथर्वणा द्विजाः ।
यज्ञस्य परमा योनिः पतिश्चायं परः स्मृतः ॥
रात्र्यहःश्रोत्रनयनः पक्षमासशिरोभुजः ।
ऋतुवीर्यस्तपोधैर्यो ह्यब्दगुह्योरुपादवान् ॥ ५०
मृत्युर्यमो हुताशश्च कालः संहारवेगवान् ।
कालस्य परमा योनिः कालश्चायं सनातनः ॥
चन्द्रादित्यौ सनक्षत्रौ ग्रहाश्च सह वायुना ।
भुवः सप्तर्षयश्चैव भुवनाः सप्त एव च ॥ ५२
प्रधानं महदव्यक्तं विशेषान्तं सवैकृतम् ।
ब्रह्मादिस्तम्बपर्यन्तं भूतादि सदसच्च यत् ॥५३
अष्टौ प्रकृतयश्चैव प्रकृतिभ्यश्च यः परः ।
अस्य देवस्य यद्भाग कृत्स्नं संपरिवर्तते ॥ ५४
एतत्परममानन्दं यत्तच्छाश्वतमेव च ।
एषा गतिर्विरक्तानामेष भावः परः सताम् ५५
एतत्पदमनुद्विग्नमेतद्ब्रह्म सनातनम् ।
शास्त्रवेदाङ्गविदुषामेतद्ध्यानं परं पदम् ॥ ५६
इयं सा परमा काष्ठा इयं सा परमा कला ।
इयं सा परमा सिद्धिरियं सा परमा गतिः५७
इयं सा परमा शान्तिरियं सा निर्वृतिः परा॥
यं प्राप्य कृतकृत्याः स्म इत्यमन्यन्त योगिनः
इयं तुष्टिरिय सिद्धिरियं श्रुतिरियं स्मृतिः ।
अध्यात्मगतिरिष्टानां विदुषा प्राप्तिरव्यया५९
यजतां कामयानानां मखैर्विपुलदक्षिणैः ।
या गतिर्यज्ञशीलानां सा गतिस्त्व न संशयः
सम्यक् योगजपैः शान्तिर्नियमैर्देहतापनैः ।
तप्यता या गतिर्देव परमा सा गतिर्भवान् ॥
कर्मन्यासकृतानां च विरक्तानां ततस्ततः ।
या गतिर्ब्रह्मसदने सा गतिस्त्वं सनातन ६२
अपुनर्भवकामाना वैराग्ये वर्तता च या ।
प्रकृतीनां लयानां च सा गतिस्त्वं सनातन ॥
ज्ञानविज्ञानयुक्ताना निरुपाख्या निरंजना ।
कैवल्या या गतिर्देव परमा सा गतिर्भवान् ॥

वेदशास्त्रपुराणोक्ताः
पञ्चैता गतयः स्मृताः ।
त्वत्प्रसादाद्धि लभ्यन्ते
न लभ्यन्तेऽन्यथा विभो ॥ ६५

इति तण्डिस्तपोराशिस्तुष्टावेशानमात्मना ।
जगौ च परमं ब्रह्म यत्पुरा लोककृज्जगौ ६६

उपमन्युरुवाच ।

एवं स्तुतो महादेवस्तण्डिना ब्रह्मवादिना ।
उवाच भगवान् देव उमया सहितः प्रभुः॥६७
ब्रह्मा शतक्रतुर्विष्णुर्विश्वेदेवा महर्षयः ।
न विदुस्त्वामिति ततस्तुष्टः प्रोवाच तं शिवः

श्रीभगवानुवाच ।

अक्षयश्चाव्ययश्चैव भविता दुःखवर्जितः ।
यशस्वी तेजसा युक्तो दिव्यज्ञानसमन्वितः ॥

दिव्यो लाभ ऐन्द्रं आदिव्यो लाभ सार्वभौमत्वम् ॥ ४६ ॥ अनुशंसन्तीति पाठ स्वच्छ । तत्त्वे अनारोपिते रूपे विषये कथयन्ति ॥४७॥ त्रिधा पाकयज्ञत्रये श्रौतस्मार्त्तध्यानयज्ञैरित्यर्थ ॥ ४८ ॥ ऋतं यज्ञ सत्यं तत्फलं योनि श्रद्धास त्ये ॥४९॥ यज्ञपते श्रोत्रादिभावेन रात्र्यादीनि निरूपयतिरात्रीति ॥५०॥ कालस्य योनिमेवाह चन्द्रेति ॥ ५२ ॥ सत् भूम्यम्बुतेजासि असत् वाय्वाकाशौ॥५३॥ अष्टौ भूमिरापोऽनलो वायु खं मनो बुद्धिरहंकारश्च पर मायावी अस्य मायाविन भाग अंश कृत्स्नं प्रपञ्चजातम्॥५४॥ एतस्मात्परमं आनन्दमयादीश्वरादपि पर शुद्ध आनन्दं आनंदमात्र तदेव शाश्वतं तेन पूर्वेषामशाश्वतत्वं दर्शितम्॥५५॥ ध्यानं परं पदं पदप्रापकम् ५६॥ सेति सा काष्ठा सा परा गतिरिति श्रुतिप्रसिद्धा ॥ ५७ ॥ निर्वृति सुखम्॥५८॥ श्रुतिरिति श्रोत्रादिजन्याऽनुभूति इष्टाना योगिना अध्यात्मगति प्रत्यक्प्रावण्यरूपा गति विदुषा अहं ब्रह्मास्मीति जानता अव्यया अपुनरावर्तिनी प्राप्ति ॥ ५९ ॥ परमा गतिमपरमा गतिपूर्विका व्याचष्टे–**यजतामिति** । यज्ञशीलाना गति स्वर्गादिलोकः ॥६०॥ योगजपादिपराणा तपस्विना नक्षत्रलोकाख्या परमा भास्वती गतिर्द्वितीया ॥६१॥ संन्यासिना ब्रह्मलोक पुनरावृत्तिरूपा गतिस्तृतीया ॥६२॥ प्रकृतीना ये लयमभ्यस्यंति तेषा दहरादिरूपकारणब्रह्मोपासकाना अपुनरावृत्तिरूपा गतिश्चतुर्थी ॥६३॥ **ज्ञानेति** । निष्कलब्रह्मविदा मोक्षाख्या या गति सा भवान् पूर्वांस्तु गतयोऽनात्मभूताः इति भाव ॥ ६४ ॥ तत ब्रह्मादयस्त्वा न विदुरिति वाक्यात् ॥६८॥

ऋषीणामभिगम्यश्च सूत्रकर्ता सुतस्तव ।
मत्प्रसादाद्विजश्रेष्ठ भविष्यति न संशयः ७०
कं वा कामं ददाम्यद्य ब्रूहि यद्वत्स काङ्क्षसे ।
प्राञ्जलिः स उवाचेदं त्वयि भक्तिर्दृढाऽस्तु मे
उपमन्युरुवाच ।
एतान् दत्वा वरान्देवो वन्द्यमानः सुरर्षिभिः
स्तूयमानश्च विबुधैस्तत्रैवान्तरधीयत ॥ ७२
अन्तर्हिते भगवति सानुगे यादवेश्वर ।
ऋषिराश्रममागम्य ममैतत्प्रोक्तवानिह ॥ ७३
यानि च प्रथितान्यादौ तण्डिराख्यातवान्मम
नामानि मानवश्रेष्ठ तानि त्वं शृणु सिद्धये७४
दशनामसहस्राणि देवेष्वाह पितामहः ।
सर्वस्य शास्त्रेषु तथा दशनामशतानि च ७५
गुह्यानीमानि नामानि तण्डिर्भगवतोऽच्युत ।
देवप्रसादाद्देवेशः पुरा प्राह महात्मने ॥ ७६

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि मेघवाहनपर्वाख्याने षोडशोऽध्यायः ॥ १६ ॥

१७

वासुदेव उवाच ।
ततः स प्रयतो भूत्वा मम तात युधिष्ठिर ।
प्राञ्जलिः प्राह विप्रर्षिर्नामसंग्रहमादितः ॥ १
उपमन्युरुवाच ।
ब्रह्मप्रोक्तैर्ऋषिप्रोक्तैर्वेदवेदाङ्गसम्भवैः ।
सर्वलोकेषु विख्यातं स्तुत्यं स्तोष्यामि नामभिः
महद्भिर्विहितैः सत्यैः सिद्धैः सर्वार्थसाधकैः ।
ऋषिणा तण्डिना भक्त्या कृतैर्वेदकृतात्मना॥
यथोक्तैः साधुभिः ख्यातैर्मुनिभिस्तत्त्वदर्शिभिः
प्रवरं प्रथमं स्वर्ग्यं सर्वभूतहितं शुभम् ॥ ४
श्रुतैः सर्वत्र जगति ब्रह्मलोकावतारितैः ।
सत्यैस्तत्परमं ब्रह्म ब्रह्मप्रोक्तं सनातनम् ॥ ५
वक्ष्ये यदुकुलश्रेष्ठ शृणुष्वावहितो मम ।
वरयैनं भवं देवं भक्तस्त्वं परमेश्वरम् ॥ ६
तेन ते श्रावयिष्यामि यत्तद्ब्रह्म सनातनम् ।
न शक्यं विस्तरात्कृत्स्न वक्तुं सर्वस्य केनचित् ७
युक्तेनापि विभूतीनामपि वर्षशतैरपि ।
यस्यादिर्मध्यमन्तं च सुरैरपि न गम्यते ॥ ८
कस्तस्य शक्नुयाद्वक्तुं गुणान् कात्स्न्र्येन माधव
किं तु देवस्य महतः साक्षेपार्थपदाक्षरम् ॥ ९
शक्तितश्चरितं वक्ष्ये प्रसादात्तस्य धीमतः ।
अप्राप्य तु ततोऽनुज्ञां न शक्यः स्तोतुमीश्वरः
यदा तेनाभ्यनुज्ञातः स्तुतो वै स तदा मया ।
अनादिनिधनस्याहं जगद्योनेर्महात्मनः ॥ ११
नाम्नां कञ्चित्समुद्देशं वक्ष्याम्यव्यक्तयोनिनः ।
वरदस्य वरेण्यस्य विश्वरूपस्य धीमतः १२
शृणु नाम्नां च यं कृष्ण यदुक्तं पशयोनिना ।
दशनामसहस्राणि यान्याह प्रपितामहः ॥ १३
तानि निर्मथ्य मनसा दध्नो घृतमिवोद्धृतम् ।
गिरेः सार यथा हेम पुष्पसारं यथा मधु १४
घृतात्सारं यथा मण्डस्तथैतत्सारमुद्धृतम् ।
सर्वपापापहमिदं चतुर्वेदसमन्वितम् ॥ १५
प्रयत्नेनाधिगन्तव्यं धार्यं च प्रयतात्मना ।
माङ्गल्यं पौष्टिकं चैव रक्षोघ्नं पावनं महत् १६
इदं भक्ताय दातव्यं श्रद्दधानास्तिकाय च ।
नाश्रद्दधानरूपाय नास्तिकायाजितात्मने॥१७

सूत्रकर्ता ताण्डिन इति यजुर्वेदे शाखाविशेषस्तत्र कल्पसूत्रकर्ता ॥ ७० ॥ प्रथितानि मया तुभ्यं येषा मध्ये एकं उपदिष्टं तानि सर्वाणि त्वं शृणु सिद्धये मोक्षान्तसकलप्राप्तये ॥ ७४ ॥ देवेशो ब्रह्मा यानि नामानि महात्मने पुरा प्राह गुह्यानि तानीमानि नामानि देवप्रसादात्तंडि प्राह मह्यमिति शेष ॥७६॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षोडशोऽध्याय ॥ १६ ॥

१७

तत इति ॥१॥ सत्यैरन्वर्थैं वेदे कृतात्मना दत्तचित्तेन कृतै वेदात्पृथक्कृतै ॥३॥ यथोक्तैरिति स्तुत्यं सिंहावलोकनन्यायेन विशिनष्टि प्रवरमित्यर्धेन ॥ ४ ॥ श्रुतैरिति ब्रह्मप्रोक्तै वेदोक्तै ॥ ५ ॥ वरय प्रार्थय उपसन्नो भव एनं मंत्रात्मकमीश्वरं लब्धुम् ॥६॥ तेन विधिना ॥ ७ ॥ युक्तेन सन्नद्धेन ॥८॥ योनिन योने ब्रह्मण इति शेष ॥१२॥

यश्चाभ्यसूयते देवं कारणात्मानमीश्वरम् ।
स कृष्ण नरकं याति सह पूर्वैः सहात्मजैः१८
इदं ध्यानमिदं योगमिदं ध्येयमनुत्तमम् ।
इदं जप्यमिदं ज्ञानं रहस्यमिदमुत्तमम् ॥ १९
यं ज्ञात्वा अन्तकालेऽपि गच्छेत परमां गतिं
पावित्रं मङ्गलं मेध्यं कल्याणमिदमुत्तमम् ॥२०
इदं ब्रह्मा पुरा कृत्वा सर्वलोकपितामहः ।
सर्वस्तवानां राजत्वे दिव्यानां समकल्पयत्२१
तदाप्रभृति चैवायमीश्वरस्य महात्मनः ।
स्तवराज इति ख्यातो जगत्यमरपूजितः॥२२
ब्रह्मलोकादयं स्वर्गे स्तवराजोऽवतारितः ।
यतस्तण्डिः पुरा प्राप तेन तंडिकृतोऽभवत् ॥
स्वर्गाच्चैवात्र भूलोकं तण्डिना ह्यवतारितः ।
सर्वमङ्गलमाङ्गल्यं सर्वपापप्रणाशनम् ॥ २४
निगदिष्ये महाबाहो स्तवानामुत्तमं स्तवम् ।
ब्रह्मणामपि यद्ब्रह्म पराणामपि यत्परम् ॥ २५
तेजसामपि यत्तेजस्तपसामपि यत्तपः ।
शांतानामपि यः शांतो द्युतीनामपि या द्युतिः
दांतानामपि यो दांतो धीमतामपि या च धीः
देवानामपि यो देव ऋषीणामपि यस्त्वृषिः२७
यज्ञानामपि यो यज्ञः शिवानामपि यः शिवः
रुद्राणामपि यो रुद्रः प्रभा प्रभवतामपि ॥२८
योगिनामपि यो योगी कारणानां च कारणम्
यतो लोकाः संभवन्ति न भवन्ति यतः पुनः
सर्वभूतात्मभूतस्य हरस्यामिततेजसः ।
अष्टोत्तरसहस्रं तु नाम्नां शर्वस्य मे शृणु ।
यच्छ्रुत्वा मनुजव्याघ्र सर्वान्कामानवाप्स्यसि

स्थिरः स्थाणुः प्रभुर्भीमः प्रवरो वरदो वरः ।

इदमिति । एतज्जप एव ध्यानादिफलप्रद इत्यर्थ ॥ १९ ॥ यं स्तव सकृदविगमेनाप्यस्य परमा गतिं गच्छेतैवेत्यर्थ । पवित्र पापनाशक मेध्य यज्ञादिफलप्रद मगल अभ्युदयकर उत्तम कल्याण परमानन्दरूपम् ॥२०॥ ब्रह्मणा वेदाना वाचामपि यो वागित्यर्थ । पराणामिंद्रियार्थमनोबुद्धिमहदव्यक्तानामपि य पर पुरुष इत्यर्थ ॥ २५ ॥ तेजसा चक्षुरादीनामपि यच्चक्षु तपसा पुण्याना गङ्गादीनामपि यत्पुण्य शान्ताना उपरतचित्तानामपि आत्यंतिकी उपरतिर्मोक्षाख्या द्युतीना ज्ञानाना वृत्तिरूपाणामपि ज्ञान साक्षिरूपं अनुव्यवसायापरपर्यायम् ॥ २६ ॥ दान्ताना जितेन्द्रियाणा मध्येऽत्यन्त जितेन्द्रिय । धीमता ज्ञानिना धी आत्मा अनुभवरूप ज्ञानम् । देवाना पूज्यानामपि पूज्य । ऋषीणा काव्यकर्तृणामपि काव्यकर्ता वेदकर्तृत्वात् ॥ २७ ॥ यज्ञाना यज्ञभोक्तृणा यज्ञ यज्ञस्य आराधनस्य भोक्ता शिवाना कल्याणानामपि कल्याणं रुणद्धि एनामिति वा रोदित्यनेन वा रौत्यनेन वा रवण वा रुत् अज्ञानं वा विपर्ययो वा शोको वा दुःख वा रुत् ता द्रावयतीति रुद्र । ज्ञान आनंदो वा तेषामप्यानन्द । प्रभवतामीश्वराणामपि प्रभा ऐश्वर्यम् ॥२८॥ योगिना ब्रह्मादीनामपि यो योगी ध्येयसंकल्पमात्रेण स्रष्टा। कारणाना अव्यक्तादीना कारणं निष्कलम् ॥ २९ ॥

यद्यप्यत्र सहस्रनामस्तोत्रे नाम्ना शब्दतोऽर्थतश्च पौनरुक्त्यमस्ति तथापि अर्थैक्येऽपि शब्दभेदात्क्वचित् क्वचित् शब्दैक्येऽप्यर्थभेदाच्चापौनरुक्त्यं द्रष्टव्यं अपूर्वार्थत्वात्। न हि सर्वात्मपदोच्चारणजन्यमपूर्व विश्वात्मपदोच्चारणादुत्पद्यते अन्यथा 'अग्नये जुष्टं निर्वपामि' इत्यत्र वह्नये जुष्टमिति उच्चारणेऽपि तदपूर्वोत्पत्त्यापत्तेर्विधिगत एव शब्द प्रयोक्तव्य इति **मीमांसकमुद्रा**भग स्यात्। अर्थभेदेऽपि शब्दैक्यं न पौनरुक्त्यावहं इन्द्रशब्दस्यान्यार्थस्यापि ऐन्द्र्या गार्हपत्यमुपतिष्ठतेति विधानायोगेनाभिपरत्वप्रदर्शनात्। तथा च शब्दैक्येऽप्यर्थैक्य नास्ति तथा वयमस्या व्याख्याया प्रदर्शयिष्याम —

१—[**स्थिर**] तिष्ठतीति स्थिर तिष्ठन्त्यस्मिन्निति स्थाणुश्च।आजिरशिशिरेत्यादिना स्थाणुरिति च तिष्ठते किरच् टिलोपौ नुप्रत्ययश्च विधीयते। स्थिर अचञ्चल ।कूटस्थ नित्य।

२—**स्थाणुः** गृहस्तंभवत्सर्वाश्रय । यथोक्तं–' संसारमडपस्यास्य मूलस्तम्भाय शभवे ' इति ।

३—**प्रभुः** ईश्वरोन्तर्यामीत्यर्थ प्रकृष्ट भवन सत्ता यस्येति वा परमार्थसत्य इत्यर्थ । प्रकर्षेण भावयति विश्वं +चरयति जानाति वा विश्वकर्त्ता सर्वज्ञो वेत्यर्थ । ' विप्रसंभ्योड्वसंज्ञायाम्' (पा ३।२।१८०) इति प्रपूर्वाद्भवतेर्डु । पाचकपाठकादिवद्गुणशब्दोऽयं न तु सज्ञाशब्द । एवमुत्तरत्रापि ज्ञेयम्।

४—**भीमः** सहर्त्ता बिभेत्यस्माज्जगादिति व्युत्पत्ते 'भीमादयोऽपादाने' (पा ३।४।७४) इति सूत्रान्सिद्धि ।

५—**प्रवरः** श्रेष्ठ प्रकर्षेण भोगमोक्षकामैर्वरणीय ।

६—अत एव **वरदः** इष्टप्रद 'आतोऽनुपसर्गे क' (पा ३।२।३) इति सुप्पूर्वाद्दातेः क

७—**वरः** वृणोति आच्छादयति सर्वमिति वर । पचाद्यच् ।

+ रचयति ।

सर्वात्मा सर्वविख्यातः सर्वः सर्वकरो भवः
जटी चर्मी शिखंडी च सर्वांगः सर्वभावनः ।
हरश्च हरिणाक्षश्च सर्वभूतहरः प्रभुः ॥ ३२
प्रवृत्तिश्च निवृत्तिश्च नियतः शाश्वतो ध्रुवः ।
श्मशानवासी भगवान् खचरो गोचरोऽर्दनः ३३
अभिवाद्यो महाकर्मा तपस्वी भूतभावनः ।
उन्मत्तवेषप्रच्छन्नः सर्वलोकप्रजापतिः ॥ ३४

८—**सर्वात्मा** सृतमनेनेति सर्वं स चात्मा चेति सर्वात्मा व्यापक प्रत्यग्रूप प्राणमृन्मात्रस्यान्तरात्मेत्यर्थ । सर्वनिघृर्वेत्यादिना सर्तेर्वङतत्वं निपात्यते आप्नोति सर्वं भोग्यं स्वार्थत्वेन लभते आदत्ते स्वीकरोति अत्ति भुक्ते अतति सततमेकरूपेण वर्तत इति च आत्मा तथा च स्मृति —

'यच्चाप्नोति यदादत्ते यच्चात्ति विषयानयम् ।
यच्चास्य सन्ततो भावस्तस्मादात्मेति गीयते' ॥

इति ।

९—**सर्वविख्यातः** सर्वत्र देशे काले च सर्वेषा प्राणिना वा विख्यात प्रत्यक्त्वेन प्रसिद्ध ।

१०—**सर्वः** व्यापक 'सर्वं समाप्नोषि ततोऽसि सर्व' इति भगवद्वचनात् ।

११—सर्वं करोतीति **सर्वकरः** विश्वस्य कर्ता एतेन नामद्वयेन उपादानत्वं निमित्तत्वं चोक्तम् ।

१२—अत एव भवत्यस्मादनन्यापेक्षाद्विश्वमिति भवत्यस्मिन्प्रलय इति वा **भवः** सर्वस्योत्पत्तिप्रलयस्थान 'ऋदोरप्' (पा ३।३।५७) इत्यप् भवति अस्तीति सत्तार्थाद्भवते पचाद्यच् सत्तामात्रस्वरूप इत्यर्थ ॥ ३१ ॥

१३—**जटी** जटझटसंघातेऽस्मात्पचाद्यचि केशाना संघातो जटा तद्वान् ।

१४—**चर्मी** चर्म व्याघ्रस्य गजस्य वा कृत्तिस्तद्वान् ।

१५—**शिखंडी** मयूरशिखावत् जटासंनिवेशोपरि कृतो जटाग्रगुच्छ शिखण्डस्तद्वान् ।

१६—सर्वं जगदङ्गं अवयवभूतं यस्य स **सर्वांगः** विराडित्यर्थ ।

१७—**सर्वभावनः** विश्वकर्ता ।

१८—**हरः** हरति सर्वं सहरतीति हर हरते पचाद्यच् ।

१९—**हरिणाक्षः** मृगनेत्र ।

२०—सर्वाणि भूतानि हरतीति **सर्वभूतहरः** हरतेरनुद्यमनेऽजित्यच् ।

२१—**प्रभुः** प्रकर्षेण भवते प्राप्नोति विश्वं भोग्यत्वेनेति सर्वभोक्ता पूर्ववत् डु ॥ ३२ ॥

२२—**प्रवृत्तिः** प्रकर्षेण कुर्वद्रूपतया वर्त्तनं प्रवृत्ति ।

२३—निकर्षेण निरुद्यमतया वर्त्तनम् । **निवृत्तिः** निपूर्वात् वृतु वर्तनेऽस्मात् स्त्रिया क्तिन् ।

२४—यतन्ते विषयग्रहणाय स्वय प्रवर्तन्ते तानि यतानि इन्द्रियाणि यतीं प्रयन्तेऽस्मात् पचाद्यच् । निगृहीतानि यतानि येन स **नियतः** तपस्वीत्यर्थ ।

२५—**शाश्वतः** शश्वद्भव नित्य इत्यर्थ ।

२६—**ध्रुवः** अचलः ।

२७—**श्मशानवासी** श्मान शवा मृतजीवाः शेरतेऽस्मिन् पुनरुत्थानवर्जितं शयन कुर्वन्त्यस्मिन्निति श्मशानं वाराणसी तत्र वस्तु शीलमस्य स श्मशानवासी । शवदाहस्थले तु श्मशानशब्दो गौण । नहि तत् मृताना देहाना देहिना वा मृद्भस्मीभूताना यातनावशाना वा सुषुप्तिवद्विश्रान्तिस्थान देहाना जडत्वेन विश्रान्त्यनर्हत्वात् देहिना शरीरान्तरधारिणा विश्रान्त्यभावात् वाराणस्या मृतास्तु न पुन संसरन्तीति सहस्रश प्रमाणान्यस्मत्कृते **अविमुक्तनिरुक्तिसारे** द्रष्टव्यानि ।

२८—**भगवान्**

ऐश्वर्यस्य समग्रस्य ज्ञानस्य यशस श्रिय ।
वैराग्यस्य च धर्मस्य षण्णा भग इतीङ्गना ॥

इति स्मृतानि भगानि विद्यन्तेऽस्मिन्निति भगवान् ।

२९—**खचरः** हार्दाकाशचारी ।

'दहरोऽस्मिन्नन्तराकाशस्तस्मिन्यन्दतस्तदन्वेष्टव्यं शम्भुराकाशमध्य' इति श्रुतिप्रसिद्ध । चरेष्ट ।

३०—**गोचरः** गोषु इन्द्रियेषु विषयतया चरतीति वा गोभि करणैर्वा चरति विषयान् भुंक्त इति वा गोचर । सर्वात्मत्वात्सर्वेन्द्रियगम्य इन्द्रियद्वारा विषयभुगिति वाऽर्थ ।

३१—अर्दयति जनं पापिन पीडयति कालान्तकरूपेणेति **अर्दनः** । नन्द्यादित्यु ॥ ३३ ॥

३२—**अभिवाद्यः** सर्वेषा नमस्कार्य स्तुत्यो वा ।

३३—महत् सृष्टयादिक कर्मास्येति **महाकर्मा** ।

३४—तप एव स्व धन तद्वान् **तपस्वी** ।

३५—भूतानि खादीनि भावयति संकल्पमात्रेण सृजतीति **भूतभावनः** ।

३६—**उन्मत्तवेषप्रच्छन्नः** उन्मत्तवेषेण दिग्वासस्त्वादिरूपेण प्रच्छन्नो दुर्ज्ञेय ।

३७—लोका स्थानानि प्रजास्तत्र निवसन्तश्चेतनाः सर्वासा लोकप्रजाना पति स्वामी [**सर्वलोकप्रजापतिः** ।]

महारूपो महाकायो वृषरूपो महायशाः ।
महात्मा सर्वभूतात्मा विश्वरूपो महाहनुः ३५
लोकपालोऽन्तर्हितात्मा प्रसादो हयगर्दभिः ।
पवित्रं च महांश्चैव नियमो नियमाश्रितः ॥३६
सर्वकर्मा स्वयंभूत आदिरादिकरो निधिः ।
सहस्राक्षो विशालाक्षः सोमो नक्षत्रसाधकः
चन्द्रः सूर्यः शनिः केतुर्ग्रहो ग्रहपतिर्वरः ।
अत्रिरत्र्या नमस्कर्ता मृगबाणार्पणोऽनघः ३८
महातपा घोरतपा अदीनो दीनसाधकः ।

३८—महत् अपरिच्छेद्य रूपमस्य स **महारूपः** ।

३९— महान् काय स्थूल रूप वैराजं यस्य स **महाकायः** ।

४०—वृषो धर्मस्तद्रूपो **वृषरूपः** ।

४१—महच्च तद्यशश्च **महायशाः** ' तस्य नाम महद्यश ' इति श्रुते परमेश्वर ।

४२—**महात्मा** महामना ।

४३—सर्वाणि भूतानि आत्मा मन संकल्पमात्र यस्य स **सर्वभूतात्मा** तदीक्षणमात्रत्वात्सर्वस्य ।

४४—विश्वं रूपमस्य विश्वस्मिन् रूप्यते प्रकटी भवतीति वा **विश्वरूपः** ।

४५—**महाहनुः** महत्यौ विश्वग्राससमर्थे हनू अधरोत्तरे मुखफलके यस्य स महाहनु ॥ ३५ ॥

४६—**लोकपालः** इन्द्रादिरूप ।

४७—**अन्तर्हितात्मा** अविद्याकल्पितेन अहंकारादिना तिरोहिताखण्डैकरसस्वभाव सर्पेणेव रज्जु ।

४८—**प्रसादः** अभिरतिरानन्द इति यावत् ।

४९—**हयगर्दभिः** हय अश्व गर्दभी च स्वयोनित्वेन आचक्षते ता अश्वगर्दभ्य अश्वतर्य. ता रथस्थं वहन्त्येनमिति हयगर्दभि । क्विब्न्तात्कर्तरि क्विप् तत इञ् वृद्धयभावश्चार्ष । रुद्रो वा एष यदग्नि । अश्वतरीरथेनाग्निराजिमधावदिति श्रुतिभ्या अग्निरूपी देवोऽश्वतरीरथवाहन इति गम्यते ।

५०—**पवित्र** पवेरिव पवे समारवज्रपातात्त्रायत इति पवित्रम् ।

५१—अत एव **महान्** पूज्य ।

५२—**नियमः** शौचसन्तोषतप स्वाध्यायेश्वरप्रणिधानाख्यैर्नियमै प्राप्यते इति नियम ।

५३—[**नियमाश्रितः**] नियमैस्तैरेव आश्रित नारायणदक्षिणामूर्त्यादिरूपेण नियमानामाश्रयभूत इत्यर्थ ॥३६॥

५४—**सर्वकर्मा** सकलशिल्पाचार्यो विश्वकर्मा ।

५५—**स्वयंभूतः** नित्यसिद्ध ।

५६—अत एव **आदिः** सर्वस्मात्प्रथम ।

५७—**आदिकरः** हिरण्यगर्भस्रष्टा । ' स वै शरीरी प्रथम ' इति श्रुतेस्तस्मादित्वम् ।

५८—**निधिः** पद्मशंखादिरूपोऽक्षयैश्वर्य इत्यर्थ ।

५९—**सहस्राक्षः** अनन्तकरचरणादिमान् 'सर्वतपाणिपाद तत्सर्वतोऽक्षिशिरोमुखम् ' इत्यादिशास्त्रात् **देवेन्द्रो** वा सर्वस्य तदभिन्नत्वात् ब्रह्मैवेदं सर्वमित्यादिश्रुते ।

६०—विशालानि अतीतादिप्रकाशकत्वेन विपुलान्यक्षाणि इन्द्रियाणि यस्य स **विशालाक्षः** ।

६१—**सोमः** चद्र लतारूप याज्ञियं हविर्वा यत्पुरुषेण हविषेति तस्यैव हविष्ट्वदर्शनात् ।

६२—**नक्षत्रसाधकः** सुकृता वा एतानि ज्योतींषि यन्नक्षत्राणीति श्रुतेराकाशे दीप्यमानानि शरीराणि नक्षत्राणि तेषा साधक । इष्टादिकारिणा सोमलोके दिव्यशरीरलाभस्य दर्शनात् ॥ ३७ ॥

६३—**चंद्रः** ।

६४—**सूर्यः** ।

६५—**शनिः** ।

६६—**केतुः** च प्रसिद्ध ।

६७—चद्रार्कौ गृह्णातीति **ग्रहो** राहु ।

६८—ग्रहाणा पति [**ग्रहपतिः**] क्रूरत्वात् मगल ।

६९—**वरो** वरणीय पूज्यो बृहस्पति स एव शुक्र । बृहस्पतिर्हि शुक्रो भूत्वेति मैत्रायणीयश्रुतौ शुक्रस्य बृहस्पत्यवतारत्वश्रवणात् ।

७०— **अत्रिः** अत्रिगोत्रापत्यत्वाद्बुध तेन सर्वग्रहस्वरूपीत्यर्थ ।

७१—**अत्र्याः** अत्रिपत्न्या अनसूयाया **नमस्कर्ता** दत्तदुर्वासोरूपेण तत्पुत्रत्वात् ।

७२—**मृगबाणार्पणः** मृगरूपवारिणि यज्ञे बाण अर्पयतीति तथा ।

७३—**अनघः** यज्ञोऽपि निष्पाप तेजीयस्त्वात्स्वतत्रत्वाच्च ॥ ३८ ॥

७४—महत् विश्वसृक्षमं तप आलोचन यस्य स **महातपाः** स ऐक्षत लोकानुसृजा इति स इमाँल्लोकानसृजतेति श्रुते ।

७५—घोरं विश्वसंहारक्षम तपो यस्येति **घोरतपाः** यो ह्येव प्रभव स एवाप्यय इति श्रुते ।

७६—**अदीनः** महामना सुग्रीवबिभीषणादिभ्यः प्रणतिमात्रेण राज्यप्रद ।

७७—**दीनसाधकः** दीनाना शरणागताना इष्टसाधक ।

संवत्सरकरो मन्त्रः प्रमाणं परमं तपः ॥ ३९
योगी योज्यो महाबीजो महारेता महाबलः।
सुवर्णरेताः सर्वज्ञः सुबीजो बीजवाहनः ॥४०
दशबाहुस्त्वनिमिषो नीलकण्ठ उमापतिः।
विश्वरूपः स्वयं श्रेष्ठो बलवीरो बलो गणः ४१
गणकर्ता गणपतिर्दिग्वासाः काम एव च।
मन्त्रवित्परमो मन्त्रः सर्वभावकरो हरः ४२
कमण्डलुधरो धन्वी बाणहस्तः कपालवान्

७८—सवत्सरस्य कर कर्ता [**संवत्सरकरः**] कालचक्रप्रवर्तको ध्रुवादिज्योतिर्गणरूप ।

७९—**मंत्रः** मननात्त्रायत इति प्रणवादिरूप ।

८०—**प्रमाणं** वेदशास्त्रादिरूप ।

८१—**परमं तपः** अय तु परमो धर्मो यद्योगेना-मदर्शनामिति **याज्ञवल्क्योक्तो** धर्म ॥ ३९ ॥

८२—**योगी** योगनिष्ठ ।

८३—**योज्यः** योगे ब्रह्मणि प्रविलापनीय ।

८४—**महाबीजः** कारणस्यापि कारणम् ।

८५—**महारेताः** महत् जडानृतस्यापि अव्यक्तस्य स्फूर्तिसत्ताप्रदं रेत प्रतिबिंबो यस्य स महारेता ।

८६—अत एव **महाबल** उत्कृष्टसामर्थ्य ।

८७—**सुवर्णरेताः**

अप एव ससर्जाग्रे तासु वीर्यमवासृजत्
तदण्डमभवद्धैमं सहस्रांशुसमप्रभमिति ।

स्कादात् हिरण्मयब्रह्माडस्रष्टा अग्निरूपेण सुवर्णरेता एव वा।

८८—**सर्वज्ञः** मायावृत्त्या सर्वं जानन् सर्वज्ञासौ ज्ञश्चेति वा ।

८९—**सुबीज** सुष्ठु अविकारी बीजभूत सर्वकारण भवतीत्यर्थ ।

९०—**बीजवाहन** बीज अविद्याकामकर्मात्मकं तदेव वाहनं इहलोकपरलोके सचारार्थं यस्येति तथा यथोक्त—

'आत्मान रथिनं विद्धि शरीरं रथमेव तु' इति । शरीरपदमत्राव्यक्तपरमिति सिद्धान्त ॥ ४० ॥

९१—**दशबाहुः** स्पष्टम् ।

९२—**अनिमिषः** न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यतेऽविनाशित्वादिति श्रुते क्षणमपि दृग्लोपहीन ।

९३—**नीलकण्ठः** त्रैलोक्यसहारक्षमस्य हालाहलस्य कठे धारणान्नीलकण्ठ परमकारुणिक ।

९४—अत एव **उमापतिः** उमा हैमवतीति केनोपनिषत्प्रसिद्धा ब्रह्मविद्या उमा तस्या पति प्रदाता पक्षे पार्वतीश ।

९५—विश्वानि रूपाणि यस्माज्जायन्ते स **विश्वरूपः** ।

९६—**स्वयश्रेष्ठः** स्वय अनागन्तुक श्रेष्ठत्व प्रशस्यतमत्वं यस्य स तथा ।

९७—**बलवीरः** बलेन सामर्थ्येन वीरो विक्रान्तः त्रिपुरपातनाद्यनन्यसाध्यकर्मकर्ता ।

९८—**बलः** नि सामर्थ्य चेतनप्रयुक्ति विना चलनाक्षम गण्यते सख्यायत इति गणस्तत्त्वसमूह पञ्चविंशतिजडतत्वात्मेत्यर्थ । स्वय तु षड्विंश तत्त्वानि च साख्यसप्तत्या अव्यक्तं महान् अहंकार पञ्चतन्मात्राणि एकादशेंद्रियाणि पञ्चमहाभूतानि पञ्चविंशो भोक्तेति ॥ ४१ ॥

९९—'वभूतस्यापि गणस्य कर्ता पतिर्नियन्ता चेति **गणकर्ता** ।

१००—**गणपतिः** च उच्यते ।

इति प्रथम शतम् ।

१०१—**दिग्वासाः** दारुकावने मुनिपत्नीमोहनार्थं नग्नत्वं धृतमिति ज्ञेयं वस्तुतस्तु दिशा अनन्तानामपि वास इव वास अच्छादक तथा च श्रुति ईशावास्यमिद सर्वं यत्किंच जगत्या जगदिति । ईशा ईश्वरेणावास्यमाच्छादनीयमिति ।

२—**कामः** स्मरोऽभिलाषो वा तद्रूप ।

३—मन्त्रान् इषेत्वादीन् पाठतोऽर्थतश्च वेत्तीति वा तैर्वित् वेदनमस्येति वा **मंत्रवित्** यस्य ज्ञानमय तप नावेदविन्मनुते त बृहतामिति श्रुतिभ्याम् ।

४—**परमो मन्त्रः** आत्मतत्त्वालोचनरूपो विचार ।

५—तस्य अध्यारोपापवादात्मकत्वात्तदनुगुण नामद्वय **सर्वभावकरः** जगत्कारणमित्यर्थ ।

६—**हरः** तत्प्रविलापनस्थान सर्वभावन हर इति च पूर्व कालरूपेण सर्वकर्तृत्वसहर्तृत्वे उक्ते इदानीं तत्त्वदृष्ट्येति भेद । तथा हि चतुर्विध प्रलय प्राकृतो ब्रह्मावसाने महदन्ताना कार्याणा नाश । दैनदिनो ब्रह्मादिनावसाने त्रैलोक्यनाश । नित्योऽस्मदादिसुषुप्तौ सर्वनाश । एते त्रय. सबीजा इति उत्पत्तिमन्त आत्यन्तिकस्तु तत्त्वज्ञानेन सकारणस्य कार्यस्य नाश पुनरुत्पत्तिहीनो मोक्षाख्य इति शास्त्रप्रसिद्धि ॥ ४२ ॥

७—दशबाहुरित्युक्ताना वाहूनामायुधान्याह **कमंडलुधरः** ।

८—**धन्वी** धनुष्मान् ।

९—**बाणहस्तः** ।

११०—**कपालवान्** ब्रह्मण शिरश्छित्वा तत्कपाल धारयतीत्यर्थ ।

अशनी शतघ्नी खड्गी पट्टिशी चायुधी महान्
स्रुवहस्तः सुरूपश्च तेजस्तेजस्करो निधिः।
उष्णीषी च सुवक्त्रश्च उदग्रो विनतस्तथा ४४
दीर्घश्च हरिकेशश्च सुतीर्थः कृष्ण एव च।
शृगालरूपः सिद्धार्थो मुण्डः सर्वशुभङ्करः ४५

११—अशनिर्वज्रं तद्वान् [**अशनी**]।
१२—**शतघ्नी** शक्तिस्तद्वान्।
१३—उभयत्र व्रीह्यादिभ्यश्चेति मत्वर्थीय इनि **खड्गी**
१४—पट्टिश खड्गविशेषस्तद्वान् [**पट्टिशी**]।
१५—आयुधं स्वस्य असाधारण शूल तद्वान् [**आयुधी**] शूलीत्यर्थ।
१६—**महान्** पूज्य ॥ ४३ ॥
१७—स्रुवो यज्ञपात्रं तद्धस्त [**स्रुवहस्तः**]।
१८—**सुरूपः** शोभनरूप।
१९—**तेजः** तेजस्वी।
२०—**तेजस्करो निधिः** भक्तानां कान्तिप्रदो निधिरिव निधिरनुच्छेद्य।
२१—**उष्णीषी** शिरोवेष्टनवान्।
२२—**सुवक्त्रः**।
२३—**उदग्रः** ऊर्जितरूप।
२४—**विनतः** विनयवान्। ॥ ४४ ॥
२५—**दीर्घः** अत्युच्च।
२६—**हरिकेशः** हरय इन्द्रियाण्येव केशा इव केशा रश्मयो यस्य स हरिकेश इन्द्रियद्वारा तत्तदर्थप्रकाशकर्ता यद्वा हरिश्च कश्च ईशश्च तेषा समाहार त्रिमूर्तिरित्यर्थ।
२७—शोभनश्चासौ तीर्थं च **सुतीर्थः** महागुरु। क्लेशकर्मविपाकाशयैरपरामृष्ट पुरुषविशेष ईश्वरस्तस्य वाचक प्रणव स पूर्वेषामपि गुरुरिति पतञ्जलिस्मरणात्।
२८—**कृष्णः**।
कृषिर्भूवाचक शब्दो णश्च निर्वृतिवाचक।
तयोरैक्यं परं ब्रह्म कृष्ण इत्याभिधीयते ॥
इति श्रुतेरानन्दसन्मात्र इत्यर्थ। ब्रह्मोत्तरखण्डे वा गोपशिशु प्रति महादेवेन तवान्वये सप्तमोऽह भविष्यामीति वरदानान्महादेवस्यैवावतार कृष्ण इत्यवगमात्।
२९—**शृगालरूपः** वणिजाऽवमानितं ब्राह्मण प्रायोपविष्ट सान्त्वयितुमिन्द्रेणैतद्रूप धृतामिति मोक्षधर्मेप्याख्यायते तेन शृगालरूप इन्द्रस्तदभिन्न इत्यर्थ।
३०—**सिद्धार्थः** सिद्धा एव न तु साध्या अर्था अर्थनीया पदार्था यस्य।
३१—**मुण्डः** परिव्राट्।
३२—अत एव **सर्वशुभङ्करः** सर्वभूताभयप्रद ॥ ४५ ॥

अजश्च बहुरूपश्च गन्धधारी कपर्द्यपि।
ऊर्ध्वरेता ऊर्ध्वलिङ्ग ऊर्ध्वशायी नभःस्थलः ॥
त्रिजटी चीरवासाश्च रुद्रः सेनापतिर्विभुः।
अहश्चरो नक्तंचरस्तिग्ममन्युः सुवर्चसः ॥ ४७

३३—**अजः** अजात ब्रह्मादिष्वजन्व आपेक्षिकं देवेष्वमरत्ववत्
'हिरण्यगर्भ समवर्ततात्रे भूतस्य जात पतिरेक आसीत्।
विष्णुरित्थापरममस्य विद्वान् जातो बृहन्नभिपाति तृतीयम्' इति ब्रह्मविष्ण्वादिषु जात इति विशेषणात्। अजात इत्येनं कश्चिद्वीरु प्रपद्यते रुद्र यत्ते दक्षिणं मुख तेन मा पाहीति रुद्रे एवाजातत्वदर्शनात्।
३४—**बहुरूपः** स्पष्टम्।
३५—**गन्धधारी** कुकुमकस्तूर्यादिसुरभिद्रव्यधर्ता।
३६—**कपर्दी** क जल पिबतीति कप ऋति सौत्रो धातु स्पर्धायामैश्वर्ये चास्ति ऋत्स्पर्धनैश्वर्ययोरिति बोपदेवः अस्मात् भावे क्विप् कृतं ऐश्वर्य ददातीति ऋद कपश्चासौ ऋदश्चेति समास आद्गुण कपर्द महादेवस्य हि जटाजूटेन स्वर्गात्पतन्ती गङ्गा प्रथम पीता पश्चाद्भगीरथप्रार्थनया तस्या निर्गमनसामर्थ्य च दत्तमत स कपर्द तद्वान् महेश्वर कपर्दी।
३७—**ऊर्ध्वरेताः** अविप्लुतब्रह्मचर्य।
३८—तत्र हेतु **ऊर्ध्वलिङ्गः** अधोलिङ्गो हि रेत सिञ्चति न तूर्ध्वलिङ्ग।
३९—अत्रापि हेतु **ऊर्ध्वशायी** उत्तानशय।
४०—एतेन नामत्रयेण उमया शिवो न ग्रस्तो न च स्पृष्ट यत असङ्ग इत्यर्थत्रय दर्शितम् एव। सत्यपि नभ एव आकाशशब्दिता शक्तिरेव स्थल आवासो यस्य स **नभःस्थलः** यथोक्तमार्याभियुक्तै—

शक्ति शरीरमविदेवतमन्तरात्मा
ज्ञान क्रिया करणमासनजालमिच्छा।
ऐश्वर्यमायतनमावरणानि च त्व
किं किं न यद्भवसि देवि शशाङ्कमौले ॥इति ॥४६॥

४१—**त्रिजटी**।
४२—**चीरवासाः** स्पष्टे द्वे।
४३—**रुद्रः** प्राणा वाव रुद्रा एते हीदं सर्वं रोदयन्तीति श्रुते सर्वेषा प्राणरूप।
४४—**सेनापतिः**।
४५—**विभुः** व्यापी।
४६—**अहश्चरः** देवादि।
४७—**नक्तंचरः** राक्षसादिस्तदुभयरूपः।
४८—**तिग्ममन्युः** तीक्ष्णक्रोध
४९—**सुवर्चसः** सुतरा वर्चोऽध्ययनतपआदिज तेजो यस्मिन् समासान्तोऽच् आर्ष ॥ ४७ ॥

गजहा दैत्यहा कालो लोकधाता गुणाकरः ।
सिंहशार्दूलरूपश्च आर्द्रचर्माम्बरावृतः ॥ ४८
कालयोगी महानादः सर्वकामश्चतुष्पथः ।
निशाचरः प्रेतचारी भूतचारी महेश्वरः ॥ ४९
बहुभूतो बहुधरः स्वर्भानुरमितो गतिः ।
नृत्यप्रियो नित्यनर्तो नर्तकः सर्वलालसः ॥५०

घोरो महातपाः पाशो नित्यो गिरिरुहो नभः
सहस्रहस्तो विजयो व्यवसायो ह्यतंद्रितः॥५१
अधर्षणो धर्षणात्मा यज्ञहा कामनाशकः ।
दक्षयागापहारी च सुसहो मध्यमस्तथा ॥ ५२
तेजोपहारी बलहा मुदितोऽर्थो जितोऽवरः

५०—**गजहा**

वाराणस्या पुरा यातो गजरूपी महासुर ।
जघ्ने तं कुञ्जरं भीममदृश्यमपि शङ्कर ॥

इति स्कान्दे उपाख्यानात् गजासुरहन्ता ।

५१—**दैत्यहा** ।

५२—**कालः** मृत्यु संवत्सरादिर्वा ।

५३—**लोकधाता** लोकानामीश्वर ।

५४—गुणाना दीनदयालुत्वज्ञानैश्वर्यादीनामाकर खनि [**गुणाकरः**] ।

५५—**सिंहशार्दूलरूपः** सर्वहिंस्रपशुरूप ।

५६—आर्द्रचर्म गजकृत्तिस्तदेवाम्बरं तेनावृत [**आर्द्रचर्माम्बरावृतः**] ॥ ४८ ॥

५७—कालवद्भको योगी **कालयोगी** ।

५८—**महानादः** अनाहतध्वनिरूप स च हंसोपनिषत्प्रसिद्ध ।

५९—सर्वे कामा विषया अस्मिन्निति **सर्वकामः** अस्मिन् सर्वे कामा समाहिता इति श्रुति ।

६०—**चतुष्पथः** चत्वारः उपासनार्थं पन्थानोऽस्य स तथा ते च विश्वतैजसप्राज्ञशिवध्यानरूपा ।

६१—**निशाचरः** वेतालादि ।

६२—प्रेतैर्भूतैश्च सह चरतीति **प्रेतचारी** ।

६३—**भूतचारी** ।

६४—**महेश्वरः** इन्द्रादिभ्य ईश्वरेभ्यो महान् ॥४९॥

६५—**बहुभूतः** सच्च त्यच्चाभवदिति सत्य चानृतं च सत्यमभवदित्यन्तेन श्रुतमस्य बहुभवनम् ।

६६—**बहुधरः** महत प्रपञ्चस्य धर्ता ।

६७—**स्वर्भानुः** मूलाज्ञानरूपस्तम शब्दितो राहु ।

६८—**अमितः** अनन्त भूमेत्यर्थ ।

६९—**गतिः** मुक्तप्राप्य ।

७०—**नृत्यप्रियः** ताण्डवेश्वराश्चिदम्बरमूर्ति ।

७१—नित्य सन्तत नर्तो नर्तन यस्य **नित्यनर्तः** ।

७२—**नर्तकः** नर्तयिता ।

७३—सर्वेषु लालसा प्रीतिरस्य [**सर्वलालसः**]विश्वबन्धुरित्यर्थ ॥ ५० ॥

७४—**घोरः** शिवस्य द्वे तन्वौ घोराऽन्या क्षुत्तृषादिरघोराऽन्या सन्तोषादिस्तद्रूपत्वाद् घोर ।

७५—**महातपाः** महत्सृष्टिसंहारक्षम तप आलोचनं यस्य ।

७६—पाशयति स्वमायया बध्नातीति **पाशः** ।

७७—**नित्यः** ध्वंसरहित ।

७८—**गिरिरुहः** पर्वतारूढ कैलासवासीत्यर्थ ।

७९—**नभः** व्योमवदसङ्ग ।

८०—**सहस्रहस्तः** ।

८१—**विजयः** ।

८२—**व्यवसायो** निश्चय उद्योगो वा जयहेतु ।

८३—अत एव **तन्द्रितः** तन्द्रा तमोमयी वृत्ति प्रवृत्तिनिरोधिनी तद्रहित अनिन्दित इति पाठे व्यवसायस्य विशेषणम् ॥ ५१ ॥

८४—**अधर्षणः** अप्रकम्य ।

८५—**धर्षणात्मा** भयरूप ।

८६—**यज्ञहा** बलिं यज्ञञ्च बौद्धावतारत्वेन वा यज्ञघ्न विश्व भूतं भुवन चित्र बहुधा जात जायमान च यत् सर्वो ह्येष रुद्रस्तस्मै रुद्राय नमो अस्त्विति मन्त्रवर्णेन विष्ण्वाद्यनन्यत्वाच्छिवस्य तद्विवक्षयेदमुक्तम् ।

८७—**कामनाशकः** स्मरस्य भक्तकामप्रदत्वेन इच्छाया वा नाशक ।

८८—**दक्षयागापहारी** स्पष्टम् ।

८९—**सुसहः** सौम्य ।

९०—**मध्यम** ईषत्सौम्य ॥ ५२ ॥

९१—**तेजोपहारी** अतिक्रूर ।

९२—**बलहा** इन्द्ररूपेण बलनामानं दैत्य हन्तीति तथा ।

९३—**मुदितः** कारणरूपेण नित्यमानन्दयुक्त ।

९४—**अर्थः** धनरूपेणार्थनीय ।

९५—**अजितः** सग्रामादौ कृष्णेन तु बाणासुरयुद्धे शिवाज्ञयैव शिवो जितो न स्वबलेन यथा भीष्मेण कृष्ण स्वप्रतिज्ञा समर्थयताऽकृत कृत भक्तपारवश्यदर्शनाय तद्वत् एतच्च पुराणे प्रसिद्धम् ।

९६—**अवरः** नास्ति वरो वरणीयो यस्मादन्य इत्यवर ।

गंभीरघोषो गंभीरो गभीरबलवाहनः ॥ ५३
न्यग्रोधरूपो न्यग्रोधो वृक्षकर्णस्थितिर्विभुः ।
सुतीक्ष्णदशनश्चैव महाकायो महाननः ॥ ५४
विष्वक्सेनो हरिर्यज्ञः सयुगापीडवाहनः ।
तीक्ष्णतापश्च हर्यश्वः सहायः कर्मकालवित् ५५
विष्णुप्रसादितो यज्ञः समुद्रो वडवामुखः ।
हुताशनसहायश्च प्रशान्तात्मा हुताशनः ॥ ५६

९७—**गम्भीरघोषो** दुन्दुभिसमुद्रादिरूपेण ।

९८—**गम्भीरो** दुरवगाहतात्पर्यो वेदरूपेण ।

९९—गभीर अगाधं परैरनामादिततल बल सेना शारीर सामर्थ्य वा वाहन वृषभश्च धर्मरूपी यस्य स **गम्भीरबलवाहनः** ॥५३॥

२००—**न्यग्रोधरूपः** न्यक् नीचै रोहतीति ऊर्ध्वमूलो ह्यवाक् शाख एषोऽश्वत्थ सनातन इति श्रुतिप्रसिद्ध संसारवृक्ष ।

इति द्वितीयं शतकम् ।

१—**न्यग्रोधः** वटरूप वटानिकटवासी दक्षिणामूर्तिरूप इत्यर्थ मार्कंडेयदृष्टो वा एकार्णवस्थो वटस्तच्छायी बालकृष्णरूपी महाविष्णुर्वा ।

२-वृक्षस्य कर्ण इव कर्ण एकदेश पर्ण तत्र स्थितिर्यस्य स **वृक्षकर्णस्थितिः** वृक्षकल्पस्थितिरिति पाठे यथैकस्माद्बीजादेको वटस्ततोऽनन्तानि बीजानि तेभ्यस्तावन्तो वटा इति उत्तरोत्तरवृद्धिमत कार्यस्यानन्त्य तत्कल्पा तत ईषन्न्यूना स्थिति ससारवृक्षपालन यस्य स न्यूनत्व ज्ञानेन भर्जिते बीजे पुन प्ररोहासभवात् अभर्जिते च तस्यानिवार्यत्वादिति सूचयितुं कल्पप् । मार्कंण्डेयस्यापि एकार्णवे ब्रह्मण्येकदेशे संसारवटोऽल्पोऽयनन्तप्ररोहोस्तीति भगवता स्वमायारूपं वटबीजेन प्रदर्शितम् । अत्र शिवो महेश्वरश्चैव रुद्रो विष्णु पितामह । ससारबन्धु सर्वज्ञ परमात्मेति मुख्यत नामाष्टकमिदं तस्य प्रतिपादकमीशितुरिति शैवे । विष्णुपितामहयोरपि शिवादनन्यत्वात्तद्वाचिभिरपि शब्दै शिव एवाभिधीयत इति दर्शनात् हरिवंशे कैलासयात्राया—नामानि तव गोविंद यानि लोके महाति च । तान्येव मम नामानि नात्र कार्या विचारणेति शिववचनाच्च । सर्वस्मिन् पुराणे शिवपर्यायैर्विष्णुपर्यायैर्वा एक एव ईश्वरोऽभिधीयते शिवविष्णोर्भेदमुतमानुतमभावं च कल्पयत पाषण्डिन शिरसि पततु वज्रपात यथोक्त सूतसंहितायाम्—ब्रह्माणं केशवं विष्णु भेदभावेन मोहिता । पश्यन्त्येक न जानन्ति पाषण्डोपहता जना इति । अत एव माता धाता पितामह रुद्रो बहुशिरा बभ्रुरिति विष्णुनामसु ब्रह्मरुद्रनामानि पठ्यन्ते। तथा महादेवोऽव्ययो हरि , गणनाथ प्रजापतिरिति शिवनामसु विष्णुप्रजापतिनामानि इतरेषामितरत्र गौणमुख्यवृत्तिभेदेन प्रवृत्तिरिति कल्पनाया उदाहृतशैवस्कान्दवाक्यबाधितत्वेनानुत्थानात् । ' यो देवाना नामधा एक एव नामानि सर्वाणि यमाविशति । एक सन्त बहुधा कल्पयन्ति एकं सद्विप्रा बहुधा वदन्त्यग्नि यममातरिश्वानमाहु ' इत्याद्यागमबहिर्भूतत्वाच्चैते उपेक्ष्या एवेति दिक् । निपुणतरमुपपादितमेतदादिपर्वण्युपोद्घाते ।

३—**विभुः** विविधरूपेण हरिहरदुर्गागणेशार्काग्निवाय्वादिरूपेण भक्तानामनुग्रहाय भवतीति विभु ।

४—सुतीक्ष्णा अनेकब्रह्माडचणकचर्वणक्षमा दशना यस्य **सुतीक्ष्णदशनः** ।

५—**महाकायः** ।

६—**महानन** इति तदनुगुणे शरीरमुखे अनुवर्णिते ॥ ५४ ॥

७—विष्वक् विषु सर्वत अचति पलायन्ते यस्य प्रयाणोद्योगे दैत्याना सेना इति **विष्वक्सेनः** सर्वत. पूज्यते सेना यस्येति वा अचु गतिपूजनयोरिति धातु ।

८—**हरिः** गजेन्द्रमोक्षणे आपदं हरतीति हरि सर्वसहर्ता वा ।

९—**यज्ञः** सृष्टिबीजभूत तथा च श्रुति —
अग्नौ प्रास्ताहुति सम्यगादित्यमुपतिष्ठते ।
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं तत प्रजा इति ।

१०—पंयुगे सग्रामे आपीड इव आपीडो वज्रभूतं वाहन वृषरूप यस्य [**सयुगापीडवाहनः**] वृषरूपो ध्वज एव वाहनमपीत्यर्थ ।

११—**तीक्ष्णतापोऽग्नि** तदात्मा ।

१२—हरय अतिवेगवाहिन अश्वा यस्य स **हर्यश्वः** सूर्यस्तदात्मा ।

१३—**सहायः** जीवस्य सखा द्वा सुपर्णा सयुजा सखायेति मत्रवर्णात् ।

१४—कर्मणा दर्शादीना काल यथोक्त वेतीति **कर्मकालवित्** ॥ ५५ ॥

१५—विष्णुना प्रसादितश्चक्रलाभार्थमिति **विष्णुप्रसादितः** ।

१६—**यज्ञः** विष्णुरूपी, यज्ञो वै विष्णुरिति श्रुते ।

१७—**समुद्रः** ।

१८—**वडवामुख** वन्हिविशेषो य सामुद्रं जलं नित्यं शोषयति ।

१९—**हुताशनसहाय** वायु ।

२०—**प्रशान्तात्मा** निस्तरंगसागरस्वरूप ।

२१—**हुताशनः** अग्नि ॥ ५६ ॥

उग्रतेजा महातेजा जन्यो विजयकालवित् ।
ज्योतिषामयनं सिद्धिः सर्वविग्रह एव च ॥५७
शिखी मुंडी जटी ज्वाली मूर्तिजो मूर्द्धगो बली
वेणवी पणवी तालो खली कालकटंकटः ५८
नक्षत्रविग्रहमतिर्गुणबुद्धिर्लयोऽगमः ।
प्रजापतिर्विश्वबाहुर्विभागः सर्वगोऽमुखः ५९
विमोचनः सुसरणो हिरण्यकवचोद्भवः ।
मेद्रजो बलचारी च महीचारी स्रुतस्तथा ६०
सर्वतूर्यनिनादी च सर्वातोद्यपरिग्रहः ।
व्यालरूपो गुहावासी गुहो माली तरङ्गवित् ॥

२२—स एव **उग्रतेजाः** दु सहस्पर्श ।

२३—**महातेजाः** विश्वत प्रकाश ।

२४—जन्ये संग्रामे साधु **जन्यः** ।

२५—यतो **विजयकालवित्** तेन शूरोऽपि काल-ज्ञानाभावे पराजितो भवतीति गम्यते ।

२६—ज्योतिषा ग्रहनक्षत्राणामयनं गमनं वर्ण्यते तच्छास्त्रं **ज्योतिषामयनं** कालवित्कालरूपश्चेति नामद्वयार्थ ।

२७—**सिद्धिः** जयरूपा ।

२८—सर्वे कालादिकं विग्रहो देहो यस्य स **सर्व-विग्रहः** सन्धीति पाठे सन्धिविग्रहयानासनादिरूप ॥५७॥

२९—**शिखी** शिखावान् गृहस्थ ।

३०—**मुण्डी** तद्रहित संन्यासी । एतेन नैष्ठिकब्रह्म-चारिणोऽपि ग्रहणम्। दण्डीति पाठेपि पालाशं वैणव च दण्डं धारयतस्तावेव ।

३१—**जटी** जटावान् वानप्रस्थ ।

३२—**ज्वाली** ज्वालावान् अर्चिरादिमार्ग शिखि-प्रभृतीभि प्रार्थ्य ।

३३—मूर्तौ शरीरे जायते आविर्भवतीति **मूर्तिजः** ।

३४—**मूर्धगः** मूर्धानि सहस्रारे वा गच्छतीति मूर्धग ।

३५—**बली** बलवान् वलीति पाठे वलिमान् वृद्ध ।

३६—वेणुपणवतालाख्या वाद्यविशेषास्तद्वान् **वेणवी** ।

३७—**पणवी** ।

३८—**ताली** ।

३९—खल धान्यस्थान तद्वान् [**खली**] ।

४०—**कालकटंकटः** कालस्य यमस्य कटो वेष्टक आवरणमीश्वरीया माया तामपि कटत्यावृणोतीति कालकट-कट कटे वर्षावरणयोरिति धातु । शालेति पाठे वृक्षाणामा-वरको वायुस्तस्याप्यावरको व्योमरूपी ॥ ५८ ॥

४१—नक्षत्रविग्रह ग्रहतारादिशरीरं कालचक्रं तदनुसा-रिणी मतिर्यस्य स दैवज्ञो वा [**नक्षत्रविग्रहमतिः**]। पाठा-न्तरे गमयति चालयति वा नक्षत्रविग्रहगम मतिर्वा ।

४२—गुणेषु गुणकार्येषु विषयेषु बुद्धिर्यस्य [**गुण-बुद्धिः**] जीवरूपीत्यर्थ ।

४३—लीयतेऽस्मिन् सर्वमिति **लय** ईश्वर ।

४४ – **अगमः** अचञ्चल कूटस्थश्चिन्मात्र । यम इति पाठेऽपि तयोर्यमयितोऽयस्कान्ततुल्य स एव ।

४५—**प्रजापतिः** विराट् ।

४६—अत एव **विश्वबाहुः** विश्वेषा बाहव एव बाहवो यस्य स तथा ।

४७—**विभागः** विभज्यते पृथक् क्रियत इति व्यष्टि-कार्यरूप ।

४८—**सर्वगः** समष्टिकार्यरूप ।

४९—अत एव **अमुखः** भोगसाधनहीन अमो-क्षेति यावत् । सर्वतोमुख इति पाठे त्वेक नाम ॥ ५९ ॥

५०—**विमोचनः** ससारमोचक ।

५१—**सुसरणः** सुप्राप । सुशरण इति पाठे शोभनं शरणं रक्षितृत्वं यस्य अपुनरावृत्तिगृहमित्यर्थ ।

५२—हिरण्यकवच हरतीति हिरण्यं माया तद्विकारभूतं कवचमिव कवच आवरकं शरीरम्। हिरण्मयेन पात्रेण सत्य-स्यापिहित मुखमिति श्रुतेस्तत्र उद्भव आविर्भावो यस्य स **हिरण्यकवचोद्भवः** ।

५३—**मेद्रजः** मेद्रे लिङ्गे आविर्भवतीति मेद्रज ।

५४—**बलचारी** वनेचर शबर । देवा वै बले गाः पर्यपश्यन्निति ब्राह्मणाद्बलशब्दस्य वनवाचित्वम् ।

५५—महीं कृत्वा चरतीति **महीचारी** ।

५६—**स्रुतः** सर्वत्र गत प्राप्त , कर्मणि क्त ॥ ६० ॥

५७—**सर्वतूर्यनिनादी** स्पष्टम् ।

५८—**सर्वातोद्यपरिग्रहः** आतोद्या प्रतोदनार्हा जीवपशवस्ते एव सर्वे परिग्रह कुटुम्बं यस्य,पशुपतिरित्यर्थ ।

५९—**व्यालरूपः** शेषात्मा ।

६०—**गुहावासी** योगी जैगीषव्यादि ।

६१—**गुहः** कार्तिकेय ।

६२—**माली** वनमालाधारी ।

६३—**तरङ्गवित्** तरङ्गतुल्यानि विषयसुखानि विन्दति लभते इति तथा तरङ्गवित् ॥ ६१ ॥

त्रिदशस्त्रिकालधृक्कर्मसर्वबन्धविमोचनः ।
बंधनस्त्वसुरेंद्राणां युधि शत्रुविनाशनः ॥ ६२
सांख्यप्रसादो दुर्वासाः सर्वसाधुनिषेवितः ।
प्रस्कन्दनो विभागज्ञो अतुल्यो यज्ञभागवित्६३
सर्ववासः सर्वचारी दुर्वासा वासवोऽमरः ।
हैमो हेमकरोऽयज्ञः सर्वधारी धरोत्तमः ॥६४
लोहिताक्षो महाक्षश्च विजयाक्षो विशारदः
संग्रहो निग्रहः कर्ता सर्पचीरनिवासनः ॥ ६५
मुख्योऽमुख्यश्च देहश्च काहलिः सर्वकामदः ।
सर्वकालप्रसादश्च सुबलो बलरूपधृक् ॥ ६६

६४—**त्रिदशः** तिस्रो दशा जन्मस्थितिनाशा प्राणिना यस्मादिति ।

६५—त्रिकालजातं वस्तु धारयतीति **त्रिकालधृक्** । यथोक्तं—

अनागतमतीतं च भाविष्यत् स्थूलमप्यपि ।
तथा दूरमदूरं च निमेष कल्प इत्यपि ॥
चिदात्मनि स्थितान्येव पश्य मायाविजृम्भितमिति ।

६६—कर्माणि सञ्चितक्रियमाणानि बन्धाश्चाविद्याकामात्मका तेभ्यो मोचयतीति **कर्मसर्वबन्धविमोचनः** ।

६७—**बन्धनस्त्वसुरेन्द्राणा** वामनरूपेण बलेर्बन्धकर्ता बहुवचनं कल्पभेदाभिप्रायम् ।

६८—**युधि शत्रुविनाशनः** स्पष्टार्थम् ॥६२॥

६९—**साख्यप्रसादः** आत्मानात्मविवेक साख्यं तेनैव प्रसीदति ज्ञानैकलभ्य इत्यर्थ , अथवा साख्यज्ञानप्रदो दत्तात्रेय इत्यर्थ ।

७०—**दुर्वासाः** तस्यैव सोदर्यो रुद्राश ।

७१—**सर्वसाधुनिषेवितः** इति ब्राह्मणाना राजा सोम उक्त ।

७२—**प्रस्कन्दनः** ब्रह्मादीनामपि च्यावयिता। मन्ये त्वा च्यवनमच्युतानामिति मन्त्रवर्ण ।

७३—**विभागज्ञः** प्राणिना यथोचित तत्तत्कर्म फलाना विभाजक ।

७४—अत एव **अतुल्यः** न त्वत्समोऽस्त्यभ्याधिक कुतोऽन्य इति **गीतावचनात्** ।

७५—**यज्ञविभागवित्** यज्ञियाना हविषा विभागाभिज्ञ ॥ ६३ ॥

७६—सर्वत्र वासो वसतिस्थानमस्य **सर्ववासः** ।

७७—**सर्वचरी** ।

७८—**दुर्वासाः** दुस्थं आर्द्रगजकृत्तिरूपं वासो यस्य दुर्लभं वा वासो यस्य अनन्तपारत्वादिति दुर्वासा ।

७९—**वासवः** ।

८०—**अमरः** ।

८१—**हैमो** हिमस्याय समूहो हैमो हिमालयरूपी ।

८२—**हेमकरो** जाम्बूनदस्य सुवर्णस्य कर्ता जंबुद्वीपचिन्हभूतो जंबूवृक्ष , तस्य हि फलं प्रस्कन्नं सुवर्णत्वं भजतीत्युपाख्यायते पुराणेषु ।

८३—**अयज्ञः** निष्कर्मा ।

८४—अथ च **सर्वधारी** सकलकर्मफलधर्ता ।

८५—वगणा दिग्गजशेषकूर्मादीनामप्युत्तम [**धरोत्तमः**] अनन्याधार सन् तै सर्वै सहितस्य ब्रह्माडस्य धर्ता ॥ ६४ ॥

८६—**लोहिताक्षः** रक्तनेत्र ।

८७—महाति विश्वव्यापकानि अक्षाणि इद्रियाणि यस्य स **महाक्षः** ।

८८—विजयावह अक्षोपलक्षितो रथो यस्य स **विजयाक्षः** ।

८९—**विशारदः** पडित ।

९०—**संग्रहः** संगृह्णाति बाणादीन् दासान् स्वीकरोतीति सग्रह ।

९१—**निग्रहः** निगृह्णाति इन्द्रादीनुत्सिक्तान् दंडयतीति निग्रह ।

९२—अत एव **कर्ता** ।

९३—सर्पा एव चीरस्य वस्त्रस्य निवासनं विष्टम्भकं यस्य स **सर्पचीरनिवासनः** वसु स्तम्भेऽस्य रूपम् ॥ ६५ ॥

९४—**मुख्यः** परम ।

९५—**अमुख्यः** अवम , देवानामित्यर्थ अभिर्वै देवानामवमो विष्णु परमस्तदंतरेण सर्वा अन्या देवता इति ब्राह्मणात् सर्वदेवतामय इत्यर्थ ।

९६—**देहः** उपचित अत्यंतपुष्ट इति यावत् ।

९७—काहला वाद्यविशेषस्तद्वान् **काहलि** आर्षत्वादिञ् प्रत्यय देहारिरित्यपि पठन्ति ।

९८—**सर्वकामदः** ।

९९—**सर्वकालप्रसाद** ।

३००—**सुबलः** शोभन परपीडापहारि बलं सामर्थ्यं यस्य दयानिधिरित्यर्थ ।

इति तृतीयं शतकम् ।

—❀—

१—बलो बलरामस्तद्रूपधारी **बलरूपधृक्** बलं च रूप च तयोर्धर्ता वा ॥ ६६ ॥

सर्वकामवरश्चैव सर्वदः सर्वतोमुखः ।
आकाशनिर्विरूपश्च निपाती ह्यवशः खगः॥६७
रौद्ररूपोऽशुरादित्यो बहुरश्मिः सुवर्चसी ।
वसुवेगो महावेगो मनोवेगो निशाचरः ॥ ६८

सर्ववासी श्रियावासी उपदेशकरोऽकरः ।
मुनिरात्मनिरालोकः संभग्नश्च सहस्रदः ॥६९
पक्षी च पक्षरूपश्च अतिदीप्तो विशांपतिः ।
उन्मादो मदनः कामो ह्यश्वत्थोऽर्थकरो यशः

२—**सर्वकामवरः** सर्वेषां काम्यमानानां वर श्रेष्ठ मोक्ष इत्यर्थ ।

३—**सर्वदः** स्पष्टम् ।

४—**सर्वतोमुखः** इति सर्वत पाणिपादत्वादेरुपलक्षणम् ।

५—**आकाशनिर्विरूपश्च** आकाशादिव निर्गच्छंति विविधानि रूपाण्यस्मादिति स तथा । अनेन वायुरभ्रं विद्युत्स्तनयित्नुरशरीरीष्येतानि तद्यथैतान्यमुष्मादाकाशात्समुत्थाय परं ज्योतिरूपं संपद्यस्वेन रूपेणाभिनिष्पद्यन्त एवमेवैष संप्रसादोस्माच्छरीरात्समुत्थाय परं ज्योतिरूपं संपद्यस्वेन रूपेणाभिनिष्पद्यते स उत्तम· पुरुष इति श्रुतेरर्थो दर्शित , स च यथा आकाशतादात्म्यं प्राप्ता वाय्वादयोऽशरीरा अविभाव्यमानस्वरूपा संतोऽपि प्रावृडारम्भे तत· पृथग्भूय स्वेन रूपेणोपसंपन्ना भूत्वा निर्वाणदीपवत् परं ज्योतिरात्मनाभिनिष्पन्ना भवन्ति एव देहतादात्म्यापन्न संप्रसादाख्यो जीवो देहात्पृथगविभाव्यमानस्वरूपोऽपि ध्यानकाले देहातस्वदेहाद्व्युत्थाय स्वेनापहतपाप्मादिगुणाष्टकयुक्तेन रूपेणाभिनिष्पन्नस्तद्वदेव परं ज्योतिर्निर्विशेषं ब्रह्माभिमुख्येन प्रत्यगभेदेन निष्पद्यत इति ।

६—देहगर्ते निपतितुं तत्तादात्म्यं प्राप्तु शीलमस्येति **निपाती** ।

७—अत एव **अवशः** देहसंबधादपरिहार्यदु खादिसंबंध ।

८—**खगः** हार्दाकाशग शुद्धेन रूपेणेत्यर्थ , हार्दाकाश एव तावदसंगस्तदन्तर्गतस्तु सुतरामसंग सन् निपाती अवशश्च भवत्यहो मोहस्य माहात्म्यमपारमिति भाव ॥ ६७ ॥

९—**रौद्ररूपो** महाभैरव ।

१०—**अंशुः** देवताभेद ।

११—**आदित्यः** तत्सहचारी भगापरनामा देव , तस्या अंशुश्च भगश्चाजायेतामिति ब्राह्मणात् ।

१२—**बहुरश्मिः** सूर्य एव ।

१३—शोभनं वर्चस्तेज सुवर्चसं तद्वान् **सुवर्चसी** ।

१४—**वसुवेगः** वासयति स्थापयत्येतत्सर्वं आत्मनीति वसुर्वायु वायुर्ह्येवैतान्सर्वान्वृङ्क्ते इति श्रुते तस्य वेग इव वेगो यस्य स तथा ।

१५—**महावेगः** ततोऽप्यधिकवेग ।

१६—**मनोवेगः** मनसोऽप्यधिकवेग मनसो जवीय इति मंत्रवर्णात् ।

१७—**निशाचरः** निशेव निशा अविद्या तया चरति विषयान् भुंक्ते स तथा ॥ ६८ ॥

१८—सर्वेषु शरीरेषु वसतीति **सर्ववासी** ।

१९—श्रिया सह वसतीति **श्रियावासी** अलुक्समास· श्रीरत्र—ऋच सामानि यजूंषि सा हि श्रीरमृता सतामिति श्रुत्युक्तविद्या ग्राह्या ।

२०—अत एव **उपदेशकरः** ।

२१—**अकरः** उपदेशमपि तूष्णीभावेनास्थानं यथोक्तं—

चित्रं वटतरोर्मूले वृद्धा शिष्या गुरुर्युवा ।
गुरोस्तु मौनं व्याख्यान शिष्यास्तु च्छिन्नसंशया ॥

इति । बाष्कलिना च वाध्व पृष्ट· पुन पुनस्तूष्णीभूत एव स्थित्वा तृतीये प्रश्ने प्राह—ब्रूम खलु त्वं तु न विजानास्युपशातोऽयमात्मेति ।

२२—अकरत्वादेव **मुनिः** मौनवान् ।

२३—आत्मनि जीवे निश्चित्य देहादुपाधेर्वा निर्गत्य आलोचयतीति **आत्मनिरालोकः** ।

२४—**संभग्नः** सम्यक् सेवित , भज सेवायामित्यस्य रूप न तु भंजे ।

२५—अत एव **सहस्रदः** अनन्तस्य धनादेर्दाता ॥ ६९ ॥

२६—**पक्षी** गरुत्मान् ।

२७—**पक्षरूपः** मित्ररूपेण सहाय ।

२८—**अतिदीप्तः** कोटिसूर्यप्रतीकाश शत्रुतेजोभिभावक ।

२९—अत एव सर्वासा विशा प्रजाना पति [**विशांपतिः**] सार्वभौम ।

३०—उन्मादयतीति **उन्मादः** मोहक ।

३१—यत **मदनः** अनङ्ग ।

३२—**कामः** काम्यमान स्त्र्यादिविषयरूप ।

३३—**अश्वत्थः** संसारवृक्ष कामप्रदो वा वृक्ष एव ।

३४—**अर्थकरः** धनादिप्रद· ।

३५—**यश** कीर्तिप्रदश्च ॥ ७० ॥

वामदेवश्च वामश्च प्राग्दक्षिणश्च वामनः ।
सिद्धयोगी महर्षिश्च सिद्धार्थः सिद्धसाधकः
भिक्षुश्च भिक्षुरूपश्च विपणो मृदुरव्ययः ।
महासेनो विशाखश्च षष्टिभागो गवां पतिः ७२
वज्रहस्तश्च विष्कम्भी चमूस्तम्भन एव च ।
वृत्तावृत्तकरस्तालो मधुर्मधुकलोचनः ॥ ७३
वाचस्पत्यो वाजसनो नित्यमाश्रमपूजितः ।
ब्रह्मचारी लोकचारी सर्वचारी विचारवित्
ईशान ईश्वरः कालो निशाचारी पिनाकवान्

३६—**वामदेवः** वामाना कर्मफलाना देव इव देवो राजा विभाजक ।

३७—**वामः** कर्मफलरूप विषयसंपर्कजानन्दमात्रस्वरूप इत्यर्थ ।

३८—**प्राक्** सर्वेषामाद्य ।

३९—**दक्षिणः** त्रैलोक्याक्रमणसमर्थ ।

४०—**वामनः** बलिबन्धनकर्ता ।

४१—**सिद्धयोगी** सनत्कुमारादि ।

४२—**महर्षिः** वसिष्ठादि ।

४३—**सिद्धार्थः** ऋषभदत्तात्रेयादि ।

४४—सिद्धश्चासौ साधकश्च [**सिद्धसाधकः**] ज्ञानोत्तरं संन्यासमभीप्सन् याज्ञवल्क्यादिर्विद्वत्संन्यासी ॥ ७१ ॥

४५—**भिक्षुः** लिङ्गधारी हंस ।

४६—**भिक्षुरूपः** अलिङ्ग परमहंस ।

४७—अत एव **विपणो** निर्व्यवहार दण्डादिरहितः ।

४८—**मृदुः** सर्वभूताभयदाता ।

४९—**अव्ययः** निर्विकार मानापमानादिप्राप्तावपि हर्षविषादशून्य ।

५०—**महासेनः** कार्तिकेयो देवसेनापति ।

५१—**विशाखः** तत एव इन्द्रेण वज्रप्रहारे कृते जातस्तत्सहाय ।

५२—**षष्टिभागः** षष्टिस्तत्त्वानि यस्य भागो भोज्यं अतिथिभाग इतिवत् स षष्टिभाग तानि च जागरितस्थान इत्यादिना माण्डूक्यादौ प्रसिद्धानि यथा जाग्रदवस्था बहिर्मुख प्रज्ञानं सप्त शब्दादय पञ्च मन्तव्यबोद्धव्याभ्या सहिता स्वसङ्कल्पोत्था विषया एकोनत्रिंशतिभोगद्वाराणि दशेन्द्रियाणि पञ्चप्राणमनोबुद्धयहङ्काराचित्तानि चेति स्थूलं भोग्यं शब्दाद्याश्रयभूतामिति एकोनत्रिंशत् । तथा स्वप्नावस्था अंतर्मुखं प्रज्ञानं वासनामयाश्च इतरे सर्वे सूक्ष्मभोग्याता एकोनत्रिंशदेव । तथा सुषुप्तं स्थानं चेतश्च सूक्ष्मतरं मुखं इति षष्टि भोग्यवर्ग यस्तु भोक्ता स साक्षी आनन्दरूपोऽस्यामवस्थाया प्रत्यगानन्दसूक्ष्माभिश्चेतोवृत्तिभिर्भुक्ते इति षष्टिभाग ।

५३—[**गवां पतिः**] गवामिन्द्रियाणा पतिश्चालक ॥ ७२ ॥

५४—**वज्रहस्तः** पर्वतभेत्ता शक्र ।

५५—विष्कम्भो विस्तारस्तद्वान् **विष्कम्भी** ।

५६—**चमूस्तम्भनो** दैत्यसेनास्तम्भनकृत् ।

५७—वृत्त युद्धे रथेन मण्डलाना करणं आवृतं परसना भित्त्वा पुनरक्षतेन आगमन तयो कर कर्ता **वृत्तावृत्तकरः** । ऋतावृत्तेति पाठे निष्कपटमावृत्तकर्ता ।

५८—**तालः** ससारसिन्धोस्तलं आधारं स्थानं वेत्तीति ताल शुद्धब्रह्मवित् ।

५९—**मधुः** वसन्त ।

६०—मधुक कोयष्टिकाख्य पक्षी तद्वल्लोचने यस्य स **मधुकलोचनः** मध्वेव मधुकं क्षौद्र तद्वत्पिङ्गनेत्र इति वा ॥ ७३ ॥

६१—वाचस्पतिं देवपुरोहितं अनुजात **वाचस्पत्यः** पुरोहितकर्मकर्ता बृहस्पतिर्ह वै देवाना पुरोहितस्तमन्वन्ये मनुष्यराज्ञा पुरोहिता इति ब्राह्मणे बृहस्पतिं य सुभृतं बिभर्तीति मन्त्रस्थबृहस्पतिपदस्य व्याख्यानात् ।

६२—**वाजसनः** शाखाविशेषप्रवर्तकोऽध्वर्युकर्मकर्ता ।

६३—**नित्यमाश्रमपूजितः** स्पष्टम् ।

६४—**ब्रह्मचारी** ब्रह्मणि चरतीति ब्रह्मनिष्ठ ।

६५—लोकेषु ब्राह्मणादिगृहेषु चरति भक्षयतीति **लोकचारी** भिक्षु ।

६६—**सर्वचारी** सर्वग 'य एव वेदाह ब्रह्मास्मीति' 'स इदं सर्वं भवति' इति श्रुतेरात्मज्ञानात् सार्वात्म्यं प्राप्त इत्यर्थ ।

६७—**विचारवित्** विपरीतं चरणं अन्तर्मुखतया गमन तद्वेत्ता ॥ ७४ ॥

६८—ईष्टे इति **ईशानो** नियन्ताऽन्तर्यामीत्यर्थ । लट शानच ।

६९—**ईश्वरः** अश्नोति व्याप्नोतीति । अशेतेराशुकर्माणि वरट् चेत्युणादिसूत्रेण अशूङ् व्याप्तावित्यस्मात् वरट् चात् क्ङिशेरीचोपधाया इति पूर्वसूत्रादनुवृत्त्या उपधाया ईत्वं च ।

७०—**कालः** कलयति सर्वेषा पुण्यपापादिकं तत्तत्फलप्रदानार्थं संख्यातीति काल चित्रगुप्तात्मा ।

७१—**निशाचारी** ब्राह्म्या निशाया महाप्रलयरूपायामपि चरति प्रत्यगानन्दं अनुभवतीति निशाचारी ।

७२—पाति रक्षतीति पिनाको धनुर्विशेषस्तद्वान् [**पिनाकधान्**] पिनाकी । पिनाकादयश्चेति पातेरित्वमाकप्रत्ययो नुडागमश्च निपात्यते ।

निमित्तस्थो निमित्तं च नदिर्नन्दिकरो हरिः७५
नंदीश्वरश्च नंदी च नंदनो नंदिवर्द्धनः ।
भगहारी निहंता च कालो ब्रह्मा पितामहः७६
चतुर्मुखो महालिंगश्चारुलिंगस्तथैव च ।
लिंगाध्यक्षः सुराध्यक्षो योगाध्यक्षो युगावहः
बीजाध्यक्षो बीजकर्ता अध्यात्मानुगतो बलः
इतिहासः सकल्पश्च गौतमोऽथ निशाकरः७८
दम्भो ह्यदम्भो वैदम्भो वश्यो वशकरः कलिः
लोककर्ता पशुपतिर्महाकर्ता ह्यनोषधः ॥ ७९
अक्षरं परम ब्रह्म बलवच्छक्र एव च ।

७३—[**निमित्तस्थः**] निमित्तं लक्ष्य दैन्यादि तत्रस्थस्तदन्तर्यामी ।

७४—**निमित्तं** तद्रूपश्च विश्वरूपत्वात् ।

७५—**नन्दिः** समृद्धि एषाऽस्य परमा संपदिति श्रुतेर्ज्ञानसंपद्रूप ।

७६—**नन्दिकरः** सपत्कर ।

७७—**हरिः** हनुमान् रामरूपस्य विष्णो सहाय ७५

७८—नन्दी शिवस्य गणो वाहनं वा तस्येश्वर [**नन्दीश्वरः**] ।

७९—**नन्दी** गणरूपश्च ।

८०—**नन्दन** आनन्दयिता ।

८१—**नन्दिवर्धनः** दत्ताया अपि सपदश्छेदक ।

८२—भगानि इन्द्रादीनामैश्वर्याणि तान्यपि हरतीति **भगहारी** ।

८३—**निहन्ता** मृत्युरूपेण ।

८४—**कालः** कलाना चतु षष्टिसमिताना निवास काल ।

८५—अत एव **ब्रह्मा** अतिशयेन महान् ।

८६—**पितामहः** पितुर्विष्णोरपि पिता । इन्दिरा लोकमाता मेति लक्ष्म्या लोकमातृत्वस्य प्रसिद्धत्वेन तद्भर्तुर्विष्णोर्लोकपितृत्वात् ॥ ७६ ॥

८७—**चतुर्मुखः** विधाता ।

८८—महत् सर्वदेवासुरादिपूज्यं लिङ्गमस्य स **महालिङ्गः** ।

८९—**चारुलिङ्गः** रमणीयवेष ।

९०—**लिङ्गाध्यक्षः** लीनमावृत्तमर्थं गमयन्तीति लिङ्गानि प्रत्यक्षादीनि प्रमाणानि तेषामध्यक्ष प्रवृत्तिनिवृत्तिनियामक ।

९१—**सुराध्यक्षः** चक्षुरादिप्रमाणानामधिष्ठातार सुरास्तेषामप्यध्यक्ष ।

९२—**योगाध्यक्षः** तेषामेवेन्द्रियदेवताना हार्दाकाशे एकीकरणं योग अत्र ह्येते सर्वे एकं भवन्तीति श्रुते· तस्याप्यध्यक्ष. एतत्कृपयैव योग. प्राप्य इत्यर्थ. ।

९३—**युगावहः** युगानि पुण्यपापतारतम्यवन्ति कृतत्रेताद्वापरकलिसंज्ञानि आवहति निर्वर्तयतीति तथा ॥७७॥

९४—बीजं धर्माधर्मौ तयोरध्यक्ष फलदाता **बीजाध्यक्षः** ।

९५—**बीजकर्ता** स्पष्टम् ।

९६—**अध्यात्मानुगतः** आत्मानमधिकृत्य प्रवृत्तं शास्त्रं अनुसरन् साधक इत्यर्थ ।

९७—**बलः** बलानि धृत्यादीनि वर्त्तन्तेऽस्मिन्निति बल मत्वर्थीयार्श आद्यजन्तम् ।

९८—**इतिहासो** भारतादि ।

९९—**सकल्पः** यज्ञकल्पकेन प्रयोगविधिविचारेण सहितो मीमासान्यायसंघ ।

४००—**गौतमः** तर्कशास्त्रप्रणेता ।

इति चतुर्थं शतकम् ।

—०:०—

१—**निशाकरः** चद्रश्चान्द्रव्याकरणप्रणेता ॥ ७८ ॥

२—**दभः** दभ्नाति शत्रून् दमयतीति तथा ।

३—**अदंभः** नास्ति दम्भो दमको यस्य ।

४—**वैदंभः** दभो धर्मध्वजित्वं तद्विरहिता विदंभास्तेषामयं स्वभूतो वैदम्भ ।

५—**वश्यो** भक्तपरावीन ।

६—**वशकरः** अन्यान्वशेकर्तुं समर्थ वंश्यो, वशकर इति पाठे स्पष्टोर्थ ।

७ **कलिः** अन्योन्यं देवासुरादिना वैरकर्ता ।

८-**लोककर्ता** भौतिकचतुर्दशभुवननिर्माता ।

९—**पशुपतिः** ब्रह्मादिस्तम्बपर्यन्ताना जीवपशूना पति पालक ।

१०- **महाकर्ता** पंचभूतानामपि स्रष्टा ।

११—**अनौषधः** व्रीह्याद्यन्नजातीयरहितः अभोक्तेति यावत् ॥ ७९ ॥

१२—**अक्षरं** अव्ययम् ।

१३—**परमं ब्रह्म** अन्नाद्यवरब्रह्मापेक्षया परमं उत्कृष्टं आनंदमात्रस्वरूपम् ।

१४ **बलवत्** बलाभिमानिदेवतारूपम् ।

१५—अत एव शक्नोतीति **शक्रः** शतक्रतुशब्दावयव - योरन्त्यवर्णयोर्लोपेन वा शक्र ।

नीतिर्ह्यनीतिः शुद्धात्मा शुद्धो मान्यो गतागतः
बहुप्रसादः सुस्वप्नो दर्पणोऽथ त्वमित्रजित् ।
वेदकारो मन्त्रकारो विद्वान्समरमर्दनः ॥ ८१
महामेघनिवासी च महाघोरो वशीकरः ।
अग्निज्वालो महाज्वालो अतिधूम्रो हुतो हविः
वृषणः शङ्करो नित्यं वर्चस्वी धूमकेतनः ।
नीलस्तथागतुब्धश्च शोभनो निरवग्रहः ॥ ८३

स्वस्तिदः स्वस्तिभावश्च भागी भागकरो लघुः
उत्संगश्च महांगश्च महागर्भपरायणः ॥ ८४
कृष्णवर्णः सुवर्णश्च इंद्रियं सर्वदेहिनाम् ।
महापादो महाहस्तो महाकायो महायशाः८५
महामूर्धा महामात्रो महानेत्रो निशालयः ।
महान्तको महाकर्णो महोष्ठश्च महाहनुः ॥ ८६

१६—**नीतिः** दंड्येषु दण्डप्रणयनादि ।
१७—**अनीतिः** तद्विपर्यय ।
१८—**शुद्धात्मा** विमलचित्त ।
१९—**शुद्धः** दोषास्पर्शी ।
२०—**मान्यः** मानार्ह ।
२१—**गतागतः** यातायातवान्ससार । ॥ ८० ॥
२२—**बहुप्रसादः** ।
२३—**सुस्वप्नः** स्वप्नावस्थाभिमानी तैजसोऽप्ययमेव ।
२४—**दर्पणः** दर्पण इव विश्वप्रतिबिंबदर्शनास्पदम् ।
२५—**अमित्रजित्** बाह्याभ्यन्तरशत्रुजित् ।
२६—**वेदकारो** नि श्वसितमेतद्यद्ऋग्वेद इत्यादिश्रुतेर्वेदाना कर्ता ।
२७—[**मन्त्रकारः**] मन्त्रा वेदादन्ये तान्त्रिकपौराणिका देशभाषामया तेषा कर्ता मन्त्रकर्त्ता ।
२८—**विद्वान्** ।
२९—**समरमर्दनः** समरे शत्रूणा मर्दन । ॥८१॥
३०—महान्तो मेघा प्रलयकालिकास्तेषु तदधिष्ठातृदेवतात्वेन वसतीति **महामेघनिवासी** ।
३१—**महाघोरः** प्रलयकर्तृत्वात् ।
३२—वशे सर्वमस्यास्तीति **वशी** ।
३३—कृणोति हिनस्ति जगदिति **करः** संहारकर्ता ।
३४—अग्नेरिव ज्वाला तेजो यस्य स **अग्निज्वालः** ।
३५—ततोऽपि **महाज्वालः** ।
३६—**अतिधूम्रः** कालाग्निरूपेण सर्वदाहकालेऽत्यन्तं धूम्रमय ।
३७—**हुतः** आदिकर्मणि क्त होमेन प्रीत ।
३८—**हविः** पयआदिरूप ॥ ८२ ॥
३९—**वृषणः** वर्षति कर्मफलानीति वृषणो धर्म गुणाभाव आर्ष, यद्वा वृषो धर्मोस्त्यस्मिन्निति वृषण पामादित्वान्न प्रत्यय ।
४०—**शङ्करः** सुखप्रद. ।
४१—**नित्यं वर्चस्वी** ।
४२—**धूमकेतनः** वन्हिरूप. ।
४३—**नीलः** मरकतवर्ण ।
४४—तथेति तत एव हेतो **अङ्गलुब्धः** अङ्ग स्वीयोऽवयव लिङ्गमिति यावत् । तत्र लुब्ध नीलेऽनिले वा लिङ्गे नित्यं सन्निहित इत्यर्थ ।
४५—**शोभनः** कल्याणहेतु ।
४६—**निरवग्रहः** प्रतिबन्धशून्यो मनोरथवृष्टिकर्ता ॥ ८३ ॥
४७—**स्वस्तिदः** ।
४८—**स्वस्तिभावः** सुतरा अस्ति भाव सत्ताऽस्येति स्वस्तिभाव ।
४९—**भागी** यज्ञे भागवान् ।
५०—**भागकरः** यज्ञियहविषा विभाजक ।
५१—**लघुः** शीघ्र ।
५२—**उत्सङ्गः** असङ्ग ।
५३—**महाङ्गः** महालिङ्ग. ।
५४—महान् गर्भ उत्पादनीयत्वे परायण अवश्यं गम्यं यस्य स **महागर्भपरायणः** प्रजननात्मक कन्दर्प इत्यर्थ ॥ ८४ ॥
५५—**कृष्णवर्णो** विष्णुरूपेण ।
५६—**सुवर्णः** श्वेतवर्ण साम्बरूपेण ।
५७—**सर्वदेहिनामिन्द्रियं** सर्वेन्द्रियरूप ।
५८—**महापादः** ।
५९—**महाहस्तः** ।
६०—**महाकायः** ।
६१—**महायशाः** ॥ ८५ ॥
६२—**महामूर्धा** ।
६३—**महामात्रः** महाप्रमाण ।
६४—**महानेत्रः** ।
६५—**निशालयः** निशेव निशा अविद्या तस्या लयो यत्र ।
६६—**महान्तकः** मृत्युमृत्यु ।
६७—**महाकर्णः** ।
६८—**महोष्ठः** ।
६९—**महाहनुः** ॥ ८६ ॥

महानासो महाकम्बुर्महाग्रीवः श्मशानभाक्
महावक्षा महोरस्को ह्यन्तरात्मा मृगालयः ॥
लंबनो लंबितोष्ठश्च महामायः पयोनिधिः ।
महादन्तो महादंष्ट्रो महाजिह्वो महामुखः॥८८
महानखो महारोमा महाकेशो महाजटः ।
प्रसन्नश्च प्रसादश्च प्रत्ययो गिरिसाधनः ॥ ८९
स्नेहनोऽस्नेहनश्चैव अजितश्च महामुनिः ।
वृक्षाकारो वृक्षकेतुरनलो वायुवाहनः ॥ ९०
गण्डली मेरुधामा च देवाधिपतिरेव च ।
अथर्वशीर्षः सामास्य ऋक्सहस्रामितेक्षणः ९१
यजुः पादभुजो गुह्यः प्रकाशो जङ्गमस्तथा ।
अमोघार्थः प्रसादश्च अभिगम्यः सुदर्शनः ९२
उपकारः प्रियः सर्वः कनकः काञ्चनच्छविः॥

७०—**महानासः** ।

७१—**महाकम्बुः** महाकण्ठ ।

७२—**महाग्रीवः** ।

७३—**श्मशानभाक्** श्मना शरीराणा शान तनूकरणं भजतीति श्मशानभाक् देहबन्धच्छेत्तेति यावत् ।

७४—**महावक्षाः** रक्ष इति पाठे महती रक्षा रक्षणं यस्य स तथा ।

७५—**महोरस्कः** ।

७६—**अन्तरात्मा** ।

७७—**मृगालयः** अङ्काधिरोपितमृग इत्यर्थ ॥८७॥

७८—लम्बन्तेऽस्मिन्ननेकानि तरौ फलानीव ब्रह्माण्डानीति **लम्बनः** ।

७९—**लम्बितोष्ठः** प्रलयकाले विश्वं ग्रसितुं लम्बितौ दीर्घीकृतौ ओष्ठौ येन स ।

८०—महती ब्रह्मादिभिरप्यजय्या माया यस्य स **महामायः** ।

८१—**पयोनिधिः** क्षीरसमुद्र ।

८२—**महादन्तः** ।

८३—**महादंष्ट्रः** ।

८४—**महाजिह्वः** ।

८५—**महामुखः** ॥ ८८ ॥

८६—**महानखः** नृसिंह ।

८७—**महारोमा** वराह ।

८८—**महाकोशः** महोदर ।

८९—**महाजटः** ।

९०—**प्रसन्नः** ।

९१—**प्रसादः** प्रसन्नता ।

९२—**प्रत्ययः** अनुभव ।

९३—**गिरिसाधनः** पर्वत एव साधनं रणे जयहेतुर्यस्य गिरिधन्वेत्यर्थ ॥ ८९ ॥

९४—स्निह्यतीति **स्नेहनः** पितृवत्प्रजासु स्नेहवान् ।

९५—**अस्नेहनः** तद्विपरीत ।

९६—**अजितः** ।

९७—**महामुनिः** अत्यन्त मौनवान् मननशीलो वा ।

९८—**वृक्षाकारः** संसारवृक्ष एवाकारो यस्य ।

९९—**वृक्षकेतुः** संसारवृक्ष एव केतुर्ज्ञापको यस्य न हि देहेन्द्रियाण्यनुपादाय ब्रह्म जिज्ञासितुं शक्यम् ।

१००—**अनलो** नास्ति अलं पूर्तिर्यस्य भुञ्जानस्य सोऽनलोऽग्नि ।

इति पञ्चमं शतकम् ।

१—वायुरेव वाहनं देशादेशान्तर प्रति गते साधनं स **वायुवाहनः** ॥ ९० ॥

२—गण्ड इव गण्डो भूमेरुच्छ्रूनप्रदेशः क्षुद्रशैलास्तेषु लीयते गच्छतीति **गण्डलीः** गण्डशब्दपूर्वात् ली गतावस्मात् क्विप् । विभक्तिलोप सुपा सुलुगिति पूर्वसवर्णो वा आर्ष ।

३—**मेरुधामा** ।

४—**देवाधिपतिः** ।

५—**अथर्वशीर्षः** ।

६—**सामास्यः** ।

७—**ऋक् सहस्रामितेक्षणः** ॥ ९१ ॥

८—**यजुः पादभुजः**

९—**गुह्यः** उपनिषद्देश ।

१०—**प्रकाशः** कर्मकाण्ड ।

११—**जङ्गमः** नृपश्वादिरूप ।

१२—अर्थोऽर्थनं याच्ञा अमोघोऽर्थो यत्र स **अमोघार्थः** ।

१३—**प्रसादः** प्रसीदतीति दयालु ।

१४—**अभिगम्यः** सुखप्राप्य ।

१५—**सुदर्शनः** मङ्गलावहं दर्शन यस्य ॥ ९२ ॥

१६—**उपकारः** प्राणिनरूप ।

१७—**प्रियः** सुखदायी ।

१८—**सर्वः** सरत्यभिमुख आयातीति सर्व ।

१९—**कनकः** स्वर्णादिप्रियवस्तुरूप ।

२०—**काञ्चनच्छविः** ।

नाभिर्नन्दिकरो भावः पुष्करस्थपतिः स्थिरः
द्वादशस्त्रासनश्चाद्यो यज्ञो यज्ञसमाहितः ।
नक्तं कलिश्च कालश्च मकरः कालपूजितः ९४
सगणो गणकारश्च भूतवाहनसारथिः ।
भस्मशयो भस्मगोप्ता भस्मभूतस्तरुर्गणः ॥९५
लोकपालस्तथाऽलोको महात्मा सर्वपूजितः
शुक्लस्त्रिशुक्लः संपन्नः शुचिर्भूतनिषेवितः ॥९६
आश्रमस्थः क्रियावस्थो विश्वकर्ममतिर्वरः ।

२१—**नाभिः** भुवनस्य मध्यदेश । अयं यज्ञो भुवनस्य नाभिर्यज्ञरूप अत्यूर्ध्वगतिहेतुत्वाभावाद्यज्ञस्य नाभित्वम् ।

२२—**नन्दिकरः** यज्ञफलसमृद्धिकर्ता ।

२३—**भावः** क्रतुश्रद्धारूप ।

२४—[**पुष्करस्थपतिः**] पुष्करस्य ब्रह्माण्डस्य स्थपति स्वामी ।

२५—**स्थिरः** स्थावर पर्वतादिरूप ॥ ९३ ॥

२६—**द्वादशः** नृणा दशगर्भवासादयो दशास्तासा मृत्युर्दशमी स्वर्ग एकादशी मोक्षो द्वादशीति द्वादश इति संसारापेक्षया मोक्ष उच्यते ।

२७—**त्रासनः** आन्तरालिकदशारूपेण भयजनन ।

२८—**आद्यः** संसारात्प्राचीन शुद्ध आद्यन्तमध्यरूप इति नामत्रयार्थ ।

२९—**यज्ञः** जीवेशयो सङ्गतिकरणरूपो योग ।

३०—अत एव **यज्ञसमाहितः** तत्रस्थस्तदेकलभ्य इत्यर्थ ।

३१—नक्तमिव **नक्त** अप्रकाशात्मा महामोह ।

३२—**कलिः** तत्कार्यभूत कामक्रोधलोभादिरूप ।

३३—**कालः** तस्यापि कार्य जन्ममरणप्रवाह काल यति सवलयतीति योगात् ।

३४—**मकरः** मकराकार शिशुमारचक्र कालस्य ज्ञापकं तत्स्वरूप ।

३५—कालेन मृत्युना पूजित **कालपूजितः** ॥९४॥

३६—**सगणः** प्रमथादियुक्त ।

३७—**गणकारः** बाणादीन् भक्तान् स्वगणान् करोतीति गणकार ।

३८—भूताना वाहनो योगक्षेमनिर्वाहको ब्रह्मा सारथिर्यस्य **भूतवाहनसारथिः** ।

३९—**भस्मशयः** भस भर्त्सनदीप्त्योरिति जौहोत्यादिकाद्धातोरन्येभ्योऽपि दृश्यत इति मनिन् बभास्ति भर्त्सयति दोषान् भासयति वा आत्मानामिति भस्म। तथा चोक्तं वासिष्ठलैङ्गे ' भर्त्सनात्सर्वपापाना पाशाना च महामुने । भस्मेति कीर्त्यते रक्षा रोगाणा चापि भर्त्सनात्' इति। तत्रैव बाह्यमोक्षेण किं भस्मधारणं मोक्षलक्षणम्। भस्मना नित्ययुक्तस्य ज्ञानमुत्पद्यतेऽचिरात्। इति श्रुतावप्यथर्वशिरसि अग्निरित्यादिना भस्म गृहीत्वाऽभिमृज्याङ्गानि सम्पृशेद्व्रतमेतत्पाशुपतं पशुपाशविमोक्षायेति । भस्मनि शेते भस्मशय तेन उद्धूलनादिकमपि कर्तव्यं, यथाह बृद्धशातातप 'स्तेय कृत्वा गुरुदाराश्च गत्वा मद्य पीत्वा ब्रह्महत्या च कृत्वा। भस्मच्छन्नो भस्मशय्या शयानो रुद्राध्यायी मुच्यते सर्वपापै.' इति ।

४०—**भस्मगोप्ता** भस्मना गोपायति जगदिति भस्मगोप्ता, वक्ष्यति चात्रैव 'रक्षार्थं मङ्गलार्थं च पवित्रार्थं च भामिनि । लाञ्छनार्थं च भक्ताना भस्म दत्तं मया पुरा'इति।

४१—**भस्मभूतः** एतच्च मङ्गणकनाम्नि मुनौ करात् च्युत शाकरस दृष्ट्वा नृत्यति सति तन्नृत्योपशमार्थं महादेवेन स्वमङ्गुलिं भित्त्वा तज्ज भस्म दर्शित तेन स्वस्य वपु केवल भस्ममयमिति ज्ञाप्यते ।

४२—**तरुः** कल्पवृक्षादि ।

४३—**गणः** भृगिरिटिनंदिकेश्वरादिस्तद्रूप ॥ ९५ ॥

४४—लोकाश्चतुर्दशभुवनानि तेषा पालो **लोकपालः** ।

४५—**अलोकः** लोकातीत ।

४६—**महात्मा** पूर्ण ।

४७—**सर्वपूजितः** ।

४८—**शुक्लः** शुद्ध ।

४९—**त्रिशुक्लः** त्रीणि कायवाङ्मनासि शुक्लानि यस्य ।

५०—अत एव **संपन्नः** कैवल्य प्राप्त ।

५१—**शुचिः** आगन्तुकमपि मल न स्पृशति असङ्ग इत्यर्थ ।

५२—भूतै पूर्वाचार्यैर्निषेवित **भूतनिषेवितः** ९६

५३—आश्रमेषु चतुर्षु धर्मरूपेण तिष्ठतीति **आश्रमस्थः** ।

५४—**क्रियावस्थः** धर्मस्यैव पूर्वरूप क्रियायागादिस्तदवस्थापन्न ।

५५—**विश्वकर्ममतिः** देवशिल्पिनो यत्कौशलं तद्रूप इत्यर्थ ।

५६—**वरः** व्रियत इति वरो लक्ष्म्यादिरूप ।

विशालशाखस्ताम्रोष्ठो ह्यम्बुजालः सुनिश्चलः
कपिलः कपिशः शुक्ल आयुश्चैव परोऽपरः।
गन्धर्वो ह्यदितिस्तार्क्ष्यः सुविज्ञेयः सुशारदः॥
परश्वधायुधो देव अनुकारी सुबान्धवः।
तुम्बवीणो महाक्रोध ऊर्ध्वरेता जलेशयः ९९
उग्रो वंशकरो वंशो वंशनादो ह्यनिन्दितः।
सर्वाङ्गरूपो मायावी सुहृदो ह्यनिलोऽनलः
बन्धनो बन्धकर्ता च सुबन्धनविमोचनः।
स यज्ञारिः स कामारिर्महादंष्ट्रो महायुधः।
बहुधा निन्दितः शर्वः शङ्करः शङ्करोऽधनः।

५७—**विशालशाखः** दीर्घबाहु ' शाखा पक्षान्तरे बाहौ ' (खान्तवर्गे ६) इति **मेदिनी** ।

५८—**ताम्रोष्ठः** ।

५९—**अम्बुजालः** जलसमूह सागर इत्यर्थ ' जाल गवाक्ष आनाये क्षारके दम्भवृन्दयो ' (लान्तवर्गे १९) इति **मेदिनी** ।

६०—**सुनिश्चलः** पर्वतादिरूप ॥ ९७ ॥

६१—**कपिलः** ।

६२—**कपिशः** ।

६३—**शुक्ल** इति त्रयोऽपि वर्णवाचिनस्तद्वान् ।

६४—**आयुः** जीवनकाल ।

६५—**परः** प्राचीन ।

६६—**अपरः** अर्वाचीन ।

६७—**गन्धर्वः** चित्ररथादि ।

६८—**अदितिः** देवमाता ' इयं वा अदिति ' इति श्रुते पृथ्वी वा ।

६९—**तार्क्ष्यः** वैनतेय ।

७०—**सुविज्ञेयः** सुखेन ज्ञातुं योग्य ।

७१—**सुशारदः** शोभनवाक् ॥ ९८ ॥

७२—**परश्वधायुधः** ।

७३—**देवः** विजिगीषु ।

७४—**अनुकारी** भीष्म हतु आयुध प्रक्षेप्तुमनुकरोति वा सोऽनुकारी ।

७५—शोभनश्चासौ बान्धवश्च **सुबान्धवः** अर्जुनसखा ।

७६—**तुम्बवीणः** तुम्बीफलद्वययुक्ता वीणा यस्य सैव रुद्रवीणेति लोके प्रसिद्धा ।

७७—**महाक्रोधः** प्रलयकाले ।

७८—**ऊर्ध्वरेताः** ऊर्ध्वं देवमनुष्येभ्य उपर्यपि रेत प्रजा ब्रह्मविष्ण्वादिरूपा यस्य स ।

७९—**जलेशयः** विष्णुरूपी शेषपर्यङ्के जलशायी ९९

८०—**उग्रः** उत्कर्षेण ग्रसतीत्युग्र ।

८१—**वंशकरः** ।

८२—**वंशः** च प्रसिद्ध ।

८३—**वंशनादः** ।

८४—**अनिन्दितः** ।

८५—**सर्वाङ्गरूपः** सर्वेष्वङ्गेषु रूप सौन्दर्यमस्यास्ति 'रूपं स्वभावे सौन्दर्ये' (पान्तवर्गे ९) इति **मेदिनी**

८६—**मायावी** मायाविशिष्ट 'मायिनं तु महेश्वरम इति प्रसिद्ध ।

८७—**सुहृदः** अदन्तत्वमार्षम् प्रत्युपकारमनपेक्ष उपकर्ता ।

८८—**अनिलः** वायु ।

८९—**अनलः** अग्नि ॥ १०० ॥

९०—बध्नात्यनेनेति **बन्धनः** संसारपाश ।

९१—**बन्धकर्ता** संसारनिर्माता ।

९२—**सुबन्धनविमोचनः** सुतरा बन्धनस्य माया पाशस्य मोचनकर्ता ।

९३— यज्ञारयो दैत्यास्तै सहापि वसतीति **यज्ञारिः** ।

९४—कामारयो जितकामा योगिन तैश्च सह स्तीति स **कामारिः** ।

९५—**महादंष्ट्रः** ।

९६—**महायुधः** ॥ १०१ ॥

९७—**बहुधा निन्दितः** दारुकावने अतिकमनी रूपं धृत्वा नग्न सन्नयं पापिष्ठोऽस्मत्पत्नीना चित्तं मोहयितु मागतोस्तीऽति सर्वैर्ऋषिभिर्निन्दित ।

९८—शृणोति हिनस्ति दारुकावनस्थान्मुनीन् मोह यतीति **शर्वः** ।

९९—**शङ्करः** तेषामपि कुशलं करे यस्य स्वामी यस्येत्यर्थ ।

६००—शङ्कानां समूह शङ्क तस्य र इव र **शङ्कर** सर्वसंशयदाहक रोऽर्ककामानिले वह्नाविति **विश्वलोचनः** । यैर्मुनिभिर्दारुकावनस्थैर्निन्दितो याश्च मोहितवान् तेषामेव कारुण्यात्कल्याण सर्वसशयोच्छेद च तत्त्वज्ञानदानेन कृतवानिति नामचतुष्कतात्पर्यम् ।

इति षष्ठं शतकम् ।

१—**अधनः** दिगम्बरत्वात् ।

अमरेशो महादेवो विश्वदेवः सुरारिहा १०२
अहिर्बुध्न्योऽनिलाभश्च चेकितानो हविस्तथा
अजैकपाच्च कापाली त्रिशङ्कुरजितः शिवः ३
धन्वन्तरिर्धूमकेतुः स्कन्दो वैश्रवणस्तथा।
धाता शक्रश्च विष्णुश्च मित्रस्त्वष्टा ध्रुवो धरः
प्रभावः सर्वगो वायुरर्यमा सविता रविः।
उषंगुश्च विधाता च मान्धाता भूतभावनः॥५
विभुर्वर्णविभावी च सर्वकामगुणावहः।

२—एवमन्यमराणा ईश **अमरेशः**।

३—**महादेवो** देवेन्द्रादीनामपि पूज्य। यथोक्त साम्बपुराणे—

'पूज्यते य सुरै सर्वैर्महाश्चैव प्रमाणत।
महेति धातु पूजाया महादेवस्तत स्मृत' इति।

४—**विश्वदेवः** विश्वं विष्णुर्वषट्कार इति वक्ष्यमाणत्वाद्विश्वं विष्णु तस्यापि देव आराध्य।

५—**सुरारिहा** ॥ १०२ ॥

६—**अहिर्बुध्न्यः** अहि सर्प, तस्य विशेषणं बुध्न्य बुध्ने मूले साधुरिति ब्रह्माण्डमूल पाताल तत्र वर्तत इति यावत्। शेषस्वरूप इत्यर्थ। यथोक्तं विष्णुपुराणे—

संकर्षणात्मको रुद्रो निष्क्रम्यात्ति जगत्त्रयम्'इति पदद्वयात्मकमेकं नाम।

७—**अनिलाभः** वायुर्यथा अप्रत्यक्षोपि स्पर्शेन ज्ञायते एवमय विषयसंस्पर्शजन्यानुभवरूप। यथोक्तम्—

'परागर्थप्रमेयेषु या फलत्वेन संमता
सवित्तिसैवेह मेयोऽर्थो वेदान्तोक्तिप्रमाणत।' इति

८—**चेकितानः** कित ज्ञाने अदादि अस्मात् यङ्लुकि शानच् अतिशयेन चिकेति जानातीति चेकितान युगपदशेषविशेषविज्ञानवानित्यर्थ।

९—हविरिव **हविः** तस्यैव भोक्तुर्भोग्यजातम् हरिरिति पाठेऽपि तस्यैव हर्तव्य वस्त्विति स एवार्थ। हृञ औणादिक सर्वधातुभ्य इति कर्मणि बाहुलकादिन्।

१०—**अजैकपात्** एकादशसु रुद्रेषु कश्चित्।

११—**कापाली** कपालाभ्या द्युपृथिवीरूपाभ्या निर्वृत्त कापालं ब्रह्माण्डं तदस्यास्तीति कापाली ब्रह्माण्डाधीश।

१२—**त्रिशंकुः** त्रयो गुणा कीला इव यस्य विष्टंभका स त्रिशकु ससारी।

'न तदस्ति पृथिव्या वा दिवि देवेषु वा पुन
सत्त्व प्रकृतिजैर्मुक्त यदेभि स्यात्त्रिभिर्गुणै'

इति गीतावचनात् सर्वजीवरूप इत्यर्थ।

१३—**अजितः** तैरेव शकुभिरवशीकृत।

१४—अत एव **शिवः** शुद्ध निरुपाधिरित्यर्थ। यथोक्त वायुसहितायाम्—विशुद्धि शिवता स्वत इति ॥१०३

१५—**धन्वन्तरिः** महावैद्य 'भिषक्तमं त्वा भिषजा शृणोमि' इति मंत्रप्रसिद्ध।

१६—**धूमकेतुः** उत्पातविशेष।

१७—**स्कन्दः**।

१८—**वैश्रवणः**।

१९—**धाता**।

२०—**शक्रः**।

२१—**विष्णुः**।

२२—**मित्रः**।

२३—**त्वष्टा**।

२४—**ध्रुवः**।

२५—**धरः** ॥ १०४ ॥

२६—**प्रभावः** प्रभावाख्यो वसु।

२७—**सर्वगो वायुः** सूत्रात्मा। 'वायुना वै गौतम सूत्रेणाय च लोक परश्च लोक सर्वाणि च भूतानि संदृब्धानि' इति श्रुते पदद्वयात्मकमेक नाम।

२८—**अर्यमा**।

२९—**सविता**।

३०—**रविः**।

३१—**उषंगुः** नृपविशेष मान्धातृमाहचर्यात्। यद्वा उष दाहेऽस्मात् 'इगुपधज्ञाप्रीकिर क' इति कप्रत्यये **उषं** दाहक गाव किरणा यस्येत्युषंगु, विभक्त्यलोप आर्ष वेदा प्रमाणमितिवद्लिंगवचनभेदेऽपि पदयो सामानाधिकरण्य वन्वतर्यादय शब्दा देवताविशेषवाचिन शिवे सार्वात्म्योपपादनार्था एवेति सर्वत्र ज्ञेयं पुनरुक्तानामपि तत्तद्यौगिकार्थभेदादपौनरुक्त्य ज्ञेय सत्यपि पौनरुक्त्ये स्तुत्यर्थत्वान्न दोष।

३२—**विधाता** विविधप्रकारेण पोषक।

३३—**मान्धाता** अस्मच्छब्दार्थ जीव धयति पाययतीति मान्धाता जीवस्य तृप्तिकर।

३४—भूताना भावन रज्ज्वामुरगस्येवास्मिन्निति **भूतभावनः** ॥ १०५ ॥

३५—**विभुः** विविधरूपेण भवति अस्तीति विभु भवते सत्यर्थकत्वात्पूर्ववत् डुप्रत्यय।

३६—वर्णान् श्वेतपीतादीन् विविधरूपेण भावयतीति **वर्णविभावी** तस्मिन्। शुक्लमुत नीलमाहुरित्यादिश्रुते स्तदन्तर्मुखाना नाडीमार्गगतं प्रत्यक्षम् श्रुत्यन्तरं च नीहारधूमार्कानिलानलाना खद्योतविद्युत्स्फाटिकशशीना एतानि रूपाणि पुर सराणि ब्रह्मण्यभिव्यक्तिकराणि योग इति।

३७—**सर्वकामगुणावहः** तत्रैव अन्तर्मुखत्वकाले सर्वान्कामान्काम्यमानान् विषयान्गुणाश्च शान्तघोरमूढान् योगविघ्नकरान्सुखास्वादविक्षेपल्यापरनामधेयान् ध्यायिभ्य आवहति साकल्येन प्रापयतीति तथा।

पद्मनाभो महागर्भश्चन्द्रवक्त्रोऽनिलोऽनलः ६
बलवांश्चोपशान्तश्च पुराणः पुण्यचञ्चुरी ।
कुरुकर्ता कुरुवासी कुरुभूतो गुणौषधः ॥ ७
सर्वाशयो दर्भचारी सर्वेषां प्राणिनां पतिः ।
देवदेवः सुखासक्तः सदसत्सर्वरत्नवित् ॥ ८
कैलासगिरिवासी च हिमवद्गिरिसंश्रयः ।
कूलहारी कूलकर्ता बहुविद्यो बहुप्रदः ॥ १०९
वणिजो वर्धकी वृक्षो बकुलश्चन्दनश्छदः ।
सारग्रीवो महाजत्रुरलोलश्च महौषधः ॥ ११०
सिद्धार्थकारी सिद्धार्थश्छन्दोव्याकरणोत्तरः
सिंहनादः सिंहदंष्ट्रः सिंहगः सिंहवाहनः ॥ १११
प्रभावात्मा जगत्कालस्थालो लोकहितस्तरुः

३८—**पद्मनाभः** पद्मं विश्वस्यायतनं नाभौ तत्रस्थे मणिपूरचक्रेऽस्यास्तीति पद्मनाभ । नाभ्यामुपरि तिष्ठति विश्वस्यायतनं महदिति श्रुते ।

३९—**महागर्भः** महान्तो ब्रह्मादयो गर्भा उदरान्तर्गता यस्य स तथा ।

४०—**चन्द्रवक्त्रः** रम्यरूप ।

४१—**अनिलः** ।

४२—**अनलश्च** । पूर्वं भूतरूपेणोक्तावत्र तदभिमानिदेवतारूपाविति विशेष ॥ १०६ ॥

४३—**बलवान्** ।

४४—**उपशान्तः** ।

४५—**पुराणः** ।

४६—स्पष्टार्थं नामत्रयं **पुण्यचञ्चुः** पुण्येन ज्ञात 'तेन वित्तश्चञ्चुप् चणपौ' इति चञ्चुप् ।

४७—ई लक्ष्मीरित्येकाक्षरं नाम । ई विषादेऽनुकम्पाया लक्ष्म्या च पुनरव्ययम् (अव्ययवर्गे) इति **मेदिनी** ।

४८—**कुरुकर्ता** अत्र नाभैकदेशग्रहणेन नामग्रहणं भामासत्यभामेतिवत् कुरुपदेन कुरुक्षेत्रमुच्यते तेन अविमुक्तं वै कुरुक्षेत्रमिति श्रुते सर्वलोकप्रसिद्धेश्च तद्विविध तयो कर्मोपस्तिस्थानयोर्निर्माता ।

४९—**कुरुवासी** कुरुक्षेत्रद्वयवासी ।

५०—**कुरुभूतः** कुरुक्षेत्रद्वयात्मा ।

५१—**गुणौषधः** ऐश्वर्यज्ञानवैराग्यधर्मादीनामौषधवदुद्दीपक ॥ १०७ ॥

५२—**सर्वाशयः** सर्वे आशेरतेऽस्मिन्निति अत्र ह्येते सर्व एकं भवन्तीति श्रुते सर्वस्य सुषुप्तिस्थानं प्राज्ञ इत्यर्थ ।

५३—दर्भेषु अन्तर्वेदिस्थबर्हिरूपेषु आसादितानि हवींषि चरति भक्षयतीति **दर्भचारी** ।

५४—**सर्वेषां प्राणिनां पतिः** ।

५५—**देवदेवः** ।

५६—**सुखासक्तः** ।

५७—**सत्** कार्यम् ।

५८—**असत्** कारणम् ।

५९—**सर्वरत्नवित्** सर्वाणि रत्नानि तत्तज्जातिपूत्कृष्टवस्तूनि विन्दते लभते इति तथा ॥ १९८ ॥

६०—**कैलासगिरिवासी** ।

६१—**हिमवद्गिरिसंश्रयः** ।

६२—**कूलहारी** महाप्रवाहरूपेण तीरस्थद्रुमहारी ।

६३—**कूलकर्ता** पुष्करादीना महातटाकाना कर्ता कूलं प्रतीरे सैन्यस्य पृष्ठे कूपतटाकयोरिति **विश्वलोनचः**

६४—**बहुविद्यः** ।

६५—**बहुप्रदः** ॥ १०९ ॥

६६—**वणिजो** वणिक् अकारान्तत्वं आर्षम् ।

६७—**वर्धकी** तक्षा ।

६८—**वृक्षः** तक्षणीय संसारवृक्ष ।

६९—**बकुलः** वृक्षविशेष ।

७०—**चन्दनः**

७१— **छदः** सपर्ण ।

७२—**सारग्रीवः** दृढकन्धर ।

७३— **महाजत्रुः** जत्रुरत्र कण्ठस्कन्धयोरधोऽस्थि ॥

७४—**अलोलः** ।

७५—**महौषधः** व्रीहियवरूप ॥ ११० ॥

७६—**सिद्धार्थकारी** ।

७७—**सिद्धार्थः** पूर्वपक्षं निरस्य यो निष्पन्नोऽर्थः स सिद्धार्थ उच्यते स एव सिद्धान्त इति प्रसिद्धस्तस्यैव विशेषणं छन्दोव्याकरणोत्तर इति वेदव्याख्यानोपबृंहित इत्यर्थ ।

७८—**सिंहनादः** ।

७९—**सिंहदंष्ट्रः** ।

८०—**सिंहगः** सिंहारूढ ।

८१—**सिंहवाहनः** सिंहयुक्तं वाहनं रथोऽस्य १११

८२—**प्रभावात्मा** प्रकृष्टो भाव सत्ता तद्रूप इत्यर्थ । 'प्राणा वै सत्यं तेषामेष सत्यम्' इति श्रुते सत्यस्य सत्य इत्यर्थ ।

८३—जगत काल ग्रासकर्ता जगत्काल स एव स्थालो भोजनपात्रं यस्य **[जगत्कालस्थालः]** ।

८४—**लोकहितः** ।

८५—**तरुः** तारक ।

सारङ्गो नवचक्राङ्गः केतुमाली सभावनः॥१२
भूतालयो भूतपतिरहोरात्रमनिन्दितः॥ १३
वाहिता सर्वभूतानां निलयश्च विभुर्भवः।
अमोघः संयतो ह्यश्वो भोजनः प्राणधारणः१४
धृतिमान्मतिमान् दक्षः सत्कृतश्च युगाधिपः
गोपालिर्गोपतिर्ग्रामो गोचर्मवसनो हरिः १५
हिरण्यबाहुश्च तथा गुहापालः प्रवेशिनाम्।
प्रकृष्टारिर्महाहर्षो जितकामो जितेन्द्रियः १६
गान्धारश्च सुवासश्च तपःसक्तो रतिर्नरः।
महागीतो महानृत्यो ह्यप्सरोगणसेवितः १७
महाकेतुर्महाधातुर्नैकसानुचरश्चलः।
आवेदनीय आदेशः सर्वगन्धसुखावहः॥११८
तोरणस्तारणो वातः परिधी पतिखेचरः।

८६—**सारङ्गः** पक्षिविशेष ।

८७—नवश्चासौ चक्राङ्गो हसश्च **नवचक्राङ्गः**।

८८—केतुरिव केतु शिखा तया मालते शोभते इति **केतुमाली** मयूरकुक्कुटादिपक्षिरूप ।

८९—सभा धर्मपरीक्षास्थानं अवतीति **सभावनः॥ ११२॥**

९०—**भूतालयः**।

९१—**भूतपतिः**।

९२—**अहोरात्रम्**।

९३—**अनिन्दितः॥ ११३॥**

९४—वाहिता वोढा सर्वभूतानामित्युभयत्र सम्बध्यते **सर्वभूतानां वाहिता** इत्येकं नाम।

९५—**सर्वभूतानां निलयः** सदनमित्यपरम्।

९६—**विभुः** विगतं भूर्भुवन यस्मादित्यजन्मा भावार्थे पूर्ववत् भवतेर्डु ।

९७—**भवः** अस्तीति भव अस्ते पचाद्यचि भूभाव।

९८—**अमोघः** नैष्फल्यरहित ।

९९—**संयतः** धारणाध्यानसमाधिमान्।

७००—**अश्वः** उच्चै श्रत्रादिरूप ।

इति सप्तमं शतकम्।

१—भोजयतीति **भोजनः** अन्नदाता।

२—अत एव **प्राणधारणः॥ ११४॥**

३—**धृतिमान्**।

४—**मतिमान्**।

५ **दक्षः** उत्साही।

६—**सत्कृतः** आदृत ।

७—**युगाधिपः** युगशब्देन धर्माधर्मौ लक्ष्येते तयो फलदः।

८—**गोपालिः** इन्द्रियाणा पालयिता।

९—**गोपतिः** रश्मीना पति. सूर्यादि ।

१०—**ग्रामः** समूह ।

११—**गोचर्मवसनः**।

१२—**हरिः** हरति भक्ताना दु खमिति हरि॥११५॥

१३—**हिरण्यबाहुः** रमणीयबाहु ।

१४—[**गुहापालः प्रवेशिना**] अन्त. प्रवेशशीलाना योगिना चिरकालं काष्ठवत्स्थायिना गुहा शरीर तस्य रक्षक ।

१५—प्रकृष्टा प्रकर्षेण तनूकृता अरय कामादयो येन स **प्रकृष्टारिः** साधकोत्तम ।

१६—**महाहर्षः**।

१७—**जितकामः**।

१८—**जितेन्द्रियः॥ ११६॥**

१९—**गान्धारः** स्वरविशेष ।

२०—**सुवासः** शोभनं वसतिस्थानं कैलासाख्यमस्य।

२१—**तपःसक्तः**।

२२—**रतिः** प्रीतिरूप ।

२३—**नरः** नयति प्रापयति ब्रह्माडमिति नरो विराट्।

२४—**महागीतः**।

२५—**महानृत्यः**।

२६—**अप्सरोगणसेवितः॥ ११७॥**

२७—महान् केतुर्ध्वरूपी यस्य स **महाकेतुः**।

२८—**महाधातुः** मेरुपर्वत ।

२९—तस्यैव **नैकसानुचरः** अनेकशिखरसंचारी।

३०—**चलः** दुर्ग्रह ।

३१—**आवेदनीयः** वाचामगोचरोऽपि गुरुभिरुपदेष्टु शक्य ।

३२—**आदेशः** साक्षादुपदेशरूप ।

३३—**सर्वगन्धसुखावहः** युगपत्सर्वेषा गन्धाना विषयस्पर्शाना सुखं आवहतीति तथा॥ ११८॥

३४—**तोरणः** पुरद्वारादिरूप.।

३५—**तारणः** परिखादींस्तारयति जिगीषून्।

३६—**वातः**।

३७—परिधी परिधिरस्यास्तीति **परिधी** दुर्गरूप.।

३८—पतिश्चासौ खेचरश्चेति [**पतिखेचरः**] खेचरेश्वरो गरुड ।

संयोगो वर्धनो वृद्धो अतिवृद्धो गुणाधिकः
नित्य आत्मसहायश्च देवासुरपतिः पतिः ।
युक्तश्च युक्तबाहुश्च देवो दिविसुपर्वणः ॥ १२०
आषाढश्च सुषाढश्च ध्रुवोऽथ हरिणो हरः ।
वपुरावर्तमानेभ्यो वसुश्रेष्ठो महापथः ॥ १२१
शिरोहारी विमर्शश्च सर्वलक्षणलक्षितः ।
अक्षश्च रथयोगी च सर्वयोगी महाबलः ॥ २२
समाम्नायोऽसमाम्नायस्तीर्थदेवो महारथः ।
निर्जीवो जीवनो मन्त्रः शुभाक्षो बहुकर्कशः ॥
रत्नप्रभूतो रत्नाङ्गो महार्णवनिपानवित् ।
मूलं विशालो ह्यमृतो व्यक्ताव्यक्तस्तपोनिधिः
आरोहणोऽधिरोहश्च शीलधारी महायशाः

३९—**संयोगो वर्धनः** वृद्धिहेतुभूत संयोग स्त्रीपुसयो सम्बन्ध प्रजनश्चास्मि कन्दर्प इत्युक्त ।

४०—**वृद्धो गुणाधिकः** गुणैर्ज्ञानैश्वर्यादिभिरधिकत्वेन वृद्ध इत्यर्थ न तु वलीपलितादिना । यथोक्तं—

विप्राणा ज्ञानतो ज्यैष्ठ्य क्षत्रियाणा तु शौर्यत ।
वैश्याना धनबाहुल्याच्छूद्राणा वयसाऽधिक इति ।

४१—**अतिवृद्धः** ।

४२—**गुणाधिकः** ॥ ११९ ॥

४३—**नित्य आत्मसहायः** च इत्येकं नाम नित्यश्चासावात्मसहायश्चेति समासे विभक्त्यलोप आर्ष ।

४४—**देवासुरपतिः** ।

४५—**पतिः** अर्थात्सर्वस्य ।

४६—**युक्तः** सन्नद्ध सङ्ग्रामादौ ।

४७—**युक्तबाहुः** शत्रुमर्दनयोग्यौ बाहू यस्य ।

४८—**देवो दिवि सुपर्वणः** दिवि स्वर्गे य सुपर्वा इन्द्रसंज्ञो महान् तस्य देव आराधनीय ॥ १२० ॥

४९—**आषाढः** साहयते कर्तरि निष्ठा,आ समन्तात्सर्वं साहयति सहनं कारयतीत्याषाढ सर्वसहनसामर्थ्यप्रद इत्यर्थ ।

५०—सुषाढ ईषत्कर पूर्वोक्तं यस्य स **सुषाढः** ।

५१—**ध्रुवः** अचञ्चल ।

५२—**हरिणः** श्वेत शुद्ध इत्यर्थ ।

५३—**हरः** हन्तीति हा शूलस्तं राति आदत्ते स हर । हन्ते कर्तरि क्विप् तत्पूर्वात् 'राते आतोऽनुपसर्गे क' इति क । हर शूलीत्यर्थ ।

५४—वपु वपु प्रदाता आवर्तमानेभ्य स्वर्गच्युतेभ्य **[वपुरावर्तमानेभ्यः]** वसुरिति पाठे सेवकेभ्यो धनप्रद इत्यथ ।

५५—**वसुश्रेष्ठः** धनादप्याधिक । प्रेयो वित्तादिति श्रुते ।

५६—**महापथः** शिष्टाचाररूप ॥ १२१ ॥

५७—शिरोहारी ब्रह्मण शिरश्छेत्ता विमर्श विशेषेण विचारवान् **[शिरोहारी विमर्शश्च]** विवेकेनैव ब्रह्मशिरश्छिन्नं न तु क्रोधमात्रेणेति भाव । पदद्वयात्मकमेकं नाम ।

५८—**सर्वलक्षणलक्षितः** सामुद्रिकोक्तशुभलक्षणयुक्त सर्वाणि लक्ष्यन्ते ज्ञायन्तेऽर्थजातानि एतैरिति प्रमाणानि लक्षणान्युच्यन्ते तैर्लक्ष्यते न तु साक्षात्क्रियत इत्यर्थ ।

५९—अक्ष रथसन्धानदारु अत एव रथयोगी रथेन सम्बद्ध **[अक्षश्च रथयोगी]** ।

६०—**सर्वयोगी** सर्वसंस्पर्शी विभुत्वात् ।

६१—**महाबलः** महाश्वासौ बलश्च महाबल बलशब्दान्मत्वर्थीयोऽर्श आद्यच्प्रत्यय बलवान् वीर इत्यर्थ. ॥ १२२ ॥

६२—**समाम्नायो** वेद ।

६३—**असमाम्नायः** तदन्य स्मृतीतिहासपुराणागमादि ।

६४—**तीर्थदेवः** ।

६५—**महारथः** पृथिवीस्यन्दन ।

६६—**निर्जीवः** अचेतनप्रपञ्चात्मा ।

६७—**जीवनः** अचेतनस्यापि देहादेश्चैतन्यप्रदाता ।

६८—**मन्त्रः** प्रणवादिर्मृतसञ्जीवनो वा ।

६९—**शुभाक्षः** शान्तदृष्टि ।

७०—**बहुकर्कशः** संहर्तृत्वात् ॥ १२३ ॥

७१—**रत्नप्रभूतः** प्रभूतानि बहूनि रत्नानि उत्तमवस्तून्यस्मिन् रत्नप्रभूत । आहिताग्न्यादिवत्पूर्वानिपात ।

७२—**रक्ताङ्गः** ।

७३—**महार्णवनिपानवित्** निपानं कूपाद्बहिः पशूना पानार्थं कृतं कुंडं महार्णवा एव सर्वे यस्य निपानभूतास्तान् शोषणीयान् विन्दति लभते इति ।

७४—**मूलं** संसारतरोरधिष्ठानम् ।

७५—**विशालः** अत्यन्त शोभमान ।

७६—**अमृतः** सुधारूप ।

७७—**व्यक्ताव्यक्तः** कार्यकारणात्मा ।

७८—**तपोनिधिः** महामुनि ॥ १२४ ॥

७९—**आरोहणः** परं पदं आरुरुक्षु ।

८०—**अधिरोहः** तदेव अधिरूढ ।

८१—**शीलधारी** सदाचार ।

८२—**महायशाः** पुण्यकीर्ति ।

सेनाकल्पो महाकल्पो योगो युगकरो हरिः॥
युगरूपो महारूपो महानागहनो वधः।
न्यायनिर्वपणः पादः पण्डितो ह्यचलोपमः॥
बहुमालो महामालः शशी हरसुलोचनः।
विस्तारो लवणः कूपस्त्रियुगः सफलोदयः२७
त्रिलोचनो विषण्णाङ्गो मणिविद्धो जटाधरः
बिन्दुर्विसर्गः सुमुखः शरः सर्वायुधः सहः २८
निवेदनः सुखाजातः सुगन्धारो महाधनुः।
गन्धपाली च भगवानुत्थानः सर्वकर्मणाम्२९
मन्थानो बहुलो वायुः सकलः सर्वलोचनः।
तलस्तालः करस्थाली ऊर्ध्वसहननो महान्

८३—**सेनाकल्पः** सेनाया आकल्प अलङ्कार पराक्रम इत्यर्थ ।

८४—**महाकल्पः** दिव्यभूषण ।

८५—**योगः** चित्तवृत्तिनिरोध ।

८६—[**युगकरः**] युगानि कल्पादीनि करे यस्य कल्पादिप्रद ।

८७—हरति शरीर देशादेशान्तर प्रति नयतीति **हरिः** पादाभिमानिनी देवता त्रिविक्रम इत्यर्थ ॥ १२५ ॥

८८—**युगरूपः** धर्मावर्मतत्सकरूप ।

८९—**महारूपः** महाश्चासौ अरूपश्चेति तथा ।

९०—**महानागहनः** गजासुरघ्न ।

९१—**वधः** मृत्यु ।

९२—**न्यायनिर्वपणः** न्याययुक्त निवर्पण दान यस्य यथावर्म मनोरथप्रद ।

९३—**पादः** पद्यत इति गम्य ।

९४—**पण्डितः** परोक्षज्ञानी ।

९५—**अचलोपमः** निश्चल तत्त्वज्ञानीत्यर्थ ॥१२६

९६—[**बहुमालः**] बहु निरवधि मालते शोभते इति अनन्तलील ।

९७—**महामालः** महती आपादलम्बिनी अम्लानत्वादिगुणयुक्ता वा माला यस्य ।

९८—शशी चन्द्र स एव हरसुलोचन महादेवस्य शान्तदृष्टिरूप [**शशी हरसुलोचनः**] ।

९९—**विस्तारो लवणः कूपः** विशिष्टस्तार आच्छादनं यस्य सोऽतिविस्तीर्ण लवण क्षाररस कूप इव कूप महाकूपतुल्य क्षारसमुद्ररूपीत्यर्थ त्रिपदमेकं नाम ।

८००—**त्रियुगः** कलिबहिर्भूत ।

इति अष्टमं शतकम्।

१—अत एव **सफलोदयः** ॥ १२७ ॥

२—**त्रिलोचनः** त्रीणि शास्त्राचार्यध्यानानि लोचनानि दर्शनसाधनानि यस्य स त्रिलोचन ।

३—**विषण्णाङ्गः** विशेषेण सन्ना निरन्वयमुच्छिन्नाः अज्ञाख्या भूम्यादयोऽष्टौ मूर्तयो यस्य। अमूर्ते हि सूक्ष्मरूपेण मूर्तीनामन्वयोऽस्ति ततोऽप्ययमन्तरङ्ग शुद्धो भूमेत्यर्थ ।

४—**मणिविद्धः** मणिपिधानार्थं कर्णदेशे विद्ध कृतच्छिद्र कुण्डलीत्यर्थ ।

५—**जटाधरः** ।

६—**बिन्दुः** अनुस्वार ।

७—**विसर्गः** विसर्जनीय ।

८—**सुमुखः** व्यक्तवर्ण ।

९—**शरः** बाण ।

१०—**सर्वायुधः** ।

११—**सहः** सर्व सहते मर्षयतीति सह ॥ १२८ ॥

१२—**निवेदनः** निहीन सर्ववृत्त्युपरमेण वेदनं ज्ञानं यस्य ।

१३—**सुखाजातः** सुखरूपेण आजात वृत्तिविलये सति आविर्भूत ।

१४—**सुगन्धारः** शोभनो गन्धारदेशोद्भव ।

१५—**महाधनुः** पिनाकधन्वा ।

१६—[**गन्धपाली च भगवान्**] गन्धा लेशा सूक्ष्मा प्रपञ्चवासना ता पालयतीति गन्धपाली सर्वप्राणिधीवासनामय इत्यर्थ । स एव भगवान् ईश्वर एकं नाम ।

१७—**उत्थानः सर्वकर्मणां** उत्तिष्ठन्त्यस्मादित्युत्थान ॥ १२९ ॥

१८—[**मन्थानो बहुलो वायुः**] मन्थानो विश्वविलोडनसमर्थो बहुलो निरवधिर्वायु महान्प्रलयानिल इत्येक नाम त्रिपदम् ।

१९—**सकलः** पूर्ण ।

२०—**सर्वलोचनः** सर्वद्रष्टा ।

२१—**तलः** ताल करतलोत्थ एव तालवाद्यविशेष ।

२२—करावेव स्थालो भोजनभाजन तदस्यास्तीति **करस्थाली** ।

२३—**ऊर्ध्वसंहननः** श्रेष्ठो दृढशरीरश्चेत्यर्थ ।

२४—**महान्** अत्युच्च ॥ १३० ॥

छत्रं सुच्छत्रो विख्यातो लोकः सर्वाश्रयः क्रमः
मुण्डो विरूपो विकृतो दण्डी कुण्डी विकुर्वणः
हर्यक्षः ककुभो वज्री शतजिह्वः सहस्रपात् ।
सहस्रमूर्धा देवेन्द्रः सर्वदेवमयो गुरुः ॥ १३२
सहस्रबाहुः सर्वाङ्गः शरण्यः सर्वलोककृत् ।
पवित्रं त्रिककुन्मन्त्रः कनिष्ठः कृष्णपिङ्गलः ३३
ब्रह्मदण्डविनिर्माता शतघ्नीपाशशक्तिमान् ।
पद्मगर्भो महागर्भो ब्रह्मगर्भो जलोद्भवः ॥ १३४
गभस्तिर्ब्रह्मकृद्ब्रह्मी ब्रह्मविद्ब्राह्मणो गतिः ।

२५—**छत्रम्** ।

२६—**सुच्छत्रः** ।

२७—**विख्यातो लोकः** प्राणिभृन्मात्रप्रसिद्ध प्रकाश ।

२८—**सर्वाश्रयः क्रमः** सर्वस्य आश्रय आधारभूत क्रम पादविक्षेप त्रैविक्रमेण रूपेण पादाक्रान्तजगत्त्रय इत्यर्थ ।

२९—**मुण्डः** मुण्डिताशिरा ।

३०—अत एव **विरूपः** विकटरूप ।

३१—**विकृतः** सर्वा विक्रिया प्राप्त ।

३२—**दण्डी** ।

३३—**कुण्डी** ।

३४—**विकुर्वणः** करोतीति कुर्वा विगत कुर्वा यस्मात् विकुर्वण कर्माप्राप्य इत्यर्थ समासान्त आर्ष १३१

३५—**हर्यक्षः** सिंह ।

३६—**ककुभः** सर्वदिग्रूप ।

३७—**वज्री** ।

३८—**शतजिह्वः** ।

३९—**सहस्रपात** सहस्रमूर्धा ।

४०—**देवेन्द्रः** ।

४१—**सर्वदेवमयः** ।

४२—**गुरुः** ॥ १३२ ॥

४३—**सहस्रबाहुः** ।

४४—**सर्वाङ्गः** सर्व अञ्नति प्राप्नोतीति सर्वाङ्ग ।

४५—**शरण्यः** शरणाय साधुः ।

४६—**सर्वलोककृत्** ।

४७—**पवित्रं** पावनस्तीर्थादिरूप ।

४८—**त्रिककुन्मन्त्रः** त्रीणि ककुन्दीव ककुन्दि उच्चस्थानानि बीजशक्तिकीलकानि यस्य तादृशो मन्त्र ।

४९—**कनिष्ठः** अदितिपुत्राणा मध्ये य कनिष्ठो वामनरूपी विष्णुस्तद्रूप ।

५०—**कृष्णपिङ्गलः** हरिहरमूर्ति विष्णुर्नारायण कृष्ण इति कृष्णशब्दस्य हरौ निधिभेदे कपौ रुद्रे पिङ्गल कपिलेऽन्यवदिति **नानार्थकोशात्**, पिङ्गलशब्दस्य हरे च प्रसिद्धिदर्शनात् पुरुषं कृष्णपिङ्गल दरिद्र नीललोहितेत्यादिश्रुतेरप्ययमेवार्थ, नीलग्रीवो विलोहित इति लोहितपदेन रुद्रस्यापि ग्रहणात् । यदि तु नीललोहितत्व रुद्रस्य पूर्व लोहित पश्चान्नील इति कालभेदेन वा कण्ठे नील सर्वाङ्गे लोहित इति वा वामाङ्गे नीलो दक्षिणाङ्गे लोहित इति देशभेदेन वा आवरकप्रकृत्यंशेन नीलस्तत्प्रवर्तकपुरुषाशेन लोहित इति गुणभेदेन वा गृह्यते, तदा गुणवाचिनो शब्दयोर्द्रव्यवाचित्वं तद्वत्त्वाच्च तदेकदेशवाचित्वमिति विप्रकृष्टार्थकल्पना । अस्माकं तु विलोहितकृष्णपदयोर्मुख्यवृत्त्यैव शिवकेशववाचित्वं दृष्ट तेन तत्पर्याययोर्नीलपिङ्गलपदयोरपि हरिहरवाचित्वं वक्तुं युज्यते। तथा च कृष्णपिङ्गलपदेन नीललोहितपदेन वा हरिहरावेव ग्राह्यौ । निर्णीतार्थकपदान्तरसमभिव्याहारसामर्थ्यादनिर्णीतार्थकस्यापि पदस्यार्थो व्यवस्थापयितुं शक्य एवेति युक्तमुत्पश्याम । यद्यपि पूर्ववायुक्तेष्वप्यर्थेषु कुशकाशावलम्बने न किञ्चित्प्रमाणमुन्नेतुं शक्य तथापि ऋजुमार्गेण सिद्धयत्यर्थे वक्रेण साधनायोगात् शिवविष्णुनाम्नामन्योन्यस्मिन्प्रयोगदर्शनाच्च तयोरेकस्यैव व्यूहद्वयात्मत्वादत्र इदमेव व्याख्यानमिष्टम् । न चैवमिन्द्राग्निपदवत् द्विवचनेन भाव्यं तत्पुरुषादिपदेष्विव कृष्णश्चासौ पिङ्गलश्चेत्यभेदेनैव पदयोरन्वयोपपत्तौ भेदसूचकद्विवचनायोगात्। हरिहरयोरभेदस्य च प्रागेव प्रतिपादितत्वादिति दिक्। तदय सङ्ग्रह ॥ १३३ ॥

५१—**ब्रह्मदण्डविनिर्माता** ।

५२—**शतघ्नीपाशशक्तिमान्** ।

५३—**पद्मगर्भो ब्रह्मा** ।

५४—**महागर्भो** महान् गर्भोऽन्तरवकाशो यस्य ।

५५—**ब्रह्मगर्भो** वेदगर्भित ।

५६—**जलोद्भवः** जले 'सलिल एकोऽद्रष्टा'इति श्रुतेरेकार्णवे उद्भव आविर्भावो यस्य मायावीत्यर्थ ॥ १३४ ॥

५७—**गभस्तिः** रश्मिमान् ।

५८—**ब्रह्मकृत** वेदकर्ता ।

५९—**ब्रह्मी** वेदाध्यायी ।

६०—**ब्रह्मवित्** वेदार्थवित् ।

६१—**ब्राह्मणः** ब्राह्मिष्ठ ।

६२—**गतिः** ब्राह्मिष्ठानामेव परायणम् ।

अनन्तरूपो नैकात्मा तिग्मतेजाः स्वयंभुवः ३५
ऊर्ध्वगात्मा पशुपतिर्वातरहा मनोजवः ।
चन्दनी पद्मनालाग्रः सुरभ्युत्तरणो नरः ॥ ३६
कर्णिकारमहास्रग्वी नीलमौलिः पिनाकधृत्
उमापतिरुमाकान्तो जान्हवीधृदुमाधवः ३७
वरो वराहो वरदो वरेण्यः सुमहास्वनः ।
महाप्रसादो दमनः शत्रुहा श्वेतपिङ्गलः ॥ ३८
पीतात्मा परमात्मा च प्रयतात्मा प्रधानधृत् ।
सर्वपार्श्वमुखस्त्र्यक्षो धर्मसाधारणो वरः ३९

६३—अनन्तं रूपमस्य स **अनन्तरूपः** ।

६४—अत एव **नैकात्मा** अनेकशरीरधारी ।

६५—**तिग्मतेजाः स्वयंभुवः** ब्रह्मणो दृष्ट्या तिग्मतेजा दु सहपराक्रम स्वशिरश्छेदकत्वात् ॥ १३५ ॥

६६—**ऊर्ध्वगात्मा** उपाधित्रयादुपरिगत आत्मा स्वरूपं यस्य । ' स भूमिं सर्वतो वृत्वाऽत्यतिष्ठद्दशाङ्गुलम् ' इति श्रुते ।

६७—**पशुपतिः** जीवानामीश्वर ।

६८—**वातरंहाः** ।

६९—**मनोजवः** ।

७०—**चन्दनी** चन्दनालिप्तगात्र ।

७१—**पद्मनालाग्रः** पद्मनालमस्याग्रेऽस्तीति तथा । कदाचिद्ब्रह्मा स्वाश्रयभूतपद्मनालस्यान्त द्रक्ष्ये इति बुद्धया नालमार्गेण गच्छंस्तदादिं न प्राप्तवान् अतोऽर्वाचीनस्यापि नालस्यान्तो न दृष्ट किमुत नालक्षेत्रस्य भूस्थानीयस्येति भाव ।

७२—**सुरभ्युत्तरणः** कदाचिद्विष्णुस्पर्धया ब्रह्मा शिवस्य शिरोदेशो मया दृष्टस्तत्र त्वया साक्ष्यं देयमिति कामधेनुमुक्तवान् सा च ब्रह्ममयादनृतं साक्ष्यं दत्तवती ततो महादेवेन शप्ताऽमेध्याशिनी ते सन्ततिर्भविष्यतीति तादिदमुक्तं सुरभिं कामधेनुं ऊर्ध्वपदादध उत्तारयतीति सुरभ्युत्तरण ।

७३—एव मूर्तिद्वयस्याप्यन्तो येन न दृष्ट. सोऽप्ययमेवेत्याह- **नर इति** । न राति आदत्ते प्राप्नोत्यन्तमिति **नरः** ' आतोऽनुपसर्गे क ' ॥ १३६ ॥

७४—कर्णिकारपुष्पमयी महती स्रक् माला तद्वान् **कर्णिकारमहास्रग्वी** ।

७५ **नीलमौलिः** नीलमणिमयं किरीटं मौलौ यस्य ।

७६—**पिनाकधृत्** पित प्राप्त नाको द्यौर्येन स पिनाक । पि गताविति यतो निष्ठातस्य लोप । त्रिपुरासुरेण हृत स्वर्गो देवैर्यद्बलात् प्राप्तस्तन्महादेवस्य शैलेन्द्ररूपं धनु पिनाकस्तस्य धर्ता पिनाकधृत् यथा नमुचिं फेनेन निघ्नत इन्द्रस्य फेने यथा वज्रप्रवेश एवं शैलेऽपि पिनाकप्रवेशात्सोऽपि पिनाक इत्यर्थ ।

७७—**[उमापतिः]**उमा ब्रह्मविद्या तस्या. पतिर्यथेष्टविनियोगात्स्वामी ।

७८—उमया तयैव ब्रह्मविद्यया कान्त कामित वशीकृत **[उमाकान्तः]** ।

७९—**जान्हवीधृत्** ।

८०—उमाया शैलपुत्र्या धवो भर्ता **उमाधवः** । ॥ १३७ ॥

८१—**वरो वराहः** आद्यो भूमेरुद्धर्ता, यज्ञरूपी वराह ।

८२—वरै श्रेष्ठै रूपैर्दयते नानावतारैर्जगत्पालयतीति **वरदः** ।

८३—अत एव वरेण्य **वरणीयः** ।

८४—**सुमहास्वनः** वेदगर्जितो हयग्रीव ।

८५—**महाप्रसादः** ।

८६—दमन इव सुरभित्वात् **दमनः** तत्पूज्यत्वाद्वा ।

८७—शत्रून् कामादीन् हन्तीति **शत्रुहा** ।

८८—**श्वेतपिङ्गलः** अर्द्धनारीनटेश्वरो दक्षिणार्द्धे कर्पूरगौर वामार्द्धे कनकपिङ्गल । ये तु श्वेतपिङ्गलपदस्यार्थं कृष्णपिङ्गलपदेन ब्रुवते ते श्वेतमपि कृष्णीकर्तुं समर्था महान्तो भवन्तीति ॥ १३८ ॥

८९—**पीतात्मा** सुवर्णवर्णशरीर य एषोन्तरादित्ये हिरण्मय पुरुषो दृश्यते हिरण्यश्मश्रुर्हिरण्यकेश आप्रणखात्सर्व एव सुवर्ण इति श्रु युक्त ।

९०—**परमात्मा** अन्नमय-प्राणमय-मनोमय-विज्ञानमयानन्दमयेभ्य पञ्चभ्योऽपरमेभ्य आत्मभ्योऽन्य षष्ठ आनन्दमात्रस्वरूप ।

९१—**प्रयतात्मा** शुद्धचित्त ।

९२—**प्रधानधृत्** त्रिगुणात्मकं जगत्कारणं प्रधानाख्यमज्ञानं तदधिष्ठानभूत. ।

९३—**सर्वपार्श्वमुखः** चतसृषु दिक्षु ऊर्ध्वं च मुखं यस्येति पञ्चवक्त्र उक्त ।

९४—**त्र्यक्षः** त्रीणि सोमसूर्याग्निरूपाणि अक्षाणि नेत्राणि यस्य ।

९५—**धर्मसाधारणो वरः** पुण्यानुरूपप्रसादात्मा ॥ १३९ ॥

चराचरात्मा सूक्ष्मात्मा अमृतो गोवृषेश्वरः।
साध्यर्षिर्वसुरादित्यो विवस्वान्सविताऽमृतः
व्यासः सर्गः सुसंक्षेपो विस्तरः पर्ययो नरः।
ऋतुः संवत्सरो मासः पक्षः संख्यासमापनः
कला काष्ठा लवा मात्रा मुहूर्ताहः क्षपाः क्षणाः
विश्वक्षेत्रं प्रजाबीजं लिङ्गमाद्यस्तु निर्गमः ४२
सदसद्व्यक्तमव्यक्त पिता माता पितामहः।
स्वर्गद्वारं प्रजाद्वारं मोक्षद्वारं त्रिविष्टपम्॥१४३
निर्वाणं ह्लादनश्चैव ब्रह्मलोकः परा गतिः।
देवासुरविनिर्माता देवासुरपरायणः॥ ४४

९६—**चराचरात्मा** रलयोरैक्यात् चलाचलात्मा दिवि पन्थाश्चलाचल इति श्रुत्युक्तौ यावावृत्त्यनावृत्तिमार्गौ तद्रूपश्चराचरात्मा कर्मानुरूप प्रसादानुरूपो मार्गोऽप्ययमेवेति नामद्वयार्थ ।

९७—**सूक्ष्मात्मा** मार्गद्वयागोचरस्वरूप ।

९८—अमृतो मरणवर्जितो निष्काम गोवृष पृथिवीपतिर्धर्म तस्य ईश्वर [**अमृतो गोवृषेश्वरः**] निष्कामधर्मस्यामृत मोक्षरूप फल दातु समर्थ ।

९९—साध्या देवानामपि देवा तेषामपि ऋषि आचार्य **साध्यर्षिः।**

१००—**वसुः** देवताविशेष उपरिचरस्य राज्ञो व्यावृत्त्यर्थं तस्यैव विशेषण **आदित्य** इति अदिते पुत्रो वसुर्नामेत्यर्थ ॥

इति नवमं शतकम्।

१—**विवस्वान्** विशेषेण वस्ते आच्छादयत्यनेन भुवनमिति विव अंशुजाल तद्वान् सूयते इति **सविता** कृतो बहुलमिति वार्तिकात्कर्मणि तृच् बाहुलकात् यज्ञेऽभिषूयमाण **अमृतः** सोम अंशुरशुष्टेदेवसोमेति मन्त्रालिङ्गात्। अपाम सोममममृता अभूमेति अमृतत्वसाधनत्वश्रुतेश्च सोमस्य विवस्वत्त्वममृतत्वं च ज्ञेयं तेन त्रिपदमेकं नाम ॥ १४० ॥

२—**व्यासः** पुराणेतिहासादे स्रष्टा ।

३—**सर्गः** तस्यैव सृज्यं पुराणादि अस्य विशेषणे **सुसक्षेपो विस्तर** इति च सूत्रादिरूपो भाष्यादिरूप इत्यर्थ । इदमपि त्रिपदं नाम एव सति होमे एकैकनामजपे वा एव मन्त्र ऊह्य ओं सर्गाय सुसक्षेपाय विस्तराय स्वाहेति ओ नम सर्गाय सुसंक्षेपाय विस्तरायेति च भूरग्नये च पृथिव्यै च महते च स्वाहेतिवदनेकपदतोऽप्येकनामत्व ज्ञेयम् ।

४—**पर्ययो नरः** परित अयते व्याप्नोतीति पर्यय स च नरो जीव समष्टिजीवो वैश्वानर इत्यर्थ ।

५—**ऋतुः**।

६—**संवत्सरः**।

७—**मासः**।

८—**पक्षः**।

९—**संख्यासमापनः** ऋत्वादिसख्यासमाप्तिरूपः सङ्क्रान्तिदर्शपूर्णमासादिरूप ॥ १४१ ॥

१०—**कलाः**।

११—**काष्ठा**।

१२—**लवाः**।

१३—**मात्रा**।

१४—**मुहूर्ताहःक्षपा** इति समस्त नाम ।

१५—**क्षणाः** ऋत्वाद्या कालावयवा स्पष्टार्था ।

१६—**विश्वक्षेत्रं** ब्रह्माण्डवृक्षस्यालवालं चिन्मात्रम्।

१७—**प्रजाबीज** प्रजाना बीजं मायाविशिष्टचैतन्यरूपं अव्यक्तम्।

१८—**लिङ्गं** महत्तत्त्वम्।

१९—**आद्यो निर्गमः** अंकुररूपी अहमिति प्रथमोऽध्यास ॥ १४२ ॥

२०—**सत् कार्यम्**।

२१—**असत्** कारणम्।

२२—**व्यक्तं** इन्द्रियग्राह्यम्।

२३—**अव्यक्तं** अहं न जानामीत्यनुभवैकवेद्यमज्ञानम्।

२४—**पिता**।

२५—**माता**।

२६—**पितामहः**।

२७—**स्वर्गद्वारं** तप ।

२८—**प्रजाद्वारं** राग ।

२९—**मोक्षद्वारं** वैराग्यम्।

३०—**त्रिविष्टपं** स्वर्गसाधनधर्म ॥ १४३ ॥

३१— **निर्वाणं** मोक्ष ।

३२—**ह्लादनः** आनन्दयिता एष ह्येवानन्दयातीति श्रुते ।

३३—**ब्रह्मलोकः** सत्यलोक ।

३४—**परा गतिः** ततोऽप्यधिका गतिर्गन्तव्य ।

३५—**देवासुरविनिर्माता**।

३६—**देवासुरपरायणः** पुंस्त्वमार्षम्॥१४४॥

देवासुरगुरुर्देवो देवासुरनमस्कृतः ।
देवासुरमहामात्रो देवासुरगणाश्रयः ॥ ४५
देवासुरगणाध्यक्षो देवासुरगणाग्रणीः ।
देवातिदेवो देवर्षिर्देवासुरवरप्रदः ॥ ४६
देवासुरेश्वरो विश्वो
देवासुरमहेश्वरः ।
सर्वदेवमयोऽचिन्त्यो
देवतात्माऽऽत्मसंभवः ॥ ४७

उद्भित्त्रिविक्रमो वैद्यो विरजो नीरजोऽमरः ।
ईड्यो हस्तीश्वरो व्याघ्रो देवसिंहो नरर्षभः ४८
विबुधोऽग्रवरः सूक्ष्मः सर्वदेवस्तपोमयः ।
सुयुक्तः शोभनो वज्री प्रासानां प्रभवोऽव्ययः
गुहः कान्तो निजः सर्गः
पवित्रं सर्वपावनः ।
शृङ्गी शृङ्गप्रियो बभ्रू
राजराजो निरामयः ॥ ५०

३७—**देवासुरगुरुः** बृहस्पतिशुक्ररूप ।
३८—**देवो** विजिगीषु ।
३९—**देवासुरनमस्कृतः** ।
४०—**देवासुरमहामात्रः** महामात्र श्रेष्ठ ।
४१—**देवासुरगणाश्रयः** आश्रणीय ॥ १४५ ॥
४२—**देवासुरगणाध्यक्षः** इन्द्रविरोचनादिरूप ।
४३—**देवासुरगणाग्रणीः** स्वामिकार्तिकेयकोशि दैत्यरूप ।
४४—**देवातिदेवः** इन्द्रियाण्यतिक्रम्य स्वयमेव प्रकाशमान ।
४५—**देवर्षिः** नारदादिरूपः ।
४६—**देवासुरवरप्रदः** ब्रह्मरुद्रादिरूपेण ॥१४६॥
४७—**देवासुरेश्वरः** तेषामन्तर्यामी ।
४८—**विश्वः** विशत्यस्मिन्निति विश्व जगद्गर्भेशय ।
४९—**देवासुरमहेश्वरः** अन्तर्यामिण ईश्वरस्याप्यधिष्ठान अतो महेश्वर ।
५०—**सर्वदेवमयः** अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यावित्यादि श्रुते ।
५१—**अचिन्त्यः** नास्ति चिन्त्योऽन्यो यस्य यस्माद्वा ।
५२—**देवतात्मा** देवतानामन्तरात्मा प्रत्यग्रूप ।
५३—**आत्मसम्भवः** स्वत सिद्ध ॥ १४७ ॥
५४—**उद्भित्** उद्भिद्याविर्भवतीति वा फलं उद्भिनत्तीति वा स्थावररूपो यज्ञादिरूपो वा ।
५५—**त्रिविक्रमः** त्रीणि भुवनानि क्रमत इति वामन ।
५६—**वैद्यो** विद्यावान् ।
५७—**विरजः** निर्मल ।
५८—**नीरजः** रजोगुणहीन ।
५९—**अमरः** विनाशहीन ।
६०—**ईड्यः** स्तुत्य ।
६१—**हस्तीश्वरः** कालहस्तीश्वराख्यवायव्यलिङ्गरूप ।
६२—**व्याघ्रो** व्याघ्रेश्वरनामकलिङ्गरूप ।
६३—**देवसिंहः** देवेषु पराक्रमी ।
६४—**नरर्षभः** नरेष्वपि श्रेष्ठ ॥ १४८ ॥
६५—**विबुधः** विशेषेण प्राज्ञ ।
६६—**अग्रवरः** अग्रे वृणोति यज्ञभागादिकमित्यग्रवर ।
६७—**सूक्ष्मः** दुर्लक्ष्य ।
६८—**सर्वदेवः** तत्तद्देवतासु कात्स्न्येन परिसमाप्त ।
६९—**तपोमयः** तप प्रधान ।
७०—**सुयुक्तः** सुतरा युक्त सन्नद्ध ।
७१—**शोभनः** कल्याण ।
७२—**वज्री** वज्रायुध ।
७३—**प्रासानां** आयुधविशेषाणा **प्रभव** उत्पत्तिस्थानम् ।
७४—**अव्ययः** न विविधेन रूपेण एति प्राप्नोत्येन साधक इत्यव्यय एकाग्रचित्तप्राप्य । एरच्प्रत्ययान्तोयम् ॥ १४९ ॥
७५—**गुहः** कुमार ।
७६—**कान्तः** कस्य सुखस्य अन्त सीमा आनन्दस्य परा काष्ठेत्यर्थ ।
७७—**निजः सगः** सृज्यत इति सर्गस्तस्य विशेषणं निज स्वस्मादनन्य ।
७८—**पवित्रं** पविर्वज्रं तत्तुल्य मृत्युदु ख तस्मात् त्रायत इति पवित्रम् ।
७९—अत एव **सर्वपावनः** सर्वेषा ब्रह्मादीनामपि शुद्धिकर ।
८०—**शृङ्गी** वृषभादिरूप ।
८१—**शृङ्गप्रियः** पर्वताशिखराश्रय ।
८२—**बभ्रुः** शनैश्चर ।
८३—**राजराजः** कुबेर ।
८४—**निरामयः** निर्दोष ॥ १५० ॥

अभिरामः सुरगणो विरामः सर्वसाधनः ।
ललाटाक्षो विश्वदेवो हरिणो ब्रह्मवर्चसः ५१
स्थावराणां पतिश्चैव
नियमेन्द्रियवर्धनः ।
सिद्धार्थः सिद्धभूतार्थोऽ-
चिन्त्यः सत्यव्रतः शुचिः ॥ ५२
व्रताधिपः परं ब्रह्म
भक्तानां परमा गतिः ।
विमुक्तो मुक्ततेजाश्च
श्रीमान् श्रीवर्धनो जगत् ॥ ५३

यथा प्रधानं भगवानिति भक्त्या स्तुतो मया
यन्न ब्रह्मादयो देवा विदुस्तत्त्वेन नर्षयः ॥१५४
स्तोतव्यमर्च्यं वन्द्यं च
कः स्तोष्यति जगत्पतिम् ।
भक्त्या त्वेवं पुरस्कृत्य
मया यज्ञपतिर्विभुः ॥ ५५
ततोऽभ्यनुज्ञां संप्राप्य स्तुतो मतिमतां वरः ।
शिवमेभिः स्तुवन् देवं नामभिः पुष्टिवर्धनैः५६
नित्ययुक्तः शुचिर्भक्तः
प्राप्नोत्यात्मानमात्मना ॥ ५७

८५—**अभिरामः** प्रीतिजनक ।

८६—**सुरगणः** देवसङ्घरूप ।

८७—**विरामः** सर्वोपरमरूप ।

८८—**सर्वसाधनः** सर्वाणि आश्रमकर्माणि यदवाप्तये साधनानि यस्मिन्निति ।

८९—**ललाटाक्षः** ।

९०—**विश्वदेवः** विश्वैर्ब्रह्माण्डकन्दुकैर्दीव्यति क्रीडत इति ।

९१—**हरिणः** मृगरूप ।

९२—[**ब्रह्मवर्चसः**] ब्रह्मवर्चस विद्यातप समुद्भव तेज तद्वान् अर्शआद्यच्प्रत्ययान्तोऽयम् ॥ १५१ ॥

९३—**स्थावराणां पतिः** हिमाचलादिरूप ।

९४—**नियमेन्द्रियवर्धनः** नियमैर्निग्रहै कृत्वा इन्द्रियाणा समनस्काना वर्धनो हिंसक क्षीणमना लब्धसमाधिरित्यर्थ ।

९५—**सिद्धार्थः** नित्यसिद्ध एव मोक्षो ज्ञानापगममात्रेण कण्ठगतविस्मृतचामीकरवदर्थोऽर्थनीयो यस्य स सिद्धार्थ तत्त्वज्ञानार्थी ।

९६—अत एव **सिद्धभूतार्थः** पूर्व सिद्ध पश्चाद्भूत साधित सिद्धभूत पूर्वकालैकेति समास , स चासौ अर्थश्च सिद्धभूतार्थ उक्तविधो मोक्ष ।

९७—अत एव **अचिन्त्यः** चिन्त्यादुपास्याद्न्य. प्रत्यगात्मत्वात् 'तदेव ब्रह्म त्व विद्धि नेदं यदिदमुपासते' इति श्रुतेश्च ।

९८—**सत्यव्रतः** सत्यं ब्रह्म तदर्थान्येव व्रतानि तपासि यस्य ।

९९—**शुचिः** निर्मलचित्त. ॥ १५२ ॥

१०००—**व्रताधिपः** तत्तद्व्रतफलप्रद ।

इति दशमं शतकम् ।

१—**परं** विश्वतैजसप्राज्ञेभ्योऽपरब्रह्मभ्य परं तुरीय शिवाख्य 'शिवमद्वैत चतुर्थं मन्यन्ते' इति श्रुतिप्रसिद्धम् ।

२—अत एव **ब्रह्म** देशत कालतो वस्तुतश्च परिच्छेदशून्यम् । 'नेह नानास्ति किञ्चन' इति श्रुतेर्विश्वादीनामनृतत्वेन स्वगतभेदस्याप्यभावादखण्डैकरस वस्तु तन्मात्रम् ।

३—**भक्तानां परमा गतिः** भजो आमर्दनेऽस्य रूपं भक्तानां विश्वादिषु पूर्वपूर्वस्य उत्तरस्मिन्नुत्तरस्मिन्प्रविलापनलक्षणं आमर्दन सैन्धवखिल्यसलिलन्यायेन कुर्वता परमा निरतिशया गति कैवल्यरूपा विश्रान्ति ।

४—**विमुक्तः** देहान्ते विशेषेण मुक्त ।

५—कुतो विमुक्तत्वमत आह—**मुक्ततेजा** इति। तेज पदेनात्र लिङ्गशरीरमुच्यते । तत् मुक्तं तेजोऽनेनेति तथा ।

६—मुक्ततेजस्त्वमपि कुत यत **श्रीमान्** योगैश्वर्यवान् तथाहि—योगी जितमृत्युर्यथाकामं भीष्मवदिहैव तिष्ठति ब्रह्मलोक वा मूर्धन्यनाड्या गच्छति। इहैव लिङ्गशरीर कवचवद्वा त्यक्त्वा विशुद्ध कैवल्यमाप्नोति ।

७—श्रीमत्त्वमपि कुत यत. **श्रीवर्धनः** 'ऋच सामानि यजूंषि सा हि श्रीरमृता सताम्' इति श्रुतेर्वेदत्रयरूपा श्रियं कर्मोपासनिज्ञानकाण्डात्मिका वर्धयति तत्तदुक्तार्थानुष्ठानेन सम्यक् परिपोषयति स श्रीवर्धन. ।

८—**जगत्** अव्याकृतादिघटान्तनश्वरवस्तुरूप गच्छति नित्यं रूपान्तरं प्राप्नोतीति जगदिति व्युत्पत्ते प्रधानादीनामपि जगत्त्व चलं गुणवृत्तमिति कापिलसिद्धान्ताच्च एवं च य आदौ स्थिर उक्त स एव जगदित्युक्ते स्थिरे भूमात्मनि जगत्कल्पितमित्युक्तं भवति, ततश्च 'आत्मैवेदं सर्वं ब्रह्मैवेदं सर्वं तत्त्वमस्यहं ब्रह्मास्म्ययमात्मा' इत्यादि शास्त्रसिद्धं ब्रह्माद्वैतं प्रतिपादितं भवतीति शिवम् ॥ १५३ ॥

इति नाम्नामष्टाधिकं दशमं शतकं समाप्तम् ।


यथेति । बहुना मध्ये सहस्रं प्रधानानि नामान्युद्धृत्य स्तुतोऽसीत्यर्थस्यार्थ. ॥ १५४ ॥

एतद्धि परमं ब्रह्म पर ब्रह्माधिगच्छति ।
ऋषयश्चैव देवाश्च स्तुवन्त्येतेन तत्परम् ॥५८
स्तूयमानो महादेवस्तुष्यते नियतात्मभिः ।
भक्तानुकम्पी भगवानात्मसंस्थाकरो विभुः ॥
तथैव च मनुष्येषु ये मनुष्याः प्रधानतः ।
आस्तिकाः श्रद्दधानाश्च बहुभिर्जन्मभिः स्तवैः
भक्त्या ह्यनन्यमीशान परं देवं सनातनम् ।
कर्मणा मनसा वाचा भावेनामिततेजसः ६१
शयाना जाग्रमाणाश्च व्रजन्नुपविशंस्तथा ।
उन्मिषन्निमिषंश्चैव चिन्तयन्तः पुनः पुनः ६२
शृण्वन्तः श्रावयन्तश्च कथयन्तश्च ते भवम् ।
स्तुवन्तः स्तूयमानाश्च तुष्यन्ति च रमन्ति च
जन्मकोटिसहस्रेषु नानासंसारयोनिषु ।
जन्तोर्विगतपापस्य भवे भक्तिः प्रजायते॥६४
उत्पन्ना च भवे भक्तिरनन्या सर्वभावतः ।
भाविनः कारणे चास्य सर्वयुक्तस्य सर्वथा ।
एतद्देवेषु दुष्प्रापं मनुष्येषु न लभ्यते ।
निर्विघ्ना निश्चला रुद्रे भक्तिरव्यभिचारिणी
तस्यैव च प्रसादेन भक्तिरुत्पद्यते नृणाम् ।
येन यान्ति परां सिद्धिं तद्भागवतचेतसः ॥
ये सर्वभावानुगताः प्रपद्यन्ते महेश्वरम् ।
प्रपन्नवत्सलो देवः संसारात्तान्समुद्धरेत् ६८
एवमन्ये विकुर्वन्ति देवाः संसारमोचनम् ।
मनुष्याणामृते देव नान्या शक्तिस्तपोबलम्
इति तेनेन्द्रकल्पेन
भगवान्सदसत्पतिः ।
कृत्तिवासाः स्तुतः कृष्ण
तण्डिना शुभबुद्धिना ॥ ७०
स्तवमेतं भगवतो ब्रह्मा स्वयमधारयत् ।
गीयते च स बुद्ध्येत ब्रह्मा शङ्करसन्निधौ१७१

इदं पुण्यं पवित्रं च सर्वदा पापनाशनम् ।
योगदं मोक्षद चैव स्वर्गदं तोषदं तथा ॥ ७२
एवमेतत्पठन्ते य एकभक्त्या तु शङ्करम् ।
या गतिः सांख्ययोगानां व्रजन्त्येतां गतिं तदा
स्तवमेतं प्रयत्नेन सदा रुद्रस्य सन्निधौ ।
अब्दमेकं चरेद्भक्तः प्राप्नुयादीप्सितं फलम्७४
एतद्रहस्यं परम ब्रह्मणो हृदि संस्थितम् ।
ब्रह्मा प्रोवाच शक्राय शक्रः प्रोवाच मृत्यवे७५
मृत्युः प्रोवाच रुद्रेभ्यो
रुद्रेभ्यस्तण्डिमागमत् ।
महता तपसा प्राप्त-
स्तण्डिना ब्रह्मसद्मनि ॥ ७६
तण्डिः प्रोवाच शुक्राय गौतमाय च भार्गवः
वैवस्वताय मनवे गौतमः प्राह माधव ॥ ७७
नारायणाय साध्याय
समाधिष्ठाय धीमते ।
यमाय प्राह भगवान्
साध्यो नारायणोऽच्युतः ॥ ७८
नाचिकेताय भगवानाह वैवस्वतो यमः ।
मार्कण्डेयाय वार्ष्णेय नाचिकेतोऽभ्यभाषत
मार्कण्डेयान्मया प्राप्तो नियमेन जनार्दन ।
तवाप्यहममित्रघ्न स्तवं दद्यां ह्यविश्रुतम् ॥८०
स्वर्ग्यमारोग्यमायुष्यं
धन्यं वेदेन संमितम् ।
नास्य विघ्नं विकुर्वन्ति
दानवा यक्षराक्षसाः ।
पिशाचा यातुधाना वा
गुह्यका भुजगा अपि ॥ ८१
यः पठेत शुचिः पार्थ ब्रह्मचारी जितेन्द्रियः ।
अभग्नयोगो वर्षं तु सोऽश्वमेधफलं लभेत १८२

एतद्धीति । परमं ब्रह्म उत्कृष्टा ब्रह्मप्राप्तिसाधनभूता विद्या । एता जपन् परं ब्रह्म कैवल्यं अधिगच्छतीत्यध्याहृत्य योज्यम् ॥ ५८ ॥ आत्मसंस्थाकर आत्मनि प्रतीचि संस्थाऽनन्यव्यापाररूपा परिसमाप्तिं ता करोति मोक्षप्रद इत्यर्थ ॥ ५९ ॥ **तथैवेति** । बहुभिर्जन्मभिरीशानं स्तवै स्तुवन्तस्तुष्यन्ति च रमन्ति चेति प्रथमद्वितीयचतुर्थस्थैरन्वय ॥ ६० ॥ भक्त्या आराध्योऽयमिति निश्चयेन भावेन प्रीत्या ॥ ६१ ॥ व्रजन्नित्याद्येकवचनानि बहुवचनार्थानि सुपा सुलुगिति वा विभक्तेरार्ष सु ॥ ६२ ॥ अनन्या अभेदेन शिवोऽहमस्मीति भावनया । तथा च श्रुति —' अथ योऽन्या देवातामुपास्तेऽन्योऽसावन्योऽहमिति न स वेद यथा पशुरेव स देवतानाम् ' इति, भेदेनोपासन निन्दति–भवे शिवे कारणे भक्तिरस्य पुंसः भाविनो भाग्यात् सर्वयुक्तस्य सर्वसाधनवत सर्वथा सर्वैः प्रकारैरुत्पन्ना भवतीति संबन्ध ॥ ६५ ॥ **एवमिति** । संसारमोचनं देवं ऋते अन्ये देवा मनुष्याणा तपोबलं विकुर्वन्ति नाशयन्तीति सम्बन्ध । तेषा यतोऽन्या शक्तिर्नास्ति ॥ ६९ ॥ इति हेतो तेन तण्डिना ॥ ७० ॥ गीयते च सस्तवो ब्रह्मणा शङ्करसन्निधौ अतस्तं ब्रह्मा ब्राह्मणो बुद्धयेत जानीयात् ॥ १७१ ॥ स्पष्टार्थो ग्रन्थशेष ॥ ७२ ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि महादेवसहस्रनामस्तोत्रे सप्तदशोऽध्यायः ॥ १७ ॥



१८

वैशम्पायन उवाच ।

महायोगी ततः प्राह कृष्णद्वैपायनो मुनिः
पठस्व पुत्र भद्रं ते प्रीयता ते महेश्वरः ॥ १
पुरा पुत्र मया मेरौ तप्यता परमं तपः ।
पुत्रहेतोर्महाराज स्तव एषोऽनुकीर्तितः ॥ २
लब्धवानीप्सितान्कामानहं वै पाण्डुनन्दन ।
तथा त्वमपि शर्वाद्धि सर्वान्कामानवाप्स्यसि
कपिलश्च ततः प्राह साङ्ख्यर्षिर्देवसंमतः ।
मया जन्मान्यनेकानि भक्त्या चाराधितो भवः
प्रीतश्च भगवान् ज्ञानं ददौ मम भवान्तकम् ।
चारुशीर्षस्ततः प्राह शक्रस्य दयितः सखा ।
आलम्बायन इत्येवं विश्रुतः करुणात्मकः ५
मया गोकर्णमासाद्य तपस्तप्त्वा शतं समाः
अयोनिजानां दान्तानां धर्मज्ञानां सुवर्चसाम्
अजराणामदुःखानां शतवर्षसहस्रिणाम् ।
लब्धं पुत्रशत शर्वात्पुरा पाण्डुनृपात्मज ॥ ७
वाल्मीकिश्चाह भगवान्युधिष्ठिरमिदं वचः ।
विवादे साग्निमुनिभिर्ब्रह्मघ्नो वै भवानिति ।
उक्तः क्षणेन चाविष्टस्तेनाधर्मेण भारत ।
सोऽहमीशानमनघममोघं शरणं गतः ॥ ९
मुक्तश्चास्मि ततः पापैस्ततो दुःखविनाशनः ।
आह मां त्रिपुरघ्नो वै यशस्तेऽग्र्यं भविष्यति॥
जामदग्न्यश्च कौन्तेयमिदं धर्मभृतां वरः ।
ऋषिमध्ये स्थितः प्राह ज्वलन्निव दिवाकरः॥
पितृविप्रवधेनाहमार्तो वै पाण्डवाग्रज ।
शुचिर्भूत्वा महादेवं गतोऽस्मि शरण नृप १२
नामभिश्चास्तुवं देवं ततस्तुष्टोऽभवद्भवः ।
परशुं च ततो देवो दिव्यान्यस्त्राणि चैव मे॥
पापं च ते न भविता अजेयश्च भविष्यसि ।
न ते प्रभविता मृत्युरजरश्च भविष्यसि ॥ १४
आह मा भगवानेव शिखण्डी शिवविग्रहः ।
तदवाप्तं च मे सर्वं प्रसादात्तस्य धीमतः॥१५
विश्वामित्रस्तदोवाच क्षत्रियोऽहं तदाऽभवम्
ब्राह्मणोऽहं भवानीति मया चाराधितो भवः
तत्प्रसादान्मया प्राप्तं ब्राह्मण्यं दुर्लभं महत् ।
असितो देवलश्चैव प्राह पाण्डुसुत नृपम्॥१७
शापाच्छक्रस्य कौन्तेय विभो धर्मोऽनशत्तदा
तन्मे धर्मं यशश्चाग्र्यमायुश्चैवाददत्प्रभुः ॥ १८
ऋषिर्गृत्समदो नाम शक्रस्य दयितः सखा ।
प्राहाजमीढं भगवान् बृहस्पतिसमद्युतिः १९
वरिष्ठो नाम भगवांश्चाक्षुषस्य मनोः सुतः ।
शतक्रतोरचिन्त्यस्य सत्रे वर्षसहस्रिके ॥ २०
वर्तमानेऽब्रवीद्वाक्यं साग्नि ह्युच्चारिते मया ।
रथन्तरे द्विजश्रेष्ठ न सम्यगिति वर्तते ॥ २१
समीक्षस्व पुनर्बुद्ध्या पापं त्यक्त्वा द्विजोत्तम
अयज्ञवाहिनं पापमकार्षीस्त्वं सुदुर्मते ॥ २२
एवमुक्त्वा महाक्रोधः प्राह शंभुं पुनर्वचः ।
प्रज्ञया रहितो दुःखी नित्यभीतो वनेचरः २३
दशवर्षसहस्राणि दशाष्टौ च शतानि च ।
नष्टपानीयपवने मृगैरन्यैश्च वर्जिते ॥ २४

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तदशोऽध्याय ॥ १७ ॥

१८

महायोगीति । पठस्व स्तवमिति शेष । हे पुत्र युधिष्ठिर ॥१॥ आलम्बायन आलम्बगोत्र ॥ ५ ॥ हे पुत्र शत पुत्राणामिति शेष ॥ ७ ॥ विवादे वेदविपरीतवादे अग्निसहितैर्मुनिभिरुक्त इति सम्बन्ध ॥८॥ तेन वेदविरोधजेन ॥९॥ पितृतुत्या विप्रा ज्येष्ठो भ्राता पितु सम ' इति स्मृतेर्ज्येष्ठा भ्रातरस्तेषा वधेन ॥ १२ ॥ शिखण्डी कपर्दा शिवविग्रह कल्याणशरीर ॥ १५ ॥ शक्रस्य धर्मशास्त्रे क्वचिदन्यथाकरणात् कुपितस्य प्रभु प्रार्थित सन्निति शेष ॥ १८ ॥ उच्चारिते अन्यथेति शेष ॥ २१ ॥ पापं वितथाभिनिवेश त्यक्त्वा समीक्षस्व विचारय । अयज्ञवाहिन न यज्ञं वहति तं पापं अवाक्षरपाठजमपराधम् ॥ २२ ॥

अयज्ञीयद्रुमे देशे रुरुसिंहनिषेविते ।
भविता त्वं मृगः क्रूरो महादुःखसमन्वितः२५
तस्य वाक्यस्य निधने पार्थ जातो ह्यहं मृगः
ततो मां शरणं प्राप्तं प्राह योगी महेश्वरः २६
अजरश्चामरश्चैव भविता दुःखवर्जितः ।
साम्यं ममास्तु ते सौख्यं युवयोर्वर्धतां क्रतुः
अनुग्रहानेवमेष करोति भगवान् विभुः ।
परं धाता विधाता च सुखदुःखे च सर्वदा
अचिन्त्य एष भगवान्कर्मणा मनसा गिरा ।
न मे तात युधिश्रेष्ठ विद्यया पण्डितः समः२९
वासुदेवस्तदोवाच पुनर्मतिमतां वरः ।
सुवर्णाक्षो महादेवस्तपसा तोषितो मया ३०
ततोऽथ भगवानाह प्रीतो मा वै युधिष्ठिर ।
अर्थात्प्रियतरः कृष्ण मत्प्रसादाद्भविष्यसि ३१
अपराजितश्च युद्धेषु तेजश्चैवानलोपमम् ।
एवं सहस्रशश्चान्यान्महादेवो वरं ददौ ॥ ३२
मणिमन्थेऽथ शैले वै पुरा संपूजितो मया ।
वर्षायुतसहस्राणां सहस्रं शतमेव च ॥ ३३
ततो मां भगवान्प्रीत इदं वचनमब्रवीत् ।
वरं वृष्णीष्व भद्रं ते यस्ते मनसि वर्तते ॥३४
ततः प्रणम्य शिरसा इदं वचनमब्रुवम् ।
यदि प्रीतो महादेवो भक्त्या परमया प्रभुः३५
नित्यकालं तवेशान भक्तिर्भवतु मे स्थिरा ।
एवमस्त्विति भगवान्स्तत्रोक्त्वाऽन्तरधीयत

जैगीषव्य उवाच ।

ममाष्टगुणमैश्वर्यं दत्त भगवता पुरा ।
यत्नेनान्येन बलिना वाराणस्यां युधिष्ठिर३७

गर्ग उवाच ।

चतुःषष्ट्यङ्गमददत्कलाज्ञानं ममाद्भुतम् ।
सरस्वत्यास्तटे तुष्टो मनोयज्ञेन पाण्डव ॥ ३८
तुल्यं मम सहस्रं तु सुतानां ब्रह्मवादिनाम् ।
आयुश्चैव सपुत्रस्य संवत्सरशतायुतम् ॥ ३९

पराशर उवाच ।

प्रसाद्येह पुरा शर्वं मनसाऽचिन्तयं नृप ।
महातपा महातेजा महायोगी महायशाः॥४०
वेदव्यासः श्रियावासो ब्राह्मणः करुणान्वितः
अप्यसावीप्सितः पुत्रो मम स्याद्वै महेश्वरात्

इति मत्वा हृदि मतं
प्राह मां सुरसत्तमः ।
मयि संभावना यास्याः
फलात्कृष्णो भविष्यति ॥ ४२

सावर्णस्य मनोः सर्गे सप्तर्षिश्च भविष्यति
वेदानां च स वै वक्ता कुरुवंशकरस्तथा ॥४३
इतिहासस्य कर्ता च पुत्रस्ते जगतो हितः ।
भविष्यति महेन्द्रस्य दयितः स महामुनिः ॥
अजरश्चामरश्चैव पराशरसुतस्तव ।
एवमुक्त्वा स भगवांस्तत्रैवान्तरधीयत ॥४५
युधिष्ठिर महायोगी वीर्यवानक्षयोऽव्ययः ।

माण्डव्य उवाच ।

अचौरश्चौरशङ्कायां शूले भिन्नो ह्यहं तदा ।
तत्रस्थेन स्तुतो देवः प्राह मां वै नरेश्वर ।

मोक्षं प्राप्स्यसि शूलाच्च
जीविष्यसि समार्बुदम् ॥ ४७
रुजा शूलकृता चैव
न ते विप्र भविष्यति ।
आधिभिर्व्याधिभिश्चैव
वर्जितस्त्व भविष्यसि ॥ ४८

पादाच्चतुर्थात्संभूत आत्मा यस्मान्मुने तव ।
त्वं भविष्यस्यनुपमो जन्म वै सफलं कुरु ४९
तीर्थाभिषेकं सकलं त्वमविघ्नेन चाप्स्यसि ।
स्वर्गं चैवाक्षयं विप्र विदधामि तवोर्जितम्५०
एवमुक्त्वा तु भगवान् वरेण्यो वृषवाहनः ।
महेश्वरो महाराज कृत्तिवासा महाद्युतिः ५१

निधने अन्ते सत्य एवेत्यर्थः ॥ २६ ॥ साम्यं अवैषम्य युवयो गृत्समदशतक्रत्वो ॥२७॥ परं उत्कृष्ट यथा स्यात्तथा ॥२८॥न मे मया सम पण्डितोऽस्ति विद्यया हेतुना॥२९॥ अर्थात् धर्मस्य फलं कामस्य मूलं चार्थ सर्वस्मात्प्रियस्ततोऽपि प्रियोऽन्तरात्मा तत्तुल्य सर्वेषा भविष्यसीत्यर्थ ३१ पुरा पूर्वावतारे ॥ ३३ ॥ चतु षष्टि अङ्गानि अवयवा यस्य कला समूहज्ञानस्य तत् मनोयज्ञेन मानसेन पूजनेन ॥३८॥ इति मम हृदि स्थित मतं मत्वा सुरसत्तम मा प्राह या तव मयि सभावना एतस्मात्फलमह प्राप्स्ये इति अस्या फलात् पुण्यात्तव कृष्णो नाम पुत्रो भविष्यति ॥ ४२ ॥ पादाच्चतुर्थात् ' तपः शौचं दया सत्यम् ' इति चत्वारो धर्मस्य पादास्तेषा चतुर्थात्सत्यादेव तवात्मा शरीरम् ॥ ४९ ॥

सगणो दैवतश्रेष्ठस्तत्रैवान्तरधीयत।
गालव उवाच।
विश्वामित्राभ्यनुज्ञातो ह्यह पितरमागतः५२
अब्रवीन्मां ततो माता दुःखिता रुदती भृशम्
कौशिकेनाभ्यनुज्ञातं पुत्रं वेदविभूषितम् ॥५३
न तात तरुणं दान्तं पिता त्वां पश्यतेऽनघ।
श्रुत्वा जनन्या वचनं निराशो गुरुदर्शने ॥५४
नियतात्मा महादेवमपश्य सोऽब्रवीच्च माम्।
पिता माता च ते त्व च पुत्र मृत्युविवर्जिताः
भविष्यथ विश क्षिप्र द्रष्टासि पितर क्षये।
अनुज्ञातो भगवता गृहं गत्वा युधिष्ठिर ॥५६
अपश्यं पितरं तात हृष्टं कृत्वा विनिःसृतम्
उपस्पृश्य गृहीत्वेध्मं कुशांश्च शरणाकुरून् ॥
तान्विसृज्य च मां प्राह पिता सान्त्वाविलेक्षणः
प्रणमन्तं परिष्वज्य मूर्ध्न्युपाघ्राय पाण्डव ५८
दिष्ट्या दृष्टोऽसि मे पुत्र कृतविद्य इहागतः।
वैशम्पायन उवाच
एतान्यत्यद्भुतान्येव कर्माण्यथ महात्मनः॥५९
प्रोक्तानि मुनिभिः श्रुत्वा
विस्मयामास पाण्डवः।
ततः कृष्णोऽब्रवीद्वाक्यं
पुनर्मतिमतां वरः॥ ६०
युधिष्ठिरं धर्मनिधिं पुरुहूतमिवेश्वरः।
वासुदेव उवाच।
उपमन्युर्मायि प्राह तपस्निव दिवाकरः॥ ६१
अशुभैः पापकर्माणो ये नराः कलुषीकृताः॥
ईशानं न प्रपद्यन्ते तमोराजसवृत्तयः॥ ६२
ईश्वरं संप्रपद्यन्ते द्विजा भावितभावनाः।
सर्वथा वर्तमानोऽपि यो भक्तः परमेश्वरे ६३
सदृशोऽरण्यवासीनां
मुनीनां भावितात्मनाम्।
ब्रह्मत्वं केशवत्वं वा
शक्रत्वं वा सुरैः सह॥ ६४
त्रैलोक्यस्याधिपत्यं वा तुष्टो रुद्रः प्रयच्छति
मनसाऽपि शिवं तात ये प्रपद्यन्ति मानवाः॥
विधूय सर्वपापानि
देवैः सह वसन्ति ते।
भित्त्वा भित्त्वा च कूलानि
हुत्वा सर्वमिदं जगत्॥ ६६
यजेद्देवं विरूपाक्षं न स पापेन लिप्यते।
सर्वलक्षणहीनोऽपि युक्तो वा सर्वपातकैः ६७
सर्वं तुदति तत्पापं भावयञ्छिवमात्मना।
कीटपक्षिपतङ्गानां तिरश्चामपि केशव॥ ६८
महादेवप्रपन्नानां न भयं विद्यते क्वचित्।
एवमेव महादेव भक्ता ये मानवा भुवि॥ ६९
न ते संसारवशगा इति मे निश्चिता मतिः॥
ततः कृष्णोऽब्रवीद्वाक्यं धर्मपुत्रं युधिष्ठिरम्७०
विष्णुरुवाच।
आदित्यचन्द्रावनिलानलौ च
द्यौर्भूमिरापो वसवोऽथ विश्वे।
धातार्यमा शुक्रबृहस्पती च
रुद्राः ससाध्या वरुणोऽथ गोपः ७१
ब्रह्मा शक्रो मारुतो ब्रह्म सत्यं
वेदा यज्ञा दक्षिणा वेदवाहाः
सोमो यष्टा यच्च हव्यं हविश्च
रक्षा दीक्षा संयमा ये च केचित् ७२
स्वाहा वौषट् ब्राह्मणाः सौरभेयी
धर्मे चाग्र्यं कालचक्रं बलं च।
यशो दमो बुद्धिमतां स्थितिश्च
शुभाशुभ ये मुनयश्च सप्त॥ ७३
अग्र्या बुद्धिर्मनसा दर्शने च
स्पर्शश्चाग्र्यः कर्मणां या च सिद्धिः।
गणा देवानामूष्मपाः सोमपाश्च
लेखाः सुयामास्तुषिता ब्रह्मकायाः ७४

पितरं द्रक्ष्ये इति। बुद्धया गृहमागत ॥ ५२ ॥ दु खिता वैधव्यदु खेन ॥ ५३ ॥ क्षये गृहे विश प्रविश ॥ ५६ ॥ शरणाकुरून् वाग्वाघातेन वा स्वय वा पक्वतया फलानामध पतनेन विशरण शरणा तत्प्रधानाः कुरवोऽन्नानि शरणाकुरवस्तान् शृ विशरणेऽस्माद्भावे ल्यु 'कुरुर्नृपान्तरे भक्ते' (रान्तवर्गे १६) इति मेदिनी। भक्त ओदन ॥५७॥ साम्नत्वादाविले ईक्षणे यस्य ॥५८॥ ईश्वरो विष्णु. ॥६१॥ कूलानि गृहतटाकादीनि। गृहे +कूलं तटे कूपे सैन्यपृष्ठतटाकयोरिति (लान्तवर्गे १०) मेदिनी ६६ आत्मना चित्तेन ६८ आदित्यचन्द्राविन्यादि सर्वं शर्वाज्जात विद्धीति सप्तमस्थेनान्वय ॥७१॥ सत्य ब्रह्मतत्त्ववेदको वेद उपनिषत् प्राधान्यात् पृथक्कीर्तनं वेदवाहा वेदपाठका हव्य हविर्देवो भाग. ॥७२॥ अग्र्या सूक्ष्मा ब्रह्माकारा धीर्वृत्ति ॥ ७४ ॥

+ 'अथ कूलम्—' इति मूलपाठ· ।

आभासुरा गन्धपा धूमपाश्च
वाचा विरुद्धाश्च मनोविरुद्धाः ।
शुद्धाश्च निर्माणरताश्च देवाः
स्पर्शाशना दर्शपा आज्यपाश्च ॥ ७५
चिन्त्यद्योता ये च देवेषु मुख्या
ये चाप्यन्ये देवताश्चाजमीढ ।
सुपर्ण-गन्धर्व-पिशाच-दानवा
यक्षास्तथा चारण-पन्नगाश्च ॥ ७६
स्थूलं सूक्ष्मं मृदु चाप्यसूक्ष्मं
दुःखं सुखं दुःखमनन्तरं च ।
सांख्यं योगं तत्पराणां परं च
शर्वाज्जातं विद्धि यत्कीर्तितं मे ॥ ७७
तत्संभूता भूतकृतो वरेण्याः
सर्वे देवा भुवनस्यास्य गोपाः ।
आविश्येमां धरणीं येऽभ्यरक्षन्
पुरातनीं तस्य देवस्य सृष्टिम् ॥ ७८
विचिन्वन्तस्तपसा तत्स्वकीयः
किञ्चित्तत्त्वं प्राणहेतोर्नतोऽस्मि ।
ददातु देवः स वरानिहेष्टा-
नभिष्टुतो नः प्रभुरव्ययः सदा ॥ ७९
इमं स्तवं सन्नियतेन्द्रियश्च
भूत्वा शुचिर्यः पुरुषः पठेत ।
अभग्नयोगो नियतो मासमेकं
संप्राप्नुयादश्वमेधे फलं यत् ॥ ८०
वेदान् कृत्स्नान् ब्राह्मणः प्राप्नुयात्तु
जयेन्नृपः पार्थ महीं च कृत्स्नाम् ।
वैश्यो लाभं प्राप्नुयान्नैपुणं च
शूद्रो गतिं प्रेत्य तथा सुखं च ॥ ८१
स्तवराजमिमं कृत्वा रुद्राय दधिरे मनः ।
सर्वदोषापहं पुण्यं पवित्रं च यशस्विनः ८२
यावन्त्यस्य शरीरेषु रोमकूपाणि भारत ।
तावन्त्यब्दसहस्राणि स्वर्गे वसति मानवः ८३

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि मेघवाहनपर्वाख्याने अष्टादशोऽध्यायः ॥ १८ ॥

१९

युधिष्ठिर उवाच ।

यदिदं सहधर्मेति प्रोच्यते भरतर्षभ । पाणिग्रहणकाले तु स्त्रीणामेतत्कथं स्मृतम् ॥ १

धूमपाः धूमेनैव तृप्यन्त वाचा विरुद्धा वाङ्नियमनशीला निर्माणं अनेकधाभवनं योगेनानेकशरीरधारण तत्र रता ॥७५॥ चिन्त्यद्योता सकल्पितमात्रं वस्तु येषां सद्य पुरत प्रकाशते तादृशा ॥७६॥तत्संभूता इति भूमे सकाशाद्बीजानीवाव्याकृताकाशाख्या ईश्वरा भूतकृतो वियदादिस्रष्टारस्तत एवानन्दमात्रशरीराच्चतुर्थात्संभूताः ते च वरेण्या उपासकै शुद्धतत्त्वप्रेप्सुभिर्वरणीया । पूर्वबीजाद्बीजान्तरमिवानादौ सृष्टिप्रवाहे पूर्वपूर्वस्मादीशादुत्तर उत्तर ईशो भूमभूमौ उत्पद्यते इत्याशयेनोक्तम्--पुरातनीमिति । यथा बीजशक्त्या शुद्धाया भुवि विद्यमानया मृत् वृक्षीक्रियत एवं ईश्वरशक्त्या आनन्दाचिन्मात्रं वस्तु विश्वाकारं क्रियत इति तेन शक्तिं विना कथं केवलादुत्पत्तिरित्यपास्तं शक्त्यनादित्वस्याभ्युपगमात्। एतेन बीजशक्तेर्भर्जनेनेव ज्ञानेन जीवगताविद्याशक्तिर्विद्याग्निना दाहे सति मुक्तानां पुनरनुत्पत्ति केवलीभावश्च व्याख्यातः ॥ ७८ ॥ यत् तपसा ध्यानेन विचिन्वन्तः विचिन्वन्ति आलोचयन्ति ईश्वरं सूक्ष्मं विराजं वा तत्सर्वे ततः स्वकीयः स्थूलतरमेव अतः कारणात् प्राणहेतोः जीवनार्थं मोक्षार्थं किंचिद्वाङ्मनसयोरगोचर तत्त्वं नतोऽस्मि शरणीभूय प्राप्तोऽस्मि । स एव ईश्वरो भूत्वा वरान्ददातु भूमिर्बीजाद्यात्मता गत्वा जनास्तर्पयति तद्वत् ॥ ७९ ॥ इमं भीष्मवाक्यादारभ्य एतावत्पर्यन्तम् ॥८०॥ कृत्वा शरणीकृत्य रुद्राय रुद्रे निदधिरे प्रविलापितवन्त ॥ ८२ ॥

नामूर्तं मूर्तिभेद कखमिव लिपिभिर्द्वेत्तुमीष्टे कथंचि-
द्बीजं चामूर्तभेदो ध्वनिमिव कखभिर्यज्जकान्यत्वजन्मा।
को भिद्याद्बीजबीजं खमिव लिपिभिदा मूर्तिभेदेन मन्द-
स्तेनाद्वैतं चतुर्थं शिवमुपनिषदि ज्ञातमान्मानमीहे ॥१॥

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे दानधर्मपर्वणि मेघवाहनोपाख्याने अष्टादशोऽध्याय ॥ १८ ॥

१९

तमेव शरणं व्रजेत्यथ तमेव चाद्यं पर
प्रपद्य इति सूचितं विवृतवान्हरिः पूरुषम् ।
अथैतदुपलब्धये विविधधर्मजातं वदन्
विकुत्सयति योषित परविरक्तताबाधये ॥

आर्षं एष भवेद्धर्मः प्राजापत्योऽथवाऽऽसुरः
यदेतत्सहधर्मीते पूर्वमुक्तं महर्षिभिः ॥ २
सन्देहः सुमहानेष विरुद्ध इति मे मतिः।
इह यः सहधर्मो वै प्रेत्यायं विहितः क्व नु ॥ ३
स्वर्गो मृतानां भवति सहधर्मः पितामह ।
पूर्वमेकस्तु म्रियते क्व चैकस्तिष्ठते वद ॥ ४
नानाधर्मफलोपेता नानाकर्मनिवासिताः।
नानानिरयनिष्ठान्ता मानुषा बहवो यदा ॥ ५
अनृताः स्त्रिय इत्येवं सूत्रकारो व्यवस्यति ।
यदानृताः स्त्रियस्तात सहधर्मः कुतः स्मृतः ६
अनृताः स्त्रिय इत्येवं वेदेष्वपि हि पठ्यते ।
धर्मोऽयं पूर्विका संज्ञा उपचारः क्रियाविधिः
गह्वरं प्रतिभात्येतन्मम चिन्तयतोऽनिशम् ।
निःसन्देहमिदं सर्वं पितामह यथाश्रुति ॥ ८
यदैतद्यादृशं चैतद्यथा चैतत्प्रवर्तितम् ।
निखिलेन महाप्राज्ञ भवानेतद्ब्रवीतु मे ॥ ९

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अष्टावक्रस्य संवादं दिशया सह भारत ॥ १०
निर्वेष्टुकामस्तु पुरा अष्टावक्रो महातपाः।
ऋषेरथ वदान्यस्य वव्रे कन्यां महात्मनः ११
सुप्रभां नाम वै नाम्ना रूपेणाप्रतिमां भुवि ।
गुणप्रभावशीलेन चारित्रेण च शोभनाम् ॥ १२
सा तस्य दृष्ट्वैव मनो जहार शुभलोचना ।
वनराजी यथा चित्रा वसन्ते कुसुमाचिता १३
ऋषिस्तमाह देया मे सुता तुभ्यं हि तच्छृणु ।
गच्छ तावद्दिशं पुण्यामुत्तरां द्रक्ष्यसे ततः १४

अष्टावक्र उवाच ।

किं द्रष्टव्यं मया तत्र वक्तुमर्हति मे भवान् ।
तथेदानीं मया कार्यं यथा वक्ष्यति मां भवान्

वदान्य उवाच ।

धनदं समतिक्रम्य हिमवन्तं च पर्वतम् ।
रुद्रस्यायतनं दृष्ट्वा सिद्धचारणसेवितम् ॥ १६
संहृष्टैः पार्षदैर्जुष्टं नृत्यद्भिर्विविधाननैः ।
दिव्याङ्गरागैः पेशाचैरन्यैर्नानाविधैः प्रभोः १७
पाणितालसुतालैश्च शंगातालैः समैस्तथा ।
संप्रहृष्टैः प्रनृत्यद्भिः शर्वस्तत्र निषेव्यते ॥ १८
इष्टं किल गिरौ स्थानं तद्दिव्यमिति शुश्रुम ।
नित्यं सन्निहितो देवस्तथा ते पार्षदाः स्मृताः
तत्र देव्या तपप्तप्तं शङ्करार्थे सुदुश्चरम् ।
अतस्तदिष्टं देवस्य तथोमाया इति श्रुतिः २०

ज्ञेयं वस्तु श्रुत्वा तज्ज्ञानसाधनं धर्मं शुश्रूषु 'सहोभौ चरतां धर्मं' 'क्षौमे वसानौ जायापती अग्निमादधीयाताम्' इति धर्मपत्नीसाहित्यं शास्त्रे दृश्यमानमाक्षिपति—**यदिदमिति**। पाणिग्रहणात्प्राक्साहित्याभावात्सहेभाविति वाक्यं व्याकुप्येतेति भाव ॥ १ ॥ धर्मविशेषे एव साहित्यमपेक्ष्यते न सर्वत्रेत्याशङ्क्य धर्म विकल्पयति—**आर्ष इति**। ऋषिभिर्मन्त्रै प्रकाशित श्रौतस्मार्तक्रियारूप आर्ष केवल वेदविहितत्वाद्वा। प्राजपत्य प्रजापतिना सन्तानकर्मणा प्रति 'नापुत्रस्य लोकोऽस्ति' इति श्रुतत्वादकरणेऽनिष्टदर्शनाद्वा आसुर. असुषु रमन्ते तेऽसुरास्तेषामयमासुर. केवलमिन्द्रियप्रीतिदर्शनाद्वा साहित्यमुक्तमित्यर्थ. ॥ २ ॥ आद्यमाक्षिप्य सन्देहमाहार्धेन—**सन्देह इति**। अत्र दोषं स्पष्टयति **इहैव** साहित्यं दम्पत्योर्दृश्यते परलोके तयो. साहित्यं क्व नु न क्वापीत्यर्थ ॥ ३ ॥ एतदेवोपपादयति—**पूर्वमिति सार्धेन**। सत्यपि कर्मणि साहित्ये दंपत्यो. स्वस्ववासनाभेदकृतो धर्मभेदो दुर्वार इत्यार्षे प्रमाण निर्युक्तिकमित्यर्थ ॥ ४ ॥ प्रजार्थे साहित्यमिति द्वितीयं पक्षं दूषयति—**अनृताः स्त्रिय इति**। सूत्रकारो धर्मप्रवक्ता 'अनृतं साहसं माया मूर्खत्वमतिलोभता' इति स्त्रीधर्मानाह । एवं च प्रजार्थं साहित्यमप्यनुपपन्नं कुण्डगोलकादीनामप्युत्पत्तिदर्शनात् ॥ ६ ॥ पूर्विका पूर्ववती गौणी धमसंज्ञा दापत्यविधौ । यथा भिक्षुकाणामयं धर्मो धूलि परगृहादितिवद्धर्मेऽपि धर्मपदप्रयोग इत्यर्थ । तत्र च पाणिग्रहणादेर्वेदविहितत्वमपि इयेनादिवत्पुरुषेच्छामनुरुध्यैव न तु वस्तुतस्तस्य धर्मत्वमित्याह—**उपचारः क्रियाविधिरिति** ॥ ७ ॥ गह्वरं गहनं दुर्बोधमित्यर्थ ॥ ८ ॥ कामुकयो रागत प्राप्तो मिथुनीभाव इति न तत्र विधिरित्याख्यायिकामुखेनाह—**अत्रेत्यादिना**। अयं भाव—यथा दर्शपूर्णमासात्पूर्वप्रयुक्तमपा प्रणयनमाश्रित्य 'गोदोहनेन पशुकामस्य प्रणयेत्' इत्यादिविधय प्रवर्तन्ते । एवं रागप्रयुक्तं दारसंग्रहमाश्रित्य धर्मप्रजाविधय प्रवर्तन्ते नीरागस्य तु न दारसंग्रहे विधीयते नतरा तदुत्तरकालीना धर्मप्रजादीविधय इति दिशया दिगभिमानिदेवतया ॥ १० ॥ निर्वेष्टुकाम. दारसंग्रहार्थी ॥ ११ ॥ मनोज्ञहरीत्यनेन भर्तु कामुकत्वं प्रदर्श्य स्त्रिया कामुकत्वं विवरीतुं कथामाह—**ऋषेरित्यादिना** ॥ १४ ॥ तालै काल्यमयैर्वाद्यभाण्डै. शंगातालै विशुद्धतिचपलैर्भ्रमणादिघटितैर्गीतनृत्यक्रियामानविशेषै समैर्भ्रमणादिरहितैस्तैरेव ॥ १७ ॥

पूर्वे तत्र महापार्श्वे देवस्योत्तरतस्तथा ।
ऋतवः कालरात्रिश्च ये दिव्या ये च मानुषाः
देवं चोपासते सर्वे रूपिणः किल तत्र ह ।
तदतिक्रम्य भवनं त्वया यातव्यमेव हि २२
ततो नीलं घनोद्देशं द्रक्ष्यसे मेघसन्निभम् ।
रमणीयं मनोग्राहि तत्र वै द्रक्ष्यसे स्त्रियम् २३
तपस्विनीं महाभागां वृद्धां दीक्षामनुष्ठिताम् ।
दृष्ट्वा सा त्वया तत्र सपूज्या चैव ततः
तां दृष्ट्वा विनिवृत्तस्त्वं ततः पाणिं ग्रहीष्यसि
यद्येष समयः सर्वः साध्यतां तत्र गम्यताम् ॥

अष्टावक्र उवाच ।

तथास्तु साधयिष्यामि तत्र यास्याम्यसंशयम्
यत्र त्वं वदसे साधो भवान् भवतु सत्यवाक्

भीष्म उवाच ।

ततोऽगच्छत् स भगवानुत्तरामुत्तरां दिशम्
हिमवन्तं गिरिश्रेष्ठं सिद्धचारणसेवितम् २७
स गत्वा द्विजशार्दूलो हिमवन्तं महागिरिम्
अभ्यगच्छन्नदीं पुण्यां बाहुदा धर्मशालिनीम्
अशोके विमले तीर्थे स्नात्वा वै तत्र देवताः
तत्र वासाय शयने कौशे सुखमुवास ह ॥२९
ततो रात्र्या व्यतीतायां प्रातरुत्थाय स द्विजः
स्नात्वा प्रादुश्चकाराग्निं स्तुत्वा चैनं प्रधानतः
रुद्राणीं रुद्रमासाद्य ह्रदे तत्र समाश्वसत् ।
विश्रान्तश्च समुत्थाय कैलासमभितो ययौ ॥
सोऽपश्यत्काञ्चनद्वारं दीप्यमानमिव श्रिया ।
मन्दाकिनीं च नलिनीं धनदस्य महात्मनः ॥
अथ ते राक्षसाः सर्वे येऽभिरक्षन्ति पद्मिनीम्
प्रत्युत्थिता भगवन्तं मणिभद्रपुरोगमाः ३३
स तान्प्रत्यर्चयामास राक्षसान्भीमविक्रमान्
निवेदयत मां क्षिप्रं धनदायेति चाब्रवीत् ३४
ते राक्षसास्तथा राजन् भगवन्तमथाब्रुवन् ।
असौ वैश्रवणो राजा स्वयमायाति तेऽन्तकम्
विदितो भगवानस्य कार्यमागमनस्य यत् ।
पश्यैनं त्वं महाभागं ज्वलन्तमिव तेजसा३६
ततो वैश्रवणोऽभ्येत्य अष्टावक्रमानेन्दितम् ।
विधिवत्कुशलं पृष्ट्वा ततो ब्रह्मर्षिमब्रवीत् ॥३७
सुखं प्राप्तो भवान्कच्चिदिह वा मत्तश्चिकीर्षते
ब्रूहि सर्वं करिष्यामि यन्मां वक्ष्यसि वै द्विज
भवनं प्रविश त्वं मे यथाकामं द्विजोत्तम ।
सत्कृतः कृतकार्यश्च भवान् यास्यत्यविघ्नतः
प्राविशद्भवनं स्वं वै गृहीत्वा तं द्विजोत्तमम्
आसनं स्वं ददौ चैव पाद्यमर्घ्यं तथैव च ४०
अथोपविष्टयोस्तत्र मणिभद्रपुरोगमाः ।
निषेदुस्तत्र कौबेरा यक्षगन्धर्वकिन्नराः ॥ ४१
ततस्तेषां निषण्णानां धनदो वाक्यमब्रवीत् ।
भवच्छन्दं समाज्ञाय नृत्येरन्नप्सरोगणाः॥ ४२
आतिथ्यं परमं कार्यं शुश्रूषा भवतस्तथा ।
संवर्ततामित्युवाच गुनिर्मधुरया गिरा ॥ ४३।
अथोर्वरा मिश्रकेशी रम्भा चैवोर्वशी तथा ।
अलम्बुषा घृताची च चित्रा चित्राङ्गदा रुचे॥
मनोहरा सुकेशी च सुमुखी हासिनी प्रभा ।
विद्युता प्रशमी दान्ता विद्योता रतिरेव च ॥
एताश्चान्याश्च वै बह्व्यः प्रनृत्ताप्सरसः शुभाः
अवादयंश्च गन्धर्वा वाद्यानि विविधानि च॥
अथ प्रवृत्ते गान्धर्वे दिव्ये ऋषिरुपाशिरत् ।
दिव्यं संवत्सरं तत्रारमतैष महातपाः ॥ ४७
ततो वैश्रवणो राजा भगवन्तमुवाच ह ।
साग्रः संवत्सरो जातो विप्रेह तव पश्यतः४८
हार्योऽयं विषयो ब्रह्मन् गान्धर्वो नाम नामतः
छन्दतो वर्ततां विप्र यथा वदति वा भवान्॥
अतिथिः पूजनीयस्त्वमिदं च भवतो गृहम् ।
सर्वमाज्ञाप्यतामाशु परवन्तो वयं त्वयि ॥५०
अथ वैश्रवणं प्रीतो भगवान्प्रत्यभाषत ।
अर्चितोऽस्मि यथान्याय गमिष्यामि धनेश्वर
प्रीतोऽस्मि सदृश चैव तव सर्वे धनाधिप ।
तव प्रसादाद्भगवन् महर्षेश्च महात्मनः ॥ ५२
नियोगाद्य यास्यामि वृद्धिमान्वृद्धिमान् भव
अथ निष्क्रम्य भगवान् प्रययावुत्तरामुखः॥५३

महापार्श्वे पर्वते ॥ २१ ॥ उत्तरा श्रेष्ठाम् ॥ २७ ॥ प्रधानत प्रधानैर्वेदमन्त्रै ॥ ३० ॥ भवच्छन्द भवदिच्छाम् ॥ ४२ ॥ प्रनृत्ताप्सरस पदार्थाभिनयो वाक्यार्थाभिनयश्च यत्र वर्तते तत्प्रनृतम् । तत्प्रिया अप्सरस प्रनृत्ताप्सरस. मध्यमपदलोपी समास ॥ ४६ ॥ ह्रार्यं हरतीति ह्रार्य ॥ ४९ ॥ भगवान् अष्टावक्र ।

उत्पत्तिं च निरोधं च भूतानामागतिं गतिम् ।
वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति ।
दिव्यैर्भोगैरजितोऽपि सर्वज्ञोऽपि वदान्यकन्यालाभार्थं दिगन्तं प्रति गत इति अहो कष्टं कामपिशाचो दुर्जय इति भावः ॥ ५१ ॥ वृद्धिरुपचयस्तद्वान् ऋद्धिः संपत् तद्वान् ॥ ५३ ॥

कैलासं मन्दरं हैमं सर्वानुच्चचार ह ।
तानतीत्य महाशैलान् कैरातं स्थानमुत्तमम्॥
प्रदक्षिणं तथा चक्रे प्रयतः शिरसा नतः ।
धरणीमवतीर्याथ पूतात्माऽसौ तदाऽभवत्॥५५
स तं प्रदक्षिणं कृत्वा त्रिः शैलं चोत्तरामुखः ।
समेन भूमिभागेन ययौ प्रीतिपुरस्कृतः ॥ ५६
ततोऽपरं वनोद्देशं रमणीयमपश्यत
सर्वर्तुभिर्मूलफलैः पक्षिभिश्च समन्वितैः ॥५७
रमणीयैर्वनोद्देशैस्तत्र तत्र विभूषितम् ।
तत्राश्रमपदं दिव्यं ददर्श भगवानथ ॥ ५८
शैलांश्च विविधाकारान्
काञ्चनान् रत्नभूषितान् ।
मणिभूमौ निविष्टाश्च
पुष्करिण्यस्तथैव च ॥ ५९
अन्यान्यपि सुरम्याणि पश्यतः सुबहून्यथ ।
भृशं तस्य मनो रेमे महर्षेर्भावितात्मनः ॥ ६०
स तत्र काञ्चनं दिव्यं सर्वरत्नमयं गृहम् ।
ददर्शाद्भुतसङ्काश धनदस्य गृहाद्वरम् ॥ ६१
महान्तो यत्र विविधा
मणिकाञ्चनपर्वताः ।
विमानानि च रम्याणि
रत्नानि विविधानि च ॥ ६२
मन्दारपुष्पैः सङ्कीर्णां
तथा मन्दाकिनीं नदीम्
स्वयंप्रभाश्च मणयो
वज्रैर्भूमिश्च भूषिता ॥ ६३
नानाविधैश्च भवनैर्विचित्रमणितोरणैः ।
मुक्ताजालविनिक्षिप्तैर्मणिरत्नविभूषितैः ॥ ६४
मनोदृष्टिहरै रम्यैः सर्वतः संवृतं शुभैः ।
ऋषिभिश्चावृतं तत्र आश्रमं तं मनोहरम् ॥ ६५
ततस्तस्याभवच्चिन्ता
कुत्र वासो भवेदिति ।
अथ द्वारं समभितो
गत्वा स्थित्वा ततोऽब्रवीत् ॥ ६६
अतिथिं समनुप्राप्तमभिजानन्तु येऽत्र वै ।
अथ कन्याः परिवृता गृहात्तस्माद्विनिर्गताः॥६७
नानारूपाः सप्त विभो
कन्याः सर्वा मनोहराः ।
यां यामपश्यत्कन्या वै
सा सा तस्य मनोऽहरत् ।
न च शक्तो वारयितुं मनोऽस्याथावसीदति ।
ततो धृतिः समुत्पन्ना तस्य विप्रस्य धीमतः॥६९
अथ त प्रमदाः प्राहुर्भगवान्प्रविशत्विति ।
स च तासा सुरूपाणां तस्यैव भवनस्य हि ॥७०
कौतूहलं समाविष्टः प्रविवेश गृहं द्विजः ।
तत्रापश्यज्जरायुक्तामरजोम्बरधारिणीम् ॥७१
वृद्धा पर्यङ्कमासीनां सर्वाभरणभूषिताम् ।
स्वस्तीति तेन चैवोक्ता सा स्त्री प्रत्यवदत्तदा ॥
प्रत्युत्थाय च तं विप्रमास्यतामित्युवाच ह ।
अष्टावक्र उवाच ।
सर्वाः स्वानालयान् यान्तु एका मामुपतिष्ठतु
प्रज्ञाता या प्रशान्ता या
शेषा गच्छन्तु च्छन्दतः ।
ततः प्रदक्षिणीकृत्य
कन्यास्तास्तमृषिं तदा ॥ ७४
निश्चक्रमुर्गृहात्तस्मात्सा वृद्धाऽथ व्यतिष्ठत ।
अथ ता सविशन् प्राह शयने भास्वरे तदा॥७५
त्वयापि सुप्यता भद्रे रजनी ह्यतिवर्तते ।
संलापात्तेन विप्रेण तथा सा तत्र भाषिता॥७६
द्वितीये शयने दिव्ये सविवेश महाप्रभे ।
अथ सा वेपमानाङ्गी निमित्त शीतज तदा॥७७
व्यपदिश्य महर्षेर्वै शयनं व्यवरोहत ।
स्वागतेनागता ता तु भगवानभ्यभाषत ॥७८
सोपागूहद्भुजाभ्या तु ऋषिं प्रीत्या नरर्षभ ।
निर्विकारमृषि चापि काष्ठकुड्योपमं तदा॥७९
दुःखिता प्रेक्ष्य सञ्जल्पमकार्षीदृषिणा रुह ।
ब्रह्मन्न कामतोऽन्यास्ति स्त्रीणांपुरुषतो धृतिः
कामेन मोहिता चाहं
त्वां भजन्ती भजस्व माम् ।
प्रहृष्टो भव विप्रर्षे
समागच्छ मया सह ॥ ८१

कैरातं किरातवेषधारिणो महादेवस्य ॥५४॥ धरणीमवतीर्येत्यनेनाकाशमार्गेणाष्टावको गच्छतीति गम्यते ॥ ५५ ॥ सप्त ह्युत्तरदिग्देवता ॥६८॥ उत्तराधिष्ठात्री तु देवता मुख्याऽष्टमी सैव जरायुक्ता ॥७१॥ प्रज्ञाता अत्यन्तं ज्ञानवती प्रशान्ता निर्जिताचित्ता ॥ ७४ ॥ **अथेति** । अतिवृद्धाया अपि स्त्रिय इयं गतिः किमु वक्तव्यं युवत्या अधैर्यमिति ॥ ७७ ॥ उपागूहत् आलिङ्गितवती ॥ ७९ ॥ अकामतोऽनिच्छतः स्वभावत इत्यर्थः पुरुषत पुरुषं प्राप्य स्त्रीणां धृतिर्धैर्यं अन्या परकीयाऽस्ति पुंयोगे स्त्रीणा धृति स्वकीया सर्वथा नास्तीत्यर्थः ॥ ८० ॥ प्रहृष्टः कामुको भव ॥ ८१ ॥

उपगूह च मां विप्र कामार्तोऽह भृशं त्वयि।
एतद्धि तव धर्मात्मंस्तपसः पूज्यते फलम्८२
प्रार्थितं दर्शनादेव भजमानां भजस्व माम्।
मम चेदं धनं सर्वं यच्चान्यदपि पश्यसि ॥८३
प्रभुस्त्वं भव सर्वत्र मयि चैव न संशयः।
सर्वान्कामान्विधास्यामि रमस्व सहितोमया
रमणीये वने विप्र सर्वकामफलप्रदे।
त्वद्वशाहं भविष्यामि रंस्यसे च मया सह८५
सर्वान्कामानुपाश्नीमो ये दिव्या ये च मानुषाः
नातः परं हि नारीणां विद्यते च कदाचन८६
यथा पुरुषसंसर्गः परमेतद्धि नः फलम्।
आत्मच्छन्देन वर्तन्ते नार्यो मन्मथचोदिताः
न च दह्यन्ति गच्छन्त्यः सुतप्तैरपि पांसुभिः।

अष्टावक्र उवाच।

परदारानहं भद्रे न गच्छेयं कथंचन ॥ ८८
दूषितं धर्मशास्त्रज्ञैः परदाराभिमर्शनम्।
भद्रे निर्वेष्टुकामं मा विद्धि सत्येन वै शपे८९
विषयेष्वनभिज्ञोऽहं धर्मार्थं किल सन्ततिः।
एवं लोकान् गमिष्यामि पुत्रैरिति न संशयः
भद्रे धर्मं विजानीहि ज्ञात्वा चोपरमस्व ह।

स्त्युवाच।

नानिलोऽग्निर्न वरुणो न चान्ये त्रिदशा द्विज
प्रियाः स्त्रीणां यथा कामो
रतिशीला हि योषितः।
सहस्रे किल नारीणां
प्राप्येतैका कदाचन ॥ ९२
तथा शतसहस्रेषु यदि काचित्पतिव्रता।
नैता जानन्ति पितरं न कुलं न च मातरम्९३
न भ्रातृन्न च भर्तारं
न च पुत्रान्न देवरान्।
लीलायन्त्यः कुलं घ्नन्ति
कूलानीव सरिद्वराः।
दोषान्सर्वांश्च मत्वाऽऽशु
प्रजापतिरभाषत ॥ ९४

भीष्म उवाच।

ततः स ऋषिरेकाग्रस्तां स्त्रियं प्रत्यभाषत।
आस्यतां रुचितश्छन्दः किं च कार्यं ब्रवीहि मे
सा स्त्री प्रोवाच भगवन् द्रक्ष्यसे देशकालतः
वस तावन्महाभाग कृतकृत्यो भविष्यसि९६
ब्रह्मर्षिस्तामथोवाच स तथेति युधिष्ठिर।
वत्स्येऽहं यावदुत्साहो भवत्या नात्र संशयः
अथर्षिरभिसंप्रेक्ष्य स्त्रियं तां जरयाऽर्दिताम्।
चिन्तां परमिकां भेजे सन्तप्त इव चाभवत्॥
यद्यदङ्गं हि सोऽपश्यत्तस्या विप्रर्षभस्तदा।
नारमत्तत्र तत्रास्य दृष्टी रूपविरागिता ॥ ९९
देवतेयं गृहस्यास्य शापात्किं नु विरूपिता।
अस्याश्च कारणं वेत्तुं न युक्तं सहसा मया
इति चिन्ता विविक्तस्य तमर्थं ज्ञातुमिच्छतः
व्यगच्छत्तदहःशेषं मनसा व्याकुलेन तु १०१
अथ सा स्त्री तथोवाच भगवन्पश्य वै रवेः।
रूपं सन्ध्याभ्रसंरक्तं किमुपस्थाप्यतां तव ॥२
स उवाच ततस्तां स्त्रीं
स्नानोदकमिहानय।
उपासिष्ये ततः सन्ध्यां
वाग्यतो नियतेन्द्रियः ॥ १०३

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि अष्टावक्रदिक्संवादे ऊनविंशोऽध्यायः ॥ १९ ॥



उपगूह आलिङ्गस्व ॥ ८२ ॥ अनभिज्ञोऽप्रीतिमान् ॥९०॥ एका रतिशीलेति शेष ॥ ९२ ॥ लीलायन्त्य लीला रतिं आत्मन इच्छन्त्य अभाषत नैता इत्यादिसार्धश्लोकम् ॥ ९४ ॥ एकाग्र स्त्रीदोषान् अनुसन्दधान स्त्रियं प्रति आस्यतां तूष्णीं स्थीयताम्। रुचित रुचिं प्राप्य छन्द इच्छा भवतीति अभाषत त्वं रुचिज्ञा मामिच्छसि अहं त्वरुचिज्ञो न त्वा स्प्रष्टुमिच्छामीति भाव। एवमपि यत्कार्यं कर्तव्यं तव तन्मे ब्रवीहि ॥ ९५ ॥ द्रक्ष्यसे स्पर्शपुर्वं ज्ञास्यसे ॥ ९६ ॥ रूपे विरागिता वैराग्यवती दृष्टिर्नारमत् न रेमे ॥ ९९ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे ऊनविंशोऽध्यायः ॥ १९ ॥

२०

भीष्म उवाच।

अथ सा स्त्री तगुवाच बाढमेवं भवत्विति।
तैलं दिव्यमुपादाय स्नानशाटीमुपानयत ॥ १
अनुज्ञाता च मुनिना सा स्त्री तेन महात्मना
अथास्य तैलेनाङ्गानि सर्वाण्येवाभ्यमृक्षत २
शनैश्चोत्सादितस्तत्र स्नानशालामुपागमत।
भद्रासनं ततश्चित्रं ऋषिरन्वगमन्नवम् ॥ ३
अथोपविष्टश्च यदा तस्मिन्भद्रासने तदा।
स्नापयामास शनकैस्तमृषिं सुखहस्तवत् ॥ ४
दिव्यं च विधिवच्चक्रे सोपचारं मुनेस्तदा।
स तेन हसुखोष्णेन तस्या हस्तसुखेन च ॥ ५
व्यतीतां रजनीं कृत्स्नां नाजानात्स महाव्रतः।
तत उत्थाय स मुनिस्तदा परमविस्मितः ॥ ६
पूर्वस्यां दिशि सूर्यं च सोऽपश्यदुदितं दिवि
तस्य बुद्धिरियं किन्तु मोहस्तत्त्वमिदं भवेत् ७
अथोपास्य सहस्रांशुं किं करोमीत्युवाच तां।
सा चामृतरसप्रख्यं ऋषेरन्नमुपाहरत ॥ ८
तस्य स्वादुतयाऽन्नस्य न प्रभूत चकार सः।
व्यगमच्चाप्यहःशेषं ततः सन्ध्यागमत्पुनः
अथ सा स्त्री भगवन्तं सुप्यतामित्यचोदयत।
तत्र वै शयने दिव्ये तस्य तस्याश्च कल्पिते १०
पृथक्चैव तथा सुप्तौ सा स्त्री स च मुनिस्तदा।
तथार्धरात्रे सा स्त्री तु शयन तदुपागमत ॥ ११

अष्टावक्र उवाच।

न भद्रे परदारेषु मनो मे संप्रसज्जति।
उत्तिष्ठ भद्रे भद्रं ते स्वयं वै विरमस्व च ॥ १२

भीष्म उवाच।

सा तदा तेन विप्रेण तथा तेन निवर्तिता।
स्वतन्त्राऽस्मीत्युवाचर्षिं न धर्मच्छलमस्ति ते

अष्टावक्र उवाच।

नास्ति स्वतन्त्रता स्त्रीणा-
मस्वतन्त्रा हि योषितः।
प्रजापतिमतं ह्येत-
न्न स्त्री स्वातन्त्र्यमर्हति ॥ १४

स्त्र्युवाच।

बाधते मैथुनं विप्र मम भक्तिं च पश्य वै।
अधर्मं प्राप्स्यसे विप्र यन्मां त्वं नाभिनन्दसि

अष्टावक्र उवाच।

हरन्ति दोषजातानि नरं जातं यथेच्छकम्
प्रभवामि सदा धृत्या भद्रे स्वशयनं व्रज ६१

स्त्र्युवाच।

शिरसा प्रणमे विप्र प्रसादं कर्तुमर्हसि।
भूमौ निपतमानायाः शरणं भव मेऽनघ १७
यदि वा दोषजातं त्वं परदारेषु पश्यसि।
आत्मानं स्पर्शयाम्यद्य पाणिं गृह्णीष्व मे द्विज
न दोषो भविता चैव
सत्येनैतद्ब्रवीम्यहम्।
स्वतन्त्रां मां विजानीहि
योऽधर्मः सोऽस्तु वै मयि
त्वय्यावेशितचित्ता च
स्वतन्त्राऽस्मि भजस्व माम् ॥ १९

अष्टावक्र उवाच।

स्वतन्त्रा त्वं कथं भद्रे
ब्रूहि कारणमत्र वै।
नास्ति त्रिलोके स्त्री काचि-
द्या वै स्वातन्त्र्यमर्हति ॥ २०
पिता रक्षति कौमारे
भर्ता रक्षति यौवने।
पुत्राश्च स्थाविरे काले
नास्ति स्त्रीणां स्वतन्त्रता ॥ २१

स्त्र्युवाच।

कौमारं ब्रह्मचर्यं मे कन्यैवास्मि न संशयः।
पत्नीं कुरुष्व मां विप्र श्रद्धां विजहि मा मम

२०

अथेति। अथ सा स्त्रीत्यादेरध्यायस्य तात्पर्यं कुत्सितायां जीर्णायां अपि स्त्रियां करस्पर्शमात्रेण विरक्तोऽपि विज्ञानवानप्यष्टावक्रोऽतीतं कालं न बुबुधे का कथा युवत्या रतिसक्ता मूढा गतमायुरवभोत्स्यन्त इति॥१॥ अभ्यमृक्षत अभ्यञ्जितवती ॥ २ ॥ उत्सादित चालित ॥ ३ ॥ नाजानात् न ज्ञातवान् ॥ ६ ॥ न प्रभूतं चकार पूर्णमिति नाभ्यवददित्यर्थः। स्पर्शासक्तो गता रात्रिमिव रसासक्तो गत दिनमपि नाबुध्यतेति भाव ॥ ९ ॥ **सेति**। स्वातन्त्र्यान्मम न तव पारदार्यदोषोऽस्तीत्यर्थः। धर्मच्छलं परपुरुषप्रलोभनम् ॥ १३ ॥ **नास्तीति**। अप्रदत्तां त्वा न कामये इत्यर्थ ॥ १४ ॥ दोषा कामक्रोधादय यथेच्छकं स्वैरिणम् ॥ १६ ॥ स्वतन्त्रा आत्मप्रदाने इति शेषः। यो धर्मः पाणिग्रहणादिसंस्कारः मयि मन्निमित्तं सोऽस्तु ॥१९॥ विजहि मा मा नाशय ॥ २२ ॥

अष्टावक्र उवाच ।
यथा मम तथा तुभ्यं यथा तुभ्यं तथा मम ।
जिज्ञासेयमृषेस्तस्य विघ्नः सत्यं न किं भवेत्
आश्चर्यं परमं ह्येदं किंतु श्रेयो हि मे भवेत ।
दिव्याभरणवस्त्रा हि कन्येयं मामुपस्थिता२४
किं त्वस्याः परमं रूपं जीर्णमासीत्कथं पुनः।
कन्यारूपमिहाद्यैयं किमिवात्रोत्तरं भवेत ।
यथा परं शक्तिधृतेर्न व्युत्थास्ये कथञ्चन ।
न रोचते हि व्युत्थानं सत्येनासादयाम्यहम्

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि अष्टावक्रदिक्संवादे विंशोऽध्यायः॥ २० ॥



२१

युधिष्ठिर उवाच ।
न बिभेति कथं सा स्त्री शापाच्च परमद्युतेः ।
कथं निवृत्तो भगवांस्तद्भवान् प्रब्रवीतु मे ॥ १
भीष्म उवाच ।
अष्टावक्रोऽन्वपृच्छत्तां रूप विकुरुषे कथम् ।
न चानृतं ते वक्तव्यं ब्रूहि ब्राह्मणकाम्यया ॥२
स्त्र्युवाच ।
द्यावापृथिव्योर्यत्रैषा काम्या ब्राह्मणसत्तम ।
शृणुष्वावहितः सर्वं यदिदं सत्यविक्रम ॥ ३
जिज्ञासेयं प्रयुक्ता मे स्थिरीकर्तुं तवानघ ।
अव्युत्थानेन ते लोका जिताः सत्यपराक्रम
उत्तरां मां दिशं विद्धि दृष्टं स्त्रीचापलं च ते
स्थविराणामपि स्त्रीणां बाधते मैथुनज्वरः ॥ ५
तुष्टः पितामहस्त्वेऽद्य तथा देवाः सवासवाः ।
स त्वं येन च कार्येण संप्राप्तो भगवानिह ॥ ६
प्रेषितस्तेन विप्रेण कन्यापित्रा द्विजर्षभ ।
तवोपदेशं कर्तुं वै तच्च सर्वं कृतं मया ॥ ७
क्षेमैर्गमिष्यसि गृहं
श्रमश्च न भविष्यति ।
कन्यां प्राप्स्यसि तां विप्र
पुत्रिणी च भविष्यति ॥ ८
काम्यया पृष्टवांस्त्वं मां ततो व्याहृत मुत्तमम्
अनतिक्रमणीया सा कृत्स्नैर्लोकैस्त्रिभिः सदा ९
गच्छस्व सुकृतं कृत्वा
किं चान्यच्छ्रोतुमिच्छसि ।
यावद्ब्रवीमि विप्रर्षे
अष्टावक्र यथातथम् ॥ १०
ऋषिणा प्रसादिता चास्मि
तव हेतोर्द्विजर्षभ ।
तस्य संमाननार्थं मे
त्वयि वाक्यं प्रभाषितम् ॥ ११

यथेति। अहं आत्मदृष्टान्तेन त्वा स्मरातुरा वेद्मि त्वमपि स्वदृष्टान्तेन मा तथाभूतं विद्धीति भाव. । तुभ्यं तव सङ्गम-श्रद्धेति उभयत्र शेष । किं तस्य मया कन्यार्थिना प्रार्थितस्य तत्कर्तृका इय जिज्ञासा मम परीक्षा किमयं साधुरसाधुर्वेति उत किं नेति काकु· । विघ्न एवायं किं न भवेत् अपि तु विघ्न एवेत्यर्थ ॥२३॥विघ्नत्वमेवाह–**आश्चर्यमिति**। पूर्वं अति-जीर्णत्वेन दृष्ट्वा पुन कन्येव दृश्यत इति मायारूपमाश्चर्यम् ॥ २४ ॥ एतदेवाह–**किमिति** । अत्र अस्मिन्विषये किं उत्तरं श्रेष्ठतरं पूर्वपरिगृहीतस्यात्याग· उत एतस्या· स्वीकार कर्तव्य इति भाव. ॥ २५ ॥ स्वमतमाह–**यथेति** । **शक्तिः** कामदमनसामर्थ्यं **धृतिः** पूर्वप्राप्तस्यात्याग. तदुभयं धृत्वा न व्युत्थास्ये अस्या स्वीकारं न करिष्ये व्युत्थानं धर्मातिक्रमं मम न रोचते किं तु सत्येनासादयाम्यहं दारा-निति शेष ॥ २६ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे विंशोऽध्याय. ॥ २० ॥

२१

न बिभेतीति ॥१॥ विकुरुषेऽन्यथाऽन्यथा करोषि ब्राह्मणकाम्यया ब्राह्मणमानलिप्सया ॥ २ ॥ द्यावा-पृथिव्यो· दिवि पृथिव्या च यत्र स्थीयते तत्र एषा काम्या स्त्रीपुंसयोः अन्योन्याभिलाषरूपा इच्छास्ति मोक्षादन्यत्रि-ष्काम पद नास्तीत्यर्थ. ॥३॥ मे मया तव त्वाम् ॥४॥ सा काम्याऽनतिक्रमणीया ॥९॥ ऋषिणा वदान्येन ॥११॥

भीष्म उवाच ।
श्रुत्वा तु वचनं तस्याः
स विप्रः प्राञ्जलिः स्थितः ।
अनुज्ञातस्तया चापि
स्वगृहं पुनराव्रजत् ॥ १२
गृहमागत्य विश्रान्तः स्वजनं परिपृच्छ्य च
अभ्यगच्छच्च तं विप्रं न्यायतः कुरुनन्दन १३
पृष्टश्च तेन विप्रेण दृष्टं त्वेतन्निदर्शनम् ।
प्राह विप्रं तदा विप्रः सुप्रीतेनान्तरात्मना १४
भवता समनुज्ञातः प्रास्थितो गन्धमादनम् ।
तस्य चोत्तरतो देशे दृष्टं मे दैवतं महत् ॥ १५
तया चाहमनुज्ञातो भवांश्चापि प्रकीर्तितः ।
श्रावितश्चापि तद्वाक्यं गृहं चाभ्यागतः प्रभो
तमुवाच तदा विप्रः सुतां प्रति गृहाण मे ।
नक्षत्रविधियोगेन पात्रं हि परमं भवान् १७
भीष्म उवाच ।
अष्टावक्रस्तथेत्युक्त्वा प्रतिगृह्य च तां प्रभो
कन्यां परमधर्मात्मा प्रीतिमाश्चाभवत्तदा १८
कन्यां तां प्रतिगृह्यैव भार्यां परमशोभनाम् ।
उवास मुदितस्तत्र स्वाश्रमे विगतज्वरः १९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि अष्टावक्रादिकसंवादे एकविंशोऽध्यायः ॥ २१ ॥



२२

युधिष्ठिर उवाच ।
किमाहुर्भरतश्रेष्ठ पात्रं विप्राः सनातनाः ।
ब्राह्मणं लिंगिनं चैव ब्राह्मणं वाऽप्यलिंगिनम्
भीष्म उवाच ।
स्ववृत्तिमभिपन्नाय लिंगिने चेतराय च ।
देयमाहुर्महाराज उभावेतौ तपस्विनौ ॥ २
युधिष्ठिर उवाच ।
श्रद्धया परया पूतो यः प्रयच्छेद्द्विजातये ।
हव्यं कव्यं तथा दानं को दोषः स्यात्पितामह
भीष्म उवाच ।
श्रद्धापूतो नरस्तात दुर्दातोऽपि न संशयः ।
पूतो भवति सर्वत्र किमु तत्त्वं महाद्युते ॥ ४
युधिष्ठिर उवाच ।
न ब्राह्मणं परीक्षेत दैवेषु सततं नरः ।
कव्यप्रदाने तु बुधाः परीक्ष्यं ब्राह्मणं विदुः॥५
भीष्म उवाच ।
न ब्राह्मणः साधयते हव्यं दैवात्प्रसिद्ध्यति।
देवप्रसादादिज्यन्ते यजमानैर्न संशयः ॥ ६
ब्राह्मणान् भरतश्रेष्ठ सततं ब्रह्मवादिनः ।
मार्कण्डेयः पुरा प्राह इति लोकेषु बुद्धिमान्॥

यथा कृषिकृतामेव राजदेयं भवत्येव · श्रीमतामेव दैव पित्र्यं च ऋणमापतति । श्रीमत्त्व तु कामकृतं, च न वैधमिति स्त्र्यभावेऽयं कस्यापि ऋणी न भवतीति प्रघट्टकार्थ ॥ १९ ॥ श्रीमहाभारते इति अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकविंशोऽध्याय ॥ २१ ॥

२२

एवं गार्हस्थ्यहेतुं काममुक्त्वा गृहस्थोचितान् दानधर्मान्वक्तुं श्रोतुं पात्रादिगुणान्पृच्छति—**किमित्यादिना**। ब्राह्मणं ब्रह्मविदं लिङ्गिनं ब्रह्मचारिणं सन्यासिन च दण्डादिलिङ्गवन्तम् ॥ १ ॥ **स्ववृत्तिं** जीवनार्थं स्वोचितां वृत्तिं अभिपन्नाय शरणीकुर्वते लिङ्गी अलिङ्गी वा स्वधर्मसेवी य. स एव तपस्वी पात्रं चेत्यर्थः ॥ २ ॥ स्वधर्मनिष्ठत्वं पात्रगुणमुक्त्वा श्रद्धावत्त्व दातृगुणमाह—**श्रद्धयेति द्वाभ्याम्**। अपूतोऽपि परया श्रद्धया यदि प्रयच्छति तर्हि तस्य दातुरपूतत्वप्रयुक्त. को दोष स्यात्तं वद ॥ ३ ॥ **श्रद्धेति** । श्रद्धैवास्य पूतत्वं करोतीत्यर्थ ॥ ४ ॥ **नेति** श्रद्धैव पूतत्वं कर्त्री चेत् कव्ये पात्रपरीक्षा न विधेया स्यादित्याशय ॥५॥ देवाना समूहाद्दैवात् श्रद्धादिभ्य इत्यर्थ । हव्यं दैवं कर्म । सिध्यति फलदं भवति न तु ब्राह्मणगुण इति भाव । इज्यते देवा इति शेष दैवं कर्म देवानुग्रहादेव पूर्णं भवति । श्रद्धामात्रप्रियत्वाद्देवानामिति भाव ॥ ६ ॥ पित्र्यं तु कर्म ब्राह्मणानुग्रहादेव पूर्णं भवतीति तत्रानुग्रहकर्तारं तपोबलमावश्यकमित्याशयेनाह—**ब्राह्मणानिति**। लोकेषु पितृपितामहादिषु पूजनीयेषु ब्रह्मिष्ठेष्वेव ब्राह्मण्यमस्तीति विद्या-

युधिष्ठिर उवाच ।
अपूर्वोऽप्यथवा विद्वान् संबंधी वा यथा भवेत
तपस्वी यज्ञशीलो वा कथं पात्रं भवेत्तु सः॥८

भीष्म उवाच ।
कुलीनः कर्मकृद्वैद्यस्तथैवाप्यानृशंस्यवान् ।
ह्रीमानृजुः सत्यवादी पात्र पूर्वे च ये त्रयः ॥९
तत्रेमं शृणु मे पार्थ चतुर्णां तेजसां मतम् ।
पृथिव्याः काश्यपस्याग्नेर्मार्कण्डेयस्य चैव हि॥

पृथिव्युवाच ।
यथा महार्णवे क्षिप्तः क्षिप्रं लेष्टुर्विनश्यति ।
तथा दुश्चरितं सर्वं त्रिवृत्यां च निमज्जति ॥११

काश्यप उवाच ।
सर्वे च वेदाः सह षड्भिरङ्गैः
साङ्ख्यं पुराण च कुले च जन्म ।
नैतानि सर्वाणि गतिर्भवन्ति
शीलव्यपेतस्य नृप द्विजस्य ॥ १२

अग्निरुवाच ।
अधीयानः पण्डितं मन्यमानो
यो विद्यया हन्ति यशः परेषाम् ।
प्रभ्रश्यतेऽसौ चरते न सत्यं
लोकास्तस्य ह्यन्तवन्तो भवन्ति ॥१३

मार्कण्डेय उवाच ।
अश्वमेधसहस्रं च सत्यं च तुलया धृतम् ।
नाभिजानामि यद्यस्य सत्यस्यार्धमवाप्नुयात् ॥

भीष्म उवाच ।
इत्युक्त्वा ते जग्मुराशु चत्वारोऽमिततेजसः
पृथिवी काश्यपोऽग्निश्च प्रकृष्टायुश्च भार्गवः१५

युधिष्ठिर उवाच ।
यदि ते ब्राह्मणा लोके व्रतिनो भुञ्जते हविः
दत्त ब्राह्मणकामाय कथं तत्सुकृतं भवेत ॥ १६

भीष्म उवाच ।
आदिष्टिनो ये राजेन्द्र ब्राह्मणा वेदपारगाः।
भुञ्जते ब्रह्मकामाय व्रतलुप्ता भवन्ति ते ॥ १७

युधिष्ठिर उवाच ।
अनेकान्तं बहुद्वार धर्ममाहुर्मनीषिणः ।
किंनिमित्तं भवेदत्र तन्मे ब्रूहि पितामह ॥१८

भीष्म उवाच ।
अहिंसा सत्यमक्रोध आनृशंस्यं दमस्तथा।
आर्जवं चैव राजेन्द्र निश्चितं धर्मलक्षणम् १९
ये तु धर्मं प्रशंसन्तश्चरन्ति पृथिवीमिमाम् ।
अनाचरन्तस्तद्धर्मं सङ्करेऽभिरताः प्रभो॥ २०
तेभ्यो हिरण्यं रत्नं वा गामश्वं वा ददाति यः
दश वर्षाणि विष्ठा स भुङ्क्ते निरयमास्थितः

दित्यर्थ । 'अग्निमुखा वै देवा पाणिमुखा पितर' इत्याश्वलायनोदाहृतश्रुते श्रौत स्मार्त औदर्यो वाऽग्नि स्वत शुद्धो देवास्तर्पयति । पाणिस्तु सत्कर्मवानेव पितृस्तर्पयितु शक्नोति नान्यथेति कव्येष्वावश्यकी पात्रपरीक्षेति भाव ॥ ७ ॥ कथं केन हेतुनाऽपूर्वादीना पञ्चाना पात्रत्वमिति प्रश्नार्थ ॥ ८ ॥ उत्तरे तु—त्रय अपूर्वसम्बन्धितयाऽपि कुलीनत्वादिगुणसप्तकयुक्ता एव पात्रत्व भजन्ते परिशेषात् । यज्ञशीलविद्वासौ कर्मकृद्वैद्यपदोदितौ कुलीनत्वादिगुणपञ्चकयुक्तावेव । एतेषा गुणानामभावे पात्रत्व न कस्यापीत्यर्थ ॥९॥ एतदेव शिष्टसंमत्या द्रढयति—**तत्रेति** । तेजसा तेजस्विना सर्वज्ञानामिति यावत् ॥ १० ॥ लेष्टु पासुपिण्ड त्रिभिरेव वृत्ति जीवन यस्या सा ब्राह्मी सम्पत् तस्या त्रिवृत्या याजनाध्यापनप्रतिग्रहैरेव जीवति स महान् । एतेन कुलीनत्वं वैद्यत्वं च सगृहीतम् ॥ ११ ॥ ह्रीमत्त्वऋजुत्वे शीलपदेन संगृह्णाति—**सर्वे चेति** ॥ १२ ॥ आनृशंस्य कर्मकृत्त्व च संगृह्णाति—**अधीयान इति** । सत्यं यज्ञादिकमव्यभिचरितफलं कर्म न चरते न करोति ॥ १३ ॥ अश्वमेधेति सत्यसंग्रह । एतेषा गुणानामेकतमस्याप्यभावे पात्रत्वं न भवतीति चतुर्णामपि मत न तु चत्वारि पृथग्ज्ञानि उपक्रमे तेजसा मतमित्येकवचनाद्भृगौ च विप्रतिपत्तेरादर्शनादिति भावः ॥ १४ ॥ ब्रह्मचारिणि कथ तत्सुकृतमिति तदीयव्रतनाशात्तस्मिन्नं श्राद्धं दुष्यति न वेति प्रश्न ॥ १६ ॥ आदिष्टं द्वादशवर्षाणि ब्रह्मचर्यं चरेति गुर्वादिशतद्वन्त भोक्तुरेव व्रतं लुप्यते न तु दातु प्रत्यवैति अपितु 'कर्मनिष्ठास्तपोनिष्ठा पञ्चाग्निब्रह्मचारिण । 'पितृमातृगुरुश्वश्रू ब्राह्मणा श्राद्धसम्पद' इति । 'व्रतस्थमपि दौहित्रं श्राद्धे यत्नेन भोजयेत्'इति च स्मरणात्पुण्यभागेव भवतीति भाव । एतेन श्राद्धादन्यत्र लोभादिप्रदर्शनेन परव्रत नाशयतो दानेऽपि किञ्चिद्दैपुण्यं जायत इति गम्यते।' 'अत एव मनसा पात्रमुद्दिश्य जलमध्ये जलं क्षिपेत्। दाता तत्फलमाप्नोति प्रतिग्राही न दोषभाक्'इति पात्रादरार्थं कल्पान्तर स्मर्यते । अन्यथैतत्र स्मर्यत नाप्येव युधिष्ठिरेणाशङ्क्येतेति दिक् ॥ १७ ॥ अन्तो निष्ठा अनेकान्तं अनेकफलाकारामित्यर्थ । पात्रगुणानामनन्तत्वात्के गुणा नियमेन पात्रताया निमित्तं तानेवं सङ्क्षेपेण ब्रूहीति प्रश्नार्थः ॥ १८ ॥ उत्तरमाह त्रिभि —**अहिंसेति** ॥ १९ ॥

* 'ततन्म' ति पाठ

मेदानां पुल्कसानां च तथैवान्तेवसायिनाम्
कृतं कर्माकृतं वापि रागमोहेन जल्पताम् २२
वैश्वदेव च ये मूढा विप्राय ब्रह्मचारिणे ।
ददते नेह राजेन्द्र ते लोकान् भुञ्जतेऽशुभान्
युधिष्ठिर उवाच ।
किं परं ब्रह्मचर्यं च किं परं धर्मलक्षणम् ।
किं च श्रेष्ठतमं शौचं तन्मे ब्रूहि पितामह २४
भीष्म उवाच ।
ब्रह्मचर्यात्परं तात मधुमांसस्य वर्जनम् ।
मर्यादायां स्थितो धर्मः शमश्चैवास्य लक्षणं २५
युधिष्ठिर उवाच ।
कस्मिन्काले चरेद्धर्मं कस्मिन्काले ऽर्थमाचरेत्
कस्मिन्काले सुखी च स्यात्तन्मे ब्रूहि पितामह
भीष्म उवाच ।
कल्यमर्थं निषेवेत ततो धर्ममनन्तरम् ।
पश्चात्कामं निषेवेत न च गच्छेत्प्रसङ्गितां २७
ब्राह्मणांश्चैव मन्येत गुरूंश्चाप्यभिपूजयेत् ।
सर्वभूतानुलोमश्च मृदुशीलः प्रियंवदः ॥ २८
अधिकारे यदनृतं यच्च राजसु पैशुनम् ।
गुरोश्चालीककरणं तुल्यं तद्ब्रह्महत्यया ॥ २९
प्रहरेन्न नरेन्द्रेषु न हन्याद्गां तथैव च ।
भ्रूणहत्यासमं चैव उभयं यो निषेवते ॥ ३०
नाग्निं परित्यजेज्जातु न च वेदान् परित्यजेत् ।
न च ब्राह्मणमाक्रोशेत्समं तद्ब्रह्महत्यया ॥३१
युधिष्ठिर उवाच ।
कीदृशाः साधवो विप्राः केभ्यो दत्तं महाफलं
कीदृशानां च भोक्तव्यं तन्मे ब्रूहि पितामह ३२
भीष्म उवाच ।
अक्रोधना धर्मपराः सत्यनित्या दमे रताः
तादृशाः साधवो विप्रास्तेभ्यो दत्तं महाफलम्
अमानिनः सर्वसहा दृढार्था विजितेन्द्रियाः ।
सर्वभूतहिता मैत्रास्तेभ्यो दत्तं महाफलम् ३४
अलुब्धा शुचयो वैद्या ह्रीमन्तः सत्यवादिनः
स्वकर्मनिरता ये च तेभ्यो दत्तं महाफलम् ३५
साङ्गांश्च चतुरो वेदानधीते यो द्विजर्षभः ।
षड्भ्यः प्रवृत्तः कर्मभ्यस्तं पात्रमृषयो विदुः
ये त्वेवंगुणजातीयास्तेभ्यो दत्तं महाफलम् ।
सहस्रगुणमाप्नोति गुणार्हाय प्रदायकः ॥ ३७
प्रज्ञाश्रुताभ्यां वृत्तेन शीलेन च समन्वितः ।
तारयेत कुलं सर्वमेकोऽपीह द्विजर्षभः ॥ ३८
गामश्वं वित्तमन्नं वा तद्विधे प्रतिपादयेत् ।
द्रव्याणि चान्यानि तथा प्रेत्यभावे न शोचति
तारयेत कुलं सर्वमेकोऽपीह द्विजोत्तमः ।
किमङ्ग पुनरेवैते तस्मात्पात्रं समाचरेत् ॥ ४०
निशम्य च गुणोपेतं ब्राह्मणं साधुसंमतम् ।
दूरादानाय्य सत्कृत्य सर्वतश्चापि पूजयेत ४१

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि बहुप्राश्निके द्वाविंशोऽध्यायः ॥ २२ ॥

मेदादीनां स विष्ठा भुङ्क्ते इति सम्बन्धः । **मेदाः** गोमाहिष्यादिना मृतानां मांसमश्नन्ति । **पुल्कसाः** ये ब्राह्मणादीनपि स्वभावादेव हिंसन्ति । **अन्तेवसायिनः** चर्मकारादयः । कृतमकृतं वा परकीयं पापं कर्म ये प्रकाशयन्ति ब्राह्मणादयोऽपि ते मेदादितुल्या एवेति तेषामपीतिपदार्थः ॥ २२ ॥ **वैश्वदेवं** तत्सम्बन्धिनं हन्तकारं ब्रह्मचारिणे इति संन्यासिनोऽप्युपलक्षणम् । यतिश्च ब्रह्मचारी च पक्वान्नस्वामिनावुभाविति स्मृतेः अशुभानिति च्छेदः ॥२३॥ पर श्रेष्ठम् ॥२४॥ **शमः** विषयेभ्य इन्द्रियाणां निवृत्तिरेतदेव श्रेष्ठतरं शौचं धर्मस्य लक्षणं मर्यादान्तर्गतम् ॥ २५ ॥ कल्यं पूर्वाह्णे ॥ २६ ॥ षड्भ्य अनुपदोक्ते मधुमासवर्जनमर्यादापालनशौचैः सहाध्ययनयागदानेभ्य तान्यनुष्ठातुं प्रवृत्त इत्यर्थः ॥ ३६ ॥ न शोचति प्रतिपादयन् ॥ ३९ ॥ द्विजोत्तम निर्दोष । एते पूर्वोक्ता गुणाश्च तत्र यदि लभ्यन्ते तर्हि तारयेतेति किमु ॥ ४० ॥ निशम्य ज्ञात्वा ईदृशपात्रप्राप्तौ समीपस्थस्याल्पगुणस्यातिक्रमेऽपि दोषो नास्तीति भावः ॥ ४१ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्वाविंशोऽध्यायः ॥ २२ ॥

२३

युधिष्ठिर उवाच।
श्राद्धकाले च दैवे च पित्र्येऽपि च पितामह
इच्छामीह त्वयाऽऽख्यातं विहितं यत्सुरर्षिभिः

भीष्म उवाच।
दैवं पौर्वाह्णिकं कुर्यादपराह्णे तु पैतृकम्।
मङ्गलाचारसम्पन्नः कृतशौचः प्रयत्नवान् ॥ २
मनुष्याणां तु मध्याह्ने प्रदद्यादुपपत्तिभिः।
कालहीनं तु यद्दानं तं भाग रक्षसा विदुः ३
लङ्घितं चावलीढं च कलिपूर्वं च यत्कृतम्।
रजस्वलाभिदृष्टं च तं भाग रक्षसां विदुः ॥४
अवघुष्टं च यद्भुक्तमव्रतेन च भारत।
परादृष्टं शुना चैव तं भाग रक्षसां विदुः ॥५
केशकीटावपतितं क्षुतं श्वभिरवेक्षितम्।
रुदितं चावधूतं च तं भागं रक्षसा विदुः ॥ ६
निरोङ्कारेण यद्भुक्तं सशस्त्रेण च भारत।
दुरात्मना च यद्भुक्तं तं भागं रक्षसा विदुः ॥५
परोच्छिष्टं च यद्भुक्तं परिभुक्तं च यद्भवेत्।
दैवे पित्र्ये च सततं तं भागं रक्षसा विदुः ८
मन्त्रहीनं क्रियाहीनं यच्छ्राद्धं परिविष्यते।
त्रिभिर्वर्णैर्नरश्रेष्ठ तं भागं रक्षसां विदुः ॥ ९
आज्याहुतिं विना चैव यत्किंचित्परिविष्यते
दुराचारैश्च यद्भुक्तं तं भाग रक्षसां विदुः॥१०
ये भागा रक्षसां प्राप्तास्त उक्ता भरतर्षभ।
अत ऊर्ध्वं विसर्गस्य परीक्षां ब्राह्मणे शृणु ११
यावन्तः पतिता विप्रा जडोन्मत्तास्तथैव च।
दैवे वाऽप्यथ पित्र्ये वा राजन्नार्हन्ति केतनम्
श्वित्री क्लीबश्च कुष्ठी च तथा यक्ष्महतश्च यः।
अपस्मारी च यश्चान्धो राजन्नार्हन्ति केतनम्
चिकित्सका देवलका वृथा नियमधारिणः।
सोमविक्रयिणश्चैव राजन्नार्हन्ति केतनम् १३
गायना नर्तकाश्चैव प्लवका वादकास्तथा।
कथका योधकाश्चैव राजन्नार्हन्ति केतनम्१५
होतारो वृषलानां च वृषलाध्यापकास्तथा।
तथा वृषलशिष्याश्च राजन्नार्हन्ति केतनम्१६
अनुयोक्ता च यो विप्रो अनुयुक्तश्च भारत।
नार्हतस्तावपि श्राद्धं ब्रह्मविक्रयिणौ हि तौ१७
अग्रणीर्यः कृतः पूर्वं वर्णावरपरिग्रहः।
ब्राह्मणः सर्वविद्योऽपि राजन्नार्हति केतनम्॥
अनग्नयश्च ये विप्रा मृतनिर्यातकाश्च ये।
स्तेनाश्च पतिताश्चैव राजन्नार्हन्ति केतनम् १९
अपरिज्ञातपूर्वाश्च गणपूर्वाश्च भारत।
पुत्रिकापूर्वपुत्राश्च श्राद्धे नार्हन्ति केतनम्॥१०
ऋणकर्ता च यो राजन्यश्च वार्धुषिको नरः।
प्राणिविक्रयवृत्तिश्च राजन्नार्हन्ति केतनम् ॥२१
स्त्रीपूर्वाः काण्डपृष्ठाश्च यावन्तो भरतर्षभ।
अजपा ब्राह्मणाश्चैव श्राद्धे नार्हन्ति केतनम् ॥

२३

श्राद्धेति। कालादौ विहितं विशेषमिति शेष ॥ १ ॥ उपपत्तिभि आदरादिभिर्युक्त सन् ॥ ३ ॥ क्षुतं क्षुतेन दूषितम् ॥६॥ निरोङ्कारेण अननुज्ञातेन शूद्रेण वा ॥७॥ परिभुक्तं देवातिथिपितृबालकादीन् वर्जयित्वा भुक्तं स्वेनैव॥८ आज्याहुतिं पात्राभिघारणं विना ॥ १० ॥ विसर्गस्य ब्राह्मणे दानस्य पात्रभूते ॥ ११ ॥ पतिता महापातकेन जातिबाह्यभूता **केतन** निमन्त्रणम् ॥१२॥ श्वित्री श्वेतकुष्ठी कुष्ठी मण्डलकुष्ठी यक्ष्महतो महारोगी अपस्मारी ग्रहग्रस्त १३ देवलका देवार्चनवृत्तिजीविन वृथा नियमधारिणो दम्भवन्त ॥ १४ ॥ **प्लवकाः** कूर्दनपरा **कथकाः** वृथालापिन· **योधकाः** मल्ला ॥ १५ ॥ **वृषलानां** शूद्राणा **होतारो** याजका· **वृषलशिष्याः** शूद्रदासा. ॥१६॥ **अनुयोक्ता** मृतकाध्यापक **अनुयुक्तः** मृतकाध्येता १७ **वर्णावरपरिग्रहः** शूद्रापति. ॥ १८ ॥ **अनग्नयः** श्रौतस्मार्तकर्मरहिता

ये चापेता स्वकर्मभ्य स्तेनास्ते परिकीर्तिता ।
कर्मणा देहदोषैश्च योनितश्चैव कुत्सिता ।
पतितास्तान्विजानीयान्महापातकिनश्च ये इति

स्तेनपतितौ यमोक्तौ वा ग्राह्यौ ॥१९॥ **गणपूर्वा** ग्रामण्य **पुत्रिकापूर्वपुत्राः** अस्यामुत्पन्न पुत्रो मदीय इति नियमेन या दीयते तस्या च यो जात स पुत्रिकापूर्वपुत्रः। स पितृगोत्राद्भ्रष्टो मातृगोत्रोपजीविन्वाप्नित्य ॥ २० ॥ ऋणकर्ता वृद्धयर्थं धनप्रयोक्ता **कुसीदी**नामा वार्धुषिक । 'समर्घं धान्यमादाय महर्घे य प्रयच्छति। स वै वार्धुषिको नाम हव्यकव्यबहिष्कृत ॥' इति **स्मृति**प्रसिद्ध ॥ २१ ॥ **स्त्रीपूर्वाः** स्त्रीजिता स्त्रीपिण्योपजीविनो वा **काण्डपृष्ठो** वेश्यापति 'काण्डपृष्ठ सद्भिरेव निगद्यते' इति यमेन व्याख्यात । **अजपाः** सन्ध्यावन्दनहीनाः ॥ २२ ॥

श्राद्धे दैवे च निर्दिष्टो ब्राह्मणो भरतर्षभ ।
दातुः प्रतिग्रहीतुश्च शृणुष्वानुग्रहं पुनः ॥ २३
चीर्णव्रता गुणैर्युक्ता भवेयुर्यैऽपि कर्षकाः ।
सावित्रीज्ञाः क्रियावन्तस्ते राजन्केतनक्षमाः
क्षात्रधर्मिणमप्याजौ केतयेत्कुलजं द्विजम् ।
न त्वेव वणिजं तात श्राद्धे च परिकल्पयेत् ॥
अग्निहोत्री च यो विप्रो ग्रामवासी च यो भवेत्
अस्तेनश्चातिथिज्ञश्च स राजन् केतनक्षमः २६
सावित्रीं जपते यस्तु त्रिकालं भरतर्षभ ।
भिक्षावृत्तिः क्रियावांश्च स राजन्केतनक्षमः॥
उदितास्तमितो यश्च तथैवास्तमितोदितः ।
अर्हिंस्रश्चाल्पदोषश्च स राजन्केतनक्षमः ॥ २८
अकल्ककको ह्यतर्कश्च ब्राह्मणो भरतर्षभ ।
संसर्गे भैक्ष्यवृत्तिश्च स राजन्केतनक्षमः ॥ २९
अव्रती कितवः स्तेनः प्राणिविक्रयिको वणिक्
पश्चाच्च पीतवान्सोम स राजन्केतनक्षमः ३०
अर्जयित्वा धनं पूर्वं दारुणैरपि कर्मभिः ।
भवेत्सर्वातिथिः पश्चात्स राजन्केतनक्षमः ३१
ब्रह्मविक्रयनिर्दिष्टं स्त्रिया यच्चार्जितं धनम्
अदेयं पितृविप्रेभ्यो यच्च क्लैब्यादुपार्जितम् ॥
क्रियमाणेऽपवर्गे च यो द्विजो भरतर्षभ ।
न व्याहराते यद्युक्त तस्याधर्मो गवानृतम् ३३
श्राद्धस्य ब्राह्मणः कालः प्राप्तं दधि घृत तथा
सोमक्षयश्च मांसं च यदारण्यं युधिष्ठिर ॥३४
श्राद्धापवर्गे विप्रस्य स्वधा वै मुदिता भवेत् ।
क्षत्रियस्यापि यो ब्रूयात्प्रीयन्तां पितरस्त्विति
अपवर्गे तु वैश्यस्य श्राद्धकर्मणि भारत ।
अक्षय्यमभिधातव्यं स्वस्ति शूद्रस्य भारत ॥
पुण्याहवाचनं दैवं ब्राह्मणस्य विधीयते ।
एतदेव निरोङ्कारं क्षत्रियस्य विधीयते ॥ ३७
वैश्यस्य दैवे वक्तव्यं प्रीयन्तां देवता इति ।
कर्मणामानुपूर्व्येण विधिपूर्वं कृत शृणु ॥ ३८
जातकर्मादिकाः सर्वास्त्रिषु वर्णेषु भारत ।
ब्रह्मक्षत्रे हि मन्त्रोक्ता वैश्यस्य च युधिष्ठिर ॥
विप्रस्य रशना मौञ्जी मौर्वी राजन्यगामिनी
बालवजी ह्यथ वैश्यस्य धर्म एष युधिष्ठिर४०
दातुः प्रतिग्रहीतुश्च धर्माधर्मावुभौ शृणु ।
ब्राह्मणस्यानृतेऽधर्मः प्रोक्तः पानकसञ्जितः ।
चतुर्गुणः क्षत्रियस्य वैश्यस्याष्टगुणः स्मृतः ४१
नान्यत्र ब्राह्मणोऽश्नीयात्पूर्वं विप्रेण कीर्तितः ।
यवीयान्पशुहिंसायां तुल्यधर्मो भवेत्स हि ॥
तथा राजन्यवैश्याभ्यां यश्चाश्नीयात्तु कीर्तितः ।
यवीयान् पशुहिंसायां भागार्धं समवाप्नुयात्
दैवं वाऽप्यथवा पित्र्यं योऽश्नीयाद्ब्राह्मणादिषु
अज्ञातो ब्राह्मणो राजंस्तस्याधर्मो गवानृतम्

अनुग्रह निषिद्धानामपि केनचिद्गुणेनाभ्यनुज्ञानम् ॥ २३ ॥ वणिज वणिग्वृत्तिम्॥२५॥ **उदितः** आढ्य **अस्तमितः** दरिद्र पूर्वाह्णे लाभकाले आढ्य । सद्यस्तस्य व्ययं दरिद्र । एवं प्रातरलाभकाले **अस्तमितः** मध्याह्ने लाभे सति **उदितः** । अल्पदोषो विद्वत्त्वादिविशेषगुणरहित **अदाता वा** ॥ २८ ॥ **अकल्ककः** अदाम्भिक अपापो वा । 'कल्क पापे च दम्भे च' इति **कोश** । अकल्पक इति पाठे स्वेच्छया धर्माधर्मकल्पक ।**अतर्कः** अहेतुक शुष्कतर्कपर. संसर्गे सङ्गत्यर्हे गृहे ज्ञाते भैक्ष्यवृत्ति ॥ २९ ॥ कितवो धूत ॥ ३० ॥ सर्व देवतादिक अतिथिरेव यस्य स सर्वातिथि ॥ ३१ ॥ **ब्रह्म** वेद क्लैब्यात् दीनभाषणेन मिथ्याशपथादिना वा ॥ ३२ ॥ अपवर्गे श्राद्धसमाप्तौ ह्रीयमाण इति पाठे लज्जमान युक्त अस्तु स्वधेत्यादिवचनं गवानृतं अनृतगोशपथस्य पापम् ॥ ३३ ॥ सोमक्षयो दर्श आरण्यं मृगादिमास च यदा प्राप्तं तदैव श्राद्धस्य काल ॥३४॥ स्वधोच्यतामिति प्रदात्रा उक्ते अस्तु स्वधेति ब्राह्मणो वदेत् एवमुत्तरत्र मुदिता प्रीतिकरी पितृणामित्यर्थात् ॥ ३५ ॥ **पुण्याहवाचनं** । पुण्याह भवन्तो ब्रुवन्त्विति यजमानेन प्रोक्ते ओ पुण्याहमस्त्विति ब्राह्मणा ब्रूयु । देव सोङ्कारम् ॥३७॥ दैवे ओङ्कारस्थाने प्रीयन्ता देवता पुण्याहमस्त्विति प्रतिवदेदित्यर्थ. कृत क्रिया अनुष्ठानकर्मामिति यावत् वैश्यस्य च मन्त्रोक्ता इत्यनुषङ्ग ॥ ३८ ॥ रशना मेखला मौञ्जी मुञ्जमयी मौर्वी धनुर्ज्या बालवजी बल्वजस्तृगविशेषस्तन्मयी ॥ ४० ॥ धर्मो दातु अधर्म प्रतिग्रहीतुरिति तावुभौ शृणु तत्राधर्ममेव सामान्यत आह—**ब्राह्मणस्येति** एककार्षापणार्थे अनृतवक्तुर्ब्राह्मणस्य यावानधर्मो भवति स एव चतुर्गुण क्षत्रियस्याष्टगुणो वैश्यस्य तावन्मात्रार्थे भवतीत्यर्थ. । सार्धश्लोक ॥ ४१ ॥ **नान्ये** । य पूर्वस्य निमन्त्रयितुरश्नाति स ज्यायान् परस्याश्नन् यवीयान् तत्र ब्राह्मणेन कीर्तित सन् यदि यवीयान् भवेत्तर्हि वृथापशुहिंसाया पूर्णं पापं प्राप्नुयात् ।क्षत्रियादिना कीर्तित सन् यदि यवीयान्स्यात्तर्हि वृथापशुहिंसाया अर्धं पापं प्राप्नुयादिति श्लोकद्वयार्थ ४२

आशौचो ब्राह्मणो राजन्योऽशीयाद्ब्राह्मणादिषु
ज्ञानपूर्वमथो लोभात्तस्याधर्मो गवानृतम्॥४५
अर्थेनान्येन यो लिप्सेत्कर्मार्थं चैव भारत।
आमन्त्रयति राजेन्द्र तस्याधर्मोऽनृतं स्मृतम्
अवेदव्रतचारित्रास्त्रिभिर्वर्णैर्युधिष्ठिर।
मन्त्रवत्परिविष्यन्ते तस्याधर्मो गवानृतम्४७
युधिष्ठिर उवाच।
पित्र्यं वाऽप्यथवा दैवं दीयते यत्पितामह
एतदिच्छाम्यहं ज्ञातुं दत्तं केषु महाफलम् ४८
भीष्म उवाच।
येषां दाराः प्रतीक्षन्ते सुवृष्टिमिव कर्षकाः।
उच्छेषपरिशेषं हि तान्भोजय युधिष्ठिर ४९
चारित्रनिरता राजन्ये कृशाः कृशवृत्तयः।
अर्थिनश्चोपगच्छन्ति तेषु दत्तं महाफलम्॥५०
तद्भक्तास्तद्गृहा राजंस्तद्बलास्तदपाश्रयाः।
अर्थिनश्च भवन्त्यर्थे तेषु दत्तं महाफलम्॥ ५१
तस्करेभ्यः परेभ्यो वा ये भयार्ता युधिष्ठिर।
अर्थिनो भोक्तुमिच्छन्ति तेषु दत्तं महाफलम्
अबलकस्य विप्रस्य रौक्ष्यात्करकृतात्मनः।
बटवो यस्य भिक्षन्ति तेभ्यो दत्तं महाफलम्
हृतस्वा हृतदाराश्च ये विप्रा देशसंप्लवे।
अर्थार्थमभिगच्छन्ति तेभ्यो दत्तं महाफलम्॥
व्रतिनो नियमस्थाश्च ये विप्राः श्रुतसंमताः।
तत्समाप्त्यर्थमिच्छन्ति तेभ्यो दत्तं महाफलम्
अत्युत्क्रान्ताश्च धर्मेषु पाषण्डसमयेषु च।
कृशप्राणाः कृशधनास्तेभ्यो दत्तं महाफलम्
कृतसर्वस्वहरणा निर्दोषाः प्रभविष्णुभिः।
स्पृहयन्ति च भुक्त्वान्न तेषु दत्तं महाफलम्
तपस्विनस्तपोनिष्टास्तेषा भैक्षचराश्च ये।
आर्थिनः किञ्चिदिच्छन्ति तेषु दत्तं महाफलम्
महाफलविधिर्दाने श्रुतस्ते भरतर्षभ।
निरयं येन गच्छन्ति स्वर्गं चैव हि तच्छृणु५९
गुर्वर्थमभयार्थं वा वर्जयित्वा युधिष्ठिर।
येऽनृतं कथयन्ति स्म ते वै निरयगामिनः ६०
परदाराभिहर्तारः परदाराभिमार्शिनः।
परदारप्रयोक्तारस्ते वै निरयगामिनः॥ ६१
ये परस्वापहर्तारः परस्वानां च नाशकाः।
सूचकाश्च परेषा ये ते वै निरयगामिनः॥ ६२
प्रपाणा च सभाना च सङ्क्रमाणा च भारत
अगाराणा च भेत्तारो नरा निरयगामिनः६३
अनाथा प्रमदा बाला वृद्धा भीता तपस्विनीम्
वञ्चयन्ति नरा ये च ते वै निरयगामिनः ६४
वृत्तिच्छेदं गृहच्छेदं दारच्छेदं च भारत।
मित्रच्छेदं तथाऽऽशायास्ते वै निरयगामिनः
सूचकाः सेतुभेत्तारः परवृत्त्युपजीवकाः।
अकृतज्ञाश्च मित्राणां ते वै निरयगामिनः ६६
पाषण्डा दूषकाश्चैव समयानां च दूषकाः।
ये प्रत्यवसिताश्चैव ते वै निरयगामिनः॥ ६७
विषमव्यवहाराश्च विषमाश्चैव वृद्धिषु।
लाभेषु विषमाश्चैव ते वै निरयगामिनः॥ ६८
दूतसंव्यवहाराश्च निष्परीक्षाश्च मानवाः।
प्राणिहिंसाप्रवृत्ताश्च ते वै निरयगामिनः॥६९

आशौच जननमरणाशौचवान् ॥ ४५ ॥ **अर्थेन** प्रयोजनेन तीर्थयात्राव्यपदेशेन जीविकार्थं यो धनं लिप्सेत् यो वा कर्मार्थं भे भिक्षा देहीत्यामन्त्रयति दातारमभिमुखीकरोति तस्यापि अनृत गवानृतमेव स्मृतम् ॥ ४६ ॥ वेदव्रत चारित्रं च येषा नास्ति ते येन मन्त्रवत् मन्त्रयुक्त यथास्यात्तथा श्राद्धे परिविष्यन्ते तस्य ॥ ४७ ॥ भोजनपात्रेऽवशिष्टमुच्छेष तेन सहितं परिशेषं स्थाल्यामवशिष्टं प्रतीक्षन्ते, येषा पाकपर्याप्तमेव धान्यादिकमस्ति न कुसूलादौ तान् भोजय ॥ ४९ ॥ तद्भक्ता चारित्रमेव भक्तोऽन्न तद्वज्जीवनं येषा ते। तद्गृहा. तदेव गृहे स्त्र्यादौ येषा ते, बलं इह लोके दोषाभिभवसामर्थ्यं, अपाश्रय. परलोकगमनालम्बनं अर्थे प्रयोजने सत्येवार्थिनो भवन्ति न सग्रहार्थम् ॥ ५१ ॥ **रौक्ष्यात्** दारिद्र्यात् करे कृत. आत्मैवात्मा जीवनमन्नं हस्ते गृहीतान्नस्य बटव. क्षुधार्ता. मह्यं देहि मह्यं देहीति याचन्ते तेभ्योऽतिदरिद्रेभ्य ॥ ५३ ॥ कृतेति पाठेऽपि कृतं हिंसितं दूरीकृतं हृतमित्येवार्थ ॥ ५४ ॥ च पादपूरणार्थ. । पाषण्डाना समयो मर्यादा येषु धर्मेषु तत्र अत्युत्क्रान्ता. अत्यन्त ततो दूरे स्थिता ॥ ५६ ॥ भुक्त्वाऽन्नमेव स्पृहयन्ति न स्वादु, अत एव न चतुर्थी स्वादु वेनानीप्सितत्वादन्नस्य किन्तु गर्तापूरण यथाकथंचित्कर्तव्य तच्च स्वयमेवेश्वरेण कर्तव्यमित्याशयवन्त इत्यर्थ ॥ ५७ ॥ अभयार्थं भयनिवृत्तिरूपं प्रयोजनम् ॥ ६० ॥ आभिमर्शिनो जारा. प्रयोक्तार हर्त्रभिमर्शिनोर्दूता ॥ ६१ ॥ परेषा दोषस्येति शेष ॥ ६२ ॥ आशायाश्छेदमित्येकदेशानुपंग कुर्वन्तीति शेष ॥ ६५ ॥ सूचका राजगामिपैशुन्यवादिन सेतु आर्यमर्यादा ॥ ६६ ॥ पाषण्डा वेदविरोधिन शाक्यादय. दूषका सता निन्दका समयाना धर्मसङ्केताना प्रत्यवसिता. आरूढपतिता ॥ ६७ ॥ विषमा जनविरोधिनो व्यवहारादयो येषां ते ॥ ६८ ॥

कृताशं कृतनिर्देश कृतभक्तं कृतश्रमम् ।
भेदैर्ये व्यपकर्षन्ति ते वै निरयगामिनः ॥ ७०
पर्यश्नन्ति च ये दारानग्निभृत्यातिथींस्तथा ।
उत्सन्नपितृदेवेज्यास्ते वै निरयगामिनः ॥ ७१
वेदविक्रयिणश्चैव वेदानां चैव दूषकाः ।
वेदानां लेखकाश्चैव ते वै निरयगामिनः ॥ ७२
चातुराश्रम्यबाह्याश्च श्रुतिबाह्याश्च ये नराः ।
विकर्मभिश्च जीवन्ति ते वै निरयगामिनः ७३
केशविक्रयिका राजन् विषविक्रयिकाश्च ये ।
क्षीरविक्रयिकाश्चैव ते वै निरयगामिनः ७४
ब्राह्मणानां गवां चैव कन्यानां च युधिष्ठिर ।
यऽन्तरं यान्ति कार्येषु ते वै निरयगामिनः ॥
शस्त्रविक्रयिकाश्चैव कर्तारश्च युधिष्ठिर ।
शल्यानां धनुषां चैव ते वै निरयगामिनः ७६
शिलाभिः शकुभिर्वापि श्वभ्रैर्वा भरतर्षभ ।
ये मार्गमनुरुंधन्ति ते वै निरयगामिनः ॥ ७७
उपाध्यायांश्च भृत्यांश्च भक्तांश्च भरतर्षभ ।
ये त्यजन्त्यविकारांस्त्रीस्ते वै निरयगामिनः७८
अप्राप्तदमकाश्चैव नासानां वेधकाश्च ये ।
बन्धकाश्च पशूनां ये ते वै निरयगामिनः ७९
अगोप्तारश्च राजानो बलिषड्भागतस्कराः ।
समर्थाश्चाप्यदातारस्ते वै निरयगामिनः ८०
क्षान्तान् दान्तांस्तथा प्राज्ञान्
दीर्घकाल सहोषितान् ।
त्यजन्ति कृतकृत्या ये
ते वै निरयगामिनः ॥ ८१
बालानामथ वृद्धानां दासानां चैव ये नराः ।
अदत्त्वा भक्षयन्त्यग्रे ते वै निरयगामिनः ८२
एते पूर्वं विनिर्दिष्टाः प्रोक्ता निरयगामिनः ।
भागिनः स्वर्गलोकस्य वक्ष्यामि भरतर्षभ ८३
सर्वेष्वेव तु कार्येषु दैवपूर्वेषु भारत ।
हन्ति पुत्रान् पशूंस्तान्ब्राह्मणातिक्रमः कृतः
दानेन तपसा चैव सत्येन च युधिष्ठिर ।
ये धर्ममनुवर्तन्ते ते नराः स्वर्गगामिन ॥ ८५
शुश्रूषाभिस्तपोभिश्च विद्यामादाय भारत ।
ये प्रतिग्रहनिःस्नेहास्ते नराः स्वर्गगामिनः ८६
भयात्पापात्तथा बाधाद्दारिद्र्याद्व्याधिपीडनात्
यत्कृते प्रतिमुच्यन्ते ते नराः स्वर्गगामिनः ८७
क्षमावन्तश्च धीराश्च धर्मकार्येषु चोत्थिताः ।
मङ्गलाचारसम्पन्नाः पुरुषाः स्वर्गगामिनः ॥८८
निवृत्ता मधुमांसेभ्यः परदारेभ्य एव च ।
निवृत्ताश्चैव मद्येभ्यस्ते नराः स्वर्गगामिनः ८९
आश्रमाणां च कर्तारः कुलानां चैव भारत
देशानां नगराणां च ते नराः स्वर्गगामिनः९०
वस्त्राभरणदातारो भक्तपानान्नदास्तथा ।
कुटुम्बानां च दातारः पुरुषाः स्वर्गगामिनः ॥
सर्वहिंसानिवृत्ताश्च नराः सर्वसहाश्च ये ।
सर्वस्याश्रयभूताश्च ते नराः स्वर्गगामिनः॥९२
मातरं पितरं चैव शुश्रूषन्ति जितेन्द्रियाः ।
भ्रातॄणां चैव सस्नेहास्ते नराः स्वर्गगामिनः९३
आढ्याश्च बलवन्तश्च यौवनस्थाश्च भारत ।
ये वै जितेन्द्रिया धीरास्ते नराः स्वर्गगामिनः
अपराधिषु सस्नेहा मृदवो मृदुवत्सलाः ।
आराधनसुखाश्चापि पुरुषाः स्वर्गगामिन ॥९५
सहस्रपरिवेष्टारस्तथैव च सहस्रदाः ।
त्रातारश्च सहस्राणां ते नराः स्वर्गगामिनः ९६
सुवर्णस्य च दातारो गवां च भरतर्षभ ।
यानानां वाहनानां च ते नराः स्वर्गगामिनः
वैवाहिकानां द्रव्याणां प्रेष्याणां च युधिष्ठिर
दातारो वाससा चैव ते नराः स्वर्गगामिनः
विहारावसथोद्यानकूपारामसभाप्रपाः ।
वप्राणां चैव कर्तारस्ते नराः स्वर्गगामिनः॥९९

कृताशं दासमार्थिनं वा कृतनिर्देशं निर्देशं तुभ्यमिदं दास्यामीति प्रतिज्ञा सा कृता यस्मै इति समासः । भक्तं वेतनं व्यपकर्षन्ति पत्यु सकाशादूरीकुर्वन्ति ॥ ७० ॥ पर्यश्नन्ति परित्यज्याश्नन्ति ॥ ७१ ॥ विकर्मभिः स्वस्य निषिद्धैः कर्मभिः ॥ ७३ ॥ केशाश्चामरकम्बलादयः ॥ ७४ ॥ अन्तरं यान्ति अन्तराया भवन्ति ॥७५॥ कर्तारः शस्त्रशल्यादीनाम् ॥७६॥ अप्राप्त अदान्त । 'प्राप्त लब्धे समजसे' (तवर्गे ३२) इति **मेदिनी** । पशूना युगेन गोण्या अण्डमर्दनेन वा बलवीर्ययोर्नाशका **अप्राप्तदमकाः** ॥ ७९ ॥ **सर्वेष्विति** । ये ब्राह्मणातिक्रमं न कुर्वन्ति ते स्वर्गगामिन इत्यर्थः ॥ ८४ ॥ आबाधात् सङ्कटात् ॥ ८७ ॥ मधु क्षौद्रम् ॥ ८९ ॥ कर्तारः पालनकर्तारः ॥ ९० ॥ कुटुम्बाना दातार परिवाहकर्तारः ॥ ९१ ॥ आराधनेन इतरान् सुखयन्ति ते तथा ॥ ९५ ॥ द्रव्याणा वध्वलङ्कारादीना प्रेष्याणा दासीदासानाम् ॥ ९८ ॥

निवेशनानां क्षेत्राणां वसतीनां च भारत ।
दातारः प्रार्थितानां च ते नराः स्वर्गगामिनः
रसानां चाथ बीजानां धान्यानां च युधिष्ठिर
स्वयमुत्पाद्य दातारः पुरुषाः स्वर्गगामिनः ॥ १
यस्मिंस्तस्मिन् कुले जाता बहुपुत्रा· शतायुषः
सानुक्रोशा जितक्रोधाः पुरुषाः स्वर्गगामिनः॥
एतदुक्तमपुत्रार्थं दैवं पित्र्यं च भारत ।
दानधर्मे च दानस्य यत्पूर्वमृषिभिः कृतम्१०३

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि स्वर्गनरकगामिवर्णने त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

युधिष्ठिर उवाच ।
इदं मे तत्त्वतो राजन् वक्तुमर्हसि भारत ।
अहिंसयित्वाऽपि कथं ब्रह्महत्या विधीयते॥१
भीष्म उवाच ।
व्यासमामन्त्र्य राजेन्द्र पुरा यत्पृष्टवानहम्।
तत्तेऽहं सम्प्रवक्ष्यामि तदिहैकमनाः शृणु ॥ २
चतुर्थस्त्वं वसिष्ठस्य तत्त्वमाख्याहि मे मुने ।
अहिंसयित्वा केनेह ब्रह्महत्या विधीयते ॥ ३
इति पृष्टो मया राजन् पराशरशरीरजः ।
अब्रवीन्निपुणो धर्मे नि.संशयमनुत्तमम् ॥ ४
ब्राह्मणं स्वयमाहूय भिक्षार्थे कृशवृत्तिनम् ।
ब्रूयान्नास्तीति यः पश्चात्तं विद्याद्ब्रह्मघातिनम्
मध्यस्थस्येह विप्रस्य योऽनूचानस्य भारत ।
वृत्तिं हरति दुर्बुद्धिस्तं विद्याद्ब्रह्मघातिनम् ॥६
गोकुलस्य तृषार्तस्य जलार्थे वसुधाधिप ।
उत्पादयति यो विघ्नं तं विद्याद्ब्रह्मघातिनम् ७
यः प्रवृत्तां श्रुतिं सम्यक् शास्त्रं वा मुनिभिः कृतं
दूषयत्यनभिज्ञाय तं विद्याद्ब्रह्मघातिनम् ॥ ८
आत्मजां रूपसंपन्नां महतीं सदृशे वरे ।
न प्रयच्छति यः कन्यां तं विद्याद्ब्रह्मघातिनम्
अधर्मनिरतो मूढो मिथ्या यो वै द्विजातिषु।
दद्यान्मर्मातिगं शोकं तं विद्याद्ब्रह्मघातिनम्१०
चक्षुषा विप्रहीणस्य पंगुलस्य जडस्य वा ।
हरेत यो वै सर्वस्वं तं विद्याद्ब्रह्मघातिनम् ११
आश्रमे वा वने वाऽपि ग्रामे वा यदि वा पुरे
अग्निं समुत्सृजेन्मोहात्तं विद्याद्ब्रह्मघातिनम्१२

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि ब्रह्मघ्नकथने चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

युधिष्ठिर उवाच ।
तीर्थानां दर्शनं श्रेयः स्नानं च भरतर्षभ । श्रवणं च महाप्राज्ञ श्रोतुमिच्छामि तत्त्वतः ॥ १

दानस्य प्रत्यर्पणस्य दानं च तद्धर्म चेति शोधको धर्म । ' स्याद्धर्ममस्त्रियाम् ' (१।४।२४) इत्यमर । अमुत्राथ परलोकफलम् ॥ ३ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्रयोविंशोऽध्याय ॥ २३ ॥

२४

इदं मे इत्यध्याय स्पष्टार्थ ॥ १ ॥ इति श्रीमहाभरते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्विंशोऽध्याय· ॥ २४ ॥

२५

तिर्थानामित्यध्यायस्य तात्पर्ये दरिद्राणां वाह्यं धर्मसाधनं तीर्थाटनादन्यन्नास्तीति श्रोतुमिच्छामि तीर्थानीत्यर्थात् ॥ १ ॥

पृथिव्यां यानि तीर्थानि पुण्यानि भरतर्षभ ॥
वक्तुमर्हसि मे तानि श्रोतास्मि नियतं प्रभो २
भीष्म उवाच ।
इममंगिरसा प्रोक्तं तीर्थवंशं महाद्युते ।
श्रोतुमर्हसि भद्रं ते प्राप्स्यसे धर्ममुत्तमम् ॥ ३
तपोवनगतं विप्रमभिगम्य महामुनिम् ।
पप्रच्छाङ्गिरसं धीरं गौतमः संशितव्रतः ॥ ४
अस्ति मे भगवन्कश्चित्तीर्थेभ्यो धर्मसंशयः ।
तत्सर्वं श्रोतुमिच्छामि तन्मे शंस महामुने ॥५
उपस्पृश्य फलं किं स्यात्तेषु तीर्थेषु वै मुने ।
प्रेत्यभावे महाप्राज्ञ तद्यथाऽस्ति तथा वद ६
आङ्गिरा उवाच ।
सप्ताहं चन्द्रभागां वै वितस्तामूर्मिमालिनीम्
विगाह्य वै निराहारो निर्मलो मुनिवद्भवेत् ७
काश्मीरमण्डले नद्यो याः पतन्ति महानदम्
ता नदीः सिंधुमासाद्य शीलवान्स्वर्गमाप्नुयात्
पुष्करं च प्रभासं च नैमिषं सागरोदकम् ।
देविकामिन्द्रमार्गं च स्वर्णबिन्दुं विगाह्य च
विबोध्यते विमानस्थः सोऽप्सरोभिरभिष्टुतः
हिरण्यबिन्दुं विक्षोभ्य प्रयतश्चाभिवाद्य च१०
कुशेशयं च देवं तं धूयते तस्य किल्बिषम् ।
इंद्रतोयां समासाद्य गन्धमादनसन्निधौ ॥ ११
करतोयां कुरङ्गे च त्रिरात्रोपोषितो नरः ।
अश्वमेधमवाप्नोति विगाह्य प्रयतः शुचिः १२
गङ्गाद्वारे कुशावर्ते बिल्वके नीलपर्वते ।
तथा कनखले स्नात्वा धूतपाप्मा दिवं व्रजेत् ।
अपां ह्रदं उपस्पृश्य वाजिमेधफलं लभेत् ।
ब्रह्मचारी जितक्रोधः सत्यसंधस्त्वहिंसकः
यत्र भागीरथी गङ्गा पतते दिशमुत्तराम् ।
महेश्वरस्य त्रिस्थाने यो नरस्त्वभिषिच्यते १५
एकमासं निराहारः स पश्यति हि देवताः ।
सप्तगङ्गे त्रिगङ्गे च इन्द्रमार्गे च तर्पयन् ॥ १६
सुधां वै लभते भोक्तुं यो नरो जायते पुनः ।
महाश्रम उपस्पृश्य योऽग्निहोत्रपरः शुचिः १७
एकमास निराहारः सिद्धिं मासेन स व्रजेत्।
महाह्रद उपस्पृश्य भृगुतुङ्गे त्वलोलुपः ॥ १८
त्रिरात्रोपोषितो भूत्वा मुच्यते ब्रह्महत्यया ।
कन्याकूप उपस्पृश्य बलाकायां कृतोदकः १९
देवेषु लभते कीर्तिं यशसा च विराजते ॥ २०
देविकायामुपस्पृश्य तथा सुन्दरिकाह्रदे ।
अश्विन्या रूपवर्चस्कं प्रेत्य वै लभते नरः २१
महागङ्गामुपस्पृश्य कृत्तिकाङ्गारके तथा ।
पक्षमेकं निराहारः स्वर्गमाप्नोति निर्मलः २२
वैमानिक उपस्पृश्य किङ्किणीकाश्रमे तथा ।
निवासेऽप्सरसा दिव्ये कामचारी महीयते२३
कालिकाश्रममासाद्य विपाशायां कृतोदकः ।
ब्रह्मचारी जितक्रोधस्त्रिरात्रं मुच्यते भवात्२४
आश्रमे कृत्तिकाना तु स्नात्वा यस्तर्पयेत्पितॄन्
तोषयित्वा महादेवं निर्मलः स्वर्गमाप्नुयात् २५
महापुर उपस्पृश्य त्रिरात्रोपोषितः शुचिः ।
त्रसानां स्थावराणा च द्विपदानां भयं त्यजेत्
देवदारुवने स्नात्वा धूतपाप्मा कृतोदकः ।
देवलोकमवाप्नोति सप्तरात्रोषितः शुचिः २७
शरस्तम्बे कुशस्तम्बे द्रोणशर्मपदे तथा ।
अपां प्रपतनासेवी सेव्यते सोऽप्सरोगणैः॥२८
चित्रकूटे जनस्थाने तथा मन्दाकिनीजले ।
विगाह्य वै निराहारो राजलक्ष्म्या निषेव्यते
श्यामायास्त्वाश्रमं गत्वा
उषित्वा चाभिषिच्य च
एकपक्षं निराहार-
स्त्वन्तर्धानफलं लभेत् ॥ ३०
कौशिकीं तु समासाद्य वायुभक्षस्त्वलोलुपः।
एकविंशतिरात्रेण स्वर्गमारोहते नरः ॥ ३१
मतङ्गवाप्यां यः स्नायादेकरात्रेण सिद्धयति ।
विगाहति ह्यनालम्बमन्धकं वै सनातनम् ३२
नैमिषे स्वर्गतीर्थे च उपस्पृश्य जितेन्द्रियः ।
फलं पुरुषमेधस्य लभेन्मास कृतोदकः ॥ ३३
गङ्गाह्रद उपस्पृश्य तथा चैवोत्पलावने ।
अश्वमेधमवाप्नोति तत्र मासं कृतोदकः ॥ ३४

तीर्थवंशं तीर्थसङ्घम् ॥ ३ ॥ तीर्थेभ्य तीर्थान्युद्दिश्य पावनानि न वेति धर्मसंशयोऽस्ति ॥ ५ ॥ प्रेत्यभावे जन्मान्तरे ॥ ६ ॥ मुनिवत् भवेत् मुनीना गतिं लभेते त्यर्थ· ॥ ७ ॥ नद सिन्धुम् ॥ ८ ॥ गङ्गाद्वारादयोऽत्र-ब्रह्मगिरौ गोदावर्यनुगता एव ग्राह्या भागीरथीमाहात्म्यस्य अग्रे स्वातन्त्र्येण वर्ण्यमानत्वात् ॥ १३ ॥ त्रिस्थाने स्वर्ग-मृत्युपाताले ॥ १५ ॥ रूपवर्चसो समाहार. रूपवर्चस्कं वर्चस्तेज· ॥ २१ ॥ त्रसाना जङ्गमानाम् ॥ २६ ॥ अन्तर्धानफलं गन्धर्वादिभोगम् ॥ ३० ॥

गङ्गायमुनयोस्तीर्थे तथा कालञ्जरे गिरौ ।
दशाश्वमेधानाप्नोति तत्र मासं कृतोदकः ॥३५
षष्टिन्हद उपस्पृश्य चान्नदानाद्विशिष्यते ।
दशतीर्थसहस्राणि तिस्रः कोट्यस्तथा पराः ॥
समागच्छन्ति माघ्यां तु प्रयागे भरतर्षभ ।
माघमासं प्रयागे तु नियतः संशितव्रतः ॥३७
स्नात्वा तु भरतश्रेष्ठ निर्मलः स्वर्गमाप्नुयात् ।
मरुद्गण उपस्पृश्य पितृणामाश्रमे शुचिः ॥ ३८
वैवस्वतस्य तीर्थे च तीर्थभूतो भवेन्नरः ।
तथा ब्रह्मसरो गत्वा भागीरथ्यां कृतोदकः ३९
एकमासं निराहारः सोमलोकमवाप्नुयात् ४०
उत्पातके नरः स्नात्वा अष्टावक्रे कृतोदकः ।
द्वादशाहं निराहारो नरमेधफलं लभेत् ॥ ४१
अश्मपृष्ठे गयायां च निरविन्दे च पर्वते ।
तृतीयां क्रौञ्चपद्यां च ब्रह्महत्यां विशुध्यते॥४२
कलविङ्क उपस्पृश्य विद्याच्च बहुशो जलम् ।
अग्नेः पुरे नरः स्नात्वा अग्निकन्यापुरे वसेत् ॥
करवीरपुरे स्नात्वा विशालायां कृतोदकः ।
देवन्हद उपस्पृश्य ब्रह्मभूतो विराजते ॥ ४४
पुनरावर्तनन्दां च महानन्दां च सेव्य वै ।
नन्दने सेव्यते दान्तस्त्वप्सरोभिरहिंसकः४५
उर्वशीं कृत्तिकायोगे गत्वा चैव समाहितः ।
लौहित्ये विधिवत्स्नात्वा पुंडरीकफलं लभेत्
रामन्हद उपस्पृश्य विपाशायां कृतोदकः ।
द्वादशाह निराहारः कलमषाद्विप्रमुच्यते ॥४७
महान्हद उपस्पृश्य शुद्धेन मनसा नरः ।
एकमास निराहारो जमदग्निगतिं लभेत् ॥४८
विंध्ये संताप्य चात्मानं सत्यसन्धस्त्वहिंसकः
विनयात्तप आस्थाय मासेनैकेन सिध्यति ४९
नर्मदायामुपस्पृश्य तथा शूर्पारकोदके ।
एकपक्षं निराहारो राजपुत्रो विधीयते ॥ ५०
जम्बूमार्गे त्रिभिर्मासैः संयतः सुसमाहितः ।
अहोरात्रेण चैकेन सिद्धिं समधिगच्छति ५१
कोकामुखे विगाह्याथ गत्वा चाञ्जलिकाश्रमम्
शाकभक्षश्चीरवासाः कुमारीर्विन्दते दश॥५२
वैवस्वतस्य सदनं न स गच्छेत्कदाचन ।
यस्य कन्याह्रदे वासो देवलोकं स गच्छति
प्रभासे त्वेकरात्रेण अमावास्यां समाहितः ।
सिध्यते तु महाबाहो यो नरो जायतेऽमरः५४
उज्जानक उपस्पृश्य आर्ष्टिषेणस्य चाश्रमे ।
पिङ्गायाश्चाश्रमे स्नात्वा सर्वपापैः प्रमुच्यते५५
कुल्यायां समुपस्पृश्य जप्त्वा चैवाघमर्षणम् ।
अश्वमेधमवाप्नोति त्रिरात्रोपोषितो नरः ॥५६
पिंडारक उपस्पृश्य एकरात्रोषितो नरः ।
अग्निष्टोममवाप्नोति प्रभातां शर्वरीं शुचिः ५७
तथा ब्रह्मसरो गत्वा धर्मारण्योपशोभितम् ।
पुण्डरीकमवाप्नोति उपस्पृश्य नरः शुचिः ५८
मैनाके पर्वते स्नात्वा तथा सन्ध्यामुपास्य च
कामं जित्वा च वै मासं सर्वयज्ञफलं लभेत्५९
कालोदकं नन्दिकुण्डं तथा चोत्तरमानसम् ।
अभ्येत्य योजनशतादभ्रूणहा विप्रमुच्यते ॥ ६०
नन्दीश्वरस्य मूर्तिं तु दृष्ट्वा मुच्येत किल्बिषैः ।
स्वर्गमार्गे नरः स्नात्वा ब्रह्मलोकं स गच्छति
विख्यातो हिमवान्पुण्यः शङ्करश्वशुरो गिरिः
आकरः सर्वरत्नानां सिद्धचारणसेवितः ६२
शरीरमुत्सृजेत्तत्र विधिपूर्वमनाशके ।
अध्रुवं जीवितं ज्ञात्वा यो वै वेदान्तगो द्विजः
अभ्यर्च्य देवतास्तत्र नमस्कृत्य मुनींस्तथा ।
ततः सिद्धो दिवं गच्छेद्ब्रह्मलोकं सनातनम्६४
कामं क्रोधं च लोभं च यो जित्वा तीर्थमावसेत्
न तेन किञ्चिन्न प्राप्तं तीर्थाभिगमनाद्भवेत् ६५
यान्यगम्यानि तीर्थानि दुर्गाणि विषमाणि च
मनसा तानि गम्यानि सर्वतीर्थसमीक्षया ६६

गयाया गयान्तर्गतेऽश्मपृष्ठे प्रेतशिलाया एका ब्रह्महत्या व्यपोह्य निरविन्दे निश्चितोऽविन्दोऽलाभो यत्र तस्मिन् सुखगन्धहीने प्रेतपर्वते द्वितीया ब्रह्महत्या निरस्य क्रौञ्चपदीति सर्वेषा विष्णुपदादीनामुपलक्षणं तेषु तृतीया ब्रह्महत्या सकृद्गया गत एव विशुध्यते हत्या नाशयित्वा पूतो भवति ॥ ४२ ॥ उर्वशीं उर्वशीतीर्थं कृत्तिकायोगे कार्तिक्या पौर्णमास्याम् ॥ ४६ ॥ कुमारी· कुमारीसंज्ञकं तीर्थम् ॥ ५२ ॥ **शरीरमिति** । विधिपूर्वकं आत्मश्राद्धादिकं कृत्वा अनाशके अनशनव्रते कृते सति बुद्धिपूर्वकं अत्रैव शरीरमुत्सृजेत् । तीव्ररोगाद्यनभिभूतस्याप्येतन्मरण विधीयते, अध्रुवमिति वाक्यशेषात् । तदपि वेदान्तगस्य ज्ञाततत्त्वस्य शरीरधारणे प्रयोजनमपश्यत एव । इतरेषा त्विह मरणं रोगादिमहानिमित्ते सत्येव महापातकप्रायश्चित्तार्थं वा उचितं नान्यथेति व्याख्यातं प्रागेव वनपर्वणि ॥ ६३ ॥

इदं मेध्यमिदं पुण्यमिदं स्वर्ग्यमनुत्तमम् ।
इदं रहस्यं वेदानामाप्लाव्यं पावनं तथा ॥ ६७
इदं दद्याद्विजातीनां साधोरात्महितस्य च ।
सुहृदां च जपेत्कर्णे शिष्यस्यानुगतस्य च ६८
दत्तवान् गौतमस्यैतदङ्गिरा वै महातपाः ।
अङ्गिराः समनुज्ञातः काश्यपेन च धीमता ६९
महर्षीणामिदं जप्यं पावनानां तथोत्तमम् ।
जपंश्चाभ्युत्थितः शश्वन्निर्मलः स्वर्गमाप्नुयात
इदं यश्चापि शृणुयाद्रहस्यं त्वङ्गिरोमतम् ।
उत्तमे च कुले जन्म लभेज्जातीश्च संस्मरेत् ७१

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि आङ्गिरसतीर्थयात्रायां पञ्चविंशोऽध्यायः ॥ २५ ॥

२६

वैशम्पायन उवाच ।
बृहस्पतिसमं बुद्ध्या क्षमया ब्रह्मणः समम् ।
पराक्रमे शक्रसममादित्यसमतेजसम् ॥ १
गाङ्गेयमर्जुनेनाजौ निहतं भूरितेजसम् ।
भ्रातृभिः सहितोऽन्यैश्च पर्यपृच्छद्युधिष्ठिरः २
शयानं वीरशयने कालाकाङ्क्षिणमच्युतम् ।
आजग्मुर्भरतश्रेष्ठं द्रष्टुकामा महर्षयः ॥ ३
अत्रिर्वसिष्ठोऽथ भृगुः पुलस्त्यः पुलहः क्रतुः ।
अङ्गिरा गौतमोऽगस्त्यः सुमतिः सुयतात्मवान्
विश्वामित्रः स्थूलशिराः संवर्तः प्रमतिर्दमः ।
बृहस्पत्युशनोन्यासाश्यवनः काश्यपो ध्रुवः५
दुर्वासा जमदग्निश्च मार्कण्डेयोऽथ गालवः ।
भरद्वाजोऽथ रैभ्यश्च यवक्रीतस्तितस्तथा ॥ ६
स्थूलाक्षः शबलाक्षश्च कण्वो मेधातिथिः कृशः
नारदः पर्वतश्चैव सुधन्वाऽथैकतो द्विजः ॥ ७
नितंभूर्भुवनो धौम्यः शतानन्दोऽकृतव्रणः ।
जामदग्न्यस्तथा रामः कचश्चेत्येवमादयः ॥८
समागता महात्मानो भीष्मं द्रष्टुं महर्षयः ।
तेषां महात्मना पूजामागतानां युधिष्ठिरः ॥९
भ्रातृभिः सहितश्चक्रे यथावदनुपूर्वशः ।
ते पूजिताः सुखासीनाः कथाश्चक्रुर्महर्षयः ॥१०
भीष्माश्रिताः सुमधुराः
सर्वेन्द्रियमनोहराः ।
भीष्मस्तेषां कथाः श्रुत्वा
ऋषीणां भावितात्मनाम् ॥ ११
मेने दिविष्ठमात्मानं तुष्ट्या परमया युतः ।
ततस्ते भीष्ममामन्त्र्य पाण्डवांश्च महर्षयः १२
अन्तर्धानं गताः सर्वे सर्वेषामेव पश्यताम् ।
तानृषीन्सुमहाभागानन्तर्धानगतानपि ॥ १३
पाण्डवास्तुष्टुवुः सर्वे प्रणेमुश्च मुहुर्मुहुः ।
प्रसन्नमनसः सर्वे गाङ्गेयं कुरुसत्तमम् ॥ १४
उपतस्थुर्यथोद्यन्तमादित्यं मन्त्रकोविदाः ।
प्रभावात्तपसस्तेषामृषीणां वीक्ष्य पांडवाः १५
प्रकाशन्तो दिशः सर्वा विस्मयं परमं ययुः ।
महाभाग्यं परं तेषामृषीणामनुचिन्त्य ते ।
पांडवाः सह भीष्मेण कथाश्चक्रुस्तदाश्रयाः१६
वैशम्पायन उवाच ।
कथान्ते शिरसा पादौ स्पृष्ट्वा भीष्मस्य पांडवः
धर्म्यं धर्मसुतः प्रश्नं पर्यपृच्छद्युधिष्ठिरः ॥ १७
युधिष्ठिर उवाच ।
के देशाः के जनपदा आश्रमाः के च पर्वताः
प्रकृष्टाः पुण्यतः काश्च ज्ञेया नद्यः पितामह १८

इदं तीर्थसेवनं मेध्यं यज्ञफलप्रदं पुण्यं पापघ्नं अत एव स्वर्ग्यं आप्लाव्यं आप्लव स्नानमित्यर्थः । आप्लाव्यमिति पाठे रहस्यत्वादवाच्यं स्वार्थे ष्यञ् ॥ ६७ ॥ समनुज्ञात प्रार्थित काश्यपेन एतद्विज्ञातुकामेनेति शेषः ॥ ६९ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चविंशोऽध्यायः ॥ २५ ॥

२६

बृहस्पतीत्यध्यायः सर्वतीर्थश्रेष्ठा गङ्गा कथयितुं प्रवर्तते इतोऽन्यतीर्थान्तरं नास्तीति स्मरन् ॥ १ ॥ यदाऽपृच्छत्तदाजमुरिति द्वितीयेन यत्तदोरध्याहारेणान्वयः । यस्य प्रश्नमात्रेण सिद्धानां दर्शनं भवति किमुत तद्दर्शनादिनेति भावः ॥ २ ॥ महाभाग्यं योगैश्वर्यं खेचरत्वान्तर्धानशक्त्यादिसिद्धिमत्त्वम् ॥ १६ ॥ देशा भूमिभागा जनपदा महाजननिवासस्थानानि आश्रमाः ऋषिस्थानानि १८

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
शिलोञ्छवृत्तेः संवादं सिद्धस्य च युधिष्ठिर १९
इमां कश्चित्परिक्रम्य पृथिवीं शैलभूषणाम् ।
असकृद्विपदा श्रेष्ठः श्रेष्ठस्य गृहमेधिनः ॥ २०
शिलवृत्तेर्गृहं प्राप्तः स तेन विधिनाऽर्चितः ।
उवास रजनीं तत्र सुखं सुखमागृषिः ॥ २१
शिलवृत्तिस्तु यत कृत्यं प्रातस्तत्कृतवाञ्शुचिः
कृतकृत्यमुपातिष्ठत सिद्धं तमतिथिं तदा २२
तौ समेत्य महात्मानौ सुखासीनौ कथाः शुभाः
चक्रतुर्वेदसंबद्धास्तच्छेषकृतलक्षणाः ॥ २३
शिलवृत्तिः कथान्ते तु सिद्धमामन्त्र्य यत्नतः ।
प्रश्नं पप्रच्छ मेधावी यन्मां त्वं परिपृच्छसि

शिलवृत्तिरुवाच ।

के देशाः के जनपदाः के श्रमाः के च पर्वताः
प्रकृष्टा पुण्यतः काश्च ज्ञेया नद्यस्तदुच्यताम् ।

सिद्ध उवाच ।

ते देशास्ते जनपदास्तेऽऽश्रमास्ते च पर्वताः
येषां भागीरथी गङ्गा मध्येनैति सरिद्वरा २६
तपसा ब्रह्मचर्येण यज्ञैस्त्यागेन वा पुनः ।
गतिं ना न लभेज्जन्तुर्गङ्गां संसेव्य या लभेत्
स्पृष्टानि येषां गाङ्गेयैस्तोयैर्गात्राणि देहिनाम्
न्यस्तानि न पुनस्तेषां त्यागः स्वर्गाद्विधीयते
सर्वाणि येषां गांगेयैस्तोयैः कार्याणि देहिनाम्
गात्यक्त्वा मानवा विप्र दिवि तिष्ठंति ते जनाः
पूर्वे वयसि कर्माणि कृत्वा पापानि ये नराः
पश्चाद्गंगां निषेवन्ते तेऽपि यान्त्युत्तमां गतिम्
स्नातानां शुचिभिस्तोयैर्गांगेयैः प्रयतात्मनाम्
व्युष्टिर्भवति या पुंसा न सा क्रतुशतैरपि॥३१
यावदस्थि मनुष्यस्य गंगातोयेषु तिष्ठति ।
तावद्वर्षसहस्राणि स्वर्गलोके महीयते ॥ ३२
अपहत्य तमस्तीव्रं यथा भात्युदये रविः ।
तथाऽपहत्य पाप्मानं भाति गंगाजलोक्षितः
विसोमा इव शर्वर्यो विपुष्पास्तरवो यथा ।
तद्वद्देशा दिशश्चैव हीना गंगाजलैः शिवैः ३४
वर्णाश्रमा यथा सर्वे धर्मज्ञानविवर्जिताः ।
क्रतवश्च यथाऽसोमास्तथा गंगां विना जगत्
यथा हीनं नभोऽर्केण भूः शैलैः खं च वायुना
तथा देशा दिशश्चैव गंगाहीना न संशयः ३६
त्रिषु लोकेषु ये केचित् प्राणिनः सर्व एव ते ।
तर्प्यमाणाः परां तृप्तिं यान्ति गंगाजलैः शुभैः
यस्तु सूर्येण निष्टप्तं गांगेयं पिबते जलम् ।
गवां निहारनिर्मुक्ताद्यावकात्तद्विशिष्यते॥३८
इन्दुव्रतसहस्रं तु यश्चरेत्कायशोधनम् ।
पिबेद्यश्चापि गंगांभः समौ स्यातां न वा समौ
तिष्ठेद्युगसहस्रं तु पदेनैकेन यः पुमान् ।
मासमेकं तु गंगायां समौ स्यातां न वा समौ
लंबतेऽवाक्शिरा यस्तु युगानामयुतं पुमान् ।
तिष्ठेद्यश्चेष्टं यश्चापि गंगाया स विशिष्यते ४१
अग्नौ प्राप्तं प्रधूयेत यथा तूलं द्विजोत्तम ।
तथा गंगावगाढस्य सर्वपापं प्रधूयते ॥ ४२
भूतानामिह सर्वेषां दुःखोपहतचेतसाम् ।
गतिमन्वेषमाणानां न गंगासदृशी गतिः ४३
भवंति निर्विषाः सर्पा यथा तार्क्ष्यस्य दर्शनात्
गंगाया दर्शनात्तद्वत्सर्वपापैः प्रमुच्यते ॥ ४४
अप्रतिष्ठाश्च ये केचिदधर्मशरणाश्च ये ।
तेषां प्रतिष्ठा गंगेह शरणं शर्म वर्म च ॥ ४५
प्रकृष्टैरशुभैर्ग्रस्तानेनैः पुरुषाधमान् ।
पततो नरके गंगा सान्त्रेत्य तारयेत् ॥४६
ते संविभक्ता मुनिभिर्नूनं देवैः सवासवैः ।
येऽभिगच्छंति सततं गङ्गां मतिमतां वर ॥४७
विनयाचारहीनाश्च अशिवाश्च नराधमाः ।
ते भवंति शिवा विप्र ये वै गङ्गामुपाश्रिताः
यथा सुराणाममृतं पितॄणां च यथा स्वधा ।
सुधा यथा च नागानां तथा गङ्गाजलं नृणाम्
उपासते यथा बाला मातरं क्षुधयाऽर्दिताः ।
श्रेयस्कामास्तथा गङ्गामुपासन्तीह देहिनः ५०
स्वायंभुवं यथा स्थानं सर्वेषां श्रेष्ठमुच्यते ।
स्नातानां सरितां श्रेष्ठा गङ्गा तद्वदिहोच्यते ५१

आश्रमा इत्याकारस्य पूर्वरूपमार्षम् ॥ २५ ॥ ते देशा इति प्रकृष्टा पुण्यत इत्यनुषङ्ग ॥ २६ ॥ गात्राणि अस्थीनि न्यस्तानि गङ्गायाम् ॥ २८ ॥ व्युष्टि पुण्यवृद्धि ' व्युष्टि फले समृद्धौ च ' इति (टान्तवर्गे २८) मेदिनी ॥३१॥ यवा निहार आहारानिर्गमनमार्गस्ततो निर्मुक्तं यावकं यवविकारस्तस्मात् गा यवानादथित्वा तच्छकृदनर्गतान् यवान् पक्त्वा भुञ्जानो यावकव्रतीत्युच्यते ॥ ३८ ॥ इन्दुव्रतं चान्द्रायणम् ॥ ३९ ॥ धूयते दूरे जायते भस्मीभूयापि न शिष्यते इत्यर्थ ॥ ४२ ॥

यथोपजीविनां धेनुर्देवादीनां धरा स्मृता ।
तथोपजीविनां गंगा सर्वप्राणभृतामिह ५२॥
देवाः सोमार्कसंस्थानि यथा सत्रादिभिर्मखैः
अमृतान्युपजीवन्ति तथा गंगाजलं नराः ५३
जाह्नवीपुलिनोत्थाभिः सिकताभिः समुक्षितम्
आत्मानं मन्यते लोको दिविष्ठमिव शोभितम्
जाह्नवीतीरसंभूतां मृदं मूर्ध्ना बिभर्ति यः ।
बिभर्ति रूपं सोऽर्कस्य तमोनाशाय निर्मलम्
गंगोर्मिभिरथो दिग्धः पुरुषं पवनो यदा ।
स्पृशते सोऽस्य पाप्मानं सद्य एवापकर्षति ५६
व्यसनैरभितप्तस्य नरस्य विनशिष्यतः ।
गंगादर्शनजा प्रीतिर्व्यसनान्यपकर्षति ॥ ५७
हंसारावैः कोकरवैः रवैरन्यैश्च पक्षिणाम् ।
पस्पर्ध गङ्गा गंधर्वान् पुलिनैश्च शिलोच्चयान्॥
हंसादिभिः सुबहुभिर्विविधैः पक्षिभिर्वृताम् ।
गंगां गोकुलसम्बाधां दृष्ट्वा स्वर्गोपि विस्मृतः
न सा प्रीतिर्दिविष्ठस्य सर्वकामानुपाश्नतः ।
संभवेद्या परा प्रीतिर्गंगायाः पुलिने नृणाम्
वाङ्मनःकर्मजैर्ग्रस्तः पापैरपि पुमानिह ।
वीक्ष्य गंगां भवेत्पूतो अत्र मे नास्ति संशयः
सप्तावरान् सप्त परान् पितॄंस्तेभ्यश्च ये परे ।
पुमांस्तारयते गंगां वीक्ष्य स्पृष्ट्वाऽवगाह्य च ६२
श्रुताभिलषिता पीता स्पृष्टा दृष्टावगाहिता ।
गंगा तारयते नृणामुभौ वंशौ विशेषतः ॥ ६३
दर्शनात्स्पर्शनात्पानात्तथा गंगेति कीर्तनात्
पुनात्यपुण्यान्पुरुषाञ्छतशोऽथ सहस्रशः ६४
य इच्छेत्सफलं जन्म जीवितं श्रुतमेव च ।
स पितॄंस्तर्पयेद्गंगामभिगम्य सुरांस्तथा ॥ ६५
न सुतैर्न च वित्तेन कर्मणा न च तत्फलम् ।
प्राप्नुयात्पुरुषोऽत्यंतं गंगां प्राप्य यदाप्नुयात् ॥
जात्यंधैरिह तुल्यास्ते मृतैः पंगुभिरेव च ।
समर्था ये न पश्यन्ति गंगां पुण्यजलां शिवाम्
भूतभव्यभविष्यज्ञैर्महर्षिभिरुपस्थिताम् ।
देवैः सेन्द्रैश्च को गंगां नोपसेवेत मानवः ६८
वानप्रस्थैर्गृहस्थैश्च यतिभिर्ब्रह्मचारिभिः ।
विद्यावद्भिः श्रितां गंगां पुमान्को नाम नाश्रयेत्
उत्क्रामद्भिश्च यः प्राणः प्रयतः शिष्टसमतः ।
चिन्तयेन्मनसा गंगां स गतिं परमां लभेत् ७०
न भयेभ्यो भयं तस्य न पापेभ्यो न राजतः ।
आ देहपतनाद्गंगामुपास्ते यः पुमानिह ॥ ७१
महापुण्यां च गगनात्पतंतीं वै महेश्वरः ।
दधार शिरसा गंगां तामेव दिवि सेवते ॥७२
अलंकृतास्त्रयो लोकाः पथिभिर्विमलैस्त्रिभिः ।
यस्तु तस्या जलं सेवेत्कृतकृत्यः पुमान् भवेत्
दिवि ज्योतिर्यथाऽऽदित्यः पितॄणां चैव चंद्रमाः
देवेशश्च तथा नृणां गगा च सरितां तथा ७५
मात्रा पित्रा सुतैर्दारैर्विमुक्तस्य धनेन वा ।
न भवेद्धि तथा दुःखं यथा गंगावियोगजम् ।
नारण्यैर्नेष्टविषयैर्न सुतैर्न धनागमैः ।
तथा प्रसादो भवति गंगां वीक्ष्य यथा भवेत्
पूर्णमिन्दुं यथा दृष्ट्वा नृणां दृष्टिः प्रसीदति ।
तथा त्रिपथगां दृष्ट्वा नृणां दृष्टिः प्रसीदति ७७
तद्भावस्तद्गतमनास्तन्निष्ठस्तत्परायणः ।
गंगां योऽनुगतो भक्त्या स तस्याः प्रियतां व्रजेत्
भूस्थैः स्वस्थैर्दिविष्ठैश्च भूतैरुच्चावचैरपि ।
गंगा विगाह्या सततमेतत्कार्यतमं सताम् ७९
विश्वलोकेषु पुण्यत्वाद्गंगायाः प्रथितं यशः ।
यत्पुत्रान्सगरस्येतो भस्माख्याननयद्दिवम् ८०
वाय्वीरिताभिः सुमनोहराभि-
र्द्रुताभिरत्यर्थसमुत्थिताभिः ।
गंगोर्मिभिर्भानुमतीभिरिद्धाः
सहस्रशश्चित्रप्रतिमा भवन्ति ॥ ८१

सोमसंस्थानि अमृतानि देवा उपजीवन्तीति ' प्रथमा पिबते वह्निर्द्वितीया पिबते रवि ' इत्यादिना स्पष्टम् । अर्कसंस्थानीत्यपि च्छान्दोग्ये रोहितादीनि पञ्चामृतानि आस्वाद्य उपजीवन्तीति प्रसिद्धम् ॥ ५३ ॥ व्यसनै द्यूतपानादिव्यसनजैर्दुःखै ॥ ५७ ॥ कामान् भोगान् ॥ ६० ॥ उपस्थिता नित्यं सेविताम् ॥ ६८ ॥ भयेभ्य घोरेभ्यो व्याघ्रादिभ्य पिशाचादिभ्यो वा । पापेभ्य ब्रह्मवधादिभ्य ॥ ७१ ॥ दिवि देवानामिति शेष । देवेश राजेन्द्र ॥७४॥ आरण्यारण्यौ तृतीयस्यामितो दिवीति श्रुतेरारण्याख्यसरोद्वयवान् ब्रह्मलोक अरण्यस्तत्र भवैरारण्यैर्विषये । इष्ट यागादि तत्प्राप्यैरिष्टविषये स्वर्गै ॥ ७६ ॥ तद्भाव तस्यामेव भाव श्रद्धा यस्य स तथा । धर्मे श्रद्धावानपि स्त्रीपुत्रादिमना भवति तद्व्यावृत्त्यर्थं तद्गतमना इति श्रद्धा मनश्च कादाचित्केऽपि यागादौ भवति न त्वाराध्यदेवतायामिव तत्र नैरन्तर्येण नितरा स्थितिर्भवति तदर्थ तन्निष्ठ इति । त्रयमपि स्वर्गार्थं कस्यचिद्भवति तथा न भवति किन्तु परायण प्राप्यमपि गङ्गैव यस्य स तत्परायण । एवं भूत्वा योऽनुगत अनुसृत भक्त्या आराध्यत्वज्ञानेन स गङ्गाया प्रियो भवेत् ॥ ७८ ॥ भस्माख्यान् भस्मीभूतान् ॥८०॥ इद्धा निर्दोषत्वेन दीप्ता. ॥८१

पयस्विनीं घृतिनीमत्युदारां
समृद्धिनीं वेगिनीं दुर्विगाह्याम् ।
गंगां गत्वा यैः शरीरं विसृष्टं
गता धीरास्ते विबुधैः समत्वम् ॥८२
अन्धान् जडान्द्रव्यहीनांश्च गंगा
यशस्विनी बृहती विश्वरूपा ।
देवैः सेन्द्रैर्मुनिभिर्मानवैश्च
निषेविता सर्वकामैर्युनक्ति ॥ ८३
ऊर्जावतीं महापुण्यां मधुमतीं त्रिवर्त्मगाम् ।
त्रिलोकगोप्त्रीं ये गंगां संश्रितास्ते दिवं गताः
यो वत्स्यति द्रक्ष्यति वापि मर्त्य-
स्तस्मै प्रयच्छन्ति सुखानि देवाः ।
तद्भाविताः स्पर्शनदर्शनेन
इष्टां गतिं तस्य सुरा दिशन्ति ॥ ८५
दक्षां पृथ्वीं बृहतीं विप्रकृष्टां
शिवामृद्धां भागिनीं सुप्रसन्नाम् ।
विभावरीं सर्वभूतप्रतिष्ठां
गंगां गता ये त्रिदिवं गतास्ते ॥ ८६
ख्यातिर्यस्याः खं दिवं गां च नित्यं
पुरा दिशो विदिशश्चावतस्थे ।
तस्या जलं सेव्य सरिद्वरायाः
मर्त्याः सर्वे कृतकृत्या भवन्ति ॥ ८७
इयं गंगेति नियतं प्रतिष्ठा
गुहस्य रुक्मस्य च गर्भयोषा ।
प्रातस्त्रिवर्गा घृतवहा विषाप्मा
गंगावतीर्णा वियतो विश्वतोया ८८
सुतावनीध्रस्य हरस्य भार्या
दिवो भुवश्चापि कृतानुरूपा
भव्या पृथिव्यां भागिनी चापि राजन्
गंगा लोकानां पुण्यदा वै त्रयाणाम्
मधुस्रवा घृतधारा घृतार्चि-
र्महोर्मिभिः शोभिता ब्राह्मणैश्च ।
दिवश्च्युता शिरसाऽऽत्ता शिवेन
गंगाऽवनीध्राच्त्रिदिवस्य माता ॥ ९०
योनिर्वरिष्ठा विरजा वितन्वी
शय्या चिरा वारिवहा यशोदा
विश्वावती चाकृतिरिष्टसिद्धा
गंगोक्षितानां भुवनस्य पन्थाः ९१
क्षान्त्या मह्या गोपने धारणे च
दीप्त्या कृशानोस्तपनस्य चैव ।
तुल्या गंगा संमता ब्राह्मणानां
गुहस्य ब्रह्मण्यतया च नित्य ॥ ९२
ऋषिष्टुतां विष्णुपदीं पुराणां
सुपुण्यतोयां मनसाऽपि लोके ।
सर्वात्मना जाह्नवीं ये प्रपन्ना-
स्ते ब्रह्मणः सदन संप्रयाताः ॥ ९३

पयोघृते यागीये हविषी समृद्धिर्यागफलं तद्वतीं यागादिजं पुण्यं तत्फलं स्वर्गादि च गङ्गाप्राप्त्यैव लभ्यत इत्यर्थः ॥ ८२ ॥ बृहती श्रेष्ठा विश्वं देवादीना रूपं सौभाग्यं यया प्राप्यते सा विश्वरूपा ॥ ८३ ॥ ऊर्क् अन्नपश्वादि ऊर्जेति भागुरिमताद्वाप् तत्प्रदामित्यर्थः । मधु कर्मफलं ब्रह्म वा तत्प्रदा मधुमतीम् ॥ ८४ ॥ यो गङ्गामिति शेषः तया गङ्गया भाविता महत्त्वं गता देवा स्पर्शनदर्शनेन गङ्गाया एव ॥ ८५ ॥ दक्षा तारणसमर्था पृथ्वीं विष्णुमातरं बृहतीं वाचं ' वाग्वै बृहती ' इति श्रुतेः । भागिनीं भगानामैश्वर्यादीना षण्णा समूहो भागं तद्वतीं विभावरीं प्रकाशिकाम् ॥ ८६ ॥ ख्याति पुण्यत्वकीर्तिं सेव्य निषेव्य ॥ ८७ ॥ गङ्गा दृष्ट्वा इयं गङ्गेति अन्यान् गङ्गा दर्शयत पुरुषस्य नियतं नियमेन गङ्गैव प्रतिष्ठा संसारावसानहेतुर्भवति । गुहस्य कार्तिकेयस्य रुक्मस्य स्वर्णस्य च गर्भयोषा गर्भधारिणी स्त्री । वियत सकाशात्प्रातरवतीर्णा तेनास्या प्रात स्नान अतिप्रशस्तमिति सूचितम् । त्रिवर्गा धर्मार्थकामदा घृतवहा जलवाहिनी विश्वतोया विश्वप्रियतोया ॥ ८८ ॥ अवनीध्रस्य मेरोः हिमवतो वा पर्वतस्य कृत अनुरूपं अलङ्कारो यया सा कृतानुरूपा ॥ ८९ ॥ मधुस्रवा धर्मद्रवा घृतधारा तेजोधारा घृतार्चिः आज्यस्येव अर्चिर्वर्चो यस्या सा 'घृत दीप्ताज्यवारिषु' इति विश्वलोचनः अवनीध्रात् पृथिवीं प्रातेति शेषः ॥ ९० ॥ वरिष्ठा योनिः परमकारणं विरजा निर्मला वितन्वी विशेषेण तन्वी सूक्ष्मा । शय्या दीर्घनिद्रातल्प 'मरणं जाह्नवीतटे' इति वचनात् चिरा शीघ्रा विश्वावती विश्वं अवन्ती पालयन्ती नुमभाव आर्षः । आकृति सत्तासामान्यरूपा । 'आकृतिस्तु क्रियारूपे सामान्यवपुषोरपि ' (तान्ते ९४) इति मेदिनी इष्टसिद्धा इष्टा सिद्धा यस्या सा सिद्धानामिष्टा इति वा उक्षितानां स्नातानां भुवनस्य स्वर्गस्य ॥ ९१ ॥ क्षान्त्यादित्रयेऽपि मह्या तुल्येति सम्बन्धः । गुहस्य कुमारस्य संमता ब्रह्मण्यतया ब्राह्मणजात्यनुग्राहकतया ॥ ९२ ॥ मनसाऽपि प्रपन्नाः किमुत साक्षात् ॥ ९३ ॥

लोकानवेक्ष्य जननीव पुत्रान्
सवात्मना सर्वगुणोपपन्नान् ।
तत्स्थानकं ब्राह्ममभीप्समानै-
र्गंगा सदैवात्मवशैरुपास्या ॥ ९४
उस्रां पुष्टां मिषतीं विश्वभोज्या-
मिरावतीं धारिणीं भूधराणाम् ।
शिष्टाश्रयाममृतां ब्रह्मकान्तां
गङ्गां श्रयेदात्मवान् सिद्धिकामः ९५
प्रसाद्य देवान् सविभून्समस्तान्
भगीरथस्तपसोग्रेण गङ्गाम् ॥
गामानयत्तामभिगम्य शश्वत्
पुंसां भयं नेह चामुत्र विद्यात् ॥ ९६
उदाहृतः सर्वथा ते गुणानां
मयैकदेशः प्रसमीक्ष्य बुद्ध्या ।
शक्तिर्न मे काचिदिहास्ति वक्तु
गुणान्सर्वान्परिमातुं तथैव ॥ ९७
मेरोः समुद्रस्य च सर्वयत्नैः
संख्योपलानामुदकस्य वापि ।
शक्यं वक्तुं नेह गंगाजलानां
गुणाख्यानं परिमातुं तथैव ॥ ९८
तस्मादेतान्परया श्रद्धयोक्तान्
गुणान्सर्वान् जाह्नवीयान् सदैव ।
भवेद्वाचा मनसा कर्मणा च
भक्त्या युक्तः श्रद्धया श्रद्दधानः ॥९९
लोकानमाल्यैन्यशसा वितत्य
सिद्धिं प्राप्य महतीं तां दुरापाम् ।
गङ्गाकृतानचिरेणैव लोकान्
यथेष्टमिष्टान् विहरिष्यसि त्वम् १००
तव मम च गुणैर्महानुभावा
जुषतु मतिं सततं स्वधर्मयुक्तैः ।
अभिमतजनवत्सला हि गंगा
जगति पुनक्ति सुखैश्च भक्तिमन्तम् १

भीष्म उवाच ।

इति परममतिर्गुणानशेषान्
शिलरतये त्रिपथानुयोगरूपान् ।
बहुविधमनुशास्य तथ्यरूपान्
गगनतल द्युतिमान् विवेश सिद्धः ॥ २
शिलवृत्तिस्तु सिद्धस्य
वाक्यैः संबोधितस्तदा ।
गंगामुपास्य विधिव-
त्सिद्धिं प्राप सुदुर्लभाम् ॥ ३
तथा त्वमपि कौन्तेय भक्त्या परमया युतः ।
गंगामभ्येहि सततं प्राप्स्यसे सिद्धिमुत्तमाम् ४

वैशम्पायन उवाच ।

श्रुत्वेतिहासं भीष्मोक्तं गंगायाः स्तवसंयुतम्
युधिष्ठिरः परां प्रीतिमगच्छद्भ्रातृभिः सह ५
इतिहासमिमं पुण्यं शृणुयाद्यः पठेत वा ।
गंगायाः स्तवसंयुक्तं स मुच्येत्सर्वकिल्बिषैः ६

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि गङ्गामाहात्म्यकथने षड्विंशोऽध्यायः ॥ २६ ॥



जननीवोपास्येति सम्बन्ध । अवेक्ष्य नश्वरानिति शेष ॥ ९४ ॥ उस्रा धेनु अमृतदुघामिति यावत् । मिषतीं पश्यन्तीं सर्वज्ञामित्यर्थ. । इरावतीं अन्नवतीं ' इरा तु मदिरावारिभारत्यशनभूमिषु ' इति **विश्वलोचनः** । धारिणीमित्यत्र रेवतीमिति पाठे मातरम् । ' रेवती हरिभार्यायां तारामिन्मातृभेदयो ' इति **मेदिनी** ब्रह्मणोऽपि कान्तां चेतोहरां सिद्धिमोक्ष. ॥ ९५ ॥ सविभून् सेश्वरान् गां पृथ्वीम् ॥ ९६ ॥ गुणाना गङ्गाया इति शेषः ॥ ९७ ॥ मदुक्तान् गङ्गागुणान् ज्ञात्वा वागादिभि स्तोत्रध्यानस्नानादिषु श्रद्दधानो भवेदिति सम्बन्ध ॥ ९९ ॥ गङ्गाकृतान् गङ्गासेवनप्राप्तान् इष्टान् सङ्कल्पसिद्धान् । पाठान्तरं यथेष्टं मृष्टं मधुरं यथा स्यात्तथा ॥ १०० ॥ महानुभावा गङ्गा मतिं जुषतु प्रीणातु गङ्गादर्शनादिना मतिं प्रसीदत्वित्यर्थ । अभिमत. श्रद्धालु ॥ १ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षड्विंशोऽध्याय. ॥ २६ ॥

२७

युधिष्ठिर उवाच ।

प्रज्ञाश्रुताभ्यां वृत्तेन शीलेन च यथा भवान्
गुणैश्च विविधैः सर्वैर्वयसा च समन्वितः ॥ १
भवान् विशिष्टो बुद्ध्या च प्रज्ञया तपसा तथा
तस्माद्भवन्तं पृच्छामि धर्मं धर्मभृतां वर ॥ २
नान्यस्त्वदन्यो लोकेषु प्रष्टव्योऽस्ति नराधिप
क्षत्रियो यदि वा वैश्यः शूद्रो वा राजसत्तम
ब्राह्मण्यं प्राप्नुयाद्येन तन्मे व्याख्यातुमर्हसि ।
तपसा वा सुमहता कर्मणा वा श्रुतेन वा ।
ब्राह्मण्यमथ चेदिच्छेत्तन्मे ब्रूहि पितामह ॥ ४

भीष्म उवाच ।

ब्राह्मण्य तात दुष्प्राप्य वर्णैः क्षत्रादिभिस्त्रिभिः
परं हि सर्वभूतानां स्थानमेतद्युधिष्ठिर ॥ ५
बह्वीस्तु संसरन् योनीर्जायमानः पुनः पुनः ।
पर्याये तात कस्मिंश्चिद्ब्राह्मणो नाम जायते ६

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
मतङ्गस्य च संवादं गर्दभ्याश्च युधिष्ठिर ॥ ७
द्विजातेः कस्यचित्तात तुल्यवर्णः सुतस्त्वभूत
मतङ्गो नाम नाम्ना वै सर्वैः समुदितो गुणैः ॥ ८
स यज्ञकारः कौन्तेय पित्रोत्सृष्टः परन्तप ।
प्रायाद्गर्दभयुक्तेन रथेनाप्याशुगामिना ॥ ९
स बालं गर्दभं राजन् वहन्तं मातुरन्तिके ।
निरविध्यत्प्रतोदेन नासिकायां पुनः पुनः ॥ १०
तत्र तीव्रं व्रणं दृष्ट्वा गर्दभी पुत्रगृद्धिनी ।
उवाच मा शुचः पुत्र चाण्डालस्त्वधितिष्ठति
ब्राह्मणे दारुणं नास्ति मैत्रो ब्राह्मण उच्यते ।
आचार्यः सर्वभूतानां शास्ता किं प्रहरिष्यति
अयं तु पापप्रकृतिर्बाले न कुरुते दयाम् ।
स्वयोनिं मानयत्येष भावो भावं नियच्छति १३
एतच्छ्रुत्वा मतङ्गस्तु दारुणं रासभीवचः ।
अवतीर्य रथात्तूर्णं रासभीं प्रत्यभाषत ॥ १४
ब्रूहि रासभि कल्याणि माता मे येन दूषिता
कथं मां वेत्सि चंडालं क्षिप्रं रासभि शंस मे
कथं मां वेत्सि चंडाल ब्राह्मण्यं येन नश्यते ॥
तत्त्वेनैतन्महाप्राज्ञे ब्रूहि सर्वमशेषतः ॥ १६

गर्दभ्युवाच ।

ब्राह्मण्या वृषलेन त्वं मत्तायां नापितेन ह ।
जातस्त्वमसि चांडालो ब्राह्मण्यं तेन तेऽनशत्
एवमुक्तो मतङ्गस्तु प्रतिप्रायाद्गृहं प्रति ।
तमागतमभिप्रेक्ष्य पिता वाक्यमथाब्रवीत् ॥ १८
मया त्वं यज्ञसंसिद्धौ नियुक्तो गुरुकर्मणि ।
कस्मात्प्रतिनिवृत्तोऽसि कच्चिन्न कुशलं तव १९

मतङ्ग उवाच

अन्त्ययोनिरयोनिर्वा कथं स कुशली भवेत्
कुशलं तु कुतस्तस्य यस्येयं जननी पितः २०
ब्राह्मण्यां वृषलाज्जातं पितर्वेदयतीव माम् ।
अमानुषी गर्दभीयं तस्मात्तप्स्ये तपो महत् २१
एवमुक्त्वा स पितरं प्रतस्थे कृतनिश्चयः ।
ततो गत्वा महारण्यमतपत्सुमहत्तपः ॥ २२
ततः स तापयामास त्रिबुधांस्तपसान्वितः ।
मतङ्गः सुखसंप्रेप्सुः स्थानं सुचरितादपि ॥ २३
तं तथा तपसा युक्तमुवाच हरिवाहनः ।
मतङ्ग तप्स्यसे किं त्वं भोगानुत्सृज्य मानुषान्

२७

तुल्या गङ्गा समता ब्राह्मणानामिति ब्रह्मविदा कृतकृत्यानामपि गङ्गा पूज्यत्वेन समतेत्युक्तं तेन ब्राह्मण्यं महदिति मत्वा पृच्छति—**प्रज्ञेति** । वृतमाचार शील विनय ॥ १ ॥ चेदिच्छेत्तर्हि केन प्राप्नुयात्तदिति अनुषज्य व्याख्येयोऽयमर्थ ॥ ४ ॥ पर्याये आवृत्तौ जन्मनाम् ॥ ६ ॥ तुल्यवर्णे अन्यवर्णजोऽपि जातकर्मादिसंस्कारयोगात्तुल्यवर्णत्वं गत । नाम प्रसिद्धम् ॥ ८ ॥ यज्ञकार यज्ञ कारयन् आर्त्विज्यं कुर्वन्नित्यर्थ । प्रायात् अभिचयनार्थमिष्टका आनेतुमित्यर्थाद्गम्यते ॥ ९ ॥ बाल अशिक्षितम् ॥ १० ॥ आवाप इति पाठे आलवालं पितृमातृतुल्य इत्यर्थः । 'आवापो भाण्डचयने परिक्षेपालवालयो' (पान्ते १४) इति मेदिनी ॥ १२ ॥ बाले त्वयि भाव. जातिस्वभाव भावं बुद्धिं नियच्छति मार्गान्तरादपकर्षति ॥ १३ ॥ ब्राह्मण्यं लोकदृश्यं नश्यते अन्तर्धीयते येन लक्षणेन तत्कथ यत मा चण्डाल वेत्सि ॥ १६ ॥ अनशत् नष्ट क्रूरत्वालिङ्गेन ॥ १७ ॥ संसिद्धौ संसिद्धयर्थम् ॥ १९ ॥ अन्त्ययोनिश्चण्डालजातिः अयोनिस्तदन्य कुत्सितयोनि, तयोर्हानकर्मतया कुशलित्व नास्तीत्यर्थ ॥ २० ॥ सुचरितात्तपसश्च हेतो स्थान ब्राह्मण्यम् सुखेन प्रेप्सु विबुधास्तापयामासेति सम्बन्ध ॥ २३ ॥ हरिवाहन इन्द्र· ॥ २४ ॥

वरं ददामि ते हंत वृणीष्व त्वं यदिच्छसि ।
यच्चाप्यवाप्यं हृदि ते सर्वं तद्ब्रूहि माचिरम्
मतङ्ग उवाच ।
ब्राह्मण्यं कामयानोऽहमिदमारब्धवांस्तपः
गच्छेयं तदवाप्येह वर एष वृतो मया ॥ २६
भीष्म उवाच ।
एतच्छ्रुत्वा तु वचनं तमुवाच पुरंदरः ।
मतङ्ग दुर्लभमिदं विप्रत्वं प्रार्थ्यते त्वया २७
ब्राह्मण्यं प्रार्थयानस्त्वमप्राप्यमकृतात्मभिः ।
विनशिष्यसि दुर्बुद्धे तदुपारम माचिरम् २८
श्रेष्ठतां सर्वभूतेषु तपोर्थं नातिवर्तते ।
तदश्यं प्रार्थयानस्त्वमचिराद्विनशिष्यसि ॥२९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि इन्द्रमतङ्गसंवादे सप्तविंशोऽध्यायः ॥ २७ ॥



२८

भीष्म उवाच ।
एवमुक्तो मतङ्गस्तु संशितात्मा यतव्रतः ।
अतिष्ठदेकपादेन वर्षाणां शतमच्युतः ॥ १
तमुवाच ततः शक्रः पुनरेव महायशाः ।
ब्राह्मण्यं दुर्लभं तात प्रार्थयानो न लप्स्यसे २
मतङ्ग परमं स्थानं प्रार्थयन्विनशिष्यसि ।
मा कृथाः साहसं पुत्र नैष धर्मपथस्तव ॥ ३
न हि शक्यं त्वया प्राप्तुं ब्राह्मण्यमिह दुर्मते ।
अप्राप्यं प्रार्थयानो हि न चिराद्विनशिष्यसि
मतङ्ग परमं स्थानं वार्यमाणोऽसकृन्मया ।
चिकीर्षस्येव तपसा सर्वथा न भविष्यसि ५
तिर्यग्योनिगतः सर्वो मानुष्यं यदि गच्छति ।
स जायते पुल्कसो वा चण्डालो वाऽप्यसंशयः
पुल्कस. पापयोनिर्वा यः कश्चिदिह लक्ष्यते ।
स तस्यामेव सुचिरं मतङ्ग परिवर्तते ॥ ७
ततो दशशते काले लभते शूद्रतामपि ।
शूद्रयोनावपि ततो बहुशः परिवर्तते ॥ ८
ततस्त्रिंशद्गुणे काले लभते वैश्यतामपि ।
वैश्यतायां चिरं कालं तत्रैव परिवर्तते ॥ ९
ततः षष्टिगुणे काले राजन्यो नाम जायते ।
ततः षष्टिगुणे काले लभते ब्रह्मबन्धुताम्॥१०
ब्रह्मबन्धुश्चिरं कालं ततस्तु परिवर्तते ।
ततस्तु द्विशते काले लभते काण्डपृष्ठताम्॥११
काण्डपृष्ठिश्चिरं कालं तत्रैव परिवर्तते ।
ततस्तु त्रिशते काले लभते जपतामपि ॥ १२
तं च प्राप्य चिरं कालं तत्रैव परिवर्तते ।
ततश्चतुःशते काले श्रोत्रियो नाम जायते ।
श्रोत्रियत्वे चिरं कालं तत्रैव परिवर्तते ॥ १३
तदेवं शोकहर्षौ तु कामद्वेषौ च पुत्रक ।
अतिमानातिवादौ च प्रविशेते द्विजाधमम्१४
तांश्चेज्जयति शत्रून्स तदा प्राप्नोति सद्गतिम् ।
अथ ते वै जयन्त्येनं तालाग्रादिव पात्यते ॥१५
मतङ्ग संप्रधार्यैवं यदहं त्वामचूचुदम् ।
वृणीष्व काममन्यं त्वं ब्राह्मण्यं हि सुदुर्लभम्॥

श्रेष्ठताख्यमर्थं ब्राह्मण्यं तप नातिवर्तते न वंशीकर्तुमर्हति ॥ २९ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तविंशोऽध्याय ॥ २७ ॥

२८

एवमुक्त इति ॥ १ ॥ काण्डपृष्ठतां शस्त्रजीवित्वम् । 'शस्त्राजीवी काण्डपृष्ठ' (२।८।६७) इत्यमर । 'वेश्यापतिः काण्डपृष्ठ सद्भिरेव निगद्यते' इति यमः ॥ ११ ॥ जपता गायत्रीमात्रसेविना कुले जन्मेति शेष ॥ १२ ॥ श्रोत्रिय अधीतवेद ॥ १३ ॥ तत् तदा श्रोत्रियत्वलाभेऽपि ॥ १४ ॥ ते शोकादय एनं श्रोत्रियं पात्यते अत्यन्तं नीचयोनिं प्राप्नोतीत्यर्थ ॥ १५ ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि इन्द्रमतङ्गसंवादे अष्टाविंशोऽध्यायः ॥ २८ ॥



२९

भीष्म उवाच ।

एवमुक्तो मतङ्गस्तु संशितात्मा यतव्रतः ।
सहस्रमेकपादेन ततो ध्याने व्यतिष्ठत ॥ १
तं सहस्रावरे काले शक्रो द्रष्टुमुपागमत् ।
तदेव च पुनर्वाक्यमुवाच बलवृत्रहा ॥ २

मतङ्ग उवाच ।

इदं वर्षसहस्रं वै ब्रह्मचारी समाहितः ।
अतिष्ठमेकपादेन ब्राह्मण्यं नाप्नुयां कथम् ॥ ३

शक्र उवाच ।

चण्डालयोनौ जातेन नावाप्यं वै कथञ्चन
अन्यं कामं वृणीष्व त्वं मा वृथा तेऽस्त्वयं श्रमः
एवमुक्तो मतङ्गस्तु भृशं शोकपरायणः ।
अध्यतिष्ठदृयां गत्वा सौगुष्ठेन शतं समाः ॥ ५
सुदुर्वहं वहन्योगं कृशो धमनिसन्ततः ।
त्वगस्थिभूतो धर्मात्मा स पपातेति नः श्रुतम्
त पतन्तमभिद्रुत्य परिजग्राह वासवः ।
वराणामीश्वरो दाता सर्वभूतहिते रतः ॥ ७

शक्र उवाच ।

मतङ्ग ब्राह्मणत्वं ते विरुद्धमिह दृश्यते ।
ब्राह्मण्यं दुर्लभतरं संवृतं परिपन्थिभिः ॥ ८
पूजयन्सुखमाप्नोति दुःखमाप्नोत्यपूजयन् ।
ब्राह्मणः सर्वभूतानां योगक्षेमसमर्पिता ॥ ९
ब्राह्मणेभ्योऽनुतृप्यन्ते पितरो देवतास्तथा ।
ब्राह्मणः सर्वभूतानां मतङ्ग पर उच्यते ॥ १०
ब्राह्मणः कुरुते तद्धि यथा यद्यच्च वाञ्छति ।
बह्वीस्तु संविशन्योनीर्जायमानः पुनःपुनः ११
पर्याये तात कस्मिंश्चिद्ब्राह्मण्यमिह विन्दति ।
तदुत्सृज्येह दुष्प्रापं ब्राह्मण्यमकृतात्मभिः १२
अन्यं वरं वृणीष्व त्वं दुर्लभोऽयं हि ते वरः ।

मतङ्ग उवाच ।

किं मां तुदसि दुःखार्तं मृतं मारयसे च मां
त्वां तु शोचामि यो लब्ध्वा ब्राह्मण्यं न बुभूषसे
ब्राह्मण्यं यदि दुष्प्रापं त्रिभिर्वर्णैः शतक्रतो १४
सुदुर्लभं सदाऽवाप्य नानुतिष्ठन्ति मानवाः ।
यः पापेभ्यः पापतमस्तेषामधम एव सः ॥ १५
ब्राह्मण्यं यो न जानीते धनं लब्ध्वेव दुर्लभम् ।
दुष्प्रापं खलु विप्रत्वं प्राप्तं दुरनुपालनम् ॥१६
दुरावापमवाप्यैतन्नानुतिष्ठन्ति मानवाः ।
एकारामो ह्यहं शक्र निर्द्वन्द्वो निष्परिग्रहः १७
अहिंसादममास्थाय कथं नार्हामि विप्रताम् ।
दैवं तु कथमेतद्वै यदहं मातृदोषतः ॥ १८
एतामवस्थां संप्राप्तो धर्मज्ञः सन्पुरन्दर ।
नूनं दैवं न शक्यं हि पौरुषेणातिवर्तितुम् १९
यदर्थं यत्नवानेव न लभे विप्रता विभो ।
एवंगते तु धर्मज्ञ दातुमर्हसि मे वरम् ॥ २०
यदि तेऽहमनुग्राह्यः किञ्चिद्वा सुकृतं मम ।

वैशम्पायन उवाच ।

वृणीष्वेति तदा प्राह ततस्तं बलवृत्रहा २१

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टाविंशोऽध्याय ॥ २८ ॥

२९

एवमुक्त इति । सहस्रं वत्सरान् ॥ १ ॥ अभिद्रुत्य गत्वा ॥ ७ ॥ दुर्लभतरमपि परिपन्थिभि कामाद्यैश्चौरै संवृतमतो दु संरक्ष्यमपीत्यर्थ ॥ ८ ॥ पूजयन् ब्राह्मणमिति शेष ॥ ९ ॥ ब्राह्मणेभ्यस्तद्वारा देवादयस्तृप्यन्तीत्यर्थ ॥ १० ॥ यद्यद्वाञ्छति तत्तत्कुरुते ॥ ११ ॥ लब्ध्वाऽपि न बुभूषसे न प्राप्नोषि माद्देशेऽपि तपस्विनि कारुण्याभावात्तन्नाशयसीति भाव ॥ १४ ॥ दुर्लभं ब्राह्मण्य प्राप्यापि नानुतिष्ठन्ति तदुचितान् ।

शमो दमस्तप शौचं क्षान्तिरार्जवमेव च ।
ज्ञानं विज्ञानमास्तिक्य ब्रह्मकर्म स्वभावजम् ॥

इति भगवदुक्तान् (भ गी अ १८ श्लो ४२) न मेवन्तेऽत प्राप्तमपि दु संरक्ष्यमिति भाव ॥ १५ ॥ न जानीते रक्षितुमिति शेष ॥ १६ ॥ दैवं प्राक्कर्म यत् यत ॥ १८ ॥ एता अब्राह्मणत्वरूपाम् ॥ १९ ॥

चोदितस्तु महेन्द्रेण मतङ्गः प्राब्रवीदिदम् ।
यथा कामविहारी स्यां कामरूपी विहङ्गमः २२
ब्रह्मक्षत्राविरोधेन पूजां च प्राप्नुयामहम् ।
यथा ममाक्षया कीर्तिर्भवेच्चापि पुरन्दर २३
कर्तुमर्हसि तद्देव शिरसा त्वां प्रसादये ।

शक्र उवाच ।

छन्दोदेव इति ख्यातः स्त्रीणां पूज्यो भविष्यसि
कीर्तिश्च तेऽतुला वत्स त्रिषु लोकेषु यास्यति
एवं तस्मै वरं दत्त्वा वासवोऽन्तरधीयत २५
प्राणांस्त्यक्त्वा मतङ्गोपि संप्राप्तःस्थानमुत्तमम्
एवमेतत्परं स्थानं ब्राह्मण्यं नाम भारत ।
तच्च दुष्प्रापमिह वै महेन्द्रवचनं यथा ॥ २६

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि इन्द्रमतङ्गसंवादे एकोनत्रिंशोऽध्यायः ॥ २९ ॥



३०

युधिष्ठिर उवाच ।

श्रुतं मे महदाख्यानमेतत्कुरुकुलोद्वह ।
सुदुष्प्राप ब्रह्मबीष ब्राह्मण्य वदतां वर ॥ १
विश्वामित्रेण च पुरा ब्राह्मण्यं प्राप्तमित्युत ।
श्रूयते वदसे तच्च दुष्प्रापमिति सत्तम ॥ २
वीतहव्यश्च नृपतिः श्रुतो मे विप्रतां गतः ।
तदेव तावद्भवेय श्रोतुमिच्छाम्यहं विभो ॥ ३
स केन कर्मणा प्राप्तो ब्राह्मण्यं राजसत्तमः ।
वरेण तपसा वापि तन्मे व्याख्यातुमर्हसि ॥४

भीष्म उवाच ।

शृणु राजन् यथा राजा वीतहव्यो महायशाः
राजर्षिदुर्लभं प्राप्तो ब्राह्मण्यं लोकसत्कृतम् ५
मनोर्महात्मनस्तात प्रजा धर्मेण शासतः ।
बभूव पुत्रो धर्मात्मा शर्यातिरिति विश्रुतः ॥६
तस्यान्ववाये द्वौ राजन राजानौ सम्बभूवतुः
हैहयस्तालजंघश्च वत्सस्य जयतां वर ॥ ७
हैहयस्य तु राजेन्द्र दशसु स्त्रीषु भारत ।
शतं बभूव पुत्राणां शूराणामनिवर्तिनाम् ॥ ८
तुण्डरूपप्रभावानां बलिनां युद्धशालिनाम् ।
धनुर्वेदे च वेदे च सर्वत्रैव कृतश्रमाः ॥ ९
काशिष्वपि नृपो राजन् दिवोदासपितामहः ।
हर्यश्व इति विख्यातो बभूव जयतां वरः १०
स वीतहव्यदायादैरागत्य पुरुषर्षभ ।
गङ्गायमुनयोर्मध्ये संग्रामे विनिपातितः ॥ ११
तं तु हत्वा नरपतिं हैहयास्ते महारथाः ।
प्रतिजग्मुः पुरीं रम्यां वत्सानामकुतोभयाः १२
हर्यश्वस्य च दायादः काशिराजोऽभ्यषिच्यत
सुदेवो देवसङ्काशः साक्षाद्धर्म इवापरः ॥ १३
स पालयामास महीं धर्मात्मा काशिनन्दनः ।
तैर्वीतहव्यैरागत्य युधि सर्वैर्विनिर्जितः ॥ १४
तमथाजौ विनिर्जित्य प्रतिजग्मुर्यथागतम् ।
सौदेवस्त्वथ काशीशो दिवोदासोऽभ्यषिच्यत
दिवोदासस्तु विज्ञाय वीर्यं तेषां यतात्मनाम्
वाराणसीं महातेजा निर्ममे शक्रशासनात् १६
विप्रक्षत्रियसम्बाधां वैश्यशूद्रसमाकुलाम् ।
नैकद्रव्योच्चयवतीं समृद्धविपणापणाम् ॥ १७
गङ्गाया उत्तरे कूले वप्रान्ते राजसत्तम ।
गोमत्या दक्षिणे कूले शक्रस्येवामरावतीम् १८
तत्र तं राजशार्दूलं निवसन्तं महीपतिम् ।
आगत्य हैहया भूयः पर्यधावन्त भारत ॥ १९

एतत्पर एतस्माद्देवताभावात्पर श्रेष्ठ तपसा देवभावोऽपि लब्धु शक्यो न विप्रता इत्येतत्कथयामास मतङ्गकथया मुनिरिति ॥२६॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकोनत्रिंशोऽध्याय. ॥ २९ ॥

३०

श्रुतामिति ॥१॥ तस्य शर्यातेरन्ववाये वत्सस्य पुत्रौ द्वौ राजानाविति योजना॥७॥वीतहव्यदायादैः हैहयस्यैव नामान्तर वीतहव्य इति तत्पुत्रै ॥ ११ ॥ वत्सानां वत्सवंश्यानां राज्ञाम्॥१३॥ वप्रान्ते तटसमीपे । 'वप्रस्थाने पुमानक्षी रेणौ क्षेत्रे चये तटे' इति (रान्तवर्गे ८२) मेदिनी ॥ १८ ॥

स निष्क्रम्य ददौ युद्धं तेभ्यो राजा महाबलः
देवासुरसमं घोरं दिवोदासो महाद्युतिः ॥ २०
स तु युद्धे महाराज दिनानां दशतीर्दश ।
हतवाहनभूयिष्ठस्ततो दैन्यमुपागमत् ॥ २१
हतयोधस्ततो राजन् क्षीणकोशश्च भूमिपः ।
दिवोदासः पुरीं त्यक्त्वा पलायनपरोऽभवत्
गत्वाऽऽश्रमपदं रम्यं भरद्वाजस्य धीमतः ।
जगाम शरणं राजा कृताञ्जलिरिदं मम ॥ २३
तमुवाच भरद्वाजो ज्येष्ठः पुत्रो बृहस्पतेः ।
पुरोधाः शीलसम्पन्नो दिवोदासं महीपतिम् ॥
किमागमनकृत्यं ते सर्वं प्रब्रूहि मे नृप ।
यत्ते प्रियं तत्करिष्ये न मेऽत्रास्ति विचारणा

राजोवाच ।

भगवन्वैतहव्यैर्मे युद्धे वंशः प्रणाशितः ।
अहमेकः परिद्यूनो भवन्तं शरण गतः ॥ २६
शिष्यस्नेहेन भगवंस्त्वं मां रक्षितुमर्हसि ।
एकशेषः कृतो वंशो मम तैः पापकर्मभिः २७
तमुवाच महाभागो भरद्वाजः प्रतापवान् ।

न भेतव्यं न भेतव्यं सौदेव द्युते ते भयम्
अहमिष्टिं करिष्यामि पुत्रार्थं ते विशांपते ।
वीतहव्यसहस्राणि येन त्वं प्रहरिष्यसि ॥२९
तत इष्टिं चकारर्षिस्तस्य वै पुत्रकामिकीम् ।
अथास्य तनयो जज्ञे प्रतर्दन इति श्रुतः ॥ ३०
स जातमात्रो ववृधे समाः सद्यस्त्रयोदश ।
वेदं चापि जगौ कृत्स्नं धनुर्वेदं च भारत॥३१
योगेन च समाविष्टो भरद्वाजेन धीमता ।
तेजोलोक्यं स संगृह्य तस्मिन्देशे समाविशत्
ततः स कवची धन्वी स्तूयमानः सुरर्षिभिः ।
वन्दिभिर्वन्द्यमानश्च बभौ सूर्य इवोदितः ॥३३
स रथी वह्निनिस्त्रिंशो बभौ दीप्त इवानलः ।
प्रययौ स धनुर्दिव्यं खड्गी चर्मी शरासनी ३४
तं दृष्ट्वा परमं हर्षं सुदेवतनयो ययौ ।
मेने च मनसा दग्धान् वैतहव्यान्स पार्थिवः ।
ततोऽस्मै यौवराज्ये च स्थापयित्वा प्रतर्दनम्
कृतकृत्यं तदाऽऽत्मानं स राजा अभ्यनन्दत

ततस्तु वैतहव्यानां वधाय स महीपतेः ।
पुत्रं प्रस्थापयामास प्रतर्दनमरिंदमम् ॥ ३७
सरथः स तु सन्तीर्य गंगामाशु पराक्रमी ।
प्रययौ वीतहव्यानां पुरीं परपुरंजयः ॥ ३८
वैतहव्यास्तु संश्रुत्य रथघोषं समुद्यतम् ।
निर्ययुर्नगराकारै रथैः पररथारुजैः ॥ ३९
निष्क्रम्य ते नरव्याघ्रा दंशिताश्चित्रयोधिनः ।
प्रतर्दनं समाजग्मुः शरवर्षैरुदायुधाः ॥ ४०
शस्त्रैश्च विविधाकारै रथौघैश्च युधिष्ठिर ।
अभ्यवर्षन्त राजानं हिमवन्तमिवाम्बुदाः ४१
अस्त्रैरस्त्राणि सवार्य तेषां राजा प्रतर्दनः ।
जघान तान्महातेजा वज्रानलसमैः शरैः ॥४२
कृत्तोत्तमांगास्ते राजन् भल्लैः शतसहस्रशः
अपतन् रुधिरार्द्रांगा निकृत्ता इव किंशुकाः
हतेषु तेषु सर्वेषु वीतहव्यः सुतेष्वथ ।
प्राद्रवन्नगरं हित्वा भृगोराश्रममभ्युत ॥ ४४
ययौ भृगुं च शरणं वीतहव्यो नराधिपः ।
अभयं च ददौ तस्मै राज्ञे राजन् भृगुस्तदा४५
अथानुपदमेवाशु तत्रागच्छत्प्रतर्दनः ।
स प्राप्य चाश्रमपदं दिवोदासात्मजोऽब्रवीत्
भो भो केऽत्राश्रमे संति भृगोः शिष्या महात्मनः
द्रष्टुमिच्छे मुनिमहं तस्याचक्षत मामिति ४७
स तं विदित्वा तु भृगुर्निश्चक्रामाश्रमात्तदा ।
पूजयामास च ततो विधिना नृपसत्तमम् ४८
उवाच चैनं राजेन्द्र किं कार्यं ब्रूहि पार्थिव ।
स चोवाच नृपस्तस्मै यदागमनकारणम् ४९


राजोवाच ।

अयं ब्रह्मान्वितो राजा वीतहव्यो विसर्ज्यताम्
तस्य पुत्रैर्हि मे कृत्स्नो ब्रह्मन्वंशः प्रणाशितः५०
उत्सादितश्च विषयः काशीनां रत्नसञ्चयः ।
एतस्य वीर्यदृप्तस्य हतं पुत्रशतं मया ॥ ५१
अस्येदानीं वधादद्य भविष्याम्यनृणः पितुः ।
तमुवाच कृपाविष्टो भृगुर्धर्मभृतां वरः ॥ ५२
नेहास्ति क्षत्रियः कश्चित्सर्वे हीमे द्विजातयः।
एतत्तु वचनं श्रुत्वा भृगोस्तथ्यं प्रतर्दनः ॥ ५३

दशतीर्दश सहस्रामित्यर्थ । षष्टिसप्ततिनवतिवद्दशतिशब्दोऽपि दशगुणितान्दश ब्रूते॥२१॥ परिद्यून. सर्वतो निरस्त. ॥२६॥ सद्यो ववृधे त्रयोदशवार्षिकोऽभूत् सद्यश्च वेदान् जगौ॥ ३१॥ योगेन योगबलेन लोक्यं लोकेषु सर्वेषु विद्यमानं तस्मिन् देशे प्रतर्दनदेहे समाविशत् समावेशितवान् ॥ ३२ ॥ तस्य तं प्रति मां आगत आचक्षत कथयत ॥ ४७ ॥

पादावुपस्पृश्य शनैः प्रहृष्टो वाक्यमब्रवीत् ।
एवमप्यस्मि भगवन् कृतकृत्यो न संशयः ५४
य एष राजा वीर्येण
स्वजातिं त्याजितो मया ।
अनुजानीहि मां ब्रह्मन्
ध्यायस्व च शिवेन माम् ५५
त्याजितो हि मया जातिमेव राजा भृगूद्वह
ततस्तेनाभ्यनुज्ञातो ययौ राजा प्रतर्दनः ॥५६
यथागतं महाराज मुक्त्वा विषमिवोरगः ।
भृगोर्वचनमात्रेण स च ब्रह्मर्षितां गतः ॥ ५७
वीतहव्यो महाराज ब्रह्मवादित्वमेव च ।
तस्य गृत्समदः पुत्रो रूपेणेन्द्र इवापरः ॥ ५८
शक्रस्त्वमिति यो दैत्यैर्निगृहीतः किलाभवत्
ऋग्वेदे वर्तते चाग्र्या श्रुतिर्यस्य महात्मनः ॥
यत्र गृत्समदो राजन् ब्राह्मणैः स महीयते ।
स ब्रह्मचारी विप्रर्षिः श्रीमान् गृत्समदोऽभवत्
पुत्रो गृत्समदस्यापि सुचेता अभवद्द्विजः ।
वर्चाः सुतेजसः पुत्रो विहव्यस्तस्य चात्मजः
विहव्यस्य तु पुत्रस्तु वितत्यस्तस्य चात्मजः ।
वितत्यस्य सुतः सत्यः संतः सत्यस्य चात्मजः
श्रवास्तस्य सुतश्चर्षिः श्रवसश्चाभवत्तमः ।
तमसश्च प्रकाशोऽभूत्तनयो द्विजसत्तमः ।
प्रकाशस्य च वागिंद्रो बभूव जयतां वरः ६३
तस्यात्मजश्च प्रमितिर्वेदवेदाङ्गपारगः ॥
घृताच्यां तस्य पुत्रस्तु रुरुर्नामोदपद्यत ॥ ६४
प्रमद्वरायां तु रुरोः पुत्रः समुदपद्यत ।
शुनको नाम विप्रर्षिर्यस्य पुत्रोऽथ शौनकः६५
एवं विप्रत्वमगमद्वीतहव्यो नराधिपः ।
भृगोः प्रसादाद्राजेन्द्र क्षत्रियः क्षत्रियर्षभ ६६
तथैव कथितो वंशो मया गार्त्समदस्तव ।
विस्तरेण महाराज किमन्यदनुपृच्छसि ॥ ६७

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि वीतहव्योपाख्यानं नाम त्रिंशोऽध्यायः ॥ ३० ॥



३१

युधिष्ठिर उवाच ।
के पूज्या वै त्रिलोकेऽस्मिन्मानवा भरतर्षभ
विस्तरेण तदाचक्ष्व न हि तृप्यामि कथ्यतः१

भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादं वासुदेवस्य चोभयोः ॥२
नारदं प्राञ्जलिं दृष्ट्वा पूजयानं द्विजर्षभान् ।
केशवः परिपप्रच्छ भगवन् कान्नमस्यसि ॥३
बहुमानपरस्तेषु भगवन्यान्नमस्यसि ।
शक्यं चेच्छ्रोतुमस्माभिर्ब्रूह्येतद्धर्मवित्तम ॥ ४

नारद उवाच ।
शृणु गोविन्द यानेतान् पूजयाम्यरिमर्दन ।
त्वत्तोन्यः कः पुमाँल्लोके श्रोतुमेतदिहार्हति ५
वरुणं वायुमादित्यं पर्जन्यं जातवेदसम् ।
स्थाणुं स्कन्दं तथा लक्ष्मीं विष्णुं ब्रह्माणमेव च
वाचस्पतिं चन्द्रमसमपः पृथ्वीं सरस्वतीम् ।
सततं ये नमस्यन्ति तान्नमस्याम्यहं विभो॥ ७
तपोधनान्वेदविदो नित्यं वेदपरायणान् ।
महार्हान्वृष्णिशार्दूल सदा सम्पूजयाम्यहम् ८

आख्यायिकातात्पर्यमाह—भृगोरिति ॥५७॥ श्रुति—'तदु गार्त्समदमेतेन वै गृत्समद इन्द्रस्य प्रिय धामोपागच्छत्' इत्यादिका ॥ ५९ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्रिंशोऽध्याय ॥ ३० ॥

३१

के पूज्या इति । ब्राह्मणस्य दुष्प्रापत्वं विप्रानुग्रहैकलभ्यत्वं चोक्त्वा पूज्यत्वहेतून् साधारणानसाधारणान् स्वधर्मानाहानेनाध्यायेन ॥ १ ॥ तेषु मानवेषु बहुमानपरः सन् कान्नमस्यसीति योज्यम् ॥ ४ ॥ महार्हान् महान् अर्हः पूजा एषाम् अतिपूज्यानित्यर्थः ॥ ८ ॥

अभुक्त्वा देवकार्याणि कुर्वते येऽविकत्थनाः ।
सन्तुष्टाश्च क्षमायुक्तास्तान्नमस्याम्यहं विभो
सम्यग्यजन्ति ये चेष्टीः क्षांता दांता जितेंद्रियाः
सत्यं धर्मं क्षितिं गाश्च तान्नमस्यामि यादव१०
ये वै तपसि वर्तंते वने मूलफलाशनाः ।
असञ्चयाः क्रियावन्तस्तान्नमस्यामि यादव११
ये भृत्यभरणे शक्ताः सततं चातिथिव्रताः ।
भुञ्जते देवशेषाणि तान्नमस्यामि यादव ॥ १२
ये वेदं प्राप्य दुर्धर्षा वाग्मिनो ब्रह्मचारिणः ।
याजनाध्यापने युक्ता नित्यं तान्पूजयाम्यहम्॥
प्रसन्नहृदयाश्चैव सर्वसत्त्वेषु नित्यशः ।
आपृष्टनापात्स्वाध्याये युक्तास्तान्पूजयाम्यहम्
गुरुप्रसादे स्वाध्याये यतन्तो ये स्थिरव्रताः ।
शुश्रूषवोऽनसूयन्तस्तान्नमस्यामि यादव ॥१५
सुव्रता मुनयो ये च ब्राह्मणाः सत्यसंगराः ।
वोढारो हव्यकव्यानां तान्नमस्यामि यादव
भैक्ष्यचर्यासु निरताः कृशा गुरुकुलाश्रयाः ।
निःसुखा निर्धना ये तु तान्नमस्यामि यादव१७
निर्ममा निष्प्रतिद्वन्द्वा निर्ह्रीका निष्प्रयोजनाः
ये वेद प्राप्य दुर्धर्षा वाग्मिनो ब्रह्मवादिनः१८
अहिंसानिरता ये च ये च सत्यव्रता नराः ।
दांताः शमपराश्चैव तान्नमस्यामि केशव ॥ १९
देवतातिथिपूजायां युक्ता ये गृहमेधिनः ।
कपोतवृत्तयो नित्यं तान्नमस्यामि यादव ॥२०
येषां त्रिवर्गः कृत्येषु वर्तते नोपहीयते ।
शिष्टाचारप्रवृत्ताश्च तान्नमस्याम्यहं सदा ॥२१
ब्राह्मणाः श्रुतसम्पन्ना ये त्रिवर्गमनुष्ठिताः ।
अलोलुपाः पुण्यशीलास्तान्नमस्यामि केशव
अब्भक्षा वायुभक्षाश्च सुधाभक्षाश्च ये सदा ।
व्रतैश्च विविधैर्युक्तास्तान्नमस्यामि माधव २३
अयोनीनग्नियोनींश्च ब्रह्मयोनीस्तथैव च ।
सर्वभूतात्मयोनीश्च तान्नमस्याम्यहं सदा २४
नित्यमेतान्नमस्यामि कृष्ण लोककरानृषीन् ।
लोकज्येष्ठान्कुलज्येष्ठांस्तमोघ्नाँल्लोकभास्करान्
तस्मात्त्वमपि वार्ष्णेय द्विजान् पूजय नित्यदा
पूजिताः पूजनार्हा हि सुखं दास्यन्ति तेऽनघ
अस्मिन् लोके सदा ह्येते परत्र च सुखप्रदाः ।
चरन्ते मान्यमाना वै प्रदास्यन्ति सुखं तव२७
ये सर्वातिथयो नित्यं गोषु च ब्राह्मणेषु च ।
नित्य सत्ये चाभिरता दुर्गाण्यतितरन्ति ते॥
नित्यं शमपरा ये च तथा ये चानसूयकाः ।
नित्यस्वाध्यायिनो ये च दुर्गाण्यतितरन्ति ते
सर्वान्देवान्नमस्यन्ति ये चैकं वेदमाश्रिताः ।
श्रद्दधानाश्च दान्ताश्च दुर्गाण्यतितरन्ति ते३०
तथैव विप्रप्रवरान्नमस्कृत्य यतव्रताः ।
भवन्ति ये दानरता दुर्गाण्यतितरन्ति ते ३१
तपस्विनश्च ये नित्यं कौमारब्रह्मचारिणः ।
तपसा भावितात्मानो दुर्गाण्यतितरन्ति ते
देवतातिथिभृत्यानां पितॄणां चार्चने रताः ।
शिष्टान्नभोजिनो ये च दुर्गाण्यतितरन्ति ते३३
अग्निमाधाय विधिवत्प्रणता धारयन्ति ये ।
प्राप्ताः सोमाहुतिं चैव दुर्गाण्यतितरन्ति ते३४
मातापित्रोर्गुरुषु च सम्यग्वर्तन्ति ये सदा ।
यथा त्वं वृष्णिशार्दूलेत्युक्त्वैवं विरराम सः
तस्मात्त्वमपि कौन्तेय पितृदेवद्विजातिर्थीन् ।
सम्यक्पूजयसे नित्यं गतिमिष्टामवाप्स्यसि३६

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि कृष्णनारदसंवादे एकत्रिंशोऽध्यायः ॥ ३१ ॥

अविकत्थना श्लाघाहीना ॥ ९ ॥ सत्यं धर्मं च यजन्ति पूजयन्ति क्षितिं गाश्च यजन्ति ब्राह्मणेभ्य प्रयच्छन्ति । यज देवपूजासङ्गतिकरणदानेषु एतेऽर्था यथासम्भवमिह ग्राह्याः ॥ १० ॥ आपृष्टतापात् यावन्मन्याहम् ॥ १४ ॥ स्वाध्याये ब्रह्मयज्ञे मन्त्रजपे वा ॥१५॥ निर्ह्रीका दिगम्बरा. कौपीनमात्रमपि परिग्रहं न कुर्वन्तीत्यर्थ ॥ १८ ॥ कपोतवृत्तय कणश आदाय ये सग्रहं न कुर्वन्तीत्यर्थ ॥ २० ॥ त्रिवर्गो धर्मार्थकामा कृत्येषु कर्तु योग्येषु कर्मसु वर्तते उत्तममध्यमाधमभावेन वर्तते न तु हीयते अधममध्यमोत्तमभावेनेत्यर्थ ॥ २१ ॥ अलोलुपा इत्यनेन धर्ममपेक्ष्य अर्थानादर उक्त पुण्यशीला इत्यनेन धर्मव्यतिरिक्तकामपरिहार उक्त । 'ऋतौ भार्यामुपेयात्' इत्येतावानेव कामो धर्ममयो नान्य ॥ २२ ॥ सुधा वैश्वदेवशेष ॥ २३ ॥ अयोनीन् अकृतदारान् अग्नियोनीन् दाराग्निहोत्रयुतान् ब्रह्मणो वेदस्य योनीन् आश्रयभूतान् ॥ २४ ॥ सर्वानिति । स्वाध्याये सर्वे यज्ञा अन्तर्भवन्तीत्यर्थ ॥ ३० ॥ भिक्षुचर्येति द्वौ श्लोकौ पुन पाठादुपेक्षितौ गौडैः ॥ ३१ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकत्रिंशोऽध्याय ॥ ३१ ॥

३२

युधिष्ठिर उवाच ।

पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
त्वत्तोऽहं श्रोतुमिच्छामि धर्मं भरतसत्तम १
शरणागतं ये रक्षन्ति भूतग्रामं चतुर्विधम् ।
किं तस्य भरतश्रेष्ठ फलं भवति तत्त्वतः ॥ २

भीष्म उवाच ।

इदं शृणु महाप्राज्ञ धर्मपुत्र महायशः ।
इतिहासं पुरावृत्तं शरणार्थे महाफलम् ॥ ३
प्रपात्यमानः श्येनेन कपोतः प्रियदर्शनः ।
वृषदर्भं महाभाग नरेन्द्रं शरणं गतः ॥ ४
स तं दृष्ट्वा विशुद्धात्मा त्रासादङ्कमुपागतम् ।
आश्वास्याश्वसिहीत्याह न तेऽस्ति भयमंडज
भयं ते सुमहत्कस्मात्कुत्र किं वा कृतं त्वया
येन त्वमिह संप्राप्तो विसंज्ञो भ्रान्तचेतनः ॥६
नवनीलोत्पलापीड चारुवर्ण सुदर्शन ।
दाडिमाशोकपुष्पाक्ष मा त्रसस्वाभयं तव ॥ ७
मत्सकाशमनुप्राप्तं न त्वां कश्चित्समुत्सहेत ।
मनसा ग्रहणं कर्तुं रक्षाध्यक्षपुरस्कृतम् ॥ ८
काशिराज्यं तदधैव त्वदर्थं जीवितं तथा ।
त्यजेयं भव विस्रब्धः कपोत न भयं तव ॥ ९

श्येन उवाच ।

ममैतद्विहितं भक्ष्यं न राजंस्त्रातुमर्हसि ।
अतिक्रांतं च प्राप्तं च प्रयत्नाद्योपपादितम् १०
मांसं च रुधिरं चास्य मज्जा मेदश्च मे हितम्
परितोषकरो ह्येष मम माऽस्यायतो भव ११
तृष्णा मे बाधतेऽत्युग्रा क्षुधा निर्दहतीव माम्
मुञ्चैनं न हि शक्ष्यामि राजन्मन्दयितुं क्षुधाम्
मया ह्यनुसृतो ह्येष मत्पक्षनखविक्षतः ।
किंचिदुच्छ्वासनिःश्वासं न राजन् गोप्तुमर्हसि
यदि स्वविषये राजन् प्रभुस्त्वं रक्षणे नृणाम्
खेचरस्य तृषार्तस्य न त्वं प्रभुरथोत्तम ॥ १४
यदि वैरिषु भृत्येषु स्वजनव्यवहारयोः ।
विषयेष्विन्द्रियाणां च आकाशे मा पराक्रम
प्रभुत्वं हि पराक्रम्य सम्यक् पक्षहरेषु ते ।
यदि त्वमिह धर्मार्थी मामपि द्रष्टुमर्हसि १६

भीष्म उवाच ।

श्रुत्वा श्येनस्य तद्वाक्यं राजर्षिर्विस्मयं गतः
सभाष्य चैनं तद्वाक्यं तदर्थी प्रत्यभाषत ॥१७

राजोवाच ।

गोवृषो वा वराहो वा मृगो वा महिषोऽपि वा
त्वदर्थमद्य क्रियतां क्षुधाप्रशमनाय ते ॥ १८
शरणागतं न त्यजेयमिति मे व्रतमाहितम् ।
न मुञ्चति ममांगानि द्विजोऽयं पश्य वै द्विज

श्येन उवाच ।

न वराहं न चोक्षाणं
न चान्यान्विविधान्द्विजान् ।
भक्षयामि महाराज
किमन्नाद्येन तेन मे ॥ २०
यस्तु मे विहितो भक्ष्यः स्वयं दैवैः सनातनः
श्येनाः कपोतान् खादंति स्थितिरेषा सनातनी
उशीनर कपोते तु यदि स्नेहस्तवानघ ।
ततस्त्व मे प्रयच्छाद्य स्वमांसं तुलया धृतम्

राजोवाच ।

महाननुग्रहो मेऽद्य यस्त्वमेवमिहात्थ माम्
बाढमेव करिष्यामीत्युक्त्वाऽसौ राजसत्तमः
उत्कृत्योत्कृत्य मांसानि तुलया समतोलयत् ।
अन्तःपुरे ततस्तस्य स्त्रियो रत्नविभूषिताः २४
हाहाभूता विनिष्क्रांताः श्रुत्वा परमदुःखिताः
तासां रुदितशब्देन मन्त्रिभृत्यजनस्य च ॥ २५
बभूव सुमहान्नादो मेघगम्भीरनिःस्वनः ।
निरुद्धं गगनं सर्वं शुभ्रं मेघैः समन्ततः ॥ २६

३२

पितामहेत्यादेरध्यायस्य पक्षिमात्रस्यापि स्वशरीरदानेन रक्षणं कार्यं किमुत पूर्वोक्तानां पूज्यानामर्थादिनेति तात्पर्यम् ॥ १ ॥ प्रपात्यमानः आकाशादिति शेषः । वृषदर्भं औशीनरं शिबिम् ॥ ४ ॥ नवं नीलं च यदुत्पलं तस्य आपीड इवालङ्कारभूतश्चारुवर्णो यस्य ॥ ७ ॥ अतिक्रान्तं गतप्रायजीवितम् ॥१०॥ अस्य मदन्नस्याग्रतोऽन्तरायभूतो मा भव ॥११॥ तृष्णा एतद्विरपिपासा ॥ १२ ॥ यदि वैर्यादिषु पराक्रमसे तदुक्तं न त्वाकाशे आकाशचारिषु ॥ १५ ॥ पक्षहरेषु आज्ञाभङ्गिषु शत्रुषु मा अशत्रुमपि जीवनहरणेन बाधमानस्य तव धर्मार्थिनोऽप्यधर्मो भविष्यतीति भावः ॥ १६ ॥ एनं श्येनं तद्वाक्यं च सम्भाव्य स्तुत्वा तदर्थी कपोतार्थी ॥ १७ ॥

मही प्रचलिता चासीत्तस्य सत्येन कर्मणा ।
स राजा पार्श्वतश्चैव बाहुभ्यामूरुतश्च यत् २७
तानि मांसानि संच्छिद्य तुलां पूरयतेऽशनेः ।
तथापि न समस्तेन कपोतेन बभूव ह ॥ २८
अस्थिभूतो यदा राजा निर्मांसो रुधिरस्रवः ।
तुलां ततः समारूढः स्वं मांसक्षयमुत्सृजन् ।
ततः सेन्द्रास्त्रयो लोकास्तं नरेन्द्रमुपस्थिताः ।
भेर्यश्चाकाशगैस्तत्र वादिता देवदुन्दुभिः ३०
अमृतेनावसिक्तश्च वृषदर्भो नरेश्वरः ।
दिव्यैश्च सुसुखैर्माल्यैरभिवृष्टः पुनः पुनः ।
देवगन्धर्वसंघातैरप्सरोभिश्च सर्वतः ।
नृत्तश्चैवोपगीतश्च पितामह इव प्रभुः ॥ ३२
हेमप्रासादसम्बाधं मणिकाञ्चनतोरणम् ।
स वैदूर्यमणिस्तम्भं विमानं समधिष्ठितः ॥३३
स राजर्षिर्गतः स्वर्गं कर्मणा तेन शाश्वतम् ।
शरणागतेषु चैवं त्वं कुरु सर्वं युधिष्ठिर ॥३४
भक्तानामनुरक्तानामाश्रितानां च रक्षिता ।
दयावान्सर्वभूतेषु परत्र सुखमेधते ॥ ३५
साधुवृत्तो हि यो राजा सद्वृत्तमनुतिष्ठति ।
किं न प्राप्तं भवेत्तेन सद्याजेनेह कर्मणा ॥३६
स राजार्षिर्विशुद्धात्मा धीरः सत्यपराक्रमः ।
काशीनामीश्वरः ख्यातस्त्रिषु लोकेषु कर्मणा
योऽप्यन्यः कारयेदेवं शरणागतरक्षणम् ।
सोऽपि गच्छेत तामेव गतिं भरतसत्तम ॥३८
इदं वृत्तं हि राजर्षे वृषदर्भस्य कीर्तयन् ।
पूतात्मा वै भवेल्लोके शृणुयाद्यश्च नित्यशः ३९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि श्येनकपोतसंवादे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

३३

युधिष्ठिर उवाच ।
किं राज्ञः सर्वकृत्यानां गरीयः स्यात्पितामह
कुर्वन् किं कर्म नृपतिरुभौ लोकौ समश्नुते १
भीष्म उवाच ।
एतद्राज्ञः कृत्यतममभिषिक्तस्य भारत ।
ब्राह्मणानामनुष्ठानमत्यन्तं सुखमिच्छता ॥ २
कर्तव्यं पार्थिवेन्द्रेण तथैव भरतर्षभ ।
श्रोत्रियान्ब्राह्मणान्वृद्धान्नित्यमेवाभिपूजयेत
पौरजानपदांश्चापि ब्राह्मणांश्च बहुश्रुतान् ।
सांत्वेन भोगदानेन नमस्कारैस्तथाऽर्चयेत ४
एतत्कृत्यतमं राज्ञो नित्यमेवोपलक्षयेत ।
यथाऽऽत्मानं यथा पुत्रास्तथैतान्प्रतिपालयेत
ये चाप्येषां पूजयितास्तान् दृढं प्रति पूजयेत
तेषु शान्तेषु तद्राष्ट्रं सर्वमेव विराजते ॥ ६
ते पूज्यास्ते नमस्कार्या मान्यास्ते पितरो यथा
तेष्वेव यात्रा लोकानां भूतानामिव वासवे ७
अभिचारैरुपायैश्च दहेयुरपि चेतसा ।
निःशेषं कुपिताः कुर्युरुग्राः सत्यपराक्रमाः ८
नान्तमेषां प्रपश्यामि न दिशश्चाप्यपावृताः ।
कुपिताःसमुदीक्षन्ते दावेष्वग्निशिखा इव ॥९
बिभ्यत्येषां साहसिका गुणास्तेषामतीव हि ।
कूपा इव तृणच्छन्ना विशुद्धा घोरिवापरे १०

अशनेः शीघ्रम् ॥ २८ ॥ मांसक्षयं मांसालयं शरीरम् ॥२९॥ नृत्तं नृत्येन तोषित एवमुगीतं ॥३२॥ साधुवृत्त सुशील सद्वृत्त शिष्टाचारं स्वव्याजेन सुतरां निष्कपटेन ॥ ३६ ॥ अस्या कथाया विवेयमाह—योऽपीति ॥ ३८ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्वात्रिंशोऽध्यायः ॥ ३२ ॥

३३

किं राज्ञ इत्यध्यायस्य तात्पर्यं स्पष्टम् ॥ १ ॥ अनुष्ठानं आराधनम् ॥ २ ॥ एषा ब्राह्मणाना मध्ये ॥ ६ ॥ वासवे पर्जन्ये ॥ ७ ॥ अभिचारै श्येनादिभि उपायैः कौलिकशास्त्रप्रसिद्धै चेतसा सङ्कल्पमात्रेण ॥ ८ ॥ अन्तं नाशकरं दिशश्चैषा न अपावृता सर्वत्राकुण्ठिता गतिरेतेषामित्यर्थ अग्निशिखा इव दहन्त ॥ ९ ॥ एषा एभ्य साहसिका अकार्यकारिणोऽपि बिभ्यति किमुत विवेकिनः छन्ना. केचिज्जडभरतादय । अपरे वसिष्ठादय ॥ १० ॥

प्रसह्यकारिणः केचित्कार्पासमृदवो परे ।
सन्ति चैषामतिशठास्तथैवान्ये तपस्विनः ११
कृषिगोरक्ष्यमप्येके भैक्ष्यमन्येऽप्यनुष्ठिताः ।
चौराश्चान्येऽनृताश्चान्ये तथान्ये नटनर्तकाः
सर्वकर्मसहाश्चान्ये पार्थिवेष्वितरेषु च ।
विविधाकारयुक्ताश्च ब्राह्मणा भरतर्षभ ॥ १३
नानाकर्मसु रक्तानां बहुकर्मोपजीविनाम् ।
धर्मज्ञानां सतां तेषां नित्यमेवानुकीर्तयेत् १४
पितॄणां देवतानां च मनुष्योरगरक्षसाम् ।
पुराप्येते महाभागा ब्राह्मणा वै जनाधिप १५
नैते देवैर्न पितृभिर्न गन्धर्वैर्न राक्षसैः ।
नासुरैर्न पिशाचैश्च शक्या जेतुं द्विजातयः १६
अदैवं दैवतं कुर्युर्दैवतं चाप्यदैवतम् ।
यमिच्छेयुः स राजा स्याद्यो नेष्टः स पराभवेत
परिवादं च ये कुर्युर्ब्राह्मणानामचेतसः ।
सत्यं ब्रवीमि ते राजन् विनश्येयुर्न संशयः १८
निंदाप्रशंसाकुशलाः कीर्त्यकीर्तिपरायणाः ।
परिकुप्यति ते राजन् सततं द्विषतां द्विजाः
ब्राह्मणा यं प्रशंसन्ति पुरुषः स प्रवर्धते ।
ब्राह्मणैर्यः पराकृष्टः पराभूयात्क्षणाद्धि सः २०
शका यवनकांबोजास्तास्तास्ताः क्षत्रियजातयः
वृषलत्वं परिगता ब्राह्मणानामदर्शनात् ।
द्राविडाश्च कलिङ्गाश्च पुलिंदाश्चाप्युशीनराः
कोलिसर्पा महिषकास्तास्ताः क्षत्रियजातयः
वृषलत्वं परिगता ब्राह्मणानामदर्शनात् ।
श्रेयान् पराजयस्तेभ्यो न जयो जयतां वर
यस्तु सर्वमिदं हन्यात् ब्राह्मणं च न तत्समम्
ब्रह्मवध्या महान्दोष इत्याहुः परमर्षयः ॥ २४
परिवादो द्विजातीनां न श्रोतव्यः कथंचन ।
आसीताधोमुखस्तूष्णीं समुत्थाय व्रजेच्च वा
न स जातोऽजनिष्यद्वा पृथिव्यामिह कश्चन
यो ब्राह्मणविरोधेन सुखं जीवितुमुत्सहेत ॥ २६
दुर्ग्राह्यो मुष्टिना वायुर्दुःस्पर्शः पाणिना शशी
दुर्धरा पृथिवी राजन् दुर्जया ब्राह्मणा भुवि

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि ब्राह्मणप्रशंसा नाम त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

३४

भीष्म उवाच ।
ब्राह्मणानेव सततं भृशं सम्परिपूजयेत ।
एते हि सोमराजान ईश्वराः सुखदुःखयोः ॥ १
एते भौगैरलङ्कारैरन्यैश्चैव किमिच्छकैः ।
सदा पूज्या नमस्कारै रक्ष्याश्च पितृवन्नृपैः ॥ २
ततो राष्ट्रस्य शान्तिर्हि भूतानामिव वासवात्
जायतां ब्रह्मवर्चस्वी राष्ट्रे वै ब्राह्मणः शुचिः ३
महारथश्च राजन्य एष्टव्यः शत्रुतापनः ।
ब्राह्मणं जातिसम्पन्नं धर्मज्ञं संशितव्रतम् ॥ ४
वासयेत गृहे राजन्न तस्मात्परमस्ति वै ।
ब्राह्मणेभ्यो हविर्दत्तं प्रतिगृह्णन्ति देवताः ॥ ५

प्रसह्यकारिण दुर्वास प्रभृतय । मृदवो गौतमादय ये पादचारेऽपि हिंसाभयात्पादयोरेवाक्षि चक्षुरित्यक्षपादत्वं गता. । अतिशठा अगस्त्यादय । वातार्पि जरयितु मासे लोलुपता दर्शयन्त ॥ ११ ॥ कृषिं कुर्वन्त उद्दालकगुर्वादय । गोरक्ष्यम् । गुरोरेव उपमन्युप्रभृतय भैक्ष्यं दत्तात्रेयादय । चौरा वाल्मीकिविश्वामित्रादय. अनृता· कलहप्रिया नारदादय नटनर्तकाः भरतादय ॥ १२ ॥ सर्वकर्मसहा समुद्रशोषणादावपि समर्थाः ॥ १३ ॥ **नानेति** । स्वरूपप्रच्छादनार्थं लोकरक्षार्थं वा निषिद्धेनापि कर्मणा वर्तमाना. । वस्तुतस्तु धर्मज्ञास्तेषा तान् नित्यमेवानुकीर्तयेत् ॥ १४ ॥ एते पूज्या इति शेष यतो महाभागा. ॥ १५ ॥ परायणाः हेतव ॥ १९ ॥ अदर्शनात् अननुग्रहात् ॥ २१ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्रयस्त्रिंशोऽध्याय ॥ ३३ ॥

३४

ब्राह्मणानित्याद्यध्यायत्रयेण दानपात्रत्व ब्राह्मणानामुच्यते.। सोमो राजा येषां ते **सोमराजानः** ॥ १ ॥ किमिच्छसीति प्रश्नपूर्वक यत्तादिष्टं दीयते तत्किमिच्छकम् २

पितरः सर्वभूतानां नैतेभ्यो विद्यते परम् ।
आदित्यश्चन्द्रमा वायुरापो भूरम्बरं दिशः ॥६
सर्वे ब्राह्मणमाविश्य सदाऽन्नमुपभुञ्जते ।
न तस्याश्नन्ति पितरो यस्य विप्रा न भुञ्जते
देवाश्चाप्यस्य नाश्नन्ति पापस्य ब्राह्मणद्विषः ।
ब्राह्मणेषु तु तुष्टेषु प्रीयन्ते पितरः सदा ॥ ८
तथैव देवता राजन्नात्र कार्या विचारणा ।
तथैव तेऽपि प्रीयन्ते येषां भवति तद्धविः ॥९
न च प्रेत्य विनश्यन्ति गच्छन्ति च परां गतिम्
येन येनैव हाविषा ब्राह्मणांस्तर्पयेन्नरः ॥ १०
तेन तेनैव प्रीयन्ते पितरो देवतास्तथा ।
ब्राह्मणादेव तद्भूतं प्रभवन्ति यतः प्रजाः ॥ ११
यतश्चायं प्रभवति प्रेत्य यत्र च गच्छति ।
वेदैष मार्गं स्वर्गस्य तथैव नरकस्य च ॥ १२
अगतानागते चोभे ब्राह्मणो द्विपदां वरः ।
ब्राह्मणो भरतश्रेष्ठ स्वधर्मं चैव वेद यः ॥ १३
ये चैनमनुवर्तन्ते ते न यान्ति पराभवम् ।
न ते प्रेत्य विनश्यन्ति गच्छन्ति न पराभवम्
यद्ब्राह्मणमुखात्प्राप्तं प्रतिगृह्णन्ति वै वचः ।
भूतात्मानो महात्मानस्ते न यान्ति पराभवम्
क्षत्रियाणां प्रतपता तेजसा च बलेन च ।
ब्राह्मणेष्वेव शाम्यन्ति तेजांसि च बलानि च
भृगवस्तालजंघांश्च नीपानाङ्गिरसोऽजयन् ।
भरद्वाजो वैहतव्यानेलांश्च भरतर्षभ ॥ १७
चित्रायुधांश्चाप्यजयन्नेते कृष्णाजिनध्वजाः ।
प्रक्षिप्यथ च कुंभान्वै पारगामिनमारभेत
यत्किंचित्कथ्यते लोके श्रूयते पठ्यतेऽपि वा
सर्वं तद्ब्राह्मणेष्वेव गूढोऽग्निरिव दारुषु ॥ १९
अत्राप्युदाहरन्तीममितिहास पुरातनम् ।
संवादं वासुदेवस्य पृथ्व्याश्च भरतर्षभ ॥ २०
वासुदेव उवाच ।
मातरं सर्वभूतानां पृच्छे त्वां संशय शुभे ।
केनस्वित्कर्मणा पापं व्यपोहति नरो गृही
पृथिव्युवाच ।
ब्राह्मणानेव सेवेत पवित्रं ह्येतदुत्तमम् ।
ब्राह्मणान्सेवमानस्य रजः सर्वं प्रणश्यति ।
अतो भूतिरतः कीर्तिरतो बुद्धिः प्रजायते २२
महारथश्च राजन्य एष्टव्यः शत्रुतापनः ।
इति मां नारदः प्राह सततं सर्वभूतये ॥ २३
ब्राह्मण जातिसम्पन्नं धर्मज्ञं संशितं शुचिम् ।
अपरेषां परेषां च परेभ्यश्चैव येऽपरे ॥ २४
ब्राह्मणा यं प्रशंसन्ति स मनुष्यः प्रवर्धते ।
अथ यो ब्राह्मणान्क्रुष्टः पराभवति सोऽचिरात्
यथा महार्णवे क्षिप्ता सीता नेष्टुर्विनश्यति ।
तथा दुश्चरितं सर्वं पराभावाय कल्पते ॥ २६
पश्य चन्द्रे कृतं लक्ष्म समुद्रो लवणोदकः ।
तथा भगसहस्रेण महेन्द्रः परिचिह्नितः ॥ २७
तेषामेव प्रभावेन सहस्रनयनो ह्यसौ ।
शतक्रतुः समभवत्पश्य माधव यादृशम् २८
इच्छन् कीर्तिं च भूतिं च लोकांश्च मधुसूदन ।
ब्राह्मणानुमते तिष्ठेत्पुरुषः शुचिरात्मवान् २९
भीष्म उवाच ।
इत्येतद्वचनं श्रुत्वा मेदिन्या मधुसूदनः ।
साधु साध्विति वाक्यस्य मेदिनीं प्रत्यपूजयत् ॥
एतां श्रुत्वोपमां पार्थ प्रयतो ब्राह्मणर्षभान् ।
सततं पूजयेथास्त्वं ततः श्रेयोऽभिपत्स्यसे ३१

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि पृथ्वीवासुदेवसंवादे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

तेऽपि दातारोऽपि तत् प्रदेयं द्रव्यम ॥ ९ ॥ तत् यज्ञादिकं भूतमुत्पन्नम् ।
'अग्नौ प्रास्ताहुति सम्यगादित्यमुपतिष्ठते ॥
आदित्याज्जायते वृष्टिर्वृष्टेरन्नं ततः प्रजा ॥'
इति स्मृतेः ॥ ११ ॥ भूतात्मान भूत प्राप्तो वशीकृत आत्मा चित्तं यैस्ते ॥ १५ ॥ **प्रक्षिप्येति** । कुं पृथिवीं ब्राह्मणाय प्रक्षिप्य दत्वा पारगामिन परलोकहितं कर्म आरभेताचरेत् भान् दीप्तिं कुर्वन्नुभयलोके इति शेषः ॥१८॥ यत्किञ्चिदतीतानागत व्यवहितं स्थूलसूक्ष्मं ब्राह्मणे हार्दाकाशाख्यब्रह्मविदि काष्ठाग्निवद्ध्यानानिर्मथनादभिव्यज्यत इत्यर्थः १९ रज ध्यानेऽन्तरायभूतो विक्षेप भूतिरैश्वर्यं बुद्धिरात्मज्ञानं सार्वश्लोक ॥ २२ ॥ अपरे ब्राह्मणं सर्वभूतये इच्छेदित्याहुरिति विपरिणामेनानुषङ्ग ॥ २४ ॥ क्रुष्ट क्रोशति कर्तरि क्त ॥ २५ ॥ सीता नेष्टुर्लाङ्गलपद्धतिगत पांसुपिण्डः लोष्ठो लेष्टुरिति कोशकारा अन्तस्थादिनिर्मं शब्दं पठन्ति दुश्चरितं ब्राह्मणद्रोह ॥ २६ ॥ विवेयमाह—**ब्राह्मणेत्यर्धेन** ॥ २९ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नीलकण्ठीये भारतभावदीपे चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

३५

भीष्म उवाच ।

जन्मनैव महाभागो ब्राह्मणो नाम जायते ।
नमस्यः सर्वभूतानामतिथिः प्रसृताग्रभुक् ॥ १
सर्वार्थाः सुहृदस्तात ब्राह्मणाः सुमनोमुखाः ।
गीर्भिर्मंगलयुक्ताभिरनुध्यायन्ति पूजिताः ॥ २
सर्वान्नो द्विषतस्तात ब्राह्मणा जातमन्यवः ।
गीर्भिर्दारुणयुक्ताभिरभिध्यासुरपूजिताः ॥ ३
अत्र गाथाः पुरागीताः कीर्तयन्ति पुराविदः
सृष्ट्वा द्विजातीन् धाता हि यथापूर्वं समादधत्
न चान्यदिह कर्तव्यं किञ्चिदूर्ध्वं यथाविधि ।
गुप्तो गोपायते ब्रह्मा श्रेयो वस्तेन शोभनम् ५
स्वमेव कुर्वतां कर्म श्रीर्वो ब्राह्मी भविष्यति ।
प्रमाणं सर्वभूतानां प्रग्रहाश्च भविष्यथ ॥ ६
न शौद्रं कर्म कर्तव्यं ब्राह्मणेन विपश्चिता ।
शौद्रं हि कुर्वतः कर्म धर्मः समुपरुध्यते ॥ ७
श्रीश्च बुद्धिश्च तेजश्च विभूतिश्च प्रतापिनी ।
स्वाध्याये चैव माहात्म्यं विपुलं प्रतिपत्स्यते ८

हुत्वा चाहवनीयस्थ
महाभाग्ये प्रतिष्ठिताः ।
अग्रभोज्याः प्रसूतीनां
श्रिया ब्राह्म्यानुकल्पिताः ॥ ९

श्रद्धया परया युक्ता ह्यनभिद्रोहलब्धया ।
दमस्वाध्यायनिरताः सर्वान्कामानवाप्स्यथ १०
यच्चैव मानुषे लोके यच्च देवेषु किञ्चन ।
सर्वं तु तपसा साध्यं ज्ञानेन नियमेन च ॥ ११
इत्येवं ब्रह्मगीतास्ते समाख्याता मयाऽनघ ।
विप्राणामनुकम्पार्थं तेन प्रोक्तं हि धीमता १२
भूयस्तेषा बलं मन्ये यथा राज्ञस्तपस्विनः ।
दुरासदाश्च चण्डाश्च रभसाः क्षिप्रकारिणः १३
सन्त्येषां सिंहसत्त्वाश्च व्याघ्रसत्त्वास्तथापरे ।
वराहमृगसत्त्वाश्च जलसत्त्वास्तथापरे ॥ १४
सर्पस्पर्शसमाः केचित्तथान्ये मकरस्पृशः ।
विभाष्यघातिनः केचित्तथा चक्षुर्हणो परे १५
सन्ति चाशीविषसमाः सन्ति मन्दास्तथापरे
विविधानीह वृत्तानि ब्राह्मणानां युधिष्ठिर १६


मेकला द्राविडा लाटाः
पौंड्राः कान्वशिरास्तथा ।
शौंडिका दरदा दार्वा-
श्चौराः शबरबर्बराः १७

किराता यवनाश्चैव तास्ताः क्षत्रियजातयः
वृषलत्वमनुप्राप्ता ब्राह्मणानाममर्षणात् ॥ १८
ब्राह्मणानां परिभवादसुराः सलिलेशयाः ।
ब्राह्मणाना प्रसादाच्च देवाः स्वर्गनिवासिनः

अशक्यं स्पष्टुमाकाश-
मचाल्यो हिमवान्गिरिः
अधार्या सेतुना गङ्गा
दुर्जया ब्राह्मणा भुवि ॥ २०

न ब्राह्मणविरोधेन शक्या शास्तुं वसुन्धरा ।
ब्राह्मणा हि महात्मानो देवानामपि देवताः २१
तान्पूजयस्व सततं दानेन परिचर्यया ।
यदीच्छसि महीं भोक्तुमिमां सागरमेखलाम् ॥
प्रतिग्रहेण तेजो हि विप्राणां शाम्यतेऽनघ ।
प्रतिग्रह ये नेच्छेयुस्तेभ्यो रक्ष्यं त्वया नृप २३

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि ब्राह्मणप्रशंसाया पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥



३५

जन्मनेति । जन्मनैव सस्काराद्यभावेऽपि ब्राह्मणो नमस्य एव । प्रसृतं प्रार्थित पक्वमन्नं तत्त्वाग्रे भोक्तुमर्हं प्रसृताग्रभुक् ॥ १ ॥ सर्वे अर्था धर्मादयो येभ्यस्ते सुमनसा देवाना मुखमिव भूता सुमनोमुखा ॥ २ ॥ नोऽस्मार्क द्विषत शत्रून् तैरपूजिता ब्राह्मणा दारुणयुक्ताभि तव शत्रवो नश्यन्त्वित्याशिर्भिर्गार्भि अभिध्यासु अभिध्यायन्तु अभिहन्युरिति स्पष्टार्थ. पाठ ॥ ३ ॥ समादधत् समाधिं नियमं कृतवान् ॥ ४ ॥ ब्रह्मा ब्राह्मण व शोभनं श्रेयस्तेनैव ॥ ५ ॥ स्वं कर्म ब्राह्मणगोपनं प्रग्रहा दमनक्षमा रज्जव इव ॥ ६ ॥ शौद्रं कर्म सेवा कर्तव्य कारयितव्यं कुर्वत कारयत ॥ ७ ॥ श्रीश्चेत्यादे श्रियामित्यर्थ ॥ ८ ॥ आहवनीयस्थ देवतागणं प्रसूतीना शिशुभ्योऽप्यग्रे भोज्यं येषा ते ब्राह्मया श्रिया विद्यया नुकल्पिता पात्रीभूता ॥ ९ ॥ **भूय इति** । चण्डत्वादिदोषवन्तोऽपि पूज्या एवेत्यर्थ ॥ १३ ॥ अमर्षणात् ब्राह्मणकोपासहनात् ॥ १८ ॥ तेभ्यो रक्ष्यं स्वकुलमिति शेष ॥ २३ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चत्रिंशोऽध्याय ॥ ३५ ॥

३६

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
शक्रशम्बरसंवादं तन्निबोध युधिष्ठिर ॥ १
शक्रो ह्यज्ञातरूपेण जटी भूत्वा रजोगुणः ।
विरूपं रथमास्थाय प्रश्नं पप्रच्छ शम्बरम् ॥ २

शक्र उवाच ।

केन शम्बर वृत्तेन स्वजात्यानधितिष्ठसि ।
श्रेष्ठं त्वां केन मन्यन्ते तद्वै प्रब्रूहि तत्त्वतः ॥ ३

शम्बर उवाच ।

नासूयामि यदा विप्रान्ब्राह्ममेव च मे मतम् ।
शास्त्राणि वदतो विप्रान्संमन्यामि यथासुखम्
श्रुत्वा च नावजानामि
नापराध्यामि कर्हिचित् ।
अभ्यर्च्याभ्यनुपृच्छामि
पादौ गृह्णामि धीमताम् ॥ ५
ते विश्रब्धाः प्रभाषन्ते संपृच्छन्ते च मा सदा
प्रमत्तेष्वप्रमत्तोऽस्मि सदा सुप्तेषु जागृमि ॥ ६
ते मां शास्त्रपथे युक्तं
ब्रह्मण्यमनसूयकम् ।
समासिञ्चन्ति शास्तारः
क्षौद्रं मध्विव मक्षिकाः ॥ ७
यच्च भाषन्ति सन्तुष्टास्तच्च गृह्णामि मेधया ।
समाधिमात्मनो नित्यमनुलोममचिन्तयम् ८
सोऽहं वाग्रसृष्टानां रसानामवलेहकः ।
स्वजात्यानधितिष्ठामि नक्षत्राणीव चन्द्रमाः ९
एतत्पृथिव्यामृतमेतच्चक्षुरनुत्तमम् ।
यद्ब्राह्मणमुखाच्छास्त्रमिह श्रुत्वा प्रवर्तते १०
एतत्कारणमाज्ञाय दृष्ट्वा देवासुरं पुरा ।
युद्ध पिता मे हृष्टात्मा विस्मितः समपद्यत ११
दृष्ट्वा च ब्राह्मणानां तु महिमानं महात्मनाम् ।
पर्यपृच्छत्कथमयं सिद्धा इति निशाकरम् १२

सोम उवाच ।

ब्राह्मणास्तपसा सर्वे सिध्यन्ते वाग्बलाः सदा
भुजवीर्याश्च राजानो वाग्बलाश्च द्विजातयः १३
प्रणवं चाप्यधीयीत ब्राह्मीर्दुर्वसतीर्वसन् ।
निर्मन्युरपि निर्वाणो यदि स्यात्समदर्शनः १४
अपि च ज्ञानसम्पन्नः सर्वान्वेदान् पितुर्गृहे ।
श्लाघमान इवाधीयाद्ब्राह्म्य इत्येव तं विदुः ॥
भूमिरेतौ निगिरति सर्पो बिलशयानिव ।
राजानं चाप्ययोद्धारं ब्राह्मणं चाप्रवासिनम् ॥
अभिमानः श्रियं हन्ति पुरुषस्याल्पमेधसः ।
गर्भेण दुष्यते कन्या गृहवासेन च द्विजः ॥ १७
इत्येतन्मे पिता श्रुत्वा सोमादद्भुतदर्शनात् ।
ब्राह्मणान्पूजयामास तथैवाहं महाव्रतान् ॥ १८

भीष्म उवाच ।

श्रुत्वैतद्वचनं शक्रो दानवेन्द्रमुखाच्च्युतम् ।
द्विजान्सम्पूजयामास महेन्द्रत्वमवाप च १९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि ब्राह्मणप्रशंसायामिन्द्रशंबरसंवादे षट्त्रिंशोऽध्यायः ॥ ३६ ॥



३६

अत्रापीत्यध्यायस्य तात्पर्यं असुराणामपि श्रीब्राह्मणप्रसादलभ्यैवेति ॥ १ ॥ मां मयि मधु अमृततुल्यां विद्यां समासिञ्चन्ति क्षौद्रं मधुपटलं मक्षिका मध्विवेत्यावृत्त्या योज्यम् ॥ ७ ॥ समाधिं ब्राह्मणेषु निष्ठाम् ॥ ८ ॥ वाग्रसे जिह्वाग्रे भुक्तं विद्यामृतं येषा ब्राह्मणाना रसानामुक्तिसुधानाम् ॥ ९ ॥ ब्राह्मीर्वेदार्था· दुर्वसती· गुरुकुलवासक्लेशात् । अपि अपि वा सति वैराग्ये यति स्यात् नैष्ठिकब्रह्मचर्यात् पारिव्राज्यमेव कुर्यादित्यर्थ· ॥ १४ ॥ पितृगृहे वेदाध्ययनं निन्दति —**अपीति** ॥ १५ ॥ अप्रवासिनं वेदार्थं ग्रामान्तरे वासमकुर्वाणम् ॥ १६ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षट्त्रिंशोऽध्याय ॥ ३६ ॥

३७

युधिष्ठिर उवाच।
अपूर्वश्च भवेत्पात्रमथवापि चिरोषितः।
दूरादभ्यागतं चापि किं पात्रं स्यात्पितामह१
भीष्म उवाच।
क्रिया भवति केषांचिदुपांशु व्रतमुत्तमम्।
यो यो याचेत यत्किञ्चित्सर्वं दद्याम इत्यपि२
अपीडयन् भृत्यवर्गमित्येवमनुशुश्रुम।
पीडयन् भृत्यवर्गं हि आत्मानमपकर्षति ॥ ३
अपूर्वं भावयेत्पात्रं यद्यपि स्याच्चिरोषितम्।
दूरादभ्यागतं चापि तत्पात्रं च विदुर्बुधाः ४
युधिष्ठिर उवाच।
अपीडया च भूतानां धर्मस्यार्हिंसया तथा।
पात्रं विद्यात्तु तत्त्वेन यस्मै दत्तं न सन्तपेत्॥५
भीष्म उवाच।
ऋत्विक्पुरोहिताचार्याः शिष्यसंबंधिबाधवाः
सर्वे पूज्याश्च मान्याश्च श्रुतवन्तोऽनसूयकाः६
अतोऽन्यथा वर्तमानाः सर्वे नार्हंति सत्क्रियाम्
तस्मान्नित्यं परीक्षेत पुरुषान्प्रणिधाय वै ॥ ७
अक्रोधः सत्यवचनमार्हिंसा दम आर्जवम्।
अद्रोहोऽनभिमानश्च ह्रीस्तितिक्षा दमः शमः
यस्मिन्नेतानि दृश्यन्ते न चाकार्याणि भारत
स्वभावतो निविष्टानि तत्पात्रं मानमर्हति ॥९
तथा चिरोषिते चापि संप्रत्यागतमेव च।
अपूर्वं चैव पूर्वं च तत्पात्रं मानमर्हति ॥ १०
अप्रामाण्यं च वेदानां शास्त्राणां चाभिलङ्घनम्
अव्यवस्था च सर्वत्र एतन्नाशनमात्मनः ११
भवेत्पण्डितमानी यो ब्राह्मणो वेदनिन्दकः
आन्वीक्षिकीं तर्कविद्यामनुरक्तो निरर्थिकाम्
हेतुवादान्ब्रुवन्सत्सु विजेताऽहेतुवादिकः।
आक्रोष्टा चातिवक्ता च ब्राह्मणानां सदैव हि
सर्वाभिशङ्की मूढश्च बालः कटुकवागपि।
बोद्धव्यस्तादृशस्तात नरः श्वान हि तं विदुः
यथा श्वा भषितुं चैव हन्तुं चैवावसज्जते।
एवं संभाषणार्थाय सर्वशास्त्रवधाय च १५
लोकयात्रा च द्रष्टव्या धर्मश्चात्महितानि च
एवं नरो वर्तमानः शाश्वतीर्वर्धते समाः १६
ऋणमुन्मुच्य देवानामृषीणां च तथैव च।
पितॄणामथ विप्राणामतिथीनां च पञ्चमम् १७
पर्यायेण विशुद्धेन सुविनीतेन कर्मणा।
एवं गृहस्थः कर्माणि कुर्वन्धर्मान्न हीयते ॥ १८

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि पात्रपरीक्षायां सप्तत्रिंशोऽध्यायः ॥ ३७ ॥



३७

अपूर्वश्चेत्यध्यायो ब्राह्मणेष्वपि पात्रविशेषपरीक्षार्थ ॥१॥ तत्र अपूर्वश्चिरोषितो दूरादागतश्च पात्रं तेषा मध्ये कश्चिद्यज्ञार्थं कश्चित् गुरुदक्षिणार्थं कश्चित्कुटुम्बभरणार्थमिति एवंरूपा क्रिया केषाञ्चित्पात्रत्वे प्रधानं भवति केषाञ्चिदुपांशुव्रतं मौनं पारिव्राज्यमिति। तथा क्रियामौनयोस्तारतम्यादेषां तारतम्यं न स्वरूपत इत्याह—**क्रियेति**। दद्याम ददाम इत्येव वक्तव्यं न त्वेतेषु कश्चित्प्रत्याचक्षीतेत्यर्थ ॥ २ ॥ दत्तं प्रदेयवस्त्वभिमानिनी देवता न सन्तपेत् यथा तादृशाय देयं नान्यस्मै स्मर्यते हि—

नष्टशौचे व्रतभ्रष्टे विप्रे वेदविवर्जिते।
दीयमानं रुदत्यन्नं किं मया दुष्कृतं कृतम्॥ इति।

अतः कस्तादृश इति प्रश्नः ॥ ५ ॥ मुख्यं पात्रविशेषेण श्रुतवन्तोऽनसूयका इति ॥ ६ ॥ तथा अक्रोधादिगुणविशिष्टम् ॥ १० ॥ अपात्रताबीजमाह—**अप्रामाण्यमिति**। आत्मन पात्रताया इति शेष ॥ ११ ॥ निरर्थिका श्रुतिविरोधित्वेन मोक्षानुपयोगिनीम् ॥ १२ ॥ हेतुवादान् ब्रुवन् युक्त्या जगत्कारणगोष्ठी कुर्वन्नपि अहेतुवादिक शास्त्रोक्तहेतुवादविरोधात्॥ १३ ॥ बोद्धव्य अस्पृश्यत्वेनेति शेष। तत्र हेतुमाह—**श्वान हि तं विदुः**। शिष्टा इति शेष ॥ १४ ॥ एतदेवोपपादयति—**यथेति** ॥१५॥लोकयात्रा शिष्टाचारादिव्यवहार धर्म श्रुतिस्मृत्युक्त आत्महितानि शमदमादीनि॥१६॥ देवानामृणं यज्ञेन, ऋषीणा वेदाधिगमेन पितॄणा, प्रजोत्पादनेन, विप्राणा दानमानेन, अतिथीनां वैश्वदेवान्ते आगताना सम्यगातिथ्येन, च उन्मुच्य अपाकृत्य कर्माणि कुर्वन्नित्युत्तरेणान्वय ॥ १७ ॥ पर्यायेण यथाक्रमेण सुविनीतेन सुशिक्षितेन कर्मणा यत्नेन कर्माणि यज्ञादीनि ॥ १८ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥

३८

युधिष्ठिर उवाच ।
स्त्रीणां स्वभावमिच्छामि
श्रोतुं भरतसत्तम ।
स्त्रियो हि मूलं दोषाणां
लघुचित्ता हि ताः स्मृताः ॥ १

भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादं पुंश्चल्या पञ्चचूडया ॥ २
लोकाननुचरन् सर्वान् देवर्षिर्नारदः पुरा ।
ददर्शाप्सरसं ब्राह्मीं पञ्चचूडामनिन्दिताम् ३
तां दृष्ट्वा चारुसर्वाङ्गीं पप्रच्छाप्सरसं मुनिः ।
संशयो हृदि कश्चिन्मे ब्रूहि तन्मे सुमध्यमे ॥४

भीष्म उवाच ।
एवमुक्ताऽथ सा विप्र प्रत्युवाचाथ नारदम्
विषये सति वक्ष्यामि समर्थं मन्यसे च माम्५

नारद उवाच ।
न त्वामविषये भद्रे नियोक्ष्यामि कथंचन ।
स्त्रीणां स्वभावमिच्छामि त्वत्तः श्रोतुं वरानने

भीष्म उवाच ।
एतच्छ्रुत्वा वचस्तस्य देवर्षेरप्सरोत्तमा ।
प्रत्युवाच न शक्ष्यामि स्त्री सती निंदितुं स्त्रियः
विदितास्ते स्त्रियो याश्च यादृशाश्च स्वभावतः
न मामर्हसि देवर्षे नियोक्तुं कार्यमीदृशे ॥ ८
तामुवाच स देवर्षिः सत्यं वद सुमध्यमे ।
मृषावादे भवेद्दोषः सत्ये दोषो न विद्यते ।
इत्युक्ता सा कृतमतिरभवच्चारुहासिनी ।
स्त्रीदोषाञ्छाश्वतान् सत्यान्भाषितुं संप्रचक्रमे

पञ्चचूडोवाच ।
कुलीना रूपवत्यश्च नाथवत्यश्च योषितः ।
मर्यादासु न तिष्ठन्ति स दोषः स्त्रीषु नारद११
न स्त्रीभ्यः किञ्चिदन्यद्वै पापीयस्तरमस्ति वै
स्त्रियो हि मूलं दोषाणां तथा त्वमपि वेत्थ ह
समाज्ञातानृद्धिमतः प्रतिरूपान्वशे स्थितान् ।
पतीनन्तरमासाद्य नालं नार्यः प्रतीक्षितुम्१३
असद्धर्मस्त्वयं स्त्रीणामस्माकं भवति प्रभो ।
पापीयसो नरान् यद्वै लज्जां त्यक्त्वा भजामहे
स्त्रियं हि यः प्रार्थयते सान्निकर्षं च गच्छति ।
ईर्षां च कुरुते सेवां तमेवेच्छन्ति योषितः ॥ १५
अनर्थित्वान्मनुष्याणां भयात्परिजनस्य च ।
मर्यादायाममर्यादाः स्त्रियस्तिष्ठन्ति भर्तृषु १६
नासां कश्चिदगम्योऽस्ति नासां वयसि निश्चयः
विरूपं रूपवन्तं वा पुमानित्येव भुञ्जते ॥ १७
न भयान्नाप्यनुक्रोशान्नार्थहेतोः कथंचन ।
न ज्ञातिकुलसम्बन्धात्स्त्रियस्तिष्ठन्ति भर्तृषु
यौवने वर्तमानानां मृष्टाभरणवाससाम् ।
नारीणां स्वैरवृत्तीनां स्पृहयन्ति कुलस्त्रियः१९
याश्च शश्वद्बहुमता रक्ष्यन्ते दयिताः स्त्रियः ।
अपि ताः संप्रसज्जन्ते कुब्जान्धजडवामनैः२०

पङ्गुष्वथ च देवर्षे
येचान्ये कुत्सिता नराः ।
स्त्रीणामगम्यो लोकेऽस्मि-
न्नास्ति कश्चिन्महामुने
यदि पुसां गतिर्ब्रह्मन् कथंचिन्नोपपद्यते ।
अप्यन्योन्यं प्रवर्तन्ते नहि तिष्ठन्ति भर्तृषु २२
अलाभात्पुरुषाणां हि भयात्परिजनस्य च ।
वधबन्धभयाच्चापि स्वयं गुप्ता भवन्ति ताः२३
चलस्वभावा दुःसेव्या दुर्ग्राह्या भावतस्तथा ।
प्राज्ञस्य पुरुषस्येह यथा वाचस्तथा स्त्रियः २४
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः
नान्तकः सर्वभूतानां न पुंसां वामलोचनाः

३८

पूर्वं मेघवाहनपर्वणि वेद्यं वस्तूक्तं तद्वेदेन धर्मबलादेव भवतीति यज्ञादिधर्मो वक्तव्य स च कामकारविहितदारपरिग्रहाधीन इत्यष्टावक्रादिकसंवादे प्रदर्शित तत्रापि ऋत्विगात्मा धनं जाया शुद्धं यस्य चतुष्टयम् तस्याग्निहोत्रं स्वर्गाय नरकायेतरस्य चेति स्मृतेर्यज्ञाङ्गभूतात्मशुद्धिं ऋत्विक्शुद्धिश्च तीर्थब्राह्मणमाहात्म्याभ्यां उक्ता । अथ स्त्रीशुद्धिर्द्रव्यशुद्धिश्च महता प्रबन्धेन प्रस्तूयते तत्र तावदस्मिन्नध्याये स्त्रीदोषानेव दर्शयति—**स्त्रीणामित्यादिना** । लघुचित्ता वायुवत् चलचित्ता ॥ १ ॥ ब्राह्मीं ब्रह्मलोकस्थाम् ॥ ३ ॥ विषये वक्तुं योग्यत्वे ॥ ५ ॥ कृतमति वक्ष्यामीति कृतनिश्चयाऽभवत् ॥ १० ॥ गति प्राप्ति अन्योन्यं कृत्रिमलिङ्गधारिण्यो भूत्वा मैथुनार्थं प्रवर्तन्ते । एतच्च लोकप्रसिद्धं भर्तृषु दूरस्थेषु इति शेष । नहि तिष्ठन्ति धैर्येण इति शेष ॥ २२ ॥ चलस्वभावा सालावृकाणा हृदयान्येता इति श्रुतेर्यथा वृकविशेषा प्रत्यहं नवं नवं मांसमिच्छन्ति ह्यस्तने न रमन्त एवं स्त्रिय. पुरुषामित्यर्थ ॥ २४ ॥ काष्ठाना काष्ठे ॥ २५ ॥

इदमन्यच्च देवर्षे रहस्यं सर्वयोषिताम् ।
दृष्ट्वैव पुरुषं हृद्यं योनिः प्रक्लिद्यते स्त्रियाः ॥ २६
कामानामपि दातारं कर्तारं मनसां प्रियम् ।
रक्षितारं न मृष्यन्ति स्वभर्तारमलं स्त्रियः २७
न कामभोगान्विपुलान्नालंकारान्न संश्रयान्
तथैव बहु मन्यन्ते यथा रत्यामनुग्रहम् ॥ २८
अन्तकः पवनो मृत्युः पातालं वडवामुखम् ।
क्षुरधारा विषं सर्पो वह्निरित्येकतः स्त्रियः ॥
यतश्च भूतानि महान्ति पञ्च
यतश्च लोका विहिता विधात्रा ।
यतः पुमांसः प्रमदाश्च निर्मिता-
स्तदैव दोषाः प्रमदासु नारद ॥ ३०

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि पञ्चचूडानारदसंवादे अष्टत्रिंशोऽध्यायः ॥ ३८ ॥



३९

युधिष्ठिर उवाच ।
इमे वै मानवा लोके स्त्रीषु सज्जन्त्यभीक्ष्णशः
मोहेन परमाविष्टा देवसृष्टेन पार्थिव ॥ १
स्त्रियश्च पुरुषेष्वेव प्रत्यक्षं लोकसाक्षिकम् ।
अत्र मे संशयस्तीव्रो हृदि संपरिवर्तते ॥ २
कथमासां नराः सङ्गं कुर्वते कुरुनन्दन ।
स्त्रियो वा केषु रज्यन्ते विरज्यन्ते च ताः पुनः
इति ताः पुरुषव्याघ्र कथं शक्यास्तु रक्षितुम्
प्रमदाः पुरुषेणेह तन्मे व्याख्यातुमर्हसि ॥ ४
एता हि रममाणास्तु वञ्चयन्तीह मानवान् ।
न चासां मुच्यते कश्चित्पुरुषो हस्तमागतः ॥ ५
गावो नवतृणानीव गृह्णन्त्येता नव नवम् ।
शंबरस्य च या माया माया या नमुचेरपि ६
बलेः कुम्भीनसेश्चैव सर्वास्ता योषितो विदुः
हसन्तं प्रहसन्त्येता रुदन्तं प्ररुदन्ति च ॥ ७
अप्रिय प्रियवाक्यैश्च गृह्णते कालयोगतः ।
उशना वेद यच्छास्त्रं यच्च वेद बृहस्पतिः ॥ ८
स्त्रीबुद्ध्या न विशिष्येत तास्तु रक्ष्याः कथं नरैः
अनृतं सत्यमित्याहुः सत्यं चापि तथानृतम्
इति यास्ताः कथं वीर संरक्ष्याः पुरुषैरिह ।
स्त्रीणा बुद्ध्यर्थनिष्कर्षादर्थशास्त्राणि शत्रुहन्
बृहस्पतिप्रभृतिभिर्मन्ये सद्भिः कृतानि वै ।
सपूज्यमानाः पुरुषैर्विकुर्वन्ति मनो नृषु ॥ ११
अपास्ताश्च तथा राजन् विकुर्वन्ति मनः स्त्रियः
इमाः प्रजा महाबाहो धार्मिक्य इति नः श्रुतम्
सत्कृतासत्कृताश्चापि विकुर्वन्ति मनः सदा ।
कस्ताः शक्तो रक्षितुं स्यादिति मे संशयो महान्
तथा ब्रूहि महाभाग कुरूणां वंशवर्धन ।
यदि शक्या कुरुश्रेष्ठ रक्षा तासां कदाचन ।
कर्तुं वा कृतपूर्वं वा तन्मे व्याख्यातुमर्हसि १४

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि स्त्रीस्वभावकथने एकोनचत्वारिंशोऽध्यायः ॥ ३९ ॥



अन्तकादिवत्सद्योनाशका इत्यर्थ ॥ २९ ॥ **यत इति ।** वन्हौष्ण्यवत्स्वाभाविका एते स्त्रीणा दोषा इत्यर्थ । यथोक्त नीतौ—

अनृतं साहसं माया मूर्खत्वमतिलोभता ।
अशौचं निर्दयत्वं च स्त्रीणा दोषा स्वभावजा ॥ इति।

कामश्चाष्टगुण स्मृत इति च ॥ ३० ॥

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टत्रिंशोऽध्याय ॥ ३८ ॥

३९

इम इति । एव स्वभावदुष्टा अपि स्त्रिय. परेभ्यो दु संरक्ष्या इत्याख्यायिकातात्पर्यम् ॥ १ ॥ **स्त्रीणामिति।** स्त्रीबुद्धिमनुसृत्यैव बृहस्पत्यादिभिर्वञ्चनाशास्त्रं प्रवर्तितमित्यन्युक्ति ॥ १० ॥ एता पूजिता धिक्कृता वा तुल्यवद्विकारं जनयन्तीत्यर्थ ॥ ११ ॥ एतदेवाह—**इमा इति** । इमा· स्त्रीरूपा धार्मिक्य इति श्रुतिमात्रं सावित्र्यादिषु दृष्टम् ॥ १२ ॥ अनुभवस्तु न तथेत्याह—**सत्कृतेति** ॥१३॥

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकोनचत्वारिंशोऽध्याय ॥ ३९ ॥

४०

भीष्म उवाच ।

एवमेव महाबाहो नात्र मिथ्याऽस्ति किञ्चन
यथा ब्रवीषि कौरव्य नारी प्रति जनाधिप १
अत्र ते वर्तयिष्यामि इतिहासं पुरातनम् ।
यथा रक्षा कृता पूर्वं विपुलेन महात्मना ॥ २
प्रमदाश्च यथा सृष्टा ब्रह्मणा भरतर्षभ ।
यदर्थं तच्च ते तात प्रवक्ष्यामि नराधिप ॥ ३
न हि स्त्रीभ्यः परं पुत्र पापीयः किञ्चिदस्ति वै
अग्निर्हि प्रमदा दीप्तो मायाश्च मयजा विभो४
क्षुरधारा विषं सर्पो वह्निरित्येकतः स्त्रियः ।
प्रजा इमा महाबाहो धार्मिक्य इति नः श्रुतम्
स्वयं गच्छन्ति देवत्वं ततो देवानियाद्भयम् ।
अथाभ्यगच्छन् देवास्ते पितामहमरिन्दम ६
निवेद्य मानस चापि तूष्णीमासन्नधोमुखाः ।
तेषामन्तर्गतं ज्ञात्वा देवानां स पितामहः ७
मानवाना प्रमोहार्थं कृत्या नार्योऽसृजत्प्रभुः
पूर्वसर्गे तु कौन्तेय साध्यो नार्य इहाभवन्

आसाध्यस्तु समुत्पन्नाः
कृत्याः सर्गात्प्रजापतेः ।
ताभ्यः कामान्यथाकामं
प्रादाद्धि स पितामहः ॥ ९

ताः कामलुब्धाः प्रमदाः प्रबाधन्ते नरान्सदा
क्रोधं कामस्य देवेशः सहायं चासृजत्प्रभुः ॥
असज्जन्त प्रजाः सर्वाः कामक्रोधवशं गताः ।
न च स्त्रीणा क्रियाःकाश्चिदिति धर्मो व्यवस्थितः
निरिन्द्रिया ह्यशास्त्राश्च स्त्रियोऽनृतमिति श्रुतिः
शय्यासनमलंकारमन्नपानमनार्यताम् ॥ १२
दुर्वाग्भावं रतिं चैव ददौ स्त्रीभ्यः प्रजापतिः
न तासां रक्षणं शक्यं कर्तुं पुंसा कथंचन १३
अपि विश्वकृता तात कुतस्तु पुरुषैरिह ।
वाचा च वधबंधैर्वा क्लेशैर्वा विविधैस्तथा१४
न शक्या रक्षितुं नार्यस्ता हि नित्यमसंयताः
इदं तु पुरुषव्याघ्र पुरस्ताच्छ्रुतवानहम् ॥१५
यथा रक्षा कृता पूर्वं विपुलेन गुरुस्त्रियाः ।
ऋषिरासीन्महाभागो देवशर्मेति विश्रुतः १६
तस्य भार्या रुचिर्नाम रूपेणाऽसदृशी भुवि ।
तस्या रूपेण सम्मत्ता देवगन्धर्वदानवाः ॥१७
विशेषेण तु राजेन्द्र वृत्रहा पाकशासनः ।
नारीणां चरितज्ञश्च देवशर्मा महामुनिः ॥ १८
यथाशक्ति यथोत्साहं भार्यां तामभ्यरक्षत ।
पुरन्दरं च जानीते परस्त्रीकामचारिणम् ॥१९
तस्माद्बलेन भार्याया रक्षणं स चकार ह ।
स कदाचिदृषिस्नातो यज्ञं कर्तुमनास्तदा २०
भार्यासंरक्षणं कार्यं कथं स्यादित्यचिन्तयत् ।
रक्षाविधानं मनसा स सञ्चिन्त्य महातपाः
आहूय दयितं शिष्यं विपुलं प्राह भार्गवम् ।

देवशर्मोवाच ।

यज्ञकारो गमिष्यामि रुचिं चेमा सुरेश्वरः२२
यतः प्रार्थयते नित्यं तां रक्षस्व यथाबलम् ।
अप्रमत्तेन ते भाव्यं सदा प्रति पुरन्दरम् ॥२३
स हि रूपाणि कुरुते विविधानि भृगूत्तम ।

भीष्म उवाच ।

इत्युक्तो विपुलस्तेन तपस्वी नियतेन्द्रियः
सदैवोग्रतपा राजन्नग्न्यर्कसदृशद्युतिः ।
धर्मज्ञः सत्यवादी च तथेति प्रत्यभाषत ॥ २५
पुनश्चेदं महाराज पप्रच्छ प्रस्थितं गुरुम् ।

विपुल उवाच ।

कानि रूपाणि शक्रस्य भवन्त्यागच्छतो मुने
वपुस्तेजश्च कीदृग्वै तन्मे व्याख्यातुमर्हसि ।

भीष्म उवाच ।

ततः स भगवांस्तस्मै विपुलाय महात्मने॥
आचचक्षे यथातत्त्वं माया शक्रस्य भारत ।

देवशर्मोवाच ।

बहुमायः स विप्रर्षे भगवान्पाकशासनः ॥
तांस्तान्विकुरुते भावान्बहूनथ मुहुर्मुहुः ।
किरीटी वज्रधृग्धन्वी मुकुटी बद्धकुण्डलः२९
भवत्यथ मुहूर्तेन चण्डालसमदर्शनः ।
शिखी जटी चीरवासाः पुनर्भवति पुत्रक ३०
बृहच्छरीरश्च पुनश्चीरवासाः पुनः कृशः ।
गौरं श्यामं च कृष्णं च वर्णं विकुरुते पुनः३१
विरूपो रूपवांश्चैव युवा वृद्धस्तथैव च ।
ब्राह्मणः क्षत्रियश्चैव वैश्यः शूद्रस्तथैव च ३२

४०

एवमेवेत्यध्यायस्य तात्पर्यं नानारूपेभ्यो विटेभ्यो योगबलेनैव स्वभावचपला स्त्रियः संरक्षितुं शक्या नान्यथेति ॥ १ ॥

प्रतिलोमोऽनुलोमश्च भवत्यथ शतक्रतुः ।
शुक्लवायसरूपी च हंसकोकिलरूपवान् ॥३३
सिंहव्याघ्रगजानां च रूपं धारयते पुनः ।
दैवं दैत्यमथो राज्ञां वपुर्धारयतेऽपि च ॥ ३४
अकृशो वायुभक्षाङ्गः शकुनिर्विकृतस्तथा ।
चतुष्पाद्द्विरूपश्च पुनर्भवति बालिशः ॥ ३५
मक्षिकामशकादीनां वपुर्धारयतेऽपि च ।
न शक्यमस्य ग्रहणं वर्तुं विपुल केनचित् ३६
अपि विश्वकृता तात येन सृष्टमिदं जगत् ।
पुनरन्तर्हितः शक्रो दृश्यते ज्ञानचक्षुषा ॥ ३७
वायुभूतश्च स पुनर्देवराजो भवत्युत ।
एवं रूपाणि सततं कुरुते पाकशासनः ॥ ३८
तस्माद्विपुल यत्नेन रक्षेमां तनुमध्यमाम् ।
यथा रुचिं नावलिहेद्देवेन्द्रो भृगुसत्तम ॥ ३९
कृतावुपहिते न्यस्त हविः श्वेव दुरात्मवान् ।
एवमाख्याय स मुनिर्यज्ञकारोऽगमत्तदा ॥४०
देवशर्मा महाभागस्ततो भरतसत्तम ।
विपुलस्तु वचः श्रुत्वा गुरोश्चिन्तामुपेयिवान्
रक्षां च परमां चक्रे देवराजान्महाबलात् ।
किं नु शक्यं मया कर्तुं गुरुदाराभिरक्षणे ४२
मायावी हि सुरेन्द्रोसौ दुर्धर्षश्चापि वीर्यवान्
नापिधायाश्रम शक्यो रक्षितुं पाकशासनः४३
उटजं वा तथा ह्यस्य नानाविधसरूपता ।
वायुरूपेण वा शक्रो गुरुपत्नीं प्रधर्षयेत् ॥ ४४
तस्मादिमां संप्रविश्य रुचिं स्थास्येहमद्य वै ।
अथवा पौरुषेणेयं न शक्या रक्षितुं मया ॥४५
बहुरूपो हि भगवाञ्छ्रूयते पाकशासनः ।
सोहं योगबलादेनां रक्षिष्ये पाकशासनात्४६
गात्राणि गात्रैरस्याहं संप्रवेक्ष्ये हि रक्षितुम् ।
यद्युच्छिष्टामि मां पत्नीमद्य पश्यति मे गुरुः४७
शप्स्यत्यसंशयं कोपाद्दित्यक्षानो महातपाः ।
न चेयं रक्षितुं शक्या यथाऽन्या प्रमदा नृभिः
मायावी हि सुरेंद्रोऽसावहो प्राप्तोस्मि सशयम्
अवश्यं करणीय हि गुरोरिह हि शासनम४९
यदि त्वेतदहं कुर्यामाश्चर्यं स्यात्कृतं मया ।
योगेनाथ प्रवेशो हि गुरुपत्न्याः कलेवरे ।
एवमेव शरीरेऽस्या निवत्स्यामि समाहितः
अशक्तः पद्मपत्रस्थो जलबिन्दुर्यथा चलः ॥ ५१
निर्मुक्तस्य रजोरूपान्नापराधो भवेन्मम ।
यथा हि शून्यां पथिकः सभामध्यावसेत्पथि
तथाद्यावासयिष्यामि गुरुपत्न्याः कलेवरम् ।
एवमेव शरीरेऽस्या निवत्स्यामि समाहितः
इत्येवं धर्ममालोक्य वेदवेदांश्च सर्वशः ।
तपश्च विपुलं दृष्ट्वा गुरोरात्मन एव च ॥ ५४
इति निश्चित्य मनसा रक्षां प्रति स भार्गवः ।
अन्वतिष्ठत्परं यत्नं यथा तच्छृणु पार्थिव ॥५५
गुरुपत्नी समासीनो विपुलः स महातपाः ।
उपासीनामनिन्द्याङ्गीं यथार्थं समलोभयत्५६
नेत्राभ्यां नेत्रयोरस्या रश्मिं संयोज्य रश्मिभिः
विवेश विपुलः कायमाकाशं पवनो यथा ५७
लक्षणं लक्षणेनैव वदनं वदनेन च ।
अविचेष्टन्नतिष्ठद्वै छायेवान्तर्हितो मुनिः ॥ ५८
ततो विष्टभ्य विपुलो गुरुपत्न्याः कलेवरम् ।
उवास रक्षणे युक्तो न च सा तमबुद्ध्यत ५९
यं कालं नागतो राजन गुरुस्तस्य महात्मनः ।
क्रतुं समाप्य स्वगृहं तं कालं सोऽभ्यरक्षत६०

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि विपुलोपाख्याने चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

भीष्म उवाच ।
ततः कदाचिद्देवेन्द्रो दिव्यरूपवपुर्धरः ।
इदमन्तरमित्येवमभ्यगात्तमथाश्रमम् ॥ १
रूपमप्रतिमं कृत्वा लोभनीय जनाधिपः ।
दर्शनीयतमो भूत्वा प्रविवेश तमाश्रमम् ॥ २

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

तत इति ॥ १ ॥

स ददर्श तमासीनं विपुलस्य कलेवरम् ।
निश्चेष्टं स्तब्धनयनं यथा लेख्यगतं तथा ॥ ३
रुचिं च रुचिरापांगीं पीनश्रोणिपयोधराम् ।
पद्मपत्रविशालाक्षीं संपूर्णेन्दुनिभाननाम् ॥ ४
सा तमालोक्य सहसा प्रत्युत्थातुमियेष ह ।
रूपेण विस्मिता कोऽसीत्यथ वक्तुमियेच्छती
उत्थातुकामा तु सती विष्टब्धा विपुलेन सा।
निगृहीता मनुष्येन्द्र न शशाक विचेष्टितुम् ६

तामाबभाषे देवेन्द्रः साम्ना परमवल्गुना ।
त्वदर्थमागत विद्धि देवेन्द्रं मां शुचिस्मिते ७
क्लिश्यमानमनङ्गेन त्वत्संकल्पभवेन ह ।
तत्संप्राप्तं हि मां सभ्रु पुरा कालोऽतिवर्तते ८
तमेवंवादिन शक्रं शुश्राव विपुलो मुनिः ।
गुरुपत्न्याः शरीरस्थो ददर्श त्रिदशाधिपम् ९
न शशाक च सा राजन्प्रत्युत्थातुमनिन्दिता।
वक्तुं च नाशकद्राजन्विष्टब्धा विपुलेन सा ॥
आकारं गुरुपत्न्यास्तु स विज्ञाय भृगूद्वहः ।
निजग्राह महातेजा योगेन बलवत्प्रभो ॥ ११
बबन्ध योगबन्धैश्च तस्याः सर्वेन्द्रियाणि सः
तां निर्विकारां दृष्ट्वा तु पुनरेव शचीपतिः १२
उवाच व्रीडितो राजंस्तां योगबलमोहिताम्।
एह्येहीति ततः सा तु प्रतिवक्तुमियेष तम् १३
स तां वाचं गुरोः पत्न्या विपुलः पर्यवर्तयत
भोः किमागमने कृत्यमिति तस्यास्तु निःसृता
वक्त्राच्छशांकसदृशाद्वाणी संस्कारभूषणा ।
व्रीडिता सा तु तद्वाक्यमुक्त्वा परवशा तदा
पुरन्दरश्च तत्रस्थो बभूव विमना भृशम् ।
स तद्विकृतमालक्ष्य देवराजो विशांपते ॥ १६
अवैक्षत सहस्राक्षस्तदा दिव्येन चक्षुषा ।
स ददर्श मुनिं तस्याः शरीरान्तरगोचरम् ॥
प्रतिबिम्बमिवादर्शे गुरुपत्न्याः शरीरगम् ।
स तं घोरेण तपसा युक्तं दृष्ट्वा पुरन्दरः ॥ १८
प्रावेपत सुसन्त्रस्तः शापभीतस्तदा विभो।
विमुच्य गुरुपत्नीं तु विपुलः सुमहातपाः ।
स्वकलेवरमाविश्य शक्रं भीतमथाब्रवीत् ॥ १९

विपुल उवाच ।

अजितेन्द्रिय दुर्बुद्धे पापात्मक पुरन्दर ।
न चिरं पूजयिष्यन्ति देवास्त्वां मानुषास्तथा
किं नु तद्विस्मृत शक्र न तन्मनसि ते स्थितम्।
गौतमेनासि यन्मुक्तो भगाङ्कपरिचिह्नितः २१
जाने त्वां बालिशमतिमकृतात्मानमस्थिरम् ।
मयेयं रक्ष्यते मूढ गच्छ पाप यथागतम् ॥ २२
नाह त्वामद्य मूढात्मन्दहेयं हि स्वतेजसा ।
कृपायमानस्तु न ते दग्धुमिच्छामि वासव ॥
स च घोरतमो धीमान्गुरुस्त्वं पापचेतसम् ।
दृष्ट्वा त्वां निर्दहेदद्य क्रोधदीप्तेन चक्षुषा ॥ २४
नैवं तु शक्र कर्तव्य पुनर्मान्याश्च ते द्विजाः ।
मा गमः स्वसुतामात्यः क्षयं ब्रह्मबलार्दितः १५
अमरोऽस्मीति यद्वाक्यं समास्थाय प्रवर्तसे ।
मावमंस्था न तपसा न साध्यं नाम किञ्चन ॥

भीष्म उवाच ।

तच्छ्रुत्वा वचनं शक्रो विपुलस्य महात्मनः।
अकिञ्चिदुक्त्वा व्रीडार्तस्तत्रैवान्तरधीयत २७
मुहूर्तयाते तस्मिंस्तु देवशर्मा महातपाः ।
कृत्वा यज्ञं यथाकाममाजगाम स्वमाश्रमम् २८
आगतेऽथ गुरौ राजन्विपुलः प्रियकर्मकृत् ।
रक्षितां गुरवे भार्यां न्यवेदयदनिन्दिताम्॥२९
अभिवाद्य च शान्तात्मा स गुरुं गुरुवत्सलः ।
विपुलः पर्युपातिष्ठद्यथापूर्वमशङ्कितः ॥ ३०
विश्रान्ताय ततस्तस्मै सहासीनाय भार्यया ।
निवेदयामास तदा विपुलः शक्रकर्म तत् ॥३१
तच्छ्रुत्वा स मुनिस्तुष्टो विपुलस्य प्रतापवान्
बभूव शीलवृत्ताभ्यां तपसा नियमेन च ॥ ३२
विपुलस्य गुरौ वृत्तिं भक्तिमात्मनि तत्प्रभुः ।
धर्मे च स्थिरतां दृष्ट्वा साधु साध्वित्यभाषत ॥
प्रतिलभ्य च धर्मात्मा शिष्यं धर्मपरायणम् ।
वरेण छन्दयामास देवशर्मा महामतिः ॥ ३४
स्थितिं च धर्मे जग्राह स तस्माद्गुरुवत्सलः ।
अनुज्ञातश्च गुरुणा चचारानुत्तमं तपः ॥ ३५
तथैव देवशर्मापि सभार्यः स महातपाः ।
निर्भयो बलवृत्रघ्नाच्चचार विजने वने ॥ ३६

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि विपुलोपाख्याने
एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकचत्वारिंशोऽध्याय ॥ ४१ ॥

४२

भीष्म उवाच ।
विपुलस्त्वकरोत्तीव्रं तपः कृत्वा गुरोर्वचः ।
तपोयुक्तमथात्मानममन्यत स वीर्यवान् ॥ १
स तेन कर्मणा स्वर्धन्पृथिवीं पृथिवीपते ।
चचार गतभीः प्रीतो लब्धकीर्तिवरो नृप॥२
उभौ लोकौ जितौ चापि तथैवामन्यत प्रभुः
कर्मणा तेन कौरव्य तपसा विपुलेन च ॥ ३
अथ काले व्यतिक्रान्ते कस्मिंश्चित्कुरुनन्दन ।
रुच्या भगिन्या आदानं प्रभूतधनधान्यवत ४
एतस्मिन्नेव काले तु दिव्या काचिद्वरराङ्गना
बिभ्रती परमं रूपं जगामाथ विहायसा ॥ ५
तस्याः शरीरात्पुष्पाणि पतितानि महीतले ।
तस्याश्रमस्याविदूरे दिव्यगन्धानि भारत ॥ ६
तान्यगृह्णात्ततो राजन रुचिर्ललितलोचना ।
तदा निमन्त्रकस्तस्या अङ्गेभ्यः क्षिप्रमागमत
तस्या हि भगिनी तात ज्येष्ठा नाम्ना प्रभावती
भार्या चित्ररथस्याथ बभूवाङ्गेश्वरस्य वै ॥ ८
पिनह्य तानि पुष्पाणि केशेषु वरवर्णिनी ।
आमन्त्रिता ततोऽगच्छद्रुचिरङ्गपतेर्गृहम् ॥ ९
पुष्पाणि तानि दृष्ट्वा तु तदाङ्गेन्द्र वरांगना ।
भगिनीं चोदयामास पुष्पार्थे चारुलोचना ॥
सा भर्त्रे सर्वमाचष्ट रुचिः सुरुचिराननाः ।
भगिन्या भाषितं सर्वमृषिस्तच्चाभ्यनन्दत ११
ततो विपुलमानाय्य देवशर्मा महातपाः ।
पुष्पार्थे चोदयामास गच्छ गच्छेति भारत ॥
विपुलस्तु गुरोर्वाक्यमविचार्य महातपाः ।
स तथेत्यब्रवीद्राजंस्तं च देशं जगाम ह ॥१३
यस्मिन्देशे तु तान्यासन् पतितानि नभस्तलात्
अम्लानान्यपि तत्रासन् कुसुमान्यपराण्यपि
स ततस्तानि जग्राह दिव्यानि रुचिराणि च
प्राप्तानि स्वेन तपसा दिव्यगन्धानि भारत १५
सप्राप्य तानि प्रीतात्मा गुरोर्वचनकारकः ।
तदा जगाम तूर्णं च चम्पा चंपकमालिनीम्
स वने निर्जने तात ददर्श मिथुनं नृणाम् ।
चक्रवत्परिवर्तन्तं गृहीत्वा पाणिना करम् ॥
तत्रैकस्तूर्णमगमत्तत्पदे च विवर्तयन् ।
एकस्तु न तदा राजंश्चक्रतुः कलहं ततः ॥ १८
त्व शीघ्रं गच्छसीत्येकोऽब्रवीन्नेति तथा परः ।
नेति नेति च तौ राजन् परस्परमथोचतुः १९
तयोर्विस्पर्धतोरेवं शपथोऽयमभूत्तदा ।
सहसोद्दिश्य विपुलं ततो वाक्यमथोचतुः २०
आवयोरनृतं प्राह यस्तस्याभूद्विजस्य वै ।
विपुलस्य परे लोके या गतिः सा भवेदिति
एतच्छ्रुत्वा तु विपुलो विषण्णवदनोऽभवत ।
एवं तीव्रतपाश्चाहं कष्टश्चायं परिश्रमः ॥ २२
मिथुनस्यास्य किं मे स्यात्कृतं पापं यथा गतिः
अनिष्टा सर्वभूतानां कीर्तिताऽनेन मेऽद्य वै ॥
एवं सञ्चिन्तयन्नेव विपुलो राजसत्तम ।
अवाङ्मुखो दीनमना दध्यौ दुष्कृतमात्मनः
ततः षडन्यान्पुरुषानक्षैः काञ्चनराजतैः ।
अपश्यदीव्यमानान्वै लोभहर्षान्वितांस्तथा ॥
कुर्वतः शपथं तेन यः कृतो मिथुनेन तु ।
विपुलं वै समुद्दिश्य तेऽपि वाक्यमथाब्रुवन्

४२

विपुलस्त्वित्यध्यायस्य तात्पर्यं पद्मपत्राम्बुवदसङ्गस्यापि योगिनो मातुरपि स्पर्शमात्रादोषो भवतीति गुरावशुभमपि कर्मानिवेद्य न स्थातव्यमिति च ॥१॥ आदीयतेऽस्मिन्बान्धवैर्दत्तं उपायनादिकं स आदानं विवाहाद्युत्सव प्रभूतं बहुधनादिकं यत्र ॥ ४ ॥ निमन्त्रक आकारणार्थं दूत ॥ ७ ॥ चोदयामास मदर्थमप्येतानि पुष्पाणि आनयेति प्रेरितवती ॥ १० ॥ परिवर्तन्तमिति पुंस्त्वमात्मनेपदाभावश्चार्ष ॥ १७॥ तत्पदे इतरस्य पदे पासुषु व्यक्ते आकर्षणेन विवर्तयन् विषमता नयन् ॥ १८ ॥ **नेति नेति** अन्योन्यवचन दूषयन्ताविति्यर्थ । **अयं भाव** –मिथुनस्थेऽर्के शीघ्रं गच्छन्तीं रात्रिमहर्देवता शीघ्र गच्छसीति लोकरूढ्या पर्यनुयुङ्क्ते । रात्रिस्तु स्वमानेनैवाहं गच्छामि न शीघ्रमिति परिहरति एवमुभावपि सत्यवादिनौ नानृतं शपथ चक्रतुरिति ॥ १९ ॥ अयं मिथुनस्य परिश्रम कष्ट इत्यन्वय गतिरनिष्टेति सार्ध ॥ २२ ॥ षड्कृतवो दीव्यमानान् अन्योन्यं जेतुमिच्छन्त वसन्तादयो हि वृषादीन्समराशीनाभिसन्धायायं मदीयोऽय मदीय इति विवदन्ते तेऽपि मतभेदान्नानृतवादिन । मीनादिर्वसन्त इति पक्षे हि वृषो ग्रीष्मान्तर्गत मेषादिपक्षे वसन्तान्तर्गत इति ॥ २५ ॥

लोभमास्थाय योऽस्माकं विषमं कर्तुमुत्सहेत्।
विपुलस्य परे लोके या गतिस्तामवाप्नुयात् ॥
एतच्छ्रुत्वा तु विपुलो नापश्यद्धर्मसङ्करम्।
जन्मप्रभृति कौरव्य कृतपूर्वमथात्मनः ॥ २८
संप्रदध्यौ तथा राजन्नग्नावग्निरिवाहितः।
दह्यमानेन मनसा शापं श्रुत्वा तथाविधम् २९
तस्य चिन्तयतस्तात बह्व्यो दिननिशा ययुः
इदमासीन्मनसि च रुच्या रक्षणकारितम् ॥
लक्षणं लक्षणेनैव वदनं वदनेन च।
विधाय न मया चोक्तं सत्यमेद्गुरोस्तथा ३१
एतदात्मनि कौरव्य दुष्कृतं विपुलस्तदा।
अमन्यत महाभाग तथा तच्च न संशयः ॥ ३२
स चंपां नगरीमेत्य पुष्पाणि गुरवे ददौ।
पूजयामास च गुरुं विधिवत्स गुरुप्रियः ३३

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि विपुलोपाख्याने द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

४३

भीष्म उवाच।
तमागतमभिप्रेक्ष्य शिष्यं वाक्यमथाब्रवीत्।
देवशर्मा महातेजा यत्तच्छृणु जनाधिप ॥ १
देवशर्मोवाच।
किं ते विपुल दृष्टं वै तस्मिन्शिष्य महावने
ते त्वां जानन्ति विपुल आत्मा च रुचिरेव च
विपुल उवाच।
ब्रह्मर्षे मिथुनं किं तत्के च ते पुरुषा विभो।
ये मां जानन्ति तत्त्वेन यन्मां त्वं परिपृच्छसि
देवशर्मोवाच।
यद्वै तन्मिथुन ब्रह्मन्नहोरात्रं हि विद्धि तत्।
चक्रवत्परिवर्तेत तत्ते जानाति दुष्कृतम् ॥ ४
ये च ते पुरुषा विप्र अक्षैर्दीव्यन्ति हृष्टवत्।
ऋतूंस्तानभिजानीहि ते ते जानन्ति दुष्कृतम्
न मां कश्चिद्विजानीत इति कृत्वा न विश्वसेत्
नरो रहसि पापात्मा पापकं कर्म वै द्विज ६
कुर्वाण हि नरं कर्म पापं रहसि सर्वदा।
पश्यन्ति ऋतवश्चापि तथा दिननिशेप्युत ७
तथैव हि भवेयुस्ते लोकाः पापकृतो यथा।
कृत्वा नाचक्षतः कर्म मम तच्च यथाकृतम् ॥ ८
ते त्वां हर्षस्मितं दृष्ट्वा गुरोः कर्मानिवेदकम्
स्मारयन्तस्तथा प्राहुस्ते यथा श्रुतवान् भवान्
अहोरात्रं विजानाति ऋतवश्चापि नित्यशः।
पुरुषे पापकं कर्म शुभं वा शुभकर्मिणः ॥ १०
तत्त्वया मम यत्कर्म व्यभिचाराद्धयात्मकम्।
नाख्यातमिति जानन्तस्ते त्वामाहुस्तथा द्विज
तेनैव हि भवेयुस्ते लोकाः पापकृतो यथा।
कृत्वा नाचक्षतः कर्म मम यच्च त्वया कृतम् ॥
त्वयाशक्या च दुर्वृत्या रक्षितुं प्रमदा द्विज
न च त्वं कृतवान्किञ्चिदतः प्रीतोऽस्मि तेन ते
यदि त्वहं त्वां दुर्वृत्तमद्राक्षं द्विजसत्तम।
शपेयं त्वामहं क्रोधान्न मेऽत्रास्ति विचारणा
सज्जन्ति पुरुषे नार्यः पुंसां सोऽर्थश्च पुष्कलः।
अन्यथा रक्षतः शापोऽभविष्यत्ते मतिश्च मे ॥
रक्षिता च त्वया पुत्र मम चापि निवेदिता।
अहं ते प्रीतिमांस्तात स्वस्थः स्वर्गं गमिष्यसि
इत्युक्त्वा विपुलं प्रीतो देवशर्मा महानृषिः
मुमोद स्वर्गमास्थाय सहभार्यः सशिष्यकः १७
इदमाख्यातवांश्चापि ममाख्यान महामुनिः।
मार्कण्डेयः पुरा राजन् गङ्गाकूले कथान्तरे ॥

रुच्या गुरुभार्यायाः ॥ ३० ॥ लक्षणं स्त्रीपुंसयोरसाधारणं चिह्नं विधाय एकीकृत्य। पिधायेति पाठेऽपि स एवार्थः ॥ ३१ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥

४३

तमागतमित्यध्यायेन पूर्वोक्तार्थविवरणपूर्वकमाख्यायिकार्थमुपसंहरति ॥ १ ॥ ते त्वया ॥ २ ॥ त्वया यथा गुरुपत्नीरक्षणं कृतं तथा न कल्पितमिति पापकृतो यथा लोकास्तथा तव भविष्यन्तीत्याह—**तथैवेति** ॥ ७ ॥ हर्षस्मितं हर्षेण गर्वितम् ॥ ९ ॥ उपसंहारमुखेनाह—**तेनेति**। तेनैव अनाख्यानेनैव ॥ १२ ॥ अशक्येति च्छेदः ॥ १३ ॥

तस्माद्ब्रवीमि पार्थ त्वां स्त्रियो रक्ष्याः सदैव च
उभयं दृश्यते तासु सततं साध्वसाधु च १९
स्त्रियः साध्यो महाभागाः संमता लोकमातरः
धारयन्ति महीं राजन्निमां सवनकाननाम् २०
असाध्यश्चापि दुर्वृत्ताः कुलघ्नाः पापनिश्चयाः
विज्ञेया लक्षणैर्दुष्टैः स्वगात्रसहजैर्नृप ॥ २१
एवमेतासु रक्षा वै शक्या कर्तुं महात्मभिः ।
अन्यथा राजशार्दूल न शक्या रक्षितुं स्त्रियः॥
एता हि मनुजव्याघ्र तीक्ष्णास्तीक्ष्णपराक्रमाः
नासामस्ति प्रियो नाम मैथुने सङ्गमेति यः ॥
एताः कृत्याश्च कार्याश्च कृताश्च भरतर्षभ।
न चैकस्मिन् रमन्त्येताः पुरुषे पाण्डुनन्दन२४
नासां स्नेहो नरैः कार्यस्तथैवेर्ष्या जनेश्वर ।
खेदमास्थाय भुञ्जीत धर्ममास्थाय चैव ह २५
निहन्यादन्यथाकुर्वन्नरः कौरवनन्दन ।
सर्वथा राजशार्दूल मुक्तिः सर्वत्र पूज्यते २६
तेनैकेन तु रक्षा वै विपुलेन कृता स्त्रियाः ।
नान्यः शक्तस्त्रिलोकेऽस्मिन् रक्षितुं नृप योषितं

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि विपुलोपाख्याने त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

युधिष्ठिर उवाच ।

यन्मूलं सर्वधर्माणां स्वजनस्य गृहस्य च ।
पितृदेवातिथीनां च तन्मे ब्रूहि पितामह ॥ १
अयं हि सर्वधर्माणां धर्मश्चिन्त्यतमो मतः ।
कीदृशस्य प्रदेया स्यात्कन्येति वसुधाधिप २

भीष्म उवाच ।

शीलवृत्ते समाज्ञाय विद्यां योनिं च कर्म च।
सद्भिरेवं प्रदातव्या कन्या गुणयुते वरे ॥ ३
ब्राह्मणाना सतामेष ब्राह्मो धर्मो युधिष्ठिर ।
आवाह्यमावहेदेवं यो दद्यादनुकूलतः ॥ ४
शिष्टाना क्षत्रियाणां च धर्म एष सनातनः ।
आत्माभिप्रेतमुत्सृज्य कन्याभिप्रेत एव यः ॥
अभिप्रेता च या यस्य तस्मै देया युधिष्ठिर ।
गान्धर्वमिति तं धर्मं प्राहुर्वेदविदो जनाः ॥ ६
धनेन बहुधा क्रीत्वा संप्रलोभ्य च बान्धवान्
असुराणां नृपैतं वै धर्ममाहुर्मनीषिणः ॥ ७
हत्वा छित्त्वा च शीर्षाणि रुदतां रुदतीं गृहात्
प्रसह्य हरण तात राक्षसो विधिरुच्यते ॥ ८
पञ्चानां तु त्रयो धर्म्या द्वावधर्म्यौ युधिष्ठिर ।
पैशाचश्चासुरश्चैव न कर्तव्यौ कथञ्चन ॥ ९

सहजै पाणिपादरेखादिभि ॥ २१ ॥ य सङ्गमेति स एव प्रियो नाम नास्तीति योजना ॥ २३ ॥ कृत्या प्राणग्राहिदेवतारूपा कार्या कृताश्च पूर्वमेकेन कृता स्वीकृता अपि पश्चादन्येनापि कर्तुं योग्या व्यभिचारिण्य प्राणग्राहिण्यश्चेत्यर्थ ॥ २४ ॥ खेदमास्थाय अप्रीत्या विष्टिगृहीतवत् भुञ्जीत न तु प्रीत्या धर्म ऋतुकालानुरोधम् ॥ २५ ॥ निहन्यात् वध प्रापयात् मुक्ति अनासक्ति युक्तिरिति पाठे समाधि. २६ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्रिचत्वारिंशोऽध्याय ॥ ४३ ॥

४४

यन्मूलमिति ॥ १ ॥ योनिं मातृत· पितृतश्च शुद्धिम् ॥ ३ ॥ अत्र ब्राह्म इत्यनेनार्षदैवयोरपि ग्रहणं ब्राह्मणयोर्ग्या एते विवाहा। यदाहाश्वलायन —'अलंकृत्य कन्या मुदकपूर्वा दद्यादेष **ब्राह्मो** विवाह । ऋत्विजे वितते कर्मणि दद्यादलंकृत्य **स दैवः**। गोमिथुन दत्वोपयच्छेत स **आर्षः**' इति। एव उक्तगुणवन्तं आवाह्य विवाहयोग्यं आवहेत् आकारयेत् । ततश्च अनुकूलतो धनदानादिना अभिमुखीकृताय दद्यात्। अयं चतुर्थ **प्राजापत्यो** ब्राह्मणाना क्षत्रियाणा च प्रशस्ततरो द्वितीयत्वेनात्र गण्यते ॥४॥ वरवध्वोरन्योन्यप्रीत्या यो विवाह स **गान्धर्वस्तृतीय** । आ-मेत्यादि सार्धश्लोक ॥ ५ ॥ आसुरं चतुर्थमाह-**धनेनेति** ॥७॥ हत्वेति **राक्षसः** पञ्चम । अत्रैव प्रमत्ताना बन्धूना कन्याहरणात् **पैशाचो** हरणसामान्यादन्तर्भवति ॥ ८ ॥ त्रय ब्राह्मक्षात्रगान्धर्वा । द्वौ आसुरराक्षसौ । तत्रापि आसुर स्वरूपेण राक्षसान्तर्गत पैशाचश्चात्यन्तं न कर्तव्यौ । अर्थाद्राक्षस. कर्तव्यः क्षत्रियाणामित्यर्थ. ॥९॥

ब्राह्मः क्षात्रोऽथ गान्धर्व एते धर्म्या नरर्षभ।
पृथग्वा यदि वा मिश्राः कर्तव्या नात्र संशयः
तिस्रो भार्या ब्राह्मणस्य द्वे भार्ये क्षत्रियस्य तु
वैश्यः स्वजात्यां विन्देत तासपत्यं समं भवेत्
ब्राह्मणी तु भवेज्ज्येष्ठा क्षत्रिया क्षत्रियस्य तु।
रत्यर्थमपि शूद्रा स्यान्नेत्याहुरपरे जनाः ॥१२
अपत्यजन्म शूद्रायां न प्रशंसन्ति साधवः।
शूद्रायां जनयन्विप्रः प्रायश्चित्ती विधीयते १३
त्रिंशद्वर्षो दशवर्षां भार्यां विन्देत नग्निकाम्।
एकविंशतिवर्षो वा सप्तवर्षामवाप्नुयात् ॥ १४
यस्यास्तु न भवेद्भ्राता पिता वा भरतर्षभ।
नोपयच्छेत तां जातु पुत्रिकाधर्मिणी हि सा
त्रीणि वर्षाण्युदीक्षेत कन्या ऋतुमती सती।
चतुर्थे त्वथ संप्राप्ते स्वयं भर्तारमर्जयेत् ॥ १६
प्रजा न हीयते तस्या रतिश्च भरतर्षभ।
अतोऽन्यथा वर्तमाना भवेद्भ्राच्या प्रजापतेः १७
असपिण्डा च या मातुरसगोत्रा च या पितुः
इत्येतामनुगच्छेत तं धर्मं मनुरब्रवीत् ॥ १८

युधिष्ठिर उवाच।

शुल्कमन्येन दत्तं स्यादन्येनेत्याह चापरः।
बलादन्यः प्रभाषेत धनमन्यः प्रदर्शयेत् ॥ १९
पाणिग्रहीता चान्यः स्यात्कस्य भार्या पितामह
तत्त्वं जिज्ञासमानानां चक्षुर्भवतु नो भवान्

भीष्म उवाच।

यत्किञ्चित्कर्म मानुष्यं संस्थानाय प्रदृश्यते।
मन्त्रवन्मन्त्रितं तस्य मृषावादस्तु पातकः २१
भार्यापत्यर्त्विगाचार्याः शिष्योपाध्याय एव च
मृषोक्ते दण्डमर्हन्ति नेत्याहुरपरे जनाः ॥ २२

दमयन्ती स्वयंवरे ब्राह्मक्षात्रयोर्मिश्रत्व रुक्मिणी-विवाहो राक्षसगान्धर्वमिश्र । सुभद्रायास्तु क्षात्रराक्षसमिश्र इत्याद्यूह्यम् ॥ १० ॥ **तिस्र इति** । सर्वेषा शूद्रा वर्ज्या इतरयोरुत्कृष्टवर्णा च वर्ज्येति ज्ञेयम् ॥ ११ ॥ वैश्यस्य त्वेकैव भार्यति सैव ज्येष्ठा उक्ताभ्योऽधिका शूद्रापि चतुर्णामपि स्यात् सा च रत्यर्थमेव नतु धर्मप्रजार्थम। अपरे याज्ञवल्क्यादयो नेत्याहु । यथा—

यदुच्यते द्विजातीना शूद्रादारोपसङ्ग्रह ।
नैतन्मम मतं यस्मात्तत्रात्मा जायते स्वयम् ॥ इति तदुक्तं ॥१२॥ स्वमतं तिस्र इत्यत्र सूचित स्फुटीकरोति— **अपत्येति** ॥१३॥ नग्निका एकवासस अजातस्त्रीव्यञ्जनामिति यावत्। नग्न स्यादेकवासा इति स्मृतिः। यस्या दशनेऽपि वर्षे कुचोद्भेदस्त प्रतिषेधार्थमेतद्विशेषणम् ॥१४॥ पुत्रिकाधर्मिणी हि सा इत्यत्र पुत्रिकाधर्मशङ्केयेति मनु पपाठ यस्या पिता इयमेव दुहिता मम पुत्र स्यानें इत्यभिप्रायवान्नवेति न ज्ञायते ता नोपयच्छेदिति तद्व्याख्यातार ॥ १५ ॥ वाच्या निन्द्या भवेत् ॥ १७ ॥ **असपिण्डेति** । अत्र चकारद्वयादुभयमुभयत्रानुषज्य व्याचक्षते । या मातुरसपिण्डा असगोत्रा चेति केचित्। अन्ये तु

एकत्वं सा गता भर्तु पिण्डे गोत्रे च सूतके

इति वचनान्मातुर्गोत्रान्तराभावाद्या मातुरसपिंडा इत्येव ग्राह्यं न त्वन्याप्यसगोत्रेति विशेषणं योज्यमिति। अन्ये तु यस्या माता स्वपित्रा पुत्रत्वेन कल्पिता तस्या मातुरसगोत्रत्वविवक्षया एतद्व्याख्यानमिति । तत्र सापिण्डयनिवृत्तिसङ्ग्रहश्लोक —

वर्त्मा वरस्य वा तातः कूटस्थाद्यदि सप्तम ।
पंचमी चेतयोर्माता तत्सापिण्ड्य निवर्तते इति ।
असगोत्रामित्यत्र असमानार्षगोत्रामिति द्रष्टव्यम् । असमानार्षगोत्रजामिति स्मृते । आर्षविषये प्रतिप्रसवश्च स्मर्यते—

पञ्चाना त्रिषु सामान्यादविवाहस्त्रिषु द्वयो ।
मृग्यद्विरोगणेष्वेवं शेषेष्वेकोऽपि वारयेदिति ।

अनुगच्छेत विवाहमनु मैथुनाय एतामेव गच्छेत्। एतेनास्य श्लोकस्य मनुपठितमुतरार्धं—

सा प्रशस्ता द्विजातीना दारकर्मणि मैथुने ।

इति तद्व्याख्यातम्। अत्र मातृपितृपक्षबन्धान्तरवर्णेव दारकर्मणि यज्ञादा मैथने च प्रशस्ता । एव सति पुनर्मैथुनग्रहणं स्मृत्यन्तरे दृष्टार्थत्वान्मैथुने स्मृत सर्वासा साधारण्य निवर्तितुम्। मैथुनेऽपि यज्ञादाविव सर्वत्रैव मुख्या नतु तस्या इतरसाधारण्यमिति । एतदेवाभिसन्धायात्रोक्तम् **इत्येतामनुगच्छेतेति**। ये तु मैथुनस्य पृथग्ग्रहणाद्दारकर्मपदेन तद्व्यतिरिक्ते यज्ञादावेव सवर्णाया प्राधान्यं मैथुने त्वितरसाधारण्यमिति व्याचक्षते तदनेन विरुध्यते। हीनवर्णाया जातस्यात्मनोऽपि हीनत्वापत्तेश्च । तत्रात्मा जायते स्वयमिति वचनात् ॥ १८ ॥ शुल्कमिति पञ्चाना पक्षाणामुपन्यास ॥१९॥ तत्र तृतीयचतुर्थौ दातुर्न दोषावहावित्युपेक्ष्य द्वितीये भार्यात्वानुत्पत्तिर्वक्तुर्दोषमात्रं चाह—**यत्किञ्चिदिति** मानुष्यं मानुषाणा हितं सावन्धिकं संस्थानाय इयमस्य भार्येत्यादि व्यवस्थार्थम्। मन्त्रवन्मन्त्रितं चारवाद्धि सर्वैरेकीभूय मन्त्रितं इयमस्मै देयेति विचारित तस्य मृषाकरणं पातक पातयितुं भवतीत्यर्थ ॥२१॥ मृषोक्ते तत्राहं भार्येत्युक्त्वा परावृत्तौ दण्डं प्रायश्चित्तम् ॥ २२ ॥

न ह्यकामेन संवासं मनुरेवं प्रशंसति ।
अयशस्यमधर्म्यं च यन्मृषा धर्मकोपनम् ॥२३
नैकान्तो दोष एकस्मिंस्तदा केनोपपद्यते ।
धर्मतो यां प्रयच्छन्ति यां च क्रीणन्ति भारत
बन्धुभिः समनुज्ञाते मन्त्रहोमौ प्रयोजयेत् ।
तथा सिद्ध्यन्ति ते मन्त्रा नादत्तायाः कथञ्चन
यस्तत्र मन्त्रसमयो भार्यापत्योर्मिथः कृतः ।
तमेषाहुर्गरीयांसं यश्चासौ ज्ञातिभिः कृतः २६
देवदत्तां पतिर्भार्यां वेत्ति धर्मस्य शासनात् ।
स दैवीं मानुषीं वाचमनृतां पर्युदस्यति ॥ २७

युधिष्ठिर उवाच ।

कन्यायां प्राप्तशुल्कायां ज्यायांश्चेदाव्रजेद्वरः
धर्मकामार्थसंपन्नो वाच्यमत्रानृतं न वा ॥ २८

तस्मिन्नुभयतोदोषे कुर्वञ्छ्रेयः समाचरेत् ।
अयं नः सर्वधर्माणां धर्मश्चिन्त्यतमो मतः२९
तत्त्वं जिज्ञासमानानां चक्षुर्भवतु नो भवान् ।
तदेतत्सर्वमाचक्ष्व न हि तृप्यामि कथ्यताम्॥

भीष्म उवाच ।

नैव निष्ठाकरं शुल्कं ज्ञात्वाऽऽसीत्तेन नाहृतम
न हि शुल्कपराः सन्तः कन्यां ददति कर्हिचित

अन्यैर्गुणैरुपेतं तु शुल्कं याचन्ति बान्धवाः ।
अलंकृत्वा वहस्वेति यो दद्यादनुकूलतः ॥ ३२
यच्च तां च ददत्येवं न शुल्कं विक्रयो न सः
प्रतिगृह्य भवेद्देयमेष धर्मः सनातनः ॥ ३३
दास्यामि भवते कन्यामिति पूर्वं न भाषितम्
ये चाहुर्ये च नाहुर्ये ये चावश्य वदन्त्युत ३४
तस्मादा ग्रहणात्पाणेर्याचयन्ति परस्परम् ।
कन्यावरः पुरा दत्तो मरुद्भिरिति नः श्रुतम३५
नानिष्टाय प्रदातव्या कन्या इत्यृषिचोदितम्
तन्मूलं काममूलस्य प्रजनस्येति मे मतिः ३६
समीक्ष्य च बहून्दोषान्संवासाद्विधि पाणयोः
यथा निष्ठाकरं शुल्कं न जात्वासीत्तथा शृणु
अहं विचित्रवीर्यस्य
द्वे कन्ये समुदावहम् ।
जित्वा च मागधान्सर्वान्
काशीनथ च कोसलान् ॥ ३८
गृहीतपाणिरेकाऽऽसीत्प्राप्तशुल्का पराऽभवत्
कन्या गृहीता तत्रैव विसर्ज्या इति मे पिता
अब्रवीदितरां कन्यामावहेति स कौरवः ।
अप्यन्यानुपप्रच्छ शंकमानः पितुर्वचः ॥ ४०

तत्र नेति पक्षं निन्दंस्त्यागमङ्गीकरोति-**न ह्रीति**२३ **नेति** । प्रथमचरमपक्षयोर्यथेष्टं एकेनेतरबाधेऽपि न दोषोस्तीत्यर्थ । धर्मतः पाणिग्रहणविधित प्रयच्छन्ति बान्धवा इति शेष । तस्या हरणे नात्यन्तं दोष । नापि गृहीतशुल्काया इत्यर्थ ॥२४॥तत्राद्यमुपपादयति—**बन्धुभिरिति** । क्रीतायास्तु हरणे दोषाभावमग्रे वक्ष्यति ॥२५॥ उभयसन्निपाते सिद्धान्तमाह—**यस्त्विति** । यद्यपि ज्ञातिभि कृत समयो गुरुस्तथापि मन्त्रपूर्वक. समयो गुरुतर इत्यर्थ ॥ २६ ॥ अत्रागमं मानमाह—**देवेति** । देव. प्राक्कर्म ईश्वरो वा वेत्ति लभते ॥ २७ ॥ उभयतोदोषे शिष्टातिक्रमात् बन्धुसम्मतिपूर्वकविक्रयातिक्रमाच्च दोषे सति कुर्वन् कर्ता श्रेय प्रशस्ततरं किं समाचरेदित्यध्याहृत्य योज्यम् । चिन्त्यतम सान्दिग्धत्वेन विचार्यतम ॥२९॥आचक्ष्व यतो नहि तृप्यामि तस्मात्कथ्यतामित्यादरसूचनार्था पुनरुक्ति ॥३०॥ **नैवेति** । तेन केत्रा शुल्कं मौल्यं निष्ठाकरं स्त्रीत्वनिश्चयकरमिति ज्ञात्वा नाहृतं किन्तु क्रयार्थं न क्रयमात्रेण भार्यात्वं सिध्यतीत्यर्थ । नापि शुल्कपरा. ददति दानं कुर्वन्ति अपि तु विक्रीणन्ति तस्माद्यादृच्छिकेऽस्मिन् क्रयविक्रयव्यवहारे कन्यापहारजो दोषो नास्तीत्यर्थ ॥ ३१ ॥ गुणैर्वयोधिकत्वादिभि कन्यार्थालङ्कारग्रहणे न दोषोऽस्तीत्याह सार्धेन **अलंकृत्वेति** ॥३२॥ नभाषितमित्येकं पदम् । ये पूर्वं दास्यामीत्याहुर्ये च न दास्यामीत्याहुर्ये च अवश्यं दास्यामीति वदन्ति तत्सर्वं नभाषितं अनुक्तवदेवेत्यर्थ ॥ ३४ ॥ यस्मादेवं तस्मात् आ पाणिग्रहणात्कन्या याचेतेति मरुता वरस्तेन तत. पूर्वं विशिष्टवरार्थमपहारेऽपि न दोष इति भाव । यथोक्तं—

दत्तामपि हरेत्कन्या श्रेयाश्चेद्वर आव्रजेदिति ॥ ३५ ॥

तत्कन्या कामो मूलं यस्य तस्मादुत्तमदौहित्रार्थिना श्रेयसे एव कन्या प्रदेयेति भाव ॥ ३६ ॥ संवासात् चिरपरिचयात् पाणयो क्रयविक्रययोः ॥ ३७ ॥ वीर्यमपि शुल्क भवतीत्यभिप्रायेणाह-**अहमिति** । अम्बिकाम्बालिकयोरेकत्वविवक्षया द्वे इत्युक्तम् ॥ ३८ ॥ प्राप्तशुल्का वीर्येण निर्जिताऽपि कन्या अगृहीता अप्राप्तपाणिग्रहा इयं अंबा विसर्ज्या उत्सृष्टुं योग्या इति पिता पितृव्यो बाल्हीकोऽब्रवीदित्युत्तरेणान्वय. ॥ ३९ ॥ अनुपप्रच्छ अनुपृष्टवानहं शङ्कमान इति वैचित्र्यात्पारोक्ष्यमभिसधायोत्तमपुरुषप्रयोग· । बहु जगद किलाहं तस्य मत्ता पुरस्तादितिवत् ४०

अतीव ह्यस्य धर्मेच्छा पितुर्मेऽभ्यधिकाभवत
ततोऽहमब्रुवं राजन्नाचारेष्वृषिरिदं वचः ।
आचारं तत्त्वतो वेत्तुमिच्छामि च पुनः पुनः
ततो मयैवमुक्ते तु वाक्ये धर्मभृतां वरः ।
पिता मम महाराज बाह्लीको वाक्यमब्रवीत
यदि वः शुल्कतो निष्ठा न पाणिग्रहणात्तथा
लाजान्तरमुपासीत प्राप्तशुल्क इति स्मृतिः ॥
न हि धर्मविदः प्राहुः प्रमाणं वाक्यतः स्मृतम्
येषां वै शुल्कतो निष्ठा न पाणिग्रहणात्तथा
प्रसिद्धं भाषितं दाने नैषां प्रत्ययकं पुनः ।
ये मन्यन्ते क्रयं शुल्कं न ते धर्मविदो नराः ४५
न चैतेभ्यः प्रदातव्या न वोढव्या तथाविधा
न ह्येव भार्या क्रेतव्या न विक्रेया कथञ्चन
ये च क्रीणन्ति दासीं च विक्रीणन्ति तथैव च
भवेत्तेषां तथा निष्ठा लुब्धानां पापचेतसाम्
अस्मिन्नर्थे सत्यवन्त पर्यपृच्छन्त वै जनाः ।
कन्यायाः प्राप्तशुल्कायाः शुल्कदः प्रशमं गतः
पाणिग्रहीता वाऽन्यः स्यादत्र नो धर्मसंशयः ।
तन्नश्छिन्धि महाप्राज्ञ त्वं हि वै प्राज्ञसंमतः
तत्त्वं जिज्ञासमानानां चक्षुर्भवतु नो भवान् ।
तानेवं ब्रुवतः सर्वान्सत्यवान्वाक्यमब्रवीत ५०
यत्रेष्टं तत्र देया स्यान्नात्र कार्या विचारणा ।
कुर्वते जीवतोऽप्येवं मृते नैवास्ति संशयः ५१
देवर प्रविशेत्कन्या तप्येद्वाऽपि तपः पुनः ।
तमेवानुगता भूत्वा पाणिग्राहस्य काम्यया ॥
लिखन्त्येव तु केषांचिदपरेषां शनैरपि ।
इति ये संवदन्त्यत्र त एतं निश्चयं विदुः ५३
तत्पाणिग्रहणात्पूर्वमन्तरं यत्र वर्तते ।
सर्वमङ्गलमन्त्रं वै मृषा वादस्तु पातकः ॥ ५४
पाणिग्रहणमन्त्राणां निष्ठा स्यात्सप्तमे पदे ।
पाणिग्रहस्य भार्या स्याद्यस्य चाद्भिः प्रदीयते
इति देयं वदन्त्यत्र त एनं निश्चयं विदुः ।
अनुकूलामनुवंशां भ्रात्रा दत्तामुपाग्निकाम् ।
परिक्रम्य यथान्यायं भार्यां विन्देद्द्विजोत्तमः

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि विवाहधर्मकथने चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥



यदीति। प्राप्तं शुल्कं येन। पाठान्तरे यस्या सा कन्याप्तिा कन्या वा लाजान्तरं वरान्तरमुपासीत इति या स्मृतिस्तर्हि बाध्येतेत्याशङ्क्याह योजना लाजा विद्यन्ते हौम्यद्रव्यमस्य स इति लाजशब्दोऽश आद्यच्प्रत्ययान्त ॥४३॥ येषा शुल्कतो निष्ठा तेषा वाक्यत वाक्य प्रमाणं स्मृतमिति धर्मविदो न हि आहुरित्यन्वय ॥ ४४ ॥ एवं बाधकसद्भावं साधकाभावं चोक्त्वा लोके विरोधमप्याहार्यत्वेन-**प्रसिद्धमिति**। कन्याया दानं इत्येवोच्यते न तु क्रयो जयो वेति। एषा शुल्कवादिना प्रत्यायकं भार्यात्वज्ञापकं किमपि नास्ति। परिणयनादेव भार्या भवति न शुल्कमात्रादिति लोकव्यवहारस्य स्पष्टत्वादित्यर्थ। एतदेवोपपादयति—**य इति**। क्रयमिति जयस्याप्युपलक्षणम् ॥ ४५ ॥ जीवत इत्यनादरे षष्ठी। जीवन्तमपि शुल्कदं अनादृत्य शिष्टा एवं यथेष्टदानं कुर्वत इत्यर्थ ॥ ५१ ॥ देवरमिति युगान्तरधर्म। कलौ देवरात्सुतोत्पत्तेर्निषेधात् ॥ ५२ ॥ **लिखन्तीति**। केषाचिन्मते देवरादय अलिखिता भ्रातृभार्यां लिखन्त्येव सुरतेन योजयन्त्येव। अपरेषा मते शनैर्मन्थरा इयं प्रवृत्तिरिच्छैव नतु वैधीत्यर्थ ॥ ५३ ॥ अस्मिन्पक्षद्वये नियममाह—**तदिति**। सर्वाणि मङ्गलानि हरिद्रालानादीनि मंत्राश्च प्राक् पाणिग्रहणीया यत्र निष्पन्नास्तादृशमप्यन्तरं कालव्यवधान यत्र वर्तते तत्रैव पूर्वोक्तौ नियमविकल्पौ प्रवर्तेते न तु पाणिग्रहणादूर्ध्वम्। तत्र सङ्कल्पपूर्वकं दत्ताया अपि कन्याया योऽपहारस्तज्जन्यो मृषावाद पातको भवति दातुर्न तु तावन्मात्रेण तस्या भार्यात्वमुत्पन्नमित्यर्थ ॥५४॥ कदा तर्हि तदुत्पद्यतेऽत आह—**पाणीति**। यत्र तु दानादूर्ध्वं सप्तमपदात्प्राक् भर्तुर्मरणं सगोत्रत्वादिज्ञानं वा जातं तत्रान्यस्मै दाने मृषावाददोषोऽपि नास्तीत्यर्थ ॥५५॥ देयं दान एनं वक्ष्यमाणं तमेवाह-**अनुकूलामिति**। अनुवंशा स्ववंशानुरूपाम्। अयं भाव—यथाऽधानपावमानेष्टिभ्यां समुच्चिताभ्यामग्नय उत्पद्यन्ते न त्वेकैकेन। एवं दानपाणिग्रहाभ्या भार्यात्वमुत्पद्यते तत्राद्याभावे चौर्येणाहृताया न धर्मपत्नीत्वम्। परस्याभावे तु तस्या दासीत्वान्न कर्मसम्बन्ध इति ॥ ५६ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चतुश्चत्वारिंशोऽध्याय ॥ ४४ ॥

४५

युधिष्ठिर उवाच ।
कन्यायाः प्राप्तशुल्कायाः पतिश्चेन्नास्ति कश्चन
तत्र का प्रतिपत्तिः स्यात्तन्मे ब्रूहि पितामह १

भीष्म उवाच ।
याऽपुत्रकस्य ऋद्धस्य प्रतिपाल्या तदा भवेत्
अथ चेन्नाहरेच्छुल्कं क्रीता शुल्कप्रदस्य सा २
तस्यार्थेऽपत्यमीहेत येन न्यायेन शक्नुयात् ।
न तस्मान्मन्त्रवत्कार्यं कश्चित्कुर्वीत किञ्चन ३
स्वयंवृतेन साऽऽज्ञप्ता पित्रा वै प्रत्यपद्यत ।
तत्तस्यान्ये प्रशंसन्ति धर्मज्ञा नेतरे जनाः ॥ ४
एतत्तु नापरे चक्रुरपरे जातु साधवः ।
साधूनां पुनराचारो गरीयान्धर्मलक्षणः ॥ ५
अस्मिन्नेव प्रकरणे सुकृतुर्वाक्यमब्रवीत् ।
नप्ता विदेहराजस्य जनकस्य महात्मनः ॥ ६
असदाचरिते मार्गे कथं स्यादनुकीर्तनम् ।
अत्र प्रश्नः संशयो वा सतामेवमुपालभेत् ॥ ७
असदेव हि धर्मस्य प्रदानं धर्म आसुरः ।
नानुशुश्रुम जात्वेतामिमां पूर्वेषु कर्मसु ॥ ८
भार्यापत्योर्हि सम्बन्धः स्त्रीपुंसोः स्वल्प एव तु
रतिः साधारणो धर्म इति चाह स पार्थिवः

युधिष्ठिर उवाच ।
अथ केन प्रमाणेन पुसामादीयते धनम् ।
पुत्रवद्धि पितुस्तस्य कन्या भवितुमर्हति ॥ १०

भीष्म उवाच ।
यथैवात्मा तथा पुत्रः पुत्रेण दुहिता समा ।
तस्यामात्मनि तिष्ठन्त्या कथमन्यो धनं हरेत्
मातुश्च यौतकं यत्स्यात्कुमारीभाग एव सः
दौहित्र एव तद्रिक्थमपुत्रस्य पितुर्हरेत् ॥ १२
ददाति हि सपिण्डान्वै पितुर्मातामहस्य च
पुत्रदौहित्रयोरेव विशेषो नास्ति धर्मतः ॥ १३
अन्यत्र जामया सार्धं प्रजानां पुत्र ईहते ।
दुहिताऽन्यत्र जातेन पुत्रेणापि विशिष्यते १४
दौहित्रकेण धर्मेण नात्र पश्यामि कारणम् ।
विक्रीतासु हि ये पुत्रा भवन्ति पितुरेव ते १५

४५

कन्याया इति । शुल्कदश्चेत्प्रेषितस्तद्भ्रयादन्यश्च न वृणुते तदा तत्पित्रा किं कर्तव्यमिति प्रश्नार्थः ॥ १ ॥ या कन्या पित्रा प्रतिपाद्या पिता च यदि तत् शुल्कं परपक्षीयेभ्य परावृत्य न दद्यात्तर्हि सा कन्या शुल्कप्रदस्यैव ज्ञेया । न तु पितुस्तस्या अन्यस्मै दातुमधिकारोऽस्तीत्यर्थः ॥ २ ॥ तस्य शुल्कदस्यार्थे न्यायेन उत्तमात् रेतस क्रमेण पुत्र ईहेत, स चास्या पुत्रस्य शुल्कदस्य चोपकाराय भवति । न तु तस्मात् शुल्कदादन्य कश्चिन्मन्त्रवत्कार्यं विधितस्तस्या पाणिग्रहणं कुर्वीत ॥३॥ एवं प्राप्तशुल्कायाः कर्तव्यमुक्त्वा अप्राप्तशुल्कायास्तादृश्या का गतिरित्यत आह—**स्वयमिति** । पित्रा आज्ञप्ता सती स्वयं वृतेनैव भर्त्रा योगं प्रत्यपद्यत तच्च इतरे धर्मज्ञा न प्रशंसन्ति ॥ ४ ॥ तत्र हेतु—**एतत्तु नापरे जातु चक्रुरिति** । अपरे पुन शिष्टाचारत्वादिदमपि गरीय इत्याहु ॥ ५ ॥ नेतर इत्यस्मिन्पक्षे शिष्टाचारं प्रमाणयति—**अस्मिन्निति** ॥ ६ ॥ न सद्भिराचरिते मार्गे सति पितरि यत्कन्या वरमन्वेषयति इद वचनं न स्त्री स्वातन्त्र्यमर्हतीति शास्त्रविरुद्धम् । कथमत्र शास्त्रार्थो वक्तव्य प्रश्नः सशयो वा असन्दिग्धत्वादस्यार्थस्य नायं संशय उत्तिष्ठतीत्यर्थ । उपालभेत् उपालम्भं कर्यं कुर्यादित्यर्थ ॥ ७ ॥ धर्मस्य क्षीणमस्वातन्त्र्यलक्षणस्य धर्मस्य प्रदानं खण्डनं यत स आसुरो धर्मः । एतादृशं पूर्वेषु वृद्धेषु कर्मसु विवाहेषु ॥८॥ स्वल्पोऽदृश्यसन्तानरूप सूक्ष्म शास्त्रिकगम्य स च सर्वाङ्गोपसहारमन्तरेण न निवर्तते । अतस्त विना केवलरत्यर्थं यथा कथंचिद्दारान्नोद्वहेदित्यर्थ ॥ ९ ॥ पुंसा पुरुषे तस्य अपुत्रस्य ॥ १० ॥ अन्यो भ्रात्रादि एतच्चासत्या मातरि ज्ञेयम् ॥ ११ ॥ **मातुरिति** । सति असति वा पुत्रे मातुर्यौतकं पृथक्कृतं धन तत्पित्रादिनिर्दत्तं विवाहकाले वा तस्यै यच्छ्वश्रूश्वशुरादिभिर्दत्त भर्त्रा वा तवेदमिति पृथग्दत्तं कर्तनाद्यर्जित वा तत्सर्वं कुमारीभाग एव न पुत्राणामित्यर्थ । तद्रिक्थं धनं मातु पितु मातामहस्य ॥ १२ ॥ अत्र हेतुमाह—**ददातीति** । य पिण्डद स रिक्थहरेत्यर्थ । पिण्डार्थे इति पाठे पिण्ड अर्थतेऽस्मिंस्तत्र श्राद्धे ॥ १३ ॥ **अन्यत्रेति** । पुत्रवतो धने विभजनीये जामया कन्ययाऽपि तामपेक्ष्येत्यर्थ । तत्र कन्या पूर्वं पुत्रीकृता तत पुत्रोऽपि जातस्तत्र पञ्चधा विभक्तस्य धनस्य द्वौ कन्याऽर्हति त्रीन्पुत्रस्ततश्च कन्यामपेक्ष्य पुत्र सार्धं अशं ईहते । अन्यत्र जातेन औरसादन्येन दत्तक्रीतादिना स्वयं संस्कृतेन पुत्रेण तमपेक्ष्य औरसी कन्या विशिष्यते अत्रापि पञ्चानामंशाना त्रीन् कन्या हरेत् द्वौ पुत्रा इत्यर्थ ॥ १४ ॥ अत्र वक्ष्यमाणस्थले कारणं निमित्तं तदेव स्थलमाह—**विक्रीतासु हीति** । अयमर्थ —विक्रीताया कन्याया. पुत्रोऽनौरसेऽपि पुत्रे सति न दायभाग्भवतीति ॥१५॥

असूयवस्त्वधर्मिष्ठाः परस्वादायिनः शठाः ।
आसुरादधिसम्भूता धर्माद्विषमवृत्तयः ॥ १६
अत्र गाथा यमोद्गीताः कीर्तयन्ति पुराविदः ।
धर्मज्ञा धर्मशास्त्रेषु निबद्धा धर्मसेतुषु ॥ १७
यो मनुष्यः स्वकं पुत्रं विक्रीय धनमिच्छति ।
कन्यां वा जीवितार्थाय यः शुल्केन प्रयच्छति
सप्तावरे महाघोरे निरये कालसाह्वये ।
स्वेदं मूत्रं पुरीषं च तस्मिन्मूढः समश्नुते ॥ १९
आर्षे गोमिथुनं शुल्कं केचिदाहुर्मृषैव तत् ।
अल्पो वा बहु वा राजन् विक्रयस्तावदेव सः
यद्यप्याचरितः कैश्चिन्नैष धर्मः सनातनः ।
अन्येषामपि दृश्यन्ते लोकतः संप्रवृत्तयः ॥२१
वश्यां कुमारीं बलतो ये तां समुपभुञ्जते ।
एते पापस्य कर्तारस्तमस्यन्धे च शेरते ॥२२
अन्योऽप्यथ न विक्रेयो मनुष्यः किं पुनः प्रजाः
अधर्ममूलैर्हि धनैस्तैर्न धर्मोऽथ कश्चन ॥ २३

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि विवाहधर्मे यमगाथा नाम पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

भीष्म उवाच ।
प्राचेतसस्य वचनं कीर्तयन्ति पुराविदः ।
यस्याः किञ्चिन्नाददते ज्ञातयो न स विक्रयः
अर्हणं तत्कुमारीणामानृशंस्यतमं च तत् ।
सर्वं च प्रतिदेयं स्यात्कन्यायै तदशेषतः ॥२
पितृभिर्भ्रातृभिश्चापि श्वशुरैरथ देवरैः ।
पूज्या भूषयितव्याश्च बहुकल्याणमीप्सुभिः ३
यदि वै स्त्री न रोचेत पुमांसं न प्रमोदयेत् ।
अप्रमोदात्पुनः पुंसः प्रजनो न प्रवर्धते ॥ ४
पूज्या लालयितव्याश्च स्त्रियो नित्यं जनाधिप
स्त्रियो यत्र च पूज्यन्ते रमन्ते तत्र देवताः ॥५
अपूजिताश्च यत्रैताः सर्वास्तत्राफलाः क्रियाः ।
तदा चैतत्कुलं नास्ति यदा शोचन्ति जामयः
जामीशप्तानि गेहानि निकृत्तानीव कृत्यया ।
नैव भान्ति न वर्धन्ते श्रिया हीनानि पार्थिव
स्त्रियः पुंसां परिददे मनुर्जिगमिषुर्दिवम् ।
अबलाः स्वल्पकौपीनाः सुहृदः सत्यजिष्णवः
ईर्षवो मानकामाश्च चण्डाश्च सुहृदोऽबुधाः ।
स्त्रियस्तु मानमर्हन्ति ता मानयत मानवाः॥ ९
स्त्रीप्रत्ययो हि वै धर्मो रतिभोगाश्च केवलाः
परिचर्या नमस्कारास्तदायत्ता भवन्तु वः १०
उत्पादनमपत्यस्य जातस्य परिपालनम् ।
प्रीत्यर्थं लोकयात्रायाः पश्यत स्त्रीनिबन्धनम्
संमान्यमानाश्चैता हि सर्वकार्याण्यवाप्स्यथ ।
विदेहराजदुहिता चात्र श्लोकमगायत ॥ १२
नास्ति यज्ञक्रिया काचिन्न श्राद्धं नोपवासकम्
धर्मः स्वभर्तृशुश्रूषा तया स्वर्गं जयन्त्युत ॥ १३
पिता रक्षति कौमारे भर्ता रक्षति यौवने ।
पुत्राश्च स्थाविरे भावे न स्त्री स्वातन्त्र्यमर्हति
श्रिय एताः स्त्रियो नाम
सत्कार्या भूतिमिच्छता ।
पालिता गृहीता च
श्रीः स्त्री भवति भारत ॥ १५

आसुराद्विवाहात्कन्याक्रयपूर्वात् ॥ १६ ॥ अत्र आसुरविवाहनिन्दायाम् ॥१७॥ कालसाह्वये कालसूत्राख्ये ॥१९॥ अन्येषां बलात्कन्याहरणशीलानां राक्षसानाम् ॥ २१ ॥ एतानपि निन्दति—**वश्यामिति** । बलतो वश्यां न तु स्वच्छन्दत इत्यर्थः ॥ २२ ॥ अन्योऽपि पशुरपि ॥ २३ ॥
इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चचत्वारिंशोऽध्याय ॥ ४५ ॥

४६

प्राचेतसस्य दक्षस्य । ज्ञातय कन्यापक्षीया. स्वयं नाददतेऽथ च कन्यालङ्कारार्थमिच्छन्ति स विक्रयो न भवतीत्यर्थः ॥ १ ॥ न रोचेत न कामयेत न प्रमोदयेत्कामुकं न कुर्यात् प्रजन संतति ॥ ४ ॥ स्वल्प ईषदायासेन अपनेय. कौपीनो गुह्याच्छादनपटो यासा सद्योहार्या इत्यर्थः । सुहृद. सौहार्दयुक्ता न बुध्यन्त इत्यबुधा ॥८॥ स्त्रीप्रत्ययः स्त्रीहेतुक. ॥ १० ॥ अत्र स्त्रीधर्मविषये ॥ १२ ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि विवाहधर्मे स्त्रीप्रशंसा नाम षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

४७

युधिष्ठिर उवाच ।
सर्वशास्त्रविधानज्ञ राजधर्मविदुत्तम ।
अतीव संशयच्छेत्ता भवान्वै प्रथितः क्षितौ १
कश्चित्तु संशयो मेऽस्ति तन्मे ब्रूहि पितामह ।
जातेऽस्मिन्संशये राजन्नान्यं पृच्छेम कञ्चन २
यथा नरेण कर्तव्यं धर्ममार्गानुवर्तिना ।
एतत्सर्वं महाबाहो भवान्व्याख्यातुमर्हति ॥ ३
चतस्रो विहिता भार्या ब्राह्मणस्य पितामह ।
ब्राह्मणी क्षत्रिया वैश्या शूद्रा च रतिमिच्छतः
तत्र जातेषु पुत्रेषु सर्वासां कुरुसत्तम ।
आनुपूर्व्येण कस्तेषां पित्र्यं दायादमर्हति ॥५
केन वा किं ततो हार्यं पितृवित्तात्पितामह ।
एतद्विच्छामि कथितं विभागस्तेषु यः स्मृतः
भीष्म उवाच ।
ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णा द्विजातयः
एतेषु विहितो धर्मो ब्राह्मणस्य युधिष्ठिर ॥ ७
वैषम्यादथवा लोभात्कामाद्वापि परंतप ।
ब्राह्मणस्य भवेच्छूद्रा न तु दृष्टान्ततः स्मृता ८
शूद्रां शयनमारोप्य ब्राह्मणो यात्यधोगतिम् ।
प्रायश्चित्तीयते चापि विधिदृष्टेन कर्मणा ॥ ९
तत्र जातेष्वपत्येषु द्विगुणं स्याद्युधिष्ठिर ।
आपद्यमानमृक्थं तु संप्रवक्ष्यामि भारत ॥ १०
लक्षण्यं गोवृषो यानं यत्प्रधानतमं भवेत् ।
ब्राह्मण्यास्तद्धरेत्पुत्र एकांशं वै पितुर्धनात् ११
शेषं तु दशधा कार्यं ब्राह्मणस्य युधिष्ठिर ।
तत्र तेनैव हर्तव्याश्चत्वारोंऽशाः पितुर्धनात्१२
क्षत्रियायास्तु यः पुत्रो ब्राह्मणः सोऽप्यसंशयः
स तु मातुर्विशेषेण त्रीनंशान्हर्तुमर्हति ॥ १३
वर्णे तृतीये जातस्तु वैश्यायां ब्राह्मणादपि ।
द्विरंशस्तेन हर्तव्यो ब्राह्मणस्याद्युधिष्ठिर १४
शूद्रायां ब्राह्मणाज्जातो नित्यादेयधनः स्मृतः
अल्पं चापि प्रदातव्यं शूद्रापुत्राय भारत १५
दशधा प्रविभक्तस्य धनस्यैष भवेत्क्रमः ।
सवर्णासु तु जातानां समान् भागान्प्रकल्पयेत्
अब्राह्मणं तु मन्यन्ते शूद्रापुत्रमनैपुणात् ।
त्रिषु वर्णेषु जातो हि ब्राह्मणाद्ब्राह्मणो भवेत् ॥
स्मृताश्च वर्णाश्चत्वारः पञ्चमो नाधिगम्यते ।
हरेच्च दशमं भागं शूद्रापुत्रः पितुर्धनात् ॥ १८
तत्तु दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति ।
अवश्यं हि धनं देयं शूद्रापुत्राय भारत ॥ १९
आनृशंस्यं परो धर्म इति तस्मै प्रदीयते ।
यत्र तत्र समुत्पन्नं गुणायैवोपपद्यते ॥ २०
यद्यप्येष सपुत्रः स्यादपुत्रो यदि वा भवेत् ।
नाधिकं दशमाद्द्याच्छूद्रापुत्राय भारत ॥ २१

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥

४७

सर्वेति ॥ १ ॥ एवमृत्विगात्मस्त्रीशुद्धिमुक्त्वा धनशुद्ध्यर्थं दायविभागं प्रस्तौति ॥ ३ ॥ रतिमिच्छत एव विहिता न तु धर्मम् । शूद्रा शयनमारोप्य ब्राह्मणो यात्यधोगतिं । अपत्यं जनयित्वाऽस्या ब्राह्मण्यादेव हीयत इति निन्दास्मरणात् ॥ ४ ॥ किं कियत्प्रमाणम् ॥ ७ ॥ दृष्टान्त शास्त्रतः ॥ ८ ॥ अविहितमप्यनिषिद्धं चेत्तत्राह—**शूद्रामिति** । कूष्माण्डैर्जुहुयाद्योऽपूत इव मन्येत यथा स्तेनो यथा भ्रूणहैवमेष भवति योऽयोनौ रेतः सिञ्चतीति क्षत्रियायां वैश्यायां चोत्पन्नस्य साक्षाद्वा कतिपयपुरुषव्यवधानाद्वा ब्राह्मण्यलाभो दृश्यते इति तयोरस्ति योनित्वं शूद्रायास्तथात्वादयोनित्वं ततस्तस्या रेतःसेके प्रायश्चित्ती भवत्येव कूष्माण्डै यद्देवा देवहेडनमिति यजुर्वेदप्रसिद्धैर्मन्त्रविशेषै । अनेनैव विधिना वेदेन दृष्टेन कर्मणा प्रायश्चित्तमात्मन इच्छति प्रायश्चित्तीयते अन्यथाऽधोगतिं यातीत्यर्थ ॥ ९ ॥ द्विगुणं प्रायश्चित्तम् ॥ १० ॥ एकांशं मुख्यांशम् ॥ ११ ॥ तेनैव ब्राह्मणीपुत्रेणैव ॥ १२ ॥ नित्यं सर्वथा अदेयं धनमस्य स नित्यादेयधन । अथापि अल्पं एकोंऽश ॥ १५ ॥ अब्राह्मणं त्विति दीर्घतमस· पुत्रेषु शूद्रायां जातेषु काक्षीवदादिषु ब्राह्मण्यादर्शनादिति भाव । एवं च तस्य अमन्त्रका संस्कारा अपि भवन्ति त्रिषु क्षत्रियादिषु एतच्च दायार्थं अवध्यत्वार्थं चोक्तम् । विप्रात् वैश्यायां शूद्रायां च जातस्य मातृजातीयत्वस्य वक्ष्यमाणत्वात् ॥ १७ ॥ समुत्पन्नं आनृशंस्यम् ॥ २० ॥ **यद्यपीति** । एतेन बन्धुषु अपुत्रात्सपुत्रोऽधिकं भागमर्हतीति ज्ञायते ॥ २१ ॥

त्रैवार्षिकाद्यदा भक्तादधिकं स्याद्द्विजस्य तु ।
यजेत तेन द्रव्येण न वृथा साधयेद्धनम् ॥ २२
त्रिसहस्रपरो दायः स्त्रियै देयो धनस्य वै ।
भर्त्रा तच्च धनं दत्तं यथार्हं भोक्तुमर्हति ॥ २३
स्त्रीणां तु पतिदायाद्यमुपभोगफलं स्मृतम् ।
नापहारं स्त्रियः कुर्युः पतिवित्तात्कथञ्चन २४
स्त्रियास्तु यद्भवेद्वित्तं पित्रा दत्तं युधिष्ठिर ।
ब्राह्मण्यास्तद्धरेत्कन्या यथा पुत्रस्तथा हि सा
सा हि पुत्रसमा राजन्विहिता कुरुनन्दन ।
एवमेव समुद्दिष्टो धर्मो वै भरतर्षभ ।
एवं धर्ममनुस्मृत्य न वृथा साधयेद्धनम् ॥ २६

युधिष्ठिर उवाच ।

शूद्रायां ब्राह्मणाज्जातो यद्यदेयधनः स्मृतः
केन प्रतिविशेषेण दशमोऽप्यस्य दीयते ॥ २७

ब्राह्मण्यां ब्राह्मणाज्जातो ब्राह्मणः स्यान्न संशयः
क्षत्रियायां तथैव स्याद्वैश्यायामपि चैव हि ॥
कस्मात्तु विषमं भागं भजेरन्नृपसत्तम ।
यदा सर्वे त्रयो वर्णास्त्वयोक्ता ब्राह्मणा इति॥

भीष्म उवाच ।

दारा इत्युच्यते लोके नाम्नैकेन परन्तप ।
प्रोक्तेन चैव नाम्नाऽयं विशेषः सुमहान्भवेत
तिस्रः कृत्वा पुरो भार्याः
पश्चाद्विन्देत ब्राह्मणीम् ।
सा ज्येष्ठा सा च पूज्या स्या-
त्सा च भार्या गरीयसी ॥ ३१
स्नानं प्रसाधनं भर्तुर्दन्तधावनमञ्जनम् ।
हव्यं कव्यं च यच्चान्यद्धर्मयुक्तं गृहे भवेत ३२
न तस्यां जातु तिष्ठन्त्यामन्या तत्कर्तुमर्हति ।
ब्राह्मणी त्वेव कुर्याद्वा ब्राह्मणस्य युधिष्ठिर३३
अन्नं पानं च माल्यं च वासांस्याभरणानि च
ब्राह्मण्यैतानि देयानि भर्तुः सा हि गरीयसी३४
मनुनाभिहितं शास्त्रं यच्चापि कुरुनन्दन ।
तत्राप्येष महाराज दृष्टो धर्मः सनातनः ॥ ३५
अथ चेदन्यथा कुर्याद्यदि कामाद्युधिष्ठिर ।
यथा ब्राह्मणचाण्डालः पूर्वदृष्टस्तथैव सः ॥३६
ब्राह्मण्याः सदृशः पुत्रः क्षत्रियायाश्च यो भवेत्
राजन्विशेषो यस्त्वत्र वर्णयोरुभयोरपि ॥३७
न तु जात्या समालोके ब्राह्मण्याःक्षत्रियाभवेत्
ब्राह्मण्याः प्रथमः पुत्रो भूयान्स्याद्राजसत्तम
भूयो भूयोपि संहार्यः पितृवित्ताद्युधिष्ठिर ।
यथा न सदृशी जातु ब्राह्मण्याः क्षत्रिया भवेत्
क्षत्रियायास्तथा वैश्या न जातु सदृशी भवेत्
श्रीश्च राज्यं च कोशश्च क्षत्रियाणां युधिष्ठिर
विहितं दृश्यते राजन्सागरान्तां च मेदिनीम् ।
क्षत्रियो हि स्वधर्मेण श्रियं प्राप्नोति भूयसीम्
राजा दण्डधरो राजन् रक्षा नान्यत्र क्षत्रियात्
ब्राह्मणा हि महाभागा देवानामपि देवताः ।
तेषु राजन्प्रवर्तेत पूजया विधिपूर्वकम् ॥ ४२
प्रणीतमृषिभिश्चार्त्वा धर्मं शाश्वतमव्ययम् ।
लुप्यमानं स्वधर्मेण क्षत्रियो ह्येष रक्षति ॥४३
दस्युभिर्ह्रियमाणं च धनं दारांश्च सर्वशः ।
सर्वेषामेव वर्णानां त्राता भवति पार्थिवः ४४
भूयान्स्यात्क्षत्रियापुत्रो वैश्यापुत्रान्न संशयः ।
भूयस्तेनापि हर्तव्यं पितृवित्ताद्युधिष्ठिर ॥ ४५

वृथा यज्ञादिप्रयोजनं विना न साधयेत् प्रतिग्रहादिना वाऽऽदाय हरणेन वा न लिप्सेत् ॥ २२ ॥ **त्रीति** । सहस्रत्रयाद्बहुवित्तवताऽपि स्त्रियोऽधिको दायो न देय इत्यर्थ । तदपि तथा दत्तं चेत् भर्त्रा भोक्तुं शक्नोति न त्वदत्तम् ॥२३॥ कुर्युः पुत्रा इति शेष । पतिवित्तात्पत्या दत्ताद्वित्तात् ॥२४॥ धर्मो विभागप्रकार वृथा अन्यायेन साधितैर्द्रव्यै कृतमपि यागादि निष्फलं भवतीति भाव ॥ २६ ॥ **शूद्रायामिति** । तस्य प्रागुक्तनित्यादेयधनत्वं तच्चानन्तरोक्तदशमांशदानविधिना विरुद्धमित्यर्थ ॥ २७ ॥ यदा तिसृणामपि पुत्रा ब्राह्मणा एव तदा किमर्थमेषा भागवैषम्यमिति द्वितीय आक्षेप ॥ २८ ॥ आदीयन्ते त्रिवर्गार्थिभिरिति दारपदप्रवृत्तिनिमित्तं आदर. स च भोगार्थाया शूद्रायामप्यस्ति अतस्तत्पुत्रोऽपि दायमर्हति । यतश्च भर्तुरादरस्ताभिर्वर्णक्रमेण यथायोग्य तारतम्यक्रमेण क्रियत इति तत्पुत्राणा भागवैषम्यं चास्तीत्यभिप्रायवानाह—**प्रोक्तेन चैवेति** । नामनिर्वचनमपेक्ष्यैवार्यं विशेषोऽस्तीत्यर्थ ॥ ३० ॥ विशेषमेवाह—**तिस्र इति** । पश्चात्परिणीतापि वयसा कनिष्ठाऽपि पितृगौरवाद्ब्राह्मणीमेव सर्वेषु लौकिकवैदिकेषु कार्येष्वाद्रियेतेत्यर्थः ॥ ३१ ॥ ब्राह्मणचाण्डाल· ब्राह्मणक्षेत्रे शूद्राजात पूर्वोक्तो मातङ्गस्तद्वत्स तेन कर्मणा ज्ञेय इत्यर्थ ।

कर्मणा ज्ञायते जातिर्भोगेन ज्ञायते कृतम् ।

इति न्यायात् ॥ ३६ ॥ भूयो भूयोपि अधिकमधिकं संहार्य. संविभजनीय· ॥ ३९ ॥

युधिष्ठिर उवाच ।
उक्तं ते विधिवद्राजन्ब्राह्मणस्य पितामह ।
इतरेषां तु वर्णानां कथं वै नियमो भवेत् ४६
भीष्म उवाच ।
क्षत्रियस्यापि भार्ये द्वे विहिते कुरुनन्दन ।
तृतीया च भवेच्छूद्रा न तु दृष्टान्ततः स्मृता ॥
एष एव क्रमो हि स्यात्क्षत्रियाणां युधिष्ठिर ।
अष्टधा तु भवेत्कार्यं क्षत्रियस्वं जनाधिप ४८
क्षत्रियाया हरेत्पुत्रश्चतुरोंशान्पितुर्धनात् ।
युद्धावहारिकं यच्च पितुः स्यात्स हरेत्तु तत् ॥
वैश्यापुत्रस्तु भागांस्त्रीन् शूद्रापुत्रस्तथाऽष्टमम्
सोपि दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति ॥ ५०
एकैव हि भवेद्भार्या वैश्यस्य कुरुनन्दन ।
द्वितीया तु भवेच्छूद्रा न तु दृष्टान्ततः स्मृता ॥
वैश्यस्य वर्तमानस्य वैश्यायां भरतर्षभ ।
शूद्रायां चापि कौन्तेय तयोर्विनियमः स्मृतः
पञ्चधा तु भवेत्कार्यं वैश्यस्वं भरतर्षभ ।
तयोरपत्ये वक्ष्यामि विभागं च जनाधिप ५३
वैश्यापुत्रेण हर्तव्याश्चत्वारोंशाः पितुर्धनात् ।
पञ्चमस्तु स्मृतो भागः शूद्रापुत्राय भारत ॥५४
सोपि दत्तं हरेत्पित्रा नादत्तं हर्तुमर्हति ।
त्रिभिर्वर्णैः सदा जातः शूद्रोऽदेयधनो भवेत् ॥
शूद्रस्य स्यात्सवर्णैव भार्या नान्या कथञ्चन ।
समभागाश्च पुत्राः स्युर्यदि पुत्रशतं भवेत् ५६
जातानां समवर्णायाः पुत्राणामविशेषतः ।
सर्वेषामेव वर्णानां समभागो धनात्स्मृतः५७
ज्येष्ठस्य भागो ज्येष्ठः स्यादेकांशो यः प्रधानतः
एष दायविधिः पार्थ पूर्वमुक्तः स्वयम्भुवा ५८
समवर्णासु जातानां विशेषोस्त्यपरो नृप ।
विवाहवैशिष्ट्यकृतः पूर्वपूर्वो विशिष्यते ५९
हरेज्ज्येष्ठः प्रधानांशमेकं तुल्यासु तेष्वपि ।
मध्यमो मध्यमं चैव कनीयांस्तु कनीयसम् ॥
एवं जातिषु सर्वासु सवर्णः श्रेष्ठतां गतः ।
महर्षिरपि चैतद्वै मारीचः काश्यपोऽब्रवीत्६१

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि विवाहधर्मे रिक्थविभागो नाम सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

४८

युधिष्ठिर उवाच ।
अर्थालोभाद्वा कामाद्वा
वर्णानां चाप्यनिश्चयात् ।
अज्ञानाद्वापि वर्णानां
जायते वर्णसंकरः ॥ १
तेषामेतेन विधिना जातानां वर्णसंकरे ।
को धर्मः कानि कर्माणि तन्मे ब्रूहि पितामह २
भीष्म उवाच ।
चातुर्वर्ण्यस्य कर्माणि चातुर्वर्ण्यं च केवलम्
असृजत्स हि यज्ञार्थं पूर्वमेव प्रजापतिः ॥ ३

उक्तं दायविभागादि नियमो दायविभागे । अत्रापि क्षत्रियस्य षोढा वैश्यस्य त्रेधा च धनं विभज्यैकैकाशहीना इतरभागा उत विशेषोऽस्तीति प्रष्टुरभिप्रायः ॥ ४६ ॥ क्षत्रियाणा क्षत्रियस्त्रीणा एष एव क्रमो भर्तृ स्नानादिप्रदाने तस्या सवर्णाया सत्यां हीनवर्णा तन्न कुर्यादित्यर्थः ॥४८॥ युद्धेऽवहियते तद्रथगजायुधकवचादिकं युद्धावहारिकम् ॥४९॥ शूद्रस्य अदेयधनत्वे हेतुस्त्रिभिर्वर्णैर्जात इति ॥५५॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तचत्वारिंशोऽध्याय ॥ ४७ ॥

४८

एवमनुलोमजातिजाना पुत्राणा तारतम्यमुक्त्वा विलोमजातिजानामपि तदाहाध्यायेन—अर्थादिति । लोभात्कामाद्वा उत्तमवर्णा स्त्री हीनवर्णानुगा भवतीति प्रसिद्धम् । तेन गूढोत्पत्तिसम्भवात् वर्णाना निश्चयो न जायते । ननु कर्मणा ज्ञायते जातिरित्यभियुक्तैरुच्यते एव न निषेककाले दुर्मुहूर्तदुष्टवस्तुस्मरणादिनाऽपि निमित्तेन असदुत्पत्तिसम्भवात् । प्रच्छन्नविलोमजेष्वपि क्वचित्सदाचारदर्शनेन वर्णानामज्ञानाच्चावश्यं वर्णसंकरो भवत्येवेत्यर्थ ॥ १ ॥ एतेन उक्तेन विधिना प्रकारेण ॥ २ ॥ तत्र प्रथमं चत्वार एव वर्णा यज्ञार्थं सृष्टास्तत्र शूद्राणा सेवाद्वारा यज्ञार्थत्वं न तु साक्षात् । तस्माच्छूद्रो यज्ञेऽनवक्लृप्त इति श्रुतेः ॥ ३ ॥

भार्याश्चतस्रो विप्रस्य द्वयोरात्मा प्रजायते ।
आनुपूर्व्याद्वयोर्हीनौ मातृजात्यौ प्रसूयतः ॥४
परंशवाद्ब्राह्मणस्यैव पुत्रः
शूद्रापुत्रं *पारशवं तमाहुः ।
शुश्रूषकः स्वस्य कुलस्य स स्या-
त्स्वचारित्रं नित्यमथो न जह्यात् ॥ ५
सर्वानुपायानथ सप्रधार्य
समुद्धरेत स्वस्य कुलस्य तन्त्रम् ।
ज्येष्ठो यवीयानपि यो द्विजस्य
शुश्रूषया दानपरायणः स्यात् ॥ ६
तिस्रः क्षत्रियसम्बन्धाद्द्वयोरात्माऽस्य जायते
हीनवर्णास्तृतीयायां शूद्रा उग्रा× इति स्मृतिः
द्वे चापि भार्ये वैश्यस्य द्वयोरात्माऽस्य जायते
शूद्रा शूद्रस्य चाप्येका शूद्रमेव प्रजायते ॥ ८
=अतोऽपि शिष्टस्त्वधमो गुरुदारप्रधर्षकः ।
बाह्यं वर्णं जनयति चातुर्वर्ण्यविगर्हितम् ॥ ९
विप्रायां क्षत्रियो बाह्यं सूतं स्तोमक्रियापरम् ।
वैश्यो वैदेहकं चापि मौद्गल्यमपवार्जितम् १०
शूद्रश्चाण्डालमत्युग्रं वध्यघ्नं बाह्यवासिनम् ।
ब्राह्मण्यां संप्रजायन्त इत्येते कुलपांसनाः ।
एते मतिमतां श्रेष्ठ वर्णसंकरजाः प्रभो ॥ ११
बन्दी तु जायते वैश्यान्मागधो वाक्यजीवनः
शूद्रान्निषादो मत्स्यघ्नः क्षत्रियायां व्यतिक्रमात्
शूद्रादायोगवश्चापि वैश्यायां ग्राम्यधर्मिणः ।
ब्राह्मणैरप्रतिग्राह्यस्तक्षा स्वधनजीवनः ॥ १३
एतेऽपि सदृशान् वर्णान् जनयन्ति स्वयोनिषु
मातृजात्याः प्रसूयन्ते ह्यवरा हीनयोनिषु १४
यथा चतुर्षु वर्णेषु द्वयोरात्मास्य जायते ।
आनन्तर्यात्प्रजायन्ते तथा बाह्याः प्रधानतः
ते चापि सदृशं वर्णं जनयन्ति स्वयोनिषु ।
परस्परस्य दारेषु जनयन्ति विगर्हितान् ॥१६
यथा शूद्रोऽपि ब्राह्मण्यां जन्तु बाह्यं प्रसूयते ।
एवं बाह्यतराद्बाह्यश्चातुर्वर्ण्यात्प्रजायते ॥ १७

आत्मा ब्राह्मण एव क्षत्रियायामपि जायत इत्यर्थ । स च किञ्चिन्नीच । यदाह मनु —(१०।६)

स्त्रीष्वनन्तरजातासु द्विजैरुत्पादितान्सुतान् ।
सदृशानेव तानाहुर्मातृदोषविगर्हितान् इति ।

मातृजात्यौ वैश्याया वैश्योंऽवष्ठो नाम शूद्राया शूद्रो निषादो नाम पारशवाख्यो भवति । मनु —(१०।८)

ब्राह्मणाद्वैश्यकन्यायामम्बष्ठो नाम जायते ।
निषाद शूद्रकन्याया य पारशव उच्यत इति ॥ ४ ॥

एतद्व्याचष्टे—**परामिति** । शवात् पशु वा एतत् श्मशान यच्छूद्र इति श्रुते शवस्थानतुल्यात् शूद्रात्परं उत्कृष्ट पशुं युतं पशु पादयुक्त जङ्गमं श्मशान शूद्र इति श्रुत्यर्थ ॥ ५ ॥ तन्त्र उपकरणं वयसा ज्येष्ठोऽपि पारशवो द्विजस्य त्रिवर्णजस्य यवीयान् कनीयानेवेति सम्बन्ध ॥ ६ ॥ वैश्यायामपि क्षत्रियात्क्षत्रिय एव भवतीत्याह—**द्वयोरिति** । उग्रा शूद्रविशेषा ॥ ७ ॥ वैश्यात् शूद्रायामपि वैश्य एव भवतीत्याह—**द्वे इति** ॥ ८ ॥ अत स्वपितुरविशिष्टो नाधिक सन्नधम शूद्रो गुरूणा ब्राह्मणादीना दारप्रधर्षकश्चेत् बाह्यं चाण्डालादिम् ॥ ९ ॥ **विप्रायामिति** । सूत सारथि जातितः कर्मतश्च सूतानामश्वसारथ्यमित्युक्ते । स्तोमक्रिया स्तोत्रकरणं च राजादीनाम् । यथोक्तम्—सूता पौराणिका मता इति । मौद्गल्य स्त्रीकार्यमन्तःपुररक्षणादि तत्कारित्वम् । वैदेहकाना स्त्रीकार्यमित्युक्ते । अपवर्जितं संस्कारानर्हम् ॥ १० ॥ वध्याना चोरादीना शिरश्छेदादिकार्यकारिणं वध्यघ्नम् ॥ ११ ॥ **बन्दीति** । मागधाना वणिक्पथ इति मनु । वाक्यं प्रस्तावसदृशी उक्ति निषादस्तथा क्षत्ता नाम । यदाह मनु —(१०।१२)

शूद्रादायोगव क्षत्ता चण्डालश्चाधमो नृणाम् ।
वैश्यराजन्यविप्रासु जायन्ते वर्णसंकरा इति ।

अस्य वृत्तिं मनुरन्यामाह—(१०।४९)

क्षत्रुप्रपुल्कसाना तु विलोको वधबन्धनमिति ।

अत्र मनुना निषादोऽनुलोमजेषु क्षत्ता च प्रतिलोमजेषूक्त । व्यासेन तु विपरीतमुक्तं विदुरे क्षत्तृशब्दं तत्र तत्र प्रयुञ्जानेन । अत एव शूद्या निषादो जात पारशवोऽपि वा, क्षत्रिया मागधं वैश्यात् शूद्रात्क्षत्तारमेव चेति **याज्ञवल्क्य** उभयत्र वाशब्द पठनयोर्निषादत्वक्षत्तृत्वे सूचयति । तेन विप्रात् शूद्राया क्षत्ता शूद्रात्क्षत्रियाया निषाद इत्यपि साधु ॥ १२ ॥ ग्राम्यधर्मिण ग्राम्यधर्मो मैथुनं तद्वतः तक्षा वर्धकि ॥ १३ ॥ एते नव अम्बष्ठपारशवोग्रा सूतवैदेहकचण्डाला मागधनिषादायोगवा. तेषा स्वयोनौ अनन्तरयोनौ च स्वात्मैव जायते पूर्ववत् । व्यवहितनीचयोनौ तु मातृजाताया इति श्लोकद्वयार्थ ॥ १४ ॥ ते चापि संकरजा अपि विगर्हितान् अधमादुत्तमाया उत्तमादधमायां वा सूताम्बष्ठादिवद्विगर्हितानेव जनयन्तीत्यर्थ ॥ १६ ॥

---

* स्वर्णकारम् । × राउत इति भाषाया प्रसिद्धा ।
= अतोऽवशिष्ट इति पाठः ।

प्रतिलोमं तु वर्धन्ते बाह्याद्बाह्यतरात्पुनः ।
हीनाद्धीनाः प्रसूयन्ते वर्णाः पंचदशैव तु १८
अगम्यागमनाच्चैव जायते वर्णसङ्करः ।
बाह्यानामनुजायन्ते सैरन्ध्र्यां मागधेषु च ।
प्रसाधनोपचारज्ञमदासं दासजीवनम् ॥१९
अतश्चायोगवं सूते वागुराबन्धजीवनम् ।
मैरेयकं च वैदेहः संप्रसूतेऽथ माधुकम् ॥ २०
निषादो मद्गुरं सूते दासं नावोपजीविनम् ।
मृतपं चापि चाण्डालः श्वपाकमिति विश्रुतम्
चतुरो मागधी सूते क्रूरान्मायोपजीविनः ।
मांसं स्वादुकरं क्षौद्रं सौगन्धमिति विश्रुतम्
वैदेहकाच्च पापिष्ठा क्रूरं मायोपजीविनम् ।
निषादान्मद्गनाभ च खरयानप्रयायिनम् २२
चांडालात्पुल्कसं चापि खराश्वगजभोजिनम्
मृतचैलप्रतिच्छन्नं भिन्नभाजनभोजिनम् २४
आयोगवीषु जायन्ते हीनवर्णास्तु ते त्रयः ।
क्षुद्रो वैदेहकादन्ध्रो बहिर्ग्रामप्रतिश्रयः ॥ २५

कारावरो निषाद्यां तु
चर्मकारः प्रसूयते ।
चांडालात्पांडुसौपाक-
स्त्वक्सारव्यवहारवान् ॥ २६

आहिण्डको निषादेन वैदेह्यां संप्रसूयते ।
चण्डालेन तु सौपाकश्चण्डालसमवृत्तिमान्
निषादी चापि चाण्डालात्पुत्रमन्तेवसायिनम्
श्मशानगोचरं सूते बाह्यैरपि बहिष्कृतम् २८
इत्येते संकरे जाताः पितृमातृव्यतिक्रमात् ।
प्रच्छन्ना वा प्रकाशा वा वेदितव्याः स्वकर्मभिः
चतुर्णामेव वर्णानां धर्मो नान्यस्य विद्यते ।
वर्णानां धर्महीनेषु संख्या नास्तीह कस्यचित्
यदृच्छयोपसंपन्नैर्यज्ञसाधुबहिष्कृतैः ।
बाह्या बाह्यैश्च जायन्ते यथावृत्ति यथाश्रयम्॥
चतुष्पथश्मशानानि शैलांश्चान्यान्वनस्पतीन्
कार्ष्णायसमलंकारं परिगृह्य च नित्यशः ३२

पञ्चदश बाह्या उक्तास्तान् व्याचष्टे—**बाह्यानामित्यादिना** । मागधेषु सैरन्ध्रयामित्यभेदेनान्वयः । सैरन्ध्र्यकर्म व्याचष्टे—**प्रसाधनेति** । प्रसाधनं राजादीना पुसा अलङ्करणं पुरुषै सैरन्ध्रै । राजस्त्रीणा च सैरन्ध्रीभि उपचारस्तेषा दिव्याङ्गरागाद्यर्पणेन स्तवादिना च सन्तोषणं तदभिज्ञं अदासमिति सामान्ये नपुंसकम् ॥ १९ ॥ अतः अत्र मागधविशेषे सैरन्ध्रयोनौ आयोगवं आयोगवस्यापत्यं सैरन्ध्रं नाम सूतेऽर्थादायोगवं सैरन्ध्रं वागुरावृत्तीति मनु । तस्यामेव मागध्यं मैरेयकं नामत माधुकं मद्यकरं कर्मतश्च पुत्रं वैदेह सूते ॥ २० ॥ मद्गुर मद्गून्मीनविशेषान् राति आदत्ते तं मद्गुरं दासं नामत मृतपं श्मशानाधिकारिणम् ॥ २१ ॥ एते मागध्या आयोगवादिभ्यश्चतुर्भ्य क्रमाज्जायन्ते इत्युपसंहरति—**चतुर इति** । एते चत्वारो वागुरादिना जीवन्तीति मायोपजीविन अन्येऽपि चत्वारो मागध्या विश्रुता सजातीया उत्पद्यन्ते तेषा नामानि मासमित्यादि मासं मासविक्रेतारं स्वादुकरं मासस्यैव संस्कारकम् । क्षौद्रं सूदं शूद्रमिति पाठत्रयेऽपि शाकाद्यन्नपाककरं सौगन्धं उक्तलक्षण सैरन्ध्रं एवस्यैव मागधस्यैतदृत्तिचतुष्टयमुक्तमिति ज्ञेयम् ॥ २२ ॥ आयोगव्या वैदेहकादिभ्यो जातान्त्रीन् भेदानाह सार्धद्वयेन—**वैदेहकादिति ॥ २३ ॥ क्षुद्र इति** । निषाद्या वैदेहकात् क्षुद्रो भेद अंध्रश्च आरण्यपशुहिंसकौ कारावराख्यश्चर्मकारश्चेति त्रयो भवन्तीत्यर्थ ॥ २५ ॥ चण्डालात् निषाद्यामेव त्वक्सारो वेणुः ॥ २६ ॥ आहिण्डक इति स्पष्टार्थौ श्लोकौ ॥ २७ ॥ **इतीति** । अत्र मागध्या आयोगववैदेहकनिषादचण्डालैश्चत्वारस्तैरेवायोगव्या स्वीयवर्जितैस्त्रयो निषाद्या चण्डालवैदेहाभ्या द्वौ वैदेह्या चण्डालनिषादाभ्या द्वौ निषाद्या चण्डालाच्चैक इति द्वादश भेदा उक्ता ।

शूद्राज्जातो निषाद्या तु स वै कुक्कुटक स्मृत ।
वैदेहकेन त्वम्बष्ठ्यामुत्पन्नो वेन उच्यते ॥ इति द्वौ ।
द्विजातय सवर्णासु जनयन्त्यव्रतास्तु यान् ।
तान्सावित्रीपरिभ्रष्टान् व्रात्यानित्यभिनिर्दिशेत् इति ।

व्रात्यजातीय एक इत्येवं मनूक्तैस्त्रिभि सह पञ्चदश संकरजाता । व्रात्यस्यापि धर्मसाकर्यादेतेष्वेव गणना प्रच्छन्ना अज्ञातयोनयोऽपि पूर्वोक्तै कर्मभिस्तेऽमुकयोनय इति वेदितव्या ॥२९॥ चातुर्वर्ण्यस्यैव धर्मा शास्त्रे विहिता इतरेषा तु जातिभेदाना धर्मानियम इयत्ता च नास्ति । तथाहि—चतुर्भ्यो वर्णेभ्य षडनुलोमजा षट्विलोमजाश्चेति द्वादश, तेभ्योऽपि षट्षष्टिरनुलोमजा षट्षष्टिर्विलोमजा इति द्वात्रिंशदधिकं शतं, तेभ्य एवं प्रातिलोम्यानुलोम्यगणनाया तेभ्यस्तेभ्यश्चैवमनन्ता भेदा भवन्ति ते च सर्वे पञ्चदशस्वेवान्तर्भवन्तीति।तावतामेव परिगणनं कृतामित्यर्थ ॥ ३० ॥ यदृच्छया जात्यानियमेन उपसंपन्नौर्मिथुनीभावं गतैर्यज्ञेभ्य साधुभ्यश्च बहिष्कृतै यथावृत्ति यथाश्रयं जीविका जातिविशेषं च यदृच्छया तत्तत्कर्मणा प्राप्ता इत्यर्थ ॥ ३१ ॥

वसेयुरेते विज्ञाता वर्तयन्तः स्वकर्मभिः ।
युञ्जन्तो वाप्यलंकारांस्तथोपकरणानि च ३३
गोब्राह्मणाय साहाय्यं कुर्वाणा वै न संशयः ।
आनृशंस्यमनुक्रोशः सत्यवाक्यं तथा क्षमा
स्वशरीरैरपि त्राणं बाह्यानां सिद्धिकारणम् ।
भवन्ति मनुजव्याघ्र तत्र मे नास्ति संशयः ॥
यथोपदेशं परिकीर्तितासु
नरः प्रजायेत विचार्य बुद्धिमान् ।
निहीनयोनिर्हि सुतोऽवसादये-
त्तितीर्षमाणं हि यथोपलो जले ॥३६
अविद्वांसमलं लोके विद्वांसमपि वा पुनः ।
नयन्ति ह्यपथं नार्यः कामक्रोधवशानुगम् ॥
स्वभावश्चैव नारीणां नराणामिह दूषणम् ।
अत्यर्थं न प्रसज्जन्ते प्रमदासु विपश्चितः ॥ ३८
युधिष्ठिर उवाच ।
वर्णापेतमविज्ञाय नरं कलुषयोनिजम् ।
आर्यरूपमिवानार्यं कथं विद्यामहे वयम् ३९
भीष्म उवाच ।
योनिसंकलुषे जातं नानाभावसमन्वितम्
कर्मभिः सज्जनाचीर्णैर्विज्ञेया योनिशुद्धता ४०
अनार्यत्वमनाचारः क्रूरत्वं निष्क्रियात्मता ।
पुरुषं व्यञ्जयन्तीह लोके कलुषयोनिजम् ॥ ४१
पित्र्यं वा भजते शीलं मातृजं वा तथोभयम् ।
न कथंचन संकीर्णः प्रकृतिं स्वां नियच्छति
यथैव सदृशो रूपे मातापित्रोर्हि जायते ।
व्याघ्रश्चित्रैस्तथा योनिं पुरुषः स्वां नियच्छति
कुले स्रोतसि संच्छन्ने यस्य स्याद्योनिसंकरः
संश्रयत्येव तच्छीलं नरोऽल्पमथवा बहु ॥४४
आर्यरूपसमाचारं चरन्तं कृतके पथि ।
सुवर्णमन्यवर्णे वा स्वशीलं शास्ति निश्चये ४५
नानावृत्तेषु भूतेषु नानाकर्मरतेषु च ।
जन्मवृत्तसमं लोके सुश्लिष्टं न विरज्यते ॥४६
शरीरमिह सत्त्वेन न तस्य परिकृष्यते ।
ज्येष्ठमध्यावरं सत्त्वं तुल्यसत्त्वं प्रमोदते ॥४७
ज्यायांसमपि शीलेन विहीनं नैव पूजयेत् ।
अपि शूद्रं च धर्मज्ञं सद्वृत्तमभिपूजयेत् ॥ ४८
आत्मानमाख्याति हि कर्मभिर्नरः
सुशीलचारित्रकुलैः शुभाशुभैः ।
प्रनष्टमप्याशु कुलं तथा नरः
पुनः प्रकाशं कुरुते स्वकर्मतः ॥ ४९
योनिष्वेतासु सर्वासु संकीर्णास्वितरासु च ।
यत्रात्मानं न जनयेद्बुधस्तां परिवर्जयेत् ॥ ५०

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि विवाहधर्मे वर्णसङ्करकथने अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥



तेषां साधारणान् धर्मानाह—**गवीति** ॥ ३४ ॥ **यथेति** । निहीनासु रेत सेक न कुर्यादिति भाव ॥ ३६ ॥ तदर्थमेव चौरेभ्य इव स्त्रीभ्य आत्मानं रक्षेदित्याह द्वाभ्याम्—**अविद्वांसमिति** ॥ ३७ ॥ कलुषयोनिज संकरयोनिजं आर्यगृहे जातत्वादार्यरूपमिव भासमानमपि उत्पत्तितोऽनार्यम् ॥ ३९ ॥ नानाभावै आर्येभ्य पृथग्भूताभिश्चेष्टाभि समन्वितं नरं सकरयोनिजं जानीयात् ॥ ४० ॥ अनार्यत्वादिष्वेकैकमपि कलुषयोनित्वव्यञ्जकं किमुत द्वे त्रीणि सर्वाणि चेति भाव ॥ ४१ ॥ प्रकृतिं योनिं नियच्छति गूहितुं शक्नोतीत्यर्थ ॥ ४२ ॥ व्याघ्र इत्युपलक्षणं बीजादेरपि यथा तिर्यक्स्थावरादिकं बीजगुणं न त्यजत्येवं मनुष्योऽपीत्यर्थ ॥ ४३ ॥ संच्छन्ने [illegible] स्रोतसेऽपि यस्य जन्मनीति शेष । स तच्छील सद्वरवर्तु स्वभावम् ॥ ४५ ॥ स्वस्य शीलं स्वभावो निश्चये कार्यस्य निष्ठाया सुवर्णं शोभनवर्ण अन्यवर्णं वा पुरुषं शास्ति कथयति सुवर्णो बहि क्रूरोऽपि कार्यकाले दयालुर्भवति, दुर्वर्णश्च नित्यं मृदुरपि फलकाले दारुणो भवतीति भाव ॥ ४५ ॥ सुश्लिष्टं शोभनवृत्तेन न विरज्यते उपचितं वृत्तं विहाय जन्मान्यथा तिष्ठतीत्यर्थ ॥ ४६ ॥ तस्य संकरजस्य शरीरं सत्त्वेन शास्त्रीयबुद्धया न परिकृष्यते न नीचमार्गादपकृष्यते बीजगुणस्य प्राबल्यात् । सत्त्वस्य कालभेदेन ज्येष्ठत्वादिभावेऽपि यत्तुल्यसत्त्व शरीरारम्भकं यत्सत्त्वं ज्येष्ठाद्यन्यतमं तदेव प्रमोदते अन्यत्तु उत्पन्नमपि सत्त्वं शारदिकाभ्रवल्लीयत इति भाव ॥ ४७ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टचत्वारिंशोऽध्याय ॥ ४८ ॥

४९

युधिष्ठिर उवाच ।

ब्रूहि तात कुरुश्रेष्ठ वर्णानां त्वं पृथक् पृथक्
कीदृश्यां कीदृशाश्चापि पुत्राः कस्य च के च ते
विप्रवादाः सुबहवः श्रूयन्ते पुत्रकारिताः ।
अत्र नो मुह्यतां राजन्संशयं छेत्तुमर्हसि ॥ २

भीष्म उवाच ।

आत्मा पुत्रश्च विज्ञेयस्तस्यानन्तरजश्च यः ।
निरुक्तजश्च विज्ञेयः सुतः प्रसृतजस्तथा ॥ ३
पतितस्य तु भार्यायां भर्त्रा सुसमवेतया ।
तथा दत्तकृतौ पुत्रावध्यूढश्च तथाऽपरः ॥ ४
षडपध्वंसजाश्चापि कानीनापसदास्तथा ।
इत्येते वै समाख्यातास्तान्विजानीहि भारत

युधिष्ठिर उवाच ।

षडपध्वंसजाः के स्युः के वाप्यपसदास्तथा
एतत्सर्वं यथातत्त्वं व्याख्यातुं मे त्वमर्हसि ६

भीष्म उवाच ।

त्रिषु वर्णेषु ये पुत्रा ब्राह्मणस्य युधिष्ठिर ।
वर्णयोश्च द्वयोः स्यातां यौ राजन्यस्य भारत॥
एको विड्वर्ण एवाथ तथाऽत्रैवोपलक्षितः ।
षडपध्वंसजास्ते हि तथैवापसदान् शृणु ॥ ८
चाण्डालो व्रात्यवैद्यौ च ब्राह्मण्यां क्षत्रियासु च
वैश्यायां चैव शूद्रस्य लक्ष्यन्तेऽपसदास्त्रयः ९
मागधो वामकश्चैव द्वौ वैश्यस्योपलक्षितौ ।
ब्राह्मण्यां क्षत्रियायां च क्षत्रियस्यैक एव तु ॥
ब्राह्मण्यां लक्ष्यते सूत इत्येतेऽपसदाः स्मृताः ।
पुत्रा ह्येते न शक्यन्ते मिथ्याकर्तुं नराधिप ११

युधिष्ठिर उवाच ।

क्षेत्रजं केचिदेवाहुः सुतं केचित्तु शुक्रजम् ।
तुल्यावेतौ सुतौ कस्य तन्मे ब्रूहि पितामह ॥

भीष्म उवाच ।

रेतजो वा भवेत्पुत्रस्त्यक्तो वा क्षेत्रजो भवेत् ।
अध्यूढः समयं भित्त्वेत्येतदेव निबोध मे ॥ १३

युधिष्ठिर उवाच ।

रेतजं विद्म वै पुत्रं क्षेत्रजस्यागमः कथम् ।
अध्यूढं विद्म वै पुत्रं भित्त्वा तु समयं कथम् ॥

भीष्म उवाच ।

आत्मजं पुत्रमुत्पाद्य यस्त्यजेत्कारणान्तरे ।
न तत्र कारणं रेतः स क्षेत्रस्वामिनो भवेत् १५

४९

पूर्वं ऋत्विक्शुद्धिज्ञानार्थमनार्यत्वमनाचार क्रूरत्व निष्क्रियात्मतेति संकरजस्य लक्षणान्युक्तानि । इदानीम्—

यन्मे माता प्रममाद यच्चचारानानुव्रतम् ।
तन्मे रेत पिता वृङ्क्ताम् इति ।

मन्त्रलिङ्गात् माता प्रमादात् कामकाराद्वा यदननुव्रतं प्रतिकूलं परस्य रेतसो वारणं चचार कृतवती तद्रेत मे मम पिता वृङ्क्ता स्वीयं करोतु पालनसस्कारादिकर्तृत्वात् । यथा उत्पतत पक्षिणो मुखात् पतित बीजं परक्षेत्रे अधिरूढ क्षेत्रपतेरेव न तु बीजपतेस्तद्वत् । तथा—

अप्रमत्ता रक्षत तन्तुमेतं मा व क्षेत्रे परबीजान्यवाप्सु ।
जनयितु पुत्रो भवति सापराये मोघं वेत्ता कुरुते तन्तुमेतम् ।

इति द्विविधशास्त्रश्रवणात् । क्षेत्रज पुत्र संस्कार्यो न वेति संदिहान पृच्छति—**ब्रूहीति** ॥ १ ॥ विप्रवादा विविधा प्रवादाः पूर्वोक्ता एव ॥ २ ॥ अत्रोत्तरमाह—**आत्मेति** । अनन्तरज औरस निरुक्तज स्वक्षेत्रे अन्यो रेत सेकार्थमुक्तस्तज्ज , प्रसृत अनिरुक्तोऽपि यो लौल्यात्परक्षेत्रे रेत सिञ्चति तज्ज प्रसृतज ॥ ३ ॥ तथा पतितात्स्वभार्यायामेव जातः भार्याया तृतीयार्थे षष्ठी । दत्त पञ्चम· कृत क्रीत स्वयमुपायगम्यो वा षष्ठ । अध्यूढ यस्य माता गर्भवत्येव ऊढा तादृश समम ॥ ४ ॥ षडपध्वसजा वक्ष्यमाणा कानीन कन्याया विवाहात् प्राक् उत्पन्नश्चतुर्दश अपसदा वक्ष्यमाणा षट् । एते विंशति तान्सर्वान् पुत्रानिति विजानीहि ॥ ५ ॥ परवर्णासु अनुलोमजा षट् अपध्वंसजा विलोमजा अपसदा षडिति ज्ञेयम् ॥ ८ ॥ मिथ्याकर्तुं एते पुत्रा न भवन्तीति वक्तुं न शक्यन्त इत्यर्थ । अयं भाव — **अप्रमत्तेति** श्रुतिरनौरसस्याप्राशस्त्यमात्रपरा । यन्मे मातेति श्रुतिस्तु अनौरसस्यापि पुत्रत्वमस्तीत्येवंपरेति न कश्चिद्विरोध । तथा च अनौरस औरसो वा सुशील श्राद्धपर पितृणा स्वर्गाय भवति विपरीतस्तु नरकायेति ॥ ११ ॥ कस्य द्वयो पित्रो क्षेत्रपतिनिषेक्त्रोर्मध्ये कस्यायं पुत्र उभयो पितृत्वाविशेषादित्यर्थ ॥ १२ ॥ यथा रेतोज औरस पुत्र एवं क्षेत्रजोऽपि बीजदेन त्यक्तश्चेत्स्वीय एव भवति । एवमध्यूढोऽपि रेत पतिना त्यक्तश्चेद्दोढुरेव अत्यक्तौ तु द्वावपि रेत प्रदस्यैवेत्यर्थ ॥ १३ ॥ एतदेव प्रश्नोत्तराभ्यां व्याचष्टे—**रेतजमिति** । आगम· पुत्रत्वप्रापकं शास्त्रं कथं कीदृशं समयभेदश्च कथमित्यर्थ· ॥ १४ ॥ कारणान्तरे लोकापवादादिभये सति ॥ १५ ॥

पुत्रकामो हि पुत्रार्थे यां वृणीते विशांपते ।
क्षेत्रजं तु प्रमाणं स्यान्न वै तत्रात्मजः सुतः१६
अन्यत्र क्षेत्रजः पुत्रो लक्ष्यते भरतर्षभ ।
न ह्यात्मा शक्यते हन्तु दृष्टान्तोपगतो ह्यसौ
क्वचिच्च कृतकः पुत्रः सग्रहादेव लक्ष्यते ।
न तत्र रेतः क्षेत्रं वा यत्र लक्ष्येत भारत ॥ १८

युधिष्ठिर उवाच ।

कीदृशः कृतकः पुत्रः संग्रहादेव लक्ष्यते ।
शुक्रं क्षेत्रं प्रमाणं वा यत्र लक्ष्यं न भारत १९

भीष्म उवाच ।

मातापितृभ्यां यस्त्यक्तः पथि यस्तं प्रकल्पयेत
न चास्य मातापितरौ ज्ञायेतां स हि कृत्रिमः ॥
अस्वामिकस्य स्वामित्व यस्मिन्संप्रति लक्ष्यते
यो वर्णः पोषयेत्तं च तद्वर्णंस्तस्य जायते ॥ २१

युधिष्ठिर उवाच ।

कथमस्य प्रयोक्तव्यः सस्कारः कस्य वा कथम्
देया कन्या कथं चेति तन्मे ब्रूहि पितामह २२

भीष्म उवाच ।

आत्मवत्तस्य कुर्वीत संस्कारं स्वामिवत्तथा
त्यक्तो मातापितृभ्यां यः सवर्णं प्रतिपद्यते २३
तद्गोत्रबन्धुजं तस्य कुर्यात्संस्कारमच्युत ।
अथ देया तु कन्या स्यात्तद्वर्णस्य युधिष्ठिर ॥
संस्कर्तुं वर्णगोत्रं च मातृवर्णविनिश्चये ।
कानीनाध्यूढजौ वापि विज्ञेयौ पुत्र किल्बिषौ
तावपि स्वाविव सुतौ संस्कार्याविति निश्चयः
क्षेत्रजो वाप्यपसदो येऽध्यूढास्तेषु चाप्युत२६
आत्मवद्वै प्रयुञ्जीरन्संस्कारान्ब्राह्मणादयः ।
धर्मशास्त्रेषु वर्णानां निश्चयोऽयं प्रदृश्यते ॥ २७
एतत्ते सर्वमाख्यातं किं भूयः श्रोतुमिच्छसि२८

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि विवाहधर्मे पुत्रप्रतिनिधिकथने एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥

५०

युधिष्ठिर उवाच ।

दर्शने कीदृशः स्नेहः संवासे च पितामह ।
महाभाग्यं गवां चैव तन्मे व्याख्यातुमर्हसि १

भीष्म उवाच ।

हन्त ते कथयिष्यामि पुरावृत्तं महाद्युते ।
नहुषस्य च संवादं महर्षेश्च्यवनस्य च ।

आगममुक्त्वा समयभेदमाह—**पुत्रेति** । या गर्भवतीं कन्या वृणीते तत्र स पुत्रो वोढुरेव क्षेत्रजो न तु स सेक्तुरात्मज ॥ १६ ॥ अन्यत्रेति त्रल् अनर्थक, परक्षेत्रे जात पुत्रोऽमुकसदृशो अमुकसदृशोऽयमिति तदीयत्वेन लक्ष्यते हन्तु गृहितु दृष्टान्तं प्रत्यक्षमेवोपगतो ज्ञात । दृश्यते चापि सारूप्यमिति स्मृते । एवं चाध्यूढो वोढु पुत्रकाम्याभावे रेत पतेरेव भवतीत्युक्तम् ॥ १७ ॥ शुक्रक्षेत्रयोरन्यतरदपि यत्र पुत्रत्वे प्रमाण न लक्ष्यं भवति स कृतक पुत्र कीदृश इत्यर्थ ॥ १९ ॥ तस्य पोषयितु पुत्र स तद्वर्ण पोषयितृवर्ण· ॥ २१ ॥ कथं केन प्रकारेण कस्य वाऽयमिति ज्ञातव्यं कथं वाऽस्य संस्कार· प्रयोक्तव्य इति प्रश्न ॥ २२ ॥ स स्वामिवद्वर्ण प्रतिपद्यते अत स्वामी तस्यात्मवत्संस्कारं करोति ॥ २३ ॥ ननु अन्यवर्णत्वशंकाया कथमेतत्स्यादित्याशक्याह—**तदिति** । अन्यवर्णत्वनिश्चये तद्गोत्रवर्णजेषु गोत्रादियोग्यमेव तस्य संस्कार स्वामी कुर्यात् । अनिश्चये तु येन संस्कृतस्तस्यैव वर्णो गोत्र च सस्कारसामर्थ्याद्भवतीत्यर्थ । अन्यगोत्रोऽप्यन्यवर्णोऽपि संस्कर्तुरेव वर्णगोत्रे भजत इति भाव ॥२४॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकोनपञ्चाशत्तमोऽध्याय ॥ ४९ ॥

५०

एव यज्ञाज्ञाना स्त्रीधनत्वेनागतानां गवा शुद्धिमुक्त्वा यज्ञे दक्षिणात्वेनोपस्थितानां गवा माहात्म्यं पृच्छति—**दर्शने इति** । परपीडादर्शने परै सह संवासे च कीदृश स्नेह आनृशस्यं च कर्तव्य गवा माहात्म्यं च ब्रूहीति प्रश्नद्वयम् ॥ १ ॥ तस्योत्तरं तन्त्रेणाह—**हन्त इत्यादिना**॥२॥

पुरा महर्षिश्च्यवनो भार्गवो भरतर्षभ ।
उदवासकृतारम्भो बभूव स महाव्रतः ॥ ३
निहत्य मानं क्रोधं च प्रहर्षं शोकमेव च ।
वर्षाणि द्वादश मुनिर्जलवासे धृतव्रतः ॥ ४
आदधत्सर्वभूतेषु विश्रम्भं परमं शुभम् ।
जलेचरेषु सर्वेषु शीतरश्मिरिव प्रभुः ॥ ५
स्थाणुभूतः शुचिर्भूत्वा दैवतेभ्यः प्रणम्य च ।
गङ्गायमुनयोर्मध्ये जलं संप्रविवेश ह ॥ ६
गङ्गायमुनयोर्वेगं सुभीमं भीमनिःस्वनम् ।
प्रतिजग्राह शिरसा वातवेगसमं जवे ॥ ७
गङ्गा च यमुना चैव सरितश्च सरांसि च ।
प्रदक्षिणमृषिं चक्रुर्न चैनं पर्यपीडयन् ॥ ८
अन्तर्जलेषु सुष्वाप काष्ठभूतो महामुनिः ।
ततश्चोर्ध्वस्थितो धीमानभवद्भरतर्षभ ॥ ९
जलौकसां स सत्त्वानां बभूव प्रियदर्शनः ।
उपाजिघ्रन्त च तदा तस्योष्ठं हृष्टमानसाः १०
तत्र तस्यासतः कालः समतीतोऽभवन्महान्
ततः कदाचित्समये कस्मिंश्चिन्मत्स्यजीविनः
तं देशं समुपाजग्मुर्जालहस्ता महाद्युते ।
निषादा बहवस्तत्र मत्स्योद्धरणनिश्चयाः १२
व्यायता बलिनः शूराः सलिलेष्वनिवर्तिनः ।
अभ्याययुश्च तं देशं निश्चिता जालकर्मणि १३
जालं ते योजयामासुर्निःशेषेण जनाधिप ।
मत्स्योदकं समासाद्य तदा भरतसत्तम ॥ १४
ततस्ते बहुभिर्योगैः कैवर्ता मत्स्यकाङ्क्षिणः ।
गङ्गायमुनयोर्वारि जालैरभ्यकिरंस्ततः ॥ १५
जालं सुविततं तेषां नवसूत्रकृतं तथा ॥
विस्तारायामसम्पन्नं यत्तत्र सलिलेऽक्षिपन् १६
ततस्ते सुमहच्चैव बलवच्च सुवर्तितम् ।
अवतीर्य ततः सर्वे जालं चक्रुषिरे तदा ॥ १७
अभीतरूपाः संहृष्टा अन्योन्यवशवर्तिनः ।
बबन्धुस्तत्र मत्स्यांश्च तथाऽन्यान् जलचारिणः
तथा मत्स्यैः परिवृतं च्यवनं भृगुनन्दनम् १९
आकर्षयन्महाराज जालेनाथ यदृच्छया १९
नदीशैवलदिग्धाङ्गं हरिश्मश्रुजटाधरम् ।
लग्नैः शङ्खनखैर्गात्रे क्रोडैश्चित्रैरिवार्पितम् २०
तं जालेनोद्धृतं दृष्ट्वा ते तदा वेदपारगम् ।
सर्वे प्राञ्जलयो दाशाः शिरोभिः प्रापतन्भुवि
परिखेदपरित्रासाज्जालस्याकर्षणेन च ।
मत्स्या बभूवुर्व्यापन्नाः स्थलसंस्पर्शनेन च२२
स मुनिस्तत्तदा दृष्ट्वा मत्स्यानां कदनं कृतम् ।
बभूव कृपयाविष्टो निःश्वसंश्च पुनः पुनः २३

निषादा ऊचुः ।

अज्ञानाद्यत्कृतं पाप प्रसादं तत्र नः कुरु ।
करवाम प्रियं किं ते तन्नो ब्रूहि महामुने ॥२४
इत्युक्तो मत्स्यमध्यस्थश्च्यवनो वाक्यमब्रवीत् ।
यो मेऽद्य परमः कामस्तं शृणुध्वं समाहिताः
प्राणोत्सर्गं विसर्गं वा मत्स्यैर्यास्याम्यहं सह
संवासान्नोत्सहे त्यक्तुं सलिलेऽभ्युषितानहम्
इत्युक्तास्ते निषादास्तु सुभृशं भयकम्पिताः ।
सर्वे विवर्णवदना नहुषाय न्यवेदयन् ॥ २७

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि च्यवनोपाख्याने पञ्चाशत्तमोऽध्यायः ॥ ५० ॥

५१

भीष्म उवाच ।

नहुषस्तु ततः श्रुत्वा च्यवनं तं तथागतम् ।
त्वरितः प्रययौ तत्र सहामात्यपुरोहितः ॥ १
शौचं कृत्वा यथान्याय प्राञ्जलिः प्रयतो नृपः ।
आत्मानमाचचक्षे च च्यवनाय महात्मने ॥ २

ऊर्ध्वस्थितः उपविष्ट ॥ ९ ॥ आसतः आसीनस्य ॥११॥ अभ्यकिरन् व्याप्तवन्त ॥ १५ ॥ शखाना जलजन्तुविशेषाणा नखानि तै ॥२०॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चाशत्तमोऽध्याय ॥ ५० ॥

५१

नहुष इति ॥ १ ॥

अर्चयामास तं चापि तस्य राज्ञः पुरोहितः ।
सत्यव्रतं महात्मानं देवकल्पं विशांपते ॥ ३

नहुष उवाच ।

करवाणि प्रियं किं ते तन्मे ब्रूहि द्विजोत्तम
सर्वं कर्तास्मि भगवन्यद्यपि स्यात्सुदुष्करम् ।

च्यवन उवाच ।

श्रमेण महता युक्ताः कैवर्ता मत्स्यजीविनः
मम मूल्यं प्रयच्छैभ्यो मत्स्यानां विक्रयैः सह

नहुष उवाच ।

सहस्रं दीयतां मूल्यं निषादेभ्यः पुरोहित ।
निष्क्रयार्थे भगवतो यथाऽऽह भृगुनन्दनः ॥ ६

च्यवन उवाच ।

सहस्रं नाहमर्हामि किंवा त्वं मन्यसे नृप ।
सदृशं दीयतां मूल्यं स्वबुद्ध्या निश्चयं कुरु ॥ ७

नहुष उवाच ।

सहस्राणां शतं विप्र निषादेभ्यः प्रदीयताम्
स्यादिदं भगवन्मूल्यं किंवाऽन्यन्मन्यते भवान्

च्यवन उवाच ।

नाहं शतसहस्रेण निमेयः पार्थिवर्षभ ।
दीयतां सदृशं मूल्यममात्यैः सह चिन्तय ॥ ९

नहुष उवाच ।

कोटिः प्रदीयता मूल्यं निषादेभ्यः पुरोहित
यदेतदपि नो मूल्यमतो भूयः प्रदीयताम् १०

च्यवन उवाच ।

राजन्नार्हाम्यहं कोटिं भूयो वाऽपि महाद्युते
सदृशं दीयतां मूल्यं ब्राह्मणैः सह चिन्तय ११

नहुष उवाच ।

अर्धं राज्यं समग्रं वा निषादेभ्यः प्रदीयताम्
एतन्मूल्यमहं मन्ये किंवाऽन्यन्मन्यसे द्विज१२

च्यवन उवाच ।

अर्धं राज्यं समग्रं च मूल्यं नार्हामि पार्थिव
सदृशं दीयतां मूल्यमृषिभिः सह चिन्त्यताम्।

भीष्म उवाच ।

महर्षेर्वचनं श्रुत्वा नहुषो दुःखकार्शितः ।
स चिन्तयामास तदा सहामात्यपुरोहितः १४
तत्र त्वन्यो वनचरः कश्चिन्मूलफलाशनः ।
नहुषस्य समीपस्थो गविजातोऽभवन्मुनिः १५
स तमाभाष्य राजानमब्रवीद्विजसत्तमः ।
तोषयिष्याम्यहं क्षिप्रं यथा तुष्टो भविष्यति
नाहं मिथ्यावचो ब्रूयां स्वैरेष्वपि कुतोऽन्यथा
भवतो यदहं ब्रूयां तत्कार्यमविशङ्कया ॥ १७

नहुष उवाच ।

ब्रवीतु भगवान्मूल्यं महर्षेः सदृशं भृगोः ।
परित्रायस्व मामस्मद्विषयं च कुलं च मे ॥ १८
हन्याद्धि भगवान् क्रुद्धस्त्रैलोक्यमपि केवलम्
किं पुनर्मां तपोहीन बाहुवीर्यपरायणम् ॥ १९
अगाधांभसि मग्नस्य सामात्यस्य सऋत्विजः
प्लवो भव महर्षे त्वं कुरु मूल्यविनिश्चयम्॥ २०

भीष्म उवाच ।

नहुषस्य वचः श्रुत्वा गविजातः प्रतापवान्
उवाच हर्षयन्सर्वानमात्यान्पार्थिवं च तम्२१
अनर्घेया महाराज द्विजा वर्णेषु चोत्तमाः ।
गावश्च पुरुषव्याघ्र गौर्मूल्यं परिकल्प्यताम् २२
नहुषस्तु ततः श्रुत्वा महर्षेर्वचनं नृप ।
हर्षेण महता युक्तः सहामात्यपुरोहितः ॥ २३
अभिगम्य भृगोः पुत्रं च्यवनं संशितव्रतम् ।
इदं प्रोवाच नृपते वाचा सन्तर्पयन्निव ॥ २४

नहुष उवाच ।

उत्तिष्ठोत्तिष्ठ विप्रर्षे गवा क्रीतोऽसि भार्गव
एतन्मूल्यमहं मन्ये तव धर्मभृतां वर ॥ २५

च्यवन उवाच ।

उत्तिष्ठाम्येष राजेंद्र सम्यक् क्रीतोऽस्मि तेऽनघ
गोभिस्तुल्यं न पश्यामि धनं किञ्चिदिहाच्युत
कीर्तनं श्रवणं दानं दर्शनं चापि पार्थिव ।
गवां प्रशस्यते वीर सर्वपापहरं शिवम् ॥ २७
गावो लक्ष्म्याः सदा मूलं गोषु पाप्मा न विद्यते
अन्नमेव सदा गावो देवानां परमं हविः ॥ २८
स्वाहाकारवषट्कारौ गोषु नित्यं प्रतिष्ठितौ ।
गावो यज्ञस्य नेत्र्यो वै तथा यज्ञस्य ता मुखम्
अमृतं ह्यव्ययं दिव्यं क्षरन्ति च वहन्ति च ।
अमृतायतनं चैताः सर्वलोकनमस्कृताः ॥ ३०
तेजसा वपुषा चैव गावो वह्निसमा भुवि ।
गावो हि सुमहत्तेजः प्राणिना च सुखप्रदाः ॥
निविष्टं गोकुलं यत्र श्वासं मुञ्चति निर्भयम् ।
विराजयति तं देशं पापं चास्यापकर्षति॥ ३२
गावः स्वर्गस्य सोपानं गावः स्वर्गेऽपि पूजिताः
गावः कामदुहो देव्यो नान्यत्किञ्चित्परं स्मृतं
इत्येतद्गोषु मे प्रोक्तं माहात्म्यं भरतर्षभ ।
गुणैकदेशवचनं शक्यं पारायणं न तु ॥ ३४

निषादा ऊचुः ।

दर्शनं कथनं चैव सहास्माभिः कृतं मुने ।
सतां सम्पदं मैत्रं प्रसादं नः कुरु प्रभो ॥ ३५

हवींषि सर्वाणि यथा ह्युपभुङ्क्ते हुताशनः ।
एवं त्वमपि धर्मात्मन्पुरुषाग्निः प्रतापवान् ३६
प्रसादयामहे विद्वन्भवन्तं प्रणता वयम् ।
अनुग्रहार्थमस्माकमियं गौः प्रतिगृह्यताम् ॥३७

च्यवन उवाच ।

कृपणस्य च यच्चक्षुर्मुनेराशीविषस्य च ।
नरं समूलं दहति कक्षमग्निरिव ज्वलन् ॥ ३८
प्रतिगृह्णामि वो धेनुं कैवर्ता मुक्तकिल्बिषाः ।
दिवं गच्छत वै क्षिप्रं मत्स्यैः सह जलोद्भवैः

भीष्म उवाच ।

ततस्तस्य प्रभावात्ते महर्षेर्भावितात्मनः ।
निषादास्तेन वाक्येन सह मत्स्यैर्दिवं ययुः ४०
ततः स राजा नहुषो विस्मितः प्रेक्ष्य धीवरान्
आरोहमाणांस्त्रिदिवं मत्स्यांश्च भरतर्षभ ॥ ४१
ततस्तौ गविजश्चैव च्यवनश्च भृगूद्वहः ।
वराभ्यामनुरूपाभ्यां छन्दयामासतुर्नृपम् ॥ ४२
ततो राजा महावीर्यो नहुषः पृथिवीपतिः।
परमित्यब्रवीत्प्रीतस्तदा भरतसत्तम ॥ ४३
ततो जग्राह धर्मे स स्थितिमिन्द्रनिभो नृपः ।
तथेति चोदितः प्रीतस्तावृषी प्रत्यपूजयत् ४४
समाप्तदीक्षश्च्यवनस्ततोऽगच्छत्स्वमाश्रमम् ।
गविजश्च महातेजाः स्वमाश्रमपदं ययौ ॥ ४५
निषादाश्च दिवं जग्मुस्ते च मत्स्या जनाधिप
नहुषोऽपि वरं लब्ध्वा प्रविवेश स्वकं पुरम् ४६
एतत्ते कथितं तात यन्मां त्वं परिपृच्छसि ।
दर्शने यादृशः स्नेहः संवासे वा युधिष्ठिर ४७
महाभाग्यं गवां चैव तथा धर्मविनिश्चयम् ।
किं भूयः कथयतां वीर किं ते हृदि विवक्षितम् ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि च्यवनोपाख्याने एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

५२

युधिष्ठिर उवाच ।

संशयो मे महाप्राज्ञ सुमहान्सागरोपमः ।
तं मे शृणु महाबाहो श्रुत्वा व्याख्यातुमर्हसि १
कौतूहलं मे सुमहज्जामदग्न्यं प्रति प्रभो ।
रामं धर्मभृता श्रेष्ठं तन्मे व्याख्यातुमर्हसि ॥ २
कथमेष समुत्पन्नो रामः सत्यपराक्रमः ।
कथं ब्रह्मर्षिवंशोऽयं क्षत्रधर्मा व्यजायत ॥ ३
तदस्य सभवं राजन्निखिलेनानुकीर्तय ।
कौशिकाश्च कथं वंशात्क्षत्राद्वै ब्राह्मणो भवेत्
अहो प्रभावः सुमहानासीद्वै सुमहात्मनः ।
रामस्य च नरव्याघ्र विश्वामित्रस्य चैव हि ५
कथं पुत्रानतिक्रम्य तेषां नप्तृष्वथाभवत् ।
एष दोषः सुतान् हित्वा तत्त्वं व्याख्यातुमर्हसि

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहास पुरातनम् ।
च्यवनस्य च संवाद कुशिकस्य च भारत ॥ ७
एतं दोषं पुरा दृष्ट्वा भार्गवश्च्यवनस्तदा ।
आगामिनं महाबुद्धिः स्ववंशे मुनिसत्तमः ॥ ८
निश्चित्य मनसा सर्वं गुणदोषबलाबलम् ।
दग्धुकामः कुलं सर्वं कुशिकानां तपोधनः ९
च्यवनः समनुप्राप्य कुशिकं वाक्यमब्रवीत् ।
वस्तुमिच्छा समुत्पन्ना त्वया सह ममानघ १०

कुशिक उवाच ।

भगवन्सहधर्मोऽयं× पण्डितैरिह धार्यते ।
प्रदानकाले कन्यानामुच्यते च सदा बुधैः ११
यत्तु तावदतिक्रान्तं धर्मद्वारं तपोधन ।
तत्कार्यं प्रकरिष्यामि तदनुज्ञातुमर्हसि ॥ १२

भीष्म उवाच ।

अथासनमुपादाय च्यवनस्य महामुनेः ।
कुशिको भार्यया सार्धमाजगाम यतो मुनिः ॥

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

५२

संशयो मे इत्यादिग्रथस्य कुशिकवद्ब्राह्मणभाक्तिमतो वंशे दिव्या ब्राह्मणा उत्पद्यन्त इति तात्पर्यम् ॥१॥

× अतिथिसेवा धर्म एव सहधर्म आमहितधर्म ।
एतावत्पर्यन्तमेतन्मत्तो न जात परं तु इदानीं करिष्यामीत्यर्थ ।

प्रगृह्य राजा भृङ्गार पाद्यमस्मै न्यवेदयत् ।
कारयामास सर्वांश्च क्रियास्तस्य महात्मनः ॥
ततः स राजा च्यवन मधुपर्कं यथाविधि ।
ग्राहयामास चाढ्यश्रो महात्मा नियतव्रतः १५
सत्कृत्य त तथा विप्रमिद पुनरथाब्रवीत् ।
भगवन्परवन्तौ स्वो ब्रूहि किं करवावहे ॥ १६
यदि राज्यं यदि धन यदि गाः संशितव्रत ।
यज्ञदानानि च तथा ब्रूहि सर्वं ददामि ते १७
इदं गृहमिदं राज्यमिद धर्मासनं च ते ।
राजा त्वमसि शाध्युर्वीमहं तु परवांस्त्वयि ॥
एवमुक्ते ततो वाक्ये च्यवनो भार्गवस्तदा ।
कुशिकं प्रत्युवाचेदं मुदा परमया युतः ॥ १९
न राज्य कामये राजन्न धनं न च योषितः ।
न च गा न च वै देशान्न यज्ञं श्रूयतामिदम् २०
नियमं किञ्चिदारप्स्ये युवयोर्यदि रोचते ।
परिचर्योस्मि यत्ताभ्या युवाभ्यामविशङ्कया ॥
एवमुक्ते तदा तेन दम्पती तौ जहर्षतुः ।
प्रत्यब्रूतां च तमृषिमेवमस्त्विति भारत ॥ २२
अथ तं कुशिको हृष्टः प्रावेशयदनुत्तमम् ।
गृहोद्देशं ततस्तस्य दर्शनीयमदर्शयत् ॥ २३
इय शय्या भगवतो यथाकाममिहोष्यताम् ।
प्रयतिष्यावहे प्रीतिमाहर्तुं ते तपोधन ॥ २४
अथ सूर्योऽतिचक्राम तेषां संवदतां तथा ।
अथर्षिश्चोदयामास पानमन्नं तथैव च ॥ २५
तमपृच्छत्ततो राजा कुशिकः प्रणतस्तदा ।
किमन्नजातमिष्ट ते किमुपस्थापयाम्यहम् ॥२६
ततः स परया प्रीत्या प्रत्युवाच नराधिपम् ।
औपपत्तिकमाहारं प्रयच्छस्वेति भारत ॥ २७
तद्वचः पूजयित्वा तु तथेत्याह स पार्थिवः ।
यथोपपन्नमाहार तस्मै प्रादाज्जनाधिप ॥ २८
ततः स भुक्त्वा भगवान्दंपती प्राह धर्मवित् ।
स्वप्तुमिच्छाम्यहं निद्रा बाधते मामिति प्रभो ॥
ततः शय्यागृहं प्राप्य भगवानृषिसत्तमः ।
संविवेश नरेशस्तु सपत्नीकः स्थितोऽभवत ३०
न प्रबोध्योऽस्मि सुप्त इत्युवाचाथ भार्गवः ।
सवाहितव्यौ मे पादौ जागृतव्यं च तेऽनिशम्
अविशङ्कस्तु कुशिकस्तथेत्येवाह धर्मवित् ।
न प्रबोधयता तौ च दम्पती रजनीक्षये ॥ ३२
यथादेशं महर्षेस्तु शुश्रूषापरमौ तदा ।
बभूवतुर्महाराज प्रयतावथ दम्पती ॥ ३३
ततः स भगवान्विप्रः समादिश्य नराधिपम् ।
सुष्वापैकेन पार्श्वेन दिवसानेकविंशतिम् ३४
स तु राजा निराहारः सभार्यः कुरुनन्दन ।
पर्युपासन त हृष्टश्च्यवनाराधने रतः ॥ ३५
भार्गवस्तु समुत्तस्थौ स्वयमेव तपोधनः ।
अकिञ्चिदुक्त्वा तु गृहान्निश्चक्राम महातपाः॥
तमन्वगच्छता तौ च क्षुधितौ श्रमकर्शितौ ।
भार्यापती मुनिश्रेष्ठस्तावेतौ नावलोकयत् ३७
तयोस्तु प्रेक्षतोरेव भार्गवाणां कुलोद्वहः ।
अन्तर्हितोऽभूद्राजेन्द्र ततो राजाऽपतत्क्षितौ
स मुहूर्तं समाश्वस्य सह देव्या महाद्युतिः ।
पुनरन्वेषणे यत्नमकरोत्परमं तदा ॥ ३९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि च्यवनकुशिकसवादे द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥

५३

युधिष्ठिर उवाच ।
तस्मिन्नन्तर्हिते विप्रे राजा किमकरोत्तदा ।
भार्या चास्य महाभागा तन्मे ब्रूहि पितामह १

भीष्म उवाच ।
अदृष्ट्वा स महीपालस्तमृषिं सह भार्यया ।
परिश्रान्तो निववृते व्रीडितो नष्टचेतनः ॥ २

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्विपञ्चाशत्तमोऽध्याय ॥ ५२ ॥

५३
तस्मिन्निति ॥ १ ॥

स प्रविश्य पुरीं दीनो नाभ्यभाषत किञ्चन।
तदेव चिन्तयामास च्यवनस्य विचेष्टितम्॥ ३
अथ शून्येन मनसा प्रविश्य स्वगृहं नृपः।
ददर्श शयने तस्मिन् शयानं भृगुनन्दनम्॥ ४
विस्मितौ तमृषिं दृष्ट्वा तदाश्चर्यं विचिन्त्य च।
दर्शनात्तस्य तु तदा विश्रान्तौ सम्बभूवतुः॥ ५
यथास्थानं च तौ स्थित्वा भूयस्तं संववाहतुः।
अथापरेण पार्श्वेन सुष्वाप स महामुनिः॥ ६
तेनैव च स कालेन प्रत्यबुद्ध्यत वीर्यवान्।
न च तौ चक्रतुः किञ्चिद्विकारं भयशङ्कितौ ७
प्रतिबुद्धस्तु स मुनिस्तौ प्रोवाच विशाम्पते।
तैलाभ्यङ्को दीयतां मे स्नास्येऽहमिति भारत
तौ तथेति प्रतिश्रुत्य क्षुधितौ श्रमकर्शितौ।
शतपाकेन तैलेन महार्हेणोपतस्थतुः॥ ९
ततः सुखासीनमृषिं वाग्यतौ संववाहतुः।
न च पर्याप्तमित्याह भार्गवः सुमहातपाः॥१०
यदा तौ निर्विकारौ तु लक्षयामास भार्गवः।
तत उत्थाय सहसा स्नानशालां विवेश ह ११
कल्पमेव तु तत्रासीत्स्नानीयं पार्थिवोचितम्
असत्कृत्य च तत्सर्वं तत्रैवान्तरधीयत॥ १२
स मुनिः पुनरेवाथ नृपतेः पश्यतस्तदा।
नासूयां चक्रतुस्तौ च दम्पती भरतर्षभ॥ १३
अथ स्नातः स भगवान्सिंहासनगतः प्रभुः।
दर्शयामास कुशिकं सभार्यं कुरुनन्दन॥ १४
संहृष्टवदनो राजा सभार्यः कुशिको मुनिम्।
सिद्धमन्नमिति प्रह्वो निर्विकारो न्यवेदयत् १५
आनीयतामिति मुनिस्तं चोवाच नराधिपम्।
स राजा समुपाजह्रे तदन्नं सह भार्यया॥ १६

मांसप्रकारान्विविधान्
शाकानि विविधानि च।
*वेसवारविकारांश्च
पानकानि लघूनि च॥ १७
रसालापूपकांश्चिभ्रान्मोदकानथ खाण्डवान्।
रसान्नानाप्रकारांश्च बन्यं च मुनिभोजनम् १८

फलानि च विचित्राणि
राजभोज्यानि भूरिशः।
बदरेङ्गुदकाश्मर्य-
भल्लातकफलानि च॥ १९

गृहस्थानां च यद्भोज्यं यच्चापि वनवासिनाम्
सर्वमाहारयामास राजा शापभयात्ततः २०
अथ सर्वमुपन्यस्तमग्रतश्च्यवनस्य तत्।
ततः सर्वं समानीय तच्च शय्यासनं मुनिः २१
वस्त्रैः शुभैरवच्छाद्य भोजनोपस्करैः सह।
सर्वमादीपयामास च्यवनो भृगुनन्दनः २२
न च तौ चक्रतुः क्रोधं दम्पती सुमहामती।
तयोः संप्रेक्षतोरेव पुनरन्तर्हितोऽभवत्॥ २३
तथैव च स राजर्षिस्तस्थौ तां रजनीं तदा।
सभार्यो वाग्यतः श्रीमान्न च कोपं समाविशत्
नित्यसंस्कृतमन्नं तु विविधं राजवेश्मनि।
शयनानि च मुख्यानि परिषेकाश्च= पुष्कलाः॥
वस्त्रं च विविधाकारमभवत्समुपार्जितम्।
न शशाक ततो द्रष्टुमन्तरं च्यवनस्तदा २६
पुनरेव च विप्रर्षिः प्रोवाच कुशिकं नृपम्।
सभार्यो मां रथेनाशु वह यत्र ब्रवीम्यहम् २७
तथेति च प्राह नृपो निर्विशङ्कस्तपोधनम्।
क्रीडारथोऽस्तु भगवन्नुत सांग्रामिको रथः २८
इत्युक्तः स मुनी राज्ञा तेन हृष्टेन तद्वचः।
च्यवनः प्रत्युवाचेदं हृष्टः परपुरञ्जयम्॥ २९
सज्जीकुरु रथं क्षिप्रं यस्ते सांग्रामिको मतः।
सायुधः सपताकश्च शक्तीकनकयष्टिमान् ३०
किङ्किणीस्वननिर्घोषो युक्तस्तोरणकल्पनैः।
जाम्बूनदनिबद्धश्च परमेषुशतान्वितः॥ ३१
ततः स तं तथेत्युक्त्वा कल्पयित्वा महारथम्
भार्यां वामे धुरि तदा चात्मानं दक्षिणे तथा
त्रिदण्डं वज्रसूच्यग्रं प्रतोदं तत्र चादधत्।
सर्वमेतत्तथा दत्त्वा नृपो वाक्यमथाब्रवीत् ३३
भगवन्रथो यातु ब्रवीतु भृगुनन्दन।
यत्र वक्ष्यसि विप्रर्षे तत्र यास्यति ते रथः ३४
एवमुक्तस्तु भगवान्प्रत्युवाचाथ तं नृपम्।
इतः प्रभृति यातव्यं पदकं पदकं शनैः ३५
श्रमो मम यथा न स्यात्तथा मच्छंदचारिणौ।
सुसुखं चैव वोढव्यो जनः सर्वश्च पश्यतु ३६
नोत्सार्याःपथिकाःकेचित्तेभ्यो दास्ये वसुह्यहम्
ब्राह्मणेभ्यश्च ये कामानर्थयिष्यन्ति मां पथि३७
सर्वान्दास्याम्यशेषेण धनं रत्नानि चैव हि।
क्रियतां निखिलेनैतन्मा विचारय पार्थिव ३८

---

* व्यञ्जनं ज्ञेयं वेसवार उपस्कर इति हलायुध। = परिषेचनपात्रविशेषा।


तस्य तद्वचनं श्रुत्वा राजा भृत्यांस्तथाऽब्रवीत्
यद्यद्ब्रूयान्मुनिस्तत्तत्सर्वं देयमशङ्कितैः ॥ ३९
ततो रत्नान्यनेकानि स्त्रियो युग्यमजाविकम्
कृताकृतं च कनकं गजेन्द्राश्चाचलोपमाः ४०
अन्वगच्छन्त तमृषिं राजामात्याश्च सर्वशः ।
हाहाभूतं च तत्सर्वमासीन्नगरमार्तवत् ॥ ४१
तौ तीक्ष्णाग्रेण सहसा प्रतोदेन प्रतोदितौ ।
पृष्ठे विद्धौ कटे चैव निर्विकारौ तमूहतुः ४२
वेपमानौ निराहारौ पञ्चाशद्रात्रकर्शितौ ।
कथञ्चिदूहतुर्वीरौ दम्पती तं रथोत्तमम् ४३
बहुशो भृशविद्धौ तौ स्रवन्तौ च क्षतोद्भवम्
ददृशाते महाराज पुष्पिताविव किंशुकौ ४४
तौ दृष्ट्वा पौरवर्गस्तु भृशं शोकसमाकुलः ।
अभिशापभयत्रस्तो न च किंचिदुवाच ह ४५
द्वन्द्वशश्चाब्रुवन्सर्वे पश्यध्वं तपसो बलम् ।
क्रुद्धा अपि मुनिश्रेष्ठं वीक्षितुं नेह शक्नुमः ४६
अहो भगवतो वीर्यं महर्षेर्भावितात्मनः ।
राज्ञश्चापि सभार्यस्य धैर्यं पश्यत यादृशम् ४७
श्रान्तावपि हि कृच्छ्रेण रथमेनं समूहतुः ।
न चैतयोर्विकारं वै ददर्श भृगुनन्दनः ॥ ४८

भीष्म उवाच ।

ततः स निर्विकारौ तु दृष्ट्वा भृगुकुलोद्वहम्
वसु विश्राणयामास यथा वैश्रवणस्तथा ॥४९
तत्रापि राजा प्रीतात्मा यथादिष्टमथाकरोत् ।
ततोऽस्य भगवान्प्रीतो बभूव मुनिसत्तमः ५०
अवतीर्य रथश्रेष्ठाद्दम्पती तौ मुमोच ह ।
विमोच्य चैतौ विधिवत्ततो वाक्यमुवाच ह
स्निग्धगम्भीरया वाचा भार्गवः सुप्रसन्नया ।
ददानि वां वरं श्रेष्ठं तं ब्रूतामिति भारत ॥ ५२
सुकुमारौ च तौ विद्धौ कराभ्यां मुनिसत्तमः
पस्पर्शामृतकल्पाभ्यां स्नेहाद्भरतसत्तम ॥ ५३
अथाब्रवीन्नृपो वाक्यं श्रमो नास्त्यावयोरिह ।
विश्रान्तौ च प्रभावात्ते ऊचतुस्तौ तु भार्गवम्
अथ तौ भगवान्प्राह प्रहृष्टश्च्यवनस्तदा ।
न वृथा व्याहृतं पूर्वं यन्मया तद्भविष्यति ५५
रमणीयः समुद्देशो गङ्गातीरमिदं शुभम् ।
किञ्चित्कालं व्रतपरो निवत्स्यामीह पार्थिव
गम्यतां स्वपुरं पुत्र विश्रान्तः पुनरेष्यसि ।
इहस्थं मां सभार्यस्त्वं द्रष्टासि श्वो नराधिप
न च मन्युस्त्वया कार्यः श्रेयस्ते समुपस्थितम् ५७
यत्काङ्क्षितं हृदिस्थं ते तत्सर्वं हि भविष्यति ।
इत्येवमुक्तः कुशिकः प्रहृष्टेनान्तरात्मना ॥ ५८
प्रोवाच मुनिशार्दूलमिदं वचनमर्थवत् ।
न मे मन्युर्महाभाग पूतौ स्वो भगवंस्त्वया ५९
संवृतौ यौवनस्थौ स्वो वपुष्मंतौ बलान्वितौ
प्रतोदेन व्रणा ये मे सभार्यस्य त्वया कृताः ६०
तान्न पश्यामि गात्रेषु स्वस्थोस्मि सह भार्यया
इमां च देवीं पश्यामि वपुषाऽप्सरसोपमाम्
श्रिया परमया युक्तां तथा दृष्टां पुरा मया ।
तव प्रसादसंवृत्तमिदं सर्वं महामुने ॥ ६२
नैतच्चित्रं तु भगवंस्त्वयि सत्यपराक्रम ।
इत्युक्तः प्रत्युवाचैनं कुशिकं च्यवनस्तदा ६३
आगच्छेथाः सभार्यश्च त्वमिहेति नराधिप ।
इत्युक्तः समनुज्ञातो राजर्षिरभिवाद्य तम् ६४
प्रययौ वपुषा युक्तो नगरं देवराजवत् ।
तत एनमुपाजग्मुरमात्याः सपुरोहिताः ६५
बलस्था गणिकायुक्ताः सर्वाः प्रकृतयस्तथा ।
तैर्वृतः कुशिको राजा श्रिया परमया ज्वलन्
प्रविवेश पुरं हृष्टः पूज्यमानोऽथ बंदिभिः ।
ततः प्रविश्य नगरं कृत्वा पौर्वाह्णिकीः क्रियाः
भुक्त्वा सभार्यो रजनीमुवास स महाद्युतिः

ततस्तु तौ नवमभिवीक्ष्य यौवन
परस्परं विगतरुजाविवामरौ ।
ननन्दतुः शयनगतौ वपुर्धरौ
श्रिया युतौ द्विजवरदत्तया तदा ६७
अथाप्यृषिर्भृगुकुलकीर्तिवर्धन-
स्तपोधनो वनमभिराममृद्धिमत् ।
मनीषया बहुविधरत्नभूषितं
ससर्ज यत्न पुरि शतक्रतोरपि ॥ ६८

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि च्यवनकुशिकसंवादे त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥



इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्रिपञ्चाशत्तमोऽध्याय ॥ ५३ ॥

५४

भीष्म उवाच ।

ततः स राजा राज्यन्ते प्रतिबुद्धो महामनाः
कृतपूर्वाह्णिकः प्रायात्सभार्यस्तद्वनं प्रति ॥ १
ततो ददर्श नृपतिः प्रासादं सर्वकाञ्चनम् ।
मणिस्तम्भसहस्राढ्यं गन्धर्वनगरोपमम् ।
तत्र दिव्यानभिप्रायान्ददर्श कुशिकस्तदा ॥ २
पर्वतान् रूप्यसानूंश्च नलिनीश्च स पङ्कजाः ।
चित्रशालाश्च विविधास्तोरणानि च भारत
शाद्वलोपचितां भूमिं तथा काञ्चनकुट्टिमाम् ३
सहकारान्प्रफुल्लांश्च केतकोद्दालकान्वरान् ।
अशोकान्सहकुन्दांश्च फुल्लांश्चैवातिमुक्तकान्
चम्पकांस्तिलकान् भव्यान्पनसान्वंजुलानपि
पुष्पितान्कर्णिकारांश्च तत्र तत्र ददर्श ह ॥ ५
श्यामान्वारणपुष्पांश्च तथाऽष्टपदिका लताः ।
तत्र तत्र परिक्लप्ता ददर्श स महीपतिः ॥ ६
रम्यान्पद्मोत्पलधरान्सर्वर्तुकुसुमांस्तथा ।
विमानप्रतिमांश्चापि प्रासादान्शैलसन्निभान्
शीतलानि च तोयानि क्वचिदुष्णानि भारत
आसनानि विचित्राणि शयनप्रवराणि च ॥ ८
पर्यङ्कान् रत्नसौवर्णान्परार्ध्यास्तरणावृतान् ।
भक्ष्यं भोज्यमनन्तं च तत्र तत्रोपकल्पितम् ९
वाणीवादाञ्छुकांश्चैव सारिकान्भृङ्गराजकान्
कोकिलाञ्छतपत्रांश्च सकोयष्टिककुक्कुभान् १०
मयूरान्क्रकुटांश्चापि दात्यूहान् जीवजीवकान्
चकोरान्वानरान्हंसान्सारसांश्चक्रसाह्वयान् ॥
समन्ततः प्रमुदितान्ददर्श सुमनोहरान् ।
क्वचिदप्सरसां संघान् गन्धर्वाणां च पार्थिव
कान्ताभिरपरांस्तत्र परिष्वक्तान्ददर्श ह ।
न ददर्श च तान्भूयो ददर्श च पुनर्नृपः ॥ १३
गीतध्वनिं सुमधुरं तथैवाध्यापनध्वनिम् ।
हंसान्सुमधुरांश्चापि तत्र शुश्राव पार्थिवः १४
तं दृष्ट्वाऽत्यद्भुतं राजा मनसाऽचिन्तयत्तदा ।
स्वप्नोऽयं चित्तविभ्रंश उताहो सत्यमेव तु १५
अहो सह शरीरेण प्राप्तोऽस्मि परमां गतिम् ।
उत्तरान्वा कुरून्पुण्यानथवाऽप्यमरावतीम् १६
किञ्चेदं महदाश्चर्यं संपश्यामीत्यचिन्तयत् ।
एवं संचिन्तयन्नेव ददर्श मुनिपुङ्गवम् ॥ १७
तस्मिन्विमाने सौवर्णे मणिस्तम्भसमाकुले ।
महार्हे शयने दिव्ये शयानं भृगुनन्दनम् १८
तमभ्ययात्प्रहर्षेण नरेन्द्रः सह भार्यया ।
अन्तर्हितस्ततो भूयश्च्यवनः शयनं च तत् १९
ततोऽन्यस्मिन्वनोद्देशे पुनरेव ददर्श तम् ।
कौश्यां बृस्यां समासीनं जपमानं महाव्रतम्
एवं योगबलाद्विप्रो मोहयामास पार्थिवम् ।
क्षणेन तद्वनं चैव ते चैवाप्सरसां गणाः २१
गन्धर्वाः पादपाश्चैव सर्वमन्तरधीयत ।
निःशब्दमभवच्चापि गङ्गाकूलं पुनर्नृप ॥ २२
कुशवल्मीकभूयिष्ठं बभूव च यथा पुरा ।
ततः स राजा कुशिकः सभार्यस्तेन कर्मणा
विस्मयं परमं प्राप्तस्तद्दृष्ट्वा महदद्भुतम् ।
ततः प्रोवाच कुशिको भार्यां हर्षसमन्वितः २४
पश्य भद्रे यथा भावाश्चित्रा दृष्टाः सुदुर्लभाः ।
प्रसादाद्भृगुमुख्यस्य किमन्यत्र तपोबलात् २५
तपसा तदवाप्यं हि यत्तु शक्यं मनोरथैः ।
त्रैलोक्यराज्यादपि हि तप एव विशिष्यते २६
तपसा हि सुतप्तेन शक्यो मोक्षस्तपोबलात्
अहो प्रभावो ब्रह्मर्षेश्च्यवनस्य महात्मनः २७
इच्छयैष तपोवीर्यादन्याँल्लोकान्सृजेदपि ।
ब्राह्मणा एव जायेरन्पुण्यवाग्बुद्धिकर्मणः २८
उत्सहेदिह कृत्वैव कोऽन्यो वै च्यवनादृते ।
ब्राह्मण्यं दुर्लभं लोके राज्यं हि सुलभ नरैः २९
ब्राह्मण्यस्य प्रभावाद्धि रथे युक्तौ स्वधुर्यवत् ।
इत्येवं चिन्तयानः स विदितश्च्यवनस्य वै ३०
संप्रेक्ष्योवाच नृपतिं क्षिप्रमागम्यतामिति ।
इत्युक्तः सहभार्यस्तु सोऽभ्यगच्छन्महामुनिम्
शिरसा वन्दनीयं तमवन्दत च पार्थिवः ।
तस्याशिषः प्रयुज्याथ स मुनिस्तं नराधिपम्
निषीदेत्यब्रवीद्धीमान्सान्त्वयन्पुरुषर्षभः ॥ ३२
ततः प्रकृतिमापन्नो भार्गवो नृपते नृपम् ।
उवाच श्लक्ष्णया वाचा तर्पयन्निव भारत ३३
राजन्सम्यग्जितानीह पञ्च पञ्च स्वयं त्वया ।
मनःषष्ठानीन्द्रियाणि कृच्छ्रान्मुक्तोऽसि तेन वै ॥

तत इति ॥ १ ॥

सम्यगाराधितः पुत्र त्वया प्रवदतां वर।
न हि ते वृजिनं किञ्चित्सुसूक्ष्ममपि विद्यते३५
अनुजानीहि मां राजन्गमिष्यामि यथागतम्।
प्रीतोस्मि तव राजेन्द्र वरश्च प्रतिगृह्यताम्३६

कुशिक उवाच।

अग्निमध्ये गतेनेव भगवन्सन्निधौ मया।
वर्तितं भृगुशार्दूल यन्न दग्धोऽस्मि तद्वहु ३७
एष एव वरो मुख्यः प्राप्तो मे भृगुनन्दन।
यत्प्रीतोऽसि मया ब्रह्मन् कुलं त्रातं च मेऽनघ
एष मेऽनुग्रहो विप्र जीविते च प्रयोजनम्।
एतद्राज्यफलं चैव तपसश्च फलं मम॥ ३९
यदि त्वं प्रीतिमान्विप्र मयि वै भृगुनन्दन।
अस्ति मे संशयः कश्चित्तन्मे व्याख्यातुमर्हसि

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि च्यवनकुशिकसंवादे चतुष्पञ्चाशत्तमोऽध्यायः॥ ५४॥

५५

च्यवन उवाच।

वरश्च गृह्यतां मत्तो यश्च ते संशयो हृदि।
न ब्रूहि नरश्रेष्ठ सर्वं सम्पादयामि ते॥ १

कुशिक उवाच।

यदि प्रीतोसि भगवंस्ततो मे वद भार्गव।
कारणं श्रोतुमिच्छामि मद्गृहे वासकारितम्
शयन चैकपार्श्वेन दिवसानेकविंशतिम्।
अकिञ्चिदुक्त्वा गमन बहिश्च मुनिपुङ्गव॥३
अन्तर्धानमकस्माच्च पुनरेव च दर्शनम्।
पुनश्च शयनं विप्र दिवसानेकविंशतिम्॥ ४
तैलाभ्यक्तस्य गमनं भोजनं च गृहे मम।
समुपानीय विविधं यद्दग्धं जातवेदसा॥ ५
निर्याणं च रथेनाशु सहसा यत्कृतं त्वया।
धनानां च विसर्गस्य वनस्यापि च दर्शनम् ६
प्रासादानां बहूनां च काञ्चनानां महामुने।
मणिविद्रुमपादानां पर्यङ्काणां च दर्शनम्॥ ७
पुनश्चादर्शन तस्य श्रोतुमिच्छामि कारणम्।
अतीव ह्यत्र मुह्यामि चिन्तयानो भृगूद्वह॥ ८
न चैवाऽधिगच्छामि सर्वस्यास्य विनिश्चयम्
एतदिच्छामि कात्स्न्येन सत्यं श्रोतुं तपोधन

च्यवन उवाच।

शृणु सर्वमशेषेण यदिदं येन हेतुना।
न हि शक्यमनाख्यातुमेव पृष्टेन पार्थिव॥१०
पितामहस्य वदतः पुरा देवसमागमे।
श्रुतवानस्मि यद्राजंस्तन्मे निगदतः शृणु ११
ब्रह्मक्षत्रविरोधेन भविता कुलसङ्करः।
पौत्रस्ते भविता राजंस्तेजोवीर्यसमन्वितः १२
ततस्ते कुलनाशार्थमहं त्वां समुपागतः।
चिकीर्षन्कुशिकोच्छेदं संदिधक्षुः कुल तव१३
ततोऽहमागम्य पुरे त्वामवोचं महीपते।
नियमं कञ्चिदारप्स्ये शुश्रूषा क्रियतामिति १४
न च ते दुष्कृतं किञ्चिदहमासादयं गृहे।
तेन जीवसि राजर्षे न भवेथास्त्वमन्यथा १५
एवं बुद्धिं समास्थाय दिवसानेकविंशतिम्।
सुप्तोस्मि यदि मां कश्चिद्बोधयेदिति पार्थिव
यदा त्वया सभार्येण संसुप्तो न प्रबोधितः।
अहं तदैव ते प्रीतो मनसा राजसत्तम॥ १७
उत्थाय चास्मि निष्क्रांतो यदि मां त्व महीपते
पृच्छेः क्व यास्यसीत्येवं शपेयं त्वामिति प्रभो॥
अन्तर्हितः पुनश्चास्मि पुनरेव च ते गृहे।
योगमास्थाय संसुप्तो दिवसानेकविंशतिम् १९
क्षुधितौ मामसूयेथां श्रमाद्वेति नराधिप।
एवं बुद्धिं समास्थाय कर्शितौ वां क्षुधा मया

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चतुष्पञ्चाशत्तमोऽध्याय॥ ५४॥

५५

वरश्चेति—

न च तेऽभूत्सुसूक्ष्मोऽपि मन्युर्मनसि पार्थिव।
सभार्यस्य नरश्रेष्ठ तेन ते प्रीतिमानहम् ॥ २१
भोजनं च समानाय्य यत्तदा दीपितं मया।
कुद्ध्येथा यदि मात्सर्यादिति तन्मर्षितं च मे
ततोऽहं रथमारुह्य त्वामवोचं नराधिप।
सभार्यो मां वहस्वेति तच्च त्वं कृतवांस्तथा २३
अविशङ्को नरपते प्रीतोऽहं चापि तेन ह।
धनोत्सर्गोऽपि च कृते न त्वां क्रोधः प्रधर्षयत
ततः प्रीतेन ते राजन् पुनरेतत्कृतं तव।
सभार्यस्य वनं भूयस्तद्विद्धि मनुजाधिप २५
प्रीत्यर्थं तव चैतन्मे स्वर्गसंदर्शनं कृतम्।
यत्ते वनेऽस्मिन्नृपते दृष्टं दिव्यं निदर्शनम् २६
स्वर्गोद्देशस्त्वया राजन् सशरीरेण पार्थिव।
मुहूर्तमनुभूतोऽसौ सभार्येण नृपोत्तम ॥ २७
निदर्शनार्थं तपसो धर्मस्य च नराधिप।
तत्र याऽऽसीत्स्पृहा राजंस्तच्चापि विदितं मया
ब्राह्मण्यं काङ्क्षसे हि त्वं तपश्च पृथिवीपते।
अवमन्य नरेंद्रत्वं देवेन्द्रत्वं च पार्थिव ॥ २९

एवमेतद्यथाऽऽत्थ त्वं ब्राह्मण्यं तात दुर्लभम्।
ब्राह्मणे सति चर्षित्वमृषित्वे च तपस्विता ३०
भविष्यत्येष ते कामः कुशिकात्कौशिको द्विजः
तृतीयं पुरुषं ×तुभ्यं ब्राह्मणत्वं गमिष्यति ३१
वंशस्ते पार्थिवश्रेष्ठ भृगूणामेव तेजसा।
पौत्रस्ते भविता विप्र तपस्वी पावकद्युतिः ३२
यः स देवमनुष्याणां भयमुत्पादयिष्यति।
त्रयाणामेव लोकानां सत्यमेतब्रवीमि ते ॥ ३३
वरं गृहाण राजर्षे यत्ते मनसि वर्तते।
तीर्थयात्रां गमिष्यामि पुरा कालोऽभिवर्तते

कुशिक उवाच।

एष एव वरो मेऽद्य यस्त्वं प्रीतो महामुने
भवत्वेतद्यथाऽऽत्थ त्वं भवेत्पौत्रो ममानघ ३५
ब्राह्मण्यं मे कुलस्यास्तु भगवन्नेष मे वरः।
पुनश्चाख्यातुमिच्छामि भगवन्विस्तरेण वै ३६
कथमेष्यति विप्रत्वं कुलं मे भृगुनन्दन।
कश्चासौ भविता बन्धुर्मम कश्चापि संमतः ३७

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि च्यवनकुशिकसंवादो नाम पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥

५६

च्यवन उवाच।

अवश्य कथनीय मे तवैतन्नरपुङ्गव।
यदर्थं त्वाहमुच्छेत्तुं संप्राप्तो मनुजाधिप ॥ १
भृगूणां क्षत्रिया याज्या नित्यमेतज्ञनाधिप।
ते च भेदं गमिष्यन्ति दैवयुक्तेन हेतुना ॥ २
क्षत्रियाश्च भृगून्सर्वान्वधिष्यन्ति नराधिप।
आ गर्भादनुकृन्तन्तो दैवदण्डनिपीडिताः ३
तत उत्पत्स्यतेऽस्माक कुले गोत्रविवर्धनः।
ऊर्वो नाम महातेजा ज्वलनार्कसमद्युतिः ॥ ४
स त्रैलोक्यविनाशाय कोपाग्निं जनयिष्यति
महीं सपर्वतवनां यः करिष्यति भस्मसात् ५
कश्चित्कालं तु वह्निं च स एव शमयिष्यति।
समुद्रे वडवावक्त्रे प्रक्षिप्य मुनिसत्तमः ॥ ६
पुत्रं तस्य महाराज ऋचीकं भृगुनन्दनम्।
साक्षात्कृत्स्नो धनुर्वेदः समुपस्थास्यतेऽनघ ७
क्षत्रियाणामभावाय दैवयुक्तेन हेतुना।
स तु तं प्रतिगृह्यैव पुत्रे संक्रामयिष्यति ॥ ८
जमदग्नौ महाभागे तपसा भावितात्मनि।
स चापि भृगुशार्दूलस्तं वेदं धारयिष्यति ॥ ९

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चपञ्चाशत्तमोऽध्याय ॥ ५५ ॥

५६

अवश्यमिति ॥ १ ॥

× अडभाव आर्षः × त्वत

कुलात्तु तव धर्मात्मन्कन्यां सोऽधिगमिष्यति
उद्भावनार्थं भवतो वंशस्य भरतर्षभ ॥ १०
गाधेर्दुहितर प्राप्य पौत्रीं तव महातपाः ।
ब्राह्मणं क्षत्रधर्माणं पुत्रमुत्पादयिष्यति ॥ ११
क्षत्रियं विप्रकर्माणं बृहस्पतिमिवौजसा ।
विश्वामित्रं तव कुले गाधेः पुत्रं सुधार्मिकम् १२
तपसा महता युक्तं प्रदास्यति महाद्युते ।
स्त्रियौ तु कारणं तत्र परिवर्ते भविष्यतः ॥ १३
पितामहनियोगाद्वै नान्यथैतद्भविष्यति ।
तृतीये पुरुषे तुभ्य ब्राह्मणत्वमुपैष्यति ।
भविता त्व च संबंधी भृगूणां भावितात्मनाम्

भीष्म उवाच ।

कुशिकस्तु मुनेर्वाक्यं च्यवनस्य महात्मनः।
श्रुत्वा हृष्टोऽभवद्राजा वाक्यं चेदमुवाच ह ॥
एवमस्त्विति धर्मात्मा तदा भरतसत्तम ।
च्यवनस्तु महातेजाः पुनरेव नराधिपम् १६
वरार्थे चोदयामास तमुवाच स पार्थिवः ।
बाढमेवं करिष्यामि कामं त्वत्तो महामुने १७
ब्रह्मभूत कुलं मेऽस्तु धर्मे चास्य मनो भवेत् १८
एवमुक्तस्तथेत्येवं प्रत्युक्त्वा च्यवनो मुनिः ।
अभ्यनुज्ञाय नृपतिं तीर्थयात्रां ययौ तदा १९
एतत्ते कथितं सर्वमशेषेण मया नृप ।
भृगूणां कुशिकानां च अभिसम्बन्धकारणम्
यथोक्तमृषिणा चापि तदा तद्भवन्नृप ।
जन्म रामस्य च मुनेर्विश्वामित्रस्य चैव हि २१

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि च्यवनकुशिकसंवादे षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥



५७

युधिष्ठिर उवाच ।

मुह्यामीव निशम्याद्य चिन्तयानः पुनः पुनः
हीनां पार्थिवसंघातैः श्रीमद्भिः पृथिवीमिमाम्
प्राप्य राज्यानि शतशो महीं जित्वाऽथ भारत
कोटिशः पुरुषान्हत्वा परितप्ये पितामह २
का नु तासां वरस्त्रीणां समवस्था भविष्यति
या हीनाः पतिभिः पुत्रैर्भ्रातृभिस्तथा ३
वयं हि तान्कुरून्हत्वा ज्ञातींश्च सुहृदोऽपि वा
अवाक्शीर्षाः पतिष्यामो नरके नात्र संशयः
शरीरं योक्तुमिच्छामि तपसोग्रेण भारत ।
उपादिष्टमिहेच्छामि तत्त्वतोऽहं विशांपते ॥ ५

वैशम्पायन उवाच ।

युधिष्ठिरस्य तद्वाक्य श्रुत्वा भीष्मो महामनाः
परीक्ष्य निपुणं बुद्ध्या युधिष्ठिरमभाषत ॥ ६
रहस्यमद्भुतं चैव शृणु वक्ष्यामि यत्त्वयि ।
या गतिः प्राप्यते येन प्रेत्यभावे विशांपते ७
तपसा प्राप्यते स्वर्गस्तपसा प्राप्यते यशः ।
आयुःप्रकर्षो भोगाश्च लभ्यन्ते तपसा विभो ८
ज्ञानं विज्ञानमारोग्यं रूपं संपत्तथैव च ।
सौभाग्यं चैव तपसा प्राप्यते भरतर्षभ ॥ ९
धनं प्राप्नोति तपसा मौनेनाज्ञां प्रयच्छति ।
उपभोगांस्तु दानेन ब्रह्मचर्येण जीवितम् ॥ १०
अहिंसायाः फलं रूपं दीक्षाया जन्म वै कुले
फलमूलाशिनां राज्यं स्वर्गः पर्णाशिना भवेत
पयोभक्षो दिवं याति दानेन द्विविणाधिकः ।
गुरुशुश्रूषया विद्या नित्यश्राद्धेन संततिः १२

आख्यायिकातात्पर्यं सङ्गृह्णाति-यथोक्तमिति । ब्राह्मण्यस्यापि रामस्य कौर्यं, क्षत्रियस्यापि विश्वामित्रस्य ब्राह्मण्यमिति वैपरीत्यं प्राकृतर्क्षसङ्कल्पानुपारादेव न त्वन्यथा स्वभावविपर्ययोऽस्तीति भाव ॥ २१ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षट्पञ्चाशत्तमोऽध्याय ॥ ५६ ॥

५७

एव ब्राह्मण्यस्यातिश्रेष्ठत्वेऽपि दौर्लभ्य क्षत्रियधर्मस्य हिंसात्वेन स्वस्य निन्द्यत्वं मन्वान शङ्कते—मुह्यामीत्यादिना । त्वदुक्तं निशम्य तस्य तात्पर्यं चिन्तयान ॥१॥ वीरधर्मस्य श्रेष्ठ्यं विवक्षुस्तपआदीना तावत्प्राशस्त्य दर्शयन् भीष्म उवाच—रहस्यमित्यादिना । या गति फल येन साधनेन प्रेत्यभावे मरणानन्तरम् ॥ ६ ॥ मौनेन जगदाज्ञाकारी भवतीत्यर्थ । जीवितं आयु ॥ १० ॥

गवाह्नयः शाकदीक्षाभिः स्वर्गमाहुस्तृणाशिनां
स्त्रियस्त्रिषवणं स्नात्वा वायुं पीत्वा क्रतुं लभेत्
नित्यस्नायी भवेद्दक्षः सन्ध्ये तु द्वे जपन्द्विजः
मरुं साधयतो राजन्नाकपृष्ठमनाशके ॥ १४
स्थंडिले शयमानानां गृहाणि शयनानि च ।
चीरवल्कलवासोभिर्वासांस्याभरणानि च
शय्यासनानि यानानि योगयुक्ते तपोधने ।
अग्निप्रवेशे नियतं ब्रह्मलोके महीयते ॥ १६
रसानां प्रतिसंहारात्सौभाग्यमिह विन्दति ।
आमिषप्रतिसंहारात्प्रजा ह्यायुष्मती भवेत् ॥
उदवासं वसेद्यस्तु स नराधिपतिर्भवेत् ।
सत्यवादी नरश्रेष्ठ दैवतैः सह मोदते ॥ १८
कीर्तिर्भवति दानेन तथाऽऽरोग्यमहिंसया ।
द्विजशुश्रूषया राज्यं द्विजत्वं चापि पुष्कलम्
पानीयस्य प्रदानेन कीर्तिर्भवति शाश्वती ।
अन्नस्य तु प्रदानेन तृप्यन्ते कामभोगतः ॥ २०
सान्त्वदः सर्वभूतानां सर्वशोकैर्विमुच्यते ।
देवशुश्रूषया राज्यं दिव्यं रूपं नियच्छति २१
दीपालोकप्रदानेन चक्षुष्मान्भवते नरः ।
प्रेक्षणीयप्रदानेन स्मृतिं मेधां च विन्दति २२
गन्धमाल्यप्रदानेन कीर्तिर्भवति पुष्कला ।
केशश्मश्रु धारयतामग्र्या भवति संततिः॥२३
उपवासं च दीक्षां च अभिषेकं च पार्थिव ।
कृत्वा द्वादशवर्षाणि वीरस्थानाद्विशिष्यते २४
दासीदासमलङ्कारान्क्षेत्राणि च गृहाणि च ।
ब्रह्मदेयां सुतां दत्त्वा प्राप्नोति मनुजर्षभ ॥ २५
क्रतुभिश्चोपवासैश्च त्रिदिवं याति भारत ।
लभते च शिवं ज्ञान फलपुष्पप्रदो नरः २६

सुवर्णशृङ्गैस्तु विराजितानां
गवां सहस्रस्य नरः प्रदानात् ।
प्राप्नोति पुण्यं दिवि देवलोक-
मित्येवमाहुर्दिवि देवसंघाः ॥ २७
प्रयच्छते यः कपिलां सवत्सां
कास्योपदोहां कनकाग्रशृङ्गीम् ।
तैस्तैर्गुणैः कामदुहास्य भूत्वा
नरं प्रदातारमुपैति सा गौः ॥ २८
यावन्ति रोमाणि भवन्ति धेन्वा-
स्तावत्कालं प्राप्य स गोप्रदानात् ।
पुत्रांश्च पौत्रांश्च कुलं च सर्व-
मासप्तमं तारयते परत्र ॥ २९
सदाक्षिणां काञ्चनचारुशृङ्गी
कांस्योपदोहां द्रविणोत्तरीयाम् ।
धेनुं तिलानां ददतो द्विजाय
लोका वसूनां सुलभा भवन्ति ॥ ३०
स्वकर्मभिर्मानवं संनिरुद्धं
तीव्रान्धकारे नरके पतन्तम् ।
महार्णवे नौरिव वायुयुक्ता
दानं गवां तारयते परत्र ॥ ३१
यो ब्रह्मदेयां तु ददाति कन्या
भूमिप्रदानं च करोति विप्रे ।
ददाति चान्नं विधिवच्च यश्च
स लोकमाप्नोति पुरन्दरस्य ॥ ३२
नैवेशिकं सर्वगुणोपपन्नं
ददाति वै यस्तु नरो द्विजाय ।
स्वाध्यायचारित्र्यगुणान्विताय
तस्यापि लोकाः कुरुषूत्तरेषु ॥ ३३
धुर्यप्रदानेन गवां तथा वै
लोकानवाप्नोति नरो वसूनाम् ।
स्वर्गाय चाहुस्तु हिरण्यदान
ततो विशिष्टं कनकप्रदानम् ॥ ३४
छत्रप्रदानेन गृहं वरिष्ठ
यान तथोपानहसंप्रदाने ।
वस्त्रप्रदानेन फल स्वरूपं
गंधप्रदानात्सुरभिर्नरः स्यात् ॥ ३५
पुष्पोपगं वाऽथ फलोपगं वा
यः पादपं स्पर्शयते द्विजाय ।
सश्रीकमृद्धं बहुरत्नपूर्णं
लभत्ययत्नोपगतं गृहं वै ॥ ३६

क्रतुं प्रजापतिं प्राणायामै प्रजापतिलोक प्राप्नोतीत्यर्थ १३ दक्षोऽपि प्रजापतिविशेष मरुं अनुदक अनाशक अनाहार ॥ १४ ॥ प्रतिसंहारात्त्यागात् ॥ १७ ॥ उपवास सर्वभोगत्याग दीक्षा जपादिनियमस्वीकार अभिषेकस्त्रिषवण स्नान त्रयाणा समुच्चय ॥ २४ ॥ शिवं बन्धविच्छेदहेतुर्ज्ञान फलपुष्पादिना परमेश्वराराधनात्प्राप्यत इत्यर्थ ॥ २६ ॥ नैवेशिक गृहोपस्करं शय्यादि ॥ ३३ ॥ उपानहेत्यदन्तत्वमार्षम् ॥ ३५ ॥

भक्ष्यान्नपानीयरसप्रदाता
सर्वान्समाप्नोति रसान्प्रकामम् ।
प्रतिश्रयाच्छादनसंप्रदाता
प्राप्नोति तान्येव न संशयोऽत्र ॥ ३७
स्रग्धूपगन्धाननुलेपनानि
स्नानानि माल्यानि च मानवो यः ।
दद्याद्द्विजेभ्यः स भवेदरोग-
स्तथाभिरूपश्च नरेन्द्रलोके ॥ ३८
बीजैरशून्यं शयनैरुपेत
दद्याद्गृह यः पुरुषो द्विजाय ।
पुण्याभिरामं बहुरत्नपूर्ण
लभत्यधिष्ठानवरं स राजन् ॥ ३९
सुगन्धचित्रास्तरणोपधानं
दद्यान्नरो यः शयनं द्विजाय ।
रूपान्वितां पक्षवतीं मनोज्ञां
भार्यामयत्नोपगतां लभेत्सः ॥ ४०
पितामहस्यानवरो वीरशायी भवेन्नरः ।
नाधिकं विद्यते यस्मादित्याहुः परमर्षयः ४१

वैशम्पायन उवाच ।

तस्य तद्वचनं श्रुत्वा प्रीतात्मा कुरुनन्दनः
नाश्रमेऽरोचयद्वासं वीरमार्गाभिकाक्षया ४२
ततो युधिष्ठिरः प्राह पांडवान्पुरुषर्षभ ।
पितामहस्य यद्वाक्यं तद्वो रोचत्विति प्रभुः
ततस्तु पांडवाः सर्वे द्रौपदी च यशस्विनी ।
युधिष्ठिरस्य तद्वाक्यं बाढमित्यभ्यपूजयन् ४४

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि
सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

५८

युधिष्ठिर उवाच ।

आरामाणां तडागानां यत्फल कुरुपुङ्गव ।
तदहं श्रोतुमिच्छामि त्वत्तोऽद्य भरतर्षभ ॥ १

भीष्म उवाच ।

सुप्रदर्शा बलवती चित्रा धातुविभूषिता ।
उपेता सर्वभूतैश्च श्रेष्ठा भूमिरिहोच्यते ॥ २
तस्याः क्षेत्रविशेषाश्च तडागानां च बन्धनम् ।
औदकानि च सर्वाणि प्रवक्ष्याम्यनुपूर्वशः ३
तडागानां च वक्ष्यामि कृतानां चापि ये गुणाः
त्रिषु लोकेषु सर्वत्र पूजनीयस्तडागवान् ॥ ४
अथवा मित्रसदनं मैत्रं मित्रविवर्धनम् ।
कीर्तिसञ्जननं श्रेष्ठं तडागानां निवेशनम् ॥ ५
धर्मस्यार्थस्य कामस्य फलमाहुर्मनीषिणः ।
तडागसुकृतं देशे क्षेत्रमेक महाश्रयम् ॥ ६
चतुर्विधानां भूतानां तडागमुपलक्षयेत ।
तडागानि च सर्वाणि दिशन्ति श्रियमुत्तमाम्
देवा मनुष्यगन्धर्वाः पितरोरगराक्षसाः ।
स्थावराणि च भूतानि संश्रयन्ति जलाशयम्
तस्मात्तांस्ते प्रवक्ष्यामि तडागे ये गुणाः स्मृताः
या च तत्र फलावाप्तिर्ऋषिभिः समुदाहृता ९

अविष्ठानवर ध्रुवपदम् ॥ ३९ ॥ पक्षवतीं महाकुलोद्भवाम् ॥ ४० ॥ तात्पर्यमाह-**पितामहस्येति** अनवर समान यस्मात् पितामहात् ॥ ४१ ॥ **तस्येति** । यज्ञादिष्वरुचिं वीरमार्गे चापेक्षा लेभे इत्यर्थ ॥ ४२ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तपञ्चाशत्तमोऽध्याय ॥ ५७ ॥

५८

एवं विशोकीकृत स्वस्थश्च राजा सर्ववर्णसाधारणान् वनसाधान्धर्मास्तावत्पृच्छति-**आरामाणामिति** ॥ १ ॥ बलवती बहुसस्योत्पादिका ॥ २ ॥ औदकानि खातानि तडागानि ॥ ३ ॥ त्रिषु पृथिव्यन्तरिक्षस्वर्गेषु तडागवान् तडागकृत् ॥ ४ ॥ मित्राणा सदनमिवोपकारक सस्योत्पादनादिना मैत्र मित्रस्य सूर्यस्येदं प्रीतिकर मित्राणा देवाना विवर्धनं पोषकम् ॥ ५ ॥ क्षेत्रवृद्धिहेतुत्वात्तडाग महाश्रयमुपलक्षयेदित्युत्तरेणापि सम्बन्ध ॥ ६ ॥

* भीष्म उवाच इति पाठ ।

वर्षाकाले तडागे तु सलिलं यस्य तिष्ठति ।
अग्निहोत्रफलं तस्य फलमाहुर्मनीषिणः ॥ १०
शरत्काले तु सलिलं तडागे यस्य तिष्ठति ।
गोसहस्रस्य स प्रेत्य लभते फलमुत्तमम् ॥११
हेमन्तकाले सलिलं तडागे यस्य तिष्ठति ।
स वै बहुसुवर्णस्य यज्ञस्य लभते फलम् ॥ १२
यस्य वै शैशिरे काले तडागे सलिलं भवेत् ।
तस्याग्निष्टोमयज्ञस्य फलमाहुर्मनीषिणः ॥ १३
तडागं सुकृतं यस्य वसंते तु महाश्रयम् ।
अतिरात्रस्य यज्ञस्य फल स समुपाश्नुते ॥ १४
निदाघकाले पानीयं तडागे यस्य तिष्ठति ।
वाजिमेधफलं तस्य फलं वै मुनयो विदुः १५
स कुलं तारयेत्सर्वं यस्य खाते जलाशये ।
गावः पिबन्ति सलिलं साधवश्च नराः सदा ॥
तडागे यस्य गावस्तु पिबन्ति तृषिता जलम्
मृगपक्षिमनुष्याश्च सोऽश्वमेधफलं लभेत् १७
यत्पिबन्ति जलं तत्र स्नायन्ते विश्रमन्ति च ।
तडागे यस्य तत्सर्वं प्रेत्यानन्त्याय कल्पते १८
दुर्लभं सलिलं तात विशेषेण परत्र वै ।
पानीयस्य प्रदानेन प्रीतिर्भवति शाश्वती १९
तिलान्ददत पानीयं दीपान्ददत जाग्रत ।
ज्ञातिभिः सह मोदध्वमेतत्प्रेत्य सुदुर्लभम् २०
सर्वदानैर्गुरुतरं सर्वदानैर्विशिष्यते ।
पानीयं नरशार्दूल तस्माद्दातव्यमेव हि २१
एवमेतत्तडागस्य कीर्तितं फलमुत्तमम् ।
अत ऊर्ध्वं प्रवक्ष्यामि वृक्षाणामवरोपणम्॥ २२
स्थावराणां च भूतानां जातयः षट् प्रकीर्तिताः
वृक्षगुल्मलतावल्यस्त्वक्सारास्तृणजातयः ॥
एता जात्यस्तु वृक्षाणां तेषां रोपे गुणास्त्विमे
कीर्तिश्च मानुषे लोके प्रेत्य चैव फल शुभम् ॥
लभते नाम लोके च पितृभिश्च महीयते ।
देवलोके गतस्यापि नाम तस्य न नश्यति२५
अतीतानागते चोभे पितृवंशं च भारत ।
तारयेद्वृक्षरोपी च तस्माद्वृक्षांश्च रोपयेत् ॥ २६
तस्य पुत्रा भवन्त्येते पादपा नात्र सशयः ।
परलोकगतः स्वर्गे लोकांश्चाप्नोति सोऽव्ययान्
पुष्पैः सुरगणान्वृक्षाः फलैश्चापि तथा पितॄन्
छायया चातिथिं तात पूजयन्ति महीरुहः२८
किन्नरोरगरक्षांसि देवगन्धर्वमानवाः ।
तथा ऋषिगणाश्चैव संश्रयन्ति महीरुहान्२९
पुष्पिताः फलवन्तश्च तर्पयन्तीह मानवान् ।
वृक्षद पुत्रवद्वृक्षास्तारयन्ति परत्र तु ॥ ३०
तस्मात्तडागे सद्वृक्षा रोप्याः श्रेयोर्थिना सदा
पुत्रवत्परिपाल्याश्च पुत्रास्ते धर्मतः स्मृताः ॥
तडागकृद्वृक्षरोपी इष्टयज्ञश्च यो द्विजः ।
एते स्वर्गे महीयन्ते ये चान्ये सत्यवादिनः ३२
तस्मात्तडागं कुर्वीत आरामांश्चैव रोपयेत् ।
यजेच्च विविधैर्यज्ञैः सत्यं च सततं वदेत्॥ ३३

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि आरामतडागवर्णनं नाम अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

५९

युधिष्ठिर उवाच ।
यानीमानि बहिर्वेद्या दानानि परिचक्षते । तेभ्यो विशिष्टं किं दानं मतं ते कुरुपुङ्गव ॥ १

वृक्षा. वटादय. गुल्मा कुशस्तम्बादय लता वृक्षाद्यारूढा पाटल्यादय वल्य भूम्या प्रतता कूष्माण्डादय त्वक्सारा वेष्वादयः तृणजातय उलपादय ॥ २३ ॥ **पुत्रास्ते धर्मतः स्मृता इति** । अपुत्रेणावश्यं पुत्रफलार्थिना तडागा आरामाश्च कर्तव्या इति दर्शितम् ॥ ३१ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टपञ्चाशत्तमोऽध्याय ॥५८॥

५९

दातार कथ दानमन्वेतीति पृच्छति—**यानीति** । दातृप्रतिग्रहीत्रो परलोके सम्बन्धाभावादिति भाव· ॥ १॥

कौतूहलं हि परमं तत्र मे विद्यते प्रभो।
दातारं दत्तमन्वेति यद्दानं तत्प्रचक्ष्व मे ॥ २

भीष्म उवाच।

अभयं सर्वभूतेभ्यो व्यसने चाप्यनुग्रहः।
यच्चाभिलषितं दद्यात्तृषितायाभियाचते ॥ ३
दत्तं मन्येत यद्दत्वा तद्दानं श्रेष्ठमुच्यते।
दत्तं दातारमन्वेति यद्दानं भरतर्षभ ॥ ४
हिरण्यदानं गोदानं पृथिवीदानमेव च।
एतानि वै पवित्राणि तारयन्त्यपि दुष्कृतम् ५
एतानि पुरुषव्याघ्र साधुभ्यो देहि नित्यदा।
दानानि हि नरं पापान्मोक्षयन्ति न संशयः ६
यद्यदिष्टतमं लोके यच्चास्य दयितं गृहे।
तत्तद्गुणवते देयं तदेवाक्षयमिच्छता ॥ ७
प्रियाणि लभते नित्यं प्रियदः प्रियकृत्तथा।
प्रियो भवति भूतानामिह चैव परत्र च ॥ ८
याचमानमभीमानादनासक्तमकिञ्चनम्।
यो नार्चति यथाशक्ति स नृशंसो युधिष्ठिर ९
अमित्रमपि चेद्दीनं शरणैषिणमागतम्।
व्यसने योऽनुगृह्णाति स वै पुरुषसत्तमः ॥ १०
कृशाय कृतविद्याय वृत्तिक्षीणाय सीदते।
अपहन्यात्क्षुधां यस्तु न तेन पुरुषः समः ॥ ११
क्रियानियमितान्साधून् पुत्रदारैश्च कर्शितान्
अयाचमानान्कौन्तेय सर्वोपायैर्निमन्त्रयेत १२
आशिषं ये न देवेषु न च मर्त्येषु कुर्वते।
अर्हन्तो नित्यसन्तुष्टास्तथा लब्धोपजीविनः
आशीविषसमेभ्यश्च तेभ्यो रक्षस्व भारत।
तान्युक्तैरुपजिज्ञास्यस्तथा द्विजवरोत्तमान् ॥
कृतैरावसथैर्नित्यं संप्रेष्यैः सपरिच्छदैः।
निमन्त्रयेथाः कौरव्य सर्वकामसुखावहैः १५
यदि ते प्रतिगृह्णीयुः श्रद्धापूतं युधिष्ठिर।
कार्यमित्येव मन्वाना धार्मिकाः पुण्यकर्मिणः॥
विद्यास्नाता व्रतस्नाता ये व्यपाश्रित्य जीविनः
गूढस्वाध्यायतपसो ब्राह्मणाः संशितव्रताः १७
तेषु शुद्धेषु दान्तेषु स्वदारपरितोषिषु।
यत्करिष्यसि कल्याणं तत्ते लोके युधांपते॥
यथाग्निहोत्रं सुहुतं सायंप्रातर्द्विजातिना।
तथा दत्तं द्विजातिभ्यो भवत्यथ यतात्मसु १९
एष ते विततो यज्ञः श्रद्धापूतः सदक्षिणः।
विशिष्टः सर्वयज्ञेभ्यो ददतस्तात वर्तताम् २०
निवापदानसलिलस्तादृशेषु युधिष्ठिर।
निवसन्पूजयंश्चैव तेष्वानृण्यं नियच्छति ॥ २१
य एवं नैव कुप्यन्ते न लुभ्यन्ति तृणेष्वपि।
त एव नः पूज्यतमा ये चापि प्रियवादिनः २२
एते न बहु मन्यन्ते न प्रवर्तन्ति चापरे।
पुत्रवत्परिपाल्यास्ते नमस्तेभ्यस्तथाऽभयम् ॥
ऋत्विक्पुरोहिताचार्या मृदुब्रह्मधरा हि ते।
क्षात्रेणापि हि संसृष्टं तेजः शाम्यति वै द्विजे
अस्ति मे बलवानस्मि राजास्मीति युधिष्ठिर
ब्राह्मणान्मा च पर्यश्रीर्वासोभिरशनेन च २५
यच्छोभार्थं बलार्थं वा वित्तमस्ति तवानघ।
तेन ते ब्राह्मणाः पूज्याः स्वधर्ममनुतिष्ठता ॥
नमस्कार्यास्तथा विप्रा वर्तमाना यथातथम्।
यथासुखं यथोत्साहं ललन्तु त्वयि पुत्रवत् २७
को ह्यक्षयप्रसादानां सुहृदामल्पतोषिणाम्।
वृत्तिमर्हत्यवक्षेतुं त्वदन्यः कुरुसत्तम ॥ २८

अभयमिति। यथा स्वय कस्मैचिदभय दीयते व्यसने वाऽनुग्रह क्रियते स पुन काले सति सामर्थ्ये आनृण्यार्थं स्वस्मै अभयं ददात्यनुग्रह च करोति एवं परत्रापीत्यर्थ ॥ ३ ॥ यद्दत्वा दत्तं मन्येत नत्विद मदीय दानमिति मन्यते स आस्तिक श्रद्धावान्दानफलं लभत इत्यर्थ. ॥४॥ अभीमानात् अतिममर्थोऽयमित्यभिमानं स्वमनस्येव कृत्वा याचमानम् ॥९॥ कृशायेत्यादिचतुर्थी षष्ठ्यर्थे ॥११॥ क्रियानियमितान् स्वधर्मयन्त्रितान् ॥ १२ ॥ येऽन्नार्थं देवादीन्नार्थयन्ते तेभ्य आत्मानं रक्षस्वेत्युक्तम् तत्र रक्षणप्रकारमाह—**तानिति**। युक्तैश्चारै मुक्तैरिति पाठे निसृष्टैर्नरै उपजिज्ञास्य निमन्त्रयेथा इति सम्बन्ध ॥१४॥ आवसथैरावसथादिसमर्पणेन ॥१५॥ **कार्यमिति**। धर्मार्थमेव धर्मं कुर्वन्ति न तु फलान्तरार्थमिति भाव ॥ १६ ॥ व्यपाश्रित्य प्रभोराश्रयमकृत्वा जीवितुं स्वभावा ॥ १७ ॥ ददत दातुस्तव वर्तता सर्वदाऽस्तु ॥ २० ॥ यज्ञविशेषण **निवापदानसलिल इति**। निवाप पितृतर्पणं तद्वदेव दानादि यस्मिन्स तथा तादृशेषु निवसन् तानाश्रित्य स्थित सन् आनृण्य देवादीना निवापो दानसदृश इति पाठे दानं महादानम् ॥ २१ ॥ एते दातार न बहु मन्यन्ते नि स्पृहत्वात् तेभ्यो नमोऽस्तु तथाऽभयमस्तु तयोभयमिति पाठे तेभ्यस्तुष्टेभ्यो रुष्टेभ्यश्च उभयं स्वर्गो नरकश्च भवतीति शेषः ॥ २३ ॥ मृदव शिष्येषु स्नेहवत्त्वात् ते च ते ब्रह्मधराश्च वेदधरा क्षात्रेण संसृष्टमपि ब्राह्मं तेज शाम्यति शान्ते द्विजेऽदीप्यमान अस्त्येवेत्यर्थ ॥ २४॥ मा पर्यश्री परित्यज्य मा भुङ्क्ष्व ॥ २५ ॥ ते त्वया ॥ २६ ॥ ललन्तु रमन्ताम् ॥ २७ ॥ अवक्षेतुं समर्पितुम् ॥ २८ ॥

यथा पत्याश्रयो धर्मः स्त्रीणां लोके सनातनः।
सदैव सा गतिर्नान्या तथाऽस्माकं द्विजातयः
यदि नो ब्राह्मणास्तात सन्त्यजेयुरपूजिताः।
पश्यन्तो दारुणं कर्म सततं क्षत्रिये स्थितम् ॥
अवेदानामयज्ञानामलोकानामवर्तिनाम्।
कस्तेषां जीवितनार्थस्त्वां विना ब्राह्मणाश्रयं
अत्र ते वर्तयिष्यामि यथा धर्मं सनातनम्।
राजन्यो ब्राह्मणान् राजन्पुरा परिचचार ह ॥
वैश्यो राजन्यमित्येव शूद्रो वैश्यमिति श्रुतिः
दुराच्छूद्रेणोपचर्यो ब्राह्मणोऽग्निरिव ज्वलन् ॥
संस्पर्शपरिचर्यस्तु वैश्येन क्षत्रियेण च।
मृदुभावान्सत्यशीलान्सत्यधर्मानुपालकान् ॥
आशीविषानिव क्रुद्धांस्तानुपाचरत द्विजान्।
अपरेषां परेषां च परेभ्यश्चापि ये परे ॥ ३५
क्षत्रियाणां प्रतपतां तेजसा च बलेन च।
ब्राह्मणेष्वेव शाम्यन्ति तेजांसि च तपांसि च
न मे पिता प्रियतरो न त्वं तात तथा प्रियः।
न मे पितुः पिता राजन्न चात्मा न च जीवितम्
त्वत्तश्च मे प्रियतरः पृथिव्यां नास्ति कश्चन।
त्वत्तोऽपि मे प्रियतरा ब्राह्मणा भरतर्षभ॥ ३८
ब्रवीमिं सत्यमेतच्च यथाऽहं पाण्डुनन्दन।
तेन सत्येन गच्छेयं लोकान्यत्र च शान्तनुः ॥
पश्येयं च सतां लोकाञ्छुचीन्ब्रह्मपुरस्कृतान्।
तत्र मे तात गन्तव्यमन्हाय च चिराय च ४०
सोऽहमेतादृशान्लोकान्दृष्ट्वा भरतसत्तम।
यन्मे कृतं ब्राह्मणेषु न तप्ये तेन पार्थिव ॥ ४१

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि
एकोनषष्टितमोऽध्यायः ॥ ५९ ॥

६०

युधिष्ठिर उवाच।
यौ च स्यातां चरणेनोपपन्नौ
यौ विद्यया सदृशौ जन्मना च।
ताभ्यां दानं कतमस्मै विशिष्ट-
मयाचमानाय च याचते च ॥ १

भीष्म उवाच।
श्रेयो वै याचतः पार्थ दानमाहुर्याचते।
अर्हत्तमो वै धृतिमान्कृपणादधृतात्मनः ॥ २
क्षत्रियो रक्षणधृति-
र्ब्राह्मणोऽनर्थनाधृतिः।
ब्राह्मणो धृतिमान्विद्वा-
न्देवान्प्रीणाति तुष्टिमान् ॥ ३
याच्यमाहुरनीशस्य अभिहारं च भारत।
उद्वेजयन्ति याचन्ति सदा भूतानि दस्युवत
म्रियते याचमानो वै न जातु म्रियते ददत्।
ददत्सञ्जीवयत्येनमात्मान च युधिष्ठिर ॥ ५
आनृशंस्य परो धर्मो याचते यत्प्रदीयते।
अयाचतः सीदमानान्सर्वोपायैर्निमन्त्रयेत् ॥ ६
यदि वै तादृशा राष्ट्रान्वसेयुस्ते द्विजोत्तमाः
भस्मच्छन्नानिवाग्नींस्तान्बुध्येथास्त्व प्रयत्नतः
तपसा दीप्यमानास्ते दहेयुः पृथिवीमपि।
अपूज्यमानाः कौरव्य पूजार्हास्तु तथाविधाः
पूज्या हि ज्ञानविज्ञानतपोयोगसमन्विताः।
तेभ्यः पूजां प्रयुञ्जीथा ब्राह्मणेभ्यः परंतप ॥ ९
ददद्बहुविधान्दायानुपागच्छन्नयाचताम्।
यदग्निहोत्रे सुहुते सायप्रातर्भवेत्फलम् ॥ १०
विद्यावेदव्रतवति तद्दानफलमुच्यते।
विद्यावेदव्रतस्नातानद्यपाश्रयजीविनः ॥ ११

अवर्तिना अवृत्तीना आर्यो गुण अकीर्तिनामिति पाठे व्रीह्यादित्वादिनि अकीर्तिमताम् ॥ ३१ ॥ पुरा पूर्वम् ॥ ३२ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकोनषष्टितमोऽध्याय ॥ ५९ ॥

६०

यौ चेति। चरणेनाचरणेन ॥ १ ॥ अयाचत श्रैष्ठ्यमाह द्वाभ्याम्—**श्रेय इति** ॥ २ ॥ अनर्थना अयाच्ञा ॥ ३ ॥ याच्य याचनारूप कर्म अनीशस्य दरिद्रस्य अभिहार तिरस्कारमाह। यदा यत याचन्ति याचमानानि भूतानि दस्युवल्लोकानुद्वेजयन्ति ॥ ४ ॥ राष्ट्रान् राष्ट्रम् ॥ ७ ॥ ददित्यर्थ। अयाचता अयाचमानाना उपागच्छन्समीपमुपसर्पन् दायान्वनादीन् ददत् दाता भवेति शेष ॥ १० ॥

गूढास्वध्यायतपसो ब्राह्मणान्संशितव्रतान्।
कृतैरावसथैर्ह्यैः सप्रेष्यैः सपरिच्छदैः ॥ १२
निमन्त्रयेथाः कौरव्य कामैश्चान्यैर्द्विजोत्तमान्।
अपि ते प्रतिगृह्णीयुः श्रद्धोपेतं युधिष्ठिर ॥ १३
कार्यमित्येव मन्वाना
धर्मज्ञाः सूक्ष्मदर्शिनः।
अपि ते ब्राह्मणा भुक्त्वा
गताः सोद्धरणान् गृहान् ॥ १४
येषां दाराः प्रतीक्षन्ते पर्जन्यमिव कर्षकाः।
अन्नानि प्रातःसवने नियता ब्रह्मचारिणः १५
ब्राह्मणास्तात भुञ्जानास्तेताग्निं प्रीणयन्त्युत।
माध्यन्दिनं ते सवनं ददतस्तात वर्तताम् १६
गोहिरण्यानि वासांसि तेनेन्द्रः प्रीयतां तव।
तृतीयं सवनं ते वै वैश्वदेवं युधिष्ठिर ॥ १७
यद्देवेभ्यः पितृभ्यश्च विप्रेभ्यश्च प्रयच्छसि।
अहिंसा सर्वभूतेभ्यः संविभागश्च भागशः १८
दमस्त्यागो धृतिः सत्यं भवत्यवभृथाय ते।
एष ते विततो यज्ञः श्रद्धापूतः सदक्षिणः १९
विशिष्टः सर्वयज्ञानां नित्यं तात प्रवर्तताम् ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि
षष्टितमोऽध्यायः ॥ ६० ॥

६१

युधिष्ठिर उवाच।
दान यज्ञः क्रिया चेह किंस्वित्प्रेत्य महाफलम्
कस्य ज्यायः फलं प्रोक्तं कीदृशेभ्यः कथं कदा
एतदिच्छामि विज्ञातुं याथातथ्येन भारत।
विद्वन् जिज्ञासमानाय दानधर्मान्प्रचक्ष्व मे २
अन्तर्वेद्यां च यद्दत्तं श्रद्धया चानृशंस्यतः।
किंस्विन्नैःश्रेयसं तात तन्मे ब्रूहि पितामह ३

भीष्म उवाच।
रौद्रं कर्म क्षत्रियस्य सतत तात वर्तते।
तस्य वैतानिकं कर्म दानं चैवेह पावनम् ॥ ४
न तु पापकृतां राज्ञां प्रतिगृह्णन्ति साधवः।
एतस्मात्कारणाद्यज्ञैर्यजेद्राजाऽऽप्तदक्षिणैः ५
अथ चेत्प्रतिगृह्णीयुर्दद्यादहरहर्नृपः।
श्रद्धामास्थाय परमां पावनं ह्येतदुत्तमम् ॥ ६
ब्राह्मणांस्तर्पयन्द्रव्यैस्ततो यज्ञे यतव्रतः।
मैत्रान् साधून्वेदविदः शीलवृत्ततपोर्जितान्७
यत्ते तेन करिष्यन्ति कृतं तेन भविष्यति।
यज्ञान्साधय साधुभ्यः स्वाद्वन्नान्दक्षिणावतः
इष्टं दत्तं च मन्येथा आत्मानं दानकर्मणा।
पूजयेथा यायजूकांस्तवाप्यंशो भवेद्यथा ॥ ९
प्रजावतो भरेथाश्च ब्राह्मणान् बहुकारिणः।
प्रजावांस्तेन भवति यथा जनयिता तथा १०
यावतः साधुधर्मान्वै सन्तः संवर्धयन्त्युत।
सर्वस्वैश्चापि भर्तव्या नरा ये बहुकारिणः ११
समृद्धः संप्रयच्छ त्वं ब्राह्मणेभ्यो युधिष्ठिर।
धेनूरनडुहोऽन्नानि च्छत्रं वासास्युपानहौ १२

अपीति।सोद्धरणान्स्वामिन्यागते दास्यामीति याचमानेभ्यो बालकेभ्य आशाप्रदर्शनमुद्धरण तत्साहितान् अत एव दारास्तेषा प्रतीक्षन्त इत्युक्तम् ॥ १४ ॥ एष ते विततो यज्ञ इति प्रागुक्त यज्ञं सवनत्रयकल्पनया व्याचष्टे —**अन्नानीत्यादिना** ॥ १५ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षष्टितमोऽध्याय ॥ ६० ॥

६१

दानमिति। यज्ञ क्रियेत्येक यज्ञरूपा क्रियेत्यर्थ। कीदृशेभ्यो दानं कथं यज्ञक्रियेति। कदेत्युभयत्र सम्बन्ध ॥ १ ॥ आनृशस्यतो बाहिर्वेद्या दानम् ॥ ३ ॥ यज्ञादानस्याधिक्यं वर्णयति—**न त्विति द्वाभ्याम्** ॥ ५ ॥ एतद्दानम् ॥ ६ ॥ तपोर्जितान् सन्विरार्ष ॥ ७ ॥ यद्यदि ते ब्राह्मणास्ते तव न करिष्यन्ति प्रतिग्रहमिति शेषः। तर्हि कृतं सुकृत ते तव न भविष्यति तदा सुकृतोत्पत्यर्थं यज्ञान् साधय ॥ ८ ॥ **इष्टमिति**। दाने यज्ञादिकमन्तर्भवति याज्ञिकेभ्यो दत्तं चेत्तत्कृतस्य यज्ञस्य श्रेयोंऽशस्तवापि भविष्यतीति न यज्ञार्थमत्युत्सुको भूरित्यर्थ ॥ ९ ॥ जनयिता प्रजापति ॥ १० ॥धर्मान् पञ्चातिथिभि समेत एव भोक्ष्ये इत्यादीन् ये सन्त सवर्धयन्ति ते सर्वस्वैर्भर्तव्या राज्ञा तस्य राज्ञस्ते सन्तो बहुकारिणोऽत्यन्तमुपकर्तारो भवन्ति ॥ ११ ॥

आज्यानि यजमानेभ्यस्तथाऽन्नानि च भारत
अश्ववन्ति च यानानि वेश्मानि शयनानि च
एते देया व्युष्टिमन्तो लघूपायाश्च भारत।
अजुगुप्सांश्च विज्ञाय ब्राह्मणान् वृत्तिकर्शितान्
उपच्छन्नं प्रकाशं वा वृत्त्या तान्प्रतिपालयेत्।
राजसूयाश्वमेधाभ्यां श्रेयस्तत्क्षत्रियान्प्रति १५
एवं पापैर्विनिर्मुक्तस्त्वं पूतः स्वर्गमाप्स्यसि।
सञ्चयित्वा पुनः कोशं यद्राष्ट्रं पालयिष्यसि
तेन त्वं ब्रह्मभूयत्वमवाप्स्यसि धनानि च।
आत्मनश्च परेषां च वृत्तिं संरक्ष भारत १७
पुत्रवच्चापि भृत्यान्स्वान् प्रजाश्च परिपालय।
योगः क्षेमश्च ते नित्यं ब्राह्मणेष्वस्तु भारत १८
तदर्थं जीवितं तेऽस्तु मा तेभ्योऽप्रतिपालनम्
अनर्थो ब्राह्मणस्यैष यद्वित्तनिचयो महान् १९
श्रिया ह्यभीक्ष्णं संवासो दर्पयेत्सप्रमोहयेत्।
ब्राह्मणेषु प्रमूढेषु धर्मो विप्रणशेद्ध्रुवम्।
धर्मप्रणाशे भूतानामभावः स्यान्न संशयः २०
यो रक्षिभ्यः संप्रदाय राजा राष्ट्रं विलुंपति
यज्ञे राष्ट्राद्धनं तस्मादानयध्वमिति ब्रुवन् ॥२१
यच्चादाय तदाज्ञप्तं भीतं दत्तं सुदारुणम्।
यजेद्राजा न तं यज्ञं प्रशंसन्त्यस्य साधवः २२
अपीडिताः सुसंवृद्धा ये ददत्यनुकूलतः।
तादृशेनाप्युपायेन यष्टव्यं नोद्यमाहृतैः॥ २३
यदा परिनिषिच्येत निहितो वै यथाविधि।
तदा राजा महायज्ञैर्यजेत बहुदक्षिणैः॥ २४
वृद्धबालधनं रक्ष्यमन्धस्य कृपणस्य च।
न खातपूर्वं कुर्वीत न रुदन्ती धनं हरेत् ॥ २५
हृतं कृपणवित्तं हि राष्ट्रं हन्ति नृपश्रियम्।
दद्याच्च महतो भोगान् क्षुद्रय प्रणुदेत्सताम् ॥
येषां स्वादूनि भोज्यानि समवेक्ष्यन्ति बालकाः
नाश्नन्ति विधिवत्तानि किं नु पापतरं ततः॥
यदि ते तादृशो राष्ट्रे विद्वान्सीदेत्क्षुधा द्विजः
भ्रूणहत्यां च गच्छेथाः कृत्वा पापमिवोत्तमम्
धिक्तस्य जीवितं राज्ञो राष्ट्रे यस्यावसीदति
द्विजोन्यो वा मनुष्योपि शिबिराह वचो यथा
यस्य स्म विषये राज्ञः स्नातकः सीदति क्षुधा
अवृद्धिमेति तद्राष्ट्रं विन्दते सहराजकम् ॥३०
क्रोशन्त्यो यस्य वै राष्ट्राच्छ्रियंते तरसा स्त्रियः
क्रोशतां पतिपुत्राणां मृतोऽसौ न च जीवति
अरक्षितारं हर्तारं विलोप्तारमनायकम्।
त वै राजकृलि हन्युः प्रजाः सन्नह्य निर्घृणम्
अहं वो रक्षितेत्युक्त्वा यो न रक्षति भूमिपः
स संहत्य निहन्तव्यः श्वेव सोन्माद आतुरः॥
पापं कुर्वन्ति यत्किञ्चित्प्रजा राज्ञा ह्यरक्षिताः
चतुर्थं तस्य पापस्य राजा विन्दति भारत३४
अथाहुः सर्वमेवैति भूयोधर्ममिति निश्चयः।
चतुर्थं मतमस्माकं मनोः श्रुत्वाऽनुशासनम् ३५
शुभं वा यच्च कुर्वन्ति प्रजा राज्ञा सुरक्षिताः
चतुर्थं तस्य पुण्यस्य राजा चाप्नोति भारत॥
जीवन्तं त्वाऽनुजीवन्तु प्रजाः सर्वा युधिष्ठिर
पर्जन्यमिव भूतानि महाद्रुममिवाण्डजाः ३७
कुबेरमिव रक्षांसि शतक्रतुमिवामराः।
ज्ञातयस्त्वाऽनुजीवन्तु सुहृदश्च परन्तप॥ ३८

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि
एकषष्टितमोऽध्यायः ॥ ६१ ॥



देया दानानि व्युष्टि समृद्धि ॥ १४ ॥ ब्रह्मणो भूय भावोस्यास्ति स ब्राह्मणो ब्रह्मभूयस्तस्य भावो ब्रह्मभूयत्व ब्राह्मणत्वम् ॥ १७ ॥ य इति। युग्मम्। यो राजा रक्षिभ्य संग्रहपरेभ्यो धन दत्वा यज्ञे यज्ञार्थं धनमानयध्वमिति ब्रुवन् राष्ट्रं विलुंपति ॥ २१ ॥ यच्चासौ तत् धनिभिर्भीत भययुक्तं यथा स्यात्तथा दत्तं प्रजाभ्य आदाय मुदारुणं यथा स्यात्तथा यजेत यज्ञ न प्रशसन्ति ॥२२ ॥ उद्यम प्रजापीडनात्मकोऽतियत्न ॥२३॥ निहितः प्रजानां नितरा हितो राजा यदा प्रजाभि पूर्णोद्रिक्ताभिर्निषिच्येत धनैरभिषिच्येत ॥ २४ ॥ खातपूर्व धन न कुर्वीत अनावृष्टौ कूपोदकनिष्पादितैर्धान्यैर्जीवता धनं स्वाधीनं न कुर्वीतेत्यर्थ ॥२५॥ समवेक्ष्यन्त्येव न तु लभंते ॥२७॥ सह युगपत् राजकं राजसमूहं प्रतिपक्षभूत विन्दते ॥ ३० ॥ सर्वं पापं गति राजानम् ॥ ३५॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकषष्टितमोऽध्याय ॥ ६१ ॥

६२

युधिष्ठिर उवाच ।

इदं देयमिदं देयमिति यं श्रुतिरादरात् ।
बहुदेयाश्च राजानः किंस्विदानमनुत्तमम् ॥ १

भीष्म उवाच ।

अतिदानानि सर्वाणि पृथिवी दानमुच्यते
अचला ह्यक्षया भूमिर्दोग्ध्री कामानिहोत्तमान्
दोग्ध्री वासांसि रत्नानि पशून्व्रीहियवांस्तथा
भूमिदः सर्वभूतेषु शाश्वतीरधते समाः ॥ ३
यावद्भूमेरायुरिह तावद्भूमिद एधते ।
न भूमिदानादस्तीह परं किञ्चिद्युधिष्ठिर ॥ ४
अप्यत्र प्रददुः सर्वे पृथिव्या इति नः श्रुतम् ।
भूमिमेव ददुः सर्वे भूमिं ते भुञ्जते जनाः ॥ ५
स्वकर्मैवोपजीवन्ति नरा इह परत्र च ।
भूमिर्भूतिर्महादेवी दातारं कुरुते प्रियम् ॥ ६
य एतां दक्षिणां दद्यादक्षयां राजसत्तम ।
पुनर्नरत्वं संप्राप्य भवेत्स पृथिवीपतिः ॥ ७
यथा दानं तथा भोग इति धर्मेषु निश्चयः ।
संग्रामे वा तनुं जह्याद्दद्याच्च पृथिवीमिमाम् ८
इत्येतत्क्षत्रबन्धूनां वदन्ति परमां श्रियम् ।
पुनाति दत्ता पृथिवी दातारमिति शुश्रुम ॥ ९
अपि पापसमाचारं ब्रह्मघ्नमपि चानृतम् ।
सैव पापं प्लावयति सैव पापात्प्रमोचयेत् १०
अपि पापकृतां राज्ञां प्रतिगृह्णन्ति साधवः ।
पृथिवीं नान्यदिच्छन्ति पावन जननी यथा ॥
नामास्याः प्रियदत्तेति गुह्यं देव्याः सनातनम्
दानं वाऽप्यथवाऽऽदान नामास्याः प्रथमप्रियं
य एतां विदुषे दद्यात्पृथिवीं पृथिवीपतिः ।
पृथिव्यामेतदिष्टं स राजा राज्यमितो व्रजेत् ॥
पुनश्चासौ जनिं प्राप्य राजवत् स्यान्न संशयः
तस्मात्प्राप्यैव पृथिवी दद्याद्विप्राय पार्थिवः ॥
नाभूमिपतिना भूमिरधिष्ठेया कथञ्चन ।
न चापात्रेण वा ग्राह्या दत्तदाने न चाचरेत् ॥
ये चान्ये भूमिमिच्छेयुः कुर्युरेवं न संशयः ।
यः साधोर्भूमिमादत्ते न भूमिं विन्दते तु सः ॥
भूमिं दत्वा तु साधुभ्यो विन्दते भूमिमुत्तमाम्
प्रेत्य चेह च धर्मात्मा संप्राप्नोति महद्यशः ॥
यस्य विप्रास्तु शंसन्ति साधोर्भूमिं सदैव हि
न तस्य शत्रवो राजन् प्रशंसन्ति वसुन्धराम्
यत्किञ्चित्पुरुषः पापं कुरुते वृत्तिकर्शितः ।
अपि गोचर्ममात्रेण भूमिदानेन पूयते ॥ १९
येऽपि संकीर्णकर्माणो राजानो रौद्रकर्मिणः
तेभ्यः पवित्रमाख्येयं भूमिदानमनुत्तमम् २०
अत्रापान्तरमिदं शश्वत्पुराणा मेनिरे जनाः ।
यो यजेताश्वमेधेन दद्याद्वा साधवे महीम् २१
अपि चेत्सुकृतं कृत्वा शङ्करेणापि पण्डिताः ।
अशक्यमेकमेवैतद्भूमिदानमनुत्तमम् ॥ २२
सुवर्णं रजतं वस्त्रं मणिमुक्तावसूनि च ।
सर्वमेतन्महाप्राज्ञो ददाति वसुधां ददत् ॥ २३
तपो यज्ञः श्रुतं शीलमलोभः सत्यसन्धता ।
गुरुदैवतपूजा च एता वर्तन्ति भूमिदम् ॥ २४
भर्तृनिःश्रेयसे युक्तास्त्यक्तात्मानो रणे हताः ।
ब्रह्मलोकगताः सिद्धा नातिक्रामन्ति भूमिदं
यथा जनित्री स्वं पुत्रं क्षीरेण भरते सदा ।
अनुगृह्णाति दातारं तथा सर्वरसैर्मही ॥ २६
मृत्युर्वैकिङ्करो दण्डस्तमो वन्हिः सुदारुणः ।
घोराश्च दारुणाः पाशा नोपसर्पन्ति भूमिदम्
पितॄंश्च पितृलोकस्थान्देवलोकाश्च देवताः ।
सन्तर्पयति शान्तात्मा यो ददाति वसुन्धरां

६२

इदमिति ॥ १ ॥ कामानेवाह—दोग्ध्रीति ॥३॥ प्रिय स्वपतिम् ॥ ६ ॥ तदेवाह— य इति ॥ ७ ॥ प्रियेण प्रियाय वा दत्तेति योगात्तस्या दानमादानं वा कुर्वन् प्रियदत्ताया अस्या प्रियो भवतीत्यर्थ । नामेति नामार्थं उभयरूप उच्यते ॥ १२ ॥ एतत्पृथ्वीदानम् ॥१३॥ दत्तदाने दत्तदेशे न चाचरेन्न सचरेत् न वा गूहेदन्तर्धानेन चाचरेदिति पाठे तु भूमिदान दानान्तरवन्न गूहनीयं किन्तु प्रख्यापयेदेवेत्याह—न चेति । अन्तर्धानेन चाचरेत् भूमिमुपविश्य दानमाचरेत् ॥ १५ ॥ शसन्ति अमुकदत्ते गृहे तिष्ठाम इति कथयन्ति ॥ १८ ॥ सप्तहस्तेन दण्डेन त्रिंशद्दण्डानिवर्तनम । दश तान्येव गोचर्म दत्वा स्वर्गे महीयते ॥ १९ ॥ अर्पितदानान्तरबद्भूमिदाने पुण्योत्पत्तौ शङ्कैव नास्तीत्यर्थ ॥ २२ ॥ एता एतानि सुपो व्यादेश वर्तन्ति अनुसरन्ति ॥ २४ ॥ वैकिंकर विपरीतं कुत्सितं च करोति वैकिंकर कालस्तत्सबंधी कालमृत्युरित्यर्थ ॥ २७ ॥

कृशाय म्रियमाणाय वृत्तिग्लानाय सीदते ।
भूमिं वृत्तिकरीं दत्वा सत्री भवति मानवः २९
यथा धावति गौर्वत्सं स्रवन्ती वत्सला पयः
एवमेव महाभाग भूमिर्भवति भूमिदम् ॥ ३०
फालकृष्टां मही दत्वा सबीजां सफलामपि ।
उदीर्णे वापि शरणं यथा भवति कामदः॥ ३१
ब्राह्मणं वृत्तिसंपन्नमाहिताग्निं शुचिव्रतम् ।
नरः प्रतिग्राह्य महीं न याति परमापदम् ३२
यथा चन्द्रमसो वृद्धिरहन्यहनि जायते ।
तथा भूमिकृतं दानं सस्ये सस्ये विवर्धते ३३
अत्र गाथा भूमिगीताः कीर्तयन्ति पुराविदः ।
याः श्रुत्वा जामदग्न्येन दत्ता भूः काश्यपाय वै
मामेवादत्त मां दत्त मा दत्वा मामवाप्स्यथ ।
अस्मिन् लोके परे चैव तद्दत्तं जायते पुनः ३५
य इमां व्याहृतिं वेद ब्राह्मणो वेदसंमिताम् ।
श्राद्धस्य क्रियमाणस्य ब्रह्मभूयं स गच्छति ॥
कृत्यानामधिशस्तानामरिष्टशमन महत् ।
प्रायश्चित्तं महीं दत्वा पुनात्युभयतो दश ३७
पुनाति य इदं वेद वेदवादं तथैव च ।
प्रकृतिः सर्वभूतानां भूमिर्वैश्वानरी मता ३८
अभिषिच्यैव नृपतिं श्रावयेदिममागमम् ।
यथा श्रुत्वा मही दद्यात्सादद्यात्साधुनश्च ताम्
सोऽयं कृत्स्नो ब्राह्मणार्थो राजार्थश्चाप्यसशयः
राजा हि धर्मकुशलः प्रथमं भूतिलक्षणम् ४०
अथ येषामधर्मज्ञो राजा भवति नास्तिकः ।
न ते सुखं प्रबुध्यन्ति न सुखं प्रस्वपन्ति च४१
सदा भवन्ति चोद्विग्नास्तस्य दुश्चरितैर्नराः ।
योगक्षेमा हि बहवो राष्ट्र नास्याविशंति तत
अथ येषां पुनः प्राज्ञो राजा भवति धार्मिकः
सुखं ते प्रतिबुध्यन्ते सुसुख प्रस्वपन्ति च ॥४३
तस्य राज्ञः शुभै राज्यैः कर्मभिर्निर्वृता नराः ।
योगक्षेमेण वृष्ट्या च विवर्धन्ते स्वकर्मभिः४४
स कुलीनः स पुरुषः स बन्धुः स च पुण्यकृत
स दाता स च विक्रांतो यो ददाति वसुधराम्
आदित्या इव दीप्यन्ते तेजसा भुवि मानवाः
ददन्ति वसुधां स्फीतां ये वेदविदुषि द्विजे४६
यथा सस्यानि रोहन्ति प्रकीर्णानि महीतले ।
तथा कामाः प्ररोहन्ति भूमिदानसमार्जिताः
आदित्यो वरुणो विष्णुर्ब्रह्मा सोमो हुताशनः
शूलपाणिश्च भगवान् प्रतिनन्दन्ति भूमिदम्४८
भूमौ जायन्ति पुरुषा भूमौ निष्ठां व्रजन्ति च ।
चतुर्विधो हि लोकोऽयं योऽयं भूमिगुणात्मकः
एषा माता पिता चैव जगतः पृथिवीपते ।
नानया सदृशं भूतं किञ्चिदस्ति जनाधिप ५०
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
बृहस्पतेश्च संवादमिन्द्रस्य च युधिष्ठिर ५१
इष्ट्वा क्रतुशतेनाथ महता दक्षिणावता ।
मघवा वाग्विदां श्रेष्ठं पप्रच्छेदं बृहस्पतिं ५२

मघवोवाच ।

भगवन् केन दानेन स्वर्गतः सुखमेधते ।
यदक्षयं महार्घं च तद्ब्रूहि वदतां वर ॥ ५३

भीष्म उवाच ।

इत्युक्तः स सुरेन्द्रेण ततो देवपुरोहितः ।
बृहस्पतिर्बृहत्तेजाः प्रत्युवाच शतक्रतुम् ॥ ५४

बृहस्पतिरुवाच ।

सुवर्णदानं गोदान भूमिदान च वृत्रहन् ।
ददतेतान्महाप्राज्ञः सर्वपापैः प्रमुच्यते ५५
न भूमिदानाद्देवेन्द्र परं किञ्चिदिति प्रभो ।
विशिष्टमिति मन्यामि यथा प्राहुर्मनीषिणः५६
ये शूरा निहता युद्धे स्वर्याता रणगृद्धिनः ।
सर्वे ते विबुधश्रेष्ठ नातिक्रामन्ति भूमिदम् ५७
भर्तुर्निःश्रेयसे युक्तास्त्यक्तात्मानो रणे हताः ।
ब्रह्मलोकगता मुक्ता नातिक्रामन्ति भूमिदम्॥
पञ्च पूर्वा हि पुरुषाः षडन्ये वसुधां गताः ।
एकादश ददद्भूमिं परित्रातीह मानवः ॥ ५९
रत्नोपकीर्णां वसुधा यो ददाति पुरदर ।
स मुक्तः सर्वकलुषैः स्वर्गलोके महीयते ॥ ६०
महीं स्फीतां ददद्राजन् सर्वकामगुणान्विताम्
राजाधिराजो भवति तद्धि दानमनुत्तमम्६१
सर्वकामसमायुक्ता काश्यपी यः प्रयच्छति ।
सर्वभूतानि मन्यन्ते मां ददातीति वासव ६२
सर्वकामदुघां धेनुं सर्वकामगुणान्विताम् ।
ददाति यः सहस्राक्ष स्वर्गं याति स मानवः

सत्री सत्रकृत् ॥ २९ ॥ उदीर्णे महत् शरण गृहम् ॥३१॥ ब्रह्मभूयं बृहत्त्वं फलमिति यावत् । गच्छति प्राप्नोति ॥३६॥ कृत्यानामन्त्रमयीना मारणार्थशक्तीना अधिशस्ताना प्रबलाना संबंधि यदरिष्ट तच्छमनम् ॥३७॥इदं भूमिदान यो वेदवादं भूमिवाक्य यो वेद सोऽपि पुनाति दशपुरुषानिति शेष ॥ ३८ ॥ भूतिलक्षण ऐश्वर्यसूचकम् ॥ ४० ॥

मधुसर्पिःप्रवाहिण्यः पयोदधिवहास्तथा ।
सरितस्तर्पयन्तीह सुरेन्द्र वसुधाप्रदम् ६४
भूमिप्रदानान्नृपतिर्मुच्यते सर्वकिल्बिषात् ।
न हि भूमिप्रदानेन दानमन्यद्विशिष्यते ६५
ददाति यः समुद्रान्तां पृथिवीं शस्त्रनिर्जिताम्
त जनाः कथयन्तीह यावद्भवति गौरियम् ॥
पुण्यामृद्धिरसां भूमिं यो ददाति पुरंदर ।
न तस्य लोकाः क्षीयन्ते भूमिदानगुणान्विताः
सर्वदा पार्थिवेनेह सततं भूतिमिच्छता ।
भूर्देया विधिवच्छक्र पात्रे सुखमभीप्सुना ६८
अपि कृत्वा नरः पापं भूमिं दत्वा द्विजातये
समुत्सृजति तत्पाप जीर्णां त्वचमिवोरगः ६९
सागरान्सरितः शैलान् काननानि च सर्वशः
सर्वमेतन्नरः शक्र ददाति वसुधा ददत् ॥ ७०
तडागान्युदपानानि स्रोतांसि च सरांसि च ।
स्नेहान्सर्वरसांश्चैव ददाति वसुधा ददत् ॥ ७१
ओषधीर्वीर्यसंपन्ना नगान्पुष्पफलान्वितान् ।
काननोपलशैलांश्च ददाति वसुधां ददत् ॥ ७२
अग्निष्टोमप्रभृतिभिरिष्ट्वा च स्वाप्तदक्षिणैः ।
न तत्फलमवाप्नोति भूमिदानाद्यदश्नुते ॥ ७३
दाता दशानुगृह्णाति दश हन्ति तथा क्षिपन् ।
पूर्वदत्तां हरन् भूमिं नरकायोपगच्छति ॥ ७४
न ददाति प्रतिश्रुत्य दत्वाऽपि च हरेत्तु यः ।
स बद्धो वारुणैः पाशैस्तप्यते मृत्युशासनात्
आहिताग्निं सदायज्ञं कृशवृत्तिं प्रियातिथिम्
ये भजन्ति द्विजश्रेष्ठं नोपसर्पन्ति ते यमम् ७६
ब्राह्मणेष्वनृणीभूतः पार्थिवः स्यात्पुरंदर ।
इतरेषां तु वर्णानां तारयेत्कृशदुर्बलान् ॥ ७७
नाच्छिन्द्यात्स्पर्शितां भूमिं परेण त्रिदशाधिप
ब्राह्मणस्य सुरश्रेष्ठ कृशवृत्तेः कदाचन ॥ ७८
यथाऽश्रु पतितं तेषां दीनानामथ सीदताम् ।
ब्राह्मणानां हृते क्षेत्रे हन्यात्त्रिपुरुषं कुलम् ७९
भूमिपालं च्युतं राष्ट्राद्यस्तु संस्थापयेन्नरः ।
तस्य वासः सहस्राक्ष नाकपृष्ठे महीयते ॥८०
इक्षुभिः संततां भूमिं यवगोधूमशालिनीम् ।
गोऽश्ववाहनपूर्णां वा बाहुवीर्योपपार्जिताम्॥
निधिगर्भां ददद्भूमिं सर्वरत्नपरिच्छदाम् ।
अक्षयाँल्लभते लोकान् भूमिसत्रं हि तत्स्मृतम्
विधूय कलुषं सर्वं विरजाः संमतः सताम् ।
लोके महीयते सद्भिर्यो ददाति वसुंधराम् ।
यथाऽप्सु पतितः शक्र तैलबिन्दुर्विसर्पति ।
तथा भूमिकृतं दानं सस्ये सस्ये विवर्धते ८४
ये रणाग्रे महीपालाः शूराः समितिशोभनाः ।
वध्यन्तेऽभिमुखाः शक्र ब्रह्मलोकं व्रजन्ति ते॥
नृत्यगीतपरा नार्यो दिव्यमाल्यविभूषिताः ।
उपतिष्ठन्ति देवेन्द्र तथा भूमिप्रदं दिवि ॥८६
मोदते च सुखं स्वर्गे देवगन्धर्वपूजितः ।
यो ददाति महीं सम्यग्विधिनेह द्विजातये८७
शतमप्सरसश्चैव दिव्यमाल्यविभूषिताः ।
उपतिष्ठन्ति देवेन्द्र ब्रह्मलोके धराप्रदम् ८८
उपतिष्ठन्ति पुण्यानि सदा भूमिप्रदं नरम् ।
शङ्खभद्रासनं छत्रं वराश्वा वरवाहनम् ८९
भूमिप्रदानात्पुष्पाणि हिरण्यनिचयास्तथा ।
आज्ञा सदाऽप्रतिहता जयशब्दा वसूनि च९०
भूमिदानस्य पुण्यानि फलं स्वर्गः पुरंदर ।
हिरण्यपुष्पाश्चौषध्यः कुशकाश्चनशाद्वलाः९१
अमृतप्रसवां भूमिं प्राप्नोति पुरुषो ददत् ।
नास्ति भूमिसमं दानं नास्ति मातृसमो गुरुः
नास्ति सत्यसमो धर्मो नास्ति दानसमो निधिः
एतदाङ्गिरसाच्छ्रुत्वा वासवो वसुधामिमाम् ।
वसुरत्नसमाकीर्णां ददावाङ्गिरसे तदा ९३
य इद श्रावयेच्छ्राद्धे भूमिदानस्य संभवम् ।
न तस्य रक्षसां भागो नासुराणां भवत्युत९४
अक्षय च भवेद्दत्तं पितृभ्यस्तन्न संशयः ।
तस्माच्छ्राद्धेष्विदं विद्वान् भुञ्जतःश्रावयेद्द्विजान्
इत्येतत्सर्वदानानां श्रेष्ठमुक्तं तवानघ ।
मया भरतशार्दूल किं भूयः श्रोतुमिच्छसि९६

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि इन्द्रबृहस्पतिसंवादे द्विषष्टितमोऽध्यायः ॥ ६२ ॥



क्षिपन् हरन् ॥ ७४ ॥ स्पर्शिता दत्ताम् ॥ ७८ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्विषष्टितमोऽध्याय ॥ ६२ ॥

६३

युधिष्ठिर उवाच ।
कानि दानानि लोकेस्मिन्दातुकामो महीपतिः
गुणाधिकेभ्यो विप्रेभ्यो दद्याद्भरतसत्तम ॥ १
केन तुष्यन्ति ते सद्यः किं तुष्टाः प्रदिशन्ति च ।
शंस मे तन्महाबाहो फलं पुण्यकृतं महत् २
दत्तं किं फलवद्राजन्निह लोके परत्र च ।
भवतः श्रोतुमिच्छामि तन्मे विस्तरतो वद ३

भीष्म उवाच ।
इममर्थं पुरा पृष्टो नारदो देवदर्शनः ।
यदुक्तवानसौ वाक्यं तन्मे निगदतः शृणु ४

नारद उवाच ।
अन्नमेव प्रशंसन्ति देवा ऋषिगणास्तथा ।
लोकतन्त्र हि संज्ञाश्च सर्वमन्ने प्रतिष्ठितम् ॥५
अन्नेन सदृशं दानं न भूतं न भविष्यति ।
तस्मादन्नं विशेषेण दातुमिच्छन्ति मानवाः ६
अन्नमूर्जस्करं लोके प्राणाश्चान्ने प्रतिष्ठिताः ।
अन्नेन धार्यते सर्वं विश्वं जगदिदं प्रभो ॥ ७

अन्नाद्गृहस्था लोकेऽस्मिन्
भिक्षवस्तापसास्तथा ।
अन्नाद्भवन्ति वै प्राणाः
प्रत्यक्षं नात्र संशयः ॥ ८

कुटुम्बिने सीदते च ब्राह्मणाय महात्मने ।
दातव्यं भिक्षवे चान्नमात्मनो भूतिमिच्छता
ब्राह्मणायाभिरूपाय यो दद्यादन्नमर्थिने ।
विदधाति निधिं श्रेष्ठं पारलौकिकमात्मनः ॥
श्रान्तमध्वनि वर्तन्तं वृद्धमर्हमुपस्थितम् ।
अर्चयेद्भूतिमन्विच्छन् गृहस्थो गृहमागतम् ॥
क्रोधमुत्पतितं हित्वा सुशीलो वीतमत्सरः ।
अन्नदः प्राप्नुते राजन् दिवि चेह च यत्सुखम्
नावमन्येदभिगतं न प्रणुद्यात्कदाचन ।
अपि श्वपाके शुनि वा न दानं विप्रणश्यति
यो दद्यादपरिक्लिष्टमन्नमध्वनि वर्तते ।
आर्तायाद्दृष्टपूर्वाय स महद्धर्ममाप्नुयात् ॥ १४
पितॄन्देवानृषीन्विप्रानतिथींश्च जनाधिप ।
यो नरः प्रीणयत्यन्नैस्तस्य पुण्यफलं महत् १५
कृत्वाऽतिपातकं कर्म यो दद्यादन्नमर्थिने ।
ब्राह्मणाय विशेषेण न स पापेन युज्यते ॥ १६
ब्राह्मणेष्वक्षयं दानमन्नं शूद्रे महाफलम् ।
अन्नदानं हि शूद्रे च ब्राह्मणे च विशिष्यते ॥
न पृच्छेद्गोत्रचरणं स्वाध्याय देशमेव च ।
भिक्षितो ब्राह्मणेनेह दद्यादन्नं प्रयाचितः ॥१८
अन्नदस्यान्नवृक्षाश्च सर्वकामफलप्रदाः ।
भवन्ति चेह चामुत्र नृपतेर्नात्र संशयः ॥ १९
आशंसन्ते हि पितरः सुवृष्टिमिव कर्षकाः ।
अस्माकमपि पुत्रो वा पौत्रो वाऽन्न प्रदास्यति
ब्राह्मणो हि महद्भूतं स्वय देहीति याचति ।
अकामो वा सकामो वा दत्वा पुण्यमवाप्नुयात्
ब्राह्मणः सर्वभूतानामतिथिः प्रसृताग्रभुक् ।
विप्रा यदधिगच्छन्ति भिक्षमाणा गृह सदा
सत्कृताश्च निवर्तन्ते तदतीव प्रवर्धते ।
महाभागे कुले प्रेत्य जन्म चाप्नोति भारत २३
दत्वा त्वन्न नरो लोके तथा स्थानमनुत्तमम् ।
नित्य मिष्टान्नदायी तु स्वर्गे वसति सत्कृतः
अन्नं प्राणा नराणां हि सर्वमन्ने प्रतिष्ठितम् ।
अन्नदः पशुमान्पुत्री धनवान् भोगवानपि ॥२५
प्राणवाश्चापि भवति रूपवांश्च तथा नृप ।
अन्नदः प्राणदो लोके सर्वदः प्रोच्यते तु सः
अन्नं हि दत्वाऽतिथये ब्राह्मणाय यथाविधि ।
प्रदाता सुखमाप्नोति दैवतैश्चापि पूज्यते ॥२७
ब्राह्मणो हि महद्भूतं क्षेत्रभूतं युधिष्ठिर ।
उप्यते तत्र यद्बीजं तद्धि पुण्यफलं महत् ॥२८
प्रत्यक्षं प्रीतिजननं भोक्तुर्दातुर्भवत्युत ।
सर्वाण्यन्यानि दानानि परोक्षफलवन्त्युत ॥
अन्नाद्धि प्रसवं यान्ति रतिरन्नाद्धि भारत ।
धर्मार्थावन्नतो विद्धि रोगनाशं तथाऽन्नतः ३०
अन्नं ह्यमृतमित्याह पुराकल्पे प्रजापतिः ।
अन्नं भुवं दिवं खं च सर्वमन्ने प्रतिष्ठितम् ३१
अन्नप्रणाशे भिद्यन्ते शरीरे पञ्च धातवः ।
बलं बलवतोऽपीह प्रणश्यत्यन्नहानितः ॥ ३२
आवाहाश्च विवाहाश्च यज्ञाश्चान्नमृते तथा ।
निवर्तन्ते नरश्रेष्ठ ×ब्रह्म चात्र प्रलीयते ॥ ३३

कानीति ॥ १ ॥ संज्ञा बुद्धय ॥ ५ ॥ * वेद ।

अन्नतः सर्वमेतद्धि यत्किंचित्स्थाणु जंगमम् ।
त्रिषु लोकेषु धर्मार्थमन्नं देयमतो बुधैः ॥ ३४
अन्नदस्य मनुष्यस्य बलमोजो यशांसि च ।
कीर्तिश्च वर्धते शश्वत्त्रिषु लोकेषु पार्थिव ३५
मेघेषूर्ध्वं सन्निधत्ते प्राणानां पवनः पतिः ।
तच्च मेघगतं वारि शक्रो वर्षति भारत ॥३६
आदत्ते च रसान्भौमानादित्यः स्वगभस्तिभिः
वायुरादित्यतस्तांश्च रसान्देवः प्रवर्षति ३७
तद्यदा मेघतो वारि पतितं भवति क्षितौ ।
तदा वसुमती देवी स्निग्धा भवति भारत ३८
ततः सस्यानि रोहन्ति येन वर्तयते जगत् ।
मासमेदोस्थिशुक्राणां प्रादुर्भावस्ततः पुनः ॥
संभवन्ति ततः शुक्रात्प्राणिनः पृथिवीपते ।
अग्नीषोमौ हि तच्छुक्रं सृजतः पुष्पतश्च ह ४०
एवमन्नाद्धि सूर्यश्च पवनः शुक्रमेव च ।
एक एव स्मृतो राशिस्ततो भूतानि जज्ञिरे
प्राणान्ददाति भूतानां तेजश्च भरतर्षभ ।
गृहमभ्यागतायाथ यो दद्यादन्नमर्थिने ॥ ४२

भीष्म उवाच ।

नारदेनैवमुक्तोऽहमदामन्नं सदा नृप ।
अनसूयुस्त्वमप्यन्नं तस्माद्देहि गतज्वरः ॥ ४३
दत्वाऽन्नं विधिवद्राजन्विप्रेभ्यस्त्वमिति प्रभा
यथावदनुरूपेभ्यस्ततः स्वर्गमवाप्स्यसि ॥ ४४
अन्नदानां हि ये लोकास्तास्त्वं शृणु जनाधिप
भवनानि प्रकाशन्ते दिवि तेषां महात्मनाम्
तारासंस्थानि रूपाणि नानास्तभान्वितानि च
चन्द्रमण्डलशुभ्राणि किंकिणीजालवन्ति च
तरुणादित्यवर्णानि स्थावराणि चराणि च ।
अनेकशतभौमानि सान्तर्जलचराणि च ॥४७
वैदूर्यार्कप्रकाशानि रौप्यरुक्ममयानि च ।
सर्वकामफलाश्चापि वृक्षा भवनसंस्थिताः ४८
वाप्यो वीथ्यः सभाः कूपा दीर्घिकाश्चैव सर्वशः
घोषवन्ति च यानानि युक्तान्यथ सहस्रशः
भक्ष्यभोज्यमयाः शैला वासांस्याभरणानि च
क्षीरं स्रवन्ति सरितस्तथा चैवान्नपर्वताः ५०
प्रासादाः पाण्डुराभ्राभाः
शय्याश्च कांचनोज्ज्वलाः ।
तान्यन्नदाः प्रपद्यन्ते
तस्मादन्नप्रदो भव ॥ ५१
एते लोकाः पुण्यकृता अन्नदाना महात्मनाम्
तस्मादन्न प्रयत्नेन दातव्यं मानवैर्भुवि ५२

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि अन्नदानप्रशंसाया त्रिषष्टितमोऽध्यायः ॥ ६३ ॥



६४

युधिष्ठिर उवाच ।

श्रुतं मे भवतो वाक्यमन्नदानस्य यो विधिः
नक्षत्रयोगस्येदानीं दानकल्पं ब्रवीहि मे ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
देवकयाश्चैव संवादं महर्षेर्नारदस्य च २
द्वारकामनुसंप्राप्तं नारदं देवदर्शनम् ।
पप्रच्छेदं वचः प्रश्नं देवकी धर्मदर्शनम् ३
तस्याः संपृच्छमानाया देवर्षिर्नारदस्ततः ।
आचष्ट विधिवत्सर्वं तच्छृणुष्व विशांपते ४

नारद उवाच ।

कृत्तिकासु महाभागे पायसेन ससर्पिषा ।
सतर्प्य ब्राह्मणान्साधूँल्लोकानाप्नोत्यनुत्तमान्
रोहिण्यां प्रसृतैर्मार्गैर्मांसैरन्नेन सर्पिषा ।
पयोन्नपानं दातव्यमनृणार्थं द्विजातये ॥ ६

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६४

श्रुतं मे इति ॥ १ ॥ मार्गैर्मृगसंबन्धिभिः ॥ ६ ॥

धेनुं दत्वा सवत्सां तु नक्षत्रे सोमदैवते ।
गच्छन्ति मानुषाल्लोकात्स्वर्गलोकमनुत्तमम् ७
आर्द्रायां कृसरं दत्वा तिलमिश्रमुपोषितः ।
नरस्तरति दुर्गाणि क्षुरधारांश्च पर्वतान् ॥ ८
पूपान्पुनर्वसौ दत्वा तथैवान्नानि शोभने ।
यशस्वी रूपसंपन्नो बहुन्नो जायते कुले ॥ ९
पुष्येण कनकं दत्वा कृतं वा कृतमेव च ।
अनालोकेषु लोकेषु सोमवत्स विराजते ॥१०
आश्लेषायां तु यो रूप्यमृषभं वा प्रयच्छति ।
स सर्वभयनिर्मुक्तः सम्भवानधितिष्ठति ॥११
मघासु तिलपूर्णानि वर्धमानानि मानवः ।
प्रदाय पुत्रपशुमानिह प्रेत्य च मोदते ॥ १२
फल्गुनीपूर्वसमये ब्राह्मणानामुपोषितः ।
भक्ष्यान्फाणितसंयुक्तान्
दत्वा सौभाग्यमृच्छति ॥ १३
घृतक्षीरसमायुक्तं विधिवत्षष्टिकौदनम् ।
उत्तराविषये दत्वा स्वर्गलोके महीयते ॥ १४
यद्यत्प्रदीयते दानमुत्तराविषये नरैः ।
महाफलमनन्तं तद्भवतीति विनिश्चयः ॥ १५
हस्ते हस्तिरथं दत्वा चतुर्युक्तमुपोषितः ।
प्राप्नोति परमाल्लोकान्पुण्यकामसमन्वितान्
चित्रायां वृषभं दत्वा पुण्यगन्धांश्च भारत ।
चरन्त्यप्सरसां लोके रमन्ते नन्दने तथा १७
स्वात्यामथ धनं दत्वा यदिष्टतममात्मनः ।
प्राप्नोति लोकान्स शुभानिह चैव महद्यशः१८
विशाखायामनड्वाहं धेनुं दत्वा च दुग्धदाम् ।
सप्रासंगं च शकटं सधान्यं वस्त्रसंयुतम् १९
पितॄन्देवांश्च प्रीणाति प्रेत्य चानन्त्यमश्नुते ।
न च दुर्गाण्यवाप्नोति स्वर्गलोकं च गच्छति
दत्वा यथोक्तं विप्रेभ्यो वृत्तिमिष्टां स विन्दति
नरकादींश्च संक्लेशान्नाप्नोतीति विनिश्चयः ॥
अनुराधासु प्रावार वरान्नं समुपोषितः ।
दत्वा युगशतं चापि नरः स्वर्गे महीयते ॥२२
कालशाकं तु विप्रेभ्यो दत्वा मर्त्यः समूलकम्
ज्येष्ठायामृद्धिमिष्टां वै गतिमिष्टां स गच्छति
मूले मूलफलं दत्वा ब्राह्मणेभ्यः समाहितः ।
पितॄन्प्रीणयते चापि गतिमिष्टां च गच्छति ॥
अथ पूर्वाषाढासु दधिपात्राण्युपोषितः ।
कुलवृत्तोपसंपन्ने ब्राह्मणे वेदपारगे ॥ २५
पुरुषो जायते प्रेत्य कुले सुबहुगोधने ।
उदमन्थं ससर्पिष्कं प्रभूतमधिफाणितम् २६
दत्वोत्तराषाढासु सर्वकामानवाप्नुयात् ।
दुग्धं त्वभिजिते योगे दत्वा मधुघृतप्लुतम् ।
धर्मनित्यो मनीषिभ्यः स्वर्गलोके महीयते २७
श्रवणे कम्बलं दत्वा वस्त्रान्तरितमेव वा ।
श्वेतेन याति यानेन स्वर्गलोकानसंवृतान्२८
गोप्रयुक्तं धनिष्ठासु यानं दत्वा समाहितः ।
वस्त्रराशिधनं सद्यः प्रेत्य राज्यं प्रपद्यते ॥ २९
गन्धाञ्छतभिषायोगे दत्वा सागुरुचन्दनान्
प्राप्नोत्यप्सरसां संघान्प्रेत्य गन्धांश्च शाश्वतान्
पूर्वाभाद्रपदायोगे राजमाषान्प्रदाय तु ।
सर्वभक्षफलोपेतः स वै प्रेत्य सुखी भवेत् ३१
औरभ्रमुत्तरायोगे यस्तु मांसं प्रयच्छति ।
स पितॄन्प्रीणयति वै प्रेत्य चानन्त्यमश्नुते ॥ ३२
कांस्योपदोहनां धेनुं रेवत्यां यः प्रयच्छति ।
सा प्रेत्य कामानादाय दातारमुपतिष्ठति ३३
रथमश्वसमायुक्तं दत्वाऽश्विन्या नरोत्तमः ।
हस्त्यश्वरथसंपन्ने वर्चस्वी जायते कुले ॥३४
भरणीषु द्विजातिभ्यस्तिलधेनुं प्रदाय वै ।
गाः सुप्रभूताः प्राप्नोति नरः प्रेत्य यशस्तथा

भीष्म उवाच ।

इत्येष लक्षणोद्देशः प्रोक्तो नक्षत्रयोगतः ।
देवक्या नारदेनेह सा क्षुधाभ्योऽब्रवीदिदम्

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि नक्षत्रयोगदान नाम चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

सौम्यनक्षत्रे मृगशिरसि ॥ ७ ॥ पूपान् पिष्टमयान् घृतपाचितपिंडान् ॥ ९ ॥ अनालोकेषु आलोकातरवर्जितेषु स्वयंप्रकाशेष्वित्यर्थः ॥ १० ॥ फाणित गोरसविकार ॥ १३ ॥ प्रासंगो धान्यादि पिधानयोग्यं चतुरस्रम् ॥ १९ ॥ उदमंथं उदकुंभयुक्तं सक्तुविकारम् ॥२६॥ उरभ्र पशुविशेषः अजो वा ॥३२॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चतुःषष्टितमोऽध्यायः ॥ ६४ ॥ * यावता वस्त्रेण कृत्स्ना धेनुराच्छादिता भवति तद्वस्त्रपूरिततिलाःस्तिलधेनुः ।

६५

भीष्म उवाच ।

सर्वान्कामान्प्रयच्छन्ति ये प्रयच्छन्ति कांचनं
इत्येवं भगवानत्रिः पितामहसुतोऽब्रवीत् ॥ १
पवित्रमथ चायुष्यं पितृणामक्षयं च तत् ।
सुवर्णं मनुजेन्द्रेण हरिश्चन्द्रेण कीर्तितम् ॥ २
पानीयं परमं दानं दानानां मनुरब्रवीत् ।
तस्मात्कूपाश्च वापीश्च तडागानि च खानयेत्
अर्धं पापस्य हरति पुरुषस्येह कर्मणः ।
कूपः प्रवृत्तपानीयः सुप्रवृत्तश्च नित्यशः ॥ ४
सर्वं तारयते वंशं यस्य खाते जलाशये ।
गावः पिबंति विप्राश्च साधवश्च नराः सदा ५
निदाघकाले पानीयं यस्य तिष्ठत्यवारितम् ।
स दुर्गे विषमं कृत्स्नं न कदाचिदवाप्नुते ॥ ६
बृहस्पतेर्भगवतः पूष्णश्चैव भगस्य च ।
अश्विनोश्चैव वह्नेश्च प्रीतिर्भवति सर्पिषा ॥ ७
परमं भेषजं ह्येतद्यज्ञानामेतदुत्तमम् ।
रसानामुत्तमं चैतत्फलानां चैतदुत्तमम् ॥ ८
फलकामो यशस्कामः पुष्टिकामश्च नित्यदा ।
घृतं दद्याद्द्विजातिभ्यः पुरुषः शुचिरात्मवान् ९
घृतं मासे आश्वयुजि विप्रेभ्यो यः प्रयच्छति
तस्मै प्रयच्छतो रूप प्रीतौ देवाविहाश्विनौ ॥
पायसं सर्पिषा मिश्रं द्विजेभ्यो यः प्रयच्छति
गृहं तस्य न रक्षांसि धर्षयन्ति कदाचन ॥ ११
पिपासया न म्रियते सोपच्छन्दश्च जायते ।
न प्राप्नुयाच्च व्यसनं करकान्यः प्रयच्छति १२
प्रयतो ब्राह्मणाग्रे यः श्रद्धया परया युतः ।
उपस्पर्शनषड्भागं लभते पुरुषः सदा ॥ १३
यः साधनार्थे काष्ठानि ब्राह्मणेभ्यः प्रयच्छति
प्रतापनार्थं राजेन्द्र वृत्तयज्ञः सदा नरः ॥ १४
सिद्ध्यंत्यर्थाःसदातस्य कार्याणि विविधानि च
उपर्युपरि शत्रूणां वपुषा दीप्यते च सः ॥ १५
भगवांश्चापि संप्रीतो वह्निर्भवति नित्यशः ।
न तं त्यजन्ति पशवः संग्रामे च जयत्यपि १६
पुत्राञ्छ्रियं च लभते यश्छत्रं संप्रयच्छति ।
न चक्षुष्यार्धिं लभते यश्चभागमथाश्नुते ॥ १७
निदाघकाले वर्षे वा यश्छत्रं संप्रयच्छति ।
नास्य कश्चिन्मनोदाहः कदाचिदपि जायते ॥
कृच्छ्रात्स विषमाच्चैव क्षिप्रं मोक्षमवाप्नुते ।
प्रदानं सर्वदानानां शकटस्य विशांपते ।
एवमाह महाभागः शांडिल्यो भगवानृषिः १९

इति श्रीमहाभारते अनुशासनपर्वाणि दानधर्मपर्वणि
पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

६६

युधिष्ठिर उवाच ।

दह्यमानाय विप्राय यः प्रयच्छत्युपानहौ ।
यत्फलं तस्य भवति तन्मे ब्रूहि पितामह ॥ १

भीष्म उवाच ।

उपानहौ प्रयच्छेद्यो ब्राह्मणेभ्यः समाहितः
मर्दते कण्टकान्सर्वान्विषमाञ्निस्तरत्यपि ॥ २
स शत्रूणामुपरि च सन्तिष्ठति युधिष्ठिर ।
यानं चाश्वतरीयुक्तं तस्य शुभ्रं विशांपते ॥ ३
उपतिष्ठति कौन्तेय रौप्यकांचनभूषितम् ।
शकटं दम्यसंयुक्तं दत्तं भवति चैव हि ॥ ४

युधिष्ठिर उवाच ।

यत्फलं तिलदाने च भूमिदाने च कीर्तितम्
गोदाने चान्नदाने च भूयस्तद्ब्रूहि कौरव ॥ ५

६५

सर्वान्कामानिति ॥ १ ॥ सोपच्छंद सोपकरण करकान्पात्राविशेषान् ॥ १२ ॥ अग्रं वृत्तिक्षेत्रादि तदर्थं उत्कोचं विना उपस्पर्शनं दानम् ॥ १३ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चषष्टितमोऽध्याय ॥ ६५ ॥

६६

दह्यमानायेति ॥ १ ॥

भीष्म उवाच ।

शृणुष्व मम कौन्तेय तिलदानस्य यत्फलम्
निशम्य च यथान्यायं प्रयच्छ कुरुसत्तम ॥ ६
पितॄणां परमं भोज्यं तिलाः सृष्टाः स्वयंभुवा ।
तिलदानेन वै तस्मात्पितृपक्षः प्रमोदते ॥ ७
माघमासे तिलान्यस्तु ब्राह्मणेभ्यः प्रयच्छति
सर्वसत्त्वसमाकीर्णं नरकं स न पश्यति ॥ ८
सर्वसत्रैश्च यजते यस्तिलैर्यजते पितॄन् ।
न चाकामेन दातव्यं तिलश्राद्धं कदाचन ९
महर्षेः कश्यपस्यैते गात्रेभ्यः प्रसृतास्तिलाः ।
ततो दिव्यं गता भावं प्रदानेषु तिलाः प्रभो ॥
पौष्टिका रूपदाश्चैव तथा पापविनाशनाः ।
तस्मात्सर्वप्रदानेभ्यस्तिलदानं विशिष्यते ११
आपस्तंबश्च मेधावी शंखश्च लिखितस्तथा ।
महर्षिर्गौतमश्चापि तिलदानैर्दिवं गताः ॥ १२
तिलहोमरता विप्राः सर्वे संयतमैथुनाः ।
समा गव्येन हविषा प्रवृत्तिषु च संस्थिताः १३
सर्वेषामिति दानानां तिलदानं विशिष्यते ।
अक्षयं सर्वदानानां तिलदानमिहोच्यते ॥ १४
उच्छिन्ने तु पुरा हव्ये कुशिकार्षिः परंतपः ।
तिलैरग्नित्रयं हुत्वा प्राप्तवान् गतिमुत्तमाम् १५
इति प्रोक्तं कुरुश्रेष्ठ तिलदानमनुत्तमम् ।
विधानं येन विधिना तिलानामिह शस्यते १६
अत ऊर्ध्वं निबोधेदं देवानां यष्टुमिच्छताम् ।
समागमे महाराज ब्रह्मणा वै स्वयंभुवा ॥ १७
देवाः समेत्य ब्रह्माणं भूमिभागे यियक्षवः ।
शुभं देशमयाचन्त यजेम इति पार्थिव ॥ १८

देवा ऊचुः ।

भगवंस्त्वं प्रभुर्भूमेः सर्वस्य त्रिदिवस्य च ।
यजेमहि महाभाग यज्ञं भवदनुज्ञया ॥ १९
नाननुज्ञातभूमिर्हि यज्ञस्य फलमश्नुते ।
त्वं हि सर्वस्य जगतः स्थावरस्य चरस्य च २०
प्रभुर्भवसि तस्मात्त्वं समनुज्ञातुमर्हसि ।

ब्रह्मोवाच ।

ददानि मेदिनीभागं भवद्भ्योऽहं सुरर्षभाः॥
यस्मिन्देशे करिष्यध्वं यज्ञान्काश्यपनन्दनाः।

देवा ऊचुः ।

भगवन्कृतकार्याः स्म यज्महे स्वाप्तदक्षिणैः २२
इमं तु देशं मुनयः पर्युपास्यन्ति नित्यदा ।
ततोऽगस्त्यश्च कण्वश्च भृगुरत्रिर्वृषाकपिः २३
असितो देवलश्चैव देवयज्ञमुपागमन् ।
ततो देवा महात्मान ईजिरे यज्ञमच्युतम् २४
तथा समापयामासुर्यथाकालं सुरर्षभाः ।
त इष्टयज्ञास्त्रिदशा हिमवत्यचलोत्तमे ॥ २५
षष्ठमंशं क्रतोस्तस्य भूमिदानं प्रचक्रिरे ।
प्रादेशमात्रं भूमेस्तु यो दद्यादनुपस्कृतम् २६
न सीदति स कृच्छ्रेषु न च दुर्गाण्यवाप्नुते ।
शीतवातातपसहां गृहभूमिं सुसंस्कृताम् २७
प्रदाय सुरलोकस्थः पुण्यान्तेऽपि न चाल्यते
मुदितो वसति प्राज्ञः शक्रेण सह पार्थिव २८
प्रतिश्रयप्रदानाच्च सोऽपि स्वर्गे महीयते ।
अध्यापककुले जातः श्रोत्रियो नियतेन्द्रियः २९
गृहे यस्य वसेत्तुष्टः प्रधानं लोकमश्नुते ।
तथा गवार्थे शरणं शीतवर्षसहं दृढम् ॥ ३०
आसप्तमं तारयति कुलं भरतसत्तम ।
क्षेत्रभूमिं ददल्लोके शुभां श्रियमवाप्नुयात् ३१
रत्नभूमिं प्रदद्यात्तु कुलवंशं प्रवर्धयेत् ।
न चोषरां न निर्वृक्षां महीं दद्यात्कथञ्चन ३२
न श्मशानपरीतां च न च पापनिषेविताम् ।
पारक्ये भूमिदेशे तु पितॄणां निर्वपेत्तु यः ३३
तद्भूमिं वापि पितृभिः श्राद्धकर्म विहन्यते ।
तस्मात्क्रीत्वामहीं दद्यात्स्वल्पामपि विचक्षणः
पिंडः पितृभ्यो दत्तो वै तस्यां भवति शाश्वतः
अटवीपर्वताश्चैव नद्यस्तीर्थानि यानि च ३५
सर्वाण्यस्वामिकान्याहुर्नहि तत्र परिग्रहः ।
इत्येतद्भूमिदानस्य फलमुक्तं विशांपते ॥ ३६

अतः परं तु गोदानं कीर्तयिष्यामि तेऽनघ
गावोऽधिकास्तपस्विभ्यो यस्मात्सर्वेभ्य एव च
तस्मान्महेश्वरो देवस्तपस्तासामिः सहास्थितः।
ब्राह्मे लोके वसन्त्येताः सोमेन सह भारत ३८
यां तां ब्रह्मर्षयः सिद्धाः प्रार्थयन्ति परां गतिम्
पयसा हविषा दध्ना शकृता चाथ चर्मणा ३९

इमं हिमवत्सान्निहितम् ॥ २३ ॥ हिमवति हिमवत्समीपे कुरुक्षेत्रं येषां कुरुक्षेत्रं वेदिरासीदिति श्रुते ॥ २५ ॥ प्रतिश्रयो वासार्थं स्थलम् ॥ २९ ॥ प्रधानं लोकं ब्रह्मलोकम् ॥ ३० ॥ तद्भूमिं परकीया भूमिं वा यो निर्वपेत् पितृभिः पितृभ्यो दद्यातर्हि तच्छ्राद्धं तद्भूमिदानाख्यं कर्म च उभयं निहन्यते वृथा भवति ॥३४॥ तस्यां क्रीतायाम् ॥३५

अस्थिभिश्चोपकुर्वन्ति शृङ्गैर्वालैश्च भारत ।
वासां शीतातपौ स्यातां सदैताः कर्म कुर्वते
न वर्षविषयं वापि दुःखमासां भवत्युत ।
ब्राह्मणैः सहिता यान्ति तस्मात्पारमकं पदम्
एकं गोब्राह्मणं तस्मात्प्रवदन्ति मनीषिणः ।
रन्तिदेवस्य यज्ञे ताः पशुत्वेनोपकल्पिताः ॥
अतश्चर्मण्वती राजन् गोचर्मभ्यः प्रवर्तिता ।
पशुत्वाच्च विनिर्मुक्ताः प्रदानायोपकल्पिताः
ता इमा विप्रमुख्येभ्यो यो ददाति महीपते ।
निस्तरेदापदं कृच्छ्रां विषमस्थोऽपि पार्थिव ॥
गवां सहस्रदः प्रेत्य नरकं न प्रपद्यते ।
सर्वत्र विजयं चापि लभते मनुजाधिप ॥ ४५
अमृतं वै गवां क्षीरमित्याह त्रिदशाधिपः ।
तस्माद्ददाति यो धेनुममृतं स प्रयच्छति ४६
अग्नीनामव्ययं ह्येतद्धौम्यं वेदविदो विदुः ।
तस्माद्ददाति यो धेनुं स हौम्यं संप्रयच्छति ॥
स्वर्गो वै मूर्तिमानेष वृषभं यो गवां पतिम् ।
विप्रे गुणयुते दद्यात्स वै स्वर्गे महीयते ॥ ४८
प्राणा वै प्राणिनामेते प्रोच्यन्ते भरतर्षभ ।
तस्माद्ददाति यो धेनुं प्राणानेष प्रयच्छति ४९
गावः शरण्या भूतानामिति वेदविदो विदुः ।
तस्माद्ददाति यो धेनुं शरणं संप्रयच्छति ५०
न वधार्थे प्रदातव्या न कीनाशे न नास्तिके
गोजीविने न दातव्या तथा गौर्भरतर्षभ ५१
ददत्स तादृशानां वै नरो गां पापकर्मणाम् ।
अक्षयं नरकं यातीत्येवमाहुर्महर्षयः ॥ ५२
न कृशां नापवत्सां वा वंध्यां रोगान्वितां तथा
न व्यङ्गां न परिश्रान्तां दद्याद्गां ब्राह्मणाय वै
दशगोसहस्रदो हि शक्रेण सह मोदते ।
अक्षयाँल्लभते लोकान्नरः शतसहस्रशः ॥ ५४
इत्येतद्गोप्रदानं च तिलदानं च कीर्तितम् ।
तथा भूमिप्रदानं च शृणुष्वान्ने च भारत ॥ ५५
अन्नदानं प्रधानं हि कौन्तेय परिचक्षते ।
अन्नस्य हि प्रदानेन रन्तिदेवो दिवं गतः ५६
श्रान्ताय क्षुधितायान्नं यः प्रयच्छति भूमिपः
स्वयंभुवं महत्स्थानं स गच्छति नराधिप ५७
न हिरण्येन वासोभिर्नान्यदानेन भारत ।
प्राप्नुवन्ति नराः श्रेयो यथा ह्यन्नप्रदाः प्रभो ॥
अन्नं वै प्रथमं द्रव्यमन्न श्रीश्च परा मता ।
अन्नात्प्राणः प्रभवति तेजो वीर्यं बलं तथा ५९
सद्यो ददाति यश्चान्नं सदैकाग्रमना नरः ।
न स दुर्गाण्यवाप्नोतीत्येवमाह पराशरः ६०
अर्चयित्वा यथान्यायं देवेभ्योऽन्नं निवेदयेत्
यदन्ना हि नरा राजंस्तदन्नास्तस्य देवताः ६१
कौमुदे शुक्लपक्षे तु योऽन्नदानं करोत्युत ।
स सन्तराते दुर्गाणि प्रेत्य चानन्त्यमश्नुते ६२
अभुक्त्वाऽतिथये चान्नं प्रयच्छेद्यः समाहितः
स वै ब्रह्मविदां लोकान्प्राप्नुयाद्भरतर्षभ ॥ ६३
सुकृच्छ्रामापदं प्राप्तश्चान्नदः पुरुषस्तरेत् ।
पापं तरति चैवेह दुष्कृतं चापकर्षति ॥ ६४
इत्येतदन्नदानस्य तिलदानस्य चैव ह ।
भूमिदानस्य च फल गोदानस्य च कीर्तितम्

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि
षट्षष्टितमोऽध्यायः ॥ ६६ ॥

६७

युधिष्ठिर उवाच ।

श्रुतं दानफलं तात यत्त्वया परिकीर्तितम्
अन्नदानं विशेषेण प्रशस्तामेह भारत ॥ १
पानीयदानमेवैतत्कथं चेह महाफलम् ।
इत्येतच्छ्रोतुमिच्छामि विस्तरेण पितामह २

भीष्म उवाच ।

हन्त ते वर्तयिष्यामि यथावद्भरतर्षभ ।
गदतस्तन्ममाद्येह शृणु सत्यपराक्रम ॥ ३

कौमुदे कार्तिके ॥६२॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षट्षष्टितमोऽध्यायः ॥ ६६ ॥

६७

श्रुतमिति ॥ १ ॥

पानीयदानात्प्रभृति सर्वं वक्ष्यामि तेऽनघ।
यदन्नं यच्च पानीयं संप्रदायाश्नुते नरः ॥ ४
न तस्मात्परमं दानं किञ्चिदस्तीति मे मनः।
अन्नात्प्राणभृतस्तात प्रवर्तन्ते हि सर्वशः ॥ ५
तस्मादन्नं परं लोके सर्वलोकेषु कथ्यते।
अन्नाद्बलं च तेजश्च प्राणिनां वर्धते सदा ॥ ६
अन्नदानमतस्तस्माच्छ्रेष्ठमाह प्रजापतिः।
सावित्र्या ह्यपि कौन्तेय श्रुतं ते वचनं शुभम्
यतश्च यद्यथा चैव देवसत्रे महामते।
अन्ने दत्ते नरेणेह प्राणा दत्ता भवन्त्युत ॥ ८
प्राणदानाद्धि परमं न दानमिह विद्यते।
श्रुतं हि ते महाबाहो लोमशस्यापि तद्वचः ९
प्राणान्दत्त्वा कपोताय यत्प्राप्तं शिबिना पुरा।
तां गतिं लभते दत्त्वा द्विजस्यान्नं विशांपते १०
तस्माद्विशिष्टां गच्छन्ति प्राणदा इति नः श्रुतं
अन्नं वापि प्रभवति पानीयात्कुरुसत्तम।
नीरजातेन हि विना न किंचित्संप्रवर्तते ११
नीरजातश्च भगवान्सोमो ग्रहगणेश्वरः।
अमृतं च सुधा चैव सुधा चैवामृतं तथा १२
अन्नौषध्यो महाराज वीरुधश्च जलोद्भवाः।
यतः प्राणभृतां प्राणाः संभवन्ति विशांपते ॥
देवानाममृतं ह्यन्नं नागानां च सुधा तथा।
पितॄणां च स्वधा प्रोक्ता पशूनां चापि वीरुधः
अन्नमेव मनुष्याणां प्राणानाहुर्मनीषिणः।
तच्च सर्वं नरव्याघ्र पानीयात्संप्रवर्तते ॥ १५
तस्मात्पानीयदानाद्धि न परं विद्यते क्वचित्।
तच्च दद्यान्नरो नित्यं यदीच्छेद्भूतिमात्मनः १६
धन्यं यशस्यमायुष्यं जलदानमिहोच्यते।
शत्रूंश्चाप्यधि कौन्तेय सदा तिष्ठति तोयदः १७
सर्वकामानवाप्नोति कीर्तिं चैव हि शाश्वतीम्
प्रेत्य चानन्त्यमश्नाति पापेभ्यश्च प्रमुच्यते १८
तोयदो मनुजव्याघ्र स्वर्गं गत्वा महाद्युते।
अक्षयान्समवाप्नोति लोकानित्यब्रवीन्मनुः ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि पानीयदानमाहात्म्ये सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८

युधिष्ठिर उवाच।
तिलानां कीदृशं दानमथ दीपस्य चैव हि
अन्नानां वाससां चैव भूय एव ब्रवीहि मे ॥१

भीष्म उवाच।
अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
ब्राह्मणस्य च संवादं यमस्य च युधिष्ठिर ॥२
मध्यदेशे महान्ग्रामो ब्राह्मणानां बभूव ह।
गंगायमुनयोर्मध्ये यामुनस्य गिरेरधः ॥ ३
पर्णशालेति विख्यातो रमणीयो नराधिप।
विद्वांसस्तत्र भूयिष्ठा ब्राह्मणाश्चावसंस्तथा ॥४
अथ प्राह यमः कंचित्पुरुषं कृष्णवाससम्।
रक्ताक्षमूर्ध्वरोमाणं काकजंघाक्षिनासिकम् ५
गच्छ त्वं ब्राह्मणग्रामं ततो गत्वा तमानय।
अगस्त्य गोत्रतश्चापि नामतश्चापि शर्मिणम्
शमे निविष्टं विद्वांसमध्यापकमनावृतम्।
मा चान्यमानयेथास्त्वं सगोत्रं तस्य पार्श्वतः
स हि तादृग्गुणस्तेन तुल्योऽध्ययनजन्मना।
अपत्येषु तथा वृत्ते समस्तेनैव धीमता ॥ ८
तमानय यथोद्दिष्टं पूजा कार्या हि तस्य वै।
स गत्वा प्रतिकूलं तच्चकार यमशासनम्।
तमाक्रम्यानयामास प्रतिषिद्धो यमेन यः।
तस्मै यमः समुत्थाय पूजां कृत्वा च वीर्यवान्
प्रोवाच नीयतामेष सोऽन्य आनीयतामिति
एवमुक्ते तु वचने धर्मराजेन स द्विजः ॥ ११
उवाच धर्मराजानं निर्विण्णोऽध्ययनेन वै।
यो मे कालो भवेच्छेषस्तं वसेयमिहाच्युत १२

नीरजातेन जलोद्भवेन धान्यादिना ॥ ११ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८

तिलानामिति ॥ १ ॥ इह यमलोके ॥ १२ ॥

यम उवाच ।

नाहं कालस्य विहितं प्राप्नोमीह कथंचन ।
यो हि धर्मं चरति वै तं तु जानामि केवलम्
गच्छ विप्र त्वमद्यैव आलयं स्वं महाद्युते ।
ब्रूहि सर्वं यथा खैरं करवाणि किमच्युत १४

ब्राह्मण उवाच ।

यत्तत्र कृत्वा सुमहत्पुण्यं स्यात्तद्ब्रवीहि मे ।
सर्वस्य हि प्रमाणं त्वं त्रैलोक्यस्यापि सत्तम

यम उवाच ।

शृणु तत्त्वेन विप्रर्षे प्रदानविधिमुत्तमम् ।
तिलाः परमकं दानं पुण्यं चैवेह शाश्वतम् १६
तिलाश्च संप्रदातव्या यथाशक्ति द्विजर्षभ ।
नित्यदानात्सर्वकामांस्तिला निर्वर्तयन्त्युत ॥
तिलान् श्राद्धे प्रशंसन्ति दानमेतद्ध्यनुत्तमम् ।
तान्प्रयच्छस्व विप्रेभ्यो विधिदृष्टेन कर्मणा १८
वैशाख्यां पौर्णमास्यां तु तिलान्दद्याद्द्विजातिषु
तिला भक्षयितव्याश्च सदा त्वालंभनं च तैः
कार्यं सततमिच्छद्भिः श्रेयः सर्वात्मना गृहे ।
तथाऽऽपः सर्वदा देयाः पेयाश्चैव न संशयः
पुष्करिण्यस्तडागानि कूपांश्चैवात्र खानयेत् ।
एतत्सुदुर्लभतरमिहलोके द्विजोत्तम ॥ २१
आपो नित्यं प्रदेयास्ते पुण्यं ह्येतदनुत्तमम् ।
प्रपाश्च कार्या दानार्थं नित्यं ते द्विजसत्तम ।
भुक्तेऽप्यन्नं प्रदेयं तु पानीयं वै विशेषतः २२

भीष्म उवाच ।

इत्युक्ते स तदा तेन यमदूतेन वै गृहान् ।
नीतश्च कारयामास सर्वं तद्यमशासनम् ।
नीत्वा तं यमदूतोऽपि गृहीत्वा शर्मिणं तदा
ययौ स धर्मराजाय न्यवेदयत चापि तम् २४
तं धर्मराजो धर्मज्ञं पूजयित्वा प्रतापवान् ।
कृत्वा च संविदं तेन विससर्ज यथागतम् २५
तस्यापि च यमः सर्वमुपदेशं चकार ह ।
प्रेत्यैत्य च ततः सर्वं चकारोक्तं यमेन तत् ॥
तथा प्रशंसते दीपान्यमः पितृहितेप्सया ।
तस्माद्दीपप्रदो नित्यं संतारयति वै पितॄन् ॥
दातव्याः सततं दीपास्तस्माद्भरतसत्तम ।
देवतानां पितॄणां च चक्षुष्यं चात्मनां विभो
रत्नदानं च सुमहत्पुण्यमुक्तं जनाधिप ।
यस्तान् विक्रीय यजते ब्राह्मणो ह्यभयंकरम् २९
यद्वै ददाति विप्रेभ्यो ब्राह्मणः प्रतिगृह्य वै ।
उभयोः स्यात्तदक्षय्यं दातुरादातुरेव च ॥३०
यो ददाति स्थितः स्थित्यां तादृशाय प्रतिग्रहं
उभयोरक्षयं धर्मं तं मनुः प्राह धर्मवित् ॥३१
वाससां संप्रदानेन स्वदारनिरतो नरः ।
सुवस्त्रश्च सुवेषश्च भवतीत्यनुशुश्रुम ॥ ३२
गावः सुवर्णं च तथा तिलाश्चैवानुवर्णिताः ।
बहुशः पुरुषव्याघ्र वेदप्रामाण्यदर्शनात् ॥ ३३
विवाहांश्चैव कुर्वीत पुत्रानुत्पादयेत च ।
पुत्रलाभो हि कौरव्य सर्वलाभाद्विशिष्यते ३४

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि श्येनकपोतसंवादे अष्टषष्टितमोऽध्यायः ॥ ६८ ॥



६९

युधिष्ठिर उवाच ।

भूय एव कुरुश्रेष्ठ दानानां विधिमुत्तमम् । कथयस्व महाप्राज्ञ भूमिदानं विशेषतः ॥१॥

कालस्य विहित आयु प्रमाणं न प्राप्नोमि न जानामि । कालेनाप्रवर्तितं त्वामिह स्थापयितु न शक्नोमीत्यर्थ ॥१३॥ ब्रूहि पृच्छ ॥ १४ ॥ निर्वर्तयन्ति साधयन्ति ॥ १७ ॥ आलम्भनं सर्वत स्पर्शनं उद्वर्तनमित्यर्थ ॥१९॥ रत्नेति तस्मै रत्नदानं कर्तव्यं यस्तान् तानि विक्रीय यज्ञं करोति । एतद्धि तस्याभयकर प्रतिग्रहविक्रयजदोषघ्नम् ॥ २९ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टषष्टितमोऽध्याय ॥ ६८ ॥

६९

भूय इति ॥ १ ॥

पृथिवीं क्षत्रियो दद्याद्ब्राह्मणायेष्टिकर्मिणे ।
विधिवत्प्रतिगृह्णीयान्न त्वन्यो दातुमर्हति ॥ २
सर्ववर्णैस्तु यच्छक्यं प्रदातुं फलकाङ्क्षिभिः ।
वेदे वा यत्समाख्यातं तन्मे व्याख्यातुमर्हसि ३

भीष्म उवाच ।

तुल्यनामानि देयानि त्रीणि तुल्यफलानि च
सर्वकामफलानीह गावः पृथ्वी सरस्वती ४
यो ह्यूयाच्चापि शिष्याय धर्म्यां ब्राह्मीं सरस्वतीं
पृथिवीगोप्रदानाभ्यां तुल्यं स फलमश्नुते ॥ ५
तथैव गाः प्रशंसन्ति न तु देयं ततः परम् ।
सन्निकृष्टफलास्ता हि लघ्वर्थाश्च युधिष्ठिर ६
मातरः सर्वभूतानां गावः सर्वसुखप्रदाः ।
वृद्धिमाकांक्षता नित्यं गावः कार्याः प्रदक्षिणाः
संताड्या न तु पादेन गवां मध्ये न च व्रजेत् ।
मङ्गलायतनं देव्यस्तस्मात्पूज्याः सदैव हि ॥ ८
प्रचोदनं देवकृतं गवां कर्मसु वर्तताम् ।
पूर्वमेवाक्षरं चान्यदभिधेयं ततः परम् ॥ ९
प्रचारे वा निवाते वा बुधो नोद्वेजयेत गाः ।
तृषिता ह्यभिवीक्षन्त्यो नरं हन्युः सबान्धवम्
पितृसद्मानि सततं देवतायतनानि च ।
पूयते शकृता यासां पूतं किमधिकं ततः ॥ ११
घासमुष्टिं परगवे दद्यात्संवत्सरं तु यः ॥
अकृत्वा स्वयमाहारं व्रतं तत्सार्वकामिकम् १२
स हि पुत्रान्यशोर्थं च श्रियं चाप्यधिगच्छति
नाशयत्यशुभं चैव दुःस्वप्नं चाप्यपोहति १३

युधिष्ठिर उवाच ।

देयाः किंलक्षणा गावः काश्चापि परिवर्जयेत
कीदृशाय प्रदातव्या न देयाः कीदृशाय च १४

भीष्म उवाच ।

असद्वृत्ताय पापाय लुब्धायानृतवादिने ।
हव्यकव्यव्यपेताय न देया गौः कथञ्चन ॥ १५
भिक्षवे बहुपुत्राय श्रोत्रियायाहिताग्नये ।
दत्वा दशगवां दाता लोकानाप्नोत्यनुत्तमान्
यश्चैव धर्मं कुरुते तस्य धर्मफलं च यत् ।
सर्वस्यैवाशभाग्दाता तं निमित्तं प्रवृत्तयः १७
यश्चैनमुत्पादयते यश्चैनं त्रायते भयात् ।
यश्चास्य कुरुते वृत्तिं सर्वे ते पितरस्त्रयः १८
कल्मषं गुरुशुश्रूषा हन्ति मानो महद्यशः ।
अपुत्रतां त्रयः पुत्रा अवृत्तिं दश धेनवः ॥ १९

वेदान्तनिष्टस्य बहुश्रुतस्य
प्रज्ञानतृप्तस्य जितेन्द्रियस्य ।
शिष्टस्य दान्तस्य यतस्य चैव
भूतेषु नित्यं प्रियवादिनश्च ॥ २०
यः क्षुद्रयाद्वै न विकर्म कुर्या-
न्मृदुश्च शान्तो ह्यतिथिप्रियश्च ।
वृत्तिं द्विजायातिसृजेत तस्मै
यस्तुल्यशीलश्च सपुत्रदारः २१
शुभे पात्रे ये गुणा गोप्रदाने
तावान्दोषो ब्राह्मणस्यापहारे ।
सर्वस्वं ब्राह्मणस्यापहारो
दाराश्चैषां दूरतो वर्जनीयाः २२

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि गोदानमाहात्म्ये एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥



इष्टिकर्मिणे याज्ञिकाय ॥ २ ॥ तुल्यनामानि गोपदवाच्यानि ॥ ४ ॥ देयं दानयोग्यं परं श्रेष्ठम् ॥ ६ ॥ **प्रचोदनमिति** गवां बलीवर्दानां कर्मसु यज्ञाद्यर्थेषु कृष्याद्यर्थेषु कर्षणादिषु वर्तता प्रचोदनं प्रतोदेन प्रेरणं देवैः कृतमिति न तत्र दोष इति भावः । तथापि पूर्वं यज्ञार्थमेव चोदनं अक्षरं श्रेयस्करम् । अन्यत्कृष्याद्यर्थं तु तत परं वैदिककर्षणमनुप्रवृत्तं अभिधेयं वाच्यं निन्द्यमित्यर्थः । तथा च स्मृति हलान्त ब्रह्मवर्चसमिति । तेन गोद्रोहकारित्वात्कृष्यर्थं कर्षणं दोषावहमित्यर्थ ॥ ९ ॥ **प्रचारे** पलायने । **निवाते** कठिनोपवेशने **अभिवीक्षन्त्यो** जलमलमभमानाः ॥ १० ॥ आहारं तदीयतत्काद्याहरणमकृत्वा ॥ १२ ॥ वेदान्तनिष्टस्य वृत्तिं अतिसृजेतेत्युत्तरेणान्वयः चतुर्थ्यर्थे षष्ठी ॥ २० ॥ **य इति** । ब्राह्मणो यदि क्षुद्रयाद्विकर्म करोति तर्हि राज्ञस्तत्पापमित्यर्थ ॥ २१ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकोनसप्ततितमोऽध्यायः ॥ ६९ ॥

७०

भीष्म उवाच ।
अत्रैव कीर्त्यते सद्भिर्ब्राह्मणस्वाभिमर्शने ।
नृगेण सुमहत्कृच्छ्रं यदवाप्तं कुरूद्वह ॥ १
निविशंत्यां पुरा पार्थ द्वारवत्यामिति श्रुतिः
अदृश्यत महाकूपस्तृणवीरुत्समावृतः ॥ २
प्रयत्नं तत्र कुर्वाणास्तस्मात्कूपाज्जलार्थिनः ।
श्रमेण महता युक्तास्तस्मिंस्तोये सुसंवृते ॥ ३
ददृशुस्ते महाकायं कृकलासमवस्थितम् ।
तस्य चोद्धरणे यत्नमकुर्वंस्ते सहस्रशः ॥ ४
प्रग्रहैश्चर्मपट्टैश्च तं बध्वा पर्वतोपमम् ।
नाशकनुवन् समुद्धर्तुं ततो जग्मुर्जनार्दनम् ५
स्वमावृत्योदपानस्य कृकलासः स्थितो महान् ।
तस्य नास्ति समुद्धर्तेत्येतत्कृष्णे न्यवेदयन् ६
स वासुदेवेन समुद्धृतश्च
पृष्टश्च कार्यं निजगाद राजा ।
नृगस्तदात्मानमथो न्यवेदयत
पुरातनं यज्ञसहस्रयाजिनम् ७
तथा ब्रुवाणं तु तमाह माधवः
शुभं त्वया कर्म कृतं न पापकम् ।
कथं भवान्दुर्गतिमीदृशीं गतो
नरेन्द्र तद्ब्रूहि किमेतदीदृशम् ॥ ८
शतं सहस्राणि गवां शतं पुनः
पुनः शतान्यष्टशतायुतानि ।
त्वया पुरा दत्तमितीह शुश्रुम
नृप द्विजेभ्यः क्व नु तद्गतं तव ९
नृगस्ततोऽब्रवीत्कृष्णं ब्राह्मणस्याग्निहोत्रिणः ।
प्रोषितस्य परिभ्रष्टा गौरेका मम गोधने १०
गवां सहस्रे संख्याता तदा सा पशुभिर्मम ।
सा ब्राह्मणाय मे दत्ता प्रेत्यार्थमभिकांक्षता ११
अपश्यत्परिमार्गेश्च तां गां परगृहे द्विजः ।
ममेयमिति चोवाच ब्राह्मणो यस्य साऽभवत्
तावुभौ समनुप्राप्तौ विवदन्तौ भृशज्वरौ ।
भवान्दाता भवान्हर्तेत्यथ तौ मामयोचताम् ।
शतेन शतसंख्येन गवां विनिमयेन वै ।
याचे प्रतिग्रहीतारं स तु मामब्रवीदिदम् ।
देशकालोपसम्पन्ना दोग्ध्री शांतातिवत्सला
स्वादुक्षीरप्रदा धन्या मम नित्यं निवेशने १५
कृतं च भरते सा गौर्मम पुत्रमपस्तनम् ।
न सा शक्या मया दातुमित्युक्त्वा स जगाम ह
ततस्तमपरं विप्रं याचे विनिमयेन वै ।
गवां शतसहस्रं हि तत्कृते गृह्यतामिति १७
ब्राह्मण उवाच ।
न राज्ञां प्रतिगृह्णामि शक्तोऽहं स्वस्य मार्गणे
सैव गौर्दीयतां शीघ्रं ममेति मधुसूदन ॥ १८
रुक्ममश्वांश्च ददतो रजतस्यन्दनांस्तथा ।
न जग्राह ययौ चापि तदा स ब्राह्मणर्षभः १९
एतस्मिन्नेव काले तु चोदितः कालधर्मणा ।
पितृलोकमहं प्राप्य धर्मराजमुपागमम् ॥ २०
यमस्तु पूजयित्वा मां ततो वचनमब्रवीत् ।
नान्तः संख्यायते राजंस्तव पुण्यस्य कर्मणः
अस्ति चैव कृतं पापमज्ञानात्तदपि त्वया ।
चरस्व पापं पश्चाद्वा पूर्वं वा त्वं यथेच्छसि ॥
रक्षिताऽस्मीति चोक्तं ते प्रतिज्ञा चानृता तव
ब्राह्मणस्य च दानं द्विविधस्ते व्यतिक्रमः ॥
पूर्वं कृच्छ्रं चरिष्येऽहं पश्चाच्छुभमिति प्रभो ।
धर्मराजं ब्रुवन्नेवं पतितोऽस्मि महीतले ॥ २४
अश्रौषं पतितश्चाहं यमस्योक्तैः प्रभाषतः ।
वासुदेवः समुद्धर्ता भविता ते जनार्दनः २५
पूर्णे वर्षसहस्रान्ते क्षीणे कर्मणि दुष्कृते ।
प्राप्स्यसे शाश्वतान्लोकाञ्जितान्स्वेनैव कर्मणा
कूपेऽऽत्मानमधःशीर्षमपश्यं पतितश्च ह ।
तिर्यग्योनिमनुप्राप्तं न च मामजहात्स्मृतिः ॥
त्वया तु तारितोऽस्म्यद्य किमन्यत्र तपोबलात्
अनुजानीहि मां कृष्ण गच्छेयं दिवमद्य वै ॥
अनुज्ञातः स कृष्णेन नमस्कृत्य जनार्दनम् ।
दिव्यमास्थाय पन्थानं ययौ दिवमरिन्दमः ॥
ततस्तस्मिन्दिवं याते नृगे भरतसत्तम ।
वासुदेव इमं श्लोकं जगाद कुरुनन्दन ॥ ३०
ब्राह्मणस्वं न हर्तव्यं पुरुषेण विजानता ।
ब्राह्मणस्वं हृतं हन्ति नृगं ब्राह्मणगौरिव ३१

७०

अत्रैवेति ॥ १ ॥ जलार्थिनः तस्मिन्कृकलास ददृशु- रित्याग्रिमेणान्वयः ॥ ३ ॥ अनृता ब्राह्मणधेनोर्नाशात् तस्या एव त्वया आदानात् ॥ २३ ॥ कृच्छ्रं चरिष्ये पापफलं भोक्ष्ये ॥ २४ ॥ त्मानं आत्मान सन्धिरार्ष· ॥ २७ ॥

सतां समागमः सद्भिर्नाफलः पार्थ विद्यते । प्रदानफलवत्तत्र ग्रीहस्तत्र तथाफलः ।
विमुक्तं नरकात्पश्य नृगं साधुसमागमात् ३२ अपचारं गवां तस्माद्रक्षेत युधिष्ठिर ॥ ३३

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि नृगोपाख्याने सप्ततितमोऽध्यायः ॥ ७० ॥

७१

युधिष्ठिर उवाच ।

दत्तानां फलसंप्राप्तिं गवां ब्रूहि मेऽनघ ।
विस्तरेण महाबाहो न हि तृप्यामि कथ्यताम्

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ऋषेरुद्दालकेर्वाक्यं नाचिकेतस्य चोभयोः २
ऋषिरुद्दालकिर्दीक्षामुपगम्य ततः सुतम् ।
त्वं मामुपचरस्वेति नाचिकेतमभाषत ॥ ३
समाप्ते नियमे तस्मिन्महर्षिः पुत्रमब्रवीत् ।
उपस्पर्शनसक्तस्य स्वाध्यायाभिरतस्य च ॥ ४
इध्मा दर्भाः सुमनसः फलशाखातिभोजनम् ।
विस्मृतं मे तदादाय नदीतीरादिहाव्रज ॥ ५
गत्वाऽनवाप्य तत्सर्वं नदीवेगसमाप्लुतम् ।
न पश्यामि तदित्येवं पितरं सोऽब्रवीन्मुनिः ६
क्षुत्पिपासाश्रमाविष्टो मुनिरुद्दालकिस्तदा ।
यमं पश्येति तं पुत्रमशपत्स महातपाः ॥ ७
तथा स पित्राऽभिहतो वाग्वज्रेण कृताञ्जलिः
प्रसीदेति ब्रुवन्नेव गतसत्त्वोऽपतद्भुवि ॥ ८
नाचिकेतं पिता दृष्ट्वा पतितं दुःखमूर्च्छितः ।
किं मया कृतमित्युक्त्वा निपपात महीतले ९
तस्य दुःखपरीतस्य स्वं पुत्रमनुशोचतः ।
व्यतीतं तदहःशेषं साचोग्रा तत्र शर्वरी १०
पित्र्येणाश्रुप्रपातेन नाचिकेतः कुरूद्वह ।
प्रास्यन्दच्छयने कीर्ण्ये वृष्ट्या सस्यमिवाप्लुतम्
स पर्यपृच्छत्तं पुत्रं क्षीणं पर्यागतं पुनः ।
दिव्यैर्गन्धैः समादिग्धं क्षीणस्रग्मिवोत्थितम्

अपि पुत्र जिता लोकाः शुभास्ते स्वेन कर्मणा
दिष्ट्या चासि पुनः प्राप्तो न हि ते मानुषं वपुः
प्रत्यक्षदर्शी सर्वस्य पित्रा पृष्टो महात्मना ।
स तां वार्तां पितुर्मध्ये महर्षीणां न्यवेदयत् ॥

कुर्वन् भवच्छासनमाशु यातो
ह्यहं विशालां रुचिरप्रभावाम् ।
वैवस्वतीं प्राप्य सभामपश्य
सहस्रशो योजनहेमभासम् ॥ १५

दृष्ट्वैव मामभिमुखमापतन्तं
देहीति स ह्यासनमादिदेश ।
वैवस्वतोऽर्घ्यादिभिरर्हणैश्च
भवत्कृते पूजयामास मां सः ॥ १६

ततस्त्वहं तं शनकैरवोचं
वृतः सदस्यैरभिपूज्यमानः ।
प्राप्तोऽस्मि ते विषयं धर्मराज
लोकानर्हो यानहं तान्विधत्स्व ॥ १७

यमोऽब्रवीन्मां न मृतोऽसि सौम्य
यमं पश्येत्याह स त्वां तपस्वी ।
पिता प्रदीप्ताग्निसमानतेजा
न तच्छक्यमनृतं विप्रकर्तुम् ॥ १८

दृष्टस्तेऽहं प्रतिगच्छस्व तात
शोचत्यसौ तव देहस्य कर्ता ।
ददानि किं चापि मनःप्रणीतं
प्रियातिथेस्तव कामान्वृणीष्व ॥ १९

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्ततितमोऽध्यायः ॥ ७० ॥

७१

दत्तानामिति ॥ १ ॥ अतिभोजनं भोजनसामग्रिकशाकादि ॥ ५ ॥ गतसत्त्वो मृतः ॥ ८ ॥ सस्यं शुष्यमाणम् ॥ ११ ॥ योजनेति लुप्ततृतीयान्तं पदम् । योजनैः सहस्रश संमितामिति शेषः ॥ १५ ॥ अस्मै आसनं देहीति स्वभृत्यमादिदेश ॥ १६ ॥

तेनैवमुक्तस्तमहं प्रत्यवोचं
प्राप्तोऽस्मि ते विषयं दुर्निवर्त्यम् ।
इच्छाम्यहं पुण्यकृतां समृद्धाँ-
ल्लोकान्द्रष्टुं यदि तेऽहं वराहः ॥ २०
यानं समारोप्य तु मां स देवो
वाहैर्युक्तं सुप्रभं भानुमत्तत् ।
संदर्शयामास तदात्मलोकान्
सर्वांस्तथा पुण्यकृतां द्विजेन्द्र ॥ २१
अपश्यं तत्र वेश्मानि तैजसानि महात्मनाम् ।
नानासंस्थानरूपाणि सर्वरत्नमयानि च २२
चन्द्रमण्डलशुभ्राणि किङ्किणीजालवन्ति च ।
अनेकशतभौमानि सान्तर्जलवनानि च ॥ २३
वैदूर्यार्कप्रकाशानि रूप्यरुक्ममयानि च ।
तरुणादित्यवर्णानि स्थावराणि चराणि च ॥
भक्ष्यभोज्यमयान्शैलान्वासांसि शयनानि च
सर्वकर्मफलांश्चैव वृक्षान्भवनसंस्थितान् २५
नद्यो वीथ्यः सभा वाप्यो दीर्घिकाश्चैव सर्वशः
योषवन्ति च यानानि युक्तान्यथ सहस्रशः
क्षीरस्रवा वै सरितो गिरींश्च
सर्पिस्तथा विमलं चापि तोयम् ।
वैवस्वतस्यानुमतांश्च देशा-
नदृष्टपूर्वोन्सुबहूनपश्यम् ॥ २७
सर्वान्दृष्ट्वा तदहं धर्मराज-
मवोचं वै प्रभविष्णुं पुराणम् ।
क्षीरस्यैताः सर्पिषश्चैव नद्यः
शाश्वत्स्रोताः कस्य भोज्याः प्रदिष्टाः
यमोऽब्रवीद्विद्धि भोज्यास्त्वमेता
ये दातारः साधवो गोरसानाम् ।
अन्ये लोकाः शाश्वता वीतशोकैः
समाकीर्णा गोप्रदाने रतानाम् ॥ २९
न त्वेतासां दानमात्रं प्रशस्तं
पात्रं कालो गोविशेषो विधिश्च ।
ज्ञात्वा देयं विप्र गवान्तरं हि
दुःखं ज्ञातुं पावकादित्यभूतम् ॥ ३०
स्वाध्यायवान् योऽतिमात्रं तपस्वी
वैतानस्थो ब्राह्मणः पात्रमासाम् ।
कृच्छ्रोत्सृष्टाः पोषणाभ्यागताश्च
द्वारैरेतैर्गोविशेषाः प्रशस्ताः ॥ ३१
तिस्रो रात्र्यस्त्वद्भिरुपोष्य भूमौ
तृप्ता गावस्तर्पितेभ्यः प्रदेयाः ।
वत्सैः प्रीताः सुप्रजाः सोपचारा-
स्त्र्यहं दत्वा गोरसैर्वर्तितव्यम् ॥ ३२
दत्वा धेनुं सुव्रतां कांस्यदोहां
कल्याणवत्सामपलायिनीं च ।
यावन्ति रोमाणि भवन्ति तस्या-
स्तावद्वर्षाण्यश्नुते स्वर्गलोकम् ॥ ३३
तथाऽनड्वाहं ब्राह्मणेभ्यः प्रदाय
दान्तं धुर्यं बलवन्तं युवानम् ।
कुलानुजीव्यं वीर्यवन्तं बृहन्तं
भुङ्क्ते लोकान्संमितान्धेनुदस्य ॥ ३४
गोषु क्षान्तं गोशरण्यं कृतज्ञं
वृत्तिग्लानं तादृशं पात्रमाहुः ।
वृद्धे ग्लाने संभ्रमे वा महार्थे
कृष्यर्थे वा होम्यहेतोः प्रसूत्याम् ॥ ३५
गुर्वर्थं वा बालपुष्टयाभिषङ्गां
गां वै दातुं देशकालोऽविशिष्टः ।
अन्तर्ज्ञाताः सक्रयज्ञानलब्धाः
प्राणक्रीता निर्जिता यौतकाश्च ॥ ३६


नाचिकेत उवाच ।

श्रुत्वा वैवस्वतवचस्तमहं पुनरब्रुवम् ।
अभावे गोप्रदातॄणां कथं लोकान् हि गच्छति
ततोऽब्रवीद्यमो धीमान् गोप्रदानपरां गतिम् ।
गोप्रदानानुकल्पं तु गामृते सन्ति गोप्रदाः ॥
अलाभे यो गवा दद्यात घृतधेनुं यतव्रतः ।
तस्यैता घृतवाहिन्यः क्षरन्ते वत्सला इव ३९
घृतालाभे तु यो दद्यात्तिलधेनुं यतव्रतः ।
स दुर्गात्तारितो धेन्वा क्षीरनद्यां प्रमोदते ४०

अनेकशतानि भौमानि उपर्युपरिभूमिसमूहा येषु तानि प्रासादमण्डलानि ॥ २३ ॥ गवामन्तर अन्योन्य तारतम्यं अवह् ॥ ३० ॥ कृच्छ्रोत्सृष्टा सङ्कटात् निरोधात् मुक्ता । पोषणार्थं दरिद्रागारादागता तादृशीनां पालन प्रशस्ततरमित्यर्थ ॥ ३१ ॥ **तिस्र इति** । त्र्यहमम्मात्राहारो भूमिशायी भूत्वा चतुर्थ दिनमारभ्य त्र्यहमेकैका गा दत्वा गोरसैर्वर्तिं कुर्यात् । एवं व्रतपूर्वकं गोत्रयं ददत उक्त वक्ष्यमाण च फलं भवतीत्यर्थ ॥ ३२ ॥ वृद्धे ग्लाने रोगिणि पथ्याशनार्थं संभ्रमे दुर्भिक्षे महार्थे यज्ञार्थे च प्रसूत्या पुत्रजन्मनि ॥३५॥ बालपृष्टया बालपुष्टयभिप्रायेण वा अन्न बहुदुग्धा शान्तेत्यादिगुणवत्त्वेन ज्ञाताः । क्रयलब्धा ज्ञानलब्धा प्राणव्ययव्ययेन क्रीता यौतका पाणिग्रहणादिकाले श्वशुरादिभ्य. प्राप्ता ॥ ३६ ॥

तिलालाभे तु यो दद्याज्जलधेनुं यतव्रतः ।
स कामप्रवहां शीतां नदीमेतामुपाश्नुते ॥ ४१
एवमेतानि मे तत्र धर्मराजो न्यदर्शयत् ।
दृष्ट्वा च परमं हर्षमवापमहमच्युत ॥ ४२
निवेदये चाहमिमं प्रियं ते
क्रतुर्महानल्पधनप्रचारः ।
प्राप्तो मया तात स मत्प्रसूतः
प्रपत्स्यते वेदविधिप्रवृत्तः ॥ ४३
शापो ह्ययं भवतोऽनुग्रहाय
प्राप्तो मया यत्र दृष्टो यमो वै ।
दानव्युष्टिं तत्र दृष्ट्वा महात्म-
न्निःसन्दिग्धान्दानधर्मांश्चरिष्ये ॥ ४४
इदं च मामब्रवीद्धर्मराजः
पुनः पुनः संप्रहृष्टो महर्षे ।
दानेन यः प्रयतोऽभूत्सदैव
विशेषतो गोप्रदानं च कुर्यात् ॥ ४५
शुद्धो ह्यर्थो नावमन्यस्व धर्मान्
पात्रे देयं देशकालोपपन्ने ।
तस्माद्गावस्ते नित्यमेव प्रदेया
मा भूच्च ते संशयः कश्चिदत्र ॥ ४६
एताः पुरा ह्यददन्नित्यमेव
शान्तात्मानो दानपथे निविष्टाः ।
तपांस्युग्राण्यप्रतिशंकमाना-
स्ते वै दानं प्रददुश्चैव शक्त्या ॥ ४७
काले च शक्त्या मत्सरं वर्जयित्वा
शुद्धात्मानः श्रद्दधानाः पुण्यशीलाः ।
दत्त्वा गा वै लोकमग्र्यं प्रपन्ना
देदीप्यन्ते पुण्यशीलास्तु नाके ॥ ४८
एतद्दानं न्यायलब्धं द्विजेभ्यः
पात्रे दत्तं प्रापणीयं परीक्ष्य ।
*काम्याष्टम्या वर्तितव्यं दशार्हं
रसैर्गवां शकृता प्रस्रवैर्वा ॥ ४९
देवव्रती स्याद्वृषभप्रदानै-
र्वैदावाप्तिर्गोयुगस्य प्रदाने ।
तीर्थावाप्तिर्गोप्रयुक्तप्रदाने
पापोत्सर्गः कपिलायाः प्रदाने ॥ ५०
गामप्येकां कापिलां संप्रदाय
न्यायोपेतां कलुषाद्विप्रमुच्येत् ।
गवां रसात्परमं नास्ति किंचि-
द्गवां प्रदानं सुमहद्ददन्ति ॥ ५१
गावो लोकांस्तारयन्ति क्षरन्त्यो
गावश्चान्नं सञ्जनयन्ति लोके ।
यस्तं जानन्न गवां हार्दमेति
स वै गन्ता निरयं पापचेताः ॥ ५२
यैस्तद्दत्तं गोसहस्रं शतं वा
दशार्धं वा दश वा साधुवत्सम् ।
अप्येका वै साधवे ब्राह्मणाय
साऽस्यामुष्मिन्पुण्यतीर्था नदी वै ५३
प्राप्त्या पुष्ट्या लोकसंरक्षणेन
गावस्तुल्याः सूर्यपादैः पृथिव्याम् ।
शब्दश्चैकः संनतिश्चोपभोगा-
स्तस्माद्गोदः सूर्य इवावभाति ॥ ५४
गुरुं शिष्यो वरयेद्गोप्रदाने
स वै गन्ता नियतं स्वर्गमेव ।
विधिज्ञानां सुमहान्धर्म एषो
विधिं ह्याद्यं विधयः संविशन्ति ५५
इदं दानं न्यायलब्धं द्विजेभ्यः
पात्रे दत्त्वा प्रापयेथाः परीक्ष्य ।
त्वय्याशासन्त्यमरा मानवाश्च
वयं चापि प्रसृते पुण्यशीले ॥ ५६
इत्युक्तोऽह धर्मराजं द्विजर्षे
धर्मात्मानं शिरसाऽभिप्रणम्य ।
अनुज्ञातस्तेन वैवस्वतेन
प्रत्यागमं भगवत्पादमूलम् ॥ ५७

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि यमवाक्यं नाम एकसप्ततितमोऽध्यायः ॥ ७१ ॥



क्रतुः गोदानरूपः ॥४३॥ प्रापणीयं गो आहारादि ॥४९॥ गोप्रयुक्तं रथशकटादि ॥ ५० ॥ हार्दं हृत्स्थं भक्ष्यपानकड्डयनादिकं कर्तुं न एति नानुस्मरति ॥ ५२॥ गवां सूर्यरश्मिसाम्याद्गोदः सूर्य इत्याह—प्राप्त्येति ॥ ५४ ॥ विधिं गुर्वाराधनपरं विधयो गोदानविधय संविशन्तीति पुण्यद्वैगण्यमुक्तम् ॥ ५५ ॥ द्विजेभ्यस्त्रैवर्णिकेभ्यो न्यायलब्धं दत्त्वा समर्प्य प्रापयेथा न तु पोषणमात्रार्थं प्रापयेथा इत्यर्थः ॥५६

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकसप्ततितमोऽध्यायः ॥ ७१ ॥

*कामे इच्छापूरणे साधुः काम्या या अष्टमी शुक्लकृष्णान्यतरा तस्यामिति मिश्राः ॥

७२

युधिष्ठिर उवाच ।

उक्तं ते गोप्रदानं वै नाचिकेतमृषिं प्रति ।
माहात्म्यमपि चैवोक्तमुद्देशेन गवां प्रभो ॥ १
नृगेण च महद्दुःखमनुभूतं महात्मना ।
एकापराधाद्दानात्पितामह महामते ॥ २
द्वारवत्यां यथा चासौ निविशन्त्यां समुद्धृतः
मोक्षहेतुरभूत्कृष्णस्तदप्यवधृतं मया ॥ ३
किं त्वस्ति मम सन्देहो गवा लोकं प्रति प्रभो
तत्त्वतः श्रोतुमिच्छामि गोदा यत्र वसन्त्युत ४

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यथाऽपृच्छत्पद्मयोनिमेतदेव शतक्रतुः ॥ ५

शक्र उवाच ।

स्वर्लोकवासिनां लक्ष्मीमभिभूय स्वयार्चिषा ।
गोलोकवासिनः पश्ये व्रजतः संशयोऽत्र मे ६
कीदृशा भगवँल्लोका गवां तद्ब्रूहि मेऽनघ ।
यानावसन्ति दातार एतदिच्छामि वेदितुम्
कीदृशाः किंफलाः किंस्वित्परमस्तत्र को गुणः
कथं च पुरुषास्तत्र गच्छन्ति विगतज्वराः ८
कियत्कालं प्रदानस्य दाता च फलमश्नुते ।
कथं बहुविधं दानं स्यादल्पमपि वा कथम् ९
ब्रह्मीनां कीदृशं दानमल्पानां वाऽपि कीदृशम्
अदत्वा गोप्रदाः सन्ति केन वा तच्च शंस मे
कथं वा बहुदाता स्यादल्पदात्रा समः प्रभो ।
अल्पप्रदाता बहुदः कथं स्वित्स्यादिहेश्वर ११
कीदृशी दक्षिणा चैव गोप्रदाने विशिष्यते ।
एतत्तथ्येन भगवन्मम शासितुमर्हसि ॥ १२

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि गोप्रदानिके द्विसप्ततितमोऽध्यायः ॥ ७२ ॥



७३

पितामह उवाच ।

योऽयं प्रश्नस्त्वया पृष्टो
गोप्रदानादिकारितः ।
नास्ति प्रष्टाऽस्ति लोकेऽस्मि-
स्त्वत्तोऽन्यो हि शतक्रतो ॥ १
सन्ति नानाविधा लोका
यांस्त्वं शक्र न पश्यसि ।
पश्यामि यानहं लोका-
नेकपत्न्यश्च याः स्त्रियः ॥ २
कर्मभिश्चापि सुशुभैः सुव्रता ऋषयस्तथा ।
सशरीरा हि तान्यान्ति ब्राह्मणाः शुभबुद्धयः
शरीरन्यासमोक्षेण मनसा निर्मलेन च ।
स्वप्नभूतांश्च ताँल्लोकान्पश्यन्तीहापि सुव्रताः ४
ते तु लोकाः सहस्राक्ष शृणु यादृग्गुणान्विताः
न तत्र क्रमते कालो न जरा न च पावकः ५
तथा नास्त्यशुभं किञ्चिन्न व्याधिस्तत्र न क्लमः
यद्यच्च गावो मनसा तस्मिन्वाञ्छन्ति वासव
तत्सर्वं प्राप्नुवन्ति स्म मम प्रत्यक्षदर्शनात् ।
कामगाः कामचारिण्यः कामात्कामाश्च भुञ्जते
वाप्यः सरांसि सरितो विविधानि वनानि च
गृहाणि पर्वताश्चैव यावद्धृदयं च किञ्चन ॥ ८

७२

उक्तमिति ॥ १ ॥ पश्ये पश्यामि ॥ ६ ॥ को गुण स च किंस्वित्परम का तस्या परा काष्ठेत्यर्थ ॥ ८ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

७३

योऽयमिति ॥ १ ॥ शरीरस्य न्यास समाधिकाले मोक्ष. मरणे निर्मलेन मनसा योगिनो न्यासे मोक्षे च ताँल्लोकान्पश्यन्ति ॥ ४ ॥

मनोज्ञं सर्वभूतेभ्यः सर्वतन्त्रं प्रदृश्यत ।
ईदृशाद्विपुलाल्लोकान्नास्ति लोकस्तथाविधः ९
तत्र सर्वसहाः क्षान्ता वत्सला गुरुवर्तिनः ।
अहङ्कारैर्विरहिता यान्ति शक्र नरोत्तमाः १०

यः सर्वमांसानि न भक्षयीत
पुमान्सदा भावितो धर्मयुक्तः ।
मातापित्रोरर्चिता सत्ययुक्तः
शुश्रूषिता ब्राह्मणानामनिन्द्यः ॥ ११
अक्रोधनो गोषु तथा द्विजेषु
धर्मे रतो गुरुशुश्रूषकश्च ।
यावज्जीवं सत्यवृत्ते रतश्च
दाने रतो यः क्षमी चापराधे ॥ १२
मृदुर्दान्तो देवपरायणश्च
सर्वातिथिश्चापि तथा दयावान् ।
ईदृग्गुणो मानवस्तं प्रयाति
लोकं गवां शाश्वतं चाव्ययं च १३
न पारदारी पश्यति लोकमेतं
न वै गुरुघ्नो न मृषा संप्रलापी ।
सदा प्रवादी ब्राह्मणेष्वाप्तवैरो
दोषैरेतैर्यश्च युक्तो दुरात्मा ॥ १४
न मित्रध्रुङ्नैकृतिकः कृतघ्नः
शठोऽनृजुर्धर्मविद्वेषकश्च ।
न ब्रह्महा मनसापि प्रपश्ये-
द्गवां लोकं पुण्यकृतां निवासम् १५

एतत्ते सर्वमाख्यातं निपुणेन सुरेश्वर ।
गोप्रदानरतानां तु फलं शृणु शतक्रतो ॥ १६
दायाद्यलब्धैरर्थैर्यो गाः क्रीत्वा संप्रयच्छति ।
धर्मार्जितान्धनैः क्रीतान्स लोकानाप्नुयाच्छुभान्
यो वै द्यूते धनं जित्वा गाः क्रीत्वा सप्रयच्छति
स दिव्यमयुतं शक्र वर्षाणां फलमश्नुते ॥ १८
दायाद्याः स्म वै गावो न्यायपूर्वैरुपार्जिताः
प्रदद्यात्ताः प्रदातॄणां सम्भवन्त्यपि च ध्रुवाः
प्रतिगृह्य तु यो दद्याद्गाः संशुद्धेन चेतसा ।
तस्यापीहाक्षयान्लोकान्
ध्रुवान् विद्धि शचीपते ॥
जन्मप्रभृति सत्यं च यो ब्रूयान्नियतेन्द्रियः ।
गुरुद्विजसहः क्षान्तस्तस्य गोभिः समा गतिः
न जातु ब्राह्मणो वाच्यो यदवाच्यं शचीपते ।
मनसा गोषु न द्रुह्येद्गोवृत्तिर्गोऽनुकल्पकः २२
सत्ये धर्मे च निरतस्तस्य शक्र फलं शृणु ।
गोसहस्रेण समिता तस्य धेनुर्भवत्युत ॥ २३
क्षत्रियस्य गुणैरेतैरपि तुल्यफलं शृणु ।
तस्यापि द्विजतुल्या गौर्भवतीति विनिश्चयः
वैशस्यैते यदि गुणास्तस्य पञ्चशतं भवेत् ।
शूद्रस्यापि विनीतस्य चतुर्भागफलं स्मृतम् ॥

एतच्चैनं योऽनुतिष्ठेत युक्तः
सत्ये रतो गुरुशुश्रूषया च ।
दक्षः क्षान्तो देवनार्थी प्रशान्तः
शुचिर्बुद्धो धर्मशीलोऽनहंवाक् ॥ २६
महत्फलं प्राप्यते स द्विजाय
दत्वा दोग्ध्रीं विधिनाऽनेन धेनुम् ।
नित्यं दद्यादेकभक्तः सदा च
सत्ये स्थितो गुरुशुश्रूषिता च ॥ २७
वेदाध्यायी गोषु यो भक्तिमांश्च
नित्यं दत्वा योऽभिनन्देत गाश्च ।
आजातितो यश्च गवां नमेत
इदं फलं शक्र निबोध तस्य ॥ २८
यत्स्यादिष्ट्वा राजसूये फलं तु
यत्स्यादिष्ट्वा बहुना काञ्चनेन ।
एतत्तुल्यं फलमप्याहुरग्र्यं
सर्वे सन्तस्तत्त्वृषयो ये च सिद्धाः २९
योऽग्रं भक्तं किञ्चिदप्राश्य दद्या-
द्गोभ्यो नित्यं गोव्रती सत्यवादी ।
शान्तोऽलुब्धो गोसहस्रस्य पुण्यं
संवत्सरेणाप्नुयात्सत्यशीलः ॥ ३०
यदेकभक्तमश्नीयाद्दद्यादेकं गवां च यत
दशवर्षाण्यनन्तानि गोव्रती गोऽनुकम्पकः ३१
एकेनैव च भक्तेन यः क्रीत्वा गां प्रयच्छति ।
यावन्ति तस्या रोमाणि संभवन्ति शतक्रतो
तावत्प्रदानात्स गवां फलमाप्नोति शाश्वतम्
ब्राह्मणस्य फलं ह्येतत् क्षत्रियस्य तु वै शृणु ३३
पञ्चवार्षिकमेवं तु क्षत्रियस्य फलं स्मृतम् ।
ततोर्धेन तु वैश्यस्य शूद्रो वैश्यार्धतः स्मृतः ।
यश्चात्मविक्रयं कृत्वा गाः क्रीत्वा संप्रयच्छति
यावत्संदर्शयेद्गां वै स तावत्फलमश्नुते ॥ ३५

नैकृतिको वंचक शठः समर्थोपि दारिद्र्यभाषी ॥ १५ ॥ गुरूणां द्विजानां वाऽपराधं सहते इति गुरुद्विजसह ॥२१॥ गोव्रतिरसंग्रहपर गवा घासादेरनुकल्पक सपादको गोनुकल्पक ॥ २२ ॥ संदर्शयेत्पश्येत् । यावद्ब्रह्माण्डे गोजातीयमस्ति तावत्तत्र वसेदित्यर्थ ॥ ३५ ॥

रोम्णि रोम्णि महाभाग
लोकाश्चास्याऽक्षयाः स्मृताः ।
संग्रामेष्वर्जयित्वा तु
यो वै गाः सम्प्रयच्छति ।
आत्मविक्रयतुल्यास्ताः
शाश्वता विद्धि कौशिक ॥ ३६

अभावे यो गवां दद्यात्तिलधेनुं यतव्रतः ।
दुर्गात्स तारितो धेन्वा क्षीरनद्यां प्रमोदते ३७

न त्वेवासां दानमात्रं प्रशस्तं
पात्रं कालो गोविशेषो विधिश्च ।
कालज्ञानं विप्र गवान्तरं हि
दुःखं ज्ञातुं पावकादित्यभूतम् ॥
स्वाध्यायाढ्यं शुद्धयोनिं प्रशान्तं
वैतानस्थं पापभीरुं बहुज्ञम् ।
गोषु क्षान्तं नातितीक्ष्णं शरण्यं
वृत्तिग्लानं तादृशं पात्रमाहुः ३९

वृत्तिग्लाने सीदति चातिमात्रं
कृष्यर्थं वा होम्यहेतोः प्रसूतेः ।
गुर्वर्थं वा बालसंवृद्धये वा
धेनुं दद्यादेशकाले विशिष्टे ॥ ४०

अन्तर्ज्ञाताः सक्रयज्ञानलब्धाः
प्राणैः क्रीतास्तेजसा यौतकाश्च ।
कृच्छ्रोत्सृष्टाः पोषणाभ्यागताश्च
द्वारैरेतैर्गोविशेषाः प्रशस्ताः ॥ ४१

बलान्विताः शीलवयोपपन्नाः
सर्वाः प्रशंसन्ते सुगन्धवत्यः ।
यथा हि गङ्गा सरितां वरिष्ठा
तथार्जुनीनां कपिला वरिष्ठा ॥ ४२

तिस्रो रात्रीस्त्वद्भिरुपोष्य भूमौ
तृप्ता गावस्तर्पितेभ्यः प्रदेयाः ।
वत्सैः पुष्टैः क्षीरपैः सुप्रचारा-
स्त्र्यहं दत्वा गोरसैर्वर्तितव्यम् ॥ ४३

दत्वा धेनुं सुव्रतां साधुदोहां
कल्याणवत्सामपलायिनीं च ।
यावन्ति रोमाणि भवन्ति तस्या
स्तावन्ति वर्षाणि भवन्त्यमुत्र ॥ ४४

तथाऽनड्वाहं ब्राह्मणाय प्रदाय
धुर्यं युवानं बलिनं विनीतम् ।
हलस्य वोढारमनन्तवीर्यं
प्राप्नोति लोकान् दशधेनुदस्य ॥ ४५

कान्तारे ब्राह्मणान्गाश्च यः परित्राति कौशिक
क्षणेन विप्रमुच्येत तस्य पुण्यफलं शृणु ४६

अश्वमेधक्रतोस्तुल्यं फलं भवति शाश्वतम् ।
मृत्युकाले सहस्राक्ष या वृत्तिमनुकाङ्क्षते ॥
लोकान्बहुविधान्दिव्यान्यश्चास्य हृदि वर्तते
तत्सर्वं समवाप्नोति कर्मणेतेन मानवः ४८

गोभिश्च समनुज्ञातः सर्वत्र च महीयते ।
यस्त्वेतेनैव कल्पेन गा वनेष्वनुगच्छति ४९

तृणगोमयपर्णाशी निस्पृहो नियतः शुचिः ।
अकाम तेन वस्तव्यं मुदितेन शतक्रतो ॥ ५०
मम लोके सुरैः सार्धं लोके यत्रापि चेच्छति

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि पितामहेन्द्रसंवादे त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

७४

इन्द्र उवाच ।
जानन्यो गामपहरेद्विक्रीयाद्वार्थकारणात्।
एतद्विज्ञातुमिच्छामि क नु तस्य गतिर्भवेत १

पितामह उवाच ।
भक्षार्थं विक्रयार्थं वा येऽपहारं हि कुर्वते ।
दानार्थं ब्राह्मणार्थाय तत्रेदं श्रूयतां फलम् ॥२

अर्जुनीनां गवाम्॥४३॥ इति श्रीमहाभारते अनुशासनपर्वणि नीलकण्ठीये भारतभावदीपे त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

७४

जानाति ॥१॥

विक्रयार्थं हि यो हिंस्याद्भक्षयेद्वा निरंकुशः ।
घातयानं हि पुरुषं येऽनुमन्येयुरर्थिनः ॥ ३
घातकः खादको वापि तथा यश्चानुमन्यते ।
यावंति तस्या रोमाणि तावद्वर्षाणि मज्जति४
ये दोषा यादृशाश्चैव द्विजयज्ञोपघातके ।
विक्रये चापहारे च ते दोषा वै स्मृताः प्रभो५
अपहृत्य तु यो गां वै ब्राह्मणाय प्रयच्छति ।
यावद्गानफलं तस्यास्तावद्विरयमृच्छति ॥ ६
सुवर्णं दक्षिणामाहुर्गोप्रदाने महाद्युते ।
सुवर्णं परमित्युक्तं दाक्षिणार्थमसंशयम् ॥ ७
गोप्रदानात्तारयते सप्त पूर्वांस्तथा परान् ।
सुवर्णं दक्षिणां कृत्वा तावद्विगुणमुच्यते ८
सुवर्णं परमं दानं सुवर्णं दक्षिणा परा ।
सुवर्णं पावनं शक्र पावनानां परं स्मृतम् ९
कुलानां पावनं प्राहुर्जातरूपं शतक्रतो ।
एषा मे दक्षिणा प्रोक्ता समासेन महाद्युते १०

भीष्म उवाच ।

एतत्पितामहेनोक्तमिन्द्राय भरतर्षभ ।
इन्द्रो दशरथायाह रामायाह पिता तथा ११
राघवोऽपि प्रियभ्रात्रे लक्ष्मणाय यशस्विने ।
ऋषिभ्यो लक्ष्मणेनोक्तमरण्ये वसता प्रभो १२
पारंपर्यागतं चेदमृषयः संशितव्रताः ।
दुर्धरं धारयामासु राजानश्चैव धार्मिकाः १३
उपाध्यायेन गादितं मम चेद युधिष्ठिर ।
य इदं ब्राह्मणो नित्यं वदेद्ब्राह्मणसंसदि १४
यज्ञेषु गोप्रदानेषु द्वयोरपि समागमे ।
तस्य लोकाःकिलाक्षय्या दैवतैः सह नित्यदा

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि
चतुःसप्ततितमोऽध्यायः ॥७४॥

७५

युधिष्ठिर उवाच ।

विस्रंभितोऽहं भवता धर्मान्प्रवदता विभो ।
प्रवक्ष्यामि तु संदेहं तन्मे ब्रूहि पितामह ॥ १
व्रतानां किं फलं प्रोक्तं कीदृशं वा महाद्युते ।
नियमानां फलं किं च स्वधीतस्य च किं फलम्
दत्तस्येह फलं किं च वेदानां धारणे च किम् ।
अध्यापने फलं किं च सर्वमिच्छामि वेदितुम्
अप्रतिग्राहके किं च फलं लोके पितामह ।
तस्य किं च फलं दृष्टं श्रुतं यस्तु प्रयच्छति ॥४
स्वकर्मनिरतानां च शूराणां चापि किं फलं
शौचे च किं फलं प्रोक्तं ब्रह्मचर्ये च किं फलम्
पितृशुश्रूषणे किं च मातृशुश्रूषणे तथा ।
आचार्यगुरुशुश्रूषास्वनुक्रोशानुकंपने ॥ ६
एतत्सर्वमशेषेण पितामह यथातथम् ।
वेत्तुमिच्छामि धर्मज्ञ परं कौतूहलं हि मे ॥ ७

भीष्म उवाच ।

यो व्रतं वै यथोद्दिष्टं तथा संप्रतिपद्यते ।
अखण्डं सम्यगारभ्य तस्य लोकाः सनातनाः
नियमानां फलं राजन्प्रत्यक्षमिह दृश्यते ।
नियमानां क्रतूनां च त्वयाऽवाप्तमिदं फलम्
स्वधीतस्याप च फलं दृश्यतेऽमुत्र चेह च ।
इहलोकेऽथवा नित्यं ब्रह्मलोके च मोदते १०
दमस्य तु फलं राजञ्शृणु त्वं विस्तरेण मे ।
दान्ताः सर्वत्र सुखिना दान्ताः सर्वत्र निर्वृताः
यत्रेच्छागामिनो दान्ताः सर्वशत्रुनिषूदनाः ।
प्रार्थयन्ति च यद्दान्ता लभन्ते तन्न संशयः ॥
युज्यन्ते सर्वकामैर्हि दान्ताः सर्वत्र पाण्डव ।
स्वर्गे यथा प्रमोदन्ते तपसा विक्रमेण च १३
दानैर्यज्ञैश्च विविधैस्तथा दान्ताः क्षमान्विताः
दानाद्दमो विशिष्टो हि ददतीकाचिद्धि जातये ॥

विक्रयार्थं यो नियुङ्क्ते इति शेषः ॥ ३ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नीलकण्ठीये भारतभावदीपे चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

७५

विस्रंभित इति ॥ १ ॥ अनुक्रोशः परदुःखेन दुःखितत्वं अनुकम्पा तत्प्रतीकारकरणम् ॥ ६ ॥ व्रतं एकभक्तादिनियमम् ॥ ८ ॥ फलं ऐश्वर्यमेव प्रत्यक्षम् ॥ ९ ॥

दाता कुप्यति नो दान्तस्तस्माद्दानात्परं दमः
यस्तु दद्यादकुप्यन्हि तस्य लोकाः सनातनाः॥
क्रोधो हन्ति हि यद्दानं तस्माद्दानात्परं दमः
अदृश्यानि महाराज स्थानान्ययुतशो दिवि
ऋषीणां सर्वलोकेषु याने ते यान्ति देवताः।
दमेन यानि नृपते गच्छन्ति परमर्षयः॥ १७
कामयाना महत्स्थानं तस्माद्दानात्परं दमः।
अध्यापकः परिक्लेशादक्षयं फलमश्नुते॥ १८
विधिवत्पावकं हुत्वा ब्रह्मलोके नराधिप।
अधीत्यापि हि यो वेदान्न्यायविद्भ्यः प्रयच्छति
गुरुकर्मप्रशंसी तु सोऽपि स्वर्गे महीयते।
क्षत्रियोऽध्ययने युक्तो यजने दानकर्मणि।
युद्धे यश्च परित्राता सोऽपि स्वर्गे महीयते २०
वैश्यः स्वकर्मनिरतः प्रदानाल्लभते महत्।
शूद्रः स्वकर्मनिरतः स्वर्गं शुश्रूषयाऽर्च्छति २१
शूरा बहुविधाः प्रोक्तास्तेषामर्थास्तु मे शृणु।
शूरान्वयानां निर्दिष्टं फलं शूरस्य चैव हि॥
यज्ञशूरा दमे शूराः सत्यशूरास्तथाऽपरे।
युद्धशूरास्तथैवोक्ता दानशूराश्च मानवाः २३
सांख्यशूराश्च बहवो योगशूरास्तथाऽपरे।
अरण्ये गृहवासे च त्यागे शूरास्तथाऽपरे २४
आर्जवे च तथा शूराः शमे वर्तन्ति मानवाः।
तैस्तैश्च नियमैः शूरा बहवः सन्ति चापरे।
वेदाध्ययनशूराश्च शूराश्चाध्यापने रताः॥२५
गुरुशुश्रूषया शूराः पितृशुश्रूषयाऽपरे।
मातृशुश्रूषया शूरा भैक्ष्यशूरास्तथाऽपरे २६
अरण्ये गृहवासे च
शूराश्चातिथिपूजने।
सर्वे यान्ति परान्लोकान्
स्वकर्मफलनिर्जितान्॥ २७

धारणं सर्ववेदानां सर्वतीर्थावगाहनम्।
सत्यं च ब्रुवतो नित्यं समं वा स्यान्न वा समं
अश्वमेधसहस्रं च सत्यं च तुलया धृतम्।
अश्वमेधसहस्राद्धि सत्यमेव विशिष्यते॥ २९
सत्येन सूर्यस्तपति सत्येनाग्निः प्रदीप्यते।
सत्येन मरुतो वान्ति सर्वं सत्ये प्रतिष्ठितम्
सत्येन देवाः प्रीयन्ते पितरो ब्राह्मणास्तथा।
सत्यमाहुः परो धर्मस्तस्मात्सत्यं न लंघयेत
मुनयः सत्यनिरता मुनयः सत्यविक्रमाः।
मुनयः सत्यशपथास्तस्मात्सत्यं विशिष्यते॥
सत्यवन्तः स्वर्गलोके मोदन्ते भरतर्षभ।
दमः सत्यफलावाप्तिरुक्ता सर्वात्मना मया॥
असशयं विनीतात्मा स वै स्वर्गे महीयते।
ब्रह्मचर्यस्य च गुणं शृणु त्वं वसुधाधिप॥ ३४
आजन्ममरणाद्यस्तु ब्रह्मचारी भवेदिह।
न तस्य किंचिदप्राप्यमिति विद्धि नराधिप
बह्वयः कोट्यस्तवृषीणां तु ब्रह्मलोके वसन्त्युत
सत्ये रतानां सततं दान्तानामूर्ध्वरेतसाम्॥
ब्रह्मचर्यं दहेद्राजन् सर्वपापान्युपासितम्।
ब्राह्मणेन विशेषेण ब्राह्मणो ह्यग्निरुच्यते॥ ३७
प्रत्यक्षं हि तथा ह्येतद्ब्राह्मणेषु तपस्विषु।
बिभेति हि यथा शक्रो ब्रह्मचारिप्रधर्षितः ३८
तद्ब्रह्मचर्यस्य फलमृषीणामिह दृश्यते।
मातापित्रोः पूजने यो धर्मस्तमपि मे शृणु ३९
शुश्रूषते यः पितरं न चासूयेत्कदाचन।
मातरं भ्रातरं वापि गुरुमाचार्यमेव च॥ ४०
तस्य राजन्फलं विद्धि स्वर्लोके स्थानमर्चितम्
न च पश्यति नरकं गुरुशुश्रूषयाऽऽत्मवान् ४१

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि
पञ्चसप्ततितमोऽध्यायः॥ ७५॥



७६

युधिष्ठिर उवाच ।
विधिं गवां परं श्रोतुमिच्छामि नृप तत्त्वतः
येन तान् शाश्वताँल्लोकानर्थिनां प्राप्नुयादिह १
भीष्म उवाच ।
न गोदानात्परं किंचिद्विद्यते वसुधाधिप ।
गौर्हि न्यायागता दत्ता सद्यस्तारयते कुलम्
सतामर्थे सम्यगुत्पादितो यः
स वै कल्पः सम्यगाभ्यः प्रजाभ्यः ।
तस्मात्पूर्वं ह्यादिकालप्रवृत्तं
गोदानार्थं शृणु राजान्विधिं मे ॥ २
पुरा गोषूपनीतासु गोषु सन्दिग्धदर्शिना ।
मां धात्रा प्रकृतं प्रश्नं बृहस्पतिरभाषत ॥ ४
द्विजातिमतिसत्कृत्य श्वः कालमभिवेद्य च ।
गोदानार्थे प्रयुञ्जीत रोहिणीं नियतव्रतः ॥ ५
आह्वानं च प्रयुञ्जीत समङ्गे बहुलेति च ।
प्रविश्य च गवां मध्यमिमां श्रुतिमुदाहरेत् ६
गौर्मे माता वृषभः पिता मे
दिवं शर्म जगती मे प्रतिष्ठा ।
प्रपद्यैवं शर्वरीमुष्य गोषु
पुनर्वाणीमुत्सृजेद्गोप्रदाने ॥ ७
स तामेकां निशां गोभिः समसख्यः समव्रतः
ऐकात्म्यगमनात्सद्यः कलुषाद्विप्रमुच्यते ॥ ८
उत्सृष्टवृषवत्सा हि प्रदेया सूर्यदर्शने ।
त्रिदिवं प्रतिपत्तव्यमर्थवादाशिषस्तव ॥ ९
ऊर्जस्विन्य ऊर्जमेधाश्च यज्ञे
गर्भोऽमृतस्य जगतोऽस्य प्रतिष्ठा ।
क्षिते रोहः प्रवहः शश्वदेव
प्राजापत्याः सर्वमित्यर्थवादाः ॥ १०
गावो ममैनः प्रणुदन्तु सौर्या-
स्तथा सौम्याः स्वगेयानाय सन्तु ।
आत्मानं मे मातृवच्चाश्रयन्तु
तथाऽनुक्ताः सन्तु सर्वाशिषो मे ११
शेषोत्सर्गे कर्मभिर्देहमोक्षे
सरस्वत्यः श्रेयसे संप्रवृत्ताः ।
यूय नित्यं सर्वपुण्योपवाह्यां
दिशध्वं मे गतिमिष्टां प्रसन्नाः ॥ १२
या वै यूयं सोऽहमद्यैव भावो
युष्मान्दत्त्वा चाहमात्मप्रदाता ।
मनश्च्युता मन एवोपपन्नाः
सन्धुक्षध्वं सौम्यरूपोग्ररूपाः ॥ १३
एवं तस्याग्रे पूर्वमर्धं वदेत
गवां दाता विधिवत्पूर्वदृष्टः ।
प्रतिब्रूयाच्छेषमर्धं द्विजातिः
प्रतिगृह्णन्वै गोप्रदाने विधिज्ञः १४
गोप्रदानीति वक्तव्यमर्घ्यवस्त्रवसुप्रदः ।
ऊर्ध्वास्या भावितव्या च वैष्णवीति च चोदयेत्

७६

विधिमिति ॥ १ ॥ यो विधिरुत्पादित ॥ ३ ॥ स्वकालमिति पाठे स्वकालं स्वस्य मृत्युं आकस्मिकं ज्ञात्वा रोहिणीं लोहितवर्णाम् ॥ ५ ॥ बहुले इति च्छेद सन्धिरार्षः ॥ ६ ॥ दिवं स्वर्गं शर्म ऐहिकं सुखं प्रयच्छत्विति शेष ।जगती गौ । 'पशवो जगति इति श्रुते ।एवमनेन मन्त्रेण गोष्ठं प्रपद्य गत्वा मौनेन तत्र वासं कृत्वा द्वितीयेऽह्नि गोप्रदानकाल एव वाचं विसृजेत् इदं गोप्रदानस्य पूर्वाङ्गं व्रतम् ॥ ७ ॥ समसख्यो गा अनिवारयन् समव्रत भूतलशायित्वदंशाद्यनिवारकत्वादिगुणयुक्त ॥ ८ ॥ उत्सृष्ट वृषवत्सो यया सार्धं सा उत्सृष्टवृषवत्सेति **गौडाः** । त्वया दात्रा प्रदेया त्रिदिवं च प्रतिपत्तव्य गन्तव्यम् । अर्थवादमन्त्रोक्ता आशिषश्च तव भविष्यन्तीति योज्यम् ॥ ९ ॥ आशिषमेवाह—**ऊर्जस्विन्य इति** । ऊर्जस्तु कार्तिकोत्साहबलेषु प्राणनेऽपि च इति **मेदिनी** । बलवत्य. उत्साहवत्यो वा ऊर्जस्विन्य ऊर्जमेधा उपगतप्रज्ञा । यज्ञे अमृतस्य तत्साधनस्य हविषो गर्भ इव गर्भ क्षेत्रभूता । क्षिते ऐश्वर्यस्य रोह । शश्वत् शाश्वत क्षिते प्रवह प्रवाहरूपाश्च ॥१०॥ अनुक्ता मन्त्रद्वयेन उक्ताश्च आशिषो मे सन्तु ॥ ११ ॥ 'शोषोत्सर्गे क्षयरोगोपतापापनये शोषो यक्ष्माणि शोषणे'इति **मेदिनी** । क्षयरोगादिनिवृत्तौ देहमोक्षे च कर्मभि पञ्चगव्यादिभि सेविता सत्य सरस्वत्यो नद्य इव श्रेयसे संप्रवृत्ता ॥ १२ ॥ **येति** । गवा स्वस्य चाभेदेन गोदानात् आत्मदानफलं लभ्यमित्यर्थ । मनश्च्युता दातुर्ममत्वाभिमानात् च्युता । मन एव उपपन्ना मदीयममतास्पदीभूता । संधुक्षध्व दातारं मा च इष्टैर्भोगै प्रकाशयध्वम् ॥ १३ ॥ **एवमिति** । अयं श्लोको दातृप्रतिग्रहीतृभ्या क्रमेणार्धशपठनीय इत्यर्थ ॥ १४ ॥ **गोप्रदानीतीति** । अर्घ्यवस्त्रवसुप्रदोऽपि गोप्रदानीति वक्तव्यमिति योजना । यो गोः प्रतिनिधित्वेन अर्घ्यं वस्त्रं सुवर्णं वा प्रयच्छति सोऽपि गोप्र-

नाम सङ्कीर्तयेत्तस्या यथासंख्योत्तरं स वै ।
फलं षट्त्रिंशदष्टौ च सहस्राणि च विंशतिः
एवमेतान् गुणान्विद्याद्वादीनां यथाक्रमम् ।
गोप्रदाता समाप्नोति समस्तानष्टमे क्रमे १७
गोदः शीली निर्भयश्चार्घदाता ।
न स्याद्दुःखी वसुदाता च कामम् ।
उषस्योढा भारते यश्च विद्वान्
विख्यातास्ते वैष्णवाश्चन्द्रलोकाः १८
गा वै दत्वा गोव्रती स्यान्निरात्रं
निशां चैकां संवसेतेह ताभिः ।
कामाष्टम्यां वर्तितव्यं त्रिरात्रं
रसैर्वा गोः शकृता प्रस्रवैर्वा ॥ १९
देवव्रती स्यादृषभप्रदाने
वेदावाप्तिर्गोयुगस्य प्रदाने ।
तथा गवां विधिमासाद्य यज्वा
लोकानग्र्यान्विन्दते नाविधिज्ञः २०
कामान्सर्वान्पार्थिवानेकसंख्या-
न्यो वै दद्यात्कामदुघाञ्च धेनुम् ।
सम्यक्ताः स्युर्हव्यकव्यौघवत्य-
स्तासामुष्णां ज्यायसां संप्रदानम् २१
न चाशिष्यायाव्रतायोपकुर्या-
न्नाश्रद्दधानाय न वक्रबुद्धये ।
गुह्यो ह्यय सर्वलोकस्य धर्मो
नेमं धर्मं यत्र तत्र प्रजल्पेत् ॥ २२
सन्ति लोके श्रद्दधाना मनुष्याः
सन्ति क्षुद्रा राक्षसमानुषेषु ।
एषामेतद्दीयमानं ह्यनिष्टं
ये नास्तिक्यं चाश्रयन्तेऽल्पपुण्याः ॥
बार्हस्पत्यं वाक्यमेतन्निशम्य
ये राजानो गोप्रदानानि दत्वा ।
लोकान्प्राप्ताः पुण्यशीलाः प्रवृत्ता-
स्तान्मे राजन्कीर्त्यमानान्निबोध २४
उशीनरो विष्वगश्वो नृगश्च
भगीरथो विश्रुतो यौवनाश्वः ।
मान्धाता वै मुचुकुन्दश्च राजा
भूरिद्युम्नो नैषधः सोमकश्च ॥ २५
पुरूरवो भरतश्चक्रवर्ती
यस्यान्ववाये भरताः सर्व एव ।
तथा वीरो दाशरथिश्च रामो
ये चाप्यन्ये विश्रुताः कीर्तिमन्तः २६
तथा राजा पृथुकर्मा दिलीपो
दिवं प्राप्तो गोप्रदानैर्विधिज्ञः ।
यज्ञैर्दानैस्तपसा राजधर्मै-
र्मान्धाताऽभूद्गोप्रदानैश्च युक्तः ॥ २७
तस्मात्पार्थ त्वमपीमां मयोक्तां
बार्हस्पत्यां भारतीं धारयस्व ।
द्विजाग्र्येभ्यः संप्रयच्छस्व प्रीतो
गाः पुण्या वै प्राप्य राज्यं कुरूणाम्
वैशम्पायन उवाच ।
तथा सर्वं कृतवान्धर्मराजो
भीष्मेणोक्तो विधिवद्गोप्रदाने ।
स मान्धातुर्वेद देवोपदिष्टं
सम्यग्धर्मं धारयामास राजा ॥ २९

दानी भवतीत्यर्थ । अर्घ्यं अर्घो व्यावहारिक गोमूल्यं वस्त्रमपि आधानप्रकरणे **बौधायनेन** गोप्रतिनिधित्वेनोक्तम् । 'यावतीर्गा दद्यात्तावन्ति वासासि तावदोदनान् वा दद्यात्' इति । 'सुवर्णं तु गोस्तु मात्रा न विद्यते' इति श्रुतेरपरिमितम् । अर्घादिकं यावच्छक्ति देयम् । तत्र अर्घगोप्रदाने इमा ऊर्ध्वास्याम् । पाठान्तरे ऊधस्या तुभ्य सप्रददे त्व गृहागेति चोदयेत् । वस्त्रधेनुं भवितव्येतिपाठान्तरे नमितव्येति वा वसु धेनुं वैष्णवीति कीर्तयेदित्यर्थ ॥ १५ ॥ गवादीना गोप्रतिनिधीना एव तत्फलं प्रत्यक्षगोदाने गोप्रतिग्रहीतुर्गृहं गच्छन्त्या अष्टमे पदे भवन्ति किमु तद्गृहगमने तदीयबालकातिथ्यभिहोत्रादीना चिरकालनिर्वाह इति भाव ॥ १७ ॥ **गोद इति** । शीली शीलवान् अर्घदाता निर्भय इति संबन्ध । निकृष्टत्वाद्वस्त्रदातु फलं नोक्तम् । एवं त्रयाणामैहिकं फलमुक्त्वा आमुष्मिक फलमाह—**उषस्योढेति** । उषस्यं प्रात स्नानादि कर्म ऊढं प्राप्तं यै : 'उषस्योढ स विज्ञेयो ब्रह्मदेयायुतस्तु य' भारते विद्वान् **भारतवेत्ता** वैष्णवा विष्णुभक्ता चन्द्रवत् लोकआलोको येषा एवं विख्याता कथिता इति **केचित्** । त्रयोऽपि वैष्णवा विष्णुदत्ताश्चन्द्रवदमृतस्रवा लोका विदो वियन्ते ऽस्मिन्स विद्वान् ॥१८॥ देवव्रती ब्रह्मचारी सूर्यमण्डलभेत्ता ॥ २० ॥ एकसस्थान् एकीकृतान् गजग्रामादिसर्वदानतुल्यमेकधेनुदानं किमुत बह्वयो हव्यादिमत्यो देया तासा ताभ्योऽधिकमिति शेष । उष्णा त्र्यवराणाम् ॥ २१ ॥ उपकुर्यात् एतत्कथनेन ॥ २२ ॥

इति नृप सततं गवां प्रदाने
यवशकलान्सह गोमयैः पिबानः ।
क्षितितलशयनः शिखी यतात्मा
वृष इव राजवृषस्तदा बभूव ॥ ३०

नरपतिरभवत्सदैवताभ्यः
प्रयतमनास्त्वभिसंस्तुवंश्च ताः स्म ।
नृपतिधुरि च गामयुक्त भूप-
स्तुरगवरैरगमच्च यत्र तत्र ॥ ३१

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि गोदानकथने षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

७७

वैशम्पायन उवाच ।
ततो युधिष्ठिरो राजा भूयः शान्तनवं नृपम्
गोदानविस्तरं धर्मान्पप्रच्छ विनयान्वितः १

युधिष्ठिर उवाच ।
गोप्रदानगुणान्सम्यक् पुनर्मे ब्रूहि भारत ।
न हि तृप्याम्यहं वीर शृण्वानोऽमृतमीदृशम्

वैशम्पायन उवाच ।
इत्युक्तो धर्मराजेन तदा शान्तनवो नृपः ।
सम्यगाह गुणांस्तस्मै गोप्रदानस्य केवलान् २

भीष्म उवाच ।
वत्सलां गुणसंपन्नां तरुणीं वस्त्रसंयुताम् ।
दत्वेदृशीं गां विप्राय सर्वपापैः प्रमुच्यते ४
असुर्या नाम ते लोका गां दत्वा तान्न गच्छति
पीतोदकां जग्धतृणां नष्टक्षीरां निरिन्द्रियाम्
जरारोगोपसंपन्नां जीर्णां वापीमिवाजलाम् ।
दत्वा तमः प्रविशति द्विजं क्लेशेन योजयेत् ६
रुष्टा दुष्टा व्याधिता दुर्बला वा
नो दातव्या याश्च मूल्यैरदत्तैः ।
क्लेशैर्विप्रं योऽफलैः संयुनक्ति
तस्यावीर्याश्चाफलाश्चैव लोकाः ॥ ७
बलान्विताः शीलवयोपपन्नाः
सर्वे प्रशसन्ति सुगन्धवत्यः ।
यथा हि गङ्गा सरितां वरिष्ठा
तथार्जुनीनां कपिला वरिष्ठा ॥ ८

युधिष्ठिर उवाच ।
कस्मात्समाने बहुलाप्रदाने
सद्भिः प्रशस्तं कपिलाप्रदानम् ।
विशेषमिच्छामि महाप्रभावं
श्रोतुं समर्थोऽस्मि भवान्प्रवक्तुम् ॥ ९

भीष्म उवाच ।
वृद्धानां ब्रुवतां तात श्रुतं मे यत्पुरातनम् ॥
वक्ष्यामि तदशेषेण रोहिण्यो निर्मिता यथा ॥
प्रजा सृजेति चादिष्टः पूर्वं दक्षः स्वयंभुवा ।
असृजद्वृत्तिमेवाग्रे प्रजानां हितकाम्यया ॥
यथा ह्यमृतमाश्रित्य वर्तयन्ति दिवौकसः ।
तथा वृत्तिं समाश्रित्य वर्तयन्ति प्रजा विभो
अचरेभ्यश्च भूतेभ्यश्चराः श्रेष्ठाः सदा नराः ।
ब्राह्मणाश्च ततः श्रेष्ठास्तेषु यज्ञाः प्रतिष्ठिताः ॥
यज्ञैरवाप्यते सोमः स च गोषु प्रतिष्ठितः ।
ततो देवाः प्रमोदन्ते पूर्वं वृत्तिस्ततः प्रजाः ॥
प्रजातान्येव भूतानि प्राक्रोशन्वृत्तिकांक्षया ।
वृत्तिदं चान्वपद्यन्त तृषिताः पितृमातृवत् ॥
इतीदं मनसा गत्वा प्रजासर्गार्थमात्मनः ।
प्रजापतिस्तु भगवानमृतं प्रापिबत्तदा ॥ १६
स गतस्तस्य तृप्तिं तु गन्धं सुरभिमुद्विरन् ॥
ददर्शोद्गारसंवृत्तां सुरभिं मुखजां सुताम् १७
साऽसृजत्सौरभेयीस्तु सुरभिर्लोकमातृकाः ।
सुवर्णवर्णाः कपिलाः प्रजानां वृत्तिधेनवः १८

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षट्सप्ततितमोऽध्यायः ॥ ७६ ॥

७७

तत इति ॥ १ ॥

तासाममृतवर्णानां क्षरन्तीनां समंततः ।
बभूवामृतजः फेनः स्रवन्तीनामिवोर्मिजः १९
स वत्समुखविभ्रष्टो भवस्य भुवि तिष्ठतः ।
शिरस्यवाप तत्क्रुद्धः स तदैक्षत च प्रभुः २०
ललाटप्रभवेणाक्ष्णा रोहिणीं प्रदहन्निव ।
तत्तेजस्तु ततो रौद्रं कपिलास्ता विशांपते ॥
नानावर्णत्वमनयन्मेघानिव दिवाकरः ।
यास्तु तस्मादपक्रम्य सोममेवाभिसंश्रिताः २२
यथोत्पन्नाः स्ववर्णास्थास्ता नीताश्चान्यवर्णतां
अथ क्रुद्ध महादेवं प्रजापतिरभाषत ॥ २३
अमृतेनावसिक्तस्त्वं नोच्छिष्टं विद्यते गवाम्
यथा ह्यमृतमादाय सोमो विस्यन्दते पुनः २४
तथा क्षीरं क्षरन्त्येता रोहिण्योऽमृतसंभवम् ।
न दुष्यत्यनिलो नाग्निर्न सुवर्णं न चोदधिः ॥
नामृतेनामृतं पीतं वत्सपीता न वत्सला ।
इमान्लोकान्भरिष्यन्ति हविषा प्रस्रवेण च ॥
आसामैश्वर्यमिच्छन्ति सर्वेऽमृतमयं शुभम् ।
वृषभं च ददौ तस्मै सह गोभिः प्रजापतिः२७
प्रसादयामास मनस्तेन रुद्रस्य भारत ।
प्रीतश्चापि महादेवश्चकार वृषभं तदा ॥ २८
ध्वज च वाहनं चैव तस्मात्स वृषभध्वजः ।
ततो देवैर्महादेवस्तदा पशुपतिः कृतः ।
ईश्वरः स गवां मध्ये वृषभाङ्कः प्रकीर्तितः९९

एवमद्यग्रवर्णानां कपिलानां महौजसाम् ।
प्रदाने प्रथमः कल्पः सर्वासामेव कीर्तितः ३०
लोकज्येष्ठा लोकवृत्तिप्रवृत्ता
रुद्रोपेताः सोमविष्यन्दभूताः ।
सौम्याः पुण्याः कामदाः प्राणदाश्च
गा वै दत्वा सर्वकामप्रदः स्यात् ३१
इदं गवां प्रभवविधानमुत्तमं
पठन्सदाऽशुचिरपि मङ्गलप्रियः ।
विमुच्यते कलिकलुषेण मानवः
श्रियं सुतान् धनपशुमाप्नुयात्सदा ३२
हव्य कव्यं तर्पणं शान्तिकर्म
यानं वासो वृद्धबालस्य तुष्टिः ।
एतान्सर्वान् गोप्रदाने गुणान्वै
दाता राजन्नाप्नुयाद्वै सदैव ॥ ३३

वैशम्पायन उवाच ।

पितामहस्याथ निशम्य वाक्यं
राजा सह भ्रातृभिराजमीढः ।
सुवर्णवर्णानडुहस्तथा गाः
पार्थो ददौ ब्राह्मणसत्तमेभ्यः ॥ ३४
तथैव तेभ्योऽपि ददौ द्विजेभ्यो
गवां सहस्राणि शतानि चैव ।
यज्ञान्समुद्दिश्य च दक्षिणार्थं
लोकान्विजेतुं परमां च कीर्तिम् ३५

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि गोप्रभवकथने सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

७८

भीष्म उवाच ।

एतस्मिन्नेव काले तु वसिष्ठमृषिसत्तमम् ।
इक्ष्वाकुवंशजो राजा सौदासो वदतां वरः १
सर्वलोकचरं सिद्धं ब्रह्मकोशं सनातनम् ।
पुरोहितमभिप्रष्टुमभिवाद्योपचक्रमे ॥ २

सौदास उवाच ।

त्रैलोक्ये भगवन्किंस्वित्पवित्र कथ्यतेऽनघ
यत्कीर्तयन्सदा मर्त्यः प्राप्नुयात्पुण्यमुत्तमम् ३

भीष्म उवाच ।

तस्मै प्रोवाच वचनं प्रणताय हितं तदा ।
गवामुपनिषद्विद्वान्नमस्कृत्य गवां शुचिः ॥ ४
गावः सुरभिगन्धिन्यस्तथा गुग्गुलुगन्धयः ।
गावः प्रतिष्ठा भूतानां गावः स्वस्त्ययनं महत्

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

७८

एतस्मिन्निति ॥ १ ॥

गावो भूतं च भव्यं च गावः पुष्टिः सनातनी
गावो लक्ष्म्यास्तथा मूलं गोषु दत्तं न नश्यति
अन्नं हि परमं गावो देवानां परमं हविः ।
स्वाहाकारवषट्कारौ गोषु नित्यं प्रतिष्ठितौ
गावो यज्ञस्य हि फलं गोषु यज्ञाः प्रतिष्ठिताः
गावो भविष्यं भूतं च गोषु यज्ञाः प्रतिष्ठिता
सायं प्रातश्च सततं होमकाले महाद्युते ।
गावो ददति वै हौम्यमृषिभ्यः पुरुषर्षभ ॥ ९
यानि कानि च दुर्गाणि दुष्कृतानि कृतानि च
तरन्ति चैव पाप्मानं धेनुं ये ददति प्रभो १०
एकां च दशगुर्दद्याद्दश दद्याच्च गोशती ।
शतं सहस्रगुर्दद्यात्सर्वं तुल्यफला हि ते ॥ ११
अनाहिताग्निः शतगुरयज्वा च सहस्रगुः ।
समृद्धो यश्च कीनाशो नार्घमर्हन्ति ते त्रयः ॥
कपिलां ये प्रयच्छन्ति सवत्सां कांस्यदोहनाम्
सुव्रतां वस्त्रसंवीतामुभौ लोकौ जयन्ति ते ॥
युवानमिन्द्रियोपेतं शतेन शतयूथपम् ।
गवेन्द्रं ब्राह्मणेन्द्राय भूरिशृंगमलंकृतम् ॥ १४
वृषभं ये प्रयच्छन्ति श्रोत्रियाय परन्तप ।
ऐश्वर्यं तेऽधिगच्छन्ति जायमानाः पुनः पुनः
नाकीर्तयित्वा गाः सुप्या-
त्तासां संस्मृत्य चोत्पतेत् ।
सायंप्रातर्नमस्येच्च
गास्ततः पुष्टिमाप्नुयात् ॥ १६
गवां मूत्रपुरीषस्य नोद्विजेत कथंचन ।
न चासां मांसमश्नीयाद्गवां पुष्टिं तथाप्नुयात
गाश्च संकीर्तयेन्नित्यं नावमन्येत तास्तथा ।
अनिष्टं स्वप्नमालक्ष्य गां नरः संप्रकीर्तयेत् १८
गोमयेन सदा स्नायात्करीषे चापि संविशेत् ।
श्लेष्ममूत्रपुरीषाणि प्रतिघातं च वर्जयेत् ॥ १९
सार्द्रे चर्मणि भुञ्जीत निरीक्षेद्वारुणीं दिशम्
वाग्यतः सर्पिषा भूमौ गवां पुष्टिं सदाऽश्नुते ॥
घृतेन जुहुयादग्निं घृतेन स्वस्ति वाचयेत् ।
घृतं दद्याद्घृतं प्राशेद्गवां पुष्टिं सदाऽश्नुते २१
गोमत्या विद्यया धेनुं तिलानामभिमन्त्र्य यः
सर्वरत्नमयीं दद्यान्न स शोचेत्कृताकृते ॥ २२
गावो मामुपतिष्ठन्तु हेमशृंग्यः पयोमुचः ।
सुरभ्यः सौरभेय्यश्च सरितः सागरं यथा २३
गा वै पश्याम्यहं नित्यं गावः पश्यन्तु मां सदा
गावोस्माकं वयं तासां यतो गावस्ततो वयम्
एवं रात्रौ दिवा चापि समेषु विषमेषु च ।
महाभयेषु च नरः कीर्तयन्मुच्यते भयात् २५

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि गोप्रदानिके
अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥

७९

वसिष्ठ उवाच ।
शतं वर्षसहस्राणां तपस्तप्तं सुदुष्करम् ।
गोभिः पूर्वं विसृष्टाभिर्गच्छेम श्रेष्ठतामिति १
लोकेऽस्मिन्दक्षिणानां च सर्वासां वयमुत्तमाः
भवेम न च लिप्येम दोषेणेति परन्तप ॥ २
अस्मत्पुरीषस्नानेन जनः पूयेत सर्वदा ।
शकृता च पवित्रार्थं कुर्वीरन्देवमानुषाः ॥ ३
तथा सर्वाणि भूतानि स्थावराणि चराणि च
प्रदातारश्च लोकान्नो गच्छेयुरिति मानद ॥ ४
ताभ्यो वरं ददौ ब्रह्मा तपसोऽन्ते स्वयं प्रभुः ।
एवं भवत्विति प्रभुर्लोकांस्तारयतेति च ॥ ५

कीनाश कर्षक कृषणो वा ॥ १२ ॥ गोसमृद्धिकरं कर्म व्रतपूर्वकमाह-सार्द्रेति । चर्मणि गोरवे सार्द्रे प्रोक्षणेनार्द्रीकृते उपविश्येति शेष । भूमाविति कास्यनिवृत्ति ॥२०॥ जुहुयाद्रोमत्येत्यपकृष्यते गोमाँ अग्नेविमाँ अश्वीति मन्त्रो गोमती ॥ २१॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टसप्ततितमोऽध्याय ॥७८॥

७९

शतमिति ॥ १ ॥

उत्तस्थुः सिद्धकामास्ता भूतभव्यस्य मातरः
प्रातर्नमस्यास्ता गावस्ततः पुष्टिमवाप्नुयात् ६
तपसोऽन्ते महाराज गावो लोकपरायणाः।
तस्माद्गावो महाभागाः पवित्रं परमुच्यते ॥७
तथैव सर्वभूतानां समतिष्ठन्त मूर्धनि।
समानवत्सां कपिलां धेनुं दत्त्वा पयस्विनीम्
सुव्रतां वस्त्रसंवीतां ब्रह्मलोके महीयते ॥ ८
लोहितां तुल्यवत्सां तु धेनुं दत्त्वा पयस्विनीम्
सुव्रतां वस्त्रसंवीतां सूर्यलोके महीयते ॥ ९
समानवत्सां शबलां धेनुं दत्त्वा पयस्विनीम्
सुव्रतां वस्त्रसंवीतां सोमलोके महीयते ॥ १०
समानवत्सां श्वेतां तु धेनुं दत्त्वा पयस्विनीम्
सुव्रतां वस्त्रसंवीतामिन्द्रलोके महीयते ॥ ११
समानवत्सां कृष्णां तु धेनु दत्त्वा पयस्विनीम्
सुव्रतां वस्त्रसंवीतामग्निलोके महीयते ॥ १२
समानवत्सां धूम्रां तु धेनुं दत्त्वा पयस्विनीम्
सुव्रतां वस्त्रसंवीतां याम्यलोके महीयते ॥ १३
अपां फेनसवर्णां तु सवत्सां कांस्यदोहनाम्।
प्रदाय वस्त्रसंवीतां वारुणं लोकमाप्नुते ॥ १४
वातरेणुसवर्णां तु सवत्सां कांस्यदोहनाम्।
प्रदाय वस्त्रसंवीतां वायुलोके महीयते ॥ १५
हिरण्यवर्णां पिंगाक्षीं सवत्सां कांस्यदाहनां
प्रदाय वस्त्रसंवीतां कौबेरं लोकमश्नुते ॥ १६
पलालधूम्रवर्णां तु सवत्सां कांस्यदोहनाम्।
प्रदाय वस्त्रसंवीतां पितृलोके महीयते ॥ १७
सवत्सां पीवरीं दत्त्वा दृतिकण्ठामलंकृताम्
वैश्वदेवमसम्बाधं स्थानं श्रेष्ठं प्रपद्यते॥ १८
समानवत्सां गौरीं तु धेनुं दत्त्वा पयस्विनीम्
सुव्रतां वस्त्रसंवीतां वसूनां लोकमाप्नुयात् १९
पाण्डुकम्बलवर्णाभां सवत्सां कांस्यदोहनाम्
प्रदाय वस्त्रसंवीतां साध्यानां लोकमाप्नुते २०
वैराटपृष्ठमुक्षाणं सर्वरत्नैरलंकृतम्।
प्रदद्न्मरुतां लोकान्स राजन् प्रतिपद्यते ॥ २१
वयोपपन्नं लीलाङ्गं सर्वरत्नसमन्वितम्।
गन्धर्वाप्सरसां लोकान्दत्त्वा प्राप्नोति मानवः
दृतिकण्ठमनड्वाहं सर्वरत्नैरलंकृतम्।
दत्त्वा प्रजापतेर्लोकान्विशोकः प्रतिपद्यते॥
गोप्रदानरतो याति भित्त्वा जलदसंचयान्।
विमानेनार्कवर्णेन दिवि राजन्विराजते ॥ २४
तं चारुवेषाः सुश्रोण्यः सहस्रं सुरयोषितः।
रमयन्ति नरश्रेष्ठं गोप्रदानरतं नरम् ॥ २५
वीणानां वल्लकीनां च नूपुराणां च सिञ्जितैः
हासैश्च हरिणाक्षीणां सुप्तः स प्रतिबोध्यते ॥
यावन्ति रोमाणि भवन्ति धेन्वा-
स्तावन्ति वर्षाणि महीयते सः।
स्वर्गच्युतश्चापि ततो नृलोके
प्रसूयते वै विपुले गृहे सः २७

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि गोप्रदानिके एकोनाशीतितमोऽध्यायः ॥ ७९ ॥

८०

वसिष्ठ उवाच।
घृतक्षीरप्रदा गावो घृतयोन्यो घृतोद्भवाः
घृतनद्यो घृतावर्तास्ता मे सन्तु सदा गृहे १
घृतं मे हृदये नित्यं घृतं नाभ्यां प्रतिष्ठितम्।
घृतं सर्वेषु गात्रेषु घृतं मे मनसि स्थितम् ॥ २

लोकपरायणा बभूवुरिति शेष ॥ ७॥ दृतिकण्ठा प्रलबगल-कबलाम् ॥१८॥ वैराटं वृद्धं पृष्ठं यस्य रटति क्रन्दत्यनेनेति राटं क्षतं विगत राटं यस्मात्तद्विराटं स्वार्थे तद्धित ॥२१॥ लीलागं विलसिताङ्गम् ॥२२ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकोनाशीतितमोऽध्याय ॥ ७९ ॥

८०

घृतेति। घृतयोन्य घृतयोनय ॥ १ ॥

गावो ममाग्रतो नित्यं गावः पृष्ठत एव च।
गावो मे सर्वतश्चैव गवां मध्ये वसाम्यहम् ३
इत्याचम्य जपेत्सायं प्रातश्च पुरुषः सदा।
यदह्ना कुरुते पापं तस्मात्स परिमुच्यते ४
प्रासादा यत्र सौवर्णा वसोर्धारा च यत्र सा
गन्धर्वाप्सरसो यत्र तत्र यान्ति सहस्रदाः॥५
नवनीतपङ्काः क्षीरोदा दधिशैवलसंकुलाः।
वहन्ति यत्र वै नद्यस्तत्र यान्ति सहस्रदाः ६
गवां शतसहस्रं तु यः प्रयच्छेद्यथाविधि।
परां वृद्धिमवाप्याथ स्वर्गलोके महीयते ७
दश चोभयतः पुत्रो मातापित्रोः पितामहान्।
दधाति सुकृतान्लोकान्पुनाति च कुलं नरः ८

धेन्वाः प्रमाणेन समप्रमाणां
धेनुं तिलानामपि च प्रदाय।
पानीयदाता च यमस्य लोके
न यातनां काञ्चिदुपैति तत्र ९
पवित्रमग्र्यं जगतः प्रतिष्ठा
दिवौकसां मातरोऽथाप्रमेयाः।
अन्वालभेद्दक्षिणतो व्रजेच्च
दद्याच्च पात्रे प्रसमीक्ष्य कालम् १०

धेनुं सवत्सां कपिलां भूरिशृंगीं
कांस्योपदोहां वसनोत्तरीयाम्।
प्रदाय तां गाहति दुर्विगाह्यां
याम्यां सभां वीतभयो मनुष्यः ॥ ११
सुरूपा बहुरूपाश्च विश्वरूपाश्च मातरः।
गावो मामुपतिष्ठन्तामिति नित्यं प्रकीर्तयेत् ॥
नातः पुण्यतरं दानं नातः पुण्यतरं फलम्।
नातो विशिष्टं लोकेषु भूतं भवितुमर्हति १३
त्वचा लोम्नाऽथ शृंगैर्वा वालैः क्षीरेण मेदसा।
यज्ञं वहति संभूय किमस्त्यभ्यधिकं ततः १४
यया सर्वमिदं व्याप्तं जगत्स्थावरजङ्गमम्।
तां धेनुं शिरसा वन्दे भूतभव्यस्य मातरम् १५

गुणवचनसमुच्चयैकदेशो
नृवर मयैष गवां प्रकीर्तितस्ते।
न च परमिह दानमस्ति गोभ्यो
भवति न चापि परायणं तथाऽन्यत्
भीष्म उवाच।
वरमिदमिति भूमिदो विचिन्त्य
प्रवरमृषेर्वचनं ततो महात्मा।
व्यसृजत नियतात्मवान्द्विजेभ्यः
सुबहु च गोधनमाप्तवांश्च लोकान् ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि गोप्रदानिके अशीतितमोऽध्यायः ॥ ८० ॥

८१

युधिष्ठिर उवाच।
पवित्राणां पवित्रं यच्छिष्टं लोके च यद्भवेत्
पावनं परमं चैव तन्मे ब्रूहि पितामह ॥ १
भीष्म उवाच।
गावो महार्थाः पुण्याश्च तारयंति च मानवान्
धारयन्ति प्रजाश्चेमा हविषा पयसा तथा २
न हि पुण्यतमं किञ्चिद्गोभ्यो भरतसत्तम।
एताः पुण्याः पवित्राश्च त्रिषु लोकेषु सत्तमाः

देवानामुपरिष्टाच्च गावः प्रतिवसन्ति वै।
दत्त्वा चैतास्तारयते यान्ति स्वर्गं मनीषिणः४
मांधाता यौवनाश्वश्च ययातिर्नहुषस्तथा।
गा वै ददन्तः सततं सहस्रशतसंमिताः ॥ ५
गताः परमकं स्थानं देवैरपि सुदुर्लभम्।
अपि चात्र पुरागीतां कथयिष्यामि तेऽनघ ६
ऋषीणामुत्तमं धीमान्कृष्णद्वैपायनं शुकः।
अभिवाद्याह्निककृतः शुचिः प्रयतमानसः ७

वसोर्धारा मंदाकिनी ॥ ५ ॥ पानीयदाता जलधेनुदाता ॥९॥ भूमिद- सौदासो नाम राजा ॥ १७ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपेऽशीतितमोऽध्याय ॥ ८० ॥

८१

पवित्राणामिति। शिष्टं उक्तादन्यत् ॥ १ ॥ पुरागीता पौराणीं कथाम् ॥ ६ ॥ आह्निककृत कृताह्निक ॥ ७ ॥

पितरं परिपप्रच्छ दृष्टलोकपरावरम् ।
को यज्ञः सर्वयज्ञानां वरिष्ठोऽभ्युपलक्ष्यते ॥८
किं च कृत्वा परं स्थानं प्राप्नुवन्ति मनीषिणः
केन देवाः पवित्रेण स्वर्गमश्नन्ति वा विभो ९
किं च यज्ञस्य यज्ञत्वं क च यज्ञः प्रतिष्ठितः ।
देवानामुत्तमं किं च किं च सत्रमितः परम् १०
पवित्राणां पवित्रं च यत्तद्ब्रूहि पितर्मम ।
एतच्छ्रुत्वा तु वचनं व्यासः परमधर्मवित् ।
पुत्रायाकथयत्सर्वं तत्त्वेन भरतर्षभ ॥ ११

व्यास उवाच ।

गावः प्रतिष्ठा भूतानां तथा गावः परायणम्
गावः पुण्याः पवित्राश्च गोधनं पावनं तथा
पूर्वमासन्नशृङ्गा वै गाव इत्यनुशुश्रुम ।
शृङ्गार्थे समुपासन्त ताः किल प्रभुमव्ययम् ॥
ततो ब्रह्मा तु गाः प्रायमुपविष्टाः समीक्ष्य ह
ईप्सितं प्रददौ ताभ्यो गोभ्यः प्रत्येकशः प्रभुः
तासां शृङ्गाण्यजायन्त यस्या यादृङ्मनोगतम्
नानावर्णाः शृङ्गवन्त्यस्ता व्यरोचन्त पुत्रक ॥
ब्रह्मणा वरदत्तास्ता हव्यकव्यप्रदाः शुभाः ।
पुण्याः पवित्राः सुभगा दिव्यसंस्थानलक्षणाः
गावस्तेजो महद्दिव्यं गवां दानं प्रशस्यते ।
ये चैताः संप्रयच्छन्ति साधवो वीतमत्सराः॥
ते वै सुकृतिनः प्रोक्ताः सर्वदानप्रदाश्च ते ।
गवां लोकं तथा पुण्यमाप्नुवन्ति च तेऽनघ१८
यत्र वृक्षा मधुफला दिव्यपुष्पफलोपगाः ।
पुष्पाणि च सुगन्धीनि दिव्यानि द्विजसत्तम१९
सर्वा मणिमयी भूमिः सर्वकाञ्चनवालुकाः ।
सर्वर्तुसुखसंस्पर्शा निष्पङ्का निरजाः शुभाः
रक्तोत्पलवनैश्चैव मणिखण्डैर्हिरण्मयैः ।
तरुणादित्यसंकाशैर्भान्ति तत्र जलाशयाः ॥
महार्हमणिपत्रैश्च काञ्चनप्रभकेसरैः ।
नीलोत्पलविमिश्रैश्च सरोभिर्बहुपङ्कजैः ॥ २२
करवीरवनैः फुल्लैः सहस्रावर्तसंवृतैः ।
सन्तानकवनैः फुल्लैर्वृक्षैश्च समलंकृताः ॥ २३
निर्मलाभिश्च मुक्ताभिर्मणिभिश्च महाप्रभैः ।
उद्धूतपुलिनास्तत्र जातरूपैश्च निम्नगाः ॥ २४
सर्वरत्नमयैश्चित्रैरवगाढा द्रुमोत्तमैः ।
जातरूपमयैश्चान्यैर्हुताशनसमप्रभैः ॥ २५
सौवर्णा गिरयस्तत्र मणिरत्नशिलोच्चयाः ।
सर्वरत्नमयैर्भान्ति शृंगैश्चारुभिरुच्छ्रितैः ॥ २६
नित्यपुष्पफलास्तत्र नगाः पत्ररथाकुलाः ।
दिव्यगन्धरसैः पुष्पैः फलैश्च भरतर्षभ ॥ २७
रमन्ते पुण्यकर्माणस्तत्र नित्यं युधिष्ठिर ।
सर्वकामसमृद्धार्था निःशोका गतमन्यवः २८
विमानेषु विचित्रेषु रमणीयेषु भारत ।
मोदन्ते पुण्यकर्माणो विहरन्तो यशस्विनः २९

उपक्रीडन्ति तान् राजन्
शुभाश्चाप्सरसां गणाः ।
एतान्लोकानवाप्नोति
गां दत्वा वै युधिष्ठिर ॥ ३०

येषामधिपतिः पूषा मारुतो बलवान्बली ।
ऐश्वर्ये वरुणो राजा नाममात्रं युगन्धरः ३१
सुरूपा बहुरूपाश्च विश्वरूपाश्च मातरः ।
प्राजापत्यमिति ब्रह्मन् जपेन्नित्यं यतव्रतः ३२
गाश्च शुश्रूषते यश्च समन्वेति च सर्वशः ।
तस्मै तुष्टाः प्रयच्छन्ति वरानपि सुदुर्लभान्
द्रुह्येन्न मनसा वापि गोषु नित्यं सुखप्रदः ।
अर्चयेत सदा चैव नमस्कारैश्च पूजयेत् ॥ ३४
दान्तः प्रीतमना नित्यं गवां व्युष्टिं तथाऽश्नुते
व्यहमुष्णं पिबेन्मूत्रं व्यहमुष्णं पिबेत्पयः ३५
गवामुष्णं पयः पीत्वा व्यहमुष्णं घृतं पिबेत्
व्यहमुष्णं घृतं पीत्वा वायुभक्षो भवेत व्यहम्
येन देवाः पवित्रेण भुञ्जते लोकमुत्तमम् ।
यत्पवित्रं पवित्राणां तद्घृतं शिरसा वहेत् ॥
घृतेन जुहुयादाग्निं घृतेन स्वस्ति वाचयेत् ।
घृतं प्राशेद्घृतं दद्याद्भवां पुष्टिं तथाऽश्नुते ॥३८
निर्हृतैश्च यवैर्गोभिर्मासं प्रश्रितयावकः ।
ब्रह्महत्यासमं पापं सवमंतेन शुध्यते ॥ ३९
पराभवाच्च दैत्यानां देवैः शौचमिदं कृतम् ।
ते देवत्वमपि प्राप्ताः संसिद्धाश्च महाबलाः ॥

अशृंगा इत्यखुरा इत्यस्याप्युपलक्षण गावो वै सत्रमासत शफान् शृंगाणि सिषासन्त्यस्तासा दशमे मासि शफा शृंगाण्यजायन्तेति श्रुते ॥ १३ ॥ उद्धूतपुलिना अङ्कुरिततीरा ॥ २४ ॥ नगा वृक्षा पत्ररथा पक्षिण ॥ २७ ॥ नाममात्रं जपेदिति संबन्ध युगंधरा सस्यादियुग धारयन्ति ता ॥ ३१ ॥ प्राजापत्यं प्रजापतिनोक्तम् ॥ ३२ ॥ जुहुयात् पूर्वोक्तगोमत्या ॥ ३८ ॥ निर्हृतै गोमयनिर्गतै ॥ ३९ ॥

गावः पवित्राः पुण्याश्च पावनं परमं महत् ।
ताश्च दत्वा द्विजातिभ्यो नरः स्वर्गमुपाश्नुते ॥
गवां मध्ये शुचिर्भूत्वा गोमतीं मनसा जपेत्
पूताभिरद्भिराचम्य शुचिर्भवति निर्मलः ४२
अग्निमध्ये गवां मध्ये ब्राह्मणानां च संसदि ।
विद्यावेदव्रतज्ञाता ब्राह्मणाः पुण्यकर्मिणः ४३
अध्यापयेरन् शिष्यान्वै गोमतीं यज्ञसंमिताम्
त्रिरात्रोपोषितो भूत्वा गोमतीं लभते वरम्
पुत्रकामश्च लभते पुत्रं धनमथापि वा ।
पतिकामा च भर्तारं सर्वकामांश्च मानवः ।
गावस्तुष्टाः प्रयच्छन्ति सेविता वै न संशयः
एवमेता महाभागा यज्ञियाः सर्वकामदाः ।
रोहिण्य इति जानीहि नैताभ्यो विद्यते परम्
इत्युक्तः स महातेजाः शुकः पित्रा महात्मना
पूजयामास गां नित्यं तस्मात्त्वमपि पूजय ४७

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि गोप्रदानिके एकाशीतितमोऽध्यायः ॥ ८१ ॥

८२

युधिष्ठिर उवाच ।
मया गवां पुरीषं वै श्रिया जुष्टमिति श्रुतम्।
एतदिच्छाम्यहं श्रोतुं संशयोऽत्र पितामह ॥१
भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
गोभिर्नृपेह संवादं श्रिया भरतसत्तम ॥ २
श्रीः कृत्वेह वपुः कान्तं गोमध्येषु विवेश ह ।
गावोऽथ विस्मितास्तस्या दृष्ट्वा रूपस्य संपदम्
गाव ऊचुः ।
काऽसि देवि कुतो वा त्वं रूपेणाप्रतिमा भुवि
विस्मिताः स्म महाभागे तव रूपस्य सम्पदा॥
इच्छाम त्वां वयं ज्ञातुं का त्वं क्व गमिष्यसि
तत्त्वेन वरवर्णा मे सर्वमेतद्ब्रवीहि नः ॥ ५
श्रीरुवाच ।
लोककान्तास्मि भद्रं वः
श्रीर्नामाऽहं परिश्रुता ।
मया दैत्याः परित्यक्ता
विनष्टाः शाश्वतीः समाः ॥ ६
मयाऽभिपन्ना देवाश्च मोदन्ते शाश्वतीः समाः
इन्द्रो विवस्वान्सोमश्च विष्णुरापोऽग्निरेव च
मयाभिपन्नाः सिध्यन्ते ऋषयो देवतास्तथा ।
याम्याविशाम्यहं गावस्ते विनश्यन्ति सर्वशः
धर्मश्चार्थश्च कामश्च मया जुष्टाः सुखान्विताः ।
एवंप्रभावां मां गावो विजानीत सुखप्रदाः ९
इच्छामि चापि युष्मासु वस्तुं सर्वासु नित्यदा
आगत्य प्रार्थये युष्माञ्छ्रीजुष्टा भवताऽथ वै
गाव ऊचुः ।
अध्रुवा चपला च त्वं सामान्या बहुभिः सह
न त्वामिच्छाम भद्रं ते गम्यतां यत्र रंस्यसे
वपुष्मन्त्यो वयं सर्वाः किमस्माकं त्वयाद्य वै
यथेष्टं गम्यतां तत्र कृतकार्या वय त्वया ॥ १२
श्रीरुवाच ।
किमेतद्वः क्षमं गावो यन्मां नेहाभिनन्दथ ।
न मां संप्रति गृह्णीध्वं कस्माद्वै दुर्लभां सतीम्
सत्यं च लोकवादोऽयं लोके चरति सुव्रताः ।
स्वयं प्राप्ते परिभवो भवतीति विनिश्चयः १४
महदुग्रं तपः कृत्वा मां निषेवन्ति मानवाः ।
देवदानवगन्धर्वाः पिशाचोरगराक्षसाः ॥१५
प्रभाव एष वो गावः प्रतिगृह्णीत मामिह ।
नावमन्या ह्यहं सौम्यास्त्रैलोक्ये सचराचरे ॥

गोमतीं गोमत्या ऋचा प्रकाशितमर्थं वरं लभते ॥ ४४ ॥
इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकाशीतितमोऽध्याय ॥ ८१ ॥

८२

मयेति ॥ १ ॥

गाव ऊचुः ।
नावमन्यामहे देवि न त्वां परिभवामहे ।
अध्रुवा चलचित्ताऽसि ततस्त्वां वर्जयामहे ॥
बहुना च किमुक्तेन गम्यतां यत्र वांच्छसि ।
वपुष्मन्त्यो वयं सर्वाः किमस्माकं त्वयाऽनघे
श्रीरुवाच ।
अवज्ञाता भविष्यामि सर्वलोकस्य मानदाः
प्रत्याख्यानेन युष्माकं प्रसादः क्रियतां मम ॥
महाभागा भवत्यो वै शरण्याः शरणागताम् ।
परित्रायन्तु मां नित्यं भजमानामनिन्दिताम्
माननामहमिच्छामि भवत्यः सततं शिवाः ।
अप्येकाङ्केष्वधो वस्तुमिच्छामि च सुकुत्सिते
न वोऽस्ति कुत्सितं किञ्चिदङ्केष्वालक्ष्यतेनघाः
पुण्याः पवित्राः सुभगा ममादेशं प्रयच्छथ २२
वसेयं यत्र वो देहे तन्मे ब्याख्यातुमर्हथ ।
एवमुक्तास्ततो गावः शुभाः करुणवत्सलाः ।
समन्त्र्य सहिताः सर्वाः श्रियमूचुर्नराधिप ॥
अवश्यं मानना कार्या तवास्माभिर्यशस्विनि
शकृन्मूत्रे निवस त्वं पुण्यमेतद्धि नः शुभे २४
श्रीरुवाच ।
दिष्ट्या प्रसादो युष्माभिः कृतो मेऽनुग्रहात्मकः
एवं भवतु भद्रं वः पूजिताऽस्मि सुखप्रदाः २५
एवं कृत्वा तु समयं श्रीर्गोभिः सह भारत ।
पश्यन्तीनां ततस्तासां तत्रैवान्तरधीयत २६
एवं गोशकृतः पुत्र माहात्म्यं तेऽनुवर्णितम् ।
माहात्म्यं च गवां भूयः श्रूयतां गदतो मम २७

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि श्रीगोसंवादो नाम
ह्यशीतितमोऽध्यायः ॥ ८२ ॥

८३

भीष्म उवाच ।
ये च गां संप्रयच्छन्ति हुतशिष्टाशिनश्च ये
तेषां सत्राणि यज्ञाश्च नित्यमेव युधिष्ठिर ॥ १
ऋते दधिघृतेनेह न यज्ञः संप्रवर्तते ।
तेन यज्ञस्य यज्ञत्वमतो मूलं च कथ्यते ॥ २
दानानामपि सर्वेषां गवां दानं प्रशस्यते ।
गावः श्रेष्ठाः पवित्राश्च पावनं ह्येतदुत्तमम् ३
पुष्ट्यर्थमेताः सेवेत शान्त्यर्थमपि चैव ह ।
पयोदधिघृतं चासां सर्वपापप्रमोचनम् ॥ ४
गावस्तेजः परं प्रोक्तमिह लोके परत्र च ।
न गोभ्यः परमं किञ्चित्पवित्रं भरतर्षभ ॥ ५
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
पितामहस्य संवादमिन्द्रस्य च युधिष्ठिर ॥ ६
पराभूतेषु दैत्येषु शक्रस्त्रिभुवनेश्वरः ।
प्रजाः समुदिताः सर्वाः सत्यधर्मपरायणाः ७
अथर्षयः सगन्धर्वाः किन्नरोरगराक्षसाः ।
देवासुरसुपर्णाश्च प्रजानां पतयस्तथा ॥ ८
पर्युपासन्त कौन्तेय कदाचिद्वै पितामहम् ।
नारदः पर्वतश्चैव विश्वावसुर्हहाहुहूः ॥ ९
दिव्यतानेषु गायन्तः पर्युपासन्त तं प्रभुम् ।
तत्र दिव्यानि पुष्पाणि प्रावहत्पवनस्तदा ॥
आजह्रुर्ऋतवश्चापि सुगन्धीनि पृथक् पृथक् ।
तस्मिन्देवसमावाये सर्वभूतसमागमे ॥ ११
दिव्यवादित्रसंघुष्टे दिव्यस्त्रीचारणावृते ।
इन्द्रः पप्रच्छ देवेशमभिवाद्य प्रणम्य च १२
देवानां भगवन्कस्माल्लोकेशानां पितामह ।
उपरिष्टाद्भवां लोक एतदिच्छामि वेदितुम् १३
किं तपो ब्रह्मचर्यं वा गोभिः कृतमहेश्वर ।
देवानामुपरिष्टाद्यद्वसन्त्यरजसः सुखम् ॥ १४
ततः प्रोवाच ब्रह्मा तं शक्रं बलनिषूदनम् ।
अवज्ञातास्त्वया नित्यं गावो बलनिषूदन १५

एका अहम् अंगेषु मध्ये कुत्सिते ॥ २१ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे ह्यशीतितमोऽध्याय ॥ ८२ ॥

८३
ये चेति ॥ १ ॥

तेन त्वमासां माहात्म्यं न वेत्सि शृणु यत्प्रभो
गवां प्रभावं परमं माहात्म्यं च सुरर्षभ ॥ १६
यज्ञाङ्गं कथिता गावो यज्ञ एव च वासव ।
एताभिश्च विना यज्ञो न वर्तेत कथञ्चन ॥ १७
धारयन्ति प्रजाश्चैव पयसा हविषा तथा ।
एतासां तनयाश्चापि कृषियोगमुपासते ॥ १८
जनयन्ति च धान्यानि बीजानि विविधानि च
ततो यज्ञाः प्रवर्तन्ते हव्यं कव्यं च सर्वशः ॥
पयोदधिघृतं चैव पुण्याश्चैताः सुराधिप ।
वहन्ति विविधान्भारान्क्षुत्तृष्णापरिपीडिताः
मुनींश्च धारयन्तीह प्रजाश्चैवापि कर्मणा ।
वासवाकूटवाहिन्यः कर्मणा सुकृतेन च २१
उपरिष्टात्ततोऽस्माक वसन्त्येताः सदैव हि ।
एवं ते कारण शक्र निवासकृतमद्य वै ॥ २२
गवा देवोपरिष्टाद्धि समाख्यातं शतक्रतो ।
एता हि वरदत्ताश्च वरदाश्चापि वासव २३
सुरभ्यः पुण्यकर्मिण्यः पावनाः शुभलक्षणाः ।
यदर्थं गां गताश्चैव सुरभ्यः सुरसत्तम ॥ २४
तच्च मे शृणु कात्स्न्र्येन वदतो बलसूदन ।
पुरा देवयुगे तात देवेन्द्रेषु महात्मसु ॥ २५
त्रैलोकाननुशासत्सु विष्णौ गर्भत्वमागते ।
अदित्यास्तप्यमानायास्तपो घोर सुदुश्चरम् ॥
पुत्रार्थममरश्रेष्ठ पादेनैकेन नित्यदा ।
ता तु दृष्ट्वा महादेवीं तप्यमानां महत्तपः ॥ २७
दक्षस्य दुहिता देवी सुरभी नाम नामतः ।
अतप्यत तपो घोरं दृष्ट्वा धर्मपरायणा ॥ २८
कैलासशिखरे रम्ये देवगन्धर्वसेविते ।
व्यतिष्ठदेकपादेन परमं योगमास्थिता ॥ २९
दशवर्षसहस्राणि दशवर्षशतानि च ।
सन्तप्तास्तपसा तस्या देवाः सर्षिमहोरगाः ॥
तत्र गत्वा मया सार्धं पर्युपासन्त तां शुभाम्
अथाहमब्रुवं तत्र देवीं तां तपसान्विताम् ३१
किमर्थं तप्यसे देवि तपो घोरमनिन्दिते ।
प्रीतस्तेऽहं महाभागे तपसाऽनेन शोभने ३२
वरयस्व वरं देवि दातास्मीति पुरन्दर ॥ ३३
सुरभ्युवाच ।
वरेण भगवन्मह्यं कृतं लोकपितामह ।
एष एव वरो मेऽद्य यत्प्रीतोऽसि ममानघ ३४
ब्रह्मोवाच ।
तामेवं ब्रुवतीं देवीं सुरभिं त्रिदशेश्वर ।
प्रत्यब्रुवं यद्देवेन्द्र तन्निबोध शचीपते ॥ ३५
अलोभकाम्यया देवि तपसा च शुभानने ।
प्रसन्नोऽहं वरं तस्मादमरत्वं ददामि ते ॥ ३६
त्रयाणामपि लोकानामुपरिष्टान्निवत्स्यसि ।
मत्प्रसादाच्च विख्यातो गोलोकः संभविष्यति
मानुषेषु च कुर्वाणाः प्रजाः कर्म शुभास्तव ।
निवत्स्यन्ति महाभागे सर्वा दुहितरश्च ते ३८
मनसा चिन्तिता भोगास्त्वया वै दिव्यमानुषाः
यच्च सर्वं सुखं देवि तत्ते सम्पत्स्यते शुभे ३९
तस्या लोकाः सहस्राक्ष सर्वकामसमन्विताः ।
न तत्र क्रमते मृत्युर्न जरा न च पावकः ॥४०
न दैवं नाशुभं किञ्चिद्विद्यते तत्र वासव ।
तत्र दिव्यान्यरण्यानि दिव्यानि भवनानि च
विमानानि सुयुक्तानि कामगानि च वासव ।
ब्रह्मचर्येण तपसा यत्नेन च दमेन च ॥ ४२
दानैश्च विविधैः पुण्यैस्तथा तीर्थानुसेवनात् ।
तपसा महता चैव सुकृतेन च कर्मणा ॥ ४३
शक्यः समासादयितुं गोलोकः पुष्करेक्षण ।
एतत्ते सर्वमाख्यातं मया शक्रानुपृच्छते ४४
न ते परिभवः कार्यो गवामसुरसूदन ॥ ४५
भीष्म उवाच ।
एतच्छ्रुत्वा सहस्राक्षः पूजयामास नित्यदा
गाश्चक्रे बहुमानं च तासु नित्य युधिष्ठिर ४६

वासव अकूटवाहिन्य अमायाव्यवहरिण्य ॥ २१ ॥ निवासार्थं कृतं निवासकृतम् ॥ २२ ॥ त्रयाणामुपरिष्टात् ब्रह्मलोके इत्यर्थ । तत परस्य तप फलस्याभावात् तत्रैव च गोलोक श्रूयते—

ता वा वास्तून्युश्मसि गमध्यै यत्र गावो भूरिशृंगा अयास ।
अत्राह तदुरुगायस्य वृष्ण परम पदमवभाति भूरि ॥

इति । ता तानि वा युवयोरिंद्राविष्णोर्नरनारायणयो प्रसादाद्वास्तूनि स्थानानि उश्मसि कामयामहे गमध्यै गन्तुं यत्र येषु स्थानेषु गाव भूरिशृंगा अत्यन्तं मानवत्य अयास गतवत्य अत्र अस्मिन् गोलोके अह एव तत्प्रसिद्धं उरुगायस्य विष्णो वृष्ण कामपूरकस्य परमं पदं सर्वोत्कृष्ट स्थानं अवभाति अल्पमिव भाति भूरि अत्यंत सर्वेभ्यो लोकेभ्य उपरि गोलोक इति सिद्धम् । अन्यथा चतुर्थो महर्लोक एवाप्रोति न च तस्य परमपरत्वमस्तीति मन्त्रानुसाराद्ब्रह्मलोक एव गाव सन्तीति ज्ञेयम् ॥ ३६ ॥

एतत्ते सर्वमाख्यातं पावनं च महाद्युते ।
पवित्रं परमं चापि गवां माहात्म्यमुत्तमम् ४७
कीर्तितं पुरुषव्याघ्र सर्वपापविमोचनम् ।
य इदं कथयेन्नित्यं ब्राह्मणेभ्यः समाहितः ४८
हव्यकव्येषु यज्ञेषु पितृकार्येषु चैव ह ।
सार्वकामिकमक्षय्यं पितॄंस्तस्योपतिष्ठते ४९
गोषु भक्तश्च लभते यद्यदिच्छति मानवः ।
स्त्रियोपि भक्ता या गोषु ताश्च काममवाप्नुयुः
पुत्रार्थी लभते पुत्रं कन्यार्थी तामवाप्नुयात् ।
धनार्थी लभते वित्तं धर्मार्थी धर्ममाप्नुयात्५१
विद्यार्थी चाप्नुयाद्विद्यां सुखार्थी प्राप्नुयात्सुखं
न किञ्चिदुर्लभं चैव गवां भक्तस्य भारत ॥५२

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि गोलोकवर्णने
त्र्यशीतितमोऽध्यायः ॥ ८३ ॥

८४

युधिष्ठिर उवाच ।
उक्तं पितामहेनेदं गवां दानमनुत्तमम् ।
विशेषेण नरेन्द्राणामिह धर्ममवेक्षताम् ॥ १
राज्यं हि सततं दुःखं दुर्धरं चाकृतात्मभिः ।
भूयिष्ठं च नरेन्द्राणां विद्यते न शुभा गतिः २
पूयन्ते तत्र नियतं प्रयच्छन्तो वसुन्धराम् ।
सर्वे च कथिता धर्मास्त्वया मे कुरुनन्दन ॥३
एवमेव गवामुक्त प्रदानं ते नृगेण ह ।
ऋषिणा नाचिकेतेन पूर्वमेव निदर्शितम् ॥ ४
वेदोपनिषदश्चैव सर्वकर्मसु दक्षिणाः ।
सर्वक्रतुषु चोद्दिष्टं भूमिर्गावोऽथ काञ्चनम् ५
तत्र श्रुतिस्तु परमा सुवर्णं दक्षिणेति वै ।
एतदिच्छाम्यहं श्रोतुं पितामह यथातथम् ॥६
किं सुवर्णं कथं जातं कस्मिन्काले किमात्मकं
किं दैवं किं फलं चैव कस्माच्च परमुच्यते ७
कस्मादानं सुवर्णस्य पूजयन्ति मनीषिणः ।
कस्माच्च दक्षिणार्थं तद्यज्ञकर्मसु शस्यते ॥ ८
कस्माच्च पावनं श्रेष्ठं भूमेर्गोभ्यश्च काञ्चनम् ।
परमं दक्षिणार्थं च तद्भवीहि पितामह ॥ ९

भीष्म उवाच ।
शृणु राजन्नवहितो बहुकारणविस्तरम् ।
जातरूपसमुत्पत्तिमनुभूतं च यन्मया ॥ १०
पिता मम महातेजाः शान्तनुर्निधन गतः ।
तस्य दित्सुरहं श्राद्धं गङ्गाद्वारमुपागमम् ११
तत्राऽऽगम्य पितुः पुत्र श्राद्धकर्म समारभम् ।
माता मे जाह्नवी चात्र साहाय्यमकरोत्तदा ॥
ततोऽग्रतस्ततः सिद्धानुपवेश्य बहूनृषीन् ।
तोयप्रदानात्प्रभृति कार्याण्यहमथारभम् १३
तत्समाप्य यथोद्दिष्टं पूर्वकर्म समाहितः ।
दातुं निर्वपणं सम्यग्यथावदहमारभम् ॥ १४
ततस्तं दर्भविन्यासं भित्त्वा सुरुचिराङ्गदः ।
प्रलम्बाभरणो बाहुरुदतिष्ठद्विशाम्पते ॥ १५
तमुत्थितमहं दृष्ट्वा परं विस्मयमागमम् ।
प्रतिग्रहीता साक्षान्मे पितेति भरतर्षभ ॥ १६
ततो मे पुनरेवासीत्संज्ञा सञ्चिन्त्य शास्त्रतः ।
नायं वेदेषु विहितो विधिर्हस्त इति प्रभो १७
पिण्डो देयो नरेणेह ततो मतिरभून्मम ।
साक्षान्नेह मनुष्यस्य पिण्डं हि पितरः क्वचित्
गृह्णन्ति विहितं चेत्थं पिण्डो देयः कुशेष्विति
ततोऽहं तदनादृत्य पितुर्हस्तनिदर्शनम् ॥ १९
शास्त्रप्रामाण्यसूक्ष्मं तु विधिं पिण्डस्य संस्मरन्
ततो दर्भेषु तत्सर्वमददं भरतर्षभ ॥ २०
शास्त्रमार्गानुसारेण तद्विद्धि मनुजर्षभ ।
ततः सोन्तर्हितो बाहुः पितुर्मम जनाधिप॥२१

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्र्यशीतितमोऽध्याय ॥ ८३ ॥

८४

उक्तमिति ॥ १ ॥ न शुभा अशुभा ॥ २ ॥ पूयन्ते शुद्धयन्ति ॥ ३ ॥

ततो मां दर्शयामासुः स्वप्नान्ते पितरस्तथा ।
प्रीयमाणास्तु मामूचुः प्रीताः स्म भरतर्षभ२२
विज्ञानेन तवानेन यन्न मुह्यसि धर्मतः ।
त्वया हि कुर्वता शास्त्रं प्रमाणमिह पार्थिव२३
आत्मा धर्मः श्रुतं वेदाः पितरश्चर्षिभिः सह ।
साक्षात्पितामहो ब्रह्मा गुरवोऽथ प्रजापतिः
प्रमाणमुपनीता वै स्थिताश्च न विचालिताः ।
तदिदं सम्यगारब्धं त्वयाऽद्य भरतर्षभ ॥ २५
किं तु भूमेर्गवां चार्थे सुवर्णं दीयतामिति ।
एवं वयं च धर्मज्ञ सर्वे चास्मत्पितामहाः २६
पाविता वै भविष्यन्ति पावनं हि परं हि तत्
दशपूर्वान्दशीवान्यांस्तथासन्तारयन्ति ते॥२७
सुवर्णं ये प्रयच्छन्ति एवं मत्पितरोऽब्रुवन् ।
ततोहं विस्मितो राजन्प्रतिबुद्धो विशांपते२८
सुवर्णदानेऽकरवं मतिं च भरतर्षभ ।
इतिहासमिमं चापि शृणु राजन्पुरातनम् २९
जामदग्न्यं प्रति विभो धन्यमायुष्यमेव च ।
जामदग्न्येन रामेण तीव्ररोषान्वितेन वै ॥ ३०
त्रिः सप्तकृत्वः पृथिवी कृता निःक्षत्रिया पुरा
ततो जित्वा महीं कृत्स्नां रामो राजीवलोचनः
आजहार क्रतुं वीरो ब्रह्मक्षत्रेण पूजितम् ।
वाजिमेधं महाराज सर्वकामसमन्वितम् ३२
पावनं सर्वभूतानां तेजोद्युतिविवर्धनम् ।
विपाप्मा च स तेजस्वी तेन क्रतुफलेन च ॥
नैवात्मनोऽथ लघुतां जामदग्न्योऽध्यगच्छत
स तु क्रतुवरेणेष्ट्वा महात्मा दक्षिणावता ३४
पप्रच्छागमसंपन्नानृषीन्देवांश्च भार्गव ।
पावनं यत्परं नृणामुग्रे कर्मणि वर्तताम् ॥ ३५
तदुच्यतां महाभागा इति जातघृणोऽब्रवीत् ।
इत्युक्ता वेदशास्त्रज्ञास्तमूचुस्ते महर्षयः ॥ ३६
राम विप्राः सत्क्रियन्तां वेदप्रामाण्यदर्शनात्
भूयश्च विप्रर्षिगणाः प्रष्टव्याः पावनं प्रति ३७
ते यद् ब्रयुर्महाप्राज्ञास्तच्चैव समुदाचर ।
ततो वसिष्ठं देवर्षिमगस्त्यमथ काश्यपम् ॥३८
तमेवार्थं महातेजाः पप्रच्छ भृगुनन्दनः ।
जाता मतिर्मे विप्रन्द्रा कथं पूयेयमित्युत॥३९
केन वा कर्मयोगेन प्रदानेनेह केन वा ।
यदि वोऽनुग्रहकृता बुद्धिर्मां प्रति सत्तमाः ॥
ब्रूत पावनं किं मे भवेदिति तपोधनाः ॥४०

ऋषय ऊचुः ।

गाश्च भूमिं च वित्तं च दत्वेह भृगुनन्दन ।
पापकृत्पूयते मर्त्य इति भार्गव शुश्रुम ॥ ४१
अन्यद्दानं तु विप्रर्षे श्रूयतां पावनं महत् ।
दिव्यमत्यद्भुताकारमपत्यं जातवेदसः ॥ ४२
दग्ध्वा लोकान्पुरा वीर्यात्संभूतमिह शुश्रुम
सुवर्णमिति विख्यातं तद्ददत्सिद्धिमेष्यसि ४३
ततोऽब्रवीद्वसिष्ठस्तं भगवान्संशितव्रतः ।
शृणु राम यथोत्पन्नं सुवर्णमनलप्रभम् ॥ ४४
फलं दास्यति तं यत्तु दानं परमिहोच्यते ।
सुवर्णं यच्च यस्माच्च यथा च गुणवत्तमम् ४५
तन्निबोध महाबाहो सर्वं निगदतो मम ।
अग्नीषोमात्मकमिदं सुवर्णं विद्धि निश्चये ४६
अजोऽग्निर्वरुणो मेषः सूर्योऽश्व इति दर्शनम् ।
कुञ्जराश्च मृगा नागा महिषाश्चासुरा इति ४७
कुक्कुटाश्च वराहाश्च राक्षसा भृगुनन्दन ।
इडा गावः पयः सोमो भूमिरित्येव च स्मृतिः
जगत्सर्वं च निर्मथ्य तेजोराशिः समुत्थितः
सुवर्णमेभ्यो विप्रर्षे रत्नं परममुत्तमम् ॥ ४९
एतस्मात्कारणाद्देवा गन्धर्वोरगराक्षसाः ।
मनुष्याश्च पिशाचाश्च प्रयता धारयन्ति तत्
मुकुटैरंगदयुतैरलंकारैः पृथग्विधैः ।
सुवर्णविकृतैस्तत्र विराजन्ते भृगूत्तम ॥ ५१
तस्मात्सर्वपवित्रेभ्यः पवित्रं परमं स्मृतम् ।
भूमेर्गोभ्योऽथ रत्नेभ्यस्तद्विद्धि मनुजर्षभ ५२
पृथिवीं गाश्च दत्वेह यच्चान्यदपि किंचन ।
विशिष्यते सुवर्णस्य दानं परमकं विभो ॥५३
अक्षय पावनं चैव सुवर्णममरद्युते ।
प्रयच्छ द्विजमुख्येभ्यः पावनं ह्येतदुत्तमम् ५४
सुवर्णमेव सर्वासु दक्षिणासु विधीयते ।
सुवर्णं ये प्रयच्छन्ति सर्वदास्ते भवन्त्युत ५५
देवतास्ते प्रयच्छन्ति ये सुवर्णं ददत्यथ ।
अग्निर्हि देवताः सर्वाः सुवर्णं च तदात्मकम्
तस्मात्सुवर्णं ददता दत्ताः सर्वाः स्म देवताः
भवन्ति पुरुषव्याघ्र न ह्यतः परमं विदुः ॥ ५७

लघुता निष्पापताम् ॥ ३४ ॥ **अज इति** । अजादीनामग्न्यादिरूपत्वात्तद्दान तल्लोकप्रदम् । असुरराक्षसपदाभ्यामपि तल्लोक ॥ ४७ ॥ वराहश्च निर्ऋतिः अस्य दानं अल्पफल इडादयो भूमिरूपा इति तद्दान महाफलं इडेति इडावान् यज्ञ ॥ ४८ ॥ **जगादिति** । सुवर्णदानं ब्रह्माण्डदानतुल्यामिति भाव ॥४९॥

भूय एव च माहात्म्यं सुवर्णस्य निबोध मे ।
गदतो मम विप्रर्षे सर्वशस्त्रभृतां वर ॥ ५८
मया श्रुतमिदं पूर्वं पुराणे भृगुनन्दन ।
प्रजापतेः कथयतो यथान्यायं तु तस्य वै ५९
शूलपाणेर्भगवतो रुद्रस्य च महात्मनः ।
गिरौ हिमवति श्रेष्ठे तदा भृगुकुलोद्वह ॥ ६०
देव्या विवाहे निर्वृत्ते रुद्राण्या भृगुनन्दन ।
समागमे भगवतो देव्या सह महात्मनः ॥ ६१
ततः सर्वे समुद्विग्ना देवा रुद्रमुपागमन् ।
ते महादेवमासीनं देवीं च वरदामुमाम् ६२
प्रसाद्य शिरसा सर्वे रुद्रमूचुर्भृगूद्वह ।
अयं समागमो देवो देव्या सह तवानघ ॥ ६३
तपस्विनस्तपस्विन्या तेजस्विन्याऽतितेजसः ।
अमोघतेजास्त्वं देव देवी चेयमुमा तथा ॥ ६४
अपत्यं युवयोर्देव बलवद्भविता विभो ।
तद्भूतं त्रिषु लोकेषु न किञ्चिच्छेषयिष्यति ॥
तदेभ्यः प्रणतेभ्यस्त्वं देवेभ्यः पृथुलोचन ।
वरं प्रयच्छ लोकेश त्रैलोक्यहितकाम्यया ॥
अपत्यार्थे निगृह्णीष्व तेजः परमकं विभो ।
त्रैलोक्यसारौ हि युवां लोकं सन्तापयिष्यथः
तदपत्यं हि युवयोर्देवानभिभवेद्ध्रुवम् ।
न हि ते पृथिवी देवी न च द्यौर्न दिवं विभो
नेदं धारयितुं शक्ताः समस्ता इति मे मतिः ।
तेजःप्रभावनिर्दग्धं तस्मात्सर्वमिदं जगत् ६९
तस्मात्प्रसादं भगवन्कर्तुमर्हसि नः प्रभो ।
न देव्यां संभवेत्पुत्रो भवतः सुरसत्तम ।
धैर्यादेव निगृह्णीष्व तेजो ज्वलितमुत्तमम् ७०
इति तेषां कथयतां भगवान्वृषभध्वजः ।
एवमस्त्विति देवांस्तान्विप्रर्षे प्रत्यभाषत ७१
इत्युक्त्वा चोर्ध्वमनयद्देतो वृषभवाहनः ।
ऊर्ध्वरेताः समभवत्ततः प्रभृति चापि सः ॥
रुद्राणीति ततः कृत्वा प्रजोच्छेदे तदा कृते ।
देवानथाब्रवीत्तत्र स्त्रीभावात्पुरुषं वचः ॥ ७३
यस्मादपत्यकामो वै भर्ता मे विनिवर्तितः ।
तस्मात्सर्वे सुरा यूयमनपत्या भविष्यथ ॥ ७४
प्रजोच्छेदो मम कृतो यस्माद्युष्माभिरद्य वै ।
तस्मात्प्रजा वः खगमाः सर्वेषां न भविष्यति
पावकस्तु न तत्रासीच्छापकाले भृगूद्वह ।
देवा देव्यास्तथा शापादनपत्यास्ततोऽभवन्
रुद्रस्तु तेजोऽप्रतिमं धारयामास वै तदा ।
प्रस्कन्नं तु ततस्तस्मात्किंचित्तत्रापतद्भुवि ७७
उत्पपात तदा वह्नौ ववृधे चाद्भुतोपमम् ।
तेजस्तेजसि संयुक्तमात्मयोनित्वमागतम् ७८
एतस्मिन्नेव काले तु देवाः शक्रपुरोगमाः ।
असुरस्तारको नाम तेन सन्तापिता भृशम्
आदित्या वसवो रुद्रा मरुतोऽथाश्विनावपि ।
साध्याश्च सर्वे संत्रस्ता दैतेयस्य पराक्रमात् ॥
स्थानानि देवतानां हि विमानानि पुराणि च
ऋषीणां चाश्रमाश्चैव बभूवुरसुरैर्हृताः ॥ ८१
ते दीनमनसः सर्वे देवता ऋषयश्च ये ।
प्रजग्मुः शरणं देवं ब्रह्माणमजरं विभुम् ॥ ८२

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि सुवर्णोत्पत्तिर्नाम चतुरशीतितमोऽध्यायः ॥ ८४ ॥

८५

देवा ऊचुः ।
असुरस्तारको नाम त्वया दत्तवरः प्रभो ।
सुरानृषींश्च क्लिश्नाति वधस्तस्य विधीयताम् १
तस्माद्भय समुत्पन्नमस्माकं वै पितामह ।
परित्रायस्व नो देव न ह्यन्या गतिरस्ति नः २

ब्रह्मोवाच ।
समोऽहं सर्वभूतानामधर्मं नेह रोचये ।
हन्यतां तारकः क्षिप्रं सुरर्षिगणबाधिता ॥ ३

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चतुरशीतितमोऽध्याय ॥ ८४ ॥

८५

असुर इति ॥ १ ॥

वेदा धर्माश्च नोच्छेदं गच्छेयुः सुरसत्तमाः ।
विहितं पूर्वमेवात्र मया वै व्येतु वो ज्वरः ४

देवा ऊचुः ।

वरदानाद्भगवतो दैतेयो बलगर्वितः ।
देवैर्न शक्यते हन्तुं स कथं प्रशमं व्रजेत ॥ ५
स हि नैव स्म देवानां नासुराणां न रक्षसाम्
वध्यः स्यामिति जग्राह वरं त्वत्तः पितामह
देवाश्च शप्ता रुद्राण्या प्रजोच्छेदे पुराकृते ।
न भविष्यति वोऽपत्यमिति सर्वे जगत्पते ७

ब्रह्मोवाच ।

हुताशनो न तत्रासीच्छापकाले सुरोत्तमाः
स उत्पादयिताऽपत्यं वधाय त्रिदशद्विषाम् ८
तद्वै सर्वानतिक्रम्य देवदानवराक्षसान् ।
मानुषानथ गन्धर्वान्नागानथ च पक्षिणः ॥ ९
अस्त्रेणामोघपातेन शक्त्या त घातयिष्यति ।
यतो वो भयमुत्पन्नं ये चान्ये सुरशत्रवः १०
सनातनो हि सङ्कल्पः काम इत्यभिधीयते ।
रुद्रस्य तेजः प्रस्कन्नमग्नौ निपतितं च यत् ॥
तत्तेजोऽग्निर्महद्भूतं द्वितीयामिति पावकम् ।
वधार्थं देवशत्रूणां गङ्गायां जनयिष्यति ॥ १२
स तु नावाप तं शापं नष्टः स हुतभुक् तदा ।
तस्माद्वो भयद्देवाः समुत्पत्स्यति पावकिः ॥
अन्विष्यतां वै ज्वलनस्तथा चाद्य नियुज्यताम्
तारकस्य वधोपायः कथितो वै मयाऽनघाः
न हि तेजस्विनां शापास्तेजःसु प्रभवन्ति वै ।
बलान्यतिबलं प्राप्य दुर्बलानि भवन्ति वै १५
हन्यादवध्यान्वरदानपि चैव तपस्विनः ।
सङ्कल्पाभिरुचिः कामः सनातनतमोऽभवत् ॥
जगत्पतिरनिर्देश्यः सर्वगः सर्वभावनः ।
इच्छयः सर्वभूतानां ज्येष्ठो रुद्रादपि प्रभुः १७
अन्विष्यतां स तु क्षिप्रं तेजोराशिर्हुताशनः ।
स वो मनोगतं कामं देवः संपादयिष्यति १८
एतद्वाक्यमुपश्रित्य ततो देवा महात्मनः ।
जग्मुः संसिद्धसङ्कल्पाः पर्येषन्तो विभावसुम्
ततस्त्रैलोक्यमृषयो व्यचिन्वन्त सुरैः सह ।
कांक्षन्तो दर्शनं वह्नेः सर्वे तद्गतमानसाः २०
परेण तपसा युक्ताः श्रीमन्तो लोकविश्रुताः ।
लोकानन्वचरन्सिद्धाः सर्व एव भृगूत्तम २१
नष्टमात्मनि संलीनं नाभिजग्मुर्हुताशनम् ।
ततः सञ्जातसंत्रासानग्निर्दर्शनलालसान् २२
जलेचरः क्लान्तमनास्तेजसाऽग्नेः प्रदीपितः ।
उवाच देवान्मण्डूको रसातलतलोत्थितः ॥
रसातलतले देवा वसत्यग्निरिति प्रभो ।
संतापादिह संप्राप्तः पावकप्रभवादहम् ॥ २४
स संसुप्तो जले देवा भगवान्हव्यवाहनः ।
अपः संसृज्य तेजोभिस्तेन संतापिता वयम् ॥
तस्य दर्शनमिष्टं वो यदि देवा विभावसोः ।
तत्रैवमधिगच्छध्व कार्यं वो यदि वह्निना २६
गम्यतां साधयिष्यामो वयं ह्यग्निभयात्सुराः ।
एतावदुक्त्वा मंडूकस्त्वरितो जलमाविशत् ॥
हुताशनस्तु बुबुधे मण्डूकस्य च पैशुनम् ।
शशाप स तमासाद्य न रसान्वेत्स्यसीति वै
तं वै संयुज्य शापेन मण्डूकं त्वरितो ययौ ।
अन्यत्र वासाय विभुर्न चात्मानमदर्शयत २९
देवास्त्वनुग्रहं चक्रुर्मण्डूकानां भृगूत्तम ।
यत्तच्छृणु महाबाहो गदतो मम सर्वशः ॥ ३०

देवा ऊचुः ।

अग्निशापादजिह्वापि रसज्ञानबहिष्कृताः ।
सरस्वतीं बहुविधां यूयमुच्चारयिष्यथ ॥ ३१
बिलवासं गतांश्चैव निराहारानचेतसः ।
गतासूनपि संशुष्कान् भूमिः संतारयिष्यति ॥
तमोघनायामपि वै निशायां विचरिष्यथ ।
इत्युक्त्वा तांस्ततो देवाः पुनरेव महीमिमाम्
परीयुर्ज्वलनस्यार्थे न चाविन्दन् हुताशनम् ।
अथ तान्द्विरदः कश्चित्सुरेन्द्रद्विरदोपमः ३४
अश्वत्थस्थोऽग्निरित्येवमाह देवान् भृगूद्वह ।
शशाप ज्वलनः सर्वान्द्विरदान्क्रोधमूर्च्छितः
प्रतीपा भवतां जिह्वा भवित्रीति भृगूद्वह ।
इत्युक्त्वा निःसृतोश्वत्थादग्निर्वारणसूचितः ।
प्रविवेश शमीगर्भमथ वह्निः सुषुप्सया ॥ ३६

नष्ट अदर्शनं गत ॥ १३ ॥ ननु सर्वे सुरा इत्युद्दिश्य देव्या शापात्कथं वह्नौ न शाप स तत्र नासीदिति चेत्तेन किमित्यत आह—**न हीति** । वह्नेस्तेजस्वित्वान्न शापो दृश्यते इति भाव ॥ १५ ॥ काम काम्यमानो वह्नि संकल्प अपत्यविषयस्तदर्थं अभिरुचि सर्वतो रोचमानो भवत् अस्तु ॥ १६ ॥ नष्टं अदर्शन गत आत्मनि जले जलस्य तेजोजन्यत्वात् ॥ २२ ॥ **न रसानिति** । रसनेन्द्रियहीनो भविष्यसीत्यर्थ ॥ २८ ॥ अजिह्वा अपीति च्छेद ॥ ३१ ॥

अनुग्रहं तु नागानां यं चक्रुः शृणु तं प्रभो ।
देवा भृगुकुलश्रेष्ठ प्रीत्या सत्यपराक्रमाः ३७

देवा ऊचुः ।

प्रतीपया जिह्वयापि सर्वाहार करिष्यथ ।
वाचं चोच्चारयिष्यध्वमुच्चैरव्यक्तिताक्षराम् ॥
इत्युक्त्वा पुनरेवाग्निमनुसस्मुर्दिवौकसः ।
अभ्यत्थाग्निःसुतश्चाग्निः शमीगर्भमुपाविशत्
शुक्रेण ख्यापितो विप्र तं देवाः समुपाद्रवन् ।
शशाप शुक्रमग्निस्तु वाग्विहीनो भविष्यसि
जिह्वामावर्तयामास तस्यापि हुतभुक्तथा ।
दृष्ट्वा तु ज्वलनं देवाः शुक्रमूचुर्दयान्विताः ४१
भविता न त्वमत्यन्तं शुक्रत्वे नष्टवागिति ।
आवृत्तजिह्वस्य सतो वाक्यं कान्तं भविष्यति
बालस्येव प्रवृद्धस्य कलमव्यक्तमद्भुतम् ।
इत्युक्त्वा तं शमीगर्भे वह्निमालक्ष्य देवताः
तदेवायतनं चक्रुः पुण्यं सर्वक्रियास्वपि ।
ततः प्रभृति चाप्यग्निः शमीगर्भेषु दृश्यते ४४
उत्पादने तथोपायमभिजग्मुश्च मानवाः ।
आपो रसातले यास्तु संस्पृष्टाश्चित्रभानुना ॥
ताः पर्वतप्रस्रवणैरूष्मां मुञ्चति भार्गव ।
पावकेनाधिशयता संतप्तास्तस्य तेजसा ४६
अथाग्निर्देवता दृष्ट्वा बभूव व्यथितस्तदा ।
किमागमनमित्येवं तानपृच्छत पावकः ॥ ४७
तमूचुर्विबुधाः सर्वे ते चैव परमर्षयः ।
त्वां नियोक्ष्यामहे कार्ये तद्भवान्कर्तुमर्हति
कृते च तस्मिन् भविता तवापि सुमहान्गुणः

अग्निरुवाच ।

ब्रूत यद्भवतां कार्यं कर्तास्मि तदहं सुराः ।
भवतां तु नियोज्योस्मि मा वोत्रास्तुविचारणा

देवा ऊचुः ।

असुरस्तारको नाम ब्रह्मणो वरदर्पितः ।
अस्मान्प्रबाधते वीर्याद्वधस्तस्य विधीयताम्
इमान्देवगणांस्तात प्रजापतिगणांस्तथा ।
ऋषींश्चापि महाभाग परित्रायस्व पावक ५२
अपत्यं तेजसा युक्तं प्रवीरं जनय प्रभो ।
यद्भयं नोऽसुरात्तस्मान्नाशयेद्धव्यवाहन ५३
शक्तानां नो महादेव्या नान्यदस्ति परायणम्
अन्यत्र भवतो वीर्यं तस्मात्त्रायस्व नः प्रभो ॥
इत्युक्तः स तथेत्युक्त्वा भगवान्हव्यवाहनः ।
जगामाथ दुराधर्षो गङ्गां भागीरथीं प्रति ५५
तया चाप्यभवन्मिश्रो गर्भ चास्यादधे तदा ।
ववृधे स तदा गर्भः कक्षे कृष्णगतिर्यथा ५६
तेजसा तस्य देवस्य गङ्गा विह्वलचेतना ।
सन्तापमगमत्तीव्रं सोढुं सा न शशाक ह ५७
आहिते ज्वलनेनाथ गर्भे तेजःसमन्विते ।
गङ्गायामसुरः कश्चिद्भैरवं नादमानदत् ॥ ५८
अबुद्धिपतितेनाथ नादेन विपुलेन सा ।
विस्रस्तोद्भ्रान्तनयना गङ्गा विस्रुतलोचना ५९
विसस्रा नाशकद्गर्भं वोढुमात्मानमेव च ।
सा तु तेजःपरीताङ्गी कम्पयन्तीव जाह्नवी ६०
उवाच ज्वलनं विप्र तदा गर्भबलोद्धुता ।
ते न शक्तास्मि भगवंस्तेजसोऽस्य विधारणे
विमूढाऽस्मि कृतानेन न मे स्वास्थ्यं यथा पुरा
विह्वला चास्मि भगवंश्चेतो नष्टं च मेऽनघ ६२
धारणे नास्य शक्ताऽहं गर्भस्य तपतां वर ।
उत्स्रक्ष्येहमिमं दुःखान्न तु कामात्कथञ्चन ६३
न तेजसोस्ति संस्पर्शो मम देव विभावसो ।
आपदर्थं हि सम्बन्धः सुसूक्ष्मोऽपि महाद्युते
यदत्र गुणसम्पन्नमितरद्वा हुताशन ।
त्वय्येव तदहं मन्ये धर्माधर्मौ च केवलौ ६५
तामुवाच ततो वह्निर्धार्यतां धार्यतामिति ।
गर्भो मत्तेजसा युक्तो महागुणफलोदयः ॥ ६६
शक्ता ह्यसि महीं कृत्स्नां वोढुं धारयितुं तथा
न हि ते किञ्चिदप्राप्यमन्यतो धारणादृते ६७
सा वह्निना वार्यमाणा देवैरपि सरिद्वरा ।
समुत्ससर्ज तं गर्भं मेरौ गिरिवरे तदा ॥ ६८
समर्था धारणे चापि रुद्रतेजःप्रधर्षिता ।
नाशकत्तं तदा गर्भं संधारयितुमोजसा ६९
सा समुत्सृज्य तं दुःखाद्दीप्तवैश्वानरप्रभम् ।
दर्शयामास चाग्निस्तं तदा गङ्गां भृगूद्वह ७०
पप्रच्छ सरितां श्रेष्ठां कस्मिन्गर्भः सुखोदयः ।
कीदृग्वर्णोऽपि वा देवि कीदृग्रूपश्च दृश्यते ।
तेजसा केन वा युक्तः सर्वमेतद्ब्रवीहि मे ॥ ७१

ऊष्मा ऊष्माणं डावुभाभ्यामिति मन्नन्तात् डाप् अधिशयता अधिशयानेन ॥४६॥ अबुद्धिपतितेन अकस्माज्जातेन ॥५९॥ रुद्रस्य अग्नेस्तेजस्तेन प्रधर्षिता रुद्रो वा एष यदग्निरिति श्रुते ॥ ६९ ॥

गङ्गोवाच।
जातरूपः स गर्भो वै तेजसा त्वमिवानघ।
सुवर्णो विमलो दीप्तः पर्वतं चावभासयत् ७२
पद्मोत्पलविमिश्राणां ह्रदानामिव शीतलः।
गन्धोऽस्य स कदम्बानां तुल्यो वै तपतां वर
तेजसा तस्य गर्भस्य भास्करस्येव रश्मिभिः
यद्द्रव्यं परिसंसृष्टं पृथिव्यां पर्वतेषु च ७४
तत्सर्वं काञ्चनीभूतं समन्तात्प्रत्यदृश्यत।
पर्यधावत शैलाश्च नदीः प्रस्रवणानि च ७५
व्यादीपयंस्तेजसा च त्रैलोक्यं सचराचरम्
एवंरूपः स भगवान्पुत्रस्ते हव्यवाहन।
सूर्यवैश्वानरसमः कान्त्या सोम इवापरः ७६
एवमुक्त्वा तु सा देवी तत्रैवान्तरधीयत।
पावकश्चापि तेजस्वी कृत्वा कार्यं दिवौकसाम्
जगामेष्टं ततो देशं तदा भार्गवनन्दन।
एतैः कर्मगुणैर्लोके नामाग्नेः परिगीयते ॥ ७८
हिरण्यरेता इति वै ऋषिभिर्विबुधैस्तथा।
पृथिवी च तदा देवी ख्याता वसुमतीति वै ॥
स तु गर्भो महातेजा गाङ्गेयः पावकोद्भवः।
दिव्यं शरवणं प्राप्य ववृधेऽद्भुतदर्शनः ॥ ८०
ददृशुः कृत्तिकास्तं तु बालार्कसदृशद्युतिम्।
पुत्रं वै ताश्च तं बालं पुपुषुः स्तन्यविस्रवैः ८१
ततः स कार्तिकेयत्वमवाप परमद्युतिः।
स्कन्नत्वात्स्कन्दतां चापि गुहावासाद्गुहोऽभवत्
एवं सुवर्णमुत्पन्नमपत्यं जातवेदसः।
तत्र जाम्बूनदं श्रेष्ठं देवानामपि भूषणम् ॥ ८३
ततः प्रभृति चाप्येतज्जातरूपमुदाहृतम्।
रत्नानामुत्तमं रत्नं भूषणानां तथैव च ॥ ८४
पवित्रं च पवित्राणां मङ्गलानां च मङ्गलम्।
यत्सुवर्णं स भगवानग्निरीशः प्रजापतिः ॥ ८५
पवित्राणां पवित्रं हि कनकं द्विजसत्तमाः।
अग्नीषोमात्मकं चैव जातरूपमुदाहृतम् ॥ ८६

वसिष्ठ उवाच।
अपि चेदं पुरा राम श्रुतं मे ब्रह्मदर्शनम्।
पितामहस्य यद्वृत्तं ब्रह्मणः परमात्मनः ॥ ८७
देवस्य महतस्तात वारुणीं बिभ्रतस्तनुम्।
ऐश्वर्ये वारुणे राम रुद्रस्येशस्य वै प्रभो॥ ८८
आजग्मुर्मुनयः सर्वे देवाश्चाग्निपुरोगमाः।
यज्ञाङ्गानि च सर्वाणि वषट्कारश्च मूर्तिमान्
मूर्तिमन्ति च सामानि यजूंषि च सहस्रशः।
ऋग्वेदश्चागमत्तत्र पदक्रमविभूषितः ॥ ९०
लक्षणानि स्वरा स्तोभा निरुक्तं सुरपंक्तयः।
ओङ्कारश्चावसन्नेत्रे निग्रहप्रग्रहौ तथा ॥ ९१
वेदाश्च सोपनिषदो विद्या साविद्व्यथापि च।
भूतं भव्यं भविष्यं च दधार भगवान्शिवः९२
संजुहावात्मनाऽऽत्मानं स्वयमेव तदा प्रभो
यज्ञं च शोभयामास बहुरूपं पिनाकधृत् ९३
द्यौर्नभः पृथिवी खं च तथा चैवैष भूपतिः।
सर्वविद्येश्वरः श्रीमानेष चापि विभावसुः९४
एष ब्रह्मा शिवो रुद्रो वरुणोऽग्निः प्रजापतिः।
कीर्त्यते भगवान्देवः सर्वभूतपतिः शिवः ९५
तस्य यज्ञः पशुपतेस्तपः क्रतव एव च।
दीक्षा दीक्षव्रता देवी दिशश्च सदिगीश्वराः९६
देवपत्न्यश्च कन्याश्च देवानां चैव मातरः।
आजग्मुः सहितास्तत्र तदा भृगुकुलोद्वह ॥९७
यज्ञं पशुपतेः प्रीता वरुणस्य महात्मनः।
स्वयंभुवस्तु ता दृष्ट्वा रेतः समपतद्भुवि ॥ ९८
तस्य शुक्रस्य विस्पन्दान्पांसून्संगृह्य भूमितः
प्रास्यत्पूषा कराभ्यां वै तस्मिन्नेव हुताशने
ततस्तस्मिन्संप्रवृत्ते सत्रे ज्वलितपावके।
ब्रह्मणो जुह्वतस्तत्र प्रादुर्भावो बभूव ह ॥ १००
स्कन्नमात्रं च तच्छुक्रं स्रुवेण परिगृह्य सः।
आज्यवन्मन्त्रतश्चापि सोऽजुहोद्भृगुनन्दन १
ततः स जनयामास भूतग्रामं च वीर्यवान्।
तस्य तत्तेजसस्तस्माज्जज्ञे लोकेषु तैजसम् ॥ २
तमसस्तामसा भावा व्यापि सत्त्वं तथोभयम्
स गुणस्तेजसो नित्यस्तस्य चाकाशमेव च३

कदंबाना कदंबपुष्पाणाम्७३ देवस्य महत इति रुद्रस्येत्यर्थ ॥८८॥ विस्पन्दान् कणान् ताभि पतिताभी रेत कणिकाभि सह पासून् संगृह्य ॥ ९९ ॥ प्रादुर्भावश्चरमधातु ॥१००॥ भूतग्रामं चतुर्विधं तत्तेजसस्तस्य त्रिगुणमयस्य रेतस संबंधी यस्तेजोंशो रजोंशस्तस्मात्तैजसं प्रवृत्तिप्रधान जंगममभूत् ॥२॥ तमसस्तमोंऽशात्तामस स्थावरं सत्त्वाशस्तूभयत्रानुगत उभयेषु सात्त्विकाना भावाना धर्महेतुत्वादीना दर्शनात्। स इति। स सत्त्वगुणस्तेजस प्रकाशरूपाया बुद्धे स्वरूपमित्यर्थ। बुद्धेस्तेजस्त्वं प्रकाशकत्वसाम्यान्मनोज्योतिरितिमन्त्रलिङ्गाच्च तस्य धीसत्त्वस्य च आकाशं आकाशादि कृत्स्नं विश्वं स्वरूपं तद्धि लब्धसत्त्वात्मक तदात्मना परिणमत इति भाव ॥ ३ ॥

सर्वभूतेषु च तथा सत्त्वं तेजस्तथोत्तमम् ।
शुक्रे हुतेऽग्नौ तस्मिंस्तु प्रादुरासंस्त्रयः प्रभो ४
पुरुषा वपुषा युक्ताः स्वैः स्वैः प्रसवजैर्गुणैः ।
भृगित्येव भृगुः पूर्वमङ्गारेभ्योऽङ्गिराऽभवत् ५
अङ्गारसंश्रयाच्चैव कविरित्यपरोऽभवत् ।
सह ज्वालाभिरुत्पन्नो भृगुस्तस्माद्भृगुः स्मृतः
मरीचिभ्यो मरीचिस्तु
मारीचः कश्यपो ह्यभूत् ।
अङ्गारेभ्योऽङ्गिरास्तात
वालखिल्याः कुशोच्चयात् ॥ ८
अत्रैवात्रेति च विभो जातमत्रिं वदन्त्यपि ।
तथा भस्मन्यपोहेभ्यो ब्रह्मर्षिगणसंमताः ॥ ८
वैखानसाः समुत्पन्नास्तपःश्रुतगुणेप्सवः ।
अश्रुतोऽस्य समुत्पन्नावश्विनौ रूपसम्मतौ ९
शेषाः प्रजानां पतयः स्रोतोभ्यस्तस्य जज्ञिरे
ऋषयो रोमकूपेभ्यः स्वेदाच्छंदो बलान्मनः
एतस्मात्कारणादाहुरग्निः सर्वास्तु देवताः ।
ऋषयः श्रुतसम्पन्ना वेदप्रामाण्यदर्शनात् ११
यानि दारूणि निर्यासास्ते मासाः पक्षसंज्ञिताः
अहोरात्रा मुहूर्ताश्च पित्तं ज्योतिश्च दारुणम्
रौद्रं लोहितमित्याहुर्लोहितात्कनकं स्मृतम् ।
तन्मैत्रमिति विज्ञेयं धूमाश्च वसवः स्मृताः ।
अर्चिषो याश्च ते रुद्रास्तथाऽऽदित्या महाप्रभाः
उद्दिष्टास्ते तथांगारा ये धिष्ण्येषु दिवि स्थिताः
आदिकर्ता च लोकस्य तत्परं ब्रह्म तद्भुवम् ।
सर्वेकामदमित्याहुस्तद्रहस्यमुवाच ह ॥ १५
ततोऽब्रवीन्महादेवो वरुणः पवनात्मकः ।
मम सत्रमिदं दिव्यमहं गृहपतिस्त्विह ॥ १६
त्रीणि पूर्वाण्यपत्यानि मम तानि न संशयः ।
इति जानीत खगमा मम यज्ञफलं हि तत् १७
अग्निरुवाच ।
मदङ्गेभ्यः प्रसूतानि मदाश्रयकृतानि च ।
ममैव तान्यपत्यानि वरुणो ह्यवशात्मकः १८
अथाब्रवील्लोकगुरुर्ब्रह्मा लोकपितामहः ।
ममैव तान्यपत्यानि मम शुक्रं हुतं हि तत् १९
अहं कर्ता हि सत्रस्य होता शुक्रस्य चैव ह ।
यस्य बीजं फलं तस्य शुक्रं चेत्कारणं मतम् २०
ततोऽब्रुवन्देवगणाः पितामहमुपेत्य वै ।
कृताञ्जलिपुटाः सर्वे शिरोभिरभिवन्द्य च ॥ २१
वयं च भगवन्सर्वे जगच्च सचराचरम् ।
तवैव प्रसवाः सर्वे तस्मादग्निर्विभावसुः ॥ २२
वरुणश्चेश्वरो देवो लभतां काममीप्सितम् ।
निसर्गाद्ब्रह्मणश्चापि वरुणो यादसांपतिः ॥ २३
जग्राह वै भृगुं पूर्वमपत्यं सूर्यवर्चसम् ।
ईश्वरोऽङ्गिरसं चाग्नेरपत्यार्थमकल्पयत् ॥ २४
पितामहस्त्वपत्यं वै कविं जग्राह तत्त्ववित् ।
तदा स वारुणः ख्यातो भृगुः प्रस्रवकर्मकृत्
आग्नेयस्त्वांगिराः श्रीमान्कविर्ब्राह्मो महायशाः
भार्गवाङ्गिरसौ लोके लोकसन्तानलक्षणौ २६
एते हि प्रस्रवाः सर्वे प्रजानां पतयस्त्रयः ।
सर्वं संतानमेतेषामिदमित्युपधारय ॥ २७
भृगोस्तु पुत्राः सप्तासन्सर्वे तुल्या भृगोर्गुणैः ।
च्यवनो वज्रशीर्षश्च शुचिरौर्वस्तथैव च ॥ २८
शुक्रो वरेण्यश्च विभुः सवनश्चेति सप्त ते ।
भार्गवा वारुणाः सर्वे येषां वंशे भवानपि ॥
अष्टौ चांगिरसः पुत्रा वारुणास्तेप्युदाहृताः ।
बृहस्पतिरुतथ्यश्च पयस्यः शान्तिरेव च ॥ ३०
घोरो विरूपः संवर्तः सुधन्वा चाष्टमः स्मृतः
एतेऽष्टौ वह्निजाः सर्वे ज्ञाननिष्ठा निरामयाः
ब्रह्मणस्तु कवेः पुत्रा वारुणास्तेऽप्युदाहृताः ।
अष्टौ प्रसवजैर्युक्ता गुणैर्ब्रह्मविदः शुभाः ॥ ३२
कविः काव्यश्च धृष्णुश्च बुद्धिमानुशनास्तथा
भृगुश्च विरजाश्चैव काशी चोग्रश्च धर्मवित् ॥

तस्मात्सर्वेषु भूतेषु तमोमयेषु जडेषु शरीरेषु सत्त्वं प्रकाश उत्तमं तेज धर्मप्रवृत्तिश्च तत्सर्वं तस्माद्वह्नौ हुतात्प्रजापतिशुक्राज्जज्ञिरे इत्यर्थः ॥ ४ ॥ प्रसवजै कारणजैर्गुणै तानेवाह—**भृगिति**। भृज्जति पावयतीति भृक् ज्वाला साक्षाज्ज्वाला इत्येव भृगुरिति नाम ॥ ५ ॥ अंगाराश्रिता अल्पज्वाला निर्धूमास्ताभ्य कविरभूदित्यर्थ । भृगिति व्याचष्टे—**सहेति** ॥ ६ ॥ अत्रैव कुशोच्चये अत्र अत्रेवेति संबन्ध व्यपोहेभ्य समूहेभ्य ॥८॥अश्रुत अश्रुसकाशात् ॥९॥ स्रोतोभ्य श्रोत्रादीन्द्रियेभ्य । बलात् वीर्यात् ॥१०॥ एतस्मादग्निजत्वात् ॥ ११ ॥ निर्यासा दारुगता लाक्षादयो वृक्षरसा ॥ १२ ॥ दिविस्थिता ग्रहतारादय विष्ण्येषु स्थानेषु ॥ १४ ॥ त्रीणि भृग्वंगिर कविसंज्ञानि ॥ १७ ॥ अवश आत्मा चित्तं यस्य सोऽवशात्मक भ्रान्त इत्यर्थ १८ कवे पुत्रा वारुणा इत्यनेन स्वीयभागोऽपि कविर्ब्रह्मणा वरुणाय समर्पित इत्युन्नेयम् ॥ ३२ ॥

अष्टौ कविसुता ह्येते सर्वमेभिर्जगत्ततम् ।
प्रजापतय एते हि प्रजाभागैरिह प्रजाः ॥ ३४
एवमंगिरसश्चैव कवेश्च प्रसवान्वयैः ।
भृगोश्च भृगुशार्दूल वंशजैः सततं जगत् ॥ ३५
वरुणश्चादितो विप्र जग्राह प्रभुरीश्वरः ।
कविं तात भृगुं चापि तस्मात्तौ वारुणौ स्मृतौ
जग्राहांगिरसं देवः शिखी तस्माद्धुताशनः ।
तस्मादांगिरसा ज्ञेयाः सर्व एव तदन्वयाः ॥
ब्रह्मा पितामहः पूर्वं देवताभिः प्रसादितः ।
इमे नः सन्तरिष्यन्ति प्रजाभिर्जगतीश्वराः ॥
सर्वे प्रजानां पतयः सर्वे चातितपस्विनः ।
त्वत्प्रसादादिमं लोकं तारयिष्यन्ति सांप्रतम्
तथैव वंशकर्तारस्तव तेजोविवर्धनाः ।
भवेयुर्वेदविदुषः सर्वे च कृतिनस्तथा ॥ ४०
देवपक्षचराः सौम्याः प्राजापत्या महर्षयः ।
आप्नुवन्ति तपश्चैव ब्रह्मचर्यं परं तथा ॥ ४१
सर्वे हि वयमेते च तवैव प्रसवः प्रभो ।
देवानां ब्राह्मणानां च त्वं हि कर्ता पितामह
मारीचमादितः कृत्वा सर्वे चैवाथ भार्गवाः ।
अपत्यानीति संप्रेक्ष्य क्षमयाम पितामह ॥ ४२
ते त्वनेनैव रूपेण प्रजनिष्यन्ति वै प्रजाः ।
स्थापयिष्यन्ति चात्मानं युगादिनिधने तथा
इत्युक्तः स तदा तैस्तु ब्रह्मा लोकपितामहः ।
तथेत्येवाब्रवीत्प्रीतस्तेऽपि जग्मुर्यथागतम् ॥
एवमेतत्पुरा वृत्तं तस्य यज्ञे महात्मनः ।
देवश्रेष्ठस्य लोकादौ वारुणीं बिभ्रतस्तनुम् ॥
अग्निर्ब्रह्मा पशुपतिः शर्वो रुद्रः प्रजापतिः ।
अग्नेरपत्यमेतद्वै सुवर्णमिति धारणा ॥ ४७
अदृश्यभावे च कुरुते वह्निस्थानेषु काञ्चनम् ।
जामदग्न्यः प्रमाणज्ञो वेदश्रुतिनिदर्शनात् ४८
कुशस्तम्बे जुहोत्यग्नि सुवर्णे तत्र च स्थिते ।
वल्मीकस्य वपायां च कर्णे वाऽजस्य दक्षिणे
शकटोद्यौ परस्याप्सु ब्राह्मणस्य करे तथा ।
हुते प्रीतिकरीमृद्धिं भगवांस्तत्र मन्यते ॥ ५०
तस्मादग्निपराः सर्वे देवता इति शुश्रुम ।
ब्रह्मणो हि प्रभूतोऽग्निरग्नेरपि च काञ्चनम् ॥
तस्माद्ये वै प्रयच्छन्ति सुवर्णं धर्मदर्शिनः ।
देवतास्ते प्रयच्छन्ति समस्ता इति नः श्रुतम् ॥
तस्य चातमसो लोका गच्छतः परमां गतिम्
स्वर्लोके राजराज्येन सोऽभिषिच्येत भार्गव
आदित्योदयसंप्राप्ते विधिमन्त्रपुरस्कृतम् ।
ददाति काञ्चनं यो वै दुःस्वप्नं प्रतिहन्ति सः
ददात्युदितमात्रे यस्तस्य पाप्मा विधूयते ।
मध्याह्ने ददतो रुक्म हन्ति पापमनागतम् ५५
ददाति पश्चिमां सन्ध्यां यः सुवर्णं यतव्रतः ।
ब्रह्मवाय्वग्निसोमानां सालोक्यमुपयाति सः
सेन्द्रेषु चैव लोकेषु प्रतिष्ठां विन्दते शुभाम् ।
इह लोके यशः प्राप्य शान्तपाप्मा च मोदते
ततः संपद्यतेऽन्येषु लोकेष्वप्रतिम. सदा ।
अनावृतगतिश्चैव कामचारो भवत्युत ॥ ५८
न च क्षरति तेभ्यश्च यशश्चैवाप्नुते महत् ।
सुवर्णमक्षयं दत्वा लोकांश्चाप्नोति पुष्कलान् ॥
यस्तु सञ्जनयित्वाग्निमादित्योदयनं प्रति ।
दद्याद्वै व्रतमुद्दिश्य सर्वकामान्समश्नुते ॥ ६०
अग्निमित्येव तत्प्राहुः प्रदानं च सुखावहम् ।
यथेष्टगुणसंवृत्तं प्रवर्तकमिति स्मृतम् ॥ ६१
एषा सुवर्णस्योत्पत्तिः कथिता ते मयाऽनघ
कार्तिकेयस्य च विभो तद्विद्धि भृगुनन्दन ६२

न अस्मान् संतरिष्यन्ति संतारयिष्यन्ति ॥ ३८ ॥ विदुष विद्वांस ॥ ४० ॥ क्षमयाम स्वोत्कर्षार्थं अन्योन्याभिभवाय न यतामह इत्यर्थ ॥ ४३ ॥ ते अनेन क्षमावता आदिनिधने उत्पत्तिप्रलययोरन्तराले ॥ ४४ ॥ देवश्रेष्ठस्य रुद्रस्य ॥ ४६ ॥ धारणा निश्चय ॥ ४७ ॥ **वेदश्रुतिरिति** । अग्नावनुगतेन्तरा आहुती हिरण्य उत्तरा जुहुयादिति कल्पकारेण दर्शिता ॥ ४८ ॥ वल्मीकवपाया सान्नाय्यमिति दधिपयसो सहहोम उक्त । ब्राह्मणपाण्यजकर्णदर्भस्तंबाप्सु काष्ठेष्वित्येतानि श्रुतौ दृश्यन्ते ॥ ४९ ॥ शकटोद्यौ तु श्रुत्यन्तरात् ज्ञेया परस्य तीर्थादेरप्सु ॥ ५० ॥ राजराज्येन कुबेरत्वेन ॥ ५३ ॥ तेभ्यो लोकेभ्यो न च क्षरति ॥ ५९ ॥ अग्निं श्रौतं स्मार्तं वा संजनयित्वा प्रात प्रादुष्कृत्य उदयकाले दद्यात् ॥ ६० ॥ **अग्निमिति** । अभ्यादित्ययो प्रादुर्भूतयोरन्तराले काले सुवर्णदानं, इष्टेन गुणेन भुवि दिवि प्रकाशमानेन रूपेण मया स्थेयमित्येवंरूपेण गुणेन अंतरालकालेन च गुणेन सवृत्तं समान जात, एतच्च गुणज्ञानं प्रवर्तकं अग्निजत्वाद्धिरण्यमग्नि इति शब्द प्रकारार्थ ।हिरण्यं पुरस्कृत्य सायमुद्धरेदिति सायमुद्धरणकालातिक्रमे सूर्यस्य हिरण्यपुरस्कारवचनाद्धिरण्यमादित्यत्वेनापि जानीयात् अतस्तयोरन्तराले सुवर्णं ददत् तादृशमेव फल प्राप्नोतीत्यर्थ ॥ ६१ ॥ **एषेति** । यथा कार्तिकेय सर्वदेवानामजेयं दैत्य निहतवान् एवं तत्सोदरं सुवर्णमपि सर्वेषां धर्माणामजय्यं दुरितं नाशयति लोकं च तादृशं जयतीत्यर्थ ॥ ६२ ॥ इति

---

१ रंध्रे रंध्रे श्वभ्रं वपा सुषिरित्यमर. ।

कार्तिकेयस्तु संवृद्धः कालेन महता तदा।
देवैः सेनापतित्वेन वृतः सेन्द्रैर्भृगूद्वह ॥ ६३
जघान तारकं चापि दैत्यमन्यांस्तथासुरान्।
त्रिदशेन्द्राज्ञया ब्रह्मँल्लोकानां हितकाम्यया ॥
सुवर्णदाने च मया कथितास्ते गुणा विभो।
तस्मात्सुवर्णं विप्रेभ्यः प्रयच्छ ददतां वर ६५

भीष्म उवाच।
इत्युक्तः स वसिष्ठेन जामदग्न्यः प्रतापवान्
ददौ सुवर्णं विप्रेभ्यो व्यमुच्यत च किल्बिषात्
एतत्ते सर्वमाख्यातं सुवर्णस्य महीपते।
प्रदानस्य फलं चैव जन्म चास्य युधिष्ठिर ६७
तस्मात्त्वमपि विप्रेभ्यः प्रयच्छ कनकं बहु।
ददत्सुवर्णं नृपते किल्बिषाद्विप्रमोक्ष्यसि १६८

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि सुवर्णोत्पत्तिर्नाम पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

८६

युधिष्ठिर उवाच।
उक्ताः पितामहेनेह सुवर्णस्य विधानतः।
विस्तरेण प्रदानस्य ये गुणाः श्रुतिलक्षणाः १
यत्तु कारणमुत्पत्तेः सुवर्णस्य प्रकीर्तितम्।
स कथं तारकः प्राप्तो निधनं तद्ब्रवीहि मे २
उक्तं स दैवतानां हि अवध्य इति पार्थिव।
कथं तस्याभवन्मृत्युर्विस्तरेण प्रकीर्तय ॥ ३
एतदिच्छाम्यहं श्रोतुं त्वत्तः कुरुकुलोद्वह।
कात्स्न्र्येन तारकवधं परं कौतूहलं हि मे ॥ ४

भीष्म उवाच।
विपन्नकृत्या राजेन्द्र देवता ऋषयस्तथा।
कृत्तिकाश्चोदयामासुरपत्यभरणाय वै ॥ ५
न देवतानां काचिद्धि समर्था जातवेदसः।
एता हि शक्तास्तं गर्भं संधारयितुमोजसा ६
षण्णां तासां ततः प्रीतः पावको गर्भधारणात्
स्वेन तेजोविसर्गेण वीर्येण परमेण च ॥ ७
तास्तु षट्कृत्तिका गर्भं पुपुषुर्जातवेदसः।
षट्सु वर्त्मसु तेजोग्नेः सकलं निहित प्रभो ॥८
ततस्ता वर्धमानस्य कुमारस्य महात्मनः।
तेजसाऽभिपरीता ङ्ग्यो न क्वचिच्छर्म लेभिरे
ततस्तेजःपरीताङ्ग्यः सर्वाः काल उपस्थिते
समं गर्भं सुषुविरे कृत्तिकास्तं नरर्षभ ॥ १०
ततस्तं षडधिष्ठानं गर्भमेकत्वमागतम्।
पृथिवी प्रतिजग्राह कार्तस्वरसमीपतः ॥ ११
स गर्भो दिव्यसस्थानो दीप्तिमान्पावकप्रभः
दिव्यं शरवणं प्राप्य ववृधे प्रियदर्शनः ॥ १२
ददृशुः कृत्तिकास्तं तु बालमर्कसमद्युतिम्।
जातस्नेहाश्च सौहार्दात्पुपुषुः स्तन्यविस्रवैः ॥
अभवत्कार्तिकेयः स त्रैलोक्ये सचराचरे।
स्कन्नत्वात्स्कन्दतां प्राप्तो गुहावासाद्गुहोभवत्
ततो देवास्त्रयस्त्रिंशदृषिश्च सदिगीश्वराः।
रुद्रो धाता च विष्णुश्च यमः पूषार्यमा भगः
अंशो मित्रश्च साध्याश्च वासवो वसवोऽश्विनौ
आपो वायुर्नभश्चन्द्रो नक्षत्राणि ग्रहा रविः ॥
पृथग्भूतानि चान्यानि यानि देवार्पणानि वै
आजग्मुस्तेऽद्भुतं द्रष्टुं कुमारं ज्वलनात्मजम्

श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चाशीतितमोऽध्याय ॥ ८५ ॥

८६

उक्ता इति। श्रुतिर्वेद लक्षण ज्ञापकं येषा ते श्रुतिलक्षणा श्रुत्युक्ता इत्यर्थ ॥१॥ विपन्नं कृत्यं येषा ते गङ्गया गर्भे त्यक्ते सति नष्टकार्या ॥५॥चोदयामासुरित्यत्र हेतुमाह —**नेति**। गर्भं संधारयितुमित्यपकृष्यते पूर्वार्धेऽपि ॥ ६ ॥ प्रीतस्ताभिर्गरुडीरूपेण तद्रेत पीत्वा षोढा गर्भे धृते सतीति शेष ॥ ७ ॥ वर्त्मसु गर्भागमनमार्गेषु योनिष्वित्यर्थ ॥८॥ देवेभ्योऽर्प्यन्ते यैस्तानि ऋग्यजु सामानि मूर्तिमन्ति देवार्पणानि ॥ १७ ॥

ऋषयस्तुष्टुवुश्चैव गन्धर्वाश्च जगुस्तथा ।
षडाननं कुमारं तु द्विषडक्षं द्विजप्रियम् ॥ १८
पीनांसं द्वादशभुजं पावकादित्यवर्चसम् ।
शयानं शरगुल्मस्थं दृष्ट्वा देवाः सहर्षिभिः १९
लेभिरे परमं हर्षं मेनिरे चासुरं हतम् ।
ततो देवाः प्रियाण्यस्य सर्व एव समाहरन् २०
क्रीडतः क्रीडनीयानि ददुः पक्षिगणाश्च ह ।
सुपर्णोऽस्य ददौ पुत्रं मयूरं चित्रबर्हिणम् २१
राक्षसाश्च ददुस्तस्मै वराहमहिषावुभौ ।
कुक्कुटं चाग्निसंकाशं प्रददावरुणः स्वयम् ॥ २२
चन्द्रमाः प्रददौ मेषमादित्यो रुचिरां प्रभाम्
गवां माता च गा देवी ददौ शतसहस्रशः ॥
छागमग्निर्गुणोपेतमिला पुष्पफलं बहु ।
सुधन्वा शकटं चैव रथं चामितकूबरम् ॥ २४
वरुणो वारुणान्दिव्यान्सगजान्प्रददौ शुभान्
सिंहान्सुरेन्द्रो व्याघ्रांश्च द्विपानन्यांश्च पक्षिणः
श्वापदांश्च बहून् घोरांश्छत्राणि विविधानि च
राक्षसासुरसंघाश्च अनुजग्मुस्तमीश्वरम् २६
वर्धमानं तु तं दृष्ट्वा प्रार्थयामास तारकः ।
उपायैर्बहुभिर्हन्तुं नाशकच्चापि तं विभुम् २७
सैनापत्येन तं देवाः पूजयित्वा गुहालयम् ।
शशंसुर्विप्रकारं तं तस्मै तारककारितम् २८
स विवृद्धो महावीर्यो देवसेनापतिः प्रभुः ।
जघानामोघया शक्त्या दानवं तारकं गुहः ॥
तेन तस्मिन्कुमारेण क्रीडता निहतेऽसुरे ।
सुरेन्द्रः स्थापितो राज्ये देवानां पुनरीश्वरः
स सेनापतिरेवाथ बभौ स्कन्दः प्रतापवान् ।
ईशो गोप्ता च देवानां प्रियकृच्छङ्करस्य च ३१
हिरण्यमूर्तिर्भगवानेष एव च पावकिः ।
सदा कुमारो देवानां सैनापत्यमवाप्तवान् ॥
तस्मात्सुवर्णं मङ्गल्यं रत्नमक्षय्यमुत्तमम् ।
सहजं कार्तिकेयस्य वह्नेस्तेजः परं मतम् ३३
एवं रामाय कौरव्य वसिष्ठोऽकथयत्पुरा ।
तस्मात्सुवर्णदानाय प्रयतस्व नराधिप ॥ ३४
रामः सुवर्णं दत्त्वा हि विमुक्तः सर्वकिल्बिषैः
त्रिविष्टपे महत्स्थानमवापासुलभं नरैः ॥ ३५

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि तारकवधोपाख्यानं नाम षडशीतितमोऽध्यायः ॥ ८६ ॥

८७

युधिष्ठिर उवाच ।
चातुर्वर्ण्यस्य धर्मात्मन्धर्मः प्रोक्ता यथा त्वया
तथैव मे श्राद्धविधिं कृत्स्नं प्रब्रूहि पार्थिव १
वैशम्पायन उवाच ।
युधिष्ठिरेणैवमुक्तो भीष्मः शान्तनवस्तदा
इमं श्राद्धविधिं कृत्स्नं वक्तुं समुपचक्रमे ॥ २
भीष्म उवाच ।
शृणुष्वावहितो राजञ्छ्राद्धकर्मविधिं शुभम्
धन्यं यशस्यं पुत्रीयं पितृयज्ञं परंतप ॥ ३
देवासुरमनुष्याणां गन्धर्वोरगरक्षसाम् ।
पिशाचकिन्नराणां च पूज्या वै पितरः सदा ४
पितॄन्पूज्यादितः पश्चाद्देवतास्तर्पयन्ति वै ।
तस्मात्तान्सर्वयत्नेन पुरुषः पूजयेत्सदा ॥ ५
अन्वाहार्यं महाराज पितॄणां श्राद्धमुच्यते ।
तस्माद्विशेषविधिना विधिः प्रथमकल्पितः ६
सर्वेष्वहःसु प्रीयन्ते कृते श्राद्धे पितामहाः ।
प्रवक्ष्यामि तु ते सर्वांस्तिथ्यातिथ्यगुणागुणान्

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षडशीतितमोऽध्याय ॥ ८६ ॥

८७

चातुर्वर्ण्यस्येति ॥ १ ॥ आदित अमावास्याया पश्चात्प्रतिपदि यद्वा खडदर्शे पूर्वार्धे इष्टि पश्चात्पितृयज्ञ ॥ ५ ॥ अन्वाहार्यं पश्चात् कर्तव्यमपि यस्मादेवं तस्मात् प्रथमकल्पित सामान्यविधिः अमावास्याया यदहश्चन्द्रमसं न पश्यति तदहरपराह्णे पिंडपितृयज्ञं कुरुत इति विशेषविधिना बाध्यत इति अन्वाहार्यत्वमपि पितृयज्ञस्य भवतीत्यर्थ ॥ ६ ॥ तिथीना अतिथीना च गुणानगुणाश्च प्रवक्ष्यामि ॥ ७ ॥

येष्वहःसु कृतैः श्राद्धैर्यत्फलं प्राप्यतेऽनघ ।
तत्सर्वं कीर्तयिष्यामि यथावत्तन्निबोध मे ८
पितॄनर्च्य प्रतिपदि प्राप्नुयात्सुगृहे स्त्रियः ।
अभिरूपप्रजायिन्यो दर्शनीया बहुप्रजाः ॥ ९
स्त्रियो द्वितीयां जायन्ते तृतीयायां तु वाजिनः
चतुर्थ्यां क्षुद्रपशवो भवन्ति बहवो गृहे ॥ १०
पञ्चम्यां बहवः पुत्रा जायन्ते कुर्वतां नृप ।
कुर्वाणास्तु नराः षष्ठ्यां भवन्ति द्युतिभागिनः
कृषिभागी भवेच्छ्राद्धं कुर्वाणः सप्तमीं नृप ।
अष्टम्यां तु प्रकुर्वाणो वाणिज्ये लाभमाप्नुयात्
नवम्यां कुर्वतः श्राद्धं भवत्येकशफं बहु ।
विवर्धन्ते तु दशमी गावः श्राद्धान्विकुर्वतः ॥
कुप्यभागी भवेन्मर्त्यः कुर्वन्नेकादशीं नृप ।
ब्रह्मवर्चस्विनः पुत्रा जायन्ते तस्य वेश्मनि १४
द्वादश्यामीहमानस्य नित्यमेव प्रदृश्यते ।
रजतं बहुवित्तं च सुवर्णं च मनोरमम् ॥ १५
ज्ञातीनां तु भवेच्छ्रेष्ठः कुर्वञ्छ्राद्धं त्रयोदशीम्
अवश्यं तु युवानोऽस्य प्रमीयन्ते नरा गृहे १६
युद्धभागी भवेन्मर्त्यः कुर्वञ्छ्राद्ध चतुर्दशीम् ।
अमावास्यां तु निर्वापात्सर्वकामानवाप्नुयात्
कृष्णपक्षे दशम्यादौ वर्जयित्वा चतुर्दशीम् ।
श्राद्धकर्मणि तिथ्यस्तु प्रशस्ता न तथेतराः ॥
यथा चैवापरः पक्षः पूर्वपक्षाद्विशिष्यते ।
तथा श्राद्धस्य पूर्वाह्णादपराह्णो विशिष्यते १९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि श्राद्धकल्पे
सप्ताशीतितमोऽध्यायः ॥ ८७ ॥



८८

युधिष्ठिर उवाच ।
किंस्विदत्तं पितृभ्यो वै भवत्यक्षयमीश्वर
किं हविश्चिरराय किमानन्त्याय कल्पते १
भीष्म उवाच ।
हवींषि श्राद्धकल्पे तु यानि श्राद्धविदो विदुः
तानि मे शृणु काम्यानि फलं चैव युधिष्ठिर
तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलैस्तथा ।
दत्तेन मासं प्रीयन्ते श्राद्धेन पितरो नृप ॥ ३
वर्धमानतिलं श्राद्धमक्षयं मनुरब्रवीत् ।
सर्वेष्वेव तु भोज्येषु तिलाः प्राधान्यतः स्मृताः
द्वौ मासौ तु भवेत्तृप्तिर्मत्स्यैः पितृगणस्य ह ।
त्रीन्मासानाविकेनाहुश्चतुर्मासं शशेन ह ॥ ५
आजेन मासान्प्रीयन्ते पञ्चैव पितरो नृप ।
वाराहेण तु षण्मासान् सप्त वै शाकुलेन तु ६
मासानष्टौ पार्षतेन रौरवेण नव प्रभो ।
गवयस्य तु मांसेन तृप्तिः स्याद्दशमासिकी ७
मांसेनैकादश प्रीतिः पितॄणां माहिषेण तु ।
गव्येन दत्ते श्राद्धे तु संवत्सरमिहोच्यते ॥ ८
यथा गव्य तथा युक्तं पायसं सर्पिषा सह ।
वार्ध्रीणसस्य मांसेन तृप्तिर्द्वादशवार्षिकी ॥ ९
आनन्त्याय भवेद्दत्तं खड्गमांसं पितृक्षये ।
कालशाकं च लौहं चाप्यानन्त्यं छाग उच्यते
गाथाश्चाप्यत्र गायन्ति पितृगीता युधिष्ठिर
सनत्कुमारो भगवान्पुरा मह्यमभाषत ॥ ११

सुगृहे स्त्रियो भार्या ॥ ९ ॥ स्त्रिय दुर्हितर ॥ १० ॥ कुप्यं वस्त्रपात्रादि ॥ १४ ॥ चतुर्दशीश्राद्धं निन्दन्त्यवश्यमिति ॥ १६ ॥ दशम्यादौ तिथिषट्के ॥ १८ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्ताशीतितमोऽध्याय ॥ ८७ ॥

८८

किंस्विदिति ॥ १ ॥ पृषतश्चित्रमृगस्तदीय पार्षत रुरु कृष्णमृगस्तदीय रौरवम् ॥ ७ ॥ वार्ध्रीणस वर्ष्या स्यूतनासिको महोक्ष पक्षिविशेषोऽजाविशेषश्चेत्यन्ये ॥ ९ ॥ पितृक्षये मृततिथौ कालशाकं **चुका** इति भाषया प्रसिद्धं तत्सदृशमेव तदन्यदित्यन्ये लौहं काञ्चनवृक्षज पुष्पादिशाक छागोऽपि आनन्त्य तत्फलमिति शेष ॥ १० ॥

अपि नः स्वकुले जायाद्यो नो दद्यात्त्रयोदशीम्
मघासु सर्पिःसंयुक्तं पायसं दक्षिणायने ॥१२
आजेन वाऽपि लौहेन मघास्वेव यतव्रतः ।
हस्तिच्छायासु विधिवत् कर्णव्यजनवीजितम्
एष्टव्या बहवः पुत्रा यद्येकोऽपि गयां व्रजेत्
यत्रासौ प्रथितो लोकेष्वक्षय्यकरणो वटः १४
आपो मूलं फलं मांसमन्नं वापि पितृक्षये ।
यत्किंचिन्मधुसंमिश्रं तदानन्त्याय कल्पते ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि
श्राद्धकल्पेऽष्टाशीतितमोऽध्यायः ॥ ८८ ॥

८९

भीष्म उवाच ।
यमस्तु यानि श्राद्धानि प्रोवाच शशबिन्दवे
तानि मे शृणु काम्यानि नक्षत्रेषु पृथक् पृथक्
श्राद्धं यः कृत्तिकायोगे कुर्वीत सततं नरः ।
अग्नीनाधाय सापत्यो यजेत विगतज्वरः ॥ २
अपत्यकामो रोहिण्यां तेजस्कामो मृगोत्तमे
क्रूरकर्मा ददच्छ्राद्धमार्द्रायां मानवो भवेत् ३
धनकामो भवेन्मर्त्यः कुर्वञ्छ्राद्धं पुनर्वसौ ।
पुष्टिकामोऽथ पुष्येण श्राद्धमीहेत मानवः ॥ ४
आश्लेषायां ददच्छ्राद्धं धीरान्पुत्रान्प्रजायते ।
ज्ञातीनां तु भवेच्छ्रेष्ठो मघासु श्राद्धमावपन् ५
फल्गुनीषु ददच्छ्राद्धं सुभगः श्राद्धदो भवेत् ।
अपत्यभागुत्तरासु हस्तेन फलभाग्भवेत् ॥ ६
चित्रायां तु ददत् श्राद्धं लभेद्रूपवतः सुतान् ।
स्वातियोगे पितॄनर्च्य वाणिज्यमुपजीवति ७
बहुपुत्रो विशाखासु पुत्रमीहन्भवेन्नरः ।
अनुराधासु कुर्वाणो राजचक्रं प्रवर्तयेत् ॥ ८
आधिपत्यं व्रजेन्मर्त्यो ज्येष्ठायामपवर्जयन् ।
नरः कुरुकुलश्रेष्ठ ऋद्धो दमपुरःसरः ॥ ९
मूले त्वारोग्यमृच्छेत यशोऽऽषाढासु चोत्तमं
उत्तरासु त्वषाढासु वीतशोकश्चरेन्महीम् १०
श्राद्धं त्वभिजिता कुर्वन्भिषक्सिद्धिमवाप्नुयात्
श्रवणेषु ददच्छ्राद्धं प्रेत्य गच्छेत्स तद्गतिम् ११
राज्यभागी धनिष्ठायां भवेत नियतं नरः ।
नक्षत्रे वारुणे कुर्वन् भिषक्सिद्धिमवाप्नुयात्१२
पूर्वप्रोष्ठपदाः कुर्वन् बहून्विन्दत्यजाविकान् ।
उत्तरासु प्रकुर्वाणो विन्दते गाः सहस्रशः १३
बहुकुप्यकृतं वित्तं विन्दते रेवती श्रितः ।
अश्विनीष्वश्वान्विन्देत भरणीष्वायुरुत्तमम् ॥
इमं श्राद्धविधिं श्रुत्वा शशबिन्दुस्तथाकरोत्।
अक्लेशेनाजयच्चापि महीं सोऽनुशशास ह॥१५

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि श्राद्धकल्पे
एकोननवतितमोऽध्यायः ॥ ८९ ॥

वीजितं पायसादिक दद्यादिति पूर्वेणान्वय ॥ १३ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टाशीतितमोऽध्याय ॥ ८८ ॥

८९

यमस्त्विति ॥ १ ॥ फलभाक् इष्टार्थभाक् ॥ ६ ॥ वारुणे शतभिषजि ॥ १२ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकोननवतितमोऽध्याय ॥ ८९ ॥

९०

युधिष्ठिर उवाच ।
कीदृशेभ्यः प्रदातव्यं भवेत श्राद्धं पितामह
द्विजेभ्यः कुरुशार्दूल तन्मे व्याख्यातुमर्हसि १
भीष्म उवाच ।
ब्राह्मणान्न परीक्षेत क्षत्रियो दानधर्मवित ।
दैवे कर्मणि पित्र्ये तु न्यायमाहुः परीक्षणम् २
देवताः पूजयन्तीह दैवेनैवेह तेजसा ।
उपेत्य तस्माद्देवेभ्यः सर्वेभ्यो दापयेन्नरः ॥ ३
श्राद्धे त्वथ महाराज परीक्षेद्ब्राह्मणान्बुधः ।
कुलशीलवयोरूपैर्विद्ययाऽभिजनेन च ॥ ४
तेषामन्ये पंक्तिदूषास्तथाऽन्ये पंक्तिपावनाः ।
अपांक्तेयास्तु ये राजन्कीर्तयिष्यामि तान् शृणु
कितवो भ्रूणहा यक्ष्मी पशुपालो निराकृतिः ।
ग्रामप्रेष्यो वार्धुषिको गायनः सर्वविक्रयी ६
अगारदाही गरदः कुंडाशी सोमविक्रयी ।
सामुद्रिको राजभृत्यस्तैलिकः कूटकारकः ७
पित्रा विवदमानश्च यस्य चोपपतिर्गृहे ।
अभिशस्तस्तथा स्तेनः शिल्पं यश्चोपजीवति ८
पर्वकारश्च सूची च मित्रध्रुक् पारदारिकः ।
अव्रतानामुपाध्यायः कांडपृष्ठस्तथैव च ॥ ९
श्वभिश्च यः परिक्रामेद्यः शुना दष्ट एव च ।
परिवित्तिश्च यश्च स्याद्दुश्चर्मा गुरुतल्पगः ॥१०
कुशीलवो देवलको नक्षत्रैर्यश्च जीवति ।
ईदृशैर्ब्राह्मणैर्भुक्तमपाक्तेयैर्युधिष्ठिर ॥ ११
रक्षांसि गच्छते हव्यमित्याहुर्ब्रह्मवादिनः ।
श्राद्धं भुक्त्वा त्वधीयीत वृषलीतल्पगश्च यः
पुरीषे तस्य ते मासं पितरस्तस्य शेरते ।
सोमविक्रयिणे विष्ठा भिषजे पूयशोणितम् १३
नष्टं देवलके दत्तमप्रतिष्ठं च वार्धुषे ।
यत्तु वाणिजके दत्तं नेह नामुत्र तद्भवेत् ॥ १४
भस्मनीव हुतं हव्यं तथा पौनर्भवे द्विजे ।
ये तु धर्मव्यपेतेषु चारित्रापगतेषु च ।
हव्यं कव्यं प्रयच्छन्ति तेषां तत्प्रेत्य नश्यति ॥
ज्ञानपूर्वं तु ये तेभ्यः प्रयच्छन्त्यल्पबुद्धयः ।
पुरीषं भुञ्जते तस्य पितरः प्रेत्य निश्चयः ।
एतानिमान्विजानीयादपांक्तेयान्द्विजाधमान्
शूद्राणामुपदेशं च ये कुर्वन्त्यल्पचेतसः ॥ १७
पंक्त्यां समुपविष्टायां तावद्दृष्यते नृप ॥ १८
यद्वेष्टितशिरा भुंक्ते यद्भुंक्ते दक्षिणामुखः ।
सोपानत्कश्च यद्भुंक्ते सर्वं विद्यात्तदासुरम् १९
असूयता च यद्दत्तं यच्च श्रद्धाविवर्जितम् ।
सर्वं तदसुरेंद्राय ब्रह्मा भागमकल्पयत् ॥ २०
श्वानश्च पंक्तिदूषाश्च नावेक्षेरन्कथञ्चन ।
तस्मात्परिसृते दद्यात्तिलांश्चान्ववकीरयेत्२१
तिलैर्विरहितं श्राद्धं कृत क्रोधवशेन च ।
यातुधानाः पिशाचाश्च विप्रलुंपन्ति तद्धविः
अपांक्तो यावतः पांक्तान्भुञ्जानाननुपश्यति ।
तावत्फलाद्भ्रंशयति दातारं तस्य बालिशम्२३
इमे तु भरतश्रेष्ठ विज्ञेयाः पंक्तिपावनाः ।
ये त्वतस्तान्प्रवक्ष्यामि परीक्षस्वेह तान्द्विजान्
विद्यावेदव्रतस्नाता ब्राह्मणाः सर्व एव हि ।
सदाचारपराश्चैव विज्ञेयाः सर्वपावनाः ॥ २५
पांक्तेयांस्तु प्रवक्ष्यामि ज्ञेयास्ते पंक्तिपावनाः
त्रिणाचिकेतः पञ्चाग्निस्त्रिसुपर्णः षडंगवित् २६
ब्रह्मदेयानुसंतानश्छंदोगो ज्येष्ठसामगः ।
मातापित्रोर्यश्च वश्यः श्रोत्रियो दशपूरुषः २७

९०

कीदृशे इति ॥ १ ॥ **देवता इति** । अभाग्या देवतापूजनेषु श्रद्धां न कुर्वन्तीत्यर्थः । विप्रान् पूजयन्ति उपेत्य उपस्थाय देवेभ्यो देवान् उद्दिश्य सर्वेभ्यो विप्रेभ्य ॥ ३ ॥ पङ्क्तिदूषा· काणादय अपाङ्क्तेया दुष्कर्माण पंक्त्ययोग्या ॥ ५ ॥ निराकृति अध्ययनादिशून्य. वार्धुषिको वृद्धयर्थं धनप्रयोक्ता ॥ ६ ॥ कुण्डाशी भगभक्ष· तैलिकस्तत्कर्मकृत् ॥ ७ ॥ पर्वकार वेषान्तरधारी । पर्व क्लीब महाग्रन्थप्रस्तावे लक्षणान्तरे इति **मेदिनी** । सूची पिशुन अव्रताना शूद्राणा काण्डपृष्ठः शस्त्राजीवी ॥ ९ ॥ श्वभि परिक्रामेत् मृगया कुर्वन् ॥ १० ॥ कुशीलव कुशी फाल तेन कर्षणं लक्ष्यते कृषीवल । लवच्छेदेन तदुपजीवी काष्ठच्छेदनोपजीवी। 'कुशी फाले' इति **मेदिनी** ॥ ११ ॥ तस्यैव पुरीषे तस्य पितर शेरते न त्वन्यस्य पुरीषे ॥ १३ ॥ षष्टिं शतं पुरुषानिति शेष ॥ १८ ॥ असुरेन्द्राय बलये ॥ २० ॥ परिसृते आवृतदेशे ॥ २१ ॥ त्रिणाचिकेत त्रिणाचिकेताख्यमन्त्राध्येता । पञ्चगार्हपत्यादय आवसथ्यान्ता अग्नयो यस्य । त्रिसुपर्ण चतुष्कपर्दा युवति सुपेशा इति बह्वृचानां मन्त्रत्रयं वा ब्रह्मभेतुमामित्यादि तैत्तिरीयप्रसिद्धं वा षडङ्गानि शिक्षादीनि ॥ २६ ॥ **ब्रह्मदेय इति** । ब्रह्म वेद पर-

ऋतुकालाभिगामी च धर्मपत्नीषु यः सदा ।
वेदविद्याव्रतस्नातो विप्रः पंक्तिं पुनात्युत २८
अथर्वशिरसोऽध्येता ब्रह्मचारी यतव्रतः ।
सत्यवादी धर्मशीलः स्वकर्मनिरतश्च सः २९
ये च पुण्येषु तीर्थेषु अभिषेककृतश्रमाः ।
मखेषु च समन्त्रेषु भवन्त्यवभृथप्लुताः ॥ ३०
अक्रोधना ह्यचपलाः क्षांता दाता जितेंद्रियाः
सर्वभूतहिता ये च श्राद्धेष्वेतान्निमन्त्रयेत ३१
एतेषु दत्तमक्षय्यमेते वै पंक्तिपावनाः ।
इमे परे महाभागा विज्ञेयाः पंक्तिपावनाः ३२
यतयो मोक्षधर्मज्ञा योगाः सुचरितव्रताः ।
ये चेतिहासं प्रयताः श्रावयन्ति द्विजोत्तमान्
ये च भाष्यविदः केचिद्ये च व्याकरणे रताः।
अधीयते पुराणं ये धर्मशास्त्राण्यथापि च ।
अधीत्य च यथान्यायं विधिवत्तस्य कारिणः
उपपन्नो गुरुकुले सत्यवादी सहस्रशः ॥ ३५
अश्रथाः सर्वेषु वेदेषु सर्वप्रवचनेषु च ।
यावदेते प्रपश्यन्ति पङ्क्त्यास्तावत्पुनन्त्युत
ततो हि पावनात्पङ्क्त्याः पंक्तिपावन उच्यते
क्रोशादर्धतृतीयाच्च पावयेदेक एव हि ॥ ३७
ब्रह्मदेयानुसन्तान इति ब्रह्मविदो विदुः ।
अनृत्विगनुपाध्यायः स चेदग्रासनं व्रजेत ३८
ऋत्विग्भिरभ्यनुज्ञातः पङ्क्त्या हरति दुष्कृतं
अथ चेद्वेदवित्सर्वैः पङ्क्तिदोषैर्विवर्जितः ३९
न च स्यात्पतितो राजन्पङ्क्तिपावन एव सः
तस्मात्सर्वप्रयत्नेन परीक्ष्यामन्त्रयेद्विजान् ४०
स्वकर्मनिरतानन्यान्कुले जातान्बहुश्रुतान् ।
यस्य मित्रप्रधानानि श्राद्धानि च हवींषि च
न प्रणिन्ति पितॄन्देवान्स्वर्गं च न स गच्छति
यश्च श्राद्धे कुरुते सङ्गतानि
न देवयानेन पथा स याति ।
स वै मुक्तः पिप्पलं बन्धनाद्वा
स्वर्गाल्लोकाच्च्यवते श्राद्धमित्रः ॥ ४२
तस्मान्मित्रं श्राद्धकृन्नाद्रियेत
दद्यान्मित्रेभ्यः संग्रहार्थं धनानि ।
यन्मन्यते नैव शत्रुं न मित्रं
तं मध्यस्थं भोजयेद्धव्यकव्ये ॥ ४३
यथोषरे बीजमुप्तं न रोहे-
न्न चावप्ता प्राप्नुयाद्बीजभागम् ।
एवं श्राद्धं भुक्तमनर्हमाणै-
र्न चेह नामुत्र फलं ददाति ॥ ४४
ब्राह्मणो ह्यनधीयानस्तृणाग्निरिव शाम्यति ।
तस्मै श्राद्धं न दातव्यं न हि भस्मनि हूयते ॥
संभोजनी नाम पिशाचदक्षिणा
सा नैव देवान्न पितॄनुपैति ।
इहैव सा भ्राम्यति हीनपुण्या
शालान्तरे गौरिव नष्टवत्सा ॥ ४६
यथाऽग्नौ शान्ते घृतमाजुहोति
तन्नैव देवान्न पितॄनुपैति ।
तथा दत्तं नर्तने गायने च
या चानृते दक्षिणामावृणोति ॥ ४७
उभौ हिनास्ति न भुनक्ति चैषा
या चानृते दक्षिणा दीयते वै ।
आघातिनी गार्हतैषा पतन्ती
तेषां प्रेतान्पातयेद्देवयानात् ॥ ४८
ऋषीणां समये नित्यं ये चरन्ति युधिष्ठिर ।
निश्चिताः सर्वधर्मज्ञास्तान्देवा ब्राह्मणान्विदुः
स्वाध्यायनिष्ठा ऋषयो ज्ञाननिष्ठास्तथैव च ।
तपोनिष्ठाश्च बोद्धव्याः कर्मनिष्ठाश्च भारत ५०
कव्यानि ज्ञाननिष्ठेभ्यः प्रतिष्ठाप्यानि भारत ।
तत्र ये ब्राह्मणान्केचिन्न निन्दन्ति हि ते नराः

विद्या वा तदेव देयं येषा तेषामनुसंतान परंपरायामुत्पन्न स्वयं च ब्रह्मविदध्यापको वा ब्रह्मदेयानुसंतान ॥२७॥ अथ ऋत्विक्त्वादिगुणहीनोऽपि पङ्क्तिपावनएवेत्याह-**अनृत्विगिति** ३८ ऋत्विग्भिरभ्यनुज्ञात इति ऋत्विग्भिरभ्यनुज्ञेय एव स न त्वनृत्विक्त्वेनानुपाध्यायत्वेनोपेक्षणीय ।यत स पङ्क्त्या दुष्कृतं हरति। अननुज्ञात इति पाठेऽभिमानवशादननुज्ञातोऽपीति ज्ञेयम् ॥३९॥ मित्रमेव प्रधानं न योग्यत्वादिक येषु तानि । मित्रेष्वपि योग्यता चेत्तत्परित्यागे दोष एवेति भाव ॥४१॥ श्राद्धेन निमित्तेन सङ्गतानि सख्यानि पिप्पलं बन्धनाद्वा बन्धनादिव कर्मफलोपनिबधनभूतात् स्वर्गाच्च्यवते तत्र न गच्छतीत्यर्थ ४२ सभोजनी अन्योन्यं दीयमाना सा पिशाचदक्षिणा पिशाचदानतुल्या पिशाचा स्वस्य भोजकाय भोजयन्ति तद्वत् ॥ ४६ ॥ या च दक्षिणा अनृते अपात्रे आवृणोति प्रयच्छति आवृ इति सुपठम् ॥ ४७ ॥ न भुनक्ति न पालयति आघातिनी हन्त्री ॥ ४८ ॥

ये तु निन्दन्ति जल्पेषु न ताञ्छ्राद्धेषु भोजयेत्
ब्राह्मणा निन्दिता राजन्हन्युस्त्रीपुरुषं कुलम् ॥
वैखानसानां वचनमृषीणां श्रूयते नृप।
दूरादेव परीक्षेत ब्राह्मणान्वेदपारगान् ॥ ५३

प्रियो वा यदि वा द्वेष्यस्तेषां तु श्राद्धमावपेत्
यः सहस्रं सहस्राणां भोजयेदनृताञ्नरः।
एकस्तान्मन्त्रवित्प्रीतः सर्वानर्हति भारत ५४

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि श्राद्धकल्पे
नवतितमोऽध्यायः ॥ ९० ॥

९१

युधिष्ठिर उवाच ।
केन सङ्कल्पितं श्राद्धं कस्मिन्काले किमात्मकम्
भृग्वङ्गिरसिके काले मुनिना कतरेण वा १
कानि श्राद्धानि वर्ज्यानि कानि मूलफलानि च
धान्यजात्यश्च का वर्ज्यास्तन्मे ब्रूहि पितामह

भीष्म उवाच ।
यथा श्राद्धं सम्प्रवृत्तं यस्मिन्काले सदात्मकम्
येन सङ्कल्पितं चैव तन्मे शृणु जनाधिप ३
स्वायंभुवोऽत्रिः कौरव्य परमर्षिः प्रतापवान्।
तस्य वंशे महाराज दत्तात्रेय इति स्मृतः॥ ४
दत्तात्रेयस्य पुत्रोऽभून्निमिर्नाम तपोधनः।
निमेश्चाप्यभवत्पुत्रः श्रीमाञ्शाम श्रिया वृतः ५
पूर्णे वर्षसहस्रान्ते स कृत्वा दुष्करं तपः।
कालधर्मपरीतात्मा निधनं समुपागतः ॥ ६
निमिस्तु कृत्वा शौचानि विधिदृष्टेन कर्मणा
सतापमगमत्तीव्रं पुत्रशोकपरायणः ॥ ७
अथ कृत्वोपहार्याणि चतुर्दश्यां महामतिः।
तमेव गणयन्शोक विरात्रे प्रत्यबुध्यत ॥ ८
तस्यासीत्प्रतिबुद्धस्य शोकेन व्यथितात्मनः।
मनः संवृत्य विषये बुद्धिर्विस्तारगामिनी ॥ ९
ततः सञ्चिन्तयामास श्राद्धकल्पं समाहितः।
यानि तस्यैव भोज्यानि मूलानि च फलानि च
उक्तानि यानि चान्नानि यानि चेष्टानि तस्य ह
तानि सर्वाणि मनसा विनिश्चित्य तपोधनः॥
अमावास्या महाप्राज्ञो विप्रानानाय्य पूजितान्
दक्षिणावर्तिकाः सर्वा बृसीः स्वयमथाकरोत्
सप्तविप्रास्ततो भोज्ये युगपत्समुपानयत्।
ऋते च लवणं भोज्य श्यामाकान्नं ददौ प्रभुः
दक्षिणाग्रास्ततो दर्भा विष्टरेषु निवेशिताः।
पादयोश्चैव विप्राणा ये त्वन्नमुपभुञ्जते॥ १५
कृत्वा च दक्षिणाग्रान्वै दर्भान्स प्रयतः शुचिः
प्रददौ श्रीमतः पिण्डान्नामगोत्रमुदाहरन् १५
तत्कृत्वा स मुनिश्रेष्ठो धर्मसङ्करमात्मनः।
पश्चात्तापेन महता तप्यमानोऽन्वचिन्तयत् १६
अकृतं मुनिभिः पूर्वं किं मयेदमनुष्ठितम्।
कथं नु शापेन न मा दहेयुर्ब्राह्मणा इति॥ १७
ततः सञ्चिन्तयामास वंशकर्तारमात्मनः।
ध्यातमात्रस्तथा चात्रिराजगाम तपोधनः १८
अथात्रिस्तं तथा दृष्ट्वा पुत्रशोकेन कर्षितम्।
भृशमाश्वासयामास वाग्भिरिष्टाभिरव्ययः॥
निमे संकल्पितस्तेऽयं पितृयज्ञस्तपोधन।
मा तेभूद्धीः पूर्वदृष्टो धर्मोयं ब्रह्मणा स्वयम्
सोयं स्वयंभुविहितो धर्मः सकल्पितस्त्वया
ऋते स्वयंभुवः कोन्यः श्राद्धेयं विधिमाहरेत्

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे नवतितमोऽध्याय ॥ ९० ॥

९१

केनेति। भृग्वङ्गिरसके यदा भृगवोऽङ्गिरसश्च वर्तन्ते नान्ये ॥ १ ॥ श्राद्धानि श्राद्धेषु कानि कर्माणि वर्ज्यानि ॥ २ ॥ कृत्वा उपकल्प्य उपहार्याणि मृष्टान्नकाशिपूपबर्हणादीनि विरात्रे प्रभाते ॥ ८ ॥ विषये अत्यन्तबन्धके शोके विषये मन संहृत्य शोके त्यक्त्वेत्यर्थ ।तस्य बुद्धिर्विस्तारगामिनी आसीत् इति सम्बन्ध ॥ ९ ॥ दक्षिणावर्तिका प्रदक्षिणावर्तिता बृसी आसनानि ॥ १२ ॥ श्रौते पित्राद्युद्देशेन दृष्टो धर्मो लोके पुत्रोद्देशेनापि स्वेच्छया कल्पित इति सङ्कर ॥ १६ ॥

अथाख्यास्यामि ते पुत्र श्राद्धेयं विधिमुत्तमम्
स्वयंभुविहितं पुत्र तत्कुरुष्व निबोध मे ॥२२
कृत्वाऽग्नौकरणं पूर्वं मन्त्रपूर्वं तपोधन ।
ततोऽग्नयेऽथ सोमाय वरुणाय च नित्यशः ॥
विश्वेदेवाश्च ये नित्यं पितृभिः सह गोचराः
तेभ्यः संकल्पिता भागाः स्वयमेव स्वयंभुवा
स्तोतव्या चेह पृथिवी निवापस्येह धारिणी ।
वैष्णवी काश्यपी चेति तथैवेहाक्षयेति च २५
उदकानयने चैव स्तोतव्यो वरुणो विभुः ।
ततोऽग्निश्चैव सोमश्च आप्याय्याविह तेऽनघ
देवास्तु पितरो नाम निर्मिता ये स्वयंभुवा ।
उष्णपा ये महाभागास्तेषां भागः प्रकल्पितः
ते श्राद्धेनार्च्यमानावै विमुच्यन्ते ह किल्बिषात्
सप्तकः पितृवंशस्तु पूर्वदृष्टः स्वयंभुवा ॥ २८
विश्वे चाग्निमुखा देवाः संख्याताः पूर्वमेव ते
तेषां नामानि वक्ष्यामि भागार्हाणां महात्मनां
बलं धृतिर्विपाप्मा च पुण्यकृत्पावनस्तथा ।
पार्ष्णिक्षेमा समूहश्च दिव्यसानुस्तथैव च ॥
विवस्वान्वीर्यवान्ह्रीमान्कीर्तिमान्कृत एव च
जितात्मा मुनिवीर्यश्च दीप्तरोमा भयङ्करः ३१
अनुकर्मा प्रतीतश्च प्रदाताऽप्यंशुमांस्तथा ।
शैलाभः परमक्रोधी धीरोष्णी भूपतिस्तथा
स्रजो वज्री वरी चैव विश्वेदेवाः सनातनाः
विद्युद्वर्चाः सोमवर्चाः सूर्यश्रीश्चेति नामतः ३३
सोमपः सूर्यसावित्रो दक्षात्मा पुण्डरीयकः ।
उष्णीनाभो नभोदश्च विश्वायुर्दीप्तिरेव च ३४
चमूहरः सुरेशश्च व्योमारिः शंकरो भवः ।
ईशः कर्ता कृतिर्दक्षो भुवनो दिव्यकर्मकृत ३५
गणितः पञ्चवर्यश्च आदित्यो रश्मिवांस्तथा ।
सप्तकृत्सोमवर्चाश्च विश्वकृत्कविरेव च ॥ ३६
अनुगोप्ता सुगोप्ता च नप्ता चेश्वर एव च ।
कीर्तितास्ते महाभागाः कालस्य गतिगोचराः
अश्राद्धेयानि धान्यानि कोद्रवाः पुलकास्तथा
हिंगुद्रव्येषु शाकेषु पलाण्डुं लशुनं तथा ॥ ३८
सौभाञ्जनः कोविदारस्तथा गृञ्जनकादयः ।
कूष्माण्डजात्यलाबुं च कृष्णं लवणमेव च
ग्राम्यवाराहमांसं च यच्चैवाप्रोक्षितं भवेत् ।
कृष्णाजाजी विडश्चैव शीतपाकी तथैव च ।
अङ्कुराद्यास्तथा वर्ज्या इह शृंगाटकानि च
वर्जयेल्लवणं सर्वं तथा जम्बूफलानि च ।
अवक्षुतावरुदितं तथा श्राद्धे च वर्जयेत् ॥ ४१
निवापे हव्यकव्ये वा गर्हितं च सुदर्शनम् ।
पितरश्च हि देवाश्च नाभिनन्दन्ति तद्विदः ॥
चाण्डालश्वपचौ वर्ज्यौ निवापे समुपस्थिते ।
काषायवासाः कुष्ठी वा पतितो ब्रह्महाऽपि वा
संकीर्णयोनिर्विप्रश्च सम्बन्धी पतितश्च यः ।
वर्जनीया बुधैरेते निवापे समुपस्थिते ॥ ४४
इत्येवमुक्त्वा भगवान्स्वयंदृश्यं तमृषिं पुरा ।
पितामहसभां दिव्यां जगामात्रिस्तपोधनः ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि श्राद्धकल्पे
एकनवतितमोऽध्यायः ॥ ९१ ॥



ते प्रसिद्धा पित्रादय विमुच्यन्ते किल्बिषात् नरकादिरूपात् ॥ २८ ॥ पुलकाः असंपूर्णतण्डुलयुक्तधान्यानि हिङ्गुद्रव्येषु शाकादिसंस्कारद्रव्येषु पलाण्डु लशुन च शाकेषु ॥ ३८ ॥ सौभाजनादन्विर्जयति सौभाजन शिग्रु· **गृंजनं** विषदिग्धशस्त्रहतपशुमासम् ' अथ गृजनं विषदिग्धपशोर्मासे ' इति **मेदिनी** । कृष्ण लवण गन्धविडम् ॥ ३९ ॥ **कृष्णाजाजी** कृष्णजीरक **विड** विड्लवणं **शीतपाकी** शाकविशेष **अङ्कुराद्या** वंशकरीरादय· **शृङ्गाटकं शिंघाडा** इति प्रसिद्धम् ॥४० ॥ **सुदर्शनं** शाकविशेष ॥ ४२ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकनवतितमोऽध्यायः ॥९१॥

९२

भीष्म उवाच ।

तथा निमौ प्रवृत्ते तु सर्व एव महर्षयः ।
पितृयज्ञं तु कुर्वन्ति विधिदृष्टेन कर्मणा ॥ १
ऋषयो धर्मनित्यास्तु कृत्वा निवपनान्युत ।
तर्पणं चाप्यकुर्वन्त तीर्थाभोभिर्यतव्रताः ॥ २
निवापैर्दीयमानैश्च चातुर्षण्येन भारत ।
तर्पिताः पितरो देवास्तत्रान्नं जरयन्ति वै ॥३
अजीर्णैस्त्वभिहन्यन्ते ते देवाः पितृभिः सह
सोममेवाभ्यपद्यन्त तदा ह्यन्नाभिपीडिताः ४
तेऽब्रुवन्सोममासाद्य पितरोऽजीर्णपीडिताः ।
निवापान्नेन पीड्यामः श्रेयो नोऽत्र विधीयता
तान्सोमः प्रत्युवाचाथ श्रेयश्चेदीप्सितं सुराः ।
स्वयंभूसदन यात स वः श्रेयोभिधास्यति ६
ते सोमवचनाद्देवाः पितृभिः सह भारत ।
मेरुशृंगे समासीनं पितामहमुपागमन् ॥ ७

पितर ऊचुः ।

निवापान्नेन भगवन्भृशं पीड्यामहे वयम् ।
प्रसादं कुरु नो देव श्रेयो नः संविधीयताम् ८
इति तेषां वचः श्रुत्वा स्वयंभूरिदमब्रवीत् ।
एष मे पार्श्वतो वह्निर्युष्मच्छ्रेयोभिधास्यति

अग्निरुवाच ।

सहितास्तात भोक्ष्यामो निवापे समुपस्थिते
जरयिष्यथ चाप्यन्नं मया सार्धं न संशयः ॥
एतच्छ्रुत्वा तु पितरस्ततस्ते विज्वरा भवन् ।
एतस्मात्कारणाच्चाग्नेः प्राक्तावद्दीयते नृप ११
निवप्ते चाग्निपूर्वं वै निवापे पुरुषर्षभ ।
न ब्रह्मराक्षसास्तं वै निवाप धर्षयन्त्युत १२
रक्षांसि चापवर्तन्ते स्थिते देवे हुताशने ।
पूर्वं पिण्डं पितुर्दद्यात्ततो दद्यात्पितामहे १३
प्रपितामहाय च तत एष श्राद्धविधिः स्मृतः ।
ब्रूयात् श्राद्धे च सावित्रीं पिंडे पिंडे समाहितः
सोमायेति च वक्तव्यं तथा पितृमतेति च ।
रजस्वला च या नारी व्यङ्गिता कर्णयोश्च या
निवापे नोपतिष्ठेत संग्राह्या नान्यवशजा १५
जलं प्रतरमाणश्च कीर्तयेत पितामहान् ।
नदीमासाद्य कुर्वीत पितॄणां पिण्डतर्पणम् १६
पूर्वं स्ववशजानां तु कृत्वाऽद्भिस्तर्पणं पुनः ।
सुहृत्सम्बन्धिवर्गाणां ततो दद्याज्जलाञ्जलिम्
कलमाषगोयुगेनाथ युक्तेन तरतो जलम् ।
पितरोऽभिलषन्ते वै नावं चाप्यधिरोहिताः॥
सदा नावि जलं तज्ज्ञाःप्रयच्छन्ति समाहिताः
मासार्धे कृष्णपक्षस्य कुर्यान्निर्वपणानि वै १९
पुष्टिरायुस्तथा वीर्यं श्रीश्चैव पितृभक्तितः ।
पितामहः पुलस्त्यश्च वसिष्ठः पुलहस्तथा २०
अङ्गिराश्च क्रतुश्चैव कश्यपश्च महानृषिः ।
एते कुरुकुलश्रेष्ठ महायोगेश्वराः स्मृताः ॥ २१
एते च पितरो राजन्नेष श्राद्धविधिः परः ।
प्रेतास्तु पिण्डसम्बन्धान्मुच्यन्ते तेन कर्मणा
इत्येषा पुरुषश्रेष्ठ श्राद्धोत्पत्तिर्यथागमम् ।
व्याख्याता पूर्वनिर्दिष्टा दानं वक्ष्याम्यतः परम्

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि श्राद्धकल्पे द्विनवतितमोऽध्यायः ॥ ९२ ॥



९२

एवं श्राद्धोत्पत्तिमुक्त्वा तदङ्गभूतस्याग्नौ करणस्योत्पत्तिमाह—**तथेत्यादिना** ॥ १ ॥ निवप्ते दत्ते सम्प्रसारणाभाव आर्षः। औणादिकस्तन्प्रत्ययो वा ॥ १२ ॥ व्यङ्गिता त्रुटिता नोपतिष्ठेत तया निवापो न द्रष्टव्य इत्यर्थ । तथा अन्यवशजाऽपि पाकार्थं न संग्राह्या ॥ १५ ॥ **कलमा षेति** चित्रवर्ण बलीवर्दपुच्छमाश्रित्य नदी तरत सकाशात् तत्पुच्छेन तर्पणं पितरोऽभिलषन्ते युक्तेन शकटेन ॥ १८ ॥ मासार्धे अमावास्याया कृष्णपक्षस्येत्युक्तेर्नात्र शुक्लादिमासो विवक्षित ॥ १९ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्विनवतितमोऽध्याय ॥ ९२ ॥

९३

युधिष्ठिर उवाच ।
द्विजातयो व्रतोपेता हविस्ते यदि भुञ्जते ।
अन्नं ब्राह्मणकामाय कथमेतत्तिपतामह ॥ १
भीष्म उवाच ।
अवेदोक्तव्रताश्चैव भुञ्जानाः कामकारणे ।
वेदोक्तेषु तु भुञ्जाना व्रतलुप्ता युधिष्ठिर ॥ २
युधिष्ठिर उवाच ।
यदिदं तप इत्याहुरुपवासं पृथग्जनाः ।
तपः स्यादेतदेवेह तपोऽन्यद्वाऽपि किं भवेत्
भीष्म उवाच ।
मासार्धमासोपवासाद्यत्तपो मन्यते जनः ।
आत्मतन्त्रोपघाती यो न तपस्वी न धर्मवित् ४
त्यागस्य चापि संपत्तिः शिष्यते तप उत्तमम्
सदोपवासी च भवेद्ब्रह्मचारी तथैव च ॥ ५
मुनिश्च स्यात्सदा विप्रो वेदांश्चैव सदा जपेत्
कुटुम्बिको धर्मकामः सदाऽस्वप्नश्च मानवः ॥ ६
अमांसाशी सदा च स्यात्पवित्रं च सदा पठेत्
ऋतवादी सदा च स्याद्गुरुनियतश्च सदा भवेत्॥
विघसाशी कथं च स्यात्सदा चैवातिथिप्रियः
अमृताशी सदा च स्यात्पवित्री च सदा भवेत
युधिष्ठिर उवाच ।
कथं सदोपवासी स्याद्ब्रह्मचारी च पार्थिव ।
विघसाशी कथं च स्यात्कथं चैवातिथिप्रियः
भीष्म उवाच ।
अन्तरा सायमाशं च प्रातराशं च यो नरः।
सदोपवासी भवति यो न भुंक्तेन्तरा पुनः १०
भार्यां गच्छन् ब्रह्मचारी ऋतौ भवति चैव ह
ऋतवादी सदा च स्याद्दानशीलस्तु मानवः
अभक्षयन् वृथा मासममांसाशी भवत्युत ।
दानं ददत्पवित्री स्यादस्वप्नश्च दिवाऽस्वपन् ॥
भृत्यातिथिषु यो भुङ्क्ते भुक्तवत्सु नरः सदा
अमृतं केवलं भुङ्क्ते इति विद्धि युधिष्ठिर १३
अभुक्तवत्सु नाश्नाति ब्राह्मणेषु तु यो नरः ।
अभोजनेन तेनास्य जितः स्वर्गो भवत्युत १४
देवेभ्यश्च पितृभ्यश्च संश्रितेभ्यस्तथैव च ।
अवशिष्टानि यो भुङ्क्ते तमाहुर्विघसाशिनम्॥
तेषां लोका ह्यपर्यन्ताः सदने ब्रह्मणः स्मृताः
उपस्थिता ह्यप्सरसो गन्धर्वैश्च जनाधिप ॥ १६
देवतातिथिभिः सार्धं पितृभ्यश्चोपभुञ्जते ।
रमन्ते पुत्रपौत्रेण तेषां गतिरनुत्तमा ॥ १७
युधिष्ठिर उवाच ।
ब्राह्मणेभ्यः प्रयच्छन्ति दानानि विविधानि च
दातृप्रतिग्रहीत्रोर्वै को विशेषः पितामह ॥ १८
भीष्म उवाच ।
साधोर्यः प्रतिगृह्णीयात्तथैवासाधुतो द्विजः ।
गुणवत्यल्पदोषः स्यान्निर्गुणे तु निमज्जति १९
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
वृषादर्भेश्च संवादं सप्तर्षीणां च भारत ॥ २०
कश्यपोऽत्रिर्वसिष्ठश्च भरद्वाजोऽथ गौतमः ।
विश्वामित्रो जमदग्निः साध्वी चैवाप्यरुन्धती
सर्वेषामथ तेषां तु गण्डाऽभूत्कर्मकारिका ।
शूद्रः पशुसखश्चैव भर्ता चास्या बभूव ह २२
ते च सर्वे तपस्यन्तः पुरा चेरुर्महीमिमाम् ।
समाधिनोपशिक्षन्तो ब्रह्मलोकं सनातनम् ॥
अथाभवदनावृष्टिर्महती कुरुनन्दन ।
कृच्छ्रप्राणोऽभवद्यत्र लोकोऽयं वै क्षुधान्वितः
कस्मिंश्चिच्च पुरा यज्ञे शैब्येन शिबिसूनुना ।
दक्षिणार्थेऽथ ऋत्विग्भ्यो दत्तः पुत्रः पुरा किल
अस्मिन्काले ऽथ सोऽपायुर्दंष्टान्तमगमत्प्रभुः
ते तं क्षुधाभिसन्तप्ताः परिवार्योपतस्थिरे २६

९३

द्विजातय इति। दशाहादौ व्रतोपेता ब्राह्मणा ब्राह्मणकामाय यजमानस्यार्थं यदि भुञ्जते तत्कथम् स्वस्य व्रतलोपो वा गरीयान् उत ब्राह्मणस्य कामभङ्गो वेति प्रश्नार्थ ॥१॥ वेदोक्तं यागाङ्गभूतं व्रतं तेन रहिता कामकारणे इच्छया हेतुना भुञ्जाना भोजनं कुर्वन्तु नाम । ये तु व्रतोपेता भुञ्जते ते लुप्तव्रता भवन्ति । तेषा व्रतलोपप्रायश्चित व्रातपतीष्टिरूपं कर्तव्यं भवति । इतरस्यालाभे व्रतवन्तोऽपि भुक्त्वा प्रायश्चित्त कुर्वारन्न तु श्राद्धं लुंपेरन्निति भाव ॥ २ ॥ तपस्विन पात्रत्वमुक्त तत्र तपसो रूप पृच्छति—**यदिदमिति** ॥ ३ ॥ आत्मतन्त्र शरीररूप कुटुंबरूप वा तदुपघाती ॥४॥ **त्यागस्येति**। दान वेदजपश्च परम तप इति श्लोकद्वयार्थ. ॥ ५ ॥ अस्वप्न स्वधर्मे जागरूक ॥६॥ यथोक्तभोजनद्वयव्यतिरेकेण मध्ये यो न भुङ्क्ते स सदोपवासीत्यर्थ— **अन्तरेति** ॥ १० ॥ वृथा यज्ञादिनिमित्त विना ॥ १२ ॥ गुणवति दातरि प्रतिग्रहीतुरल्पो दोष ॥ १९ ॥ गण्डेति नामत ॥२२॥ उपशिक्षन्त अर्जयन्त. २३ दिष्टान्तं मरणम् ॥ २६ ॥

याज्यात्मजमथो दृष्ट्वा गतासुमृषिसत्तमाः ।
अपचन्त तदा स्थाल्यां क्षुधार्ताः किल भारत
निरग्ने मर्त्यलोकेऽस्मिन्नात्मानं ते परीप्सवः
कृच्छ्रामापेदिरे वृत्तिमन्नहेतोस्तपस्विनः ॥ २८
अटमानोऽथ तान्मार्गे पच्यमानान्महीपतिः ।
राजा शैब्यो वृषादर्भिः क्लिश्यमानान्ददर्श ह

वृषादर्भिरुवाच ।

प्रतिग्रहस्तारयति पुष्टिर्धैं प्रतिगृह्यताम् ।
मयि यद्विद्यते वित्तं तद्गृणुध्वं तपोधनाः ॥ ३०
प्रियो हि मे ब्राह्मणो याच्यमानो
दद्यामहं वोऽश्वतरीसहस्रम् ।
एकैकशः सवृषाः संप्रसूताः
सर्वेषां वै शीघ्रगाः श्वेतरोमाः ॥ ३१
कुलंभराननडुहः शतं शतान्
धुर्यान् श्वेतान् सर्वशोऽहं ददामि ।
षष्ठौहीनां पीवराणां च ताव-
दृश्या गृष्टयो धेनवः सुव्रताश्च ॥ ३२
वरान् ग्रामान् व्रीहिरसं यवांश्च
रत्नं चान्यद्दुर्लभं किं ददानि ।
नास्मिन्नभक्ष्ये भावमेवं कुरुध्वं
पुष्ट्यर्थं वः किं प्रयच्छाम्यहं वै ॥ ३३

ऋषय ऊचुः ।

राजन्प्रतिग्रहो राज्ञां मध्वास्वादो विषोपमः
तज्जानमानः कस्मात्त्वं कुरुषे नः प्रलोभनम्
क्षेत्रं हि दैवतमिदं ब्राह्मणान् समुपाश्रितम् ।
अमलो ह्येष तपसा प्रीतः प्रीणाति देवताः ३५
अंहापाहि तपो जातु ब्राह्मणस्योपजायते ।
तद्दाव इव निर्दह्यात्प्राप्तो राजप्रतिग्रहः ॥ ३६
कुशलं सह दानेन राजन्नस्तु सदा तव ।
अर्थिभ्यो दीयतां सर्वमित्युक्त्वाऽन्येन ते ययुः
अपक्वमेव तन्मांसमभूत्तेषां महात्मनाम् ।
अथ हित्वा ययुः सर्वे वनमाहारकांक्षिणः ३८
ततः प्रचोदिता राज्ञा वन गत्वाऽस्य मन्त्रिणः
प्रचीयोदुम्बराणि स्म दातुं तेषां प्रचक्रिरे ३९
उदुम्बराण्यथान्यानि हेमगर्भाण्युपाहरन् ।
भृत्यास्तेषां ततस्तानि प्रग्राहितुमुपाद्रवन् ४०
गुरूणीति विदित्वाथ न ग्राह्याण्यत्रिरब्रवीत् ।
न स्महे मन्दविज्ञाना न स्महे मन्दबुद्धयः ४१
हैमानीमानि जानीमः प्रतिबुद्धाः स्म जागृम
इह ह्येतदुपादत्तं प्रेत्य स्यात्कटुकोदयम् ।
अप्रतिग्राह्यमेवैतत्प्रेत्येह च सुखेप्सुना ॥ ४२

वसिष्ठ उवाच ।

शतेन निष्कगणितं सहस्रेण च संमितम् ।
तथा बहु प्रतीच्छन्वै पापिष्ठां पतते गतिम् ४३

कश्यप उवाच ।

यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
सर्वे तन्नालमेकस्य तस्माद्विद्वाञ्छमं चरेत् ॥

भरद्वाज उवाच ।

उत्पन्नस्य रुरोः शृङ्गं वर्धमानस्य वर्धते ।
प्रार्थना पुरुषस्येव तस्य मात्रा न विद्यते ४५

गौतम उवाच ।

न तल्लोके द्रव्यमस्ति यल्लोकं प्रतिपूरयेत् ।
समुद्रकल्पः पुरुषो न कदाचन पूर्यते ॥ ४६

विश्वामित्र उवाच ।

कामं कामयमानस्य यदा कामः समृध्यते ।
अथैनमपरः कामस्तृष्णा विध्यति बाणवत् ॥

जमदग्निरुवाच ।

प्रतिग्रहे संयमो वै तपो धारयते ध्रुवम् ।
तद्धनं ब्राह्मणस्येह लुभ्यमानस्य विस्रवेत् ४८

अरुन्धत्युवाच ।

धर्मार्थं सञ्चयो यो वै द्रव्याणां पक्षसंमतः ।
तपः सञ्चय एवेह विशिष्टो द्रव्यसञ्चयात् ४९

गण्डोवाच ।

उग्रादितो भयाद्यस्माद्बिभ्यतीमे ममेश्वराः ।
बलीयांसो दुर्बलवद्बिभेभ्यहमतः परम् ॥ ५०

पशुसख उवाच ।

यद्वै धर्मे परं नास्ति ब्राह्मणास्तद्धनं विदुः ।
विनयार्थं सुविद्वांसमुपासेयं यथातथम् ॥ ५१

आत्मानं शरीरं परीप्सव रक्षितुकामा ॥ २८ ॥ पुष्टि पुष्टिहेतु ॥ ३१ ॥ ब्राह्मणान् क्षेत्रं ब्राह्मणस्वरूपस्थान देवतासमूह । 'यावतीर्वै देवतास्ता सर्वा वेदविदि ब्राह्मणे वसन्ति' इति श्रुत्यर्थ उक्त ॥ ३५ ॥ अन्येन पथा ॥३७॥ न स्महे न स्म अस्तेरार्षस्तङ् ॥४१॥ प्रतीच्छन् प्रतिगृह्णन् ॥४३॥ तस्य लाभसुखस्य मात्रा इयत्ता ॥४५॥ कामस्तृष्णा-रूप ॥४७॥ तद्धनं तपोधनम् ॥ ४८ ॥ पक्षसमत पाक्षिकत्वेन मत ॥ ४९ ॥ यदिति । यत् यतो हेतो वैधर्मेः विधर्म एव वैधर्म तस्मिँल्लोभादिदोषे सति परं उत्कृष्ट पदं नास्ति न लभ्यतेऽतस्तदलोभाख्यमेव धनं ब्राह्मणा विदु । विनय शिक्षा तदर्थं शिक्षितुमिति यावत् ॥५१॥

ऋषय ऊचुः ।
कुशलं सह दानेन तस्मै यस्य प्रजा इमाः ।
फलान्युपधियुक्तानि य एवं नः प्रयच्छति ५२
भीष्म उवाच ।
इत्युक्त्वा हेमगर्भाणि हित्वा तानि फलानि वै
ऋषयो जग्मुरन्यत्र सर्व एव धृतव्रताः ॥ ५३
मन्त्रिण ऊचुः ।
उपधिं शंकमानास्ते हित्वा तानि फलानि वै
ततोऽन्येनैव गच्छन्ति विदितं तेऽस्तु पार्थिव
इत्युक्तः स तु भृत्यैस्तैर्वृषादर्भिश्चुकोप ह ।
तेषां वै प्रतिकर्तुं च सर्वेषामगमद्गृहम् ॥ ५५
स गत्वा हवनीयेऽग्नौ तीव्रं नियममास्थितः ।
जुहाव संस्कृतैर्मन्त्रैरेकैकामाहुतिं नृपः ॥ ५६
तस्मादग्नेः समुत्तस्थौ कृत्या लोकभयंकरी ।
तस्या नाम वृषादर्भिर्यातुधानीत्यथाकरोत् ॥
सा कृत्या कालरात्रीव कृताञ्जलिरुपस्थिता ।
वृषादर्भिं नरपतिं किं करोमीति चाब्रवीत् ॥
वृषादर्भिरुवाच ।
ऋषीणां गच्छ सप्तानामरुन्धत्यास्तथैव च
दासीभर्तुश्च दास्याश्च मनसा नाम धारय ॥
ज्ञात्वा नामानि चैवैषां सर्वानेतान्विनाशय
विनष्टेषु तथा स्वैरं गच्छ यत्रेप्सितं तव ॥ ६०
सा तथेति प्रतिश्रुत्य यातुधानी स्वरूपिणी ।
जगाम तद्वनं यत्र विचेरुस्ते महर्षयः ॥ ६१
भीष्म उवाच ।
अथात्रिप्रमुखा राजन् वने तस्मिन्महर्षयः ।
व्यचरन् भक्षयन्तो वै मूलानि च फलानि च
अथापश्यन्सुपीनांसपाणिपादमुखोदरम् ।
परिव्रजन्तं स्थूलाङ्गं परिव्राजं शुना सह॥६३
अरुन्धती तु तं दृष्ट्वा सर्वाङ्गोपचितं शुभम् ।
भवितारो भवन्तो वै नैवमित्यब्रवीदृषीन् ॥

वसिष्ठ उवाच ।
नैतस्येह यथाऽस्माकमग्निहोत्रमनिर्हुतम् ।
सायंप्रातश्च होतव्यं तेन पीवाञ्छुना सह ६५
अत्रिरुवाच ।
नैतस्येह यथाऽस्माकं क्षुधा वर्यि समाहतम्
कृच्छ्राधीतं प्रनष्टं च तेन पीवाञ्छुना सह ६६
विश्वामित्र उवाच ।
नैतस्येह यथाऽस्माकं शश्वच्छास्त्रं जरद्गवः
अलसः क्षुत्परो मूर्खस्तेन पीवाञ्छुना सह ॥
जमदग्निरुवाच ।
नैतस्येह यथाऽस्माकं भक्तमिन्धनमेव च
साङ्गिन्त्यं वार्षिकं चित्ते तेन पीवाञ्छुना सह
कश्यप उवाच ।
नैतस्येह यथाऽस्माकं चत्वारश्च सहोदराः
देहि देहीति भिक्षन्ति तेन पीवाञ्छुना सह ॥
भरद्वाज उवाच ।
नैतस्येह यथाऽस्माकं ब्रह्मबन्धोरचेतसः ।
शोको भार्यापवादेन तेन पीवाञ्छुना सह ॥
गौतम उवाच ।
नैतस्येह यथाऽस्माकं त्रिकौशेयं च राङ्कवम्
एकैकं वै त्रिवर्षीयं तेन पीवाञ्छुना सह ७१
भीष्म उवाच ।
अथ दृष्ट्वा परिव्राट् स तान्महर्षीन् शुना सह
अभिगम्य यथान्यायं पाणिस्पर्शमथाचरत ७२
परिचर्यां वने तां तु क्षुत्प्रतीघातकारिकाम् ।
अन्योन्येन निवेद्याथ प्रातिष्ठन्त सहैव ते ॥७३
एकनिश्चयकार्याश्च व्यचरन्त वनानि ते ।
आददानाः समुद्धृत्य मूलानि च फलानि च
कदाचिद्विचरन्तस्ते वृक्षैरविरलैर्वृताम् ।
शुचिवारिप्रसन्नोदां ददृशुः पद्मिनीं शुभाम् ॥

उपधिश्छलम् ॥ ५२ ॥ नामार्थमेव धारय ॥ ५९ ॥ ज्ञात्वा नामानुरूपं तेषां सामर्थ्यं परीक्ष्य तान् विनाशय । अन्यथा त्वामेव ते विनाशयिष्यन्तीति भावः ॥ ६० ॥ कार्यस्य कारणं नित्यकर्मलोप इति वसिष्ठस्य भावः ॥ ६५ ॥ क्षुद्दुःखं अधीतनाशनं चेत्यत्रेः ॥ ६६ ॥ शास्त्रप्रतिपादितो जरन् क्षीयमाणो धर्म इति विश्वामित्रस्य ॥६७॥ अन्नादिचिन्तेति जमदग्नेः ॥ ६८ ॥ बहुकुटुम्बितेति कश्यपस्य ॥ ६९ ॥ भार्यापवादः कृत्तिकास्वभिशापादिति भरद्वाजस्य ॥ ७० ॥ हीनवस्त्रत्वं गौतमस्य च मतं त्रिकौशेयं कुशा रज्जु तया निर्वृत्तं कौशेयं पाटितसंधानं त्रीणि कौशेयानि यस्मिन् 'कुशी फाले कुशारज्जु' (शान्तवर्गे ४) इति मेदिनी राकवं रंकोमृगविशेषस्य चर्म तदपि त्रिवर्षीयं अतिजीर्णम् ॥ ७१ ॥ परिचर्यां करिष्यामि कुर्वित्यन्योन्यमुक्त्वेत्यर्थः ॥ ७३ ॥ एकरूप एव निश्चय कार्यं च येषां ते ॥ ७४ ॥

बालादित्यवपुःप्रख्यैः पुष्करैरुपशोभिताम् ।
वैदूर्यवर्णसदृशैः पद्मपत्रैरथावृताम् ॥ ७६
नानाविधैश्च विहगैर्जलप्रकरसेविभिः ।
एकद्वारामनादेयां सूपतीर्थामकर्दमाम् ॥ ७७
वृषादर्भिप्रयुक्ता तु कृत्या विकृतदर्शना ।
यातुधानीति विख्याता पद्मिनीं तामरक्षत ॥
पशुसखसहायास्तु बिसार्थं ते महर्षयः ।
पद्मिनीमभिजग्मुस्ते सर्वे कृत्याभिरक्षिताम् ॥
ततस्ते यातुधानी तां दृष्ट्वा विकृतदर्शनाम् ।
स्थितां कमलिनीतीरे कृत्यामूचुर्महर्षयः ॥ ८०
एका तिष्ठसि का च त्वं कस्यार्थे किं प्रयोजनम्
पद्मिनीतीरमाश्रित्य ब्रूहि त्वं किं चिकीर्षसि

यातुधान्युवाच ।

याऽस्मि साऽस्म्यनुयोगो मे न कर्तव्यः कथञ्चन
आरक्षिणी मा पद्मिन्या वित्त सर्वे तपोधनाः

ऋषय ऊचुः ।

सर्व एव क्षुधार्ताः स्म न चान्यत्किंचिदस्ति नः
भवत्याः संमते सर्वे गृह्णीयाम बिसान्युत ८३

यातुधान्युवाच ।

समयेन बिसानीतो गृह्णीध्वं कामकारतः ।
एकैको नाम मे प्रोक्त्वा ततो गृह्णीत माचिरम्

भीष्म उवाच ।

विज्ञाय यातुधानीं तां कृत्यामृषिवधैषिणीम्
अत्रिः क्षुधापरीतात्मा ततो वचनमब्रवीत् ८५

अत्रिरुवाच ।

अरात्रिरत्रिः सा रात्रिर्यो नार्धीते त्रिरह्न वै
अरात्रिरत्रिरित्येव नाम मे विद्धि शोभने ८६

यातुधान्युवाच ।

यथोदाहृतमेतत्ते मयि नाम महाद्युते ।
दुर्धार्यमेतन्मनसा गच्छावतर पद्मिनीम् ८७

वसिष्ठ उवाच ।

वसिष्ठोऽस्मि वरिष्ठोऽस्मि वसे वासगृहेष्वपि
वसिष्ठत्वाच्च वासाच्च वसिष्ठ इति विद्धि माम्

यातुधान्युवाच ।

नामनैरुक्तमेतत्ते दुःखव्याभाषिताक्षरम् ।
नैतद्धारयितुं शक्यं गच्छावतर पद्मिनीम् ८९

उपतीर्थमवतरणमार्ग ॥७७॥ नामार्थद्वारा सामर्थ्यं ज्ञात्वा अस्माक वधैषिणीयमिति विज्ञायेत्यर्थ ॥ ८५ ॥ **अरात्रिरिति**। यदिदं सर्वं पाप्मनोऽत्रायत तदिद किंच तत्तस्मादत्रय इति श्रुतौ पाप्मनस्त्रातात्रिरित्यत्रिशब्दस्य निर्वचन तदेव शब्दान्तरेण प्रदर्शयति यातुधानीं विमोहयिष्यन्। अरात्रि अरय कामादय सन्त्यस्मिन्नित्यरं पाप तस्मात्रायत इत्यरात्रि । अरशब्दादलुप्तपचमीकात् परस्य त्रायतेरुपरि क्विप्प्रत्यय । अरिशब्दान्मत्वर्थीयेऽर्श आद्यचि यस्येतीकारलोपे अरमिति सिध्यति यस्मादरात्रिस्तस्मादत्रि । अत्तीत्यद् मृत्युस्तस्मात्रायत इत्यत्रिरित्यत्रापि अवयवार्थेन पाप्मानं मृत्युमन्ववायानित्यादौ मृत्युशब्दस्य पाप्मनि प्रयोगदर्शनात्। धर्मेण पापमपनुदतीति धर्मोऽप्यत्रि स्यादत आह सा रात्रिर्यो नार्धीते त्रिरह्न वा इति वै निश्चत अह्न वर्तमानकाले या त्रि त्रिवारं नाधीते नाधिगच्छति। अतीतस्य हि पुत्रादेरनुत्पत्तौ अनागतत्वेन उत्पत्तौ वर्तमानत्वेन नाशे अतीतत्वेन नान्वेति त्रिरधिगमोऽस्ति तत्र नास्ति सर्वं वर्तमानमेव भवति यत्रावस्थाया सा हार्दाकाशाख्यजगत्कारणप्राप्ति सर्वपाप्मोच्छेदिका साऽरात्रिरुच्यते। अत्र हि अतीतानागत सर्वमस्तीति श्रूयते यच्चास्येहास्ति यच्च नास्ति सर्वं तदत्र गत्वा विन्दत इति अत्र हि सर्वे कामा समाहिता इति च यस्मादेवमरात्रिरस्मि तस्मादत्रिरेव मम नाम । मन्त्रोऽपि—

य वै सूर्यं स्वर्भानुस्तमसाऽविध्यदासुर ॥
अत्र यस्तमन्वविंदन्न ह्य १ न्ये अशक्नुवन् ॥

इति। 'सूर्य आत्मा जगतस्तस्थुषश्च' इति श्रुते । सूर्यपरं ब्रह्म स्वर्भानु राहुरूपो मृत्यु अविध्यत् व्याप्तवान् तमसा अनात्मनि आत्मबुद्धिरूपया अविद्ययेति मन्त्रपदानामर्थ ॥८६॥ तदेतदत्रित्वं मैनमाऽपि दुर्धार्यमिति मत्वा यातुधान्याह—**यथेति**। ते त्वया मयि मत्समीपे अतीतानागतयोरपि वर्तमानकाले एव दर्शन कामाद्यनुदयश्चेति द्वयं अत्यन्तं तमःस्वभावया मया प्राप्तुमशक्यमिति भाव । त्वामहं धर्षितुमशक्तेति त्व गच्छ अवतर पद्मिनीं सरसीम् ॥ ८७ ॥ **वसिष्ठोस्मीति**। वासिष्ठ वायुश्च पृथिवीं च वायुश्चान्तरिक्षं च द्यौश्चादित्यश्चन्द्रमाश्च नक्षत्राणि चेति वसव एतेषु हीदं सर्वं वसु हितमिति हीद सर्वं वासयन्ते इति श्रुतिप्रसिद्धा वसवस्ते यस्य स्वाधीना भवन्ति स वसुमान्प्राप्ताणिमाद्यैश्वर्यो महायोगी अतिशयेन वसुमानिति वसिष्ठस्तादृशोऽहमस्मि अतिशयेन उरुरास्मि वसुमच्छब्दादिष्ठन्प्रत्यये परे मतुब्लोपे टिलोपे च वसिष्ठ उरुशब्दस्येष्ठनि वरादेशश्च प्रियस्थिरादिसूत्रेण ज्ञेय । सर्वं मद्वशेऽस्ति अहं तु न कस्यापि वशेऽस्मीति नामद्वयार्थ । वासगृहेषु वासयोग्येषु गृहस्थाश्रमेषु सर्वेषामुपजीव्येषु वसे वसामि अतोऽहं वस्तृणा मध्ये अतिश्रेष्ठ इति वसिष्ठोऽस्मि । वस्तृशब्दादिष्ठनि तृन्लोपे च वसिष्ठ. सर्वेषामाश्रयभूतत्वान्मम मा देवा रक्षन्तीति भाव ॥८८॥

कश्यप उवाच ।
कुलं कुलं च कुवमः कुवमः कश्यपो द्विजः ।
काश्यः काशनिकाशत्वादेतन्मे नाम धारय
यातुधान्युवाच ।
यथोदाहृतमेतत्ते मयि नाम महाद्युते ।
दुर्धार्यमेतन्मनसा गच्छावतर पक्षिणीम् ९१
भरद्वाज उवाच ।
भरेऽसुतान्भरेऽशिष्यान्भरे देवान्भरे द्विजान्
भरे भार्यां भरेद्वाजं भरद्वाजोऽस्मि शोभने ॥

यातुधान्युवाच ।
नामनैरुक्तमेतत्ते दुःखव्याभाषिताक्षरम् ।
नैतद्धारयितुं शक्यं गच्छावतर पक्षिणीम् ९३
गौतम उवाच ।
गोदमो दमतोऽधूमोऽदमस्ते समदर्शनात् ।
विद्धि मां गौतमं कृत्ये यातुधानि निबोध माम्
यातुधान्युवाच ।
यथोदाहृतमेतत्ते मयि नाम महामुने ।
नैतद्धारयितुं शक्यं गच्छावतर पक्षिणीम् ९५

कुलमिति । कशाश्वताडनरज्जुस्तामर्हन्ति ते कश्या अश्वा । अत्र च प्रकरणादिन्द्रियाणि हयानाहुरिति श्रुत्युक्तेरिन्द्रियाण्येवाश्वा कश्यास्तदाश्रयत्वाच्छरीराण्यपि कश्यानि कुलं कुलमिति वीप्सायां द्विर्वचनम् । सर्वशरीरेष्वहमेवैक कश्यपो नाम द्विजोऽस्मि । कश्यानि शरीराणि पाति रक्षति पिबति भुंक्ते पाययति शोषयति वा कश्यप इति योगात्सर्वाणि शरीराणि प्रविश्यान्तर्यामिरूपेण पालयामि जीवरूपेण तद्द्वारा सुखदुःखादिकं भुंजे ब्रह्मरूपेण तानि सर्वाणि स्वात्मनि प्रविलापयामीत्यर्थः । एवं सर्वमध्यात्मं मत्स्वरूपमित्युक्त्वाऽधिदैवमपि मत्स्वरूपमेवेत्याह— **कुवमः कुवम इति** । कु पृथिवी तस्यां वमति वर्षतीति कुवम आदित्यः । 'आदित्याज्जायते वृष्टिः' इति श्रुतेः । पूर्ववद्विवचनं सर्वोऽप्यादित्योऽहमेव मत्पुत्रत्वात्सर्वेषामादित्यानामित्यर्थः । पाठान्तरे कुपपी कु पातीति योगात्कुपपी सूर्य एव । यापो किद्वे चेति सूत्रेण पातेरीप्रत्यये प्रकृतेर्द्वित्वे प्रत्ययस्य कित्त्वे च पपीरिति रूपम् । कुपपिरिति ह्रस्वपाठे तु आदृगमहनजनेति किप्रत्यये लिङ्द्भावे च कुपपिरिति सूर्य एव । कुपप इत्यकारान्तपाठस्तु प्रामादिकः । यद्वा कुं पृथिवीं पातीति कुपं जलं पिबतीति कुपप सूर्य एवेति समाधेयम् । काश्यो दीप्तिमान् तत्र हेतुः काशनिकाशत्वात् बहुकालीनत्वेन काशपुष्पसदृशः सर्वतः पलितश्चिरन्तनस्तपसा दीप्तोऽस्मीत्यर्थः ॥९०॥ प्रजा वै वाजस्ता एष बिभर्ति यद्विभर्ति तस्माद्भरद्वाज इति श्रुत्यनुसारेण स्वनामाह— **भरे इति** । अशिष्यान् शासितुमयोग्यानपि राक्षसान् शत्रूंश्च वशे कृत्य करुणया पालयामि तथा असुतान् अपुत्रानुदासीनानपि दीनानदीनान्पालयामि । भार्यां भार्येति पुत्रभृत्यादेरुपलक्षणम् । ईदृग्विधोऽन्योऽपि वाजं वेगं शत्रूणां साहसं अन्नं वा भरेत्स पृथिवीवत्सर्वंसहोऽन्नप्रदश्च भवतीति तस्मादहमपि तथास्मीत्यर्थः । द्वाजमिति च्छेदे तु द्वाभ्यां जातं संकरजमित्यर्थः । ननु 'माता भस्त्रा पितुः पुत्रो येन जातः स एव सः' (म भा आदिप. अ ७४ श्लो १०). इति स्मृतेश्चर्मकोशतुल्या मातेत्यतः सर्वोऽप्येकज एवेति नास्ति कश्चिद्द्वाजः । न हि द्वाभ्यां रेतःसेकाभ्यामेको जायत इति संभवति । सत्यम् । आहवनीयादीनामपि संस्कारवतां सर्वेषां द्विविधं जन्म योनितः संस्कारतश्च । तत्र सङ्करोऽन्यस्माज्जातोऽन्येन स्वपुत्र इति बुद्ध्या संस्कृत इति स एव द्वाजः । द्विर्जायत इति द्विजोऽन्यः । द्वाभ्यां स्त्रीपुरुषाभ्यां जायत इत्यर्थे द्वाजादयो निपात्यन्ते तत एव द्वाजा अपि सन्तीति वशी वश नयस एकजत्वमिति मन्त्रे मन्योः संकल्पस्य एकजेति विशेषणम् । द्वाजे तु बीजसंस्कारसङ्कादवश्यं संकल्पयोर्वाच्यनसयोर्वा पौर्वापर्यविरोधो भवतीति विश्वासघातकादयो द्वाजा इति ज्ञेयम् । तदयं संग्रहः —

कौशिके कौर्यतपसी राधेये शौर्यभीरुते ।
खले वाक्रीतवैमत्ये बीजसंस्कारसंकरात् ॥ इति ।

भार्यामनव्याज इति पाठे अनव्या अजा माया तयैव जातोऽस्मि लोकहितार्थं नतु कर्मणेत्यर्थः ॥ ९२ ॥ **गोदम इति** । गोपदार्थं स्वर्गं भूमिं च दमयति वशीकरोतीति गोदम तत्र हेतुः दमत इति दमेन इन्द्रियजयेन दमयतीति जितेन्द्रियत्वात् गां द्यां च दमितुं शक्तोऽस्मीत्यर्थः । अधूम निर्धूमाग्नितुल्य अतएवादम अन्येन दमितुमयोग्य तत्र हेतुः ते त्वयि समदर्शनात्समस्य ब्रह्मणो दर्शनात् 'निर्दोषं हि समं ब्रह्म' इति भगवद्वचनात् 'तस्य ह देवाश्च नाभूत्या ईशते आत्मा ह्येषां स भवति' इति श्रुतेः । तस्य ब्रह्मविदोऽनैश्वर्याय देवाश्च न देवा अपि न ईशते न समर्था भवन्ति किमुत निःसारा यातुधाना इति श्रुत्यर्थः । अत्र दकारस्थाने तकारं कृत्वा गौतम इति निपात्यते। गोभिस्तमो मम ध्वस्तं जातमात्रस्य देहतः इति पाठे देहतो मातुर्देहाज्जातमात्रस्य अकृततपसोऽपि मम सूर्यतुल्यस्य गोभी रश्मिभिस्तमोन्धकारं ध्वस्तं अतोऽहं गावः अतमा तमोविरोधिनो यस्य स इति व्युत्पत्त्या गौतमोऽस्मि। त्वया वन्हिवद्दुःस्पर्शोऽहमित्यर्थः ॥ ९४ ॥

विश्वामित्र उवाच ।
विश्वे देवाश्च मे मित्रं मित्रमस्मि गवां तथा
विश्वामित्रमिति ख्यात यातुधानि निबोध मां
यातुधान्युवाच ।
नामनैरुक्तमेतत्ते दुःखव्याभाषिताक्षरम् ।
नैतद्धारयितुं शक्यं गच्छावतर पक्षिनीम् ९७
जमदग्निरुवाच ।
जाजमद्यजजानेऽहं जिजाहीह जिजायिषि
जमदग्निरिति ख्यातस्ततो मां विद्धि शोभने
यातुधान्युवाच ।
यथोदाहृतमेतत्ते मयि नाम महामुने ।
नैतद्धारयितुं शक्यं गच्छावतर पक्षिनीम् ९९
अरुन्धत्युवाच ।
धरान् धरित्री वसुधां भर्तुस्तिष्ठाम्यनन्तरम् ।
मनोनुरुन्धती भर्तुरिति मा विद्ध्यरुन्धतीम् ॥
यातुधान्युवाच ।
नामनैरुक्तमेतत्ते दुःखव्याभाषिताक्षरम् ।
नैतद्धारयितुं शक्यं गच्छावतर पक्षिनीम् ॥
गण्डोवाच ।
वक्त्रैकदेशे गण्डेति धातुमेतं प्रचक्षते ।
तेनोन्नतेन गण्डेति विद्धि माऽनलसम्भवे २
यातुधान्युवाच ।
नामनैरुक्तमेतत्ते दुःखव्याभाषिताक्षरम् ।
नैतद्धारयितुं शक्यं गच्छावतर पक्षिनीम् ३
पशुसख उवाच ।
पशून् रक्षामि दृष्ट्वाऽहं पशूनां च सदा सखा
गौणं पशुसखेत्येवं विद्धि मामग्निसम्भवे ॥
यातुधान्युवाच ।
नामनैरुक्तमेतत्ते दुःखव्याभाषिताक्षरम् ।
नैतद्धारयितुं शक्यं गच्छावतर पक्षिनीम् ५
शुनःसख उवाच ।
एभिरुक्तं यथा नाम नाहं वक्तुमिहोत्सहे ।
शुनःसखसखायं मा यातुधान्युपधारय ॥
यातुधान्युवाच ।
नामनैरुक्तमेतत्ते वाक्यं सन्दिग्धया गिरा ।
तस्मात्पुनरिदानीं त्वं ब्रूहि यन्नाम ते द्विज ७
शुनःसख उवाच ।
सकृदुक्तं मया नाम न गृहीतं त्वया यदि ।
तस्माच्चिरंडाभिहता गच्छ भस्मेति मा चिरम्
सा ब्रह्मदण्डकल्पेन तेन मूर्ध्नि हता तदा ।
कृत्या पपात मेदिन्यां भस्म सा च जगाम ह
शुनःसखा च हत्वा तां यातुधानीं महाबलाम्
भुवि त्रिदण्ड विष्टभ्य शाद्वले समुपाविशत ॥
ततस्ते मुनयः सर्वे पुष्कराणि बिसानि च ।
यथाकाममुपादाय समुत्तस्थुर्मुदान्विताः ११

विश्वे इति । विश्वशब्देन आधिदैवं ब्रह्माण्डस्था देवा उच्यन्ते । अध्यात्मं च पिण्डस्थानीन्द्रियाणि तान्युभयानि मित्रभूतानि यस्य स विश्वामित्र । ' विश्वस्य ह वै मित्र विश्वामित्र आस ' इति श्रुते । मित्रे चर्षाविति विश्व पदान्तस्य दीर्घः । गवा इन्द्रियाणाम् ॥ ९६॥ **जाजमद्य इति** । भूयो भूयोऽतिशयेन जमन्ति युगपदनेकेषु यज्ञादिष्वनेकवार पुन पुनर्भक्षयन्ति हवींषि ते जाजमन्तो देवा । जमु भक्षणे यङ्लुकि शत्रन्तस्य रूपम् । इज्यन्ते देवता अस्मिन्निति यजोऽग्नि ।तेषा जान आविर्भावस्तास्मिन् जिजायिषि जातोऽस्मि।जनेर्यङन्तात्सनि लुङात्मनेपदे उत्तमपुरुषैकवचन आर्षोऽटभावश्च । इहलोके अतो मा जिजाहि जानीहि । अतो योगात् मा जमदग्निरिति नामतो विद्धि । जाजमदित्यत्राद्यपदे प्रथमाक्षरलोपे द्वितीयस्याग्नित्वे जमदग्निरिति सिद्धम् । जिजाहीत्यपि ज्ञाधातोर्यङ्लुकि जादेशे मध्यमैकवचनम् । ततो जाजमन्तोऽग्निश्चास्मिन् सन्तीति जमदग्निमान् । ततो मतुब्लोपेन जमदग्निरिति पदम् । एतेनापि स्वस्या वर्षणीयत्वमुक्तम् । जाजमद्यजजा नाम मृजा माऽऽह । जिजायिषीति पाठे जाजमद्यजेभ्यो देवाग्निभ्यो जाता सपदो जाजमद्यजजास्ताश्च कृतकत्वात् नाम निश्चितं, मृजा मार्ज्यन्त इति मृजा नश्वरा इति मा मामाह उक्तवान् वेद अतोऽहं ता जिजायिषि जितवानस्मि । अस्मिन्पक्षे अभ्यासतद्विकारभावाद्यार्षम् । जितलोकोऽहं त्वया जेतुमशक्य इति भाव ॥ ९८ ॥ **धरानिति** । धरान् पर्वतान् धरित्रीं भुव वसून्देवान्धत्ते इति व्युत्पत्त्या वसुधा दिव च तिष्ठामि अधितिष्ठामि तत्र हेतु —भर्तुर्वसिष्ठस्यानन्तरं अव्यवधानेन मनोऽनुरुन्धतीति अरुधो अतिकठिनान् धरादीन् दधातीत्यरुन्धतीति दकारलोपेन मुमागमेन च सिद्धम् । अनुरुन्धतीत्यत्र नुकारलोपेन वेति ॥ १०० ॥ **वक्त्रेति** । गडेति नुमा सहितस्यानुकरणम्। मा मा अनलसभवे त्वमस्या वृषादर्भिणा स्वधनमप्रतिगृह्णतामृषीणा वधार्थं स्वजटाममौ हुत्वा ततोऽस्या उत्पादितत्वादिति ज्ञेयं ॥ २ ॥ पशून् जीवान् रक्षामि रक्षयामि मा मम नामेत्यर्थः ॥ ४ ॥ श्वा धर्म तत्सखायो मुनय तेषा सखा शुनसखसख तम् ॥ ६ ॥ भस्म भस्मताम् ॥ ९ ॥

श्रमेण महता कृत्वा ते बिसानि कलापशः ।
तीरे निक्षिप्य पप्रिन्यास्तर्पणं चक्रुरम्भसा ॥
अथोत्थाय जलात्तस्मात्सर्वे ते समुपागमन् ।
नापश्यंश्चापि ते तानि बिसानि पुरुषर्षभाः ॥

ऋषय ऊचुः ।

केन क्षुधा परीतानामस्माकं पापकर्मणाम् ।
नृशंसेनापनीतानि बिसान्याहारकांक्षिणाम्
ते शङ्कमानास्त्वन्योन्यं पप्रच्छुर्द्विजसत्तमाः ।
त ऊचुः समयं सर्वे कुर्म इत्यरिकर्शन ॥ १५
त उक्त्वा बाढमित्येव सर्व एव तदा समम् ।
क्षुधार्ताः सुपरिश्रान्ताः शपथायोपचक्रमुः १६

अत्रिरुवाच ।

स गां स्पृशतु पादेन सूर्यं च प्रतिमेहतु ।
अनध्यायेष्वधीयीत बिसस्तैन्यं करोति यः ॥

वसिष्ठ उवाच ।

अनध्याये पठेल्लोके शुनः स परिकर्षतु ।
परिव्राट् कामवृत्तस्तु बिसस्तैन्यं करोति यः
शरणागतं हन्तु स वै स्वसुतां चोपजीवतु ।
अर्थान्कांक्षतु कीनाशाद्बिसस्तैन्यं करोति यः

कश्यप उवाच ।

सर्वत्र सर्वं लपतु न्यासलोपं करोतु च ।
कूटसाक्षित्वमभ्येतु बिसस्तैन्यं करोति यः ॥
वृथामांसाशनश्चास्तु वृथादानं करोतु च ।
यातु स्त्रियं दिवा चैव बिसस्तैन्यं करोति यः

भरद्वाज उवाच ।

नृशंसस्त्यक्तधर्मास्तु स्त्रीषु ज्ञातिषु गोषु च ।
ब्राह्मणं चापि जयतां बिसस्तैन्यं करोति यः
उपाध्यायमधः कृत्वा ऋचोऽध्येतु यजूंषि च
जुहोतु च स कक्षाग्नौ बिसस्तैन्यं करोति यः

जमदग्निरुवाच ।

पुरीषमुत्सृजत्वप्सु हन्तु गां चैव दुह्यतु ।
अनृतौ मैथुनं यातु बिसस्तैन्यं करोति यः २४
द्वेष्यो भार्योपजीवी स्यादूरबन्धुश्च वैरवान् ।
अन्योन्यस्यातिथिश्चास्तु बिसस्तैन्यं करोति यः

गौतम उवाच ।

अधीत्य वेदांस्त्यजतु त्रीनग्नीनपविध्यतु ।
विक्रीणातु तथा सोमं बिसस्तैन्यं करोति यः
उदपानप्लवे ग्रामे ब्राह्मणो वृषलीपतिः ।
तस्य सालोक्यतां यातु बिसस्तैन्यं करोति यः

विश्वामित्र उवाच ।

जीवतो वै गुरून्भृत्यान्भरन्त्वस्य परे जनाः
अगतिर्बहुपुत्रः स्याद्बिसस्तैन्यं करोति यः ॥
अशुचिर्ब्रह्मकूटोऽस्तु ऋद्ध्या चैवाप्यहंकृतः ।
कर्षको मत्सरी चास्तु बिसस्तैन्यं करोति यः
वर्षाचरोऽस्तु भृतको राज्ञश्चास्तु पुरोहितः ।
अयाज्यस्य भवेद्दत्विग् बिसस्तैन्य करोति यः

अरुन्धत्युवाच ।

नित्यं परिभवेच्छ्वश्रूं भर्तुर्भवतु दुर्मनाः ।
एका स्वादु समाश्नातु बिसस्तैन्यं करोति या
ज्ञातीनां गृहमध्यस्था सकृन्नक्तु दिनक्षये ।
अभोग्या वीरसूरस्तु बिसस्तैन्यं करोति या ।

गण्डोवाच ।

अनृतं भाषतु सदा बन्धुभिश्च विरुध्यतु ।
ददातु कन्यां शुल्केन बिसस्तैन्य करोति या
साधयित्वा स्वयं प्राशेद्दास्ये जीर्यतु चैव ह ।
विकर्मणा प्रमीयेत बिसस्तैन्यं करोति या ३४

पशुसख उवाच ।

दास एव प्रजायेतामप्रसूतिरकिञ्चनः ।
दैवतेष्वनमस्कारो बिसस्तैन्यं करोति यः ३५

शुनःसख उवाच ।

अध्वर्यवे दुहितरं वा ददातु
च्छन्दोगे वा चरितब्रह्मचर्ये ।
आथर्वणं वेदमधीत्य विप्रः
स्नायीत वा यो हरते बिसानि ३६

ऋषय ऊचुः ।


इष्टमेतद्द्विजातीनां योऽयं ते शपथः कृतः ।
त्वया कृतं बिसस्तैन्यं सर्वेषां नः शुनःसख ३७

कलापश संघश ॥ १२ ॥ समयं शपथं अत्र शपथव्याजेन निषिद्धान्युच्यन्ते ॥१५॥ शुन सारमेयान्परिकर्षतु क्रीडार्थं मृगयार्थं वा ॥ १८ ॥ स्वसुता शुल्कग्रहणेन क्रीनाशात् कर्षकात् ॥ १९ ॥ वृथा यागादिनिमित्तं विना वृथा नट-नर्तकादौ ॥ २१ ॥ जयता युद्धे वादे वा ॥२२ ॥ कक्षाग्नौ तत्र हि हुत भस्मीभावमप्राप्य होतुर्दोषकरमित्याशय ॥ २३ ॥ उदपानप्लवे एककूपैकजीवने ॥ २७ ॥ ब्रह्मकूटो वेदराशिस्तस्याशुचित्व दोष ऋद्धिमतो गर्वो भवतु । कर्षकश्च मत्सरी चास्तु ॥ २९ ॥ ज्ञातीना अनादरे षष्ठी ज्ञातीननादृत्येत्यर्थ । अभोग्या योनिदूषिता ॥ ३२ ॥ साधयित्वा अन्नं पक्त्वा विकर्मणा जारजातेन गर्भा-दिना ॥ ३४ ॥

शुनःसख उवाच ।
न्यस्तमद्यं न पश्यद्भिर्यदुक्तं कृतकर्मभिः ।
सत्यमेतन्न मिथ्यैतद्बिसस्तैन्यं कृतं मया ३८
मया ह्यन्तर्हितानीह बिसानीमानि पश्यत ।
परीक्षार्थं भगवतां कृतमेवं मयाऽनघाः ॥ ३९
रक्षणार्थं च सर्वेषां भवतामहमागतः ।
यातुधानी ह्यतिक्रूरा कृत्यैषा वो वधैषिणी४०
वृषादर्भिप्रयुक्तैषा निहता मे तपोधनाः ।
दुष्टा हिंस्यादियं पापा युष्मान्प्रत्यग्निसंभवा
तस्मादस्म्यागतो विप्रा वासवं मां निबोधत
अलोभादक्षया लोकाः प्राप्ता वै सार्वकामिकाः
उत्तिष्ठध्वमितः क्षिप्रं तानवाप्नुत वै द्विजाः४३

भीष्म उवाच ।
ततो महर्षयः प्रीतास्तथेत्युक्त्वा पुरंदरम् ।
सहैव त्रिदशेन्द्रेण सर्वे जग्मुस्त्रिविष्टपम् ॥ ४४
एवमेते महात्मानो भोगैर्बहुविधैरपि ।
क्षुधा परमया युक्ताच्छंद्यमाना महात्मभिः
नैव लोभं तदा चक्रुस्ततः स्वर्गमवाप्नुवन् ।
तस्मात्सर्वास्ववस्थासु नरो लोभं विवर्जयेत्
एष धर्मः परो राजंस्तस्माल्लोभ विवर्जयेत् ४७
इदं नरः सुचरितं समवायेषु कीर्तयन् ।
अर्थभागी च भवति न च दुर्गाण्यवाप्नुते ४८
प्रीयन्ते पितरश्चास्य ऋषयो देवतास्तथा ।
यशोधर्मार्थभागी च भवति प्रेत्य मानवः१४९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि बिसस्तैन्योपाख्याने त्रिनवतितमोऽध्यायः ॥ ९३ ॥



९४

भीष्म उवाच ।
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
यद्वृत्तं तीर्थयात्रायां शपथं प्रति तच्छृणु ॥ १
पुष्करार्थे कृतं स्तैन्यं पुरा भरतसत्तम ।
राजर्षिभिर्महाराज तथैव च द्विजर्षिभिः ॥ २
ऋषयः समेताः पश्चिमे वै प्रभासे
समागता मन्त्रममन्त्रयन्त ।
चराम सर्वां पृथिवीं पुण्यतीर्थां
तन्नः काम हंत गच्छाम सर्वे ॥ ३
शुक्रोऽङ्गिराश्चैव कविश्च विद्वां-
स्तथा ह्यगस्त्यो नारदपर्वतौ च ।
भृगुर्वसिष्ठः कश्यपो गौतमश्च
विश्वामित्रो जमदग्निश्च राजन् ॥ ४
ऋषिस्तथा गालवोऽथाष्टकश्च ।
भरद्वाजोऽरुन्धती वालखिल्याः ।
शिबिर्दिलीपो नहुषोऽम्बरीषो
राजा ययातिर्धुन्धुमारोऽथ पूरुः ॥५
जग्मुः पुरस्कृत्य महानुभाव
शतक्रतुं वृत्रहणं नरेन्द्राः ।
तीर्थानि सर्वाणि परिभ्रमन्तो
माघ्यां ययुः कौशिकीं पुण्यतीर्थाम्६
सर्वेषु तीर्थेष्ववधूतपापा
जग्मुस्ततो ब्रह्मसरः सुपुण्यम् ।
देवस्य तीर्थे जलमग्निकल्पा
विगाह्य ते भुक्तबिसप्रसूनाः ॥ ७
केचिद्बिसान्यखनंस्तत्र राज-
न्नन्ये मृणालान्यखनंस्तत्र विप्राः
अथापश्यन्पुष्करं ते ह्रियन्तं
ह्रदादगस्त्येन समुद्धृतं तत् ॥ ८

अद्यं भक्ष्यं यदुक्तं तन्न मिथ्येति सम्बन्धः ॥ ३८ ॥ अन्तर्हितानि अन्तर्धानं प्रापितानि ॥ ३९ ॥ स्वधर्मनिष्ठकुप्रतिग्रहपराङ्मुखो निषिद्धवर्जितो मुख्यं पात्रमित्यध्यायतात्पर्यम् ॥ १४९ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्रिनवतितमोऽध्याय ॥ ९३ ॥

९४
अत्र शपथेनैव निषिद्धार्थप्रकाशने ॥ १ ॥ पुष्करार्थे इन्द्रेण स्तैन्य कृत मुनिभि शपथा कृता इत्यर्थ ॥ २ ॥ बिसमृणालयो कमलकुमुदवदवान्तरभेदो ज्ञेय ह्रियन्तं ह्रियमाणम् ॥ ८ ॥

नानाह सर्वानृषिमुख्यानगस्त्यः
केनादत्तं पुष्कर मे सुजातम् ।
युष्मान्शङ्के पुष्कर दीयतां मे
न वै भवन्तो हर्तुमर्हन्ति पद्मम् ॥ ९
शृणोमि कालो हिंसते धर्मवीर्यं
सोऽयं प्राप्तो वर्तते धर्मपीडा ।
पुराऽधर्मो वर्तते नेह याव-
त्तावद्गच्छामः सुरलोकं चिराय॥ १०
पुरा वेदान्ब्राह्मणा ग्राममध्ये
घुष्टस्वरा वृषलान्श्रावयन्ति ।
पुरा राजा व्यवहारेण धर्मान्
पश्यत्यहं परलोकं व्रजामि ॥ ११
पुरावरान्प्रत्यवरान् गरीयसो
यावन्नरा नावमंस्यन्ति सर्वे ।
तमोत्तरं यावदिदं न वर्तते
तावद्व्रजामि परलोकं चिराय ॥ १२
पुरा प्रपश्यामि परेण मर्त्यान्
बलीयसा दुर्बलान्भुज्यमानान् ।
तस्माद्यास्यामि परलोकं चिराय
न ह्युत्सहे द्रष्टुमिह जीवलोकम् ॥ १३
तमाहुरार्ता ऋषयो महर्षिं
न ते वयं पुष्करं चोरयामः ।
मिथ्याभिषङ्गो भवता न कार्यः
शपाम तीक्ष्णैः शपथैर्महर्षे ॥ १४
ते निश्चितास्तत्र महर्षयस्तु
सपश्यन्तो धर्ममेतं नरेन्द्राः ।
ततोऽशपन्त शपथान्पर्ययेण
सहैव ते पार्थिव पुत्रपौत्रैः ॥ १५

भृगुरुवाच ।

प्रत्याक्रोशेदिहाकृष्टस्ताडितः प्रतिताडयेत् ।
खादेच्च पृष्ठमांसानि यस्ते हरति पुष्करम् १६

वसिष्ठ उवाच ।

अस्वाध्यायपरो लोके श्वानं च परिकर्षतु ।
पुरे च भिक्षुर्भवतु यस्ते हरति पुष्करम् ॥ १७

कश्यप उवाच ।

सर्वत्र सर्वं पणतु न्यासे लोभं करोतु च ।
कूटसाक्षित्वमभ्येतु यस्ते हरति पुष्करम् १८

गौतम उवाच ।

जीवत्वहकृतो बुद्ध्या विषमेणासमेन सः ।
कर्षको मत्सरी चास्तु यस्ते हरति पुष्करम्१९

अङ्गिरा उवाच ।

अशुचिर्ब्रह्मकूटोऽस्तु श्वानं च परिकर्षतु ।
ब्रह्महाऽनिकृतिश्चास्तु यस्ते हरति पुष्करम् ॥

धुन्धुमार उवाच ।

अकृतज्ञस्तु मित्राणां शूद्रायां च प्रजायतु ।
एकः सम्पन्नमश्नातु यस्ते हरति पुष्करम् २१

पूरुरुवाच ।

चिकित्सायां प्रचरतु भार्यया चैव पुष्यतु ।
श्वशुरात्तस्य वृत्तिः स्याद्यस्ते हरति पुष्करम्

दिलीप उवाच ।

उदपानप्लवे ग्रामे ब्राह्मणो वृषलीपतिः ।
तस्य लोकान्स व्रजतु यस्ते हरति पुष्करम्२३

शुक्र उवाच ।

वृथामासं समश्नातु दिवा गच्छतु मैथुनम् ।
प्रेष्यो भवतु राज्ञश्च यस्ते हरति पुष्करम् ॥२४

जमदग्निरुवाच ।

अनध्यायेष्वधीयीत मित्रं श्राद्धे च भोजयेत्
श्राद्धे शूद्रस्य चाश्नीयाद्यस्ते हरति पुष्करम्

शिबिरुवाच ।

अनाहिताग्निर्म्रियतां यज्ञे विघ्नं करोतु च ।
तपस्विभिर्विरुध्येच्च यस्ते हरति पुष्करम् २६

ययातिरुवाच ।

अनृतौ च व्रती चैव भार्यायां स प्रजायतु ।
निराकरोतु वेदांश्च यस्ते हरति पुष्करम् २७

नहुष उवाच ।

अतिथिर्गृहसंस्थोऽस्तु कामवृत्तस्तु दीक्षितः
विद्या प्रयच्छतु भृतो यस्ते हरति पुष्करम् ॥

अम्बरीष उवाच ।

नृशंसस्त्यक्तधर्मोऽस्तु स्त्रीषु ज्ञातिषु गोषु च
निहन्तु ब्राह्मणं चापि यस्ते हरति पुष्करम् २९

आदत्त आत्तम् ॥ ९ ॥ अधर्म इति च्छेद ॥ १० ॥ प्रत्यवगन्मध्यमान् तम अज्ञानम् ॥ १२ ॥ पृष्ठमासानि पृष्ठवाहाना ह्यवृषभोष्ट्रादीनां मासानि ॥ १६ ॥ भिक्षु संन्यासी ॥ १७ ॥ पणतु क्रयविक्रय करोतु सर्व अपथ्यमपि ॥ १८ ॥ विगत समभावो यस्मात्तेनासमेन कामक्रोधादिना ॥ १९ ॥ अनिकृति अकृतप्रायश्चित्त ॥ २० ॥ अतिथिर्यति गृहसंस्थो गृहवासी कामवृत्त यथेष्टचेष्टावान् ॥ २८ ॥

नारद उवाच ।
गृहज्ञानी बहिःशास्त्रं पठतां विस्वरं पदम् ।
गर्हयसोऽवजानातु यस्ते हरति पुष्करम् ३०
नाभाग उवाच ।
अनृतं भाषतु सदा सन्धिश्चैव विरुध्यतु ।
शुल्केन तु ददत्कन्यां यस्ते हरति पुष्करम् ॥
कविरुवाच ।
पद्भ्यां स गां ताडयतु सूर्यं च प्रतिमेहतु ।
शरणागतं संत्यजतु यस्ते हरति पुष्करम् ३२
विश्वामित्र उवाच ।
करोतु भृतकोऽवर्षी राज्ञश्चास्तु पुरोहितः ।
ऋत्विगस्तु ह्ययाज्यस्य यस्ते हरति पुष्करम्
पर्वत उवाच ।
ग्रामे चाधिकृतः सोऽस्तु खरयानेन गच्छतु
शुनः कर्षतु वृत्त्यर्थं यस्ते हरति पुष्करम् ॥३४
भरद्वाज उवाच ।
सर्वपापसमादानं नृशंसे चानृते च यत् ।
तत्तस्यास्तु सदा पाप यस्ते हरति पुष्करम् ॥
अष्टक उवाच ।
स राजास्त्वकृतप्रज्ञः कामवृत्तश्च पापकृत् ।
अधर्मेणाभिशास्तूर्वीं यस्ते हरति पुष्करम् ॥
गालव उवाच ।
पापिष्ठेभ्यो ह्यनर्घार्हः स नरोस्तु स्वपापकृत्।
दत्वा दानं कीर्तयतु यस्ते हरति पुष्करम् ॥
अरुन्धत्युवाच ।
श्वश्वापवाद वदतु भर्तुर्भवतु दुर्मनाः ।
एका स्वादु समश्नातु या ते हरति पुष्करम्३८
वालखिल्या ऊचुः ।
एकपादेन वृत्त्यर्थं ग्रामद्वारे स तिष्ठतु ।
धर्मज्ञस्त्यक्तधर्माऽस्तु यस्ते हरति पुष्करम् ।
शुनःसख उवाच ।
अग्निहोत्रमनादृत्य स सुखं स्वपतु द्विजः ।
परिव्राट् कामवृत्तोऽस्तु यस्ते हरति पुष्करम्
सुरभ्युवाच ।
बालजेन निदानेन कांस्यं भवतु दोहनम् ।
दुह्येत परवत्सेन या ते हरति पुष्करम् ॥ ४१
भीष्म उवाच ।
ततस्तु तैः शपथैः शप्यमानै-
र्नानाविधैर्बहुभिः कौरवेन्द्र ।
सहस्राक्षो देवराट् सप्रहृष्टः
समीक्ष्य तं कोपन विप्रमुख्यम् ॥ ४२
अथाब्रवीन्मघवा प्रत्ययं स्व
समाभाष्य तमृषिं जातरोषम् ।
ब्रह्मर्षिदेवर्षिनृपर्षिमध्ये
य त निबोधेह ममाद्य राजन् ॥ ४३
शक्र उवाच ।
अध्वर्यवे दुहितरं ददातु
छन्दोगे वा चरितब्रह्मचर्ये ।
अथर्वणं वेदमधीत्य विप्रः
स्नायीत यः पुष्करमाददाति ॥ ४४
सर्वान्वेदानधीयीत पुण्यशीलोऽस्तु धार्मिकः
ब्रह्मणः सदनं यातु यस्ते हरति पुष्करम् ५४
अगस्त्य उवाच ।
आशीर्वादस्त्वया प्रोक्तः शपथो बलसूदन ।
दीयतां पुष्करं मह्यमेष धर्मः सनातनः ॥ ४६
इन्द्र उवाच ।
न मया भगवन् लोभाद्धृत पुष्करमद्य वै ।
धर्मोस्तु श्रोतुकामेन हृतं न क्रोद्धुमर्हसि ४७
धर्मश्रुतिसमुत्कर्षो धर्मसेतुरनामयः ।
आर्षो वै शाश्वतो नित्यमव्ययोऽयं मया श्रुतः
तदिदं गृह्यतां विद्वन्पुष्करं द्विजसत्तम ।
अतिक्रमं मे भगवन् क्षन्तुमर्हस्यनिन्दित ४९
इत्युक्तः स महेन्द्रेण तपस्वी कोपनो भृशम् ।
जग्राह पुष्करं धीमान्प्रसन्नश्चाभवन्मुनिः ५०
प्रययुस्ते ततो भूयस्तीर्थानि वनगोचराः ।
पुण्येषु तीर्थेषु तथा गात्राण्याप्लावयन्त ते॥ ५१
आख्यानं य इदं युक्तः पठेत्पर्वणि पर्वणि ।
न मूर्खे जनयेत्पुत्रं न भवेच्च निराकृतिः ॥ ५२

भृतो वित्तेन क्रीत भृतको धान्यविक्रीत वैश्यै क्रीत सन् अवर्षी वृष्टिनिबन्धम् करोतु ॥ ३३ ॥ पापिष्ठा एव अनर्घार्हा अपूज्याः अयं तु ततोऽप्यपूज्योऽस्तु । यत स्वपापकृत् स्वेषु ज्ञातिषु पापकृत् गराग्निदानादिना वधकृत् ॥ ३७ ॥ श्वश्वा अपवादमिति च्छेद ॥ ३८ ॥ बालजेन नृकेशजेन बल्वजेनेति पाठे ।बल्वज बगईसज्ञकस्तृणविशेषस्तज्जेन निदानं दोहनकाले गवा पादबन्धनी रज्जुः तेन ॥ ४१ ॥ प्रत्यय अभिप्रायम् ॥ ४३ ॥ धर्मश्रुतीना सम्यगुत्कर्ष धर्म एव सेतुस्तरणोपाय ॥ ४८ ॥

न तमापत्स्पृशेत्काचिद्विज्वरो न जरावहः ।
विरजाः श्रेयसा युक्तः प्रेत्य स्वर्गमवाप्नुयात् ॥
यश्च शास्त्रमधीयीत ऋषिभिः परिपालितम् ।
स गच्छेद्ब्रह्मणो लोकमव्ययं च नरोत्तम ५५

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि शपथविधिर्नाम चतुर्नवतितमोऽध्यायः ॥ ९४ ॥

९५

युधिष्ठिर उवाच ।
यदिदं श्राद्धकृत्येषु दीयते भरतर्षभ ।
छत्रं चोपानहौ चैव केनैतत्संप्रवर्तितम् ॥ १
कथं चैतत्समुत्पन्नं किमर्थं चैव दीयते ।
न केवलं श्राद्धकृत्ये पुण्यकेष्वपि दीयते ॥ २
बहुष्वपि निमित्तेषु पुण्यमाश्रित्य दीयते ।
एतद्विस्तरतो ब्रह्मन् श्रोतुमिच्छामि तत्त्वतः ३

भीष्म उवाच ।
शृणु राजन्नवहितश्छत्रोपानहविस्तरम् ।
यथैतत्प्रथितं लोके यथा चैतत्प्रवर्तितम् ॥ ४
यथा चाक्षय्यतां प्राप्तं पुण्यतां च यथा गतम्
सर्वमेतदशेषेण प्रवक्ष्यामि नराधिप ॥ ५
जमदग्नेश्च संवादं सूर्यस्य च महात्मनः ।
पुरा स भगवान् साक्षाद्धनुषाऽक्रीडयत्प्रभो ६
संधाय संधाय शरांश्चिक्षेप किल भार्गवः ।
तान् क्षिप्तान् रेणुका सर्वांस्तस्येषून्दीप्ततेजसः
आनीय सा तदा तस्मै प्रादादसकृदच्युत ।
अथ तेन स शब्देन ज्यायाश्चैव शरस्य च ८
प्रहृष्टः संप्रचिक्षेप सा च प्रत्याजहार तान् ।
ततो मध्याह्नमारूढे ज्येष्ठामूले दिवाकरे ॥ ९
स सायकान्द्विजो मुक्त्वा रेणुकामिदमब्रवीत्
गच्छानय विशालाक्षि शरानेतान्धनुश्च्युतान्
यावदेतान्पुनः सुभ्रु क्षिपामीति जनाधिप ।
सा गच्छन्त्यन्तरा छायां वृक्षमाश्रित्य भामिनी
तस्थौ तस्या हि सन्तप्तं शिरः पादौ तथैव च
क्षिता सा तु मुहूर्तं वै भर्तुः शापभयाच्छुभा
ययावानयितुं भूयः सायकानसितेक्षणा ।
प्रत्याजगाम च शरांस्तानादाय यशस्विनी॥१३
सा वै खिन्ना सुचार्वङ्गी पद्भ्यां दुःखं नियच्छती
उपाऽऽजगाम भर्तारं भयाद्भर्तुः प्रवेपती ॥१४
स तामृषिस्तदा क्रुद्धो वाक्यमाह शुभाननाम्
रेणुके किं चिरेण त्वमागतेति पुनः पुनः १५

रेणुकोवाच ।
शिरस्तावत्प्रदीप्तं मे पादौ चैव तपोधन ।
सूर्यतेजोनिरुद्धाऽहं वृक्षच्छायां समाश्रिता ॥
एतस्मात्कारणाद्ब्रह्मंश्चिरायैतत्कृतं मया ।
एतच्छ्रुत्वा मम विभो मा क्रुधस्त्वं तपोधन

जमदग्निरुवाच ।
अद्यैनं दीप्तकिरणं रेणुके तव दुःखदम् ।
शरैर्निपातयिष्यामि सूर्यमस्त्राग्नितेजसा १८

भीष्म उवाच ।
स विस्फार्य धनुर्दिव्यं गृहीत्वा च शरान्बहून्
अतिष्ठत्सूर्यमभितो यतो याति ततोमुखः ॥
अथ तं प्रेक्ष्य सन्नद्धं सूर्योऽभ्येत्य तथाऽब्रवीत्
द्विजरूपेण कौन्तेय किं ते सूर्योपराध्यते २०
आदत्ते रश्मिभिः सूर्यो दिवि तिष्ठंस्ततस्ततः
रसं हृतं वै वर्षासु प्रवर्षति दिवाकरः ॥ २१
ततोऽन्नं जायते विप्र मनुष्याणां सुखावहम् ।
अन्नं प्राणा इति यथा वेदेषु परिपठ्यते ॥ २२
अथाग्नेषु निगूढश्च रश्मिभिः परिवारितः ।
सप्तद्वीपानिमान्ब्रह्मन्वर्षेणाभिप्रवर्षति ॥ २३

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्नवतितमोऽध्याय ॥ ९४ ॥

९५

यादिदमिति ॥ १ ॥ पुण्यकेषु स्त्रीणा व्रतोत्सवेषु ॥ २ ॥ ज्येष्ठामूले दक्षिणावर्ते भ्रममाणे भचक्रे ज्येष्ठानां समसूत्रे पतितं रोहिणीनक्षत्र तदेव ज्येष्ठाना मूलं यथाश्रुतार्थग्रहणं तु न ज्येष्ठामूलस्थेऽर्के हेमन्ते शिर पाददाहस्यानवसरात् ॥ ९ ॥

ततस्तदौषधीनां च वीरुधां पुष्पपत्रजम् ।
सर्वं वर्षाभिनिर्वृत्तमन्नं संभवति प्रभो ॥ २४
जातकर्माणि सर्वाणि व्रतोपनयनानि च ।
गोदानानि विवाहाश्च तथा यज्ञसमृद्धयः २५
शास्त्राणि दानानि तथा संयोगा वित्तसंचयाः ।
अन्नतः संप्रवर्तन्ते यथा त्वं वेत्थ भार्गव॥२६
रमणीयानि यावन्ति यावदारंभिकाणि च ।
सर्वमन्नात्प्रभवति विदितं कीर्तयामि ते ॥ २७
सर्वं हि वेत्थ विप्र त्वं यदेतत्कीर्तितं मया ।
प्रसादये त्वां विप्रर्षे किं ते सूर्यं निपात्य वै ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि छत्रोपानहोत्पत्तिर्नाम पञ्चनवतितमोऽध्यायः ॥ ९५ ॥



९६

युधिष्ठिर उवाच ।
एवं प्रयाचति तदा भास्करे मुनिसत्तमः ।
जमदग्निर्महातेजाः किं कार्यं प्रत्यपद्यत ॥ १
भीष्म उवाच ।
स तथा याचमानस्य मुनिरग्निसमप्रभः ।
जमदग्निः शमं नैव जगाम कुरुनन्दन ॥ २
ततः सूर्यो मधुरया वाचा तमिदमब्रवीत् ।
कृताञ्जलिर्विप्ररूपी प्रणम्यैनं विशाम्पते ॥ ३
चलं निमित्तं विप्रर्षे सदा सूर्यस्य गच्छतः ।
कथं चलं भेत्स्यसि त्वं सदा यान्तं दिवाकरम्
जमदग्निरुवाच ।
स्थिरं चापि चलं चापि जाने त्वां ज्ञानचक्षुषा
अवश्यं विनयाधानं कार्यमद्य मया तव ॥ ५
मध्याह्ने वै निमेषार्धं तिष्ठसि त्वं दिवाकर ।
तत्र भेत्स्यामि सूर्य त्वां न मेऽत्रास्ति विचारणा
सूर्य उवाच ।
असंशयं मां विप्रर्षे भेत्स्यसे धन्विनां वर ।
अपकारिणं मां विद्धि भगवञ्छरणागतम् ७
भीष्म उवाच ।
ततः प्रहस्य भगवान् जमदग्निरुवाच तम् ।
न भीः सूर्य त्वया कार्या प्राणिपातगतो ह्यसि
ब्राह्मणेष्वार्जवं यच्च स्थैर्यं च धरणीतले ।
सौम्यतां चैव सोमस्य गांभीर्यं वरुणस्य च
दीप्तिमग्नेः प्रभां मेरोः प्रतापं तपनस्य च ।
एतान्यतिक्रमेद्यो वै स हन्याच्छरणागतम् १०
भवेत्स गुरुतल्पी च ब्रह्महा च स वै भवेत् ।
सुरापानं स कुर्याच्च यो हन्याच्छरणागतम् ॥
एतस्य त्वपनीतस्य समाधिं तात चिन्तय
यथा सुखगमः पन्था भवेत्त्वद्रश्मिभावितः ॥
भीष्म उवाच ।
एतावदुक्त्वा स तदा तूष्णीमासीद्भृगूत्तमः
अथ सूर्योऽददत्तस्मै छत्रोपानहमाशु वै ॥ १३
सूर्य उवाच ।
महर्षे शिरसस्त्राणं छत्रं मद्रश्मिवारणम् ।
प्रतिगृह्णीष्व पद्भ्यां च त्राणार्थं चर्मपादुके १४
अद्यप्रभृति चैवेह लोके संप्रचरिष्यति ।
पुण्यकेषु च सर्वेषु परमक्षय्यमेव च ॥ १५
भीष्म उवाच ।
छत्रोपानहमेतत्तु सूर्येणैतत्प्रवर्तितम् ।
पुण्यमेतदभिख्यातं त्रिषु लोकेषु भारत ॥ १६
तस्मात्प्रयच्छ विप्रेषु छत्रोपानहमुत्तमम् ।
धर्मस्तेषु महान्भावी न मेऽत्रास्ति विचारणा
छत्रं हि भरतश्रेष्ठ यः प्रदद्याद्द्विजातये ।
शुभ्रं शतशलाकं वै स प्रेत्य सुखमेधते ॥ १८
स शक्रलोके वसति पूज्यमानो द्विजातिभिः
अप्सरोभिश्च सततं देवैश्च भरतर्षभ ॥ १९
दह्यमानाय विप्राय यः प्रयच्छत्युपानहौ ।
स्नातकाय महाबाहो संशिताय द्विजातये २०
सोऽपि लोकानवाप्नोति दैवतैरभिपूजितान्
गोलोके स मुदा युक्तो वसति प्रेत्य भारत ॥


इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चनवतितमोऽध्यायः ॥ ९५ ॥

९६

एवमिति ॥ १ ॥ * एतस्य शरणागतस्य अपनीतस्यापराधवत समाधिं समाधानम् ।

एतत्ते भरतश्रेष्ठ मया कात्स्न्र्येन कीर्तितम् । छत्रोपानहदानस्य फलं भरतसत्तम ॥ २२

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि छत्रोपानहदानप्रशंसा नाम षण्णवतितमोऽध्यायः ॥ ९६ ॥



९७

युधिष्ठिर उवाच ।

गार्हस्थ्यं धर्ममखिलं ब्रूहि भरतर्षभ ।
ऋद्धिमाप्नोति किं कृत्वा मनुष्य इह पार्थिव १

भीष्म उवाच ।

अत्र ते वर्तयिष्यामि पुरावृत्तं जनाधिप ।
वासुदेवस्य संवादं पृथिव्याश्चैव भारत ॥ २
संस्तुत्य पृथिवीं देवीं वासुदेवः प्रतापवान् ।
पप्रच्छ भरतश्रेष्ठ मां त्वं यत्पृच्छसेऽद्य वै ॥ ३

वासुदेव उवाच ।

गार्हस्थ्यं धर्ममाश्रित्य मया वा मद्विधेन वा
किमवश्यं धरे कार्यं किं वा कृत्वा कृतं भवेत्

पृथिव्युवाच ।

ऋषयः पितरो देवा मनुष्याश्चैव माधव ।
इज्याश्चैवार्चनीयाश्च यथा चैव निबोध मे ॥४
सदा यज्ञेन देवाश्च सदाऽऽतिथ्येन मानुषाः ।
छंदनश्च यथा नित्यमर्हान् भुञ्जीत नित्यशः ६
तेन ह्यृषिगणाः प्रीता भवन्ति मधुसूदन ।
नित्यमग्निं परिचरेदभुक्त्वा बलिकर्म च ७
कुर्यात्तथैव देवा वै प्रीयन्ते मधुसूदन ।
कुर्यादहरहः श्राद्धमन्नाद्येनोदकेन च ॥ ८
पयोमूलफलैर्वापि पितॄणा प्रीतिमाहरन् ।
सिद्धान्नाद्वैश्वदेवं वै कुर्यादग्नौ यथाविधि ॥९
अग्नीषोम वैश्वदेवं धान्वन्तर्यमनन्तरम् ।
प्रजानां पतये चैव पृथग्घोमो विधीयते ॥ १०
तथैव चानुपूर्व्येण बलिकर्म प्रयोजयेत् ।
दक्षिणायां यमायेति प्रतीच्यां वरुणाय च ११
सोमाय चाप्युदीच्यां वै वास्तुमध्ये प्रजापतेः
धन्वन्तरेः प्रागुदीच्या प्राच्यां शक्राय माधव
मनुष्येभ्य इति प्राहुर्बलिं द्वारि गृहस्य वै ।
मरुद्भ्यो दैवतेभ्यश्च बलिमन्तर्गृहे हरेत् ॥ १३
तथैव विश्वेदेवेभ्यो बलिमाकाशतो हरेत् ।
निशाचरेभ्यो भूतेभ्यो बलिं नक्तं तथा हरेत्
एव कृत्वा बलिं सम्यग्दद्याद्भिक्षां द्विजाय वै
अलाभे ब्राह्मणस्यान्नावग्रमुद्धृत्य निक्षिपेत् १५
यदा श्राद्ध पितृभ्योऽपि दातुमिच्छेत मानवः
तदा पश्चात्प्रकुर्वीत निवृत्ते श्राद्धकर्मणि १६
पितॄन्सन्तर्पयित्वा तु बलिं कुर्याद्विधानतः ।
वैश्वदेवं ततः कुर्यात्पश्चाद्ब्राह्मणवाचनम् १७
ततोऽन्नेन विशेषेण भोजयेदतिथीनपि ।
अर्चापूर्वं महाराज ततः प्रीणाति मानवान्
अनित्य हि स्थितो यस्मात्तस्मादतिथिरुच्यते
आचार्यस्य पितुश्चैव सख्युराप्तस्य चातिथेः१९
इदमस्ति गृहे मह्यमिति नित्यं निवेदयेत् ।
ते यद्ददेयुस्तत्कुर्यादिति धर्मो विधीयते ॥२०
गृहस्थः पुरुषः कृष्ण शिष्टाशी च सदा भवेत् ।
राजर्त्विज स्नातकं च गुरुं श्वशुरमेव च ॥ २१
अर्चयेन्मधुपर्केण परिसंवत्सरोषितान् ।
श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि २२
वैश्वदेवं हि नामैतत्सायंप्रातर्विधीयते ।
एतांस्तु धर्मान् गार्हस्थ्यान्यः कुर्यादनसूयकः ।
स इहर्षिवरान्प्राप्य प्रेत्य लोके महीयते २३

भीष्म उवाच ।

इति भूमेर्वचः श्रुत्वा वासुदेवः प्रतापवान् ।
तथा चकार सततं त्वमप्येवं सदाऽऽचर ॥२४

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षण्णवतितमोऽध्याय ॥ ९६ ॥

९७

गार्हस्थ्य गृहस्थयोग्यम् ॥ १ ॥ बलिकर्म वैश्वदेव तत्र प्रागन्नमेव ग्राह्यम् ॥ ७ ॥

एतद्गृहस्थधर्मं त्वं चेष्टमानो जनाधिप । इहलोके यशः प्राप्य प्रेत्य स्वर्गमवाप्स्यसि ॥ २५

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि बलिदानविधिर्नाम सप्तनवतितमोऽध्यायः ॥ ९७ ॥



९८

युधिष्ठिर उवाच ।

आलोकदान नामैतत्कीदृशं भरतर्षभ ।
कथमेतत्समुत्पन्नं फलं वा तद्ब्रवीहि मे ॥ १

भीष्म उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
मनोः प्रजापतेर्वादं सुवर्णस्य च भारत ॥ २
तपस्वी कश्चिदभवत्सुवर्णो नाम भारत ।
वर्णतो हेमवर्णः स सुवर्ण इति पप्रथे ३
कुलशीलगुणोपेतः स्वाध्याये च परंगतः ।
बहून्सुवशप्रभवान्समतीतः स्वकैर्गुणैः ॥ ४
स कदाचिन्मनु विप्रो ददर्शोपससर्प च ।
कुशलप्रश्नमन्योन्यं तौ चोभौ तत्र चक्रतुः ॥ ५
ततस्तौ सत्यसङ्कल्पौ मेरौ काञ्चनपर्वते ।
रमणीये शिलापृष्ठे सहितौ संन्यषीदताम् ६
तत्र तौ कथयन्तौ स्तां कथा नानाविधाश्रयाः
ब्रह्मर्षिदेवदैत्यानां पुराणानां महात्मनाम् ॥ ७
सुवर्णस्त्वब्रवीद्वाक्यं मनु स्वायंभुवं प्रति ।
हितार्थं सर्वभूतानां प्रश्नं मे वक्तुमर्हसि ॥ ८
सुमनोभिर्यदिज्यन्ते दैवतानि प्रजेश्वर ।
किमेतत्कथमुत्पन्नं फलं योग च शंस मे ॥ ९

मनुरुवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
शुक्रस्य च बलेश्चैव संवादं वै महात्मनोः १०
बलेर्वैरोचनस्येह त्रैलोक्यमनुशासतः ।
समीपमाजगामाशु शुक्रो भृगुकुलोद्वहः ॥ ११
तमर्घ्यादिभिरभ्यर्च्य भार्गवं सोऽसुराधिपः।
निषसादासने पश्चाद्विधिवद्भूरिदक्षिणः ॥१२
कथेयमभवत्तत्र त्वया या परिकीर्तिता ।
सुमनोधूपदीपानां संप्रदाने फलं प्रति ॥ १३
ततः पप्रच्छ दैत्येन्द्रः कवीन्द्रं प्रश्नमुत्तमम्१४

बलिरुवाच ।

सुमनोधूपदीपानां किं फलं ब्रह्मवित्तम ।
प्रदानस्य द्विजश्रेष्ठ तद्भवान्वक्तुमर्हति । १५

शुक्र उवाच ।

तपः पूर्वं समुत्पन्नं धर्मस्तस्मादनन्तरम् ।
एतस्मिन्नन्तरे चैव वीरुदोषध्य एव च ॥ १६
सोमस्यात्मा च बहुधा संभूतः पृथिवीतले ।
अमृतं च विषं चैव ये चान्ये तृणजातयः १७
अमृतं मनसः प्रीतिं सद्यस्तृप्तिं ददाति च ।
मनो ग्लपयते तीव्र विषं गन्धेन सर्वशः १८
अमृतं मङ्गल विद्धि महद्विषममङ्गलम् ।
ओषध्यो ह्यमृतं सर्वा विषं तेजोग्निसम्भवम्
मनो ह्लादयते यस्माच्छ्रियं चापि दधाति च
तस्मात्सुमनसः प्रोक्ता नरैः सुकृतकर्मभिः २०
देवताभ्यः सुमनसो यो ददाति नरः शुचिः।
तस्य तुष्यन्ति वै देवास्तुष्टाः पुष्टिं दद्त्यपि
य यमुद्दिश्य दीयेरन्देवं सुमनसः प्रभो ।
मङ्गलार्थं स तेनास्य प्रीतो भवति दैत्यप २२
श्रेयास्तूग्राश्च सौम्याश्च
तेजस्विन्यश्च ताः पृथक् ।
ओषध्यो बहुवीर्या हि
बहुरूपास्तथैव च ॥ २३
यज्ञियानां च वृक्षाणामयज्ञीयान्निबोध मे ।
आसुराणि च माल्यानि दैवतेभ्यो हितानि च

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तनवतितमोऽध्याय ॥ ९७ ॥

९८

आलोकेति ॥ १ ॥ स्तां अभवताम् ॥ ७ ॥ **तपः** वर्णाश्रमधर्म **धर्मो** दयादि **वीरुधो** लता **ओषध्यो** व्रीह्यादय ॥ १९ ॥

रक्षसामुरगाणां च यक्षाणां च तथा प्रियाः ।
मनुष्याणां पितॄणां च कान्तायास्त्वनुपूर्वशः
वन्या ग्राम्याश्चेह तथा कृष्टोप्ताः पर्वताश्रयाः ।
अकण्टकाः कण्टकिनो गन्धरूपरसान्विताः
द्विविधो हि स्मृतो गन्ध इष्टोऽनिष्टश्च पुष्पजः
इष्टगन्धानि देवानां पुष्पाणीति विभावय २७
अकण्टकानां वृक्षाणां श्वेतप्रायाश्च वर्णतः ।
तेषां पुष्पाणि देवानामिष्टानि सतत प्रभो २८
जलजानि च माल्यानि पद्मादीनि च यानि वै
गन्धर्वनागयक्षेभ्यस्तानि दद्याद्विचक्षणः २९
ओषध्यो रक्तपुष्पाश्च कटुकाः कण्टकान्विताः
शत्रूणामभिचारार्थमाथर्वेषु निदर्शिताः ॥ ३०
तीक्ष्णवीर्यास्तु भूतानां दुरालम्भाः सकंटकाः
रक्तभूयिष्ठवर्णाश्च कृष्णाश्चैवोपहारयेत् ॥ ३१
मनोहृदयनंदिन्यो विशेषमधुराश्च याः ।
चारुरूपाः सुमनसो मानुषाणां स्मृता विभो
न तु श्मशानसम्भूता देवतायतनोद्भवाः ।
सन्नयेत्पुष्टियुक्तेषु विवाहेषु रहःसु च ॥ ३३
गिरिसानुरुहाः सौम्या
देवानामुपपादयेत् ।
प्रोक्षिताऽभ्युक्षिताः सौम्या
यथायोग्यं यथास्मृति ॥ ३४
गन्धेन देवास्तुष्यन्ति दर्शनाद्यक्षराक्षसाः ।
नागाः समुपभोगेन त्रिभिरेतैस्तु मानुषाः ३५
सद्यः प्रीणाति देवान्वै ते प्रीता भावयन्त्युत
सङ्कल्पसिद्धा मर्त्यानामीप्सितैश्च मनोरमैः३६
प्रीताः प्रीणन्ति सततं मानिता मानयन्ति च
अवज्ञाताववूताश्च निर्दहन्त्यधमान्नरान् ३७
अत ऊर्ध्वं प्रवक्ष्यामि धूपदानविधेः फलम्
धूपाश्च विविधान्साधूनसाधूंश्च निबोध मे ॥
निर्यासाः सारिणश्चैव कृत्रिमाश्चैव ते त्रयः ।
इष्टोऽनिष्टो भवेद्गन्धस्तन्मे विस्तरशः शृणु ॥
निर्यासाः सल्लकीवर्ज्या देवानां दयिताऽस्तु ते
गुग्गुलुप्रवरस्तेषां सर्वेषामिति निश्चयः ॥ ४०
अगुरुः सारिणां श्रेष्ठो यक्षराक्षसभोगिनाम् ।
दैत्यानां सल्लकीयश्च कांक्षितो यश्च तद्विधः
अथ सर्जरसादीनां गन्धैः पार्थिवदारवैः
फाणितासवसंयुक्तैर्मनुष्याणां विधीयते ४२
देवदानवभूतानां सद्यस्तुष्टिकरः स्मृतः ।
येऽन्ये वैहारिकास्तत्र मानुषाणामिति स्मृताः
य एवोक्ताः सुमनसां प्रदाने गुणहेतवः ।
धूपेष्वपि परिज्ञेयास्त एव प्रीतिवर्धनाः ॥ ४४
दीपदाने प्रवक्ष्यामि फलयोगमनुत्तमम् ।
यथा येन यदा चैव प्रदेया यादृशाश्च ते ४५
ज्योतिस्तेजः प्रकाशं वाऽप्यूर्ध्वगं चापि वर्ण्यते
प्रदानं तेजसां तस्मात्तेजो वर्धयते नृणाम् ४६
अन्धन्तमस्तमिस्रं च दक्षिणायनमेव च ।
उत्तरायणमेतस्माज्ज्योतिर्दान प्रशस्यते ४७
यस्मादूर्ध्वगमेतत्तु तमसश्चैव भेषजम् ।
तस्मादूर्ध्वगतेर्दाता भवेदत्रेति निश्चयः ॥ ४८
देवास्तेजस्विनो ह्यस्मात्प्रभावन्तः प्रकाशकाः
तामसा राक्षसाश्चैव तस्माद्दीपः प्रदीयते ४९
आलोकदानाच्चक्षुष्मान्प्रभायुक्तो भवेन्नरः ।
तान्दत्वा नोपहिंसेत न हरेन्नोपनाशयेत ५०
दीपहर्ता भवेदन्धस्तमोगतिरसुप्रभः ।
दीपप्रदः स्वर्गलोके दीपमालेव राजते ॥ ९१
हविषा प्रथमः कल्पो द्वितीयश्चौषधीरसैः ।
वसामेदोस्थिनिर्यासैर्न कार्यः पुष्टिमिच्छता ५२
गिरिप्रपाते गहने चैत्यस्थाने चतुष्पथे ।
दीपदानं भवेन्नित्य य इच्छेद्भूतिमात्मनः ५३
कुलोद्योतो विशुद्धात्मा प्रकाशत्वं च गच्छति
ज्योतिषां चैव सालोक्यं दीपदाता नरः सदा
बलिकर्मसु वक्ष्यामि गुणान्कर्मफलोदयान् ।
देवयक्षोरगनृणां भूतानामथ रक्षसाम् ॥ ५५
येषां नाग्रभुजो विप्रा देवतातिथिबालकाः ।
राक्षसानेव तान्विद्धि निर्विशंकानमङ्गलान् ॥
तस्मादग्रं प्रयच्छेत देवेभ्यः प्रतिपूजितम् ।
शिरसा प्रयतश्चापि हरेद्बलिमतन्द्रितः ॥ ५७

निर्यासा गुग्गुलुप्रभृतय **सारिणः** काष्ठाग्निसयोगान्नि सरन्त कृत्रिमा अष्टगन्धादय ॥ ३९ ॥ फाणिताश्च ते आसवेन तीव्रगधेन सयुक्ता देवदारुप्रभृतयस्तै । पाठान्तरे फालिता विकसिता मल्लिकादयस्तासा रसैर्मकरदै गंधरससंयुक्तैर्दारवै ॥ ४२ ॥ सद्यस्तुष्टिकरो गन्ध इति शेष । वैहारिका विहारमात्रोपयुक्ता ॥ ४३ ॥ **ज्योतिर्दीपादि तेजः** कान्ति **प्रकाशः** कीर्ति ॥४६॥ तमिस्र अन्धकार अन्धतमो नाम नरकरूपं तथा दक्षिणायनमप्यन्धतम एव । अत उत्तरायणे रात्रौ तमोनाशकं ज्योतिर्देयं नरकनिवृत्त्यर्थम् ॥ ४७ ॥ हविषा घृतेन ओषधीरसै तिलसर्षपादिस्नेहै वसामेदोस्थीनि प्राण्यवयवास्तेषा निर्यासा स्नेहा वसादय पृथग्वा निर्यासात् ॥ ५२ ॥

गृह्णन्ति देवता नित्यमाशंसन्ति सदा गृहान्
बाह्याश्चागन्तवो येऽन्ये यक्षराक्षसपन्नगाः ५८
इतो दत्तेन जीवन्ति देवताः पितरस्तथा ।
ते प्रीताः प्रीणयन्त्येनमायुषा यशसा धनैः ॥
बलयः सह पुष्पैस्तु देवानामुपहारयेत् ।
दधिदुग्धमयाः पुण्याः सुगन्धाः प्रियदर्शनाः
कार्या रुधिरमांसाढ्या बलयो यक्षरक्षसाम् ।
सुरासवपुरस्कारा लाजोल्लापिकभूषिताः ६१
नागानां दयिता नित्यं पद्मोत्पलविमिश्रिताः
तिलान् गुडसुसंपन्नान्भूतानामुपहारयेत् ६२
अग्रदाताग्रभोगी स्याद्बलवीर्यसमन्वितः ।
तस्मादग्रं प्रयच्छेत देवेभ्यः प्रतिपूजितम् ६३
ज्वलन्त्यहरहो वेश्म याश्चास्य गृहदेवताः ।
ताः पूज्या भूतिकामेन प्रसूताग्रप्रदायिना ॥
इत्येतदसुरेन्द्राय काव्यः प्रोवाच भार्गवः ।
सुवर्णाय मनुः प्राह सुवर्णो नारदाय च ॥ ६५
नारदोऽपि मयि प्राह गुणानेतान्महाद्युते ।
त्वमप्येतद्विदित्वेह सर्वमाचर पुत्रक ॥ ६६

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि सुवर्णमनुसंवादो नामाष्टनवतितमोऽध्यायः ॥ ९८ ॥

९९

युधिष्ठिर उवाच ।
श्रुत मे भरतश्रेष्ठ पुष्पधूपप्रदायिनाम् ।
फलं बलिविधाने च तद्भूयो वक्तुमर्हसि ॥ १
धूपप्रदानस्य फलं प्रदीपस्य तथैव च ।
बलयश्च किमर्थं वै क्षिप्यन्ते गृहमेधिभिः ॥ २

भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नहुषस्य च संवादमगस्त्यस्य भृगोस्तथा ॥ ३
नहुषो हि महाराज राजर्षिः सुमहातपाः ।
देवराज्यमनुप्राप्तः सुकृतेनेह कर्मणा ॥ ४
तत्रापि प्रयतो राजन्नहुषस्त्रिदिवे वसन् ।
मानुषीश्चैव दिव्याश्च कुर्वाणो विविधाः क्रियाः
मानुष्यस्तत्र सर्वाः स्म क्रियास्तस्य महात्मनः
प्रवृत्तास्त्रिदिवे राजन्दिव्याश्चैव सनातनाः ६
अग्निकार्याणि समिधः कुशाः सुमनसस्तथा ।
बलयश्चान्नलाजाभिर्धूपन दीपकर्म च ॥ ७
सर्वं तस्य गृहे राज्ञः प्रावर्तत महात्मनः ।
जपयज्ञान्मनोयज्ञांस्त्रिदिवेऽपि चकार सः ॥८
देवानभ्यर्चयञ्चापि विधिवत्स सुरेश्वरः ।
सर्वानेव यथान्यायं यथापूर्वमरिन्दम ॥ ९
अथेन्द्रोऽहमिति ज्ञात्वा अहंकारं समाविशत्
सर्वाश्चैव क्रियास्तस्य पर्यहीयन्त भूपतेः ॥१०
स ऋषीन्वाहयामास वरदानमदान्वितः ।
परिहीनक्रियश्चैव दुर्बलत्वमुपेयिवान् ॥ ११
तस्य वाहयतः कालो मुनिमुख्यांस्तपोधनान्
अहंकाराभिभूतस्य सुमहानभ्यवर्तत ॥ १२
अथ पर्यायशः सर्वान्वाहनायोपचक्रमे ।
पर्यायश्चाप्यगस्त्यस्य समपद्यत भारत ॥ १३
अथागत्य महातेजा भृगुर्ब्रह्मविदां वरः ।
अगस्त्यमाश्रमस्थं वै समुपेत्येदमब्रवीत् ॥ १४
एवं वयमसत्कारं देवेन्द्रस्यास्य दुर्मतेः ।
नहुषस्य किमर्थं वै मर्षयाम महामुने ॥ १५

अगस्त्य उवाच ।
कथमेष मया शक्यः शातु यस्य महामुने ।
वरदेन वरो दत्तो भवतो विदितश्च सः ॥ १६
यो मे दृष्टिपथं गच्छेत्स मे वश्यो भवेदिति ।
इत्यनेन वरं देवो याचितो गच्छता दिवम् ।
एव न दग्धः स मया भवता च न संशयः ।
अन्येनाप्यृषिमुख्येन न दग्धो न च पातितः ॥

लाजोल्लापिकभूषिता उल्लापिक उपरिलापनम् ॥ ६१ ॥
इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टनवतितमोऽध्याय ॥ ९८ ॥

९९

श्रुतमिति ॥ १ ॥ लाजाभि आर्ष ह्रीत्वम् ॥ ७ ॥

अमृतं चैव पानाय दत्तमस्मै पुरा विभो ।
महात्मना तदर्थं च नास्माभिर्विनिपात्यते ॥
प्रायच्छत वरं देवः प्रजानां दुःखकारणम् ।
द्विजेष्वधर्मयुक्तानि स करोति नराधमः २०
तत्र यत्प्राप्तकालं नस्तद्ब्रूहि वदतां वर ।
भवांश्चापि यथा ब्रूयात्तत्कर्ताऽस्मि न संशयः

भृगुरुवाच ।

पितामहनियोगेन भवन्तं सोऽहमागतः ।
प्रतिकर्तुं बलवति नहुषे दैवमोहिते ॥ २२
अद्य हि त्वां सुदुर्बुद्धी रथे योक्ष्यति देवराट् ।
अद्यैनमहमुद्वृत्तं करिष्येऽनिन्द्रमोजसा ॥ २३
अद्येन्द्रं स्थापयिष्यामि पश्यतस्ते शतक्रतुम् ।
सञ्चाल्य पापकर्माणमैन्द्रात् स्थानात्सुदुर्मतिम्
अद्य चासौ कुदेवेन्द्रस्त्वां पदा धर्षयिष्यति ।
दैवोपहतचित्तत्वादात्मनाशाय मन्दधीः २५
च्युत्क्रान्तधर्मं तमहं धर्षणामर्षितो भृशम् ।
अहिर्भवस्वेति रुषा शप्स्ये पापं द्विजद्रुहम् ॥
तत एनं सुदुर्बुद्धिं धिक्शब्दाभिहतत्विषम् ।
धरण्यां पातयिष्यामि पश्यतस्ते महामुने २७
नहुषं पापकर्माणमैश्वर्यबलमोहितम् ।
यथा च रोचते तुभ्यं तथा कर्तास्म्यहं मुने ॥
एवमुक्तस्तु भृगुणा मैत्रावरुणिरव्ययः ।
अगस्त्यः परमप्रीतो बभूव विगतज्वरः ॥ २९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि अगस्त्यभृगुसंवादो नाम नवनवतितमोऽध्यायः ॥ ९९ ॥

१००

युधिष्ठिर उवाच ।

कथं वै स विपन्नश्च कथं वै पातितो भुवि।
कथं चानिन्द्रतां प्राप्तस्तद्भवान्वक्तुमर्हति ॥ १

भीष्म उवाच ।

एवं तयोः संवदतोः क्रियास्तस्य महात्मनः
सर्वा एव प्रवर्तन्ते या दिव्या याश्च मानुषीः
तथैव दीपदानानि सर्वोपकरणानि वै ।
बलिकर्म च यच्चान्यद्गृत्सकाश्च पृथग्विधाः ३
सर्वं तस्य समुत्पन्ना देवेन्द्रस्य महात्मनः ।
देवलोके नृलोके च सदाचारा बुधाः स्मृताः
ते चेद्भवन्ति राजेन्द्र ऋद्ध्यन्ते गृहमेधिनः ।
धूपप्रदानैर्दीपैश्च नमस्कारैस्तथैव च ॥ ५
यथा सिद्धस्य चान्नस्य ग्रहायाग्रं प्रदीयते ।
बलयश्च गृहोद्देशे अतः प्रीयन्ति देवताः ॥ ६
यथा च गृहिणस्तोषो भवेद्वै बलिकर्मणि ।
तथा शतगुणा प्रीतिर्देवतानां प्रजायते ॥ ७
एवं धूपप्रदानं च दीपदानं च साधवः ।
प्रयच्छन्ति नमस्कारैर्युक्तमात्मगुणावहम् ॥ ८
स्नानेनाद्भिश्च यत्कर्म क्रियते वै विपश्चिता ।
नमस्कारप्रयुक्तेन तेन प्रीयन्ति देवताः ॥ ९
पितरश्च महाभागा ऋषयश्च तपोधनाः ।
गृह्याश्च देवताः सर्वाः प्रीयन्ते विधिनार्चिताः
इत्येतां बुद्धिमास्थाय नहुषः स नरेश्वरः ।
सुरेन्द्रत्वं महत्प्राप्य कृतवानेतदद्भुतम् ॥ ११
कस्यचित्त्वथ कालस्य भाग्यक्षय उपस्थिते ।
सर्वमेतदवज्ञाय कृतवानिदमीदृशम् ॥ १२
ततः स परिहीणोऽभूत्सुरेन्द्रो बलदर्पतः ।
धूपदीपोदकविधिं न यथावच्चकार ह ॥ १३
ततोऽस्य यज्ञविषयो रक्षोभिः पर्यबध्यत ।
अथागस्त्यमृषिश्रेष्ठं वाहनायाजुहाव ह ॥ १४
द्रुतं सरस्वतीकूलात् स्मयन्निव महाबलः ।
ततो भृगुर्महातेजा मैत्रावरुणिमब्रवीत् ॥ १५

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे नवनवतितमोऽध्याय ॥ ९९ ॥

१००

कथमिति ॥१॥ वत्सका पुत्रादेर्वार्षिकोत्सवा । वत्स पुत्रादिकोत्सवे इति **मेदिनी** ॥ ३॥ ग्रहाय अतिथये ॥६॥

निमीलय स्वनयने जटां यावद्विशामि ते ।
स्थाणुभूतस्य तस्याथ जटां प्राविशदच्युतः १६
भृगुः स सुमहातेजाः पातनाय नृपस्य च ।
ततः स देवराट् प्राप्तस्तमृषिं वाहनाय वै १७
ततोऽगस्त्यः सुरपतिं वाक्यमाह विशांपते ।
योजयस्वेति मा क्षिप्रं क च देश वहामि ते ॥
यत्र वक्ष्यसि तत्र त्वां नयिष्यामि सुराधिप
इत्युक्तो नहुषस्तेन योजयामास तं मुनिम् १९
भृगुस्तस्य जटान्तस्थो बभूव हृषितो भृशम् ।
न चापि दर्शनं तस्य चकार स भृगुस्तदा २०
वरदानप्रभावज्ञो नहुषस्य महात्मनः ।
न चुकोप तदाऽगस्त्यो युक्तोऽपि नहुषेण वै ॥
तं तु राजा प्रतोदेन चोदयामास भारत ।
न चुकोप स धर्मात्मा ततः पादेन देवराट् ॥
अगस्त्यस्य तदा क्रुद्धो वामेनाभ्यहनच्छिरः ।
तस्मिन् शिरस्यभिहते स जटान्तर्गतो भृगुः
शशाप बलवत्क्रुद्धो नहुषं पापचेतसम् ।
यस्मात्पदाऽहतः क्रोधाच्छिरसीम महामुनिम्
तस्मादाशु महीं गच्छ सर्पो भूत्वा सुदुर्मते ।
इत्युक्तः स तदा तेन सर्पो भूत्वा पपात ह २५
अदृष्टेनाथ भृगुणा भूतले भरतर्षभ ।
भृगुं हि यदि सोऽद्रक्ष्यन्नहुषः पृथिवीपते २६
न च शक्तोऽभविष्यद्वै पातने तस्य तेजसा ।
स तु तैस्तैः प्रदानैश्च तपोभिर्नियमैस्तथा २७
पतितोऽपि महाराज भूतले स्मृतिमानभूत् ।
प्रसादयामास भृगुं शापान्तो मे भवेदिति २८
ततोऽगस्त्यः कृपाविष्टः प्रासादयत तं भृगुम्
शापान्तार्थं महाराज स च प्रादात्कृपान्वितः
भृगुरुवाच ।
राजा युधिष्ठिरो नाम भविष्यति कुलोद्वहः
स त्वां मोक्षयिता शापादित्युक्त्वाऽन्तरधीयत
अगस्त्योऽपि महातेजाः कृत्वा कार्यं शतक्रतोः
स्वमाश्रमपदं प्रायात्पूज्यमानो द्विजातिभिः ॥
नहुषोऽपि त्वया राजंस्तस्माच्छापात्समुद्धृतः
जगाम ब्रह्मभवनं पश्यतस्ते जनाधिप ॥ ३२
तदा स पातयित्वा तं नहुषं भूतल भृगुः ।
जगाम ब्रह्मभवनं ब्रह्मणे च न्यवेदयत् ॥ ३३
ततः शक्रं समानाय्य देवानाह पितामहः ।
वरदानान्मम सुरा नहुषो राज्यमाप्तवान् ३४
स चागस्त्येन क्रुद्धेन भ्रंशितो भूतलं गतः ।
न च शक्यं विना राज्ञा सुरा वर्तयितुं क्वचित
तस्मादय पुनः शक्रो देवराज्येऽभिषिच्यताम्
एव संभाषमाणं तु देवाः पार्थ पितामहम् ३६
एवमस्त्विति संहृष्टाः प्रत्यूचुस्तं नराधिप ।
सोऽभिषिक्तो भगवता देवराज्ये च वासवः
ब्रह्मणा राजशार्दूल यथापूर्वं व्यरोचत ।
एवमेतत्पुरावृत्तं नहुषस्य व्यतिक्रमात् ॥ ३८
स च तैरेव संसिद्धो नहुषः कर्मभिः पुनः ।
तस्मादीपाः प्रदातव्याः सायं वै गृहमेधिभिः
दिव्यं चक्षुरवाप्नोति प्रेत्य दीपस्य दायकः ।
पूर्णचन्द्रप्रतीकाशा दीपदाश्च भवन्त्युत ४०
यावदक्षिनिमेषाणि ज्वलन्ते तावतीः समाः
रूपवान्बलवांश्चापि नरो भवति दीपदः ४१

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि अगस्त्यभृगुसंवादो नाम शततमोऽध्यायः ॥ १०० ॥

१०१

युधिष्ठिर उवाच ।
ब्राह्मणस्वानि ये मन्दा हरन्ति भरतर्षभ ।
नृशंसकारिणो मूढाः क्व ते गच्छन्ति मानवाः

भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
चाण्डालस्य च संवादं क्षत्रबन्धोश्च भारत २

पदा हत पादेन हतवानसि ॥ २८ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे शततमोऽध्याय ॥ १०० ॥

१०१

ब्राह्मणस्वानीति ॥ १ ॥

राजन्य उवाच ।
वृद्धरूपोऽसि चाण्डाल बालवच्च विचेष्टसे
श्वखराणां रजःसेवी कस्मादुद्विजसे गवां ३
साधुभिर्गर्हितं कर्म चाण्डालस्य विधीयते ।
कस्माद्गोरजसा ध्वस्तमपां कुण्डे निषिञ्चसि
चाण्डाल उवाच ।
ब्राह्मणस्य गवां राजन् ह्रियतीनां रजः पुरा
सोममुध्वंसयामास तं सोमं येऽपिबन्द्विजाः
दीक्षितश्च स राजाऽपि क्षिप्रं नरकमाविशत्
सह तैर्याजकैः सर्वैर्ब्रह्मस्वमुपजीव्य तत् ॥ ६
येऽपि तत्रापिबन्क्षीरं घृतं दधि च मानवाः
ब्राह्मणाः सहराजन्याः सर्वे नरकमाविशन्
जघ्नुस्ताःपयसा पुत्रांस्तथा पौत्रान्विधुन्वतीः
पशूनवेक्षमाणाश्च साधुवृत्तेन दम्पती ॥ ८
अहं तत्रावसं राजन्ब्रह्मचारी जितेन्द्रियः ।
तासां मे रजसा ध्वस्तं भैक्षमासीन्नराधिप
चाण्डालोऽहं ततो राजन्भुक्त्वा तद्भवं नृप
ब्रह्मस्वहारी च नृपः सोऽप्रतिष्ठां गतिं ययौ ॥
तस्माद्धरेन्न विप्रस्वं कदाचिदपि किञ्चन ।
ब्रह्मस्वं रजसा ध्वस्तं भुक्त्वा मां पश्य यादृशम्
तस्मात्सोमोऽप्यविक्रेयः पुरुषेण विपश्चिता
विक्रयं त्विह सोमस्य गर्हयन्ति मनीषिणः ॥
ये चैनं क्रीणते तात ये च विक्रीणते जनाः
ते तु वैवस्वतं प्राप्य रौरवं यान्ति सर्वशः ॥
सोमं तु रजसा ध्वस्तं विक्रीणन्विधिपूर्वकम्
श्रोत्रियो वार्धुषी भूत्वा न चिरं स विनश्यति
नरक त्रिंशतं प्राप्य स्वविष्ठामुपजीवति ।
श्वचर्यामभिमानं च सखिदारे च विप्लवम् १५
तुलया धारयन्धर्ममभिमान्यतिरिच्यते ।
श्वानं वै पापिनं पश्य विवर्णं हरिणं कृशम्
अभिमानेन भूतानामिमां गतिमुपागतम् ।
अहं वै विपुले तात कुले धनसमन्विते ॥ १७
अन्यस्मिन् जन्मनि विभो ज्ञानविज्ञानपारगः
अभवं तत्र जानानो ह्येतान्दोषान्मदात्सदा ॥
संरुध्य एव भूतानां पृष्ठमांसमभक्षयम् ।
सोऽहं तेन च वृत्तेन भोजनेन च तेन वै १९
इमामवस्थां संप्राप्तः पश्य कालस्य पर्ययम् ।
आदीप्तमिव चैलान्तं भ्रमरैरिव चार्दितम् २०
धावमानं सुसंरब्धं पश्य मा रजसान्वितम्
स्वाध्यायैस्तु महत्पापं हरन्ति गृहमेधिनः २१
दानैः पृथग्विधैश्चापि यथा प्राहुर्मनीषिणः ।
तथा पापकृतं विप्रमाश्रमस्थं महीपते ॥ २२
सर्वसंगविनिर्मुक्तं छन्दांस्युत्तारयन्त्युत ।
अहं हि पापयोन्यां वै प्रसूतः क्षत्रियर्षभ ।
निश्चयं नाधिगच्छामि कथं मुच्येयमित्युत ॥
जातिस्मरत्वं च मम केनचित्पूर्वकर्मणा ।
शुभेन येन मोक्षं वै प्राप्तुमिच्छाम्यहं नृप २४
त्वामिमं संप्रपन्नाय संशयं ब्रूहि पृच्छते ।
चाण्डालत्वात्कथमहं मुच्येयमिति सत्तम ॥
राजन्य उवाच ।
चाण्डाल प्रतिजानीहि येन मोक्षमवाप्स्यसि
ब्राह्मणार्थे त्यजन्प्राणान्गतिमिष्टामवाप्स्यसि
दत्वा शरीरं कव्याद्भ्यो रणाग्नौ द्विजहेतुकम्
हुत्वा प्राणान्प्रमोक्षस्ते नान्यथा मोक्षमर्हसि
भीष्म उवाच ।
इत्युक्तः स तदा तेन ब्रह्मस्वार्थे परन्तप ।
हुत्वा रणमुखे प्राणान्गतिमिष्टामवाप ह २८
तस्माद्रक्ष्यं त्वया पुत्र ब्रह्मस्वं भरतर्षभ ।
यदीच्छसि महाबाहो शाश्वतीं गतिमात्मनः

रज सेवी रजोगुंठित ॥ ३ ॥ गोरजसा गोपरागेण यथा पुष्पस्य परागो रज कणस्तदान्दोलने परित प्रसर्पति । एव प्रचलन्त्या वेनोरूधस. सकाशात्प्रसरन्त्य क्षीरविप्रुषोऽत्र परागपर्यायेण रज - पदेनोच्यन्ते। तथा च मेदिनी–रज क्लीबं गुणान्तरे। आर्तवे च परागे च रेणुमात्रे च दृश्यते इति । ध्वस्तं व्याप्तं शरीरमिति शेष· । विप्रुण्मात्रेणापि ब्रह्मस्वेन देहस्निग्धत्व माभूदिति भाव. ॥ ४ ॥ ह्रियतीना गोग्रहे केनचिद्राज्ञा ह्रियमाणाना रजः क्षीरं कर्तृ मार्गस्थवल्लीरूपं सोममुध्वंसयामास नाशितवत् ॥ ५ ॥ तत्र गोहर्तृणा पुरे ॥ ७ ॥ ता हृता गावो विधुन्वती स्वस्वस्वामिवत्सवियोगार्त्या शरीरं कंपयन्त्य परै पीतेन स्वपयसा तेषा पुत्रपौत्रान् दंपतीं च जघ्नु सद्योऽल्पायुषश्चक्रु ॥ ८ ॥ तत्र देशे काले च ॥ ९ ॥ प्रसगात्सोमविक्रय निन्दति—तस्मादिति ॥ १२ ॥ एनं ब्रह्मस्वसृष्टम् ॥ १३ ॥ चिर न विनश्यतीति न अपितु चिरं नरकवासान्नश्यत्येव ॥ १४ ॥ श्वचर्या नीचसेवाम् ॥ १५ ॥ श्वचर्यादित्रयं तुलया धारयंस्तुल्यं मन्वानोऽभिमानी धर्ममतिक्रम्य रिच्यतेतिरिक्तो भवति अभिमानी इतरद्वयापेक्षया अत्यन्तं पापीत्यर्थ ॥ १६ ॥ भूतानामुपरि सदा संरब्ध एव कुपित एवेत्यन्वय ॥ १९ ॥ भ्रमैरस्तीक्ष्णतुण्डैर्ह्यमानमिव चैलातवद्दह्यमानमिव क्लिश्यन्तं मा पश्य ॥ २० ॥ रक्ष्यमेव न तु भक्ष्यम् ॥ २९ ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि राजन्यचाण्डालसंवादो नामैकोत्तरशततमोऽध्यायः ॥ १०१ ॥



१०२

युधिष्ठिर उवाच ।

एके लोकाः सुकृतिनः सर्वे त्वाहो पितामह
तत्र तत्रापि भिन्नास्ते तन्मे ब्रूहि पितामह १

भीष्म उवाच ।

कर्मभिः पार्थ नानात्व लोकानां यांति मानवाः
पुण्यान्पुण्यकृतो यान्ति पापान्पापकृतो नराः
अत्राप्युदाहरन्तीममितिहास पुरातनम् ।
गौतमस्य मुनेस्तात संवादं वासवस्य च ३
ब्राह्मणो गौतमः कश्चिन्मृदुर्दान्तो जितेन्द्रियः
महावने हस्तिशिशुं परिद्यूनममातृकम् ॥ ४
तं दृष्ट्वा जीवयामास सानुक्रोशो धृतव्रतः ।
स तु दीर्घेण कालेन बभूवातिबलो महान् ५
तं प्रभिन्नं महानागं प्रभूतं पर्वतोपमम् ।
धृतराष्ट्रस्य रूपेण शक्रो जग्राह हस्तिनम् ॥ ६
ह्रियमाणं तु तं दृष्ट्वा गौतमः संशितव्रतः ।
अभ्यभाषत राजानं धृतराष्ट्रं महातपाः ॥ ७
मा मेऽहार्षीर्हस्तिनं पुत्रमेन
दुःखात्पुष्ट धृतराष्ट्राकृतज्ञ ।
मैत्रं सतां सप्तपदं वदन्ति
मित्रद्रोहो मैव राजन् स्पृशेत्त्वाम् ८
इध्मोदकप्रदातारं शून्यपालं ममाश्रमे ।
विनीतमाचार्यकुले सुयुक्तं गुरुकर्मणि ॥ ९
शिष्टं दान्तं कृतज्ञं च प्रियं च सतत मम ।
न मे विक्रोशतो राजन् हर्तुमर्हसि कुञ्जरम् ॥

धृतराष्ट्र उवाच ।

गवां सहस्रं भवते ददानि
दासीशतं निष्कशतानि पञ्च ।
अन्यच्च वित्तं विविधं महर्षे
किं ब्राह्मणस्येह गजेन कृत्यम् ॥ ११

गौतम उवाच ।

तवैव गावो हि भवन्तु राजन्
दास्यः सनिष्का विविध च रत्नम् ।
अन्यच्च वित्तं विविधं नरेन्द्र
किं ब्राह्मणस्येह धनेन कृत्यम् ॥ १२

धृतराष्ट्र उवाच ।

ब्राह्मणानां हस्तिभिर्नास्ति कृत्यं
राजन्यानां नागकुलानि विप्र ।
स्वं वाहनं नयतो नास्त्यधर्मो
नागश्रेष्ठं गौतमास्मान्निवर्त ॥ १३

गौतम उवाच ।

यत्र प्रेतो नन्दति पुण्यकर्मा
यत्र प्रेतः शोचते पापकर्मा ।
वैवस्वतस्य सदने महात्मं-
स्तत्र त्वाहं हस्तिनं यातयिष्ये ॥ १४

धृतराष्ट्र उवाच ।

ये निष्क्रिया नास्तिकाः श्रद्दधानाः
पापात्मान इन्द्रियार्थे निविष्टाः ।
यमस्य ते यातनां प्राप्नुवन्ति
पर गन्ता धृतराष्ट्रो न तत्र ॥ १५

गौतम उवाच ।

वैवस्वती संयमनी जनानां
यत्रानृतं नोच्यते यत्र सत्यम् ।
यत्राबला बलिनं यातयन्ति
तत्र त्वाहं हस्तिनं यातयिष्ये ॥ १६

धृतराष्ट्र उवाच ।

ज्येष्ठां स्वसार पितर मातरं च
यथा शत्रुं मदमत्ताश्चरन्ति ।
तथाविधानामेष लोको महर्षे
पर गन्ता धृतराष्ट्रो न तत्र १७

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकोत्तरशततमोऽध्याय ॥१०१॥

१०२

एके इति । विद्याभ्यासश्रद्धादितारतम्यात्कर्मफलतारतम्यमस्ति उत नेति प्रश्नार्थ ॥ १ ॥ **कर्मभिरिति** । पुण्यपापयोरिव पुण्यानामवान्तरभेदोऽस्तीत्यर्थ ॥ २ ॥ ब्राह्मणस्य ब्राह्मणसम्बन्धिना धनेन॥१२॥ यातयिष्ये हस्तिन स्वीयं फलं त्वत्तो ग्रहीष्ये इत्यर्थ ॥ १४ ॥

गौतम उवाच ।
मन्दाकिनी वैश्रवणस्य राज्ञो
महाभागा भोगिजनप्रवेद्या ।
गन्धर्वयक्षैरप्सरोभिश्च जुष्टा
तत्र त्वाहं हस्तिनं यातयिष्ये ॥ १८
धृतराष्ट्र उवाच ।
अतिथिव्रताः सुव्रता ये जना वै
प्रतिश्रयं ददति ब्राह्मणेभ्यः ।
शिष्टाशिनः संविभज्याश्रितांश्च
मन्दाकिनीं तेऽपि विभूषयन्ति १९
गौतम उवाच ।
मेरोरग्रे यद्वनं भाति रम्यं
सुपुष्पितं किन्नरीगीतजुष्टम् ।
सुदर्शना यत्र जम्बूर्विशाला
तत्र त्वाहं हस्तिनं यातयिष्ये ॥ २०
धृतराष्ट्र उवाच ।
ये ब्राह्मणा मृदवः सत्यशीला
बहुश्रुताः सर्वभूताभिरामाः ।
येऽधीयते सेतिहासं पुराणं
मध्वाहुत्या जुह्वति वै द्विजेभ्यः ॥ २१
तथाविधानामेष लोको महर्षे
परं गन्ता धृतराष्ट्रो न तत्र ।
यद्विद्यते विदितं स्थानमस्ति
तद्ब्रूहि त्वं त्वरितो ह्येष यामि ॥ २२
गौतम उवाच ।
सुपुष्पितं किं नरराज जुष्टं
प्रियं वनं नन्दनं नारदस्य ।
गन्धर्वाणामप्सरसां च शश्व-
त्तत्र त्वाहं हस्तिनं यातयिष्ये ॥ २३
धृतराष्ट्र उवाच ।
ये नृत्यगीते कुशला जनाः सदा
ह्ययाचमानाः सहिताश्चरन्ति ।
तथाविधानामेष लोको महर्षे
पर गन्ता धृतराष्ट्रो न तत्र ॥ २४
गौतम उवाच ।
यत्रोत्तराः कुरवो भान्ति रम्या
देवैः सार्धं मोदमाना नरेन्द्र ।
यत्राग्नियौनाश्च वसन्ति लोका
अब्योनयः पर्वतयोनयश्च ॥ २५
यत्र शक्रो वर्षति सर्वकामा-
न्यत्र स्त्रियः कामचारा भवन्ति ।
यत्र चेर्ष्या नास्ति नारीनराणां
तत्र त्वाहं हस्तिनं यातयिष्ये ॥ २६
धृतराष्ट्र उवाच ।
ये सर्वभूतेषु निवृत्तकामा
अमांसादा न्यस्तदण्डाश्चरन्ति ।
न हिंसन्ति स्थावरं जङ्गमं च
भूतानां ये सर्वभूतात्मभूताः ॥ २७
निराशिषो निर्ममा वीतरागा
लाभालाभे तुल्यनिन्दाप्रशंसाः ।
तथाविधानामेष लोको महर्षे
पर गन्ता धृतराष्ट्रो न तत्र ॥ २८
गौतम उवाच ।
ततोऽपरे भान्ति लोकाः सनातनाः
सुपुण्यगन्धा विरजा वीतशोकाः ।
सोमस्य राज्ञः सदने महात्मन-
स्तत्र त्वाऽहं हस्तिनं यातयिष्ये २९
धृतराष्ट्र उवाच ।
ये दानशीलान् प्रतिगृह्णते सदा
न चाप्यर्थांश्चाददते परेभ्यः ।
येषामदेयमर्हते नास्ति किंचि-
त्सर्वातिथ्याः सुप्रसादा जनाश्च ३०
ये क्षन्तारो नाभिजल्पन्ति चान्यान्
सत्रीभूताः सततं पुण्यशीलाः ।
तथाविधानामेष लोको महर्षे
परं गन्ता धृतराष्ट्रो न तत्र ३१
गौतम उवाच ।
ततोऽपरे भान्ति लोकाः सनातना
विरजसो वितमस्का विशोकाः ।
आदित्यदेवस्य पदं महात्मन-
स्तत्र त्वाहं हस्तिनं यातयिष्ये ३२
धृतराष्ट्र उवाच ।
स्वाध्यायशीला गुरुशुश्रूषणे रता-
स्तपस्विनः सुव्रताः सत्यसन्धाः ।
आचार्याणामप्रतिकूलभाषिणो
नित्योत्थिता गुरुकर्मस्वचोद्याः ॥३३

अग्नियौना कृष्णयुम्नवदग्निरेव यौन योनिर्येषा ते ॥ २५ ॥ क्षन्तार· क्षमिण सत्रीभूता भूतानामाच्छादनवद्रक्षका ॥३१॥

तथाविधानामेष लोको महर्षे
विशुद्धानां भावितो वाग्यतानाम् ।
सत्ये स्थितानां वेदविदां महात्मनां
परं गन्ता धृतराष्ट्रो न तत्र ॥ ३४
गौतम उवाच ।
ततोऽपरे भान्ति लोकाः सनातनाः
सुपुण्यगन्धा विरजा विशोकाः ।
वरुणस्य राज्ञः सदने महात्मन-
स्तत्र त्वाहं हस्तिनं यातयिष्ये ॥ ३५
धृतराष्ट्र उवाच ।
चातुर्मास्यैर्ये यजन्ते जनाः सदा
तथेष्टीनां दशशतं प्राप्नुवन्ति ।
ये चाग्निहोत्रं जुह्वति श्रद्दधाना
यथाम्नायं त्रीणि वर्षाणि विप्राः ३६
सुधारिणां धर्मसुरे महात्मनां
यथोदिते वर्त्मनि सुस्थितानाम् ।
धर्मात्मनामुद्वहतां गतिं तां
परं गन्ता धृतराष्ट्रो न तत्र ३७
गौतम उवाच ।
इन्द्रस्य लोका विरजा विशोका
दुरन्वयाः कांक्षिता मानवानाम् ।
तस्याहं ते भवने भूरितेजसो
राजन्निमं हस्तिनं यातयिष्ये ३८
धृतराष्ट्र उवाच ।
शतवर्षजीवी यश्च शूरो मनुष्यो
वेदाध्यायी यश्च यज्वाऽप्रमत्तः ।
एते सर्वे शक्रलोकं व्रजन्ति
परं गन्ता धृतराष्ट्रो न तत्र ३९
गौतम उवाच ।
प्राजापत्याः सन्ति लोका महान्तो
नाकस्य पृष्ठे पुष्कला वीतशोकाः ।
मनीषिताः सर्वलोकोद्भवानां
तत्र त्वाहं हस्तिन यातयिष्ये ४०
धृतराष्ट्र उवाच ।
ये राजानो राजसूयाभिषिक्ता
धर्मात्मानो रक्षितारः प्रजानाम् ।
ये चाश्वमेधावभृथे प्लुताङ्गा-
स्तेषां लोका धृतराष्ट्रो न तत्र ४१
गौतम उवाच ।
ततः परं भान्ति लोकाः सनातनाः
सुपुण्यगन्धा विरजा वीतशोकाः ।
तस्मिन्नहं दुर्लभे चाप्यधृष्ये
गवां लोके हस्तिनं यातयिष्ये ॥ ४२
धृतराष्ट्र उवाच ।
यो गोसहस्री शतदः समां समां
गवां शती दश दद्याच्च शक्त्या ।
तथा दशभ्यो यश्च दद्यादिहैकां
पञ्चभ्यो वा दानशीलस्तथैकाम् ४३
ये जीर्यन्ते ब्रह्मचर्येण विप्रा
ब्राह्मीं वाचं परिरक्षन्ति चैव ।
मनस्विनस्तीर्थयात्रापरायणा-
स्ते तत्र मोदन्ति गवां निवासे ॥ ४४
प्रभासं मानसं तीर्थं पुष्कराणि महत्सरः ।
पुण्यं च नैमिषं तीर्थं बाहुदां करतोयिनीम्४५
गयां गयशिरश्चैव विपाशां स्थूलवालुकाम्
कृष्णां गङ्गां पञ्चनदं महाह्रदमथापि च ४६
गोमतीं कौशिकीं पंपां महात्मानो धृतव्रताः
सरस्वतीदृषद्वत्यौ यमुनां ये तु यान्ति च ४७
तत्र ते दिव्यसंस्थाना दिव्यमाल्यधराःशिवाः
प्रयान्ति पुण्यगन्धाढ्या धृतराष्ट्रो न तत्र वै४८
गौतम उवाच ।
यत्र शीतभयं नास्ति न चोष्णभयमण्वपि ।
न क्षुत्पिपासे न ग्लानिर्न दुःखं न सुखं तथा
न द्वेष्यो न प्रियः कश्चिन्न बन्धुर्न रिपुस्तथा ।
न जरामरणे तत्र न पुण्यं न च पातकम् ५०
तस्मिन्विरजसि स्फीते प्रज्ञासत्त्वव्यवस्थिते ।
स्वयंभुभवने पुण्ये हस्तिन मे प्रदास्यसि ५१
धृतराष्ट्र उवाच ।
निर्मुक्ताः सर्वसङ्गैर्ये कृतात्मानो यतव्रताः ।
अध्यात्मयोगसंस्थानैर्युक्ताः स्वर्गगतिं गताः
ते ब्रह्मभवनं पुण्यं प्राप्नुवन्तीह सात्त्विकाः ।
न तत्र धृतराष्ट्रस्ते शक्यो द्रष्टुं महामुने ॥ ५२
गौतम उवाच ।
रथंतरं यत्र बृहच्च गीयते
यत्र वेदी पुण्डरीकैस्तृणोति
यत्रोपयाति हरिभिः सोमपीथी
तत्र त्वाहं हस्तिनं यातयिष्ये ॥ ५४

धर्म एव सुरः क्षुरस्तत्र सुष्ठु आत्मा संधारयन्ति ते सुधारिणस्तेषां धर्मधुरे इत्यपि पाठ ॥ ३७ ॥

बुध्यामि त्वां वृत्रहणं शतक्रतुं
व्यतिक्रमन्तं भुवनानि विश्वा ।
कश्चिन्न वाचा वृजिनं कदाचि-
दकार्षे ते मनसोभिषंगात् ५५

शतक्रतुरुवाच ।

मघवाऽहं लोकपथं प्रजाना-
मन्वागमं परिवादे गजस्य ।
तस्माद्भवान्प्रणतं माऽनुशास्तु
ब्रवीषि यत्तत्करवाणि सर्वम् ५६

गौतम उवाच ।

श्वेतं करेणुं मम पुत्रं हि नागं
यं मेऽहार्षीर्दशवर्षाणि बालम् ।
यो मे वने वसतोऽभूद्वितीय-
स्तमेव मे देहि सुरेन्द्र नागम् ॥ ५७

शतक्रतुरुवाच ।

अयं सुतस्ते द्विजमुख्य नाग
आगच्छति त्वामभिवीक्षमाणः ।
पादौ च ते नासिकयोपजिघ्रते
श्रेयो ममाध्याहि नमश्च तेऽस्तु ५८

गौतम उवाच ।

शिवं सदैवेह सुरेन्द्र तुभ्यं
ध्यायामि पूजां च सदा प्रयुञ्जे ।
ममापि त्वं शक्र शिवं ददस्व
त्वया दत्तं प्रतिगृह्णामि नागम् ५९

शतक्रतुरुवाच ।

येषां वेदा निहिता वै गुहायां
मनीषिणां सत्यवतां महात्मनाम् ।
तेषां त्वयैकेन महात्मनाऽस्मि
वृद्धस्तस्मात्प्रीतिमांस्तेऽहमद्य ६०

हन्तैहि ब्राह्मण क्षिप्रं सह पुत्रेण हस्तिना ।
त्वं हि प्राप्तुं शुभाल्लोकानह्याय च चिराय च
स गौतमं पुरस्कृत्य सह पुत्रेण हस्तिना ।
दिवमाचक्रमे वज्री सद्भिः सह दुरासदम् ॥
इदं यः शृणुयान्नित्यं यः पठेद्वा जितेन्द्रियः।
स याति ब्रह्मणो लोकं ब्राह्मणो गौतमो यथा

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि हस्तिकूटो नाम द्व्यधिकशततमोऽध्यायः ॥ १०२ ॥

१०३

युधिष्ठिर उवाच ।

दानं बहुविधाकारं शान्तिः सत्यमहिंसितम्
स्वदारतुष्टिश्चोक्ता ते फलं दानस्य चैव यत् १
पितामहस्य विदितं किमन्यत्तपसो बलात्
तपसो यत्परं तेऽद्य तन्नो व्याख्यातुमर्हसि २

भीष्म उवाच ।

तपः प्रचक्षते यावत्तावल्लोको युधिष्ठिर ।
मतं ममात्र कौन्तेय तपो नानशनात्परम् ॥ ३
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
भगीरथस्य संवादं ब्रह्मणश्च महात्मनः ॥ ४
अतीत्य सुरलोकं च गवां लोकं च भारत ।
ऋषिलोकं च सोऽगच्छत् भगीरथ इति श्रुतम्
तं तु दृष्ट्वा वचः प्राह ब्रह्मा राजन्भगीरथम् ।
कथं भगीरथागास्त्वमिमं लोकं दुरासदम् ७
न हि देवा न गन्धर्वा न मनुष्या भगीरथ ।
आयान्त्यतस्ततपसः कथं वै त्वमिहागतः ७

ब्रह्मस्वं ब्रह्मलोके गतस्यापि न जीर्यत इत्यर्थवादात्पर्यम् ॥ ६३ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्व्यधिकशततमोऽध्याय ॥ १०२ ॥

—

१०३

दानमिति । अहिंसित अहिंसा ॥ १ ॥ तपस कृच्छ्र-चान्द्रायणादेर्बलादन्यत्किं बलवत्तरं विदितं न किमपि अपि तु तपसस्तपसा मध्ये यत्परम् ॥२॥ लोको भोग्यप्रदेश ॥३॥

भगीरथ उवाच ।
निष्काणां वै ह्यददं ब्राह्मणेभ्यः
शतं सहस्राणि सदैव दानम् ।
ब्राह्मं व्रतं नित्यमास्थाय विद्व-
न्न त्वेवाहं तस्य फलादिहागाम् ॥ ८
दशैकरात्रान्दशपञ्चरात्रा-
नेकादशैकादशकान् क्रतूंश्च ।
ज्योतिष्टोमानां च शतं यदिष्टं
फलेन तेनापि च नागतोऽहम् ॥ ९
यश्चावसं जाह्नवीतीरनित्यः
शतं समास्तप्यमानस्तपोऽहम् ।
अदां च तत्राश्वतरीसहस्र
नारीपुरं न च तेनाहमागाम् ॥ १०
दशायुतानि चाश्वानां गोयुतानि च विंशतिम्
पुष्करेषु द्विजातिभ्यः प्रादां शतसहस्रशः ११
सुवर्णचन्द्रोत्तमधारिणीनां
कन्योत्तमानामददं सहस्रम् ।
षष्टिं सहस्राणि विभूषितानां
जाम्बूनदैराभरणैर्न तेन ॥ १२
दशार्बुदान्यददं गोसवेज्या-
स्वेकैकशो दश गा लोकनाथ ।
समानवत्साः पयसा समन्विताः
सुवर्णकांस्योपदुहा न तेन ॥ १३
आप्तोर्यामेषु नियतमेकैकस्मिन्दशाददम् ।
गृष्टीनां क्षीरदात्रीणां रोहिणीनां शतानि च
दोग्ध्रीणां वै गवां चापि प्रयुतानि दशैव ह ।
प्रादां दशगुणं ब्रह्मन्न तेनाहमिहागतः ॥ १५
वाजिनां बाह्लिजातानामयुतान्यददं दश ।
कर्काणां हेममालानां न च तेनाहमागतः १६
कोटीश्च काञ्चनस्याष्टौ प्रादां ब्रह्मन्दशान्वहम्
एकैकस्मिन् क्रतौ तेन फलेनाहं न चागतः ॥
वाजिनां श्यामकर्णानां हरितानां पितामह ।
प्रादां हेमस्रजां ब्रह्मन्कोटीर्दश च सप्त च १८
ईषादन्तान्महाकायान्काञ्चनस्रग्विभूषितान्
पद्मिनो वै सहस्राणि प्रादां दश च सप्त च ॥
अलंकृतानां देवेश दिव्यैः कनकभूषणैः ।
रथानां काञ्चनाङ्गानां सहस्राण्यददं दश २०
सप्त चान्यानि युक्तानि वाजिभिः समलंकृतैः
दक्षिणावयवाः केचिद्वेदैर्ये संप्रकीर्तिताः २१
वाजपेयेषु दशसु प्रादां तेष्वपि चाप्यहम् ।
शक्रतुल्यप्रभावाणामिज्यया विक्रमेण ह २२
सहस्रं निष्ककण्ठानामददं दक्षिणामहम् ।
विजित्य भूपतीन्सर्वानर्थैरिष्ट्वा पितामह २३
अष्टभ्यो राजसूयेभ्यो न च तेनाहमागतः ।
स्रोतश्च यावद्गङ्गाया श्छन्नमासीज्जगत्पते २४
दक्षिणाभिः प्रवृत्ताभिर्मम नागां च तत्कृते ।
वाजिनां च सहस्रे द्वे सुवर्णशतभूषिते ॥ २५
वरं ग्रामशतं चाहमेकैकस्य त्रिधाऽददम् ।
तपस्वी नियताहारः शममास्थाय वाग्यतः २६
दीर्घकालं हिमवति गङ्गायाश्च दुरुत्सहाम् ।
मूर्ध्ना धारां महादेवः शिरसा यामधारयत् ।
न तेनाप्यहमागच्छं फलेनेह पितामह ॥ २७
शम्याक्षेपैरयजं यच्च देवा-
न्साद्यस्कानामयुतैश्चापि यत्तत ।
त्रयोदशद्वादशाहैश्च देव
सपौण्डरीकान्न च तेषां फलेन २८
अष्टौ सहस्राणि ककुद्मिनामहं
शुक्लर्षभाणामददं द्विजेभ्यः ।
एकैकं वै काञ्चनं शृंगमेभ्यः
पत्नीश्चैषामददं निष्ककण्ठीः ॥ २९
हिरण्यरत्ननिचयानददं रत्नपर्वतान् ।
धनधान्यसमृद्धाश्च ग्रामाश्चान्ये सहस्रशः ३०
शत शतानां गृष्टीनामददं चाप्यतन्द्रितः ।
इष्ट्वाऽनेकैर्महायज्ञैर्ब्राह्मणेभ्यो न तेन च ॥ ३१
एकादशाहैरयजं सदक्षिणै-
र्द्विर्द्वादशाहैरथमेधैश्च देव ।
आर्कायणैः षोडशभिश्च ब्रह्मं-
स्तेषां फलेनेह न चागतोऽस्मि ॥ ३२

एकरात्रादय क्रतुविशेषा ॥ ९ ॥ नारीपुर कन्या-समूहमदाम् ॥ १० ॥ चन्द्रो भूषणविशेष न तेनाहमागामि-त्यनुवर्तते ॥ १२ ॥ एकैकशो ब्राह्मणाय दश गा ॥ १३ ॥ **आप्तोर्यामः** सोमयाग ॥ १४ ॥ कर्क कर्कोटके वह्नौ शुक्राश्वे दर्पणे घटे इति **मेदिनी** । कर्काणा शुक्लाश्वानाम् १६ पद्मिन. पद्मचिह्नान् ॥ १९ ॥ दक्षिणारूपा यज्ञाङ्गभूता दक्षिणावयवा ॥ २१ ॥ निष्ककण्ठाना युद्धे जिताना राज्ञा सहस्रं विप्रेभ्यो विप्रवचनादक्षिणा अददं उत्सृष्टवान् ॥ २३ ॥ **शम्या** पृथुबुध्न काष्ठदण्ड स बलेनाक्षिप्तो यावद्दूर पतति तावद्देशो यस्य वेदिकाया भवति स शम्या-क्षेपो याग । तथा साद्यस्कादयो यागविशेषा ॥ २८ ।

निष्कैककण्ठमददं योजनायत
तद्विस्तीर्णं काञ्चनपादपानाम् ।
वन वृतानां रत्नविभूषितानां
न चैव तेषामागतोऽहं फलेन ॥ ३३
तुरायणं हि व्रतमप्यधृष्य-
मक्रोधनोऽकरवं त्रिंशतोऽब्दान् ।
शतं गवामष्टशतानि चैव
दिने दिने ह्यददं ब्राह्मणेभ्यः ॥ ३४
पयस्विनीनामथ रोहिणीनां
तथैवान्याननडुहो लोकनाथ ।
प्रादां नित्यं ब्राह्मणेभ्यः सुरेश
नेहागतस्तेन फलेन चाहम् ॥ ३५
त्रिंशदग्नीनह ब्रह्मन्नयजं यच्च नित्यदा ।
अष्टाभिः सर्वमेधैश्च नरमेधैश्च सप्तभिः ॥ ३६
दशभिर्विश्वजिद्भिश्च शतैरष्टादशोत्तरैः ।
न चैव तेषां देवेश फलेनाहमिहागमम् ॥ ३७
सरय्वां बाहुदायां च गङ्गायामथ नैमिषे ।
गवां शतानामयुतमददं न च तेन वै ॥ ३८
इन्द्रेण गुह्यं निहितं वै गुहायां
यद्भार्गवस्तपसेहाभ्यविन्दत् ।
जाज्वल्यमानमुशनस्तेजसेह
तत्साधयामासमहं वरेण्य ॥ ३९
ततो मे ब्राह्मणास्तुष्टास्तस्मिन्कर्मणि साधिते
सहस्रमृषयश्चासन्ये वै तत्र समागताः ॥ ४०
उक्तस्तैरस्मि गच्छ त्वं ब्रह्मलोकमिति प्रभो
प्रीतेनोक्तसहस्रेण ब्राह्मणानामहं प्रभो ।
इमं लोकमनुप्राप्तो माभूत्तेऽत्र विचारणा ४१
कामं यथावद्विहितं विधात्रा
पृष्टेन वाच्यं तु मया यथावत् ।
तपो हि नान्यच्चानशनान्मतं मे
नमोऽस्तु ते देववर प्रसीद ॥ ४२

भीष्म उवाच ।

इत्युक्तवन्तं ब्रह्मा तु राजानं स भगीरथम् ।
पूजयामास पूजार्हं विधिदृष्टेन कर्मणा ॥ ४३
तस्मादनशनैर्युक्तो विप्रान्पूजय नित्यदा ।
विप्राणां वचनात्सर्वं परत्रेह च सिध्यति ४४
वासोभिरन्नैर्गोभिश्च शुभैर्नैवेशिकैरपि ।
शुभैः सुरगणैश्चापि स्तोष्या एव द्विजास्तथा
एतदेव परं गुह्यमलोभेन समाचर ॥ ४५

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि ब्रह्मभगीरथसंवादे त्र्यधिकशततमोऽध्यायः ॥ १०३ ॥

१०४

युधिष्ठिर उवाच ।

शतायुरुक्तः पुरुषः शतवीर्यश्च जायते ।
कस्मान्म्रियन्ते पुरुषा बाला अपि पितामह
आयुष्मान्केन भवति अल्पायुर्वाऽपि मानवः
केन वा लभते कीर्तिं केन वा लभते श्रियम्
तपसा ब्रह्मचर्येण जपहोमैस्तथौषधैः ।
कर्मणा मनसा वाचा तन्मे ब्रूहि पितामह॥ ३

भीष्म उवाच ।

अत्र तेऽहं प्रवक्ष्यामि यन्मां त्वमनुपृच्छसि
अल्पायुर्येन भवति दीर्घायुर्वाऽपि मानवः ४
येन वा लभते कीर्तिं येन वा लभते श्रियम्
यथा वर्तयन्पुरुषः श्रेयसा सप्रयुज्यते ॥ ५
आचाराल्लभते ह्यायुराचाराल्लभते श्रियम् ।
आचारात्कीर्तिमाप्नोति पुरुषः प्रेत्य चेह च

काञ्चनमयाना वृक्षाणा चूताना नानावर्णरत्नखचिताना वनमित्यर्थ ॥ ३३ ॥ अग्नीन् अग्निचयनानि ॥ ३६ ॥ गुहाया निहितं गोपित गुह्यं यदनशनं तपसा अभ्यविन्दत् आज्ञासीत् उशनस्तेजसा शुक्रस्य बलेन ज्वाज्वल्यमानम् । तच्च वाक्यशेषात्सर्वभोगत्यागात्मकमनशनं सर्वभोगैर्ब्राह्मणाना सतर्पण च साधयामासमित्यार्षम् ॥ ३९ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्र्यधिकशततमोऽध्याय ॥ १०३ ॥

१०४

शतायुरिति ॥१॥ वर्तयन् अनुतिष्ठन् ॥ ५ ॥

दुराचारो हि पुरुषो नेहायुर्विन्दते महत् ।
त्रसन्ति यस्माद्भूतानि तथा परिभवन्ति च
तस्मात्कुर्यादिहाचारं यदिच्छेद्भूतिमात्मनः ।
अपि पापशरीरस्य आचारो हन्त्यलक्षणम् ८
आचारलक्षणो धर्मः सन्तश्चारित्रलक्षणाः ।
साधूनां च यथावृत्तमेतदाचारलक्षणम् ॥ ९
अप्यदृष्टं श्रवादेव पुरुषं धर्मचारिणम् ।
भूतिकर्माणि कुर्वाणं तं जनाः कुर्वते प्रियम् ॥
ये नास्तिका निष्क्रियाश्च गुरुशास्त्राभिलंघिनः
अधर्मज्ञा दुराचारास्ते भवन्ति गतायुषः ११
व्रिशीला भिन्नमर्यादा नित्यं संकीर्णमैथुनाः
अल्पायुषो भवन्तीह नरा निरयगामिनः १२
सर्वलक्षणहीनोपि समुदाचारवान्नरः ।
श्रद्दधानोऽनसूयुश्च शतं वर्षाणि जीवति १३
अक्रोधनः सत्यवादी भूतानामविहिंसकः ।
अनसूयुरजिह्मश्च शतं वर्षाणि जीवति ॥ १४
लोष्टमर्दी तृणच्छेदी नखखादी च यो नरः ।
नित्योच्छिष्टः सकुसुको नेहायुर्विन्दते महत्
ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिन्तयेत् ।
उत्थायाचम्य तिष्ठेत पूर्वां सन्ध्यां कृताञ्जलिः
एवमेवापरां सन्ध्यां समुपासीत वाग्यतः ।
नेक्षेतादित्यमुद्यन्त नास्तं यान्तं कदाचन ॥
नोपसृष्टं न वारिस्थं न मध्यं नभसो गतम् ।
ऋषयो नित्यसन्ध्यत्वादीर्घमायुरवाप्नुवन् १८
तस्मात्तिष्ठेत्सदा पूर्वां पश्चिमां चैव वाग्यतः
ये न पूर्वामुपासन्ते द्विजाः सन्ध्यां न पश्चिमां
सर्वांस्तान् धार्मिको राजा
शूद्रकर्माणि कारयेत् ।
परदारा न गन्तव्या
सर्ववर्णेषु कर्हिचित् ॥ २०
न हीदृशमनायुष्यं लोके किञ्चन विद्यते ।
यादृशं पुरुषस्येह परदारोपसेवनम् ॥ २१
यावन्तो रोमकूपाः स्युःस्त्रीणां गात्रेषु निर्मिताः
तावद्वर्षसहस्राणि नरकं पर्युपासते ॥ २२
प्रसाधनं च केशानामंजनं दन्तधावनम् ।
पूर्वाह्ण एव कार्याणि देवतानां च पूजनम् ॥
पुरीषमूत्रे नोदीक्षेन्नाधितिष्ठेत्कदाचन ।
नातिकल्यं नातिसायं न च मध्यदिने स्थिते
नाज्ञातैः सह गच्छेत नैको न वृषलैः सह ।
पन्था देयो ब्राह्मणाय गोभ्यो राजभ्य एव च
वृद्धाय भारतप्ताय गर्भिण्यै दुर्बलाय च ।
प्रदक्षिणं च कुर्वीत परिज्ञातान्वनस्पतीन् ॥
चतुष्पथान्प्रकुर्वीत सर्वानेव प्रदक्षिणान् ।
मध्यन्दिने निशाकाले अर्धरात्रे च सर्वदा ॥
चतुष्पथं न सेवेत उभे संध्ये तथैव च ।
उपानहौ च वस्त्रं च धृतमन्यैर्न धारयेत् ।
ब्रह्मचारी च नित्यं स्यात्पाद पादेन नाक्रमेत्
अमावास्यां पौर्णमास्यां चतुर्दश्यां च सर्वशः
अष्टम्यां सर्वपक्षाणां ब्रह्मचारी सदा भवेत् ॥
वृथामांसं न खादेत पृष्ठमांसं तथैव च ।
आक्रोशं परिवाद च पैशुन्यं च विवर्जयेत् ॥
नारुन्तुदः स्यान्न नृशंसवादी
न हीनतः परमभ्याददीत ।
ययाऽस्य वाचा पर उद्विजेत
न तां वदेद्रुशतीं पापलोक्याम् ३१
वाक्सायका वदनान्निष्पतन्ति
यैराहतः शोचति रात्र्यहानि ।
परस्य वा मर्मसु ये पतन्ति
तान्पण्डितो नावसृजेत्परेषु ॥ ३२
रोहते सायकैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम्
कर्णिनालीकनाराचान्निर्हरन्ति शरीरतः ।
वाक्शल्यस्तु न निर्हर्तुं शक्यो हृदिशयो हि सः
हीनाङ्गानतिरिक्ताङ्गा-
न्विद्याहीनान्विगर्हितान् ।
रूपद्रविणहीनाश्च
सत्यहीनांश्च नाक्षिपेत् ॥ ३५
नास्तिक्यं वेदनिंदां च देवतानां च कुत्सनम्
द्वेषस्तम्भोभिमान च तैक्ष्ण्यं च परिवर्जयेत्
परस्य दण्डं नोद्यच्छेत्क्रुद्धो नैन निपातयेत् ।
अन्यत्र पुत्राच्छिष्याच्च शिक्षार्थं ताडनं स्मृतम्
न ब्राह्मणान्परिवदेन्नक्षत्राणि न निर्दिशेत् ।
तिथिं पक्षस्य न ब्रूयात्तथास्यायुर्न रिष्यते ३८
कृत्वा मूत्रपुरीषे तु रथ्यामाक्रम्य वा पुनः ।
पादप्रक्षालनं कुर्यात्स्वाध्याये भोजने तथा

अलक्षणं कुष्ठापस्मारादि विरुद्ध लक्षणम् ॥ ८ ॥ श्रवात् श्रवणात् त पुरुषम् जना साधव ॥ १० ॥ सकुसुको दुर्जन अस्थिरश्च संकुसुकोऽस्थिर इत्यमर ॥ १५ ॥ उपसृष्टं राहुग्रस्तम् ॥ १८ ॥ न रिष्यते न हिंस्यते ॥ ३८ ॥

त्रीणि देवाः पवित्राणि ब्राह्मणानामकल्पयन्
अदृष्टमद्भिर्निर्णिक्तं यच्च वाचा प्रशस्यते ॥ ४०
संयावं कृसरं मांसं शष्कुलीं पायसं तथा।
आत्मार्थं न प्रकर्तव्यं देवार्थं तु प्रकल्पयेत् ४१
नित्यमग्निं परिचरेद्भिक्षां दद्याच्च नित्यदा।
वाग्यतो दन्तकाष्ठं च नित्यमेव समाचरेत् ॥
न चाभ्युदितशायी स्यात्प्रायश्चित्ती तथा भवेत्
मातापितरमुत्थाय पूर्वमेवाभिवादयेत् ॥ ४३
आचार्यमथवाप्यन्यं तथायुर्विन्दते महत्।
वर्जयेद्दन्तकाष्ठानि वर्जनीयानि नित्यशः ४४
भक्षयेच्छास्त्रदृष्टानि पर्वस्वपि विवर्जयेत्।
उदङ्मुखश्च सततं शौचं कुर्यात्समाहितः ४५
अकृत्वा देवपूजां च नाचरेद्दन्तधावनम्।
अकृत्वा देवपूजां च नाभिगच्छेत्कदाचन।
अन्यत्र तु गुरुं वृद्धं धार्मिकं वा विचक्षणम् ॥
अवलोक्यो न चादर्शो मलिनो बुद्धिमत्तरैः।
न चास्नातां स्त्रियं गच्छेद्गर्भिणीं वा कदाचन
उदङ्शिरा न स्वपेत तथा प्रत्यक्शिरा न च
प्राक्शिरास्तु स्वपेद्विद्वानथवा दक्षिणाशिराः
न भग्ने नावशीर्णे च शयने प्रस्वपीत च।
नान्तर्धाने न संयुक्ते न च तिर्यक्कदाचन ४९
न चापि गच्छेत्कार्येण समयाद्वापि नास्तिकैः
आसनं तु पदाऽऽकृष्य न प्रसज्जेत्तथा नरः ॥
न नग्नः कर्हिचित्स्नायान्न निशायां कदाचन
स्नात्वा च नावमृज्येत गात्राणि सुविचक्षणः
न चानुलिंपेदस्नात्वा स्नात्वा वासो न निर्धुनेत
न चैवार्द्राणि वासांसि नित्यं सेवेत मानवः
स्रजश्च नावकृष्येत न बहिर्धारयीत च।
उदक्यया च सम्भाषां न कुर्वीत कदाचन ॥
नोत्सृजेत पुरीषं च क्षेत्रे ग्रामस्य चान्तिके।
उभे मूत्रपुरीषे तु नाप्सु कुर्यात्कदाचन ॥ ५४
अन्नं बुभुक्षमाणस्तु त्रिर्मुखेन स्पृशेदपः।
भुक्त्वा चान्नं तथैव त्रिर्द्विः पुनः परिमार्जयेत्
प्राङ्मुखो नित्यमश्नीयाद्वाग्यतोऽन्नमकुत्सयन्
प्रस्कन्दयेच्च मनसा भुक्त्वा चाग्निमुपस्पृशेत्
आयुष्यं प्राङ्मुखो भुङ्क्ते यशस्यं दक्षिणामुखः
धन्यं पश्चान्मुखो भुङ्क्ते ऋतं भुंक्ते उदङ्मुखः
अग्निमालभ्य तोयेन सर्वान्प्राणानुपस्पृशेत्।
गात्राणि चैव सर्वाणि नाभिं पाणितले तथा
नाधितिष्ठेत्तुषं जातु केशभस्मकपालिकाः।
अन्यस्य चाप्यवस्नातं दूरतः परिवर्जयेत ५९
शान्तिहोमांश्च कुर्वीत सावित्राणि च धारयेत
निषण्णश्चापि खादेत न तु गच्छन्कदाचन ॥
मूत्रं नोत्तिष्ठता कार्यं न भस्मनि न गोव्रजे।
आर्द्रपादस्तु भुञ्जीत नार्द्रपादस्तु संविशेत ६१
आर्द्रपादस्तु भुञ्जानो वर्षाणां जीवते शतम्।
त्रीणि तेजांसि नोच्छिष्ट आलभेत कदाचन
अग्निं गां ब्राह्मणं चैव तथा ह्यायुर्न रिष्यते।
त्रीणि तेजांसि नोच्छिष्ट उदीक्षेत कदाचन
सूर्याचन्द्रमसौ चैव नक्षत्राणि च सर्वशः।
ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति
प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते ।
अभिवादयीत वृद्धांश्च दद्याच्चैवासनं स्वयम्
कृताञ्जलिरुपासीत गच्छन्त पृष्ठतोऽन्वियात्।
न चासीतासने भिन्ने भिन्नकांस्ये च वर्जयेत
नैकवस्त्रेण भोक्तव्यं न नग्नः स्नातुमर्हति।
स्वप्तव्यं नैव नग्नेन न चोच्छिष्टोऽपि संविशेत
उच्छिष्टो न स्पृशेच्छीर्षं सर्वे प्राणास्तदाश्रयाः।
केशग्रहं प्रहारांश्च शिरस्येतान्विवर्जयेत ६८
न संहताभ्यां पाणिभ्यां कंडूयेदात्मनः शिरः
न चाभीक्ष्णं शिरः स्नायात्तथास्यायुर्न रिष्यते
शिरस्नातस्तु तैलैश्च नाङ्गं किञ्चिदपि स्पृशेत
तिलसृष्टं न चाश्नीयात्तथास्यायुर्न रिष्यते ॥
नाध्यापयेत्तथोच्छिष्टो नाधीयीत कदाचन ।
वाते च पूतिगन्धे च मनसाऽपि न चिन्तयेत
अत्र गाथा यमोद्गीताः कीर्तयन्ति पुराविदः
आयुरस्य निकृन्तामि प्रजास्तस्यादृते तथा ॥

त्रीणि भोज्यानि अदृष्टं शूद्रोदक्यादिभि ॥४०॥नाभिगच्छेत् राजादीन् प्रति ॥४६॥ अज्ञाताऽनुमतीत्वेन कामुकत्वेन वा ॥४७॥ अन्तर्धाने अत्यंतमन्धकारे संयुक्ते इतरेण स्त्र्यादिना ॥ ४९ ॥ प्रस्कंदयेदन्नशेषं किंचित्त्यजेत् भुक्त्वा च मनसाऽग्निमुपस्पृशेत् ॥ ५६ ॥ ऋतं नि श्रेयसमिच्छन्निति शेष ॥ ५७ ॥ प्राणान्नासादीन् ऊर्ध्वच्छिद्राणि ॥ ५८ ॥ अवस्नातं स्नानजलम्॥५९॥ सावित्राणि मन्त्राविशेषान् ॥६०॥ न रिष्यते हिंस्यते ॥ ६९ ॥ तिलसृष्टं तिलसंयुक्तं सट भक्ष्यम् ॥ ७० ॥ न चिन्तयेत् वेदम् ॥ ७१ ॥

उच्छिष्टो यः प्राद्रवति
स्वाध्यायं चाधिगच्छति ।
यश्चानध्यायकालेऽपि
मोहाद्भ्यस्यति द्विजः ॥ ७३
तस्य वेदः प्रणश्येत आयुश्च परिहीयते ।
तस्माद्युक्तो ह्यनध्याये नाधीयीत कदाचन ॥
प्रत्यादित्यं प्रत्यनलं प्रति गां च प्रति द्विजान्
ये मेहन्ति च पन्थानं ते भवन्ति गतायुषः ॥
उभे मूत्रपुरीषे तु दिवा कुर्यादुदङ्मुखः ।
दक्षिणाभिमुखो रात्रौ तथा ह्यायुर्न रिष्यते
त्रीन्कृशान्नावजानीयाद्दीर्घमायुर्जिजीविषुः ।
ब्राह्मण क्षत्रियं सर्प सर्वे ह्याशीविषास्त्रयः ॥
दहत्याशीविषः क्रुद्धो यावत्पश्यति चक्षुषा ।
क्षत्रियोऽपि दहेत्क्रुद्धो यावत्स्पृशति तेजसा ॥
ब्राह्मणस्तु कुलं हन्याद्ध्यानेनावेक्षितेन च ।
तस्मादेतत्त्रयं यत्नादुपसेवेत पण्डितः ॥ ७९
गुरुणा चैव निर्बन्धो न कर्तव्यः कदाचन ।
अनुमान्यः प्रसाद्यश्च गुरुः क्रुद्धो युधिष्ठिर ८०
सम्यङ्मिथ्या प्रवृत्तेऽपि वर्तितव्यं गुराविह
गुरुनिन्दा दहत्यायुर्मनुष्याणां न संशयः ८१
दूरादावसथान्मूत्रं दूरात्पादावसेचनम् ।
उच्छिष्टोत्सर्जनं चैव दूरे कार्यं हितैषिणा ८२
रक्तमाल्यं न धार्यं स्याच्छुक्लं धार्यं तु पण्डितैः
वर्जयित्वा तु कमलं तथा कुवलयं प्रभो ॥ ८३
रक्तं शिरसि धार्यं तु
तथा वानेयमित्यपि ।
काञ्चनीयाऽपि माला या
न सा दुष्यति कर्हिचित् ॥ ८४
स्नातस्य वर्णकं नित्यमार्द्रं दद्याद्विशांपते।
विपर्ययं न कुर्वीत वाससो बुद्धिमान्नरः ॥ ८५
तथा नान्यधृतं धार्यं न चापदशमेव च ।
अन्यदेव भवेद्वासः शयनीये नरोत्तम ॥ ८६
अन्यद्वध्यासु देवानामर्चायामन्यदेव हि ।
प्रियङ्गुचन्दनाभ्यां च बिल्वेन तगरेण च ॥
पृथगेवानुलिम्पेत केसरेण च बुद्धिमान् ।
उपवासं च कुर्वीत स्नातः शुचिरलंकृतः ८८
पर्वकालेषु सर्वेषु ब्रह्मचारी सदा भवेत् ।
समानमेकपात्रे तु भुञ्जेन्नान्न जनेश्वर ॥ ८९
नालीढया परिहृतं भक्षयीत कदाचन ।
तथा नोद्धृतसाराणि प्रेक्षते नाप्रदाय च ९०
न संनिकृष्टे मेधावी नाशुचेर्न च सत्सु च ।
प्रतिषिद्धान्न धर्मेषु भक्ष्यान्भुञ्जीत पृष्टतः ९१
पिप्पलं च वटं चैव शणशाकं तथैव च ।
उदुम्बरं न खादेच्च भवार्थी पुरुषोत्तमः ॥ ९२
आजं गव्यं तथा मांसं मायूरं चैव वर्जयेत् ।
वर्जयेच्छुष्कमांसं च तथा पर्युषितं च यत् ९३
न पाणौ लवणं विद्वान्प्राश्नीयान्न च रात्रिषु ।
दधिसक्तून्न भुञ्जीत वृथामांसं च वर्जयेत् ९४
सायंप्रातश्च भुञ्जीत नान्तराले समाहितः ।
बालेन तु न भुञ्जीत परश्राद्धं तथैव च ॥ ९५
वाग्यतो नैकवस्त्रश्च नासंविष्टः कदाचन ।
भूमौ सदैव नाश्नीयान्नानासीनो न शब्दवत्॥
तोयपूर्वं प्रदायान्नमतिथिभ्यो विशांपते ।
पश्चाद्भुञ्जीत मेधावी न चाप्यन्यमना नरः९७
समानमेकपङ्क्त्यां तु भोज्यमन्नं नरेश्वर ।
विष हालाहलं भुङ्क्ते योऽप्रदाय सुहृज्जने ॥
पानीयं पायसं सक्तून्दधिसर्पिर्मधून्यपि ।
निरस्य शेषमन्येषां न प्रदेयं तु कस्यचित् ९९
भुञ्जानो मनुजव्याघ्र नैव शङ्कां समाचरेत् ।
दधि चाप्यनुपानं वै न कर्तव्यं भवार्थिना ॥

मिथ्याप्रवृत्तेऽपि सम्यक् वर्तितव्यम्॥८१॥ विपर्ययं औत्तरार्धर्यम् ॥८५॥ अपदश दशाहीनम् ॥ ८६॥ प्रियंगु राजिका 'प्रियंगु स्त्री राजिकाकणयोरपि' इति मेदिनी ॥८७॥ तगरस्थगरं महाराष्ट्राणा गावबाणइति प्रसिद्धम्। पृथगिति। राजिकयानुलेपनं कृत्वा स्नात्वा चन्दनाद्यन्यतमेनानुलेपनं कार्यमित्यर्थं उपवास ब्रह्मचर्यम् ॥८८॥ आलीढया रजस्वलया परिकृतं संपादितं नालीढ नापरिहितमिति पाठे आलीढ गवाद्याघ्रात अपरिहितं परिषेचनहीनं,उद्धृतसाराणि क्षीरादीनि प्रेक्षते याचकाय ॥ ९० ॥ मेधावी ना पुरुष अशुचे सान्निकृष्टे न भुंजीत। मेधावी अशुचेरिति गौडा धर्मेषु श्राद्धादिषु प्र तिषिद्धान्भक्षान्पृष्टत श्राद्धाद्यभावे न भुञ्जीत ॥९१॥ बालेन केशेन उपलक्षितं परश्राद्ध शत्रुश्राद्धम् ॥९५॥सदैव न सदा नैवेति सम्बन्ध ॥ ९६ ॥ निरस्य पानीयादीन्विहाय अन्येषा भक्षाणा शेषमन्यस्मै न देय पानीयादेरपि शेष पुत्रादिभ्य एव देयं पितुर्ज्येष्ठस्य च भ्रातुरुच्छिष्टं भोज्यमिति स्मरणात्। अन्येषा तद्भोजनस्य निषेधात्। गौडास्तु निरस्य शेषमेतेषा न प्रदेयमिति पठन्ति तत्परिमल्यापत्तेरुपेक्ष्यते ॥ ९९ ॥ शङ्का जीर्यति नवेति अन्नस्यापूतत्वात् वा अधिकत्वाच्छङ्कया नैव भोक्तव्यमित्यर्थं दधीति तक्रं त्वनुपान कर्तव्यमेव यथेष्टं भुक्ष्व मामैषीस्तक्र सलवणं पिवेति तस्य दृष्टार्थत्वोक्ते ॥ १०० ॥

आचम्य चैकहस्तेन परिप्लाव्यं तथोदकम् ।
अंगुष्ठं चरणस्याथ दक्षिणस्यावसेचयेत् ॥ १
पार्णिं मूर्ध्नि समाधाय स्पृष्ट्वा चाग्निं समाहितः
ज्ञातिश्रैष्ठ्यमवाप्नोति प्रयोगकुशलो नरः २
अद्भिः प्राणान्समालभ्य नाभिं पाणितले तथा
स्पृशंश्चैव प्रतिष्ठेत न चाप्यार्द्रेण पाणिना ॥ ३
अङ्गुष्ठस्यान्तराले च ब्राह्मं तीर्थमुदाहृतम् ।
कनिष्ठिकायाः पश्चात्तु दैवतीर्थमिहोच्यते ४
अङ्गुष्ठस्य च यन्मध्यं प्रदेशिन्याश्च भारत ।
तेन पित्र्याणि कुर्वीत स्पृष्ट्वापो न्यायतः सदा
परापवादं न ब्रूयान्नाप्रियं च कदाचन ।
न मन्युः कश्चिदुत्पाद्यः पुरुषेण भवार्थिना ६
पतितैस्तु कथां नेच्छेद्दर्शनं च विवर्जयेत् ।
ससर्गं च न गच्छेत तथाऽऽयुर्विन्दते महत् ७
न दिवा मैथुनं गच्छेन्न कन्यां न च बन्धकीम्
न चास्नातां स्त्रियं गच्छेत्तथाऽऽयुर्विन्दते महत्
स्वे स्वे तीर्थे समाचम्य कार्ये समुपकल्पिते ।
त्रिःपीत्वाऽऽपो द्विः प्रमृज्य कृतशौचो भवेन्नरः
इन्द्रियाणि सकृत्स्पृश्य त्रिरभ्युक्ष्य च मानवः
कुर्वीत पित्र्यं दैवं च वेददृष्टेन कर्मणा ॥ १०
ब्राह्मणार्थे च यच्छौचं तच्च मे शृणु कौरव ।
पवित्रं च हितं चैव भोजनाद्यं तयोस्तथा ११
सर्वशौचेषु ब्राह्मेण तीर्थेन समुपस्पृशेत् ।
निष्ठीव्य तु तथा क्षुत्वा स्पृश्यापो हि शुचिर्भवेत
वृद्धो ज्ञातिस्तथा मित्रं दरिद्रो यो भवेदपि ।
गृहे वासयितव्यास्ते धन्यमायुष्यमेव च १३
गृहे पारावता धन्याः शुकाश्च सहसारिकाः
गृहेष्वेते न पापाय तथा वै *तैलपायिकाः ।
उद्दीपकाश्च गृध्राश्च कपोता भ्रमरास्तथा १४
निर्विशेयुर्यदा तत्र शान्तिमेव तदाऽऽचरेत् ।
अमंगल्यानि चैतानि तथाऽक्रोशो महात्मनां
महात्मनोतिगुह्यानि न वक्तव्यानि कर्हिचित
अगम्याश्च न गच्छेत राज्ञः पत्नीं सखीस्तथा
वैद्यानां बालवृद्धानां भृत्यानां च युधिष्ठिर ।
बन्धूनां ब्राह्मणानां च तथा शारणिकस्य च
संबन्धिनां च राजेन्द्र तथाऽऽयुर्विंदते महत् ।
ब्राह्मणस्थपतिभ्यां च निर्मितं यन्निवेशनम् ॥
तदावसेत्सदा प्राज्ञो भवार्थी मनुजेश्वर ।
सन्ध्यायां न स्वपेद्राजन्विद्यां न च समाचरेत्
न भुञ्जीत च मेधावी तथाऽऽयुर्विन्दते महत्
नक्तं न कुर्यात्पित्र्याणि भुक्त्वा चैव प्रसाधनं
पानीयस्य क्रिया नक्तं न कार्या भूतिमिच्छता
वर्जनीयाश्चैव नित्यं सक्तवो निशि भारत २१
शेषाणि चैव पानानि पानीयं चापि भोजने
सौहित्यं न च कर्तव्यं रात्रौ न च समाचरेत्
द्विजच्छेदं न कुर्वीत भुक्त्वा न च समाचरेत्
महाकुले प्रसूतां च प्रशस्तां लक्षणैस्तथा २३
वयस्थां च महाप्राज्ञः कन्यामावोढुमर्हति ।
अपत्यमुत्पाद्य ततः प्रतिष्ठाप्य कुलं तथा २४
पुत्राः प्रदेया ज्ञानेषु कुलधर्मेषु भारत ।
कन्या चोत्पाद्य दातव्या कुलपुत्राय धीमते
पुत्रा निवेश्याश्च कुलाद्वृत्त्या लभ्याश्च भारत ।
शिरस्नातोऽथ कुर्वीत दैवं पित्र्यमथापि च ॥
नक्षत्रे न च कुर्वीत यस्मिन् जातो भवेन्नरः ।
न प्रोष्ठपदयोः कार्यं तथाऽऽग्नेये च भारत २७
दारुणेषु च सर्वेषु
प्रत्यरिं च विवर्जयेत् ।
ज्योतिषे यानि चोक्तानि
तानि सर्वाणि वर्जयेत् ॥ २८

कुत्र परिप्लाव्यं तदाह—**अंगुष्ठमिति** ॥ १०१ ॥ प्राणान्नासादीन् ॥ ३ ॥ एते तैलपायिकादिवन्न पापाय अभ्युदयायेत्यर्थ । पारावतादय सर्वे पक्षिविशेषा एव ॥ १४ ॥ शारणिकस्य रक्षणार्थिन ॥ १७ ॥ प्रसाधनं केशाना संस्कारादिकम् ॥ २०॥ पानीयस्य क्रिया स्नान 'न नक्तं स्नायात्'इति गृहे रात्रौ शिर स्नानानिषेध ॥ २१ ॥ पानानि पातुं योग्यानीत्यर्थ । चावदातानि इति गौडपाठ अवदातानि निर्मलान्यपि शेषाणि वर्जनीयानीत्यर्थ । सौहित्यमातृप्तिभोजनं परस्य न कर्तव्यं आत्मनश्च न समाचरेत् ॥ २२ ॥ द्विजच्छेद पक्षिवधं न कुर्वीत। तर्हि पक्षिमासमेव न भोक्तव्यमिति फलितमित्याशक्याह–भुक्त्वा न समाचरेदिति द्विजान्भुक्त्वाऽपि तच्छेदं न समाचरेत् क्रयक्रीतमेव मासं भक्ष्यं नतु स्वय हिंसा कार्येत्यर्थ । भुक्त्वा पानं समाचरेदिति पाठे–भोजनान्ते तक्र जल वा पेयमित्यर्थ ॥ २३ ॥ ज्ञानेषु बहुज्ञाननिमित्तं पुत्रा देया विद्वत्सु समर्पणीया ॥२५॥ कुलात्सत्कुलसम्बन्धेन निवेश्या विवाह्या लभ्या लम्भनीयाः ॥ २६ ॥ आग्नेये कृत्तिकायाम् ॥२७ ॥ प्रत्यरिंस्वनक्षत्राद्दिनक्षत्रं यावद्गणयित्वा नवभिर्भागे हृते पञ्चमी तारा प्रत्यरि ॥ २८ ॥

* विष्ठामुखा वडवागुळ इति प्रसिद्धा ।

प्राङ्मुखः श्मश्रुकर्माणि कारयेत्सुसमाहितः
उदङ्मुखो वा राजेन्द्र तथाऽऽयुर्विन्दते महत्
परिवादं न च ब्रूयात्परेषामात्मनस्तथा।
परिवादो ह्यधर्माय प्रोच्यते भरतर्षभ ॥ ३०
वर्जयेद्व्यंगिनीं नारीं तथा कन्यां नरोत्तम।
समार्षां व्यंगितां चैव मातुः स्वकुलजां तथा
वृद्धां प्रव्रजितां चैव तथैव च पतिव्रताम्।
तथा निकृष्टवर्णां च वर्णोत्कृष्टां च वर्जयेत् ॥
अयोनिं च वियोनिं च न गच्छेत विचक्षणः
पिंगलां कुष्ठिनीं नारीं न त्वमुद्वोढुमर्हसि ३३
अपस्मारिकुले जातां निहीना चापि वर्जयेत्।
श्वित्रिणां च कुले जातां क्षयिणां मनुजेश्वर॥
लक्षणैरन्विता या च प्रशस्ता या च लक्षणैः।
मनोज्ञां दर्शनीयां च तां भवान्वोढुमर्हति ३५
महाकुले निवेष्टव्य सदृशे वा युधिष्ठिर।
अवरा पतिता चैव न ग्राह्या भूतिमिच्छता
अग्नीनुत्पाद्य यत्नेन क्रियाः सुविहिताश्च याः।
वेदे च ब्राह्मणैः प्रोक्तास्ताश्च सर्वाः समाचरेत्
न चेर्ष्या स्त्रीषु कर्तव्या रक्ष्या दाराश्च सर्वशः
अनायुष्या भवेदीर्ष्या तस्मादीर्ष्यां विवर्जयेत्
अनायुष्यं दिवा स्वप्नं तथाभ्युदितशायिता।
प्रगे निशामाशु तथा नैवोच्छिष्टाः स्वपन्ति वै
पारदार्यमनायुष्यं नापितोच्छिष्टता तथा।
यत्नतो वै न कर्तव्यमभ्यासश्चैव भारत ॥ ४०
सन्ध्यायां च न भुञ्जीत न स्नायेन्न तथा पठेत्
प्रयतश्च भवेत्तस्या न च किञ्चित्समाचरेत् ॥
ब्राह्मणान्पूजयेच्चापि तथा स्नात्वा नराधिप।
देवाश्च प्रणमेत्स्नातो गुरूंश्चाप्यभिवादयेत् ४२
अनिमन्त्रितो न गच्छेत यज्ञं गच्छेत दर्शकः।
अनर्चिते ह्यनायुष्यं गमनं तत्र भारत ॥ ४३
न चैकेन परिव्रज्यं न गन्तव्यं तथा निशि।
अनागतायां सन्ध्यायां पश्चिमायां गृहे वसेत्
मातुः पितुर्गुरूणां च कार्यमेवानुशासनम्।
हितं चाप्यहितं चापि न विचार्यं नरर्षभ ४५
धनुर्वेदे च वेदे च यत्नः कार्यो नराधिप।
हस्तिपृष्ठेऽश्वपृष्ठे च रथचर्यासु चैव ह ॥ ४६
यत्नवान्भव राजेन्द्र यत्नवान्सुखमेधते।
अप्रधृष्यश्च शत्रूणां भृत्यानां स्वजनस्य च ॥
प्रजापालनयुक्तश्च न क्षतिं लभते क्वचित्।
युक्तिशास्त्रं च ते ज्ञेयं शब्दशास्त्रं च भारत ४८
गान्धर्वशास्त्रं च कलाः परिज्ञेया नराधिप।
पुराणमितिहासाश्च तथाऽऽख्यानानि यानि च
महात्मनां च चरितं श्रोतव्यं नित्यमेव ते।
पत्नी रजस्वला या च नाभिगच्छेन्न चाह्वयेत्
स्नातां चतुर्थे दिवसे रात्रौ गच्छेद्विचक्षणः।
पञ्चमे दिवसे नारी षष्ठेऽहनि पुमान्भवेत् ५१
एतेन विधिना पत्नीमुपगच्छेत पण्डितः।
ज्ञातिसम्बन्धिमित्राणि पूजनीयानि सर्वशः
यष्टव्यं च यथाशक्ति यज्ञैर्विविधदक्षिणैः।
अत ऊर्ध्वमरण्यं च सेवितव्यं नराधिप ॥५३
एष ते लक्षणोद्देश आयुष्याणां प्रकीर्तितः।
शेषस्त्रैविद्यवृद्धेभ्यः प्रत्याहार्यो युधिष्ठिर॥५४
आचारो भूतिजनन आचारः कीर्तिवर्धनः।
आचाराद्वर्धते ह्यायुराचारो हन्त्यलक्षणम् ॥
आगमानां हि सर्वेषामाचारः श्रेष्ठ उच्यते।
आचारप्रभवो धर्मो धर्मादायुर्विवर्धते ५६
एतद्यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं महत्।
अनुकल्प्य सर्ववर्णान्ब्रह्मणा समुदाहृतम् १५७

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि आयुष्याख्याने
चतुरधिकशततमोऽध्यायः ॥ १०४ ॥




व्यङ्गिनीं न्यूनाङ्गी व्यङ्गिता विरुद्धाङ्गेनाधिकेन युक्ता समार्षां समानप्रवराम् ॥ ३१ ॥ अयोनिं अज्ञातकुलां वियोनिं हीनकुलाम् ॥ ३२ ॥ प्रगे सन्ध्यायाम् ॥ ३९॥ नापितोच्छिष्टता श्मश्रुकर्मोत्तरमस्नातता अभ्यासोऽध्ययन च ॥ ४० ॥ दर्शको द्रष्टा ॥४३॥ परिव्रज्यं देशान्तरे गन्तव्यम् ॥ ४४ ॥ आयुष्याणां आयुष्कराणां कर्मणां उद्देश संक्षेप ॥ ५४ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चतुरधिकशततमोऽध्याय ॥१०४॥

१०५

युधिष्ठिर उवाच ।
यथा ज्येष्ठः कनिष्ठेषु वर्तेत भरतर्षभ ।
कनिष्ठाश्च यथा ज्येष्ठे वर्तेरंस्तद्ब्रवीहि मे ॥ १

भीष्म उवाच ।
ज्येष्ठवत्तात वर्तस्व ज्येष्ठोऽसि सततं भवान्
गुरोर्गरीयसी वृत्तिर्या च शिष्यस्य भारत २
न गुरावकृतप्रज्ञे शक्यं शिष्येण वर्तितुम् ।
गुरोर्हि दीर्घदर्शित्वं यत्तच्छिष्यस्य भारत ३
अन्धः स्यादन्धवेलायां जडःस्यादपि वा बुधः
परिहारेण तद्ब्रूयाद्यस्तेषां स्याद्यातिक्रमः ॥ ४
प्रत्यक्षं भिन्नहृदया भेदयेयुः कृतं नराः ।
श्रियाऽभितप्ताः कौन्तेय भेदकामास्तथारयः
ज्येष्ठः कुलं वर्धयति विनाशयति वा पुनः।
हन्ति सर्वमपि ज्येष्ठः कुलं यत्रावजायते ॥ ६
अथ यो विनिकुर्वीत ज्येष्ठो भ्राता यवीयसः
अज्येष्ठः स्यादभागश्च नियम्यो राजभिश्च सः
निकृती हि नरो लोकान्पापान्गच्छत्यसंशयम्
विदुलस्येव तत्पुष्पं मोघं जनयितुः स्मृतम् ८
सर्वानर्थः कुले यत्र जायते पापपूरुषः ।
अकीर्तिं जनयत्येव कीर्तिमन्तर्दधाति च ॥ ९
सर्वे चापि विकर्मस्था भागं नार्हन्ति सोदराः।
नाप्रदाय कनिष्ठेभ्यो ज्येष्ठः कुर्वीत यौतकम्
अनुपघ्नन्पितुर्दायं जंघाश्रमफलोऽध्वगः ।
स्वयमीहितलब्धं तु नाकामो दातुमर्हति ११
भ्रातृणामविभक्तानामुत्थानमपि चेत्सह ।
न पुत्रभागं विषमं पिता दद्यात्कदाचन ॥ १२
न ज्येष्ठो वाऽवमन्येत दुष्कृतः सुकृतोपि वा
यदि स्त्री यद्यवरजः श्रेयश्चेत्तत्तदाचरेत् ॥ १३
धर्म हि श्रेय इत्याहुरिति धर्मविदो जनाः ।
दशाचार्यानुपाध्याय उपाध्यायान्पिता दश
दश चैव पितृन्माता सर्वां वा पृथिवीमपि ।
गौरवेणाभिभवति नास्ति मातृसमो गुरुः १५
माता गरीयसी यच्च तेनैतां मन्यते जनः ।
ज्येष्ठो भ्राता पितृसमो मृते पितरि भारत१६
स ह्येषां वृत्तिदाता स्यात्स चैतान्प्रतिपालयेत्
कनिष्ठास्तं नमस्येरन्सर्वे छंदानुवर्तिनः ॥ १७
तमेव चोपजीवेरन् यथैव पितरं तथा ।
शरीरमेतौ सृजतः पिता माता च भारत ॥१८
आचार्यशास्ता या जातिः
सा सत्या साऽजराऽमरा ।
ज्येष्ठा मातृसमा चापि
भगिनी भरतर्षभ ॥ १९
भ्रातुर्भार्या च तद्वत्स्याद्यस्या बाल्ये स्तनं पिबेत्

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि ज्येष्ठकनिष्ठवृत्तिर्नाम पञ्चाधिकशततमोऽध्यायः ॥ १०५ ॥



१०६

युधिष्ठिर उवाच ।
सर्वेषामेव वर्णानां म्लेच्छानां च पितामह
उपवासे मतिरियं कारणं च न विद्महे ॥ १
ब्रह्मक्षत्रेण नियमाश्चर्तव्या इति नः श्रुतम् ।
उपवासे कथं तेषां कृत्यमस्ति पितामह ॥ २

१०५

यथेति ॥ १ ॥ या च शिष्यस्य गुरौ वृत्तिस्ता वर्तस्व ॥ २ ॥ तेषां गुरूणाम् ॥ ४ ॥ कृतं मित्रम् अरय नरा भेदयेयु ॥ ५ ॥ यवीयस कनिष्ठान् ॥ ७ ॥ विदुलस्य वेतसस्य । विदुलस्तु पुमानम्लवेतसे वेतसेऽपि चेति मेदिनी जनयितुः पितुः ॥ ८ ॥ जङ्घाश्रम एव फलं धनं यस्य अध्वग प्रवासी॥११॥उत्थान भोजनादौ विभागे वा॥१२॥ यदि स्त्री यदि वा कनिष्ठो दुष्कृतस्तथाऽपि तस्य श्रेय आचरेत् ॥ १३ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चाधिकशततमोऽध्याय ॥१०५

१०६

सर्वेषामिति ॥ १ ॥

नियमांश्चोपवासांश्च सर्वेषां ब्रूहि पार्थिव ।
आप्नोति कां गतिं तात उपवासपरायणः ३
उपवासः परं पुण्यमुपवासः परायणम् ।
उपोष्येह नरश्रेष्ठ किं फलं प्रतिपद्यते ॥ ४
अधर्मान्मुच्यते केन धर्ममाप्नोति वा कथम् ।
स्वर्गं पुण्यं च लभते कथं भरतसत्तम ॥ ५
उपोष्य चापि किं तेन प्रदेयं स्यान्नराधिप ।
धर्मेण च सुखानर्थांल्लभेद्येन ब्रवीहि तम् ॥ ६

वैशम्पायन उवाच ।

एवं ब्रुवाणं कौन्तेयं धर्मज्ञं धर्मतत्त्ववित् ।
धर्मपुत्रमिदं वाक्यं भीष्मः शांतनवोऽब्रवीत् ७

भीष्म उवाच ।

इदं खलु मया राजन् श्रुतमासीत्पुरातनम् ।
उपवासविधौ श्रेष्ठा गुणा ये भरतर्षभ ॥ ८
ऋषिमङ्गिरसं पूर्वं पृष्टवानस्मि भारत ।
यथा मा त्व तथैवाहं पृष्टवांस्तं तपोधनम् ९
प्रश्नमेतं मया पृष्टो भगवानग्निसंभवः ।
उपवासविधिं पुण्यमाचष्ट भरतर्षभ ॥ १०

अङ्गिरा उवाच ।

ब्रह्मक्षत्रे त्रिरात्रं तु विहितं कुरुनन्दन ।
द्विस्त्रिरात्रमथैकाह निर्दिष्टं पुरुषर्षभ ॥ ११
वैश्याः शूद्राश्च यन्मोहादुपवासं प्रचक्रिरे ।
त्रिरात्रं वा द्विरात्रं वा तयोर्व्युष्टिर्न विद्यते १२
चतुर्थभक्तक्षपणं वैश्ये शूद्रे विधीयते ।
त्रिरात्रं न तु धर्मज्ञैर्विहित धर्मदर्शिभिः ॥ १३
पञ्चम्या वाऽपि षष्ठ्या च पौर्णमास्यां च भारत
उपोष्य एकभक्तेन नियताऽऽत्मा जितेन्द्रियः
क्षमावान् रूपसम्पन्नः श्रुतवांश्चैव जायते ।
नानपत्यो भवेत्प्राज्ञो दरिद्रो वा कदाचन
यजिष्णुः पञ्चमीं षष्ठीं कुले भोजयते द्विजान्
अष्टमीमथ कौरव्य कृष्णपक्षे चतुर्दशीम् ॥१६
उपोष्य व्याधिरहितो वीर्यवानभिजायते ।
मार्गशीर्षे तु यो मासमेकभक्तेन संक्षिपेत्॥१७
भोजयेच्च द्विजान् शक्त्या
स मुच्येद्व्याधिकिल्बिषैः ।
सर्वकल्याणसंपूर्णः
सर्वौषधिसमन्वितः ॥ १८
उपोष्य व्याधिरहितो वीर्यवानभिजायते ।
कृषिभागी बहुधनो बहुधान्यश्च जायते १९
पौषमासं तु कौन्तेय भक्तेनैकेन यः क्षिपेत् ।
सुभगो दर्शनीयश्च यशोभागी च जायते २०
माघं तु नियतो मासमेकभक्तेन यः क्षिपेत् ।
श्रीमत्कुले ज्ञातिमध्ये स महत्त्व प्रपद्यते ॥ २१
भगदैवतमासं तु एकभक्तेन यः क्षिपेत् ।
स्त्रीषु वल्लभतां याति वश्याश्चास्य भवन्ति ताः
चैत्रं तु नियतो मासमेकभक्तेन यः क्षिपेत् ।
सुवर्णमणिमुक्ताढ्ये कुले महति जायते ॥ २३
निस्तरेदेकभक्तेन वैशाखं यो जितेन्द्रियः ।
नरो वा यदि वा नारी ज्ञातीनां श्रेष्ठता व्रजेत्
ज्येष्ठामूल तु यो मासमेकभक्तेन संक्षिपेत् ।
ऐश्वर्यमतुलं श्रेष्ठं पुमान्स्त्री वा प्रपद्यते ॥ २५
आषाढमेकभक्तेन स्थित्वा मासमतन्द्रितः ।
बहुधान्यो बहुधनो बहुपुत्रश्च जायते ॥ २६
श्रावणं नियतो मासमेकभक्तेन यः क्षिपेत् ।
यत्र तत्राभिषेकेण युज्यते ज्ञातिवर्धनः ॥ २७
प्रौष्ठपद तु यो मासमेकाहारो भवेन्नरः ।
गवाढ्य स्फीतमचलमैश्वर्यं प्रतिपद्यते ॥ २८
तथैवाश्वयुजं मासमेकभक्तेन यः क्षिपेत् ।
मृजावान् वाहनाढ्यश्च बहुपुत्रश्च जायते २९
कार्तिकं तु नरो मासं यः कुर्यादेकभोजनम् ।
शूरश्च बहुभार्यश्च कीर्तिमाश्चैव जायते ॥ ३०
इति मासा नरव्याघ्र क्षिपता परिकीर्तिताः ।
तिथीनां नियमा ये तु शृणु तानपि पार्थिव ३१
पक्षे पक्षे गते यस्तु भक्तमश्नाति भारत ।
गवाढ्यो बहुपुत्रश्च बहुभार्यः स जायते ॥ ३२
मासि मासि त्रिरात्राणि कृत्वा वर्षाणि द्वादश
गणाधिपत्यं प्राप्नोति निःसपत्नमनाविलम् ॥
एते तु नियमाः सर्वे कर्तव्याः शरदो दश ।
द्वे चान्ये भरतश्रेष्ठ प्रवृत्तिमनुवर्तता ॥ ३४
यस्तु प्रातस्तथा सायं भुञ्जानो नान्तरा पिबेत्
अहिंसानिरतो नित्यं जुह्वानो जातवेदसम् ॥


ब्रह्मक्षत्रे त्रिरात्राधिक्मुपोषणं नेष्टं द्विस्त्रिरात्र षट्रात्रं सवेषा अथ आश्रमान्तरे क्वचित् निर्दिष्टम् ॥ ११ ॥ व्युष्टि फलम् ॥ १२ ॥ दिनस्य द्वे भक्ते तत्र चतुर्थस्य भक्तस्य क्षपण द्विरात्रमभोजनमित्यर्थ ननु त्रिरात्रं तेषामस्ति इत्याह— त्रीति ॥ १३ ॥ यजिष्णु देवतापूजनशील कुले स एव महानन्नदाता भवतीत्यर्थ ॥ १६ ॥ ज्येष्ठामूलं ज्येष्ठमासं ॥ २५ ॥ सर्वेषु मासेषु एकैकस्मिन्पक्षे गते द्वितीयपक्षे भक्तं एकभक्तं अश्नाति ॥ ३२ ॥

षड्भिः स वर्षैर्नृपते सिध्यते नात्र संशयः ।
अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ३६
अधिवासे सोऽप्सरसां नृत्यगीतविनादिते ।
रमते स्त्रीसहस्राढ्ये सुकृती विरजो नरः ३७
तप्तकाञ्चनवर्णाभं विमानमधिरोहति ।
पूर्णं वर्षसहस्रं च ब्रह्मलोके महीयते ॥ ३८
तत्क्षयादिह चागम्य माहात्म्य प्रतिपद्यते ।
यस्तु संवत्सरं पूर्णमेकाहारो भवेन्नरः ॥ ३९
अतिरात्रस्य यज्ञस्य स फलं समुपाश्नुते ।
दशवर्षसहस्राणि स्वर्गे च स महीयते ॥ ४०
तत्क्षयादिह चागम्य माहात्म्यं प्रतिपद्यते ।
यस्तु संवत्सर पूर्णं चतुर्थं भक्तमश्नते ॥ ४१
अहिंसानिरतो नित्यं सत्यवाग्विजितेन्द्रियः
वाजपेयस्य यज्ञस्य स फलं समुपाश्नुते ॥ ४२
दशवर्षसहस्राणि स्वर्गलोके महीयते ।
षष्ठे काले तु कौन्तेय नरः संवत्सर क्षिपन् ॥
अश्वमेधस्य यज्ञस्य फल प्राप्नोति मानवः ।
चक्रवाकप्रयुक्तेन विमानेन स गच्छति ॥ ४४
चत्वारिंशत्सहस्राणि वर्षाणां दिवि मोदते ।
अष्टमेन तु भक्तेन जीवन्संवत्सरं नृप ॥ ४५
गवामयस्य यज्ञस्य फल प्राप्नोति मानवः ।
हंससारसयुक्तेन विमानेन स गच्छति ॥ ४६
पञ्चाशतं सहस्राणि वर्षाणां दिवि मोदते ।
पक्षे पक्षे गते राजन्योऽश्नीयाद्वर्षमेव तु ॥ ४७
षण्मासानशन तस्य भगवानङ्गिराऽब्रवीत् ।
षष्टिर्वर्षसहस्राणि दिवमावसते च सः ॥ ४८
वीणानां वल्लकीनां च वेणूनां च विशांपते ।
सुघोषैर्मधुरैः शब्दैः सुप्तः स प्रतिबोध्यते ४९
संवत्सरमिहैकं तु मासे मासे पिबेदपः ।
फलं विश्वजितस्तात प्राप्नोति स नरो नृप ॥
सिंहव्याघ्रप्रयुक्तेन विमानेन स गच्छति ।
सप्तर्षि च सहस्राणि वर्षाणां दिवि मोदते ५१
मासादूर्ध्वं नरव्याघ्र नोपवासो विधीयते ।
विधिं त्वनशनस्याहुः पार्थ धर्मविदो जनाः
अनार्तो व्याधिरहितो गच्छेदनशनं तु यः ।
पदे पदे यज्ञफलं स प्राप्नोति न संशयः ॥ ५३
दिवं हंसप्रयुक्तेन विमानेन स गच्छति ।
शतं वर्षसहस्राणां मोदते स दिवि प्रभो ॥ ५४
शतं चाप्सरसः कन्या रमयन्त्यापि तं नरम् ।
आर्तो वा व्याधितो वापि गच्छेदनशनं तु यः
शत वर्षसहस्राणां मोदते स दिवि प्रभो ।
काञ्चीनूपुरशब्देन सुप्तश्चैव प्रबोध्यते ॥ ५६
सहस्रहंसयुक्तेन विमानेन तु गच्छति ।
स गत्वा स्त्रीशताकीर्णं रमते भरतर्षभ ॥ ५७
क्षीणस्याप्यायन दृष्ट क्षतस्य क्षतरोहणम् ।
व्याधितस्यौषधग्रामः क्रुद्धस्य च प्रसादनम् ॥
दुःखितस्यार्थमानाभ्यां दुःखानां प्रतिषधनम्
न चैते स्वर्गकामस्य रोचन्ते सुखमेधसः ॥ ५९
अतः स कामसयुक्त विमाने हेमसान्निभे ।
रमते स्त्रीशताकीर्णे पुरुषोऽलकृतः शुचिः ६०
स्वस्थः सफलसङ्कल्पः सुखी विगतकल्मषः ।
अनश्नन्देहमुत्सृज्य फल प्राप्नोति मानवः ६१
बालसूर्यप्रतीकाशे विमाने हेमवर्चसि ।
वैदूर्यमुक्ताखचिते वीणामुरजनादिते ॥ ६२
पताकादीपिकाकीर्णे दिव्यघण्टानिनादिते ।
स्त्रीसहस्रानुचरिते स नरः सुखमेधते ॥ ६३
यावन्ति रोमकूपाणि तस्य गात्रेषु पाण्डव ।
तावन्त्येव सहस्राणि वर्षाणां दिवि मोदते ॥
नास्ति वेदात्परं शास्त्र नास्ति मातृसमो गुरुः
न धर्मात्परमो लाभस्तपो नानशनात्परम् ६५
ब्राह्मणेभ्यः पर नास्ति पावन दिवि चेह च ।
उपवासेस्तथा तुल्यं तपः कर्म न विद्यते ॥ ६६
उपोष्य विधिवद्देवास्त्रिदेव प्रतिपेदिरे ।
ऋषयश्च परां सिद्धिमुपवासैरवाप्नुवन् ॥ ६७
दिव्यवर्षसहस्राणि विश्वामित्रेण धीमता ।
क्षान्तमेकेन भक्तेन तेन विप्रत्वमागतः ॥ ६८
च्यवनो जमदग्निश्च वसिष्ठो गौतमो भृगुः ।
सर्व एव दिव प्राप्ताः क्षमावन्तो महर्षयः ६९
इदमंगिरसा पूर्वं महर्षिभ्यः प्रदर्शितम् ।
यः प्रदर्शयते नित्यं न स दुःखमवाप्नुते ॥ ७०
इम तु कौन्तेय यथाक्रमं विधिं
प्रवर्तितं ह्यंगिरसा महर्षिणा ।
पठेच्च यो वै शृणुयाच्च नित्यदा
न विद्यते तस्य नरस्य किल्बिषम् ७१

एकस्मिन्पक्षे गते परस्मिन्पक्षेऽश्नाति वर्षे च तदेव षण्मासाशनं भवति॥४७॥ संवत्सरमिति एकैकस्मिन्सवत्सरे एकमेक मासं जलमात्राहारो भवेदिति वाक्यार्थ । यथाश्रुतार्थग्रहणे जीवनाशप्रसङ्गात् ॥ ५० ॥ स्वर्गकामस्य क्षीणत्वाद्यवस्था प्राप्तस्याप्यायनादयो न रोचन्तेऽपि तु तज्ज दु खं सहमान एव स स्वतपो वर्धयतीत्यर्थ ॥ ५९ ॥

विमुच्यते चापि स सर्वसङ्करै-
र्न चास्य दोषैरभिभूयते मनः ।
वियोनिजानां च विजानते रुतं
ध्रुवां च कीर्तिं लभते नरोत्तमः॥७२

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि उपवासविधौ षडधिकशततमोऽध्यायः ॥ १०६ ॥



१०७

युधिष्ठिर उवाच ।

पितामहेन विधिवद्यज्ञाः प्रोक्ता महात्मना।
गुणाश्चैषां यथातथ्यं प्रेत्य चेह च सर्वशः ॥ १
न ते शक्या दरिद्रेण यज्ञाः प्राप्तुं पितामह ।
बहूपकरणा यज्ञा नानासंभारविस्तराः ॥ २
पार्थिवैर्वा राजपुत्रैर्वा शक्याः प्राप्तुं पितामह ।
नार्थन्यूनैरवगुणैरेकात्मभिरसंहतैः ॥ ३
यो दरिद्रैरपि विधिः शक्यः प्राप्तुं सदा भवेत्
अर्थन्यूनैरवगुणैरेकात्मभिरसंहतैः ॥ ४
तुल्यो यज्ञफलैरेतैस्तन्मे ब्रूहि पितामह ।

भीष्म उवाच ।

इदमङ्गिरसा प्रोक्तमुपवासफलात्मकम् ॥ ५
विधिं यज्ञफलैस्तुल्यं तन्निबोध युधिष्ठिर ।
यस्तु कल्यं तथा सायं भुञ्जानो नान्तरा पिबेत्
अहिंसानिरतो नित्यं जुह्वानो जातवेदसम् ।
षड्भिरेव स वर्षैस्तु सिध्यते नात्र संशयः ७
तप्तकाञ्चनवर्णं च विमानं लभते नरः ।
देवस्त्रीणामधीवासे नृत्यगीतनिनादिते ॥ ८
प्राजापत्ये वसेत्पद्मे वर्षाणामग्निसंनिभे ।
त्रीणि वर्षाणि यः प्राश्नेत्सततं त्वेकभोजनम्
धर्मपत्नीरतो नित्यमग्निष्टोमफलं लभेत् ।
यज्ञं बहुसुवर्णं वा वासवप्रियमाचरेत् ॥ १०
सत्यवान्दानशीलश्च ब्रह्मण्यश्चानसूयकः ।
क्षान्तो दान्तो जितक्रोधः स गच्छति परां गतिं
पाण्डुराभ्रप्रतीकाशे विमाने हंसलक्षणे ।
द्वे समाप्ते ततः पद्मे सोप्सरोभिर्वसेत्सह १२
द्वितीये दिवसे यस्तु प्राश्नीयादेकभोजनम् ।
सदा द्वादशमासांस्तु जुह्वानो जातवेदसम् ॥
अग्निकार्यपरो नित्यं नित्यं कल्यप्रबोधनः ।
अग्निष्टोमस्य यज्ञस्य फलं प्राप्नोति मानवः ॥
हंससारसयुक्तं च विमानं लभते नरः ।
इन्द्रलोके च वसते वरस्त्रीभिः समावृतः १५
तृतीये दिवसे यस्तु प्राश्नीयादेकभोजनम् ।
सदा द्वादशमासास्तु जुह्वानो जातवेदसम् ॥
अग्निकार्यपरो नित्यं नित्यं कल्यप्रबोधनः ।
अतिरात्रस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम् १७
मयूरहंसयुक्तं च विमानं लभते नरः ।
सप्तर्षीणां सदा लोके सोप्सरोभिर्वसेत्सह ॥
निवर्तनं च तत्रास्य त्रीणि पद्मानि वै विभुः ।
दिवसे यश्चतुर्थे तु प्राश्नीयादेकभोजनम् ॥ १९
सदा द्वादशमासान्वै जुह्वानो जातवेदसम् ।
वाजपेयस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम् २०
इन्द्रकन्याभिरूढं च विमानं लभते नरः ।
सागरस्य च पर्यन्ते वासवं लोकमावसेत् २१
देवराजस्य च क्रीडां नित्यकालमवेक्षते ।
दिवसे पञ्चमे यस्तु प्राश्नीयादेकभोजनम् २२
सदा द्वादशमासांस्तु जुह्वानो जातवेदसम् ।
अलुब्धः सत्यवादी च ब्रह्मण्यश्चाविहिंसकः
अनसूयुरपापस्थो द्वादशाहफलं लभेत् ।
जाम्बूनदमयं दिव्यं विमानं हंसलक्षणम् २४
सूर्यमालासमाभासमारोहेत्पाण्डुरं गृहम् ।
आवर्तनानि चत्वारि तथा पद्मानि द्वादश ॥

वियोनिजाना पक्ष्यादीना रुतं शब्द विजानते विजानीते ॥ ७२ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षडधिकशततमोऽध्यायः ॥ १०६ ॥

१०७

पितामहेनेति ॥ १॥ अवगुणैर्निर्गुणै एकात्माभिरेकाकीभि अत एवासहतैरसहायै ॥ ३ ॥ कल्यं प्रातः ॥ ६ ॥ समाप्ते सम्पूर्णे द्वे पद्मे वर्षाणीति शेष । शतकोटय एकं पद्मम् ॥ १२ ॥ निवर्तनं नियमेन वर्तनम् ॥ १९ ॥ आवर्तनानि वर्षाणि चत्वारि द्वादश चेति षोडशपद्मानि ॥ २५ ॥

शराग्निपरिमाणं च तत्रासौ वसते सुखम् ।
दिवसे यस्तु षष्ठे वै मुनिः प्राशेत भोजनम् २६
सदा द्वादशमासान्वै जुह्वानो जातवेदसम् ।
सदा त्रिषवणस्नायी ब्रह्मचार्यनसूयकः ॥ २७
गवां मेधस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम् ।
अग्निज्वालासमाभासं हंसबर्हिणसेवितम् ॥
शातकुंभसमायुक्तं साधयेद्यानमुत्तमम् ।
तथैवाप्सरसामङ्के प्रतिसुप्तः प्रबोध्यते ॥ २९
नूपुराणां निनादेन मेखलानां च निःस्वनैः ।
कोटीसहस्रं वर्षाणां त्रीणि कोटिशतानि च
पञ्चान्यष्टादश तथा पताके द्वे तथैव च ।
अयुतानि च पञ्चाशदक्षचर्मशतस्य च ॥ ३१
लोम्नां प्रमाणेन समं ब्रह्मलोके महीयते ।
दिवसे सप्तमे यस्तु प्राश्नीयादेकभोजनम् ॥
सदा द्वादशमासान्वै जुह्वानो जातवेदसम् ।
सरस्वतीं गोपयानो ब्रह्मचर्यं समाचरन् ॥ ३३
सुमनोवर्णकं चैव मधुमांसं च वर्जयन् ।
पुरुषो मरुतां लोकमिन्द्रलोकं च गच्छति ॥
तत्र तत्र हि सिद्धार्थो देवकन्याभिरर्च्यते ।
फलं बहुसुवर्णस्य यज्ञस्य लभते नरः ॥ ३५
संख्यामतिगुणां चापि तेषु लोकेषु मोदते ।
यस्तु संवत्सरं क्षान्तो भुंक्तेऽहन्यष्टमे नरः ॥
देवकार्यपरो नित्यं जुह्वानो जातवेदसम् ।
पौण्डरीकस्य यज्ञस्य फलं प्राप्नोत्यनुत्तमम् ॥
पद्मवर्णनिभं चैव विमानमधिरोहति ।
कृष्णाः कनकगौर्यश्च नार्यः श्यामास्तथापराः
वयोरूपविलासिन्यो लभते नात्र संशयः ।
यस्तु संवत्सरं भुंक्ते नवमे नवमेऽहनि ॥ ३९
सदा द्वादशमासान्वै जुह्वानो जातवेदसम् ।
अश्वमेधसहस्रस्य फलं प्राप्नोत्यनुत्तमम् ४०
पुण्डरीकप्रकाशं च विमानं लभते नरः ।
दीप्तसूर्याग्नितेजोभिर्दिव्यमालाभिरेव च ॥४१
नीयते रुद्रकन्याभिः सोन्तरिक्षं सनातनम् ।
अष्टादश सहस्राणि वर्षाणां कल्पमेव च ४२
कोटीशतसहस्रं च तेषु लोकेषु मोदते ।
यस्तु संवत्सरं भुंक्ते दशाहे वै गते गते ४३
सदा द्वादशमासान्वै जुह्वानो जातवेदसम् ।
ब्रह्मकन्यानिवासे च सर्वभूतमनोहरे ॥ ४४
अश्वमेधसहस्रस्य फलं प्राप्नोत्यनुत्तमम् ।
रूपवत्यश्च तं कन्या रमयन्ति सनातनम् ।४५
नीलोत्पलनिभैर्वर्णैः रक्तोत्पलनिभैस्तथा ।
विमानं मण्डलावर्तमावर्तगहनाकुलम् ॥ ४६
सागरोर्मिप्रतीकाशं स लभेद्यानमनुत्तमम् ।
विचित्रमणिमालाभिर्नादितं शङ्खनिःस्वनैः ४७
स्फाटिकैर्वज्रसारैश्च स्तम्भैः सुकृतवेदिकम् ।
आरोहति महद्यानं हंससारसनादितम् ४८
एकादशे तु दिवसे यः प्राप्ते प्राशते हविः ।
सदा द्वादशमासांस्तु जुह्वानो जातवेदसम्४९
परस्त्रियं नाभिलषेद्वाचाथ मनसापि वा ।
अनृतं च न भाषेत मातापित्रोः कृतेपि वा ५०
अभिगच्छेन्महादेवं विमानस्थ महाबलम् ।
अश्वमेधसहस्रस्य फलं प्राप्नोत्यनुत्तमम् ॥ ५१
स्वायंभुवं च पश्येत विमानं समुपस्थितम् ।
कुमार्यः काञ्चनाभासा रूपवत्यो नयन्ति तम्
रुद्राणां तमधीवास दिवि दिव्य मनोहरम्
वर्षाण्यपरिमेयानि युगान्ताग्निसमप्रभः ॥ ५३
कोटीशतसहस्र च दशकोटिशतानि च ।
रुद्र नित्य प्रणमते देवदानवसंमतम् ॥ ५४
स तस्मै दर्शनं प्राप्तो दिवसे दिवसे भवेत् ।
दिवसे द्वादशे यस्तु प्राप्ते वै प्राशते हविः ५५
सदा द्वादशमासान्वै सर्वमेधफलं लभेत् ।
आदित्यं द्वादशे तस्य विमानं संविधीयते५६
मणिमुक्ताप्रवालैश्च महार्हैरुपशोभितम् ।
हंसभासापरिक्षिप्तं नागवीथीसमाकुलम् ५७
मयूरैश्चक्रवाकैश्च कूजद्भिरुपशोभितम् ।
अट्टैर्महद्भिः संयुक्तं ब्रह्मलोके प्रतिष्ठितम् ५८
नित्यमावसथ राजन्नरनारीसमावृतम् ।
ऋषिरेवं महाभागस्त्वंगिरा प्राह धर्मवित्
त्रयोदशे तु दिवसे प्राप्ते यः प्राशते हविः ।
सदा द्वादशमासान्वै देवसत्रफलं लभेत् ६०
रक्तपद्मोदयं नाम विमानं साधयेन्नरः ।
जातरूपप्रयुक्तं च रत्नसञ्चयभूषितम् ॥ ६१
देवकन्याभिरार्कीर्णं दिव्याभरणभूषितम् ।
पुण्यगंधोदय दिव्य वायव्यैरुपशोभितम् ॥६२
तत्र शंकुपताके द्वे युगान्तं कल्पमेव च ।
अयुतायुतं तथा पद्म समुद्रं च तथा वसेत्६३

तथा शराग्निरिति पञ्चत्रिंशत् एवमेकपञ्चाशत् पद्मानि ॥ २६ ॥ ऊर्ध्वत्वसामान्यात्पताका महापद्माख्य-संख्याविशेष ॥ ३१ ॥ सुमनोवर्णकं सल्लकीचन्दनादि ॥३४॥ संख्याविशेष ।

गीतगंधर्वघोषैश्च भेरीपणवनिःस्वनैः ।
सदा प्रल्हादितस्ताभिर्देवकन्याभिरिज्यते ६४
चतुर्दशे तु दिवसे यः पूर्णे प्राशते हविः ।
सदा द्वादशमासांस्तु महामेधफलं लभेत् ६५
अनिर्देश्यवयोरूपा देवकन्याः स्वलंकृताः ।
मृष्टतप्ताङ्गदधरा विमानैरुपयान्ति तम् ॥ ६६
कलहंसविनिर्घोषैर्नूपुराणां च निःस्वनैः ।
काञ्चीनां च समुत्कर्षैस्तत्र तत्र निबोध्यते६७
देवकन्यानिवासे च तस्मिन्वसति मानवः ।
जाह्नवीवालुकाकीर्णे पूर्णे सवत्सरं नरः ६८
यस्तु पक्षे गते भुंक्ते एकभक्तं जितेन्द्रियः ।
सदा द्वादशमासांस्तु जुह्वानो जातवेदसम्६९
राजसूयसहस्रस्य फलं प्राप्नोत्यनुत्तमम् ।
यानमारोहते दिव्यं हंसबर्हिणसेवितम् ॥ ७०
मणिमण्डलकैश्चित्रं जातरूपसमावृतम् ।
दिव्याभरणशोभाभिर्वरस्त्रीभिरलकृतम् ७१
एकस्तम्भं चतुर्द्वारं सप्तभौमं सुमङ्गलम् ।
वैजयन्तीसहस्रैश्च शोभितं गीतनिःस्वनैः ७२
दिव्यं दिव्यगुणोपेतं विमानमधिरोहति ।
मणिमुक्ताप्रवालैश्च भूषितं वैद्युतप्रभम् ॥ ७३
वसेद्युगसहस्रं च खड्गकुञ्जरवाहनः ।
षोडशे दिवसे प्राप्ते यः कुर्यादेकभोजनम् ७४
सदा द्वादशमासान्वै सोमयज्ञफलं लभेत् ।
सोमकन्यानिवासेषु सोऽध्यावसति नित्यशः
सौम्यगंधानुलिप्तश्च कामकारगतिर्भवेत् ।
सुदर्शनाभिर्नारीभिर्मधुराभिस्तथैव च ॥ ७६
अर्च्यते वै विमानस्थः कामभोगैश्च सेव्यते ।
फलं पद्मशतप्रख्यं महाकल्पं दशाधिकम् ७७
आवर्तनानि चत्वारि साधयेच्चाप्यसौ नरः ।
दिवसे सप्तदशमे यः प्राप्ते प्राशते हविः ७८
सदा द्वादशमासान्वै जुह्वानो जातवेदसम् ।
स्थानं वारुणमैन्द्रं च रौद्रं वाप्यधिगच्छति ७९
मारुतौशनसे चैव ब्रह्मलोकं स गच्छति ।
तत्र दैवतकन्याभिरासनेनोपचर्यते ॥ ८०
भूर्भुवं चापि देवर्षिं विश्वरूपमवेक्षते ।
तत्र देवाधिदेवस्य कुमार्यो रमयन्ति तम् ८१
द्वात्रिंशद्रूपधारिण्यो मधुराः समलंकृताः ।
चंद्रादित्यावुभौ यावद्गगने चरतः प्रभो ॥ ८२
तावच्चरत्यसौ धीरः सुधामृतरसाशनः ।
अष्टादशे यो दिवसे प्राश्नीयादेकभोजनम् ८३
सदा द्वादशमासान्वै सप्तलोकान्स पश्यति ।
रथैः सनन्दिघोषैश्च पृष्ठतः सोऽनुगम्यते ८४
देवकन्याधिरूढैस्तु भ्राजमानैः स्वलंकृतैः ।
व्याघ्रसिंहप्रयुक्तं च मेघस्वननिनादितम् ८५
विमानमुत्तमं दिव्यं सुसुखी ह्यधिरोहति ।
तत्र कल्पसहस्रं स कन्याभिः सह मोदते ८६
सुधारसं च भुञ्जीत अमृतोपममुत्तमम् ।
एकोनविंशतिदिने यो भुंक्ते एकभोजनम् ८७
सदा द्वादशमासान्वै सप्तलोकान्स पश्यति ।
उत्तमं लभते स्थानमप्सरोगणसेवितम् ॥ ८८
गन्धर्वैरुपगीतं च विमानं सूर्यवर्चसम् ।
तत्रामरवरस्त्रीभिर्मोदते विगतज्वरः ॥ ८९
दिव्याम्बरधरः श्रीमानयुतानां शतं शतम् ।
पूर्णेऽथ विंशे दिवसे यो भुङ्क्ते ह्येकभोजनम्
सदा द्वादशमासांस्तु सत्यवादी धृतव्रतः ।
अमांसाशी ब्रह्मचारी सर्वभूतहिते रतः ॥ ९१
स लोकान्विपुलान् रम्यानादित्यानामुपाश्नुते
गन्धर्वैरप्सरोभिश्च दिव्यमाल्यानुलेपनैः ९२
विमानैः काञ्चनैर्हैयैः पृष्ठतश्चानुगम्यते ।
एकविंशे तु दिवसे यो भुङ्क्ते ह्येकभोजनम्९३
सदा द्वादशमासान्वै जुह्वानो जातवेदसम् ।
लोकमौशनसं दिव्यं शक्रलोकं च गच्छति९४
अश्विनोर्मरुतां चैव सुखेष्वभिरतः सदा ।
अनभिज्ञश्च दुःखानां विमानवरमास्थितः ९५
सेव्यमानो वरस्त्रीभिः क्रीडत्यमरवत्प्रभुः ।
द्वाविंशे दिवसे प्राप्ते यो भुङ्क्ते ह्येकभोजनम्
सदा द्वादशमासान्वै जुह्वानो जातवेदसम् ।
अहिंसानिरतो धीमान् सत्यवागनसूयकः ॥
लोकान्वसूनामाप्नोति दिवाकरसमप्रभः ।
कामचारी सुधाहारो विमानवरमास्थितः ॥
रमते देवकन्याभिर्दिव्याभरणभूषितः ।
त्रयोविंशे तु दिवसे प्राश्नीयस्त्वेकभोजनम् ९९
सदा द्वादशमासांस्तु मिताहारो जितेन्द्रियः ।
वायोरुशनसश्चैव रुद्रलोकं च गच्छति १००
कामचारी कामगमः पूज्यमानोऽप्सरोगणैः ।
अनेकगुणपर्यन्तं विमानवरमास्थितः ॥ १
रमते देवकन्याभिर्दिव्याभरणभूषितः ।
चतुर्विंशे तु दिवसे यः प्राप्ते प्राशते हविः २


सुधा अमृतं अमृतं देवभोग्यं तदुपमम् ॥ ८७ ॥

सदा द्वादशमासांश्च जुह्वानो जातवेदसम् ।
आदित्यानामधीवासे मोदमानो वसेच्चिरम् ४
दिव्यमाल्याम्बरधरो दिव्यगन्धानुलेपनः ।
विमाने काञ्चने दिव्ये हंसयुक्ते मनोरमे ॥
रमते देवकन्यानां सहस्रैरयुतैस्तथा ।
पञ्चविंशे तु दिवसे यः प्राशेदेकभोजनम् ॥ ५
सदा द्वादशमासांस्तु पुष्कलं यानमारुहेत् ।
सिंहव्याघ्रयुक्तैस्तु मेघनिःस्वननादितैः ॥ ६
स रथैर्नन्दिघोषैश्च पृष्ठतो ह्यनुगम्यते ।
देवकन्यासमारूढैः काञ्चनैर्विमलैः शुभैः ७
विमानमुत्तमं दिव्यमास्थाय सुमनोहरम् ।
तत्र कल्पसहस्रं वै वसते स्त्रीशतावृते ॥ ८
सुधारसं चोपजीवन्नमृतोपममुत्तमम् ।
षड्विंशे दिवसे यस्तु प्रकुर्यादेकभोजनम् ९
सदा द्वादशमासांस्तु नियतो नियताशनः ।
जितेन्द्रियो वीतरागो जुह्वानो जातवेदसम्
स प्राप्नोति महाभागः पूज्यमानोऽप्सरोगणैः
सप्तानां मरुतां लोकान्वसूनां चापि सोश्नुते ॥
विमानैः स्फाटिकैर्दिव्यैः सर्वरत्नैरलङ्कृतैः ।
गन्धर्वैरप्सरोभिश्च पूज्यमानः प्रमोदते ॥ १२
द्वे युगानां सहस्रे तु दिव्ये दिव्येन तेजसा ।
सप्तविंशेऽथ दिवसे यः कुर्यादेकभोजनम् १३
सदा द्वादशमासांस्तु जुह्वानो जातवेदसम् ।
फलं प्राप्नोति विपुलं देवलोके च पूज्यते १४
अमृताशी वसंस्तत्र स वितृष्णः प्रमोदते ।
देवर्षिचरितं राजन् राजर्षिभिरनुष्ठितम् १५
अध्यावसति दिव्यात्मा विमानवरमास्थितः ।
स्त्रीभिर्मनोभिरामाभी रममाणो मदोत्कटः ॥
युगकल्पसहस्राणि त्रीण्यावसति वै सुखम् ।
योऽष्टाविंशे तु दिवसे प्राश्नीयादेकभोजनम्॥
सदा द्वादशमासांस्तु जितात्मा विजितेन्द्रियः
फलं देवर्षिचरितं विपुलं समुपाश्नुते ॥ १८
भोगवांस्तेजसा भाति सहस्रांशुरिवामलः ।
सुकुमार्यश्च नार्यस्तं रममाणाः सुवर्चसः १९
पीनस्तनोरुजघना दिव्याभरणभूषिताः ।
रमयन्ति मनःकान्ते विमाने सूर्यसन्निभे २०
सर्वकामगमे दिव्ये कल्पायुतशतं समाः ।
एकोनत्रिंशे दिवसे यः प्राशेदेकभोजनम् २१
सदा द्वादशमासान्वै सत्यव्रतपरायणः ।
तस्य लोकाः शुभा दिव्या देवराजर्षिपूजिताः
विमानं सूर्यचन्द्राभं दिव्यं समधिगच्छति ।
जातरूपमयं युक्तं सर्वरत्नसमन्वितम् ॥ २३
अप्सरोगणसंपूर्णं गन्धर्वैरभिनादितम् ।
तत्र चैनं शुभा नार्यो दिव्याभरणभूषिताः २४
मनोभिरामा मधुरा रमयन्ति मदोत्कटाः ।
भोगवांस्तेजसा युक्तो वैश्वानरसमप्रभः २५
दिव्यो दिव्येन वपुषा भ्राजमान इवामरः ।
वसूनां मरुता चैव साध्यानामश्विनोस्तथा २६
रुद्राणां च तथा लोकं ब्रह्मलोकं च गच्छति ।
यस्तु मासे गते भुङ्क्ते एकभक्तं शमात्मकः ॥
सदा द्वादशमासान्वै ब्रह्मलोकमवाप्नुयात् ।
सुधारसकृताहारः श्रीमान्सर्वमनोहरः ॥ २८
तेजसा वपुषा लक्ष्म्या भ्राजते रश्मिवानिव ।
दिव्यमाल्याम्बरधरो दिव्यगन्धानुलेपनः २९
सुखेष्वभिरतो भोगी दुःखानामविजानकः ।
स्वयंप्रभाभिर्नारीभिर्विमानस्थो महीयते ॥ ३०
रुद्रदेवर्षिकन्याभिः सततं चाभिपूज्यते ।
नानारमणरूपाभिर्नानारागाभिरेव च ॥ ३१
नानामधुरभाषाभिर्नानारतिभिरेव च ।
विमाने गगनाकारे सूर्यवैदूर्यसन्निभे ॥ ३२
पृष्ठतः सोमसंकाशे उदर्के चाम्रसन्निभे ।
दक्षिणाया तु रक्ताभे अधस्तान्नीलमण्डले ३३
ऊर्ध्वं विचित्रसंकाशे नैको वसति पूजितः ।
यावद्वर्षसहस्रं वै जम्बुद्वीपे प्रवर्षति ॥ ३४
तावत्संवत्सराः प्रोक्ता ब्रह्मलोकेऽस्य धीमतः
विप्रुषश्चैव यावन्त्यो निपतन्ति नभस्तलात्॥
वर्षासु वर्षतस्तावन्निवसत्यमरप्रभः ।
मासोपवासी वर्षैस्तु दशाभिः स्वर्गमुत्तमम् ३६
महर्षित्वमथासाद्य स शरीरगतिर्भवेत् ।
मुनिर्दान्तो जितक्रोधो जितशिश्नोदरः सदा
जुह्वन्नग्नींश्च नियतः सन्ध्योपासनसेविता ।
बहुभिर्नियमैरेवं शुचिरभाति यो नरः ॥ ३८
अभ्रावकाशशीलश्च तस्य भानोरिव त्विषः ।
दिवं गत्वा शरीरेण स्वेन राजन् यथामरः ॥
स्वर्गे पुण्यं यथाकाममुपभुङ्क्ते तथाविधः ।
एष ते भरतश्रेष्ठ यज्ञानां विधिरुत्तमः ॥ ४०
व्याख्यातो ह्यानुपूर्व्येण उपवासफलात्मकः ।
दरिद्रैर्मनुजैः पार्थ प्राप्तं यज्ञफलं यथा ॥ ४१

अभ्रं मेघस्तस्यावकाश आकाशं तच्छीलस्तद्वन्निर्मल ॥ ३९ ॥

उपवासानिमान् कृत्वा गच्छेच्च परमां गतिम्
देवद्विजातिपूजाया रतो भरतसत्तम ॥ ४२
उपवासविधिस्त्वेष विस्तरेण प्रकीर्तितः ।
नियतेष्वप्रमत्तेषु शौचवत्सु महात्मसु ॥ ४३
दंभद्रोहनिवृत्तेषु कृतबुद्धिषु भारत ।
अचलेष्वप्रकंपेषु मा ते भूदत्र संशयः ॥ १४४

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि उपवासविधिर्नाम सप्ताधिकशततमोऽध्यायः ॥ १०७ ॥



१०८

युधिष्ठिर उवाच ।
यद्वरं सर्वतीर्थाना तन्मे ब्रूहि पितामह ।
यत्र चैव परं शौच तन्मे व्याख्यातुमर्हसि १
भीष्म उवाच ।
सर्वाणि खलु तीर्थानि गुणवन्ति मनीषिणः
यत्तु तीर्थं च शौचं च तन्मे शृणु समाहितः
अगाधे विमले शुद्धे सत्यतोये धृतिह्रदे ।
स्नातव्य मानसे तीर्थे सत्त्वमालंब्य शाश्वतम्
तीर्थशौचमनर्थित्वमार्जवं सत्यमार्दवम् ।
अहिंसा सर्वभूतानामानृशंस्यं दमः शम. ४
निर्ममा निरहंकारा निर्द्वन्द्वा निष्परिग्रहाः ।
शुचयस्तीर्थभूतास्ते ये भैक्ष्यमुपभुञ्जते ॥ ५
तत्त्ववित्त्वनहंबुद्धिस्तीर्थप्रवरमुच्यते ।
शौचलक्षणमेतत्ते सर्वत्रैवान्ववेक्षतः ॥ ६
रजस्तमः सत्त्वमथो येषा निर्धौतमात्मनः ।
शौचाशौचसमायुक्ताः स्वकार्यपरिमार्गिणः ७
सर्वत्यागेष्वभिरताः सर्वज्ञाः समदर्शिनः ।
शौचेन वृत्तशौचार्थास्ते तीर्थाः शुचयश्च ये ८
नोदकक्लिन्नगात्रस्तु स्नात इत्यभिधीयते ।
स स्नातो यो दमस्नातः स बाह्याभ्यन्तरः शुचिः
अतीतेष्वनपेक्षा ये प्राप्तेष्वर्थेषु निर्ममाः ।
शौचमेव परं तेषां येषां नोत्पद्यते स्पृहा ॥१०
प्रज्ञान शौचमेवेह शरीरस्य विशेषतः ।
तथा निष्किंचनत्व च मनसश्च प्रसन्नता ११
वृत्तशौचं मनःशौच तीर्थशौचमतःपरम् ।
ज्ञानोत्पन्नं च यच्छौचं तच्छौच परम स्मृतम्
मनसा च प्रदीप्तेन ब्रह्मज्ञानजलेन च ।
स्नाति यो मानसे तीर्थे तत्स्नानं तत्त्वदर्शिनः
समारोपितशौचस्तु नित्य भावसमाहितः ।
केवलं गुणसपन्नः शुचिरेव नरः सदा ॥ १४
शरीरस्थानि तीर्थानि प्रोक्तान्येतानि भारत
पृथिव्यायानि तीर्थानि पुण्यानि शृणु तान्यपि
शरीरस्य यथोद्देशाः शुचयः परिकीर्तिताः ।
तथा पृथिव्या भागाश्च पुण्यानि सलिलानि च
कीर्तनाच्चैव तीर्थस्य स्नानाच्च पितृतर्पणात् ।
धुनन्ति पाप तीर्थेषु ते प्रयान्ति सुखं दिवम्
परिग्रहाच्च साधूना पृथिव्याश्चैव तेजसा ।
अतीव पुण्यभागास्ते सलिलस्य च तेजसा ॥
मनसश्च पृथिव्याश्च पुण्यास्तीर्थास्तथापरे ।
उभयोरेव यः स्नायात्स सिद्धिं शीघ्रमाप्नुयात्
यथा बलं क्रियाहीन क्रिया वा बलवर्जिता ।
नेह साधयते कार्यं समायुक्ता तु सिध्यति २०
एवं शरीरशौचेन तीर्थशौचेन चान्वितः ।
शुचिः सिद्धिमवाप्नोति द्विविधं शौचमुत्तमम्

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि शौचानुपृच्छा नामाष्टाधिकशततमोऽध्यायः ॥ १०८ ॥



इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठाये भारतभावदीपे सप्ताधिकशततमोऽध्याय ॥ १०७ ॥

१०८

यदिति ॥ १ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टाधिकशततमोऽध्याय १०८

१०९

युधिष्ठिर उवाच ।
सर्वेषामुपवासानां यच्छ्रेयः सुमहत्फलम् ।
यच्चाप्यसदृशं लोके तन्मे त्वं वक्तुमर्हसि ॥१
भीष्म उवाच ।
शृणु राजन्यथा गीतं स्वयमेव स्वयंभुवा ।
यत्कृत्वा निर्वृतो भूयात्पुरुषो नात्र संशयः २
द्वादश्यां मार्गशीर्षे तु अहोरात्रेण केशवम् ।
अर्च्यांश्वमेधं प्राप्नोति दुष्कृतं चास्य नश्यति
तथैव पौषमासे तु पूज्यो नारायणेति च ।
वाजपेयमवाप्नोति सिद्धिं च परमां व्रजेत् ४
अहोरात्रेण द्वादश्यां माघमासे तु माधवम् ।
राजसूयमवाप्नोति कुलं चैव समुद्धरेत् ॥ ५
तथैव फाल्गुने मासि गोविन्देति च पूजयन् ।
अतिरात्रमवाप्नोति सोमलोकं च गच्छति ६
अहोरात्रेण द्वादश्या चैत्रे विष्णुरिति स्मरन् ।
पौण्डरीकमवाप्नोति देवलोकं च गच्छति ७
वैशाखमासे द्वादश्यां पूजयन्मधुसूदनम् ।
अग्निष्टोममवाप्नोति सोमलोकं च गच्छति ८
अहोरात्रेण द्वादश्यां ज्येष्ठे मासि त्रिविक्रमम्
गवां मेधमवाप्नोति अप्सरोभिश्च मोदते ॥ ९
आषाढे मासि द्वादश्यां वामनेति च पूजयन्
नरमेधमवाप्नोति पुण्यं च लभते महत् ॥ १०
अहोरात्रेण द्वादश्यां श्रावणे मासि श्रीधरम् ।
पञ्चयज्ञानवाप्नोति विमानस्थश्च मोदते ॥ ११
तथा भाद्रपदे मासि हृषीकेशेति पूजयन् ।
सौत्रामणिमवाप्नोति पूतात्मा भवते च हि ॥
द्वादश्यामाश्विने मासि पद्मनाभेति चार्चयन्
गोसहस्रफलं पुण्यं प्राप्नुयान्नात्र संशयः ॥१३
द्वादश्यां कार्तिके मासि पूज्य दामोदरेति च
गवा यज्ञमवाप्नोति पुमान् स्त्री वा न संशयः ॥
अर्चयेत्पुण्डरीकाक्षमेवं संवत्सरं तु यः ।
जातिस्मरत्वं प्राप्नोति विन्द्याद्वहु सुवर्णकम्
अहन्यहनि तद्भावमुपेन्द्रं योऽधिगच्छति ।
समाप्ते भोजयेद्विप्रानथवा दापयेद्घृतम् ॥ १६
अतः पर नोपवासो भवतीति विनिश्चयः ।
उवाच भगवान्विष्णुः स्वयमेव पुरातनम् १७

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि विष्णोर्द्वादशकं नाम नवाधिकशततमोऽध्यायः ॥ १०९ ॥

११०

वैशम्पायन उवाच ।
शरतल्पगतं भीष्मं वृद्ध कुरुपितामहम् ।
उपगम्य महाप्राज्ञः पर्यपृच्छद्युधिष्ठिरः ॥ १
युधिष्ठिर उवाच ।
अज्ञानां रूपसौभाग्यं प्रियं चैव कथं भवेत
धर्मार्थकामसंयुक्तः सुखभागी कथ भवेत ॥ २
भीष्म उवाच ।
मार्गशीर्षस्य मासस्य चन्द्रे मूलेन संयुते ।
पादौ मूलेन राजेन्द्र जंघायामथ रोहिणीम् ३
अश्विन्यां सक्थिनी चैव ऊरू चाषाढयोस्तथा
गुह्यं तु फाल्गुनी विद्यात्कृत्तिका कटिकास्तथा

१०९


सर्वेषामिति ॥ १ ॥ अर्च्य अभ्यर्च्य ॥ ३ ॥ तद्भावमुपेन्द्रं उपेन्द्रतादात्म्य कीटभृङ्गन्यायेन ध्यानेनाधिगच्छति ॥ १६ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे नवाधिकशततमोऽध्याय १०९

११०

शरतल्पगतमिति ॥ १ ॥ इष्टकामनासिद्धयर्थं चान्द्रव्रतमाह–**मार्गेति** । मार्गशीर्षशुक्लप्रतिपदि मूलनक्षत्रयोगे सतीदं चान्द्र व्रतमारभेत् । तत्र चन्द्रावयवेषु नक्षत्राणि न्यसेत् पादौ मूलेनेत्यादिना स्वदेवतासहितेन मूलेन चन्द्रस्य पादौ कल्पयेदित्यर्थ । एव रोहिण्यादिभि सदेवताभिर्जघादय कल्पनीया । सर्वत्र विभक्तिव्यत्यय आर्ष ॥३॥ **आषाढयोरिति**। आषाढाद्वयं फाल्गुनीद्वय भाद्रपदाद्वयं च ज्ञेयम् ॥ ४ ॥

नाभिं भाद्रपदे विद्याद्रेवत्यामक्षिमण्डलम् ।
पृष्ठमेव धनिष्ठासु अनुराधोत्तरास्तथा ॥ ५
बाहुभ्यां तु विशाखासु हस्तौ हस्तेन निर्दिशेत्
पुनर्वस्वंगुली राजन्नाश्लेषासु नखास्तथा ॥ ६
ग्रीवां ज्येष्ठा च राजेन्द्र श्रवणेन तु कर्णयोः ।
मुखं पुष्येण दानेन दन्तोष्ठौ स्वातिरुच्यते ७
हास शतभिषां चैव मघां चैवाथ नासिकाम्
नेत्रे मृगशिरो विद्यात्ललाटे मित्रमेव तु ॥ ८
भरण्यातु शिरो विद्यात् केशानार्द्रा नराधिप
समाप्ते तु घृत दद्याद्ब्राह्मणे वेदपारगे ॥ ९
सुभगो दर्शनीयश्च ज्ञानभाग्यथ जायते ।
जायते परिपूर्णांगः पौर्णमास्येव चन्द्रमाः १०

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि
दशाधिकशततमोऽध्यायः ॥ ११० ॥



१११

युधिष्ठिर उवाच ।
पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
श्रोतुमिच्छामि मर्त्यानां संसारविधिमुत्तमम्
केन वृत्तेन राजेन्द्र वर्तमाना नरा भुवि ।
प्राप्नुवन्त्युत्तमं स्वर्गं कथं च नरकं नृप ॥ २
मृत शरीरमुत्सृज्य काष्ठलोष्टसम जनाः ।
प्रयान्त्यमुं लोकमितः को वै ताननुगच्छति

भीष्म उवाच ।
अयमायाति भगवान् बृहस्पतिरुदारधीः ।
पृच्छैनं सुमहाभागमेतद्गुह्यं सनातनम् ॥ ४
नैतदन्येन शक्यं हि वक्तु केनचिदद्य वै ।
वक्ता बृहस्पतिसमो न ह्यन्यो विद्यते क्वचित्

वैशम्पायन उवाच ।
तयोः सवदतोरेवं पार्थगाङ्गेययोस्तदा ।
आजगाम विशुद्धात्मा नाकपृष्ठाद्बृहस्पतिः ६
ततो राजा समुत्थाय धृतराष्ट्रपुरोगमः ।
पूजामनुपमा चक्रे सर्वे ते च सभासदः ॥ ७
ततो धर्मसुतो राजा भगवन्तं बृहस्पतिम् ।
उपगम्य यथान्यायं प्रश्नं पप्रच्छ तत्त्वतः ॥ ८

युधिष्ठिर उवाच ।
भगवन्सर्वधर्मज्ञ सर्वशास्त्रविशारद ।
मर्त्यस्य कः सहायो वै पिता माता सुतो गुरुः
ज्ञातिसम्बन्धिवर्गश्च मित्रवर्गस्तथैव च ।
मृतं शरीरमुत्सृज्य काष्ठलोष्टसमं जनाः १०
गच्छन्त्यमुत्र लोकं वै क एनमनुगच्छति ।

बृहस्पतिरुवाच ।
एकः प्रसूयते राजन्नेक एव विनश्यति ॥११
एकस्तरति दुर्गाणि गच्छत्येकस्तु दुर्गतिम् ।
असहायः पिता माता तथा भ्राता सुतो गुरुः
ज्ञातिसम्बन्धिवर्गश्च मित्रवर्गस्तथैव च ।
मृतं शरीरमुत्सृज्य काष्ठलोष्टसम जनाः ॥१३
मुहूर्तमिव रोदित्वा ततो यान्ति पराङ्मुखाः
तैस्तच्छरीरमुत्सृष्टं धर्म एकोऽनुगच्छति १४
तस्माद्धर्मः सहायश्च सेवितव्यः सदा नृभिः ।
प्राणी धर्मसमायुक्तो गच्छेत्स्वर्गगतिं पराम् ॥
तथैवाधर्मसंयुक्तो नरकं चोपपद्यते ।
तस्मान्न्यायागतैरर्थैर्धर्मं सेवेत पण्डितः १६

अत्राय प्रयोग —पुण्याहवाचनादिपूर्वक इष्टकाम्यार्थं व्रत स्वीकृत्य चन्द्रमात्मान च चन्द्राभिन्नं ध्यात्वा तदवयवेषु तत्तद्देवतासहितानि नक्षत्राणि विन्यस्य तत्तन्मन्त्रैस्तेषामाराधन जपहोमादिना प्रत्यह कर्तव्यम् । एव पौर्णमासीपर्यन्त कृत्वा समाप्ते व्रते होमशेषं घृतमाचार्याय निवेदयेत् समाप्ते तु घृतं दद्यादित्यनेन घृतमेव होमद्रव्यं ज्ञायते ॥ ९ ॥ एव कुर्वन्विकलाङ्गोपि पौर्णमास्या सकलाङ्गो भवति एतत्सदृष्टान्तमाह–**परिपूर्णाङ्ग इति** ॥१०॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे दशाधिकशततमोऽध्याय ॥ ११० ॥

१११

पितामहेति ॥ १ ॥

धर्म एको मनुष्याणां सहायः पारलौकिकः ।
लोभान्मोहादनुक्रोशाद्भयाद्वाप्यबहुश्रुतः १७
नरः करोत्यकार्याणि परार्थे लोभमोहितः ।
धर्मश्चार्थश्च कामश्च त्रितयं जीविते फलम् १८
एतत्त्रयमवाप्तव्यमधर्मपरिवर्जितम् ।

युधिष्ठिर उवाच ।

श्रुत भगवतो वाक्यं धर्मयुक्तं पर हितम्१९
शरीरनिचयं ज्ञातुं बुद्धिस्तु मम जायते ।
मृतं शरीरं हि नृणा सूक्ष्ममव्यक्ततां गतम् २०
अचक्षुर्विषयं प्राप्त कथं धर्मोऽनुगच्छति ।

बृहस्पतिरुवाच ।

पृथिवी वायुराकाशमापो ज्योतिर्मनोन्तगः
बुद्धिरात्मा च सहिता धर्मं पश्यन्ति नित्यदा
प्राणिनामिह सर्वेषा साक्षिभूता निशानिशम्
एतैश्च सह धर्मोऽपि त जीवमनुगच्छति ।
त्वगस्थिमासं शुक्रं च शोणितं च महामते ॥
शरीर वर्जयन्त्येते जीवितेन विवर्जितम् ।
ततो धर्मसमायुक्तः प्राप्नुते जीव एव हि २४
ततोऽस्य कर्म पश्यन्ति शुभं वा यदि वाऽशुभ
देवताः पञ्चभूतस्थाः कि भूयः श्रोतुमिच्छासि
ततो धर्मसमायुक्तः स जीवः सुखमेधते ।
इहलोके परे चैव कि भूयः कथयामि ते ॥ २६

युधिष्ठिर उवाच ।

तदर्शितं भगवता यथा धर्मोऽनुगच्छति ।
एतत्तु ज्ञातुमिच्छामि कथ रेतः प्रवर्तते ॥२७

बृहस्पतिरुवाच ।

अन्नमश्नन्ति यद्देवाः शरीरस्था नरेश्वर ।
पृथिवी वायुराकाशमापो ज्योतिर्मनस्तथा ॥
ततस्तृप्तेषु राजेन्द्र तेषु भूतेषु पञ्चसु ।
मनःषष्ठेषु शुद्धात्मन् रेतः संपद्यते महत् २९
ततो गर्भः सम्भवति श्लेषात्स्त्रीपुंसयोर्नृप ।
एतत्ते सर्वमाख्यातं भूयः किं श्रोतुमिच्छसि

युधिष्ठिर उवाच ।

आख्यातं मे भगवता गर्भः सञ्जायते तथा।
यथा जातस्तु पुरुषः प्रपद्यति तदुच्यताम् ३१

बृहस्पतिरुवाच ।

आसन्नमात्रः पुरुषस्तैर्भूतैरभिभूयते ।
विप्रयुक्तश्च तैर्भूतैः पुनर्यात्यपरा गतिम् ॥ ३२
सर्वभूतसमायुक्तः प्राप्नुते जीव एव हि ।
ततोऽस्य कर्म पश्यन्ति शुभ वा यदि वाऽशुभम
देवताः पञ्चभूतस्थाः किं भूयः श्रोतुमिच्छसि

युधिष्ठिर उवाच ।

त्वगस्थिमांसमुत्सृज्य तैश्च भूतैर्विवर्जितः।
जीवः स भगवन्कस्थः सुखदुःखे समश्नुते ३४

बृहस्पतिरुवाच ।

जीवः कर्मसमायुक्तः शीघ्र रेतस्त्वमागतः।
स्त्रीणां पुष्पं समासाद्य सूते कालेन भारत ३५
यमस्य पुरुषैः क्रूशं यमस्य पुरुषैर्वधम् ।
दुःखं संसारचक्र च नरः क्लेश स विन्दति ॥
इह लोक स च प्राणी जन्मप्रभृति पार्थिव ।
सुकृतं कर्म वै भुङ्क्ते धर्मस्य फलमाश्रितः ॥
यदि धर्मं यथाशक्ति जन्मप्रभृति सेवते ।
ततः स पुरुषो भूत्वा सेवते नित्यदा सुखम्३८

शरीरस्य निचयं सञ्चय अवस्थितिमिति यावत् ॥ २० ॥ अन्तगो यम अन्तार्थं गच्छतीति योगात् ॥ २१ ॥ आत्मा साक्षी निशेति दिवसस्याप्युपलक्षणम् ॥ २२ ॥ एतै सह धर्मोऽपूर्वरूपो जीवमनुगच्छति ॥ २३ ॥ ननु भूतसूक्ष्मवत्फलसूक्ष्मावस्थारूपमपूर्वं जीवमनुगच्छतु रेतस्तु मूल एव स्थूलतरं कथमेनमावृणोति इत्याशङ्कते-**तदिति** ॥ २७ ॥ स जीवो पूर्वेण भूतैश्च मिश्रितो वायुद्वारा वृष्टित्व प्राप्यान्नरूपेण परिणम्य रेतोरूपी भवतीत्याह—**अन्नमिति** ॥ २८ ॥ कथ सूक्ष्मतमस्य पुरुषस्य स्थूलतरेण रेतसा तादात्म्य सत्यपि ससर्गे अभ्रवाय्वोरिव भवतीत्याशङ्कते —**आख्यातमिति** ॥ ३१ ॥ भूतावेशन्यायेन पुरुषस्तैस्तैर्भूतै रेतोद्वारा शरीराकारत्व प्राप्ते सह सङ्गमात्रेणाभिभूयते तादात्म्येन च वर्तते सङ्गाभावे तु न सुखमाप्यादित्याह—**आसन्नेति** ॥ ३२ ॥ ततस्तादात्म्याभिमानरूपादभिभवादयं कर्तृत्वादिमान् भवति तदास्य कर्मादिक देवा पश्यन्ति ॥ ३३ ॥ स्थूलदेहसङ्गाद्युज्यतामस्य कर्तृत्व तद्गहे तु कथमस्य सुखादिसङ्ग इत्याशङ्कते-**त्वगिति**३४॥ स्थूलदेहनाशक्षण एव स रेतस्त्वं शुक्रक्रमेण सूक्ष्मशरीरभावमेति तत स्त्रीणा पुष्पं समासाद्येत्यादि स्पष्ट तद्यथा तृणजलायूका अन्यत्तृणमाक्रम्य पूर्वं जहाति एवमेतादिति ज्ञेयम् ॥३५॥ **यमस्येति** । गर्भत्वमप्राप्त सूक्ष्मशरीरावच्छिन्नस्तीव्रपापयोगाद्यातना लभत इत्यर्थः ॥ ३६ ॥

पर लोकमिति शेष ।

अथान्तरा तु धर्मस्याप्यधर्ममुपसेवते ।
सुखस्यानन्तरं दुःखं स जीवोऽप्यधिगच्छति
अधर्मेण समायुक्तो यमस्य विषयं गतः ।
महद्दुःखं समासाद्य तिर्यग्योनौ प्रजायते ४०
कर्मणा येन येनेह यस्यां योनौ प्रजायते ।
जीवो मोहसमायुक्तस्तन्मे निगदतः शृणु ४१
यदेतदुच्यते शास्त्रे सेतिहासे च छन्दसि ।
यमस्य विषयं घोरं मर्त्यो लोकः प्रपद्यते ४२
इह स्थानानि पुण्यानि देवतुल्यानि भूपते ।
तिर्यग्योन्यतिरिक्तानि गतिमन्ति च सर्वशः
यमस्य भवने दिव्ये ब्रह्मलोकसमे गुणैः ।
कर्मभिर्नियतैर्बद्धो जन्तुर्दुःखान्युपाश्नुते ४४
येन येन तु भावेन कर्मणा पुरुषो गतिम् ।
प्रयाति पुरुषां घोरां तत्ते वक्ष्याम्यतः परम् ॥
अधीत्य चतुरो वेदान् द्विजो मोहसमन्वितः
पतितात्प्रतिगृह्याथ खरयोनौ प्रजायते ॥ ४६
खरो जीवति वर्षाणि दश पञ्च च भारत ।
खरो मृतो बलीवर्दः सप्त वर्षाणि जीवति ॥
बलीवर्दो मृतश्चापि जायते ब्रह्मराक्षसः ।
ब्रह्मरक्षश्च मासांस्त्रीस्ततो जायति ब्राह्मणः ४८
पतितं याजयित्वा तु कृमियोनौ प्रजायते ।
तत्र जीवति वर्षाणि दश पञ्च च भारत ४९
कृमिभावाद्विमुक्तस्तु ततो जायति गर्दभः ।
गर्दभः पञ्चवर्षाणि पञ्चवर्षाणि सूकरः ॥ ५०
कुक्कुटः पञ्च वर्षाणि पञ्च वर्षाणि जम्बुकः ।
श्वा वर्षमेक भवति ततो जायति मानवः ५१
उपाध्यायस्य यः पापं शिष्यः कुर्यादबुद्धिमान्
स जीव इह संसारांस्त्रीनाप्नोति न संशयः ५२
प्राक् श्वा भवति राजेन्द्र ततः क्रव्यात्ततः खरः
ततः प्रेतः परिक्लिष्टः पश्चाज्जायति ब्राह्मणः ॥
मनसापि गुरोर्भार्यां यः शिष्यो याति पापकृत्
स उग्रान्प्रैति संसारानधर्मेणेह चेतसा ॥ ५४
श्वयोनौ तु स संभूतस्त्रीणि वर्षाणि जीवति
तत्रापि निधन प्राप्तः कृमियोनौ प्रजायते ५५
कृमिभावमनुप्राप्तो वर्षमेकं तु जीवति ।
ततस्तु निधनं प्राप्तो ब्रह्मयोनौ प्रजायते ५६
यदि पुत्रसम शिष्यं गुरुर्हन्याद्कारणे ।
आत्मनः कामकारेण सोऽपि हिंस्रः प्रजायते॥
पितर मातरं चैव यस्तु पुत्रोऽवमन्यते ।
सोऽपि राजन्मृतो जन्तुः पूर्वं जायेत गर्दभः
गर्दभत्वं तु संप्राप्य दशवर्षाणि जीवति ।
संवत्सरं तु कुंभीरस्ततो जायेत मानवः ५९
पुत्रस्य मातापितरौ यस्य रुष्टावुभावपि ।
गुर्वपध्यानतः सोऽपि मृतो जायति गर्दभः ॥
खरो जीवति मासास्तु दश श्वा च चतुर्दश ।
बिडालः सप्तमासांस्तु ततो जायति मानवः
मातापितरावाकुश्य सारिकः संप्रजायते ।
ताडयित्वा तु तावेव जायते कच्छपो नृप ॥
कच्छपो दशवर्षाणि त्रीणि वर्षाणि शल्यकः
व्यालो भूत्वा च षण्मासांस्ततो जायति मानुषः
भर्तृपिण्डमुपाश्नन्यो राजद्विष्टानि सेवते ।
सोऽपि मोहसमापन्नो मृतो जायति वानरः
वानरो दशवर्षाणि पञ्चवर्षाणि मूषिकः ।
श्वाऽथ भूत्वा तु षण्मासांस्ततो जायति मानुषः
न्यासापहर्ता तु नरो यमस्य विषयं गतः ।
संसाराणां शत गत्वा कृमियोनौ प्रजायते ६६
तत्र जीवति वर्षाणि दश पञ्च च भारत ।
दुष्कृतस्य क्षयं कृत्वा ततो जायति मानुषः ।
असूयको नरश्चापि मृतो जायति शार्ङ्गकः ।
विश्वासहर्ता तु नरो मीनो जायति दुर्मतिः
भूत्वा मीनोऽष्टवर्षाणि मृतो जायति भारत ।
मृगस्तु चतुरो मासास्ततश्छागः प्रजायते ६९
छागस्तु निधनं प्राप्य पूर्णे सवत्सरे ततः ।
कीटः सञ्जायते जन्तुस्ततो जायति मानुषः ॥

धान्यान् यवांस्तिलान् माषान्
कुलत्थान् सर्षपांश्चणान् ।
कलापानथ मुद्गांश्च
गोधूमानतसीस्तथा ॥ ७१

सस्यस्यान्यस्य हर्ता च मोहाज्जन्तुरचेतनः ।
स जायते महाराज मूषिको निरपत्रपः ७२
ततः प्रेत्य महाराज मृतो जायति सूकरः ।
सूकरो जातमात्रस्तु रोगेण म्रियते नृप ॥ ७३
श्वा ततो जायते मूढः कर्मणा तेन पार्थिव ।
भूत्वा श्वा पञ्च वर्षाणि ततो जायति मानवः
परदाराभिमर्शी तु कृत्वा जायति वै वृकः ।
श्वा शृगालस्ततो गृध्रो व्यालः कंको बकस्तथा
भ्रातुर्भार्यां तु पापात्मा यो धर्षयति मोहितः ।
पुंस्कोकिलत्वमाप्नोति सोऽपि संवत्सर नृप
सखिभार्यां गुरोर्भार्यां राजभार्यां तथैव च ।
प्रधर्षयित्वा कामाय मृतो जायति सूकरः ७७
सूकरः पञ्चवर्षाणि दशवर्षाणि श्वाविधः ।
बिडालः पञ्चवर्षाणि दशवर्षाणि कुक्कुटः ७८

नकस्तु कुम्भीर (१।१०।२१) इत्यमर ।

पिपीलिकस्तु मासांस्त्रीन्
कीटः स्यान्मासमेव तु ।
एतानासाद्य संसारान्
कृमियोनौ प्रजायते ॥ ७९
तत्र जीवति मासांस्तु कृमियोनौ चतुर्दश ।
ततोऽधर्मक्षयं कृत्वा पुनर्जायति मानवः ८०
उपस्थिते विवाहे तु यज्ञे दानेऽपि वा विभो ।
मोहात्करोति यो विघ्न स मृतो जायते कृमिः
कृमिर्जीवति वर्षाणि दश पञ्च च भारत ।
अधर्मस्य क्षयं कृत्वा ततो जायति मानवः८२
पूर्वं दत्वा तु यः कन्यां द्वितीये दातुमिच्छति
सोपि राजन्मृतो जन्तुः कृमियोनौ प्रजायते
तत्र जीवति वर्षाणि त्रयोदश युधिष्ठिर ।
अधर्मसंक्षये युक्तस्ततो जायति मानवः ८४
देवकार्यमकृत्वा तु पितृकार्यमथापि वा ।
अनिर्वाप्य समश्नन्वै मृतो जायति वायसः८५
वायसः शतवर्षाणि ततो जायति कुक्कुटः ।
जायते व्यालकश्चापि मासं तस्मात्तु मानुषः
ज्येष्ठ पितृसमं चापि भ्रातरं योऽवमन्यते ।
सोऽपि मृत्युमुपागम्य क्रौञ्चयोनौ प्रजायते ॥
क्रौञ्चो जीवति वर्षं तु ततो जायति चीरकः
ततो निधनमापन्नो मानुषत्वमुपाश्नुते ॥ ८८
वृषलो ब्राह्मणी गत्वा कृमियोनौ प्रजायते ।
ततः संप्राप्य निधनं जायते सूकरः पुनः ॥ ८९
सूकरो जातमात्रस्तु रोगेण म्रियते नृप ।
श्वा ततो जायते मूढः कर्मणा तेन पार्थिव९०
श्वा भूत्वा कृतकर्माऽसौ जायते मानुषस्ततः
तत्रापत्यं समुत्पाद्य मृतो जायति मूषिकः९१
कृतघ्नस्तु मृतो राजन् यमस्य विषय गतः ।
यमस्य पुरुषैः क्रुद्धैर्वध प्राप्नोति दारुणम् ९२
दण्ड समुद्गरं शूलमग्निकुभ च दारुणम् ।
असिपत्रवनं घोरवालुक कूटशाल्मलीम् ९३
एताश्चान्याश्च बह्वीश्च यमस्य विषयं गतः ।
यातनाः प्राप्य तत्रोग्रास्ततो वध्यति भारत
ततो हतः कृतघ्नः स तत्रोग्रैर्भरतर्षभ ।
संसारचक्रमासाद्य कृमियोनौ प्रजायते ॥ ९५
कृमिर्भवति वर्षाणि दश पञ्च च भारत ।
ततो गर्भं समासाद्य तत्रैव म्रियते शिशुः ९६
ततो गर्भशतैर्जन्तुर्बहुभिः संप्रपद्यते ।
संसारांश्च बहून्गत्वा ततस्तिर्यक्षु जायते ९७
ततो दुःखमनुप्राप्य बहु वर्षगणानिह ।
अपुनर्भवसयुक्तस्ततः कूर्मः प्रजायते ९८
दधि हृत्वा बकश्चापि प्लवो मत्स्यानसंस्कृतान्
चोरयित्वा तु दुर्बुद्धिर्मधुदंशः प्रजायते ॥ ९९
फल वा मूलकं हृत्वा अपूपं वा पिपीलिकाः
चोरयित्वा च निष्पावं जायते हलगोलकः
पायस चोरयित्वा तु तित्तिरित्वमवाप्नुते ।
हृत्वा पिष्टमयं पूपं कुंभोलूकः प्रजायते १०१
अयो हृत्वा तु दुर्बुद्धिर्वायसो जायते नरः ।
कास्य हृत्वा तु दुर्बुद्धिर्हारितो जायते नरः२
राजतं भाजन हृत्वा कपोतः संप्रजायते ।
हृत्वा तु काञ्चन भाण्ड कृमियोनौ प्रजायते ३
पत्रोर्णं चोरयित्वा तु कृकलत्वं निगच्छति ।
कौशिकं तु ततो हृत्वा नरो जायति वर्तकः४
अंशुक चोरयित्वा तु शुको जायति मानवः ।
चोरयित्वा दुकूलं तु मृतो हंसः प्रजायते ५
क्षौञ्चः कार्पासिकं हृत्वा मृतो जायति मानवः
चोरयित्वा नरः पट्टं त्वाविक चैव भारत ६
क्षौमं च वस्त्रमादाय शशो जंतुः प्रजायते ।
वर्णान् हृत्वा तु पुरुषो मृतो जायति बर्हिणः
हृत्वा रक्तानि वस्त्राणि जायते जीवजीवकः
वर्णकादीस्तथा गन्धाश्चोरयित्वेह मानवः॥८
छुच्छुंदरित्वमाप्नोति राजन् लोभपरायणः ।
तत्र जीवति वर्षाणि ततो दश च पञ्च च ९
अधर्मस्य क्षयं गत्वा ततो जायति मानुषः ।
चोरयित्वा पयश्चापि बलाका सप्रजायते १०
यस्तु चोरयते तैलं नरो मोहसमन्वितः ।
सोऽपि राजन्मृतो जन्तुस्तैलपायी प्रजायते
अशस्त्र पुरुषं हत्वा सशस्त्रः पुरुषाधमः ।
अर्थार्थी यदि वा वैरी स मृतो जायते खरः१२
खरो जीवति वर्षे द्वे ततः शस्त्रेण वध्यते ।
स मृतो मृगयोनौ तु नित्योद्विग्नोऽभिजायते
मृगो वध्यति शस्त्रेण गते संवत्सरे तु सः ।
हतो मृगस्ततो मीनः सोपि जालेन बध्यते ॥

निष्पाव राजमाष हरगोलक दीर्घपुच्छो गोलरूपी कीटविशेष ॥ १०० ॥ कुभोलूक उलूकजातिभेद ॥ १ ॥ हारित. पक्षिविशेष ॥ २ ॥ पत्रोर्ण वीतकौशेयम् ॥ ४ ॥ वर्णान् हरितालादीन् ॥ ७ ॥

मासे चतुर्थे संप्राप्ते श्वापदः संप्रजायते ।
श्वापदो दशवर्षाणि द्वीपी वर्षाणि पञ्च च१५
ततस्तु निधनं प्राप्तः कालपर्यायचोदितः ।
अधर्मस्य क्षयं कृत्वा ततो जायति मानुषः ॥
स्त्रियं हृत्वा तु दुर्बुद्धिर्यमस्य विषय गतः ।
बहून्क्लेशान्समासाद्य संसारांश्चैव विंशतिम्
ततः पश्चान्महाराज कृमियोनौ प्रजायते ।
कृमिर्विंशतिवर्षाणि भूत्वा जायति मानुषः
भोजनं चोरयित्वा तु मक्षिका जायते नरः ।
मक्षिकासंघवशगो बहून्मासान्भवत्युत ॥ १९
ततः पापक्षयं कृत्वा मानुषत्वमवाप्नुते ।
धान्य हृत्वा तु पुरुषो लोमशः संप्रजायते २०
तथा पिण्याकसंमिश्रमशन चोरयेन्नरः ।
स जायते बभ्रुसमो दारुणो मूषिको नरः २१
दशन् वै मानुषान्नित्यं पापात्मा स विशांपते
घृतं हृत्वा तु दुर्बुद्धिः काकमद्गुः प्रजायते २२
मत्स्यमांसमथो हृत्वा काको जायति दुर्मतिः
लवणं चोरयित्वा तु चिरिकाकः प्रजायते ॥
विश्वासेन तु निक्षिप्तं यो विनिह्नोति मानवः
स गतायुर्नरस्तात मत्स्ययोनौ प्रजायते ॥ २४
मत्स्ययोनिमनुप्राप्य मृतो जायति मानुषः ।
मानुषत्वमनुप्राप्य क्षीणायुरुपपद्यते ॥ २५
पापानि तु नराः कृत्वा तिर्यग्जायन्ति भारत
न चात्मनः प्रमाणं ते धर्मं जानन्ति किञ्चन
ये पापानि नराः कृत्वा निरस्यन्ति व्रतैःसदा
सुखदुःखसमायुक्ता व्यथितास्ते भवन्त्युत ॥
असंवासाः प्रजायन्ते म्लेच्छाश्चापि न संशयः
नराः पापसमाचारा लोभमोहसमन्विताः ॥
वर्जयन्ति च पापानि जन्मप्रभृति ये नराः ।
अरोगा रूपवन्तस्ते धनिनश्च भवन्त्युत ॥ २९
स्त्रियोऽप्येतेन कल्पेन कृत्वा पापमवाप्नुयुः ।
एतेषामेव जन्तूना भार्यात्वमुपयान्ति ताः ॥
परस्वहरणे दोषाः सर्व एव प्रकीर्तिताः ।
एतद्धि लेशमात्रेण कथितं ते मयाऽनघ ॥ ३१
अपरस्मिन् कथायोगे भूयः श्रोष्यसि भारत ।
एतन्मया महाराज ब्रह्मणा वदत पुरा ॥ ३२
सुरर्षीणां श्रुत मध्ये पृष्टश्चाऽपि यथातथम् ।
मयापि तच्च कात्स्न्र्येन यथावदनुवर्णितम् ।
एतच्छ्रुत्वा महाराज धर्मे कुरु मन सदा १३३

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि ससारचक्रं नाम एकादशाधिकशततमोऽध्यायः ॥ १११ ॥

११२

युधिष्ठिर उवाच ।
अधर्मस्य गतिर्ब्रह्मन्कथिता मे त्वयाऽनघ ।
धर्मस्य तु गतिं श्रोतुमिच्छामि वदतां वर १
कृत्वा कर्माणि पापानि कथं यांति शुभां गतिम्
कर्मणा च कृतेनेह केन यान्ति शुभा गतिम् २

बृहस्पतिरुवाच ।
कृत्वा पापानि कर्माणि अधर्मवशमागतः ।
मनसा विपरीतेन निरय प्रतिपद्यते ॥ ३
मोहादधर्मं यः कृत्वा पुनः समनुतप्यते ।
मनःसमाधिसयुक्तो न स सेवेत दुष्कृतम् ४
यथा यथा मनस्तस्य दुष्कृतं कर्म गर्हते ।
तथा तथा शरीरं तु तेनाधर्मेण मुच्यते ५
यदि व्याहरते राजन्विप्राणां धर्मवादिनाम् ।
ततोऽधर्मकृतात् क्षिप्रमपवादात् प्रमुच्यते ६
यथा यथा नरः सम्यगधर्ममनुभाषते ।
समाहितेन मनसा विमुच्येत तथा तथा ॥ ७
भुजङ्ग इव निर्मोकात्पूर्वभुक्ताज्जरान्वितात् ।
दत्वा विप्रस्य दानानि विविधानि समाहितः

काकमद्गु श्वगवान् जलपक्षी ॥ २२ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकादशाधिकशततमोऽध्याय ॥ १११ ॥

११२
अधर्मस्येति ॥ १ ॥

मनःसमाधिसंयुक्तः सुगतिं प्रतिपद्यते ।
प्रदानानि तु वक्ष्यामि यानि दत्वा युधिष्ठिर
नरः कृत्वाप्यकार्याणि ततो धर्मेण युज्यते ।
सर्वेषामेव दानानामन्नं श्रेष्ठमुदाहृतम् ।
पूर्वमन्नं प्रदातव्यमृजुना धर्ममिच्छता ॥ १०
प्राणा ह्यन्नं मनुष्याणां तस्माज्जन्तुश्च जायते ।
अन्ने प्रतिष्ठितो लोकस्तस्मादन्नं प्रशस्यते ११
अन्नमेव प्रशंसन्ति देवर्षिपितृमानवाः ।
अन्नस्य हि प्रदानेन रन्तिदेवो दिवं गतः १२
न्यायलब्धं प्रदातव्यं द्विजातिभ्योऽन्नमुत्तमम्
स्वाध्याय समुपेतेभ्यः प्रहृष्टेनान्तरात्मना १३
यस्य ह्यन्नमुपाश्नन्ति ब्राह्मणानां शतं दश ।
हृष्टेन मनसा दत्तं न स तिर्यग्गतिं व्रजेत् १४
ब्राह्मणानां सहस्राणि दश भोज्य नरर्षभ ।
नरोऽधर्मात्प्रमुच्येत योगेष्वभिरतः सदा १५
भैक्ष्येणान्नं समाहृत्य विप्रो वेदपुरस्कृतः ।
स्वाध्यायनिरते विप्रे दत्त्वेह सुखमेधते ॥ १६
अहिंसन्ब्राह्मणस्वानि न्यायेन परिपाल्य च ।
क्षत्रियस्तरसा प्राप्तमन्नं यो वै प्रयच्छति १७
द्विजेभ्यो वेदवृद्धेभ्यः प्रयत सुसमाहितः ।
तेनापोहति धर्मात्मन् दुष्कृत कर्म पाण्डव १८
षड्भागपरिशुद्धं च कृषेर्भागमुपार्जितम् ।
वैश्यो ददद्विजातिभ्यः पापेभ्यः परिमुच्यते
अवाप्य प्राणसन्देह कार्कश्येन समार्जितम् ।
अन्न दत्वा द्विजातिभ्यः शूद्रः पापात्प्रमुच्यते
औरसेन बलेनान्नमर्जयित्वाऽविहिंसकः ।
यः प्रयच्छति विप्रेभ्यो न स दुर्गाणि पश्यति
न्यायेनैवाप्तमन्नं तु नरो हर्षसमन्वितः ।
द्विजेभ्यो वेदवृद्धेभ्यो दत्वा पापात्प्रमुच्यते ॥
अन्नमूर्जस्करं लोके दत्वोर्जस्वी भवेन्नरः ।
सतां पन्थानमावृत्य सर्वपापैः प्रमुच्यते ॥ २३
दानवद्भिः कृतः पन्था येन यान्ति मनीषिणः
ते हि प्राणस्य दातारस्तेभ्यो धर्मः सनातनः
सर्वावस्थं मनुष्येण न्यायेनान्नमुपार्जितम् ।
कार्यं पात्रागतं नित्यमन्नं हि परमा गतिः २५
अन्नस्य हि प्रदानेन नरो रौद्रं न सेवते ।
तस्मादन्नं प्रदातव्यमन्यायपरिवर्जितम् ॥ २६
यतेर्ब्राह्मणपूर्वं हि भोक्तुमन्न गृहे सदा ।
अवन्ध्यं दिवसं कुर्यादन्नदानेन मानवः ॥ २७
भोजयित्वा दशशतं नरो वेदविदां नृप ।
न्यायविद्धर्मविदुषामितिहासविदा तथा २८
न याति नरकं घोरं संसारांश्च न सेवते ।
सर्वकामसमायुक्तः प्रेत्य चाप्यश्नुते सुखम् २९
एवं खलु समायुक्तो रमते विगतज्वरः ।
रूपवान् कीर्तिमांश्चैव धनवाश्चोपपद्यते ॥ ३०
एतत्ते सर्वमाख्यातमन्नदानफलं महत् ।
मूलमेतत्तु धर्माणा प्रदानानां च भारत ॥ ३१

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि संसारचक्रे
द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥

११३

युधिष्ठिर उवाच ।
अहिंसा वैदिकं कर्म ध्यानमिन्द्रियसंयमः ।
तपोऽथ गुरुशुश्रूषा किं श्रेयः पुरुषं प्रति ॥ १
बृहस्पतिरुवाच ।
सर्वाण्येतानि धर्म्याणि पृथग्द्वाराणि सर्वशः
शृणु संकीर्त्यमानानि षडेव भरतर्षभ ॥ २
हन्त निःश्रेयसं जन्तोरह वक्ष्याम्यनुत्तमम् ।
अहिंसापाश्रय धर्मं यः साधयति वै नरः ॥ ३
त्रीन् दोषान् सर्वभूतेषु निधाय पुरुषः सदा ।
कामक्रोधौ च सयम्य ततः सिद्धिमवाप्नुते ४

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्वादशाधिकशततमोऽध्यायः ॥ ११२ ॥

११३

अहिंसेति ॥ १ ॥ त्रीन्दोषान् कामक्रोधलोभान् लोकेषु निधाय न तु स्वात्मनि कामक्रोधौ चाक्रोधम् ॥ ४ ॥

अहिंसकानि भूतानि दण्डेन विनिहन्ति यः।
आत्मनः सुखमन्विच्छन् स प्रेत्य न सुखी भवेत्
आत्मोपमस्तु भूतेषु यो वै भवति पूरुषः।
न्यस्तदण्डो जितक्रोधः स प्रेत्य सुखमेधते ६
सर्वभूतात्मभूतस्य सर्वभूतानि पश्यतः।
देवाऽपि मार्गे मुह्यन्ति अपदस्य पदैषिणः ७
न तत्परस्य सन्दध्यात्प्रतिकूलं यदात्मनः।
एष संक्षेपतो धर्मः कामादन्यः प्रवर्तते ॥ ८
प्रत्याख्याने च दाने च सुखदुःखे प्रियाप्रिये।
आत्मौपम्येन पुरुषः प्रमाणमधिगच्छति ॥ ९

यथा परः प्रक्रमते परेषु
तथाऽपरे प्रक्रमन्ते परस्मिन्।
तथैव तेऽस्तूपमा जीवलोके
यथा धर्मो नैपुणेनोपदिष्टः ॥ १०

वैशम्पायन उवाच।

इत्युक्त्वा तं सुरगुरुर्धर्मराजं युधिष्ठिरम्।
दिवमाचक्रमे धीमान् पश्यतामेव नस्तदा ११

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि संसारचक्रसमाप्तौ त्रयोदशाधिकशततमोऽध्यायः ॥ ११३ ॥

११४

वैशम्पायन उवाच।

ततो युधिष्ठिरो राजा शरतल्पे पितामहम्
पुनरेव महातेजाः पप्रच्छ वदतां वरः ॥ १

युधिष्ठिर उवाच।

ऋषयो ब्राह्मणा देवाः प्रशंसन्ति महामते।
अहिंसालक्षणं धर्मं वेदप्रामाण्यदर्शनात् ॥ २
कर्मणा मनुजः कुर्वन् हिंसां पार्थिवसत्तम।
वाचा च मनसा चैव कथं दुःखात् प्रमुच्यते

भीष्म उवाच।

चतुर्विधेयं निर्दिष्टा ह्यहिंसा ब्रह्मवादिभिः।
एकैकतोऽपि विभ्रष्टा न भवत्यरिसूदन ॥ ४
यथा सर्वश्चतुष्पाद्वै त्रिभिः पादैर्न तिष्ठति।
तथैवेयं महीपाल कारणैः प्रोच्यते त्रिभिः ५
यथा नागपदेऽन्यानि पदानि पदगामिनाम्।
सर्वाण्येवापिधीयन्ते पदजातानि कौञ्जरे ॥ ६
एवं लोकेष्वहिंसा तु निर्दिष्टा धर्मतः पुरा।
कर्मणा लिप्यते जन्तुर्वाचा च मनसापि च ७
पूर्वं तु मनसा त्यक्त्वा तथा वाचाऽथ कर्मणा
न भक्षयति यो मांसं त्रिविधं स विमुच्यते ८
त्रिकारणं तु निर्दिष्टं श्रूयते ब्रह्मवादिभिः।
मनो वाचि तथाऽऽस्वाद दोषा ह्येषु प्रतिष्ठिताः
न भक्षयन्त्यतो मांसं तपोयुक्ता मनीषिणः।
दोषांस्तु भक्षणे राजन्मांसस्येह निबोध मे ॥
पुत्रमांसोपमं जानन् खादते यो विचक्षणः।
मांसं मोहसमायुक्तः पुरुषः सोऽधमः स्मृतः

सर्वेषा भूतानामात्मभूतस्य आत्मदु खेनेव परदु खेनापि उद्विजत सर्वभूतानि आत्मत्वेन तत्त्वदृशा पश्यत मार्गे देवा मुह्यन्ति स व्यापको भूत्वा मुच्यत इत्यर्थ। अपदस्य गत्यागतिहीनत्वान्मार्गसूचकपदरहितस्य पदैषिण स्थानैषिण बहिर्मुखा इत्यर्थ ॥७॥ **यथेति**। हिंसितो हिनस्ति पालित पालयति तस्मात्पालयेदेव नो हिंसयेदित्यर्थ ॥ १० ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्रयोदशाधिकशततमोऽध्याय ॥ ११३ ॥

११४

तत इति ॥ १ ॥ मनसा वचसा कर्मणा भक्षणेनेति चतुर्विधा हिंसा। तत्र एकेन त्यक्ता सर्वात्मना त्यक्ता न भवति न ह्यभक्षयन असकृत्पश्यत अन्यमास भोक्ष्ये इत्यवदन अकुर्वतो वा हिंसा केनचिदंशेन भवति॥ ४॥तत्र दृष्टान्तमाह— **यथेति**। एकेन पादेन विना त्रिभि पादै पशुरिवेयमप्येकेनांशेन हीना अशत्रयेण न तिष्ठतीत्यर्थ ॥५॥ **यथेति**। नागपदे गजपदे क्षुद्रपदानामिव सर्वेषा धर्माणा समावेशो भवति अहिंसायाम्। कौंजरे पदे दत्ते सति सर्वाणि पदानि यथा पिधीयन्ते एव हिंसाया सर्वे धर्मा पिधीयन्ते ॥ ६ ॥

पितृमातृसमायोगे पुत्रत्वं जायते यथा ।
हिंसां कृत्वावशः पापो भूयिष्ठं जायते तथा
रसं च प्रतिजिह्वाया ज्ञानं प्रज्ञायते यथा ।
तथा शास्त्रेषु नियतं रागो ह्यास्वादिताद्भवेत्
संस्कृतासंस्कृताः पक्वा लवणालवणास्तथा ॥
प्रजायन्ते यथा भावास्तथा चित्तं निरुध्यते ॥
भेरीमृदङ्गशब्दांश्च तन्त्रीशब्दांश्च पुष्कलान् ॥
निषेविष्यन्ति वै मन्दा मासभक्षाः कथं नराः
अचिन्तितमनिर्दिष्टमसंकल्पितमेव च ।
रसगृद्ध्याऽभिभूता ये प्रशंसन्ति फलार्थिनः
प्रशसा ह्येव मांसस्य दोषकर्मफलान्विता ।
जीवितं हि परित्यज्य बहवः साधवो जनाः
स्वमांसैः परमासानि परिपाल्य दिवं गताः ॥
एवमेषा महाराज चतुर्भिः कारणैर्वृता ।
अहिंसा तव निर्दिष्टा सर्वधर्मानुसंहिता १९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि मासवर्जनकथने चतुर्दशाधिकशततमोऽध्यायः ॥ ११४ ॥

११५

युधिष्ठिर उवाच ।
अहिंसा परमो धर्म इत्युक्तं बहुशस्त्वया ।
श्राद्धेषु च भवानाह पितॄनामिषकांक्षिणः ॥ १
मांसैर्बहुविधैः प्रोक्तस्त्वया श्राद्धविधिः पुरा
अहत्वा च कुतो मांसमेवमेतद्विरुध्यते ॥ २
जातो नः संशयो धर्मे मांसस्य परिवर्जने ।
दोषो भक्षयतः कः स्यात्कश्चाभक्षयतो गुणः
हत्वा भक्षयतो वापि परेणोपहृतस्य वा ।
हन्याद्वा यः परस्यार्थे क्रीत्वा वा भक्षयेन्नरः
एतदिच्छामि तत्त्वेन कथ्यमानं त्वयाऽनघ ।
निश्चयेन चिकीर्षामि धर्ममेतं सनातनम् ॥ ५
कथमायुरवाप्नोति कथं भवति सत्त्ववान् ।
कथमव्यङ्गतामेति लक्षण्यो जायते कथम् ॥६

भीष्म उवाच ।
मांसस्याभक्षणाद्राजन्यो धर्मः कुरुनन्दन ।
तन्मे शृणु यथातत्त्वं यथाऽस्य विधिरुत्तमः
रूपमव्यङ्गतामायुर्बुद्धिं सत्त्वं बलं स्मृतिम् ।
प्राप्तुकामैर्नरैर्हिंसा वर्जिता वै महात्मभिः ॥ ८
ऋषीणामत्र सवादो बहुशः कुरुनन्दन ।
बभूव तेषां तु मत यत्तच्छृणु युधिष्ठिर ॥ ९
यो यजेताश्वमेधेन मासि मासि यतव्रतः ।
वर्जयेन्मधुमास च सममेतद्युधिष्ठिर ॥ १०
सप्तर्षयो वालखिल्यास्तथैव च मरीचिपाः ।
अमासभक्षणं राजन्प्रशंसन्ति मनीषिणः ॥११
न भक्षयति यो मांसं न च हन्यान्न घातयेत् ।
तन्मित्र सर्वभूतानां मनुः स्वायंभुवोऽब्रवीत्
अधृष्यः सर्वभूताना विश्वास्यः सर्वजन्तुषु ।
साधूनां संमतो नित्यं भवेन्मांस विवर्जयन्
स्वमासं परमांसेन यो वर्धयितुमिच्छति ।
नारदः प्राह धर्मात्मा नियतं सोऽवसीदति
ददाति यजते चापि तपस्वी च भवत्यपि ।
मधुमांसनिवृत्त्येति प्राह चैवं बृहस्पतिः १५
मासि मास्यश्वमेधेन यो यजेत शतं समाः ।
न खादति च यो मांसं सममेतन्मतं मम १६
सदा यजति सत्रेण सदा दानं प्रयच्छति ।
सदा तपस्वी भवति मधुमांसविवर्जनात् १७

पितृति । यथा स्त्रीपुयोगेनान्तरीयकं पुत्रजन्म एव हिंसकस्य भूयिष्ठ पापयोनौ जन्मेत्यर्थ ॥ १२ ॥ **जीवितं हीति** । यथा स्वमासार्पणात् शिबिरूर्ध्व गत एव परमासादनादधो गच्छतीत्यर्थ ॥ १७ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्दशाधिकशततमोऽध्याय ॥ ११४ ॥

११५

अहिंसेति ॥ १ ॥

सर्वे वेदा न तत्कुर्युः सर्वे यज्ञाश्च भारत।
यो भक्षयित्वा मांसानि पश्चादपि निवर्तते ॥
दुष्करं च रसज्ञाने मांसस्य परिवर्जनम्।
चर्तुं व्रतमिदं श्रेष्ठं सर्वप्राण्यभयप्रदम् ॥ १९
सर्वभूतेषु यो विद्वान् ददात्यभयदक्षिणाम्।
दाता भवति लोके स प्राणानां नात्र संशयः
एव वै परम धर्मं प्रशंसन्ति मनीषिणः।
प्राणा यथाऽऽत्मनोऽभीष्टा भूतानामपि वै तथा
आत्मौपम्येन मन्तव्य बुद्धिमद्भिः कृतात्मभिः
मृत्युतो भयमस्तीति विदुषा भूतिमिच्छताम्
किं पुनर्हन्यमानाना तरसा जीवितार्थिनाम्
अरोगाणामपापाना पापैर्मांसोपजीविभिः २३
तस्माद्विद्धि महाराज मासस्य परिवर्जनम्।
धर्मस्यायतन श्रेष्ठ स्वर्गस्य च सुखस्य च २४
अहिंसा परमो धर्मस्तथाऽहिंसा पर तपः।
अहिंसा परमं सत्य यतो धर्मः प्रवर्तते ॥ २५
न हि मासं तृणात् काष्ठादुपलाद्वापि जायते।
हत्वा जन्तुं ततो मासं तस्माद्दोषस्तु भक्षणे॥
स्वाहास्वधामृतभुजो
देवाः सत्यार्जवप्रियाः।
क्रव्यादान् राक्षसान्विद्धि
जिह्मानृतपरायणान्॥ २७
कान्तारेष्वथ घोरेषु दुर्गेषु गहनेषु च।
रात्रावहनि सन्ध्यासु चत्वरेषु सभासु च २८
उद्यतेषु च शस्त्रेषु मृगव्यालहतेषु च।
अमासभक्षण राजन्नभयमन्यैर्न गच्छति ॥ २९
शरण्यः सर्वभूतानां विश्वास्यः सर्वजन्तुषु।
अनुद्वेगकरो लोके न चाप्युद्विजते सदा ॥३०
यदि चेत्खादको न स्यान्न तदा घातको भवेत्
घातकः खादकार्थाय तद्घातयति वै नरः ३१
अभक्ष्यमेतदिति वै इति हिंसा निवर्तते।
खादकार्थमतो हिंसा मृगादीना प्रवर्तते ॥ ३२
यस्माद्रसति चैवायुर्हिंसकाना महाद्युते।
तस्माद्विवर्जयेन्मांसं य इच्छेद्भूतिमात्मनः ३३
त्रातार नाधिगच्छन्ति रौद्राः प्राणिविहिंसकाः
उद्वेजनीया भूताना यथा व्यालमृगास्तथा ३४
लोभाद्वा बुद्धिमोहाद्वा बलवीर्यार्थमेव च।
संसर्गादथ पापानामधर्मरुचिता नृणाम् ॥ ३५
स्वमासं परमासेन यो वर्धयितुमिच्छति।
उद्विग्नवासो वसति यत्र यत्राभिजायते ॥ ३६
धन्य यशस्यमायुष्यं स्वर्ग्यं स्वस्त्ययनं महत्
मांसस्याभक्षण प्राहुर्नियताः परमर्षयः ॥ ३७
इदं तु खलु कौन्तेय श्रुतमासीत्पुरा मया।
मार्कण्डेयस्य वदतो ये दोषा मासभक्षणे ३८
यो हि खादति मांसानि
प्राणिना जीवितैषिणाम्।
हतानां वा मृतानां वा
यथा हन्ता तथैव सः ॥ ३९
धनेन क्रयिको हन्ति खादकश्चोपभोगतः।
घातको वधबन्धाभ्यामित्येष त्रिविधो वधः
अखादन्ननुमोदंश्च भावदोषेण मानवः।
योऽनुमोदति हन्यन्तं सोऽपि दोषेण लिप्यते
अधृष्यः सर्वभूतानामायुष्मान्निरुजः सदा।
भवत्यभक्षयन् मास दयावान् प्राणिनामिह ॥
हिरण्यदानैर्गोदानैर्भूमिदानैश्च सर्वशः।
मासस्याभक्षणे धर्मो विशिष्ट इति नः श्रुतिः
अप्रोक्षितं वृथामासं विधिहीन न भक्षयेत्।
भक्षयन्निरय याति नरो नास्त्यत्र संशयः ४४
प्रोक्षिताभ्युक्षितं मास तथा ब्राह्मणकाम्यया
अल्पदोषमिह ज्ञेय विपरीते तु लिप्यते ॥ ४५
खादकस्य कृते जन्तून् यो हन्यात् पुरुषाधमः
महादोषतरस्तत्र घातको न तु खादकः ॥ ४६
इज्यायज्ञश्रुतिकृतैर्यो मार्गैरबुधोऽधमः।
हन्याज्जन्तून् मासगृध्नुः स वै नरकभाङ्नरः
भक्षयित्वापि यो मास पश्चादपि निवर्तते।
तस्यापि सुमहान् धर्मो यः पापाद्विनिवर्तते ॥
आहर्ता चानुमन्ता च विशस्ता क्रयविक्रयी।
सस्कर्ता चोपभोक्ता च खादकाः सर्व एव ते
इदमन्यत्तु वक्ष्यामि प्रमाणं विधिनिर्मितम्।
पुराणमृषिभिर्जुष्टं वेदेषु परिनिष्ठितम् ॥ ५०

सर्वे इति। न हि कृत्स्नो वेद तथा तद्बोधिता यज्ञाश्च पुरुषं हिंसाया प्रवर्तयन्ति, किंतु परिसंख्याविधया निवृत्तिमेव बोधयन्तीत्यर्थ ॥१८॥ व्यालमृगा मासादपशव ॥३४॥ हन्यन्तं हन्यमानम ॥४१॥ इज्या देवपूजा यज्ञोऽश्वमेधादिस्तदर्थं श्रुतिकृतैर्मार्गैरुपायैरबुधो यज्ञोपनिषदमजानन्मांसगृध्नु केवल यज्ञव्याजेन मास भोक्तुकाम ॥ ४७ ॥

प्रवृत्तिलक्षणो धर्मः प्रजार्थमभिरुदाहृतः ।
यथोक्तं राजशार्दूल न तु तन्मोक्षकांक्षिणाम् ५१
हविर्यत्संस्कृतं मन्त्रैः प्रोक्षिताभ्युक्षित शुचि ।
वेदोक्तेन प्रमाणेन पितॄणां प्रक्रियासु च ॥ ५२
अतोऽन्यथा वृथामांसमभक्ष्यं मनुरब्रवीत् ।
अस्वर्ग्यमयशस्यं च रक्षोवद्धरतर्षभ ॥ ५३
विधिहीनं नरः पूर्वं मांसं राजन्न भक्षयेत् ।
अप्रोक्षितं वृथा मांसं विधिहीनं न भक्षयेत् ॥
य इच्छेत्पुरुषोत्यन्तमात्मानं निरुपद्रवम् ।
स वर्जयेत मांसानि प्राणिनामिह सर्वशः ५५
श्रूयते हि पुरा कल्पे नृणां व्रीहिमयः पशुः।
येनायजन्त यज्वानः पुण्यलोकपरायणाः ५६
ऋषिभिः संशयं पृष्टो वसुश्चेदिपतिः पुरा ।
अभक्ष्यमपि मांसं यः प्राह भक्ष्यमिति प्रभा ॥
आकाशादवनिं प्राप्तस्ततः स पृथिवीपतिः ।
एतदेव पुनश्चोक्त्वा विवेश धरणीतलम् ५८
प्रजानां हितकामेन त्वगस्त्येन महात्मना ।
आरण्याः सर्वदैवत्याः प्रोक्षितास्तपसा मृगाः
क्रिया ह्येवं न हीयन्ते पितृदैवतसंश्रिताः ।
प्रीयन्ते पितरश्चैव न्यायतो मांसतर्पिताः ६०
इदं तु शृणु राजेन्द्र कीर्त्यमानं मयाऽनघ ।
अभक्षणे सर्वसुखं मांसस्य मनुजाधिप ॥ ६१
यस्तु वर्षशत पूर्णं तपस्तप्येत्सुदारुणम् ।
यश्चैव वर्जयेन्मांसं सममेतन्मतं मम ॥ ६२
कौमुदे तु विशेषेण शुक्लपक्ष नराधिप ।
वर्जयेन्मधुमांसानि धर्मो यत्र विधीयते ॥ ६३
चतुरो वार्षिकान्मासान्यो मासं परिवर्जयेत
चत्वारि भद्राण्याप्नोति कीर्तिमायुर्यशो बलम्
अथवा मासमेकं वै सर्वमांसान्यभक्षयन् ।
अतीत्य सर्वदुःखानि सुखं जीवेन्निरामयः ६५
वर्जयन्ति हि मांसानि मासशः पक्षशोऽपि वा
तेषा हिंसानिवृत्तानां ब्रह्मलोको विधीयते ॥
मांसं तु कौमुद पक्ष वर्जितं पार्थ राजभिः ।
सर्वभूतात्मभूतस्थैर्विदितार्थपरावरैः ॥ ६७
नाभागेनाम्बरीषेण गयेन च महात्मना ।
आयुनाथानरण्येन दिलीपरघुपूरुभिः ॥ ६८
कार्तवीर्यानिरुद्धाभ्यां नहुषेण ययातिना ।
नृगेण विष्वगश्वेन तथैव शशबिन्दुना ॥ ६९
युवनाश्वेन च तथा शिबिनौशीनरेण च ।
मुचुकुन्देन मान्धात्रा हरिश्चन्द्रेण वा विभो ॥
सत्यं वदत माऽसत्यं सत्य धर्मः सनातनः ।
हरिश्चन्द्रश्चरति वै दिवि सत्येन चन्द्रवत् ७१
इयेनचित्रेण राजेन्द्र सोमकेन वृकेण च ।
रैवते रन्तिदेवेन वसुना सृञ्जयेन च ॥ ७२
एतैश्चान्यैश्च राजेन्द्र कृपेण भरतेन च ।
दुष्यन्तेन करूषेण रामालर्कनरैस्तथा ।
विरूपाश्वेन निमिना जनकेन च धीमता ७३
ऐलेन पृथुना चैव वीरसेनेन चव ह ।
इक्ष्वाकुणा शम्भुना च श्वेतेन सगरेण च ७४
अजेन धुन्धुना चैव तथव च सुबाहुना ।
हर्यश्वेन च राजेन्द्र क्षुपेण भरतेन च ॥ ७५
एतैश्चान्यैश्च राजेन्द्र पुरा मांसं न भक्षितम् ।
शारद कौमुद मास ततस्ते स्वर्गमाप्नुवन् ॥ ७६
ब्रह्मलोके च तिष्ठन्ति ज्वलमानाः श्रियान्विताः
उपास्यमाना गन्धर्वैः स्त्रीसहस्रसमन्विताः ॥
तदेतदुत्तम धर्ममहिंसाधर्मलक्षणम् ।
ये चरन्ति महात्मानो नाकपृष्ठे वसन्ति ते ७८
मधुमांसं च ये नित्यं वर्जयन्तीह धार्मिकाः ।
जन्मप्रभृति मद्य च सर्वे ते मुनयः स्मृताः ७९
इमं धर्ममांसाद यश्चरेच्छ्रावयीत वा ।
अपि चेत्सुदुराचारो न जातु निरयं व्रजेत् ८०
पठेद्वा य इद राजञ्शृणुयाद्वाप्यभीक्ष्णशः ।
अमांसभक्षणविधिं पवित्रमृषिपूजितम् ॥ ७१
विमुक्तः सर्वपापेभ्यः सर्वकामैर्महीयते ।
विशिष्टतां ज्ञातिषु च लभते नात्र संशयः ८२
आपन्नश्चापदो मुच्येद्बद्धो मुच्येत बन्धनात् ।
मुच्येत्तथाऽऽतुरो रोगादुःखान्मुच्येत दुःखितः
तिर्यग्योनिं न गच्छेत रूपवांश्च भवेन्नरः ।
ऋद्धिमान्वै कुरुश्रेष्ठ प्राप्नुयाच्च महद्यशः ॥ ८४
एतत्ते कथित राजन्मांसस्य परिवर्जने ।
प्रवृत्तौ च निवृत्तौ च विधानमृषिनिर्मितम् ८५

व्रीहिमय पशु पुरोडाशादिरूप त एतदुक्तान्तमेधा अमेध्या पशव इत्युक्त्वा तस्मादाहु पुरोडाशमत्र लोक्यमिति ब्राह्मणात् ॥ ५६ ॥ अभक्ष्यमपि मासं भक्ष्यमित्याह पपातेत्यर्थ ॥ ५८ ॥ आरण्या प्रोक्षिता इति पर्यभिकृतानारण्यानुत्सृजन्तीति श्रुतेरारण्यैर्यज्ञ कृत्वाऽपि तेषां वधो न कृत इत्यर्थ ॥ ५९ ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि मांसभक्षणनिषेधे पञ्चदशाधिकशततमोऽध्यायः ॥ ११५ ॥

११६

युधिष्ठिर उवाच ।

इमे वै मानवा लोके नृशंसा मांसगृद्धिनः ।
विसृज्य विविधान्भक्ष्यान्महारक्षोगणा इव १
अपूपान्विविधाकारान्शाकानि विविधानि च
खाण्डवान्नसयोगान्न तथेच्छन्ति यथाऽऽमिषम्
तत्र मे बुद्धिरत्रैव विषये परिमुह्यते ।
न मन्ये रसतः किञ्चिन्मांसतोऽस्तीति किञ्चन
तदिच्छामि गुणान् श्रोतुं मांसस्याभक्षणे प्रभो
भक्षणे चैव ये दोषास्ताश्चैव पुरुषर्षभ ॥ ४
सर्वं तत्त्वेन धर्मज्ञ यथावदिह धर्मतः ।
किं चाभक्ष्यमभक्ष्य वा सर्वमेतद्वदस्व मे ॥ ५
यथैतद्यादृश चैव गुणा ये चास्य वर्जने ।
दोषा भक्षयतो येऽपि तन्मे ब्रूहि पितामह ६

भीष्म उवाच ।

एवमेतन्महाबाहो यथा वदसि भारत ।
न मांसात्परमं किञ्चिद्रसतो विद्यते भुवि ७
क्षतक्षीणाभितप्तानां ग्राम्यधर्मरतात्मनाम् ।
अध्वना कर्शितानां च न मांसाद्विद्यते परम्
सद्यो वर्धयति प्राणान्पुष्टिमग्र्या दधाति च ।
न भक्ष्योऽभ्यधिकः कश्चिन्मांसादस्ति परंतप
विवर्जिते तु बहवो गुणाः कौरवनन्दन ।
ये भवन्ति मनुष्याणां तान्मे निगदतः शृणु ॥
स्वमासं परमासेन यो वर्धयितुमिच्छति ।
नास्ति क्षुद्रतरस्तस्मात्स नृशंसतरो नरः ११
न हि प्राणात् प्रियतर लोके किञ्चन विद्यते ।
तस्माद्दया नरः कुर्याद्यथाऽऽत्मनि तथा परे ॥
शुक्राच्च तात संभूतिर्मांसस्येह न सशयः ।
भक्षणे तु महान् दोषो निवृत्त्या पुण्यमुच्यते ॥
विधिना वेददृष्टेन तद्भुक्त्वेह न दुष्यति ।
यज्ञार्थं पशवः सृष्टा इत्यपि श्रूयते श्रुतिः ॥ १४
अतोऽन्यथा प्रवृत्ताना राक्षसो विधिरुच्यते ।
क्षत्रियाणा तु यो दृष्टो विधिस्तमपि मे शृणु
वीर्येणोपार्जितं मासं यथा भुञ्जन्न दुष्यति ।
आरण्याः सर्वदैवत्याः सर्वशः प्रोक्षिता मृगाः
अगस्त्येन पुरा राजन् मृगया येन पूज्यते ।
नात्मानमपरित्यज्य मृगया नाम विद्यते ॥१७
समतामुपसङ्गम्य भूत हन्यति हन्ति वा ।
अतो राजर्षयः सर्वे मृगया यान्ति भारत ॥१८
न हि लिप्यन्ति पापेन न चैतत्पातकं विदुः॥
न ह्यतः सदृशं किञ्चिदिह लोके परत्र च १९

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चदशाधिकशततमोऽध्याय ॥ ११५ ॥

११६

इमे इति ॥ १ ॥ आरण्या इति यजमानेन उत्सृष्टानामप्यारण्याना राज्ञा मृगयाया वधो न्याय्य एव। उत्सृष्टपशोर्जीवने तत्तद्देवतायास्तृप्त्ययोगात् । अत एव कपिञ्जलानालभेतेत्यत्राधिकानामालम्भे दोषप्रसङ्गात्त्रितयेनैव शास्त्रार्थस्यानुष्ठितत्वाद्बहुत्वस्य त्रित्वे पर्यवसानमुक्तम्। अन्यथा कपिञ्जलानामारण्यत्वेन पर्यभिकरणान्ते उत्सृष्टाना वधस्याप्रसक्तेरधिकानामालम्भे दोषो न प्रसज्येत । तथा च यदि त्र्यधिकानुत्सृजेत्तर्हि तद्वधे उत्सृष्टं पापं यदि त्रिनेव तद्वधिकत्वे हन्तु पापमिति सिद्धे तादिदमुक्तम्—आरण्या. सर्वदैवत्या सर्वश प्रोक्षिता मृगा । अगस्त्येन पुरा राजन् मृगया येन पूज्यत इति। सर्वश इति उत्पन्नमात्रस्य ग्रहणम् ॥ १६ ॥ किञ्च हन्यमानात्पशो स्ववधस्यापि सम्भवात् प्राणपणेनेय क्रियमाणा मृगया न दोषायेत्याह—**नात्मानमिति** ॥१७॥ हन्यते भूतमनेन भूतं चैन हन्ति ॥१८॥ एवं प्रवृत्तिमार्गमुक्त्वा वस्तुतत्त्वमाह—**न हीति**। न हि अगस्त्यवद्युगपत्सर्वेषा पशूनामालम्भप्रोक्षणादिकमिदानीन्तनेन कर्तुं शक्य अतोऽप्रोक्षिताना वधे दोष एव । नापि प्राणपणत्वेन मृगयाया अदोषत्वम्। तस्कराणामपि तथा निर्दोषत्वप्रसङ्गादिति हिशब्देन सूचितम् ॥ १९ ॥

यत्सर्वेष्विह भूतेषु दया कौरवनन्दन ।
न भयं विद्यते जातु नरस्येह दयावतः ॥ २०
दयावतामिमे लोकाः परे चापि तपस्विनाम् ।
अहिंसालक्षणो धर्म इति धर्मविदो विदुः॥ २१
यदहिंसात्मक कर्म तत्कुर्यादात्मवान्नरः ।
पितृदैवतयज्ञेषु प्रोक्षितं हविरुच्यते ॥ २२
अभय सर्वभूतेभ्यो यो ददाति दयापरः ।
अभयं तस्य भूतानि ददतीत्यनुशुश्रुम ॥ २३
क्षत च स्खलितं चैव पतितं कृष्टमाहतम् ।
सर्वभूतानि रक्षन्ति समेषु विषमेषु च ॥ २४
नैन व्यालमृगा घ्नन्ति न पिशाचा न राक्षसाः
मुच्यते भयकालेषु मोक्षयेद्यो भये परान् ॥२५
प्राणदानात् परं दानं न भूतं न भविष्यति ।
न ह्यात्मनः प्रियतरं किञ्चिदस्तीह निश्चितम्
अनिष्ट सर्वभूतानां मरणं नाम भारत ।
मृत्युकाले हि भूतानां सद्यो जायति वेपथुः
जातिजन्मजरादुःखैर्नित्यं संसारसागरे ।
जन्तवः परिवर्तन्ते मरणादुद्विजन्ति च ॥२८
गर्भवासेषु पच्यन्ते क्षाराम्लकटुकै रसैः ।
मूत्रस्वेदपुरीषाणां परुषैर्भृशदारुणैः ॥ २९
जाताश्चाप्यवशास्तत्र च्छिद्यमानाः पुनः पुनः
याच्यमानाश्च दृश्यन्ते विवशा मांसगृद्धिनः
कुंभीपाके च पच्यन्ते तां तां योनिमुपागताः ।
आक्रम्य मार्यमाणाश्च भ्राम्यन्ते वै पुनः पुनः
नात्मनोऽस्ति प्रियतरः पृथिवीमनुसृत्य ह ।
तस्मात् प्राणिषु सर्वेषु दयावानात्मवान्भवेत्
सर्वमांसानि यो राजन् यावज्जीव न भक्षयेत
स्वर्गे स विपुलं स्थान प्राप्नुयान्नात्र संशयः ३३
ये भक्षयन्ति मांसानि भूतानां जीवितैषिणाम्
भक्ष्यन्ते तेऽपि भूतैस्तैरिति मे नास्ति संशयः
मांसं भक्षयते यस्माद्भक्षयिष्ये तमप्यहम् ।
एतन्मांसस्य मांसत्वमनुबुद्ध्यस्व भारत ॥ ३५
घातको वध्यते नित्यं तथा वध्यति भक्षिता
आक्रोष्टा क्रुध्यते राजंस्तथा द्वेष्यत्वमाप्नुते ३६
येन येन शरीरेण यद्यत्कर्म करोति यः ।
तेन तेन शरीरेण तत्तत्फलमुपाश्नुते ॥ ३७
अहिंसा परमो धर्मस्तथाऽहिंसा परो दमः ।
अहिंसा परमं दानमहिंसा परमं तपः ॥ ३८
अहिंसा परमो यज्ञस्तथाऽहिंसा पर फलम् ।
अहिंसा परमं मित्रमहिंसा परम सुखम् ॥ ३९
सर्वयज्ञेषु वा दानं सर्वतीर्थेषु वाऽऽप्लुतम् ।
सर्वदानफलं वापि नैतत्तुल्यमहिंसया ॥ ४०
अहिंसस्य तपोऽक्षय्यमहिंस्रो यजते सदा ।
अहिंस्रः सर्वभूतानां यथा माता यथा पिता ॥
एतत् फलमहिंसाया भूयश्च कुरुपुङ्गव ।
न हि शक्या गुणा वक्तुमपि वर्षशतैरपि ४२

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि अहिंसाफलकथने षोडशाधिकशततमोऽध्यायः ॥ ११६ ॥

११७

युधिष्ठिर उवाच ।
अकामाश्च सकामाश्च ये हताः स्म महामृधे
कां गतिं प्रतिपन्नास्ते तन्मे ब्रूहि पितामह १
दुःखं प्राणपरित्यागः पुरुषाणां महामृधे ।
जानासि त्वं महाप्राज्ञ प्राणत्याग सुदुष्करम् २
समृद्धौ वाऽसमृद्धौ वा शुभे वा यदि वाऽशुभे
कारणं तत्र मे ब्रूहि सर्वज्ञो ह्यसि मे मतः ३
भीष्म उवाच ।
समृद्धौ वाऽसमृद्धौ वा शुभे वा यदि वाऽशुभे
संसारेऽस्मिन्समायाताः प्राणिनः पृथिवीपते

जातिर्गर्भे जन्म ॥ २८ ॥ मा स पूर्वजन्मनि भक्षितवानत एव तस्य मासमह भक्षयिष्यामीति व्यवहारान्मासपदनिरुक्ति ॥ ३५ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षोडशाधिकशततमोऽध्याय ॥ ११६ ॥

११७

अकामा इति ॥ १ ॥

निरता येन भावेन तत्र मे शृणु कारणम्।
सम्यक्कायमनुप्रश्नस्त्वयोक्तस्तु युधिष्ठिर ॥ ५
अत्र ते वर्तयिष्यामि पुरावृत्तमिदं नृप।
द्वैपायनस्य संवादं कीटस्य च युधिष्ठिर ॥ ६
ब्रह्मभूतश्चरन्विप्रः कृष्णद्वैपायनः पुरा।
ददर्श कीटं धावन्तं शीघ्र शकटवर्त्मनि ॥ ७
गतिज्ञः सर्वभूतानां भाषाज्ञश्च शरीरिणाम्।
सर्वज्ञः स तदा दृष्ट्वा कीटं वचनमब्रवीत् ॥ ८
व्यास उवाच।
कीट संत्रस्तरूपोऽसि त्वरितश्चैव लक्ष्यसे।
क्व धावसि तदाचक्ष्व कुतस्ते भयमागतम्॥ ९
कीट उवाच।
शकटस्यास्य महतो घोष श्रुत्वा भयं मम।
आगत वै महाबुद्धे स्वन एष हि दारुणः॥ १०
श्रूयते न च मां हन्यादिति ह्यस्मादपक्रमे।
श्वसतां च शृणोम्येनं गोपुत्राणां प्रतोदताम्॥
वहतां सुमहाभारं सन्निकर्षे स्वनं प्रभो।
नृणां च संवाहयतां श्रूयते विविधः स्वनः १२
श्रोतुमस्मद्विधेनैष न शक्यः कीटयोनिना।
तस्मादतिक्रमाम्येष भयादस्मात्सुदारुणात् ॥
दुःखं हि मृत्युभूतानां जीवितं च सुदुर्लभम्।
अतो भीतः पलायामि गच्छेयं नासुखं सुखात
भीष्म उवाच।
इत्युक्तः स तु तं प्राह कुतः कीट सुखं तव।
मरण ते सुखं मन्ये तिर्यग्योनौ तु वर्तसे॥ १५
शब्दं स्पर्शं रसं गन्धं भोगांश्चोच्चावचान्बहून्
नाभिजानासि कीट त्वं श्रेयो मरणमेव ते १६
कीट उवाच।
सर्वत्र निरतो जीव इतश्चापि सुखं मम।
चिन्तयामि महाप्राज्ञ तस्मादिच्छामि जीवितुं
इहापि विषयः सर्वो यथादेहं प्रवर्तितः।
मानुषाः स्थैर्यजाश्चैव पृथग्भोगा विशेषतः ॥
अहमास मनुष्यो वै शूद्रो बहुधनः प्रभो।
अब्रह्मण्यो नृशंसश्च कदर्यो वृद्धिजीवनः॥ १९
वाक्तीक्ष्णो निकृतिप्रज्ञो
द्वेष्टा विश्वस्य सर्वशः।
मिथ्याकृतोऽपि विधिना
परस्वहरणे रतः॥ २०
भृत्यातिथिजनश्चापि गृहे पर्यशितो मया।
मात्सर्यात्स्वादुकामेन नृशंसेन बुभुक्षता २१
देवार्थं पितृयज्ञार्थमन्नं श्रद्धाहृतं मया।
न दत्तमर्थकामेन देयमन्न पुरा किल ॥ २२
गुप्तं शरणमाश्रित्य भयेषु शरणागताः।
अकस्मात्ते मया त्यक्ता न त्राता अभयैषिणः॥
धनं धान्यं प्रियान्दारान्यानं वासस्तथाद्भुतम्
श्रियं दृष्ट्वा मनुष्याणामसूयामि निरर्थकम् २४
ईर्ष्युः परसुखं दृष्ट्वा अन्यस्य न बुभूषकः।
त्रिवर्गहन्ता चान्येषामात्मकामानुवर्तकः २५
नृशंसगुणभूयिष्ठं पुरा कर्म कृत मया।
स्मृत्वा तदनुतप्येऽहं हित्वा प्रियमिवात्मजम्
शुभानां नाभिजानामि कृतानां कर्मणां फलम्
माता च पूजिता वृद्धा ब्राह्मणश्चार्चितो मया
सकृज्जातिगुणोपेतः सङ्गत्या गृहमागतः।
अतिथिः पूजितो ब्रह्मंस्तेन मां नाजहात्स्मृतिः
कर्मणा पुनरेवाह सुखमागामि लक्षये।
तच्छ्रोतुमहमिच्छामि त्वत्तः श्रेयस्तपोधन२९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि कीटोपाख्याने सप्तदशाधिकशततमोऽध्यायः ॥ ११७ ॥



इहेति मानुषाणा स्थैर्यजाना स्थावराणा च विशेषतो भोगा सन्ति जङ्गमाना तु साधारण्येनैव सर्वविषयज सुख दु खं वाऽस्तीत्यर्थ ॥ १८ ॥ पर्याशितः भृत्यादीन्परित्यज्याशनं कृतवानस्मीत्यर्थ ॥ २१ ॥ न बुभूषक अनैश्वर्यमिच्छन् ॥ २५ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तदशाधिकशततमोऽध्याय ॥ ११७ ॥

११८

व्यास उवाच ।
शुभेन कर्मणा यद्वै तिर्यग्योनौ न मुह्यसे ।
ममैव कीट तत्कर्म येन त्वं न प्रमुह्यसे ॥ १
अहं त्वां दर्शनादेव तारयामि तपोबलात् ।
तपोबलाद्धि बलवद्बलमन्यन्न विद्यते ॥ २
जानामि पापैः स्वकृतैर्गतं त्वां कीट कीटताम्
अवाप्स्यसि पुनर्धर्मं धर्मं तु यदि मन्यसे ॥ ३
कर्म भूमिकृत देवा भुञ्जते तिर्यगाश्च ये ।
धर्मोऽपि हि मनुष्येषु कामार्थश्च तथा गुणाः ४
वाग्बुद्धिपाणिपादैश्च व्यपेतस्य विपश्चितः ।
किं हास्यति मनुष्यस्य मंदस्यापि हि जीवतः
जीवन् हि कुरुते पूजां विप्राग्र्यः शशिसूर्ययोः
ब्रुवन्नपि कथा पुण्यां तत्र कीट त्वमेष्यसि॥ ६
गुणभूतानि भूतानि तत्र त्वमुपभोक्ष्यसे ।
तत्र तेऽहं विनेष्यामि ब्रह्म त्व यत्र वैष्यसि ७
स तथेति प्रतिश्रुत्य कीटो वर्त्मन्यतिष्ठत ।
शकटो व्रजंश्च सुमहानागतश्च यदृच्छया ॥ ८
चक्राक्रमेण भिन्नश्च कीटः प्राणान्मुमोच ह ।
संभूतः क्षत्रियकुले प्रसादादमितौजसः ॥ ९
तमृषिं द्रष्टुमगमत्सर्वास्वन्यासु योनिषु ।
श्वाविद्वोधावराहाणां तथैव मृगपक्षिणाम् ॥
श्वपाकशूद्रवैद्यानां क्षत्रियाणा च योनिषु ।
स कीट एवमाभाष्य ऋषिणा सत्यवादिना।
प्रतिस्मृत्याथ जग्राह पादौ मूर्ध्नि कृताञ्जलिः॥

कीट उवाच ।
इदं तदतुलं स्थानमीप्सितं दशभिर्गुणैः ।
यदहं प्राप्य कीटत्वमागतो राजपुत्रताम् १२
वहन्ति मामतिबलाः कुञ्जरा हेममालिनः ।
स्यन्दनेषु च कांबोजा युक्ताः परमवाजिनः ॥
उष्ट्राश्वतरयुक्तानि यानानि च वहन्ति माम् ।
सबान्धवः सहामात्यश्चाश्नामि पिशितौदनम्
गृहेषु स्वनिवासेषु सुखेषु शयनेषु च ।
वरार्हेषु महाभाग स्वपामि च सुपूजितः ॥ १५
सर्वेष्वपररात्रेषु सूतमागधबन्दिनः ।
स्तुवन्ति मां यथा देवा महेन्द्रं प्रियवादिनः ॥
प्रसादात्सत्यसन्धस्य भवतोऽमिततेजसः ।
यदहं कीटतां प्राप्य संप्राप्ता राजपुत्रताम् १७
नमस्तेऽस्तु महाप्राज्ञ किं करोमि प्रशाधि माम्
त्वत्तपोबलनिर्दिष्टमिदं ह्यधिगतं मया ॥ १८

व्यास उवाच ।
अर्चितोऽहं त्वया राजन् वाग्भिरद्य यदृच्छया
अद्य ते कीटतां प्राप्य स्मृतिर्जाता जुगुप्सिता
न तु नाशोऽस्ति पापस्य यस्त्वयोपचितः पुरा
शूद्रेणार्थप्रधानेन नृशंसेनाततायिना ॥ २०
मम ते दर्शनं प्राप्तं तच्च वै सुकृत त्वया ।
तिर्यग्योनौ स्म जातेन मम चाभ्यर्चनात्तथा
इतस्त्वं राजपुत्रत्वाद्ब्राह्मण्यं समवाप्स्यसि ।
गोब्राह्मणकृते प्राणान् हुत्वाऽऽत्मानं रणाजिरे
राजपुत्र सुखं प्राप्य क्रतूंश्चैवाप्तदक्षिणान् ।
अथ मोदिष्यसे स्वर्गे ब्रह्मभूतोऽव्ययः सुखी २३

तिर्यग्योन्याः शूद्रतामभ्युपैति
शूद्रो वैश्य क्षत्रियत्वं च वैश्यः ।
वृत्तश्लाघी क्षत्रियो ब्राह्मणत्वं
स्वर्गं पुण्य ब्राह्मणः साधुवृत्तः ॥ २४

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि कीटोपाख्याने अष्टादशाधिकशततमोऽध्यायः ॥ ११८ ॥

११८

शुभेन येन न मुह्यसे तन्ममैव कर्म ॥ १ ॥ तिर्यगा इत्यत्र वर्णलोप आर्ष । सिद्धा इत्यर्थ । धर्मोऽपि मनुष्येषु मूढेषु कामार्थ काम्य एवास्ति न तु निष्काम एवं गुणा अपि कामार्था एव ॥४॥ **वागिति** । कर्मणि षष्ठी वागादिहीनं बुधमबुधं वा जीवन्तं नरं किं हास्यति किं त्यक्ष्यति न किमपि । सर्वैं पुरुषार्थैरयं त्यक्त इत्यर्थ ॥ ५ ॥ जीवन् हीति। हे कीट यत्र विप्राग्र्यस्तत्र त्वमेष्यसि ॥६॥ **गुणेति** तत्र विप्रत्वे त्वं भूतानि भोक्ष्यसे तत्र योनौ ते तुभ्य अहं ब्रह्म विनेष्यामि ब्रह्मविद्या दास्यामि यत्र वा त्वं एष्यसि वाच्छसि तत्र त्वा नेष्यामीति योजना ॥ ७ ॥ **स इति** यत्र यत्र गन्तु मनसा शक्छिनवान् तत्र तत्र ऋषिमेव ददर्शेत्यर्थ ॥ ११ ॥ गोब्राह्मणकृते प्राणान्हित्वा ब्राह्मण्यमवाप्स्यसीति योजना ॥ २२ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टादशाधिकशततमोऽध्याय ॥ ११८ ॥

११९

भीष्म उवाच ।
क्षत्रधर्ममनुप्राप्तः स्मरन्नेव च वीर्यवान् ।
त्यक्त्वा स कीटतां राजंश्चचार विपुलं तपः १
तस्य धर्मार्थविदुषो दृष्ट्वा तद्विपुलं तपः ।
आजगाम द्विजश्रेष्ठः कृष्णद्वैपायनस्तदा ॥ २
व्यास उवाच ।
क्षात्रं देवव्रतं कीट भूतानां परिपालनम् ।
क्षात्रं देवव्रतं ध्यायंस्ततो विप्रत्वमेष्यसि ॥३
पाहि सर्वाः प्रजाः सम्यक् शुभाशुभविदात्मवान्
शुभैः संविभजन् कामैरशुभानां च पावनैः ४
आत्मवान् भव सुप्रीतः स्वधर्माचरणे रतः ।
क्षात्री तनुं समुत्सृज्य ततो विप्रत्वमेष्यसि
भीष्म उवाच ।
सोऽप्यरण्यमनुप्राप्य पुनरेव युधिष्ठिर ।
महर्षेर्वचनं श्रुत्वा प्रजा धर्मेण पाल्य च ॥ ६
अचिरेणैव कालेन कीटः पार्थिवसत्तम ।
प्रजापालनधर्मेण प्रेत्य विप्रत्वमागतः ॥ ७
ततस्तं ब्राह्मणं दृष्ट्वा पुनरेव महायशाः ।
आजगाम महाप्राज्ञः कृष्णद्वैपायनस्तदा ॥ ८
व्यास उवाच ।
भोभो ब्रह्मर्षभ श्रीमन् मा व्यथिष्ठाः कथञ्चन
शुभकृच्छुभयोनीषु पापकृत्पापयोनिषु ॥ ९
उपपद्यति धर्मज्ञ यथापापफलोपगम् ।
तस्मान्मृत्युभयात्कीट मा व्यथिष्ठाः कथञ्चन
धर्मलोपभयं ते स्यात्तस्माद्धर्मं चरोत्तमम् ।
कीट उवाच ।
सुखात्सुखतर प्राप्तो भगवंस्त्वत्कृते ह्यहम्
धर्ममूला श्रियं प्राप्य पाप्मा नष्ट इहाद्य मे ।
भीष्म उवाच ।
भगवद्वचनात्कीटो ब्राह्मण्य प्राप्य दुर्लभम्
अकरोत्पृथिवी राजन्यज्ञयूपशताङ्किताम् ।
ततः सालोक्यमगमद्ब्रह्मणो ब्रह्मवित्तमः ॥ १३
अवाप च पदं कीटः पार्थ ब्रह्म सनातनम् ।
स्वकर्मफलनिर्वृत्तं व्यासस्य वचनात्तदा ॥१४
तेऽपि यस्मात्प्रभावेण हताः क्षत्रियपुङ्गवाः ।
सप्राप्तास्ते गतिं पुण्यां तस्मान्मा शोच पुत्रक

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि कीटोपाख्याने एकोनविंशत्यधिकशततमोऽध्यायः ॥ ११९ ॥

१२०

युधिष्ठिर उवाच ।
विद्यातपोभ्यां दानाच्च किमेतेषां विशिष्यते
पृच्छामि त्वां सतां श्रेष्ठ तन्मे ब्रूहि पितामह
भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
मैत्रेयस्य च संवादं कृष्णद्वैपायनस्य च ॥ २
कृष्णद्वैपायनो राजन्नज्ञातचरित चरन् ।
वाराणस्यामुपातिष्ठन्मैत्रेय स्वैरिणीकुले ॥ ३
तमुपस्थितमासीनं ज्ञात्वा स मुनिसत्तमम् ।
अर्चित्वा भोजयामास मैत्रेयोऽशनमुत्तमम् ४
तदन्नमुत्तमं भुक्त्वा गुणवत्सार्वकामिकम् ।
प्रतिष्ठमानोऽस्मयत प्रीतः कृष्णो महामनाः ५
तमुत्स्मयन्तं संप्रेक्ष्य मैत्रेयः कृष्णमब्रवीत् ।
कारण ब्रूहि धर्मात्मन्यस्मयिष्ठाः कुतश्च ते ६

११९

क्षत्रेति ॥ १ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकोनविंशत्यधिकशततमोऽध्याय ॥ ११९ ॥

१२०

विद्यातपोभ्यामिति ॥ १ ॥ मैत्रेयमपि अज्ञातचरित चरन्तमित्यर्थ । स्व ईरयति धर्माय प्रेरयति स्वैरिणी मुनिश्रेणी तस्या कुले गृहे ॥ ३ ॥ अस्मयत विस्मय प्राप्तवान् ॥ ५ ॥ कुतश्च ते प्रमोद इति सम्बन्ध ॥ ६ ॥

तपस्विनो धृतिमतः प्रमोदः समुपागतः ।
एतत्पृच्छामि ते विद्वन्नभिवाद्य प्रणम्य च ।
आत्मनश्च तपोभाग्यं महाभाग्यं तवेह च ॥७
पृथगाचरतस्तात पृथगात्मसुखात्मनोः ।
अल्पान्तरमहं मन्ये विशिष्टमपि चान्वयात् ८

व्यास उवाच ।

अतिच्छेदातिवादाभ्यां स्मयोऽयं समुपागतः
असत्य वेदवचन कस्माद्वेदोऽनृतं वदेत् ॥ ९
त्रीण्येव तु पदान्याहुः पुरुषस्योत्तमं व्रतम् ।
न द्रुह्येच्चैव दद्याच्च सत्यं चैव परं वदेत् ॥ १०
इति वेदोक्तमृषिभिः पुरस्तात्परिकल्पितम् ।
इदानीं चैव नः कृत्य पुरस्ताच्च परिश्रुतम् ११
अल्पोऽपि तादृशो दायो भवत्युत महाफलः
तृषिताय च ते दत्तं हृदयेनानसूयता ॥ १२
तृषितस्तृषिताय त्व दत्वैतद्दर्शन मम ।
अजैषीर्महतो लोकान्महायज्ञैरिव प्रभो ॥ १३
ततो दानपवित्रेण प्रीतोऽस्मि तपसैव च ।
पुण्यस्यैव हि ते सत्त्वं पुण्यस्यैव च दर्शनम् ॥
पुण्यस्यैवाभिगन्धस्ते मन्ये कर्मविधानजम् ।
अधिकं मार्जनात्तात तथा चैवानुलेपनात् १५
शुभं सर्वपवित्रेभ्यो दानमेव परं द्विज ।
नो चेत्सर्वपवित्रेभ्यो दानमेव परं भवेत् ॥१६
यानीमान्युत्तमानीह वेदोक्तानि प्रशंससि ।
तेषां श्रेष्ठतरं दानमिति मे नात्र संशयः ॥ १७
दानकृद्भिः कृतः पन्था येन यान्ति मनीषिणः
ते हि प्राणस्य दातारस्तेषु धर्मः प्रतिष्ठितः ॥
यथा वेदाः स्वधीताश्च यथा चेन्द्रियसंयमः ।
सर्वत्यागो यथा चेह तथा दानमनुत्तमम् १९
त्वं हि तात महाबुद्धे सुखमेष्यसि शोभनम् ।
सुखात्सुखतरप्राप्तिमाप्नुते मतिमान्नरः ॥ २०
तन्नः प्रत्यक्षमेवेदमुपलभ्यमसंशयम् ।
श्रीमन्तः प्राप्नुवन्त्यर्थान्दानं यज्ञं तथा सुखम्
सुखादेव परं दुःखं दुःखादप्यपरं सुखम् ।
दृश्यते हि महाप्राज्ञ नियतं वै स्वभावतः २२
त्रिविधानीह वृत्तानि नरस्याहुर्मनीषिणः ।
पुण्यमन्यत्पापमन्यन्न पुण्यं न च पापकम् २३
न वृत्त मन्यते तस्य मन्यते न च पातकम् ।
तथा स्वकर्मनिर्वृत्तं न पुण्यं न च पापकम् ॥
यज्ञदानतपःशीला नरा वै पुण्यकर्मिणः ।
येऽभिद्रुह्यन्ति भूतानि ते वै पापकृतो जनाः
द्रव्याण्याददते चैव दुःखं यान्ति पतन्ति च ।
ततोऽन्यत्कर्म यत्किञ्चिन्न पुण्यं न च पातकम्
रमस्वैधस्व मोदस्व देहि चैव यजस्व च ।
न त्वामभिभविष्यन्ति वैद्या न च तपस्विनः

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि मैत्रेयभिक्षायां विंशत्यधिकशततमोऽध्यायः ॥ १२० ॥



एतत् आत्मनस्तपोभाग्य तव महाभाग्यं ते त्वा पृच्छामि आश्चर्यदर्शन विना विस्मयो न भवतीति भाव ७ **पृथगिति** पृथगात्मा उपाधिपरिच्छिन्नो जीव सुखात्मा अनुपाधिकं ब्रह्म पञ्चम्यर्थे षष्ठी। तत पृथगाचरतस्तव जीवन्मुक्तस्य मुक्तामुक्तोभयात्मन अपेक्षयाहमात्मानमल्पान्तरं मन्ये। यतस्त्वं मद्भाग्य दृष्ट्वा विस्मितोऽसि अतोऽहं त्वत्तोल्पान्तरोऽस्मीत्यात्मानमनुमिनोमीत्यर्थ । अन्वयात् मित्रवश्यत्वात् विशिष्टमपीतरेभ्य ॥ ८ ॥ अतिच्छेदोऽत्यन्तमन्तर मशकेन समुद्रशोषणमिव । अतिच्छंद इति पाठेऽपि स एवार्थ । अतिवादस्तस्यैवार्थस्य कथनं लोके ताभ्या विस्मयो मेऽभवत् । इदं स्थानं क्रतुशत विना न प्राप्यत इति वेदवचनमसत्यं जलमात्रदानेन तव तत्प्राप्तिदर्शनात् । देशकालपात्रश्रद्धाविशेषादल्पमपि महत्त्वं जलमौक्तिकन्यायेन प्राप्नोतीति दर्शनात् कस्माद्वेदोऽनृत वदेदिति उक्तम् ॥९॥ पदानि पदनीयानि एतदेव त्रयमुत्तमं व्रतम् ॥१०॥ न अस्माभिरपि कृत्यं अवश्यकर्तव्यम् ॥ ११ ॥ दायो दानम् ॥ १२ ॥ त्वं महतो लोकानजैषीरित्येतन्मम दर्शन प्रत्यक्षं तेनाहं विस्मितोऽस्मीति भाव· एतदर्शमिति पाठे स्पष्टार्थ ॥ १३ ॥ धर्मतपोदानानि पुण्यत्रये दृष्टान्ता इत्याह—**पुण्यस्यैवेति** ॥ १४ ॥ मार्जनात्तीर्थस्नानात् अनुलेपनात् वेदव्रतसमापनात् ॥ १५ ॥ त्रिविधानीत्यस्यान्त्य पाद व्याचष्टे न वृत्तमिति तस्य ब्रह्मनिष्ठस्य यज्ञादीनि पुण्य द्रोहादीनि पापं ततोऽन्यन्न पुण्य न च पापकमिति स्वकर्मनिर्वृत्तं पुण्यं पापं च न मन्यत इत्यर्थः ॥ २४ ॥ त्वं तु पुण्यस्यैवाधिकारीत्याह—**रमस्वेति** ॥ २७ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे विंशत्यधिकशततमोऽध्याय ॥ १२० ॥

१२१

भीष्म उवाच ।
एवमुक्तः प्रत्युवाच मैत्रेयः कर्मपूजकः ।
अत्यन्तश्रीमति कुले जातः प्राज्ञो बहुश्रुतः १
मैत्रेय उवाच ।
असंशयं महाप्राज्ञ यथैवात्थ तथैव तत् ।
अनुज्ञातश्च भवता किंचिद्ब्रूयामहं विभो ॥ २
व्यास उवाच ।
यद्यदिच्छसि मैत्रेय यावद्यावद्यथा यथा ।
ब्रूहि तत्त्वं महाप्राज्ञ शुश्रूषे वचनं तव ॥ ३
मैत्रेय उवाच ।
निर्दोषं निर्मलं चैवं वचनं दानसंहितम् ।
विद्यातपोभ्यां हि भवान् भावितात्मा न संशयः
भवतो भावितात्मत्वाल्लाभोऽयं सुमहान्मम ।
भूयो बुद्ध्याऽनुपश्यामि सुसमृद्धतपा इव ॥ ५
अपि नो दर्शनादेव भवतोऽभ्युदयो भवेत् ।
मन्ये भवत्प्रसादोऽय तद्धि कर्म स्वभावतः ६
तपः श्रुतं च योनिश्चाप्येतद्ब्राह्मण्यकारणम् ।
त्रिभिर्गुणैः समुदितस्ततो भवति वै द्विजः ७
अस्मिंस्तृप्ते च तृप्यन्ते पितरो दैवतानि च ।
न हि श्रुतवतां किञ्चिदधिकं ब्राह्मणादृते॥१८
अन्धं स्यात्तम एवेद न प्रज्ञायेत किञ्चन ।
चातुर्वर्ण्यं न वर्तेत धर्माधर्मावृतानृते ॥ ९
यथा हि सुलभे क्षेत्रे फल विन्दति मानवः ।
एवं दत्वा श्रुतवति फलं दाता समश्नुते ॥ १०
ब्राह्मणश्चेन्न विन्देत श्रुतवृत्तोपसंहितः ।
प्रतिग्रहीता दानस्य मोघ स्याद्धनिनां धनम्
अदन्नविद्वान्हन्त्यन्नमद्यमानं च हन्ति तम् ।
तं चान्नं पाति यश्चान्नं स हन्ता हन्यतेऽबुधः
प्रभुर्ह्यन्नमदन्विद्वान् पुनर्जनयतीश्वरः ।
स चान्नाज्जायते तस्मात्सूक्ष्म एष व्यतिक्रमः
यदेव ददतः पुण्यं तदेव प्रतिगृह्णतः ।
न ह्येकचक्रं वर्तेत इत्येवमृषयो विदुः ॥ १४
यत्र वै ब्राह्मणाः सन्ति श्रुतवृत्तोपसंहिताः ।
तत्र दानफलं पुण्यमिह चामुत्र चाश्नुते ॥ १५
ये योनिशुद्धाः सततं तपस्यभिरता भृशम् ।
दानाध्ययनसंपन्नास्ते वै पूज्यतमाः सदा १६
तैर्हि सद्भिः कृतः पन्थास्तेन यातो न मुह्यते ।
ते हि स्वर्गस्य नेतारो यज्ञवाहाः सनातनाः ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि मैत्रेयभिक्षाया एकविंशत्यधिकशततमोऽध्यायः ॥ १२१ ॥



१२१


एवमिति ॥ १ ॥ पात्रगुणाद्दानस्य महाफलत्व मैत्रेय आह—**निर्दोषमिति** द्वाभ्याम् ॥ ४ ॥ भवतो दर्शनान्नोऽस्माकमभ्युदयो भवेदिति योजना ॥ ६ ॥ श्रुतं शास्त्रज्ञानम् ॥ ७ ॥ ब्राह्मणादृते इदमन्वं तम एव स्याद्यतो वर्णधर्मादिकं तेन विना न प्रज्ञायेतेति सम्बन्ध ॥ ८ ॥ **अदन्निति** । तमदन्तं स अबुध अदतोऽन्नस्य च तादृशस्य हन्ता स्वयमपि हन्यते दोषेणेत्यर्थ । तच्चान्न पाति यच्चान्नमिति पाठे तच्चान्नमद्यमान सन्तमत्तारं हन्तीति पूर्वेणान्वय । यच्चान्न स च तस्य हन्ता मूर्खस्ताभ्या हताभ्यामयमबुधो दाता हन्यत इत्यर्थ ॥ १२ ॥ **प्रभुरिति** । यतिश्च ब्रह्मचारी च पक्वान्नखामि नावुभाविति स्मृतेर्विद्वानन्नमदस्तस्य प्रभुर्भवति ईश्वरत्वाच्च क्षेत्रभूत सन् पुनर्जनयति दात्रे अनेकगुणित प्रयच्छतीत्यर्थ स च दातुरन्नाज्जायते प्रजारूपेण गृहस्थश्चेत्तत्र यस्मान्न तस्य सन्ततिरिति सूक्ष्मो व्यतिक्रमोऽस्ति तेन गृहस्थ परपाकं नाश्नीयादिति गम्यते ॥ १३ ॥ **यदेवेति** प्रतिग्रहीत्रभावे अन्नस्य वृद्धिर्न स्यात् वृद्धयभावे दातुर्दाने प्रवृत्तिर्न स्यादिति दातृप्रतिग्रहातारौ चक्रवल्लोकतन्त्र वहत इत्यर्थ ॥ १४ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकविंशत्यधिकशततमोऽध्याय ॥ १२१ ॥

१२२

भीष्म उवाच ।

एवमुक्तः स भगवान् मैत्रेयं प्रत्यभाषत ।
दिष्ट्यैवं त्वं विजानासि दिष्ट्या ते बुद्धिरीदृशी
लोको ह्यार्यगुणानेव भूयिष्ठं तु प्रशंसति ।
रूपमानवयोमानश्रीमानाश्चाप्यसंशयम् ॥ २
दिष्ट्या नाभिभवन्ति त्वा दैवस्तेऽयमनुग्रहः
यत्ते भूशतरं दानाद्वर्तयिष्यामि तच्छृणु ॥ ३
यानीहागमशास्त्राणि याश्च काश्चित्प्रवृत्तयः ।
तानि वेदं पुरस्कृत्य प्रवृत्तानि यथाक्रमम् ॥४
अहं दानं प्रशंसामि भवानपि तपःश्रुते ।
तपः पवित्रं वेदस्य तपः स्वर्गस्य साधनम् ५
तपसा महदाप्नोति विद्यया चेति नः श्रुतम् ।
तपसैव चापनुदेद्यच्चान्यदपि दुष्कृतम् ॥ ६
यद्यद्धि किंचित्संधाय पुरुषस्तप्यते तपः ।
सर्वमेतदवाप्नोति विद्यया चेति नः श्रुतम्॥ ७
दुरन्वयं दुष्प्रधर्षं दुरापं दुरतिक्रमम् ।
सर्वं वै तपसाऽभ्येति तपो हि बलवत्तरम्॥८
सुरापोऽसंमतादायी भ्रूणहा गुरुतल्पगः ।
तपसा तरते सर्वमेनसश्च प्रमुच्यते ॥ ९
सर्वविद्यस्तु चक्षुष्मानपि यादृशतादृशम् ।
तपस्विनं तथैवाहुस्ताभ्यां कार्यं सदा नमः१०
सर्वे पूज्याः श्रुतधनास्तथैव च तपस्विनः ।
दानप्रदाः सुखं प्रेत्य प्राप्नुवन्तीह च श्रियम्११
इमं च ब्रह्मलोकं च लोकं च बलवत्तरम् ।
अन्नदानैः सुकृतिनः प्रतिपद्यन्ति लौकिकाः१२
पूजिताः पूजयन्त्येते मानिता मानयन्ति च ।
स दाता यत्र यत्रैति सर्वतः संप्रणूयते ॥ १३
अकर्ता चैव कर्ता च
लभते यस्य यादृशम् ।
यदि चोर्ध्वं यद्यधो वा
स्वान् लोकानभियास्यति १४
प्राप्स्यसि त्वन्नपानानि
यानि वांच्छसि कानिचित् ।
मेधाढ्यसि कुले जातः
श्रुतवाननृशंसवान् १५
कौमारचारी व्रतवान्मैत्रेय निरतो भव ।
एतद्गृहाण प्रथम प्रशस्त गृहमेधिनाम् ॥ १६
यो भर्ता वासिता तुष्टो भर्तुस्तुष्टा च वासिता
यस्मिन्नेव कुले सर्वं कल्याणं तत्र वर्तते ॥ १७
अङ्गिर्गात्रान्मलमिव तमोऽग्निप्रभया यथा ।
दानेन तपसा चैव सर्वपापमपोहति ॥ १८
स्वस्ति प्राप्नुहि मैत्रेय गृहान् साधु व्रजाम्यहम
एतन्मनसि कर्तव्यं श्रेय एवं भविष्यति ॥ १९
तं प्रणम्याथ मैत्रेयः कृत्वा चापि प्रदक्षिणम् ।
स्वस्ति प्राप्नोतु भगवानित्युवाच कृताञ्जलिः

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि मैत्रेयभिक्षायां द्वाविंशत्यधिकशततमोऽध्यायः ॥ १२२ ॥



१२३

युधिष्ठिर उवाच ।

सत्स्त्रीणां समुदाचार सर्वधर्मविदां वर । श्रोतुमिच्छाम्यहं त्वत्तस्तन्मे ब्रूहि पितामह ॥१

१२२

एवमिति ॥ १ ॥ आर्यगुणान्प्रभुगुणान् ॥ २ ॥ वर्तयिष्यामि कथयिष्यामि ॥ ३॥ असम्मतादायी यथा च परप्रतिग्रहमभिमन्यते स्तेनो भवतीति स्मृते स्तेन ॥९॥य सर्ववित्स चक्षुष्मान् यादृशतादृशमपि तपस्विनं तथैव चक्षुष्मन्तमेवाहुः ताभ्यां सर्ववित्तपस्विभ्याम् ॥१०॥ कौमारचारी प्रथमवया ॥१६॥ वासिता स्त्री ॥ १७ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्वाविंशत्यधिकशततमोऽध्याय ॥ १२२ ॥

१२३

सत्स्त्रीणामिति ॥ १ ॥

भीष्म उवाच ।
सर्वज्ञां सर्वतत्त्वज्ञां देवलोके मनस्विनीम्।
कैकेयी सुमना नाम शांडिलीं पर्यपृच्छत ॥२
केन वृत्तेन कल्याणि समाचारेण केन वा।
विधूय सर्वपापानि देवलोकं त्वमागता ३
हुताशनशिखेव त्वं ज्वलमाना स्वतेजसा।
सुता ताराधिपस्येव प्रभया दिवमागता ॥ ४
अरजांसि च वस्त्राणि धारयन्ती गतक्लमा
विमानस्था शुभा भासि सहस्रगुणमोजसा ५
न त्वमल्पेन तपसा दानेन नियमेन वा।
इमं लोकमनुप्राप्ता त्वं हि तत्त्व वदस्व मे ६
इति पृष्टा सुमनया मधुरं चारुहासिनी।
शांडिली निभृतं वाक्यं सुमनामिदमब्रवीत् ७

नाहं काषायवसना नापि वल्कलधारिणी
न च मुंडा च जटिला भूत्वा देवत्वमागता८
अहितानि च वाक्यानि सर्वाणि परुषाणि च
अप्रमत्ता च भर्तारं कदाचिन्नाहमब्रुवम् ॥ ९
देवतानां पितृणां च ब्राह्मणानां च पूजने।
अप्रमत्ता सदा युक्ता श्वश्रूश्वशुरवर्तिनी ॥ १०
पैशुन्ये न प्रवर्तामि न ममैतन्मनोगतम्।
अद्वारि न च तिष्ठामि चिरं न कथयामि च
असद्वा हसित किञ्चिदहितं वापि कर्मणा।
रहस्यमरहस्यं वा न प्रवर्तामि सर्वथा ॥ १२
कार्यार्थे निर्गत चापि भर्तारं गृहमागतम्।
आसनेनोपसंयोज्य पूजयामि समाहिता १३
यदन्नं नाभिजानाति यद्भोज्यं नाभिनन्दति।
भक्ष्य वा यदि वा लेह्यं तत्सर्वं वर्जयाम्यहम्
कुटुंबार्थे समानीतं यत्किञ्चित्कार्यमेव तु।
प्रातरुत्थाय तत्सर्वं कारयामि करोमि च १५
प्रवासं यदि मे याति भर्ता कार्येण केनचित्
मङ्गलैर्बहुभिर्युक्ता भवामि नियता तदा ॥ १६
अञ्जनं रोचनां चैव स्नानं माल्यानुलेपनम्।
प्रसाधन च निष्क्रान्ते नाभिनन्दामि भर्तरि
नोत्थापयामि भर्तारं सुखसुप्तमह सदा।
आन्तरेष्वपि कार्येषु तेन तुष्यति मे मनः १८
नायासयामि भर्तारं कुटुम्बार्थेऽपि सर्वदा।
गुप्तगुह्या सदा चास्मि सुसंमृष्टनिवेशना १९
इमं धर्मपथं नारी पालयन्ती समाहिता।
अरुन्धतीव नारीणां स्वर्गलोके महीयते २०

भीष्म उवाच ।
एतदाख्याय सा देवी सुमनायै तपस्विनी।
पतिधर्मं महाभागा जगामादर्शनं तदा २१
यश्चेदं पांडवाख्यानं पठेत्पर्वणि पर्वणि।
स देवलोकं संप्राप्य नन्दने स सुखी वसेत्२२

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि शाण्डिलीसुमनासंवादे त्रयोविंशत्यधिकशततमोऽध्यायः ॥ १२३ ॥



१२४

युधिष्ठिर उवाच ।
साम्नि चापि प्रदाने च ज्यायः किं भवतो मतम्
प्रब्रूहि भरतश्रेष्ठ यदत्र व्यतिरिच्यते १

भीष्म उवाच ।
साम्ना प्रसाद्यते कश्चिदानेन च तथा परः।
पुरुषप्रकृतिं ज्ञात्वा तयोरेकतरं भजेत् ॥ २
गुणांस्तु शृणु मे राजन् सान्त्वस्य भरतर्षभ।
दारुणान्यपि भूतानि सान्त्वेनाराधयेद्यथा ३

अत्राप्युदाहरन्तीममितिहासं पुरातनम्।
गृहीत्वा रक्षसा मुक्तो द्विजातिः कानने यथा
कश्चिद्वाग्बुद्धिसपन्नो ब्राह्मणो विजने वने।
गृहीतः कृच्छ्रमापन्नो रक्षसा भक्षयिष्यता ५

मङ्गलैर्नियतेति मङ्गलसूत्रमात्र धारयामि न तु ताम्बूलादीनित्यर्थ ॥ १६ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्रयोविंशत्यधिकशततमोऽध्याय ॥ १२३ ॥

१२४

साम्नीति ॥ १ ॥

स बुद्धिश्रुतिसंपन्नस्तं दृष्ट्वाऽतीव भीषणम् ।
सामैवास्मिन्प्रयुयुजे न मुमोह न विव्यथे ६
रक्षस्तु वाचं संपूज्य प्रश्न पप्रच्छ तं द्विजम् ।
मोक्ष्यसे ब्रूहि मे प्रश्नं केनास्मि हरिणः कृशः ७
मुहूर्तमथ सञ्चिन्त्य ब्राह्मणस्तस्य रक्षसः ।
आभिर्गाथाभिरव्यग्रः प्रश्नं प्रतिजगाद ह ॥ ८

ब्राह्मण उवाच ।

विदेशस्थो विलोकस्थो विना नून सुहृज्जनैः
विषयानतुलान् भुङ्क्षे तेनासि हरिणः कृशः
नूनं मित्राणि ते रक्षः साधूपचरितान्यपि ।
स्वदोषादपरज्यन्ते तेनासि हरिणः कृशः ॥
धनैश्वर्याधिकाः स्तब्धास्त्वद्गुणैः परमावराः
अवजानन्ति नूनं त्वां तेनासि हरिणः कृशः
गुणवान्विगुणानन्यान्नूनं पश्यसि सत्कृतान् ।
प्राज्ञोऽप्राज्ञान्विनीतात्मा तेनासि हरिणःकृशः
अवृत्त्या क्लिश्यमानोऽपि वृत्युपायान्विगर्हयन्
माहात्म्याद्व्यथसे नूनं तेनासि हरिणः कृशः ॥
संपीड्यात्मानमार्यत्वाच्चया कञ्चिदुपस्कृतः ।
जितं त्वां मन्यते साधो तेनासि हरिणः कृशः
क्लिश्यमानान्विमार्गेषु कामक्रोधावृतात्मनः ।
मन्ये त्वं ध्यायसि जनांस्तेनासि हरिणः कृशः
प्रज्ञासम्भावितो नूनमप्रैरुपसंहितः ।
हीयमानोसि दुर्वृत्तैस्तेनासि हरिणः कृशः ॥
नूनं मित्रमुखः शत्रुः कश्चिदार्यवदाचरन् ।
वञ्चयित्वा गतस्त्वां वै तेनासि हरिणः कृशः
प्रकाशार्थगतिर्नूनं रहस्यकुशलः कृती ।
तज्ज्ञैर्न पूज्यसे नूनं तेनासि हरिणः कृशः १८
असत्स्वपि निविष्टेषु ब्रुवतो मुक्तसंशयम् ।
गुणास्ते न विराजन्ते तेनासि हरिणः कृशः
धनबुद्धिश्रुतैर्हीनः केवलं तेजसान्वितः ।
महत्प्रार्थयसे नूनं तेनासि हरिणः कृशः २०
तपःप्राणिहितात्मानं मन्ये त्वारण्यकाक्षिणम्
बान्धवा नाभिनन्दन्ति तेनासि हरिणः कृशः
इष्टभार्यस्य ते नूनं प्रातिवेश्यो महाधनः ।
युवा सुलालितः कामी तेनासि हरिणः कृशः
नूनमर्थवतां मध्ये तव वाक्यमनुत्तमम् ।
न भाति कालेऽभिहितं तेनासि हरिणः कृशः
दृढपूर्वं श्रुतं मूर्खं कुपित हृदयप्रियम् ।
अनुनेतुं न शक्नोषि तेनासि हरिणः कृशः २४
नूनमासज्जयित्वा त्वां कृत्ये कस्मिञ्चिदीप्सिते
काश्चिदर्थयते नित्यं तेनासि हरिणः कृशः २५
नून त्वां सुगुणैर्युक्तं पूजयानं सुहृद्वृतम् ।
ममार्थ इति जानीते तेनासि हरिणः कृशः२६
अन्तर्गतमभिप्राय नूनं नेच्छसि लज्जया ।
विवेक्तु प्राप्तिशैथिल्यात्तेनासि हरिणः कृशः२७
नानाबुद्धिरुचो लोके मनुष्यान्नूनमिच्छसि ।
ग्रहीतु स्वगुणैः सर्वांस्तेनासि हरिणः कृशः ॥
अविद्वान्भीरुरल्पार्थे विद्याविक्रमदानजम् ।
यशः प्रार्थयसे नूनं तेनासि हरिणः कृशः २९
चिराभिलषितं किञ्चित्फलमप्राप्तमेव ते ।
कृतमन्यैरपहृतं तेनासि हरिणः कृशः ॥ ३०
नूनमात्मकृतं दोषमपश्यन्किञ्चिदात्मनः ।
अकारणेऽभिशप्तोसि तेनासि हरिणः कृशः ॥
साधून् गृहस्थान् दृष्ट्वा च तथा साधून्वनेचरान्
मुक्ताश्चावसथे सक्तास्तेनासि हरिणः कृशः ॥
सुहृदां दुःखमार्तानां न प्रमोक्ष्यसि हानिजम्
अलमर्थगुणैर्हीनं तेनासि हरिणः कृशः ॥ ३३
धर्म्यमर्थ्यं च काम्य च काले चाभिहितं वचः
न प्रतीयन्ति ते नूनं तेनासि हरिणः कृशः ३४
दत्तानकुशलैरर्थान्मनीषी सञ्जिजीविषुः ।
प्राप्य वर्तयसे नूनं तेनासि हरिणः कृशः ३५
पापान् प्रवर्धतो दृष्ट्वा कल्याणानावसीदतः ।
ध्रुवं गर्हयसे नित्य तेनासि हरिणः कृशः ३६
परस्परविरुद्धाना प्रियं नूनं चिकीर्षसि ।
सुहृदामुपरोधेन तेनासि हरिणः कृशः ॥ ३७

श्रोत्रियांश्च विकर्मस्थान्
प्राज्ञांश्चाप्यजितेन्द्रियान् ।
मन्येऽनुध्यायसि जनां-
स्तेनासि हरिणः कृशः ॥ ३८

एव संपूजितं रक्षो विप्रं तं प्रत्यपूजयत् ।
सखायमकरोच्चैन संयोज्यार्थैर्मुमोच ह ॥ ३९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि हरिणकृशाख्याने चतुर्विंशत्यधिकशततमोऽध्यायः ॥ १२४ ॥

हरिण पाण्डुरवर्ण ॥ ७ ॥ अनात्मविषयिणी चिन्ता पाण्डुत्वकृशत्वहेतु दानाभावे सामैव जीवनोपाय इत्यध्यायतात्पर्यम्॥ ॥ ३९ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्विंशत्यधिकशततमोऽध्याय ॥ १२४ ॥

१२५

युधिष्ठिर उवाच ।

जन्म मानुष्यकं प्राप्य कर्मक्षेत्रं सुदुर्लभम् ।
श्रेयोर्थिना दरिद्रेण किं कर्तव्यं पितामह ॥
दानानामुत्तमं यच्च देयं यच्च यथा यथा ।
मान्यान्पूज्यांश्च गाङ्गेय रहस्यं वक्तुमर्हसि २

वैशम्पायन उवाच ।

एवं पृष्टो नरेन्द्रेण पाण्डवेन यशस्विना ।
धर्माणां परम गुह्य भीष्मः प्रोवाच पार्थिवम्॥

भीष्म उवाच ।

शृणुष्वावहितो राजन्धर्मगुह्यानि भारत ।
यथा हि भगवान्व्यासः पुरा कथितवान्मयि४
देवगुह्यमिदं राजन्यमेनाक्लिष्टकर्मणा ।
नियमस्थेन युक्तेन तपसो महतः फलम् ॥ ५
येन यः प्रीयते देवः प्रीयन्ते पितरस्तथा ।
ऋषयः प्रमथाः श्रीश्च चित्रगुप्तो दिशां गजाः
ऋषिधर्मः स्मृतो यत्र सरहस्यो महाफलः ।
महादानफलं चैव सर्वयज्ञफलं तथा ॥ ७
यश्चैतदेवं जानीयाज्ज्ञात्वा वा कुरुतेऽनघ ।
स दोषो दोषवाञ्श्रेह तैर्गुणैः सह युज्यते ॥ ८
दशसूनासमं चक्रं दशचक्रसमो ध्वजः ।
दशध्वजसमा वेश्या दशवेश्यासमो नृपः ९
अर्धेनैतानि सर्वाणि नृपतिः कथ्यतेऽधिकः ।
त्रिवर्गसहितं शास्त्रं पवित्रं पुण्यलक्षणम् ॥
धर्मव्याकरणं पुण्यं रहस्यश्रवणं महत् ।
श्रोतव्यं धर्मसंयुक्त विहितं त्रिदशैः स्वयम् ॥
पितॄणां यत्र गुह्यानि प्रोच्यन्ते श्राद्धकर्मणि ।
देवतानां च सर्वेषां रहस्यं कथ्यतेऽखिलम्॥
ऋषिधर्मः स्मृतो यत्र सरहस्यो महाफलः ।
महायज्ञफलं चैव सर्वदानफलं तथा ॥ १३
ये पठन्ति सदा मर्त्या येषां चैवोपतिष्ठति ।
श्रुत्वा च फलमाचष्टे स्वय नारायणः प्रभुः ॥
गवां फल तीर्थफलं यज्ञानां चैव यत्फलम् ।
एतत्फलमवाप्नोति यो नरोऽतिथिपूजकः॥१५
श्रोतारः श्रद्दधानाश्च येषा शुद्धं च मानसम् ।
तेषां व्यक्त जिता लोकाः श्रद्दधानेन साधुना
मुच्यते किल्बिषाच्चैव न स पापेन लिप्यते ।
धर्मं च लभते नित्यं प्रेत्य लोकगतो नरः १७
कस्यचित्त्वथ कालस्य देवदूतो यदृच्छया ।
स्थितो ह्यन्तर्हितो भूत्वा पर्यभाषत वासवम्
यौ तौ कामगुणोपेतावश्विनौ भिषजां वरौ ।
आज्ञयाऽहं तयोः प्रातः सनरान् पितृदैवतान्
कस्माद्धि मैथुनं श्राद्धे दातुर्भोक्तुश्च वर्जितम् ।
किमर्थं च त्रयः पिंडाः प्रविभक्ताः पृथक् पृथक्
प्रथमः कस्य दातव्यो मध्यमः क्व च गच्छति ।
उत्तरश्च स्मृतः कस्य एतदिच्छामि वेदितुम्
श्रद्दधानेन दूतेन भाषितं धर्मसहितम् ।
पूर्वस्मात्त्रिदशाः सर्वे पितरः पूज्य खेचरम् २२

पितर ऊचुः ।

स्वागत तेऽस्तु भद्रं ते श्रूयतां खेचरोत्तम ।
गूढार्थः परमः प्रश्नो भवता समुदीरितः ॥२३
श्राद्धं दत्वा च भुक्त्वा च पुरुषो यः स्त्रियं व्रजेत्
पितरस्तस्य तं मासं तस्मिन् रेतसि शेरते २४
प्रविभागं तु पिंडानां प्रवक्ष्याम्यनुपूर्वशः ।
पिंडो ह्यधस्तादुच्छंस्तु अप आविश्य भावयेत्
पिण्डं तु मध्यमं तत्र पत्नी त्वेका समश्नुते ।
पिण्डस्तृतीयो यस्तेषां तं दद्याज्जातवेदसि २६
एष श्राद्धविधिः प्रोक्तो यथा धर्मो न लुप्यते ।
पितरस्तस्य तुष्यन्ति प्रहृष्टमनसः सदा ॥ २७
प्रजा विवर्धते चास्य अक्षयं चोपतिष्ठति ।

देवदूत उवाच ।

आनुपूर्व्येण पिंडानां प्रविभागः पृथक् पृथक्

१२५

जन्मेति ॥ १ ॥ यमेन प्राप्तमिति शेष ॥ ५ ॥ दशाना पशूना सूना वधो यत्र सा पशुसजातिर्दशसूना चक्र चक्रवान् तैलिक ध्वज सुरापायी नृप क्षुद्रो राजा ॥ ९ ॥ अधिको नृपतिस्तु एतानि सर्वाणि अर्धेन तुलयन् कथ्यते । एतच्च तारतम्य प्रतिग्रहार्थमुच्यते। एवं दुष्प्रतिग्रहपराङ्मुखेन त्रिवर्गशास्त्रं धर्मार्थकामशास्त्राणि ज्ञेयानि ॥ १० ॥तत्राप्यर्थकामयो प्रसिद्धत्वाद्धर्मशास्त्राण्येव श्रोतव्यानीत्याह—**धर्मेत्यादिना** ॥ ११ ॥ पठन्ति शास्त्र उपतिष्ठति सम्यक् स्फुरति आचष्टे च य स स्वय नारायण एवेति ज्ञातव्यः ॥ १४ ॥ एव स्तुत्वा शास्त्रमारभते गवा फलमिति शास्त्रसङ्क्षेप ॥१५॥ श्रोतार इति द्वाभ्या श्रद्धाप्रशंसा ॥१६॥ सनरान् सदर्षीन्प्राप्त प्रष्टुमिति शेष ॥ १९ ॥ पूज्य सम्पूज्य ॥ २२ ॥

पितृणां त्रिषु सर्वेषां निरुक्तं कथितं त्वया ।
एकः समुद्धृतः पिंडो ह्यधस्तात्कस्य गच्छति ॥
कं वा प्रीणयते देवं कथं तारयते पितॄन् ।
मध्यमं तु तदा पत्नी भुंक्तेऽनुज्ञातमेव हि ॥३०
किमर्थं पितरस्तस्य कव्यमेव च भुञ्जते ।
अत्र यस्त्वन्तिमः पिण्डो गच्छते जातवेदसम्
भवते का गतिस्तस्य कं वा समनुगच्छति ।
एतदिच्छाम्यहं श्रोतुं पिण्डेषु त्रिषु या गतिः
फलं वृत्तिं च मार्गं च यश्चैनं प्रतिपद्यते ।

पितर ऊचुः ।

सुमहानेष प्रश्नो वै यस्त्वया समुदीरितः३३
रहस्यमद्भुतं चापि पृष्टाः स्म गगनेचर ।
एतदेव प्रशसन्ति देवाश्च मुनयस्तथा ॥ ३४
तेऽप्येव नाभिजानन्ति पितृकार्यविनिश्चयम्
वर्जयित्वा महात्मान चिरजीविनमुत्तमम् ३५
पितृभक्तस्तु यो विप्रो वरलब्धो महायशाः ।
त्रयाणामपि पिण्डानां श्रुत्वा भगवतो गतिम्
देवदूतेन यः पृष्टः श्राद्धस्य विधिनिश्चयः ।
गतिं त्रयाणां पिण्डानां शृणुष्वावहितो मम
अपो गच्छति यो ह्यत्र शशिन ह्येष प्रीणयेत् ।
शशी प्रीणयते देवान् पितॄंश्चैव महामते ॥ ३८
भुंक्ते तु पत्नी यं चैषामनुज्ञाता तु मध्यमम् ।
पुत्रकामाय पुत्रं तु प्रयच्छन्ति पितामहाः ३९
हव्यवाहे तु यः पिण्डो दीयते तन्निबोध मे ।
पितरस्तेन तृप्यन्ति प्रीताः कामान् दिशंति च
एतत्ते कथितं सर्वं त्रिषु पिण्डेषु या गतिः ।
ऋत्विग्यो यजमानस्य पितृत्वमनुगच्छति ॥
तस्मिन्नहनि मन्यन्ते परिहार्यं हि मैथुनम् ।
शुचिना तु सदा श्राद्ध भोक्तव्य खेचरोत्तम
ये मया कथिता दोषा-
स्ते तथा स्युर्न चान्यथा ।
तस्मात्स्नातः शुचिः क्षान्तः
श्राद्धं भुञ्जीत वै द्विजः ॥ ४३
प्रजा विवर्धते चास्य यश्चैव संप्रयच्छति ।
ततो विद्युत्प्रभो नाम ऋषिराह महातपाः ४४
आदित्यतेजसा तस्य तुल्यं रूप प्रकाशते ।
स च धर्मरहस्यानि श्रुत्वा शक्रमथाब्रवीत् ॥
तिर्यग्योनिगतान् सत्त्वान्
मर्त्या हिंसन्ति मोहिताः ।
कीटान् पिपीलिकान् सर्पान्
मेषान् समृगपक्षिणः ॥ ४६
किल्बिषं सुबहु प्राप्ताः किंस्विदेषां प्रतिक्रिया
ततो देवगणाः सर्वे ऋषयश्च तपोधनाः ॥ ४७
पितरश्च महाभागाः पूजयन्ति स्म तं मुनिम् ।

शक्र उवाच ।

कुरुक्षेत्रं गयां गङ्गां प्रभासं पुष्कराणि च४८
एतानि मनसा ध्यात्वा अवगाहेत्ततो जलम् ।
तथा मुच्यति पापेन राहुणा चन्द्रमा यथा ॥
ह्यह स्नातः स भवति निराहारश्च वर्तते ।
स्पृशते यो गवा पृष्ठं वालधिं च नमस्यति ॥
ततो विद्युत्प्रभो वाक्यमभ्यभाषत वासवम् ।
अयं सूक्ष्मतरो धर्मस्तं निबोध शतक्रतो ५१
घृष्टो वटकषायेण अनुलिप्तः प्रियंगुणा ।
क्षीरेण षष्टिकान् भुक्त्वा सर्वपापैः प्रमुच्यते
श्रूयतां चापरं गुह्य रहस्यमृषिचिन्तितम् ।
श्रुतं मे भाषमाणस्य स्थाणोः स्थाने बृहस्पतेः॥
रुद्रेण सह देवेश तन्निबोध शचीपते ।
पर्वतारोहणं कृत्वा एकपादो विभावसुम् ५४
निरीक्षेत निराहार ऊर्ध्वबाहुः कृताञ्जलिः ।
तपसा महता युक्त उपवासफलं लभेत् ॥ ५५
रश्मिभिस्तापितोऽर्कस्य सर्वपापमपोहति ।
ग्रीष्मकालेऽथ वा शीते एवं पापमपोहति ॥
ततः पापात्प्रमुक्तस्य द्युतिर्भवति शाश्वती ।
तेजसा सूर्यवद्दीप्तो भ्राजते सोमवत्पुनः ॥ ५७
मध्ये त्रिदशवर्गस्य देवराजः शतक्रतुः ।
उवाच मधुरं वाक्यं बृहस्पतिमनुत्तमम् ॥ ५८
धर्मगुह्यं तु भगवन्मानुषाणां सुखावहम् ।
सरहस्याश्च ये दोषास्तान् यथावदुदीरय ५९

चिरजीविन मार्कण्डेयम् ॥ ३५ ॥ यत ऋत्विक् श्राद्धभोक्ता यजमानस्य पितृत्व गच्छति तस्माद-न्यात्मता गत स्वस्त्रियं न गच्छेत्पारदार्यदोषतुल्य ह्येतदि-त्यर्थ ॥ ४१ ॥ एतच्च वरणमारभ्य द्रष्टव्यमित्याशयेनाह —शुचिनेति ॥ ४२ ॥ वटकषायेण वटजटाकषायेण प्रियङ्गु राजमर्षप षष्टिकान् षष्टिरात्रेण पक्व धान्यम्॥५२ विभावसुं सूर्यम् ॥ ५४ ॥

बृहस्पतिरुवाच ।
प्रतिमेहन्ति ये सूर्यमनिलं द्विषते च ये ।
हव्यवाहे प्रदीप्ते च समिधं ये न जुह्वति ६०
बालवत्सां च ये धेनुं दुहन्ति क्षीरकारणात
तेषां दोषान्प्रवक्ष्यामि तान्निबोध शचीपते ६१
भानुमाननिलश्चैव हव्यवाहश्च वासव ।
लोकानां मातरश्चैव गावः सृष्टाः स्वयंभुवा ॥
लोकांस्तारयितुं शक्ता मर्त्येष्वेतेषु देवताः ।
सर्वे भवन्तः शृण्वन्तु एकैकं धर्मनिश्चयम् ६३
वर्षाणि षडशीतिं तु दुर्वृत्ताः कुलपासनाः ।
स्त्रियः सर्वाश्च दुर्वृत्ताः प्रतिमेहन्ति या रविम्
अनिलद्वेषिणः शक्र गर्भस्था च्यवते प्रजा ।
हव्यवाहस्य दीप्तस्य समिधं ये न जुह्वति ६५
अग्निकार्येषु वै तेषां हव्यं नाश्नाति पावकः ।
क्षीरं तु बालवत्सानां ये पिबन्तीह मानवाः ॥
न तेषां क्षीरपाः केचिज्जायन्ते कुलवर्धनाः ।
प्रजाक्षयेण युज्यन्ते कुलवंशक्षयेण च ॥ ६७
एवमेतत्पुरा दृष्ट कुलवृद्धैर्द्विजातिभिः ।
तस्माद्वर्ज्यानि वर्ज्यानि कार्यं कार्यं च नित्यशः
भूतिकामेन मर्त्येन सत्यमेतद्ब्रवीमि ते ।
ततः सर्वे महाभाग देवताः समरुद्गणाः ६९
ऋषयश्च महाभागा. पृच्छन्ति स्म पितॄंस्ततः
पितरः केन तुष्यन्ति मर्त्यानामल्पचेतसाम् ॥
अक्षयं च कथं दान भवेच्चैवोर्ध्वदेहिकम् ।
आनृण्यं वा कथ मर्त्या गच्छेयुः केन कर्मणा
एतदिच्छामहे श्रोतुं पर कौतूहलं हि नः ।

पितर ऊचुः ।
न्यायतो वै महाभागाः संशयः समुदाहृतः
श्रूयतां येन तुष्यामो मर्त्यानां साधुकर्मणाम् ।
नीलषण्डप्रमोक्षेण अमावास्यां तिलोदकैः ७३
वर्षासु दीपकैश्चैव पितृणामनृणो भवेत् ।
अक्षय निर्व्यलीक च दानमेतन्महाफलम् ७४
अस्माकं परितोषश्च अक्षयः परिकीर्त्यते ।
श्रद्दधानाश्च ये मर्त्या आहरिष्यन्ति सन्ततिम्
दुर्गात्ते तारयिष्यन्ति नरकात्प्रपितामहान् ।
पितॄणां भाषितं श्रुत्वा हृष्टरोमा तपोधनः ॥
वृद्धगार्ग्यो महातेजास्तानेवं वाक्यमब्रवीत् ।
के गुणा नीलषण्डस्य प्रमुक्तस्य तपोधनाः ७७
वर्षासु दीपदानेन तथैव च तिलोदकैः ।

पितर ऊचुः ।
नीलषण्डस्य लाङ्गूल तोयमभ्युद्धरेद्यदि ७८
षष्टिं वर्षसहस्राणि पितरस्तेन तर्पिताः ।
यस्तु शृङ्गगतं पङ्कं कूलादुद्धृत्य तिष्ठति ॥ ७९
पितरस्तेन गच्छन्ति सोमलोकमसंशयम् ।
वर्षासु दीपदानेन शशीवच्छोभते नरः ॥ ८०
तमोरूप न तस्यास्ति दीपकं यः प्रयच्छति ।
अमावास्यां तु ये मर्त्याः प्रयच्छन्ति तिलोदकम्
पात्रमौदुम्बरं गृह्य मधुमिश्रं तपोधन ।
कृत भवति तैः श्राद्धं सरहस्यं यथार्थवत् ८२
हृष्टपुष्टमनास्तेषां प्रजा भवति नित्यदा ।
कुलवंशस्य वृद्धिस्तु पिण्डदस्य फलं भवेत
श्रद्दधानस्तु यः कुर्यात्पितृणामनृणो भवेत् ८३
एवमेष समुद्दिष्टः श्राद्धकालक्रमस्तथा ।
विधिः पात्रं फलं चैव यथावदनुकीर्तितम् ८४

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि पितृरहस्य नाम पञ्चविंशत्यधिकशततमोऽध्यायः ॥ १२५ ॥

१२६

भीष्म उवाच ।
केन ते च भवेत्प्रीतिः कथं तुष्टिं तु गच्छसि । इति पृष्टः सुरेन्द्रेण प्रोवाच हरिरीश्वरः ॥ १

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चविंशत्यधिकशततमोऽध्याय ॥ १२५ ॥

१२६

केनेति ॥ १ ॥

विष्णुरुवाच ।
ब्राह्मणानां परीवादो मम विद्वेषणं महत् ।
ब्राह्मणैः पूजितैर्नित्यं पूजितोऽहं न संशयः २
नित्याभिवाद्या विप्रेन्द्रा भुक्त्वा पादौ तथात्मनः
तेषां तुष्यामि मर्त्यानां यश्चक्रे च बलिं हरेत
वामनं ब्राह्मणं दृष्ट्वा वराहं च जलोत्थितम् ।
उद्धृतां धरणीं चैव मूर्ध्ना धारयते तु यः ४
न तेषामशुभं किञ्चित्कल्मषं चोपपद्यते ।
अश्वत्थं रोचनां गां च पूजयेद्यो नरः सदा ५
पूजितं च जगत्तेन सदेवासुरमानुषम् ।
तेन रूपेण तेषां च पूजां गृह्णामि तत्त्वतः ॥ ६
पूजा ममैषा नास्त्यन्या यावल्लोकाः प्रतिष्ठिताः
अन्यथा हि वृथा मर्त्याः पूजयन्त्यल्पबुद्धयः ।
नाहं तत्प्रतिगृह्णामि न सा तुष्टिकरी मम ८

इन्द्र उवाच ।
चक्रं पादौ वराहं च ब्राह्मणं चापि वामनम्
उद्धृतां धरणीं चैव किमर्थं त्वं प्रशंससि ॥ ९
भवान्सृजति भूतानि भवान्संहरति प्रजाः ।
प्रकृतिः सर्वभूतानां समर्त्यानां सनातनी १०

भीष्म उवाच ।
संप्रहस्य ततो विष्णुरिदं वचनमब्रवीत् ।
चक्रेण निहता दैत्याः पद्भ्यां क्रान्ता वसुंधरा
वाराह रूपमास्थाय हिरण्याक्षो निपातितः ।
वामनं रूपमास्थाय जितो राजा मया बलिः
परितुष्टो भवाम्येवं मानुषाणां महात्मनाम् ।
तन्मां ये पूजयिष्यन्ति नास्ति तेषां पराभवः
अपि वा ब्राह्मणं दृष्ट्वा ब्रह्मचारिणमागतम् ।
ब्राह्मणाय्याहुतिं दत्त्वा अमृतं तस्य भोजनम्
ऐन्द्रीं सन्ध्यामुपासित्वा
आदित्याभिमुखः स्थितः
सर्वतीर्थेषु स स्नातो
मुच्यते सर्वकिल्बिषैः ॥ १५
एतद्वः कथितं गुह्यमखिलेन तपोधनाः ।
संशयं पृच्छमानानां किं भूयः कथयाम्यहम्

बलदेव उवाच ।
श्रूयतां परम गुह्यं मानुषाणां सुखावहम् ।
अजानन्तो यदबुधाः क्लिश्यन्ते भूतपीडिताः
कल्य उत्थाय यो मर्त्यः स्पृशेद्गां वै घृत दधि
सर्षपं च प्रियंगुं च कल्मषात् प्रतिमुच्यते १८
भूतानि चैव सर्वाणि अग्रतः पृष्ठतोऽपि वा ।
उच्छिष्टं वाऽपि च्छिद्रेषु वर्जयन्ति तपोधनाः

देवा ऊचुः ।
प्रगृह्यौदुंबरं पात्रं तोयपूर्णं उदङ्मुखः ।
उपवासं तु गृह्णीयाद्यद्वा संकल्पयेद्व्रतम् ॥ २०
देवतास्तस्य तुष्यन्ति कामिकं चापि सिध्यति
अन्यथा हि वृथा मर्त्याः कुर्वते स्वल्पबुद्धयः
उपवासे बली चापि ताम्रपात्रं विशिष्यते ।
बलिर्भिक्षा तथाऽर्घ्यं च पितॄणां च तिलोदकम्
ताम्रपात्रेण दातव्यमन्यथाऽल्पफलं भवेत ।
गुह्यमेतत्समुद्दिष्टं यथा तुष्यन्ति देवताः ॥ २३

धर्म उवाच ।
राजपौरुषिके विप्रे घाण्टिके परिचारिके
गोरक्षके वाणिजके तथा कारुकुशीलवे २४
मित्रद्रुह्यनधीयाने यश्च स्याद्वृषलीपतिः ।
एतेषु दैवं पित्र्यं वा न देयं स्यात्कथञ्चन २५
पिण्डदास्तस्य हीयन्ते न च प्रीणाति वै पितॄन्
अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्तते २६
पितरस्तस्य देवाश्च अग्नयश्च तथैव हि ।
निराशाः प्रतिगच्छन्ति अतिथेरप्रतिग्रहात् ॥
स्त्रीघ्नैर्गोघ्नैः कृतघ्नैश्च ब्रह्मघ्नैर्गुरुतल्पगैः ।
तुल्यदोषो भवत्येभिर्यस्यातिथिरनर्चितः २८

अग्निरुवाच ।
पादमुद्यम्य यो मर्त्यः स्पृशेद्गाश्च सुदुर्मतिः ।
ब्राह्मणं वा महाभाग दीप्यमानं तथाऽनलम्
तस्य दोषान्प्रवक्ष्यामि तच्छृणुध्वं समाहिताः
दिव स्पृशत्यशब्दोऽस्य त्रस्यन्ति पितरश्च वै
वैमनस्यं च देवाना कृतं भवति पुष्कलम् ।
पावकश्च महातेजा हव्यं न प्रतिगृह्णाति ३१
आजन्मनां शतं चैव नरके पच्यते तु सः ।
निष्कृतिं च न तस्यापि अनुमन्यन्ति कर्हिचित
तस्माद्गावो न पादेन स्पृष्टव्या वै कदाचन ।
ब्राह्मणश्च महातेजा दीप्यमानस्तथाऽनलः ३३
श्रद्दधानेन मर्त्येन आत्मनो हितमिच्छता ।
एते दोषा मया प्रोक्तास्त्रिषु यः पादमुत्सृजेत्॥

विश्वामित्र उवाच ।
श्रूयतां परमं गुह्यं रहस्यं धर्मसंहितम् ।
परमान्नेन यो दद्यात्पितॄणामौपहारिकम् ३५

पादौ स्वीयावप्यभिवाद्यौ सन्ध्याया शिष्टाचारात् चक्रे गोमयोपलिप्ते मण्डले सुदर्शनमन्त्रेण पूजिते ॥ ३ ॥

गजच्छायायां पूर्वस्यां कुतपे दक्षिणामुखः।
यदा भाद्रपदे मासि भवते बहुले मघा ॥ ३६
श्रूयतां तस्य दानस्य यादृशो गुणविस्तरः।
कृतं तेन महच्छ्राद्धं वर्षाणीह त्रयोदश ३७

गाव ऊचुः।

बहुले समंगे ह्यकुतोभये च
क्षेमे च संख्येव हि भूयसी च।
यथा पुरा ब्रह्मपुरे सवत्सा
शतक्रतोर्वज्रधरस्य यज्ञे ३८
भूयश्च या विष्णुपदे स्थिता या
विभावसोश्चापि पथे स्थिता या।
देवाश्च सर्वे सह नारदेन
प्रकुर्वते सर्वसहेति नाम ॥ ३९
मंत्रेणैतेनाभिवन्देत यो वै
विमुच्यते पापकृतेन कर्मणा।
लोकानवाप्नोति पुरंदरस्य
गवां फलं चन्द्रमसो द्युतिं च ॥ ४०
एतं हि मन्त्रं त्रिदशाभिजुष्टं
पठेत यः पर्वसु गोष्ठमध्ये।
न तस्य पाप न भयं न शोकः
सहस्रनेत्रस्य च याति लोकम् ४१

भीष्म उवाच।

अथ सप्त महाभागा ऋषयो लोकविश्रुताः।
वसिष्ठप्रमुखाः सर्वे ब्रह्माणं पद्मसंभवम् ॥ ४२
प्रदक्षिणमभिक्रम्य सर्वे प्राञ्जलयः स्थिताः।
उवाच वचनं तेषां वसिष्ठो ब्रह्मवित्तमः ॥ ४३
सर्वप्राणिहितं प्रश्नं ब्रह्मक्षत्रे विशेषतः।
द्रव्यहीनाः कथं मर्त्या दरिद्राः साधुवर्तिनः ४४
प्राप्नुवन्तीह यज्ञस्य फलं केन च कर्मणा।
एतच्छ्रुत्वा वचस्तेषां ब्रह्मा वचनमब्रवीत् ४५

ब्रह्मोवाच।

अहो प्रश्नो महाभागा गूढार्थः परमः शुभः
सूक्ष्मः श्रेयाश्च मर्त्यानां भवद्भिः समुदाहृतः ४६
श्रूयता सर्वमाख्यास्ये निखिलेन तपोधनाः।
यथा यज्ञफलं मर्त्यो लभते नात्र संशयः ४७
पौषमासस्य शुक्ले वै यदा युज्येत रोहिणी।
तेन नक्षत्रयोगेन आकाशशयनो भवेत् ॥ ४८
एकवस्त्रः शुचिः स्नातः श्रद्दधानः समाहितः
सोमस्य रश्मयः पीत्वा महायज्ञफलं लभेत्
एतद्वः परमं गुह्यं कथितं द्विजसत्तमाः।
यन्मा भवन्तः पृच्छन्ति सूक्ष्मतत्त्वार्थदर्शिनः

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि देवरहस्ये षड्विंशत्यधिकशततमोऽध्यायः ॥ १२६ ॥



१२७

विभावसुरुवाच।

सलिलस्याञ्जलिं पूर्णमक्षताश्च घृतोत्तराः।
सोमस्योत्तिष्ठमानस्य तज्जलं चाक्षतांश्च तान्
स्थितो ह्यभिमुखो मर्त्यः पौर्णमास्यां बलिं हरेत्
अग्निकार्यं कृतं तेन हुताश्चास्याग्नयस्त्रयः २
वनस्पतिं च यो हन्यादमावास्यामबुद्धिमान्
अपि ह्येकेन पत्रेण लिप्यते ब्रह्महत्यया ॥ ३
दन्तकाष्ठं तु यः खादेदमावास्यामबुद्धिमान्।
हिंसितश्चन्द्रमास्तेन पितरश्चोद्विजन्ति च ४
हव्यं न तस्य देवाश्च प्रतिगृह्णन्ति पर्वसु।
कुप्यन्ते पितरश्चास्य कुले वंशोऽस्य हीयते ५

श्रीरुवाच।

प्रकीर्णं भाजनं यत्र भिन्नभाण्डमथासनम्।
योषितश्चैव हन्यन्ते कश्मलोपहते गृहे ॥ ६

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षड्विंशत्यधिकशततमोऽध्याय ॥ १२६ ॥

* द्वितीयार्थे प्रथमा।

१२७

सलिलस्येति ॥ १ ॥

देवताः पितरश्चैव उत्सवे पर्वणीषु वा ।
निराशाः प्रतिगच्छन्ति कश्मलोपहताद्गृहात्

अङ्गिरा उवाच ।

यस्तु संवत्सरं पूर्णं दद्यादीपं करञ्जके ।
सुवर्चलामूलहस्तः प्रजा तस्य विवर्धते ॥ ८

गार्ग्य उवाच ।

आतिथ्यं सततं कुर्याद्दीपं दद्यात्प्रतिश्रये ।
वर्जयानो दिवा स्वापं न च मांसानि भक्षयेत्
गोब्राह्मणं न हिंस्याच्च पुष्कराणि च कीर्तयेत्
एष श्रेष्ठतमो धर्मः सरहस्यो महाफलः ॥ १०
अपि क्रतुशतैरिष्ट्वा क्षयं गच्छति तद्विधिः ।
न तु क्षीयन्ति ते धर्माः श्रद्दधानैः प्रयोजिताः
इदं च परमं गुह्यं सरहस्यं निबोधत ।
श्राद्धकल्पे च दैवे च तैर्थिके पर्वणीषु च १२
रजस्वला च या नारी श्वित्रिकाऽपुत्रिका च या
एताभिश्चक्षुषा दृष्टं हविर्नाश्नन्ति देवताः १३
पितरश्च न तुष्यन्ति वर्षाण्यपि त्रयोदश ।
शुक्लवासाः शुचिर्भूत्वा
ब्राह्मणान् स्वस्ति वाचयेत् ।
कीर्तयेद्धारतं चैव
तथा स्यादक्षयं हविः ॥ १४

धौम्य उवाच ।

भिन्नभाण्ड च खट्वां च कुक्कुटं शुनकं तथा ।
अप्रशस्तानि सर्वाणि यश्च वृक्षो गृहेरुहः ॥
भिन्नभाण्डे कलिं प्राहुः खट्वायां तु धनक्षयः ।
कुक्कुटे शुनके चैव हविर्नाश्नन्ति देवताः ।
वृक्षमूले ध्रुवं सत्त्वं तस्माद्वृक्षं न रोपयेत् ॥

जमदग्निरुवाच ।

यो यजेदश्वमेधेन वाजपेयशतेन ह ।
अवाक्शिरा वा लम्बेत सत्रं वा स्फीतमाहरेत्
न यस्य हृदय शुद्ध नरकं स ध्रुवं व्रजेत् ।
तुल्यं यज्ञश्च सत्य च हृदयस्य च शुद्धता १८
शुद्धेन मनसा दत्त्वा सकुप्रस्थं द्विजातये ।
ब्रह्मलोकमनुप्राप्तः पर्याप्त तन्निदर्शनम् ॥ १९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि देवरहस्ये
सप्तविंशत्यधिकशततमोऽध्यायः ॥ १२७ ॥



१२८

वायुरुवाच ।

किञ्चिद्धर्मं प्रवक्ष्यामि मानुषाणां सुखावहम्
सरहस्याश्च ये दोषास्तान् शृणुध्वं समाहिताः
अग्निकार्यं च कर्तव्यं परमान्नेन भोजनम् ।
दीपकश्चापि कर्तव्यः पितृणां सतिलोदकः २
एतेन विधिना मर्त्यः
श्रद्दधानः समाहितः ।
चतुरो वार्षिकान् मासान्
यो ददाति तिलोदकम् ॥ ३
भोजन च यथाशक्त्या ब्राह्मणे वेदपारगे ।
पशुबन्धशतस्येह फलं प्राप्नोति पुष्कलम् ४
इद चैवापर गुह्यमप्रशस्तं निबोधत ।
अग्नेस्तु वृषलो नेता हविर्मूढाश्च योषितः ॥ ५
मन्यते धर्म एवेति स चाधर्मेण लिप्यते ।
अग्नयस्तस्य कुप्यन्ति शूद्रयोनिं स गच्छति ६
पितरश्च न तुष्यन्ति सह देवैर्विशेषतः ।
प्रायश्चित्त तु यत्तत्र ब्रुवतस्तन्निबोध मे ॥ ७

करञ्जसुवर्चले वृक्षवल्लिविशेषौ ॥ ८ ॥ अपुत्रिकेति च्छेद ॥ १३ ॥ सत्त्वं वृश्चिकसर्पादि न रोपयेत् गृहे इति शेष ॥ १६ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तविंशत्यधिकशततमोऽध्याय ॥ १२७ ॥

१२८

किञ्चिदिति ॥ १ ॥ अग्नेरणीस्थस्य वा वैदिकस्य नेता देशान्तरप्रापको यदि योषित हविषा सोमाज्यपय-प्रभृतिना यज्ञावशिष्टेन इडादिस्थानीयेन मूढा स्युस्तर्हि तस्य दोष ॥ ५ ॥ प्रायश्चित्त च वक्ष्यामीति शेष ॥ ७ ॥

यत्कृत्वा तु नरः सम्यक् सुखी भवति विज्वरः
गवां मूत्रपुरीषेण पयसा च घृतेन च ॥ ८
अग्निकार्यं त्र्यहं कुर्यान्निराहारः समाहितः ।
ततः संवत्सरे पूर्णे प्रतिगृह्णन्ति देवताः ॥ ९
हृष्यन्ति पितरश्चास्य श्राद्धकाल उपस्थिते ।
एष ह्यधर्मो धर्मश्च सरहस्यः प्रकीर्तितः ॥ १०
मर्त्यानां स्वर्गकामानां प्रेत्य स्वर्गसुखावहः ११

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि देवरहस्ये
अष्टाविंशत्यधिकशततमोऽध्यायः ॥ १२८ ॥



१२९

लोमश उवाच ।
परदारेषु ये सक्ता अकृत्वा दारसग्रहम् ।
निराशाः पितरस्तेषा श्राद्धकाले भवन्ति वै
परदाररतिर्यश्च यश्च वन्ध्यामुपासते ।
ब्रह्मस्वं हरते यश्च समदोषा भवन्ति ते ॥ २
असंभाष्या भवन्त्येते पितृणां नात्र संशयः ।
देवताः पितरश्चैषां नाभिनन्दन्ति तद्धविः ३
तस्मात्परस्य वै दारांस्त्यजेद्वन्ध्यां च योषितं
ब्रह्मस्वं हि न हर्तव्यमात्मनो हितमिच्छता ४
श्रूयतां चापर गुह्यं रहस्यं धर्मसहितम् ।
श्रद्दधानेन कर्तव्यं गुरूणा वचनं सदा ॥ ५
द्वादश्यां पौर्णमास्यां च मासि मासि घृताक्षतं
ब्राह्मणेभ्यः प्रयच्छेत तस्य पुण्यं निबोधत ॥ ६
सोमश्च वर्धते तेन समुद्रश्च * महोदधिः ।
अश्वमेधचतुर्भागं फलं सृजति वासवः ॥ ७
दानेनैतेन तेजस्वी वीर्यवांश्च भवेन्नरः ।
प्रीतश्च भगवान् सोम इष्टान् कामान् प्रयच्छति
श्रूयता चापरो धर्मः सरहस्यो महाफलः ।
इद कलियुगं प्राप्य मनुष्याणां सुखावहः ॥ ९
कल्यमुत्थाय यो मर्त्यः स्नातः शुक्लेन वाससा
तिलपात्र प्रयच्छेत ब्राह्मणेभ्यः समाहितः १०
तिलोदकं च यो दद्यात्पितृणां मधुना सह ।
दीपकं कृसरं चैव श्रूयतां तस्य यत्फलम् ११
तिलपात्रे फलं प्राह भगवान् पाकशासनः ।
गोप्रदानं च यः कुर्याद्भूमिदानं च शाश्वतम्
अग्निष्टोम च यो यज्ञं यजेत बहुदक्षिणम् ।
तिलपात्रं सहैतेन सम मन्यन्ति देवताः ॥१३
तिलोदकं सदा श्राद्धे मन्यन्ते पितरोऽक्षयम्
दीपे च कृसरे चैव तुष्यन्तेऽस्य पितामहाः ॥
स्वर्गे च पितृलोके च पितृदेवाभिपूजितम् ।
एवमेतन्मयोद्दिष्टमृषिदृष्टं पुरातनम् ॥ १५

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि लोमशरहस्ये
ऊनत्रिंशदधिकशततमोऽध्यायः ॥ १२९ ॥



इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टाविंशत्याधिकशततमोऽध्याय ॥ १२८ ॥

१२९

परदारेष्विति ॥ १ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे ऊनत्रिंशदधिकशततमोऽध्याय ॥ १२९ ॥

* महान्त्युदकानि धीयन्तेऽस्मिन्निति। यद्वा महानामुत्सवानामुदधिरिव महोत्साहवाश्च भवति।

१३०

भीष्म उवाच ।

ततस्त्वृषिगणाः सर्वे पितरश्च सदेवताः ।
अरुन्धतीं तपोवृद्धामपृच्छन्त समाहिताः १
समानशीलां वीर्येण वसिष्ठस्य महात्मनः ।
त्वत्तो धर्मरहस्यानि श्रोतुमिच्छामहे वयम् ।
यत्ते गुह्यतमं भद्रे तत्प्रभाषितुमर्हसि ॥ २

अरुन्धत्युवाच ।

तपोवृद्धिर्मया प्राप्ता भवतां स्मरणेन वै ।
भवतां च प्रसादेन धर्मान्वक्ष्यामि शाश्वतान्
सगुह्यान्सरहस्यांश्च तान् शृणुध्वमशेषतः ।
श्रद्दधाने प्रयोक्तव्या यस्य शुद्ध तथा मनः॥ ४
अश्रद्दधानो मानी च ब्रह्महा गुरुतल्पगः ।
असंभाष्या हि चत्वारो नैषां धर्मं प्रकाशयेत्
अहन्यहनि यो दद्यात्कपिलां द्वादशीः समाः
मासि मासि च सत्रेण यो यजेत सदा नरः६
गवां शतसहस्रं च यो दद्याज्ज्येष्ठपुष्करे ।
न तद्धर्मफलं तुल्यमतिथिर्यस्य तुष्यति ॥ ७
श्रूयतां चापरो धर्मो मनुष्याणां सुखावहः ।
श्रद्दधानेन कर्तव्यः सहस्रयो महाफलः ॥ ८
कल्यमुत्थाय गोमध्ये गृह्य दर्भान्सहोदकान् ।
निषिञ्चेत गवां शृङ्गे मस्तकेन च तज्जलम् ९
प्रतीच्छेत निराहारस्तस्य धर्मफलं शृणु ।
श्रूयन्ते यानि तीर्थानि त्रिषु लोकेषु कानिचित्
सिद्धचारणजुष्टानि सेवितानि महर्षिभिः ।
अभिषेकः समस्तेषां गवां शृङ्गोदकस्य च ॥ ११
साधु साध्विति चोद्दिष्टं दैवतैः पितृभिस्तथा
भूतैश्चैव सुसंहृष्टैः पूजिता साऽप्यरुन्धती १२

पितामह उवाच ।

अहो धर्मो महाभागे सरहस्य उदाहृतः ।
वरं ददामि ते धन्ये तपस्ते वर्धतां सदा ॥१३

यम उवाच ।

रमणीया कथा दिव्या युष्मत्तो या मया श्रुता
श्रूयतां चित्रगुप्तस्य भाषितं मम च प्रियम् १४
रहस्यं धर्मसंयुक्तं शक्यं श्रोतु महर्षिभिः ।
श्रद्दधानेन मर्त्येन आत्मनो हितमिच्छता॥ १५
न हि पुण्यं तथा पापं कृतं किञ्चिद्विनश्यति ।
पर्वकाले च यत्किञ्चिदादित्यं चाधितिष्ठति॥
प्रेतलोकं गते मर्त्ये तत्तत्सर्वं विभावसुः ।
प्रतिजानाति पुण्यात्मा तच्च तत्रोपयुज्यते १७
किञ्चिद्धर्मं प्रवक्ष्यामि चित्रगुप्तमतं शुभम् ।
पानीयं चैव दीपं च दातव्यं सततं तथा १८
उपानहौ च च्छत्रं च कपिला च यथातथम् ।
पुष्करे कपिला देया ब्राह्मणे वेदपारगे ॥ १९
अग्निहोत्रं च यत्नेन सर्वशः प्रतिपालयेत् ।
अयं चैवापरो धर्मश्चित्रगुप्तेन भाषितः ॥ २०
फलमस्य पृथक्त्वेन श्रोतुमर्हन्ति सत्तमाः ।
प्रलयं सर्वभूतैस्तु गन्तव्यं कालपर्ययात् ॥ २१
तत्र दुर्गमनुप्राप्ताः क्षुत्तृष्णापरिपीडिताः ।
दह्यमाना विपच्यन्ते न तत्रास्ति पलायनम् ॥
अन्धकारं तमो घोरं प्रविशन्त्यल्पबुद्धयः ।
तत्र धर्मं प्रवक्ष्यामि येन दुर्गाणि सन्तरेत्२३
अल्पव्ययं महार्थं च प्रेत्य चैव सुखोदयम् ।
पानीयस्य गुणा दिव्याः प्रेतलोके विशेषतः॥
तत्र पुण्योदका नाम नदी तेषां विधीयते ।
अक्षयं सलिलं तत्र शीतलं ह्यमृतोपमम् ॥ २५
स तत्र तोयं पिबति पानीयं यः प्रयच्छति ।
प्रदीपस्य प्रदानेन श्रूयतां गुणविस्तरः ॥ २६
तमोन्धकारं नियतं दीपदो न प्रपश्यति ।
प्रभा चास्य प्रयच्छन्ति सोमभास्करपावकाः
देवताश्चानुमन्यन्ते विमलाः सर्वतो दिशः ।
द्योतते च यथाऽऽदित्यः प्रेतलोकगतो नरः ॥
तस्माद्दीपः प्रदातव्यः पानीयं च विशेषतः ।
कपिलां ये प्रयच्छन्ति ब्राह्मणे वेदपारगे २९
पुष्करे च विशेषेण श्रूयतां तस्य यत्फलम् ।
गोशतं सवृषं तेन दत्तं भवति शाश्वतम् ॥ ३०
पापं कर्म च यत्किञ्चिद्ब्रह्महत्यासमं भवेत् ।
शोधयेत्कपिला ह्येका प्रदत्तं गोशतं यथा ३१
तस्मात्तु कपिला देया कौमुद्यां ज्येष्ठपुष्करे ।
न तेषां विषमं किञ्चिन्न दुःखं न च कण्टकाः
उपानहौ च यो दद्यात्पात्रभूते द्विजोत्तमे ।
छत्रदाने सुखां छायां लभते परलोकगः ॥ ३३

१३०

तत इति ॥ १ ॥ प्रयोक्तव्या धर्मा वाच्या ॥ ४ ॥ प्रतिजानाति अर्पयति उपयुज्यते पुण्यपापकर्ता ॥ १७ ॥ प्रकृष्टो लय· अदर्शनं यस्मात्तत्प्रलयं मरणम् ॥२१॥

न हि दत्तस्य दानस्य नाशोऽस्तीह कदाचन ।
चित्रगुप्तमतं श्रुत्वा हृष्टरोमा विभावसुः ॥ ३४
उवाच देवताः सर्वाः पितॄंश्चैव महाद्युतिः ।
श्रुतं हि चित्रगुप्तस्य धर्मगुह्यं महात्मनः ॥ ३५
श्रद्दधानाश्च ये मर्त्या ब्राह्मणेषु महात्मसु ।
दानमेतत्प्रयच्छन्ति न तेषां विद्यते भयम् ३६
धर्मदोषास्त्विमे पञ्च येषां नास्तीह निष्कृतिः
असभाष्या अनाचारा वर्जनीया नराधमाः ॥
ब्रह्महा चैव गोघ्नश्च परदाररतश्च यः ।
अश्रद्दधानश्च नरः स्त्रियं यश्चोपजीवति ॥ ३८
प्रेतलोकगता ह्येते नरके पापकर्मिणः ।
पच्यन्ते वै यथा मीनाः पूयशोणितभोजनाः
असंभाष्याः पितॄणां च देवानां चैव पञ्च ते ।
स्नातकानां च विप्राणां ये चान्ये च तपोधनाः

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि अरुन्धतीचित्रगुप्तरहस्ये त्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥



१३१

भीष्म उवाच ।
ततः सर्वे महाभागा देवाश्च पितरश्च ह ।
ऋषयश्च महाभागाः प्रमथान्वाक्यमब्रुवन् ॥ १
भवन्तो वै महाभागा अपरोक्षनिशाचराः ।
उच्छिष्टानशुचीन्क्षुद्रान्कथं हिंसथ मानवान्
के च स्मृताः प्रतीघाता येन मर्त्यान्न हिंसथ ।
रक्षोघ्नानि च कानि स्युर्यैर्गृहेषु प्रणश्यथ ।
श्रोतुमिच्छाम युष्माकं सर्वमेतन्निशाचराः ३
प्रमथा ऊचुः ।
मैथुनेन सदोच्छिष्टाः कृते चैवाधरोत्तरे ।
मोहान्मांसानि खादेत वृक्षमूले च यः स्वपेत्
आमिषं शीर्षतो यस्य पादतो यश्च संविशेत् ।
तत उच्छिष्टकाः सर्वे बहुच्छिद्राश्च मानवाः ५
उदके चाप्यमेध्यानि श्लेष्माणं च प्रमुञ्चति ।
एते भक्ष्याश्च वध्याश्च मानुषा नात्र संशयः ६
एवं शीलसमाचारान्धर्षयामो हि मानवान् ।
श्रूयता च प्रतीघातान्यैर्न शक्नुम हिंसितुम् ७
गोरोचनासमालम्भो वचाहस्तश्च यो भवेत् ।
घृताघृतं च यो दद्यान्मस्तके तत्परायणः ८
ये च मांसं न खादन्ति तान्न शक्नुम हिंसितुम्
यस्य चाग्निर्गृहे नित्यं दिवारात्रौ च दीप्यते
तरक्षोश्चर्म दंष्ट्राश्च तथैव गिरिकच्छपः ।
आज्यधूमो बिडालश्च च्छागः कृष्णोऽथ पिङ्गलः
येषामेतानि तिष्ठन्ति गृहेषु गृहमेधिनाम् ।
तान्यधृष्याण्यगाराणि पिशिताशैः सुदारुणैः
लोकानस्मद्विधा ये च विचरन्ति यथासुखम्
तस्मादेतानि गेहेषु रक्षोघ्नानि विशाम्पते ।
एतद्वः कथितं सर्वं यत्र वः संशयो महान् १२

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि प्रमथरहस्ये एकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥



इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्रिंशदधिकशततमोऽध्यायः ॥ १३० ॥

१३१

ततः सर्वे इति ॥ १ ॥ अधरोत्तरे वान्ते अधर उत्तर श्रेष्ठो यत्र श्रेष्ठस्यावमाने कृते सति ॥ ५ ॥ आमिष मास शिरसि दधान पादत शय्याया पादस्थाने शिरः कृत्वा य सविशेत् ॥ ६ ॥ तरक्षोर्व्याघ्रस्य गिरिकच्छपः पर्वतदरीशायी स्थलकूर्म ॥ ११ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकत्रिंशदधिकशततमोऽध्यायः ॥ १३१ ॥

१३२

भीष्म उवाच ।

ततः पद्मप्रतीकाशः पद्मोद्भूतः पितामहः ।
उवाच वचनं देवान्वासवं च शचीपतिम् १
अयं महाबलो नागो रसातलचरो बली ।
तेजस्वी रेणुको नाम महासत्त्वपराक्रमः ॥ २
अतितेजस्विनः सर्वे महावीर्या महागजाः ।
धारयन्ति महीं कृत्स्नां सशैलवनकाननाम् ३
भवद्भिः समनुज्ञातो रेणुकस्तान्महागजान् ।
धर्मगुह्यानि सर्वाणि गत्वा पृच्छतु तत्र वै ४
पितामहवचः श्रुत्वा ते देवा रेणुकं तदा ।
प्रेषयामासुरव्यग्रा यत्र ते धरणीधराः ॥ ५

रेणुक उवाच ।

अनुज्ञातोऽस्मि देवैश्च पितृभिश्च महाबलाः
धर्मगुह्यानि युष्माकं श्रोतुमिच्छामि तत्त्वतः
कथयध्वं महाभागा यद्वस्तत्त्वं मनीषितम् ६

दिग्गजा ऊचुः ।

कार्तिके मासि चाश्लेषा बहुलस्याष्टमी शिवा
तेन नक्षत्रयोगेन यो ददाति गुडौदनम् ॥ ७
इमं मन्त्रं जपञ्छ्राद्धे यताहारो ह्यकोपनः ।
बलदेवप्रभृतयो ये नागा बलवत्तराः ॥ ८
अनन्ता ह्यक्षया नित्यं भोगिनः सुमहाबलाः
तेषां कुलोद्भवा ये च महाभूता भुजङ्गमाः ९
ते मे बलिं प्रयच्छन्तु बलतेजोभिवृद्धये ।
यदा नारायणः श्रीमानुज्जहार वसुंधराम् १०
तद्बल तस्य देवस्य धरामुद्धरतस्तथा ।
एवमुक्त्वा बलिं तत्र वल्मीके तु निवेदयेत्
गजेन्द्रकुसुमाकीर्णं नीलवस्त्रानुलेपनम् ।
निर्वपेत्तं तु वल्मीके अस्तं याते दिवाकरे १२
एव तुष्टास्ततः सर्वे अधस्ताद्भारपीडिताः ।
श्रमं त नावबुध्यामो धारयन्तो वसुधराम् ॥
एव मन्यामहे सर्वे भारार्ता निरपेक्षिणः ।
ब्राह्मणः क्षत्रियो वैश्य. शूद्रो वा यद्युपोषितः
एवं संवत्सर कृत्वा दानं बहुफलं लभेत् ।
वल्मीके बलिमादाय तन्नो बहुफलं मतम् १५
ये च नागा महावीर्यास्त्रिषु लोकेषु कृत्स्नशः
कृतातिथ्या भवेयुस्ते शतं वर्षाणि तत्त्वतः १६
दिग्गजानां च तच्छ्रुत्वा देवताः पितरस्तथा
ऋषयश्च महाभागाः पूजयन्ति स्म रेणुकम्१७

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि दिग्गजानां रहस्ये द्वात्रिंशदधिकशततमोऽध्यायः ॥ १३२ ॥

१३३

महेश्वर उवाच ।

सारमुद्धृत्य युष्माभिः साधुधर्म उदाहृतः ।
धर्मगुह्यमिदं मत्तः शृणुध्वं सर्व एव ह ॥ १
येषां धर्माश्रिता बुद्धिः श्रद्दधानाश्च ये नराः ।
तेषां स्यादुपदेष्टव्यः सरहस्यो महाफलः ॥ २
निरुद्विग्नस्तु यो दद्यान्मासमेकं गवाह्निकम् ।
एकभक्तं तथाऽश्नीयाच्छ्रूयतां तस्य यत्फलम्
इमा गावो महाभागाः पवित्र परमं स्मृताः ।
श्रीर्लोकान्धारयन्ति स्म सदेवासुरमानुषान्
तासु चैव महापुण्यं शुश्रूषा च महाफलम् ।
अहन्यहनि धर्मेण युज्यते वै गवाह्निकः ॥ ५
मया ह्येता ह्यनुज्ञाताः पूर्वमासन्कृते युगे ।
ततोऽहमनुनीतो वै ब्रह्मणा पद्मयोनिना ॥ ६
तस्माद्व्रजस्थानगतस्तिष्ठत्युपरि मे वृषः ।
रमेऽहं सह गोभिश्च तस्मात्पूज्याः सदैव ताः

१३२

तत इति ॥ १ ॥ नागो गज ॥ २ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्वात्रिंशदधिकशततमोऽध्याय ॥ १३२ ॥

१३३

सारमिति ॥ १ ॥

महाप्रभावा वरदा वरं दद्युरुपासिताः । ता गावोऽस्यानुमन्यन्ते सर्वकर्मसु यत्फलम् ॥
तस्य तत्र चतुर्भागो यो ददाति गवाह्निकम् ॥ ९
इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि महादेवरहस्ये
त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥ १३३ ॥



१३४

स्कन्द उवाच ।
ममाप्यनुमतो धर्मस्तं शृणुध्वं समाहिताः ।
नीलषण्डस्य शृंगाभ्यां गृहीत्वा मृत्तिकां तु यः
अभिषेकं त्र्यहं कुर्यात्तस्य धर्मं निबोधत ।
शोधयेदशुभं सर्वमाधिपत्यं परत्र च ।
यावच्च जायते मल्यंस्तावच्छूरो भविष्यति ।
इदं चाप्यपरं गुह्यं सरहस्यं निबोधत ॥ ३
प्रगृह्यौदुम्बरं पात्र पक्वान्न मधुना सह ।
सोमस्योत्तिष्ठमानस्य पौर्णमास्यां बलिं हरेत्
तस्य धर्मफलं नित्यं
श्रद्दधाना निबोधत ।
साध्या रुद्रास्तथाऽऽदित्या
विश्वेदेवास्तथाश्विनौ ॥ ५
मरुतो वसवश्चैव प्रतिगृह्णन्ति तं बलिम् ।
सोमश्च वर्धते तेन समुद्रश्च महोदधिः ॥ ६
एष धर्मो मयोद्दिष्टः सरहस्यः सुखावहः ॥ ७
विष्णुरुवाच ।
धर्मगुह्यानि सर्वाणि देवतानां महात्मनाम्
ऋषीणां चैव गुह्यानि यः पठेदाह्निकं सदा ८
शृणुयाद्वाऽनसूयुर्यः श्रद्दधानः समाहितः ।
नास्य विघ्नः प्रभवति भय चास्य न विद्यते ९
ये च धर्माः शुभाः पुण्याः सरहस्या उदाहृताः
तेषां धर्मफलं तस्य यः पठेत जितेन्द्रियः १०
नास्य पापं प्रभवति न च पापेन लिप्यते ।
पठेद्वा श्रावयेद्वापि श्रुत्वा वा लभते फलम् ॥
भुञ्जते पितरो देवा हव्यं कव्यमथाक्षयम् ।
श्रावयंश्चापि विप्रेन्द्रान् पर्वसु प्रयतो नरः १२
ऋषीणा देवताना च पितॄणा चैव नित्यदा ।
भवत्यभिमतः श्रीमान् धर्मेषु प्रयतः सदा १३
कृत्वापि पापकं कर्म महापातकवर्जितम् ।
रहस्यधर्मं श्रुत्वेमं सर्वपापैः प्रमुच्यते ॥ १४
भीष्म उवाच ।
एतद्धर्मरहस्यं वै देवतानां नराधिप ।
व्यासोद्दिष्ट मया प्रोक्तं सर्वदेवनमस्कृतम् १५
पृथिवी रत्नसंपूर्णा ज्ञानं चेदमनुत्तमम् ।
इदमेव ततः श्राव्यमिति मन्येत धर्मवित् १६
नाश्रद्दधानाय न नास्तिकाय
न नष्टधर्माय न निर्घृणाय ।
न हेतुदुष्टाय गुरुद्विषे वा
नानात्मभूताय निवेद्यमेतत् ॥ १७
इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि स्कन्ददेवरहस्ये
चतुस्त्रिंशदधिकशततमोऽध्यायः ॥ १३४ ॥



इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभाव-दीपे त्रयस्त्रिंशदधिकशततमोऽध्याय ॥ १३३ ॥

१३४

ममापीति ॥ १ ॥ इति श्रीमहाभारते अनुशासन. पर्वणि नैलकण्ठीये भारतभावदीपे चतुस्त्रिंशदधिकशततमोऽ-ध्याय ॥ १३४ ॥

* मनु० १८

१३५

युधिष्ठिर उवाच ।
के भोज्या ब्राह्मणस्येह के भोज्याः क्षत्रियस्य ह
तथा वैश्यस्य के भोज्याः के शूद्रस्य च भारत

भीष्म उवाच ।
ब्राह्मणा ब्राह्मणस्येह भोज्या ये चैव क्षत्रियाः
वैश्याश्चापि तथा भोज्याः शूद्राश्च परिवर्जिताः
ब्राह्मणाः क्षत्रिया वैश्या भोज्या वै क्षत्रियस्य ह
वर्जनीयास्तु वै शूद्राः सर्वभक्षा विकर्मिणः ३
वैश्यास्तु भोज्या विप्राणां क्षत्रियाणां तथैव च
नित्यान्नयो विविक्ताश्च चातुर्मास्यरताश्च ये ॥
शूद्राणामथ यो भुंक्ते स भुंक्ते पृथिवीमलम् ।
मलं नृणां स पिबति मलं भुंक्ते जनस्य च ॥
शूद्राणां यस्तथा भुंक्ते स भुंक्ते पृथिवीमलम् ।
पृथिवीमलमश्नन्ति ये द्विजाः शूद्रभोजिनः ॥ ६
शूद्रस्य कर्मनिष्ठायां विकर्मस्थोऽपि पच्यते ।
ब्राह्मणः क्षत्रियो वैश्यो विकर्मस्थश्च पच्यते ७
स्वाध्यायनिरता विप्रास्तथा स्वस्त्ययने नृणाम्
रक्षणे क्षत्रियं प्राहुर्वैश्यं पुष्ट्यर्थमेव च ॥ ८
करोति कर्म यद्वैश्यस्तद्दत्त्वा ह्युपजीवति ।
कृषिगोरक्ष्यवाणिज्यमकृत्सा वैश्यकर्मणि ॥९
शूद्रकर्म तु यः कुर्यादवहाय स्वकर्म च ।
स विज्ञेयो यथा शूद्रो न च भोज्यः कदाचन
चिकित्सकः काण्डपृष्ठः पुराध्यक्षः पुरोहितः
सांवत्सरो वृथाध्यायी सर्वे ते शूद्रसंमिताः ॥
शूद्रकर्मस्वथैतेषु यो भुंक्ते निरपत्रपः ।
अभोज्यभोजनं भुक्त्वा भयं प्राप्नोति दारुणम्
कुलं वीर्यं च तेजश्च तिर्यग्योनित्वमेव च ।
स प्रयाति यथा श्वा वै निष्क्रियो धर्मवर्जितः
भुंक्ते चिकित्सकस्यान्नं तदन्नं च पुरीषवत् ।
पुंश्चल्यन्नं च मूत्रं स्यात्कारुकान्नं च शोणितम्
विद्योपजीविनोऽन्नं च यो भुंक्ते साधुसंमतः ।
तदप्यन्नं यथा शौद्रं तत्साधुः परिवर्जयेत् १५
वचनीयस्य यो भुंक्ते तमाहुः शोणितं ह्रदम् ।
पिशुनं भोजनं भुंक्ते ब्रह्महत्यासमं विदुः ॥ १६
असत्कृतमवज्ञातं न भोक्तव्यं कदाचन ॥ १७
व्याधिं च कुलक्षयं चैव क्षिप्रं प्राप्नोति ब्राह्मणः ।
नगरीरक्षिणो भुंक्ते श्वपचप्रवणो भवेत् ॥ १८
गोघ्ने च ब्राह्मणघ्ने च सुरापे गुरुतल्पगे ।
भुक्त्वान्नं जायते विप्रो रक्षसां कुलवर्धनः ॥
न्यासापहारिणो भुक्त्वा कृतघ्ने क्लीबवर्तिनि
जायते शबरावासे मध्यदेशबहिष्कृते ॥ २०
अभोज्याश्चैव भोज्याश्च मया प्रोक्ता यथाविधि
किमन्यदद्य कौन्तेय मत्तस्त्वं श्रोतुमिच्छसि ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि भोज्याभोज्यान्नकथनं नाम पञ्चत्रिंशदधिकशततमोऽध्यायः ॥ १३५ ॥

१३६

युधिष्ठिर उवाच ।
उक्तास्तु भवता भोज्यास्तथाभोज्याश्च सर्वशः
अत्र मे प्रश्नसन्देहस्तन्मे वद पितामह ॥ १
ब्राह्मणानां विशेषेण हव्यकव्यप्रतिग्रहे ।
नानाविधेषु भोज्येषु प्रायश्चित्तानि शंस मे २

भीष्म उवाच ।
हन्त वक्ष्यामि ते राजन् ब्राह्मणानां महात्मनां
प्रतिग्रहेषु भोज्ये च मुच्यते येन पाप्मनः ॥ ३
घृतप्रतिग्रहे चैव सावित्री समिदाहुतिः ।
तिलप्रतिग्रहे चैव सममेतद्युधिष्ठिर ॥ ४

१३५

के भोज्याः भोज्यान्ना ॥ १ ॥ वैश्या भोज्या भोजनीया ॥ ४ ॥ न केवल शूद्रान्नमेव वर्ज्यं किन्तु शूद्रस्य कर्मानिष्ठाया सेवाया वर्तमानो विकर्मस्थो विशिष्टकर्मस्थ सन्ध्यावन्दनादियुक्तोऽपि पच्यते नरके इति शेषः ॥ ७ ॥ काण्ड-पृष्ठ. अधम ॥ ११ ॥ पिशुनं तत्सम्बन्धि ॥ १६ ॥ नगरीं रक्षति तस्य ॥ १८ ॥ इति श्रीमहाभारते अनुशासन-पर्वणि नैलकण्ठीये भारतभावदीपे पञ्चत्रिंशदधिकशततमोऽ-ध्याय ॥ १३५ ॥

१३६

उक्ता इति ॥ १ ॥ सावित्री समिदाहुतिरिति सर्वत्र सम्बध्यते ॥ ४ ॥

मांसप्रतिग्रहे चैव मधुनो लवणस्य च ।
आदित्योदयनं स्थित्वा पूतो भवति ब्राह्मणः ५
काञ्चनं प्रतिगृह्याथ जपमानो गुरुश्रुतिम् ।
कृष्णायसं च विवृतं धारयन् मुच्यते द्विजः
एवं प्रतिगृहीतेऽथ धने वस्त्रे तथा स्त्रियाम् ।
एवमेव नरश्रेष्ठ सुवर्णस्य प्रतिग्रहे ॥ ७
अन्नप्रतिग्रहे चैव पायसेक्षुरसे तथा ।
इक्षुतैलपवित्राणां त्रिसन्ध्येऽप्सु निमज्जनम्
व्रीहौ पुष्पे फले चैव जले पिष्टमये तथा ।
यावके दधिदुग्धे च सावित्रीं शतशोन्विताम्
उपानहौ च च्छत्रं च प्रतिगृह्यौर्ध्वदेहिके ।
जपेच्छतं समायुक्तस्तेन मुच्यते पाप्मना १०
क्षेत्रप्रतिग्रहे चैव ग्रहसूतकयोस्तथा ।
त्रीणि रात्राण्युपोषित्वा तेन पापाद्विमुच्यते
कृष्णपक्षे तु यः श्राद्धं पितॄणामश्नुते द्विजः ।
अन्नमेतदहोरात्रात्पूतो भवति ब्राह्मणः ॥ १२
न च सन्ध्यामुपासीत न च जाप्यं प्रवर्तयेत्
न सङ्किरेत्तदन्न च ततः पूयेत ब्राह्मणः ॥ १३
इत्यर्थमपराह्णे तु पितॄणां श्राद्धमुच्यते ।
यथोक्तानां यदश्नीयुर्ब्राह्मणाः पूर्वकेतिताः १४
मृतकस्य तृतीयाहे ब्राह्मणो योऽन्नमश्नुते ।
स त्रिवेलं समुन्मज्य द्वादशाहेन शुध्यति १५
द्वादशाहे व्यतीते तु कृतशौचो विशेषतः ।
ब्राह्मणेभ्यो हविर्दत्वा मुच्यते तेन पाप्मना १६
मृतस्य दशरात्रेण प्रायश्चित्तानि दापयेत् ।
सावित्री रैवतीमिष्टिं कूष्माण्डमघमर्षणम् १७
मृतकस्य त्रिरात्रे यः समुद्दिष्टे समश्नुते ।
स्नात्वा त्रिषवणं स्नात्वा पूतो भवति ब्राह्मणः१८
सिद्धिमाप्नोति विपुलामापदं चैव नाप्नुयात्१९
यस्तु शूद्रैः समश्नीयाद्ब्राह्मणोप्येकभोजने ।
अशौचं विधिवत्तस्य शौचमत्र विधीयते २०
यस्तु वैश्यैः सहाश्नीयाद्ब्राह्मणोऽप्येकभोजने ।
स वै त्रिरात्रं दीक्षित्वा मुच्यते तेन कर्मणा॥
क्षत्रियैः सह योऽश्नीयाद्ब्राह्मणोऽप्येकभोजने ।
आप्लुतः सह वासोभिस्तेन मुच्येत पाप्मना॥
शूद्रस्य तु कुलं हन्ति वैश्यस्य पशुबान्धवान्
क्षत्रियस्य श्रियं हन्ति ब्राह्मणस्य सुवर्चसम् ॥
प्रायश्चित्तं च शान्तिं च जुहुयात्तेन मुच्यते ।
सावित्रीं रैवतीमिष्टिं कूष्माण्डमघमर्षणम्२४
तथोच्छिष्टमथान्योन्यं संप्राशेन्नात्र संशयः ।
रोचना विरजा रात्रिर्मङ्गलालभनानि च ॥२५

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि प्रायश्चित्तविधिर्नाम षट्त्रिंशदधिकशततमोऽध्यायः ॥ १३६ ॥



१३७

युधिष्ठिर उवाच ।
दानेन वर्ततेत्याह तपसा चैव भारत ।
तदेतन्मे मनोदुःखं व्यपोह त्वं पितामह ।
किंस्वित्पृथिव्या ह्येतन्मे भवाञ्छंसितुमर्हति

आदित्योदयनं तत्पर्यन्तं स्थित्वा ॥ ५ ॥ विवृत लोकप्रत्यक्ष धारयन् ॥ ६ ॥ गृहसूतकयो कारागारस्थाशौचवतो ॥ ११ ॥ न च सन्ध्यामुपासीतेत्यत्र अस्नात इति शष न सङ्किरेदिति पुनर्भोजनं न कुर्यादित्यर्थ ॥ १३ ॥ अश्नीयुरित्यर्थमिति सम्बन्धे अपराह्णे श्रुद्वोधात्सम्यगन्नमश्नन्वित्यर्थ । केतिता निमन्त्रिता ॥ १४ ॥ हवि अन्नम् ॥ १६ ॥ दशरात्रे दशरात्रावधि मृतस्याश्नत एवमेव प्रायश्चित्तानीत्यर्थ सावित्रीं । जपन् रैवतीमिति रैवत साम । इष्टिं पवित्रेष्टिं कूष्माण्डं यद्देवा देवहेडनमित्यनुवाकपञ्चक अघमर्षण जले मज्जश्च दशप्रणवसंयुक्तगायत्र्याः ऋतञ्चेति तृचस्य वा त्रिर्जप प्रायश्चित्तानीति बहुवचनात्सर्वेषा समुच्चय ॥ १७ ॥ अशौचं प्रायाश्चित्ताभाव एव ॥ २० ॥ विरजा दूर्वा रात्रिर्हरिद्रेति विश्वः ॥२५॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षट्त्रिंशदधिकशततमोऽध्याय ॥ १३६ ॥

१३७

दानतपसोर्मध्ये पृथिव्या किं श्रेष्ठमिति पृच्छति–**दानेनेति** सार्धेन वर्तते स्वर्गे इति शेष सन्धिरार्ष ॥ १ ॥

भीष्म उवाच ।

शृणु यैर्धर्मनिरतैस्तपसा भावितात्मभिः ।
लोका ह्यसंशयं प्राप्ता दानपुण्यरतैर्नृपैः ॥ २
सत्कृतश्च तथाऽऽत्रेयः शिष्येभ्यो ब्रह्म निर्गुणम्
उपदिश्य तदा राजन् गतो लोकाननुत्तमान्
शिबिरौशीनरः प्राणान् प्रियस्य तनयस्य च
ब्राह्मणार्थमुपाकृत्य नाकपृष्ठमितो गतः ॥ ४
प्रतर्दनः काशिपतिः प्रदाय तनयं स्वकम् ।
ब्राह्मणायातुलां कीर्तिमिह चामुत्र चाश्नुते ॥ ५
रन्तिदेवश्च सांकृत्यो वसिष्ठाय महात्मने ।
अर्घ्यं प्रदाय विधिवल्लेभे लोकाननुत्तमान् ६
दिव्यं शतशलाकं च यज्ञार्थं काञ्चनं शुभम् ।
छत्रं देवावृधो दत्त्वा ब्राह्मणायास्थितो दिवम्
भगवानम्बरीषश्च ब्राह्मणायामितौजसे ।
प्रदाय सकलं राष्ट्रं सुरलोकमवाप्तवान् ॥ ८
सावित्रः कुण्डलं दिव्यं यानं च जनमेजयः ।
ब्राह्मणाय च गा दत्त्वा गतो लोकाननुत्तमान्
वृषादर्भिश्च राजर्षी रत्नानि विविधानि च ।
रम्यांश्चावसथान्दत्त्वा द्विजेभ्यो दिवमागतः
निमिराष्ट्रं च वैदर्भिः कन्यां दत्त्वा महात्मने ।
अगस्त्याय गतः स्वर्गं सपुत्रपशुबान्धवः ॥ ११

जामदग्न्यश्च विप्राय
भूमिं दत्त्वा महायशाः ।
रामोऽक्षयांस्तथा लोकान्
जगाम मनसोऽधिकान् ॥ १२
अवर्षति च पर्जन्ये
सर्वभूतानि देवराट् ।
वसिष्ठो जीवयामास
येन यातोऽक्षया गतिम् ॥ १३

रामो दाशरथिश्चैव हुत्वा यज्ञेषु वै वसु ।
स गतो ह्यक्षयान् लोकान्यस्य लोके महद्यशः
कक्षसेनश्च राजर्षिर्वसिष्ठाय महात्मने ।
न्यासं यथावत्संन्यस्य जगाम सुमहायशाः ॥
करंधमस्य पौत्रस्तु मरुत्तोऽविक्षितः सुतः ।
कन्यामाङ्गिरसे दत्त्वा दिवमाशु जगाम सः ॥
ब्रह्मदत्तश्च पाञ्चाल्यो राजा धर्मभृतां वरः ।
निधिं शङ्खमनुज्ञाप्य जगाम परमां गतिम् १७
राजा मित्रसहश्चैव वसिष्ठाय महात्मने ।
मदयन्तीं प्रियां भार्यां दत्त्वा च त्रिदिवं गतः
मनोः पुत्रश्च सुद्युम्नो लिखिताय महात्मने ।
दण्डमुधृत्य धर्मेण गतो लोकाननुत्तमान् १९
सहस्रचित्यो राजर्षिः प्राणानिष्टान्महायशाः ।
ब्राह्मणार्थे परित्यज्य गतो लोकाननुत्तमान् ॥
सर्वकामैश्च संपूर्णं दत्त्वा वेश्म हिरण्मयम् ।
मौद्गल्याय गतः स्वर्गं शतद्युम्नो महीपतिः २१
भक्ष्यभोज्यस्य च कृतान् +राशयः पर्वतोपमान्
शाण्डिल्याय पुरा दत्त्वा सुमन्युर्दिवमास्थितः
नाम्ना च द्युतिमान्नाम शाल्वराजो महाद्युतिः
दत्त्वा राज्यमृचीकाय गतो लोकाननुत्तमान्
मदिराश्वश्च राजर्षिर्दत्त्वा कन्यां सुमध्यमाम्
हिरण्यहस्ताय गतो लोकान्देवैरधिष्ठितान्
लोमपादश्च राजर्षिः शान्तां दत्त्वा सुतां प्रभुः
ऋष्यशृङ्गाय विपुलैः सर्वैः कामैरयुज्यत ॥ २५

कौत्साय दत्त्वा कन्यां तु
हंसीं नाम यशस्विनीम् ।
गतोऽक्षयानतो लोकान्
राजर्षिश्च भगीरथः ॥ २६

दत्त्वा शतसहस्रं तु गवां राजा भगीरथः ।
सवत्सानां कोहलाय गतो लोकाननुत्तमान् ॥
एते चान्ये च बहवो दानेन तपसा च ह ।
युधिष्ठिर गताः स्वर्गं निवर्तन्ते पुनः पुनः ॥२८
तेषां प्रतिष्ठिता कीर्तिर्यावत्स्थास्यति मेदिनी
गृहस्थैर्दानतपसा यैर्लोका वै विनिर्जिताः २९
शिष्टानां चरितं ह्येतत्कीर्तितं मे युधिष्ठिर ।
दानयज्ञप्रजासर्गैरेते हि दिवमास्थिताः ३०
दत्त्वा तु सततं तेऽस्तु कौरवाणां धुरन्धर ।
दानयज्ञक्रियायुक्ता बुद्धिर्धर्मोपचायिनी ३१
यत्र ते नृपशार्दूल सन्देहो वै भविष्यति ।
श्वः प्रभाते हि वक्ष्यामि सध्या हि समुपस्थिता

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि सप्तत्रिंशदधिकशततमोऽध्यायः ॥१३७॥

तयोर्दानमेव प्रशंसति-शृण्वित्यादिना ॥२॥ सावित्र कर्ण ॥९॥मनसो मन सङ्कल्पादप्यधिकान् ॥१२॥ देवराट् भूदेवराट् वसिष्ठ· ॥ १३ ॥ न्यासं दानरूपेण स्थापनम् ॥१५॥ अनुज्ञाप्य दत्वा॥१७॥दण्डं चोरयोग्यं हस्तच्छेदरूपम् ॥१९॥

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तत्रिंशदधिकशततमोऽध्याय ॥ १३७ ॥

+ राशीनित्यर्थ । * वर्तत इति शेषः ।

१३८

युधिष्ठिर उवाच ।

श्रुतं मे भवतस्तात सत्यव्रतपराक्रम ।
दानधर्मेण महता ये प्राप्तास्त्रिदिवं नृपाः ॥ १
इमांस्तु श्रोतुमिच्छामि धर्मान्धर्मभृतां वर ।
दानं कतिविधं देयं किं तस्य च फलं लभेत २
कथं केभ्यश्च धर्म्यं च दानं दातव्यमिष्यते ।
कैः कारणैः कतिविधं श्रोतुमिच्छामि तत्त्वतः

भीष्म उवाच ।

शृणु तत्त्वेन कौन्तेय दानं प्रति ममानघ ।
यथा दान प्रदातव्यं सर्ववर्णेषु भारत ॥ ४
धर्मादर्थाद्भयात्कामात्कारुण्यादिति भारत ।
दान पञ्चविधं ज्ञेयं कारणैर्यैर्निबोध तत् ॥ ५
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ।
इति दानं प्रदातव्य ब्राह्मणेभ्योऽनसूयता ॥ ६
ददाति वा दास्यति वा मह्यं दत्तमनेन वा ।
इत्यर्थिभ्यो निशम्यैव सर्वं दातव्यमर्थिने ॥ ७
नास्याहं न मदीयोऽयं पापं कुर्याद्विमानितः ।
इति दद्याद्भयादेव दृढं मूढाय पण्डितः ॥ ८
प्रियो मेऽयं प्रियोस्याहमिति संप्रेक्ष्य बुद्धिमान्
वयस्यायैवमाक्लिष्टं दानं दद्यादतन्द्रितः ॥ ९
दीनश्च याचते चायमल्पेनापि हि तुष्यति ।
इति दद्याद्दरिद्राय कारुण्यादिति सर्वथा १०
इति पञ्चविधं दानं पुण्यकीर्तिविवर्धनम् ।
यथाशक्त्या प्रदातव्यमेवमाह प्रजापतिः ११

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि
अष्टत्रिंशदधिकशततमोऽध्यायः ॥ १३८ ॥



१३९

युधिष्ठिर उवाच ।

पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
आगमैर्बहुभिः स्फीतो भवान्नः प्रवरे कुले १
त्वत्तो धर्मार्थसयुक्तमायत्यां च सुखोदयम् ।
आश्चर्यभूत लोकस्य श्रोतुमिच्छाम्यरिन्दम २
अयं च कालः संप्राप्तो दुर्लभो ज्ञातिबान्धवैः
शास्ता च न हि नः कश्चित्त्वामृते पुरुषर्षभ ३
यदि तेऽहमनुग्राह्यो भ्रातृभिः सहितोऽनघ ।
वक्तुमर्हसि नः प्रश्नं यत्त्वां पृच्छामि पार्थिव ४
अयं नारायणः श्रीमान् सर्वपार्थिवसंमतः ।
भवन्तं बहुमानेन प्रश्रयेण च सेवते ॥ ५
अस्य चैव समक्षं त्वं पार्थिवानां च सर्वशः ।
भ्रातॄणां च प्रियार्थं मे स्नेहाद्भाषितुमर्हसि ॥ ६

वैशम्पायन उवाच ।

तस्य तद्वचनं श्रुत्वा स्नेहादागतसंभ्रमः ।
भीष्मो भागीरथीपुत्र इदं वचनमब्रवीत् ॥ ७

भीष्म उवाच ।

अह ते कथयिष्यामि कथामतिमनोहराम् ।
अस्य विष्णोः पुरा राजन्प्रभावो यो मया श्रुतः
यश्च गोवृषभाङ्कस्य प्रभावस्तं च मे शृणु ।
रुद्राण्याः संशयो यश्च दम्पत्योस्तं च मे शृणु
व्रतं चचार धर्मात्मा कृष्णो द्वादशवार्षिकम् ।
दीक्षितं चागतौ द्रष्टुमुभौ नारदपर्वतौ ॥ १०
कृष्णद्वैपायनश्चैव धौम्यश्च जपतां वरः ।
देवलः काश्यपश्चैव हस्तिकाश्यप एव च ११

१३८

श्रुतमिति ॥१॥ धर्मादानं व्याचष्टे—**इहेति** ॥ ६ ॥ अर्थादित्यस्य लक्षणमाह—**ददातीति** ॥७॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टत्रिंशदधिकशततमोऽध्याय ॥ १३८ ॥

१३९

पितामहेत्यध्यायद्वयं स्पष्टार्थं तस्य तात्पर्यं एक एव प्रभु पर्वतस्य दाहक उल्लासकश्च स एव वैष्णवैर्विष्णुरित्यधिगत पूर्वाध्याये। माहेश्वरैर्महेश्वर इत्युत्तराध्याये अत्रैव नेत्रे मे संवृते देवि त्वया बाल्यादनिन्दिते। नष्टालोकस्तदा लोकः क्षणेन समपद्यतेति महेश्वरवचनेन शिवमूर्तेर्ब्रह्माण्डस्य चाभेदो दर्शित· ॥ १ ॥ दम्पत्योः रुद्राणीरुद्रयोः तं संवादम् ॥९॥

अपरे चर्षयः सन्तो दीक्षादमसमन्विताः ।
शिष्यैरनुगताः सिद्धैर्देवकल्पैस्तपोधनैः १२
तेषामतिथिसत्कारमर्चनीयं कुलोचितम् ।
देवकीतनयः प्रीतो देवकल्पमकल्पयत् ॥ १३
हरितेषु सुवर्णेषु बार्हिष्केषु नवेषु च ।
उपोपविविशुः प्रीता विष्टरेषु महर्षयः ॥ १४
कथाश्चक्रुस्ततस्ते तु मधुरा धर्मसंहिताः ।
राजर्षीणां सुराणां च ये वसन्ति तपोधनाः
ततो नारायणं तेजो व्रतचर्येन्धनोत्थितम् ।
वक्त्राग्निःसृत्य कृष्णस्य वह्निरद्भुतकर्मणः १६
सोऽग्निर्ददाह तं शैलं सद्रुमं सलताक्षुपम् ।
सपक्षिमृगसंघातं सश्वापदसरीसृपम् ॥ १७
मृगैश्च विविधाकारैर्हाहाभूतमचेतनम् ।
शिखरं तस्य शैलस्य मथितं दीनदर्शनम् १८
स तु वह्निर्महाज्वालो दग्ध्वा सर्वमशेषतः ।
विष्णोः समीप आगम्य पादौ शिष्यवदस्पृशत
ततो विष्णुर्गिरिं दृष्ट्वा निर्दग्धमरिकर्शनः ।
सौम्यैर्दृष्टिनिपातैस्तं पुनः प्रकृतिमानयत् २०
तथैव स गिरिर्भूयः प्रपुष्पितलतादुमः ।
सपक्षिगणसंघुष्टः सश्वापदसरीसृपः ॥ २१
तमद्भुतमचिन्त्यं च दृष्ट्वा मुनिगणस्तदा ।
विस्मितो हृष्टरोमा च बभूवास्राविलेक्षणः ॥
ततो नारायणो दृष्ट्वा तानृषीन्विस्मयान्वितान्
प्रश्रितं मधुरं स्निग्धं पप्रच्छ वदतां वरः २३
किमर्थमृषिपूगस्य त्यक्तसङ्गस्य नित्यशः ।
निर्ममस्यागमवतो विस्मयः समुपागतः ॥ २४
एतन्मे सशयं सर्वं याथातथ्यमनिन्दिताः ।
ऋषयो वक्तुमर्हन्ति निश्चितार्थं तपोधनाः २५

ऋषय ऊचुः ।

भवान्विसृजते लोकान् भवान्संहरते पुनः ।
भवान् शीत भवानुष्णं भवानेव च वर्षति ॥
पृथिव्यां यानि भूतानि स्थावराणि चराणि च
तेषां पिता त्वं माता त्व प्रभुः प्रभव एव च ॥
एवं नो विस्मयकर संशयं मधुसूदन ।
त्वमेवार्हसि कल्याण वक्तुं वह्नेर्विनिर्गमम् २८
ततो विगतसंत्रासा वयमप्यरिकर्शन ।
यच्छ्रुतं यच्च दृष्टं नस्तत्प्रवक्ष्यामहे हरे ॥ २९

वासुदेव उवाच ।

एतद्वै वैष्णवं तेजो मम वक्त्राद्विनिःसृतम् ।
कृष्णवर्त्मा युगान्ताभो येनायं मथितो गिरिः
ऋषयश्चार्तिमापन्ना जितक्रोधा जितेन्द्रियाः ।
भवन्तो व्यथिताश्चासन् देवकल्पास्तपोधनाः॥
व्रतचर्यापरीतस्य तपस्विव्रतसेवया ।
मम वह्निः समुद्भूतो न वै व्यथितुमर्हथ ॥ ३२
व्रतं चतुर्थमाहायातस्त्वहं गिरिमिमं शुभम् ।
पुत्रं चात्मसमं वीर्ये तपसा लब्धुमागतः ३३
ततो ममात्मा यो देहे सोऽग्निर्भूत्वा विनिःसृतः
गतश्च वरदं द्रष्टुं सर्वलोकपितामहम् ॥ ३४
तेन चात्मानुशिष्टो मे पुत्रत्वे मुनिसत्तमाः ।
तेजसोऽर्धेन पुत्रस्ते भवितेति वृषध्वजः ॥३५
सोऽयं वह्निरुपागम्य पादमूले ममान्तिकम् ।
शिष्यवत्परिचर्यार्थं शान्तः प्रकृतिमागतः ३६
एतदेव रहस्यं वः पद्मनाभस्य धीमतः ।
मया प्रोक्तं समासेन न भीः कार्या तपोधनाः
सर्वत्र गतिरव्यग्रा भवतां दीर्घदर्शनात् ।
तपस्विव्रतसंदीप्ता ज्ञानविज्ञानशोभिताः ३८
यच्छ्रुतं यच्च वो दृष्टं दिवि वा यदि वा भुवि
आश्चर्यं परमं किञ्चित्तद्भवन्तो ब्रुवन्तु मे ॥३९
तस्यामृतनिकाशस्य वाङ्माधुर्यमस्ति मे स्पृहा ।
भवद्भिः कथितस्येह तपोवननिवासिभिः ॥
यद्यप्यहमदृष्टं वो दिव्यमद्भुतदर्शनम् ।
दिवि वा भुवि वा किञ्चित्पश्याम्यमरदर्शनाः
प्रकृतिः सा मम परा न क्वचित्प्रतिहन्यते ।
न चात्मगतमैश्वर्यमाश्चर्यं प्रतिभाति मे ॥ ४२
श्रद्धेयः कथितो ह्यर्थः सज्जनश्रवणं गतः ।
चिरं तिष्ठति मेदिन्यां शैले लेख्यमिवार्पितम्॥
तदहं सज्जनमुखान्निःसृतं तत्समागमे ।
कथयिष्याम्यहमहो बुद्धिदीपकरं नृणाम् ॥४४
ततो मुनिगणाः सर्वे विस्मिताः कृष्णसन्निधौ
नेत्रैः पद्मदलप्रख्यैरपश्यंस्तं जनार्दनम् ॥ ४५
वर्धयन्तस्तथैवान्ये पूजयन्तस्तथाऽपरे ।
वाग्भिर्ऋग्भूषितार्थाभिः स्तुवन्तो मधुसूदनम्
ततो मुनिगणाः सर्वे नारदं देवदर्शनम् ।
तदा नियोजयामासुर्वचने वाक्यकोविदम् ४७

मुनय ऊचुः ।

यदाश्चर्यमचिन्त्यं च गिरौ हिमवति प्रभो ।
अनुभूतं मुनिगणैस्तीर्थयात्रापरैर्मुने ॥ ४८
तद्भवानृषिसंघस्य हितार्थं सर्वमादितः ।
यथा दृष्टं हृषीकेशे सर्वमाख्यातुमर्हसि ॥ ४९

एवमुक्तः स मुनिभिर्नारदो भगवान् मुनिः । कथयामास देवर्षिः पूर्ववृत्तामिमां कथाम् ॥ ५०

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि
ऊनचत्वारिंशदधिकशततमोऽध्यायः ॥ १३९ ॥

१४०

भीष्म उवाच ।
ततो नारायणसुहृन्नारदो भगवानृषिः ।
शङ्करस्योमया सार्धं संवादं प्रत्यभाषत ॥ १
नारद उवाच ।
तपश्चचार धर्मात्मा वृषभाङ्कः सुरेश्वरः ।
पुण्ये गिरौ हिमवति सिद्धचारणसेविते ॥ २
नानौषधियुते रम्ये नानापुष्पसमाकुले ।
अप्सरोगणसंकीर्णे भूतसंघनिषेविते ॥ ३
तत्र देवो मुदा युक्तो भूतसंघशतैर्वृतः ।
नानारूपैर्विरूपैश्च दिव्यैरद्भुतदर्शनैः ॥ ४
सिंहव्याघ्रगजप्रख्यैः सर्वजातिसमन्वितैः ।
क्रोष्टुकद्वीपिवदनर्क्षर्क्षभमुखैस्तथा ॥ ५
उलूकवदनैर्भीमैर्वृकश्येनमुखैस्तथा ।
नानावर्णैर्मृगमुखैः सर्वजातिसमन्वितैः ॥ ६
किंनरैर्यक्षगन्धर्वै रक्षोभूतगणैस्तथा ।
दिव्यपुष्पसमाकीर्णं दिव्यज्वालासमाकुलम् ॥
दिव्यचन्दनसंयुक्तं दिव्यधूपेन धूपितम् ।
तत्सदो वृषभांकस्य दिव्यवादित्रनादितम् ८
मृदंगपणवोद्घुष्टं शङ्खभेरीनिनादितम् ।
नृत्यद्भिर्भूतसंघैश्च बर्हिणैश्च समततः ॥ ९
प्रनृत्ताप्सरसं दिव्यं देवर्षिगणसेवितम् ।
दृष्टिकान्तमनिर्देश्यं दिव्यमद्भुतदर्शनम् ॥ १०
स गिरिस्तपसा तस्य गिरिशस्य व्यरोचत ।
स्वाध्यायपरमैर्विप्रैर्ब्रह्मघोषो निनादितः ॥ ११
षट्पदैरुपगीतैश्च माधवाप्रतिमो गिरिः ।
तन्महोत्सवसंकाशं भीमरूपधरं ततः ॥ १२
दृष्ट्वा मुनिगणस्यासीत्परा प्रीतिर्जनार्दन ।
मुनयश्च महाभागाः सिद्धाश्चैवोर्ध्वरेतसः १३
मरुतो वसवः साध्या विश्वेदेवाः सवासवाः
यक्षा नागाः पिशाचाश्च लोकपाला हुताशनाः
वाताः सर्वे महाभूतास्तत्रैवासन् समागताः
ऋतवः सर्वपुष्पैश्च व्यकिरन्त महाद्भुतैः ॥१५
ओषध्यो ज्वलमानाश्च द्योतयन्ति स्म तद्वनम्
विहंगाश्च मुदा युक्ताः प्रानृत्यन्व्यनदंश्च ह ॥
गिरिपृष्ठेषु रम्येषु व्याहरन्तो जनप्रियाः ।
तत्रदेवो गिरितटे दिव्यधातुविभूषिते ॥ १७
पर्यङ्क इव विभ्राजन्नुपविष्टो महामनाः ।
व्याघ्रचर्माम्बरधरः सिंहचर्मोत्तरच्छदः ॥१८
व्यालयज्ञोपवीती च लोहिताङ्गदभूषणः ।
हरिश्मश्रुर्जटी भीमो भयकर्ता सुरद्विषाम् १९
अभयः सर्वभूतानां भक्तानां वृषभध्वजः ।
दृष्ट्वा महर्षयः सर्वे शिरोभिरवनिं गताः ॥ २०
विमुक्ताः सर्वपापेभ्यः क्षान्ता विगतकल्मषाः
तस्य भूतपतेः स्थानं भीमरूपधरं बभौ ॥ २१
अप्रधृष्यतरं चैव महोरगसमाकुलम् ।
क्षणेनैवाभवत्सर्वमद्भुतं मधुसूदन ॥ २२
तत्सदो वृषभांकस्य भीमरूपधरं बभौ ।
तमभ्ययाच्छैलसुता भूतस्त्रीगणसंवृता ॥ २३
हरतुल्याम्बरधरा समानव्रतधारिणी ।
बिभ्रती कलशं रौक्मं सर्वतीर्थजलोद्भवम् २४
गिरिस्त्रीभिः सर्वाभिः पृष्ठतोऽनुगता शुभा ।
पुष्पवृष्ट्याभिवर्षन्ती गन्धैर्बहुविधैस्तथा ।
सेवन्ती हिमवत्पार्श्वं हरपार्श्वमुपागमत् ॥ २५
ततः स्मयन्ती पाणिभ्यां नर्मार्थं चारुहासिनी
हरनेत्रे शुभे देवी सहसा सा समावृणोत् २६
संवृताभ्यां तु नेत्राभ्यां तमोभूतमचेतनम् ।
निर्होमं निर्वषट्कारं जगद्वै सहसाऽभवत् २७

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे ऊनचत्वारिंशदधिकशततमोऽध्याय. ॥ १३९ ॥

१४०

तत इति ॥ १ ॥

जनश्च विमनाः सर्वोऽभवत्त्रासमन्वितः ।
निमीलिते भूतपतौ नष्टसूर्य इवाभवत् ॥ २८
ततो वितिमिरो लोकः क्षणेन समपद्यत ।
ज्वाला च महती दीप्ता ललाटात्तस्य निःसृता
तृतीयं चास्य संभूतं नेत्रमादित्यसन्निभम् ।
युगान्तसदृशं दीप्तं येनासौ मथितो गिरिः ३०
ततो गिरिसुता दृष्ट्वा दीप्ताग्निसदृशेक्षणम् ।
हरं प्रणम्य शिरसा ददर्शायतलोचना ३१
दह्यमाने वने तस्मिन् ससालसरलद्रुमे ।
सचन्दनवरे रम्ये दिव्यौषधिविदीपिते ॥ ३२
मृगयूथैर्द्विपैर्भीतैर्हरपार्श्वमुपागतैः ।
शरणं चाप्यविंदद्भिस्तत्सदः सकुलं बभौ ३३
ततो नभस्पृशज्वालो विद्युल्लोलाग्निरुल्बणः ।
द्वादशादित्यसदृशो युगान्ताग्निरिवापरः ३४
क्षणेन तेन निर्दग्धो हिमवानभवन्नगः ।
स धातुशिखराभोगो दीप्तदग्धलतौषधिः ३५
तं दृष्ट्वा मथितं शैलं शैलराजसुता ततः ।
भगवन्तं प्रपन्ना वै साञ्जलिप्रग्रहा स्थिता ३६
उमां शर्वस्तदा दृष्ट्वा स्त्रीभावगतमार्दवाम् ।
पितुर्दैन्यमनिच्छन्ती प्रीत्याऽपश्यत्तदा गिरिं
क्षणेन हिमवान्सर्वः प्रकृतिस्थः सुदर्शनः ।
प्रहृष्टविहगश्चैव सुपुष्पितवनद्रुमः ॥ ३८
प्रकृतिस्थं गिरिं दृष्ट्वा प्रीता देवं महेश्वरम् ।
उवाच सर्वलोकानां पतिं शिवमनिन्दिता ३९

उमोवाच ।

भगवन् सर्वभूतेश शूलपाणे महाव्रत ।
संशयो मे महान् जातस्तन्मे व्याख्यातुमर्हसि
किमर्थं ते ललाटे वै तृतीयं नेत्रमुत्थितम् ।
किमर्थं च गिरिर्दग्धः सपक्षिगणकाननः ४१
किमर्थं च पुनर्देव प्रकृतिस्थस्त्वया कृतः ।
तथैव द्रुमसंच्छन्नः कृतोऽयं ते पिता मम ४२

महेश्वर उवाच ।

नेत्रे मे संवृते देवि त्वया बाल्यादनिंदिते ।
नष्टालोकस्तदा लोकः क्षणेन समपद्यत ॥ ४३
नष्टादित्ये तथा लोके तमोभूते नगात्मजे ।
तृतीयं लोचनं दीप्तं सृष्टं मे रक्षता प्रजाः ४४
तस्य चाक्ष्णो महत्तेजो येनायं मथितो गिरिः
त्वत्प्रियार्थं च मे देवि प्रकृतिस्थः पुनः कृतः ४५

उमोवाच ।

भगवन्केन ते वक्त्रं चन्द्रवत्प्रियदर्शनम् ।
पूर्वं तथैव श्रीकान्तमुत्तरं पश्चिमं तथा ॥ ४६
दक्षिणं च मुखं रौद्रं केनोर्ध्वं कपिला जटाः
केन कण्ठश्च ते नीलो बर्हिबर्हनिभः कृतः ॥ ४७
हस्ते देव पिनाकं ते सततं केन तिष्ठति ।
जटिलो ब्रह्मचारी च किमर्थमसि नित्यदा ४८
एतन्मे संशयं सर्वं वक्तुमर्हसि वै प्रभो ।
सधर्मचारिणी चाहं भक्ता चेति वृषध्वज ४९

भीष्म उवाच ।

एवमुक्तः स भगवान्शैलपुत्र्या पिनाकधृत् ।
तस्या धृत्या च बुद्ध्या च प्रीतिमानभवत्प्रभुः
ततस्तामब्रवीद्देवः सुभगे श्रूयतामिति ।
हेतुभिर्यैर्ममैतानि रूपाणि रुचिराननें ५१

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि उमामहेश्वरसंवादो नाम चत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

१४१

श्रीभगवानुवाच ।

तिलोत्तमा नाम पुरा ब्रह्मणा योषिदुत्तमा
तिलं तिलं समुद्धृत्य रत्नानां निर्मिता शुभा
साऽभ्यगच्छत मां देवि रूपेणाप्रतिमा भुवि ।
प्रदक्षिणं लोभयन्ती मां शुभे रुचिरानना ॥ २

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चत्वारिंशदधिकशततमोऽध्याय ॥ १४० ॥

१४१

एवं शंभोः कृष्णादनन्यत्वं जगदात्म्यं चोक्त्वा चतुर्मुखादनन्यत्वं चाह—तिलोत्तमेत्यादिना ॥ १ ॥

यता यतः सा सुदती मामुपाधावदन्तिके ।
ततस्तां मुखं चारु मम देवि विनिर्गतम् ३
तां दिदृक्षुरहं योगाच्चतुर्मूर्तित्वमागतः ।
चतुर्मुखश्च संवृत्तो दर्शयन्योगमुत्तमम् ॥ ४
पूर्वेण वदनेनाहमिन्द्रत्वमनुशास्मि ह ।
उत्तरेण त्वया सार्धं रमाम्यहमनिन्दिते ॥ ५
पश्चिमं मे मुखं सौम्यं सर्वप्राणिसुखावहम् ।
दक्षिणं भीमसंकाशं रौद्रं संहरति प्रजाः ॥ ६
जटिलो ब्रह्मचारी च लोकानां हितकाम्यया
देवकार्यार्थसिद्ध्यर्थं पिनाकं मे करे स्थितम् ७
इन्द्रेण च पुरा वज्रं क्षिप्तं श्रीकाक्षिणा मम ।
दग्ध्वा कण्ठं तु तद्यातं तेन श्रीकण्ठता मम

उमोवाच ।

वाहनेष्वत्र सर्वेषु श्रीमत्स्वन्येषु सत्तम ।
कथं च वृषभो देव वाहनत्वमुपागतः ॥ ९

महेश्वर उवाच ।

सुरभीमसृजद्ब्रह्मा देवधेनुं पयोमुचम् ।
सा सृष्टा बहुधा जाता क्षरमाणा पयोऽमृतम्
तस्या वत्समुखोत्सृष्टः फेनो मद्गात्रमागतः ।
ततो दग्धा मया गावो नानावर्णत्वमागताः
ततोऽहं लोकगुरुणा शमं नीतोऽर्थवेदिना ।
वृषं चैनं ध्वजार्थं मे ददौ वाहनमेव च ॥ १२

उमोवाच ।

निवासा बहुरूपास्ते दिवि सर्वगुणान्विताः
तांश्च संत्यज्य भगवन् श्मशाने रमसे कथम्
केशास्थिकलिले भीमे कपालघटसंकुले ।
गृध्रगोमायुबहुले चिताग्निशतसंकुले ॥ १४
अशुचौ मांसकलिले वसाशोणितकर्दमे ।
विकीर्णान्त्रास्थिनिचये शिवानादविनादिते ।

महेश्वर उवाच ।

मेध्यान्वेषी मही कृत्स्नां विचराम्यनिशं सदा
न च मेध्यतरं किञ्चित् श्मशानादिह लक्ष्यते
तेन मे सर्ववासानां श्मशाने रमते मनः ।
न्यग्रोधशाखासछन्ने निर्भुग्नस्रग्विभूषिते १७
तत्र चैव रमन्तीमे भूतसंघाः शुचिस्मिते ।
न च भूतगणैर्देवि विनाऽहं वस्तुमुत्सहे ॥१८
एष वासो हि मे मेध्यः स्वर्गीयश्च मतः शुभे ।
पुण्यः परमकश्चैव मेध्यकामैरुपास्यते ॥ १९

उमोवाच ।

भगवन् सर्वभूतेश सर्वधर्मविदां वर ।
पिनाकपाणे वरद संशयो मे महानयम् ॥ २०
अयं मुनिगणः सर्वस्तपस्तेप इति प्रभो ।
तपोवेषकरो लोके भ्रमते विविधाकृतिः ॥२१
अस्य चैवर्षिसंघस्य मम च प्रियकाम्यया ।
एतं ममेह सन्देह वक्तुमर्हस्यरिन्दम ॥ २२
धर्मः किंलक्षणः प्रोक्तः कथं वा चरितुं नरैः ।
शक्यो धर्ममविन्दद्भिर्धर्मज्ञ वद मे प्रभो २३

नारद उवाच ।

ततो मुनिगणः सर्वस्तां देवीं प्रत्यपूजयत् ।
वाग्भिरङ्गैरभूषितार्थाभिः स्तवैश्चार्थविशारदैः

महेश्वर उवाच ।

अहिंसा सत्यवचनं सर्वभूतानुकंपनम् ।
शमो दानं यथाशक्ति गार्हस्थ्यो धर्म उत्तमः ॥

पूर्वेण वदनेनेत्यादिना सकलदिक्पालात्माप्यहमेवैक ॥ ५ ॥ एवंभूतोऽपि स्वात्मभूतलोकरक्षार्थं तप आयुधं च धारयामीत्याह **जटिल इति**॥७॥ इन्द्रेणेति एवमहं दासानामतिक्रमं सोढ्वा तत्कीर्त्यर्थं नीलं कण्ठमपि धारयामीति स्वस्य परमकारुणिकत्वं च दर्शितम् ॥८॥ सुरभीमिति वाचं धेनुमुपासीत तस्याश्चत्वार· स्तना स्वाहाकार स्वधाकारो हंतकारो वषट्कार इति वाग्धेनोश्चतुर्भि स्तनै पुष्टो धर्मो गोवृषस्तस्य फलभूतं परं वैराग्यविवेकादिक फेनस्थानीयं यदा प्रत्यक्तत्वोपग भवति तदा वाग्धेनो पारमार्थिकं प्रामाण्यमपह्नूयते । व्यावहारिकमेव तत्स्थाप्यते सोऽय गवा विवर्णभाव· । धर्मश्च एवंभूतस्य जीवन्मुक्तस्वरूपसूचको ध्वज इव तत्त्वविदि दृश्यत इति प्रघट्टकार्थ. ॥१०॥**निवासा इति** पूर्वं मैत्रेयभिक्षायां वाराणस्यामज्ञातैर्मुमुक्षुभिर्वस्तव्यामिति व्यासवाक्येन सूचितम् । अग्रे च काश्या शवदर्शनाच्छिवदर्शनं सवर्तवासेन सूच्यते । पूर्वत्र अल्पया भिक्षया दतया मैत्रेयस्यानन्तपुण्योत्पत्तिवचनेन वाराणस्या पुण्यक्षेत्रत्वमुक्तम् । अग्रे च काश्या शवदर्शनाच्छिवदर्शनस्यान्यथासिद्धिसूचनेनात्र मृताना शरीरं शिवलिंगमय भवतीति चोक्तम् । संप्रति रूढ्या महाश्मशानत्वेनावगतमत्र पवित्रत्वेन तदेव प्रदश्यते मेध्यान्वेषीत्यादिना मेधाया धीवृत्तौ विदित मेध्य ब्रह्म तत्प्राप्तिकामै इदं श्मशानं उपासत इति वचनान्नान्यत् श्मशानं रुद्रावास इति ज्ञेयम् ॥ १३ ॥ योगजधर्म वृष वाराणसीं श्मशान च सेवितुमशक्ताना तप आदिकं विधातुं भगवन्नित्यादिर्ग्रन्थ प्रवर्तते ॥ २० ॥ तपोवेष तप सूचको वेषो नखलोमजटाधारित्वादि ॥ २१ ॥

परदारेष्वसंसर्गो न्यासस्त्रीपरिरक्षणम् ।
अदत्तादानविरमो मधुमांसस्य वर्जनम् ॥ २६
एष पञ्चविधो धर्मो बहुशाखः सुखोदयः ।
देहिभिर्धर्मपरमैश्चर्तव्यो धर्मसंभवः ॥ २७

उमोवाच ।

भगवन् संशयः पृष्टस्तन्मे शंसितुमर्हसि ।
चातुर्वर्ण्यस्य यो धर्मः स्वे स्वे वर्णे गुणावहः
ब्राह्मणे कीदृशो धर्मः क्षत्रिये कीदृशोऽभवत
वैश्ये किंलक्षणो धर्मः शूद्रे किंलक्षणो भवेत

महेश्वर उवाच ।

न्यायतस्ते महाभागे सर्वशः समुदीरितः ।
भूमिदेवा महाभागाः सदा लोके द्विजातयः ॥
उपवासः सदा धर्मो ब्राह्मणस्य न संशयः ।
स हि धर्मार्थसंपन्नो ब्रह्मभूयाय कल्पते ॥ ३१
तस्य धर्मक्रिया देवि ब्रह्मचर्या च न्यायतः ।
व्रतोपनयनं चैव द्विजो येनोपपद्यते ॥ ३२
गुरुदैवतपूजार्थं स्वाध्यायाभ्यसनात्मकः ।
देहिभिर्धर्मपरमैश्चर्तव्यो धर्मसंभवः ॥ ३३

उमोवाच ।

भगवन् संशयो मेऽस्ति तन्मे व्याख्यातुमर्हसि
चातुर्वर्ण्यस्य धर्मं वै नैपुण्येन प्रकीर्तय ॥ ३४

महेश्वर उवाच ।

रहस्यश्रवणं धर्मो वेदव्रतनिषेवणम् ।
अग्निकार्यं तथा धर्मो गुरुकार्यप्रसाधनम् ३५
मक्षचर्या परो धर्मो नित्ययज्ञोपवीतिता ।
नित्यं स्वाध्यायिता धर्मो ब्रह्मचर्याश्रमस्तथा
गुरुणा चाभ्यनुज्ञातः समावर्तेत वै द्विजः ।
विन्देतानन्तरं भार्यामनुरूपां यथाविधि ॥ ३७
शूद्रान्नवर्जनं धर्मस्तथा सत्पथसेवनम् ।
धर्मो नित्योपवासित्वं ब्रह्मचर्य तथैव च ३८
आहिताग्निरधीयानो जुह्वानः संयतेन्द्रियः ।
विघसाशी यताहारो गृहस्थः सत्यवाक् शुचिः
अतिथिव्रतता धर्मो धर्मस्त्रेताग्निधारणम् ।
इष्टीश्च पशुबन्धांश्च विधिपूर्वं समाचरेत् ॥४०
यज्ञश्च परमो धर्मस्तथाऽहिंसा च देहिषु ।
अपूर्वभोजनं धर्मो विघसाशित्वमेव च ॥ ४१
भुक्ते परिजने पश्चाद्भोजनं धर्म उच्यते ।
ब्राह्मणस्य गृहस्थस्य श्रोत्रियस्य विशेषतः ४२
दम्पत्योः समशीलत्वं धर्मः स्याद्बहुमेधिनः ।
गृह्याणां चैव देवानां नित्यपुष्पबलिक्रिया ४३
नित्योपलेपनं धमस्तथा नित्योपवासिता ।
सुसंमृष्टोपलिप्ते च साज्यधूमो भवेद्गृहे ॥ ४४
एष द्विजजने धर्मो गार्हस्थ्ये लोकधारणः ।
द्विजानां च सतां नित्यं सदैवैष प्रवर्तते ४५
यस्तु क्षत्रगतो देवि मया धर्म उदीरितः ।
तमहं ते प्रवक्ष्यामि तन्मे शृणु समाहिता ४६
क्षत्रियस्य स्मृतो धर्मः प्रजापालनमादितः ।
निर्दिष्टफलभोक्ता हि राजा धर्मेण युज्यते ॥
प्रजाः पालयते यो हि धर्मेण मनुजाधिपः ।
तस्य धर्मार्जिता लोकाः प्रजापालनसंचिताः
तस्य राज्ञः परो धर्मो दमः स्वाध्याय एव च
अग्निहोत्रपरिस्पंदो दानाध्ययनमेव च ॥ ४९
यज्ञोपवीतधरणं यज्ञो धर्मक्रियास्तथा ।
भृत्यानां भरण धर्मः कृते कर्मण्यमोघता ५०
सम्यग्दण्डे स्थितिर्धर्मो धर्मो वेदक्रतुक्रियाः ।
व्यवहारस्थितिर्धर्मः सत्यवाक्यरतिस्तथा ५१
आर्तहस्तप्रदो राजा प्रेत्य चेह महीयते ।
गोब्राह्मणार्थे विक्रान्तः सग्रामे निधनं गतः ॥
अश्वमेधजितांल्लोकानाप्नोति त्रिदिवालये ५३
वैश्यस्य सततं धर्मः पाशुपाल्य कृषिस्तथा ।
अग्निहोत्रपरिस्पन्दो दानाध्ययनमेव च ॥ ५४
वाणिज्यं सत्पथस्थानमातिथ्यं प्रशमो दमः ।
विप्राणां स्वागतं त्यागो वैश्यधर्मः सनातनः
तिलान् गन्धान् रसांश्चैव विक्रीणीयान्न चैव हि
वणिक्पथमुपासीनो वैश्यः सत्पथमाश्रितः ॥
सर्वातिथ्यं त्रिवर्गस्य यथाशक्ति यथार्हतः ।
शूद्रधर्मः परो नित्य शुश्रूषा च द्विजातिषु ॥
स शूद्रः संशिततपाः सत्यवादी जितेन्द्रियः
शुश्रूषुरतिथिं प्राप्तं तपः सचिनुते महत ॥ ५८
नित्यं स हि शुभाचारो देवताद्विजपूजकः ।
शूद्रो धर्मफलैरिष्टैः संप्रयुज्येत बुद्धिमान् ५९
एतत्ते सर्वमाख्यातं चातुर्वर्ण्यस्य शोभने ।
एकैकस्येह सुभगे किमन्यच्छ्रोतुमिच्छसि ॥

पंचविध अहिंसादिविशिष्टो गार्हस्थ्यधर्मादि धर्मस्य पुण्यस्य संभवो योनि ॥ २७ ॥ उपवास इंद्रियजय. ॥ ३१ ॥ अपूर्वभोजन पूर्वभोजनं प्राक्भोजनं तदभाव सकृद्भोजनमित्यर्थ ॥४१॥ निर्दिष्ट षड्भाग ॥ ४७ ॥ आर्तहस्तेति आर्तप्रिय इत्यर्थ. । आर्द्रेति पाठे सजलेन हस्तेन ददाति॥५२॥ सर्वप्रकारेणातिथ्यं सर्वातिथ्यम्॥५७॥

उमोवाच ।
उक्तस्त्वया पृथग्धर्मश्चातुर्वर्ण्यहितः शुभः ।
सर्वेष्वापी तु यो धर्मो भगवंस्तद्ब्रवीहि मे ६१
महेश्वर उवाच ।
ब्राह्मणा लोकसारेण सृष्टा धात्रा गुणार्थिना
लोकांस्तारयितुं कृत्स्नान्मर्त्येषु क्षितिदेवताः
तेषामपि प्रवक्ष्यामि धर्मकर्मफलोदयम् ।
ब्राह्मणेषु हि यो धर्मः स धर्मः परमो मतः ६३
इमे ते लोकधर्मार्थं त्रयः सृष्टाः स्वयम्भुवा ।
पृथिव्यां सर्जने नित्यं सृष्टास्तानपि मे शृणु ॥
वेदोक्तः परमो धर्मः स्मृतिशास्त्रगतोऽपरः ।
शिष्टाचीर्णो परः प्रोक्तस्त्रयो धर्माः सनातनाः
त्रैविद्यो ब्राह्मणो विद्वान्न चाध्ययनजीवकः ।
त्रिकर्मा त्रिपरिक्रान्तो मैत्र एष स्मृतो द्विजः
षडिमानि तु कर्माणि प्रोवाच भुवनेश्वरः ।
वृत्त्यर्थं ब्राह्मणानां वै शृणु धर्मान्सनातनान्
यजनं याजनं चैव तथा दानप्रतिग्रहौ ।
अध्यापनं चाध्ययनं षट्कर्मा धर्मभाग्द्विजः ॥
नित्यः स्वाध्यायिता धर्मो धर्मो यज्ञः सनातनः
दानं प्रशस्यते चास्य यथाशक्ति यथाविधि ॥
शमस्तूपरमो धर्मः प्रवृत्तः सत्सु नित्यशः ।
गृहस्थानां विशुद्धानां धर्मस्य निचयो महान्
पञ्चयज्ञविशुद्धात्मा सत्यवागनसूयकः ।
दाता ब्राह्मणसत्कर्ता सुसंसृष्टनिवेशनः ॥ ७१
अमानी च सदाऽजिह्मः स्निग्धवाणीप्रदस्तथा
अतिथ्यभ्यागतरतिः शेषान्नकृतभोजनः ॥ ७२
पाद्यमर्घ्यं यथान्यायमासनं शयनं तथा ।
दीपं प्रतिश्रयं चैव यो ददाति स धार्मिकः ७३
प्रातरुत्थाय चाचम्य भोजनेनोपमन्त्र्य च ।
सत्कृत्यानुव्रजेद्यस्तु तस्य धर्मः सनातनः ७४
सर्वातिथ्य त्रिवर्गस्य यथाशक्ति निशानिशम्
शूद्रधर्मः समाख्यातस्त्रिवर्गपरिचारणम् ॥ ७५
प्रवृत्तिलक्षणो धर्मो गृहस्थेषु विधीयते ।
तमहं वर्तयिष्यामि सर्वभूतहितं शुभम् ॥ ७६
दातव्यमसकृच्छक्त्या यष्टव्यमसकृत्तथा ।
पुष्टिकर्मविधानं च कर्तव्यं भूतिमिच्छता ॥
धर्मेणार्थः समाहार्यो धर्मलब्धं त्रिधा धनम् ।
कर्तव्यं धर्मपरमं मानवेन प्रयत्नतः ॥ ७८
एकेनांशेन धर्मार्थौ कर्तव्यौ भूतिमिच्छता ।
एकेनांशेन कामार्थं एकमंशं विवर्धयेत् ॥ ७९
निवृत्तिलक्षणस्त्वन्यो धर्मो मोक्षाय तिष्ठति
तस्य वृत्तिं प्रवक्ष्यामि शृणु मे देवि तत्त्वतः ॥
सर्वभूतदया धर्मो न चैकग्रामवासिता ।
आशापाशविमोक्षश्च शस्यते मोक्षकांक्षिणाम्
न कुट्यां नोदके सङ्गो न वाससि न चासने
न त्रिदण्डे न शयने नाग्नौ न शरणालये ८२
अध्यात्मगतिचित्तो यस्तन्मनास्तत्परायणः ।
युक्तो योगं प्रति सदा प्रतिसंख्यानमेव च ॥
वृक्षमूलपरो नित्यं शून्यागारनिवेशनः ।
नदीपुलिनशायी च नदीतीररतिश्च यः ॥ ८४
विमुक्तः सर्वसङ्गेषु स्नेहबन्धेषु च द्विजः ।
आत्मन्येवात्मनो भाव समासज्जेत वै द्विजः
स्थाणुभूतो निराहारो मोक्षदृष्टेन कर्मणा ।
परिव्रजति यो युक्तस्तस्य धर्मः सनातनः ८६
न चैकत्र समासक्तो न चैकग्रामगोचरः ।
मुक्तो ह्यटति निर्मुक्तो न चैकपुलिनेशयः ८७
एष मोक्षविदा धर्मो वेदोक्तः सत्पथः सताम्
यो मार्गमनुयातीमं पदं तस्य च विद्यते ॥ ८८
चतुर्विधा भिक्षवस्ते कुटीचकबहूदकौ ।
हंसः परमहंसश्च यो यः पश्चात्स उत्तमः ८९
अतः परतरं नास्ति नावरं न तिरोग्रतः ।
अदुःखमसुखं सौम्यमजरामरमव्ययम् ॥ ९०
उमोवाच ।
गार्हस्थ्यो मोक्षधर्मश्च सज्जनाचरितस्त्वया
भाषितो जीवलोकस्य मार्गः श्रेयस्करो महान्
ऋषिधर्मं तु धर्मज्ञ श्रोतुमिच्छाम्यतः परम् ।
स्पृहा भवति मे नित्यं तपोवननिवासिषु ९२
आज्यधूमोद्भवो गन्धो रुणद्धीव तपोवनम् ।
तं दृष्ट्वा मे मनः प्रीतं महेश्वर सदा भवेत् ९३
एतन्मे संशयं देव मुनिधर्मकृतं विभो ।
सर्वधर्मार्थतत्त्वज्ञ देवदेव वदस्व मे ।
निखिलेन मया पृष्टं महादेव यथातथम् ॥ ९४

त्रयो धर्मा सर्जने सर्जनकाले ॥ ६४ ॥ त्रिकर्मा दानाध्ययनयजनकर्मा त्रीन् कामक्रोधलोभान् परिक्रान्त परित्यज्य गत ॥ ६६ ॥ अजिह्म इति च्छेदः ॥ ७२ ॥ कुटीचकबहूदकौ त्रिदण्डिनौ एको गृहे वसति अपरस्तीर्थान्यटति इतरौ एकदण्डिनौ तयोराद्य आश्रमधर्मनियत परो निस्त्रैगुण्य इति तेषा भेद ॥ ८९ ॥ अतः परमहस्येनात्माधिगमात्परं श्रेष्ठं नास्ति नापि अवरादि सर्वस्यात्रैवान्तर्भूतत्वात् ॥ ९० ॥

श्रीभगवानुवाच ।
हन्त तेऽहं प्रवक्ष्यामि मुनिधर्ममनुत्तमम् ।
यं कृत्वा मुनयो यान्ति सिद्धिं स्वतपसा शुभे
फेनपानामृषीणां यो धर्मो धर्मविदां सताम् ।
तन्मे शृणु महाभागे धर्मज्ञे धर्मादितः ॥ ९६
उंच्छान्ति सततं ये ते ब्राह्मयं फेनोत्करं शुभम्
अमृतं ब्रह्मणा पीतमध्वरे प्रसृतं दिवि ॥ ९७
एष तेषां विशुद्धानां फेनपानां तपोधने ।
धर्मचर्याकृतो मार्गो बालखिल्यगणैः शृणु ९८
बालखिल्यास्तपःसिद्धा मुनयः सूर्यमण्डले ।
उंच्छे तिष्ठन्ति धर्मज्ञाः शाकुनीं वृत्तिमास्थिताः
मृगनिर्मोकवसनाश्चीरवल्कलवाससः ।
निर्द्वन्द्वाः सत्पथं प्राप्ता बालखिल्यास्तपोधनाः
अङ्गुष्ठपर्वमात्रा ये भूत्वा स्वे स्वे व्यवस्थिताः
तपश्चरणमीहन्ते तेषां धर्मफलं महत् ॥ १०१
ते सुरैः समतां यान्ति सुरकार्यार्थसिद्धये ।
द्योतयन्ति दिशःसर्वास्तपसा दग्धकिल्बिषाः
ये त्वन्ये शुद्धमनसो दयाधर्मपरायणाः ।
सन्तश्चक्रचराः पुण्याः सोमलोकचराश्च ये ३
पितृलोकसमीपस्थास्त उंच्छान्ति यथाविधि ।
संप्रक्षालाश्मकुट्टाश्च दन्तोलूखलिकाश्च ते ४
सोमपानां च देवानामूष्मपाणां तथैव च ।
उंच्छान्ति ये समीपस्थाः सदारा नियतेन्द्रियाः
तेषामग्निपरिस्यन्दः पितृणां चार्चनं तथा ।
यज्ञानां चैव पञ्चानां यजनं धर्म उच्यते १०६
एष चक्रचरैर्देवि देवलोकचरैर्द्विजैः ।
ऋषिधर्मः सदा चीर्णो योऽन्यस्तमपि मे शृणु
सर्वेष्वेवर्षिधर्मेषु ज्ञेयोऽऽत्मा संयतेन्द्रियैः ।
कामक्रोधौ ततः पश्चाज्जेतव्याविति मे मतिः
अग्निहोत्रपरिस्पन्दो धर्मरात्रिसमासनम् ।
सोमयज्ञाभ्यनुज्ञानं पञ्चमी यज्ञदक्षिणा ॥ ९
नित्यं यज्ञक्रिया धर्मः पितृदेवार्चने रतिः ।
सर्वातिथ्य च कर्तव्यमन्नेनोच्छार्जितेन वै १०
निवृत्तिरुपभोगेषु गोरसानां शमे रतिः ।
स्थाडिले शयने योगः शाकपर्णनिषेवणम् १११
फलमूलाशन वायुरापः शैवलभक्षणम् ।
ऋषीणां नियमा ह्येते यैर्जयन्त्याजितां गतिं१२
विधूमे सन्नमुसले व्यङ्गारे भुक्तवज्जने ।
अतीतपात्रसञ्चारे काले विगतभिक्षुके ॥ १३
अतिथिं कांक्षमाणो वै शेषान्नकृतभोजनः ।
सत्यधर्मरतः शान्तो मुनिधर्मेण युज्यते ॥ १४
न स्तम्भी न च मानी स्यान्नाप्रसन्नो न विस्मितः
मित्रामित्रसमो मैत्रो यः स धर्मविदुत्तमः१५

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि
एकचत्वारिंशदधिकशततमोऽध्यायः ॥ १४१ ॥

१४२

उमोवाच ।
देशेषु रमणीयेषु नदीनां निर्झरेषु च ।
स्रवन्तीनां निकुञ्जेषु पर्वतेषु वनेषु च ॥ १
देशेषु च पवित्रेषु फलवत्सु समाहिताः ।
मूलवत्सु च मेध्येषु वसन्ति नियतव्रताः ॥ २
तेषामपि विधिं पुण्यं श्रोतुमिच्छामि शङ्कर ।
वानप्रस्थेषु देवेश स्वशरीरोपजीविषु ॥ ३

मुनय सन्यासिन ॥९५ ब्राह्मयं ब्राह्मसजातीयसंबन्धि फेनोत्करं अग्राग्रसमूह उंच्छन्ति अल्पश आददते तदिदममृतं ब्रह्मणा साधकावस्थायां पीत अध्वरे वृष्ट्यादिद्वारा यज्ञाङ्गरूपेण दिवि दिव्यभोगात्मना च प्रसृतम् ॥९७॥ मार्ग उक्त इति शेष ॥९८॥ स्वे स्वे धर्म इति शेष ॥१॥ चक्रचरा चक्रवच्चरन्ति वासरहिता इत्यर्थ ॥ ३ ॥ उंच्छन्ति अर्थात्सोमकिरणान् संप्रक्षाला सम्यक् पात्रादिकं प्रक्षालयन्ति नतु श्वोऽर्थे किंचित्स्थापयन्ति ॥ ४ ॥ धर्मरात्रिर्धर्मसत्रं तेन सम्यगासनं समासनं धर्मचक्रं सनातनमिति गौडा ॥९।। इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकचत्वारिंशदधिकशततमोऽध्याय ॥ १४१ ॥

१४२

देशेष्विति ॥ १ ॥ स्वशरीरमेवोपजीवन्ति नतु भृत्यादि स्वयं दासा इत्यर्थः ॥ ३ ॥

महेश्वर उवाच ।

वानप्रस्थेषु यो धर्मस्तं मे शृणु समाहिता ।
श्रुत्वा चैकमना देवि धर्मबुद्धिपरा भव ॥ ४
संसिद्धैर्नियमैः सद्भिर्वनवासमुपागतैः ।
वानप्रस्थैरिदं कर्म कर्तव्यं शृणु यादृशम् ॥ ५
त्रिकालमभिषेकं च पितृदेवार्चन तथा ।
अग्निहोत्रपरिस्यन्द इष्टिहोमविधिस्तथा ॥ ६
नीवारग्रहणं चैव फलमूलनिषेवणम् ।
इंगुदैरण्डतैलानां स्नेहार्थे च निषेवणम् ॥ ७
योगचर्याकृतैः सिद्धैः कामक्रोधविवर्जितैः ।
वीरशय्यामुपासद्भिर्वीरस्थानोपसेविभिः ॥८
युक्तैर्योगवहैः सद्भिर्ग्रीष्मे पञ्चतपैस्तथा ।
मंडूकयोगनियतैर्यथान्याय निषेविभिः ॥ ९
वीरासनरतैर्नित्य स्थंडिले शयनं तथा ।
शीततोयाग्नियोगश्च चर्तव्यो धर्मबुद्धिभिः १०
अब्भक्षैर्वायुभक्षैश्च शैवलोत्तरभोजनैः ।
अश्मकुट्टैस्तथा दांतैः संप्रक्षालैस्तथापरैः ॥११
चीरवल्कलसवीतैर्मृगचर्मनिवासिभिः ।
कार्या यात्रा यथाकालं यथाधर्मं यथाविधि
वननित्यैर्वनचरैर्वनस्थैर्वनगोचरैः ।
वनं गुरुमिवासाद्य वस्तव्यं वनजीविभिः १३
तेषां होमक्रिया धर्मः पञ्चयज्ञनिषेवणम् ।
भाग च पञ्चयज्ञस्य वेदोक्तस्यानुपालनम् ॥१४
अष्टमी यज्ञपरता चातुर्मास्यनिषेवणम् ।
पौर्णमासादयो यज्ञा नित्ययज्ञस्तथैव च ॥ १५
विमुक्ता दारसंयोगैर्विमुक्ताः सर्वसङ्करैः ।
विमुक्ताः सर्वपापैश्च चरन्ति मुनयो वने १६
स्रुग्भाण्डपरमा नित्यं त्रेताग्निशरणाः सदा ।
सन्तः सत्पथनित्या ये ते यांति परमां गतिं
ब्रह्मलोकं महापुण्यं सोमलोकं च शाश्वतम् ।
गच्छन्ति मुनयः सिद्धाः सत्यधर्मदयपाश्रयाः
एष धर्मो मया देवि वानप्रस्थाश्रितः शुभः ।
विस्तरेणाथ संपन्नो यथास्थूलमुदाहृतः ॥ १९

उमोवाच ।

भगवन्सर्वभूतेश सर्वभूतनमस्कृत ।
यो धर्मो मुनिसङ्घस्य सिद्धिवादेषु तं वद २०
सिद्धिवादेषु संसिद्धास्तथा वननिवासिनः
स्वैरिणो दारसंयुक्तास्तेषा धर्मः कथं स्मृतः ॥

महेश्वर उवाच ।

स्वैरिणस्तपसा देवि सर्वे दारविहारिणः ।
तेषां मौण्ड्यं कषायश्च वासे रात्रिश्च कारणम्
त्रिकालमभिषेकश्च होत्रं त्वृषिकृत महत् ।
समाधिसत्पथस्थानं यथोद्दिष्टनिषेवणम् २३
ये च ते पूर्वकथिता धर्मास्ते वनवासिनाम् ।
यदि सेवन्ति धर्मांस्तानाप्नुवन्ति तपःफलम्
ये च दम्पतिधर्माणः स्वदारनियतेन्द्रियाः ।
चरन्ति विधिदृष्ट तदनुकालाभिगामिनः २५
तेषामृषिकृतो धर्मो धर्मिणामुपपद्यते ।
न कामकारात्कामोन्यः संसेव्यो धर्मदर्शिभिः
सर्वभूतेषु यः सम्यग्ददात्यभयदक्षिणाम् ।
हिंसादोषविमुक्ताऽऽत्मा स वै धर्मेण युज्यते
सर्वभूतानुकम्पी यः सर्वभूतार्जवव्रतः ।
सर्वभूतात्मभूतश्च स वै धर्मेण युज्यते ॥ २८
सर्ववेदेषु वा स्नान सर्वभूतेषु चार्जवम् ।
उभे एते समे स्यातामार्जवं वा विशिष्यते
आर्जवं धर्ममित्याहुरधर्मो जिह्म उच्यते ।
आर्जवेनेह संयुक्तो नरो धर्मेण युज्यते ३०
आर्जवे तु रतो नित्यं वसत्यमरसन्निधौ ।
तस्मादार्जवयुक्तः स्याद्य इच्छेद्धर्ममात्मनः ।
क्षांतो दांतो जितक्रोधो धर्मभूतो विहिंसकः
धर्मे रतमना नित्यं नरो धर्मेण युज्यते ॥ ३२
व्यपेततंद्रिर्धर्मात्मा शक्त्या सत्पथमाश्रितः ।
चारित्रपरमो बुद्धो ब्रह्मभूयाय कल्पते ॥ ३३

उमोवाच ।

आश्रमाभिरता देव तापसा ये तपोधनाः ।
दीप्तिमन्तः कया चैव चर्यया ऽथ भवन्ति ते ३४

वीरशय्या वीरासन वीरस्थानं महारण्यं भीरुभिरप्रवेश्यम् ॥ ८ ॥ मंडूकयोगो हठशास्त्रप्रसिद्ध. ॥ ९ ॥ वीरासनं सदोपवेशनं शीतं वर्षास्वासारशायी तोयं हेमते जलवासी अग्नि ग्रीष्मे पंचाग्निमध्यस्थ एवं शीततोयाग्नियोग ॥ १० ॥ सिद्धिवादेषु ज्ञानगोष्ठीषु ॥ २० ससिद्धा संपन्ना ते कदाचित् स्वैरिण कदाचिद्दारसंयुक्ताः ॥ २१ ॥ तत्र स्वैरिणां मौण्ड्य कषायश्च कारण ज्ञापकं दारसयुक्ताना रात्रिर्वासे कारण न स्वैरिणामिव तेषा यथेष्टविहारोऽस्तीत्यर्थ· ॥२२॥ त्रिकालमाभिषेक उभयेषां दारवतामृषिकृतं होत्र वन्याम्बुफलादिना होम एवं यथायोग्य धर्मसंबन्ध ऊह्य·॥२३॥

राजानो राजपुत्राश्च निर्धना ये महाधनाः।
कर्मणा केन भगवन्प्राप्नुवन्ति महाफलम्॥३५
नित्यं स्थानमुपागम्य दिव्यचन्दनभूषिताः।
केन वा कर्मणा देव भवन्ति वनगोचराः ३६
एतन्मे संशयं देव तपश्चर्याऽऽश्रितं शुभम्।
शंस सर्वमशेषेण त्र्यक्ष त्रिपुरनाशन ॥ ३७


महेश्वर उवाच।

उपवासव्रतैर्दान्ता ह्यहिंस्राः सत्यवादिनः
संसिद्धाः प्रेत्य गन्धर्वैः सह मोदन्त्यनामयाः
मण्डूकयोगशयनो यथान्याय यथाविधि।
दीक्षां चरति धर्मात्मा स नागैः सह मोदते
शष्पं मृगमुखोच्छिष्टं यो मृगैः सह भक्षति।
दीक्षितो वै मुदा युक्तः स गच्छत्यमरावतीम्
शैवालं शीर्णपर्णं वा तद्भर्ती यो निषेवते।
शीतयोगवहो नित्यं स गच्छेत्परमां गतिम्॥
वायुभक्षोऽम्बुभक्षो वा फलमूलाशनोपि वा
यक्षेष्वैश्वर्यमाधाय मोदतेऽप्सरसां गणैः ॥४२
अग्नियोगवहो ग्रीष्मे विधिदृष्टेन कर्मणा।
चीर्त्वा द्वादशवर्षाणि राजा भवति पार्थिवः
आहारनियमं कृत्वा मुनिर्द्वादशवार्षिकम्।
मरुं संसाध्य यत्नेन राजा भवति पार्थिवः ४४
स्थण्डिले शुद्धमाकाशं परिगृह्य समन्ततः।
प्रविश्य च मुदा युक्तो दीक्षां द्वादशवार्षिकीं
देहं चानशने त्यक्त्वा स स्वर्गे सुखमेधते।
स्थण्डिलस्य फलान्याहुर्यानानि शयनानि च
गृहाणि च महार्हाणि चन्द्रशुभ्राणि भामिनि
आत्मानमुपजीवन्यो नियतो नियताशनः ४७
देहं वाऽनशने त्यक्त्वा स स्वर्गं समुपाश्नुते।
आत्मानमुपजीवन्यो दीक्षां द्वादशवार्षिकीम्
त्यक्त्वा महार्णवे देहं वारुणं लोकमश्नुते।
आत्मानमुपजीवन्यो दीक्षां द्वादशवार्षिकीम्

अश्मना चरणौ भित्त्वा
गुह्यकेषु स मोदते।
साधयित्वाऽऽत्मनाऽऽत्मान
निर्द्वन्द्वो निष्परिग्रहः॥ ५०

चीर्त्वा द्वादशवर्षाणि दीक्षामेतां मनोगताम्।
स्वर्गलोकमवाप्नोति देवैश्च सह मोदते ॥ ५१
आत्मानमुपजीवन्यो दीक्षां द्वादशवार्षिकीम्।
हुत्वाऽग्नौ देहमुत्सृज्य वह्निलोके महीयते ॥
यस्तु देवि यथान्यायं दीक्षितो नियतो द्विजः
आत्मन्यात्मानमाधाय निर्ममो धर्मलालसः॥
चीर्त्वा द्वादशवर्षाणि दीक्षामेतां मनोगताम्।
अरणीसहितं स्कन्धे बध्वा गच्छत्यनावृतः ॥
वीराध्वानगतो नित्यं वीरासनरतस्तथा।
वीरस्थायी च सततं स वीरगतिमाप्नुयात्॥५५
स शक्रलोकगो नित्यं सर्वकामपुरस्कृतः।
दिव्यपुष्पसमाकीर्णो दिव्यचन्दनभूषितः ५६
सुखं वसति धर्मात्मा दिवि देवगणैः सह।
वीरलोकगतो नित्यं वीर्ययोगसहः सदा ५७
सत्त्वस्थः सर्वमुत्सृज्य दीक्षितो नियतः शुचिः
वीराध्वानं प्रपद्येद्यस्तस्य लोकाः सनातनाः॥
कामगेन विमानेन स वै चरति च्छन्दतः।
शक्रलोकगतः श्रीमान्मोदते च निरामयः ५९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि उमामहेश्वरसंवादे द्विचत्वारिंशदधिकशततमोऽध्यायः ॥ १४२ ॥



१४३

उमोवाच।

भगवन् भगनेत्रघ्न पूष्णो दन्तनिपातन। दक्षक्रतुहर त्र्यक्ष संशयो मे महानयम् ॥ १

मरुर्ना गिरिधन्वनोरिति मेदिनी। मरुसाधन मेरुसाधनामिति पर्याय जलाहारमपि त्यक्त्वेत्यर्थ ॥ ४४ ॥ शुद्धमिति। आसनं विनोपविश्येत्यर्थ ॥ ४५ ॥ अरणीसहित अग्निं स्कन्धे तरुप्रकाण्डे बध्वा विलाप्य तरावग्निं विसृज्येत्यर्थ ॥ ५४ ॥ वीरो देहत्यागोत्सुक ॥ ५५ ॥

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्विचत्वारिंशदधिकशततमोऽध्याय ॥ १४२ ॥

१४३

भगवन्निति ॥ १ ॥

चातुर्वर्ण्यं भगवता पूर्वं सृष्टं स्वयंभुवा ।
केन कर्मविपाकेन वैश्यो गच्छति शूद्रताम् २
वैश्यो वा क्षत्रियः केन
द्विजो वा क्षत्रियो भवेत् ।
प्रतिलोमः कथं देव
शक्यो धर्मो निवर्तितुम् ॥ ३
केन वा कर्मणा विप्रः शूद्रयोनौ प्रजायते ।
क्षत्रियः शूद्रतामेति केन वा कर्मणा विभो ४
एतन्मे संशयं देव वद भूतपतेऽनघ ।
त्रयो वर्णाः प्रकृत्येह कथं ब्राह्मण्यमाप्नुयुः ॥ ५

महेश्वर उवाच ।

ब्राह्मण्यं देवि दुष्प्राप निसर्गाद्ब्राह्मणः शुभे
क्षत्रियो वैश्यशूद्रो वा निसर्गादिति मे मतिः
कर्मणा दुष्कृतेनेह स्थानाद्भ्रश्यति वै द्विजः ।
ज्येष्ठं वर्णमनुप्राप्य तस्माद्रक्षेत वै द्विजः ॥७
स्थितो ब्राह्मणधर्मेण ब्राह्मण्यमुपजीवति ।
क्षात्रियो वाऽथ वैश्यो वा ब्रह्मभूयं स गच्छति
यस्तु विप्रत्वमुत्सृज्य क्षात्रं धर्मं निषेवते ।
ब्राह्मण्यात्स परिभ्रष्टः क्षत्रयोनौ प्रजायते ॥९
वैश्यकर्म च यो विप्रो लोभमोहव्यपाश्रयः ।
ब्राह्मण्यं दुर्लभं प्राप्य करोत्यल्पमतिः सदा १०
स द्विजो वैश्यतामेति
वैश्यो वा शूद्रतामियात ।
स्वधर्मात्प्रच्युतो विप्र-
स्ततः शूद्रत्वमाप्नुते ॥ ११
तत्रासौ निरयं प्राप्तो वर्णभ्रष्टो बहिष्कृतः ।
ब्रह्मलोकात्परिभ्रष्टः शूद्रः समुपजायते ॥ १२
क्षत्रियो वा महाभागे वैश्यो वा धर्मचारिणि
स्वानि कर्माण्यपाहाय शूद्रकर्म निषेवते ॥ १३
स्वस्थानात्स परिभ्रष्टो वर्णसङ्करतां गतः ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रत्व याति तादृशः
यस्तु बुद्धः स्वधर्मेण ज्ञानविज्ञानवान् शुचिः
धर्मज्ञो धर्मनिरतः स धर्मफलमश्नुते ॥ १५
इदं चैवापरं देवि ब्रह्मणा समुदाहृतम् ।
अध्यात्मं नैष्ठिकं सद्भिर्धर्मकामैर्निषेव्यते ॥ १६
उग्रान्नं गर्हितं देवि गणान्नं श्राद्धसूतकम् ।
दुष्टान्नं नैव भोक्तव्यं शूद्रान्नं नैव कर्हिचित् ॥
शूद्रान्नं गर्हितं देवि सदा देवैर्महात्मभिः ।
पितामहमुखोत्सृष्टं प्रमाणमिति मे मतिः ॥ १८
शूद्रान्नेनावशेषेण जठरे यो म्रियेद्द्विजः ।
आहिताग्निस्तथा यज्वा स शूद्रगतिभाग्भवेत्
तेन शूद्रान्नशेषेण ब्रह्मस्थानादपाकृतः ।
ब्राह्मणः शूद्रतामेति नास्ति तत्र विचारणा
यस्यान्नेनावशेषेण जठरे यो म्रियेद्द्विजः ।
तां तां योनिं व्रजेद्विप्रो यस्यान्नमुपजीवति ॥
ब्राह्मणत्वं शुभं प्राप्य दुर्लभं योऽवमन्यते ।
अभोज्यान्नानि चाश्नाति स द्विजत्वात्पतेत वै
सुरापो ब्रह्महा क्षुद्रश्चोरो भग्नव्रतोऽशुचिः ।
स्वाध्यायवर्जितः पापो लुब्धो नैकृतिकः शठः
अव्रती वृषलीभर्ता कुंडाशी सोमविक्रयी ।
निहीनसेवी विप्रो हि पतति ब्रह्मयोनितः ॥
गुरुतल्पी गुरुद्रोही गुरुकुत्सारतिश्च यः ।
ब्रह्मविद्यापि पतति ब्राह्मणो ब्रह्मयोनितः २५
एभिस्तु कर्मभिर्देवि शुभैराचरितैस्तथा ।
शूद्रो ब्राह्मणतां याति वैश्यः क्षत्रियतां व्रजेत्
शूद्रकर्माणि सर्वाणि यथान्यायं यथाविधि ।
शुश्रूषां परिचर्यां च ज्येष्ठे वर्णे प्रयत्नतः ॥२७
कुर्यादविमनाः शूद्रः सततं सत्पथे स्थितः ।
देवद्विजातिसत्कर्ता सर्वातिथ्यकृतव्रतः २८
ऋतुकालाभिगामी च नियतो नियताशनः ।
चोक्षश्चोक्षजनान्वेषी शेषान्नकृतभोजनः २९
वृथामांसं न भुञ्जीत शूद्रो वैश्यत्वमृच्छति ।
ऋतवागनहंवादी निर्द्वन्द्वः शमकोविदः ॥
यजते नित्ययज्ञैश्च स्वाध्यायपरमः शुचिः ।
दान्तो ब्राह्मणसत्कर्ता सर्ववर्णबुभूषकः ॥३१
गृहस्थव्रतमातिष्ठन् द्विकालकृतभोजनः ।
शेषाशी विजिताहारो निष्कामो निरहंवदः
अग्निहोत्रमुपासश्च जुह्वानश्च यथाविधि ।
सर्वातिथ्यमुपातिष्ठन् शेषान्नकृतभोजनः ३३
त्रेताग्निमन्त्रविहितो वैश्यो भवति वै द्विजः ।
स वैश्यः क्षत्रियकुले शुचौ महति जायते ३४
स वैश्यः क्षत्रियो जातो जन्मप्रभृति संस्कृतः
उपनीतो व्रतपरो द्विजो भवति सत्कृतः ३५
ददाति यजते यज्ञैः समृद्धैराप्तदक्षिणैः ।
अधीत्य स्वर्गमन्विच्छन्त्रेताग्निशरणः सदा ॥

कुण्डे पाकपात्रे अश्नातीति कुण्डाशी ॥ २४ ॥ चोक्ष शुद्ध ॥ २९ ॥

आर्तहस्तप्रदो नित्यं प्रजा धर्मेण पालयन् ।
सत्यः सत्यानि कुरुते नित्यं यः सुखदर्शनः
धर्मदण्डो न निर्दण्डो धर्मकार्यानुशासकः ।
यन्त्रितः कार्यकरणैः षड्भागकृतलक्षणः ३८
ग्राम्यधर्मं न सेवेत स्वच्छन्देनार्थकोविदः ।
ऋतुकाले तु धर्मात्मा पत्नीमुपशयेत्सदा ३९
सदोपवासी नियतः स्वाध्यायनिरतः शुचिः
बर्हिष्कान्तरिते नित्य शयानोऽग्निगृहे सदा
सर्वातिथ्यं त्रिवर्गस्य कुर्वाणः सुमनाः सदा ।
शूद्राणां चान्नकामाना नित्यं सिद्धमिति ब्रुवन्
अर्थाद्वा यदि वा कामान्न किञ्चिदुपलक्षयेत।
पितृदेवातिथिकृते साधनं कुरुते च यः ॥ ४२
स्ववेश्मनि यथान्यायमुपास्ते भैक्ष्यमेव च ।
त्रिकालमग्निहोत्रं च जुह्वानो वै यथाविधि ॥
गोब्राह्मणहितार्थाय रणे चाभिसुखो हतः ।
त्रेताग्निमन्त्रपूतात्मा समाविश्य द्विजो भवेत्
ज्ञानविज्ञानसंपन्नः संस्कृतो वेदपारगः ।
विप्रो भवति धर्मात्मा क्षत्रियः स्वेन कर्मणा
एतैः कर्मफलैर्देवि न्यूनजातिकुलोद्भवः ।
शूद्रोप्यागमसंपन्नो द्विजो भवति संस्कृतः ॥
ब्राह्मणो वाप्यसद्वृत्तः सर्वसङ्करभोजनः ।
ब्राह्मण्यं स समुत्सृज्य शूद्रो भवति तादृशः ॥
कर्मभिः शुचिभिर्देवि शुद्धात्मा विजितेन्द्रियः
शूद्रोऽपि द्विजवत्सेव्य इति ब्रह्माऽब्रवीत्स्वयम्
स्वभावः कर्म च शुभं यत्र शूद्रेऽपि तिष्ठति ।
विशिष्टः स द्विजातेर्वै विज्ञेय इति मे मतिः ४९
न योनिर्नापि संस्कारो न श्रुतं न च सन्ततिः
कारणानि द्विजत्वस्य वृत्तमेव तु कारणम् ॥
सर्वोऽयं ब्राह्मणो लोके वृत्तेन तु विधीयते ।
वृत्ते स्थितस्तु शूद्रोपि ब्राह्मणत्व नियच्छति
ब्राह्मः स्वभावः सुश्रोणि समः सर्वत्र मे मतिः
निर्गुणं निर्मलं ब्रह्म यत्र तिष्ठति स द्विजः ॥५२
एते योनिफला देवि स्थानभागनिदर्शकाः ।
स्वयं च वरदेनोक्ता ब्रह्मणा सृजता प्रजाः ॥
ब्राह्मणोऽपि महत्क्षेत्रं लोके चरति पादवत्।
यत्तत्र बीजं वपति सा कृषिः प्रेत्य भाविनि ॥
विघसाशिना सदा भाव्यं सत्पथालबिना तथा
ब्राह्मं हि मार्गमाक्रम्य वर्तितव्यं बुभूषता ॥५५
संहिताध्यायिना भाव्यं गृहे वै गृहमेधिना ।
नित्य स्वाध्यायिना भाव्यं न चाध्ययनजीविना
एवंभूतो हि यो विप्रः सत्पथं सत्पथे स्थितः
आहिताग्निरधीयानो ब्रह्मभूयाय कल्पते ५७
ब्राह्मण्यं देवि सप्राप्य रक्षितव्यं यतात्मना ।
योनिप्रतिग्रहादानैः कर्मभिश्च शुचिस्मिते ५८
एतत्ते गुह्यमाख्यातं यथा शूद्रो भवेद्द्विजः ।
ब्राह्मणो वा च्युतो धर्माद्यथा शूद्रत्वमाप्नुते ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि उमामहेश्वरसंवादे त्रिचत्वारिंशदधिकशततमोऽध्यायः ॥ १४३ ॥

१४४

उमोवाच ।
भगवन् सर्वभूतेश देवासुरनमस्कृत ।
धर्माधर्मौ नृणां देव ब्रूहि मेऽसंशयं विभो १
कर्मणा मनसा वाचा त्रिविधं हि नरः सदा
बध्यते बन्धनैः पाशैर्मुच्यतेऽप्यथवा पुनः ॥२
केन शीलेन वृत्तेन कर्मणा कीदृशेन वा ।
समाचारैर्गुणैः कैर्वा स्वर्गं यान्तीह मानवाः
महेश्वर उवाच ।
देवि धर्मार्थतत्त्वज्ञे धर्मनित्ये दमे रते ।
सर्वप्राणिहितः प्रश्नः श्रूयतां बुद्धिवर्धनः ॥ ४

पादवत् गतिमत् ॥ ५४ ॥ **ब्राह्मण्यमिति** कुयोनिसंबंधात् कुप्रतिग्रहात् आदानाच्च ब्राह्मण्यं नश्यतीति भाव ॥ ५८ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्रिचत्वारिंशदधिकशततमोऽध्याय ॥१४३॥

१४४

भगवन्निति ॥ १ ॥

सत्यधर्मरताः सन्तः सर्वलिङ्गविवर्जिताः ।
धर्मलब्धार्थभोक्तारस्ते नराः स्वर्गगामिनः ॥ ५
नाधर्मेण न धर्मेण बध्यन्ते छिन्नसंशयाः ।
प्रलयोत्पत्तितत्त्वज्ञाः सर्वज्ञाः सर्वदर्शिनः ६
वीतरागा विमुच्यन्ते पुरुषाः कर्मबन्धनैः ।
कर्मणा मनसा वाचा ये न हिंसन्ति किञ्चन
ये न सज्जन्ति कस्मिंश्चित्ते न बध्यन्ति कर्मभिः
प्राणातिपाताद्विरताः शीलवन्तो दयान्विताः
तुल्यद्वेष्यप्रिया दान्ता मुच्यन्ते कर्मबन्धनैः ।
सर्वभूतदयावन्तो विश्वास्याः सर्वजन्तुषु ॥ ९
त्यक्तहिंसासमाचारास्ते नराः स्वर्गगामिनः ।
परस्वे निर्ममा नित्यं परदारविवर्जकाः ॥ १०
धर्मलब्धान्नभोक्तारस्ते नराः स्वर्गगामिनः ।
मातृवत्स्वसृवच्चैव नित्यं दुहितृवच्च ये ॥ ११
परदारेषु वर्तन्ते ते नराः स्वर्गगामिनः ।
स्तैन्यान्निवृत्ताः सततं सन्तुष्टाः स्वधनेन च ॥
स्वभाग्यान्युपजीवन्ति ते नराः स्वर्गगामिनः ।
स्वदारनिरता ये च ऋतुकालाभिगामिनः १३
अग्राम्यसुखभोगाश्च ते नराः स्वर्गगामिनः ।
परदारेषु ये नित्यं चरित्रावृतलोचनाः ॥ १४
यतेन्द्रियाः शीलपरास्ते नराः स्वर्गगामिनः ।
एष देवकृतो मार्गः सेवितव्यः सदा नरैः १५
अकषायकृतश्चैव मार्गः सेव्यः सदा बुधैः ।
दानधर्मतपोयुक्तः शीलशौचदयात्मकः १६
वृत्त्यर्थं धर्महेतोर्वा सेवितव्यः सदा नरैः ।
स्वर्गवासमभीप्सद्भिर्न सेव्यस्त्वत उत्तरः १७

उमोवाच ।

वाचा तु बध्यते येन मुच्यतेऽप्यथवा पुनः।
तानि कर्माणि मे देव वद भूतपतेऽनघ ॥ १८

महेश्वर उवाच ।

आत्महेतोः परार्थं वा नर्महास्याश्रयात्तथा।
ये मृषा न वदन्तीह ते नराः स्वर्गगामिनः ॥
वृत्त्यर्थं धर्महेतोर्वा कामकारात्तथैव च ।
अनृतं ये न भाषन्ते ते नराः स्वर्गगामिनः २०
श्लक्ष्णां वाणीं निराबाधां मधुरां पापवर्जिताम्
स्वागतेनाभिभाषन्ते ते नराः स्वर्गगामिनः ॥
परुषं ये न भाषन्ते कटुकं निष्ठुरं तथा ।
अपैशुन्यरताः सन्तस्ते नराः स्वर्गगामिनः २२
पिशुनां न प्रभाषन्ते मित्रभेदकरीं गिरम् ।
ऋतं मैत्रं तु भाषन्ते ते नराः स्वर्गगामिनः ॥
ये वर्जयन्ति परुषं परद्रोहं च मानवाः ।
सर्वभूतसमा दान्तास्ते नराः स्वर्गगामिनः२४
शठप्रलापाद्विरता विरुद्धपरिवर्जकाः ।
सौम्यप्रलापिनो नित्यं ते नराः स्वर्गगामिनः
न कोपाद्याहरन्ते ये वाचं हृदयदारणीम् ।
सान्त्व वदन्ति क्रुद्धाऽपि ते नराः स्वर्गगामिनः
एष वाणीकृतो देवि धर्मः सेव्यः सदा नरैः
शुभः सत्यगुणो नित्यं वर्जनीयो मृषा बुधैः ॥

उमोवाच ।

मनसा बध्यते येन कर्मणा पुरुषः सदा ।
तन्मे ब्रूहि महाभाग देवदेव पिनाकधृत् २८

महेश्वर उवाच ।

मानसेनेह धर्मेण संयुक्ताः पुरुषाः सदा ।
स्वर्गं गच्छन्ति कल्याणि तन्मे कीर्तयतः शृणु
दुष्प्रणीतेन मनसा दुष्प्रणीततराकृतिः ।
मनो बध्यति येनेह शृणु वाक्यं शुभानने ३०
अरण्ये विजने न्यस्त परस्व दृश्यते यदा ।
मनसाऽपि न हिंसन्ति ते नराः स्वर्गगामिनः
ग्रामे गृहे वा ये द्रव्यं पारक्यं विजने स्थितम्
नाभिनन्दन्ति वै नित्यं ते नराः स्वर्गगामिनः
तथैव परदारान् ये कामवृत्तान् रहोगतान् ।
मनसाऽपि न हिंसन्ति ते नराः स्वर्गगामिनः
शत्रुं मित्र च ये नित्य तुल्येन मनसा नराः ।
भजन्ति मैत्राः सङ्गम्य ते नराः स्वर्गगामिनः
श्रुतवन्तो दयावन्तः शुचयः सत्यसङ्गराः ।
स्वैरर्थैः परिसन्तुष्टास्ते नराः स्वर्गगामिनः ३५
अवैरा ये त्वनायासा मैत्रीचित्तरताः सदा ।
सर्वभूतदयावन्तस्ते नराः स्वर्गगामिनः ॥ ३६
श्रद्धावन्तो दयावन्तश्चोक्षाश्चोक्षजनप्रियाः ।
धर्माधर्मविदो नित्यं ते नराः स्वर्गगामिनः ॥
शुभानामशुभानां च कर्मणा फलसञ्चये ।
विपाकज्ञाश्च ये देवि ते नराः स्वर्गगामिनः ॥
न्यायोपेता गुणोपेता देवद्विजपराः सदा ।
समुत्थानमनुप्राप्तास्ते नराः स्वर्गगामिनः ३९

सर्वेषामाश्रमाणा लिंगैर्विवर्जिता ॥ ५ ॥ न सज्जन्ति सक्ता न भवन्ति प्राणातिपातात् इन्द्रियाणा विषयाभिमुख्यात् ॥ ८ ॥ अकषायकृत रागद्वेषाद्यभावार्थं निर्मित ॥ १६ ॥ नर्म कौटिल्यं विना स्वगादौ सर्पभ्रमोत्पादन हास्य तादृशमेव मात्रादिषु दोषारोपपूर्वक गालनम् ॥ १९ ॥ न हिंसन्ति आदानेन तत्स्वामिनं न पीडयन्ति ॥ ३१ ॥

शुभैः कर्मफलैर्देवि मयैते परिकीर्तिताः ।
स्वर्गमार्गपरा भूयः किं त्वं श्रोतुमिहेच्छसि ॥
उमोवाच ।
महान्मे संशयः कश्चिन्मर्त्यान्प्रति महेश्वर ।
तस्मात्त्वं नैपुणेनाद्य मम व्याख्यातुमर्हसि ४१
केनायुर्लभते दीर्घं कर्मणा पुरुषः प्रभो ।
तपसा वापि देवेश केनायुर्लभते महत् ॥ ४२
क्षीणायुः केन भवति कर्मणा भुवि मानवः ।
विपाकं कर्मणां देव वक्तुमर्हस्यनिन्दित ४३
अपरे च महाभाग्या मन्दभाग्यास्तथाऽपरे ।
अकुलीनास्तथा चान्ये कुलीनाश्च तथाऽपरे
दुर्दर्शाः केचिदाभान्ति नराः काष्ठमया इव ।
प्रियदर्शास्तथा चान्ये दर्शनादेव मानवाः ४५
दुष्प्रज्ञाः केचिदाभांति केचिदाभांति पंडिताः
महाप्राज्ञास्तथैवान्ये ज्ञानविज्ञानभाविनः ॥
अल्पाबाधास्तथा केचिन्महाबाधास्तथाऽपरे
दृश्यन्ते पुरुषा देव तन्मे व्याख्यातुमर्हसि ४७
महेश्वर उवाच ।
हन्त तेऽहं प्रवक्ष्यामि देवि कर्मफलोदयम्।
मर्त्यलोके नरः सर्वो येन स्वफलमश्नुते ॥ ४८
प्राणातिपाते यो रौद्रो दण्डहस्तोद्यतः सदा
नित्यमुद्यतशस्त्रश्च हन्ति भूतगणान्नरः ॥ ४९
निर्दयः सर्वभूतानां नित्यमुद्वेगकारकः ।
अपि कीटपिपीलानामशरण्यः सुनिर्घृणः ५०
एवंभूतो नरो देवि निरयं प्रतिपद्यते ।
विपरीतस्तु धर्मात्मा रूपवानभिजायते ५१
पापेन कर्मणा देवि वध्यो हिंसारतिर्नरः ।
अप्रियः सर्वभूतानां हीनायुरुपजायते ॥ ५२
निरयं याति हिंसात्मा याति स्वर्गमहिंसकः
यातनां निरये रौद्रां स कृच्छ्रां लभते नरः५३
यः कश्चिन्निरयात्तस्मात्समुत्तरति कर्हिचित्।
मानुष्यं लभते चापि हीनायुस्तत्र जायते ५४
पापेन कर्मणा देवि बद्धो हिंसारतिर्नरः ।
अप्रियः सर्वभूतानां हीनायुरुपजायते ॥ ५५
यस्तु शुक्लाभिजातीयः प्राणिघातविवर्जकः ।
निक्षिप्तशस्त्रो निर्दण्डो न हिंसति कदाचन५६
न घातयति नो हन्ति घ्नन्त नैवानुमोदते ।
सर्वभूतेषु सस्नेहो यथाऽऽत्मनि तथाऽपरे ५७
ईदृशः पुरुषोत्कर्षो देवि देवत्वमश्नुते ।
उपपन्नान्सुखान्भोगानुपाश्नाति मुदा युतः ५८
अथ चेन्मानुषे लोके कदाचिदुपपद्यते ।
तत्र दीर्घायुरुत्पन्नः स नरः सुखमेधते ॥ ५९
एष दीर्घायुषां मार्गः सुवृत्तानां सुकर्मिणाम् ।
प्राणिहिंसाविमोक्षेण ब्रह्मणा समुदीरितः ६०

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि उमामहेश्वरसंवादे चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४४ ॥



१४५

उमोवाच ।
किंशीलः किंसमाचारः पुरुषः कैश्च कर्मभिः
स्वर्गं समभिपद्येत संप्रदानेन केन वा ॥ १
महेश्वर उवाच ।
दाता ब्राह्मणसत्कर्ता दीनार्तकृपणादिषु ।
भक्ष्यभोज्यान्नपानानां वाससां च प्रदायकः २
प्रतिश्रयान्सभाः कूपान्प्रपाः पुष्करिणीस्तथा
नैत्यकानि च सर्वाणि किमिच्छकमतीव च
आसनं शयनं यानं गृहं रत्नं धनं तथा ।
सस्यजातानि सर्वाणि गाः क्षेत्राण्यथ योषितः
सुप्रतीतमना नित्यं यः प्रयच्छति मानवः ।
एवंभूतो नरो देवि देवलोकेऽभिजायते ॥ ५
तत्रोष्य सुचिरं कालं भुक्त्वा भोगाननुत्तमान् ।
सहाप्सरोभिर्मुदितो रमते नन्दनादिषु ॥ ६
तस्मात्स्वर्गाच्च्युतो लोकान्मानुषेषु प्रजायते
महाभोगकुले देवि धनधान्यसमन्वितः ॥ ७

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चतुश्चत्वारिंशदधिकशततमोऽध्याय ॥ १४४ ॥

१४५

किमिति ॥ १ ॥ नैत्यकानि नित्यदेयानि किमिच्छसीति पृष्ट्वा यदीप्सितं दीयते तत्किमिच्छकम् ॥ ३ ॥

तत्र कामगुणैः सर्वैः समुपेतो मुदा युतः ।
महाभोगो महाकोशो धनी भवति मानवः ८
एते देवि महाभागाः प्राणिनो दानशीलिनः ।
ब्रह्मणा वै पुरा प्रोक्ताः सर्वस्य प्रियदर्शनाः ९
अपरे मानवा देवि प्रदानकृपणा द्विजैः ।
याचिता न प्रयच्छन्ति विद्यमानेऽप्यबुद्धयः ॥
दीनान्धकृपणान्दृष्ट्वा भिक्षुकानतिथीनपि ।
याच्यमाना निवर्तन्ते जिह्मालोभसमन्विताः
न धनानि न वासांसि न भोगान्न च काञ्चनं
न गावो नान्नविकृतिं प्रयच्छन्ति कदाचन ॥
अप्रवृत्ताश्च ये लुब्धा नास्तिका दानवर्जिताः
एवंभूता नरा देवि निरयं यान्त्यबुद्धयः १३
ते वै मनुष्यतां यान्ति यदा कालस्य पर्ययात्
धनरिक्ते कुले जन्म लभन्ते स्वल्पबुद्धयः ॥ १४
क्षुत्पिपासापरीताश्च सर्वलोकबहिष्कृताः ।
निराशाः सर्वभोगेभ्यो जीवन्त्यधर्मजीविकां
अल्पभोगकुले जाता अल्पभोगरता नराः ।
अनेन कर्मणा देवि भवन्त्यधनिनो नराः १६
अपरे स्तब्धिनो नित्यं मानिनः पापतो रताः ।
आसनार्हस्य ये पीठं न प्रयच्छन्त्यचेतसः १७
मार्गार्हस्य च ये मार्गं न यच्छन्त्यल्पबुद्धयः ।
पाद्यार्हस्य च ये पाद्यं न ददत्यल्पबुद्धयः ॥ १८
अर्घार्हान्न च सत्कारैरर्चयन्ति यथाविधि ।
अर्घ्यमाचमनीयं वा न यच्छन्त्यल्पबुद्धयः १९
गुरुं चाभिगतं प्रेम्णा गुरुवन्न बुभूषते ।
अभिमानप्रवृत्तेन लोभेन समवस्थिताः ॥ २०
संमान्याश्चावमन्यन्ते वृद्धान्परिभवन्ति च ।
एवंविधा नरा देवि सर्वे निरयगामिनः ॥ २१
ते वै यदि नरास्तस्मान्निरयादुत्तरन्ति वै ।
वर्षपूगैस्ततो जन्म लभन्ते कुत्सिते कुले ॥ २२
श्वपाकपुल्कसादीनां कुत्सितानामचेतसाम् ।
कुलेषु तेषु जायन्ते गुरुवृद्धापचायिनः ॥ २३
न स्तब्धो न च मानी यो देवताद्विजपूजकः ।
लोकपूज्यो नमस्कर्ता प्रश्रितो मधुर वचः २४
सर्ववर्णप्रियकरः सर्वभूतहितः सदा ।
अद्वेषी सुमुखः श्लक्ष्णः स्निग्धवाणीप्रदः सदा
स्वागतेनैव सर्वेषा भूतानामविहिंसकः ।
यथार्हसत्क्रियापूर्वमर्चयन्नवतिष्ठति ॥ २६
मार्गार्हाय ददन्मार्गं गुरुं गुरुवदर्चयन् ।
अतिथिप्रग्रहरतस्तथाऽभ्यागतपूजकः ॥ २७
एवंभूतो नरो देवि स्वर्गतिं प्रतिपद्यते ।
ततो मानुषतां प्राप्य विशिष्टकुलजो भवेत् ॥
तत्रासौ विपुलैर्भोगैः सर्वरत्नसमायुतः ।
यथार्हदाता चार्हेषु धर्मचर्यापरो भवेत् ॥ २९
समतः सर्वभूतानां सर्वलोकनमस्कृतः ।
स्वकर्मफलमाप्नोति स्वयमेव नरः सदा ॥ ३०
उदात्तकुलजातीय उदात्ताभिजनः सदा ।
एष धर्मो मया प्रोक्तो विधात्रा स्वयमीरितः ॥
यस्तु रौद्रसमाचारः
सर्वसत्त्वभयङ्करः ।
हस्ताभ्यां यदि वा पद्भ्या
रज्ज्वा दण्डेन वा पुनः ॥ ३२
लोष्टैः स्तम्भैरायुधैर्वा जन्तून्बाधति शोभने ।
हिंसार्थं निकृतिप्रज्ञः प्रोद्वेजयति चैव ह ॥ ३३
उपक्रामति जन्तूंश्च उद्वेगजननः सदा ।
एवंशीलसमाचारो निरय प्रतिपद्यते ॥ ३४
स वै मनुष्यता गच्छेद्यदि कालस्य पर्ययात् ।
बह्वाबाधपरिक्लिष्टे जायते सोऽधमे कुले ॥३५
लोकद्वेष्योऽधमः पुंसां स्वय कर्मफलैः कृतैः ।
एष देवि मनुष्येषु बोद्धव्यो ज्ञातिबन्धुषु ॥३६
अपरः सर्वभूतानि दयावाननुपश्यति ।
मैत्रदृष्टिः पितृसमो निर्वैरो नियतेन्द्रियः॥ ३७
नोद्वेजयति भूतानि न विघातयते तथा ।
हस्तपादैः सुनियतैर्विश्वास्यः सर्वजन्तुषु ३८
न रज्ज्वा न च दण्डेन न लोष्टैर्नायुधेन च ।
उद्वेजयति भूतानि श्लक्ष्णकर्मा दयापरः॥ ३९
एवंशीलसमाचारः स्वर्गं समुपजायते ।
तत्रासौ भवने दिव्ये मुदा वसति देववत् ४०
स चेत्कर्मक्षयान्मर्त्यो मनुष्येषूपजायते ।
अल्पाबाधो निरान्तकः स जातः सुखमेधते
सुखभागी निरायासो निरुद्वेगः सदा नरः ।
एष देवि सता मार्गो बाधा यत्र न विद्यते ४२

उमोवाच ।

इमे मनुष्या दृश्यन्ते ऊहापोहविशारदाः ।
ज्ञानविज्ञानसम्पन्नाः प्रज्ञावन्तोऽर्थकोविदाः॥

अतिथीन् दृष्ट्वा तैर्याच्यमाना सन्तो निवर्तन्ते न प्रयच्छन्ति ॥ ११ ॥ गुरुवृद्धापचायिन गुरूणा वृद्धाना च हीनत्व- संपादका ॥ २३ ॥ गुरुवत् पितृवत् ॥ २७ ॥ उदात्त प्रश- स्तम् ॥ ३१ ॥ ऊहः सिद्धान्त अपोहः पूर्वपक्ष ॥४३॥

दुष्प्रज्ञाश्चापरे देव ज्ञानविज्ञानवर्जिताः ।
केन कर्मविशेषेण प्रज्ञावान्पुरुषो भवेत् ॥ ४४
अल्पप्रज्ञो विरूपाक्ष कथं भवति मानवः ।
एतन्मे संशयं छिंधि सर्वधर्मविदां वर ॥ ४५
जात्यन्धाश्चापरे देव रोगार्ताश्चापरे तथा ।
नराः क्लीबाश्च दृश्यन्ते कारणं ब्रूहि तत्र वै ४६

महेश्वर उवाच ।

ब्राह्मणान् वेदविदुषः सिद्धान् धर्मविदस्तथा
परिपृच्छन्त्यहरहः कुशलाः कुशलं तथा ॥४७
वर्जयन्तोऽशुभं कर्म सेवमानाः शुभं तथा ।
लभन्ते स्वर्गति नित्यमिहलोके तथा सुखम् ॥
स चेन्मानुषता याति मेधावी तत्र जायते ।
श्रुतं प्रज्ञानुगं यस्य कल्याणमुपजायते ४९
परदारेषु ये चापि चक्षुर्दुष्टं प्रयुञ्जते ।
तेन दुष्टस्वभावेन जात्यन्धास्ते भवन्ति ह ५०
मनसा तु प्रदुष्टेन नग्नां पश्यन्ति ये स्त्रियम् ।
रोगार्तास्ते भवन्तीह नरा दुष्कृतकर्मिणः ५१
ये तु मूढा दुराचारा वियोनौ मैथुने रताः ।
पुरुषेषु सुदुष्प्रज्ञाः क्लीबत्वमुपयान्ति ते ॥ ५२
पशूश्च ये घातयन्ति ये चैव गुरुतल्पगाः ।
प्रकीर्णमैथुना ये च क्लीबा जायन्ति ते नराः

उमोवाच ।

सावद्यं किन्तु वै कर्म निरवद्यं तथैव च ।
श्रेयः कुर्वन्नवाप्नोति मानवो देवसत्तम ॥ ५४

महेश्वर उवाच ।

श्रेयांसं मार्गमन्विच्छन्
सदा यः पृच्छति द्विजान्
धर्मान्वेषी गुणाकांक्षी
स स्वर्गं समुपाश्नुते ॥ ५५
यदि मानुषतां देवि कदाचित्स निगच्छति ।
मेधावी धारणायुक्तः प्रायस्तत्राभिजायते ५६
एष देवि सतां धर्मो मन्तव्यो भूतिकारकः ।
नृणा हितार्थाय मया तव वै समुदाहृतः ॥ ५७

उमोवाच ।

अपरे स्वल्पविज्ञाना धर्मविद्वेषिणो नराः ।
ब्राह्मणान् वेदविदुषो नेच्छन्ति परिसर्पितुम्
व्रतवन्तो नराः केचिच्छ्रद्धाधर्मपरायणाः ।
अव्रता भ्रष्टनियमास्तथाऽन्ये राक्षसोपमाः ५९
यज्वानश्च तथैवान्ये निर्होमाश्च तथाऽपरे ।
केन कर्मविपाकेन भवन्तीह वदस्व मे ६०

महेश्वर उवाच ।

आगमा लोकधर्माणा मर्यादाः सर्वनिर्मिताः
प्रामाण्येनानुवर्तन्ते दृश्यन्ते च दृढव्रताः ॥६१
अधर्मं धर्ममित्याहुर्ये च मोहवश गताः ।
अव्रता नष्टमर्यादास्ते प्रोक्ता ब्रह्मराक्षसाः ६२
ते चेत्कालकृतोद्योगात्सम्भवन्तीह मानुषाः
निर्होमा निर्वषट्कारास्ते भवन्ति नराधमाः
एष देवि मया सर्वः संशयच्छेदनाय ते ।
कुशलाकुशलो नणां व्याख्यातो धर्मसागरः

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि उमामहेश्वरसंवादे पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥ १४५ ॥

१४६

नारद उवाच ।

एवमुक्त्वा महादेवः श्रोतुकामः स्वयंप्रभुः ।
अनुकूलां प्रियां भार्यां पार्श्वस्थां समभाषत १

महेश्वर उवाच ।

परावरज्ञे धर्मज्ञे तपोवननिवासिनि ।
साध्वि सुभ्रु सुकेशान्ते हिमवत्पर्वतात्मजे ॥ २

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चचत्वारिंशदधिकशततमोऽध्याय ॥ १४५ ॥

१४६

एवमिति ॥ १ ॥

दक्षे शमदमोपेते निर्ममे धर्मचारिणि ।
पृच्छामि त्वां वरारोहे पृष्टा वद ममेप्सितम्
सावित्री ब्रह्मणः साध्वी
कौशिकस्य शची सती ।
मार्कण्डेयस्य धूमोर्णा
ऋद्धिर्वैश्रवणस्य च ॥ ४
वरुणस्य तथा गौरी
सूर्यस्य च सुवर्चला ।
रोहिणी शशिनः साध्वी
स्वाहा चैव विभावसोः ॥ ५
अदितिः कश्यपस्याथ सर्वास्ताः पतिदेवताः।
पृष्टाश्चोपासिताश्चैव तास्त्वया देवि नित्यशः
तेन त्वां परिपृच्छामि धर्मज्ञे धर्मवादिनि ।
स्त्रीधर्मं श्रोतुमिच्छामि त्वयोदाहृतमादितः ७
सधर्मचारिणी मे त्वं समशीला समव्रता ।
समानसारवीर्या च तपस्तीव्रं कृतं च ते ॥ ८
त्वया ह्युक्तो विशेषेण गुणवान्स भविष्यति ।
लोके चैव त्वया देवि प्रमाणत्वमुपैष्यति॥९
स्त्रियश्चैव विशेषेण स्त्रीजनस्य गतिः परा ।
गौर्यो गच्छति सुश्रोणि लोकेष्वेषा गतिः सदा
मम चार्धं शरीरस्य तव चार्धेन निर्मितम् ।
सुरकार्यकरी च त्वं लोकसन्तानकारिणी ॥
तव सर्वः सुविदितः स्त्रीधर्मः शाश्वतः शुभे ।
तस्मादशेषतो ब्रूहि स्वधर्मं विस्तरेण मे ॥ १२

उमोवाच ।

भगवन्सर्वभूतेश भूतभव्यभवोत्तम ।
त्वत्प्रभावादियं देव वाक्चैव प्रतिभाति मे १३
इमास्तु नद्यो देवेश सर्वतीर्थोदकैर्युताः ।
उपस्पर्शनहेतोस्त्वामुपयान्ति समीपतः ॥ १४
एताभिः सह संमन्त्र्य प्रवक्ष्याम्यनुपूर्वशः ।
प्रभवन्योऽनहंवादी स वै पुरुष उच्यते ॥ १५
स्त्री च भूतेश सततं स्त्रियमेवानुधावति ।
मया समानिताश्चैव भविष्यन्ति सरिद्वराः ॥
एषा सरस्वती पुण्या नदीनामुत्तमा नदी ।
प्रथमा सर्वसरितां नदी सागरगामिनी ॥ १७
विपाशा च वितस्ता च चन्द्रभागा इरावती
शतद्रूर्देविका सिन्धुः कौशिकी गौतमी तथा
तथा देवनदी चेयं सर्वतीर्थाभिसंभृता ।
गगनाद्गां गता देवी गङ्गा सर्वसरिद्वरा ॥ १९
इत्युक्त्वा देवदेवस्य पत्नी धर्मभृतां वरा ।
स्मितपूर्वमथाभाष्य सर्वास्ताः सरितस्तथा २०
अपृच्छद्देवमहिषी स्त्रीधर्मं धर्मवत्सला ।
स्त्रीधर्मकुशलास्ता वै गङ्गाद्याः सरितां वराः

उमोवाच ।

अयं भगवता प्रोक्तः प्रश्नः स्त्रीधर्मसंश्रितः ।
तं तु संमन्त्र्य युष्माभिर्वक्तुमिच्छामि शङ्करम्
न चैकसाध्यं पश्यामि विज्ञानं भुवि कस्यचित्
दिवि वा सागरगमास्तेन वो मानयाम्यहम्
एवं सर्वाः सरिच्छ्रेष्ठाः पृष्टाः पुण्यतमाः शिवाः
ततो देवनदी गङ्गा नियुक्ता प्रतिपूज्य च २४
बह्वीभिर्बुद्धिभिः स्फीता
स्त्रीधर्मज्ञा शुचिस्मिता ।
शैलराजसुतां देवीं
पुण्या पापभयापहा ॥ २५
बुद्ध्या विनयसंपन्ना सर्वधर्मविशारदा ।
सस्मितं बहुबुद्ध्याढ्या गङ्गा वचनमब्रवीत् ॥

गङ्गोवाच ।

धन्याऽस्म्यनुगृहीताऽस्मि देवि धर्मपरायणे
या त्वं सर्वजगन्मान्या नदी मानयसेऽनघे ॥
प्रभवन् पृच्छते यो हि संमानयति वा पुनः ।
नूनं जनमदुष्टात्मा पण्डिताख्यां स गच्छति॥
ज्ञानविज्ञानसंपन्नानूहापोहविशारदान् ।
प्रवक्तॄन् पृच्छते योऽन्यान् स वै नापदमृच्छति
अन्यथा बहुबुद्ध्याढ्यो वाक्यं वदति संसदि।
अन्यथैव ह्यहंवादी दुर्बलं वदते वचः ॥ ३०
दिव्यज्ञाने दिवि श्रेष्ठे दिव्यपुण्यैः सहोत्थिते
त्वमेवार्हसि नो देवि स्त्रीधर्मानुभाषितुम् ॥
ततः साराधिता देवी गङ्गया बहुभिर्गुणैः ।
प्राह सर्वमशेषेण स्त्रीधर्मं सुरसुन्दरी ॥ ३२

उमोवाच ।

स्त्रीधर्मो मां प्रति यथा प्रति भाति यथाविधि
तमहं कीर्तयिष्यामि तथैव प्रश्रिता भव॥३३
स्त्रीधर्मः पूर्व एवायं विवाहे बन्धुभिः कृतः ।
सहधर्मचरी भर्तुर्भवत्यग्निसमीपतः ॥ ३४
सुस्वभावा सुवचना सुवृत्ता सुखदर्शना ।
अनन्यचित्ता सुमुखी भर्तुः सा धर्मचारिणी ॥
सा भवेद्धर्मपरमा सा भवेद्धर्मभागिनी ।
देववत्सततं साध्वी या भर्तारं प्रपश्यति ३६


गुणवान् स स्त्रीधर्म ॥ ९ ॥ गौर्या भूमौ गच्छति अनादिपरपरया चलति ॥ १० ॥

शुश्रूषां परिचारं च देववद्या करोति च ।
नान्यभावा ह्यविमनाः सुव्रता सुखदर्शना ॥
पुत्रवक्त्रमिवाभीक्ष्णं भर्तुर्वदनमीक्षते ।
या साध्वी नियताहारा सा भवेद्धर्मचारिणी
श्रुत्वा दम्पतिधर्मं वै सहधर्मं कृतं शुभम् ।
या भवेद्धर्मपरमा नारी भर्तृसमव्रता ॥ ३९
देववत्सततं साध्वी भर्तारमनुपश्यति ।
दम्पत्योरेष वै धर्मः सहधर्मकृतः शुभः ॥४०
शुश्रूषां परिचारं च देवतुल्यं प्रकुर्वती ।
वश्या भावेन सुमनाः सुव्रता सुखदर्शना ।
अनन्यचित्ता सुमुखी भर्तुः सा धर्मचारिणी
परुषाण्यपि चोक्ता या दृष्टा दुष्टेन चक्षुषा ।
सुप्रसन्नमुखी भर्तुर्या नारी सा पतिव्रता ॥४२
न चन्द्रसूर्यौ न तरुं पुंनाम्ना या निरीक्षते ।
भर्तृवर्जं वरारोहा सा भवेद्धर्मचारिणी ॥ ४३
दरिद्रं व्याधितं दीनमध्वना परिकार्शितम् ।
पतिं पुत्रमिवोपास्ते सा नारी धर्मभागिनी ॥
या नारी प्रयता दक्षा या नारी पुत्रिणी भवेत्
पतिप्रिया पतिप्राणा सा नारी धर्मभागिनी
शुश्रूषां परिचर्यां च करोत्यविमनाः सदा ।
सुप्रतीता विनीता च सा नारी धर्मभागिनी
न कामेषु न भोगेषु नैश्वर्ये न सुखे तथा ।
स्पृहा यस्या यथा पत्यौ सा नारी धर्मभागिनी
कल्योत्थानरतिर्नित्यं गृहशुश्रूषणे रता ।
सुसंमृष्टक्षया चैव गोशकृत्कृतलेपना ॥ ४८
अग्निकार्यपरा नित्यं सदा पुष्पबलिप्रदा ।
देवतातिथिभृत्यानां निर्वाप्य पतिना सह ॥
शेषान्नमुपभुञ्जाना यथान्यायं यथाविधि ।
तुष्टपुष्टजना नित्यं नारीं धर्मेण युज्यते ॥ ५०
श्वश्रूश्वशुरयोः पादौ जोषयन्ती गुणान्विता ।
मातापितृपरा नित्यं या नारी सा तपोधना
ब्राह्मणान् दुर्बलानाथान्दीनान्धकृपणांस्तथा ।
बिभर्त्यन्नेन या नारी सा पतिव्रतभागिनी ॥
व्रतं चरति या नित्यं दुश्चरं लघुसत्त्वया ।
पतिचित्ता पतिहिता सा पतिव्रतभागिनी ॥
पुण्यमेतत्तपश्चैतत्स्वर्गश्चैष सनातनः ।
या नारी भर्तृपरमा भवेद्भर्तृव्रता सती ॥ ५४
पतिर्हि देवो नारीणां पतिर्बन्धुः पतिर्गतिः ।
पत्या समा गतिर्नास्ति दैवतं वा यथा पतिः
पतिप्रसादः स्वर्गो वा तुल्यो नार्या न वा भवेत्
अह स्वर्गं न हीच्छेयं त्वय्यप्रीते महेश्वरे ५६
यद्यकार्यमधर्मं वा यदि वा प्राणनाशनम् ।
पतिर्ब्रूयाद्दरिद्रो वा व्याधितो वा कथञ्चन ॥
आपन्नो रिपुसस्थो वा ब्रह्मशापार्दितोपि वा ।
आपद्धर्मानुप्रेक्ष्य तत्कार्यमविशंकया ॥ ५८
एष देव मया प्रोक्तः स्त्रीधर्मो वचनात्तव ।
या त्वेवंभाविनी नारी सा पतिव्रतभागिनी

भीष्म उवाच ।

इत्युक्तः स तु देवेशः प्रतिपूज्य गिरेः सुताम्
लोकान् विसर्जयामास सर्वैरनुचरैर्वृतान् ६०
ततो ययुर्भूतगणाः सरितश्च यथागतम् ।
गन्धर्वाप्सरसश्चैव प्रणम्य शिरसा भवम् ६१

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि उमामहेश्वरसंवादे स्त्रीधर्मकथने षट्चत्वारिंशदधिकशततमोऽध्यायः ॥ १४६ ॥



१४७

ऋषय ऊचुः ।

पिनाकिन् भगनेत्रघ्न सर्वलोकनमस्कृत । माहात्म्यं वासुदेवस्य श्रोतुमिच्छामि शङ्कर १

वश्याभावेन मन्त्रादिना वशीकरणं विना ॥ ४१ ॥ चन्द्रसूर्यौ तरुमपि या पुरुषनामत्वान्न निरीक्षते किमु नरं पशुं वेति भाव ॥ ४३ ॥ सुसंमृष्टक्षया शोधितगृहा ॥ ४८ ॥ लघुसत्त्वया शीघ्रमर्यादावबोधिन्या बुद्धया ॥ ५३ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षट्चत्वारिंशदधिकशततमोऽध्याय ॥ १४६ ॥

१४७

पिनाकिन्निति । अस्मिन्नध्याये यो हि मा द्रष्टुमिच्छेतेति श्लोकद्वयेन ब्रह्मविष्णुरुद्राणामैकात्म्य दर्शित यत्प्रागुपदर्शित तदेवात्रोपसंहृतमिति बोध्यम् ॥ १ ॥

ईश्वर उवाच ।

पितामहादपि वरः शाश्वतः पुरुषो हरिः ।
कृष्णो जाम्बूनदाभासो व्यभ्रे सूर्य इवोदितः २
दशबाहुर्महातेजा देवतारिनिषूदनः ।
श्रीवत्साङ्को हृषीकेशः सर्वदैवतपूजितः ॥ ३
ब्रह्मा तस्योदरभवस्तस्याहं च शिरोभवः ।
शिरोरुहेभ्यो ज्योतींषि रोमभ्यश्च सुरासुराः॥
ऋषयो देहसम्भूतास्तस्य लोकाश्च शाश्वताः
पितामहगृहं साक्षात्सर्वदेवगृहं च सः ॥ ५

सोऽस्याः पृथिव्याः कृत्स्नायाः
स्रष्टा त्रिभुवनेश्वरः ।
संहर्ता चैव भूतानां
स्थावरस्य चरस्य च ॥ ६

स हि देववरः साक्षाद्देवनाथः परंतपः ।
सर्वज्ञः सर्वसंश्रिष्टः सर्वगः सर्वतोमुखः ॥ ७
परमात्मा हृषीकेशः सर्वव्यापी महेश्वरः ।
न तस्मात्परमं भूतं त्रिषु लोकेषु किञ्चन ॥ ८
सनातनो वै मधुहा गोविन्द इति विश्रुतः ।
स सर्वान्पार्थिवान्संख्ये घातयिष्यति मानदः
सुरकार्यार्थमुत्पन्नो मानुषं वपुरास्थितः ।
न हि देवगणाः शक्तास्त्रिविक्रमविनाकृताः १०
भुवने देवकार्याणि कर्तुं नायकवर्जिताः ।
नायकः सर्वभूतानां सर्वदेवनमस्कृतः ॥ ११
एतस्य देवनाथस्य देवकार्यपरस्य च ।
ब्रह्मभूतस्य सततं ब्रह्मर्षिशरणस्य च ॥ १२
ब्रह्मा वसति गर्भस्थः शरीरे सुखसंस्थितः ।
शर्वः सुखं संश्रितश्च शरीरे सुखसंस्थितः १३
सर्वाः सुखं संश्रिताश्च शरीरे तस्य देवताः ।
स देवः पुण्डरीकाक्षः श्रीगर्भः श्रीसहोषितः॥
शार्ङ्गचक्रायुधः खड्गी सर्वनागरिपुध्वजः ।
उत्तमेन स शीलेन दमेन च शमेन च ॥ १५
पराक्रमेण वीर्येण वपुषा दर्शनेन च ।
आरोहेण प्रमाणेन धैर्येणार्जवसंपदा ॥ १६
आनृशंस्येन रूपेण बलेन च समन्वितः ।
अस्त्रैः समुदितः सर्वैर्दिव्यैरद्भुतदर्शनैः ॥ १७
योगमायः सहस्राक्षो निरपायो महामनाः ।
वीरो मित्रजनश्लाघी ज्ञातिबन्धुजनप्रियः १८
क्षमावांश्चानहंवादी ब्रह्मण्यो ब्रह्मनायकः ।
भयहर्ता भयार्तानां मित्राणां नन्दिवर्धनः १९
शरण्यः सर्वभूतानां दीनानां पालने रतः ।
श्रुतवानर्थसंपन्नः सर्वभूतनमस्कृतः ॥ २०
समाश्रितानां वरदः शत्रूणामपि धर्मवित् ।
नीतिज्ञो नीतिसंपन्नो ब्रह्मवादी जितेन्द्रियः॥
भवार्थमिह देवानां बुद्ध्या परमया युतः ।
प्राजापत्ये शुभे मार्गे मानवे धर्मसंस्कृते ॥ २२
समुत्पत्स्यति गोविन्दो मनोर्वंशे महात्मनः ।
अङ्गो नाम मनोः पुत्रो अन्तर्धामा ततः परः
अन्तर्धान्नो हविर्धामा प्रजापतिरनिन्दितः ।
प्राचीनबर्हिर्भविता हविर्धान्नः सुतो महान् ॥
तस्य प्रचेतःप्रमुखा भविष्यन्ति दशात्मजाः ।
प्राचेतसस्तथा दक्षो भवितेह प्रजापतिः २५
दाक्षायण्यास्तथाऽऽदित्यो मनुरादित्यतस्तथा
मनोश्च वंशज इला सुद्युम्नश्च भविष्यति ॥ २६
बुधात्पुरूरवाश्चापि तस्मादायुर्भविष्यति ।
नहुषो भविता तस्माद्ययातिस्तस्य चात्मजः
यदुस्तस्मान्महासत्त्वः क्रोष्टा तस्माद्भविष्यति
क्रोष्टुश्चैव महान्पुत्रो वृजिनीवान्भविष्यति २८
वृजिनीवतश्च भविता उषङ्गुरपराजितः ।
उषङ्गोर्भविता पुत्रः शूरश्चित्ररथस्तथा २९
तस्य त्ववरजः पुत्रः शूरो नाम भविष्यति ।
तेषां विख्यातवीर्याणां चरित्रगुणशालिनाम्।
यज्वनां सुविशुद्धानां वंशे ब्राह्मणसमते ।
स शूरः क्षत्रियश्रेष्ठो महावीर्यो महायशाः ।
स्ववंशविस्तरकरं जनयिष्यति मानदः ॥ ३१
वसुदेव इति ख्यात पुत्रमानकदुन्दुभिम् ।
तस्य पुत्रश्चतुर्बाहुर्वासुदेवो भविष्यति ॥ ३२
दाता ब्राह्मणसत्कर्ता ब्रह्मभूतो द्विजप्रियः ।
राज्ञो मागधसंरुद्धान् मोक्षयिष्यति यादवः ॥
जरासन्धं तु राजान निर्जित्य गिरिगह्वरे ।
सर्वपार्थिवरत्नाढ्यो भविष्यति स वीर्यवान्
पृथिव्यामप्रतिहतो वीर्येण च भविष्यति ।
विक्रमेण च संपन्नः सर्वपार्थिवपार्थिवः ॥ ३५
शूरसेनेषु भूत्वा स द्वारकायां वसन्प्रभुः।
पालयिष्यति गा देवीं विजित्य नयवित्सदा॥
तं भवन्तः समासाद्य वाङ्माल्यैरर्हणैर्वरैः ।
अर्चयन्तु यथान्याय ब्रह्माणमिव शाश्वतम् ॥
यो हि मां द्रष्टुमिच्छेत ब्रह्माणं च पितामहम् ।
द्रष्टव्यस्तेन भगवान्वासुदेवः प्रतापवान् ३८
दृष्टे तस्मिन्नहं दृष्टो न मेऽत्रास्ति विचारणा ।
पितामहो वा देवेश इति वित्त तपोधनाः ३९

स यस्य पुण्डरीकाक्षः प्रीतियुक्तो भविष्यति
तस्य देवगणः प्रीतो ब्रह्मपूर्वो भविष्यति ४०
यश्च तं मानवो लोके संश्रयिष्यति केशवम् ।
तस्य कीर्तिर्जयश्चैव स्वर्गश्चैव भविष्यति ४१
धर्माणां देशिकः साक्षात्
स भविष्यति धर्मभाक् ।
धर्मवद्भिः स देवेशो
नमस्कार्यः सदोद्यतैः ॥ ४२
धर्म एव परो हि स्यात्तस्मिन्नभ्यर्चिते विभौ
स हि देवो महातेजाः प्रजाहितचिकीर्षया ॥
धर्मार्थं पुरुषव्याघ्र ऋषिकोटीः ससर्ज ह ।
ताः सृष्टास्तेन विभुना पर्वते गन्धमादने ४४
सनत्कुमारप्रमुखास्तिष्ठन्ति तपसान्विताः ।
तस्मात्स वाग्मी धर्मज्ञो नमस्यो द्विजपुङ्गवाः
दिवि श्रेष्ठो हि भगवान्हरिर्नारायणः प्रभुः ।
वन्दितो हि स वन्देत मानितो मानयीत च
अर्हितश्चार्हयेन्नित्यं पूजितः प्रतिपूजयेत् ॥ ४६
दृष्टः पश्येदहरहः संश्रितः प्रतिसंश्रयेत् ।
अर्चितश्चार्चयेन्नित्यं स देवो द्विजसत्तमाः ४७
एतत्तस्यानवद्यस्य विष्णोर्वै परमं व्रतम् ।
आदिदेवस्य महतः सज्जनाचरितं सदा ॥ ४८
भुवनेऽभ्यर्चितो नित्य दैवैरपि सनातनः ।
अभयेनानुरूपेण युज्यन्ते तमनुव्रताः ॥ ४९
कर्मणा मनसा वाचा स नमस्यो द्विजैः सदा
यत्नवद्भिरुपस्थाय द्रष्टव्यो देवकीसुतः ॥ ५०
एष वोऽभिहितो मार्गो मया वै मुनिसत्तमाः
तं दृष्ट्वा सर्वशो देवं दृष्टाः स्युः सुरसत्तमाः ॥
महावराहं तं देवं सर्वलोकपितामहम् ।
अहं चैव नमस्यामि नित्यमेव जगत्पतिम् ५२
तत्र च त्रितयं दृष्ट भविष्यति न संशयः ।
समस्ता हि वयं देवास्तस्य देहे वसामहे ॥५३
तस्य चैवाग्रजो भ्राता सिताद्रिनिचयप्रभः ।
हली बल इति ख्यातो भविष्यति धराधरः ।
त्रिशिरास्तस्य दिव्यश्च शातकुंभमयो द्रुमः ।
ध्वजस्तृणेन्द्रो देवस्य भविष्यति रथाश्रितः
शिरोनागैर्महाभोगैः परिकीर्णं महात्मभिः ।
भविष्यति महाबाहोः सर्वलोकेश्वरस्य च ५६
चिन्तितानि समेष्यन्ति शस्त्राण्यस्त्राणि चैव ह
अनन्तश्च स एवोक्तो भगवान् हरिरव्ययः ॥
समादिष्टश्च विबुधैर्दर्शय त्वमिति प्रभो ।
सुपर्णो यस्य वीर्येण कश्यपस्यात्मजो बली ।
अन्तं नैवाशकद्द्रष्टुं देवस्य परमात्मनः ॥ ५८
स च शेषो विचरते परया वै मुदा युतः ।
अन्तर्वसति भोगेन परिरभ्य वसुन्धराम् ॥ ५९
य एव विष्णुः सोऽनन्तो भगवान् वसुधाधरः
यो रामः स हृषीकेशो योऽच्युतः स धराधरः
तावुभौ पुरुषव्याघ्रौ दिव्यौ दिव्यपराक्रमौ ।
द्रष्टव्यौ माननीयौ च चक्रलाङ्गलधारिणौ ॥
एष वोऽनुग्रहः प्रोक्तो मया पुण्यस्तपोधनाः ।
यद्भवन्तो यदुश्रेष्ठं पूजयेयुः प्रयत्नतः ॥ ६२

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि पुरुषमाहात्म्ये
सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥ १४७ ॥

१४८

नारद उवाच ।
अथ व्योम्नि महाञ्छब्दः
सविद्युत्स्तनयित्नुमान् ।
मेघैश्च गगनं नीलं
संरुद्धमभवद्घनैः ॥ १
प्रावृषीव च पर्जन्यो ववृषे निर्मलं पयः ।
तमश्चैवाभवद्घोरं दिशश्च न चकाशिरे ॥ २
ततो देवगिरौ तस्मिन् रम्ये पुण्ये सनातने ।
न शर्वं भूतसंघा वा ददृशुर्मुनयस्तदा ॥ ३

अर्हित पुष्पधूपादिनार्चित पूजित वाचा च महीकृत ॥४६॥ अर्चित मनसा ध्यात ॥४७॥ तृणेन्द्र तालद्रुम ॥ ५५ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तचत्वारिंशदधिकशततमोऽध्याय ॥१४७

१४८

अथ व्योम्नीति कथोपसंहारार्थं स्पष्टार्थोऽध्याय ॥

व्यभ्रं च गगनं सद्यः क्षणेन समपद्यत ।
तीर्थयात्रां ततो विप्रा जग्मुश्चान्ये यथागतम् ४
तदद्भुतमचिन्त्यं च दृष्ट्वा ते विस्मिताऽभवन् ।
शङ्करस्योमया सार्धं संवाद त्वत्कथाश्रयम्
स भवान् पुरुषव्याघ्र ब्रह्मभूतः सनातनः ।
यदर्थमनुशिष्टाः स्मो गिरिपृष्ठे महात्मना ॥ ६
द्वितीयं त्वद्भुतमिदं त्वत्तेजः कृतमद्य वै ।
दृष्ट्वा च विस्मिताः कृष्ण सा च नः स्मृतिरागता
एतत्ते देवदेवस्य माहात्म्यं कथित प्रभो ।
कपर्दिनो गिरीशस्य महाबाहो जनार्दन ॥ ८
इत्युक्तः स तदा कृष्णस्तपोवननिवासिभिः ।
मानयामास तान्सर्वानृषीन् देवकिनन्दनः ९
अथर्षयः संप्रहृष्टाः पुनस्ते कृष्णमब्रुवन् ।
पुनः पुनर्दर्शयास्मान् सदैव मधुसूदन ॥ १०
न हि नः सा रतिः स्वर्गे या च त्वद्दर्शने विभो
तदृतं च महाबाहो यदाह भगवान्भवः ॥ ११
एतत्ते सर्वमाख्यातं रहस्यमरिकर्शन ।
त्वमेव ह्यर्थतत्त्वज्ञः पृष्टोऽस्मान् पृच्छसे यदा
तदस्माभिरिदं गुह्य त्वत्प्रियार्थमुदाहृतम् ।
न च तेऽविदितं किञ्चित्त्रिषु लोकेषु विद्यते
जन्म चैव प्रसूतिश्च यच्चान्यत्कारणं विभो ।
वयं तु बहुचापल्यादशक्ता गुह्यधारणे ॥ १४
ततः स्थिते त्वयि विभो लघुत्वात्प्रलपामहे ।
न हि किञ्चित्तदाश्चर्यं यन्न वेत्ति भवानिह १५
दिवि वा भुवि वा देव सर्वं हि विदित तव ।
साधयाम वय कृष्ण बुद्धिं पुष्टिमवाप्नुहि ॥१६
पुत्रस्ते सदृशस्तात विशिष्टो वा भविष्यति ।
महाप्रभावसंयुक्तो दीप्तिकीर्तिकरः प्रभुः ॥१७

भीष्म उवाच ।

ततः प्रणम्य देवेश यादवं पुरुषोत्तमम् ।
प्रदक्षिणमुपावृत्य प्रजग्मुस्ते महर्षयः ॥ १८
सोऽय नारायणः श्रीमान् दीप्त्या परमया युतः
व्रतं यथावत्तच्चीर्त्वा द्वारकां पुनरागमत् ॥ १९
पूर्णे च दशमे मासि पुत्रोऽस्य परमाद्भुतः ।
रुक्मिण्यां संमतो जज्ञे शूरो वंशधरः प्रभो ॥
स कामः सर्वभूतानां सर्वभागवतो नृप ।
असुराणां सुराणां च चरत्यन्तर्गतः सदा २१
सोऽयं पुरुषशार्दूलो मेघवर्णश्चतुर्भुजः ।
संश्रितः पाण्डवान् प्रेम्णा भवन्तश्चैनमाश्रिताः
कीर्तिर्लक्ष्मीर्धृतिश्चैव स्वर्गमार्गस्तथैव च ।
यत्रैष संस्थितस्तत्र देवो विष्णुस्त्रिविक्रमः २३
सेन्द्रा देवास्त्रयस्त्रिंशदेष नात्र विचारणा ।
आदिदेवो महादेवः सर्वभूतप्रतिश्रयः ॥ २४
अनादिनिधनोऽव्यक्तो महात्मा मधुसूदनः ।
अयं जातो महातेजाः सुराणामर्थसिद्धये २५
सुदुस्तरार्थतत्त्वस्य वक्ता कर्ता च माधवः ।
तव पार्थ जयः कृत्स्नस्तव कीर्तिस्तथाऽतुला
तवेय पृथिवी देवी कृत्स्ना नारायणाऽऽश्रयात्
अयं नाथस्तवाचिन्त्यो यस्य नारायणो गतिः
स भवांस्त्वमुपाध्वर्यू रणाग्नौ हुतवान्नृपान् ।
कृष्णवुवेण महता युगान्ताग्निसमेन वै ॥ २८
दुर्योधनश्च शोच्योऽसौ सपुत्रभ्रातृबान्धवः ।
कृतवान्योऽबुधः क्रोधाद्धरिगाण्डीविविग्रहम्
दैतेया दानवेन्द्राश्च महाकाया महाबलाः ।
चक्राग्नौ क्षयमापन्ना दावाग्नौ शलभा इव ३०
प्रतियोद्धुं न शक्यो हि मानुषैरेष संयुगे ।
विहीनैः पुरुषव्याघ्र सत्त्वशक्तिबलादिभिः ३१
जयो योगी युगान्ताभः सव्यसाची रणाग्रगः
तेजसा हतवान् सर्वं सुयोधनबलं नृप ॥ ३२
यत्तु गोवृषभांकेन मुनिभ्यः समुदाहृतम् ।
पुराणं हिमवत्पृष्ठे तन्मे निगदतः शृणु ॥ ३३
यावत्तस्य भवेत्पुष्टिस्तेजो दीप्तिः पराक्रमः ।
प्रभावः सन्नतिर्जन्म कृष्णे तावत्त्रिगुणं विभो ॥
कः शक्नोत्यन्यथाकर्तुं तद्यदि स्यात्तथा शृणु ।
यत्र कृष्णो हि भगवांस्तत्र पुष्टिरनुत्तमा ॥ ३५
वयं त्विहाल्पमतयः परतन्त्राः सुविक्लवाः ।
ज्ञानपूर्वं प्रपन्नाः स्मो मृत्योः पन्थानमव्ययम्
भवांश्चाप्यार्जवपरः पूर्वं कृत्वा प्रतिश्रयम् ।
राजवृत्त न लभते प्रतिज्ञापालने रतः ॥ ३७
अप्यैवात्मवधं लोके राजंस्त्वं बहु मन्यसे ।
न हि प्रतिज्ञा या दत्ता ता प्रहातुमरिन्दम३८
कालेनायं जनः सर्वो निहतो रणमूर्धनि ।
वय च कालेन हताः 'कालो हि परमेश्वरः'३९
न हि कालेन कालज्ञः स्पृष्टः शोचितुमर्हसि ।
कालो लोहितरक्ताक्षः कृष्णो दण्डी सनातनः
तस्मात् कुन्तीसुत ज्ञातीन्नेह शोचितुमर्हसि
व्यपेतमन्युर्नित्यं त्वं भव कौरवनन्दन ॥ ४१
माधवस्यास्य माहात्म्य श्रुतं यत्कथितं मया
तदेव तावत्पर्याप्तं सज्जनस्य निदर्शनम् ॥ ४२
व्यासस्य वचनं श्रुत्वा नारदस्य च धीमतः ।
स्वयं चैव महाराज कृष्णस्यार्हतमस्य वै ४३

प्रभावश्चर्षिपूगस्य कथितः सुमहान् मया ।
महेश्वरस्य संवादं शैलपुत्र्याश्च भारत ॥ ४४
धारयिष्यति यश्चैनं महापुरुषसंभवम् ।
शृणुयात्कथयेद्वा यः स श्रेयो लभते परम् ४५
भवितारश्च तस्याथ सर्वे कामा यथेप्सिताः ।
प्रेत्य स्वर्गं च लभते नरो नास्त्यत्र संशयः ॥
न्याय्यं श्रेयोऽभिकामेन प्रतिपत्तुं जनार्दनः ।
एष एवाक्षयो विप्रैः स्तुतो राजन् जनार्दनः
महेश्वरमुखोत्सृष्टा ये च धर्मगुणाः स्मृताः ।
ते त्वया मनसा धार्याः कुरुराज दिवानिशम्
एवं ते वर्तमानस्य सम्यग्दण्डधरस्य च ।
प्रजापालनदक्षस्य स्वर्गलोको भविष्यति ४९ ।
धर्मेणापि सदा राजन् प्रजा रक्षितुमर्हसि ।
यस्तस्य विपुलो दण्डः सम्यग्धर्मः स कीर्त्यते
य एष कथितो राजन् मया सज्जनसन्निधौ ।
शङ्करस्योमया सार्धं संवादो धर्मसंहितः ५१
श्रुत्वा वा श्रोतुकामो वाप्यर्चयेद्वृषभध्वजम् ।
विशुद्धेनेह भावेन य इच्छेद्भूतिमात्मनः ॥ ५२
एष तस्यानवद्यस्य नारदस्य महात्मनः ।
संदेशो देवपूजार्थं तं तथा कुरु पाण्डव ५३
एतदत्यद्भुतं वृत्तं पुण्ये हि भवति प्रभो ।
वासुदेवस्य कौन्तेय स्थाणोश्चैव स्वभावजम्॥
दशवर्षसहस्राणि बदर्यामेष शाश्वतः ।
तपश्चचार विपुलं सह गाण्डीवधन्वना ५५
त्रियुगौ पुण्डरीकाक्षौ वासुदेवधनञ्जयौ ।
विदितौ नारदादेतौ मम व्यासाच्च पार्थिव ॥
बाल एव महाबाहुश्चकार कदनं महत् ।
कंसस्य पुण्डरीकाक्षो ज्ञातित्राणार्थकारणात्
कर्मणामस्य कौन्तेय नान्तं संख्यातुमुत्सहे ।
शाश्वतस्य पुराणस्य पुरुषस्य युधिष्ठिर ॥ ५८
ध्रुव श्रेयः परं तात भविष्यति तवोत्तमम् ।
यस्य ते पुरुषव्याघ्रः सखा चाय जनार्दनः ५९
दुर्योधनं तु शोचामि प्रेत्य लोकेऽपि दुर्मतिम्
यत्कृते पृथिवी सर्वा विनष्टा सहयद्विपा ६०
दुर्योधनापराधेन कर्णस्य शकुनेस्तथा ।
दुःशासनचतुर्थानां कुरवो निधनं गताः ६१

वैशम्पायन उवाच ।

एवं संभाषमाणे तु गाङ्गेये पुरुषर्षभे ।
तूष्णीं बभूव कौरव्यो मध्ये तेषां महात्मनाम्
तच्छ्रुत्वा विस्मयं जग्मुर्धृतराष्ट्रादयो नृपाः ।
संपूज्य मनसा कृष्णं सर्वे प्राञ्जलयोऽभवन् ६३
ऋषयश्चापि ते सर्वे नारदप्रमुखास्तदा ।
प्रतिगृह्याभ्यनन्दन्त तद्वाक्यं प्रतिपूज्य च ६४
इत्येतदखिलं सर्वैः पाण्डवो भ्रातृभिः सह ।
श्रुतवान्सुमहाश्चर्यं पुण्यं भीष्मानुशासनम् ६५
युधिष्ठिरस्तु गाङ्गेयं विश्रान्तं भूरिदक्षिणम् ।
पुनरेव महाबुद्धिः पर्यपृच्छन्महीपतिः ॥ ६६

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि महापुरुषप्रस्तावे
अष्टचत्वारिंशदधिकशततमोऽध्यायः ॥ १४८ ॥

१४९

वैशम्पायन उवाच ।

श्रुत्वा धर्मानशेषेण पावनानि च सर्वशः ।
युधिष्ठिरः शान्तनवं पुनरेवाभ्यभाषत ॥ १

युधिष्ठिर उवाच ।

किमेकं दैवतं लोके किं वाप्येकं परायणम् ।
स्तुवन्तः क कमर्चन्तः प्राप्नुयुर्मानवाः शुभम्

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टचत्वारिंशदधिकशततमोऽध्याय ॥ १४८ ॥

१४९

श्रुत्वेति—विश्वं विष्णुरित्यतः प्राक्तनो ग्रन्थः स्पष्टार्थः । नामपदानामवयवार्थस्तु श्रीशङ्कराचार्यभगवत्पादीयभाष्यादेवावगन्तव्यः शूद्र सुखमवाप्नुयादित्यनेन शूद्रस्याप्येतज्जपेऽधिकारोस्ति इति दर्शितं शेषं सुगमम् ॥ १ ॥

को धर्मः सर्वधर्माणां भवतः परमो मतः ।
किं जपन्मुच्यते जन्तुर्जन्मसंसारबन्धनात् ३

भीष्म उवाच ।

जगत्प्रभुं देवदेवमनन्तं पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण पुरुषः सततोत्थितः ॥ ४
तमेव चार्चयन्नित्यं भक्त्या पुरुषमव्ययम् ।
ध्यायंस्तुवन्नमस्यंश्च यजमानस्तमेव च ॥ ५
अनादिनिधनं विष्णुं सर्वलोकमहेश्वरम् ।
लोकाध्यक्षं स्तुवन्नित्यं सर्वदुःखातिगो भवेत् ६
ब्रह्मण्यं सर्वधर्मज्ञं लोकानां कीर्तिवर्धनम् ।
लोकनाथं महद्भूतं सर्वभूतभवोद्भवम् ॥ ७
एष मे सर्वधर्माणां धर्मोऽधिकतमो मतः ।
यद्भक्त्या पुण्डरीकाक्षं स्तवैरर्चेन्नरः सदा ८
परमं यो महत्तेजः परमं यो महत्तपः ।
परमं यो महद्ब्रह्म परमं यः परायणम् ॥ ९
पवित्राणां पवित्रं यो मङ्गलानां च मङ्गलम् ।
दैवतं देवतानां च भूतानां योऽव्ययः पिता ॥
यतः सर्वाणि भूतानि भवन्त्यादियुगागमे ।
यस्मिंश्च प्रलयं यान्ति पुनरेव युगक्षये ॥ ११
तस्य लोकप्रधानस्य जगन्नाथस्य भूपते ।
विष्णोर्नामसहस्रं मे शृणु पापभयापहम् १२
यानि नामानि गौणानि विख्यातानि महात्मनः
ऋषिभिः परिगीतानि तानि वक्ष्यामि भूतये

ॐ विश्वं विष्णुर्वषट्कारो भूतभव्यभवत्प्रभुः
भूतकृद्भूतभृद्भावो भूतात्मा भूतभावनः १४
पूतात्मा परमात्मा च मुक्तानां परमा गतिः ।
अव्ययः पुरुषः साक्षी क्षेत्रज्ञोऽक्षर एव च १५
योगो योगविदां नेता प्रधानपुरुषेश्वरः ।
नरसिंहवपुः श्रीमान्केशवः पुरुषोत्तमः ॥ १६
सर्वः शर्वः शिवः स्थाणुर्भूतादिर्निधिरव्ययः ।
सम्भवो भावनो भर्ता प्रभवः प्रभुरीश्वरः १७
स्वयंभूः शम्भुरादित्यः पुष्कराक्षो महास्वनः ।
अनादिनिधनो धाता विधाता धातुरुत्तमः ॥
अप्रमेयो हृषीकेशः पद्मनाभोऽमरप्रभुः ।
विश्वकर्मा मनुस्त्वष्टा स्थविष्ठः स्थविरो ध्रुवः
अग्राह्यः शाश्वतः कृष्णो लोहिताक्षः प्रतर्दनः
प्रभूतस्त्रिककुब्धाम पवित्रं मङ्गलं परम् ॥ २०
ईशानः प्राणदः प्राणो ज्येष्ठः श्रेष्ठः प्रजापतिः
हिरण्यगर्भो भूगर्भो माधवो मधुसूदनः ॥ २१
ईश्वरो विक्रमी धन्वी मेधावी विक्रमः क्रमः
अनुत्तमो दुराधर्षः कृतज्ञः कृतिरात्मवान् २२
सुरेशः शरणं शर्म विश्वरेताः प्रजाभवः ।
अहः संवत्सरो व्यालः प्रत्ययः सर्वदर्शनः २३
अजः सर्वेश्वरः सिद्धः सिद्धिः सर्वादिरच्युतः
वृषाकपिरमेयात्मा सर्वयोगविनिःसृतः २४
वसुर्वसुमनाः सत्यः समात्मा संमितः समः ।
अमोघः पुण्डरीकाक्षो वृषकर्मा वृषाकृतिः २५
रुद्रो बहुशिरा बभ्रुर्विश्वयोनिः शुचिश्रवाः ।
अमृतः शाश्वतः स्थाणुर्वरारोहो महातपाः २६
सर्वगः सर्वविद्भानुर्विष्वक्सेनो जनार्दनः ।
वेदो वेदविदव्यङ्गो वेदाङ्गो वेदवित्कविः २७
लोकाध्यक्षः सुराध्यक्षो धर्माध्यक्षः कृताकृतः
चतुरात्मा चतुर्व्यूहश्चतुर्दंष्ट्रश्चतुर्भुजः ॥ २८
भ्राजिष्णुर्भोजनं भोक्ता सहिष्णुर्जगदादिजः
अनघो विजयो जेता विश्वयोनिः पुनर्वसुः २९
उपेन्द्रो वामनः प्रांशुरमोघः शुचिरूर्जितः ।
अतीन्द्रः सङ्ग्रहः सर्गो धृतात्मा नियमो यमः
वेद्यो वैद्यः सदा योगी वीरहा माधवो मधुः
अतीन्द्रियो महामायो महोत्साहो महाबलः
महाबुद्धिर्महावीर्यो महाशक्तिर्महाद्युतिः ।
अनिर्देश्यवपुः श्रीमानमेयात्मा महाद्रिधृत् ३२
महेष्वासो महीभर्ता श्रीनिवासः सतां गतिः
अनिरुद्धः सुरानन्दो गोविन्दो गोविदां पतिः
मरीचिर्दमनो हंसः सुपर्णो भुजगोत्तमः ।
हिरण्यनाभः सुतपाः पद्मनाभः प्रजापतिः ३४
अमृत्युः सर्वदृक् सिंहः
संधाता संधिमान् स्थिरः
अजो दुर्मर्षणः शास्ता
विश्रुतात्मा सुरारिहा ३५
गुरुर्गुरुतमो धाम सत्यः सत्यपराक्रमः ।
निमिषोऽनिमिषः स्रग्वी वाचस्पतिरुदारधीः
अग्रणीर्ग्रामणीः श्रीमान्न्यायो नेता समीरणः
सहस्रमूर्धा विश्वात्मा सहस्राक्षः सहस्रपात्
आवर्तनो निवृत्तात्मा संवृतः संप्रमर्दनः ।
अहः संवर्तको वह्निरनिलो धरणीधरः ॥ ३८

सुप्रसादः प्रसन्नात्मा विश्वधृग् विश्वभुग्विभुः
सत्कर्ता सत्कृतः साधुर्जह्नुर्नारायणो नरः
असंख्येयोऽप्रमेयात्मा
विशिष्टः शिष्टकृच्छुचिः
सिद्धार्थः सिद्धसङ्कल्पः
सिद्धिदः सिद्धिसाधनः ४०
वृषाही वृषभो विष्णुर्वृषपर्वा वृषोदरः ।
वर्धनो वर्धमानश्च विविक्तः श्रुतिसागरः ४१
सुभुजो दुर्धरो वाग्मी महेन्द्रो वसुदो वसुः ।
नैकरूपो बृहद्रूपः शिपिविष्टः प्रकाशनः ॥ ४२
ओजस्तेजो द्युतिधरः प्रकाशात्मा प्रतापनः
ऋद्धः स्पष्टाक्षरो मन्त्रश्चन्द्रांशुर्भास्करद्युतिः
अमृतांशूद्भवो भानुः शशबिन्दुः सुरेश्वरः ।
औषध जगतः सेतुः सत्यधर्मपराक्रमः ॥ ४४
भूतभव्यभवन्नाथः पवनः पावनोऽनलः ।
कामहा कामकृत्कान्तः कामः कामप्रदः प्रभुः
युगादिकृ× द्युगावर्तो नैकमायो महाशनः ।
अदृश्यो व्यक्तरूपश्च सहस्राजिदनन्तजित्॥ ४६
इष्टो विशिष्टः शिष्टेष्टः शिखण्डी नहुषो वृषः
क्रोधहा क्रोधकृत्कर्ता विश्वबाहुर्महीधरः ४७
अच्युतः प्रथितः प्राणः प्राणदो वासवानुजः
अपां निधिरधिष्ठानमप्रमत्तः प्रतिष्ठितः ॥ ४८
स्कन्दः स्कन्दधरो धुर्यो वरदो वायुवाहनः ।
वासुदेवो बृहद्भानुरादिदेवः पुरंदरः ॥ ४९
अशोकस्तारणस्तारः शूरः शौरिर्जनेश्वरः ।
अनुकूलः शतावर्तः पद्मी पद्मनिभेक्षणः ॥ ५०
पद्मनाभोऽरविन्दाक्षः पद्मगर्भः शरीरभृत् ।
महर्धिर्ऋद्धो वृद्धात्मा महाक्षो गरुडध्वजः५१
अतुलः शरभो भीमः समयज्ञो हविर्हरिः ।
सर्वलक्षणलक्षण्यो लक्ष्मीवान्समितिंजयः५२
विक्षरो रोहितो मार्गो हेतुर्दामोदरः सहः ।
महीधरो महाभागो वेगवानमिताशनः ५३
उद्भवः क्षोभणो देवः श्रीगर्भः परमेश्वरः ।
करणं कारणं कर्ता विकर्ता गहनो गुहः ५४
व्यवसायो व्यवस्थानः संस्थानः स्थानदो ध्रुवः
परर्धिः परमस्पष्टस्तुष्टः पुष्टः शुभेक्षणः ॥ ५५
रामो विरामो विरजो मार्गो नेयो नयोऽनयः
वीरः शक्तिमतां श्रेष्ठो धर्मो धर्मविदुत्तमः ५६
वैकुण्ठः पुरुषः प्राणः प्राणदः प्रणवः पृथुः ।
हिरण्यगर्भः शत्रुघ्नो व्याप्तो वायुरधोक्षजः५७
ऋतुः सुदर्शनः कालः परमेष्ठी परिग्रहः ।
उग्रः संवत्सरो दक्षो विश्रामो विश्वदक्षिणः
विस्तारः स्थावरः स्थाणुः प्रमाणं बीजमव्ययम्
अर्थोऽनर्थो महाकोशो महाभोगो महाधनः
अनिर्विण्णः स्थविष्ठो भूर्धर्मयूपो महामखः ।
नक्षत्रनेमिर्नक्षत्री क्षमः क्षामः समीहनः॥ ६०
यज्ञ इज्यो महेज्यश्च क्रतुः सत्रं सतां गतिः ।
सर्वदर्शी विमुक्तात्मा सर्वज्ञो ज्ञानमुत्तमम् ॥
सुव्रतः सुमुखः सूक्ष्मः सुघोषः सुखदः सुहृत् ।
मनोहरो जितक्रोधो वीरबाहुर्विदारणः ॥६२
स्वापनः स्ववशो व्यापी नैकात्मा नैककर्मकृत्
वत्सरो वत्सलो वत्सी रत्नगर्भो धनेश्वरः ॥
धर्मगुब्धर्मकृद्धर्मी सदसत्क्षरमक्षरम् ।
अविज्ञाता सहस्रांशुर्विधाता कृतलक्षणः ६४
गभस्तिनेमिः सत्त्वस्थः सिंहो भूतमहेश्वरः ।
आदिदेवो महादेवो देवेशो देवभृद्गुरुः ॥ ६५
उत्तरो गोपतिर्गोप्ता ज्ञानगम्यः पुरातनः ।
शरीरभूतभृद्भोक्ता= कपीन्द्रो भूरिदक्षिणः॥
सोमपोऽमृतपः सोमः
पुरुजित्पुरुसत्तमः ।
विनयो जयः सत्यसन्धो
दाशार्हः सात्वतां पतिः ॥ ६७
जीवो विनयिता साक्षी मुकुन्दोऽमितविक्रमः
अंभोनिधिरनन्तात्मा महोदधिशयोऽन्तकः
अजो महार्हः स्वाभाव्यो जितामित्रः प्रमोदनः
आनन्दो नन्दनो नन्दः सत्यधर्मा त्रिविक्रमः
महर्षिः कपिलाचार्यः कृतज्ञो मेदिनीपतिः ।
त्रिपदस्त्रिदशाध्यक्षो महाशृङ्गः कृतान्तकृत् ।
महावराहो गोविन्दः सुषेणः कनकाङ्गदी ।
गुह्यो गभीरो गहनो गुप्तश्चक्रगदाधरः ॥ ७१
वेधाः स्वाङ्गो जितः कृष्णो दृढः सङ्कर्षणोच्युतः
वरुणो वारुणो वृक्षः पुष्कराक्षो महामनाः
भगवान् भगहा नन्दी वनमाली हलायुधः ।
आदित्यो ज्योतिरादित्यः सहिष्णुर्गतिसत्तमः
सुधन्वा खण्डपरशुर्दारुणो द्रविणप्रदः ।
दिवस्पृक्सर्वदृग्व्यासो वाचस्पतिरयोनिजः

विश्वं बिभर्तीति विश्वधृगिति भाष्ये । × ३०० । † ४०० । = ५०० ।

त्रिसामा सामगः साम निर्वाणं भेषजं भिषक्
संन्यासकृच्छमः शांतो निष्ठा शांतिः परायणं
शुभाङ्गः शान्तिदः स्रष्टा कुमुदः कुवलेशयः ।
गोहितो गोपतिर्गोप्ता वृषभाक्षो वृषप्रियः ७६
अनिवर्ती निवृत्तात्मा संक्षेप्ता क्षेमकृच्छिवः ।
श्रीवत्सवक्षाः श्रीवासः श्रीपतिः श्रीमतां वरः
श्रीदः श्रीशः श्रीनिवासः
श्रीनिधिः श्रीविभावनः ।
श्रीधरः श्रीकरः श्रेयः
श्रीमाँल्लोकत्रयाश्रयः ॥ ७८
स्वक्षः स्वङ्गः शतानन्दो
नन्दिर्ज्योतिर्गणेश्वरः ।
विजितात्मा विधेयात्मा
सत्कीर्तिश्छिन्नसंशयः ॥ ७९
उदीर्णः सर्वतश्चक्षुरनीशः शाश्वतः स्थिरः ।
भूशयो भूषणो भूतिर्विशोकः शोकनाशनः ॥
अर्चिष्मानर्चितः कुंभो विशुद्धात्मा विशोधनः
अनिरुद्धोऽप्रतिरथः प्रद्युम्नोऽमितविक्रमः ८१
कालनेमिनिहा वीरः शूरः शौरिर्जनेश्वरः ।
त्रिलोकात्मा त्रिलोकेशः केशवः केशिहा हरिः
कामदेवः कामपालः कामी कान्तः कृतागमः
अनिर्देश्यवपुर्विष्णुर्वीरोऽनन्तो धनञ्जयः ८३
ब्रह्मण्यो ब्रह्मकृद्ब्रह्मा ब्रह्म ब्रह्मविवर्धनः ।
ब्रह्मविद्ब्राह्मणो ब्रह्मी ब्रह्मज्ञो ब्राह्मणप्रियः ॥८४
महाक्रमो महाकर्मा महातेजा महोरगः ।
महाक्रतुर्महायज्वा महायज्ञो महाहविः ॥ ८५
स्तव्यः स्तवप्रियः स्तोत्रं स्तुतिस्तोता रणप्रियः
पूर्णः पूरयिता पुण्यः पुण्यकीर्तिरनामयः ८६
मनोजवस्तीर्थकरो वसुरेता वसुप्रदः ।
वसुप्रदो वासुदेवो वसुर्वसुमना हविः ॥ ८७
सद्गतिः सत्कृतिः× सत्ता सद्भूतिः सत्परायणः
शूरसेनो यदुश्रेष्ठः सन्निवासः सुयामुनः ॥ ८८
भूतावासो वासुदेवः सर्वासुनिलयोऽनलः ।
दर्पहा दर्पदो दृप्तो दुर्धरोऽथापराजितः ॥ ८९
विश्वमूर्तिर्महामूर्तिर्दीप्तमूर्तिरमूर्तिमान् ।
अनेकमूर्तिरव्यक्तः शतमूर्तिः शताननः ॥ ९०
एको नैकः सवः कः किं यत्तत्पदमनुत्तमम् ।
लोकबन्धुर्लोकनाथो माधवो भक्तवत्सलः ९१
सुवर्णवर्णो हेमाङ्गो वराङ्गश्चन्दनाङ्गदी ।
वीरहा विषमः शून्यो घृताशीरचलश्चलः ९२
अमानी मानदो मान्यो
लोकस्वामी त्रिलोकधृत् ।
सुमेधा मेधजो धन्यः
सत्यमेधा धराधरः ॥ ९३
तेजो वृषो द्युतिधरः सर्वशस्त्रभृता वरः ।
प्रग्रहो निग्रहो व्यग्रो नैकशृङ्गो गदाग्रजः ॥९४
चतुर्मूर्तिश्चतुर्बाहुश्चतुर्व्यूहश्चतुर्गतिः ।
चतुरात्मा चतुर्भावश्चतुर्वेदविदेकपात् ॥ ९५
समावर्तो निवृत्तात्मा दुर्जयो दुरतिक्रमः ।
दुर्लभो दुर्गमो दुर्गो दुरावासो दुरारिहा ९६
शुभाङ्गो लोकसारङ्गः सुतन्तुस्तन्तुवर्धनः ।
इन्द्रकर्मा महाकर्मा कृतकर्मा कृतागमः ॥ ९७
उद्भवः सुन्दरः सुन्दो रत्ननाभः सुलोचनः ।
अर्को वाजसनः शृङ्गी जयन्तः सर्वविज्जयी ॥
सुवर्णबिन्दुरक्षोभ्यः सर्ववागीश्वरेश्वरः ।
महाह्रदो महागर्तो महाभूतो महानिधिः ९९
कुमुदः कुन्दरः कुन्दः पर्जन्यः पवनोऽनिलः ।
अमृताशोऽमृतवपुः सर्वज्ञः सर्वतोमुखः १००
सुलभः सुव्रतः सिद्धः शत्रुजिच्छत्रुतापनः ।
न्यग्रोधोदुम्बरोऽश्वत्थश्चाणूरान्ध्रनिषूदनः ॥१
सहस्रार्चिः सप्तजिह्वः सप्तैधाः सप्तवाहनः ।
अमूर्तिरनघोऽचिन्त्यो भयकृद्भयनाशनः ॥ २
अणुर्बृहत्कृशः स्थूलो गुणभृन्निर्गुणो महान् ।
अधृतः स्वधृतः स्वास्यः प्राग्वंशो वंशवर्धनः
भारभृत्कथितो योगी योगीशः सर्वकामदः ।
आश्रमः श्रमणः क्षामः सुपर्णो वायुवाहनः ४
धनुर्धरो धनुर्वेदो दण्डो दमयिता दमः ।
अपराजितः सर्वसहो नियन्ता नियमो यमः ५
सत्ववान् सात्विकः सत्यः सत्यधर्मपरायणः
अभिप्रायः प्रियार्होऽर्हः प्रियकृत्प्रीतिवर्धनः ६
विहायसगतिर्ज्योतिः सुरुचिर्हुतभुग्विभुः ।
रविर्विरोचनः सूर्यः सविता रविलोचनः ७
अनन्तो हुतभुग्भोक्ता सुखदो नैकदोऽग्रजः ।
अनिर्विण्णः सदामर्षी लोकाधिष्ठानमद्भुतः ८

सनात्सनातनतमः
कपिलः कपिरव्ययः ।
स्वस्तिदः स्वस्तिकृत्स्वस्ति
स्वस्तिभुक् स्वस्तिदक्षिणः ॥ ९
अरौद्रः कुण्डली चक्री विक्रम्यूर्जितशासनः ।
शब्दातिगः शब्दसहः शिशिरः शर्वरीकरः ॥
अक्रूरः पेशलो दक्षो दक्षिणः क्षमिणां वरः ।
विद्वत्तमो वीतभयः पुण्यश्रवणकीर्तनः ॥ ११
उत्तारणो दुष्कृतिहा पुण्यो दुःस्वप्ननाशनः ॥
वीरहा रक्षणः सन्तो जीवनः पर्यवस्थितः १२
अनन्तरूपोऽनन्तश्री-
र्जितमन्युर्भयापहः ।
चतुरस्रो गभीरात्मा
विदिशो व्यादिशो दिशः ॥ १३
अनादिर्भूर्भुवो लक्ष्मीः सुवीरो रुचिराङ्गदः ।
जननो जनजन्मादिर्भीमो भीमपराक्रमः ॥ १४
आधारनिलयो धाता पुष्पहासः प्रजागरः ।
ऊर्ध्वगः सत्पथाचारः प्राणदः प्रणवः पणः १५
प्रमाणं प्राणनिलयः प्राणभृत्प्राणजीवनः ।
तत्त्वं तत्त्वविदेकात्मा जन्ममृत्युजरातिगः ॥
भूर्भुवःस्वस्तरुस्तारः सविता प्रपितामहः ।
यज्ञो यज्ञपतिर्यज्वा यज्ञाङ्गो यज्ञवाहनः ॥ १७
यज्ञभृद्यज्ञकृद्यज्ञी यज्ञभुग्यज्ञसाधनः ।
यज्ञान्तकृद्यज्ञगुह्यमन्नमन्नाद एव च ॥ १८
आत्मयोनिः स्वयंजातो वैखानः सामगायनः
देवकीनन्दनः स्रष्टा क्षितीशः पापनाशनः ॥
शङ्खभृन्नन्दकी चक्री शार्ङ्गधन्वा गदाधरः ।
रथाङ्गपाणिरक्षोभ्यः सर्वप्रहरणायुधः
सर्वप्रहरणायुध ओं नम इति ॥ १२०

इतीदं कीर्तनीयस्य केशवस्य महात्मनः ।
नाम्नां सहस्रं दिव्यानामशेषेण प्रकीर्तितम् २१
य इदं शृणुयान्नित्यं यश्चापि परिकीर्तयेत् ।
नाशुभं प्राप्नुयात्किञ्चित्सोऽमुत्रेह च मानवः
वेदान्तगो ब्राह्मणः स्यात्
क्षत्रियो विजयी भवेत् ।
वैश्यो धनसमृद्धः स्या-
च्छूद्रः सुखमवाप्नुयात् ॥ २३
धर्मार्थी प्राप्नुयाद्धर्ममर्थार्थी चार्थमाप्नुयात् ।
कामानवाप्नुयात्कामी प्रजार्थी प्राप्नुयात्प्रजां
भक्तिमान्यः सदोत्थाय शुचिस्तद्गतमानसः ।
सहस्रं वासुदेवस्य नाम्नामेतत्प्रकीर्तयेत् ॥ २५
यशः प्राप्नोति विपुलं ज्ञातिप्राधान्यमेव च ।
अचलां श्रियमाप्नोति श्रेयः प्राप्नोत्यनुत्तमम् ॥
न भयं क्वचिदाप्नोति वीर्यं तेजश्च विन्दति ।
भवत्यरोगो द्युतिमान्बलरूपगुणान्वितः ॥ २७
रोगार्तो मुच्यते रोगाद्बद्धो मुच्येत बन्धनात्
भयान्मुच्येत भीतस्तु मुच्येदापन्न आपदः २८
दुर्गाण्यतितरत्याशु पुरुषः पुरुषोत्तमम् ।
स्तुवन्नामसहस्रेण नित्यं भक्तिसमन्वितः २९
वासुदेवाश्रयो मर्त्यो वासुदेवपरायणः ।
सर्वपापविशुद्धात्मा याति ब्रह्म सनातनम् १३०
न वासुदेवभक्तानामशुभं विद्यते क्वचित् ।
जन्ममृत्युजराव्याधिभयं नैवोपजायते ॥ ३१
इमं स्तवमधीयानः श्रद्धाभक्तिसमन्वितः ।
युज्येतात्मसुखक्षान्तिश्रीधृतिस्मृतिकीर्तिभिः
न क्रोधो न च मात्सर्यं न लोभो नाशुभा मतिः
भवन्ति कृतपुण्यानां भक्तानां पुरुषोत्तमे ३३
द्यौः सचन्द्रार्कनक्षत्रा खं दिशो भूर्महोदधिः
वासुदेवस्य वीर्येण विधृतानि महात्मनः ३४
ससुरासुरगन्धर्वं सयक्षोरगराक्षसम् ।
जगद्वशे वर्ततेदं कृष्णस्य सचराचरम् ॥ ३५
इन्द्रियाणि मनो बुद्धिः सत्त्वं तेजो बलं धृतिः
वासुदेवात्मकान्याहुः क्षेत्रं क्षेत्रज्ञ एव च ३६
सर्वागमानामाचारः प्रथमं ×परिकल्प्यते ।
+आचारः प्रथमो धर्मो धर्मस्य प्रभुरच्युतः ॥
ऋषयः पितरो देवा महाभूतानि धातवः ।
जङ्गमाजङ्गमं चेदं जगन्नारायणोद्भवम् ॥ ३८
योगो ज्ञानं तथा साङ्ख्यं
विद्याः शिल्पादि कर्म च ।
वेदाः शास्त्राणि विज्ञान-
मेतत्सर्वं जनार्दनात् ॥ ३९
एको विष्णुर्महद्भूत
पृथग्भूतान्यनेकशः ।
त्रीन् लोकान् व्याप्य भूतात्मा
भुङ्क्ते विश्वभुगव्ययः ॥ १४०

* १००० । † १०००० । × प्रथम इति पाठ । + आचारप्रभवो धर्म इति पाठ ।

इमं स्तवं भगवतो
विष्णोर्व्यासेन कीर्तितम् ।
पठेद्य इच्छेत्पुरुषः
श्रेयः प्राप्तुं सुखानि च ॥ १४१

विश्वेश्वरमजं देव
जगतः प्रभवाप्ययम् ।
भजन्ति ये पुष्कराक्षं
न ते यान्ति पराभवम् ॥ १४२

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासक्यामनुशासनपर्वणि दानधर्मपर्वणि विष्णुसहस्रनामकथने एकोनपञ्चाशदधिकशततमोऽध्यायः ॥ १४९ ॥

१५०

युधिष्ठिर उवाच ।
पितामह महाप्राज्ञ सर्वशास्त्रविशारद ।
किं जप्यं जपतो नित्यं भवेद्धर्मफलं महत्॥ १
प्रस्थाने वा प्रवेशे वा प्रवृत्ते वापि कर्मणि ।
दैवे वा श्राद्धकाले वा किं जप्यं कर्मसाधनम्
शान्तिकं पौष्टिकं रक्षा शत्रुघ्नं भयनाशनम् ।
जप्यं यद्ब्रह्म समित तद्भवान् वक्तुमर्हति ॥ ३

भीष्म उवाच ।
व्यासप्रोक्तमिमं मन्त्रं शृणुष्वैकमना नृप ।
सावित्र्या विहित दिव्य सद्यः पापविमोचनम्
शृणु मन्त्रविधिं कृत्स्न प्रोच्यमान मयाऽनघ ।
य श्रुत्वा पाण्डवश्रेष्ठ सर्वपापैः प्रमुच्यते ॥ ५
रात्रावहनि धर्मज्ञ जपन् पापैर्न लिप्यते ।
तत्तेऽहं संप्रवक्ष्यामि शृणुष्वैकमना नृप ॥ ६
आयुष्मान् भवते चैव य श्रुत्वा पार्थिवात्मज
पुरुषस्तु सुसिद्धार्थः प्रेत्य चेह च मोदते ॥ ७
सेवितं सततं राजन् पुरा राजर्षिसत्तमैः ।
क्षत्रधर्मपरैर्नित्यं सत्यव्रतपरायणैः ॥ ८
इदमाह्निकमव्यग्रं कुर्वद्भिर्नियतैः सदा ।
नृपैर्भरतशार्दूल प्राप्यते श्रीरनुत्तमा ॥ ९
नमो वसिष्ठाय महाव्रताय
पराशरं वेदनिधि नमस्ये ।
नमोऽस्त्वनन्ताय महोरगाय
नमोऽस्तु सिद्धेभ्य इहाक्षयेभ्यः ॥ १०
नमोस्त्वृषिभ्यः परम परेषा
देवेषु देवं *वरद वराणाम् ।
सहस्रशीर्षाय नमः शिवाय
सहस्रनामाय जनार्दनाय ॥ ११
अजैकपादहिर्बुध्न्यः पिनाकी चापराजितः ।
ऋतश्च पितृरूपश्च त्र्यम्बकश्च महेश्वरः ॥ १२
वृषाकपिश्च शम्भुश्च हवनोऽथेश्वरस्तथा ।
एकादशैते प्रथिता रुद्रास्त्रिभुवनेश्वराः ॥ १३
शतमेतत्समाम्नात शतरुद्रे महात्मनाम् ।
अंशो भगश्च मित्रश्च वरुणश्च जलेश्वरः ॥ १४
तथा धातार्यमा चैव जयन्तो भास्करस्तथा ।
त्वष्टा पूषा तथैवेन्द्रो द्वादशो विष्णुरुच्यते ॥
इत्येते द्वादशादित्याः काश्यपेया इति श्रुतिः
धरो ध्रुवश्च सोमश्च सावित्रोथानिलोऽनलः
प्रत्यूषश्च प्रभासश्च वसवोऽष्टौ प्रकीर्तिताः ।
नासत्यश्चापि दस्रश्च स्मृतौ द्वावश्विनावपि ॥
मार्तण्डस्यात्मजावेतौ संज्ञानासाविनिर्गतौ
अतः पर प्रवक्ष्यामि लोकानां कर्मसाक्षिणः
अपि यज्ञस्य वेत्तारो दत्तस्य सुकृतस्य च ।
अदृश्याः सर्वभूतेषु पश्यन्ति त्रिदशेश्वराः १९

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकोनपञ्चाशदधिकशततमोऽध्याय ॥ १४९ ॥

१५०

पितामहेति ॥१॥ विहितं इष्टसित्यर्थं जप्तम् ॥४॥ आह्निक अहरह कर्तव्यम् ॥ ९ ॥ सज्ञाया अश्वारूपायाः नासात नासिकाया सकाशाद्विनिर्गतौ ॥ १८ ॥

* नमस्ये इति शेष

शुभाशुभानि कर्माणि मृत्युः कालश्च सर्वशः
विश्वेदेवाः पितृगणा मूर्तिमन्तस्तपोधनाः २०
मुनयश्चैव सिद्धाश्च तपोमोक्षपरायणाः।
शुचिस्मिताः कीर्तयतां प्रयच्छन्ति शुभं नृणाम्
प्रजापतिकृतानेतान् लोकान् दिव्येन तेजसा
वसन्ति सर्वलोकेषु प्रयताः सर्वकर्मसु॥ २२
प्राणानामीश्वरानेतान् कीर्तयन्प्रयतो नरः।
धर्मार्थकामैर्विपुलैर्युज्यते सह नित्यशः॥ २३
लोकांश्च लभते पुण्यान्विश्वेश्वरकृताञ्छुभान्
एते देवास्त्रयस्त्रिंशत्सर्वभूतगणेश्वराः॥ २४
नन्दीश्वरो महाकायो ग्रामणीर्वृषभध्वजः।
ईश्वराः सर्वलोकानां गणेश्वरविनायकाः॥
सौम्या रौद्रा गणाश्चैव योगभूतगणास्तथा।
ज्योतींषि सरितो व्योम सुपर्णः पतगेश्वरः॥
पृथिव्यां तपसा सिद्धाः स्थावराश्च चराश्च ह
हिमवान् गिरयः सर्वे चत्वारश्च महार्णवाः॥
भवस्यानुचराश्चैव हरतुल्यपराक्रमाः।
विष्णुर्देवोथ जिष्णुश्च स्कन्दश्चाम्बिकया सह
कीर्तयन्प्रयतः सर्वान्सर्वपापैः प्रमुच्यते।
अत ऊर्ध्वं प्रवक्ष्यामि मानवानृषिसत्तमान्॥
यवक्रीतश्च रैभ्यश्च अर्वावसुपरावसू।
औशिजश्चैव कक्षीवान् बलश्चाङ्गिरसः सुतः
ऋषिर्मेधातिथेः पुत्रः कण्वो बर्हिषदस्तथा।
ब्रह्मतेजोमयाः सर्वे कीर्तिता लोकभावनाः
लभन्ते हि शुभं सर्वे रुद्रानलवसुप्रभाः।
भुवि कृत्वा शुभं कर्म मोदन्ते दिवि दैवतैः॥
महेन्द्रगुरवः सप्त प्राची वै दिशमाश्रिताः।
प्रयतः कीर्तयेदेतान् शक्रलोके महीयते ३३
उन्मुचुः प्रमुचुश्चैव स्वस्त्यात्रेयश्च वीर्यवान्।
दृढच्युतोर्ध्वबाहुश्च तृणसोमाङ्गिरास्तथा ३४
मित्रावरुणयोः पुत्रस्तथागस्त्यः प्रतापवान्।
धर्मराजर्त्विजः सप्त दक्षिणां दिशमाश्रिताः
दृढेयुश्च ऋतेयुश्च परिव्याधश्च कीर्तिमान्।
एकतश्च द्वितश्चैव त्रितश्चादित्यसन्निभाः ३६
अत्रेः पुत्रश्च धर्मात्मा ऋषिः सारस्वतस्तथा।
वरुणस्यर्त्विजः सप्त पश्चिमां दिशमाश्रिताः॥
अत्रिर्वसिष्ठो भगवान् कश्यपश्च महानृषिः।
गौतमश्च भरद्वाजो विश्वामित्रोऽथ कौशिकः
ऋचीकतनयश्चोग्रो जमदग्निः प्रतापवान्।
धनेश्वरस्य गुरवः सप्तैते उत्तराश्रिताः॥ ३९
अपरे मुनयः सप्त दिक्षु सर्वास्वधिष्ठिताः।
कीर्तिस्वस्तिकरा नृणां कीर्तिता लोकभावनाः
धर्मः कामश्च कालश्च वसुर्वासुकिरेव च।
अनन्तः कपिलश्चैव सप्तैते धरणीधराः॥ ६१
रामो व्यासस्तथा द्रौणिरश्वत्थामा च लोमशः
इत्येते मुनयो दिव्या एकैकः सप्त सप्तधा ४२
शान्तिस्वस्तिकरा लोके
दिशांपालाः प्रकीर्तिताः।
यस्यां यस्यां दिशि ह्येते
तन्मुखः शरणं व्रजेत्॥ ४३
स्रष्टारः सर्वभूतानां कीर्तिता लोकपावनाः।
सवर्तो मेरुसावर्णो मार्कण्डेयश्च धार्मिकः ४४
सांख्ययोगौ नारदश्च दुर्वासाश्च महानृषिः।
अत्यन्ततपसो दान्तास्त्रिषु लोकेषु विश्रुताः॥
अपरे रुद्रसङ्काशाः कीर्तिता ब्रह्मलौकिकाः।
अपुत्रो लभते पुत्रं दरिद्रो लभते धनम्॥ ४६
तथा धर्मार्थकामेषु सिद्धिं च लभते नरः।
पृथु वैन्यं नृपवरं पृथ्वी यस्याभवत्सुता ४७
प्रजापतिं सार्वभौमं कीर्तयेद्वसुधाधिपम्।
आदित्यवंशप्रभवं महेन्द्रसमविक्रमम्॥ ४८
पुरूरवसमैलं च त्रिषु लोकेषु विश्रुतम्।
बुधस्य दयितं पुत्रं कीर्तयेद्वसुधाधिपम्॥ ४९
त्रिलोकविश्रुतं वीरं भरतं च प्रकीर्तयेत्।
गवामयेन यज्ञेन येनेष्टं वै कृते युगे॥ ५०
रन्तिदेवं महादेवं कीर्तयेत्परमद्युतिम्।
विश्वजित्तपसोपेतं लक्षण्यं लोकपूजितम् ५१
तथा श्वेतं च राजर्षिं कीर्तयेत्परमद्युतिम्।
सगरस्यात्मजा येन प्लाविता स्तारितास्तथा
हुताशनसमानेतान् महारूपान् महौजसः।
उग्रकायान्महासत्त्वान्कीर्तयेत्कीर्तिवर्धनान्
देवानृषिगणांश्चैव नृपांश्च जगतीश्वरान्।
सांख्यं योगं च परमं हृद्यं कल्यं तथैव च॥
कीर्तितं परमं ब्रह्म सर्वश्रुतिपरायणम्।
मङ्गल्यं सर्वभूतानां पवित्रं बहुकीर्तितम् ५५
व्याधिप्रशमनं श्रेष्ठं पौष्टिकं सर्वकर्मणाम्।
प्रयतः कीर्तयेच्चैतान् कल्यं सायं च भारत॥
एते वै यान्ति वर्षन्ति
भान्ति वान्ति सृजन्ति च।
एते विनायकाः श्रेष्ठा
दक्षाः क्षान्ता जितेन्द्रियाः॥ ५७

नराणामशुभं सर्वं व्यपोहन्ति प्रकीर्तिताः ।
साक्षिभूता महात्मानः पापस्य सुकृतस्य च
एतान्वै कल्यमुत्थाय कीर्तयन् शुभमश्नुते ।
नाग्निचौरभयं तस्य न मार्गप्रतिरोधनम् ५९
एतान् कीर्तयतां नित्यं दुःस्वप्नो नश्यते नृणाम्
मुच्यते सर्वपापेभ्यः स्वास्तिमांश्च गृहान् व्रजेत्
दीक्षाकालेषु सर्वेषु यः पठेन्नियतो द्विजः ।
न्यायवानात्मनिरतः क्षांतो दांतोऽनसूयकः॥
रोगार्तो व्याधियुक्तो वा पठन् पापात्प्रमुच्यते
वास्तुमध्ये तु पठतः कुले स्वस्त्ययनं भवेत् ॥
क्षेत्रमध्ये तु पठतः सर्वं सस्यं प्ररोहति ।
गच्छतः क्षेममध्वानं ग्रामान्तरगतः पठन् ॥
आत्मनश्च सुतानां च दाराणां च धनस्य च
बीजानामोषधीनां च रक्षामेतां प्रयोजयेत् ॥
एतान् सग्रामकाले तु पठतः क्षत्रियस्य तु ।
व्रजन्ति रिपवो नाश क्षेमं च परिवर्तते ॥ ६५
एतान्दैवे च पित्र्ये च पठतः पुरुषस्य हि ।
भुञ्जते पितरः कव्यं हव्यं च त्रिदिवौकसः ॥
न व्याधिश्वापदभयं न द्विपान्न हि तस्करात्
कश्मलं लघुतां याति पाप्मना च प्रमुच्यते
यानपात्रे च याने च प्रवासे राजवेश्मनि ।
परां सिद्धिमवाप्नोति सावित्री ह्युत्तमां पठन्
न च राजभयं तेषां न पिशाचान्न राक्षसात्।
नाश्यम्बुपवनव्यालाद्भयं तस्योपजायते ॥६९
चतुर्णामपि वर्णानामाश्रमस्य विशेषतः ।
करोति सतत शान्ति सावित्रीमुत्तमां पठन्॥
नाग्निर्दहति काष्ठानि सावित्री यत्र पठ्यते ।
न तत्र बालो म्रियते न च तिष्ठन्ति पन्नगाः ॥
न तेषां विद्यते दुःख गच्छन्ति परमां गतिम्
ये शृण्वन्ति महद्ब्रह्म सावित्रीगुणकीर्तनम् ॥
गवां मध्ये तु पठतो गावोऽस्य बहुवत्सलाः
प्रस्थाने वा प्रवासे वा सर्वावस्थां गतः पठेत्
जपतां जुह्वतां चैव नित्यं च प्रयतात्मनाम् ।
ऋषीणां परमं जप्यं गुह्यमेतन्नराधिप ॥ ७४
याथातथ्येन सिद्धस्य इतिहासं पुरातनम् ।
पराशरमत दिव्यं शक्राय कथितं पुरा ॥ ७५
तदेतत्ते समाख्यातं तथ्यं ब्रह्म सनातनम् ।
हृदयं सर्वभूतानां श्रुतिरेषा सनातनी ॥ ७६
सोमादित्यान्वयाः सर्वे राघवाः कुरवस्तथा
पठन्ति शुचयो नित्यं सावित्रीं प्राणिना गतिं
अभ्यासे नित्यं देवानां सप्तर्षीणां ध्रुवस्य च
मोक्षण सर्वकृच्छ्राणां मोचयत्यशुभात्सदा ॥
वृद्धैः काश्यपगौतमप्रभृतिभि-
र्भृग्वनिरोऽत्र्यादिभिः
शुक्रागस्त्यबृहस्पतिप्रभृतिभि-
र्ब्रह्मर्षिभिः सेवितम् ।
भारद्वाजमतं ऋचीकतनयैः
प्राप्तं वसिष्ठात् पुनः
सावित्रीमधिगम्य शक्रवसुभिः
कृत्स्ना जिता दानवाः ॥ ७९
यो गोशतं कनकशृङ्गमयं ददाति
विप्राय वेदविदुषे च बहुश्रुताय ।
दिव्यां च भारतकथां कथयेच्च नित्यं
तुल्यं फलं भवति तस्य च तस्य चैव
धर्मो विवर्धति भृगोः परिकीर्तनेन
वीर्यं विवर्धति वसिष्ठनमोनतेन ।
संग्रामजिद्भवति चैव रघुं नमस्यन्
स्यादश्विनौ च परिकीर्तयतो न रोगः
एषा ते कथिता राजन् सावित्री ब्रह्मशाश्वती
विवक्षुरसि यच्चान्यत्तत्ते वक्ष्यामि भारत ८२

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि सावित्रीव्रतोपाख्याने पञ्चाशदधिकशततमोऽध्यायः ॥ १५० ॥

१५१

युधिष्ठिर उवाच ।
के पूज्याः के नमस्कार्याः कथं वर्तेत केषु च । किमाचारः कीदृशेषु पितामह न रिष्यते ॥ १

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चाशदधिकशततमोऽध्याय ॥ १५० ॥

१५१

के इति ॥ १ ॥

भीष्म उवाच ।
ब्राह्मणानां परिभवः सादयेदपि देवताः ।
ब्राह्मणांस्तु नमस्कृत्य युधिष्ठिर न रिष्यते
ते पूज्यास्ते नमस्कार्या वर्तेथास्तेषु पुत्रवत् ।
ते हि लोकानिमान् सर्वान् धारयंति मनीषिणः
ब्राह्मणाः सर्वलोकानां महान्तो धर्मसेतवः ।
धनत्यागाभिरामाश्च वाक्संयमरताश्च ये ॥४
रमणीयाश्च भूतानां निधानं च धृतव्रताः ।
प्रणेतारश्च लोकानां शास्त्राणां च यशस्विनः
तपो येषां धनं नित्यं वाक्चैव विपुलं बलम् ।
प्रभवश्चैव धर्माणां धर्मज्ञाः सूक्ष्मदर्शिनः ॥ ६
धर्मकामाः स्थिता धर्मे सुकृतैर्धर्मसेतवः ।
यान्समाश्रित्य जीवंति प्रजाः सर्वाश्चतुर्विधाः
पन्थानः सर्वनेतारो यज्ञवाहाः सनातनाः ।
पितृपैतामहीं गुर्वीमुद्वहन्ति धुरं सदा ॥
धुरि ये नावसीदन्ति विषमे सद्वहा इव ।
पितृदेवातिथिमुखा हव्यकव्याग्रभोजिनः ॥९
भोजनादेव लोकांस्त्रीस्त्रायन्ते महतो भयात् ।
दीपः सर्वस्य लोकस्य चक्षुश्चक्षुष्मतामपि १०
सर्वशिक्षा श्रुतिधना निपुणा मोक्षदर्शिनः ।
गतिज्ञाः सर्वभूतानामध्यात्मगतिचिन्तकाः
आदिमध्यावसानानां ज्ञातारश्छिन्नसंशयाः ।
परावरविशेषज्ञा गन्तारः परमां गतिम् ॥ १२
विमुक्ता धूतपाप्मानो निर्द्वन्द्वा निष्परिग्रहाः
मानार्हा मानिता नित्यं ज्ञानविद्भिर्महात्मभिः
चन्दने मलपङ्के च भोजनेऽभोजने समाः ।
समं येषां दुकूलं च तथा क्षौमाजिनानि च ॥
तिष्ठेयुरप्यभुञ्जाना बहूनि दिवसान्यपि ।
शोषयेयुश्च गात्राणि स्वाध्यायैः संयतेन्द्रियाः
अदैवं दैवतं कुर्युर्दैवतं चाप्यदैवतम् ।
लोकानन्यान् सृजेयुस्ते लोकपालांश्च कोपिताः
अपेयः सागरो येषामपि शापान्महात्मनाम्
येषां कोपाग्निरद्यापि दण्डकेनोपशाम्यति ॥
देवानामपि ये देवाः कारणं कारणस्य च ।
प्रमाणस्य प्रमाणं च कस्तानभिभवेद्बुधः ॥ १८
येषां वृद्धश्च बालश्च सर्वः संमानमर्हति ।
तपोविद्याविशेषात्तु मानयन्ति परस्परम् १९
अविद्वान् ब्राह्मणो देवः पात्रं वै पावनं महत् ।
विद्वान् भूयस्तरो देवः पूर्णसागरसन्निभः २०
अविद्वांश्चैव विद्वांश्च ब्राह्मणो दैवतं महत् ।
प्रणीतश्चाप्रणीतश्च यथाग्निर्दैवतं महत् ॥ २१
श्मशाने ह्यपि तेजस्वी पावको नैव दुष्यति ।
हविर्यज्ञे च विधिवद् गृह एवातिशोभते ॥२२
एवं यद्यप्यनिष्टेषु वर्तते सर्वकर्मसु ।
सर्वथा ब्राह्मणो मान्यो दैवतं विद्धि तत्परम्

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि ब्राह्मणप्रशंसाया-
मेकपञ्चाशदधिकशततमोऽध्यायः ॥ १५१ ॥

१५२

युधिष्ठिर उवाच ।
कां तु ब्राह्मणपूजायां व्युष्टिं दृष्ट्वा जनाधिप।
कं वा कर्मोदयं मत्वा तानर्चसि महामते ॥ १
भीष्म उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
पवनस्य च संवादमर्जुनस्य च भारत ॥ २
सहस्रभुजभृच्छ्रीमान्कार्तवीर्योऽभवत्प्रभुः ।
अस्य लोकस्य सर्वस्य माहिष्मत्यां महाबलः
स तु रत्नाकरवती सद्वीपां सागराम्बराम् ।
शशास पृथिवीं सर्वां हैहयः सत्यविक्रमः॥४

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारत-
भावदीपे एकपञ्चाशदधिकशततमोऽध्याय ॥ १५१ ॥

१५२
कां त्विति व्युष्टिं समृद्धिं फलं वा 'व्युष्टि फले समृद्धौ च' (३।३।३८) इत्यमरः ॥ १ ॥

स्वविक्तं तेन दत्तं तु दत्तात्रेयाय कारणे ।
क्षत्रधर्मं पुरस्कृत्य विनयं श्रुतमेव च ॥ ५
आराधयामास च तं कृतवीर्यात्मजो मुनिम्
न्यमन्त्रयत सन्तुष्टो द्विजश्चैनं वरैरिभिः ॥ ६
स वरैश्छन्दितस्तेन नृपो वचनमब्रवीत् ।
सहस्रबाहुर्भूयां वै चमूमध्ये गृहेऽन्यथा ॥ ७
मम बाहुसहस्रं तु पश्यतां सैनिका रणे ।
विक्रमेण महीं कृत्स्नां जयेयं संशितव्रत ॥ ८
तां च धर्मेण संप्राप्य पालयेयमतन्द्रितः ।
चतुर्थं तु वरं याचे त्वामहं द्विजसत्तम ॥ ९
तं ममानुग्रहकृते दातुमर्हस्यनिन्दित ।
अनुशासन्तु मां सन्तो मिथ्योद्वृत्तं त्वदाश्रयम्
इत्युक्तः स द्विजः प्राह तथास्त्विति नराधिपम्
एवं समभवंस्तस्य वरास्ते दीप्ततेजसः ॥ ११
ततः स रथमास्थाय ज्वलनार्कसमद्युतिम् ।
अब्रवीद्वीर्यसंमोहात्को वास्ति सदृशो मम ॥
धैर्यैर्वीर्यैर्यशःशौर्यैर्विक्रमेणौजसापि वा ।
तद्वाक्यान्ते चान्तरिक्षे वागुवाचाशरीरिणी॥
न त्वं मूढ विजानीषे ब्राह्मण क्षत्रियाद्वरम् ।
सहितो ब्राह्मणेनेह क्षत्रियः शास्ति वै प्रजाः

अर्जुन उवाच ।

कुर्यां भूतानि तुष्टोऽहं क्रुद्धो नाशं तथाऽनये
कर्मणा मनसा वाचा न मत्तोस्ति वरो द्विजः
पूर्वो ब्रह्मोत्तरो वादो द्वितीयः क्षत्रियोत्तरः ।
त्वयोक्तौ हेतुयुक्तौ तौ विशेषस्तत्र दृश्यते १६
ब्राह्मणाः संश्रिताः क्षत्र
न क्षत्रं ब्राह्मणाश्रितम्
श्रिता ब्रह्मोपधा विप्राः
खादन्ति क्षत्रियान् भुवि ॥ १७
क्षत्रियेष्वाश्रितो धर्मः प्रजानां परिपालनम् ।
क्षत्राद्वृत्तिर्ब्राह्मणानां तैः कथं ब्राह्मणो वरः १८
सर्वभूतप्रधानांस्तान्भैक्षवृत्तीनहं सदा ।
आत्मसंभावितान्विप्रान्स्थापयाम्यात्मनो वशे
कथितं त्वनयाऽसत्यं गायत्र्या कन्यया दिवि
विजेष्याम्यवशान्सर्वान्ब्राह्मणांश्चर्मवाससः ॥
न च मां व्यावयेद्ब्राह्म-
त्रिषु लोकेषु कश्चन ।
देवो वा मानुषो वाऽपि
तस्माज्ज्येष्ठो द्विजादहम् ॥ २१
अद्य ब्रह्मोत्तरं लोकं करिष्ये क्षत्रियोत्तरम् ।
न हि मे संयुगे कश्चित्सोढुमुत्सहते बलम्२२
अर्जुनस्य वचः श्रुत्वा वित्रस्ताऽभून्निशाचरी
अथैनमन्तरिक्षस्थस्ततो वायुरभाषत ॥ २३
त्यजैनं कलुषं भावं ब्राह्मणेभ्यो नमस्कुरु ।
एतेषां कुर्वतः पाप राष्ट्रक्षोभो भविष्यति २४
अथवा त्वा महीपाल शमयिष्यन्ति वै द्विजाः
निरसिष्यन्ति ते राष्ट्राद्धतोत्साहा महाबलाः
तं राजा कस्त्वमित्याह ततस्तं प्राह मारुतः ।
वायुर्वै देवदूतोस्मि हित त्वा प्रब्रवीम्यहम्२६

अर्जुन उवाच ।

अहो त्वयाऽस्य विप्रेषु भक्तिरागः प्रदर्शितः
यादृशं पृथिवीभूत तादृशं ब्रूहि मे द्विजम्॥२७
वायोर्वा सदृशं किंचिद्ब्रूहि त्वं ब्राह्मणोत्तमम्
अपां वै सदृशं ब्रूहेः सूर्यस्य नभसोपि वा २८

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि पवनार्जुनसंवादे ब्राह्मणमाहात्म्ये द्विपञ्चाशदधिकशततमोऽध्यायः ॥ १५२ ॥



पूर्वो वादो ब्रह्मोत्तर ब्राह्मणाधिक्यवचन पूर्वपक्ष क्षत्रियाधिक्यं सिद्धान्त इत्यर्थ । हेतुयुक्तौ प्रजापालनेन हेतुना युक्तौ सहितौ तौ ब्राह्मणक्षत्रियौ ॥ १६ ॥ ब्रह्म वेदो यज्ञो वा अध्यापनयजनार्थ एव उपधा च्छलं येषा ते तथा क्षत्रियान् खादन्ति उपजीवन्ति ॥ १७ ॥ गायत्र्या सरस्वत्या असत्यं कथित चर्मवासस अजिनवस्त्रान् ॥२०॥ ब्रह्मोत्तर सन्तम् ॥२२॥ निशाचरी अन्तर्हिता सरस्वती । यद्वा निशाचरी राक्षस्यपि वित्रस्ताऽभूत् किमुतान्ये आस्तिका इति भाव ॥ २३ ॥ पृथिवीभूतं पृथिव्यात्मक भूतम् ॥ २७ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्विपञ्चाशदधिकशततमोऽध्याय ॥ १५२ ॥

१५३

वायुरुवाच ।

शृणु मूढ गुणान्कांश्चिद्ब्राह्मणानां महात्मनाम्
ये त्वया कीर्तिता राजंस्तेभ्योऽथ ब्राह्मणो वरः
त्यक्त्वा महीत्वं भूमिस्तु स्पर्धयाङ्गनृपस्य ह
नाशं जगाम तां विप्रो व्यस्तंभयत कश्यपः २
अजेया ब्राह्मणा राजन्दिवि चेह च नित्यदा।
अपिबत्तेजसा ह्यापः स्वयमेवाङ्गिराः पुरा ॥ ३
स ताः पिबन्क्षीरमिव नातृप्यत महामनाः।
अपूरयन्महौघेन महीं सर्वां च पार्थिव ॥ ४
तस्मिन्नहं च क्रुद्धे वै जगत्त्यक्त्वा ततो गतः
व्यतिष्ठमग्निहोत्रे च चिरमङ्गिरसो भयात् ॥ ५
अथ शप्तश्च भगवान् गौतमेन पुरन्दरः।
अहल्यां कामयानो वै धर्मार्थं च न हिंसितः
तथा समुद्रो नृपते पूर्णो मृष्टस्य वारिणः।
ब्राह्मणैरभिशप्तश्च बभूव लवणोदकः ॥ ७
सुवर्णवर्णो निर्धूमः सङ्गतोर्ध्वशिखः कविः।
क्रुद्धेनाङ्गिरसा शप्तो गुणैरेतैर्विवर्जितः ॥ ८
प्रहृतश्चूर्णितान्पश्य ये हासन्त महोदधिम्।
सुवर्णधारिणा नित्यमवशप्ता द्विजातिना ॥ ९
समो न त्वं द्विजातिभ्यः
श्रेयो विद्धि नराधिप।
गर्भस्थान् ब्राह्मणान् सम्यङ्
नमस्यति किल प्रभुः ॥ १०
दण्डकानां महद्राज्यं ब्राह्मणेन विनाशितम्।
तालजंघ महाक्षत्रमौर्वेणैकेन नाशितम् ॥ ११
त्वया च विपुलं राज्यं बलं धर्मं श्रुतं तथा।
दत्तात्रेयप्रसादेन प्राप्तं परमदुर्लभम् ॥ १२
अग्निं त्वं यजसे नित्यं
कस्माद्ब्राह्मणमर्जुन।
स हि सर्वस्य लोकस्य
हव्यवाट् किं न वेत्सि तम् ॥ १३
अथवा ब्राह्मणश्रेष्ठमनुभूतानुपालकम्।
कर्तारं जीवलोकस्य कस्माज्ज्ञानन्विमुह्यसे १४
तथा प्रजापतिर्ब्रह्मा अव्यक्तः प्रभुरव्ययः।
येनेदं निखिलं विश्वं जनितं स्थावरं चरम् १५
अण्डजातं तु ब्रह्माणं केचिदिच्छन्त्यपण्डिताः
अंडाद्धिन्नाद्बभुः शैला दिशोभः पृथिवी दिवम्
द्रष्टव्यं नैतदेवं हि कथं जायेदजो हि सः।
स्मृतमाकाशमण्डं तु तस्माज्जातः पितामहः
तिष्ठेत्कथमिति ब्रूहि न किञ्चिद्धि तदा भवेत्
अहङ्कार इति प्रोक्तः सर्वतेजोगतः प्रभुः १८
नास्त्यण्डमस्ति तु ब्रह्मा स राजा लोकभावनः
इत्युक्तः स तदा तूष्णीमभूद्वायुस्ततोऽब्रवीत् ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि पवनार्जुनसंवादे त्रिपञ्चाशदधिकशततमोऽध्यायः ॥ १५३ ॥



१५३

शृण्विति ॥ १ ॥ अहं वायु ॥ ५ ॥ कवि अग्नि ॥ ८ ॥ महत सगरपुत्रान् आसन्त उपासन्त सुवर्णधारिणा शोभनो ब्राह्मणवर्णस्तस्य धारिणा धर्त्रा द्विजातिना कपिलेन ॥ ९ ॥ अग्निं ब्राह्मणमित्यन्वय ॥ १३ ॥ अनुभूत प्रतिभूतं अनुपालक पोषकम् ॥ १४ ॥ ननु ब्रह्माडे जातत्वात्कथमडमजनयदित्यत्राह-**अण्डेति** केचिदिति तन्नेत्यर्थ ॥ १६ ॥ दूषयति-द्रष्टव्यमिति अजत्वादेव ब्रह्मा न अण्डजात अण्डजत्ववचनं त्वस्य प्रकारान्तरेणेत्याह-**स्मृतमिति** आकाश अव्याकृतम् ॥ १७ ॥ आकाशज पितामह किमाश्रयेण तिष्ठेदिति चेत् कश्चिदब्रूयात्तं प्रति ब्रूहि तदा न किंचिद्भवेदिति। पितामहस्य निरधिष्ठानत्वे सति तज्जमिद सर्व शून्यमेव स्यान्न किंचिद्भवादित्यर्थ। ननु कोय प्रजापतिपदेनोच्यते अत आह-**अहंकार इति प्रोक्त इति** प्रभुः व्यापकः यत सर्वतेजोगत जलचद्रन्यायेन कृत्स्नं चैतन्यज्योति प्राप्तः द्वितीयाश्रितेति समास। अय भाव -सुषुप्तिसदृशादव्याकृताकाशादुत्थितोहकाररूप उपाधिस्तेन साक्षी सर्वात्मनाऽवच्छिन्न सोऽयमहकारविशिष्टो बाह्यं व्योमादिक कल्पितवान्। एवं शास्त्रानुभवाभ्या जानाति स ब्राह्मणो जगत्कर्ता तेन तव साम्यं समुद्रेण तरङ्गस्येव कदाचिदपि न संभवतीति ॥ १८ ॥ अत एव अण्डं नास्ति रज्जूरगवत्कल्पनामात्रत्वात्। कल्पकस्तु स ब्रह्मा ब्राह्मणोस्तित्युक्त स राजाऽर्जुन इति वायुनोक्त सस्तूष्णीमभूत्ततो वायुरब्रवीद्वक्ष्यमाणमर्थमिति शेष ॥ १९ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्रिपञ्चाशदधिकशततमोऽध्याय ॥ १५३ ॥

१५४

वायुरुवाच ।


इमां भूमिं द्विजातिभ्यो दित्सुर्वै दक्षिणां पुरा
अङ्गो नाम नृपो राजंस्ततश्चिन्तां मही ययौ १
धारिणीं सर्वभूतानामथ प्राप्य वरो नृपः ।
कथमिच्छति मां दातुं द्विजेभ्यो ब्रह्मणः सुताम्
साऽहं त्यक्त्वा गमिष्यामि भूमित्वं ब्रह्मणःपदं
अयं सराष्ट्रो नृपतिर्माभूदिति ततोऽगमत् ३
ततस्तां कश्यपो दृष्ट्वा व्रजन्तीं पृथिवीं तदा ।
प्रविवेश महीं सद्यो मुक्त्वाऽऽत्मानं समाहितः
ऋद्धा सा सर्वतो जज्ञे तृणौषधिसमन्विता ।
धर्मोत्तरा नष्टभया भूमिरासीत्ततो नृप ॥ ५
एवं वर्षसहस्राणि दिव्यानि विपुलव्रतः ।
त्रिंशतः कश्यपो राजन् भूमिरासीदतंद्रितः ६
अथागम्य महाराज नमस्कृत्य च कश्यपम् ।
पृथिवी काश्यपी जज्ञे सुता तस्य महात्मनः७
एष राजन्नीदृशो वै ब्राह्मणः कश्यपोऽभवत् ।
अन्यं प्रब्रूहि वा त्वं च कश्यपात्क्षत्रियं वरम्
तूष्णीं बभूव नृपतिः पवनस्त्वब्रवीत्पुनः ।
शृणु राजन्नुतथ्यस्य जातस्यांगिरसे कुले ॥ ९
भद्रा सोमस्य दुहिता रूपेण परमा मता ।
तस्यास्तुल्यं पतिं सोम उतथ्यं समपश्यत१०
सा च तीव्रं तपस्तेपे महाभागा यशस्विनी ।
उतथ्यार्थे तु चार्वङ्गी परं नियममास्थिता ११
तत आहूय सोतथ्य ददावत्रिर्यशस्विनीम् ।
भार्यार्थे स च जग्राह विधिवद्भूरिदक्षिणः
तां त्वकामयत श्रीमान्वरुणः पूर्वमेव ह ।
स चागम्य वनप्रस्थं यमुनायां जहार ताम्
जलेश्वरस्तु हृत्वा तामनयत्स्वं पुरं प्रति ।
परमाद्भुतसंकाशं षट्सहस्रशतह्रदम् ॥ १४
न हि रम्यतरं किंचित्तस्मादन्यत्पुरोत्तमम् ।
प्रासादैरप्सरोभिश्च दिव्यैः कामैश्च शोभितम्
तत्र देवस्तया सार्धं रेमे राजन् जलेश्वरः ।
अथाख्यातमुतथ्याय ततः पत्न्यवमर्दनम् १६
तच्छ्रुत्वा नारदात्सर्वमुतथ्यो नारदं तदा ।
प्रोवाच गच्छ ब्रूहि त्वं वरुणं परुषं वचः १७
मद्भाक्यान्मुञ्च मे भार्यां कस्मात्त्वा हृतवानसि
लोकपालोसि लोकानां न लोकस्य विलोपकः
सोमेन दत्ता भार्या मे त्वया चापहृताऽद्य वै।
इत्युक्तो वचनात्तस्य नारदेन जलेश्वरः १९
मुञ्च भार्यामुतथ्यस्य कस्मात्त्वं हृतवानसि ।
इति श्रुत्वा वचस्तस्य सोऽथ तं वरुणोऽब्रवीत्
ममैषा सुप्रिया भार्या नैनामुत्स्रष्टुमुत्सहे ।
इत्युक्तो वरुणेनाथ नारदः प्राप्य त मुनिम् ।
उतथ्यमब्रवीद्वाक्यं नातिहृष्टमना इव ॥ २१
गले गृहीत्वा क्षिप्तोस्मि वरुणेन महामुने ।
न प्रयच्छति ते भार्यां यत्ते कार्यं कुरुष्व तत्
नारदस्य वचः श्रुत्वा क्रुद्धः प्राज्वलदङ्गिराः
अपिबत्तेजसा वारि विष्टभ्य सुमहातपाः २३
पीयमाने तु सर्वस्मिंस्तोयेऽपि सलिलेश्वरः ।
सुहृद्भिर्भिक्षमाणोऽपि नैवामुञ्चत तां तदा२४
ततः क्रुद्धोऽब्रवीद्भूमिमुतथ्यो ब्राह्मणोत्तमः ।
दर्शयस्व स्थलं भद्रे षट्सहस्रशतह्रदम् २५
ततस्तदीरिणं* जातं समुद्रस्यावसर्पतः ।
तस्मादेशान्नदीं चैव प्रोवाचासौ द्विजोत्तमः
अदृश्या गच्छ भीरु त्वं सरस्वति मरून्प्रति ।
अपुण्य एष भवतु देशस्त्यक्तस्त्वया शुभे २७
तस्मिन् संशोषिते देशे भद्रामादाय वारिपः
अददाच्छरणं गत्वा भार्यामाङ्गिरसाय वै २८
प्रतिगृह्य तु तां भार्यामुतथ्यः सुमनाऽभवत् ।
मुमोच च जगद्दुःखाद्वरुणं चैव हैहय ॥ २९
ततः स लब्ध्वा तां भार्यां वरुणं प्राह धर्मवित्
उतथ्यः सुमहातेजा यत्तच्छृणु नराधिप ३०
मयैषा तपसा प्राप्ता क्रोशतस्ते जलाधिप ।
इत्युक्त्वा तामुपादाय स्वमेव भवनं ययौ ॥
एष राजन्नीदृशो वै उतथ्यो ब्राह्मणर्षभः ।
ब्रवीम्यहं ब्रूहि वा त्वमुतथ्यात्क्षत्रियं वरम्३२

१५४

इमामिति ॥१॥ भूमित्व त्यक्त्वा ब्रह्मण पदं गमिष्यामीति संबन्ध ॥३॥ आत्मानं देह त्यक्त्वा निर्जीवं महीदेहं प्रविश्य सजीवं योगबलेन कृतवान् ॥ ४ ॥ भूमिस्तु धर्मोत्तरा स्वधर्मबलेन ब्रह्मलोक गत्वा नष्टभयाऽऽसीदित्यर्थ ॥ ५ ॥ कश्यपो भूमिर्भूत्वाऽऽसीदित्यन्वय ॥६॥ सोऽत्रिसोमपिता उतथ्यमाहूय ता तस्मै ददौ सोतथ्यमिति सन्धिरार्ष ॥ १२ ॥ देवो वरुण तया भद्रया ॥१६॥ जगद्वरुणं च दुःखान्मुमोच मोचयामास ॥ २९ ॥

* ऊषरप्रदेश ।

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि पवनार्जुनसंवादो नाम चतुष्पञ्चाशदधिकशततमोऽध्यायः ॥ १५४ ॥



१५५

भीष्म उवाच ।

इत्युक्तः स नृपस्तूष्णीमभूद्वायुस्ततोऽब्रवीत् शृणु राजन्नगस्त्यस्य माहात्म्य ब्राह्मणस्य ह असुरैर्निर्जिता देवा निरुत्साहाश्च ते कृताः । यज्ञाश्चैषां हृताः सर्वे पितॄणां च स्वधास्तथा कर्मेज्या मानवानां च दानवैर्हैहयर्षभ । भ्रष्टैश्वर्यास्ततो देवाश्चेरुः पृथ्वीमिति श्रुतिः ३ ततः कदाचित्ते राजन्दीप्तमादित्यवर्चसम् । ददृशुस्तेजसा युक्तमगस्त्यं विपुलव्रतम् ॥ ४ अभिवाद्य तु तं देवाः पृष्ट्वा कुशलमेव च । इदमूचुर्महात्मानं वाक्यं काले जनाधिप ५ दानवैर्युधि भग्नाः स्म तथैश्वर्याच्च भ्रंशिताः । तदस्मान्नो भयात्तीव्राच्चाहि त्वं मुनिपुङ्गव ॥६ इत्युक्तः स तदा देवैरगस्त्यः कुपितोऽभवत् । प्रजज्वाल च तेजस्वी कालाग्निरिव संक्षये ॥ तेन दीप्तांशुजालेन निर्दग्धा दानवास्तदा । अन्तरिक्षान्महाराज निपेतुस्ते सहस्रशः ८ दह्यमानास्तु ते दैत्यास्तस्यागस्त्यस्य तेजसा उभौ लोकौ परित्यज्य गताः काष्ठां तु दक्षिणाम् बलिस्तु यजते यज्ञमश्वमेधं मही गतः । येऽन्येऽधस्था महीस्थाश्च तेन दग्धा महासुराः ततो लोकाः पुनः प्राप्ताः सुरैः शान्तभयैर्नृप। अथैनमब्रुवन् देवा भूमिष्ठानसुरान् जहि ११ इत्युक्तः प्राह देवान्स न शक्तोस्मि महीगतान् दग्धुं तपो हि क्षीयेन्मे न शक्यामीति पार्थिव एव दग्धा भगवता दानवाः स्वेन तेजसा । अगस्त्येन तदा राजंस्तपसा भावितात्मना ईदृशश्चाप्यगस्त्यो हि कथितस्ते मयाऽनघ। ब्रवीम्यहं ब्रूहि वा त्वमगस्त्यात्क्षत्रियं वरम् ॥

भीष्म उवाच ।

इत्युक्तः स तदा तूष्णीमभूद्वायुस्ततोऽब्रवीत् शृणु राजन् वसिष्ठस्य मुख्यं कर्म यशस्विनः आदित्याः सत्रमासन्त सरो वै मानसं प्रति वसिष्ठ मनसा गत्वा ज्ञात्वा तत्तस्य गौरवम् यजमानांस्तु तान् दृष्ट्वा सर्वान्दीक्षानुकार्शितान् हन्तुमैच्छन्त शैलाभाः खलिनो नाम दानवाः अदूरात्तु ततस्तेषां ब्रह्मदत्तवरं सरः । हता हता वै तत्रैते जीवन्त्याप्लुत्य दानवाः ते प्रगृह्य महाघोरान् पर्वतान् परिघान् द्रुमान् विक्षोभयन्तः सलिलमुत्थित शतयोजनम् १९ अभ्यद्रवन्त देवांस्ते सहस्राणि दशैव हि । ततस्तैरर्दिता देवाः शरणं वासवं ययुः ॥ २० स च तैर्व्यथितः शक्रो वसिष्ठं शरणं ययौ । ततोऽभयं ददौ तेभ्यो वसिष्ठो भगवानृषिः ॥ तदा तान्दुःखितान्ज्ञात्वा आनृशंस्यपरो मुनिः अयत्नेनादहत्सर्वान्खलिनः स्वेन तेजसा २२ कैलासं प्रस्थितां चैव नदी गङ्गां महातपाः । आनयत्तत्सरो दिव्यं तया भिन्नं च तत्सरः ॥ सरो भिन्नं तया नद्या सरयूः सा ततोऽभवत् हताश्च खलिनो यत्र स देशः खलिनोऽभवत् एवं सेन्द्रा वसिष्ठेन रक्षितास्त्रिदिवौकसः । ब्रह्मदत्तवराश्चैव हता दैत्या महात्मना ॥ २५ एतत्कर्म वसिष्ठस्य कथितं हि मयाऽनघ । ब्रवीम्यहं ब्रूहि वा त्वं वसिष्ठात्क्षत्रियं वरम् २६

इति श्रीमहाभारते अनुशासनपर्वाणि दानधर्मपर्वणि पवनार्जुनसंवादे पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥ १५५ ॥

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चतुष्पञ्चाशदधिकशततमोऽध्याय ॥ १५४ ॥

१५५

इत्युक्त इति॥१॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चपञ्चाशदधिकशततमोऽध्याय ॥ १५५ ॥

१५६

भीष्म उवाच ।

इत्युक्तस्त्वर्जुनस्तूष्णीमभूद्वायुस्तमब्रवीत् ।
शृणु मे हैहयश्रेष्ठ कर्मात्रेः सुमहात्मनः ॥ १
घोरे तमस्ययुध्यन्त सहिता देवदानवाः ।
अविध्यत शरैस्तत्र स्वर्भानुः सोमभास्करौ ।
अथ ते तमसा ग्रस्ता निहन्यन्ते स्म दानवैः ॥
देवा नृपतिशार्दूल सहैव बलिभिस्तदा ॥ ३
असुरैर्वध्यमानास्ते क्षीणप्राणा दिवौकसः ।
अपश्यन्त तपस्यन्तमात्रिं विप्रं तपोधनम् ४
अथैनमब्रुवन्देवाः शान्तक्रोधं जितेन्द्रियम् ।
असुरैरिषुभिर्विद्धौ चन्द्रादित्याविमावुभौ ५
वयं वध्यामहे चापि शत्रुभिस्तमसावृते ।
नाधिगच्छामि शांतिं च भयात्त्रायस्व नः प्रभो

अत्रिरुवाच ।

कथं रक्षामि भवतस्तेऽब्रुवंश्चन्द्रमा भव ।
तिमिरघ्नश्च सविता दस्युहन्ता च नो भव ७
एवमुक्तस्तदाऽत्रिर्वै तमोनुदभवच्छशी ।
अपश्यत्सौम्यभावाच्च सोमवत्प्रियदर्शनः ॥ ८
दृष्ट्वा नातिप्रभं सोम तथा सूर्यं च पार्थिव ।
प्रकाशमकरोदत्रिस्तपसा स्वेन संयुगे ॥ ९
जगद्वितिमिरं चापि प्रदीप्तमकरोत्तदा ॥ १०
व्यजयच्छत्रुसंघांश्च देवानां स्वेन तेजसा ।
अत्रिणा दह्यमानांस्तान्दृष्ट्वा देवा महासुरान् ॥
पराक्रमैस्तेऽपि तदा व्यघ्नन्नत्रिसुरक्षिताः ।
उद्भासितश्च सविता देवास्त्राता हतासुराः ॥
अत्रिणा त्वथ सामर्थ्यं कृतमुत्तमतेजसा ।
द्विजेनाग्निद्वितीयेन जपता चर्मवाससा ॥ १३
फलभक्षेण राजर्षे पश्य कर्मात्रिणा कृतम् ।
तस्यापि विस्तरेणोक्तं कर्मात्रेः सुमहात्मनः ।
ब्रवीम्यहं ब्रूहि वा त्वमत्रितः क्षत्रिय वरम् ॥
इत्युक्तस्त्वर्जुनस्तूष्णीमभूद्वायुस्ततोऽब्रवीत् ।
शृणु राजन् महत्कर्म च्यवनस्य महात्मनः१५
अश्विनोः प्रतिसंश्रुत्य च्यवनः पाकशासनम् ।
प्रोवाच साहितो देवैः सोमपावश्विनौ कुरु ॥

इन्द्र उवाच ।

अस्माभिर्निन्दितावेतौ भवेतां सोमपौ कथम्
देवैर्न संमितावेतौ तस्मान्मैवं वदस्व नः ॥ १७
अश्विभ्यां सह नेच्छामः सोमं पातुं महाव्रत ।
यदन्यद्वक्ष्यसे विप्र तत्करिष्याम ते वचः १८

च्यवन उवाच ।

पिबेतामश्विनौ सोमं भवद्भिः सहिताविमौ
उभावेतावपि सुरौ सूर्यपुत्रौ सुरेश्वर ॥ १९
क्रियतां मद्वचो देवा यथा वै समुदाहृतम् ।
एतद्वः कुर्वतां श्रेयो भवेन्नैतदकुर्वताम् ॥ २०

इन्द्र उवाच ।

अश्विभ्यां सह सोमं वै
न पास्यामि द्विजोत्तम ।
पिबन्त्वन्ये यथाकामं
नाहं पातुमिहोत्सहे ॥ २१

च्यवन उवाच ।

न चेत्करिष्यसि वचो मयोक्तं बलसूदन ।
मया प्रमथितः सद्यः सोमं पास्यसि वै मखे ॥

वायुरुवाच ।

ततः कर्म समारब्धं हिताय सहसाश्विनोः ।
च्यवनेन ततो मन्त्रैरभिभूताः सुराऽभवन् २३
तत्तु कर्म समारब्धं दृष्ट्वेन्द्रः क्रोधमूर्च्छितः ।
उद्यम्य विपुलं शैलं च्यवनं समुपाद्रवत् ॥ २४
तथा वज्रेण भगवानमर्षाकुललोचनः ।
तमापतन्तं दृष्ट्वैव च्यवनस्तपसान्वितः ॥ २५
अद्भिः सिक्त्वाऽस्तंभयत्तं सवज्रं सहपर्वत
अथेन्द्रस्य महाघोरं सोऽसृजच्छत्रुमेव हि २६
मद नामाहुतिमयं व्यादितास्यं महामुनिः ।
तस्य दन्तसहस्र तु बभूव शतयोजनम् ॥ २७
द्वियोजनशतास्तस्य दंष्ट्राः परमदारुणाः ।
हनुस्तस्याभवद्भूमावास्यं चास्यास्पृशद्दिवम् ॥
जिह्वामूले स्थितास्तस्य सर्वे देवाः सवासवाः
तिमेरास्यमनुप्राप्ता यथा मत्स्या महार्णवे २९
ते समन्त्र्य ततो देवा मदस्यास्य समीपगाः
अब्रुवन्सहिताः शक्रं प्रणमास्मै द्विजातये ३०
अश्विभ्यां सह सोम च पिबाम विगतज्वराः
ततः स प्रणतः शक्रश्चकार च्यवनस्य तत् ३१
च्यवनः कृतवानेतावश्विनौ सोमपायिनौ ।
ततः प्रत्याहरत्कर्म मदं च व्यभजन्मुनिः ३२

१५६

इत्युक्त इति ॥ १ ॥

अक्षेषु मृगयायां च पाने स्त्रीषु च वीर्यवान्।
एतैर्दोषैर्नरा राजन् क्षय यान्ति न संशयः ॥
तस्मादेतान्नरो नित्यं दूरतः परिवर्जयेत्॥३४

एतत्ते च्यवनस्यापि कर्म राजन्प्रकीर्तितम्।
ब्रवीम्यहं ब्रूहि वा त्व क्षत्रियं ब्राह्मणाद्वरम् ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि पवनार्जुनसंवादे षट्पञ्चाशदधिकशततमोऽध्यायः ॥ १५६ ॥

१५७

भीष्म उवाच।
तूष्णीमासीदर्जुनस्तु पवनस्त्वब्रवीत्पुनः।
शृणु मे ब्राह्मणेष्वेव मुख्यं कर्म जनाधिप ॥ १
मदस्यास्यमनुप्राप्ता यदा सेन्द्रा दिवौकसः।
तदैव च्यवनेनेह हृता तेषां वसुन्धरा ॥ २
उभौ लोकौ हृतौ मत्वा
ते देवा दुःखिताऽभवन्।
शोकार्ताश्च महात्मानं
ब्रह्माण शरण ययुः ॥ ३
देवा ऊचुः।
मदास्यव्यतिषिक्तानामस्माकं लोकपूजित।
च्यवनेन हृता भूमिः कपैश्चैव दिवं प्रभो ॥ ४
ब्रह्मोवाच ।
गच्छध्व शरणं विप्रानाशु सेन्द्रा दिवौकसः
प्रसाद्य तानुभौ लोकाववाप्स्यथ यथा पुरा॥५
ते ययुः शरणं विप्रानूचुस्ते कान् जयामहे।
इत्युक्तास्ते द्विजान्प्राहुर्जयतेह कपानिति ॥ ६
भूगतान् हि विजेतारो वयमित्यब्रुवन् द्विजाः।
ततः कर्म समारब्धं ब्राह्मणैः कपनाशनम् ॥ ७
तच्छ्रुत्वा प्रेषितो दूतो ब्राह्मणेभ्यो धनी कपैः
स च तान् ब्राह्मणानाह धनी कपवचो यथा
भवद्भिः सदृशाः सर्वे कपाः किमिह वर्तते।
सर्वे वेदविदः प्राज्ञाः सर्वे च क्रतुयाजिनः ९
सर्वे सत्यव्रताश्चैव सर्वे तुल्या महर्षिभिः।
श्रीश्चैव रमते तेषु धारयन्ति श्रियं च ते ॥ १०
वृथादारान्न गच्छन्ति वृथामांसं न भुञ्जते।
दीप्तमग्निं जुह्वते च गुरूणां वचने स्थिताः ११
सर्वे च नियतात्मानो बालानां संविभागिनः
उपेत्य शनकैर्यान्ति न सेवन्ति रजस्वलाम्।
स्वर्गतिं चैव गच्छन्ति तथैव शुभकर्मिणः १२
अभुक्तवत्सु नाश्नन्ति गर्भिणीवृद्धकादिषु।
पूर्वाह्णेषु न दीव्यन्ति दिवा चैव न शेरते १३
एतैश्चान्यैश्च बहुभिर्गुणैर्युक्तान् कथं कपान्।
विजेष्यथ निवर्तध्वं निवृत्तानां सुखं हि वः
ब्राह्मणा ऊचुः।
कपान्वयं विजेष्यामो
ये देवास्ते वयं स्मृताः।
तस्माद्बध्याः कपाऽस्माकं
धनिन् याहि यथाऽऽगतम् ॥ १५
धनी गत्वा कपानाह
न वो विप्राः प्रियङ्कराः।
गृहीत्वाऽस्त्राण्यतो विप्रान्
कपाः सर्वे समाद्रवन् ॥ १६
समुदग्रध्वजान् दृष्ट्वा
कपान् सर्वे द्विजातयः।
व्यसृजन् ज्वलितानग्नीन्
कपानां प्राणनाशनान् ॥ १७
ब्रह्मसृष्टा हव्यभुजः कपान् हत्वा सनातनाः।
नभस्सीव यथाऽभ्राणि व्यराजन्त नराधिप१८

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षट्पञ्चाशदधिकशततमोऽध्याय ॥१५६॥

१५७

तूष्णीमिति ॥ १ ॥ कपै असुरविशेषै दिव द्यौ ॥ ४ ॥ धनीनामको दूत ॥ ८ ॥

हत्वा वै दानवान् देवाः सर्वे संभूय संयुगे ।
तेनाभ्यजानन् हि तदा ब्राह्मणैर्निहतान्कपान्
अथागम्य महातेजा नारदोऽकथयद्विभो ।
यथा हता महाभागैस्तेजसा ब्राह्मणैः कपाः२०
नारदस्य वचः श्रुत्वा प्रीताः सर्वे दिवौकसः
प्रशशंसुर्द्विजांश्चापि ब्राह्मणांश्च यशस्विनः २१
तेषां तेजस्तथा वीर्यं देवानां ववृधे ततः ।
अवाप्तवंश्चामरत्वं त्रिषु लोकेषु पूजितम् ॥२२
इत्युक्तवचनं वायुमर्जुनः प्रत्युवाच ह ।
प्रतिपूज्य महाबाहो यत्तच्छृणु युधिष्ठिर २३

अर्जुन उवाच ।

जीवाम्यहं ब्राह्मणार्थे सर्वथा सततं प्रभो ।
ब्रह्मण्यो ब्राह्मणेभ्यश्च प्रणमामि च नित्यशः ॥
दत्तात्रेयप्रसादाच्च मया प्राप्तमिदं बलम् ।
लोके च परमा कीर्तिर्धर्मश्चाचरितो महान् २५
अहो ब्राह्मणकर्माणि मया मारुत तत्त्वतः ।
त्वया प्रोक्तानि कार्त्स्न्येन श्रुतानि प्रयतेन च

वायुरुवाच ।

ब्राह्मणान् क्षात्रधर्मेण पालयस्वेन्द्रियाणि च
भृगुभ्यस्ते भयं घोरं तत्तु कालाद्भविष्यति ॥

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि पवनार्जुनसंवादे सप्तपञ्चाशदधिकशततमोऽध्यायः ॥ १५७ ॥



१५८

युधिष्ठिर उवाच ।

ब्राह्मणानर्चसे राजन् सततं संशितव्रतान् ।
कं तु कर्मोदयं दृष्ट्वा तानर्चसि जनाधिप ॥ १
कां वा ब्राह्मणपूजायां व्युष्टिं दृष्ट्वा महाव्रत ।
तानर्चसि महाबाहो सर्वमेतद्ब्रूहि मे ॥ २

भीष्म उवाच ।

एष ते केशवः सर्वमाख्यास्यति महामतिः।
व्युष्टिं ब्राह्मणपूजायां द्रष्टव्युष्टिर्महाव्रतः ॥ ३
बलं श्रोत्रे वाङ्मनश्चक्षुषी च
ज्ञानं तथा संविशुद्धं ममाद्य ।
देहन्यासो नातिचिरान्मतो मे
न चाति तूर्णं संवितायं याति ॥ ४
उक्ता धर्मा ये पुराणे महान्तो
राजन् विप्राणां क्षत्रियाणां विशां च
तथा शूद्राणां धर्ममुपासते च
शेषं कृष्णादुपशिक्षस्व पार्थ ॥ ५
अहं ह्येनं वेद्मि तत्त्वेन कृष्णं
योऽयं हि यच्चास्य बलं पुराणम् ।
अमेयात्मा केशवः कौरवेन्द्र
सोऽयं धर्मं वक्ष्यति संशयेषु ॥ ६
कृष्णः पृथ्वीमसृजत् खं दिवं च
कृष्णस्य देहान्मेदिनी सम्बभूव ।
वराहोऽयं भीमबलः पुराणः
स पर्वतान्व्यसृजद्वै दिशश्च ॥ ७
अस्य चाधोऽथान्तरिक्षं दिवं च
दिशश्चतस्रो विदिशश्चतस्रः ।
सृष्टिस्तथैवेयमनुप्रसूता
स निर्ममे विश्वमिदं पुराणम् ॥ ८
अस्य नाभ्यां पुष्करं संप्रसूतं
यत्रोत्पन्नः स्वयमेवामितौजाः ।
येनाच्छिन्नं तत्तमः पार्थ घोरं
यत्तत्तिष्ठत्यर्णवं तर्जयानम् ॥ ९

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तपञ्चाशदधिकशततमोऽध्याय ॥१५७॥

१५८

ब्राह्मणानिति। कर्मोदयं फलोदयम्॥१॥ न चेति। दु खितस्य दिनं महद्भवतीत्यर्थ ॥ ४ ॥ अस्य चाध इत्याकाशादेरुपर्युपरि अयमेवास्तीत्युक्तम् ॥ ८ ॥ अर्णवं तर्जयानमित्यगाधत्वमपारत्वं चोक्तम् ॥ ९ ॥

कृते युगे धर्म आसीत्समग्र-
स्त्रेताकाले ज्ञानमनुप्रपन्नः ।
बलं त्वासीद्वापरे पार्थ कृष्णः
कलौ त्वधर्मः क्षितिमेवाजगाम ॥१०
स एव पूर्वं निजघान दैत्यान्
स पूर्वदेवश्च बभूव सम्राट् ।
स भूतानां भावनो भूतभव्यः
स विश्वस्यास्य जगतश्चाभिगोप्ता ११
यदा धर्मो ग्लाति वंशे सुराणां
तदा कृष्णो जायते मानुषेषु ।
धर्मे स्थित्वा स तु वै भावितात्मा
परांश्च लोकानपरांश्च पाति ॥ १२
त्याज्य त्यक्त्वा चासुराणां वधाय
कार्याकार्ये कारणं चैव पार्थ ।
कृत करिष्यत् क्रियते च देवो
राहुं सोमं विद्धि च शक्रमेनम् ॥ १३
स विश्वकर्मा स हि विश्वरूपः
स विश्वभुग्विश्वसृग्विश्वजिच्च ।
स शूलभृच्छोणितभूत्करालः
स्तं कर्मभिर्विदितं वै स्तुवन्ति ॥ १४
तं गन्धर्वाणामप्सरसां च नित्य-
मुपातिष्ठन्ते विबुधानां शतानि ।
तं राक्षसाश्च परि संवदन्ति
रायस्पोषः स विजिगीषुरेकः ॥ १५
तमध्वरे शंसितारः स्तुवन्ति
रथन्तरे सामगाश्च स्तुवन्ति ।
तं ब्राह्मणा ब्रह्मगुहां प्रविष्टो
महीसत्रं भारताग्रे ददर्श ।
स चैव गामुद्धाराग्र्यकर्मा
विक्षोभ्य दैत्यानुरगान्दानवांश्च ॥१७
त घोषार्थे गीर्भिरिन्द्राः स्तुवन्ति
स चापीशो भारतैकः पशूनाम् ।
तस्य भक्षान्विविधान्वेदयन्ति
तमेवाजौ वाहन वेदयन्ति ॥ १८
तस्यान्तरिक्षं पृथिवी दिवं च
सर्वं वशे तिष्ठति शाश्वतस्य ।
स कुम्भे रेतः ससृजे सुराणा
यत्रोत्पन्नमृषिमाहुर्वसिष्ठम् ॥ १९
स मातरिश्वा विभुरश्ववाजी
स रश्मिवान् सविता चादिदेवः ।
तेनासुरा विजिताः सर्व एव
तद्विक्रान्तैर्विजितानीह त्रीणि ॥ २०
स देवानां मानुषाणां पितॄणां
तमेवाहुर्यज्ञविदां वितानम् ।
स एव काल विभजन्नुदेति
तस्योत्तर दक्षिण चायने द्वे ॥ २१
तस्यैवोर्ध्वं तिर्यगधश्चरन्ति
गभस्तयो मेदिनी भासयन्तः ।
तं ब्राह्मणा वेदविदो जुषन्ति
तस्यादित्यो भामुपयुज्य भाति ॥२२
स मासि मास्यध्वरकृद्विधत्ते
तमध्वरे वेदविदः पठन्ति ।
स एवोक्तश्चक्रमिदं त्रिनाभि
सप्ताश्वयुक्त वहते वै त्रिधाम ॥ २३
महातेजाः सर्वगः सर्वसिंहः
कृष्णो लोकान् धारयते यथैकः ।
हंसं तमोघ्नं च तमेव वीर
कृष्णं सदा पार्थ कर्तारमेहि ॥ २४
स एकदा कक्षगतो महात्मा
तुष्टो विभुः खाण्डवे धूमकेतुः ।
स राक्षसानुरगांश्चावजित्य
सर्वत्रगः सर्वमग्नौ जुहोति ॥ २५

कृत इति । ज्ञान अकर्तव्यकोटेरपि उपस्थानात्त्रेताया विवेक आसीत् । द्वापरे तु द्वितीयकोटे साम्याद्बल प्रधानमासीत् न धर्म । कलौ त्वधर्म एव बलवानिति भाव ॥१०॥ स एव पूर्वदेव आदिदेवो दैत्यान्निजघान स एव सम्राट् बलिरूपी पूर्वदेवो दैत्यो बभूव ॥११॥ ग्लाति ग्लायति ॥१२॥ एवमेन राहु सोम शक्र च विद्धि ॥१३॥ शोणितभूच्छरीरी ॥ १४ ॥ राय धनस्य पोष पोषक ॥ १५ ॥ महीसत्रं पृथिव्याश्छादन मज्जनमिति यावत् । 'सत्र यज्ञे महादानाच्छादनारण्यकैतवे' इति **मेदिनी** ॥१७॥ घोषार्थे गोवर्द्धनोद्धरणकाले घोषोम्बुनादो वा वृष्ट्यर्थमित्यर्थ । पशूना गवा जीवाना च वाहन जयप्रापकम् ॥ १८ ॥ सुराणां मित्रावरुणयो रेत कुभे ससृजे ॥ १९ ॥ विक्रान्तै पादविक्षेपैः त्रीणि भुवनानि ॥ २० ॥ देवाना आत्मेति शेष ॥ २१॥ जुषन्ति सेवन्ते ॥ २२ ॥ विधत्तेऽध्वरमित्यर्थात् त्रिनाभि शीतोष्णवृष्टिकालगर्भ चक्र संवत्सर त्रिधामेति वर्षवातोष्णप्रकारम् ॥ २३ ॥ हंस सूर्यम् ॥ २४ ॥

स एव पार्थाय श्वेतमश्वं प्रायच्छ-
त्स एवाश्वानथ सर्वांश्चकार ।
स बन्धुरस्तस्य रथस्त्रिचक्र-
स्त्रिवृच्छिराश्चतुरश्वस्त्रिनाभिः ॥ २६
स विहायो व्यदधात्पंचनाभिः
स निर्ममे गां दिवमन्तरिक्षम् ।
सोऽरण्यानि व्यसृजत्पर्वताश्च
हृषीकेशोऽमितदीप्तान्नितेजाः ॥ २७
अलंघयद्वै सरितो जिघासन्
शक्रं वज्र प्रहरन्तं निरास ।
स महेन्द्रः स्तूयते वै महाध्वरे
विप्रैरेको ऋक्सहस्रैः पुराणैः ॥ २८
दुर्वासा वै तेन नान्येन शक्यो
गृहे राजन् वासयितुं महौजाः ।
तमेवाहुर्ऋषिमेकं पुराणं
स विश्वकृद्विदधात्यात्मभावान् ॥२९
वेदाश्च यो वेदयतेऽधिदेवो
विधीश्च यश्चाश्रयते पुराणान् ।
कामे वेदे लौकिके यत्फलं च
विष्वक्सेनः सर्वमेतत्प्रतीहि ॥ ३०
ज्योतींषि शुक्लानि हि सर्वलोके
त्रयो लोका लोकपालास्त्रयश्च ।
त्रयोऽग्नयो व्याहृतयश्च तिस्रः
सर्वे देवा देवकीपुत्र एव ॥ ३१
स वत्सरः स ऋतुः सोऽर्धमासः
सोऽहोरात्रः स कला वै स काष्ठाः ।
मात्रा मुहूर्ताश्च लवाः क्षणाश्च
विष्वक्सेनः सर्वमेतत्प्रतीहि ॥ ३२
चन्द्रादित्यौ ग्रहनक्षत्रतारा-
सर्वाणि दर्शान्यथ पौर्णमासम् ।
नक्षत्रयोगा ऋतवश्च पार्थ
विष्वक्सेनात्सर्वमेतत्प्रसूतम् ॥ ३३
रुद्रादित्या वसवोऽथाश्विनौ च
साध्याश्च विश्वे मरुतां गणाश्च ।
प्रजापतिर्देवमाता दितिश्च
सर्वे कृष्णादृषयश्चैव सप्त ॥ ३४
वायुर्भूत्वा विक्षिपते च विश्व-
मग्निर्भूत्वा दहते विश्वरूपः ।
आपो भूत्वा मज्जयते च सर्वं
ब्रह्मा भूत्वा सृजते विश्वसंघान् ॥ ३५
वेद्यं च यद्वेदयते च वेद्यं
विधिश्च यश्च श्रयते विधेयम् ।
धर्मे च वेदे च बले च सर्वं
चराचरं केशवं त्वं प्रतीहि ॥ ३६
ज्योतिर्भूतः परमोऽसौ पुरस्तात्
प्रकाशते यत्प्रभया विश्वरूपः ।
अपः सृष्ट्वा सर्वभूतात्मयोनिः
पुराऽकरोत्सर्वमेवाथ विश्वम् ॥ ३७
ऋतूनुत्पातान्विविधान्यद्भुतानि
मेघान्विद्युत्सर्वमैरावतं च ।
सर्वं कृष्णात्स्थावर जङ्गमं च
विश्वात्मानं विष्णुमेनं प्रतीहि ॥ ३८
विश्वावासं निर्गुणं वासुदेवं
संकर्षणं जीवभूतं वदन्ति ।
ततः प्रद्युम्नमनिरुद्धं चतुर्थ-
माज्ञापयत्यात्मयोनिर्महात्मा ॥ ३९
स पञ्चधा पञ्चजनोपपन्नं
सञ्चोदयन् विश्वमिदं सिसृक्षुः ।
ततश्चकाराविनिमारुतौ च
खं ज्योतिरभ्रं च तथैव पार्थ ॥ ४०
स स्थावरं जङ्गमं चैव मेत-
च्चतुर्विधं लोकमिमं च कृत्वा ।
ततो भूमिं व्यदधात्पंचबीजां
द्यौः पृथिव्यां धास्यति भूरि वारि ४१

बन्धुर तस्य ससाररथस्य योक्ता त्रिचक्र सत्त्वरजस्तमोमय । त्रिवृच्छिरा ऊर्ध्वमध्याधोगतिफल चतुरश्व कालादृष्टेश्वरेच्छास्वसङ्कल्पाश्चत्वारोऽश्वा यस्य त्रिनाभि शुक्लं कृष्णं शुक्लकृष्णं चेति त्रिविधकर्मगर्भ ॥ २६ ॥ पञ्चनाभि पञ्चभूताना नाभिराश्रय इत्यर्थ ॥ २७ ॥ निरास पराभूतवान् ॥ २८ ॥ विधीन् अग्निहोत्रादीन् ॥ ३० ॥ वेद्यं वेदप्रतिपाद्य वेद्यं ज्ञेयम् ॥ ३६ ॥ अनिरुद्धं अहङ्कारम् ॥ ३९ ॥ पञ्चधा पञ्चप्रकार देवासुरमनुष्यश्वापदतिर्यग्रूपेण पञ्चजना पञ्चभूतानि तैरुपपन्नं विश्व सिसृक्षुराज्ञापयतीति पूर्वेणान्वय ॥ ४० ॥ चतुर्विध जरायुजादि पञ्चबीजा चतुर्विधभूतग्राम कर्म च तेषा बीजभूताम् ॥ ४१ ॥

तेन विश्वं कृतमेतद्धि राजन्
स जीवयत्यात्मनैवात्मयोनिः ।
ततो देवानसुरान् मानवांश्च
लोकानृषींश्चापि पितॄन् प्रजाश्च ।
समासेन विधिवत्प्राणिलोकान्
सर्वान् सदा भूतपतिः सिसृक्षुः ॥४२
शुभाशुभं स्थावरं जंगमं च
विष्वक्सेनात्सर्वमेतत्प्रतीहि ।
यद्वर्तते यच्च भविष्यतीह
सर्वं ह्येतत्केशवं त्वं प्रतीहि ॥ ४३
मृत्युश्चैव प्राणिनामन्तकाले
साक्षात्कृष्णः शाश्वतो धर्मवाहः ।
भूतं च यच्चेह न विद्म किञ्चि-
द्विष्वक्सेनात्सर्वमेतत्प्रतीहि ॥ ४४
यत्प्रशस्त च लोकेषु
पुण्यं यच्च शुभाशुभम् ।
तत्सर्वं केशवोऽचिन्त्यो
विपरीतमतः परम् ॥ ४५
एतादृशः केशवोऽतश्च भूयो
नारायणः परमश्चाव्ययश्च ।
मध्याद्यन्तस्य जगतस्तस्थुषश्च
बुभूषतां प्रभवश्चाव्ययश्च ॥ ४६

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि महापुरुषमाहात्म्ये अष्टपञ्चाशदधिकशततमोऽध्यायः ॥ १५८ ॥

१५९

युधिष्ठिर उवाच ।
ब्रूहि ब्राह्मणपूजायां व्युष्टिं त्वं मधुसूदन ।
वेत्ता त्वमस्य चार्थस्य वेद त्वां हि पितामहः
वासुदेव उवाच ।
शृणुष्वावहितो राजन्द्विजानां भरतर्षभ ।
यथा तत्त्वेन वदतो गुणान्वै कुरुसत्तम ॥ २
द्वारवत्यां समासीन पुरा मां कुरुनन्दन ।
प्रद्युम्नः परिपप्रच्छ ब्राह्मणैः परिकोपितः ॥ ३
किं फलं ब्राह्मणेष्वस्ति पूजायां मधुसूदन ।
ईश्वरत्व कुतस्तेषामिहैव च परत्र च ॥ ४
सदा द्विजातीन्संपूज्य किं फल तत्र मानद ।
एतद्ब्रूहि स्फुटं सर्वं सुमहान्संशयोऽत्र मे ॥ ५
इत्युक्ते वचने तस्मिन्प्रद्युम्नेन तथा त्वहम् ।
प्रत्यब्रुवं महाराज यत्तच्छृणु समाहितः ॥ ६
व्युष्टिं ब्राह्मणपूजायां रौक्मिणेय निबोध मे ।
एते हि सोमराजान ईश्वराः सुखदुःखयोः ७
अस्मिन्लोके रौक्मिणेय तथाऽमुष्मिंश्च पुत्रक
ब्राह्मणप्रमुखं सौम्यं न मेऽत्रास्ति विचारणा ८
ब्राह्मणप्रतिपूजायामायुः कीर्तिर्यशो बलम् ।
लोका लोकेश्वराश्चैव सर्वे ब्राह्मणपूजकाः ॥९
त्रिवर्गे चापवर्गे च यशःश्रीरोगशान्तिषु ।
देवतापितृपूजासु सन्तोष्याश्चैव नो द्विजाः॥
तत्कथं वै नाद्रियेयमीश्वरोऽस्मीति पुत्रक ।
मा ते मन्युर्महाबाहो भवत्वत्र द्विजान् प्रति ॥
ब्राह्मणा हि महद्भूतमस्मिन् लोके परत्र च ।
भस्म कुर्युर्जगदिदं क्रुद्धाः प्रत्यक्षदर्शिनः ॥ १२
अन्यानपि सृजेयुश्च लोकान्लोकेश्वरांस्तथा ।
कथ तेषु न वर्तेरन् सम्यग्ज्ञानात्सुतेजसः ॥
अवसन्मद्गृहे तात
ब्राह्मणो हरिपिङ्गलः ।
चीरवासा बिल्वदण्डी
दीर्घश्मश्रुः कृशो महान् ॥ १४

अत केशवात् यत्पर कल्प्यते तद्विपरीतं असन्मार्ग इत्यर्थ ॥ ४५ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे अष्टपञ्चाशदधिकशततमोऽध्याय ॥१५८॥

१५९
ब्रूहीति ॥१॥ सौम्य कल्याणम् ॥८॥

दीर्घेभ्यश्च मनुष्येभ्यः
प्रमाणादधिको भुवि।
स स्वैरं चरते लोकान्
ये दिव्या ये च मानुषाः ॥ १५

इमां गाथां गायमानश्चत्वरेषु सभासु च।
दुर्वाससं वासयेत्को ब्राह्मणं सत्कृतं गृहे १६
रोषणः सर्वभूतानां सूक्ष्मेप्यपकृते कृते।
परिभाषां च मे श्रुत्वा को नु दद्यात्प्रतिश्रयम्
यो मां कश्चिद्वासयीत न स मां कोपयेदिति
यस्मान्नाद्रियते कश्चित्ततोऽहं समवासयम् ॥
स संभुङ्क्ते सहस्राणां बहूनामन्नमेकदा।
एकदा सोऽल्पकं भुङ्क्ते न चैवैति पुनर्गृहान्
अकस्माच्च प्रहसति तथाऽकस्मात्प्ररोदिति।
न चास्य वयसा तुल्यः पृथिव्यामभवत्तदा २०
अथ स्वावसथं गत्वा स शय्यास्तरणानि च।
कन्याश्चालंकृता दग्ध्वा ततो व्यपगतः पुनः
अथ मामब्रवीद्भूयः स मुनिः संशितव्रतः।
कृष्ण पायसमिच्छामि भोक्तुमित्येव सत्वरः
तदैव तु मया तस्य
चित्तज्ञेन गृहे जनः।
सर्वान्यन्नानि पानानि
भक्ष्याश्चोच्चावचास्तथा ॥ २३
भवन्तु सत्कृतानीह
पूर्वमेव प्रचोदितः।
ततोऽहं ज्वलमानं वै
पायसं प्रत्यवेदयम् ॥ ॥ २४

तं भुक्त्वैव स तु क्षिप्रं ततो वचनमब्रवीत्।
क्षिप्रमङ्गानि लिंपस्व पायसेनेति स स्म ह ॥
अविमृश्यैव च ततः कृतवानस्मि तत्तथा।
तेनोच्छिष्टेन गात्राणि शिरश्चैवाभ्यमृक्षयम् ॥
स ददर्श तदाभ्याशे मातरं ते शुभाननाम्।
तामपि स्मयमानां स पायसेनाभ्यलेपयम् २७
मुनिः पायसदिग्धाङ्गी रथे तूर्णमयोजयत्।
तमारुह्य रथं चैव निर्ययौ स गृहान्मम ॥ २८
अग्निवर्णो ज्वलन्भीमान्स द्विजो रथधुर्यवत्।
प्रतोदेनातुदद्बालां रुक्मिणी मम पश्यतः २९
न च मे स्तोकमप्यासीद्दुःखमीर्ष्याकृतं तदा।
तथा स राजमार्गेण महता निर्ययौ बहिः ३०
तद्दृष्ट्वा महदाश्चर्यं दाशार्हा जातमन्यवः।
तत्राजल्पन्मिथः केचित्समाभाष्य परस्परम्॥
ब्राह्मणा एव जायेरन्नान्यो वर्णः कथञ्चन।
को ह्येनं रथमास्थाय जीवेदन्यः पुमानिह ३२
आशीविषविषं तीक्ष्णं ततस्तीक्ष्णतरो द्विजः
ब्रह्माशीविषदग्धस्य नास्ति कश्चिच्चिकित्सकः
तस्मिन्व्रजति दुर्धर्षे प्रास्खलद्रुक्मिणी पथि।
तन्नामर्षयत श्रीमांस्ततस्तूर्णमचोदयत् ॥ ३४
ततः परमसंक्रुद्धो रथात्प्रस्कन्द्य स द्विजः।
पदातिरुत्पथेनैव प्राद्रवद्दक्षिणामुखः ॥ ३५
तमुत्पथेन धावन्तमन्वधाव द्विजोत्तमम्।
तथैव पायसादिग्धः प्रसीद भगवन्निति ॥३६
ततो विलोक्य तेजस्वी ब्राह्मणो मामुवाच ह।
जितः क्रोधस्त्वया कृष्ण प्रकृत्यैव महाभुज ॥
न तेऽपराधमिह वै
दृष्टवानस्मि सुव्रत।
प्रीतोऽस्मि तव गोविन्द
वृणु कामान् यथेप्सितान् ॥ ३८

प्रसन्नस्य च मे तात पश्य व्युष्टिं यथाविधि।
यावदेव मनुष्याणामन्ने भावो भविष्यति ॥
यथैवान्ने तथा तेषां त्वयि भावो भविष्यति।
यावच्च पुण्या लोकेषु त्वयि कीर्तिर्भविष्यति
त्रिषु लोकेषु तावच्च वैशिष्ट्यं प्रतिपत्स्यसे।
सुप्रियः सर्वलोकस्य भविष्यसि जनार्दन ४१
यत्ते भिन्नं च दग्धं च यच्च किञ्चिद्विनाशितम्
सर्वं तथैव द्रष्टाऽसि विशिष्टं वा जनार्दन ॥
यावदेतत्प्रलिप्तं ते गात्रेषु मधुसूदन।
अतो मृत्युभयं नास्ति यावदिच्छसि चाच्युत।
न तु पादतले लिप्ते कस्मात्ते पुत्रकाद्य वै।
नैतन्मे प्रियमित्येव स मां प्रीतोऽब्रवीत्तदा ४४
इत्युक्तोहं शरीरं स्वं ददर्श श्रीसमायुतम्।
रुक्मिणीं चाब्रवीत्प्रीतः सर्वस्त्रीणां वरं यशः
कीर्तिं चानुत्तमां लोके
समवाप्स्यसि शोभने।
न त्वां जरा वा रोगो वा
वैवर्ण्यं चापि भाविनि ॥ ४६
स्प्रक्ष्यन्ति पुण्यगन्धा च कृष्णमाराधयिष्यसि
षोडशानां सहस्राणां वधूनां केशवस्य ह ४७
वरिष्ठा च सलोक्या च केशवस्य भविष्यसि
तव मातरमित्युक्त्वा ततो मां पुनरब्रवीत्४८
प्रस्थितः सुमहातेजा दुर्वासाग्निरिव ज्वलन्।
एषैव ते बुद्धिरस्तु ब्राह्मणान्प्रति केशव ॥ ४९
इत्युक्त्वा स तदा पुत्र तत्रैवान्तरधीयत।
तस्मिन्नन्तर्हिते चाहमुपांशु व्रतमाचरम् ॥ ५०

यत्किञ्चिद्ब्राह्मणो ब्रूयात्सर्वं कुर्यामिति प्रभो।
एतद्व्रतमहं कृत्वा मात्रा ते सह पुत्रक ॥ ५१
ततः परमहृष्टात्मा प्राविशं गृहमेव च।
प्रविष्टमात्रश्च गृहे सर्वं पश्यामि तन्नवम् ॥ ५२
यद्भिन्नं यच्च वै दग्धं तेन विप्रेण पुत्रक।
ततोऽहं विस्मयं प्राप्तः सर्वं दृष्ट्वा नवं दृढम् ५३
अपूजयं च मनसा रौकिमणेय सदा द्विजान्।
इत्यह रौक्मिणेयस्य पृच्छतो भरतर्षभ ॥ ५४
माहात्म्यं द्विजमुख्यस्य सर्वमाख्यातवांस्तदा
तथा त्वमपि कौन्तेय ब्राह्मणान्सततं प्रभो ५५
पूजयस्व महाभागान्वाग्भिर्दानैश्च नित्यदा।
एवं व्युष्टिमहं प्राप्तो ब्राह्मणस्य प्रसादजाम्।
यच्च मामाह भीष्मोऽयं तत्सत्यं भरतर्षभ ५६

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि दुर्वासोभिक्षा नाम एकोनषष्ट्यधिकशततमोऽध्यायः ॥ १५९ ॥

१६०

युधिष्ठिर उवाच।
दुर्वाससः प्रसादात्ते यत्तदा मधुसूदन।
अवाप्तमिह विज्ञान तन्मे व्याख्यातुमर्हसि १
महाभाग्यं च यत्तस्य नामानि च महात्मनः
तत्त्वतो ज्ञातुमिच्छामि सर्वं मतिमतां वर २
वासुदेव उवाच।
हन्त ते कीर्तयिष्यामि नमस्कृत्य कपर्दिने।
यदवाप्त मया राजञ्छ्रेयो यच्चार्जितं यशः ३
प्रयतः प्रातरुत्थाय यदधीये विशां पते।
प्राञ्जलिः शतरुद्रीयं तन्मे निगदतः शृणु ॥ ४
प्रजापतिस्तत्ससृजे तपसोऽन्ते महातपाः।
शङ्करस्त्वसृजत्तात प्रजाः स्थावरजङ्गमाः ॥५
नास्ति किञ्चित्पर भूतं महादेवाद्विशां पते।
इह त्रिष्वपि लोकेषु भूतानां प्रभवो हि सः ६
न चैवोत्सहते स्थातुं कश्चिदग्रे महात्मनः।
न हि भूतं समं तेन त्रिषु लोकेषु विद्यते ॥ ७
गन्धेनापि हि संग्रामे तस्य क्रुद्धस्य शत्रवः।
विसंज्ञा हतभूयिष्ठा वेपन्ते च पतन्ति च ॥ ८
घोरं च निनदं तस्य पर्जन्यनिनदोपमम्।
श्रुत्वा विशीर्येद्धृदयं देवानामपि संयुगे ९
यांश्च घोरेण रूपेण पश्येत्क्रुद्धः पिनाकधृत्।
न सुरा नासुरा लोके न गधर्वा न पन्नगाः
कुपिते सुखमेधन्ते तस्मिन्नपि गुहागताः।
प्रजापतेश्च दक्षस्य यजतो वितते क्रतौ ॥ ११
विव्याध कुपितो यज्ञं निर्भयस्तु भवस्तदा।
धनुषा बाणमुत्सृज्य सघोषं विननाद च ॥१२
ते न शर्म कुतः शांतिं विषाद लेभिरे सुराः।
विद्धे च सहसा यज्ञे कुपिते च महेश्वरे ॥ १३
तेन ज्यातलघोषेण सर्वे लोकाः समाकुलाः
बभूवुरवशाः पार्थ विषेदुश्च सुरासुराः ॥ १४
आपश्चुक्षुभिरे चैव चकपे च वसुन्धरा।
व्यद्रवन् गिरयश्चापि द्यौः पफाल च सर्वशः
अन्धेन तमसा लोकाः प्रावृता न चकाशिरे।
प्रनष्टा ज्योतिषां भाश्च सह सूर्येण भारत १६
भृशं भीतास्ततः शांतिं चक्रुः स्वस्त्ययनानि च
ऋषयः सर्वभूतानामात्मनश्च हितैषिणः ॥१७
ततः सोऽभ्यद्रवद्देवान्रुद्रो रौद्रपराक्रमः।
भगस्य नयने क्रुद्धः प्रहारेण व्यशातयत् १८
पूषणं चाभिदुद्राव पादेन च रुषान्वितः।
पुरोडाशं भक्षयतो दशनान्वै व्यशातयत् १९

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकोनषष्ट्यधिकशततमोऽध्याय ॥ १५९ ॥

१६०

दुर्वासस इति। अत्र त्रिपुरदाह श्रद्धारहितानां निन्दार्थं, उपासकाना स्थूलसूक्ष्मकारणदेहत्रयरूपाणां तिसृणा पुरा दाहेन ससारानर्थनिवृत्तिर्महादेवस्य त्रिपुरहन्तु प्रसादादेव भवतीति प्रदर्शनार्थश्च ॥ १ ॥

ततः प्रणेमुर्देवास्ते वेपमानाः स्म शङ्करम् ॥
पुनश्च सन्दधे रुद्रो दीप्तं सुनिशितं शरम् ॥२०
रुद्रस्य विक्रमं दृष्ट्वा भीता देवाः सहर्षिभिः ।
ततः प्रसादयामासुः शर्वं ते विबुधोत्तमाः २१
जेपुश्च शतरुद्रीयं देवाः कृत्वाऽञ्जलिं तदा ।
संस्तूयमानस्त्रिदशैः प्रससाद महेश्वरः ॥ २२
रुद्रस्य भागं यज्ञे च विशिष्टं ते त्वकल्पयन् ।
भयेन त्रिदशा राजञ्छरणं च प्रपेदिरे ॥ २३
तेन चैव हि तुष्टेन स यज्ञः सन्धितोऽभवत् ।
यद्यच्चापहृतं तत्र तत्तथैवान्वजीवयत् ॥ २४
असुराणां पुराण्यासंस्त्रीणि वीर्यवतां दिवि ।
आयसं राजतं चैव सौवर्णमपि चापरम् २५
नाशकत्तानि मघवा जेतुं सर्वायुधैरपि ।
अथ सर्वेऽमरा रुद्रं जग्मुः शरणमार्दिताः ॥२६
तत ऊचुर्महात्मानो देवाः सर्वे समागताः ।
रुद्र रौद्रा भविष्यन्ति पशवः सर्वकर्मसु २७
जहि दैत्यान्सह पुरैर्लोकांस्त्रायस्व मानद ।
स तथोक्तस्तथेत्युक्त्वा कृत्वा विष्णुं शरोत्तमं
शल्यमग्निं तथा कृत्वा
पुङ्खं वैवस्वतं यमम् ।
वेदान् कृत्वा धनुः सर्वान्
ज्यां च सावित्रिमुत्तमाम् ॥ २९
ब्रह्माणं सारथिं कृत्वा विनियुज्य च सर्वशः ।
त्रिपर्वणा त्रिशल्येन तेन तानि बिभेद सः ३०
शरेणादित्यवर्णेन कालाग्निसमतेजसा ।
ते सुराः सपुरास्तत्र दग्धा रुद्रेण भारत ॥ ३१
त चैवांकगतं दृष्ट्वा बालं पञ्चशिखं पुनः ।
उमा जिज्ञासमाना वै कोऽयमित्यब्रवीत्तदा
असूयतश्च शक्रस्य वज्रेण प्रहरिष्यतः ।
स वज्रं स्तम्भयामास तं बाहुं परिघोपमम् ३३
न संबुबुधिरे चैव देवास्तं भुवनेश्वरम् ।
सप्रजापतयः सर्वे तस्मिन्मुमुहुरीश्वरे ॥ ३४
ततो ध्यात्वा च भगवान्ब्रह्मा तममितौजसम
अयं श्रेष्ठ इति ज्ञात्वा ववन्दे तमुमापतिम् ३५
ततः प्रसादयामासुरुमां रुद्रं च ते सुराः ।
बभूव स तदा बाहुर्बलहन्तुर्यथा पुरा ॥ ३६
स चापि ब्राह्मणो भूत्वा दुर्वासा नाम वीर्यवान्
द्वारवत्यां मम गृहे चिर कालमुपावसन् ३७
विप्रकारान् प्रयुंक्ते स्म सुबहून्मम वेश्मनि ।
तानुदारतया चाहं चक्षमे चातिदुःसहान् ३८
स वै रुद्रः स च शिवः
सोऽग्निः सर्वः स सर्वजित् ।
स चैवेन्द्रश्च वायुश्च
सोश्विनौ स च विद्युतः ॥ ३९
स चन्द्रमाः स चेशानः स सूर्यो वरुणश्च सः
स कालः सौतको मृत्युः स यमो राज्यहानि च
मासार्धमासा ऋतवः संध्ये संवत्सरश्च सः ।
स धाता स विधाता च विश्वकर्मा स सर्ववित्
नक्षत्राणि गृहाश्चैव दिशोऽथ प्रदिशस्तथा ।
विश्वमूर्तिरमेयात्मा भगवान्परमद्युतिः ४२
एकधा च द्विधा चैव बहुधा च स एव हि ।
शतधा सहस्रधा चैव तथा शतसहस्रधा ४३
ईदृशः स महादेवो भूयश्च भगवानतः ॥
न हि शक्या गुणा वक्तुमपि वर्षशतैरपि ४४


इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि ईश्वरप्रशंसा नाम षष्ट्यधिकशततमोऽध्यायः ॥ १६० ॥

तं चैवेति । एवमध्यात्मं त्रिपुरदाहेऽपि ससारात्मक सूक्ष्म प्रपञ्चो यावद्देहपातं बाधितानुवृत्त्या वर्तत एव। त बालं हिरण्यगर्भाख्यं सूक्ष्मसमष्टिरूपं पुरदग्धुरंकगतं जीवन्मुक्त-प्रतीतिगोचरं जिज्ञासमाना उमा ब्रह्मविद्यामया कृत्स्नबाधे कृतेऽपि अयं कोऽवशिष्ट इत्यब्रवीत्पृष्टवती । तत्र महादेव-स्तस्य प्रत्यगनन्यत्वादनुत्तरमेवोत्तर ददौ । अत एव तं सूक्ष्मसमष्टिं क इति वेदे वदन्ति। प्रजापतिर्वै क इति। तस्य नामैव क इति प्रतिष्ठितं एव सर्वत्राख्यानतात्पर्यं ज्ञेयम् । तथा शक्रबाहुस्तंभाख्यायिकया त्रिपुरघ्न बाहुकृतं कर्म न स्पृशतीति दर्शितम् ॥३२॥ एकधा ब्रह्मरूपेण। द्विधा ब्रह्म-भेदेन । बहुधेत्यादि प्रपञ्चरूपेण ॥४३॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षष्ट्यधिक-शततमोऽध्याय ॥ १६० ॥

१६१

वासुदेव उवाच ।
युधिष्ठिर महाबाहो महाभाग्यं महात्मनः ।
रुद्राय बहुरूपाय बहुनाम्ने निबोध मे ॥ १
वदन्त्यग्निं महादेवं तथा स्थाणुं महेश्वरम् ।
एकाक्षं त्र्यम्बकं चैव विश्वरूपं शिवं तथा ॥ २
द्वे तनू तस्य देवस्य वेदज्ञा ब्राह्मणा विदुः ।
घोरामन्यां शिवामन्यां ते तनू बहुधा पुनः॥३
उग्रा घोरा तनुर्याऽस्य
सोग्निर्विद्युत्स भास्करः ।
शिवा सौम्या च या त्वस्य
धर्मस्त्वापोऽथ चंद्रमाः ॥ ४
आत्मनोर्ध्वं तु तस्याग्निः सोमोऽर्धं पुनरुच्यते
ब्रह्मचर्यं चरत्येका शिवा चास्य तनुस्तथा॥५
याऽस्य घोरतमा मूर्तिर्जगत्संहरते तथा ।
ईश्वरत्वान्महत्त्वाच्च महेश्वर इति स्मृतः ॥ ६
यन्निर्दहति यत्तीक्ष्णो यदुग्रो यत्प्रतापवान् ।
मांसशोणितमज्जादो यत्ततो रुद्र उच्यते ॥ ७
देवानां सुमहान्यच्च यच्चास्य विषयो महान् ।
यच्च विश्वं महत्पाति महादेवस्ततः स्मृतः॥८
धूम्ररूपं च यत्तस्य धूर्जटीत्यत उच्यते ।
समेधयति यन्नित्यं सर्वान्वै सर्वकर्मभिः ॥ ९
मनुष्यान् शिवमन्विच्छ-
स्तस्मादेष शिवः स्मृतः ।
दहत्यूर्ध्वं स्थितो यच्च
प्राणान्नृणां स्थिरश्च यत् ॥ १०
स्थिरलिंगश्च यन्नित्यं तस्मात्स्थाणुरिति स्मृतः
यदस्य बहुधा रूपं भूतं भव्य भवत्तथा ॥ ११
स्थावरं जंगमं चैव बहुरूपस्ततः स्मृतः ।
विश्वे देवाश्च यत्तस्मिन् विश्वरूपस्ततः स्मृतः
सहस्राक्षोऽयुताक्षो वा सर्वतोक्षिमयोऽपि वा
चक्षुषः प्रभवेत्तेजो नास्त्यंतोऽथास्य चक्षुषाम्
सर्वथा यत्पशून्पाति तैश्च यद्रमते सह ।
तेषामधिपतिर्यच्च तस्मात्पशुपतिः स्मृतः ॥१४
नित्येन ब्रह्मचर्येण लिङ्गमस्य यदा स्थितम् ।
महयत्यस्य लोकश्च प्रियं ह्येतन्महात्मनः ॥१५
विप्रहं पूजयेद्यो वै लिङ्गं वाऽपि महात्मनः ।
लिङ्गं पूजयिता नित्य महतीं श्रियमश्नुते ॥ १६
ऋषयश्चापि देवाश्च गंधर्वाप्सरसस्तथा ।
लिङ्गमेवार्चयन्ति स्म यत्तद्दूर्ध्वं समास्थितम्॥
पूज्यमाने ततस्तस्मिन्मोदते स महेश्वरः ।
सुखं ददाति प्रीतात्मा भक्तानां भक्तवत्सलः
एष एव श्मशानेषु देवो वसति निर्दहन् ।
यजन्ते ये जनास्तत्र वीरस्थाननिषेविणः १९
विषयस्थः शरीरेषु स मृत्युः प्राणिनामिह ।
स च वायुः शरीरेषु प्राणापानशरीरिणाम्२०
तस्य घोराणि रूपाणि दीप्तानि च बहूनि च
लोके यान्यस्य पूज्यंते विप्रास्तानि विदुर्बुधाः
नामधेयानि देवेषु बहून्यस्य यथार्थवत् ।
निरुच्यंते महत्त्वाच्च विभुत्वात्कर्मभिस्तथा२२
वेदे चास्य विदुर्विप्राः शतरुद्रीयमुत्तमम् ।
व्यासेनोक्तं च यच्चापि उपस्थानं महात्मनः॥
प्रदाता सर्वलोकानां विश्वं चाप्युच्यते महत्
ज्येष्ठभूतं वदन्त्येनं ब्राह्मणा ऋषयोऽपरे ॥२४
प्रथमो ह्येष देवानां मुखादग्निमजीजनत् ।
ग्रहैर्बहुविधैः प्राणान्संरुद्धानुत्सृजत्यपि ॥ २५
विमुञ्चति न पुण्यात्मा शरण्यः शरणागतान्
आयुरारोग्यमैश्वर्यं वित्तं कामांश्च पुष्कलान्
स ददाति मनुष्येभ्यः स एवाक्षिपते पुनः ।
शक्रादिषु च देवेषु तस्यैश्वर्यमिहोच्यते ॥२७
स एव व्यापृतो नित्यं त्रैलोक्यस्य शुभाशुभे
ऐश्वर्याच्चैव कामानामीश्वरः पुनरुच्यते ॥ २८
महेश्वरश्च लोकानां महतामीश्वरश्च सः ।
बहुभिर्विविधै रूपैर्विश्व व्याप्तमिदं जगत्
तस्य देवस्य यद्वक्त्रं समुद्रे वडवामुखम् २९

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि महेश्वरमाहात्म्य नाम एकषष्ट्यधिकशततमोऽध्यायः ॥ १६१ ॥



१६१

युधिष्ठिरेति ॥ १ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे एकषष्ट्यधिकशततमोऽध्याय ॥ १६१ ॥

१६२

वैशम्पायन उवाच ।
इत्युक्तवति वाक्यं तु कृष्णे देवकिनन्दने ।
भीष्मं शान्तनवं भूयः पर्यपृच्छद्युधिष्ठिरः ॥१
निर्णये वा महाबुद्धे सर्वधर्मविदां वर ।
प्रत्यक्षमागमो वेति किं तयोः कारणं भवेत्२
भीष्म उवाच ।
नास्त्यत्र संशयः कश्चि-
दिति मे वर्तते मतिः ।
शृणु वक्ष्यामि ते प्राज्ञ
सम्यक् त्वं मेऽनुपृच्छसि ॥ ३
संशयः सुगमस्तत्र दुर्गमस्तस्य निर्णयः ।
दृष्टं श्रुतमनन्तं हि यत्र संशयदर्शनम् ॥ ४
प्रत्यक्षं कारणं दृष्ट्वा हैतुकाः प्राज्ञमानिनः ।
नास्तीत्येवं व्यवस्यन्ति सत्यं संशयमेव च ५
तदयुक्तं व्यवस्यन्ति बालाः पण्डितमानिनः ।
अथ चेन्मन्यसे चैकं कारणं किं भवेदिति ॥६
शक्यं दीर्घेण कालेन युक्तेनातन्द्रितेन च ।
प्राणयात्रामनेकां च कल्पमानेन भारत ॥ ७
तत्परेणैव नान्येन शक्यं ह्येतस्य दर्शनम् ।
हेतूनामन्तमासाद्य विपुलं ज्ञानमुत्तमम् ॥ ८
ज्योतिः सर्वस्य लोकस्य विपुलं प्रतिपद्यते ।
न त्वेव गमनं राजन्हेतुतो गमनं तथा ।
अग्राह्यमनिबद्धं च वाचा संपरिवर्जयेत् ॥ ९
युधिष्ठिर उवाच ।
प्रत्यक्षं लोकतः सिद्धिर्लोकश्चागमपूर्वकः ।
शिष्टाचारो बहुविधस्तन्मे ब्रूहि पितामह ।
भीष्म उवाच ।
धर्मस्य ह्रियमाणस्य बलवद्भिर्दुरात्मभिः ।
संस्था यत्नैरपि कृता कालेन प्रतिभिद्यते ॥११
अधर्मो धर्मरूपेण तृणैः कूप इवावृतः ।
ततस्तैर्भिद्यते वृत्तं शृणु चैव युधिष्ठिर ॥ १२
अवृत्ता ये तु भिन्दन्ति श्रुतित्यागपरायणाः ।
धर्मविद्वेषिणो मन्दा इत्युक्तस्तेषु संशयः ॥ १३
अतृप्यन्तस्तु साधूनां य एवागमबुद्धयः ।
परमित्येव सन्तुष्टास्तानुपास्व च पृच्छ च ॥
कामार्थौ पृष्ठतः कृत्वा लोभमोहानुसारिणौ ।
धर्म इत्येव सम्बुद्धस्तानुपास्व च पृच्छ च १५
न तेषां भिद्यते वृत्तं यज्ञाः स्वाध्यायकर्म च ।
आचारः कारणं चैव धर्मश्चैकत्रयं पुनः ॥ १६
युधिष्ठिर उवाच ।
पुनरेव हि मे बुद्धिः संशये परिमुह्यति ।
अपारे मार्गमाणस्य परं तीरमपश्यतः ॥ १७
वेदः प्रत्यक्षमाचारः प्रमाणं तत्त्रयं यदि ।
पृथक्त्वं लभ्यते चैषां धर्मश्चैकत्रयं कथम् १८

१६२

इत्युक्तवतीति ॥ १ ॥ श्रुतिप्रत्यक्षयो किं बलवदिति प्रश्न ॥२॥ **दृष्टमिति** । अनन्तं क्वचित् श्रुत्यपेक्षया प्रत्यक्षं प्रबलं क्वचित्प्रत्यक्षापेक्षया श्रुतिरित्यर्थ ॥ ४ ॥ केचित्प्रत्यक्षं प्रबलं मत्वा हैतुकास्तार्किका परमाण्वादीन्प्रज्ञया नित्यत्वादिगुणयुक्तान् कल्पयन्त सत्यमबाधितं वाङ्मनसातीतं वस्तु नास्तीत्येव निश्चयं कुर्वान्ति। पैरवैदिकैरुपालब्धा सन्तस्तत्र संशयं कुर्वन्ति ॥ ५ ॥ अथेत्यादिसार्ध· । यदि त्वमपि एकमसहृतं ब्रह्म कारणं कथं भवेदिति संशयवानसि तर्हि दीर्घकालसेवनादिनाऽयमर्थो युक्तेन योगेन वेदितुं शक्य ॥ ६ ॥ एतस्य सत्यवस्तुन· हेतूनामन्तं सर्वसंशयोच्छेदे सति कल्पनासंज्ञा हेतवो निवर्तन्ते॥ ८॥ संशयोच्छेदश्च यदा ज्योतिः प्रत्यक्चैतन्यं विपुलमनन्तं प्रतिपद्यते तदैव भवति हेतुतस्तर्कायद्वस्त्वाधिगमनं तत् अधिगमनं न भवति। तर्केणापि हि शून्यप्रधानपरमाणव· कारणत्वेन प्रतिपाद्यन्ते तच्च अग्राह्यम् । यत यद्वाचा वेदेन अनिबद्ध अप्रतिपादितं तद्वर्जयेदिति न्याय ईक्षतेर्नाशब्दमिति प्रतिपादनात् । एतेन सर्वप्रमाणापेक्षया श्रुतेर्बलीयस्त्वं सिद्धम् ॥ ९ ॥ **प्रत्यक्षमिति** । लोकत सिद्धिरनुमानं आगमपूर्व शिष्टाचारश्चेति प्रमाणानि। एतेषां मध्ये किं प्रबलमिति प्रश्नार्थ ॥१०शिष्टाचारस्य दुरात्मभिरुच्छेदितत्वाद्वेद एव मुख्यं प्रमाणं प्रत्यक्षानुमानयोर्व्यभिचारित्वेनाविश्वसनीयत्वादित्याह--**धर्मस्येत्यादिना** ॥ ११ ॥ वृत्त शिष्टाचार· ॥ १२ ॥ भिन्दन्ति वृत्तं तेषु प्रत्यक्षानुमानाचारेषु ॥ १३ ॥ अतृप्यन्त नित्यं सोत्कण्ठा आगमजन्या बुद्धयो ग्रेषा ते एव परं श्रेष्ठं प्रमाणमित्यन्वयं ॥१४॥ **नेति** । वृत्तं प्रत्यक्षदृष्टं शीलम् । आचारः शौचादि । कारणं वेद । त्रयं मिलित्वा एको धर्म स धर्मः साधनीय इत्यर्थः । स्वाध्यायकर्म वेदरक्षार्थमाचारान्तर्गतमेव ज्ञेयम् ॥ १६ ॥ **वेद इति** । प्रमाणभेदात्प्रमेयैर्धर्मैरपि त्रिभिर्भवितव्यम् ॥ १८ ॥

भीष्म उवाच ।

धर्मस्य ह्रियमाणस्य बलवद्भिर्दुरात्मभिः ।
यद्येवं मन्यसे राजंस्त्रिधा धर्मविचारणा १९
एक एवेति जानीहि त्रिधा धर्मस्य दर्शनम् ।
पृथक्त्वे च न मे बुद्धिस्त्रयाणामपि वै तथा ॥
उक्तो मार्गस्त्रयाणां च तत्तथैव समाचर ।
जिज्ञासा न तु कर्तव्या धर्मस्य परितर्कणात्
सदैव भरतश्रेष्ठ मा तेऽभूदत्र संशयः ।
अन्धो जड इवाशङ्की यद्ब्रवीमि तदाचर २२
अहिंसा सत्यमक्रोधो दानमेतच्चतुष्टयम् ।
अजातशत्रो सेवस्व धर्म एष सनातनः ॥ २३
ब्राह्मणेषु च वृत्तिर्या पितृपैतामहोचिता ।
तामन्वेहि महाबाहो धर्मस्यैते हि देशिकाः॥
प्रमाणमप्रमाणं वै यः कुर्यादबुधो जनः ।
न स प्रमाणतामर्हो विवादजननो हि सः २५
ब्राह्मणानेव सेवस्व
सत्कृत्य बहुमन्य च ।
एतेष्वेव त्विमे लोकाः
कृत्स्ना इति निबोध तान् ॥ २६

युधिष्ठिर उवाच ।

ये च धर्ममसूयन्ते ये चैनं पर्युपासते ।
ब्रवीतु मे भवानेतत् क्व ते गच्छन्ति तादृशाः

भीष्म उवाच ।

रजसा तमसा चैव समवस्तीर्णचेतसः ।
नरकं प्रतिपद्यन्ते धर्मविद्वेषिणो जनाः ॥ २८
ये तु धर्मं महाराज सततं पर्युपासते ।
सत्यार्जवपराः सन्तस्ते वै स्वर्गभुजो नराः॥
धर्म एव गतिस्तेषामाचार्योपासनाद्भवेत् ।
देवलोकं प्रपद्यन्ते ये धर्मं पर्युपासते ॥ ३०
मनुष्या यदि वा देवाः शरीरमुपताप्य वै ।
धर्मिणः सुखमेधन्ते लोभद्वेषविवर्जिताः ३१
प्रथमं ब्रह्मणः पुत्रं धर्ममाहुर्मनीषिणः ।
धार्मिणः पर्युपासन्ते फलं पक्वमिवाशयः ॥ ३२

युधिष्ठिर उवाच ।

असतां कीदृशं रूपं साधवः किं च कुर्वते ।
ब्रवीतु मे भवानेतत्सन्तोऽसन्तश्च कीदृशाः

भीष्म उवाच ।

दुराचाराश्च दुर्धर्षा दुर्मुखाश्चाप्यसाधवः ।
साधवः शीलसंपन्नाः शिष्टाचारस्य लक्षणम्
राजमार्गे गवां मध्ये धान्यमध्ये च धार्मिणः
नोपसेवन्ति राजेन्द्र सर्गे मूत्रपुरीषयोः ॥ ३५
पञ्चानामशनं दत्वा शेषमश्नन्ति साधवः ।
न जल्पन्ति च भुञ्जाना न निद्रान्त्यार्द्रपाणयः
चित्रभानुमनड्वाह देवं गोष्ठं चतुष्पथम् ।
ब्राह्मणं धार्मिकं वृद्ध ये कुर्वन्ति प्रदक्षिणम् ॥
वृद्धानां भारतप्तानां स्त्रीणां चक्रधरस्य च ।
ब्राह्मणानां गवां राज्ञां पन्थानं ददते च ये ३८
अतिथीनां च सर्वेषां प्रेष्याणां स्वजनस्य च ।
तथा शरणकामानां गोप्ता स्यात्स्वागतप्रदः ॥
सायंप्रातर्मनुष्याणामशनं देवनिर्मितम् ।
नान्तरा भोजनं दृष्टमुपवासविधिर्हि सः ४०
होमकाले यथा वह्निः कालमेव प्रतीक्षते ।
ऋतुकाले तथा नारी ऋतुमेव प्रतीक्षते ॥ ४१
नान्यदा गच्छते यस्तु ब्रह्मचर्यं च तत्स्मृतम् ।
अमृतं ब्राह्मणा गाव इत्येतत्त्रयमेकतः ॥ ४२
तस्माद्गोब्राह्मणं नित्यमर्चयेत यथाविधि ।
यज्ञुषा संस्कृतं मांसमुपभुञ्जन्न दुष्यति ।
पृष्ठमांसं वृथामांसं पुत्रमांसं च तत्समम् ४३
स्वदेशे परदेशे वाप्यतिथिं नोपवासयेत् ।
कर्म वै सफलं कृत्वा गुरूणां प्रतिपादयेत् ४४
गुरुभ्यस्त्वासनं देयमभिवाद्याभिपूज्य च ।
गुरुमभ्यर्च्य वर्धन्ते आयुषा यशसा श्रिया ४५

कथमेको धर्मस्त्रितयप्रतिपाद्य इत्याशङ्क्याह–**धर्मस्येति** । हे राजन्यद्येवं धर्मत्रयं मन्यसे तन्नेति शेष ।किन्तु ह्रियमाणस्यैकस्यैव धर्मस्य त्रिधा त्रिप्रकारा विचारणा एक एव प्रमाणत्रयसंवादेन परीक्षणीय इत्यर्थ ॥ १९ ॥ त्रिधेत्यस्य व्याख्यानं एक एवेति त्रयाणा प्रमाणाना पृथक्त्वे प्रत्येकं स्वातंत्र्येण धर्मप्रतिपादकत्वे मम बुद्धिर्न च ॥ २० ॥ **उक्त इति** । प्रत्यक्षस्यातीन्द्रिये धर्मे प्रमाणाभावात् आचारस्य च प्रध्वंसितत्वात् त्रयाणा प्रमाणाना मध्ये परिशेषात् य उक्तो वेदे स एव मार्ग न तु परितर्कणाद्धर्मस्य विचार कर्तव्य इत्यर्थ ॥ २१ ॥ अत्र वेदे अशङ्की शङ्काशून्य ॥ २२॥ आशयो भोक्तुर्मन ॥ ३२ ॥ कीदृशा· किंलक्षणा किंकर्माणश्च ॥ ३३ ॥ सर्गे उत्सर्गम् ॥ ३५ ॥ पञ्चाना देवपितृभूतातिथिकुटुम्बानाम्॥ ३६ ॥ चक्रधरस्य भुजङ्गस्य बहुग्रामाधिपतेर्वा । ‘ भवेच्चक्रधरो विष्णौ भुजङ्गे ग्रामजालिनि ’ इति **विश्वलोचनः** ॥ ३८॥ कर्म अध्ययनं प्रतिपादयेत् दक्षिणामिति शेष· ॥ ४४ ॥

वृद्धान्नाभिभवेज्जातु न चैतान्प्रेषयेदिति।
नासीनः स्यात्स्थितेष्वेवमायुरस्य न रिष्यते॥
न नग्नामीक्षते नारीं न नग्नान्पुरुषानपि।
मैथुनं सततं गुप्तमाहारं च समाचरेत्॥ ४७
तीर्थानां गुरवस्तीर्थं चोक्षाणां हृदयं शुचि।
दर्शनानां परं ज्ञानं सन्तोषः परमं सुखम् ४८
सायं प्रातश्च वृद्धानां शृणुयात्पुष्कला गिरः
श्रुतमाप्नोति हि नरः सततं वृद्धसेवया॥ ४९
स्वाध्याये भोजने चैव दक्षिणं पाणिमुद्धरेत्।
यच्छेद्वाङ्मनसी नित्यमिन्द्रियाणि तथैव च
संस्कृतं पायसं नित्यं यवागूं कृसरं हविः।
अष्टकाः पितृदैवत्या ग्रहाणामभिपूजनम् ५१
श्मश्रुकर्मणि मङ्गल्यं क्षुतानामभिनन्दनम्।
व्याधितानां च सर्वेषामायुषामभिनन्दनम्५२
न जातु त्वमिति ब्रूयादापन्नोपि महत्तरम्।
त्वकारो वा वधो वेति विद्वत्सु न विशिष्यते
अवराणां समानानां शिष्याणां च समाचरेत्
पापमाचक्षते नित्यं हृदयं पापकर्मिणः॥ ५४
ज्ञानपूर्वकृतं कर्म च्छादयन्ते ह्यसाधवः।
ज्ञानपूर्वं विनश्यन्ति गूहमाना महाजने॥ ५५
न मां मनुष्याः पश्यन्ति
न मां पश्यन्ति देवताः।
पापेनाभिहितः पापः
पापमेवाभिजायते॥ ५६
यथा वार्धुषिको वृद्धिं दिनभेदे प्रतीक्षते।
धर्मेण पिहितं पापं धर्ममेवाभिवर्धयेत्॥ ५७
यथा लवणमंभोभिराप्लुतं प्रविलीयते।
प्रायश्चित्तहतं पापं तथा सद्यः प्रणश्यति ५८
तस्मात्पापं न गूहेत गूहमानं विवर्धयेत्।
कृत्वा तत्साधुष्वाख्येयं ते तत्प्रशमयन्त्युत॥
आशया संचितं द्रव्यं कालेनैवोपभुज्यते।
अन्ये चैतत्प्रपद्यन्ते वियोगे तस्य देहिनः॥६०
मानसं सर्वभूतानां धर्ममाहुर्मनीषिणः।
तस्मात्सर्वाणि भूतानि धर्ममेव समासते॥६१
एक एव चरेद्धर्मं न धर्मध्वजिको भवेत्।
धर्मवाणिजका ह्येते ये धर्ममुपभुञ्जते॥ ६२
अर्चेद्देवानदम्भेन सेवेतामायया गुरून्।
निधिं निदध्यात्पारत्र्यं यात्रार्थं दानशब्दितम्

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि धर्मप्रमाणकथने द्विषष्ट्यधिकशततमोऽध्यायः॥ १६२॥

१६३

युधिष्ठिर उवाच।
नाभागधेयः प्राप्नोति धनं सुबलवानपि।
भागधेयान्वितस्त्वर्थान्कृशो बालश्च विन्दति
नालाभकाले लभते प्रयत्नेऽपि कृते सति।
लाभकालेऽप्रयत्नेन लभते विपुलं धनम्॥ २
कृतयत्नाफलाश्चैव दृश्यन्ते शतशो नराः।
अयत्नेनैधमानाश्च दृश्यन्ते बहवो जनाः॥ ३
यदि यत्नो भवेन्मर्त्यः स सर्वं फलमाप्नुयात्।
नालभ्यं चोपलभ्येत नृणां भरतसत्तम॥ ४
प्रयत्नं कृतवन्तोऽपि दृश्यन्ते ह्यफला नराः।
मार्गित्वायशतैरर्थानमार्गश्चापरः सुखी॥ ५

दक्षिणं पाणिं उद्धरेत् यज्ञोपवीती भवेत्॥ ५०॥ अभिपूजनं पायसादिभिः॥ ५१॥ मङ्गल्य मङ्गलवचनं अभिनन्दनं शतं जीवेति वचनेन सुखोत्पादनं च कुर्यादिति शेषः॥ ५२॥ समाचरेदभिनन्दन पापकर्मिण स्वहृदयं पापिष्ठमित्याचक्षते कर्मणैव तेषा हृदयं ज्ञायत इत्यर्थः॥ ५४॥ धर्मध्वजिक तत्प्रकाशकः॥ ६२॥ पारत्र्यं परलोकाहितम्॥ ६३॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे द्विषष्ट्यधिकशततमोऽध्यायः॥ १६२॥

१६३

नाभागधेय इति॥१॥ कृतो यत्नोऽफलो येषा ते कृतयत्नाफलाः॥३॥ भवेत्समर्थः स्यात्॥ ४॥ आयशतैः उपायशतैः सुखी धनेन॥ ५॥

अकार्यमसकृत्कृत्वा दृश्यन्ते ह्यधना नराः ।
धनयुक्ताः स्वकर्मस्था दृश्यन्ते चापरेऽधनाः॥
अधीत्य नीतिशास्त्राणि नीतियुक्तो न दृश्यते
अनभिज्ञश्च साचिव्यं गमितः केन हेतुना ॥७
विद्यायुक्तो ह्यविद्यश्च धनवान् दुर्मतिस्तथा ।
यदि विद्यामुपाश्रित्य नरः सुखमवाप्नुयात् ॥८
न विद्वान्विद्यया हीनं वृत्त्यर्थमुपसंश्रयेत् ।
यथा पिपासां जयति पुरुषः प्राप्य वै जलम्९
इष्टार्थो विद्यया ह्येव न विद्यां प्रजहेन्नरः ।
नाप्राप्तकालो म्रियते विद्धः शरशतैरपि ।
तृणाग्रेणापि संस्पृष्टः प्राप्तकालो न जीवति ॥

भीष्म उवाच ।

ईहमानः समारम्भान् यदि नासादयेद्धनम् ।
उग्रं तपः समारोहेन्न ह्यनुप्तं प्ररोहति ॥ ११
दानेन भोगी भवति मेधावी वृद्धसेवया ।
अहिंसया च दीर्घायुरिति प्राहुर्मनीषिणः१२
तस्माद्याच्ञा न याचेत पूजयेद्धार्मिकानपि ।
सुभाषी प्रियकृच्छान्तः सर्वसत्त्वाविहिंसकः॥
यदा प्रमाणं प्रसवः स्वभावश्च सुखासुखे ।
दंशकीटपिपीलानां स्थिरो भव युधिष्ठिर १४

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि धर्मप्रशंसायां त्रिषष्ट्यधिकशततमोऽध्यायः ॥ १६३ ॥



१६४

भीष्म उवाच ।

कार्यते यच्च क्रियते सच्चासच्च कृताकृतम् ।
तत्राश्वसीत सत्कृत्वा असत्कृत्वा न विश्वसेत्
काल एव सर्वकाले निग्रहानुग्रहौ ददत् ।
बुद्धिमाविश्य भूतानां धर्माधर्मौ प्रवर्तते ॥ २
यदा त्वस्य भवेद्बुद्धिर्धर्मार्थस्य प्रदर्शनात् ।
तदाश्वसीत धर्मात्मा दृढबुद्धिर्न विश्वसेत्॥३
एतावन्मात्रमेतद्धि भूतानां प्राज्ञलक्षणम् ।
कालयुक्तोप्युभयविच्छेषं युक्तं समाचरेत् ॥४
यथा ह्युपस्थितैश्वर्याः प्रजायन्ते न राजसाः ।
एवमेवात्मनात्मानं पूजयन्तीह धार्मिकाः ॥५
न ह्यधर्मतयाऽधर्मं दद्यात्कालः कथंचन ।
तस्माद्विशुद्धमात्मानं जानीयाद्धर्मचारिणम् ६
स्प्रष्टुमप्यसमर्थो हि ज्वलन्तमिव पावकम् ।
अधर्मः संततो धर्मं कालेन परिरक्षितम् ॥ ७
कार्यावेतौ हि धर्मेण धर्मो हि विजयावहः ।
त्रयाणामपि लोकानामालोकः कारणं भवेत् ८
न तु कश्चिन्नयेत्प्राज्ञो गृहीत्वैव करे नरम् ।
उच्यमानस्तु धर्मेण धर्मलोकभयच्छले ॥ ९
शूद्रोऽहं नाधिकारो मे चातुराश्रम्यसेवने ।
इति विज्ञानमपरे नात्मन्युपदधत्युत ॥ १०

प्रसव प्रसवकारणं कर्मैव देशादीना सुखाद्यासौ प्रमाण नियामकं एवं स्वस्यापि ज्ञात्वा स्थिरोऽचञ्चलो भव ॥१४॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे त्रिषष्ट्यधिकशततमोऽध्याय ॥ १६३ ॥

१६४

कार्यत इति ॥ १ ॥ प्रवर्तते प्रवर्तयति ॥ २ ॥ धर्मार्थस्य धर्मफलस्य प्रदर्शनात् यदा धर्म एव श्रेयस्कर इति बुद्धिर्भवेत्तदाऽयं धर्मात्मा धर्मचित्त धर्मे आश्वसीत विश्वासं कुर्वीत अदृढबुद्धिस्तु न विश्वसेत् धर्मफले ॥ ३ ॥ एतावद्धर्मे विश्वासवत्त्वं उभयवित्कर्तव्याकर्तव्यवित् ॥ ४ ॥ राजसा मलिना. ॥ ५ ॥ धर्म कदाप्यधर्मो न भवेदित्याह —**न ह्यधर्मतया** इति । अधर्मतया तु खहेतुतया ॥ ६ ॥ एतौ विशुद्धताऽधर्मास्पर्शौ ॥ ८ ॥ नयेद्धर्मामिति शेष । धर्मेण धर्मानुष्ठानार्थं इतरैरुच्यमान प्रेर्यमाण सन्सर्वलोकभयच्छलेतेषा प्रतारणे प्रवर्तते । यद्वा । स्वं निस्तारं स्वयमेवाचरेदित्याह—**न त्विति** नयेत् ऊर्ध्वामिति शेष । किंतु धर्मभयलोकभययोश्छलेछलने निवृत्तिनिमित्तं धर्मेण हेतुना अर्थात्प्राज्ञेन उच्यमान एव नर ऊर्ध्वं गच्छतीति शेष. । शूद्रोऽहमित्यादि वदन्निति शेषपूरणेन योज्यम् ॥ ९ ॥ अपरे साधव न उपदधति न च्छलं कुर्वान्ति यथाधिकारं धर्मे कुर्वन्ति न च्छलमित्यर्थ तस्मात्प्रवर्तना सर्वा व्यर्थैवेति भाव· ॥ १० ॥

विशेषेण च वक्ष्यामि चातुर्वर्ण्यस्य लिङ्गतः ।
पञ्चभूतशरीराणां सर्वेषां सदृशात्मनाम्॥ ११
लोकधर्मे च धर्मे च विशेषकरणं कृतम् ।
यथैकत्वं पुनर्यान्ति प्राणिनस्तत्र विस्तरः १२
अध्रुवो हि कथं लोकः स्मृतो धर्मः कथं ध्रुवः
यत्र कालो ध्रुवस्तात तत्र धर्मः सनातनः १३
सर्वेषां तुल्यदेहानां सर्वेषां सदृशात्मनाम् ।
कालो धर्मेण संयुक्तः शेष एव स्वयं गुरुः १४
एवं सति न दोषोऽस्ति भूतानां धर्मसेवने ।
तिर्यग्योनावपि सतां लोक एव मतो गुरुः १५

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि धर्मप्रशंसायां चतुःषष्ट्यधिकशततमोऽध्यायः ॥ १६४ ॥



१६५

वैशम्पायन उवाच ।
शरतल्पगतं भीष्म पाण्डवोऽथ कुरूद्वहः ।
युधिष्ठिरो हितं प्रेप्सुरपृच्छत्कलमषापहम् ॥ १
युधिष्ठिर उवाच ।
किं श्रेयः पुरुषस्येह किं कुर्वन्सुखमेधते ।
विपाप्मा स भवेत्केन किं वा कलमषनाशनम्
वैशम्पायन उवाच ।
तस्मै शुश्रूषमाणाय भूयः शान्तनवस्तदा ।
दैवं वंशं यथान्यायमाचष्ट पुरुषर्षभ ॥ २
भीष्म उवाच ।
अयं दैवतवंशो वै ऋषिवंशसमन्वितः ।
त्रिसन्ध्यं पठितः पुत्र कलमषापहरः परः ॥ ४
यदह्ना कुरुते पापमिन्द्रियैः पुरुषश्चरन् ।
बुद्धिपूर्वमबुद्धिर्वा रात्रौ यच्चापि सन्ध्ययोः ५
मुच्यते सर्वपापेभ्यः कीर्तयन्वै शुचिः सदा ।
नान्धो न बधिरः काले कुरुते स्वस्तिमान्सदा
तिर्यग्योनिं न गच्छेच्च नरकं सङ्कराणि च ।
न च दुःखभयं तस्य मरणे स न मुह्यति ॥ ७
देवासुरगुरुर्देवः
सर्वभूतनमस्कृतः ।
अचिन्त्योऽथाप्यनिर्देश्यः
सर्वप्राणो ह्ययोनिजः ॥ ८
पितामहो जगन्नाथः सावित्री ब्रह्मणः सती ।
वेदभूरथ कर्ता च विष्णुर्नारायणः प्रभुः ॥ ९
उमापतिर्विरूपाक्षः स्कन्दः सेनापतिस्तथा ।
विशाखो हुतभुग्वायुश्चन्द्रसूर्यौ प्रभाकरौ॥१०
शक्रः शचीपतिर्देवो यमो धूमोर्णया सह ।
वरुणः सह गौर्या च सह ऋद्ध्या धनेश्वरः११
सौम्या गौः सुरभिर्देवी विश्वश्चाश्च महानृषिः
सङ्कल्पः सागरो गङ्गा स्रवन्त्योऽथ मरुद्गणः॥
वालखिल्यास्तपःसिद्धाः कृष्णद्वैपायनस्तथा
नारदः पर्वतश्चैव विश्वावसुर्हाहाहूहूः ॥ १३

विशेषेणेति युग्मं सर्वेषा प्राणिना पुरुषाणा वा पाञ्चभौतिकत्वे प्रत्यक्षेऽपि विशेषकरणं इद पवित्रमिदमपवित्रमिति व्यवस्थापनं लोकधर्मे शास्त्रीयधर्मे च निमित्ते सति कृतम् । पशुपामरपाण्डिताना यथा पुनर्विहितैनैते एकत्वं प्राकृतं गच्छेयुरिति शास्त्रेण वर्मनियम कृत इत्यर्थ. ॥११॥ अत्र शङ्कते–**अध्रुव इति**। लोकस्य धर्मस्य च कार्यकारणभावात्कार्यस्याध्रुवत्वं कारणस्य ध्रुवत्वं च न युक्त तन्तुनाशमन्तरेण पटनाशायोगादित्यर्थ । उत्तरमाह—**कालः** सङ्कल्प निष्कामधर्म एव ध्रुवस्तत्फलं न तु सकाम इत्यर्थ ॥ १३ ॥ **सर्वेषामिति**। धर्मसंयुक्त सङ्कल्प एव शेष· शिष्यते नान्य । स च कथमुदेष्यतीत्यत्राह—**स्वयं गुरुरिति**। धर्मबलात्स्वयमेव च स उदेति न शिक्षयेदित्यर्थ. ॥ १४ ॥ **एवमिति**। यदा भूताना प्राक्कर्मैव तत्र तत्र सुखदु खसाधने प्रवर्तकं अतो धर्मसेवने कर्मफलभोगे अक्षमज्ञसेऽपि भूतानां दोषो नास्ति । यतः तिर्यग्योनावपि सता विद्यमानाना भूताना सदसत्प्रवृत्तौ पूर्वकर्मानुसाराल्लोक एव गुरुर्दृष्ट· । विधिनियंत्रितो लोकदृष्टान्तेनैव साधुन्यसाधुनि वा कर्मणि प्रवर्तते इत्यर्थ. ॥ १५ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे चतु.षष्ट्यधिकशततमोऽध्याय ॥ १६४ ॥

१६५

शरतल्पगतमित्यध्यायद्वयं स्पष्टार्थम् ॥ १ ॥

तुम्बुरुश्चित्रसेनश्च देवदूतश्च विश्रुतः ।
देवकन्या महाभागा दिव्याश्चाप्सरसां गणाः
उर्वशी मेनका रंभा मिश्रकेशी ह्यलंबुषा ।
विश्वाची च घृताची च पञ्चचूडा तिलोत्तमा
आदित्या वसवो रुद्राः साध्विनः पितरोपि च
धर्मः श्रुतं तपो दीक्षा व्यवसायः पितामहः॥
शर्वर्यो दिवसाश्चैव मारीचः कश्यपस्तथा ।
शुक्रो बृहस्पतिर्भौमो बुधो राहुः शनैश्चरः ॥
नक्षत्राण्यृतवश्चैव मासाः पक्षाः सवत्सराः ।
वैनतेयाः समुद्राश्च कद्रुजाः पन्नगास्तथा १८
शतद्रुश्च विपाशा च चन्द्रभागा सरस्वती ।
सिन्धुश्च देविका चैव प्रभासं पुष्कराणि च ॥
गङ्गा महानदी वेणा कावेरी नर्मदा तथा ।
कुलंपुना विशल्या च करतोयांबुवाहिनी २०
सरयूर्गण्डकी चैव लोहितश्च महानदः ।
ताम्राऽरुणा वेत्रवती पर्णाशा गौतमी तथा॥
गोदावरी च वेण्या च कृष्णवेणा तथाऽद्रिजा
दृषद्वती च कावेरी चक्षुर्मन्दाकिनी तथा २२
प्रयागं च प्रभासं च पुण्यं नैमिषमेव च ।
तच्च विश्वेश्वरस्थानं यत्र तद्विमलं सरः ॥ २३
पुण्यतीर्थं सुसलिलं कुरुक्षेत्रं प्रकीर्तितम् ।
सिन्धूत्तमं तपोदानं जबूमार्गमथापि च ॥ २४
हिरण्वती वितस्ता च तथा प्लक्षवती नदी ।
वेदस्मृतिर्वेदवती मालवाथाश्ववत्यपि ॥ २५
भूमिभागास्तथा पुण्या गङ्गाद्वारमथापि च ।
ऋषिकुल्यास्तथा मेध्या नद्यः सिंधुवहास्तथा
चर्मण्वती नदी पुण्या कौशिकी यमुना तथा।
नदी भीमरथी चैव बाहुदा च महानदी॥ २७
माहेन्द्रवाणी त्रिदिवा नीलिका च सरस्वती।
नन्दा चापरनन्दा च तथा तीर्थमहाह्रदः २८
गयाऽथ फल्गुतीर्थं च धर्मारण्यं सुरैर्वृतम् ।
तथा देवनदी पुण्या सरश्च ब्रह्मनिर्मितम् २९
पुण्यं त्रिलोकविख्यातं सर्वपापहरं शिवम् ।
हिमवान्पर्वतश्चैव दिव्यौषधिसमन्वितः॥ ३०
विंध्यो धातुविचित्राङ्गस्तीर्थवानौषधान्वितः
मेरुर्महेन्द्रो मलयः श्वेतश्च रजतावृतः ॥ ३१
शृङ्गवान्मन्दरो नीलो निषधो दर्दुरस्तथा ।
चित्रकूटोऽजनाभश्च पर्वतो गन्धमादनः ३२
पुण्यः सोमगिरिश्चैव तथैवान्ये महीधराः ।
दिशश्च विदिशश्चैव क्षितिः सर्वे महीरुहाः ३३
विश्वेदेवा नभश्चैव नक्षत्राणि ग्रहास्तथा ।
पांतु नः सततं देवाः कीर्तिताऽकीर्तिता मया
कीर्तयानो नरो ह्येतान्मुच्यते सर्वकिल्बिषैः ।
स्तुवंश्च प्रतिनन्दंश्च मुच्यते सर्वतो भयात् ३५
सर्वसत्कृरपापेभ्यो देवतास्तवनंदकः ।
देवतानन्तरं विप्रांस्तपःसिद्धांस्तपोधिकान्
कीर्तितान्कीर्तयिष्यामि सर्वपापप्रमोचनान्
यवक्रीतोऽथ रैभ्यश्च कक्षीवानौशिजस्तथा
भृग्वङ्गिरास्तथा कण्वो मेधातिथिरथ प्रभुः ।
बर्ही च गुणसम्पन्नः प्राची दिशमुपाश्रिताः३८
भद्रां दिशं महाभागा उल्मुचुः प्रमुचुस्तथा ।
मुमुचुश्च महाभागः स्वस्त्यात्रेयश्च वीर्यवान्३९
मित्रावरुणयोः पुत्रस्तथाऽगस्त्यः प्रतापवान्
दृढायुश्चोर्ध्वबाहुश्च विश्रुतावृषिसत्तमौ ॥ ४०
पश्चिमां दिशमाश्रित्य य एधंते निबोध तान्
उषंगुः सह सोदर्यैः परिव्याधश्च वीर्यवान् ४१
ऋषिर्दीर्घतमाश्चैव गौतमः काश्यपस्तथा ।
एकतश्च द्वितश्चैव त्रितश्चैव महानृषिः ॥ ४२
अत्रेः पुत्रश्च धर्मात्मा तथा सारस्वतः प्रभुः ।
उत्तरां दिशमाश्रित्य य एधन्ते निबोध तान्॥
अत्रिर्वसिष्ठः शक्तिश्च पाराशर्यश्च वीर्यवान् ।
विश्वामित्रो भरद्वाजो जमदग्निस्तथैव च ४४
ऋचीकपुत्रो रामश्च ऋषिरौद्दालकिस्तथा ।
श्वेतकेतुः कोहलश्च त्रिपुलो देवलस्तथा ४५
देवशर्मा च धौम्यश्च हस्तिकाश्यप एव च ।
लोमशो नाचिकेतश्च लोमहर्षण एव च ४६
ऋषिरुग्रश्रवाश्चैव भार्गवश्च्यवनस्तथा ॥
एष वै समवायश्च ऋषिदेवसमन्वितः ॥ ४७
आद्यः प्रकीर्तितो राजन्सर्वपापप्रमोचनः ।
नृगो ययातिर्नहुषो यदुः पूरुश्च वीर्यवान् ४८
धुंधुमारो दिलीपश्च सगरश्च प्रतापवान् ।
कुशाश्वो यौवनाश्वश्च त्रिशाश्वः सत्यवांस्तथा
दुष्यन्तो भरतश्चैव चक्रवर्ती महायशाः ।
पवनो जनकश्चैव तथा दशरथो नृपः ५०
रघुर्नरवरश्चैव तथा दशरथो नृपः ।
रामो राक्षसहा वीरः शशबिन्दुर्भगीरथः ५१
हरिश्चन्द्रो मरुत्तश्च तथा दृढरथो नृपः ।
महोदयौ ह्यलर्कश्च ऐलश्चैव नराधिपः ॥ ५२
करंधमो नरश्रेष्ठः कम्बोरश्च नराधिपः ।
दक्षोम्बरीषः कुकुरो रैवतश्च महायशाः ॥ ५३

कुरुः संवरणश्चैव मांधाता सत्यविक्रमः ।
मुचुकुन्दश्च राजर्षिर्जह्नुर्जाह्नविसेवितः ॥ ५४
आदिराजः पृथुर्वैन्यो मित्रभानुः प्रियङ्करः ।
त्रसद्स्युस्तथा राजा श्वेतो राजर्षिसत्तमः ५५
महाभिषश्च विख्यातो निमिराजा तथाऽष्टकः
आयुः क्षुपश्च राजर्षिः कक्षेयुश्च नराधिपः ५६
प्रतर्दनो दिवोदासः सुदासः कोसलेश्वरः ।
पेलो नलश्च राजर्षिर्मनुश्चैव प्रजापतिः ॥ ५७
हविर्धन्श्च पृषध्रश्च प्रतीपः शांतनुस्तथा ।
अजः प्राचीनबर्हिश्च तथेक्ष्वाकुर्महायशाः ५८
अनरण्यो नरपतिर्जानुजंघस्तथैव च ।
कक्षसेनश्च राजर्षिर्ये चान्ये चानुकीर्तिताः५९
कल्यमुत्थाय यो नित्यं संध्ये द्वेऽस्तमयोदये
पठेच्छुचिरनावृत्तः स धर्मफलभाग्भवेत् ६०
देवा देवर्षयश्चैव स्तुता राजर्षयस्तथा ।
पुष्टिमायुर्यशः स्वर्गं विधास्यन्ति ममेश्वराः
मा विघ्नं मा च मे पापं मा च मे परिपंथिनः
ध्रुवो जयो मे नित्यः स्यात्परत्र च शुभा गतिः

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि वंशानुकीर्तनं नाम पञ्चषष्ट्यधिकशततमोऽध्यायः ॥ १६५ ॥

१६६

जनमेजय उवाच ।
शरतल्पगते भीष्मे कौरवाणां धुरंधरे ।
शयाने वीरशयने पांडवैः समुपस्थिते ॥ १
युधिष्ठिरो महाप्राज्ञो मम पूर्वपितामहः ।
धर्माणामागमं श्रुत्वा विदित्वा सर्वसंशयान्
दानानां च विधिं श्रुत्वा च्छिन्नधर्मार्थसंशयः
यदन्यदकरोद्विप्र तन्मे शंसितुमर्हसि ॥ ३
वैशम्पायन उवाच ।
अभून्मुहूर्तं स्तिमितं सर्वं तद्राजमण्डलम् ।
तूष्णींभूते ततस्तस्मिन्पटे चित्रमिवार्पितम् ४
मुहूर्तमिव च ध्यात्वा व्यासः सत्यवतीसुतः
नृपं शयानं गाङ्गेयमिदमाह वचस्तदा ॥ ५
राजन्प्रकृतिमापन्नः कुरुराजो युधिष्ठिरः ।
सहितो भ्रातृभिः सर्वैः पार्थिवैश्चानुयायिभिः
उपास्ते त्वां नरव्याघ्र सह कृष्णेन धीमता ।
तमिमं पुरयानाय समनुज्ञातुमर्हसि ॥ ७
एवमुक्तो भगवता व्यासेन पृथिवीपतिः ।
युधिष्ठिरं सहामात्यमनुजज्ञे नदीसुतः ॥ ८
उवाच चैनं मधुरं नृपं शांतनवो नृपः ।
प्रविशस्व पुरीं राजन्व्येतु ते मानसो ज्वरः॥९
यजस्व विविधैर्यज्ञैर्बहुभिः स्वाप्तदक्षिणैः ।
ययातिरिव राजेन्द्र श्रद्धादमपुरःसरः ॥ १०
क्षत्रधर्मरतः पार्थ पितॄन्देवांश्च तर्पय ।
श्रेयसा योक्ष्यसे चैव व्येतु ते मानसो ज्वरः
रञ्जयस्व प्रजाः सर्वाः प्रकृतीः परिसांत्वय ॥
सुहृदः फलसत्कारैरर्चयस्व यथार्हतः ॥ १२
अनु त्वां तात जीवंतु मित्राणि सुहृदस्तथा ।
चैत्यस्थाने स्थितं वृक्षं फलवन्तमिव द्विजाः
आगन्तव्यं च भवता समये मम पार्थिव ।
विनिवृत्ते दिनकरे प्रवृत्ते चोत्तरायणे १४
तथेत्युक्त्वा च कौंतेयः सोभिवाद्य पितामहम्
प्रययौ सपरीवारो नगरं नागसाह्वयम् ॥ १५
धृतराष्ट्रं पुरस्कृत्य गांधारी च पतिव्रताम् ।
सह तैर्ऋषिभिः सर्वैर्भ्रातृभिः केशवेन च १६
पौरजानपदैश्चैव मन्त्रिवृद्धैश्च पार्थिव ।
प्रविवेश कुरुश्रेष्ठः पुरं वारणसाह्वयम् ॥ १७

इति श्रीमहाभारते अनुशासनपर्वणि दानधर्मपर्वणि भीष्मानुज्ञायां षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥

॥ समाप्तमानुशासनिकं पर्व ॥

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चषष्ट्यधिकशततमोऽध्याय ॥ १६५ ॥

१६६
शरतल्पगत इति ॥ १ ॥ इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे षट्षष्ट्यधिकशततमोऽध्यायः ॥ १६६ ॥

भीष्मस्वर्गारोहणपर्व २

१६७

वैशम्पायन उवाच ।
ततः कुंतीसुतो राजा पौरजानपदं जनम् ।
पूजयित्वा यथान्यायमनुजज्ञे गृहान्प्रति ॥ १
सान्त्वयामास नारीश्च हतवीरा हतेश्वराः ।
विपुलैरर्थदानैः स तदा पाण्डुसुतो नृपः ॥ २
सोभिषिक्तो महाप्राज्ञः प्राप्य राज्यं युधिष्ठिरः
अवस्थाप्य नरश्रेष्ठः सर्वाः स्वप्रकृतीस्तथा ॥ ३
द्विजेभ्यो गुणमुख्येभ्यो नैगमेभ्यश्च सर्वशः ।
प्रतिगृह्याशिषो मुख्यास्तथा धर्मभृतां वरः॥४
उषित्वा शर्वरीः श्रीमान्पञ्चाशन्नगरोत्तमे ।
समयं कौरवाग्र्यस्य सस्मार पुरुषर्षभः ॥ ५
स निर्ययौ गजपुराद्याजकैः परिवारितः ।
दृष्ट्वा निवृत्तमादित्यं प्रवृत्तं चोत्तरायणम् ॥ ६
घृतं माल्यं च गन्धांश्च क्षौमाणि च युधिष्ठिरः
चन्दनागुरुमुख्यानि तथा कालीयकान्यपि ॥७
प्रस्थाप्य पूर्वं कौन्तेयो भीष्मसंस्करणाय वै
माल्यानि च वरार्हाणि रत्नानि विविधानि च
धृतराष्ट्रं पुरस्कृत्य गान्धारीं च यशस्विनीम्
मातरं च पृथां धीमान्भ्रातॄंश्च पुरुषर्षभान् ॥ ९
जनार्दनेनानुगतो विदुरेण च धीमता ।
युयुत्सुना च कौरव्यो युयुधानेन वा विभो ॥
महता राजभोगेन परिबर्हेण संवृतः ।
स्तूयमानो महातेजा भीष्मस्याग्नीननुव्रजन्
निश्चक्राम पुरात्तस्माद्यथा देवपतिस्तथा ॥
आससाद कुरुक्षेत्रे ततः शान्तनवं नृपः ॥ १२
उपास्यमानं व्यासेन पाराशर्येण धीमता ।
नारदेन च राजर्षे देवलेनासितेन च ॥ १३
हतशिष्टैर्नृपैश्चान्यैर्नानादेशसमागतैः ।
रक्षिभिश्च महात्मानं रक्ष्यमाणं समंततः ॥१४
शयानं वीरशयने ददर्श नृपतिस्ततः ।
ततो रथादवातीर्य भ्रातृभिः सह धर्मराट् १५
अभिवाद्याथ कौन्तेयः पितामहमरिन्दम ।
द्वैपायनादींश्चिप्रांश्च तैश्च प्रत्यभिनन्दितः ॥१६
ऋत्विग्भिर्ब्रह्मकल्पैश्च भ्रातृभिः सह धर्मजः ।
आसाद्य शरतल्पस्थमृषिभिः परिवारितम् ॥
अब्रवीद्भरतश्रेष्ठं धर्मराजो युधिष्ठिरः ।
भ्रातृभिः सह कौरव्यः शयानं निम्नगासुतम्
युधिष्ठिरोऽहं नृपते नमस्ते जाह्नवीसुत ।
शृणोषि चेन्महाबाहो ब्रूहि किं करवाणि ते
प्राप्तोऽस्मि समये राजन्नग्नीनादाय ते विभो ।
आचार्यान्ब्राह्मणांश्चैव ऋत्विजो भ्रातरश्च मे
पुत्रश्च ते महातेजा धृतराष्ट्रो जनेश्वरः ।
उपस्थितः सहामात्यो वासुदेवश्च वीर्यवान् ॥
हतशिष्टाश्च राजानः सर्वे च कुरुजांगलाः ।
तान्पश्य नरशार्दूल समुन्मीलय लोचने ॥२२
यच्चेह किंचित्कर्तव्यं तत्सर्वं प्राप्तं मया ।
यथोक्तं भवता काले सर्वमेव च तत्कृतम् २३

वैशम्पायन उवाच ।
एवमुक्तस्तु गाङ्गेयः कुन्तीपुत्रेण धीमता ।
ददर्श भारतान्सर्वान्स्थितान्संपरिवार्य ह २४
ततश्च तं बली भीष्मः प्रगृह्य विपुलं भुजम् ।
उद्यन्मेघस्वरो वाग्मी काले वचनमब्रवीत् ॥

दिष्ट्या प्राप्तोऽसि कौन्तेय
सहामात्यो युधिष्ठिर ।
परिवृत्तो हि भगवान्
सहस्रांशुर्दिवाकरः ॥ २६

अष्टपञ्चाशतं रात्र्यः शयानस्याद्य मे गताः ।
शरेषु निशिताग्रेषु यथा वर्षशतं तथा ॥ २७
माघोऽयं समनुप्राप्तो मासः सौम्यो युधिष्ठिर
त्रिभागशेषः पक्षोऽयं शुक्लो भवितुमर्हति २८
एवमुक्त्वा तु गाङ्गेयो धर्मपुत्रं युधिष्ठिरम् ।
धृतराष्ट्रमथामन्त्र्य काले वचनमब्रवीत् ॥ २९

भीष्म उवाच ।
राजन्विदितधर्मोऽसि सुनिर्णीतार्थसंशयः ।
बहुश्रुता हि ते विप्रा बहवः पर्युपासिताः ३०

१६७

तत इति ॥१॥ भीष्मस्याग्नीनिति तेन तस्यापि पत्नी आसीत् यद्वा संस्कारकानग्नीन् ॥११॥ माघोऽयमिति सौम्यश्चान्द्रः मासस्य चतुर्भागकरणे सार्धसप्ततिर्भागत्वात् अष्टम्यर्धस्यानतीतत्वेन प्रथमभागस्य विद्यमानत्वात् त्रिभागशेषो भवितुमर्हतीत्यर्थः । तेनाद्याष्टमीत्यर्थः ॥ २८ ॥

वेदशास्त्राणि सर्वाणि धर्माश्च मनुजेश्वर ।
वेदांश्च चतुरः सर्वाञ्शिक्षिलेनानुबुद्ध्यसे ॥ ३१
न शोचितव्यं कौरव्य भवितव्यं हि तत्तथा ।
श्रुतं देवरहस्यं ते कृष्णद्वैपायनादपि ॥ ३२
यथा पाण्डोः सुता राजंस्तथैव तव धर्मतः ।
तान्पालय स्थितो धर्मे गुरुशुश्रूषणे रतान्॥३३
धर्मराजो हि शुद्धात्मा निदेशे स्थास्यते तव ।
आनृशंस्यपरं ह्येनं जानामि गुरुवत्सलम् ३४
तव पुत्रा दुरात्मानः क्रोधलोभपरायणाः ।
ईर्ष्याभिभूता दुर्वृत्तास्तान्न शोचितुमर्हसि ३५

वैशम्पायन उवाच ।

एतावदुक्त्वा वचनं धृतराष्ट्रं मनीषिणम् ।
वासुदेवं महाबाहुमभ्यभाषत कौरवः ॥ ३६

भीष्म उवाच ।

भगवन्देवदेवेश सुरासुरनमस्कृत ।
त्रिविक्रम नमस्तुभ्यं शङ्खचक्रगदाधर ॥ ३७
वासुदेवो हिरण्यात्मा पुरुषः सविता विराट्
जीवभूतोऽनुरूपस्त्वं परमात्मा सनातनः ३८
त्रायस्व पुण्डरीकाक्ष पुरुषोत्तम नित्यशः ।
अनुजानीहि मां कृष्ण वैकुण्ठ पुरुषोत्तम ॥३९
रक्ष्याश्च ते पाण्डवेया भवान्येषां परायणम् ।
उक्तवानस्मि दुर्बुद्धिं मन्दं दुर्योधनं तदा ४०
'यतः कृष्णस्ततो धर्मो' यतो धर्मस्ततो जयः।
वासुदेवेन तीर्थेन पुत्र संशाम्य पाण्डवैः ॥४१
सन्धानस्य परः कालस्तवेति च पुनः पुनः ।
न च मे तद्वचो मूढः कृतवान्स सुमन्दधीः ।
घातयित्वेह पृथिवीं ततः स निधनं गतः ४२
त्वां तु जानाम्यहं देवं पुराणमृषिसत्तमम् ।
नरेण सहितं देव बदर्यां सुचिरोषितम् ॥ ४३
तथा मे नारदः प्राह व्यासश्च सुमहातपाः ।
नरनारायणावेतौ संभूतौ मनुजेष्विति ॥ ४४
स मां त्वमनुजानीहि कृष्ण मोक्ष्ये कलेवरम्
त्वयाऽहं समनुज्ञातो गच्छेयं परमां गतिम् ॥

वासुदेव उवाच ।

अनुजानामि भीष्म त्वां वसून्प्राप्नुहि पार्थिव
न तेऽस्ति वृजिनं किञ्चिदिहलोके महाद्युते
पितृभक्तोऽसि राजर्षे मार्कण्डेय इवापरः ।
तेन मृत्युस्तव वशे स्थितो भृत्य इवानतः ४७

वैशम्पायन उवाच ।

एवमुक्तस्तु गाङ्गेयः पाण्डवानिदमब्रवीत् ।
धृतराष्ट्रमुखांश्चापि सर्वांश्च सुहृदस्तथा ॥ ४८
प्राणानुत्स्रष्टुमिच्छामि तत्रानुज्ञातुमर्हथ ।
सत्येषु यतितव्यं वः सत्यं हि परमं बलम्४९
आनृशंस्यपरैर्भाव्यं सदैव नियतात्मभिः ।
ब्रह्मण्यैर्धर्मशीलैश्च तपोनित्यैश्च भारताः ॥५०
इत्युक्त्वा सुहृदः सर्वान्संपरिष्वज्य चैव ह ।
पुनरेवाब्रवीद्धीमान्युधिष्ठिरमिदं वचः ॥ ५१
ब्राह्मणाश्चैव ते नित्यं प्राज्ञाश्चैव विशेषतः ।
आचार्या ऋत्विजश्चैव पूजनीया जनाधिप॥

इति श्रीमहाभारते अनुशासनपर्वणि भीष्मस्वर्गारोहणपर्वणि दानधर्मे सप्तषष्ट्यधिकशततमोऽध्यायः ॥ १६७ ॥

१६८

वैशम्पायन उवाच ।

एवमुक्त्वा कुरून्सर्वान् भीष्मः शांतनवस्तदा
तूष्णीं बभूव कौरव्यः स मुहूर्तमरिंदम ॥ १
धारयामास चात्मानं धारणासु यथाक्रमम् ।
तस्योर्ध्वमगमन्प्राणाः सन्निरुद्धा महात्मनः२

इति श्रीमहाभारते अनुशासनपर्वणि नैलकण्ठीये भारतभावदीपे सप्तषष्ट्यधिकशततमोऽध्याय ॥ १६७ ॥

१६८

एवमुक्त्वेति ॥१॥ धारणासु आधारादिषु स्थानेषु यथाक्रमं मूलाधारात् स्वाधिष्ठानं ततो माणिपूरं ततोऽनाहतं ततो विशुद्धिं तत आज्ञामेवं क्रमेण मन:सहितं वायुं निरुद्धनुपर्युपर्यानीतवानित्यर्थ ॥ २ ॥

इदमाश्चर्यमासीच्च मध्ये तेषां महात्मनाम् ।
सहितैर्ऋषिभिः सर्वैस्तदा व्यासादिभिः प्रभो
यद्यन्मुंचति गात्रं हि स शान्तनुसुतस्तदा ।
तत्तद्विशल्यं भवति योगयुक्तस्य तस्य वै ॥ ४
क्षणेन प्रेक्षतां तेषां विशल्यः सोऽभवत्तदा ।
तदृष्ट्वा विस्मिताः सर्वे वासुदेवपुरोगमाः ॥ ५
सह तैर्मुनिभिः सर्वैस्तदा व्यासादिभिर्नृप ।
सन्निरुद्धस्तु तेनात्मा सर्वेष्वायतनेषु च ॥ ६
जगाम भित्त्वा मूर्धानं दिवमभ्युत्पपात ह ।
देवदुन्दुभिनादश्च पुष्पवर्षैः सहाभवत् ॥ ७
सिद्धा ब्रह्मर्षयश्चैव साधु साध्विति हर्षिताः ।
महोल्केव च भीष्मस्य मूर्धदेशाज्जनाधिप ॥ ८
निःसृत्याकाशमाविश्य क्षणेनान्तरधीयत ।
एवं स राजशार्दूल नृपः शान्तनवस्तदा ॥ ९
समयुज्यत कालेन भरतानां कुलोद्वहः ।
ततस्त्वादाय दारूणि गन्धांश्च विविधान्बहून्
चिता चक्रुर्महात्मानः पाण्डवा विदुरस्तथा ।
युयुत्सुश्चापि कौरव्यः प्रेक्षकास्तिवतरेऽभवन् ॥
युधिष्ठिरश्च गाङ्गेयं विदुरश्च महामतिः ।
छादयामासतुरुभौ क्षौमैर्माल्यैश्च कौरवम् ॥ १२
धारयामास तस्याथ युयुत्सुश्छत्रमुत्तमम् ।
चामरव्यजने शुभ्रे भीमसेनार्जुनावुभौ ॥ १३
उष्णीषे परिगृह्णीतां माद्रीपुत्रावुभौ तथा ।
स्त्रियः कौरवनाथस्य भीष्म कुरुकुलोद्वहम् १४
तालवृन्तान्युपादाय पर्यवीजन्त सर्वशः ।
ततोऽस्य विधिवच्चक्रुः पितृमेधं महात्मनः १५
यजनं बहुशश्चाग्नौ जगुः सामानि सामगाः ।
ततश्चन्दनकाष्ठैश्च तथा कालीयकैरपि ॥ १६
कालागुरुप्रभृतिभिर्गन्धैश्चोच्चावचैस्तथा ।
समवच्छाद्य गाङ्गेयं संप्रज्वाल्य हुताशनम् ॥
अपसव्यमकुर्वन्त धृतराष्ट्रमुखाश्रिताम् ।
संस्कृत्य च कुरुश्रेष्ठं गाङ्गेयं कुरुसत्तमाः ॥ १८
जग्मुर्भागीरथीं पुण्यामृषिजुष्टां कुरूद्वहाः ।
अनुगम्यमाना व्यासेन नारदेनासितेन च १९
कृष्णेन भरतस्त्रीभिर्ये च पौराः समागताः ।
उदकं चक्रिरे चैव गाङ्गेयस्य महात्मनः ॥ २०
विधिवत्क्षत्रियश्रेष्ठाः स च सर्वो जनस्तदा ।
ततो भागीरथी देवी तनयस्योदके कृते ॥ २१
उत्थाय सलिलात्तस्माद्रुदती शोकविह्वला ।
परिदेवयती तत्र कौरवानभ्यभाषत ॥ २२
निबोधत यथावृत्तमुच्यमानं मयाऽनघाः ।
राजवृत्तेन संपन्नः प्रज्ञयाऽभिजनेन च ॥ २३
सत्कर्ता कुरुवृद्धानां पितृभक्तो महाव्रतः ।
जामदग्न्येन रामेण यः पुरा न पराजितः ॥ २४
दिव्यैरस्त्रैर्महावीर्यः स हतोऽद्य शिखण्डिना
अश्मसारमयं नूनं हृदयं मम पार्थिवाः ॥ २५
अपश्यन्त्याः प्रियं पुत्रं यन्न दीर्यति मेऽद्य वै ।
समेतं पार्थिवं क्षत्रं काशिपुर्यां स्वयंवरे ॥ २६
विजित्यैकरथेनैव कन्याश्चायं जहार ह ।
यस्य नास्ति बले तुल्यः पृथिव्यामपि कश्चन
हतं शिखण्डिना श्रुत्वा न विदीर्येत यन्मनः ।
जामदग्न्यः कुरुक्षेत्रे युधि येन महात्मना २८
पीडितो नातियत्नेन स हतोऽद्य शिखंडिना ।
एवंविधं बहु तदा विलपन्ती महानदीम् ॥ २९
आश्वासयामास तदा गङ्गां दामोदरो विभुः ।
समाश्वसिहि भद्रे त्वं मा शुचः शुभदर्शने ३०
गतः स परमं लोकं तव पुत्रो न संशयः ।
वसुरेष महातेजाः शापदोषेण शोभने ॥ ३१
मानुषत्वमनुप्राप्तो नैनं शोचितुमर्हसि ।
स एष क्षत्रधर्मेण अयुध्यत रणाजिरे ॥ ३२
धनंजयेन निहतो नैष देवि शिखण्डिना ।
भीष्मं हि कुरुशार्दूलमुद्यतेषुं महारणे ॥ ३३
न शक्तः संयुगे हन्तुं साक्षादपि शतक्रतुः ।
स्वच्छंदतस्तव सुतो गतः स्वर्गं शुभानने ॥ ३४
न शक्ता विनिहन्तुं हि रणे त सर्वदेवताः ।
तस्मान्मा त्वं सरिच्छ्रेष्ठे शोचस्व कुरुनंदनम्
वसूनेष गतो देवि पुत्रस्ते विज्वरा भव ॥ ३५

वैशम्पायन उवाच ।

इत्युक्ता सा तु कृष्णेन व्यासेन तु सरिद्वरा
त्यक्त्वा शोकं महाराज स्वं वार्यवततार ह ॥
सत्कृत्य ते तां सरितं ततः कृष्णमुखा नृप ।
अनुज्ञातास्तया सर्वे न्यवर्तन्त जनाधिपाः ३७

यद्यदिति प्राणेन मुक्तं गात्रं प्रशिथिलावयवसंयोगं सत् ममममपि शरं धारयितुमक्षममभूत् अतस्तत्तदङ्गं विशल्यमभूदित्यर्थ ॥ ४ ॥ आत्मा प्राणसयुक्तं मन ॥ ६ ॥ उष्णीषे किरीटशिरोवेष्टे । 'उष्णीषं तु शिरोवेष्टे किरीटे लक्षणान्तरे' इति **मेदिनी** ॥१४॥ मरणजं शोकमपनयति-**वसुरेष इति** । देवस्य मानुषत्वं नरकतुल्यं अतोऽयं हीनस्थानादुत्तम लोकं गतो न शोच्य इत्यर्थ ॥ ३१ ॥ नीचहस्तेन मरणजातं शोकं दूरीकरोति-**स एष इति** ॥ ३२ ॥ अर्जुनमपि शप्स्यतीति शकया तस्य मृत्युभयमेव नास्तीत्याह-**भीष्मं हीति** ॥ ३३ ॥

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासक्यां अनुशासनपर्वणि भीष्मस्वर्गारोहण-पर्वणि दानधर्मे भीष्मयुधिष्ठिरसंवादे भीष्ममुक्तिर्नाम अष्टषष्ट्यधिकशततमोऽध्यायः ॥१६८॥

॥ इति अनुशासनपर्व समाप्तम् ॥



गोपालं भूम्नि वेदे शिवमुपनिषदि ब्रह्मविल्लक्ष्मणार्यं
तर्के धीरेशमिश्रान् फणिपतिभणितौ पोलगङ्गाधरार्यम् ।
भाट्टे नारायणं यो गुरुमकृत ततं दक्षिणामूर्त्युपास्तौ
श्रौते चिन्तामणिं च व्यभजत स महा-भारते दानधर्मान् ॥ १ ॥

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविन्दसूरिसूनोर्नीलकण्ठस्य कृतौ भारतभावदीपे अनुशासनपर्वणि अष्टषष्ट्यधिकशततमोऽध्यायः ॥ १६८ ॥

अतः परमाश्वमेधिकं पर्व भविष्यति। तस्यायमाद्यः श्लोकः।

वैशम्पायन उवाच।

कृतोदकं तु राजानं धृतराष्ट्रं युधिष्ठिरः।
पुरस्कृत्य महाबाहुरुत्ततारकुलेन्द्रियः॥ १

॥ इति श्रीमहाभारते अनुशासनपर्व समाप्तम् ॥

* यद्यप्यादिपर्वणि पर्वसंग्रहकथनावसरे 'एतत्त्रयोदश पर्व धर्मनिश्चयकारकम्। अध्यायाना शतं त्वत्र षट्चत्वारिंशदेव तु। श्लोकानां तु सहस्राणि प्रोक्तान्यष्टौ प्रसंख्यया' इत्युक्तम्। तथापि संप्रति पर्वण्यस्मिन् अध्याया. १६८, श्लोकाश्च ७७०१ एतावन्त एव प्रायो दृश्यन्ते। एतत्सुधीभिर्मृग्यम्।

अयं ग्रन्थः श्रीकिञ्जवडेकरकुलकमलदिवाकरसोमयाजिदत्तात्रेयदीक्षिततनुज-पण्डित-रामचन्द्रशास्त्रिणा परिशोधितष्टिप्पण्यादिना परिष्कृतश्च। भारती जयतु॥ शाकः १८५५॥

Shriman
MAHĀBHĀRATAM
Part VI
XIV
Āshwamedhika parvan

WITH

Bharata Bhawadeepa By Nilkantha.

Edited by

Pandit Ramachandrashastri Kinjawadekar.

PRINTED & PUBLISHED

BY

SHANKAR NARAHAR JOSHI

Chitrashala Press, 1026 Sadashiv Peth, Poona City.

Shake 1855.] *First Edition.* [*A. D. 1933*

All Rights Reserved



श्रीमन्महाभारतम्।

षष्ठभागे—आश्वमेधिकपर्व।

चतुर्धरवंशावतंसश्रीमन्नीलकण्ठविरचित-भारतभावदीपाख्यटीकया समेतम्।

पण्डित रामचंद्रशास्त्री किंजवडेकर इत्येतैः पाठान्तर-टिप्पण्यादियोजनया समलङ्कृतम्।




तच्च

पुण्याख्यपत्तने

१०२६ सदाशिववीथ्यां चित्रशालाख्ये मुद्रणालये 'शंकर नरहर जोशी'

इत्येतैः संमुद्र्य प्रकाशितम्।



शालिवाहनशकाब्दाः १८५५] प्रथमं संस्करणम्। [खिस्ताब्दाः १९३३

अस्य ग्रन्थस्य सर्वेऽधिकाराः प्रकाशयित्रा स्वायत्तीकृताः ।

॥ श्रीभारती जयतु ॥

॥ महाभारतम् ॥

आश्वमेधिकपर्व ।

–१४–

विषयानुक्रमणिका ।

अ०	श्लो०	विषय	पृष्ठम्
(१) अश्वमेधपर्व १–२०			
१	२०	भीष्मायोदकं दत्वोत्तीर्य शोकेन पतितं कृष्णप्रेरितेन भीमेनाश्वासितं युधिष्ठिरं प्रति धृतराष्ट्रस्य विलापवाक्यम् .	२
२	२०	'अतीव मनसा शोकः' (२) इत्यादिनाऽऽश्वासयन्त श्रीकृष्णं प्रति युधिष्ठिरे 'गोविन्द मयि या प्रीतिः' (१०) इत्याद्युक्त्वा 'यदि मामनुजानीयात्' (१२)इत्यादिना वनं गन्तुमनुज्ञां प्रार्थयति तं सान्त्वयन्व्यासः 'अकृता ते मतिस्तात' (१५) इत्याद्युवाच .	३
३	२३	'युधिष्ठिर तव प्रज्ञा' (१) इत्यादिना पुरुषस्यैश्वराधीनत्वं प्रतिपाद्य पापनिवृत्त्यर्थमश्वमेधेन यजस्वेति व्यासेनोक्तं श्रुत्वा युधिष्ठिरः कोशाद्यभावमूलकं स्वासामर्थ्यं प्रकटयति स्म। युधिष्ठिरोक्तं श्रुतवता व्यासेन 'मरुत्तयज्ञे ब्राह्मणैरुत्सृष्टं द्रव्यं हिमालये बहु वर्तते तदानय तत्पर्याप्तं भविष्यति' (२१) इति कथितं श्रुत्वा 'कथं यज्ञे मरुत्तस्य' (२२) इति युधिष्ठिरेण पृष्टः स तत्कथयितुं प्रतिजज्ञे	४
४	२८	मरुत्तकथां कथयेति युधिष्ठिरेणानुयुक्तो व्यासः मरुत्तोपाख्यानं कथयन् मनुप्रभृतिवंशपरंपरायामुत्पन्नं करंधमपुत्रमविक्षितं सपर्ण्यं तत्पुत्रेण मरुत्तेन मेरुशिखरे कृतं यज्ञं स्वर्णमयीं तत्सामग्रीं च कथयति स्म	५
५	२८	'कथंवीर्यः समभवत' (१) इत्यादिना राजवीर्यविषयकं यज्ञविषयकं च प्रश्नं कुर्वति युधिष्ठिरे तदुत्तरं वदन्व्यासः करंधमं तत्पुत्रमविक्षितं च सपर्ण्यं तत्पुत्रं मरुत्त वर्ण्यस्तत्कर्माण्याचख्यौ। स्पर्धयेन्द्रेण 'मरुत्तं याज्यमपि त्यज' इति प्रेरितो बृहस्पतिस्त्यक्तुं प्रतिजज्ञे। तेनेन्द्रो हृष्टः सन् गुरुं प्रशस्य स्वभवनं ययौ ...	६
६	३३	व्यासो बृहस्पतिमरुत्तसंवादरूपमितिहासं व्याजहार। मरुत्तेन यज्ञार्थं याचितो बृहस्पतिर्यदा तं प्रत्याचचक्षे तदा व्रीडितो गच्छन्स मध्येमार्गं संगतेन नारदेन पृष्टो बृहस्पतिवृत्तमुक्त्वा 'गुरुणा प्रत्याख्यातो जीवितुं नोत्सहे' (१६) इत्युवाच। आंगिरसं संवर्तं गच्छ स त्वां याज-	

अ०	श्लो०	विषय	पृष्ठम्
		यिष्यते' (१८-१९) इति नारद उपादिदेश। तच्छ्रुत्वा मरुत्तस्तस्य स्थितिं पप्रच्छ। ततो वाराणस्यामुन्मत्तवेषेण शिवदर्शनार्थं चङ्क्रमीति। त्व वाराणसीद्वारि कुणपं निधेहि तं दृष्ट्वा यो निवर्तेत तं सवर्तं बुध्द्वा शरणं गच्छ, तेन तवाहं केनाख्यातः इति पृष्टस्त्वं नारदस्त्वामाख्यायाग्निं प्रविवेशेति ब्रह्मेत्याह नारदः। मरुत्तो वाराणसीं गत्वा नारदोपदिष्टेनोपायेन संवर्तं ज्ञात्वा तत्पृष्ठतो गच्छस्तेन कृतान् पांसुवर्षणादीन् प्रकारान्सहमानो यदा न निववृते तदा सवर्तः परावृत्य वटच्छायायां निविवेश	७
७	२७	'कथमस्मि त्वया ज्ञातः' (१) इत्यादिके संवर्तप्रश्ने नारदोपदिष्टमुत्तरमभ्यधान्मरुत्तः। तच्छ्रुत्वा तेन 'बृहस्पत्यनुज्ञामन्तरा नाह त्वां याजयिष्यामि तं गत्वाऽनुज्ञां प्रार्थय' (१२) इत्युक्तो मरुत्तः पूर्ववृत्तं निवेद्य नाह तं गच्छामीत्युवाच। 'मया याज्यमान त्वां बृहस्पतिपुरंदरौ द्विष्यातां कथ मे बुद्धिस्थैर्यं भविष्यति' (२०) इति संवर्तेनाक्षिप्तो मरुत्तो 'यावत्तपेत्सहस्रांशुः' (२२) इत्यादिशपथपूर्वक सङ्गत्यागाभावं प्रतिज्ञे तेन सन्तुष्टः सवर्तो 'गमयिष्यामि शक्रेण समताम्' (२७) इत्याद्युवाच	८
८	३८	'गिरेर्हिमवतः पृष्ठे' (१) इत्यादिना तपस्यन्तं महादेवमाख्याय सुवर्णप्राप्तये तमाराधयितुं 'तस्मै भगवते कृत्वा' (१२) इत्यारभ्य 'तत्सुवर्णमवाप्स्यसि' (३३) इत्यन्तं महादेवस्तोत्रमुपदिश्य सुवर्णानयनार्थं ते नरा गच्छन्तु इत्या-	
अ०	श्लो०	विषय	पृष्ठम्
		ह संवर्तो मरुत्तम्। मरुत्तसंवर्तोपदिष्टस्तोत्रपाठेनातुल धनं संपाद्यातिमानुषं यज्ञसविधिं चक्रे। तां समृद्धिं दृष्ट्वा सन्तप्तं बृहस्पतिं प्रतीन्द्र आगत्योवाच .	९
९	३७	'इन्द्रबृहस्पत्योः सवदतोर्बृहस्पतिना 'सर्वोपायैर्मघवन्संनियच्छ संवर्तं वा पार्थिवं वा मरुत्तम्' (७) इत्युक्त इन्द्रो मरुत्त प्रति 'अय बृहस्पतिस्त्वां याजयिष्यति तथाऽमर च कारेष्यति' (८) इत्यभिधातुमाग्निं प्रेषयति स्म। इन्द्राज्ञयागतोऽग्निर्मरुत्तेन प्रत्याख्यात इन्द्रमागत्य मरुत्तकाथितं न्यवेदयत्। तच्छ्रुतवतेन्द्रेण पुनर्गच्छ मत्सन्देशं यदि स न करिष्यति तदा त वज्रेण प्रहरिष्यामि' (२४) इत्युक्तोग्निः 'गन्धर्वराजो गच्छत्वह राज्ञो बिभेमि' (२५) इत्युक्त्वा च्यवननिदर्शनेन ब्राह्मणतेजः प्रशशंस	१२
१०	३७	'एवमेतद्ब्रह्मबल गरीयः' (१) इत्युक्त्वेन्द्रेण प्रेषितो गन्धर्वो धृतराष्ट्रो मरुत्त प्रत्यागत्य 'बृहस्पतिं याजकं त्व वृणीष्व' (५) इत्यादिकमिन्द्रसन्देशं कथयन्मरुत्तेन प्रत्याख्यातो 'घोरो नादः श्रूयतां वासवस्य' (८) इत्याद्युवाच। नदतो वासवस्य नादं श्रुत्वा मरुत्तेन प्रार्थितः सवर्तो 'भयं शक्राद्येतु ते राजसिंह' (१२) इत्यादिनाऽऽश्वास्यान्यं वर वृणीष्वेत्युवाच। 'साक्षादिन्द्र आगत्य मम यज्ञे हविर्गृह्णातु' (१८) इत्यादिकं वरं प्रार्थयति मरुत्ते संवर्तेनाहूत इन्द्रो मरुत्तेन सत्कृतः। संवर्ताशयेन्द्रेण सभादिनिर्माणे आज्ञप्ता देवाः सर्वे चक्रुः। इन्द्रादयः सर्वे देवाः सोमपानं विधाय राज्ञानुज्ञाताः प्रत्ययुः।	

अ०	श्लो०	विषय	पृष्ठम्
		युधिष्ठिरः 'ततो राजा जातरूपस्य राशीन्' (३४) इत्यादिकं व्यासवाक्यं श्रुत्वा हृष्टः सस्तेन वित्तेन यष्टुममात्यैर्मन्त्रयामास ...	१४
११	२०	व्यासेन बोधितमपि हतज्ञातिबांधवत्वान्निर्विण्णं युधिष्ठिरं सान्त्वयन्वासुदेवः 'सर्वं जिह्मं मृत्युपदम्' (४) इत्यादिना शरीरस्थशत्रुजयमुपादिशन्निन्द्रवृत्रयोर्युद्धं वृत्रग्रहणमोहितेन वसिष्ठोपदेशेन निर्मोहेणेन्द्रेण कृतमदृश्य वज्रेण वृत्रहननं च कथयति स्म .	१५
१२	१६	'द्विविधो जायते व्याधिः' (१) इत्यादिना शारीरमानसे दुःखे निरूप्यैतदवधि यज्ज्ञातं द्रोणादिभिर्युद्धपर्यन्तं तत्सर्वं विस्मृत्य प्रसक्तं मनसा सह युद्ध कुर्वित्युपदिदेश वासुदेवः	१६
१३	२२	'न बाह्य द्रव्यमुत्सृज्य' (१) इत्यादिना मनोजयोपायं कामत्यागमुपदिशंस्तद्विषये पुराविद्गीताः 'नाह शक्योऽनुपायेन' (१२) इत्याद्या गाथा अभिधाय निष्कामानश्वमेधादीन्यज्ञान् कुर्वित्यादिदेश	१७
१४	१७	वासुदेवोपदेशेनाश्वस्तो युधिष्ठिरः शोकं परित्यज्य व्यासादीनात्मकर्तव्यनिवेदनपूर्वकमनुनयति स्म। ते च युधिष्ठिरं कृष्णधनंजयौ चानुज्ञाप्यान्तर्दधिरे। युधिष्ठिरश्च भीष्मादीनामौर्ध्वदेहिकं विधाय धृतराष्ट्र पुरस्कृत्य हस्तिनापुरं जगाम... ...१९	
१५	३५	'पाण्डवैर्जिते राष्ट्रे वासुदेवधनञ्जयौ किं चक्रतुः' (१) इति जनमेजयप्रश्ने वासुदेवार्जुनयोः कार्यमभिदधाति स्म वैशम्पायनः। वासुदेवोऽर्जुनं प्रति 'विजितेयं धरा कृत्स्ना' (१२) इत्याद्युक्त्वा	

अ०	श्लो०	विषय	पृष्ठम्
		द्वारकां गन्तुमनुज्ञामयाचत। अर्जुनस्तु दुःखादनुज्ञे ...२०	

(२) अनुगीतापर्व–२०–१३०

१६	४६	सभायां वसतोः केशवार्जुनयोः का कथाऽवर्तत इति जनमेजयप्रश्ने वैशम्पायनस्योत्तरम्। सभां पश्यन्नर्जुनः कञ्चिद्रमणीयं सभोद्देशमागत्य 'विदितं मे महाबाहो संग्रामे समुपस्थिते। माहात्म्यं देवकीमातस्तच्च ते रूपमैश्वरम्' (५) इत्यादिना पूर्वं युद्धारम्भे भवता यदुक्त तत्सर्वं मे नष्टं कौतूहलं तु तच्छ्रवणेऽस्ति इत्याद्युवाच। श्रीकृष्णस्तु तं प्रति 'न च शक्यं पुनर्वक्तुम्' (११) इत्याद्याख्याय 'काश्चिद्ब्राह्मणो ब्रह्मलोकादागतोऽस्माभिः सत्कारपूर्वकं पृष्टो यदाह तत्कथयामि' (१५) इत्याद्याह स्म। अस्माभिः पृष्टो ब्राह्मणो 'मोक्षधर्ममाश्रित्य यदपृच्छस्तत्कथयामि' (१७) इति प्रतिज्ञाय काश्यपसिद्धसंवादरूपमितिहासं कथयन्काश्यपं प्रति सिद्धेन कथितं स्वसिद्धिप्राप्तौ साधनादिकमाचष्ट .	२२
१७	४२	काश्यपः सिद्धस्य पादावुपसंगृह्य कथं शरीरं च्यवते इत्यादीन्सप्त प्रश्नांश्चकार। क्रमेणोत्तराणि वदन् सिद्धः 'कथं शरीरं च्यवते' इत्यस्योत्तरम् 'आयुः कीर्तिकराणीह' (६) इत्यादिनाभिधायान्ते 'उपपत्तिं तु वक्ष्यामि गर्भस्याहमतः परम्' (४२) इत्यनेन 'कथ चैवोपपद्यते' इति द्वितीयप्रश्नस्योत्तरमाख्यातुं प्रतिजज्ञे .. .	२४
१८	३५	'शुभानामशुभानां च' (१) इत्यादिना पूर्वकृतशुभाशुभकर्म-	

अ०	श्लो०	विषयः	पृष्ठम्
		परीतस्य गर्भप्रवेशादिकं प्रतिपाद्य 'शरीरग्रहणं चास्य केन पूर्वं प्रकल्पितम्' (२४) इति संशयं 'शरीरमात्मनः कृत्वा' (२५) इत्यादिना निवर्तयामास ब्राह्मणः	२६
१९	६६	'यः स्यादेकायने लीनः' (१) इत्यादिना संसारतरणोपायमुपदिशन् 'अतः पर प्रवक्ष्यामि' (१५) इत्यादिना योगशास्त्रं, योगसाधनानि, चोपदिशति स्म ब्राह्मणः। 'भुक्तं भुक्तमिदं कोष्ठे' (३९) इत्यादिषु शिष्यप्रश्नेषु 'यथा स्वकांष्ठे प्रक्षिप्य' (४५) इत्यादिनोत्तरमभिधाय 'इदं सर्वरहस्यं ते' (५२) इत्यादिनोपसंहृत्य शिष्यं विसृज्य स्वयमप्यगच्छद्ब्राह्मणः। श्रीवासुदेवोऽर्जुनं प्रत्येतदभिधाय 'कच्चिदेतत्त्वया पार्थ श्रुतमेकाग्रचेतसा' (५५) इत्याद्युवाच .	२९
२०	२८	'भुक्तामिदं कोष्ठे' इति प्रश्नोत्तरं विवृण्वन् वासुदेवो दम्पत्योः संवादरूपमितिहासं व्याजहार। 'कं नु लोकं गमिष्यामि' (३) इत्यादिके ब्राह्मणीप्रश्ने 'सुभगे नाभ्यसूयामि' (५) इत्यादिनोत्तरमभ्यधाद्ब्राह्मणः . .	३१
२१	२६	पूर्वोक्तोत्तरविषये दशहोतृविधानं कथयन् ब्राह्मणो मनसः प्राग्वागुत्पत्तिमभ्यधात्। 'कस्माद्वागभवत्पूर्वा कस्मात्पश्चान्मनोऽभवत्' (१०) इति ब्राह्मणीप्रश्ने ब्राह्मणो वाङ्मनसोर्भूतात्मनश्च संवादं कथयन्नुत्तरमभ्यधात्। 'अनुत्पन्नेषु वाक्येषु' (२४) इत्यादिके ब्राह्मणीप्रश्ने ब्राह्मणस्तदुत्तरं वदन् वाङ्मनसयोरुभयोरपि विशिष्टत्वमविशेषादाह.	३३
२२	२९	एतद्विषये 'अत्राप्युदाहरन्तीमम्' (१) इत्यादिना सप्तहोतृणां विधानकथनपूर्वकं ब्राह्मणो ब्राह्मण्याः 'सूक्ष्मेऽवकाशे सन्तस्ते' (४) इति प्रश्नोत्तरं कथयन् घ्राणादीनां सप्तानामितरेतरकार्यकारित्वाभाव प्रतिपाद्य घ्राणादीनां मनोधीनत्वं मनसोऽप्यर्थप्रकाशकत्वं घ्राणाद्यधीनमितीन्द्रियमनःसंवादेतिहासमुखेनाह स्म .	३४
२३	२४	'अत्राप्युदाहरन्तीमम्' (१) इत्यादिना पञ्चहोतृणां विधानं कथयन् 'स्वभावात्सप्त होतारः' (३) इति ब्राह्मण्याक्षिप्तो ब्राह्मणः स्वस्वश्रैष्ठ्यविषये विवदतां प्राणादीनां पञ्चानां ब्रह्मणा सह संवादं कथयन्ब्रह्मोक्तं सर्वेषामन्योन्याश्रयत्वेन समं प्राधान्यमाह स्म	३६
२४	१७	अत्र ब्राह्मणकथितो नारददेवमतसंवादः, तत्र 'सञ्जायमानस्य जन्तोः प्राणादीनां पञ्चानां मध्ये कः पूर्वं प्रवर्तते' (२) इति देवमतप्रश्ने येनायं सृज्यते जन्तुस्ततोऽन्यः पूर्वमेति तम्' इत्याद्युत्तरं वदन्नारदः 'केनायं सृज्यते जन्तुः' (४) इति देवमतेन पृष्टः 'सङ्कल्पाज्जायते हर्षः' (५) इत्याद्याह स्म ...	३८
२५	१७	पुनः 'अत्राप्युदाहरन्तीमम्' (१) इत्यादिना चातुर्होत्रविधानकथनं प्रतिज्ञाय 'करणं कर्म कर्ता च मोक्ष इत्येव भाविनि' (३) इत्यादिना तत्सर्वं कथयित्वाऽन्ते यज्ज्ञानायेन्द्रियजयो यस्मिञ्ज्ञाते सामानि गायन्ति तं नारायणं विद्धीत्याह ब्राह्मणः ...	३९
२६	१८	'एकः शास्ता न द्वितीयोऽस्ति शास्ता' (१) इत्यादिना नारायणस्वरूपं तस्यैव गुरुत्वेन शास्तृत्वं चाख्याय गुरुकथितमेकमेवोपदेशमा-	

अ०	श्लो०	विषयः	पृष्ठम्
		त्मबुद्ध्या यथायथं गृह्णन्तीत्येतद्विषये पन्नगदेवर्षिप्रभृतीनां ब्रह्मोपदेशाख्यानं कथयति स्म ब्राह्मणः	४०
२७	२४	ब्राह्मणोऽसङ्गत्वं प्रतिप्रादयितुं 'सङ्कल्पदशमशकम्' (१) इत्यादिविशेषणविशिष्टं वनं प्रविष्टोऽस्मीति वदन् ब्राह्मणः 'क्व तद्वनं महाप्राज्ञ' (३) इत्यादिना ब्राह्मण्या पृष्टो 'नैतदस्ति पृथग्भावः' (४) इत्यादिनोत्तराण्यभिधाय 'एतदेवेदृशं पुण्यम्' (२४) इत्यादिनोपसञ्जहार .	४३
२८	२८	'गन्धान्न जिघ्रामि रसान्न वोद्मि' (१) इत्यादिना विदुषः स्वस्य कर्तृत्वाभावात्कृतेनापि कर्मणा बन्धो नास्तीति प्रतिपाद्य तद्विषयेऽध्वर्युयतिसंवाद व्याजहार ब्राह्मणः	४४
२९	२२	इन्द्रियजय एव महच्छौर्यमिति प्रतिपादयितुं कार्तवीर्यसमुद्रसंवादमब्रवीद्ब्राह्मणः। कदाचित्समुद्रतीरे विचरन्कार्तवीर्यः समुद्रं प्रति बाणान्ववर्ष। तदा समुद्रेण 'मा मुञ्च नाराचान्' (४) इति प्रार्थितः सग्रामे मत्सदृशं वीरं कथयेत्युवाच। समुद्रेण कथितं जामदग्न्यं राममागत्य प्रतिकूलान्याचरतस्तस्य बाहुसहस्रच्छेदनपूर्वकं पराभवं चकार रामः। एव क्षत्रियान्वारंवारं निघ्नन्तं राम प्रत्येकविंशतितमे युद्धे ऋचीकमुखास्तत्पितर आगत्य निवारयामासुः	४५
३०	३३	हिंसाया अकर्तव्यत्वे अलर्कस्येतिहासं कथयामासुर्जामदग्न्यपितरः। अलर्को महीं जित्वा सूक्ष्म विचारं कुर्वन्निन्द्रियाणि जिगीषुर्मनःप्रभृतिषु बाणान् युञ्जंस्तैः 'नेमे बाणास्तरिष्यन्ति मामलर्कं कथञ्चन। तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि' (७) इत्यादिना प्रत्याख्यातस्तपश्चर्यां कृत्वा योगाख्येन बाणेनेन्द्रियाणि जित्वा सिद्धिमवाप। एवं पितृभिर्बोधितो रामस्तपश्चचार	४७
३१	१३	हृदयबन्धहेतुभूतं गुणत्रयं मुमुक्षुणा हेयमिति 'त्रयो वै रिपवः' (१) इत्यादिना प्रतिपाद्य 'अत्र गाथाः कीर्तयन्ति' (४) इत्यादिनाऽम्बरीषकथिता 'भूयिष्ठ विजिता दोषाः' (७) इत्यादिका गाथा अभ्यभाषत ब्राह्मणः ...	४८
३२	२६	पूर्वोक्ताम्बरीषगीतायां लोभनिकृन्तनमुक्त तद्विषये ब्राह्मणजनकसवादरूपमितिहासं कथयति स्म ब्राह्मणो ब्राह्मणी प्रति। कस्मिंश्चिदपराधे 'विषये मे न वस्तव्य' (२) इति जनकेनोक्तः कश्चिद्ब्राह्मणस्तं प्रति 'आचक्ष्व विषयं राजन्' (३) इत्युवाच। तच्छ्रुतवतो जनकस्य 'पितृपैतामहे राज्ये वश्ये जनपदे सति। विषयं नाधिगच्छामि विचिन्वन्पृथिवीमहम्' (८) इत्याद्युक्तिं तथा प्रश्नमुखेन 'अन्तवन्त्य इहावस्थाः' (१५) इति वाक्यं च श्रुत्वा सन्तुष्टो ब्राह्मणः 'त्वज्जिज्ञासार्थमद्येह विद्धि मां धर्ममागतम्' (२५) इत्याद्युवाच	४९
३३	८	'नाह तथा भीरु चरामि लोके' (१) इत्यादिना स्वस्य सर्वात्मकत्वादिकमभिधाय 'तस्मात्ते सुभगे नास्ति' (८) इत्याद्युपदिदेश	५०
३४	१२	'नेदमल्पात्मना शक्यं वेदितुं नाकृतात्मना' (१) इत्यादिनाऽऽक्षेपपूर्वकं येनैषा मतिर्लभ्यते तमुपायं वदेति ब्राह्मणीप्रश्ने 'अरणीं	

अ०	श्लो०	विषय	पृष्ठम्
		ब्राह्मणीं विद्धि' (३) इत्यादिना ज्ञानाग्न्युत्पत्तिसाधनं कथयति स्म ब्राह्मणः । 'यदिदं ब्रह्मणो लिङ्गम्' (४) इत्यादिके पुनर्ब्राह्मणीप्रश्ने 'अलिङ्गो निर्गुणश्चैव' (५) इत्यादिनोत्तरमाह ब्राह्मणः । 'ततस्तु तस्या ब्राह्मण्याः' (१०) इत्यादिकां भगवदुक्तिं श्रुत्वाऽर्जुनः 'क्व नु सा ब्राह्मणी' (११) इत्याद्यपृच्छत् । भगवांश्च 'मनो मे ब्राह्मणं विद्धि बुद्धिं मे विद्धि ब्राह्मणीम् । क्षेत्रज्ञ इति यश्चोक्तः सोऽहमेव धनञ्जय' (१२) इत्यादिदेश	५१
३५	५०	'ब्रह्म यत्परमं ज्ञेयं तन्मे व्याख्यातुमर्हसि' (१) इत्यर्जुनप्रश्ने श्रीकृष्णो गुरुशिष्यसंवादकथनमुखेनोत्तरमाचचक्षे । 'कुतश्चाहं कुतश्च त्वम्' (७) इत्यादिषु शिष्यप्रश्नेषु गुरुः 'ब्रह्मणोक्तामिदं सर्वमृषिप्रवरसेवितम्' इत्यारभ्य 'जहाति मृत्युजन्मनी' (२२) इत्यन्तेनोपदिश्य 'प्रवक्ष्येऽहम्' (२४) इत्यादिना प्रजापतिभरद्वाजाद्यैः 'कथं कर्म क्रियात् साधु' (२९) इत्यादिपृष्टो ब्रह्मा यदुवाच तदभिधास्ये इति प्रतिजज्ञे । प्रजापत्यादिभिः पृष्टो ब्रह्मा 'सत्याद्भूतानि जातानि' (३२) इत्यादिनाऽध्यायशेषेण सर्वप्रश्नानामुत्तराण्यभिधाय पञ्चविंशतितत्त्वान्यभिदधाति स्म	५४
३६	३६	'तदव्यक्तमनुद्रिक्तम्' (१) इत्यादि उक्तान्येव तत्त्वानि विवृण्वन्ब्रह्मा 'तमसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः' (६) इत्यादिना गुणानां मिथुनान्याख्याय 'संमोहोऽज्ञानमत्यागः' (१२) इत्यादिना तमसो गुणादिकं व्यवृणोत्	५६
३७	१८	'रजोऽहं वः प्रवक्ष्यामि' (१) इत्यादिनाऽध्यायेन रजसो विवरणमकरोद्ब्रह्मा ...	५७
३८	१५	'अतः परं प्रवक्ष्यामि' (१) इत्यादिनाऽध्यायेन सत्त्वगुणं विवृणुते स्म ब्रह्मा .	५८
३९	२५	'नैव शक्या गुणा वक्तुम्' (१) इत्याद्यध्यायेन गुणानामन्योन्याश्रयत्वमुद्रेकादितारतम्येन गत्यादिकं 'तमः शूद्रे रजः क्षत्रे ब्राह्मणे सत्त्वमुच्यते' (१२) इत्यादिना शूद्रादिषु तमआदि सत्त्वं स्थावरादिष्वपि तत्सत्त्वं तथा दानादीनामपि गुणभेदेन त्रैविध्यं प्रतिपाद्य 'यत्किञ्चिदिह लोकेऽस्मिन्' (२१) इत्यादिना सर्वस्य गुणत्रयव्याप्तत्व कथयति स्म ब्रह्मा	५९
४०	१३	'अव्यक्तात्पूर्वमुत्पन्नम्' (१) इत्यादिनाऽध्यायेनाव्यक्तान्महत्तत्त्वोत्पत्तिं तत्स्वरूपं चाभ्यधाद्ब्रह्मा ..	६०
४१	५	'य उत्पन्नो महान्पूर्वं' (१) इत्यादिना महतोऽहङ्कारोत्पत्तिं तत्स्वरूपादिकं चाह स्म ब्रह्मा	६०
४२	६७	'अहङ्कारात्प्रसूतानि' (१) इत्यादिनाऽध्यायेनाहङ्कारात्पञ्चभूतोत्पत्त्यादिकमेकादशेन्द्रियाणामुत्पत्तिं चाख्याय तेषामध्यात्माधिभूताधिदैवतादीन्यभिधाय तज्ज्ञानेन ब्रह्मप्राप्तिं प्राप्तब्रह्मभावस्य सर्वस्तुत्यत्वं चाभ्यधाद्ब्रह्मा	६४
४३	४२	प्राप्तब्रह्मभावस्येश्वरत्वं समर्थयितुं 'मनुष्याणां तु राजन्यः' (१) इत्यारभ्य 'ब्राह्मणा धर्मसेतवः' (१७) इत्यन्तेन विभूतीराख्याय 'अत ऊर्ध्वं प्रवक्ष्यामि' (२०) इत्यादिना नियतं धर्मलक्षणमुक्त्वा 'गुणानां ग्रहणम्' (२८) इत्यादिना घ्राणादीन्द्रियैर्गन्धादिगुणग्रहण-	

अ०	श्लो०	विषय.	पृष्ठम्
		माख्याय 'अलिंगग्रहणः' (३६) इत्यादिनेन्द्रियाग्राह्यो नित्यः क्षेत्रज्ञः इत्याद्यादिदेश ब्रह्मा	६६
४४	२२	'यदादिमध्यपर्यन्त' (१) इत्यादिना जन्मादियुक्तं ग्राह्य कर्मसाध्यं च निरूप्य 'सर्वे क्षयान्ता निचयाः' (९) इत्यादिना सर्वस्यान्तवत्त्वं ज्ञानस्यानन्तत्वं च प्रतिपाद्य ज्ञानेन सर्वपापमुक्तत्वमभ्यधाद्ब्रह्मा	६७
४५	२५	'बुद्धिसारं मनःस्तम्भम्' (१) इत्यादिना कालचक्रं निरूप्य तन्निवृत्युपायमाख्यास्यन् गृहस्थादींश्चतुर आश्रमाननुक्रम्य 'सस्कारैः संस्कृतः'(१५) इत्यादिना गृहस्थधर्मानाचष्ट ब्रह्मा	६८
४६	५८	'एवमेतेन मार्गेण' (१) इत्यादिना ब्रह्मचर्यधर्मान् 'एवं युक्तो जयेत्स्वर्गम्' (१७) इत्यादिना वानप्रस्थधर्मान् 'गृहस्थो ब्रह्मचारी च' (१८) इत्यादिना संन्यासिधर्मांश्चादिदेश ब्रह्मा	७०
४७	१७	'सन्यासं तप इत्याहुः' (१) इत्यादिना संन्यासिधर्मानूद्य 'अव्यक्तयोनिप्रभवः' (१२) इत्यादिना रूपकेण ब्रह्मवृक्ष प्रदर्श्य ज्ञानासिना तच्छेदनान्मुच्यते इत्याह ब्रह्मा	७१
४८	१३	'केचिद्ब्रह्ममयं वृक्षम्' (१)इत्यादिनोक्तमेवोपदेश पुनरनुवदति स्म ब्रह्मा	७२
४९	१७	संशयमापन्नानामृषीणां 'को वा स्विदिह धर्माणाम्' (१)इत्यादिनाऽध्यायेन प्रश्नः	७३
५०	५६	'हन्त वः संप्रवक्ष्यामि' (१) इत्यादिना ज्ञानमार्गस्यैव श्रैष्ठ्यमभिदधानो हिंसापराणां नरकप्राप्तिं सकामकर्मकारिणां जन्मादिमत्त्वं चाभिधाय 'अतः परं प्रवक्ष्यामि' (७) इत्यादिना स-	

अ०	श्लो०	विषय	पृष्ठम्
		त्वक्षेत्रज्ञयोः सयोगवियोगौ प्रतिपाद्य 'यथाध्वानमपाथेयः' (१९) इत्यादिना कर्मणां फलप्राप्तौ सदेहमुद्गाद्य 'यथार्णवं महाघोरम्' (२६) इत्यादिना संसारसमुद्रतरणसाधनत्वेन गुरुरूपनौकाश्रयण प्रतिपाद्य 'यन्नैव गन्धि नो रस्यम्' (३२) इत्यादिना ज्ञेयस्वरूपं निरूपयन् महदाद्याकाशान्तानां स्वरूपगुणादिक संवर्ण्य पुरुषस्य सर्वेभ्यः परत्वादिकमभ्यधाद्ब्रह्मा	७६
५१	५२	'भूतानामथ पञ्चानाम्' (१) इत्यादिना क्षेत्रज्ञपर्यंतरूपत्वं मनसोऽभिधाय मनो नियम्येन्द्रियाश्वादियुत ब्रह्मरथं 'अव्यक्तादि विशेषान्तम्' (७) इत्यादिना ब्रह्मवन तत्र क्षेत्रविदः सञ्चारं चाख्याय ब्रह्मज्ञाने सति त्रसादीनां सर्वेषां लयं प्रदर्श्य 'प्रजापतिरिद सर्वम्' (१४) इत्यादिनेन्द्रियमनसामैकाग्र्यरूपेण तपसा देवादीना प्रजापतिकर्तृक सर्जनम् 'ध्यानयोगेन शुद्धेन' (२२)इत्यादिना प्रसन्नान्तःकरणस्य सुखोपचयप्राप्त्यादिकं च प्रतिपाद्य 'एतद्वः सर्वमाख्यातम्' (४०) इत्यादिनोपसहृत्य गुरुः 'इत्युक्तास्ते तु मुनयः' (४१) इत्यादिना ब्रह्मणोपदिष्ट कृतवता मुनीनां लोकप्राप्तिमभिधाय स्वशिष्यमपि 'त्वमप्येतदाचर' (४२) इत्युपादिशति स्म। एतत्कथयन्तं वासुदेवं प्रति 'को न्वसौ ब्राह्मणः' (४५) इति पप्रच्छार्जुनः। वासुदेवस्तु 'अह गुरुर्महाबाहो! (४६) इत्याद्युक्त्वा 'यदि तव मयि श्रद्धा तर्हि मदुक्तं सम्यगाचर मोक्ष प्राप्स्यसि' (४७-४८) इत्यभिधायेदमेव गीतारूपेण मया प्रागुपदिष्टमिति प्रतिपाद्य 'द्वारकां गन्तु-	

अ०	श्लो०	विषय	पृष्ठम्
		मिच्छामि' (५०) इत्यक्ते अर्जुनस्तु हस्तिनापुरं गत्वा युधिष्ठिरानुज्ञया गन्तुमर्हसीत्यब्रवीत्	७९
		॥ इति अनुगीता समाप्ता ॥	
५२	५८	स्वाज्ञया दारुकेण योजित रथमारुह्य कृष्णार्जुनौ हस्तिनापुरमागत्य धृतराष्ट्रादीनभिवाद्यार्जुनगृहे निरुध्य प्रातर्युधिष्ठिरमागत्य प्रीयमाणेन तेनानुज्ञातौ निषेदतुः। ततोऽर्जुनप्रार्थितस्य युधिष्ठिरस्याज्ञया द्वारकां गन्तुं प्रस्थितः श्रीकृष्णोऽनुयातान् विदुरादीन्निवर्त्य सुभद्रासहितो जगाम	८१
५३	२६	पथि गच्छन् श्रीकृष्णो मध्ये मीलितेनोत्तंकेन 'कच्चिच्छौरे त्वया गत्वा कुरुपाण्डवसद्म तत्। कृतं सौभ्रात्रमचलम्' (१०) इत्यादि पृष्टः 'कृतो यत्नो मया पूर्वम्' (१५) इत्याद्युवाच। तच्छ्रुत्वा क्रोधेन शापं दातुं प्रवृत्तमुत्तङ्क प्रति 'शृणु मे विस्तरेणेदम्' (२३) इत्याद्याह स्म श्रीकृष्णः	८२
५४	२३	'ब्रूहि केशव तत्त्वेन' त्वमध्यात्ममनिन्दितम्। श्रुत्वा श्रेयोऽभिधास्यामि शापं वा ते जनार्दन' (२) इत्युत्तङ्केनोक्तः श्रीकृष्णः 'तमो रजश्च सत्त्वं च विद्धि भावान्मदाश्रयान्' (२) इत्यादिनाऽध्यात्मतत्त्वोपदेशमुपदिदेश	८३
५५	३७	'अभिजानामि जगतः कर्तारं त्वां जनार्दन' (१) इत्याद्युक्तो विश्वरूपदर्शनार्थमुत्तङ्केन प्रार्थितो भगवांस्तद्दर्शयामास। उत्तङ्कस्तु तद्दृष्ट्वा भीतः सन् पूर्वरूपदर्शनं प्रार्थयति स्म। ततः प्रसन्नेन भगवता वरं याचस्वेत्युक्तेनोत्तङ्केन मरुदेशे जले याचिते विश्वरूपमुपसहृत्य यदा तव जलेच्छा भवेत्तदा मच्चिन्तनं कुर्वित्युक्त्वा द्वारकामगाच्छ्रीकृष्णः। मरुदेशे भ्रमन्नुत्तङ्कस्तृषितः सन्नच्युतं सस्मार, तदा कश्चिन्मातङ्ग आगत्य मत्तो जलं गृहाणेति वदंस्तेन प्रत्याख्यातोऽन्तर्दधे। तत उत्तङ्कः कृष्णेनाह वञ्चित इति यावद्विचारयति तावदाविर्भूतो विष्णुर्मातङ्गहस्तेनोदकं दातु तव न योग्यमिति तेनोक्तमिन्द्रवृत्तान्तमभिधाय यस्मिन्नहनि तवेच्छा भवेत्तस्मिन्नहनि जलपूर्णाः पयोधरा भविष्यन्ति ते चोत्तङ्कमेघा इति नाम्ना ख्याता भविष्यन्तीत्यभ्यधात्। तच्छ्रुत्वोत्तङ्कस्तुतोष	८४
५६	३५	'उत्तङ्कः केन तपसा'(१) इत्यादिके जनमेजयेन पृष्टे वैशम्पायन उत्तङ्कस्य तप आदि कथयति स्म। गौतमशिष्य उत्तङ्को बहून्यहानि गुरुगृहे वासं कुर्वन्कदाचिद्बहुकाष्ठभारं शिरसा धृत्वा गृहमागत्य यावत्काष्ठभारं त्यजति तावत्काष्ठलग्नां धवलां स्वजटां दृष्ट्वा स्वस्य जरा ज्ञात्वा विलपन्गुरुणा गौतमेन गृहगमनार्थमनुज्ञातो 'गुर्वर्थं कं प्रयच्छामि' (२०) इत्युवाच। तुष्टेन गुरुणा 'दक्षिणा गुरुतोषो वै' (२१) इत्यनेन गुरुसंतोषमेव दक्षिणात्वेनाङ्गीकृत्य 'यदि त्व युवा भविष्यसि तदा मत्कन्यां पत्नीत्वेन ददामि' (२२-२३) इत्युक्तो युवा भूत्वा तत्कन्यां प्रतिगृह्य गुरुदक्षिणार्थं प्रार्थितया गुरुपत्न्याऽहल्यया 'सौदासपत्न्या विधृते कुण्डले आनय'(२९) इत्युक्तस्ते आनेतुं सौदासं राक्षसभावापन्नं प्रति जगामोत्तङ्कः। अहल्यातत्तद्वृत्तान्तं श्रुत्वा चिन्तयन्गौतमस्तया प्रार्थितस्तद्रक्षणं प्रतिजज्ञे. .	८६
५७	२८	सौदासं प्रति गत उत्तङ्कस्तेन	

अ०	श्लो०	विषय	पृष्ठम्
		सहोक्तिप्रत्युक्त्यनन्तरं तत्पत्नी मदयन्ती प्रत्यागत्य मणिकुण्डले याचितवान्। सा च राज्ञोऽभिज्ञानमानयेत्युवाच	८७
५८	६०	मदयन्तीवाक्यादुत्तङ्कः पुनरागत्य सौदासात् 'न चैवैषा गतिः क्षेम्या' (२) इति श्लोकरूपमभिज्ञानमादाय तस्यै निवेदयति स्म। तदभिज्ञानं श्रुत्वा तया दत्ते कुण्डले गृहीत्वा पुनः सौदासमागत्य तेन सहोक्तिप्रत्युक्त्यनन्तर निर्गतो मध्येमार्गं केनचित्पन्नगेन कुण्डलहरणे विहिते नागलोकं गन्तुं दण्डेन वल्मीकविदारणे प्रवृते। ब्राह्मणरूपेणेन्द्रेण बोधितो यदा न निवृते तदा तन्निश्चयं ज्ञात्वेन्द्रेण दण्डे वज्रास्त्रे योजिते झटिति सञ्जातेन मार्गेण नागलोकं गतो यदा कुण्डलप्राप्तौ निराशोऽभवत्तदा कश्चिदश्वत्थस्तत्रागत्य 'धमस्वापानमेतन्मे' (४२) इत्युवाच। अश्ववाक्यात्तदपान धमति तस्मिंस्तद्रोमकूपेभ्यो निर्गतेन धूमेन व्याकुलैर्नागैः सत्कारपूर्वकमर्पिते कुण्डले गृहीत्वा गुरुपत्न्यै निवेदयति स्म।	८९
५९	२१	'उत्तङ्कस्य वरं दत्वा'(१) इत्यादिके जनमेजयप्रश्ने वैशम्पायनः श्रीकृष्णस्य द्वारकागमनादिकमभ्यधात	९०
६०	३६	युद्धवृत्तान्तज्ञानार्थं वसुदेवेन पृष्टः श्रीकृष्णोऽभिमन्युवधवर्जं सर्वं कथयति स्म	९१
६१	४२	अभिमन्युवध कथयेत्युक्त्वा मूर्च्छितायां सुभद्रायां दुःखितेन वसुदेवेन पृष्टः श्रीकृष्णोऽभिमन्युयुद्धकथनपूर्वक तमभिधाय कुन्तीकृतं सुभद्राऽऽश्वासनमुत्तराऽऽश्वासनादिकं चाकथयत	९३
६२	२१	वैशम्पायनो वसुदेवादिकृतमभिमन्युश्राद्धादिकमभिधाय व्यासेन कृतं कुन्त्या उत्तराया अर्जुनस्य चाश्वासनं धर्मराज प्रत्यश्वमेधकरणाज्ञाकरणादिकं चाचष्ट	९३
६३	२४	'श्रुत्वैतद्वचनम्' (१) इत्यादिना व्यासवाक्यश्रवणोत्तर युधिष्ठिरः किमकरोत्, मरुत्तेन मह्यां निक्षिप्तं धनं च कथमवापेति जनमेजयप्रश्ने वैशम्पायन उत्तरमाचख्यौ 'श्रुतं वो वचनं वीराः' (४) इत्यादिना युधिष्ठिरेण व्यासोपदिष्टमरुत्तनिहितधनानयनाद्यर्थं कथ कर्तव्यमिति भ्रातृषु पृष्टेषु सत्सु 'रोचते मे महाबाहो' (११) इत्यादिकं सोत्साहं भीमवाक्यं श्रुत्वा हृष्टे युधिष्ठिरेऽर्जुनादिभिरपि तथैवेत्युक्ते सर्वे पाण्डवाः सुमुहूर्ते स्वस्तिवाचनादिपुरःसर ब्राह्मणादीन् प्रदक्षिणीकृत्य निर्ययुः	९४
६४	१६	ससैन्येषु पाण्डवेषु निर्गतेषु तन्मध्ये विराजमानो युधिष्ठिरो द्रव्यदेशमागत्य समे शुभे देशे सेनाया निवेश चकार। ततः सर्वे पाण्डवा ब्राह्मणाज्ञया जलमात्र पीत्वा तां रात्रिं कुशसस्तरेषुः	९५
६५	२३	'क्रियतामुपहारोऽद्य' (१) इत्यादिना ब्राह्मणैरुपदिष्टं रुद्रबलिदानादिविधिं कृत्वा तद्धनं खानयित्वा नानाविधानि पात्रादीनि धनानि च गृहीत्वा हस्तिनापुरमाजगाम युधिष्ठिरः	९६
६६	२९	'अश्वमेधदर्शनार्थं श्रीकृष्णादिषु हस्तिनापुरमागतेषु सत्सु प्रसूताया उत्तरायाः सकाशादश्वत्थामशस्त्रपीडितः शवभूतः परीक्षिज्जज्ञे। तत्र जनकोलाहल श्रुत्वाऽन्तःपुरं प्रविष्टं श्रीकृष्णं प्रति कुन्ती 'वासुदेव महाबाहो' (१५)	

अ०	श्लो०	विषय	पृष्ठम्
		इत्यादिना भवता पूर्वप्रतिज्ञातमश्वत्थामहतस्यैतस्योज्जीवनं कुर्वित्याद्याह स्म। एवमुक्त्वा भूमौ पतितां तां प्रति कृष्ण आश्वासयामास ...	९७
६७	१९	श्रीकृष्णं दृष्ट्वा सुभद्रा दुःखार्ता सती 'पुण्डरीकाक्ष पश्य त्वम्' (२) इत्याद्युवाच	९८
६८	२४	सुभद्रावाक्यमङ्गीकृत्य परिक्षिज्जन्मगृहप्रविष्ट द्रौपद्या प्रदर्शितं श्रीकृष्णं प्रति 'पुण्डरीकाक्ष पश्यावाम्' (१२) इत्याद्युवाचोत्तरा	९९
६९	२४	एव विलप्य भूमौ पतित्वा पुनरुत्थाय स्वाङ्के पुत्रमारोप्य पुनर्विलपन्त्या उत्तराया विलापवाक्यानि श्रुत्वा श्रीकृष्णोऽप उपस्पृश्य ब्रह्मास्त्र प्रतिसंहृत्य परिक्षिज्जीवनार्थं प्रतिजज्ञे। तत्प्रभावाद्बालकः शनैः शनैः प्रास्पन्दत ..	१००
७०	२१	'ब्रह्मास्त्रं तु यदा राजन्' (१) इत्यादिना परीक्षिज्जन्मवृत्तान्तमाख्याय मासजाते परिक्षिति रत्नान्यादायागतान्पाण्डवान्प्रति यदूनां प्रत्युद्गमनादिकमभ्यधाद्वैशम्पायनः	१०१
७१	२६	कृष्णेन प्रत्युद्गताः पाण्डवा हस्तिनापुर प्रविश्य परिक्षिज्जीवनादिवृत्तान्तं श्रुत्वा श्रीकृष्ण पूजयामासुः। ततः केनचित्कालेनागतो व्यासो युधिष्ठिरेण 'भवत्प्रसादाद्भगवन्' (१३) इत्यादिना प्रार्थितोऽश्वमेधं कर्तुमनुजज्ञे। व्यासवाक्यादश्वमेधकरणे मतिं कृत्वा युधिष्ठिरेण 'देवकी सुप्रजा देवी' (१९) इत्यादिना प्रार्थितः श्रीकृष्णः 'यजस्व मदनुज्ञातः' (२५) इत्याद्युवाच	१०२
७२	२६	युधिष्ठिरेण यज्ञदीक्षाग्रहणार्थं प्रार्थितो व्यासः 'चैत्र्यां पौर्णमास्यां तव दीक्षा भविष्यति यज्ञसंभाराः सम्भ्रियन्ताम्' (४) इत्याद्युवाच। ततो युधिष्ठिरो यज्ञसम्भारानाहृत्याश्वरक्षणार्थमर्जुनं पुररक्षार्थं भीम, नकुल सहदेवं च कुटुम्बतन्त्रे न्ययोजयत	१०३
७३	२८	दीक्षाकाले व्यासादयो युधिष्ठिरं दीक्षयित्वाऽश्वं मुमुचुः। तं रक्षितुमर्जुनः पौरादिभिराशास्यमानो विजयस्तत्पृष्ठतो निर्जगाम। अर्जुनस्य बहुभिर्जातानां युद्धानां मध्ये महान्ति युद्धानि वक्ष्यामीति प्रतिजज्ञे वैशम्पायनः	१०४
७४	३४	अश्वोद्देशेनार्जुनस्य त्रिगर्तैः सूर्यवर्मणा, धृतवर्मणा च सह जातं युद्धं वर्णयति स्म वैशम्पायनः	१०५
७५	२०	प्राग्ज्योतिषपुर गतेऽश्वे तत्र भगदत्तपुत्रेण वज्रदत्तेन सहार्जुनस्य दारुणं युद्धमभूत	१०६
७६	२६	दिनत्रयपर्यन्तं प्रचलिते युद्धे चतुर्थेऽहनि क्रुद्धो वज्रदत्तोऽर्जुनमधिक्षिप्य गजारूढो युयुधे, अर्जुनश्च तदीयं गज हत्वा तं पराजित्य चैत्र्यामश्वमेधार्थं त्वमागच्छेत्याज्ञापयति स्म	१०७
७७	३२	सैन्धवैः सह युद्ध कुर्वन्नर्जुनस्तद्बाणवृष्ट्या मोहं प्राप्तो देवर्ष्यादिभिर्वर्द्धिततेजाः पुनर्युयुधे	१०८
७८	४९	सैन्धवार्जुनयोर्युद्धे प्रवृत्तेऽर्जुनो 'युद्धे राजानो न हन्तव्याः किन्तु केवल जेतव्याः' (९) इत्यादि युधिष्ठिरवाक्यं स्मृत्वा चिन्तयन्नर्जुनः सैन्धवान्प्रति 'श्रेयो वदामि युष्माकम्' (१०) इत्याद्युवाच। ते च तच्छ्रुत्वा क्रुद्धाः सन्तः पुनर्युयुधिरे। युद्धं निवारयितुं पौत्रं पुरस्कृत्यागताया दुःशलाया उ-	

अ०	श्लो०	विषय	पृष्ठम्
		क्तिप्रत्युक्तत्यनन्तरमर्जुनेन विसर्जिता सा योधान्निवर्त्य स्वगृह जगाम। अर्जुनोऽपि सैन्धवान् जित्वाऽश्वमनुययौ। अश्वश्चार्जुनसहितो मणिपूरपतेर्देशं जगाम	११०
७९	३९	स्वपितरं प्रति विनयेनागतो बभ्रुवाहनः 'प्रक्रियेयं न ते युक्ता' (३) इत्यादिनाऽधिक्षिप्तो यदा चिन्तयति स्म तदा तदसहमानया महीं भित्त्वाऽऽगतया नागकन्ययोलूप्या प्रतिबोधितो युद्ध कुर्वन्नर्जुनबाणपीडितस्तं हृदये भित्त्वा निपात्य स्वयमपि पपात। तदा चित्राङ्गदा रणाजिरमागत्य निहतं पतिं ददर्श	१११
८०	६१	चित्राङ्गदा बहु विलप्य मूर्च्छिता पुनः संज्ञां लब्ध्वा तत्रोलूपी दृष्ट्वा ता प्रति 'उलूपि पश्य भर्तारम्' (३) इत्याद्यभिधाय भर्तारं प्रति 'उत्तिष्ठ कुरुमुख्यस्य' (९) इत्याद्युक्त्वा पुनरुलूपी प्रति 'उलूपि साधु पश्येमम्' (१२) इत्याद्युदीर्य पतिचरणसमीपे प्रायोपवेशनमकरोत्। लब्धसञ्ज्ञो बभ्रुवाहनः पतिचरणानुशायिनीं मातर दृष्ट्वा विलप्योलूपी प्रति 'पश्य नागोत्तमसुते' (३१) इत्यात्यभिधाय प्रायोपवेशनं चकार। उलूपी स्मरणमात्रेण संनिहित सञ्जीवनमणिं गृहीत्वा बभ्रुवाहनं प्रति 'उत्तिष्ठ मा शुचः पुत्र' (४४) इत्याद्यभिधाय तस्मै सञ्जीवनं मणिमदात्। बभ्रुवाहनानिहितेन मणिना हृदि स्पृष्टोऽर्जुनो लब्धसञ्ज्ञो बभ्रुवाहनमालिङ्ग्य 'किमिदं लक्ष्यते सर्वम्' (५८) इति पप्रच्छ। एवं पृष्टः स उलूपी पृच्छ्यतामित्यब्रवीत् . ..	११३
८१	३२	'किमागमनकृत्यं ते' (१) इत्यर्जुनेनानुयुक्तोलूपी 'न मे त्वमपराद्धोऽसि' (५) इत्यादिना युद्धेऽधर्मेण भीष्महननात्क्रुद्धानां वसूनां शाप स्वपितृप्रार्थितेभ्यः स्तेभ्यः शापमोचनप्रकार चाभिधाय तदनुरूपो मयायं यत्नो विहित इत्याह स्म। एतच्छ्रुत्वाऽर्जुनः प्रीतः सन् 'सर्वं मे सुप्रियं देवि' (२२) इत्युलूपीं प्रत्युक्त्वा 'चैत्र्यां पौर्णमास्यामश्वमेधं द्रष्टुं मातृभ्यां सहागच्छ' (२४) इति बभ्रुवाहनमादिश्य भार्याभ्यामनुज्ञातः प्रययौ	११४
८२	३०	राजगृहपुरमागतेऽश्वे तदाधिपतिना सहदेवपुत्रेण मेघसंधिना सह युद्ध कुर्वन्नर्जुनस्तं पराजित्य यज्ञार्थमागमनमादिशति स्म	११५
८३	२०	मागधेनार्चितोर्जुनो दक्षिणां दिश गत्वा तत्र शिशुपालसुतशरभप्रभृतीञ्जित्वा सौराष्ट्रदेशमागतो द्वारवत्यामुग्रसेनादिभिः सत्कृतो विचरन्गान्धारानगच्छत्	११६
८४	२४	गान्धारदेशाधिपतिना शकुनिपुत्रेण युद्धं कुर्वन्नर्जुनस्त पराजित्य यज्ञार्थमागमनमादिशति स्म ...	११६
८५	४२	हास्तिनपुरमागन्तुं परावृत्तमश्व चारमुखाच्छ्रुत्वा युधिष्ठिरेणाज्ञप्तो भीमो ब्राह्मणान् पुरस्कृत्य प्राज्ञैः शिल्पिभिर्यज्ञवाट ब्राह्मणाना राज्ञां च निवासयोग्यानि गृहाणि च निर्माय राज्ञामाकारणार्थं दूतान् प्रेषयामास। आगतानां राज्ञां सत्कारार्थमन्नपानादिप्रेषणार्थं दूतानादिश्य समागतान्मुनिगणान्सत्कर्तुं युधिष्ठिरः स्वयमेव दम्भं परित्यज्य ययौ। 'तस्मिन्यज्ञे	


अ०	श्लो०	विषय	पृष्ठम्
		प्रवृत्ते तु' (२७) इत्यादिना प्रवृत्ते यज्ञे सम्भारादिकं वर्णयति स्म वैशम्पायनः ...	११८
८६	२१	समागतान्राज्ञो दृष्ट्वा युधिष्ठिरेणाज्ञप्तो भीमः सर्वान् पूजयामास। अथ गोविन्दो वृष्णिभिः सह बलदेवं पुरस्कृत्यागतो धर्मेण सत्कारपूर्वकं कृतप्रश्नो दूतद्वारा श्रुतमर्जुनसन्देशं 'यथा चात्ययिकं न स्यात्' (१६)इत्यादिकं कथयति स्म .	११९
८७	२८	श्रीकृष्णवाक्यं श्रुतवता युधिष्ठिरेण 'अयमर्जुनः किंनिमित्तम् सदा सुखवर्जितः' (३) इति पृष्टः श्रीकृष्णोऽर्जुनस्य सदा दुःखभागित्वे सदाप्रवासित्वे च हेतुभूतमनिष्टलक्षणं कथयति स्म। एवं परस्परभाषणादिके प्रचलिते तत्रागतादूतादर्जुनागमनं श्रुत्वोपयातैर्युधिष्ठिरादिभिः सह कर्णमुखाः 'दिष्ट्यासि पार्थ कुशली' (१९) इत्यादिका नराणा वाचः शृण्वन्नर्जुनो यज्ञवाटं प्रविवेश। एतस्मिन्नेव काले मातृभ्या सहितो बभ्रुवाहन आगत्य वृद्धाभिवादन पुरःसरं कुन्त्या गृहे प्रविवेश	१२०
८८	४०	द्रौपद्यादिभिः सत्कृते उल्लूपीचित्राङ्गदे कुन्तीगृह ऊषतुः बभ्रुवाहनश्च धृतराष्ट्रादीन्प्रत्युपतस्थे। ते च त सम्मानयामासुः। तृतीये दिवसे व्यासेन ' दक्षिणात्रैगुण्यं कुरु, तेनाश्वमेधत्रय भविष्यति' (१५) इत्युपदिष्टो यज्ञदीक्षां जग्राह युधिष्ठिरः। याजकाश्चोक्तं यज्ञक्रममस्खलितं कुर्वन्तो यूपादिकं कल्पयांचक्रुः। यूपे च त्रिशतीं पशूनां बबन्धुः	१२१
८९	४४	अश्वमालभ्य तस्य वपा मन्यान्यङ्गानि चाग्नौ हुत्वा यज्ञ समापयामासुः षोडशर्त्विजः। युधिष्ठिरोऽपि ब्राह्मणेभ्यो निष्काणि कोटिशो दत्वा व्यासादिभ्य ऋत्विग्भ्यो वसुन्धरां दक्षिणात्वेन ददौ। ततो व्यासवाक्याच्छ्रीकृष्णवाक्याच्च वसुन्धरामूल्य त्रिगुण हिरण्यं विततार। ब्राह्मणाश्च मुदिताः सन्तः स्वान् स्वानालयान् जग्मुः। राजभ्योऽपि रत्नादीनि ददद्युधिष्ठिरो बभ्रुवाहन विपुलेन वित्तेन सत्कृत्य प्रास्थापयत्। दुःशलापौत्रं च स्वराज्येऽभ्यषेचयत्। कृष्णादीन्वृष्णिवीरानपि सत्कारपूर्वकं विसर्जयति स्म। 'एव बभूव यज्ञः सः' (३९) इत्यादिना यज्ञं प्रशशस वैशम्पायनः .	१२३
९०	१२०	'पितामहस्य यज्ञे यत्किञ्चिदाश्चर्यमभूत्तत्कथय' (१) इति जनमेजयप्रश्ने वैशम्पायनस्तदाख्यातुमुपचक्रमे। अश्वमेधे निवृत्ते तत्र कश्चिन्नकुल आगत्य मनुष्यवाचा 'सक्तुप्रस्थेन वो नायम्' (७) इत्यादिनाऽधिचिक्षेप। तदा ब्राह्मणैः कृतप्रश्नः स सक्तुप्रस्थं विवरीतुमुञ्छवृत्तेराख्यायिकामाचख्यौ। कुरुक्षेत्रे निवसन्नुञ्छवृत्तिर्भार्यापुत्रस्नुषाभिः सहित उञ्छमप्यप्राप्नुवन्क्षुधापीडित एकदा यवप्रस्थं सम्पाद्य तस्य सक्तून् विधायाग्नौ हुत्वा यावद्यभजत तावदेकः कश्चिदतिथिराजगाम। तं दृष्ट्वा हृष्टास्ते सत्कारपूर्वकमेकं भाग तस्मै वितेरुः। तेनासन्तुष्टं तमालक्ष्य क्रमशः सर्वे स्वस्वभागान्सन्तुष्टाः सन्तो ददुस्तदा सन्तुष्टेनातिथिरूपेण धर्मेण 'अहो दान घुष्यते ते स्वर्गे स्वर्गनिवासिभिः' (८३) इत्यादि-	१२५

अ०	श्लो०	विषय	पृष्ठम्
		ना तत्प्रशंसापूर्वकं दानं प्रशस्य 'आरोहत यथाकामम्' (१०६) इत्याद्युक्तो भार्यया पुत्रेण स्नुषया सह दिवं जगाम। तस्य सक्तुगन्धेनोदकक्लेदेन दिव्यपुष्पविमर्देन च मम शरीरार्धं सुवर्णमयमभूत्। अपरमपि शरीरार्धं तथाविध भूयादित्याशास्यात्रागतो नाहं तथाऽभूवमिति सक्तुप्रस्थेन वो नायमित्यब्रुवमित्युक्त्वा नकुलोऽन्तर्दधे	१२७
९१	३७	'यज्ञे सक्ता नृपतयः' (१) इत्यादिना यज्ञकरणं फलप्रदर्शनेन स्तुत्वा स नकुलो युधिष्ठिरस्याश्वमेध कस्माद्धर्हयामासेति जनमेजयेन पृष्टो वैशम्पायनः 'यज्ञस्य विधिमग्र्यं वै' (७) इत्यादिना तदुत्तरमाचष्ट। पुरा किलेन्द्रे यष्टु प्रवृत्ते तत्रालभ्यमानेषु पशुषु दीनान्पशून् दृष्ट्वा दयाविष्टा महर्षय इन्द्रमागत्य 'अपरिज्ञानमेतत्ते' (१३) इत्यादिना हिंसामाचिक्षिपुः। तदसहमाने शक्रे विवादं निर्णेतुं तैरापृष्टो वसुः 'यथोपनीतैर्यष्टव्यम्' (२२) इत्यनेन हिंस्राहिंस्रयज्ञयोस्तुल्यत्वापादनरूप वितथमुत्तरं ददद्रसातलं जगाम। इत्याख्याय वैशम्पायनः 'तस्मान्न वाच्यं ह्येकेन' (२४) इत्यादिनाऽहिंसाधर्मं प्रशंसन्दानरूपं धर्ममेव प्रशशंस	१२८
९२	५३	'धर्मागतेन त्यागेन' (१) इत्यादिना सर्वयज्ञेषु परमो निश्चयः कथमिति जनमेजयेन पृष्टो वैशम्पायनोऽगस्त्येतिहासं कथयन्नुत्तरमाह स्म। द्वादशवार्षिकीं सत्रदीक्षा प्रविष्टेऽगस्त्ये महान्तोऽग्निकल्पा ऋषयस्त यज्ञमुपातिष्ठन्त। एवविधे यज्ञे प्रवृत्ते यदेन्द्रो न ववर्ष तदा कर्मान्तरे 'अगस्त्यो यजमानोऽसौ' (१३) इत्यादिकायां कथायां प्रवृत्तायां 'यदि द्वादशवर्षाणि' (१८) इत्यादिकामगस्त्योक्तिं तदनुरूपा स्थिति च दृष्ट्वा 'प्रीताः स्म' (३०) इत्याद्युक्तवत्सु ऋषिषु पुरंदरो ववर्षागस्त्यं च प्रसादयामास। 'कोऽसौ नकुलरूपेण' (३९) इत्यादिके जनमेजयप्रश्ने वैशम्पायन उत्तरमाह स्म। पुरा किल जमदग्निः श्राद्धं सङ्कल्प्य समीपागतान् होमधेनुं दुग्ध्वा तद्दुग्धं दृढे भाण्डे स्थापयामास। तदा धर्मः क्रोधरूपेण प्रविश्य दुग्धं पीतवान्। एवमप्यक्रुद्धं मुनिं दृष्ट्वा क्रोधो ब्राह्मणरूपेणागत्य 'जितोऽस्मि' इत्याद्यभिधाय 'तपसो बिभेमि, (४६) इत्युवाच। जमदग्निना तु न त्वया मे किञ्चिदपकृत येषामर्थे पयः सङ्कल्पितं तान् पितॄन्गच्छ' (४८) इत्युक्तः क्रोधः पितृणामभिषङ्गान्नकुलत्व प्राप्तः। पितॄन् प्रसाद्य तेभ्यः 'सक्तुप्रस्थनिदर्शनेन धर्मपुत्रमाक्षिपतः तव शापान्तो भविष्यति' (५०) इति शापान्त लेभे। वैशम्पायन एतदाख्याय 'एवमेतत्तदा वृत्तम्' (५३) इत्यादिनोपसञ्जहार	१३०

॥ इत्याश्वमेधिकपर्वविषयानुक्रमणिका समाप्ता ॥

अश्वमेधपर्व

१४





॥ महाभारतम् ॥

आश्वमेधिकपर्व ।

-१४-

अश्वमेधपर्व ।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ १ ॥

वैशम्पायन उवाच ।


कृतोदकं तु राजानं धृतराष्ट्रं युधिष्ठिरः ।
पुरस्कृत्य महाबाहुरुत्तताराकुलेन्द्रियः ॥ २
उत्तीर्य तु महाबाहुर्बाष्पव्याकुललोचनः ।
पपात तीरे गंगाया व्याधविद्ध इव द्विपः ३
तं सीदमानं जग्राह भीमः कृष्णेन चोदितः ।
मैवमित्यब्रवीच्चैनं कृष्णः परबलार्दनः ॥ ४
तमार्तं पतितं भूमौ श्वसन्तं च पुनः पुनः ।
ददृशुः पार्थिवा राजन्धर्मपुत्रं युधिष्ठिरम् ५

श्रीगणेशाय नमः ।

श्रीमद्गोपालमानम्य प्राचीनाचार्यवर्त्मना । आश्वमेधिकभावार्थ श्रीकृष्णेन प्रकाश्यते ॥ १ ॥ अश्विस्तुत्यूर्ध्वयायाताष्टावक्रीयेषु सूत्रित । सानत्सुजाते विवृतं गीताया विपुलीकृतं ॥ २ ॥ मोक्षधर्मेषु च पुनर्नानाख्यानोपबृंहणै । अतीव व्याकृतं प्रत्यगात्मतत्त्वमनाकुलं ॥ ३ ॥ यज्जिज्ञासोदयायैव जपदानादय स्मृता । आनुशासनिके सम्यक्चित्तदोषविनाशका ॥ ४ ॥ यत्र प्रावण्यलाभाय वैराग्योदयसिद्धये । कुरुक्षयादिको लोकवृत्तात उपवर्णित ॥५॥ तदेव स्पष्टमत्रोपसंहारव्यपदेशत । आत्मतत्त्व विवृणुते मुनिराख्यानकैस्त्रिभि. ॥ ६ ॥ आख्यानत्रय च संवर्त्तमरुत्तीयं कृष्णधर्मसवाद. कृष्णार्जुनसंवादश्च। **तत्राद्ये** काश्या मृतस्य मुक्तिं लिंगेनैव सूचयित्वा ईश्वराराधनादिना धर्मेणैव धनं लब्ध्वाऽऽत्मशुद्धये यष्टव्यामित्युक्तं **द्वितीये** शास्त्रार्थसूत्रणम्। तृतीये तद्विवरणं चेति तदूर्ध्वमुत्तरुक्कोच्छवृत्त्याद्याख्यानैर्ज्ञानोपयोगि गुरुशुश्रूषामाहात्म्यहिंसात्मकयज्ञनिंदादि च यथायथं तात्पर्यविषयतया ज्ञेयम् । तत्रायमाद्य श्लोक.-**नारायणमिति**।'आपो नारा इति प्रोक्ता आपो वै नरसूनव । अयनं तस्य ता प्रोक्तं तेन नारायण स्मृत' इति स्मृतेरापः पुरुषवचस इति श्रुतेश्चाप प्रधानं भूतपंचकं नरेणातर्यामिणा सृष्टं नारं तत्सृष्ट्वा तदेवानुप्राविशदिति श्रुते स्रष्टा प्रवेष्टा च नारायण ईश्वर स एव प्रविश्योपाधिधर्मानभिमन्यमानो नरो जीव ताभ्यामुत्तमो नरोत्तम कार्यकारणोपाधिद्वयानिर्मुक्तः परमात्मा एतत्त्रयं तत्स्वरूपप्रकाशिका सरस्वतीं देवीं च प्रणम्य जयं महाभारताख्यमितिहासं सर्वश्रुतिस्मृतिसारभूतमुदीरयेदिति तस्यार्थ । एतेन तत्त्वमस्यादिवाक्यार्थौ जीवब्रह्माभेदो ग्रंथप्रतिपाद्यो दर्शित। **कृतोदकं तु राजानमिति** उत्तार गंगा त इति शेष. ॥ १ ॥

तं दृष्ट्वा दीनमनसं गतसत्त्वं नरेश्वरम् ।
भूयः शोकसमाविष्टाः पांडवाः समुपाविशन्
राजा तु धृतराष्ट्रश्च पुत्रशोकाभिपीडितः ।
वाक्यमाह महाबुद्धिः प्रज्ञाचक्षुर्नरेश्वरम् ॥ ७
उत्तिष्ठ कुरुशार्दूल कुरु कार्यमनन्तरम् ।
क्षत्रधर्मेण कौन्तेय जितेयमवनी त्वया ॥ ८
भुंक्ष्व भोगान्भ्रातृभिश्च सुहृद्भिश्च मनोनुगान्
शोचितव्यं न पश्यामि त्वया धर्मभृतां वर
शोचितव्यं मया चैव गान्धार्या च महीपते ।
ययोः पुत्रशतं नष्टं स्वप्नलब्धं यथा धनम् १०
अश्रुत्वा हितकामस्य विदुरस्य महात्मनः ।
वाक्यानि सुमहार्थानि परितप्यामि दुर्मतिः
उक्तवान्विदुरो यन्मां धर्मात्मा दिव्यदर्शनः
दुर्योधनापराधेन कुलं ते विनशिष्यति ॥ १२
स्वस्ति चेदिच्छसे राजन्कुलस्य कुरु मे वचः
वध्यतामेष दुष्टात्मा मन्दो राजा सुयोधनः ॥
कर्णश्च शकुनिश्चैव नैनं पश्यतु कर्हिचित् ।
द्यूतसंघातमप्येषामप्रमादेन वारय ॥ १४
अभिषेचय राजानं धर्मात्मानं युधिष्ठिरम् ।
स पालयिष्यति वशी धर्मेण पृथिवीमिमाम्
अथ नेच्छसि राजानं कुन्तीपुत्रं युधिष्ठिरम् ।
मेढीभूतः स्वयं राज्यं प्रतिगृह्णीष्व पार्थिव १६
समं सर्वेषु भूतेषु वर्तमानं नराधिप ।
अनुजीवंतु सर्वे त्वां ज्ञातयो भ्रातृभिः सह
एवं ब्रुवति कौन्तेय विदुरे दीर्घदर्शिनि ।
दुर्योधनमहं पापमन्ववर्ते वृथामतिः ॥ १८
अश्रुत्वा तस्य धीरस्य वाक्यानि मधुराण्यहम्
फलं प्राप्य महद्दुःखं निमग्नः शोकसागरे १९
वृद्धौ हि तेऽद्य पितरौ पश्य नौ दुःखितौ नृप
न शोचितव्यं भवता पश्यामीह जनाधिप२०

इति श्रीमहाभारते आश्वमेधिके पर्वणि अश्वमेधपर्वणि
प्रथमोऽध्यायः ॥ १ ॥



२

वैशम्पायन उवाच ।
एवमुक्तस्तु राज्ञा स धृतराष्ट्रेण धीमता ।
तूष्णीं बभूव मेधावी तमुवाचाथ केशवः ॥ १
अतीव मनसा शोकः क्रियमाणो जनाधिप ।
सन्तापयति चैतस्य पूर्वप्रेतान्पितामहान् २
यजस्व विविधैर्यज्ञैर्बहुभिः स्वाप्तदक्षिणैः ।
देवांस्तर्पय सोमेन स्वधया च पितॄनपि ॥ ३
अतिथीनन्नपानेन कामैरन्यैरकिञ्चनान्* ।
विदितं वेदितव्यं ते कर्तव्यमपि ते कृतम् ४
श्रुताश्च राजधर्मास्ते भीष्माद्भागीरथीसुतात् ।
कृष्णद्वैपायनाच्चैव नारदाद्विदुरात्तथा ॥ ५
नेमामर्हसि मूढानां वृत्तिं त्वमनुवर्तितुम् ।
पितृपैतामहं वृत्तमास्थाय धुरमुद्वह ॥ ६
युक्तं हि यशसा क्षात्रं स्वर्गे प्राप्तुमसंशयम् ।
न हि कश्चिद्धि शूराणां निहतोऽत्र पराङ्मुखः
त्यज शोकं महाराज भवितव्यं हि तत्तथा ।
न शक्यास्ते पुनर्द्रष्टुं त्वया येऽस्मिन् रणे हताः
एतावदुक्त्वा गोविन्दो धर्मराजं युधिष्ठिरम् ।
विरराम महातेजास्तमुवाच युधिष्ठिरः ॥ ९
युधिष्ठिर उवाच ।
गोविन्द मयि या प्रीतिस्तव सा विदिता मम
सौहृदेन तथा प्रेम्णा सदा मय्यनुकम्पसे १०
प्रियं तु मे स्यात्सुमहत्कृतं चक्रगदाधर ।
श्रीमन्प्रीतेन मनसा सर्वं यादवनन्दन ॥ ११
यदि मामनुजानीयाद्भवान्गन्तुं तपोवनम् ।
न हि शांतिं प्रपश्यामि पातयित्वा पितामहम्
कर्णं च पुरुषव्याघ्रं संग्रामेष्वपलायिनम् ।
कृच्छ्रेण येन मुच्येयमस्मात्क्रूरादरिन्दम १३
कर्मणा तद्विधत्स्वेह येन शुध्यति मे मनः ।
तमेवंवादिनं पार्थं व्यासः प्रोवाच धर्मवित्


इत्याश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे प्रथमोऽध्यायः॥१॥ *'त्वद्विधस्य महाबुद्धे नैतदद्योपपद्यते'इति पा०

२

एवं शोकाक्रांतो वैराग्यमिच्छन्नीति सप्तत्यति-एवमुक्तस्त्वित्यध्यायेन ॥ १ ॥

सांत्वयन्सुमहातेजाः शुभं वचनमर्थवत् ।
अकृता ते मतिस्तात पुनर्बाल्येन मुह्यसे ॥ १५
किमाकारा वयं तात प्रलपामो मुहुर्मुहुः ।
विदिताः क्षत्रधर्मास्ते येषां युद्धेन जीविका
तथा प्रवृत्तो नृपतिर्नाधिबन्धेन युज्यसे ।
मोक्षधर्माश्च निखिला याथातथ्येन ते श्रुताः
असकृच्चापि सन्देहाच्छिन्नास्ते कामजा मया
अश्रद्दधानो दुर्मेधा लुप्तस्मृतिरसि ध्रुवम् १८
मैवं भव न ते युक्तमिदमज्ञानमीदृशम् ।
प्रायश्चित्तानि सर्वाणि विदितानि च तेऽनघ
राजधर्माश्च ते सर्वे दानधर्माश्च ते श्रुताः ।
स कथं सर्वधर्मज्ञः सर्वागमविशारदः ।
परिमुह्यसि भूयस्त्वमज्ञानादिव भारत ॥ २०

इति श्रीमहाभारते आश्वमेधिके पर्वणि अश्वमेधपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥



३

व्यास उवाच ।

युधिष्ठिर तव प्रज्ञा न सम्यगिति मे मतिः
नहि कश्चित्स्वयं मर्त्यः स्ववशः कुरुते क्रियाम्
ईश्वरेण च युक्तोऽयं साध्वसाधु च मानवः ।
करोति पुरुषः कर्म तत्र का परिदेवना ॥ २
आत्मानं मन्यसे चाथ पापकर्माणमन्ततः ।
शृणु तत्र यथापापमपकृष्यते भारत ॥ ३
तपोभिः क्रतुभिश्चैव दानेन च युधिष्ठिर ।
तरन्ति नित्यं पुरुषा ये स्म पापानि कुर्वते ।
यज्ञेन तपसा चैव दानेन च नराधिप ।
पूयन्ते नरशार्दूल नरा दुष्कृतकारिणः ॥ ५
असुराश्च सुराश्चैव पुण्यहेतोर्मखक्रियाम् ।
प्रयतन्ते महात्मानस्तस्माद्यज्ञाः परायणम् ६
यज्ञैरेव महात्मानो बभूवुरधिकाः सुराः ।
ततो देवाः क्रियावन्तो दानवान्भ्यधर्षयन् ७
राजसूयाश्वमेधौ च सर्वमेधं च भारत ।
नरमेधं च नृपते त्वमाहर युधिष्ठिर ॥ ८
यजस्व वाजिमेधेन विधिवद्दक्षिणावता ।
बहुकामान्नवित्तेन रामो दाशरथिर्यथा ॥ ९
यथा च भरतो राजा दौष्यन्तिः पृथिवीपतिः
शाकुन्तलो महावीर्यस्तव पूर्वपितामहः ॥ १०

युधिष्ठिर उवाच ।

असंशयं वाजिमेधः पावयेत्पृथिवीमपि ।
अभिप्रायस्तु मे कश्चित्तं त्वं श्रोतुमिहार्हसि ११
इमं ज्ञातिवधं कृत्वा सुमहान्तं द्विजोत्तम ।
दानमल्पं न शक्नोमि दातुं वित्तं च नास्ति मे
न तु बालानिमान्दीनानुत्सहे वसु याचितुम्
तथैवार्द्रव्रणान्कृच्छ्रे वर्तमानान्पितृन्मजान् १३
स्वयं विनाश्य पृथिवीं यज्ञार्थं द्विजसत्तम ।
करमाहारयिष्यामि कथं शोकपरायणः ॥ १४
दुर्योधनापराधेन वसुधा वसुधाधिपाः ।
प्रनष्टा योजयित्वास्मानकीर्त्या मुनिसत्तम १५
दुर्योधनेन पृथिवी क्षयिता वित्तकारणात् ।
कोशश्चापि विशीर्णोऽसौ धार्तराष्ट्रस्य दुर्मतेः
पृथिवी दक्षिणा चात्र विधिः प्रथमकल्पितः
विद्वद्भिः परिदृष्टोयं शिष्टो विधिविपर्ययः १७
न च प्रतिनिधिं कर्तुं चिकीर्षामि तपोधन ।
अत्र मे भगवन्सम्यक्समाधेयं कर्तुमर्हसि १८

एवमुक्तस्तु पार्थेन कृष्णद्वैपायनस्तदा ।
मुहूर्तमनुसञ्चिन्त्य धर्मराजानमब्रवीत् ॥ १९
कोशश्चापि विशीर्णोय परिपूर्णो भविष्यति
विद्यते द्रविणं पार्थ गिरौ हिमवति स्थितम् ॥

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे द्वितीयोऽध्याय ॥ २ ॥

३

मौढ्यप्रयुक्तादैराग्याच्छास्त्रीयकर्माचरणमेव श्रेय इत्युक्तं-युधिष्ठिर तव प्रज्ञेत्यादिना १ प्रतिनिधिमनुकल्पम् १८

उत्सृष्टं ब्राह्मणैर्यज्ञे मरुत्तस्य महात्मनः ।
तदानयस्व कौन्तेय पर्याप्तं तद्भविष्यति २१
युधिष्ठिर उवाच ।
कथं यज्ञे मरुत्तस्य द्रविणं तत्समाचितम् ।
कस्मिंश्च काले स नृपो बभूव वदतां वर २२
व्यास उवाच ।
यदि शुश्रूषसे पार्थ शृणु कारन्धमं नृपम् ।
यस्मिन्काले महावीर्यः स राजासीन्महाधनः

इति श्रीमहाभारते आश्वमेधिके पर्वणि अश्वमेध पर्वणि संवर्तमरुत्तीये तृतीयोऽध्यायः ॥ ३ ॥

४

युधिष्ठिर उवाच ।
शुश्रूषे तस्य धर्मज्ञ राजर्षेः परिकीर्तनम् ।
द्वैपायन मरुत्तस्य कथां ब्रूहि मेऽनघ ॥ १
व्यास उवाच ।
आसीत्कृतयुगे तात मनुर्दण्डधरः प्रभुः ।
तस्य पुत्रो महाबाहुः प्रसन्धिरिति विश्रुतः २
प्रसन्धेरभवत्पुत्रः क्षुप इत्यभिविश्रुतः ।
क्षुपस्य पुत्र इक्ष्वाकुर्महीपालोऽभवत्प्रभुः ३
तस्य पुत्रशतं राजन्नासीत्परधार्मिकम् ।
तांस्तु सर्वान्महीपालानिक्ष्वाकुरकरोत्प्रभुः ४
तेषां ज्येष्ठस्तु विंशोऽभूत्प्रतिमानं धनुष्मताम्
विंशस्य पुत्रः कल्याणो विविंशो नाम भारत
विविंशस्य सुता राजन्बभूवुर्दश पञ्च च ।
सर्वे धनुषि विक्रान्ता ब्रह्मण्याः सत्यवादिनः
दानधर्मरताः शान्ताः सतत प्रियवादिनः ।
तेषां ज्येष्ठः खनीनेत्रः स तान्सर्वानपीडयत् ७
खनीनेत्रस्तु विक्रांतो जित्वा राज्यमकण्टकम्
नाशकद्रक्षितुं राज्यं नान्वरज्यन्त तं प्रजाः ८
तमपास्य च तद्राज्ये तस्य पुत्रं सुवर्चसम् ।
अभ्यषिञ्चन्त राजेन्द्र मुदिता ह्यभवंस्तदा ९
स पितुर्विक्रियां दृष्ट्वा राज्यान्निरसनं च तत्
नियतो वर्तयामास प्रजाहितचिकीर्षया ॥ १०
ब्रह्मण्यः सत्यवादी च शुचिः शमदमान्वितः ।
प्रजास्तं चान्वरज्यन्त धर्मनित्यं मनस्विनम्
तस्य धर्मप्रवृत्तस्य व्यशीर्यत्कोशवाहनम् ।
तं क्षीणकोशं सामन्ताः समन्तात्पर्यपीडयन्
स पीड्यमानो बहुभिः क्षीणकोशाश्ववाहनः ।
आर्तिमार्च्छत्परां राजा सह भृत्यैः पुरेण च
न चैनमभिहन्तुं ते शशकुवन्ति बलक्षये ।
सम्यग्वृत्तो हि राजा स धर्मनित्यो युधिष्ठिर
यदा तु परमामार्तिं गतोऽसौ सपुरो नृपः ।
ततः प्रदध्मौ स करं प्रादुरासीत्ततो बलम् ॥
ततस्तानजयत्सर्वान्प्रातिसीमान्नराधिपान् ।
एतस्मात्कारणाद्राजन्विश्रुतः स करन्धमः
तस्य कारन्धमः पुत्रस्त्रेतायुगमुखेऽभवत् ।
इन्द्रादनवरः श्रीमान्देवैरपि सुदुर्जयः ॥ १७
तस्य सर्वे महीपाला वर्तन्ते स्म वशे तदा ।
स हि सम्राडभूत्तेषां वृत्तेन च बलेन च ॥ १८
अविक्षिन्नाम धर्मात्मा शौर्येणेन्द्रसमोऽभवत
यज्ञशीलो धर्मरतिर्धृतिमान्संयतेन्द्रियः १९
तेजसाऽऽदित्यसदृशः क्षमया पृथिवीसमः ।
बृहस्पतिसमो बुद्ध्या हिमवानिव सुस्थिरः २०
कर्मणा मनसा वाचा दमेन प्रशमेन च ।
मनांस्याराधयामास प्रजाना स महीपतिः २१
य ईजे हयमेधाना शतेन विधिवत्प्रभुः ।
याजयामास यं विद्वान्स्वयमेवाङ्गिराः प्रभुः ॥
तस्य पुत्रोऽतिचक्राम पितरं गुणवत्तया ।
मरुत्तो नाम धर्मज्ञश्चक्रवर्ती महायशाः ॥ २३
नागायुतसमप्राणः साक्षाद्विष्णुरिवापरः ।
स यक्ष्यमाणो धर्मात्मा शातकुम्भमयान्युत ॥

इति श्रीमहाभारते आश्वमेधिके पर्वणि नीलकण्ठीये भारतभावदीपे तृतीयोऽध्यायः ॥ ३ ॥

४

शुश्रूषे इति ॥ १ ॥ मरुत्तयज्ञप्रशंसाप्रसंगात्तद्दृश्यान्तौति आसीत्कृतयुग इत्यादिना अध्यायद्वयेन अत्यंत महान्तोऽपि कर्मैवानुतिष्ठंतीति कर्ममाहात्म्यख्यापनार्थम् २॥

कारयामास शुभ्राणि भाजनानि सहस्रशः।
मेरुं पर्वतमासाद्य हिमवत्पार्श्व उत्तरे ॥ २५
कांचनः सुमहान्पादस्तत्र कर्म चकार सः।
ततः कुण्डानि पात्रीश्च पिठराण्यासनानि च
चक्रुः सुवर्णकर्तारो येषां संख्या न विद्यते।
तस्यैव च समीपे तु यज्ञवाटो बभूव ह २७
ईजे तत्र स धर्मात्मा विधिवत्पृथिवीपतिः।
मरुत्तः सहितैः सर्वैः प्रजापालैर्नराधिपः॥ २८

इति श्रीमहाभारते आश्वमेधिके पर्वणि अश्वमेधपर्वणि संवर्तमरुत्तीये चतुर्थोऽध्यायः ॥ ४ ॥

५

युधिष्ठिर उवाच।

कथंवीर्यः समभवत्स राजा वदतां वर।
कथं च जातरूपेण समयुज्यत स द्विज ॥ १
क्व च तत्साप्रतं द्रव्यं भगवन्नवतिष्ठते।
कथं च शक्यमस्माभिस्तदवाप्तुं तपोधन ॥ २

व्यास उवाच।

असुराश्चैव देवाश्च दक्षस्यासन्प्रजापतेः।
अपत्यं बहुलं तात संस्पर्धेत परस्परम् ॥ ३
तथैवांगिरसः पुत्रौ ववतुल्यौ बभूवतुः।
बृहस्पतिर्बृहत्तेजाः संवर्तश्च तपोधनः ॥ ४
तावतिस्पर्धिनौ राजन्पृथगास्तां परस्परम्।
बृहस्पतिः स सवर्तं बाधते स्म पुनः पुनः ॥ ५
स बाध्यमानः सततं भ्रात्रा ज्येष्ठेन भारत।
अर्थानुत्सृज्य दिग्वासा वनवासमरोचयत् ६
वासवोप्यसुरान्सर्वान्विजित्य च निपात्य च
इंद्रत्वं प्राप्य लोकेषु ततो वव्रे पुरोहितम् ॥ ७
पुत्रमंगिरसो ज्येष्ठं विप्रज्येष्ठं बृहस्पतिम्।
याज्यस्त्वंगिरसः पूर्वमासीद्राजा करंधमः ८
वीर्येणाप्रतिमो लोके वृत्तेन च बलेन च।
शतक्रतुरिवौजस्वी धर्मात्मा संशितव्रतः ॥ ९
वाहनं यस्य योधाश्च मित्राणि विविधानि च।
शयनानि च मुख्यानि महार्हाणि च सर्वशः॥
ध्यानादेवाभवद्राजन्मुखवातेन सर्वशः।
स गुणैः पार्थिवान्सर्वान्वशे चक्रे नराधिपः११
संजीव्य कालमिष्टं च सशरीरो दिवं गतः।
बभूव तस्य पुत्रस्तु ययातिरिव धर्मवित् ॥ १२
अविक्षिन्नाम शत्रुंजित्स वशे कृतवान्महीम्।
विक्रमेण गुणैश्चैव पितेवासीत्स पार्थिवः॥ १३
तस्य वासवतुल्योऽभून्मरुत्तो नाम वीर्यवान्।
पुत्रस्तमनुरक्ताऽभूत्पृथिवी सागराम्बरा ॥ १४
स्पर्धते स स्म सततं देवराजेन नित्यदा।
वासवोपि मरुत्तेन स्पर्धते पाण्डुनन्दन ॥ १५
शुचिः स गुणवानासीन्मरुत्तः पृथिवीपतिः।
यतमानोऽपि यं शक्रो न विशेषयति स्म ह ॥
सोऽशक्नुवन्विशेषाय समाहूय बृहस्पतिम्।
उवाचेदं वचो देवैः संहितो हरिवाहनः ॥ १७
बृहस्पते मरुत्तस्य मा स्म कार्षीः कथंचन।
दैवं कर्माथ पित्र्यं वा कर्तासि मम चेत्प्रियम्॥
अहं हि त्रिषु लोकेषु सुराणां च बृहस्पते।
इन्द्रत्व प्राप्तवानेको मरुत्तस्तु महीपतिः ॥ १९
कथं ह्यमर्त्यं ब्रह्मंस्त्वं याजयित्वा सुराधिपम्।
याजयेर्मृत्युसंयुक्तं मरुत्तमविशङ्कया ॥ २०
मां वा वृणीष्व भद्रं ते मरुत्तं वा महिपतिम्।
परित्यज्य मरुत्तं वा यथाजोषं भजस्व माम् ॥
एवमुक्तः स कौरव्य देवराज्ञा बृहस्पतिः।
मुहूर्तमिव संचिन्त्य देवराजानमब्रवीत् ॥ २२
त्वं भूतानामधिपतिस्त्वयि लोकाः प्रतिष्ठिताः
नमुचेर्विश्वरूपस्य निहन्ता त्वं बलस्य च॥ २३
त्वमाजहर्थ देवानामेको वीराश्रियं पराम्।
त्वं बिभर्षि भुवं द्यां च सदैव बलसूदन ॥ २४
पौरोहित्यं कथं कृत्वा तव देवगणेश्वर।
याजयेयमहं मर्त्यं मरुत्त पाकशासन ॥ २५

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे चतुर्थोऽध्याय ॥ ४ ॥

५

कथमिति ॥ १ ॥

समाश्वसिहि देवेन्द्र नाहं मर्त्यस्य कर्हिचित्।
ग्रहीष्यामि स्रुवं यज्ञे शृणु चेदं वचो मम ॥ २६
हिरण्यरेता नोष्णः स्यात्परिवर्तेत मेदिनी।
मासं तु न रविः कुर्यान्न तु सत्यं चलेन्मयि ॥

वैशम्पायन उवाच।

बृहस्पतिवचः श्रुत्वा शक्रो विगतमत्सरः।
प्रशस्यैनं विवेशाथ स्वमेव भवनं तदा ॥ २८

इति श्रीमहाभारते आश्वमेधिके पर्वणि अश्वमेधपर्वणि संवर्तमरुत्तीये पञ्चमोऽध्यायः ॥ ५ ॥

६

व्यास उवाच।

आत्राप्युदाहरन्तीममितिहासं पुरातनम्।
बृहस्पतेश्च संवादं मरुत्तस्य च धीमतः ॥ १
देवराजस्य समयं कृतमाङ्गिरसेन ह।
श्रुत्वा मरुत्तो नृपतिर्यज्ञमाहारयत्परम् ॥ २
संकल्प्य मनसा यज्ञं करन्धमसुतात्मजः।
बृहस्पतिमुपागम्य वाग्मी वचनमब्रवीत् ॥ ३
भगवन्यन्मया पूर्वमभिगम्य तपोधन।
कृतोऽभिसन्धिर्यज्ञस्य भवतो वचनादुरो ॥ ४
तमहं याजयिष्यामि संभाराः संभृताश्च मे।
याज्योऽस्मि भवतः साधो तत्प्राप्नुहि विधत्स्व च

बृहस्पतिरुवाच।

न कामये याजयितुं त्वामहं पृथिवीपते।
वृतोऽस्मि देवराजेन प्रतिज्ञातं च तस्य मे ॥ ६

मरुत्त उवाच।

पितृयमस्मि तव क्षेत्रं बहु मन्ये च ते भृशम्।
तवास्मि याज्यतां प्राप्तो भजमानं भजस्व मां

बृहस्पतिरुवाच।

अमर्त्यं याजयित्वाऽहं
याजयिष्ये कथं नरम्।
मरुत्त गच्छ वा मा वा
निवृत्तोऽस्म्यद्य याजनात् ॥ ८
न त्वां याजयिताऽस्म्यद्य वृणुयं त्वमिहेच्छसि
उपाध्यायं महाबाहो यस्ते यज्ञं करिष्यति ९

व्यास उवाच।

एवमुक्तस्तु नृपतिर्मरुत्तो व्रीडितोऽभवत्।
प्रत्यागच्छन्सुसंविग्नो ददर्श पथि नारदं १०
देवर्षिणा समागम्य नारदेन स पार्थिवः।
विधिवत्प्राञ्जलिस्तस्थावथैनं नारदोऽब्रवीत् ॥
राजर्षे नातिहृष्टोऽसि कच्चित्क्षेमं तवानघ।
क्व गतोऽसि कुतश्चेदमप्रीतिस्थानमागतम् ॥ १२
श्रोतव्यं चेन्मया राजन्ब्रूहि मे पार्थिवर्षभ।
व्यपनेष्यामि ते मन्युं सर्वयत्नैर्नराधिप ॥ १३
एवमुक्तो मरुत्तः स नारदेन महर्षिणा।
विप्रलम्भमुपाध्यायात्सर्वमेव न्यवेदयत् ॥ १४

मरुत्त उवाच।

गतोऽस्म्यंगिरसः पुत्रं देवाचार्यं बृहस्पतिम्
यज्ञार्थमृत्विजं द्रष्टुं स च मां नाभ्यनन्दत १५
प्रत्याख्यातश्च तेनाहं जीवितुं नाद्य कामये।
परित्यक्तश्च गुरुणा दूषितश्चास्मि नारद १६

व्यास उवाच।

एवमुक्तस्तु राज्ञा स नारदः प्रत्युवाच ह।
आविक्षितं महाराज वाचा संजीवयन्निव १७

नारद उवाच।

राजन्नंगिरसः पुत्रः संवर्तो नाम धार्मिकः।
चंक्रमीति दिशः सर्वा दिग्वासा मोहयन्प्रजाः
तं गच्छ यदि याज्यं त्वां न वांछति बृहस्पतिः
प्रसन्नस्त्वां महातेजाः संवर्तो याजयिष्यति

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे पंचमोऽध्याय ॥ ५ ॥

६

संवर्तमरुत्तयो संयोग कथयन्नारदमुखेन वाराणसीमाहात्म्यं सूचयति-व्यास उवाच अत्राप्युदाहरंतीममित्यादिना ॥ १ ॥

मरुत्त उवाच ।

संजीवितोऽहं भवता वाक्येनानेन नारद ।
पश्येयं क्व नु संवर्तं शंस मे वदतां वर ॥ २०
कथं च तस्मै वर्तेयं कथ मां न परित्यजेत् ।
प्रत्याख्यातश्च तेनापि नाहं जीवितुमुत्सहे २१

नारद उवाच ।

उन्मत्तवेषं बिभ्रत्स चंक्रमीति यथासुखम् ।
वाराणस्यां महाराज दर्शनेप्सुर्महेश्वरम् ॥ २२
तस्या द्वारं समासाद्य न्यसेथाः कुणपं क्वचित्
तं दृष्ट्वा यो निवर्तेत संवर्तः स महीपते ॥ २३
तं पृष्ठतोऽनुगच्छेथा यत्र गच्छेत्स वीर्यवान् ।
तमेकान्ते समासाद्य प्राञ्जलिः शरणं व्रजेः २४
पृच्छेत्त्वां यदि केनाहं तवाख्यात इति स्म ह
ब्रूयास्त्वं नारदेनेति संवर्त कथितोऽसि मे ॥
स चेत्त्वामनुयुंजीत ममानुगमनेप्सया ।
शंसेथा वन्हिमारूढं मामपि त्वमशंकया ॥ २६

व्यास उवाच ।

स तथेति प्रतिश्रुत्य पूजयित्वा च नारदम्
अभ्यनुज्ञाय राजर्षिर्ययौ वाराणसीं पुरीम् ॥
तत्र गत्वा यथोक्तं स पुर्या द्वारे महायशाः ।
कुणपं स्थापयामास नारदस्य वचः स्मरन् ॥
योगपद्येन विप्रश्च पुरीद्वारमथाविशत् ।
ततः स कुणपं दृष्ट्वा सहसा संन्यवर्तत ॥ २९
स तं निवृत्तमालक्ष्य प्राञ्जलिः पृष्ठतोन्वगात् ।
आविक्षितो महीपालः संवर्तमुपशिक्षितुम् ॥
स च तं विजने दृष्ट्वा पांसुभिः कर्दमेन च ।
श्लेष्मणा चैव राजानं ष्ठीवनैश्च समाकिरत् ३१
स तथा बाध्यमानो वै संवर्तेन महीपतिः ।
अन्वगादेव तमृषिं प्राञ्जलिः संप्रसादयन् ३२
ततो निवर्त्य संवर्तः परिश्रान्त उपाविशत् ।
शीतलच्छायमासाद्य न्यग्रोध बहुशाखिनम् ३३

इति श्रीमहाभारते आश्वमेधिके पर्वणि अश्वमेधपर्वणि संवर्तमरुत्तीये षष्ठोऽध्यायः ॥ ६ ॥

७

संवर्त उवाच ।

कथमस्मि त्वया ज्ञातः केन वा कथितोऽस्मि ते
एतदाचक्ष्व मे तत्त्वमिच्छसे चेन्मम प्रियम्
सत्यं ते ब्रुवतः सर्वे संपत्स्यन्ते मनोरथाः ।
मिथ्या च ब्रुवतो मूधा शतधा ते स्फुटिष्यति

मरुत्त उवाच ।

नारदेन भवान्मह्यमाख्यातो ह्यटता पथि ।
गुरुपुत्रो ममेति त्वं ततो मे प्रीतिरुत्तमा ॥ ३

संवर्त उवाच ।

सत्यमेतद्ध्रुवानाह स मां जानाति सत्रिणम्
कथयस्व तदेतन्मे क्व नु संप्रति नारदः ॥ ४

मरुत्त उवाच ।

भवन्तं कथयित्वा तु मम देवर्षिसत्तमः ।
ततो मामभ्यनुज्ञाय प्रविष्टो हव्यवाहनम् ॥५

व्यास उवाच ।

श्रुत्वा तु पार्थिवस्यैतत्संवर्तः प्रमुदं गतः ।
एतावदहमप्येवं शक्नुयामिति सोऽब्रवीत् ॥ ६
ततो मरुत्तमुन्मत्तो वाचा निर्भर्त्सयन्निव ।
रूक्षया ब्राह्मणो राजन्पुनः पुनरथाब्रवीत् ॥ ७
बातप्रधानेन मया स्वचित्तवशवर्तिना ।
एवं विकृतरूपेण कथं याजितुमिच्छसि ॥ ८

उन्मत्तवेषमिति । अत्र कुणपदर्शनेन महेश्वरदर्शनासिद्धिं दर्शयता कुणपस्य महेश्वरप्रतिमात्वं सूचितम् । तथा चाविमुक्तं प्रकृत्य अत्र हि जंतो प्राणेषूत्क्रममाणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनासावमृती भूत्वा मोक्षी भवतीति सिद्धं कुणपाभिमानिनो जीवस्य ब्रह्मभावोऽपूर्वो ज्ञापित । एवं चोपरिधारणाविधिवद्विधिरेवायमित्युपपादितमुत्तरयायाते ॥ २२ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे षष्ठोऽध्याय ॥ ६ ॥

७

कथमस्मीति ॥ १ ॥ सत्रिणं कपटवेषच्छन्नम् ॥४॥

भ्राता मम समर्थश्च वासवेन च संगतः ।
वर्तते याजने चैव तेन कर्माणि कारय ॥ ९
गार्हस्थ्यं चैव याज्याश्च सर्वा गृह्याश्च देवताः
पूर्वजेन ममाक्षिप्तं शरीरं वर्जितं त्विदम् ॥ १०
नाहं तेनाननुज्ञातस्त्वामाविक्षित कर्हिचित ।
याजयेयं कथंचिद्वै स हि पूज्यतमो मम ॥ ११
स त्वं बृहस्पतिं गच्छ तमनुज्ञाप्य चाव्रज ।
ततोऽहं याजयिष्ये त्वां यदि यष्टुमिहेच्छसि

मरुत्त उवाच ।

बृहस्पतिं गतः पूर्वमहं संवर्त तच्छृणु ।
न मां कामयते याज्यमसौ वासवकाम्यया ॥
अमरं याज्यमासाद्य याजयिष्ये न मानुषम् ।
शक्रेण प्रतिषिद्धोहं मरुत्तं मा स्म याजयेः १४
स्पर्धते हि मया विप्र सदा हि स तु पार्थिवः
एवमस्त्विति चाप्युक्तो भ्रात्रा ते बलसूदनः ॥
स मामधिगतं प्रेम्णा याज्यत्वेन बुभूषति ।
देवराजं समाश्रित्य तद्विद्धि मुनिपुंगव ॥ १६
सोऽहमिच्छामि भवता सर्वस्वेनापि याजितुं
कामये समतिक्रान्तुं वासवं त्वत्कृतैर्गुणैः १७
न हि मे वर्तते बुद्धि-
र्गन्तुं ब्रह्मन्बृहस्पतिम् ।
प्रत्याख्यातो हि तेनास्मि
तथाऽनपकृते सति ॥ १८

संवर्त उवाच ।

चिकीर्षसि यथाकामं सर्वमेतत्त्वयि ध्रुवम् ।
यदि सर्वानभिप्रायान्कर्ताऽसि मम पार्थिव
याज्यमानं मया हि त्वां बृहस्पतिपुरन्दरौ ।
द्विषेतां समभिक्रुद्धावेतदेकं समर्थयेः ॥ २०
स्थैर्यमत्र कथं मे स्या-
त्तत्त्वं निःसंशय कुरु ।
कुपितस्त्वां न हीदानीं
भस्म कुर्यां सबान्धवम् ॥ २१

मरुत्त उवाच ।

यावत्तपेत्सहस्रांशुस्तिष्ठेरंश्चापि पर्वताः ।
तावल्लोकान्न लभेयं त्यजेयं सङ्गतं यदि ॥ २२
मा चापि शुभबुद्धित्वं लभेयमिह कर्हिचित् ।
विषयैः सङ्गतं चास्तु त्यजेयं सङ्गतं यदि २३

संवर्त उवाच ।

आविक्षित शुभा बुद्धिर्वर्ततां तव कर्मसु ।
याजनं हि ममाप्येव वर्तते हृदि पार्थिव २४
अभिधास्ये च ते राजन्नक्षयं द्रव्यमुत्तमम् ।
येन देवान्सगंधर्वान् शक्रं चाभिभविष्यसि
न तु मे वर्तते बुद्धिर्धने याज्येषु वा पुनः ।
विप्रियं तु करिष्यामि भ्रातुश्चेन्द्रस्य चोभयोः
गमयिष्यामि शक्रेण समतामपि ते ध्रुवम् ।
प्रियं च ते करिष्यामि सत्यमेतद्ब्रवीमि ते २७

इति श्रीमहाभारते आश्वमेधिके पर्वणि अश्वमेधपर्वणि संवर्तमरुत्तीये सप्तमोऽध्यायः ॥ ७ ॥

८

संवर्त उवाच ।

गिरेर्हिमवतः पृष्ठे मुञ्जवान्नाम पर्वतः ।
तप्यते यत्र भगवांस्तपो नित्यमुमापतिः ॥ १
वनस्पतीनां मूलेषु शृङ्गेषु विषमेषु च ।
गुहासु शैलराजस्य यथाकामं यथासुखम् २
उमासहायो भगवान्यत्र नित्यं महेश्वरः ।
आस्ते शूली महातेजा नानाभूतगणावृतः ॥ ३
तत्र रुद्राश्च साध्याश्च विश्वेऽथ वसवस्तथा ।
यमश्च वरुणश्चैव कुबेरश्च सहानुगः ॥ ४

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्तमोऽध्याय ॥ ७ ॥

८

गिरेर्हिमवत इत्यष्टमे तस्मै भगवते कृत्वा नम इत्यादि तत्सुवर्णमवाप्स्यसीत्यन्तम् । सुवर्णकामस्य जप्यं स्तोत्रम् । तस्य संवर्त ऋषि हिरण्यबाहुरुमो देवता अनुष्टुप छंद अत्र शतं नामानि चतुर्थ्यन्तानि ॥ १ ॥

भूतानि च पिशाचाश्च
नासत्यावपि चाश्विनौ ।
गन्धर्वाप्सरसश्चैव
यक्षा देवर्षयस्तथा ॥ ५
आदित्या मरुतश्चैव यातुधानाश्च सर्वशः ।
उपासन्ते महात्मानं बहुरूपमुमापतिम् ॥ ६
रमते भगवांस्तत्र कुबेरानुचरैः सह ।
विकृतैर्विकृताकारैः क्रीडद्भिः पृथिवीपते ७
श्रिया ज्वलन् दृश्यते वै बालादित्यसमद्युतिः
न रूपं शक्यते तस्य संस्थानं वा कदाचन ८
निर्देष्टुं प्राणिभिः कैश्चित्प्राकृतैर्मांसलोचनैः ।
नोष्णं न शिशिरं तत्र न वायुर्न च भास्करः
न जरा क्षुत्पिपासे वा न मृत्युर्न भयं नृप ।
तस्य शैलस्य पार्श्वेषु सर्वेषु जयतां वर १०
धातवो जातरूपस्य रश्मयः सवितुर्यथा ।
रक्ष्यन्ते ते कुबेरस्य सहायैरुद्यतायुधैः ११
चिकीर्षद्भिः प्रियं राजन्कुबेरस्य महात्मनः ।
तस्मै भगवते कृत्वा नमः शर्वाय वेधसे१२
रुद्राय शितिकण्ठाय पुरुषाय सुवर्चसे ।
कपर्दिने कपालाय हर्यक्षेण वरदाय च ॥ १३
त्र्यक्षेण पूष्णो दन्तभिदे वामनाय शिवाय च
याम्यायाव्यक्तरूपाय सद्वृत्ते शङ्कराय च १४
क्षेम्याय हरिकेशाय स्थाणवे पुरुषाय च ।
हरिनेत्राय मुण्डाय क्रुद्धायोत्तरणाय च ॥ १५
भास्कराय सुतीर्थाय देवदेवाय रंहसे ।
उष्णीषिणे सुवक्त्राय सहस्राक्षाय मीढुषे १६
गिरिशाय प्रशान्ताय यतये चीरवाससे ।
बिल्वदण्डाय सिद्धाय सर्वदण्डधराय च १७
मृगव्याधाय महते धन्विनेऽथ भवाय च ।
वराय सोमवक्त्राय सिद्धमन्त्राय चक्षुषे ॥१८
हिरण्यबाहवे राजन्नग्राय पतये दिशाम् ।
लेलिहानाय गोष्ठाय सिद्धमन्त्राय वृष्णये १९
पशूनां पतये चैव भूतानां पतये नमः ।
वृषाय मातृभक्ताय सेनान्ये मध्यमाय च २०
स्रुवहस्ताय पतये धन्विने भार्गवाय च ।
अजाय कृष्णनेत्राय विरूपाक्षाय चैव ह ॥ २१
तीक्ष्णदंष्ट्राय तीक्ष्णाय वैश्वानरमुखाय च ।
+महाद्युतयेऽनङ्गाय सर्वाय पतये विशाम् २२
विलोहिताय दीप्ताय दीप्ताक्षाय महौजसे ।
वसुरेतःसुवपुषे पृथवे कृत्तिवाससे ॥ २३
कपालमालिने चैव सुवर्णमुकुटाय च ।
महादेवाय कृष्णाय त्र्यम्बकायानघाय च २४
क्रोधनायानृशंसाय मृदवे बाहुशालिने ।
दण्डिने तप्ततपसे तथैवाक्रूरकर्मणे ॥ २५
सहस्रशिरसे चैव सहस्रचरणाय च ।
नमः स्वधास्वरूपाय बहुरूपाय दंष्ट्रिणे ॥ २६
पिनाकिनं महादेवं महायोगिनमव्ययम् ।
त्रिशूलहस्तं वरदं त्र्यम्बकं भुवनेश्वरम् ॥ २७
त्रिपुरघ्नं त्रिनयनं त्रिलोकेशं महौजसम् ।
प्रभवं सर्वभूतानां धारणं धरणीधरम् ॥ २८
ईशानं शङ्करं सर्वं शिवं विश्वेश्वरं भवम् ।
उमापतिं पशुपतिं विश्वरूपं महेश्वरम् ॥ २९
विरूपाक्षं दशभुजं दिव्यगोवृषभध्वजम् ।
उग्रं स्थाणुं शिवं रौद्रं शर्वं गौरीशमीश्वरम् ३०
शितिकण्ठमजं शुक्रं पृथुं पृथुहरं वरम् ।
विश्वरूपं विरूपाक्षं बहुरूपमुमापतिम् ॥ ३१
प्रणम्य शिरसा देवमनंगाङ्गहर हरम् ।
शरण्यं शरणं याहि महादेवं चतुर्मुखम् ३२
एवं कृत्वा नमस्तस्मै महादेवाय रहसे ।
महात्मने क्षितिपते तत्सुवर्णमवाप्स्यसि ३३
सुवर्णमाहरिष्यन्तस्तत्र गच्छन्तु ते नराः ।
इत्युक्तः स वचस्तेन चक्रे कारन्धमात्मजः*
ततोऽतिमानुषं सर्वं चक्रे यज्ञस्य सांवधिम् ।
सौवर्णानि च भाण्डानि सञ्चक्रुस्तत्र शिल्पिनः
बृहस्पतिस्तु तां श्रुत्वा मरुत्तस्य महीपतेः ।
समृद्धिमतिदेवेभ्यः सन्तापमकरोद्भृशम् ३६
स तप्यमानो वैवर्ण्यं कृशत्वं चागमत्परम् ।
भविष्यति हि मे शत्रुः संवर्तो वसुमानिति ॥
तं श्रुत्वा भृशसन्तप्तं देवराजो बृहस्पतिम् ।
अधिगम्यामरवृतः प्रोवाचेदं वचस्तदा ॥ ३८

इति श्रीमहाभारते आश्वमेधिके पर्वणि अश्वमेधपर्वणि संवर्तमरुत्तीये
अष्टमोऽध्यायः ॥ ८ ॥

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे अष्टमोऽध्याय ॥ ८ ॥ + ' महात्मने चानङ्गाय ' इति पाठ । * गङ्गाधरं नमस्कृत्य लब्धवान्धनमुत्तमम् । कुबेर इव-तत्प्राप्य महादेवप्रसादत । इत्यधिक श्लोक ।

९

इन्द्र उवाच ।
कच्चित्सुखं स्वपिषि त्वं बृहस्पते
कच्चिन्मनोज्ञाः परिचारकास्ते ।
कच्चिद्देवानां सुखकामोऽसि विप्र
कच्चिद्देवास्त्वां परिपालयन्ति ॥ १

बृहस्पतिरुवाच ।
सुखं शये शयने देवराज
तथा मनोज्ञाः परिचारका म ।
तथा देवानां सुखकामोस्मि नित्यं
देवाश्च मां सुभृशं पालयन्ति ॥ २

इन्द्र उवाच ।
कुतो दुःखं मानसं देहजं वा
पाण्डुर्विवर्णश्च कुतस्त्वमद्य ।
आचक्ष्व मे ब्राह्मण यावदेता-
ञ्जिहन्मि सर्वांस्तव दुःखकर्तॄन् ॥ ३

बृहस्पतिरुवाच ।
मरुत्तमाहुर्मघवन् यक्ष्यमाणं
महायज्ञेनोत्तमदक्षिणेन ।
संवर्तो याजयतीति मे श्रुतं
तदिच्छामि न स तं याजयेत ॥ ४

इन्द्र उवाच ।
सर्वान्कामाननुयातोसि विप्र
यस्त्वं देवाना मन्त्रवित्सुपुरोधाः* ।
उभौ च ते जरामृत्यू व्यतीतौ
किं संवर्तस्तव कर्ताऽद्य विप्र ॥ ५

बृहस्पतिरुवाच ।
देवैः सह त्वमसुरान्प्रणुद्य
जिघांससे चाप्युत सानुबन्धान् ।
यं यं समृद्धं पश्यसि तत्र तत्र
दुःखं सपत्नेषु समृद्धिभावः ॥ ६

अतोऽस्मि देवेन्द्र विवर्णरूपः
सपत्नो मे वर्धते तन्निशम्य ।
सर्वोपायैर्मघवन्संनियच्छ
संवर्तं वा पार्थिवं वा मरुत्तम् ॥ ७

इन्द्र उवाच ।
एहि गच्छ प्रहितो जातवेदो
बृहस्पतिं परिदातुं मरुत्ते ।
अयं वै त्वां याजयिता बृहस्पति-
स्तथाऽमरं चैव करिष्यतीति ॥ ८

अग्निरुवाच ।
अहं गच्छामि मघवन्दूतोद्य+
बृहस्पतिं परिदातुं मरुत्ते ।
वाचं सत्यां पुरुहूतस्य कर्तुं
बृहस्पतेश्चापचितिं चिकीर्षुः ॥ ९

व्यास उवाच ।
ततः प्रायाद्धूमकेतुर्महात्मा
बलानि सर्वाणि× वीरुधश्चाप्यमृद्नन्
कामाद्धिमान्ते परिवर्तमानः
काष्ठातिगो मातरिश्वेव नर्दन् ॥ १०

मरुत्त उवाच ।
आश्चर्यमद्य पश्यामि रूपिणं वह्निमागतम् ।
आसनं सलिलं पाद्यं गां चोपानय वै मुने ११

अग्निरुवाच ।
आसनं सलिलं पाद्यं प्रतिनन्दामि तेऽनघ ।
इन्द्रेण तु समादिष्टं विद्धि मां दूतमागतम् १२

मरुत्त उवाच ।
कच्चिच्छ्रीमान्देवराजः सुखी च
कच्चिच्चास्मान्प्रीयते धूमकेतो ।
कच्चिद्देवा अस्य वशे यथाव-
त्प्रब्रूहि त्व मम कात्स्न्र्येन देव ॥ १३

अग्निरुवाच ।
शक्रो भृशं सुसुखी पार्थिवेन्द्र
प्रीतिं चेच्छत्यजरा वै त्वया सः ।
देवाश्च सर्वे वशगास्तस्य राज-
न्संदेशं त्वं शृणु मे देवराज्ञः ॥ १४

यदर्थं मां प्राहिणोत्त्वत्सकाशं
बृहस्पतिं परिदातुं मरुत्ते ।
अयं गुरुर्याजयतां नृप त्वा
मत्यं सन्तममरं त्वां करोतु ॥ १५

मरुत्त उवाच ।
संवर्तोऽयं याजयिता द्विजो मां
बृहस्पतेरग्रजिरेष तस्य ।
न चैवासौ याजयित्वा महेन्द्रं
मर्त्यं सन्तं याजयन्नद्य शोभेत ॥ १६

९
कच्चिदिति ॥ १ ॥ * मन्त्रयसे पुरोधाः इति पा० + 'अहं गच्छामि तव शक्राय दूतो' इति पा० × 'बृहस्पतिम् वि०' इति पा०

अग्निरुवाच ।
ये वै लोका देवलोके महान्तः
संप्राप्स्यसे तान्देवराजप्रसादात् ।
त्वां चेदसौ याजयेद्वै बृहस्पति-
र्नूनं स्वर्गे त्वं जयेः कीर्तियुक्तः ॥ १७
तथा लोका मानुषा ये च दिव्याः
प्रजापतेश्चापि ये वै महान्तः ।
ते ते जिता देवराज्यं च कृत्स्नं
बृहस्पतिर्याजयेच्चेन्नरेन्द्र ॥ १८

संवर्त उवाच ।
मा स्मैव त्वं पुनरागाः कथञ्चित्
बृहस्पतिं परिदातुं मरुत्ते ।
मा त्वां धक्ष्ये चक्षुषा दारुणेन
संक्रुद्धोऽहं पावक त्वं निबोध ॥ १९

व्यास उवाच ।
ततो देवानगमद्धूमकेतु-
र्दाहाद्भीतो व्यथितोऽश्वत्थपर्णवत् ।
तं वै दृष्ट्वा प्राह शक्रो महात्मा
बृहस्पतेः सन्निधौ हव्यवाहम् ॥ २०
यस्त्वं गतः प्रहितो जातवेदो
बृहस्पतिं परिदातुं मरुत्ते ।
तत्किं प्राह स नृपो यक्ष्यमाणः
कच्चिद्वचः प्रतिगृह्णाति तच्च ॥ २१

अग्निरुवाच ।
न ते वाचं रोचयते मरुत्ता
बृहस्पतेरञ्जलिं प्राहिणोत्सः
संवर्तो मां याजयितेत्युवाच
पुनः पुनः स मया याच्यमानः ॥ २२
उवाचेदं मानुषा ये च दिव्याः
प्रजापतेर्ये च लोका महान्तः ।
तांश्चेल्लभेयं संविदं तेन कृत्वा
तथापि नेच्छेयमिति प्रतीतः ॥ २३

इन्द्र उवाच ।
पुनर्गत्वा पार्थिवं त्वं समत्य
वाक्यं मदीयं प्रापय स्वार्थयुक्तम् ।
पुनर्यद्युक्तो न करिष्यते वच-
स्त्वत्तो वज्रं संप्रहर्तास्मि तस्मै ॥ २४

अग्निरुवाच ।
गन्धर्वराज्यात्वय तत्र दूतो
बिभेम्यहं वासव तत्र गन्तुम् ।
संरब्धो मामब्रवीत्तीक्ष्णरोषः
संवर्तो वाक्यं चरितब्रह्मचर्यः ॥ २५
यद्यागच्छः पुनरेवं कथञ्चि-
द्बृहस्पतिं परिदातुं मरुत्ते ।
दहेयं त्वां चक्षुषा दारुणेन
संक्रुद्ध इत्येतदवैहि शक्र ॥ २६

शक्र उवाच ।
त्वमेवान्यान्दहसे जातवेदो
न हि त्वदन्यो विद्यते भस्मकर्ता ।
त्वत्संस्पर्शात्सर्वलोको बिभेति
अश्रद्धेयं वदसे हव्यवाह ॥ २७

अग्निरुवाच ।
दिवं देवेन्द्र पृथिवीं च सर्वां
संवेष्टयेस्त्वं स्वबलेनैव शक्र ।
एवंविधस्येह सतस्तवाग्नौ
कथं वृत्रस्त्रिदिवं प्राग्जहार ॥ २८

इन्द्र उवाच ।
न गण्डिकाकारयोगं करेऽणुं
न चारिसोमं प्रपिबामि वह्ने ।
न क्षीणशक्तौ प्रहरामि वज्रं
को मेऽसुखाय प्रहरेत मर्त्यः ॥ २९

ब्रह्मविदा माहात्म्य तदनुग्रहेण देवा अपि दासा भवंतीति नवमदशमयोरुक्तम् । तत्र नवमेनाह दौर्बल्याद्वृत्रेण जित इति वक्तुं स्वसामर्थ्यामिंद्रो वन्हिं प्रति वदति न गंडिकाकारयोगं करेणु नगं पर्वतं डीयते विहायसा गच्छतीति डी पक्षी अल्पोडींडिका माक्षिका मशकादिस्तस्या आकारेण योगोस्यास्तीत्येवं रूपम् अणुं सूक्ष्मं करे वुर्वे कृच्छ्रांदसं भौवादिकत्वम् । करेणेति पाठे करोमीत्यध्याहार पाथोधिं करे कर्तुमगस्त्य इवाहं पर्वतमपि मशकीकर्तुं समर्थोऽस्मीत्यर्थ कुतस्तर्हि वृत्रस्त्वा नाराधितवानित्यत आह-**न चारिसोमं प्रपिबामि वह्ने** अरिसोम शत्रुदत्तम् सोमम् त्वयैव स कुतो न निर्जित इत्यत आह-न क्षीणशक्तौ प्रहरामि वज्रमित्यादिना न शंडिका जगमो नो करेणुरिति पाठे तु करेणुर्हस्ती मम ऐरावत. शंडिका युद्ध द्रविडभाषाप्रसिद्धे तां प्रति जंगमो गतिशीलो न भवतीति नो अस्ति ऐरावतवाहनस्य मे शत्रुजय ईषत्कर इत्यर्थ । शंडिकाशब्दस्तालव्यादिरिह ज्ञेयः इंद्रो हंति वृषभ शंडिकानामिति मंत्रवर्णात् दकारान्तरूपतात्पर्य । शेषमतिरोहितार्थम् ॥ २९ ॥

प्रव्राजयेयं कालकेयान्पृथिव्या-
मपाकर्षन्दानवानन्तरिक्षात् ।
दिवः प्रह्लादमवसानमानय
को मेऽसुखाय प्रहरेत मानवः ॥ ३०

अग्निरुवाच ।

यत्र शर्यातिं च्यवनो याजयिष्यन्
सहाश्विभ्यां सोममगृह्णदेकः ।
तं त्वं क्रुद्धः प्रत्यषेधीः पुरस्ता-
च्छर्यातियज्ञं स्मर तं महेन्द्र ॥ ३१

वज्रं गृहीत्वा च पुरन्दर त्वं
संप्राहार्षीश्च्यवनस्यातिघोरम् ।
स ते विप्रः सह वज्रेण बाहु-
मपागृह्णात्तपसा जातमन्युः ॥ ३२

ततो रोषात्सर्वतो घोररूपं
सपत्नं ते जनयामास भूयः ।
मदं नामासुरं विश्वरूपं
यं त्वं दृष्ट्वा चक्षुषी संन्यमीलः ॥ ३३

हनुरेका जगतीस्था तथैका
दिवं गता महतो दानवस्य ।
सहस्रं दन्तानां शतयोजनानां
सुतीक्ष्णानां घोररूपं बभूव ॥ ३४

वृत्ताः स्थूला रजतस्तंभवर्णा
दंष्ट्राश्चतस्रो द्वे शते योजनानाम् ।
स त्वां दन्तान्विदशन्नभ्यधाव-
ज्जिघांसया शूलमुद्यम्य घोरम् ॥ ३५

अपश्यस्त्वं तं तदा घोररूपं
सर्वे वै त्वां ददृशुर्दर्शनीयम् ।
यस्माद्भीतः प्राञ्जलिस्त्वं महर्षे-
मागच्छेथाः शरणं दानवघ्न ॥ ३६

क्षात्राद्बलाद्ब्रह्मबलं गरीयो
न ब्रह्मतः किञ्चिदन्यद्गरीयः ।
सोऽहं जानन् ब्रह्मतेजो यथाव-
न्न संवर्तं जेतुमिच्छामि शक्र ॥ ३७

इति श्रीमहाभारते आश्वमेधिके पर्वणि अश्वमेधपर्वणि संवर्तमरुत्तीये नवमोऽध्यायः ॥ ९ ॥

१०

इन्द्र उवाच ।

एवमेतद्ब्रह्मबलं गरीयो
न ब्राह्मणात्किंचिदन्यद्गरीयः ।
आविक्षितस्य तु बलं न मृष्ये
वज्रमस्मै प्रहरिष्यामि घोरम् ॥ १

धृतराष्ट्र प्राहितो गच्छ मरुत्तं
संवर्तेन संगतं तं वदस्व ।
बृहस्पतिं त्वमुपशिक्षस्व राजन्
वज्रं वा ते प्रहरिष्यामि घोरम् ॥ २

व्यास उवाच ।

ततो गत्वा धृतराष्ट्रो नरेन्द्रं
प्रोवाचेदं वचनं वासवस्य ॥ ३
गन्धर्व मां धृतराष्ट्रं निबोध
त्वामागतं वक्तुकामं नरेन्द्र ।
पैंद्रं वाक्यं शृणु मे राजसिंह
यत्प्राह लोकाधिपतिर्महात्मा ॥ ४
बृहस्पतिं याजकं त्वं वृणीष्व
वज्रं वा ते प्रहरिष्यामि घोरम् ।
वचश्चेदेतन्न करिष्यसे मे
प्राहैतदेतावदचिन्त्यकर्मा ॥ ५

मरुत्त उवाच ।

त्वं चैवैतद्वेत्थ पुरंदरश्च
विश्वेदेवा वसवश्चाश्विनौ च ।
मित्रद्रोहे निष्कृतिर्नास्ति लोके
महत्पापं ब्रह्महत्यासमं तत् ॥ ६

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे नवमोऽध्याय ॥ ९ ॥

१०

एवमिति ॥ १ ॥

बृहस्पतिर्याजयतां महेन्द्रं
देवश्रेष्ठं वज्रभृतां वरिष्ठम् ।
संवर्तो मां याजयिताऽद्य राज-
न्न ते वाक्यं तस्य वा रोचयामि ॥७
गन्धर्व उवाच ।
घोरो नादः श्रूयतां वासवस्य
नभस्तले गर्जतो राजसिंह ।
व्यक्तं वज्रं मोक्ष्यते ते महेन्द्रः
क्षेमं राजंश्चिन्त्यतामेष कालः ॥ ८
व्यास उवाच ।
इत्येवमुक्तो धृतराष्ट्रेण राजन्
श्रुत्वा नादं नदतो वासवस्य ।
तपोनित्यं धर्मविदां वरिष्ठं
संवर्तं तं ज्ञापयामास कार्यम् ॥ ९
मरुत्त उवाच ।
इममात्मानं प्लवमानमारा-
दध्वा दूरं तेन न दृश्यतेऽद्य ।
प्रपद्येऽहं शर्म विप्रेन्द्र त्वत्तः
प्रयच्छ तस्मादभयं विप्रमुख्य ॥ १०
अयमायाति वै वज्री दिशो विद्योतयन्दश ।
अमानुषेण घोरेण सदस्यास्त्रासिता हि नः ॥
संवर्त उवाच ।
भयं शक्राद्येतु ते राजसिंह
प्रणोत्स्येऽहं भयमेतत्सुघोरम् ।
संस्तंभिन्या विद्यया क्षिप्रमेव
मा भैस्त्वमस्याभिभवात्प्रतीतः ॥ १२
अहं संस्तंभयिष्यामि
मा भैस्त्वं शक्रतो नृप ।
सर्वेषामेव देवानां
क्षयितान्यायुधानि मे ॥ १३
दिशो वज्रं व्रजता वायुरेतु
वर्षं भूत्वा वर्षता काननेषु ।
आपः प्लवन्त्वन्तरिक्षे वृथा च
सौदामनी दृश्यते माऽपि भैस्त्वम् १४
वह्निर्दैवस्त्रातु वा सर्वतस्ते
कामान्सर्वान्वर्षतु वासवो वा ।
वज्रं तथा स्थापयतां वधाय
महाघोरं प्लवमानं जलौघैः ॥ १५
मरुत्त उवाच ।
घोरः शब्दः श्रूयते वै महास्वनो
वज्रस्यैष सहितो मारुतेन ।
आत्मा हि मे प्रत्यथते मुहुर्मुहु-
र्न मे स्वास्थ्यं जायते चाद्य विप्र ॥ १६
संवर्त उवाच ।
वज्रादुग्राद्येतु भयं तवाद्य
वातो भूत्वा हन्मि नरेंद्र वज्रम् ।
भयं त्यक्त्वा वरमन्यं वृणीष्व
कं ते कामं मनसा साधयामि ॥ १७
मरुत्त उवाच ।
इंद्रः साक्षात्सहसाऽभ्येतु विप्र
हविर्यज्ञे प्रतिगृह्णातु चैव ।
स्वं स्वं धिष्ण्यं चैव जुषन्तु देवा
हुतं सोमं प्रतिगृह्णन्तु चैव ॥ १८
संवर्त उवाच ।
अयमिंद्रो हरिभिरायाति राजन्
देवैः सर्वैस्त्वरितैः स्तूयमानः ।
मन्त्राहूतो यज्ञमिमं मयाऽद्य
पश्यस्वैनं मन्त्रविस्रस्तकायम् ॥ १९
ततो देवैः सहितो देवराजो
रथे युंक्त्वा तान्हरीन्वाजिमुख्यान् ।
आयाद्यज्ञमथ राज्ञः पिपासु-
राविक्षितस्याप्रमेयस्य सोमम् ॥ २०
तमायान्तं सहितं देवसंघैः
प्रत्युद्ययौ स पुरोधा मरुत्तः ।
चक्रे पूजां देवराजाय चाग्र्यां
यथाशास्त्रं विधिवत्प्रीयमाणः ॥ २१
संवर्त उवाच ।
स्वागतं ते पुरुहूतेह विद्वन्
यज्ञोप्ययं सन्निहिते त्वयीन्द्र ।
शोशुभ्यते बलवृत्रघ्न भूयः
पिबस्व सोमं सुतमुद्यतं मया ।
मरुत्त उवाच ।
शिवेन मा पश्य नमश्च तेऽस्तु
प्राप्तो यज्ञः सफलं जीवितं मे ।
अयं यज्ञं कुरुते मे सुरेन्द्र
बृहस्पतेरवरजो विप्रमुख्यः ॥ २३
इन्द्र उवाच ।
जानामि ते गुरुमेनं तपोधनं
बृहस्पतेरनुजं तिग्मतेजसम् ।
यस्याह्वानादागतोऽहं नरेन्द्र
प्रीतिर्मेऽद्य त्वयि मन्युः प्रनष्टः ॥ २४

संवर्त उवाच ।
यदि प्रीतस्त्वमसि वै देवराज
तस्मात्स्वयं शाधि यज्ञे विधानम् ।
स्वयं सर्वान्कुरु भागान्सुरेन्द्र
जानात्वयं सर्वलोकश्च देव ॥ २५

व्यास उवाच ।
एवमुक्तस्त्वांगिरसेन शक्रः
समादिदेश स्वयमेव देवान् ।
सभाः क्रियन्तामावसथाश्च मुख्याः
सहस्रशश्चित्रभूताः समृद्धाः ॥ २६
कल्पाः स्थूणाः कुरुतारोहणानि
गन्धर्वाणामप्सरसां च शीघ्रम् ।
यत्र नृत्येरन्नप्सरसः समस्ताः
स्वर्गोपमः क्रियतां यज्ञवाटः ॥ २७
इत्युक्तास्ते चक्रुराशु प्रतीता
दिवौकसः शक्रवाक्यान्नरेन्द्र ।
ततो वाक्यं प्राह राजानमिन्द्रः
प्रीतो राजन्पूज्यमानो मरुत्तम् ॥ २८
एष त्वयाऽहमिह राजन्समेत्य
ये चाप्यन्ये तव पूर्वे नरेन्द्र ।
सर्वांश्चान्या देवताः प्रीयमाणा
हविस्तुभ्यं प्रतिगृह्णन्तु राजन् ॥ २९
आग्नेयं वै लोहितमालभन्तां
वैश्वदेवं बहुरूप हि राजन् ।
नीलं चोक्षाणं मेध्यमप्यालभन्तां
चलच्छिश्नं संप्रदिष्टं द्विजाग्र्याः ॥ ३०
ततो यज्ञो ववृधे तस्य राजन्
यत्र देवाः स्वयमन्नानि जह्रुः ।
यस्मिञ्शक्रो ब्राह्मणैः पूज्यमानः
सदस्योऽभूद्धरिमान्देवराजः ॥ ३१
ततः संवर्तश्चैत्यगतो महात्मा
यथा वह्निः प्रज्वलितो द्वितीयः ।
हवींष्युच्चैराह्वयन्देवसंघान्
जुहावाग्नौ मन्त्रवत्सुप्रतीतः ॥ ३२
ततः पीत्वा बलभित्सोममग्र्यं
ये चाप्यन्ये सोमपा देवसंघाः ।
सर्वेऽनुज्ञाताः प्रययुः पार्थिवेन
यथाजोषं तर्पिताः प्रीतिमन्तः ॥ ३३
ततो राजा जातरूपस्य राशीन्
पदे पदे कारयामास हृष्टः ।
द्विजातिभ्यो विसृजन् भूरि वित्तं
रराज वित्तेश इवारिहन्ता ॥ ३४
ततो वित्तं विविधं सन्निधाय
यथोत्साहं कारयित्वा च कोषम्
अनुज्ञातो गुरुणा संनिवृत्य
शशास गामखिलां सागरान्ताम् ३५
एवंगुणः संबभूवेह राजा
यस्य क्रतौ तत्सुवर्णं प्रभूतम् ।
तत्त्वं समादाय नरेन्द्र वित्तं
यजस्व देवांस्तर्पयानो निवापैः ॥३६

वैशम्पायन उवाच ।
ततो राजा पाण्डवो हृष्टरूपः
श्रुत्वा वाक्यं सत्यवत्याः सुतस्य ।
मनश्चक्रे तेन वित्तेन यष्टुं
ततोऽमात्यैर्मंत्रयामास भूयः ॥ ३७

इति श्रीमहाभारते आश्वमेधिके पर्वाणि अश्वमेधपर्वणि संवर्तमरुत्तीये दशमोऽध्यायः ॥ १० ॥

११

वैशम्पायन उवाच ।
इत्युक्ते नृपतौ तस्मिन्व्यासेनाद्भुतकर्मणा ।
वासुदेवो महातेजास्ततो वचनमाददे ॥ १

तं नृपं दीनमनसं निहतज्ञातिबान्धवम् ।
उपप्लुतमिवादित्यं सधूममिव पावकम् ॥ २

इति श्रीमहाभारते आश्वमेधिके पर्वाणि नैलकण्ठीये भारतभावदीपे दशमोऽध्याय ॥ १० ॥

११
इत्युक्ते नृपतौ तस्मिन्नित्यध्यायत्रयं कृष्णयुधिष्ठिरसंवादो ब्रह्मविद्यासूत्रम् ॥ १ ॥ उपप्लुतं राहुग्रस्तम् ॥ २ ॥

१ ' यजस्व देवास्तपनीयैर्विधानैः ' इति पाठ ।

निर्विण्णमनसं पार्थं ज्ञात्वा वृष्णिकुलोद्वहः ।
आश्वासयन्धर्मसुतं प्रवक्तुमुपचक्रमे ॥ ३

वासुदेव उवाच ।

सर्वं जिह्मं मृत्युपदमार्जवं ब्रह्मणः पदम् ।
एतावान् ज्ञानविषयः किं प्रलापः करिष्यति
नैव ते निश्चितं कर्म नैव ते शत्रवो जिताः ।
कथं शत्रुं शरीरस्थमात्मनो नावबुध्यसे ॥ ५
अत्र ते वर्तयिष्यामि यथाधर्मं यथाश्रुतम् ।
इन्द्रस्य सह वृत्रेण यथा युद्धमवर्तत ॥ ६
वृत्रेण पृथिवी व्याप्ता पुरा किल नराधिप ।
दृष्ट्वा स पृथिवीं व्याप्तां गन्धस्य विषये हृते ७
धराहरणदुर्गन्धो विषयः समपद्यत ।
शतक्रतुश्शुकोपाथ गन्धस्य विषये हृते ॥ ८
वृत्रस्य सततः क्रुद्धो घोरं वज्रमवासृजत ।
स वध्यमानो वज्रेण सुभृशं भूरितेजसा ॥ ९
विवेश सहसा तोयं जग्राह विषयं ततः ।
अप्सु वृत्रगृहीतासु रसे च विषये हृते ॥ १०
शतक्रतुरतिक्रुद्धस्तत्र वज्रमवासृजत ।
स वध्यमानो वज्रेण तस्मिन्नमिततेजसा ११
विवेश सहसा ज्योतिर्जग्राह विषयं ततः ।
व्याप्ते ज्योतिषि वृत्रेण रूपेऽथ विषये हृते १२
शतक्रतुरतिक्रुद्धस्तत्र वज्रमवासृजत ।
स वध्यमानो वज्रेण तस्मिन्नमिततेजसा १३
विवेश सहसा वायुं जग्राह विषयं ततः ।
व्याप्ते वायौ तु वृत्रेण स्पर्शेऽथ विषये हृते १४
शतक्रतुरतिक्रुद्धस्तत्र वज्रमवासृजत ।
स वध्यमानो वज्रेण तस्मिन्नमिततेजसा १५
आकाशमभिदुद्राव जग्राह विषयं ततः ।
आकाशे वृत्रभूतेऽथ शब्दे च विषये हृते ॥ १६
शतक्रतुरभिक्रुद्धस्तत्र वज्रमवासृजत ।
स वध्यमानो वज्रेण तस्मिन्नमिततेजसा ॥ १७
विवेश सहसा शक्रं जग्राह विषयं ततः ।
तस्य वृत्रगृहीतस्य मोहः समभवन्महान् ॥
रथन्तरेण तं तात वसिष्ठः प्रत्यबोधयत् ।
ततो वृत्रं शरीरस्थं जघान भरतर्षभ ।
शतक्रतुरदृश्येन वज्रेणेतीह नः श्रुतम् ॥ १९
इदं धर्म्यं रहस्यं वै शक्रेणोक्तं महर्षिषु ।
ऋषिभिश्च मम प्रोक्तं तन्निबोध जनाधिप २०

इति श्रीमहाभारते आश्वमेधिके पर्वणि अश्वमेधपर्वणि कृष्णधर्मसंवादे एकादशोऽध्यायः ॥ ११ ॥



ब्रह्मज्ञानैकनाश्य शोको वृद्धोक्तिसहस्रेण वा क्रतुसहस्रेण वा न नश्यतीत्यभिसंदधानो भगवान्वासुदेव उवाच–**सर्वं जिह्ममिति** जिह्म कामादि मृत्युपद संसारप्रापकं आर्जवं शमादि ब्रह्मण पदं मोक्षस्य प्रापकं ज्ञानविषय हेयोपादेयतया ज्ञातव्योऽर्थ ४ शत्रुं नाशयितारमात्माज्ञानरूपम्॥५॥ तदेवाह–**अत्र ते इति** । इन्द्रस्य चिदात्मन वृत्रेण कामादिधर्मिणा चिदचिद्ग्रथिरूपेणाहंकारेण॥ ६॥पृथिवी स्थूलं शरीरं'यच्छरीरं सा पृथिवी'इति श्रुते व्याप्त आत्मत्वेन गृहीत गन्धस्य विषये प्रदेशे पिण्डे स्तृते सति ॥ ७ ॥ तेन दुर्गन्ध अनात्मभूत विषयो ब्रह्माण्डं जातं एकदेशस्यात्मत्वेन परिग्रहात् 'इदं सर्वं यदयमात्मा' इति श्रुतेश्चिन्मात्र सदप्येतत् एतस्य दृष्ट्याऽनित्यन्वाद्याघ्रातमभूदित्यथ ॥ ८ ॥ वज्रं विवेक वक्ष्यमाणम् ॥ ९ ॥ तोयं कर्मसमवेतं सोमाज्यपय प्रभृतिभिर्बहुलैर्द्रव्यैश्चंद्रलोके भोगायारब्धं शरीरं ' आप पुरुषवचस ' इति श्रुते मानुषादेहाच्युत्थापितो दिव्यं देहमात्मत्वेन गृहीतवानित्यर्थ. । रसे दिव्यलोके स्तृते ममतया गृहीते ॥ १० ॥ एवं स्थूलदेहद्वयाद्व्युत्थापितो ज्योतिस्तैजसप्रपञ्चं विवेश ततस्तत्र किञ्चिद्रूप दृश्यं आत्मत्वेन जग्राह किञ्चिन्ममतयाऽऽस्तृतवान् ॥१२॥ वायुं समष्टिलिङ्ग 'वायुरेव व्यष्टिर्वायु समष्टि ' इति श्रुते । ततस्तत्र प्रवेशरूपया तदुपास्त्या ब्रह्मलोकेऽपि संकल्पमात्रोत्थितेषु विषयेषु पूर्ववदात्मत्वेनात्मायत्तत्वेन च जग्राहेत्यर्थ । स्पर्शे मानसविषयसंगे ॥१४॥ द्विविधादपि सूक्ष्मादव्युत्थापित आकाशं अव्याकृतं सुषुप्त्याख्यं जाड्य तेन शब्दे शब्दादौ विषये स्तृते गिलिते सति ॥ १६ ॥ ततो व्युत्थापित शक्र चिदात्मानमेव वृत्रो जग्राह चिदात्मैश्वर्याभिमानवानभूदित्यर्थ ॥ १८ ॥ रथो मायारूपो विग्रहः तं तरत्यनेन तद्रथंतरं 'अहं ब्रह्मास्मि'इति वाक्यं तेन वसिष्ठगुरुस्तं प्रत्यबोधयत्। द्वैतदर्शननिषेधेन 'द्वितीयाद्वै भयं भवति'इति श्रुते । अत एवादृश्येन दृश्यशून्येन। एव द्विविधादपि कारणोपाधेर्व्युत्थापित परानंदे प्रतिष्ठा प्रापदित्यर्थ ॥१९॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे एकादशोऽध्याय ११ मृत्युपदमार्जिह्मम्'इति पा०

१२

वासुदेव उवाच ।
द्विविधो जायते व्याधिः शारीरो मानसस्तथा
परस्परं तयोर्जन्म निर्द्वन्द्वं नोपपद्यते ॥ १
शरीरे जायते व्याधिः शारीरः स निगद्यते ।
मानसे जायते व्याधिर्मानसस्तु निगद्यते ॥ २
शीतोष्णे चैव वायुश्च गुणा राजन् शरीरजाः
तेषां गुणानां साम्यं चेत्तदाहुः स्वस्थलक्षणम् ३
उष्णेन बाध्यते शीतं शीतेनोष्णं च बाध्यते
सत्त्वं रजस्तमश्चेति त्रय आत्मगुणाः स्मृताः ४
तेषां गुणानां साम्यं चेत्तदाहुः स्वस्थलक्षणम्
तेषामन्यतमोत्सेके विधानमुपदिश्यते ॥ ५
हर्षेण बाध्यते शोको हर्षः शोकेन बाध्यते ।
कश्चिद्दुःखे वर्तमानः सुखस्य स्मर्तुमिच्छति
कश्चित्सुखे वर्तमानो दुःखस्य स्मर्तुमिच्छति ६
स त्वं न दुःखी दुःखस्य न सुखी सुसुखस्य च
स्मर्तुमिच्छसि कौन्तेय किमन्यद्दुःखविभ्रमात्
अथवा ते स्वभावोऽयं येन पार्थावकृष्यसे ।
दृष्ट्वा सभागतां कृष्णामेकवस्त्रां रजस्वलाम् ।
मिषतां पाण्डवेयानां न तस्य स्मर्तुमिच्छसि ८
प्रव्राजनं च नगराद्राजिनैश्च विवासनम् ।
महारण्यनिवासञ्च न तस्य स्मर्तुमिच्छसि ९
जटासुरात्परिक्लेशश्चित्रसेनेन चाहवः ।
सैन्धवाच्च परिक्लेशो न तस्य स्मर्तुमिच्छसि ॥
पुनरज्ञातचर्यायां कीचकेन पदा वधः ।
याज्ञसेन्यास्तथा पार्थ न तस्य स्मर्तुमिच्छसि
यच्च ते द्रोणभीष्माभ्यां युद्धमासीदरिन्दम ।
मनसैकेन योद्धव्यं तत्ते युद्धमुपस्थितम् ॥ १२
तस्माद्भ्युपगन्तव्यं युद्धाय भरतर्षभ ।
परमव्यक्तरूपस्य पारं युक्त्या स्वकर्मभिः १३
यत्र नैव शरैः कार्यं न भृत्यैर्न च बन्धुभिः ।
आत्मनैकेन योद्धव्यं तत्ते युद्धमुपस्थितम् १४
तस्मिन्ननिर्जिते युद्धे कामवस्थां गमिष्यसि ।
एतज्ज्ञात्वा तु कौन्तेय कृतकृत्यो भविष्यसि
एतां बुद्धिं विनिश्चित्य भूतानामागतिं गतिम्
पितृपैतामहे वृत्ते शाधि राज्यं यथोचितम् १६

इति श्रीमहाभारते आश्वमेधिके पर्वणि अश्वमेधपर्वणि कृष्णधर्मसंवादे द्वादशोऽध्यायः ॥ १२ ॥



१२

वज्रशब्दोक्तं विवेकं दर्शयति स्थूलसूक्ष्मदेहयोर्वैधर्म्यप्रदर्शनेन-**द्विविध इत्यादिना** । परस्परमिति सत्त्वादिगुणज सूक्ष्मं लिङ्गं तद्रहितस्य न स्थूल शरीरमस्ति न चैतद्विना तेषा उपलम्भस्थानमस्तीत्यर्थ ॥ १॥ शीतोष्णे कफपित्ते वायुर्वात तेषा साम्ये स्वास्थ्यं वैषम्ये व्याधिर्भवतीत्यर्थ ॥३॥ **उष्णेनेति** शीतोष्णयोरन्यतराधिक्यजं दोषमितरवर्धकैनौषधादिनापनयेदित्यर्थ । सत्त्वमिति आत्मगुणा लिङ्गधर्मा ॥ ४ ॥ साम्यं सुप्तिप्रलययो विधानं उपाय ॥५॥ हर्षशोकयो सत्त्वरज कार्ययो परस्परबाधकत्वमुक्त्वा तमस्तयोर्बाधकं ताभ्या बाध्यते चेत्याह काश्चिदिति। दु खकालेऽप्यतीतं सुखं स्मृत्वाप्यतीव व्यामुह्यति न तु तदेव विवेकेन तितिक्षते एवं सुखकालेप्यतीतं पुत्रमरणादिदु खं स्मृत्वा सिद्धमपि सुखं नाशयतीति भाव ॥ ६ ॥ स इति त्वं तु उक्तविधद्विविधव्याधिहीन न सुखं दु खं वा स्मर्तुमिच्छसि नेच्छेरित्यर्थ । किन्तु दु खविभ्रमात् यत् अन्यत् अकाममशोकं ब्रह्म तदेव स्मर्तुमनुसवातुमिच्छसि इच्छेरित्यर्थ· ॥७॥ **अथवेति**। अयं दुःखित्वादि तत्स्वभावस्यापि तव शोको न युक्तोतीतत्वाद्दु खस्येति भाव ॥ ८ ॥ मनसाहंकारेण ॥ १२ ॥ अभ्युपगन्तव्यं अभिमुखी भवितव्यं अव्यक्तरूपस्य मायामात्रस्य मनस पर पारं ब्रह्म युक्त्या योगेन कर्मभिश्च शोधकै प्राप्नुहीति शेष । मनोनाशेन निशोको भविष्यसीत्यर्थ ॥ १३ ॥ आत्मना मनसा ॥१४॥ तास्मिन्मनसि का दु खबहुलामवस्था एतन्मनसो मायामात्रत्वम् ॥१५॥ आगतिं उत्पत्तिं गतिं प्रलयं मायामात्रत्वेन ज्ञात्वा सुखं वर्तस्वेत्यर्थ ॥ १६ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे द्वादशोऽध्याय. ॥ १२ ॥

१३

वासुदेव उवाच ।

न बाह्यं द्रव्यमुत्सृज्य सिद्धिर्भवति भारत
शारीरं द्रव्यमुत्सृज्य सिद्धिर्भवति वा न वा
बाह्यद्रव्यविमुक्तस्य शारीरेषु च गृद्ध्यतः ।
यो धर्मो यत्सुखं चैव द्विषतामस्तु तत्तथा ॥ २
द्व्यक्षरस्तु भवेन्मृत्युरक्षरं ब्रह्म शाश्वतम् ।
ममेति च भवेन्मृत्युर्न ममेति च शाश्वतम् ३
ब्रह्ममृत्यू ततो राजन्नात्मन्येव व्यवस्थितौ ।
अदृश्यमानौ भूतानि योधयेतामसंशयम् ॥ ४
अविनाशोस्य सत्त्वस्य नियतो यदि भारत ।
भित्त्वा शरीरं भूतानामर्हिंसां प्रतिपद्यते ॥ ५
लब्ध्वा हि पृथिवीं कृत्स्नां
सहस्थावरजङ्गमाम् ।
ममत्वं यस्य नैव स्यात्
किं तया स करिष्यति ॥ ६
अथवा वसतः पार्थ वने वन्येन जीवतः ।
ममता यस्य द्रव्येषु मृत्योरास्ये स वर्तते ७
बाह्यान्तराणां शत्रूणां स्वभावं पश्य भारत ।
यन्न पश्यति तद्भूत मुच्यते स महाभयात ८

कामात्मानं न प्रशंसन्ति लोके
नेहाकामा काचिदस्ति प्रवृत्तिः ।
सर्वे कामा मनसोङ्गप्रभूता
यान्पण्डितः संहरते विचिन्त्य ॥ ९
भूयो भूयो जन्मनोऽभ्यासयोगा-
द्योगी योगं सारमार्गं विचिन्त्य ।
दानं च वेदाध्ययनं तपश्च
काम्यानि कर्माणि च वैदिकानि १०
व्रतं यज्ञान्नियमान् ध्यानयोगान्
कामेन यो नारभते विदित्वा ।
यद्यच्चायं कामयते स धर्मो
न यो धर्मो नियमस्तस्य मूलम् ११
अत्र गाथाः कामगीताः
कीर्तयन्ति पुराविदः ।
शृणु सङ्कीर्त्यमानास्ता
अखिलेन युधिष्ठिर ।
नाहं शक्योऽनुपायेन
हन्तुं भूतेन केनचित् ॥ १२

१३

ननु कामत्यागेनैव मनो जेतव्यमतो यत्पूर्वं मया यदि मामनुजानीयाद्भवान्गंतु तपोवनमिति राज्यत्याग प्रार्थित स एव तर्हि युक्तस्तत्र कथं शाधि राज्यं यथोचितमिति वदसीत्याशंक्याह-**न बाह्यमिति** । न बाह्यस्य राज्यादेरर्थस्य त्यागात्त्यागी भवति किन्तु शारीरं लिङ्गशरीरोत्थं कामादिकं त्यक्त्वैव सिद्धिर्मोक्ष न वेति शुष्कवैराग्यवतो विवेकशून्यस्य सिद्धयभावं सूचयति ॥ १ ॥ बाह्येति गृद्धयत सक्तस्य यो धर्म स अधर्म एव यत्सुखं तद् खमेव मौढ्यस्यानपायात् अतस्तद्द्विषतामेवास्तु तुच्छमित्यर्थ ॥ २ ॥ द्व्यक्षर इति। ममत्वं संसारहेतु तदभावो ब्रह्मप्राप्तिहेतुरित्यर्थ ॥३॥ ब्रह्ममृत्यू नि संगत्वससंगत्वे आत्मनि चित्ते एकस्मिन्वस्तुनि बहुना ममत्वं चेते युद्धयंत एव॥४॥ एव निर्ममोऽप्यसमाप्ताधिकारश्चित्तस्वाभाव्यादस्मदादिवद्युद्धयन्नपि नेतरवल्लिप्यत इत्याह-**अविनाश इति** । अस्य जगत सत्त्वस्य सत्ताया अविनाशोऽधिष्ठानसत्तानतिरिक्तत्वान्नाशाभाव नियतो निश्चितो यदि जगतो बाध्यत्वं जानन्स्वप्रकृतपापेनेव सर्वभूतशरीरोच्छेदं कुर्वन्नपि अहिंसामहिंसकत्वमेव प्रतिपद्यते हत्वापि स इमान्लोकान्न हंति न निबद्धयत इत्यर्थ ॥ ५॥ लब्ध्वा हीति । स्वप्नोपलब्धधनोज्झिव बुद्धस्य ममत्वाभाव स्वत सिद्ध इत्यर्थ ॥६॥ बाह्यातराणामिति । स्वभावं आत्ममायामात्रत्वलक्षणं तत्त्वं पश्य ध्यानेन साक्षात्कुरु ते ध्यानयोगानुगता अपश्यन्देवात्मशक्तिं स्वगुणैर्निगूढामिति श्रुते. एव दृष्ट्वा च यत् यत तत्तमपि स्वभावं भूतमनादिं न पश्यति मायामपि बाधित्वा चिन्मात्रेण रूपेण योऽऽवतिष्ठते स महाभयात्संसारान्मुच्यत इत्यर्थ ॥८॥ नन्वैश्वर्यमेव वरम् किं सुषुप्तिसमेन मोक्षेणेत्यत आह-**काममात्मानमिति** । अथ यत्रान्यत्पश्यति तदल्पमिति श्रुतेरैश्वर्यमपि तुच्छमेवातो न प्रशंसति संत मनस कामोदयस्तत प्रवृत्तिस्ततो दु खमतो मन एव निरोद्धव्यमित्यर्थ ॥ ९ ॥ एतच्चानेकजन्मसाध्यमित्याह-**भूयो भूय इति** । विच्छिद्य विच्छिद्योत्तरोत्तरभूमिलाभरूपं जन्म यस्य स भूयोभूयोजन्मा तस्मादेवाभ्यासयोगात् शुद्धचित्त सन् सारमार्ग मोक्षमार्ग विचिंन्य कामान्संहरत इति पूर्वेणान्वय कोऽसौ इत्याह-**दानं चेति** ॥ १० ॥ यो दानादिध्यानयोगातान् कामेन कामपूर्वकं नारभते यद्यच्चायं कामयते स धर्मो नेति विदित्वेति संबन्ध फलितमाह-यो धर्मो नियमस्तस्य मूलमिति तस्य कामस्य यो नियमो निग्रह स धर्म स च मूलं मोक्षबीजम् ॥ ११ ॥ कामस्य दुरुच्छेद्यत्वं कामोक्तिभिरेवाह-**अत्र गाथा इत्यादिना** । अनुपायेन निर्ममत्वं योगाभ्यासश्च कामजयोपाय उक्तस्तद्व्यतिरेकेणेत्यर्थ ॥ १२ ॥

यो मां प्रयतते हन्तुं ज्ञात्वा प्रहरणे बलम् ।
तस्य तस्मिन्प्रहरणे पुनः प्रादुर्भवाम्यहम् १३
यो मां प्रयतते हन्तुं यज्ञैर्विविधदक्षिणैः ।
जङ्गमेष्विव धर्मात्मा पुनः प्रादुर्भवाम्यहम् ॥
यो मां प्रयतते नित्यं वेदैर्वेदान्तसाधनैः ।
स्थावरेष्विव भूतात्मा तस्य प्रादुर्भवाम्यहम्
यो मां प्रयतते हन्तुं धृत्या सत्यपराक्रमः ।
भावो भवामि तस्याहं स च मां नावबुध्यते १६
यो मां प्रयतते हन्तुं तपसा संशितव्रतः ।
ततस्तपसि तस्याथ पुनः प्रादुर्भवाम्यहम् १७
यो मां प्रयतते हन्तुं मोक्षमास्थाय पण्डितः ।
तस्य मोक्षरतिस्थस्य नृत्यामि च हसामि च
अवध्यः सर्वभूतानामहमेकः सनातनः ॥ १८
तस्मात्त्वमपि तं कामं यज्ञैर्विविधदक्षिणैः ।
धर्मे कुरु महाराज तत्र ते स भविष्यति १९
यजस्व वाजिमेधेन विधिवद्दक्षिणावता ।
अन्यैश्च विविधैर्यज्ञैः समृद्धैराप्तदक्षिणैः ॥ २०
मा ते व्यथाऽस्तु निहतान्बन्धून्वीक्ष्य पुनः पुनः
न शक्यास्ते पुनर्द्रष्टुं ये हताऽस्मिन् रणाजिरे
स त्वमिष्ट्वा महायज्ञैः
समृद्धैराप्तदक्षिणैः ।
कीर्तिं लोके परां प्राप्य
गतिमग्र्यां गमिष्यसि ॥ २२

इति श्रीमहाभारते आश्वमेधिके पर्वणि अश्वमेधपर्वणि कृष्णधर्मसंवादे त्रयोदशोऽध्यायः ॥ १३ ॥



१४

वैशम्पायन उवाच ।
एवं बहुविधैर्वाक्यैर्मुनिभिस्तैस्तपोधनैः ।
समाश्वस्यत राजर्षिर्हतबन्धुर्युधिष्ठिरः ॥ १
सोऽनुनीतो भगवता विष्टरश्रवसा स्वयम् ।
द्वैपायनेन कृष्णेन देवस्थानेन वा विभुः ॥ २
नारदेनाथ भीमेन नकुलेन च पार्थिव ।
कृष्णया सहदेवेन विजयेन च धीमता ॥ ३
अन्यैश्च पुरुषव्याघ्रैर्ब्राह्मणैः शास्त्रदृष्टिभिः ।
व्यजहाच्छोकजं दुःखं सन्तापं चैव मानसम्
अर्चयामास देवांश्च ब्राह्मणांश्च युधिष्ठिरः ।
कृत्वाऽथ प्रेतकार्याणि बन्धूनां स पुनर्नृपः ।
अन्वशासच्च धर्मात्मा पृथिवीं सागराम्बराम्
प्रशान्तचेताः कौरव्यः स्वराज्यं प्राप्य केवलम्
व्यासं च नारदं चैव तांश्चान्यानब्रवीन्नृपः ॥ ६

यो मामिति प्रहरणे वागादीन्द्रियसाध्ये जपादिशास्त्रे प्रादुर्भवामि अहमेव सर्वोत्कृष्टो जपादिकर्तेत्यभिमानरूपेणाविर्भवामि तेन जपादिकं विफलं करोमीत्यर्थ । द्वितीये यो मामिति श्लोके प्रहरणे मनसि श्मशानवैराग्यन्यायेन जितो मया काम इति निश्चित्य प्रयतते सन्यासादिकं करोति तस्य मनस्येव पुनरहं प्रादुर्भवामि यदाहुरभियुक्ता,-प्रमादिनो बहिश्चित्ता पिशुना. कलहोत्सुका । संन्यासिनोऽपि दृश्यते दैवसंदूषिताशया इति ॥ १३ ॥ यो यज्ञै कामं जिघासति तस्य चेतसि यथा धर्मात्मा जगमेषु उत्तमयोनौ उदाररूपेणाविर्भवति तद्वत्तस्य चेतसि अहं दंभादिरूपेणाविर्भवामि ॥१४॥ स्थावरेषु अनभिव्यक्तरूपेण भूतात्मा जीव धर्मात्मेत्यत्रापि पठंति केचित् यायजूकापेक्षया वेदवेदांतसाधनेष्वल्पा कामाभिव्यक्तिरित्यर्थ ॥ १५ ॥ धृत्या संग्रामे विपदि च धैर्यत भावश्चित्तं धैर्यबलेनैव लोकद्वयं जेष्यामीत्यभिमानवन्त तं करोमीत्यर्थ । स च इममेवाभिमानं कामत्वेन बंधकत्वेन नावबुध्यते ॥ १६ ॥ तपसा योगबलेन तत्रापि योगोपसर्गरूपेण मधुमत्याद्यैश्वर्यभूमिषु स्पृहारूपेणाविर्भवामि॥१७॥ मोक्षमास्थाय नित्यमुक्तमात्मानमज्ञात्वा मोक्षार्थं यस्तपआदि करोति तमज्ञं प्राप्य नृत्यामि च हसामि चेत्यर्थ ॥१८॥ **तस्मादिति**। यस्मान्निर्ममत्वपूर्वकयोगाभ्यासमंतरेण अन्य कामजयोपायो नास्ति निर्ममत्व च यज्ञादिजन्या चित्तशुद्धिं विना न संभवति तस्मात् निष्कामान् यज्ञादीननुतिष्ठतस्ते तव श्रेय सिद्धिरिति शेष ॥ १९ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे त्रयोदशोऽध्याय ॥ १३ ॥

१४

आख्यायिकामनुसरत्यध्यायद्वयेन-**एवं बहुविधैर्वाक्यैरित्यादिना**॥१ कृत्वाऽथेति पुनरिति मासिकादीनि प्रेतकार्याणि पूर्वकृतानामेवानुवादो वा ॥ ५ ॥

आश्वासितोऽहं प्राग्वृद्धैर्भवद्भिर्मुनिपुङ्गवैः ।
न सूक्ष्ममपि मे किञ्चिद्व्यलीकमिह विद्यते ॥ ७
अर्थश्च सुमहान्प्राप्तो येन यक्ष्यामि देवताः ।
पुरस्कृत्याद्य भवतः समानेष्यामहे मखम् ॥ ८
हिमवन्तं त्वया गुप्ता गमिष्यामः पितामह ।
ब्रह्मर्श्यो हि देशः स श्रूयते द्विजसत्तम ॥ ९
तथा भगवता चित्रं कल्याणं बहुभाषितम् ।
देवर्षिणा नारदेन देवस्थानेन चैव ह ॥ १०
नाभागधेयः पुरुषः कश्चिदेवंविधान् गुरून् ।
लभते व्यसनं प्राप्य सुहृदः साधुसंमतान् ॥
एवमुक्तास्तु ते राज्ञा सर्व एव महर्षयः ।
अभ्यनुज्ञाप्य राजानं तथोभौ कृष्णफाल्गुनौ
पश्यतामेव सर्वेषां तत्रैवादर्शनं ययुः ।
ततो धर्मसुतो राजा तत्रैवोपाविशत्प्रभुः १३
एवं नातिमहान्कालः स तेषां संन्यवर्तत ।
कुर्वतां शौचकार्याणि भीष्मस्य निधने तदा
महादानानि विप्रेभ्यो ददतामौर्ध्वदेहिकम् ।
भीष्मकर्णपुरोगाणां कुरूणां कुरुसत्तम ॥ १५
सहितो धृतराष्ट्रेण स ददावौर्ध्वदेहिकम् ।
ततो दत्त्वा बहुधनं विप्रेभ्यः पाण्डवर्षभः १६
धृतराष्ट्रं पुरस्कृत्य विवेश गजसाह्वयम् ।
स समाश्वास्य पितरं प्रज्ञाचक्षुषमीश्वरम् ।
अन्वशाद्वै स धर्मात्मा पृथिवीं भ्रातृभिः सह१७

इति श्रीमहाभारते आश्वमेधिके पर्वणि अश्वमेधपर्वणि
चतुर्दशोऽध्यायः ॥ १४ ॥



१५

जनमेजय उवाच ।
विजिते पाण्डवेयैस्तु प्रशान्ते च द्विजोत्तम।
राष्ट्रे किं चक्रतुर्वीरौ वासुदेवधनञ्जयौ ॥ १
वैशम्पायन उवाच ।
विजिते पाण्डवै राजन्प्रशान्ते च विशाम्पते
राष्ट्रे बभूवतुर्हृष्टौ वासुदेवधनञ्जयौ ॥ २
विजह्रातें मुदा युक्तौ दिवि देवेश्वराविव ।
तौ वनेषु विचित्रेषु पर्वतेषु ससानुषु ॥ ३
तीर्थेषु चैव पुण्येषु पल्वलेषु नदीषु च ।
चंक्रम्यमाणौ संहृष्टावश्विनाविव नन्दने ॥ ४
इन्द्रप्रस्थे महात्मानौ रेमतुः कृष्णपाण्डवौ ।
प्रविश्य तां सभां रम्यां विजह्रातें च भारत
तत्र युद्धकथाश्चित्राः परिक्लेशांश्च पार्थिव ।
कथायोगे कथायोगे कथयामासतुः सदा ॥ ६
ऋषीणां देवतानां च वंशांस्तावाहतुः सदा ।
प्रीयमाणौ महात्मानौ पुराणावृषिसत्तमौ ॥ ७
मधुरास्तु कथाश्चित्राश्चित्रार्थपदनिश्चयाः ।
निश्चयज्ञः स पार्थाय कथयामास केशवः ॥ ८
पुत्रशोकाभिसन्तप्तं ज्ञातीनां च सहस्रशः ।
कथाभिः शमयामास पार्थं शौरिर्जनार्दनः ॥ ९
स तमाश्वास्य विधिवद्विज्ञानज्ञो महातपाः ।
अपहृत्यात्मनो भार विशश्रामेव सात्वतः ॥
ततः कथान्ते गोविन्दो गुडाकेशमुवाच ह ।
सान्त्वयन् श्लक्ष्णया वाचा हेतुयुक्तमिदं वचः
वासुदेव उवाच ।
विजितेयं धरा कृत्स्ना सव्यसाचिन्परन्तप
त्वद्बाहुबलमाश्रित्य राज्ञा धर्मसुतेन ह ॥ १२
असपत्नां मही भुंक्ते धर्मराजो युधिष्ठिरः ।
भीमसेनानुभावेन यमयोश्च नरोत्तम ॥ १३
धर्मेण राज्ञा धर्मज्ञ प्राप्त राज्यमकण्टकम् ।
धर्मेण निहतः संख्ये स च राजा सुयोधनः१५
अधर्मरुचयो लुब्धाः सदा चाप्रियवादिनः ।
धार्तराष्ट्रा दुरात्मानः सानुबन्धा निपातिताः
प्रशान्तामखिलां पार्थ पृथिवीं पृथिवीपतिः ।
भुंक्ते धर्मसुतो राजा त्वया गुप्तः कुरूद्वह ॥ १६

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे चतुर्दशोऽध्याय ॥ १४ ॥

१५
विजिते इति ॥ १ ॥

रमे चाहं त्वया सार्धमरण्येष्वपि पाण्डव ।
किमु यत्र जनोऽयं वै पृथा चामित्रकर्षण ॥१७
यत्र धर्मसुतो राजा यत्र भीमो महाबलः ।
यत्र माद्रवतीपुत्रौ रतिस्तत्र परा मम ॥ १८
तथैव स्वर्गकल्पेषु देशेषु कौरव ।
रमणीयेषु पुण्येषु सहितस्य त्वयाऽनघ ॥ १९
कालो महांस्त्वतीतो मे शूरसूनुमपश्यतः ।
बलदेवं च कौरव्य तथाऽन्यान् वृष्णिपुङ्गवान्
सोहं गन्तुमभीप्सामि पुरीं द्वारावतीं प्रति ।
रोचतां गमनं मह्यं तवापि पुरुषर्षभ ॥ २१
उक्तो बहुविधं राजा तत्र तत्र युधिष्ठिरः ।
सह भीष्मेण यद्युक्तमस्माभिः शोककारिते ॥
शिष्टो युधिष्ठिरोऽस्माभिः
शास्ता सन्नपि पाण्डवः ।
तेन तत्तु वचः सम्य-
ग्गृहीतं सुमहात्मना ॥ २३
धर्मपुत्रे हि धर्मज्ञे कृतज्ञे सत्यवादिनि ।
सत्यं धर्मो मतिश्चाग्र्या स्थितिश्च सततं स्थिरा
तत्र गत्वा महात्मानं यदि ते रोचतेऽर्जुन ।
अस्मद्वचनसंयुक्तं वचो ब्रूहि जनाधिपम् ॥ २५
न हि तस्याप्रियं कुर्यो प्राणत्यागेष्युपस्थिते ।
कुतो गन्तुं महाबाहो पुरीं द्वारावतीं प्रति २६
सर्वं त्विदमहं पार्थ त्वत्प्रीतिहितकाम्यया ।
ब्रवीमि सत्यं कौरव्य न मिथ्यैतत्कथञ्चन २७
प्रयोजनं च निर्वृत्तमिह वासे ममार्जुन ।
धार्तराष्ट्रो हतो राजा सबलः सपदानुगः २८
पृथिवी च वशे तात धर्मपुत्रस्य धीमतः ।
स्थिता समुद्रवलया सशैलवनकानना ॥ २९
चिता रत्नैर्बहुविधैः कुरुराजस्य पाण्डव ।
धर्मेण राजा धर्मज्ञः पातु सर्वां वसुन्धराम् ॥
उपास्यमानो बहुभिः सिद्धैश्चापि महात्मभिः ।
स्तूयमानश्च सततं बन्दिभिर्भरतर्षभ ॥ ३१
तं मया सह गत्वाऽद्य राजानं कुरु वर्धनम् ।
आपृच्छ कुरुशार्दूल गमनं द्वारकां प्रति ॥ ३२
इदं शरीरं वसु यच्च मे गृहे
निवेदितं पार्थ सदा युधिष्ठिरे ।
प्रियश्च मान्यश्च हि मे युधिष्ठिरः
सदा कुरूणामधिपो महामतिः ॥ ३३
प्रयोजनं चापि निवासकारणे
न विद्यते मे त्वदृते नृपात्मज ।
स्थिता हि पृथ्वी तव पार्थ शासने
गुरोः सुवृत्तस्य युधिष्ठिरस्य च ३४
इतीदमुक्तः स तदा महात्मना
जनार्दनेनामितविक्रमोऽर्जुनः ।
तथेति दुःखादिव वाक्यमैरय-
ज्जनार्दनं सम्प्रतिपूज्य पार्थिव ॥ ३५

इति श्रीमहाभारते आश्वमेधिके पर्वणि अश्वमेधपर्वणि
पञ्चदशोऽध्यायः ॥ १५ ॥

समाप्तं च अश्वमेधपर्व ।



॥ अथानुगीतापर्व ॥

१६

जनमेजय उवाच ।

सभायां वसतोस्तत्र निहत्यारीन्महात्मनोः ।
केशवार्जुनयोः का नु कथा समभवद्द्विज ॥ १

वैशम्पायन उवाच ।

कृष्णेन सहितः पार्थः स्वं राज्यं प्राप्य केवलं
तस्यां सभायां दिव्यायां विजहार मुदा युतः

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारत-भावदीपे पंचदशोऽध्याय ॥ १५ ॥

१६

सभायामिति ॥ १ ॥

तत्र कश्चित्सभोद्देशं स्वर्गोद्देशसमं नृप ।
यदृच्छया तौ मुदितौ जग्मतुः स्वजनावृतौ ३
ततः प्रतीतः कृष्णेन सहितः पाण्डवोऽर्जुनः ।
निरीक्ष्य तां सभां रम्यामिदं वचनमब्रवीत् ४
विदितं मे महाबाहो संग्रामे समुपस्थिते ।
माहात्म्यं देवकीमातस्तच्च ते रूपमैश्वरम् ॥ ५
यत्तद्भगवता प्रोक्तं पुरा केशव सौहृदात् ।
तत्सर्वं पुरुषव्याघ्र नष्टं मे भ्रष्टचेतसः ॥ ६
मम कौतूहलं त्वस्ति तेष्वर्थेषु पुनः पुनः ।
भवांस्तु द्वारकां गन्ता नचिरादिव माधव ७

वैशम्पायन उवाच ।

एवमुक्तस्तु तं कृष्णः फाल्गुनं प्रत्यभाषत ।
परिष्वज्य महातेजा वचनं वदतां वरः ॥ ८

वासुदेव उवाच ।

श्रावितस्त्वं मया गुह्यं श्रापितश्च सनातनम्
धर्मं स्वरूपिणं पार्थ सर्वलोकांश्च शाश्वतान् ९
अबुद्ध्या नाग्रहीर्यस्त्वं तन्मे सुमहदप्रियम् ।
न च साऽद्य पुनर्भूयः स्मृतिर्मे संभविष्यति ॥
नूनमश्रद्दधानोऽसि दुर्मेधा ह्यसि पाण्डव ।
न च शक्यं पुनर्वक्तुमशेषेण धनञ्जय ॥ ११
स हि धर्मः सुपर्याप्तो ब्रह्मणः पदवेदने ।
न शक्यं तन्मया भूयस्तथा वक्तुमशेषतः १२
परं हि ब्रह्म कथित योगयुक्तेन तन्मया ।
इतिहासं तु वक्ष्यामि तस्मिन्नर्थे पुरातनम् ॥
यथा तां बुद्धिमास्थाय गतिमग्र्यां गमिष्यसि
शृणु धर्मभृतां श्रेष्ठ गदितं सर्वमेव मे ॥ १४
आगच्छद्ब्राह्मणः कश्चित्स्वर्गलोकादरिन्दम ।
ब्रह्मलोकाच्च दुर्धर्षः सोस्माभिः पूजितोऽभवत्
अस्माभिः परिपृष्टश्च यदाह भरतर्षभ ।
दिव्येन विधिना पार्थ तच्छृणुष्वाविचारयन्

ब्राह्मण उवाच ।

मोक्षधर्मे समाश्रित्य कृष्ण यन्मामपृच्छथाः
भूतानामनुकम्पार्थं यन्मोहच्छेदनं विभो १७
तत्तेऽहं संप्रवक्ष्यामि यथावन्मधुसूदन ।
शृणुष्वावहितो भूत्वा गदतो मम माधव १८
कश्चिद्द्विप्रस्तपोयुक्तः काश्यपो धर्मवित्तमः ।
आससाद द्विजं कञ्चिद्धर्माणामागतागमम् ॥
गतागते सुबहुशो ज्ञानविज्ञानपारगम् ।
लोकतत्त्वार्थकुशलं ज्ञातार्थं सुखदुःखयोः २०
जातीमरणतत्त्वज्ञं कोविदं पापपुण्ययोः ।
द्रष्टारमुच्चनीचानां कर्मभिर्देहिना गतिम् २१
चरन्तं मुक्तवत्सिद्धं प्रशान्तं संयतेन्द्रियम् ।
दीप्यमानं श्रिया ब्राह्म्या क्रममाणं च सर्वशः
अन्तर्धानगतिज्ञं च श्रुत्वा तत्त्वेन काश्यपः ।
तथैवान्तर्हितैः सिद्धैर्यान्तं चक्रधरैः सह २३
संभाषमाणमेकान्ते समासीनं च तैः सह ।
यदृच्छया च गच्छन्तमसक्तं पवनं यथा २४
तं समासाद्य मेधावी स तदा द्विजसत्तमः ।
चरणौ धर्मकामोऽस्य तपस्वी सुसमाहितः ।
प्रतिपेदे यथान्यायं दृष्ट्वा तन्महदद्भुतम् ॥ २५
विस्मितश्चाद्भुतं दृष्ट्वा काश्यपस्तद्विजोत्तमम्
परिचारेण महता गुरुं तं पर्यतोषयत् ॥ २६
उपपन्नं च तत्सर्वं श्रुतचारित्रसंयुतम् ।
भावेनातोषयच्चैनं गुरुवृत्त्या परंतपः ॥ २७
तस्मै तुष्टः स शिष्याय प्रसन्नो वाक्यमब्रवीत्
सिद्धिं परामभिप्रेक्ष्य शृणु मत्तो जनार्दन २८

सिद्ध उवाच ।

विविधैः कर्मभिस्तात पुण्ययोगैश्च केवलैः ।
गच्छन्तीह गतिं मर्त्या देवलोके च संस्थितिम्
न क्वचित्सुखमत्यन्तं न क्वचिच्छाश्वती स्थितिः
स्थानाच्च महतो भ्रंशो दुःखलब्धात्पुनः पुनः
अशुभा गतयः प्राप्ताः कष्टा मे पापसेवनात् ।
काममन्युपरीतेन तृष्णया मोहितेन च ३१

पुनः पुनश्च मरणं
जन्म चैव पुनः पुनः ।
आहारा विविधा भुक्ताः
पीता नानाविधाः स्तनाः ॥ ३२

मातरो विविधा दृष्टाः पितरश्च पृथग्विधाः ।
सुखानि च विचित्राणि दुःखानि च मयाऽनघ
प्रियैर्विवासो बहुशः संवासश्चाप्रियैः सह ।
धननाशश्च संप्राप्तो लब्ध्वा दुःखेन तद्धनम् ॥

षोडशे सभायामित्यादिना प्रस्तूयानुगीतामारभते–**मोक्षधर्ममित्यादिना** भूतानामिव न स्वस्य विभो परमात्मन् ॥ १७ ॥ आगतागमं प्राप्तशास्त्ररहस्यं ऊहापोहकुशलमित्यर्थं ॥ १९ ॥ गतागते मरणससरणे विषये ज्ञानं शास्त्रानुमानजं विज्ञानं योगजप्रत्यक्षं अस्यैव व्याख्यान लोकतत्त्वेति सार्धेन ॥२०॥ जाती जन्म ॥ २१ ॥ मुक्तवत् नित्यमुक्तस्यापि मृषा बंधाभिप्रायं वत्करणम्॥२२॥ अन्यत्र धर्मादन्यत्राधर्मादित्यात्मनो धर्माद्यतीतत्वाद्धर्माधर्मावेव फलतो निन्दति–**वैराग्याय विविधैरित्यादिना** ॥२९॥

अवमानाः सुकष्टाश्च राजतः स्वजनात्तथा ।
शारीरा मानसा वाऽपि वेदना भृशदारुणाः
प्राप्ता विमाननाश्चोग्रा वधबन्धाश्च दारुणाः ।
पतनं निरये चैव यातनाश्च यमक्षये ॥ ३६
जरा रोगाश्च सततं व्यसनानि च भूरिशः ।
लोकेऽस्मिन्ननुभूतानि द्वन्द्वजानि भृशं मया ॥
ततः कदाचिन्निर्वेदान्निराकाराश्रितेन च ।
लोकतन्त्रं परित्यक्तं दुःखार्तेन भृशं मया ३८
लोकेऽस्मिन्ननुभूयाहमिमं मार्गमनुष्ठितः ।
ततः सिद्धिरियं प्राप्ता प्रसादादात्मनो मया ॥
नाहं पुनरिहागन्ता लोकानालोकयाम्यहम् ।
आसिद्धेराप्रजासर्गादात्मनोऽपि गतीः शुभाः
उपलब्धा द्विजश्रेष्ठ तथेयं सिद्धिरुत्तमा ।
इतः परं गमिष्यामि ततः परतरं पुनः ॥ ४१
ब्रह्मणः पदमव्यक्तं मा तेऽभूदत्र संशयः ।
नाहं पुनरिहागन्ता मर्त्यलोकं परंतप ॥ ४२
प्रीतोऽस्मि ते महाप्राज्ञ ब्रूहि किं करवाणि ते
यदीप्सुरुपपन्नस्त्वं तस्य कालोऽयमागतः ४३
अभिजाने च तदहं यदर्थं मामुपागतः ।
अचिरात्तु गमिष्यामि तेनाहं त्वामचूचुदम्
भृशं प्रीतोऽस्मि भवतश्चारित्रेण विचक्षण ।
परिपृच्छस्व कुशलं भाषेयं यत्तवेप्सितम् ४५
बहुमन्ये च ते बुद्धिं भृशं संपूजयामि च ।
येनाहं भवता बुद्धो मेधावी ह्यसि काश्यप४६

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि षोडशोऽध्यायः ॥ १६ ॥

१७

वासुदेव उवाच ।
ततस्तस्योपसंगृह्य पादौ प्रश्नान्सुदुर्वचान् ।
पप्रच्छ तांश्च धर्मान्स प्राह धर्मभृतां वरः ॥१
काश्यप उवाच ।
कथं शरीरं च्यवते कथं चैवोपपद्यते ।
कथं कष्टाश्च संसारात्संसरन्परिमुच्यते ॥ २
आत्मा च प्रकृतिं मुक्त्वा तच्छरीरं विमुंचति
शरीरतश्च निर्मुक्तः कथमन्यत्प्रपद्यते ॥ ३
कथं शुभाशुभे चायं कर्मणी स्वकृते नरः ।
उपभुंक्ते क्व वा कर्म विदेहस्यावतिष्ठते ॥ ४
ब्राह्मण उवाच ।
एवं संचोदितः सिद्धः प्रश्नांस्तान्प्रत्यभाषत
आनुपूर्व्येण वार्ष्णेय तन्मे निगदतः शृणु ॥ ५

तत कदाचिदिति निर्वेदाख्यवैराग्यदौर्लभ्यमुक्तं निराकाराश्रितेन असप्रज्ञातसमाधिसमधिगम्यब्रह्मभावाश्रितेन लोक्यत इति लोको द्वैतं तत्तन्त्रं तज्जं दुःखम् ॥३८॥ इमं मार्गं योगमार्गं अनुभूय ज्ञात्वा अनुष्ठित अनुष्ठानं अभ्यास सजातोऽस्य सोऽनुष्ठित ततोऽनुष्ठानात् इयं पूर्वोक्ता अन्तर्धानादिशक्तिर्ज्ञानविज्ञानादिरूपा आत्मन मनस मनसो हि प्रसादेन हन्ति कर्म शुभाशुभम् । प्रसन्नात्मनि स स्थित्वा सुखमक्षय्यमश्नुते इति श्रुते ॥ ३९ ॥ विद्याफलं अपुनरावृत्ति सर्वज्ञत्वं चाह-**नाहमित्यादिना**। आसिद्धे आमोक्षात् आप्रजासृष्टे आत्मन अपिशब्दाल्लोकाना च गतीरालोकयामीत्यन्वय ॥ ४० ॥ इत परं सत्यलोकं परतर कैवल्यं यदि प्रयास्यन्नृपपारमेष्ठ्यमिति योगिनामिच्छया सद्यो वा क्रामिक वा कैवल्यमस्तीति स्मरणात् ॥ ४१ ॥ बहु मन्ये भृशं पूजये अहमन्तर्धानगतोऽपि यतस्त्वया ज्ञात ॥ ४६ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे षोडशोऽध्याय ॥ १६ ॥

१७

तत इति ॥ १ ॥ एवं नित्यानित्यविवेकवैराग्यादयः शिष्यगुणा ज्ञानविज्ञानादयो गुरुगुणाश्चोक्ता तत पुनः पुनश्च मरणं जन्म चैव पुन पुनरित्युक्तं तयो प्राप्तिप्रकारौ पृच्छति-**कथमिति** । नाहं पुनरिहागन्तेत्युक्तम् । तस्यापि प्रकारं पृच्छति-**कथं कष्टाश्चेति** ॥२॥ इत परं गमिष्यामि तत. परतरम् पुनरित्युक्तम् । तत्रापि पृच्छति आत्मा चेति। आत्मा जीव प्रकृतिं मूलाविद्या तच्छरीरं तज्जं स्थूलपिंडम् मुक्त्वा कथं परं प्राप्नोतीत्यर्थ । शरीरात् परस्मात् कथं अन्यत् परतरं ब्रह्म प्रपद्यत इति **पंचमः** प्रश्न ॥ ३ ॥ **कथं शुभाशुभे इति** । एवंभूतस्य जीवत कथं कर्मफलभोग इति षष्ठ विदेहस्य संसारबीजभूतं कर्म क्व वा तिष्ठतीति **सप्तमः** ॥ ४ ॥

सिद्ध उवाच ।
आयुःकीर्तिकराणीह यानि कृत्यानि सेवते
शरीरग्रहणे यस्मिंस्तेषु क्षीणेषु सर्वशः ॥ ६
आयुःक्षयपरीतात्मा विपरीतानि सेवते ।
बुद्धिर्व्यावर्तते चास्य विनाशे प्रत्युपस्थिते ७
सत्त्वं बलं च कालं च विदित्वा चात्मनस्तथा
अतिवेलमुपाश्नाति स्वविरुद्धान्यनात्मवान् ८
यदायमतिकष्टानि सर्वाण्युपनिषेवते ।
अत्यर्थमपि वा भुंक्ते न वा भुंक्ते कदाचन ॥ ९
दुष्टान्नामिषपानं च यदन्योन्यविरोधि च ।
गुरु चाप्यमितं भुंक्ते नातिजीर्णेऽपि वा पुनः
व्यायाममतिमात्रं च व्यवाय चोपसेवते ।
सततं कर्मलोभाद्वा प्राप्त वेगं विधारयेत् ॥११
रसाभियुक्तमन्नं वा दिवा स्वप्नं च सेवते ।
अपक्वानागते काले स्वयं दोषान्प्रकोपयेत् १२
स्वदोषकोपनाद्रोगं लभते मरणान्तिकम् ।
अपि वोद्बन्धनादीनि परीतानि व्यवस्यति१३
तस्य तैः कारणैर्जंतोः शरीरं च्यवते तदा ।
जीवितं प्रोच्यमानं तद्यथावदुपधारय ॥ १४
ऊष्मा प्रकुपितः काये तीव्रवायुसमीरितः ।
शरीरमनुपर्येत्य सर्वान्प्राणान् रुणद्धि वै १५
अत्यर्थं बलवानूष्मा शरीरे परिकोपितः ।
भिनत्ति जीवस्थानानि मर्माणि विद्धि तत्त्वतः
ततः सवेदनः सद्यो जीवः प्रच्यवते क्षरात् ।
शरीरं त्यजते जंतुश्छिद्यमानेषु मर्मसु ॥ १७
वेदनाभिः परीतात्मा तद्विद्धि द्विजसत्तम ।
जातीमरणसंविग्नाः सततं सर्वजन्तवः ॥ १८
दृश्यन्ते सन्त्यजन्तश्च शरीराणि द्विजर्षभ ।
गर्भसंक्रमणे चापि मर्मणामातिसर्पणे ॥ १९
तादृशीमेव लभते वेदनां मानवः पुनः ।
भिन्नसंधिरथ क्लेदमद्भिः स लभते नरः ॥२०
यथा पञ्चसु भूतेषु संभूतत्वं नियच्छति ।
शैत्यात्प्रकुपितः काये तीव्रवायुसमीरितः २१
यः स पञ्चसु भूतेषु
प्राणापाने व्यवस्थितः ।
स गच्छत्यूर्ध्वगो वायुः
कृच्छ्रान्मुक्त्वा शरीरिणः ॥ २२
शरीरं च जहात्येवं निरुच्छ्वासश्च दृश्यते ।
स निरूष्मा निरुच्छ्वासो निःश्रीको हतचेतनः
ब्रह्मणा संपरित्यक्तो मृत इत्युच्यते नरः ।
स्रोतोभिर्यैर्विजानाति इंद्रियार्थान् शरीरभृत्
तैरेव न विजानाति प्राणानाहारसंभवान् ।
तत्रैव कुरुते काये यः स जीवः सनातनः २५
तथा यद्यद्भवेद्युक्तं सान्निपाते क्वचित् क्वचित् ।
तत्तन्मर्म विजानीहि शास्त्रदृष्टं हि तत्तथा २६
तेषु मर्मसु भिन्नेषु ततः स समुदीरयन् ।
आविश्य हृदयं जन्तोः सत्त्वं चाशु रुणद्धि वै
ततः सचेतनो जंतुर्नाभिजानाति किञ्चन २७
तमसा संवृतज्ञानः संवृतेष्वेव मर्मसु ।
स जीवो निरधिष्ठानश्चाल्यते मातरिश्वना २८
ततः स तं महोच्छ्वासं भृशमुच्छ्वस्य दारुणम्
निष्क्रामन्कंपयत्याशु तच्छरीरमचेतनम् ॥२९
स जीवः प्रच्युतः कायात्कर्मभिः स्वैः समावृतः
अभितः स्वैः शुभैः पुण्यैः पापैर्वाऽप्युपपद्यते ॥
ब्राह्मणा ज्ञानसंपन्ना यथावच्छ्रुतनिश्चयाः ।
इतरं कृतपुण्यं वा तं विजानन्ति लक्षणैः ॥३१
यथाऽन्धकारे खद्योतं लीयमानं ततस्ततः ।
चक्षुष्मन्तः प्रपश्यन्ति तथा च ज्ञानचक्षुषः ॥
पश्यन्त्येवंविधं सिद्धा जीवं दिव्येन चक्षुषा
च्यवन्तं जायमानं च योनिं चानुप्रवेशितम् ॥
तस्य स्थानानि दृष्टानि त्रिविधानीह शास्त्रतः
कर्मभूमिरिय भूमिर्यत्र तिष्ठन्ति जन्तवः ॥ ३४
ततः शुभाशुभं कृत्वा लभन्ते सर्वदेहिनः ।
इहैवोच्चावचान् भोगान् प्राप्नुवन्ति स्वकर्मभिः
इहैवाशुभकर्माणः कर्मभिर्निरयं गताः ।
अवाग्गतिरियं कष्टा यत्र पच्यन्ति मानवाः ।
तस्मात्सुदुर्लभो मोक्षो रक्ष्यश्चात्मा ततो भृशं

तत्र आद्यस्य प्रश्नस्याद्येनाध्यायेनोत्तरम् । ततो द्वितीयस्य द्वितीयेन शेषाणां तृतीयेन सिद्ध उवाच आयुःकीर्तिकराणीहेत्यादिना ॥ ६ ॥ वेगं मलमूत्रादीनाम् ॥ ११ ॥ रसाभियुक्तं परिणामे बहुरसकरं रसबाहुल्यस्याजीर्णहेतुत्वात् ॥ १२ ॥ अपि वा अथवा परीतानि विपरीतानि व्यवस्यति करोति तेन नीरुजोऽपि म्रियत इत्यर्थ १३॥

* नातिजीर्णे दिवा पुन इति पाठ ।

क्षरात् जडाच्छरीरात् ॥ १७ ॥ जाती जन्म ॥ १८ ॥ गर्भसंक्रमणे पारलौकिकदेहत्यागेनैहिकगर्भस्थदेहप्रवेशे ॥१९॥ अद्भि क्लेदं जलेन वैक्लव्यम् ॥ २० ॥ सभूतत्वं संहतत्वम् नियच्छति नाशयति यथा भूतानि पृथग्भवन्तीत्यर्थं तीव्रेण वायुनान्येन समीरित प्राणापानस्थाने व्यवस्थितो यो वायुरित्युत्तरेण संबंध ॥ २१ ॥ स्रोतोभिरिंद्रियै ॥ २४ ॥

ऊर्ध्वं तु जन्तवो गत्वा येषु स्थानेष्ववस्थिताः ।
कीर्त्यमानानि तानीह तत्त्वतः संनिबोध मे ॥
तच्छ्रुत्वा नैष्ठिकीं बुद्धिं बुद्ध्येथाः कर्मनिश्चयम्
तारारूपाणि सर्वाणि यत्रैतच्चन्द्रमण्डलम् ३८
यत्र विभ्राजते लोके स्वभासा सूर्यमण्डलम् ।
स्थानान्येतानि जानीहि जनानां पुण्यकर्मणां
कर्मक्षयाच्च ते सर्वे च्यवन्ते वै पुनः पुनः ।
तत्रापि च विशेषोस्ति दिवि नीचोच्चमध्यमः
न च तत्रापि सन्तोषो दृष्ट्वा दीप्ततरां श्रियम् ।
इत्येता गतयः सर्वाः पृथक्ते समुदीरिताः ४१
उपपत्तिं तु वक्ष्यामि गर्भस्याहमतः परम् ।
तथा तन्मे निगदतः शृणुष्वावहितो द्विज४२

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि
सप्तदशोऽध्यायः ॥ १७ ॥

१८

ब्राह्मण उवाच ।
शुभानामशुभानां च नेह नाशोस्ति कर्मणाम्
प्राप्य प्राप्यानुपच्यन्ते क्षेत्रं क्षेत्रं तथा तथा १
यथा प्रसूयमानस्तु फली दद्यात्फलं बहु ।
तथा स्याद्विपुलं पुण्यं शुद्धेन मनसा कृतम् २
पापं चापि तथैव स्यात्पापेन मनसा कृतम् ।
पुरोधाय मनो ह्येदं कर्मण्यात्मा प्रवर्तते ॥ ३
यथा कर्मसमाविष्टः काममन्युसमावृतः ।
नरो गर्भं प्रविशति तच्चापि शृणु चोत्तरम् ४
शुक्रं शोणितसंसृष्टं स्त्रिया गर्भाशयं गतम् ।
क्षेत्रं कर्मजमाप्नोति शुभं वा यदि वाऽशुभम्
सौक्ष्म्यादव्यक्तभावाच्च न च क्वचन सज्जति
संप्राप्य ब्राह्मणः कामं तस्मात्तद्ब्रह्म शाश्वतम्
तद्बीजं सर्वभूतानां तेन जीवन्ति जन्तवः ।
स जीवः सर्वगात्राणि गर्भस्याविश्य भागशः
दधाति चेतसा सद्यः प्राणस्थानेष्ववस्थितः ।
ततः स्पन्दयतेऽङ्गानि स गर्भश्चेतनान्वितः ८

यथा लोहस्य निःस्यन्दो
निषिक्तो बिम्बविग्रहम् ।
उपैति तद्विजानीहि
गर्भे जीवप्रवेशनम् ॥ ९

लोहपिण्डं यथा वह्निः
प्रविश्य ह्यतितापयेत् ।
तथा त्वमपि जानीहि
गर्भे जीवोपपादनम् ॥ १०

यथा च दीपः शरणे दीप्यमानः प्रकाशते ।
एवमेव शरीराणि प्रकाशयति चेतना ॥ ११

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्तदशोऽध्याय ॥ १७ ॥

१८

शुभानामिति । क्षेत्रं क्षेत्रं देहं देहं प्राप्य प्राप्यासाद्यासाद्य पच्यन्ते फलं प्रयच्छन्ति ॥ १ ॥ चित्तशुद्ध्यशुद्धितारतम्येनाल्पादपि पुण्यात्पापाद्वा फलं बहुस्तीत्याह सार्धेन-**यथेति**। फली वृक्ष ॥२॥ **पुरोधायेति**। तस्मान्मन एव प्रधान न कर्मेति भाव॰ ॥३॥ **यथा कर्मेति** । मन्युरविद्या संकल्पो वा तच्चापि तत्रापि प्रश्ने ॥४॥ तदाह- **शुक्रमिति** ॥ ५ ॥ क्षेत्रं प्राप्तस्य नरस्य तात्त्विकं रूपमाह—**सौक्ष्म्यादिति** । ब्राह्मणो ब्रह्मवित् तस्मात् तत् शाश्वतं ब्रह्म ज्ञात्वा कामम् ईप्सितं प्राप्यासंगो भवतीत्यर्थ ॥ ६ ॥ तद्बीजं ब्रह्मैव कारणं **तेनेति** । ' एतस्यैवानंदस्यान्यानि भूतानि मात्रामुपजीवन्ति' इति श्रुते. । स ब्रह्मैव सन् जीव चेतसा उपाधिभूतेन प्राणस्थानेषु इंद्रियगोलकेषु दधाति धारयते अभिमानमित्यर्थ इत्युत्तरश्लोकार्धेन सहान्वय ॥ ७ ॥ ततो धारणात् ॥ ८ ॥ ननु कथं सूक्ष्मोपि देहं व्याप्नुयादव्यक्तो वा व्यक्तिं असंगो वा संगमित्याशंक्य त्रिभि परिहरति-यथा लोहस्येत्यादिभि यथा स्वर्णद्रव स्वल्पोऽपि कृत्स्ना ताम्रप्रतिमा स्वर्णमयीमिव करोति एवं गर्भे जीवप्रवेशनं शरीरे सूक्ष्मस्यापि चैतन्यस्य व्याप्तिरित्याद्यस्य परिहार यथैव बिंबं मृदयोपलिप्तमित्यादिश्रुत्यनुसारी ॥ ९ ॥ यथा स्वयमव्यक्तोऽपि वह्नि काष्ठलोहाद्युपाधावेवाभिव्यज्यते एव गर्भे जीवोपपादनं देहे चैतन्यस्याभिव्यक्तिरिति द्वितीयस्य परिहार अरणीषु चाग्निरित्यादिश्रुत्यनुसारी ॥ १० ॥ तृतीयस्य परिहारमाह-**यथा चेति** । शरणे गृहे शरीराणि स्थूलसूक्ष्मकारणानि ॥ ११ ॥

यद्यच्च कुरुते कर्म शुभं वा यदि वाऽशुभम् ।
पूर्वदेहकृतं सर्वमवश्यमुपभुज्यते ॥ १२
ततस्तु क्षीयते चैव पुनश्चान्यत्प्रचीयते ।
यावत्तन्मोक्षयोगस्थं धर्मं नैवावबुध्यते ॥ १३
तत्र कर्म प्रवक्ष्यामि सुखी भवति येन वै ।
आवर्तमानो जातीषु यथाऽन्योन्यासु सत्तम॥
दानं व्रतं ब्रह्मचर्यं यथोक्तं ब्रह्मधारणम् ।
दमः प्रशान्तता चैव भूतानां चानुकम्पनम् ॥
संयमाश्चानृशंस्य च परस्वादानवर्जनम् ।
व्यलीकानामकरणं भूतानां मनसा भुवि १६
मातापित्रोश्च शुश्रूषा देवताऽतिथिपूजनम् ।
गुरुपूजा घृणा शौच नित्यमिन्द्रियसंयमः १७
प्रवर्तनं शुभाना च तत्सतां वृत्तमुच्यते ।
ततो धर्मः प्रभवति यः प्रजाः पाति शाश्वतीः
एवं सत्सु सदा पश्ये-
त्तत्राप्येषा ध्रुवा स्थितिः ।
आचारो धर्ममाचष्टे
यस्मिन् शान्ता व्यवस्थिताः ॥ १९
तेषु तत्कर्म निक्षिप्तं यः स धर्मः सनातनः ।
यस्तं समभिपद्येत न स दुर्गतिमाप्नुयात् ॥ २०
अतो नियम्यते लोकः प्रच्यवन्धर्मवर्त्मसु ।
यश्च योगी च मुक्तश्च स एतेभ्यो विशिष्यते ॥
वर्तमानस्य धर्मेण शुभं यत्र यथा तथा ।
संसारतारणं ह्यस्य कालेन महता भवेत्॥ २२
एवं पूर्वकृतं कर्म नित्यं जन्तुः प्रपद्यते ।
सर्वं तत्कारणं येन विकृतोऽयमिहागतः ॥ २३
शरीरग्रहणं चास्य केन पूर्वं प्रकल्पितम् ।
इत्येवं संशयो लोके तच्च वक्ष्याम्यतः परम् ॥
शरीरमात्मनः कृत्वा सर्वलोकपितामहः ।
त्रैलोक्यमसृजद्ब्रह्मा कृत्स्नं स्थावरजङ्गमम् ॥ २५
ततः प्रधानमसृजत्प्रकृतिं स शरीरिणाम् ।
यया सर्वमिदं व्याप्तं यां लोके परमां विदुः
इदं तत्क्षरमित्युक्तं परं त्वमृतमक्षरम् ।
त्रयाणां मिथुनं सर्वमेकैकस्य पृथक् पृथक् २७
असृजत्सर्वभूतानि पूर्वदृष्टः प्रजापतिः ।
स्थावराणि च भूतानि इत्येषा पौर्विकी श्रुतिः
तस्य कालपरीमाणमकरोत्स पितामहः ।
भूतेषु परिवृत्तिं च पुनरावृत्तिमेव च ॥ २९
यथाऽत्र कश्चिन्मेधावी दृष्टात्मा पूर्वजन्मनि ।
यत्प्रवक्ष्यामि तत्सर्वं यथावदुपपद्यते ॥ ३०
सुखदुःखे यथा सम्यगनित्ये यः प्रपश्यति ।
कायं चामेध्यसंघातं विनाशं कर्मसंहितम् ॥

दीपवदसंगाया अपि चेतनाया दु खादिमप्रतीतौ हेतुमाह—**यद्यच्चेति** । यथा प्रकाश अतदाकारोपि अंगुल्याद्युपाधिना ऋजुवक्राद्याकार इव प्रतीयते एव कर्मजदु खप्रकाशिकाया चिति दु खाकारतैव भाति वस्तुतस्तु नास्ति । असंगो ह्ययं पुरुष इति श्रुते अवस्थातरगतस्य दु खस्यावस्थातरेऽनुवृत्त्यदर्शनाच्चेति भाव ॥ १२ ॥ तत उपभोगात् ॥ १३ ॥ कथं कष्टाच्च संसारान्मुच्यत इत्यस्योत्तरमाह—**तत्र कर्मेत्यादिना** । जातीषु योनिषु ॥ १४ ॥ संयमश्चित्तैकाग्र्यम् ॥१६॥ **यश्च योगीति** । सर्पदशो विषविद्याविदमिव कर्मसग प्रतीयमानोऽपि योगिनं न बाधते योगी इतरेभ्य श्रेष्ठ इत्यर्थ । यतो योगी अतो मुक्त चम्वर्थे परौ च शब्दौ हेत्ववधारणार्थौ । यस्तु योगी स हि योगबलान्मुक्त एवेत्यर्थ ॥ २१ ॥ कर्मिणा विलंबेन मुक्तिरित्याह-**वर्तमानस्येति** ॥ २२ ॥ **एवमिति** । अयं आत्मा ब्रह्म सन्विकृत जीवत्वं प्राप्त ॥२३॥ ननु स्वतंत्रा एव बहवश्चेतना न ब्रह्मविकारा इत्याशंक्य शरीरमात्मन इत्यादिना पौर्विकी श्रुतिरित्यंतै श्लोकै प्रत्याचष्टे सर्वलोक कार्यसमष्टि तस्या पिता मायाशबलं ब्रह्म पितामह शुद्ध तत आत्मन शुद्धस्य शरीरम् । अव्याकृताकाशम् आकाशशरीरं ब्रह्मेति श्रुते माया कृत्वा उत्पाद्य तस्मादव्यक्तमुत्पन्नं त्रिगुण द्विजसत्तमेति तदुत्पत्तिस्मृतेर्नो व्योमापरो यदिति सृष्टे प्राक्तदभावश्रुतेश्च कृत्स्नं सूत्रात्मकं त्रैलोक्यम् ॥ २५ ॥ तत प्रधानं सर्वेषु कार्येषु प्रधीयमानं तेजोबन्नात्मकं जीवाना प्रकृतिं अभिव्यक्तिस्थानं देहाद्याकारं यया प्रकृत्या ॥ २६ ॥ क्षर जडं अक्षर तदवच्छिन्नं चैतन्यं जीवेशभावाक्रांतं त्रयाणा क्षराक्षरशुद्धानमध्ये मिथुन क्षराक्षरं सर्वं प्रतिपुरुष पृथक् पृथगस्ति तत्तन्मुक्तौ तत्तत्कल्पितं तद्वज्जुसर्पवद्बाध्यत इत्यर्थ ॥ २७ ॥ उक्तोऽर्थ श्रौत एवेत्याह— **असृजदिति** । पूर्वदृष्ट सृष्टे प्राक् सदेव सोम्येदमग्र आसीदेकमेवाद्वितीयमिति श्रुतौ दृष्ट सर्वभूतानि वियदादीनि स्थावराणि चाजंगमानि ऐतदात्म्यमिति श्रुते प्रत्यगात्मैव सर्वदृश्यरूपेण भातीत्यर्थ ॥ २८ ॥ एवं श्रुतिबलेन चेतनभेदं निरस्य ब्रह्मविकारस्य जीवस्य विकारत्वं नित्यं चेत्कृतं साधनैरित्याशंक्य तदनित्यत्वमाह— **तस्य कालेति** । तस्य शरीरग्रहणस्य कालेत्यनेनान्तवत्त्वं परिवृत्तिं सुरनरतिर्यगादिदेहेषु भ्रमणम् ॥ २९ ॥ **यथात्रेति** । अत्र संसारस्यान्तवत्त्वे विषये वदेत्तद्वदहं जातिस्मरो यत्प्रवक्ष्यामीत्यध्याहृत्य योज्यम् ॥ ३० ॥

यच्च किञ्चित्सुखं तच्च दुःखं सर्वमिति स्मरन्
संसारसागरं घोरं तरिष्यति सुदुस्तरम् ॥ ३२
जातिमरणरोगैश्च समाविष्टः प्रधानवित् ।
चेतनावत्सु चैतन्यं समं भूतेषु पश्यति ॥ ३३
निर्विद्यते ततः कृत्स्नं मार्गमाणः परं पदम् ।
तस्योपदेशं वक्ष्यामि याथातथ्येन सत्तम ३४
शाश्वतस्याव्ययस्याथ यदस्य ज्ञानमुत्तमम् ।
प्रोच्यमानं मया विप्र निबोधेदमशेषतः ॥ ३५

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥

१९

ब्राह्मण उवाच ।

यः स्यादेकायने लीनस्तूष्णीं किञ्चिदचिन्तयन्
पूर्वं पूर्वं परित्यज्य स तीर्णो बन्धनाद्भवेत् १
सर्वमित्रः सर्वसहः शमे रक्तो जितेन्द्रियः ।
व्यपेतभयमन्युश्च आत्मवान् मुच्यते नरः ॥ २
आत्मवत्सर्वभूतेषु यश्चरेन्नियतः शुचिः ।
अमानी निरभीमानः सर्वतो मुक्त एव सः ३
जीवितं मरणं चोभे सुखदुःखे तथैव च ।
लाभालाभे प्रियद्वेष्ये यः समः स च मुच्यते
न कस्यचित् स्पृहयते नावजानाति किञ्चन ।
निर्द्वन्द्वो वीतरागात्मा सर्वथा मुक्त एव सः ५
अनमित्रश्च निर्बन्धुरनपत्यश्च यः क्वचित् ।
त्यक्तधर्मार्थकामश्च निराकांक्षी च मुच्यते ६
नैव धर्मी न चाधर्मी पूर्वोपचितहायकः ।
धातुक्षयप्रशान्तात्मा निर्द्वन्द्वः स विमुच्यते ७
अकर्मवान् विकांक्षश्च पश्येज्जगदशाश्वतम् ।
अश्वत्थसदृशं नित्यं जन्ममृत्युजरायुतम् ॥ ८
वैराग्यबुद्धिः सततमात्मदोषव्यपेक्षकः ।
आत्मबन्धविनिर्मोक्षं स करोत्यचिरादिव ९
अगन्धमरसस्पर्शमशब्दमपरिग्रहम् ।
अरूपमनभिज्ञेयं दृष्ट्वाऽऽत्मानं विमुच्यते ॥ १०
पञ्चभूतगुणैर्हीनममूर्तिमदहेतुकम् ।
अगुणं गुणभोक्तारं यः पश्यति स मुच्यते ११
विहाय सर्वसंकल्पान्
बुद्ध्या शारीरमानसान् ।
शनैर्निर्वाणमाप्नोति
निरिन्धन इवानलः ॥ १२
सर्वसंस्कारनिर्मुक्तो निर्द्वन्द्वो निष्परिग्रहः ।
तपसा इन्द्रियग्रामं यश्चरेन्मुक्त एव सः ॥ १३
विमुक्तः सर्वसंस्कारैस्ततो ब्रह्म सनातनम् ।
परमाप्नोति संशान्तमचलं नित्यमक्षरम् १४
अतः परं प्रवक्ष्यामि योगशास्त्रमनुत्तमम् ।
युञ्जतः सिद्धमात्मानं यथा पश्यन्ति योगिनः

चेतनावत्सु देहेषु समं एकम् ॥ ३३ ॥ ऐकात्म्यदृष्ट्या निर्विद्यत इत्यर्थ । स्पष्टार्थमन्यत् ॥ ३४ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपेऽष्टादशोऽध्याय ॥ १८ ॥

१९

शरीरस्य नाशोत्पत्तिप्रकारावुक्त्वा पूर्वोपक्रान्त ततो मुक्तिप्रकार प्रपञ्चयति—**यः स्यादिति** । तद्यथा सर्वासामपा समुद्र एकायनमित्यादिश्रुत्युक्तप्रकारेण सर्वलयाधिष्ठानं ब्रह्म एकायनं तस्मिन् लीनः स यथा सैंधवखिल्य उदके प्रास्त उदकमेवानुविलीयते इति श्रुत्युक्तरीत्या ऐक्यं प्राप्त· तूष्णीं अहमेवेदं सर्वोऽस्मीत्यभिमानमप्यकुर्वन् किञ्चिदचिन्तयन्नित्यनेनास्मीत्यपि वारयति पूर्वं पूर्वं स्थूलसूक्ष्मकारणेषु परित्यज्य उत्तरस्मिन् उत्तरस्मिन्प्राविलाप्य ॥ १॥ सर्वमित्र अद्रोही सर्वसह· क्षमी शमे चित्तनिग्रहे भय योगासिद्धौ कर्मसंन्यासिन कर्मब्रह्मोभयभ्रष्टताप्रयुक्तं मन्युरियतापि कालेन न योग सिद्ध इति दैन्यं तत्र द्वेषो वा आत्मवान् जितचित्त ॥ २ ॥ अनमित्र शत्रुहीन ॥ ६ ॥ ज्ञानफलमाह—**नैवेति** । धर्माधर्मशून्य पूर्वोपाचितं प्रारब्धकर्म तस्य हायक यापक धातुक्षयेण शरीरारंभकभूतविनाशेनैव प्रशात अत्यंतसमुच्छिन्न आत्मा चित्तं यस्य स अत एव निर्द्वंद्व अद्वैत यत्र त्वस्य सर्वमात्मैवाभूत्तत्केन कं पश्येदिति श्रुते ॥ ७ ॥ अकर्मवान् संन्यासी ॥ ८ ॥ अगंधं गन्धादिहीन चिन्मात्रम् ॥ १० ॥ पञ्चभूतगुणैर्हीनमिति स्थूलनिरास अमूर्तिमदिति सूक्ष्मस्य अहेतुकमिति कारणस्य अत एव अगुणं गुणभोक्तृपूर्वैस्त्रिभी रूपै· गुणा विषयादय ॥ ११ ॥ एवं ध्यानजसंस्कारैर्बाह्यसंस्कारा नश्यंति तज्ज संस्कारोऽन्यसंस्कारप्रतिबन्धीति योगसूत्रादित्याह—**सर्वसंस्कारेति** ॥ १३ ॥ अत परं प्रवक्ष्यामीति संक्षेपोक्त्यनंतरं विस्तरेण वक्ष्यामि युञ्जत ध्यायत सिद्धं आविद्यकभ्रान्तिनिवृत्तौ स्वत सिद्धं न तु कीटभ्रमरन्यायेन ध्यानसाध्यम् १५

तस्योपदेशं वक्ष्यामि यथावत्तन्निबोध मे।
यैर्द्वारैरुच्चरयन्नित्यं पश्यत्यात्मानमात्मनि १६
इन्द्रियाणि तु संहृत्य मन आत्मनि धारयेत्।
तीव्रं तप्त्वा तपः पूर्वं मोक्षयोगं समाचरेत् ॥
तपस्वी सततं युक्तो योगशास्त्रमथाचरेत् ।
मनीषी मनसा विप्रः पश्यन्नात्मानमात्मनि ॥
स चेच्छक्नोत्ययं साधुर्योक्तुमात्मानमात्मनि ।
तत एकान्तशीलः स पश्यत्यात्मानमात्मनि
संयतः सततं युक्त आत्मवान्विजितेन्द्रियः ।
तथा य आत्मनात्मानं संप्रयुक्तः प्रपश्यति २०
यथा हि पुरुषः स्वप्ने दृष्ट्वा पश्यत्यसाविति ।
तथा रूपमिवात्मानं साधुयुक्तः प्रपश्यति २१
इषीकां च यथा मुञ्जात्कश्चिन्निष्कृष्य दर्शयेत्
योगी निष्कृष्य चात्मानं तथा पश्यति देहतः
मुञ्जं शरीरमित्याहुरिषीकामात्मनि श्रिताम्
एतन्निदर्शनं प्रोक्तं योगविद्भिरनुत्तमम् ॥ २३

यदा हि युक्तमात्मानं
सम्यक् पश्यति देहभृत्।
न तस्येहेश्वरः कश्चि-
त्त्रैलोक्यस्यापि यः प्रभुः ॥ २४

अन्यान्याश्चैव तनवो यथेष्टं प्रतिपद्यते ।
विनिवृत्य जरां मृत्युं न शोचति न हृष्यति॥
देवानामपि देवत्वं युक्तः कारयते वशी ।
ब्रह्म चाव्ययमाप्नोति हित्वा देहमशाश्वतम् ॥
विनश्यत्सु च भूतेषु न भयं तस्य जायते ।
क्लिश्यमानेषु भूतेषु न स क्लिश्यति केनचित्
दुःखशोकमयैर्घोरैः सङ्गस्नेहसमुद्भवैः ।
न विचाल्यति युक्तात्मा निस्पृहः शांतमानसः
नैनं शस्त्राणि विध्यन्ते न मृत्युश्चास्य विद्यते
नातः सुखतरं किञ्चिल्लोके क्वचन दृश्यते २९
सम्यग्युक्त्वा स आत्मानमात्मन्येव प्रतिष्ठते।
विनिवृत्तजरादुःखः सुखं स्वपिति चापि सः
देहान्यथेष्टमभ्येति हित्वेमां मानुषीं तनुम् ।
निर्वेदस्तु न कर्तव्यो भुञ्जानेन कथञ्चन ॥ ३१
सम्यग्युक्तो यदात्मानमात्मन्येव प्रपश्यति
तदैव न स्पृहयते साक्षादपि शतक्रतोः ॥ ३२
योगमेकान्तशीलस्तु यथा विन्दति तच्छृणु ।
दृष्टपूर्वां दिशं चिन्त्य यस्मिन्संनिवसेत्पुरे ३३
पुरस्याभ्यन्तरे तस्य मनः स्थाप्यं न बाह्यतः ।
पुरस्याभ्यन्तरे तिष्ठन् यस्मिन्नावसथे वसेत् ।
तस्मिन्नावसथे धार्यं सबाह्याभ्यन्तरं मनः ३४
प्रचिन्त्यावसथे कृत्स्नं यस्मिन्काले स पश्यति
तस्मिन्काले मनश्चास्य न च किञ्चन बाह्यतः

यैर्द्वारैः चित्तनिग्रहोपायैः आत्मानं चित्तं आत्मनि देहे चारयन् अन्तर्मुखं कुर्वन् नित्यं आद्यन्तशून्यं वस्तु पश्यति तानि निबोधेति पूर्वेणान्वयः ॥ १६ ॥ संहृत्य स्वस्वविषयेभ्यः प्रत्यावर्त्य आत्मनि क्षेत्रज्ञे एतच्च तप आख्यस्वधर्मानुष्ठानेन शुद्धे चेतस्येव भवतीत्याह—**तीव्रमिति** ॥ १७ ॥ एतदेवान्वयव्यतिरेकाभ्यां द्रढयति—**तपस्वीत्यादिना** ॥ १८ ॥ **यथा हीति** । यथा स्वप्ने स्थूलदेहासंगेन स्थितः सन्कश्चिद्दृष्टचरं पुरुषं पश्यति उत्थेव अनिरुद्धं प्रबुद्धश्च पुनस्तं दृष्ट्वा सोयमिति प्रत्यभिजानाति तथात्मानं विश्वरूपं समाधौ दृष्ट्वा व्युत्थानेऽपि विश्वमात्मत्वेनैव पश्यतीत्यर्थः ॥२१॥ तं स्वाच्छारीरात्प्रबृहेन्मुञ्जादिवैषीकां धैर्येणेति देहासंगे श्रौतं दृष्टान्तमाह-**इषीकामिति** ॥२२॥दृष्टांतं दार्ष्टान्तिके योजयति-**मुञ्जमिति** । आत्मनि श्रितां मायां जगदाकारेण भासमानामिति शेषः ॥ २३ ॥ यतोऽयं सबाह्याभ्यंतरं प्रत्यगनन्यत्वेन वीक्षतेऽत एव चानन्याधिपतिरयमित्याह—**यदा हीति** ॥ २४ ॥ स एकधा भवति त्रिधा भवतीत्यादि कायव्यूहकरणं । न तस्य रोगो न जरा न मृत्युः सर्वस्य वशी सर्वस्येशान इत्यादिश्रुतिप्रसिद्धं योगफलमाह—**अन्यान्या इति** । अन्यान्या देवगन्धर्वमनुष्याद्याः तनवस्तनूः कामरूपी भवतीत्यर्थः ॥२५॥ विदेहकैवल्यावधिकमैश्वर्यमित्याह—**ब्रह्म चेति** ॥२६॥ विनश्यत्स्विति विदेहमुक्तस्य न क्लेशाः संतीत्युक्तं तत्कैमुतिकन्यायेन द्रढयितुं सदेहमुक्तस्यापि ते न सन्तीत्याह दुःखशोकेत्यादिना ॥ २८ ॥ अन्यान्याश्चेति पूर्वोक्तस्य विवरणं —**देहानिति**। भुञ्जानेन योगैश्वर्यामिति शेषः । निर्वेदो योगाद्वैराग्यं न कर्तव्यामित्यर्थः ॥ ३१ ॥ वस्तुतस्तु योगजसंस्कारप्राबल्याद्योगिनो भोगेच्छैव न भवतीत्याह—**सम्यगिति** । असम्यग्योगिविषयैव भोगेच्छोक्तिरिति भावः ॥३२॥ एकान्तशीलः एकं ब्रह्म अन्यते प्राप्यतेऽनेनेति एकान्तो ध्यानं तच्छीलः। ततस्तु तं पश्यति निष्कलं ध्यायमान इति श्रुतेः दृष्टपूर्वां दिशं दृष्टं श्रुतिः प्रामाण्यं प्रत्यनपेक्षत्वात् वेदान्तश्रवणपूर्विकां दिशं उपदेशं चिन्त्य युक्त्यापि पर्यालोच्य श्रोतव्यो मन्तव्य इति श्रुतेः । यस्मिन्पुरे देहे ॥ ३३ ॥ आवसथे मूलाधारायन्यतमस्मिंश्चक्रे ॥३४॥ तदेव कृत्स्नं सर्वात्मकं यदा पश्यति तदास्य बाह्यतः प्रत्युपादन्यन्न किञ्चन अस्ति यत्रास्य मनः सज्जेत् अतो निर्वासनत्वान्मुच्यत इत्यर्थः ॥ ३५ ॥

सन्नियम्येन्द्रियग्रामं निर्घोषं निर्जने वने ।
कायमभ्यन्तरं कृत्स्नमेकाग्रः परिचिन्तयेत् ३६
दन्तांस्तालु च जिह्वां च गलं ग्रीवां तथैव च
हृदयं चिन्तयेच्चापि तथा हृदयबन्धनम् ॥ ३७
इत्युक्तः स मया शिष्यो मेधावी मधुसूदन ।
पप्रच्छ पुनरेवेमं मोक्षधर्मं सुदुर्वचम् ॥ ३८
भुक्तं भुक्तमिदं कोष्ठे कथमन्नं विपच्यते ।
कथं रसत्वं व्रजति शोणितत्वं कथं पुनः॥ ३९
तथा मांसं च मेदश्च स्नाय्वस्थीनि च योषिति।
कथमेतानि सर्वाणि शरीराणि शरीरिणाम् ॥
वर्धते वर्धमानस्य वर्धते च कथं बलम् ।
निरोधानां निर्गमनं मलानां च पृथक् पृथक्
कुतो वायं प्रश्वासिति उच्छ्वसित्यपि वा पुनः
कं च देशमधिष्ठाय तिष्ठत्यात्माऽयमात्मनि
जीवः कथं वहति च चेष्टमानः कलेवरम् ।
किंवर्णं कीदृशं चैव निवेशयति वै पुनः॥ ४३
याथातथ्येन भगवन् वक्तुमर्हसि मेऽनघ ।
इति संपरिपृष्टोऽहं तेन विप्रेण माधव ॥ ४४
प्रत्यब्रुवं महाबाहो यथाश्रुतमरिन्दम ।
यथा स्वकोष्ठे प्रक्षिप्य भाण्डं भाण्डमना भवेत्
तथा स्वकाये प्रक्षिप्य मनो द्वारैरनिश्चलैः ।
आत्मानं तत्र मार्गेत प्रमादं परिवर्जयेत् ॥ ४६
एवं सततमुद्युक्तः प्रीतात्मा न चिरादिव ।
आसादयति तद्ब्रह्म यदृष्ट्वा स्यात्प्रधानवित् ॥
न त्वसौ चक्षुषा ग्राह्यो न च सर्वैरपीन्द्रियैः ।
मनसैव प्रदीपेन महानात्मा प्रदृश्यते ॥ ४८
सर्वतः पाणिपादान्तः सर्वतोक्षिशिरोमुखः ।
सर्वतः श्रुतिमाँल्लोके सर्वमावृत्य तिष्ठति ॥४९
जीवो निष्क्रान्तमात्मानं शरीरात्संप्रपश्यति
स तमुत्सृज्य देहे स्वं धारयन्ब्रह्म केवलम् ॥
आत्मानमालोकयति मनसा प्रहसन्निव ।
तदेवमाश्रयं कृत्वा मोक्षं याति ततो मयि ॥

उपसंहरति--**सन्नियम्येति** । कायमभि देहस्याभितो बहि अन्तरं मध्ये च कृत्स्नं परिपूर्णं ब्रह्मैव चिन्तयेदित्यर्थ ॥३६॥ अस्य योगस्य साधनान्याह--**दन्तानित्यादि**। दन्तान्दन्तैरवखण्ड्यावखंड्य गृह्यमाणानाहारान् चिन्तयेत् । 'आहारशुद्धौ सत्त्वशुद्धिः सत्त्वशुद्धौ ध्रुवा स्मृतिः । स्मृतिलम्भे सर्वग्रन्थीनां विप्रमोक्षः ' इति आहारशुद्धेर्मोक्षहेतुत्वश्रुतेः । तथा तालु आधार जिह्वा तत्राधेया यथोक्तमीश्वरप्रोक्ते—

लंबिकोर्ध्वं स्थिते गर्ते रसना विपरीतगाम् ।
संयोजयेत्प्रयत्नेन मुद्रा सा खेचरी मता इति ।

दत्तात्रेयः—

अन्तः कपालविवरे जिह्वां व्यावृत्य चार्पयेत् ।
भ्रूमध्यदृष्टिरप्येषा मुद्रा भवति खेचरी इति ।

भ्रुवोर्मध्ये प्राणमावेश्य प्राणापानौ समौ कृत्वा नासाभ्यन्तरचारिणाविति चैतदेवोक्तं **गलं**-जिह्वामूलादधोभाग । **ग्रीवा**-तदध कण्ठनालं ताभ्यां कण्ठकूपस्ततोऽप्यध -स्थितो लक्ष्यते तत्र धारणा सद्य फला यत्नादभ्यसनीया योगे विश्वासोत्पत्त्यर्थं तथा च सूत्रम्—

कण्ठकूपे क्षुत्पिपासानिवृत्तिरिति ।

भाष्यमपि आसामेकस्या फलं यावन्नानुभवति तावद्योगधर्मे न श्रद्धत्ते इति। हृदयं हृदयायतनं ब्रह्म हृदयबन्धनं शतं चैका च हृदयस्य नाड्य इति श्रूयमाणं नाडीमार्गं तत्तल्लोकगत्युपयोगि ॥३७॥ मेधावी दन्तादिशब्दै पारोक्ष्येणोक्तमर्थं ज्ञातवान् ॥ ३८ ॥ पञ्चस्वर्थेषु आद्यं विवृत्य पृच्छति त्रीभि भुक्तं भुक्तमिति ॥३९॥ द्वितीयमर्धेन-**कुतो वेति**। तृतीयं योगानुपकारित्वादपृष्ट्वा चतुर्थमेव पृच्छति—**कञ्चेति** ॥ ४२ ॥ पञ्चमं पृच्छति--**जीव इति**। कथं जीवो नाडीमार्गे सूक्ष्मं कलेवरं वहति किंवर्णं वा ते नाडीमार्गा तैश्च कीदृशं पुनर्वपु प्राप्यमिति प्रश्नार्थ । एतेषां मध्ये आद्ययोर्विवरणार्था ब्राह्मणगीता इतरयोर्गुरुशिष्यसंवाद प्राधान्येन । अन्यत्तु तत्र तत्रोपसर्जनत्वेन प्रतिपाद्यत इति विभाग ॥ ४३ ॥ कोष्ठे **धान्यगृहे** भाण्डं गृहोपस्करं निक्षिप्तं यथा गृह प्रविष्टो विविच्य जानाति ॥ ४५ ॥ एवं स्वकाये देहान्तर्मन प्रक्षिप्य अनिश्चलै अनिश्चरद्भिर्द्वारैरिन्द्रियै ।सर्वद्वाराणि संयम्य मनो हृदि निरुद्ध्य चेति स्मृते त्वया यत्पृष्ट तद्वस्तुयोगबलेन ज्ञेयमित्यर्थ ॥ ४६ ॥ एतदेवोपपादयति-**एवमिति**। प्रधानवित् प्रकृतिवित्सर्वविकारविद्भवति विकाराणा प्रकृतेरनन्यत्वादिति ॥ ४७ ॥ चक्षुराद्यग्राह्यस्यामूर्तस्य रूपं सर्वत पाणिपादान्त इत्यादिलक्षणम् ॥ ४९ ॥ तदेव जीवस्य स्वात्मभूतदेहात् निष्क्रान्तं पृथग्भूतं मुञ्जेषीकावत्पश्यति संप्रज्ञाते । तं सर्वत इत्युक्तलक्षण कारणं उत्सृज्य प्रविलाप्य देहे स्व स्वरूपं धारयन्मनो निगृह्णन् केवलं निर्गुणं ब्रह्म पश्यति । स एवं विद्वानस्माच्छरीरभेदादूर्ध्वमुत्क्रम्यामुष्मिन् स्वर्गे लोके सर्वान्कामानाप्त्वाऽमृत समभवदिति देहाभिमानकृतं भेदं त्यक्त्वा ऊर्ध्वं कारणब्रह्मभाव प्राप्तं तत्रैव सर्वकामभुग्भूत्वाऽमृताख्यं कवल्यमश्नुत इति श्रवणात् ॥ ५०॥ प्रहसन्निव अहो वृथैव मरीचिकोदकतुल्येन संसारेणाहं भ्रामित इति विस्मयेनेति भाव ।तदेवं तत् ब्रह्म एवं उक्तरीत्या ॥ ५१ ॥

इदं सर्वरहस्यं ते मया प्रोक्तं द्विजोत्तम ।
आपृच्छे साधयिष्यामि गच्छ विप्र यथासुखं
इत्युक्तः स तदा कृष्ण मया शिष्यो महातपाः
अगच्छत यथाकामं ब्राह्मणः संशितव्रतः ५३

वासुदेव उवाच ।

इत्युक्त्वा स तदा वाक्यं मां पार्थ द्विजसत्तमः
मोक्षधर्माश्रितः सम्यक् तत्रैवांतरधीयत ५४
कच्चिदेतत्त्वया पार्थ श्रुतमेकाग्रचेतसा ।
तदापि हि रथस्थस्त्वं श्रुतवानेतदेव हि ॥ ५५
नैतत्पार्थ सुविज्ञेयं व्यामिश्रेणेति मे मतिः ।
नरेणाकृतसंज्ञेन विशुद्धेनांतरात्मना ॥ ५६
सुरहस्यमिदं प्रोक्तं देवानां भरतर्षभ ।
कच्चिन्नेदं श्रुतं पार्थ मनुष्येणेह कर्हिचित् ॥५७
न ह्येतच्छ्रोतुमर्होऽन्यो मनुष्यस्त्वामृतेऽनघ ।
नैतदद्य सुविज्ञेयं व्यामिश्रेणान्तरात्मना ॥५८
क्रियावद्भिर्हि कौन्तेय देवलोकः समावृतः ।
न चैतदिष्टं देवानां मर्त्यरूपनिवर्तनम् ॥ ५९
परा हि सा गतिः पार्थ यत्तद्ब्रह्म सनातनम् ।
यत्रामृतत्वं प्राप्नोति त्यक्त्वा देहं सदा सुखी
इमं धर्म समास्थाय येऽपि स्युः पापयोनयः ।
स्त्रियो वैश्यास्तथा शूद्रास्तेऽपि यांति परां गतिं
किं पुनर्ब्राह्मणाः पार्थ क्षत्रिया वा बहुश्रुताः ।
स्वधर्मरतयो नित्यं ब्रह्मलोकपरायणाः ॥ ६२
हेतुमच्चैतदुद्दिष्टमुपायाश्चास्य साधने ।
सिद्धिं फलं च मोक्षश्च दुःखस्य च विनिर्णयः
नातः परं सुखं त्वन्यत् किञ्चित्स्याद्भरतर्षभ ।
बुद्धिमान् श्रद्दधानश्च पराक्रान्तश्च पाण्डव ॥
यः परित्यज्यते मर्त्यो लोकसारमसारवत् ।
एतैरुपायैः स क्षिप्रं परां गतिमवाप्नुते ॥ ६५
एतावदेव वक्तव्यं नातो भूयोऽस्ति किञ्चन ।
षण्मासान्नित्ययुक्तस्य योगः पार्थ प्रवर्तते ६६

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि
ऊनविंशोऽध्यायः ॥ १९ ॥

२०

वासुदेव उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
दम्पत्योः पार्थ संवादं योऽभवद्भरतर्षभ ॥ १
ब्राह्मणीं ब्राह्मणं कञ्चिज्ज्ञानविज्ञानपारगम् ।
दृष्ट्वा विविक्त आसीनं भार्या भर्तारमब्रवीत् २
कं नु लोकं गमिष्यामि त्वामहं पतिमाश्रिता
न्यस्तकर्माणमासीनं क्षीनाशमविचक्षणम् ३
भार्याः पतिकृताँल्लोकानाप्नुवन्तीति नः श्रुतम्
त्वामहं पतिमासाद्य कां गमिष्यामि वै गतिं
एवमुक्तः स शान्तात्मा तामुवाच हसन्निव
सुभगे नाभ्यसूयामि वाक्यस्यास्य तवानघे
ग्राह्यं दृश्यं च सत्यं वा यदिदं कर्म विद्यते ।
एतदेव व्यवस्यन्ति कर्म कर्मेति कर्मिणः ॥ ६
मोहमेव नियच्छन्ति कर्मणा ज्ञानवर्जिताः ।
नैष्कर्म्यं न च लोकेस्मिन्मुहूर्तमपि लभ्यते॥७

व्यामिश्रेण व्यग्रेण अकृतसंज्ञेन अज्ञातविद्यासंप्रदायेन ॥ ५६ ॥ इमं धर्मं आत्मदर्शनाख्यम् ॥ ६१ ॥ लोकसारं धनादि असारवत् तृणादिवत् य परित्यज्यते विवेकादिना परित्यागवान् । क्रियते उपायै शमादिभि ॥ ६५ ॥ **षण्मासानिति** । 'षड्भिर्मासैस्तु युक्तस्य नित्ययुक्तस्य देहिन । आनन्द परमो गुह्य सम्यग्योग प्रवर्त्तते'इति मैत्रायणीयश्रुते । सुखसाध्यत्वादादरणीयो योग इत्यर्थ ॥६६॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे ऊनविंशोऽध्याय ॥ १९ ॥

२०

भुक्त भुक्तामिदं कोष्ठे इत्यादिना कृतस्य प्रश्नस्य उत्तरं 'अहं वैश्वानरो भूत्वा प्राणिना देहमाश्रित । प्राणापानसमायुक्त पचाम्यन्नं चतुर्विधम्'इति गीतोक्तमेव विवृणोति— **अत्रापीत्यादिना** । अत्र प्रश्ने विषये इतिहासमपीति सम्बन्ध ॥ १ ॥ कर्म अग्निहोत्रादिकं न्यस्तं येन तं कीनाश कर्कश मयि निरनुक्रोशं अविचक्षणं मम अनन्यगतिकत्वमजानन्तम्॥३॥ग्राह्यं दीक्षाव्रतादिकं अत एव दृश्यं लोकै स्थूलत्वाद्द्रष्टुं योग्यम्॥६॥ कर्मणा शरीरायासेन ॥७॥

कर्मणा मनसा वाचा शुभं वा यदि वाऽशुभम्
जन्मादिमूर्तिभेदान्तं कर्म भूतेषु वर्तते ॥ ८
रक्षोभिर्वध्यमानेषु दृश्यद्रव्येषु वर्त्मसु ।
आत्मस्थमात्मना तेभ्यो दृष्टमायतनं मया ॥ ९
यत्र तद्ब्रह्म निर्द्वन्द्वं यत्र सोमः सहाग्निना ।
व्यवायं कुरुते नित्यं धीरो भूतानि धारयन्
यत्र ब्रह्मादयो युक्तास्तदक्षरमुपासते ।
विद्वांसः सुव्रता यत्र शान्तात्मानो जितेंद्रियाः
घ्राणेन न तदाघ्रेयं नास्वाद्यं चैव जिह्वया ।
स्पर्शनेन तदस्पृश्यं मनसा त्ववगम्यते ॥ १२
चक्षुषामविषह्यं च यत्किंचिच्छ्रवणात्परम् ।
अगन्धमरसस्पर्शमरूपाशब्दलक्षणम् ॥ १३
यतः प्रवर्तते तन्त्रं यत्र च प्रतितिष्ठति ।
प्राणो पानः समानश्च व्यानश्चोदान एव च
तत एव प्रवर्तन्ते तदेव प्रविशन्ति च ।
समानव्यानयोर्मध्ये प्राणापानौ विचेरतुः १५
तस्मिन्लीने प्रलीयेत समानो व्यान एव च ।
अपानप्राणयोर्मध्ये उदानो व्याप्य तिष्ठति ।
तस्माच्छयानं पुरुषं प्राणापानौ न मुञ्चतः १६
प्राणानामायतत्वेन तमुदानं प्रचक्षते ।
तस्मात्तपो व्यवस्यन्ति मद्गतं ब्रह्मवादिनः १७
तेषामन्योन्यभक्षाणां सर्वेषां देहचारिणाम् ।
अग्निर्वैश्वानरो मध्ये सप्तधा दीप्यतेऽन्तरा ॥
घ्राणं जिह्वा च चक्षुश्च त्वक्च श्रोत्रं च पञ्चमम्
मनो बुद्धिश्च सप्तैता जिह्वा वैश्वानरार्चिषः १९
घ्रेयं दृश्यं च पेयं च स्पृश्यं श्रव्यं तथैव च ।
मन्तव्यमथ बोद्धव्यं ताः सप्त समिधो मम ॥
घ्राता भक्षयिता द्रष्टा स्प्रष्टा श्रोता च पञ्चमः
मन्ता बोद्धा च सप्तैते भवन्ति परमर्त्विजः ॥
घ्रेये पेये च दृश्ये च स्पृश्ये श्रव्ये तथैव च ।
मन्तव्येऽप्यथ बोद्धव्ये सुभगे पश्य सर्वदा ॥
हवींष्यग्निषु होतारः सप्तधा सप्त सप्तसु ।
सम्यक्प्रक्षिप्य विद्वांसो जनयन्ति स्वयोनिषु
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम्
मनो बुद्धिश्च सप्तैता योनिरित्येव शब्दिताः ॥
हविर्भूता गुणाः सर्वे प्रविशन्त्यग्निजं गुणम् ।
अन्तर्वासमुषित्वा च जायन्ते स्वासु योनिषु
तत्रैव च निरुध्यन्ते प्रलये भूतभावने ।
ततः सञ्जायते गन्धस्ततः सञ्जायते रसः २६

जन्मादि जन्मस्थितिभङ्गम्। मूर्तिभेदो योनिनानात्वम् ॥८॥ दृश्यानि सोमाज्यादीनि द्रव्याणि येषु वर्त्मसु कर्ममार्गेषु रक्षोभिर्दुर्जनैर्वध्यमानेषु नाश्यमानेषु सत्सु तेभ्यो विरक्तेन मयेति शेष । आयतनं भ्रूघ्राणमध्यस्थमविमुक्ताख्यम् ॥९॥ सोम इडा अग्नि पिङ्गला वरणानासीसंज्ञे सोऽविमुक्ते प्रतिष्ठित सोऽविमुक्त कस्मिन्प्रतिष्ठित इति वरणाया च नास्या मध्ये प्रतिष्ठित इत्यादि भ्रुवोर्घ्राणस्य च य सन्धिरिति जाबालश्रुतिप्रसिद्धे व्यवाय सञ्चारं धीरो बुद्धिप्रेरको भूतानि धारयन्वायु ॥१०॥न तदाघ्रेयं तत् अक्षरम्॥१२॥तंत्र सृष्ट्यादिव्यापार एतदेवाह-**प्राणोऽपान इत्यादिना** ॥ १४ ॥ प्राणापानयो प्रवृत्तिरेव सृष्टि प्रवेश एव प्रलयश्चेति भाव । **समानेति**। नाभिमण्डलस्थ समान कृत्स्नदेहव्यापी व्यान १५ तस्मिन् अपानसहिते प्राणे लीने भ्रूघ्राणमध्ये निरुद्धे सति उदान. सर्वसंधिस्थ इति वचनात् शकुनिश्चर्मेव उदानेन प्राणापानावायतौ यस्मात्कृतौ तस्मात् अनुक्राते उदाने शयानं पुरुषं प्राणापानौ न मुञ्चत । विमुंचत इति पाठे शयानमित्यस्य मृतमित्यर्थ ॥ १६ ॥ **प्राणानामिति** । यत प्राणानामायतत्वम् उदानाधीनं अतस्तं उदानं उत्कर्षेण आनयति चेष्टयते प्राणानिति निर्वचनात्प्रचक्षते यस्मात्प्राणाना जीवोपाधीना एकस्मिन् उदानेऽन्तर्भाव । तस्मात् तप प्राणजयाख्यं भ्रुवोर्मध्ये प्राणमावेश्येत्येवंरूपं आलोचनं वा आत्मनस्ततद्देहादिव्यतिरिक्तत्वस्य ब्रह्मवादिनो मद्गतं मयि मनश्चालके गतं निष्ठा प्राप्तं परात्मप्रापकं व्यवस्थंति निश्चिन्वंतीत्यर्थ ॥ १७ ॥ मद्गतमित्यत्र मच्छब्दार्थ वैश्वानरं दर्शयति-**तेषामिति** । तेषा मध्ये समानस्थाने नाभिमंडले अंतरा तस्यापि मध्ये ॥१८॥ घ्राणघ्रेयघ्रात्रादय सप्त सप्तकरणविषयकर्तृरूपा ॥ १९ ॥ तेषा मध्ये अग्निषु घ्राणाद्यभिमानिदेवतासु हवींषि घ्रेयादीनि होतारो विषयाणामाहातारस्तत्कल्पका इत्यर्थ । अमुमावहामुमावहेत्यावाहयति तदेव होतुर्होतृत्वमिति श्रौतनिर्वचनात् घ्रातोऽहमित्यादयोऽभिमाना तान्सवन्प्रक्षिप्य गुणा गुणेषु वर्तत इति मत्वा ये न सज्जंते ते विद्वांसो ब्रह्मीभूता जनयंति पृथिव्यादीन्वक्ष्यमाणान् स्वयोनिषु स्वं ब्रह्म तदेव योनिर्येषा तेषु अग्निषु ॥ २३ ॥ पृथिव्यादयोपि संघातापन्ना योनिश्चैतन्याभिव्यक्तिस्थानम्॥२४॥ हविर्भूतगुणा घ्रेयादयो विषया. आग्नेजं गुणं गंधादिज्ञानरूपा वीवृत्तिं प्रविशति अंतर्वासमिति णमुलैतं सा वृत्तिश्च सस्कारात्मना चेतसि उषित्वा स्वासु योनिषु घ्राणादिषु जायते दृष्टं रूपादिकं सुषुप्त्यादौ वासनारूपेण चित्ते स्थितं पुनर्जागरे उत्पद्यत इत्यर्थ ॥२५॥ एतदेवाह-तत्रैव अंतरेव तत. अंतर एव ॥ २६ ॥

ततः सञ्जायते रूपं ततः स्पर्शोऽभिजायते ।
ततः सञ्जायते शब्दः संशयस्तत्र जायते ।
ततः सञ्जायते निष्ठा जन्मैतत्सप्तधा विदुः २७

अनेनैव प्रकारेण प्रगृहीतं पुरातनैः ।
पूर्णाहुतिभिरापूर्णास्त्रिभिः पूर्यन्ति तेजसा २८

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्रह्मगीतासु विंशोऽध्यायः ॥ २० ॥

२१

ब्राह्मण उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
निबोध दशहोतॄणां विधानमथ यादृशम् ॥ १

श्रोत्रं त्वक् चक्षुषी जिह्वा
नासिका चरणौ करौ ।
उपस्थं वायुरिति वा
होतॄणि दश भामिनि ॥ २

शब्दस्पर्शौ रूपरसौ
गन्धो वाक्यं क्रिया गतिः ।
रेतोमूत्रपुरीषाणां
त्यागो दश हवींषि च ॥ ३

दिशो वायू रविश्चन्द्रः पृथिव्यग्नी विष्णुरेव च
इन्द्रः प्रजापतिर्मित्रमग्नयो दश भामिनि ॥ ४
दशेन्द्रियाणि होतॄणि हवींषि दश भामिनि ।
विषया नाम समिधो हूयन्ते तु दशाग्निषु ५
चित्तं स्रुवश्च वित्तं च पवित्रं ज्ञानमुत्तमम् ।
सुविभक्तमिदं सर्वं जगदासीदिति श्रुतम् ॥ ६
सर्वमेवाथ विज्ञेयं चित्तं ज्ञानमवेक्षते ।
रेतः शरीरभृत्काये विज्ञाता तु शरीरभृत् ७

संशय संशयात्मक मन निष्ठा निश्चयात्मिका बुद्धि ॥२७॥ **अनेनेति** । अनेन प्रकारेण रूपादिग्रहतत्संस्कारपरंपरया प्रगृहीत घ्राणादीना रूपं पुरातनैर्ऋषिभि वेदादिति शेष । त्रिभिर्मानमेयमातृभि पूर्ण ब्रह्म तस्य आहुतिराव्हानं,आहुतयो वै नामैता यदाहुतय एताभिर्वै देवान्यजमानोऽऽह्वयतीति श्रुते तत् यैस्तै. उपाधिभूतैर्दर्पणैरिव ब्रह्मप्रज्ञापकैरित्यर्थ आपूर्णा सर्वे लोका इति शेष । ते च त्रय तेजसा स्वात्मज्योतिषा पूर्यंति तेनैव सत्तावतो भवन्तीत्यर्थः। एवं दृष्टिसृष्टिरनेन श्लोकेन सूचिता ॥ २८ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे विंशोऽध्याय ॥ २० ॥

२१

पूर्वत्र घ्राणाद्युपाधिर्भूतात्मा घ्राताऽहमित्याद्यभिमानवान् घ्रेयादीन्प्रकल्प्य घ्राणादीस्तर्पयतीत्युक्तम् । इदानी प्राणेभ्यो देवा देवेभ्यो लोका इति श्रुत्यनुसारादिंद्रियाण्येव स्वकल्पितेषु देवेषु देवद्वारा स्वकल्पितान्लोकास्तर्पयंतीत्युक्त्या भूतात्मानि कल्पकत्वं नास्ति अपि तु जडस्यैव तादिति विविनक्ति —**अत्रापीति** । अत्र दृष्टिसृष्टिप्रकारे विवेचनीये ॥ १ ॥ **श्रोत्रमिति** । अथातो विभूतयोऽस्य पुरुषस्य तस्य वाचा सृष्टौ पृथिवी चाग्निश्चेत्यादैतरेयके श्रोत्रेण सृष्टा दिशश्च चन्द्रमाश्चेति वचनात् श्रोत्र सर्वै शब्दै महाप्येतीति कौषीतकीवचनाच्च दिगाद्यात्मके सूत्रात्मनि सविषयाणि श्रोत्रादीनि प्रविलापयेदित्यर्थ ॥ २ ॥ **चित्तमिति** । एतत्प्रविलापनं स्रुवस्थानीयेन चित्तेनैव कर्तव्यं न वायुनिरोधादिना हठेन । मनसैवेंद्रियग्राम विनियम्येति गीताषष्ठोक्ते वित्तं संस्कारा पुण्यपापे वा यथा स्रुवेणाज्यमग्नौ हुत्वा स्रुवमग्निदक्षिणार्थं वित्तं च त्यजति, एव मनसा सविषयाणींद्रियाणि कारणे प्रविलाप्य मन कारणं सुकृतदुष्कृते च त्यजेदिति रूपकद्वारा प्रपचितं एवं कृते यदवशिष्यते तदाह—**पवित्रं ज्ञानमुत्तममिति** । पवित्र असंगं उत्तमं चरमं नात परतरं किंचिदस्ति पुरुषान्नपर किंचिदिति श्रुते सुविभक्तं ज्ञानात् पृथग्भूतं इदं चित्तादिशब्दाद्यन्तम्॥६॥ **सर्वमिति**। अथेति पक्षातरे । विज्ञेयं सर्वं चित्तमेवेति संबंध । ज्ञानं तु तत्प्रकाशकं अवेक्षत एव केवलं न सज्जत इत्यर्थ । नन्वेवं कथं सुविभक्तानामपि ज्ञानज्ञेयाना अविभागप्रत्यय इत्याशंक्य तन्नाय पिंडवत्सान्निध्यमात्रादित्याह-**रेत इत्यादिना** । रेतोजन्ये शरीरेऽभिमानवान् तस्य काये षाट्कौशिके विज्ञाता जीव सूक्ष्मशरीरभृत् लिंगाभिमानी अस्ति ॥ ७ ॥

शरीरभृद्गार्हपत्यस्तस्मादन्यः प्रणीयते ।
मनश्चाहवनीयस्तु तस्मिन्प्रक्षिप्यते हविः ८
ततो वाचस्पतिर्जज्ञे तं मनः पर्यवेक्षते ।
रूपं भवति वैवर्णं समनुद्रवते मनः ॥ ९

ब्राह्मण्युवाच ।

कस्माद्वागभवत्पूर्वं कस्मात्पश्चान्मनोऽभवत्
मनसा चिन्तितं वाक्यं यदा समभिपद्यते ॥
केन विज्ञानयोगेन मतिश्चित्तं समास्थिता ।
समुन्नीता नाध्यगच्छत्को वै तां प्रतिबाधते

ब्राह्मण उवाच ।

तामपानः पतिर्भूत्वा तस्मात्प्रेषत्यपानताम् ।
तां गतिं मनसः प्राहुर्मनस्तस्मादपेक्षते ॥ १२
प्रश्नं तु वाङ्मनसोर्मां यस्मात्त्वमनुपृच्छसि ।
तस्मात्ते वर्तयिष्यामि तयोरेव समाह्वयम् १३
उभे वाङ्मनसी गत्वा भूतात्मानमपृच्छताम् ।
आवयोः श्रेष्ठमाचक्ष्व छिन्धि नौ संशयं विभो
मन इत्येव भगवांस्तदा प्राह सरस्वती ।
अहं वै कामधुक्तुभ्यमिति तं प्राह वागथ ॥

ब्राह्मण उवाच ।

स्थावरं जंगमं चैव विद्धि युग्मे मनोमयी मम ।
स्थावरं मत्सकाशे वै जंगमं विषये तव ॥ १६
यस्तु तं विषयं गच्छेन्मन्त्रो वर्णः स्वरोऽपि वा
तन्मनो जंगमो नाम तस्मादसि गरीयसी ॥
यस्मादपि समाधिस्ते स्वयमभ्येत्य शोभने ।
तस्मादुच्छ्वासमासाद्य प्रवक्ष्यामि सरस्वति
प्राणापानान्तरे देवी वाग्वै नित्यं स्म तिष्ठति
प्रेर्यमाणा महाभागे विना प्राणमपानती ।
प्रजापतिमुपाधावत्प्रसीद भगवन्निति ॥ १९
ततः प्राणः प्रादुरभू-
द्वाचमाप्याययन्पुनः ।
तस्मादुच्छ्वासमासाद्य
न वाग्वदति कर्हिचित् ॥ २०

सोऽपि शरीरभृद्गार्हपत्यः हृदयं हृदयं गार्हपत्य इति गृहपते क्षेत्रज्ञस्यायं देश इति व्युत्पन्नगार्हपत्यशब्देन हृदयशब्दस्य सामानाधिकरण्यश्रुते । तस्मात् हृदयादन्यो मनआख्य । हृदयं निरभिद्यत हृदयान्मनो मनसश्चन्द्रमा इति श्रुते । आहवनीयो मन आयतन तच्च मुखमेव । आस्यमाहवनीय इति श्रुते हवि तेजोबन्नात्मकमदनीयम् । अन्नमयं हि सोम्य मन आपोमय प्राणस्तेजोमयी वागिति श्रुतेर्हविषस्तेजोंशो जाठरं तेज प्राप्य सद्यो वाग्रूपेण परिणमते ॥ ८॥ ततो वाचस्पति वेद प्रथमं जज्ञे मन पार्थिवं तदनंतरं जज्ञे अतो मनोमय सूत्रात्मा वाचमवेक्षते सिसृक्षु सन् ।

'यो ब्रह्माण विदधाति पूर्वं यो वै वेदाश्च प्रहिणोति तस्मै ।
त ह देवमात्मबुद्धिप्रकाश मुमुक्षुर्वै शरणमह प्रपद्ये ' ॥

मनसा वाच मिथुन समभवदिति श्रुते । तत इत्यनुषज्यते मनोऽनंतरं रूप भवति । रूप्यते स्पर्शेनैव प्रथते इति रूप प्राणवायुद्रव्य उत्पद्यते। अन्नापेक्षया अपा जाड्यप्राधान्येन चिरपाकित्वात् तच्च रूपं वैवर्ण वर्णो नीलपीतादिस्तद्रहितं स्वार्थे तद्धित तद्रूपं कर्तृ मन प्रति समनुद्रवति विपरीतं वा। रुद्धे चित्तेऽनिलो रुद्धो रुद्धं रुद्धेऽनिले मन इत्युक्ते ॥९॥अत्र मन एव पूर्वरूपं वागुत्तररूपं मनसा वा इषिता वाग्वदतीति श्रुतिं लौकिकमनुभवं चानुरुध्य शकते-**कस्मादिति**॥१०॥ विज्ञानयोगेन प्रमाणेन मति प्राण समुन्नीता सुषुप्तौ उद्रिक्ता सती विषयान्कुतो नाध्यगच्छत् को वै ता प्रतिबाधते सुषुप्तौ को वा प्राणस्य ज्ञानशक्तिमपहरतीत्यर्थ ॥ ११ ॥ स्वल्पत्वात्केनेत्यस्योत्तरमादावाह—**तामपान इति**। अपानवशग प्राणो न सुषुप्तौ मनोलयाल्लीयते अपानं तु स्ववशे कृत्वा समाधौ मनोलये सति लीयत एवेत्यर्थ । तस्मात्पतिभावाद्धेतो प्रेषति नयति ता गतिमिति ता प्राणाख्या गतिं मनसो गतिं बहिर्गमनसाधनं प्राहु न हि वायुबलेनानुन्मीलिते नयने मनोवृत्तिर्ध्रुवमण्डलपर्यंत गंतुं समर्था ता मतिमित्यपपाठ ॥१२॥ कस्मादित्यस्योत्तरमाख्यायिकामुखेनाह—**प्रश्नं त्वित्यादिना** । समाह्वयं सम्यक् सुखं आह्वयन्ते विजिगीषवोऽस्मिन्निति समाह्वय सवादस्तम्॥ १३ ॥ भूतात्मानं जीवम् ॥१४॥ तन्मते मन श्रैष्ठ्यमनुभवसिद्धं वाचो मते दृष्टादृष्टे फलोपायो मयैव बोद्धुं शक्य इति **स्वस्यैव श्रैष्ठ्यम्** ॥ १५ ॥ द्वयोर्विषयविभागेन साम्यमापादयन्मनआख्यो ब्राह्मण उवाच स्थावरं बाह्येन्द्रियग्राह्य जङ्गमं अतीन्द्रियं स्वर्गादि ॥ १६ ॥ यद्यपि स्वर्गादिकमपि मनसो विषय तथापि वाचमेव द्वारीकृत्य तस्य तथात्वमस्ति अतो वागेव गरीयसीत्याह—**यस्त्विति** । मन्त्रादिप्रकाशितं विषयं गच्छन्मनोऽपि जङ्गमं भवतीत्यर्थ ॥ १७ ॥ समाधिः कामधुगस्मीति स्वपक्षपुष्टि तेनाहं मूर्छित इवास्मि यस्मात्तस्मादुच्छ्वासमासाद्येति योजना ॥ १८ ॥ तथापि मनोवृत्तिविशेषयो प्राणापानयोरतरेव वागस्ति। स्वपिति वा प्राणे तदा वाक् भवति प्राणस्तदा वाचं रेल्हीति श्रुतेरित्याह—**प्राणापानेति**। रेल्हि लेढि अपानती प्राणेन अनाप्यायिता सती तारमंद्रत्वादिभावं व्युत्सृज्यात्यंतं नीचैस्तरा भवतीत्यर्थ ॥ १९ ॥ व्यतिरेकमुक्त्वाऽन्वयमाह—**तत इति** । तस्मादप्राणवनपानन्वाचमभिव्याहरतीति श्रुतेः यस्मादेवं तस्मादुच्छ्वासं प्राणव्यापारमासाद्य न वाग्वदति२०

घोषिणी जातनिर्घोषा नित्यमेव प्रवर्तते ।
तयोरपि च घोषिण्या निर्घोषैव गरीयसी २१
गौरिव प्रसवत्यर्थान् रसमुत्तमशालिनी ।
सततं स्यन्दते ह्येषा शाश्वतं ब्रह्मवादिनी २२
दिव्यादिव्यप्रभावेन भारती गौः शुचिस्मिते
एतयोरन्तरं पश्य सूक्ष्मयोः स्यन्दमानयोः ॥

ब्राह्मण्युवाच ।

अनुत्पन्नेषु वाक्येषु चोद्यमाना विवक्षया ।
किंनु पूर्वं तदा देवी व्याजहार सरस्वती २४

ब्राह्मण उवाच ।

प्राणेन या संभवते शरीरे
प्राणादपानं प्रतिपद्यते च ।
उदानभूता च विसृज्य देहं
व्यानेन सर्वं दिवमावृणोति ॥ २५
ततः समाने प्रतितिष्ठतीह
इत्येव पूर्वं प्रजजल्प वाणी ।
तस्मान्मनः स्थावरत्वाद्विशिष्टं
तथा देवी जंगमत्वाद्विशिष्टा ॥ २६

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्राह्मणगीतासु एकविंशोऽध्यायः ॥ २१ ॥



२२

ब्राह्मण उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् । सुभगे सप्तहोतॄणां विधानमिह यादृशम् ॥ १

घोषिणी स्थूलघोषवती जात निर्घोषो घोषाभावो यस्या सा अघोषेति यावत्। तयोर्घोषिणी प्राणाप्यायनमपेक्षते तद्विना विच्छिद्यते निर्घोषा तु हसमन्त्ररूपा सर्वास्वप्यवस्थासु प्रवर्तत इति गरीयसी ॥ २१ ॥ घोषिण्यपि गुर्वीत्याह— **गौरिवेति** । वाचं धेनुमुपासीत तस्याश्चत्वार स्तना स्वाहाकार स्वधाकारो हंतकारो वषट्कार इति श्रुते । स्तनैस्तत्तत्कर्मफलरूपं रसं अर्थान् रसमिति समानाधिकरणे द्वितीये प्रस्रवति ब्रह्मवादिनी उपनिषद्वाक् तु शाश्वतं मोक्षं स्यंदते प्रस्रवति सततं नित्यमिद्धम् ॥२२॥ दिव्यं देवताद्याकर्षणादि अदिव्य व्यवहारादि सामर्थ्यं तदुभयरूपो यः प्रभावस्तेन । एतयो वाङ्मनसयोः ॥ २३ ॥ व्याजहार स्वस्य वृत्तिलाभार्थं किं नु तत्त्व विशेषेण आजहार आहृतवती ॥२४॥ आत्मा बुद्ध्या समेत्यार्थान्मनो युक्ते विवक्षया । मन कायाग्निमाहन्ति स प्रेरयति मारुतमिति शिक्षोक्तेर्मन - प्रवर्तिता प्राणाद्या एव वाचं निर्वर्तयन्तीत्याह— **प्राणेनेति** । श्रान्तो हि विवक्षुर्बाह्यं वायुमाचामति । स पुनर्नाभिस्थाने प्राणापानग्रन्थ्याधारे अपानेन सहैक्यं प्राप्य मनसा मनोभिहतकायाग्निप्रेरित ऊर्ध्वमुत्लुत्य उर·कण्ठशिर - स्थानेष्वभिघातं प्राप्य मन्द्रमध्यमतारभेदेन ध्वनिमुत्पाद्याधस्तान्मुखबिलमेत्य ताल्वादिस्थानानुरोधी मन्द्रध्वनिधर्मवतो वर्णानभिव्यज्य वेगवत्त्वस्वाभाव्याद्बहि प्रस्थित श्रोत्रस्थानानि संस्कृत्य वर्णाननुभाव्य वेगक्षये पुन समानस्थान मेव पूर्ववत्प्रतिपद्यते सोयमर्थ· श्रीभागवतेप्युक्त -स एष जीवो विवरप्रसूति प्राणेन घोषेण गुहा प्रविष्ट । मनोमयं सूक्ष्ममुपेत्य रूपं मात्रा स्वरो वर्ण इति स्थविष्ठ· इति ॥२५॥ इत्येव इत्थमेव पूर्वं वाणी स्वोत्पत्तिप्रकारं प्रजजल्प, वाच. प्राणाधीनत्वमपि वाच प्रभावादेव विदितमित्यर्थ, यत्र सोम सहाग्निनेत्युक्तौ सोमाग्नी इडा पिंगलाधिपती मनोवाक्शब्दाभ्यामुपसंहरति—**तस्मादिति** । किमर्था वयमध्येष्यामहे किमर्था वयं यक्ष्यामहे वाचि हि प्राणं जुहुम प्राणो वावयोर्ह्येव प्रभव स एवाप्यय इति श्रुते । यथा स्थंडिलस्थो वह्निर्वायुना स्थालीस्थो वायुश्च वह्निना समिध्यते अन्यतरनाशे च द्वयोरपि नाश एवं स्वर्गाद्यर्थवादैर्मन संधुक्ष्यते ततो वागादीन् व्यापारयति तत्र वाच प्रवर्तकस्य वायोर्निरोधे मनोरोधे वा वाङ्निरुध्यते तावतैव संसारादर्शनरूपेष्टार्थसिद्धौ किं यज्ञादिना । श्रुतौ तु वाक्शब्देन तत्कारणं मनो ज्ञेयम्। एवं च वाङ्मनसयो प्रत्येकं पुरुषार्थहेतुत्वाद्विशिष्टत्वमविशिष्टम् ॥ २६ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे एकविंशोऽध्याय ॥ २१ ॥

२२

इदानीं पूर्वोक्तघ्राणादिसप्तकस्य अन्वयव्यतिरेकाभ्यामितरेतरकार्यकारित्वं नास्तीत्युक्त्वा बुद्धिं मनस्यंतर्भाव्य इतरेषा पंचाना मनोधीनत्वं मनसोपि व्यावहारिकार्थप्रकाशकत्वमितराधीनमितींद्रियमन संवादेन तेषामन्योन्याव्यतिरेकमुक्त्वा पूर्वोक्तमेवान्यतरजयेनोभयजयफलं सिध्यतीति प्रतिपादनार्थोऽयं सप्तहोत्राध्याय आरभ्यते—**अत्रापीति** । अत्र वाङ्मनसयो समप्राधान्ये विवेचनीये ॥१॥

घ्राणश्चक्षुश्च जिह्वा च त्वक् श्रोत्रं चैव पञ्चमं
मनो बुद्धिश्च सप्तैते होतारः पृथगाश्रिताः ॥२
सूक्ष्मेऽवकाशे तिष्ठन्तो न पश्यन्तीतरेतरम् ।
एतान्वै सप्तहोतॄंस्त्वं स्वभावाद्विद्धि शोभने ॥
ब्राह्मण्युवाच ।
सूक्ष्मेऽवकाशे सन्तस्ते कथं नान्योन्यदर्शिनः
कथंस्वभावा भगवन्नेतदाचक्ष्व मे प्रभो ॥ ४
ब्राह्मण उवाच ।
गुणाज्ञानमविज्ञानं गुणज्ञानमभिज्ञता ।
परस्परं गुणानेते नाभिजानंति कर्हिचित् ५
जिह्वा चक्षुस्तथा श्रोत्रं वाङ्मनो बुद्धिरेव च
न गंधानधिगच्छन्ति घ्राणस्तानधिगच्छति ६
घ्राणं चक्षुस्तथा श्रोत्रं वाङ्मनो बुद्धिरेव च ।
न रसानधिगच्छन्ति जिह्वा तानधिगच्छति
घ्राणं जिह्वा तथा श्रोत्रं वाङ्मनो बुद्धिरेव च
न रूपाण्यधिगच्छन्ति चक्षुस्तान्यधिगच्छति
घ्राणं जिह्वा ततश्चक्षुः श्रोत्रं बुद्धिर्मनस्तथा ।
न स्पर्शानधिगच्छन्ति त्वक् तानधिगच्छति
घ्राणं जिह्वा च चक्षुश्च वाङ्मनो बुद्धिरेव च ।
न शब्दानधिगच्छन्ति श्रोत्रं तानधिगच्छति
घ्राणं जिह्वा च चक्षुश्च त्वक् श्रोत्रं बुद्धिरेव च
संशयं नाधिगच्छन्ति मनस्तमधिगच्छति ॥
घ्राणं जिह्वा च चक्षुश्च त्वक् श्रोत्रं मन एव च
न निष्ठामधिगच्छन्ति बुद्धिस्तामधिगच्छति ॥
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
इंद्रियाणां च संवादं मनसश्चैव भामिनि १३
मन उवाच ।
नाघ्राति मामृते घ्राणं रसं जिह्वा न वेत्ति च
रूपं चक्षुर्न गृह्णाति त्वक् स्पर्शं नावबुध्यते ॥
न श्रोत्रं बुध्यते शब्दं मया हीनं कथंचन ।
प्रवरं सर्वभूतानामहमस्मि सनातनम् ॥ १५
अगाराणीव शून्यानि शांतार्चिष इवाग्नयः ।
इंद्रियाणि न भासन्ते मया हीनानि नित्यशः
काष्ठानीवार्द्रशुष्काणि यतमानैरपीन्द्रियैः ।
गुणार्थान्नाधिगच्छन्ति मामृते सर्वजंतवः १७
इन्द्रियाण्यूचुः ।
एवमेतद्भवेत्सत्यं यथैतन्मन्यते भवान् ।
ऋतेस्मानस्मदर्थास्त्वं भोगान् भुक्ते भवान् यदि
यद्यस्मासु प्रलीनेषु तर्पणं प्राणधारणम् ।
भोगान् भुंक्ते भवान् सत्यं यथैतन्मन्यते तथा
अथवाऽस्मासु लीनेषु तिष्ठत्सु विषयेषु च ।
यदि संकल्पमात्रेण भुंक्ते भोगान् यथार्थवत् ॥
अथ चेन्मन्यसे सिद्धिमस्मदर्थेषु नित्यदा ।
घ्राणेन रूपमादत्स्व रसमादत्स्व चक्षुषा ॥ २१
श्रोत्रेण गन्धानादत्स्व स्पर्शानादत्स्व जिह्वया
त्वचा च शब्दमादत्स्व बुद्ध्या स्पर्शमथापि च
बलवन्तो ह्यनियमा नियमा दुर्बलीयसाम् ।
भोगानपूर्वानादत्स्व नोच्छिष्ट भोक्तुमर्हति ॥
यथा हि शिष्यः शास्तारं श्रुत्यर्थमभिधावति ।
ततः श्रुतमुपादाय श्रुत्यर्थमुपतिष्ठति ॥ २४
विषयानेवमस्माभिर्दर्शितानभिमन्यसे ।
अनागतानतीतांश्च स्वप्ने जागरणे तथा ॥२५
वैमनस्यं गतानां च जन्तूनामल्पचेतसाम् ।
अस्मदर्थे कृते कार्ये दृश्यते प्राणधारणम् ॥ २६
बहूनपि हि संकल्पान् मत्वा स्वप्नानुपास्य च
बुभुक्षया पीड्यमानो विषयानेव धावति २७
अगारमद्वारमिव प्रविश्य
संकल्पभोगान् विषये निबद्धान् ।
प्राणक्षये शान्तिमुपैति नित्यं
दारुक्षयेऽग्निर्ज्वलितो यथैव ॥ २८
कामं तु नः स्वेषु गुणेषु संगः
कामं च नान्योन्यगुणोपलब्धिः ।
अस्मान्विना नास्ति तपोपलब्धि-
स्तावद्वदते त्वां न भजेत्प्रहर्षः ॥ २९

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्राह्मणगीतासु द्वाविंशोऽध्यायः ॥ २२ ॥

दुर्बलीयसामस्माकं नियमा बलवंत. श्रेष्ठा· अनियमा अपराधीना. ॥२३॥ अगारं हार्दाकाशं सुषुप्तौ मोक्षे च प्रविश्य । य एषोंतर्हृदय आकाशस्तस्मिन् शेते त्रिपादस्यामृत दिवीति श्रुतिभ्याम्। अद्वारामिव बाह्येन्द्रियवर्जितामिव स्वप्नसंप्रज्ञातयोरिव व्युत्थानेपि इन्द्रियाणा वासनामात्ररूपत्वेपि भ्रातिसिद्धं स्थौल्यमपेक्ष्य इवशब्द· संकल्पजान् भोगान् विषये निबद्धान् विषयवासनानुविद्धान् भुक्त्वा प्राणक्षये मन प्रक्षये सुषुप्तावसंप्रज्ञाते वा शातिमुपैति एवं दन्तानित्यादिश्लोके सूत्रितम् आहारशुद्धे सत्त्वशुद्धिहेतुत्वं तत् आदित एवं स्वस्याकर्तृत्वभावनयाऽनमश्नत सिध्यति शुद्धचित्तस्य त्वयमेव बोधप्रकार इत्युक्तम् ॥ २८ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे द्वाविंशोऽध्याय ॥ २२ ॥

२३

ब्राह्मण उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
सुभगे पञ्चहोतॄणां विधानमिह यादृशम् ॥ १
प्राणापानावुदानश्च समानो व्यान एव च ।
पञ्चहोतॄंस्तथैतान्वै परं भावं विदुर्बुधाः ॥ २
ब्राह्मण्युवाच ।
स्वभावात्सप्तहोतार इति मे पूर्विका मतिः ।
यथा वै पञ्चहोतारः परो भावस्तदुच्यताम् ३
ब्राह्मण उवाच ।
प्राणेन सम्भृतो वायुरपानो जायते ततः ।
अपाने सम्भृतो वायुस्ततो व्यानः प्रवर्तते ४
व्यानेन सम्भृतो वायुस्ततोदानः प्रवर्तते ।
उदाने सम्भृतो वायुः समानो नाम जायते ५
तेऽपृच्छन्त पुरा सन्तः पूर्वजातं पितामहम् ।
यो नः श्रेष्ठस्तमाचक्ष्व स नः श्रेष्ठो भविष्यति
ब्रह्मोवाच ।
यस्मिन्प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
यस्मिन्प्रचीर्णे च पुनश्चरन्ति
स वै श्रेष्ठो गच्छत यत्र कामः ॥ ७
प्राण उवाच ।
मयि प्रलीने प्रलय व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रचीर्णे च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ ८
ब्राह्मण उवाच ।
प्राणः प्रालीयत ततः पुनश्च प्रचचार ह ।
समानश्चाप्युदानश्च वचोऽब्रूतां पुनः शुभे ॥ ९
न त्वं सर्वमिदं व्याप्य तिष्ठसीह यथा वयम् ।
न त्वं श्रेष्ठो हि नः प्राण अपानो हि वशे तव
प्रचचार पुनः प्राणस्तमपानोऽभ्यभाषत ॥ १०
अपान उवाच ।
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रचीर्णे च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ ११
ब्राह्मण उवाच ।
व्यानश्च तमुदानश्च भाषमाणमथोचतुः ।
अपान न त्वं श्रेष्ठोऽसि प्राणो हि वशगस्तव
अपानः प्रचचाराथ व्यानस्तं पुनरब्रवीत् ।
श्रेष्ठोऽहमस्मि सर्वेषां श्रूयतां येन हेतुना १३
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणा प्राणभृतां शरीरे ।
मयि प्रचीर्णे च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ १४

२३

तालु जिह्वा चेत्यत्र सूत्रितमर्थं व्याकरोत्यध्यायद्वयेन— **अत्रापीति** । अत्र प्राणक्षये वक्तव्ये तत्र छान्दोग्ये प्राणाग्निहोत्रविद्याया प्राणापानव्यानोदानसमाना क्रमेणाविलोकं द्युभूमिदिगाकाशविद्युद्रूपा समाम्नाता तेषा प्राणापानौ अन्योन्याधीनौ। पूरके रेचके वा क्रियमाणे अपानार्कयानिरोधात् अपाने च विरेच्यमाने प्राणगतिनिरोधात्। पार्ष्णिभागेन संपीड्य योनिमाकुंचयेद्दृढमित्यादिप्रकारेण मूलबंधेन तयोरेकीकृतयोरुर्ध्वा गतिर्भवति । तदेतत्प्राणापानयोरुदानाधीनत्वं प्रागेवोक्तं-**अपानप्राणयोर्मध्ये उदानो व्याप्य तिष्ठतीति** । एवं द्युभुवो पर्जन्ययज्ञद्वारा परस्पराश्रितयोरपि आकाशाश्रितत्व तथा नाभिदेशमात्रवर्त्ती समान सर्वागव्यापिनो व्यानस्य वशेऽस्ति व्यानोऽपि सर्वसंधिव्यापिन्युदाने समुच्चत्वादुच्चलति तद्व्याप्यत्वात्समानोऽप्युच्चलति एवं विद्युद्दिगाश्रिता दिक् आकाशाश्रिता । इदमेव सर्वेषामुदानाधीनत्व श्रुत्या तथया सुहयपड्वीशंकून्मखीदेदिति दृष्टान्तेनोपपादितम्। उदानोऽपि भ्रूघ्राणसन्धौ निरुध्यते यदा तदा तत्स्थो ब्रह्मणि द्युभूम्यादिसहित आकाशो निरुध्यते एवं च तस्यामवस्थाया सर्वप्रपञ्चप्रविलयायोगी कृतकृत्यो भवतीति प्रघट्टकतात्पर्य, तत्रैवं सति त्रेधा भावना प्रवर्तते प्राणाय स्वाहेत्यादिभिर्मन्त्रै प्राणाग्निहोत्रं कुर्वन्ननेनावदानेन सर्वं द्युप्रभृति तृप्यतीति भावनया शुद्धचित्तो भवत्यन्नदोषैश्च न लिप्यते इत्येक प्रकार । चपलं मन पूर्वोक्तखेचरीमुद्रया हठयोगेन निरोद्धव्यमिति द्वितीय । अनुपदोक्त कृत्स्नप्रपञ्चविलयस्तृतीय । एतेषामधिकारिभेदाद्व्यवस्था। एवं सर्वापि विद्यादेवाधिभूताध्यात्मभेदेन त्रिविधाधिकारभेदात् ज्ञेया ॥ १ ॥
अक्षरार्थ स्पष्ट एव पञ्चानामप्येषामेकस्यापि निरन्वयोच्छेदे सर्वेषामुच्छेदो भवतीति सर्वेषा प्रत्येकं मयि प्रलीने **प्रलयं व्रजंतीत्युक्ति** संगच्छते ॥ ८ ॥

ब्राह्मण उवाच ।
प्रालीयत ततो ध्यानः पुनश्च प्रचचार ह ।
प्राणापानावुदानश्च समानश्च तमब्रुवन् ॥ १५
न त्वं श्रेष्ठोऽसि नो ध्यान समानस्तु वशे तव
प्रचचार पुनर्ध्यानः समानः पुनरब्रवीत् ।
श्रेष्ठोऽहमस्मि सर्वेषां श्रूयतां येन हेतुना १६
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रचीर्णे च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ १७
समानः प्रचचाराथ उदानस्तमुवाच ह ।
श्रेष्ठोऽहमस्मि सर्वेषां श्रूयतां येन हेतुना १८
मयि प्रलीने प्रलयं व्रजन्ति
सर्वे प्राणाः प्राणभृतां शरीरे ।
मयि प्रचीर्णे च पुनश्चरन्ति
श्रेष्ठो ह्यहं पश्यत मां प्रलीनम् ॥ १९
ततः प्रालीयतोदानः पुनश्च प्रचचार ह ।
प्राणापानौ समानश्च ध्यानश्चैव तमब्रुवन् ।
उदान न त्वं श्रेष्ठोऽसि ध्यान एव वशे तव ॥
ब्राह्मण उवाच ।
ततस्तानब्रवीद्ब्रह्मा समवेतान्प्रजापतिः ।
सर्वे श्रेष्ठा न वा श्रेष्ठाः सर्वे चान्योन्यधर्मिणः
सर्वे स्वविषये श्रेष्ठाः सर्वे चान्योन्यधर्मिणः ।
इति तानब्रवीत्सर्वान्समवेतान्प्रजापतिः २२
एकः स्थिरश्चास्थिरश्च विशेषात्पञ्च वायवः ।
एक एव ममैवात्मा बहुधाऽप्युपचीयते ॥ २३
परस्परस्य सुहृदो भावयन्तः परस्परम् ।
स्वस्ति व्रजत भद्रं वो धारयध्वं परस्परम् ॥

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्राह्मणगीतासु त्रयोविंशोऽध्यायः ॥ २३ ॥

२४

ब्राह्मण उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
नारदस्य च संवादमृषेर्देवमतस्य च ॥ १
देवमत उवाच ।
जन्तोः सञ्जायमानस्य किं नु पूर्वं प्रवर्तते ।
प्राणोऽपानः समानो वा व्यानो वोदान एव च
नारद उवाच ।
येनायं सृज्यते जन्तुस्ततोऽन्यः पूर्वमेति तम्
प्राणद्वन्द्वं हि विज्ञेयं तिर्यगूर्ध्वमधश्च यत ३
देवमत उवाच ।
केनायं सृज्यते जन्तुः कश्चान्यः पूर्वमेति तम्
प्राणद्वन्द्वं च मे ब्रूहि तिर्यगूर्ध्वमधश्च यत ॥ ४
नारद उवाच ।
सङ्कल्पाज्जायते हर्षः शब्दादपि च जायते ।
रसात्सञ्जायते चापि रूपादपि च जायते ५

एवमेषा सत्यपि प्रत्येक श्रैष्ठ्ये स्वातंत्र्याभावादश्रैष्ठ्यमप्यस्तीत्याशयेनाह-**सर्वे श्रेष्ठा न वा श्रेष्ठा इति** ॥२१॥ वस्तुवृत्तं तु मनोमात्रत्वमेव प्राणानामित्याह—**एक एव ममैवात्मेति** ॥ २३ ॥ आख्यायिकातात्पर्यं तु यथा एक एव प्राणोऽध्यात्ममुपाधिभेदात्पञ्चधाभूतोन्योन्यस्माद्व्यावर्तते एवं परमात्मापि औपाधिकमनेकधाभावं प्राप्य मिथो हर्षविषादभोक्तृभोग्यभावं भजत इति तस्मादैकात्म्यबुद्ध्या सर्वैं सर्वत्रानुकंपा कार्येत्युपसंहरति—**धारयध्वं परस्परमिति** ॥ २४ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे त्रयोविंशोऽध्याय ॥ २३ ॥

२४

उक्तमैकात्म्यमध्यारोपापवादाभ्या प्रपञ्चयति—**अत्रेति** ॥ १ ॥ जतो समष्टिव्यष्टिशरीरिण ॥ २ ॥ येन निमित्तेन कारणेन ततो निमित्तादन्योपि तं तत्प्रति पूर्वं प्राक् निमित्तत्वेन एति किं तद्द्वयं प्राणद्वंद्वं च किं तिर्यङ्मनुष्यादि ऊर्ध्वं देवादि, अध पश्वादि एतेषां रूपं च यत्तद्विज्ञेयं, यद्वा तिर्यगित्यादिना विभुत्वमेवोच्यते ॥ ३ ॥ उत्तरं संकल्पाज्जायते हर्ष इति । हर्षः आनंद स एव संकल्पात् जंतुरित्यनुकृष्यते जंतुरूपेणाविर्भवतीत्यर्थ । 'आनंदाद्धयेव खल्विमानि भूतानि जायंते' 'सोऽकामयत बहु स्या प्रजायेय' इति 'सच्च त्यच्चाभवत्' इत्यादिश्रुतिभ्य आनंदमात्रं ब्रह्मैव मायया ईक्षणपूर्वकं ब्रह्माडपिंडाकारत्वं प्राप्नोति।

शुक्राच्छोणितसंसृष्टात्पूर्वं प्राणः प्रवर्तते ।
प्राणेन विकृते शुक्रे ततोऽपानः प्रवर्तते ॥ ६
शुक्रात्सञ्जायते चापि रसादपि च जायते ।
एतद्रूपमुदानस्य हर्षो मिथुनमन्तरा ॥ ७
कामात्सञ्जायते शुक्रं शुक्रात्सञ्जायते रजः ।
समानव्यानजनिते सामान्ये शुक्रशोणिते ८
प्राणापानाविदं द्वन्द्वमवाक् चोर्ध्वं च गच्छतः
व्यानः समानश्चैवोभौ तिर्यग्द्वन्द्वत्वमुच्यते ९
अग्निर्वै देवताः सर्वा इति देवस्य शासनम् ।
सञ्जायते ब्राह्मणस्य ज्ञानं बुद्धिसमन्वितम् १०
तस्य धूमस्तमो रूपं रजो भस्मसु तेजसः ।
सर्वं सञ्जायते तस्य यत्र प्रक्षिप्यते हविः ११
सत्त्वात्समानो व्यानश्च इति यज्ञविदो विदुः
प्राणापानावाज्यभागौ तयोर्मध्ये हुताशनः १२
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ।
निर्द्वन्द्वमिति यत्त्वेतत्तन्मे निगदतः शृणु १३
अहोरात्रमिदं द्वन्द्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १४
सच्चासच्चैव तद्वन्द्वं तयोर्मध्ये हुताशनः ।
एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १५
ऊर्ध्वं समानो व्यानश्च व्यस्यते कर्म तेन तत्
तृतीयं तु समानेन पुनरेव व्यवस्यते ॥ १६

रविरिव सूर्यकातद्वारा वह्निप्रदीपाकारत्वमिति भाव । शब्दादपि च जायते वैदिकशब्दपूर्विकापि प्रलयाग्निदग्धभौतिकसृष्टि प्रजापतिद्वारा जायते एत इति वै प्रजापतिर्देवानसृजतेत्यादिश्रुतेस्तक्षकदग्धो वट इव काश्यपमंत्रादित्यर्थ । रसात् रूपात् तत्तद्विषयवासनात इदं च पर्जन्यवदीश्वरस्य साधारणेऽपि कारणत्वे बीजवदसाधारण ज्ञेयम् ॥५॥ शुक्रं अदृष्टं शोणितं रागादि वासनामिश्रमदृष्टमवष्टभ्य प्राणो लिंगात्मा प्रवर्तते स्रष्टुं तेन प्राणेन विकृते जन्माद्यपक्षयान्तान्विकारान्प्रापिते शुक्रे सवासनकर्मजे देहे अपानो मृत्युश्वरमभावविकारो नाशाख्य प्रवर्तते ॥ ६ ॥ एवं सति पुनस्तस्मिन् जन्मन्युपचितात् शुक्रात् रसाच्च यथोक्ताज्जायते एतद्रूप उदानस्य ब्रह्मण आरोपितं रूपमित्यर्थ । किं तदत आह–हर्षो मिथुनमंतरेति। मिथुनं उक्तरूपं कारणं कार्यं च अंतरा तयोर्मध्ये हर्षो व्याप्य तिष्ठतीत्यर्थ । ते यदंतरा तद्ब्रह्मेति श्रुते । ते नामरूपे ॥ ७ ॥ प्रवृत्तिमूलात्कामात् शुक्रं अदृष्टं अदृष्टाच्च रज प्रवृत्तिरिति कामकर्मणी प्रवाहेण वर्तेते इत्यर्थ. । एतयोर्मूलं समानव्यानौ ताभ्या तदात्मके विद्युत् श्रोत्रे लक्ष्यते ततश्च दृष्टानुश्रविकाविषयं विज्ञानं कामप्रवृत्त्योर्बीजमित्यर्थ । तथाचाहु.–जानातीच्छति प्रयतत इति ॥८॥ प्राणापानाविति। इदमेव कामप्रवृत्त्याख्यं द्वंद्वं प्राप्य प्राणापानावेव जीवोपाधिभूतौ ऊर्ध्वाधोगतिं गच्छतो न तु जीवः घटो नीयेत नाकाशं तद्वज्जीवो नभोपम इति श्रुते विभोश्चिद्रूपस्य जीवस्याकाशवद्गत्ययोगात् समानव्यानौ उक्तरीत्या दृष्टं श्रुतं च। तावुभौ तिर्यक् अनूर्ध्वं अब्रह्म अतत्प्रापकत्वात्। अत एव द्वंद्वत्वं द्वंद्वं द्वैतं तद्भाव इति उच्यते वेदे ॥ ९ ॥ ननु सर्वं दृष्टं श्रुतं च तिर्यग्द्वंद्वं नेत्याह—**अग्निर्वा इति**। अग्नि. परमात्मा तस्यैव देवस्य शासनं आज्ञा। नि श्वसितमेतद्यदृग्वेद इति श्रुते. । श्रुतिस्मृती ममैवाज्ञे इति स्मृतेश्च तदाज्ञारूपो वेदः । इदं सर्वं यदयमात्मा सर्वं खल्विदं ब्रह्मेत्यादिरैकात्म्यं प्रतिपादयतीत्यर्थ । तस्य च देवस्य ज्ञानं बुद्धिसमन्वितं च परमर्षावृत्तियुक्तं तत एव वेदाज्जायत इत्यर्थ ॥ १० ॥ तदेवाह—**तस्येति** । यथा धूमभस्मनी अग्निरूपबहिर्भूते एवं तमोरजसी लयविक्षेपहेतुतया चिद्रूपाद्बहिर्भूते इत्यर्थ । **सर्वमिति** । तस्य तस्मात् यत्र अग्नौ मुख्ये भोक्तरि हविर्भोग्यं तस्मात्सर्वं संजायते इदं सर्वमित्यादृताद्भुतेरित्यर्थ ॥ ११ ॥ **सत्त्वादिति** । यज्ञो जीवब्रह्मणो संगतिकारणरूपो योग समानव्यानाख्यं सर्वं दृष्टं श्रुतं च बुद्धिसत्त्वादेव भवतीति योगिनामनुभवसिद्धमित्यर्थ । अयं भाव –वेदे ऐनज्योतिष्टोमदहरोपासनादीनि तमोरज सत्त्वप्रधानपुरुषयोग्यानि वर्तन्ते तेषु तेषु यज्ञविदा सात्त्विकमेव साधनं बहुमतं नेतरदिति—**प्राणापानाविति** । यथाऽग्निराज्यभागाभ्यामुद्दीप्यते एवं पूर्वोपाधिप्रविलापनरूपप्राणापानजयेन उदानाख्यं परं ब्रह्म भ्रूमध्ये दृष्ट्वा प्रकाशत इत्यर्थ । एवं च केनायं सृज्यत इत्यस्योत्तरं संकल्पादिति कश्चान्य इत्यस्य तन्मूलभूते कामकर्मणी प्राणद्वंद्वं च सात्त्विकं तत् द्वयं समानव्यानाख्यं तिर्यगित्यादेरुत्तर हर्षो मिथुनमंतरेति च व्यक्तम् ॥१२॥ अहोरात्रं विद्याविद्ये सुप्तिजागरौ उत्पत्तिप्रलयौ वा ॥ १४ ॥ सत् कार्ये असत्कारणं हुताशन हुते प्रविलापिते कार्यकारणे अश्नाति निरन्वयं निगिलति न तु राहुवत्पुनरुद्गिरतीति हुताशन शुद्धं ब्रह्म । उदानस्य उत्कर्षेण आनयति चेष्टयतीत्युदान परम आनंद । को ह्येवान्यात्क प्राण्यात् यदेष आकाश आनंदो न स्यादिति श्रुते ॥ १५ ॥ **ऊर्ध्वमिति** । तत ऊर्ध्वं ब्रह्म येन हेतुना संकल्पाख्येन समानो व्यानश्च भवति व्यानेन सर्वा दिवमावृणोति तत समाने प्रतितिष्ठतीत्युक्तेः कारणं कार्यं च भवति तेनैव हेतुना कर्म व्यस्यते विस्तार्यते तस्मात्संकल्पो निरोद्धव्य नि संकल्पस्तटस्थस्तिष्ठेदेव तन्मोक्षलक्षणमिति श्रुतेरिति भाव । ननु सुषुप्तावपि नि संकल्पताऽस्तीत्यत आह–**तृतीयमिति** । तृतीयं ऊर्ध्वं तुशब्दः

शान्त्यर्थं ध्यानमेकं च शान्तिर्ब्रह्म सनातनम् । एतद्रूपमुदानस्य परमं ब्राह्मणा विदुः ॥ १७

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्राह्मणगीतासु चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

ब्राह्मण उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
चातुर्होत्रविधानस्य विधानमिह यादृशम् १
तस्य सर्वस्य विधिवद्विधानमुपदिश्यते ।
शृणु मे गदतो भद्रे रहस्यमिदमद्भुतम् ॥ २
करणं कर्म कर्ता च मोक्ष इत्येव भाविनि ।
चत्वार एते होतारो यैरिदं जगदावृतम् ॥ ३
हेतूनां साधनं चैव शृणु सर्वमशेषतः ।
घ्राणं जिह्वा च चक्षुश्च त्वक्च श्रोत्रं च पञ्चमम्
मनो बुद्धिश्च सप्तैते विज्ञेया गुणहेतवः ॥ ४
गन्धो रसश्च रूपं च शब्दः स्पर्शश्च पञ्चमः ।
मन्तव्यमथ बोद्धव्यं सप्तैते कर्महेतवः ॥ ५
घ्राता भक्षयिता द्रष्टा वक्ता श्रोता च पञ्चमः
मन्ता बोद्धा च सप्तैते विज्ञेयाः कर्तृहेतवः ६
स्वगुणं भक्षयन्त्येते गुणवन्तः शुभाशुभम् ।
अहं च निर्गुणोऽनन्तः सप्तैते मोक्षहेतवः ॥ ७

समानवैलक्षण्यार्थं. समानेन उपलक्षणेन व्यवस्यते निश्चीयते शास्त्रयेव चंद्र सौषुप्तात्कारणभावात्तद्विलक्षणमित्यर्थ तथा च श्रुति.-द्वैतस्याग्रहणं तुल्यमुभयो प्राज्ञतुर्ययो बीजनिद्रायुत प्राज्ञ सा तु तुर्ये न विद्यत इति ॥१६॥ निश्चयफलमाह-**शान्तीति** । व्यानं चकारात्समानं सनातनं ब्रह्म च एतत् त्रयं एकं शातिशब्दार्थ । कार्यकारणशुद्धाना मैन्धवघनन्यायेनैक्यं मुक्तिर्न त्वाद्ययोर्निरोधमात्रं साख्याभिमतमित्यर्थ ॥ १७ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे चतुर्विंशोऽध्याय ॥ २४ ॥

२५

एवमुपदेशप्राधान्येन ब्रह्माद्वैतमुक्त्वा उपपत्तिप्राधान्येन तत्प्रसाधयितुमध्यायान्तरमारभते—**अत्रापीति** । अत्र उदानस्वरूपे विवेक्तव्ये। **चातुर्होत्रविधानं** इतिहासनाम तस्य विधानं अपूर्वतया ज्ञापनम् ॥ १ ॥ शब्दतो ज्ञातस्य पुनर्विधानं अनुष्ठानप्रकारम्॥२॥ भाविनि विशुद्धभाववति हे **बुद्धे** ॥३॥ **हेतूनामिति** । घ्राणादयो यद्यपि दशसप्तहोत्रोरुक्तास्तथाप्येतेषा क कस्य हेतुरिति तत्र नोक्तं अत्र तु युक्तिबलेन तत्साधनं अधिकमुच्यत इति विशेष इति भाव । तत्र गन्धाद्यनुभवे प्रीत्यप्रीतिविषादा· सत्त्वरजस्तमोगुणकार्यभूता उत्पद्यन्ते ते यद्यात्मधर्मा· स्युर्न तर्हि तत्स्वरूपोच्छेदं विना तस्य तद्वियोग आत्यन्तिको युज्यते । घटस्येव रूपसामान्येन। यदि प्रकृतेस्तर्हि सापि आत्मसमसत्त्वा चेत् विभुनोर्द्वयोर्वियोगायोगात्पुरुषस्य चालुप्तद्रूपत्वादवश्यं भोगस्य प्राप्तेरनिर्मोक्ष एव । तस्माद्रज्जूरगतुल्या प्रकृतिस्तत्कार्यं च सर्वं तादृशमेव दृष्टिसमसमयोत्पत्तिकमित्याशयेनाह-**घ्राणमिति** । गुणा अविद्या सैव हेतुर्येषा ते गुणहेतव । घ्राणादिकं सप्तदशकस्य लिङ्गस्योपलक्षणम् ॥ ४ ॥ गन्धादयोऽपि गुणहेतुत्वमत्यजन्त एव कर्महेतव कर्मजा अपि भवन्ति । स्थूलं सर्वकर्मण एव फलमित्यर्थ ॥५॥ कर्मकर्तैव तत्तत्फलभोक्तृरूपेण घ्रात्रादिरूपो भवतीति घ्रात्रादय कर्तृहेतव । एतेनाकर्तुर्भोक्तृत्वं वाञ्छन्साख्यो निरस्त । भोक्तृत्वस्यापि भोगकर्तृरूपत्वात् ॥ ६॥ एतेषामभेदमाह—**स्वगुणमिति** । एते घ्रात्रादय गुणा औपाधिकं रूपं घ्राणादि तद्वन्तस्तत्साधना सन्त स्वगुणं गन्धादिकं भक्षयन्ति भुञ्जते । अयं भाव —यथा आकाश कर्णशष्कुलीरूपमुपाधिं प्राप्य श्रोत्रभावं गतस्तेनैव स्वगुणं शब्दं प्रकाशयति एव घ्रात्रादयोऽपि । अथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणमिति श्रुते । स्वोपादानकघ्राणादिमन्त स्वोपादानकमेव शब्दादिकं भुञ्जते । तथा च प्रयोग —मेयमात्रौ एकोपादानकौ भास्यभासकत्वात् शब्दश्रोत्रवदित्यात्माद्वैतसाधक सूचितो भवति । किं तन्मेयमात्रोर्गुणरूपयोरुपादानं तत्राह—**अहं च निर्गुणोऽनन्त इति** । अस्मदर्थ एव घ्राणादिगुणरहितो गन्धघ्रातृत्वादिपरिच्छेदरहितस्तयोरुपादानमित्यर्थ । एव पृथिवी होता,द्यौरध्वर्यु, रुद्रोऽमीत् बृहस्पतिरुपवक्तेति च होतृमन्त्रो व्याख्यात· । तथाहि पृथवीशब्दोक्तं घ्राणादिकं अतीन्द्रियत्वसामान्यात् होतृप्रकाश्यदेवतातुल्यं होतृशब्देनोक्तम् । सुखसाधनतया द्युशब्दोक्तं गन्धादिकं दृष्टार्थत्वसामान्यादध्वर्युकर्तृकनिर्वापाव-

विदुषां बुध्यमानानां स्वं स्वं स्थानं यथाविधि
गुणास्ते देवताभूताः सततं भुञ्जते हविः ॥ ८
अदन्नन्नान्यथोऽविद्वान्ममत्वेनोपपद्यते ।
आत्मार्थे पाचयन्नन्नं ममत्वेनोपहन्यते ॥ ९
अभक्ष्यभक्षणं चैव मद्यपानं च हन्ति तम् ।
स चान्नं हन्ति तं चान्नं स हत्वा हन्यते पुनः
हन्ता ह्यन्नमिदं विद्वान्पुनर्जनयतीश्वरः ।
न चान्नाज्जायते तस्मिन्सूक्ष्मो नाम व्यतिक्रमः
मनसा गम्यते यच्च यच्च वाचा निगद्यते ।
श्रोत्रेण श्रूयते यच्च चक्षुषा यच्च दृश्यते ॥ १२
रूपशब्देन स्पृश्यते यश्च घ्राणेन घ्रायते च यत् ।
मनःषष्ठानि संयम्य हवींष्येतानि सर्वशः १३
गुणवत्पावको मह्यं दीप्यतेऽतःशरीरगः ।
योगयज्ञः प्रवृत्तो मे ज्ञानवह्निप्रदीपनः ।
प्राणस्तोत्रोऽपानशस्त्रः सर्वत्यागसुदक्षिणः १४
कर्ताऽनुमन्ता ब्रह्मात्मा होताऽध्वर्युः कृतस्तुतिः
ऋतं प्रशास्ता तच्छस्त्रमपवर्गोऽस्य दक्षिणा ॥
ऋचश्चाप्यत्र शंसन्ति नारायणविदो जनाः ।
नारायणाय देवाय यद्विन्दन्पशूःपुरा ॥ १६
तत्र सामानि गायन्ति तत्र चाहुर्निदर्शनम् ।
देवं नारायणं भीरु सर्वात्मानं निबोध तम् १७

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्राह्मणगीतासु पञ्चविंशोऽध्यायः ॥ २५ ॥

घातादितुल्यं अध्वर्युशब्देनोक्तम् । लब्धैरलब्धैश्च गन्धादिभी रोध्यमानो रोत्स्यमानो वा रुद्रशब्दोक्तो घ्रात्रादि कामाग्नीन्धकत्वसामान्यादग्नीच्छब्देनोक्त । कारणब्रह्मणोऽप्याधिष्ठानत्वेन पालकत्वाद्बृहस्पतिशब्दोक्तो निर्गुण साक्षिमात्ररूपत्वादुपवक्ता न मुख्यो वक्ता एतदुपद्रष्टृत्वादेरप्युपलक्षणम् । तेन सर्गादौ ईक्षणस्याप्यय कर्ता न भवति । एवं चित्ति स्रुगित्यादयो दशहोत्रादिमन्त्रा अपि व्याख्येया । विस्तरभयात्तु नेह व्याख्यायन्ते । चित्ति चित्तादि सर्वोप्यात्मन एव व्यूहो दशहोत्रादिशब्दानामात्ममात्रवाचकत्वस्य आत्मन्नात्मन्नित्यामन्त्रयत । तस्मै दशमऽहूत प्रत्यश्रृणोत् स दशहूतोऽभवत् दशहूतो ह वै नामैष । तं वा एतं दशहूतं सन्तं दशहोतेत्याचक्षते परोक्षेण इति श्रवणात् । आमन्त्रणमनुसन्धानं प्रतिश्रवणमुपवक्तु साक्षात्कार इति दिक् । कथं तर्हि निर्गुणस्यानंतस्य प्रतिपत्तिरिति तत्राह—**सप्तैते मोक्षहेतव इति** । इन्द्रियाणा विषयाणा च ग्रहातिग्रहसंज्ञकबन्धरूपत्वात्तेषा वियोगे शब्दशष्कुल्यभावे नभस स्वतन्मात्रत्ववदात्मनो निरुपाधेर्भेदकाभावाच्चिन्मात्ररूपेणावस्थिता एते अव्यवहिता घ्रात्रादय एव मोक्षहेतव स्यु घ्रातृत्वाद्यभिमानत्यागो मोक्ष इत्यर्थ ॥ ७ ॥ तत्त्वविदा तु न भक्षणमस्तीत्याह—**विदुषामिति** । स्वं स्वं स्थानं घ्राणादीनामधिष्ठानं अविद्यादि । गुणा गुणेषु वर्तन्त इति मत्वा न सज्जत इत्युक्तेः । घ्राणादय एव ग्रेयादिषु वर्तन्ते न त्वात्मेति जानता न घ्रातृत्वाद्यभिमानकृतो बन्धोऽस्तीत्यर्थ ॥ ८ ॥ **अदन्निति** । अविद्वानिति छेद । अन्नानि ग्रेयादीनि । अदन् भोक्तृत्वाभिमानं कुर्वन् । भोग्ये ममत्वेन ममतयोपपद्यते युज्यते ततश्च नश्यतीत्यर्थ. । अत्त केवलाघो भवति केवलादीति श्रौतं दृष्टान्तमाह—**आत्मार्थं इति** । एकाकी मिष्टभुक्केवलपापरूप एव भवति यस्मादत स चान्नं हन्ति नाशयति । तं चान्नं हन्ति मृत्युपरम्परया स हत्वाऽन्नं हन्यतेऽन्नेन ॥ १० ॥ य इदं विद्वान् अन्नं हन्ता अन्नं भोक्ता अन्नोपलक्षितस्य कृत्स्नप्रपञ्चस्यात्मनि प्रविलापयितेत्यर्थ । स ईश्वर एव सन् पुनरन्नादेर्जनको भवति । यस्मानुवित्त प्रतिबुद्ध आत्मा यस्मिन्संदेहे गहने प्रविष्ट । स विश्वकृत्स हि विश्वस्य कर्ता तस्य लोक. स उ लोक एवेति श्रुते । **न चेति** । न कर्मणा लिप्यते पापकेनेति श्रुते । सर्वभोगभुजोपि विदुषो न भोगकृतो लेपोऽस्तीत्यर्थ ॥ ११ ॥ अन्नशब्दार्थमाह—**मनसेत्यादिना** ॥ १२ ॥ मन्तव्यादीना होमो मनआदिनिग्रहेणैवेत्यर्थ ॥ १३ ॥ होमाधिष्ठानं गुणवत्पावक कारणं ब्रह्म मह्यं मम योगं यज्ञत्वेन स्तौति—**योगेति** । ज्ञानमेव वह्नि सर्वकर्मदाहकत्वात्तत्प्रद उद्भवो यस्य योगयज्ञस्य स तथा प्राण स्तोत्रं अपान शस्त्रं अपानसत्र इत्यपपाठ । सर्वत्यागसुदक्षिणः सर्वत्यागेनैव सुतरा दक्षिण फलजननसमर्थ ॥ १४ ॥ कर्ताऽहङ्कार अनुमन्ता मन आत्मा बुद्धि एतत्त्रयं ब्रह्मैव सत्कर्मेण होत्रध्वर्यूद्गातृरूपयोगिन इत्यर्थ । प्रशास्ता तच्छस्त्रं प्रशास्तु शंसनं ऋतं सत्यवचनमेवेत्यर्थ । अपवर्ग कैवल्यम् ॥ १५ ॥ ऋच तप आसीद्गृहपतिरित्याद्या चकारात्तस्यैव विदुषो यज्ञस्यात्मा यजमान श्रद्धा पत्नी शरीरमिध्ममुरो वेदिरित्यादि ब्राह्मणं च । शंसन्ति योगयज्ञे प्रमाणत्वेन कथयन्ति तैत्तिरीयादय । नारायणविद वेदविद आत्मविदो वा । नारायणाय आत्मप्राप्त्यर्थं यत् यदा पशूनिन्द्रियाणि अविन्दन् वश्यत्वेन प्राप्तवन्त. ॥ १६ ॥ तत्र तदा सामानि गायन्ति आत्मलाभेन हृष्टा सन्त तत्र चाहुर्निदर्शनं तैत्तिरीया । एतत्साम गायन्नास्ते हा ३ वुहा ३ वुहा ३ वु, अहमन्नमहमन्नमहमन्नमित्यादि यज्ञानाय पशुजयो यस्मिन् ज्ञाते सामानि गायन्ति तं नारायणं देवं निबोध जानीहि ॥ १७ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे पञ्चविंशोऽध्याय ॥ २५ ॥

२६

ब्राह्मण उवाच ।
एकः शास्ता न द्वितीयोऽस्ति शास्ता
यो हृच्छयस्तमहमनुब्रवीमि ।
तेनैव युक्तः प्रवणादिवोदकं
यथा नियुक्तोऽस्मि तथा वहामि ॥ १
एको गुरुर्नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनुब्रवीमि ।
तेनानुशिष्टा गुरुणा सदैव
लोके द्विष्टाः पन्नगाः सर्व एव ॥ २
एको बन्धुर्नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनुब्रवीमि ।
तेनानुशिष्टा बान्धवा बन्धुमन्तः
सप्तर्षयः पार्थ दिवि प्रभान्ति ॥ ३
एकः श्रोता नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनुब्रवीमि ।
तस्मिन्गुरौ गुरुवासं निरुष्य
शक्रो गतः सर्वलोकामरत्वम् ॥ ४
एको द्वेष्टा नास्ति ततो द्वितीयो
यो हृच्छयस्तमहमनुब्रवीमि ।
तेनानुशिष्टा गुरुणा सदैव
लोके द्विष्टाः पन्नगाः सर्व एव ॥ ५
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
प्रजापतौ पन्नगानां देवर्षीणां च संविदम् ६
देवर्षयश्च नागाश्चाप्यसुराश्च प्रजापतिम् ।
पर्यपृच्छन्नुपासीनाः श्रेयो नः प्रोच्यतामिति
तेषां प्रोवाच भगवान् श्रेयः समनुपृच्छताम् ।
ओमित्येकाक्षरं ब्रह्म ते श्रुत्वा प्राद्रवन्दिशः ८
तेषां प्रद्रवमाणानामुपदेशार्थमात्मनः ।
सर्पाणां दंशने भावः प्रवृत्तः पूर्वमेव तु ॥ ९
असुराणां प्रवृत्तस्तु दम्भभावः स्वभावजः ।
दानं देवा व्यवसिता दममेव महर्षयः ॥ १०
एकं शास्तारमासाद्य शब्देनैकेन संस्कृताः ।
नाना व्यवसिताः सर्वे सर्पदेवर्षिदानवाः ११
शृणोत्ययं प्रोच्यमानं गृह्णाति च यथातथम् ।
पृच्छतस्तदतो भूयो गुरुरन्यो न विद्यते ॥ १२
तस्य चानुमते कर्म ततः पश्चात्प्रवर्तते ।
गुरुर्बोद्धा च श्रोता च द्वेष्टा च हृदि निःसृतः
पापेन विचरन् लोके पापचारी भवत्ययम् ।
शुभेन विचरल्लोके शुभचारी भवत्युत १४
कामचारी तु कामेन य इन्द्रियसुखे रतः ।
ब्रह्मचारी सदैवैष य इन्द्रियजये रतः ॥ १५
अपेतव्रतकर्मा तु केवलं ब्रह्मणि स्थितः ।
ब्रह्मभूतश्चरँल्लोके ब्रह्मचारी भवत्ययम् ॥ १६
ब्रह्मैव समिधस्तस्य ब्रह्माग्निर्ब्रह्मसम्भवः ।
आपो ब्रह्म गुरुर्ब्रह्म स ब्रह्मणि समाहितः १७
एतदेवेदृशं सूक्ष्मं ब्रह्मचर्यं विदुर्बुधाः ।
विदित्वा चान्वपद्यन्त क्षेत्रज्ञेनानुदर्शिताः १८

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्राह्मणगीतासु षड्विंशोऽध्यायः ॥ २६ ॥

२६

नारायणस्वरूपमेव कथयति—**एक इत्यादिना** । प्रवणादिव नीचादिव । प्रणवादित्यपपाठ ॥१॥ अन्तर्यामिरूपेण तस्य शास्तृत्वमुक्त्वा गुरुबन्धुरूपेणापि तदाह—**एको गुरुरिति द्वाभ्याम्** । द्विष्टा द्वेषवन्त ॥ २ ॥ स एव शास्योऽपीत्याह—**एकः श्रोतेति द्वाभ्याम्** । अत्र एकस्मिन्नपि शास्तरि शास्यता बुद्धिभेदेन ॥४॥ देवाश्च ऋषयश्चेति द्वन्द्व ॥ ७ ॥ प्राद्रवन्प्रतिपेदिरे दिशो बहून्मार्गान् ॥ ८ ॥ आत्मन स्वस्य उपदेश ओमित्येकाक्षरं ब्रह्मेति वाक्यं तस्य अर्थम् । प्रद्रवमाणाना तात्पर्येणानुसरता तेषा मध्ये सर्पाणा प्रणवोच्चारणे मुखस्य उन्मीलननिमीलनयोरेव दृष्टिं कृत्वा स्वीयस्वभावानुकूलं मुखोन्मीलननिमीलनसाध्यं दंशनमेव श्रेय इति मन्वानानाम् ॥ ९ ॥ एवमसुराणामोष्ठचालनमात्रे दत्तदृष्टीना दम्भे जपाद्यभिनयप्रदर्शनरूपे भावो निश्चय प्रवृत्त । देवास्तु लोके प्रार्थितं ओमित्यनुजानन्तीति बुद्ध्वा दान श्रेय इति निश्चिता । महर्षयस्तु ओमित्यस्योच्चारणे ओष्ठप्रवृत्त्युपसंहारं दृष्ट्वा सर्वप्रवृत्त्युपसंहाररूपं दम्भं श्रेयो मेनिरे ॥ १० ॥ तस्मात्स्वयमेव स्वस्य गुरुरित्याह—**शृणोतीति** । पृच्छत शिष्यान्प्रति तत् श्रुतं गृहीतं च भूय श्रावयति ग्राहयतीति च विपरिणामेनानुषज्य योज्यं य एवंविध अतोऽन्यो गुरुर्न विद्यते इति सम्बन्ध ॥ १२ ॥ अयमेव स्वसंस्कारवशात्पापचर्यादिरूपो भवतीत्याह—**गुरुरित्यादिना** ॥ १३ ॥ तत्र मुख्यब्रह्मचारिण आश्रमधर्मलोपेऽपि न दोष इत्याह—**ब्रह्मैव समिध इति** ॥१७॥ क्षेत्रज्ञेन तत्त्वदर्शिना अनुदर्शिता अनुदर्शनं कारिता अनुशिष्टा इत्यर्थ ॥१८॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे षड्विंशोऽध्याय ॥ २६ ॥

२७

ब्राह्मण उवाच ।
सङ्कल्पदंशमशकं शोकहर्षहिमातपम् ।
मोहान्धकारातिमिरं लोभव्याधिसरीसृपम् १
विषयैकात्ययाध्वानं कामक्रोधविरोधकम् ।
तदतीत्य महादुर्गं प्रविष्टोऽस्मि महद्वनम् ॥ २
ब्राह्मण्युवाच ।
क्व तद्वनं महाप्राज्ञ के वृक्षाः सरितश्च काः ।
गिरयः पर्वताश्चैव कियत्यध्वनि तद्वनम् ॥ ३
ब्राह्मण उवाच ।
नैतदस्ति पृथक् भावः किञ्चिदन्यत्ततः सुखम्
नैतदस्त्यपृथग्भावः किञ्चिद्दुःखतरं ततः ॥ ४
तस्मात्सुखतरं नास्ति
न ततोऽस्ति महत्तरम् ।
नास्ति तस्मात्सूक्ष्मतरं
नास्त्यन्यत्तत्समं सुखम् ॥ ५
न तत्राविश्य शोचन्ति
न प्रहृष्यन्ति च द्विजाः ।
न च बिभ्यति केषांचि-
त्तेभ्यो बिभ्यति केचन ॥ ६
तस्मिन्वने सप्त महाद्रुमाश्च
फलानि सप्तातिथयश्च सप्त ।
सप्ताश्रमाः सप्त समाधयश्च
दीक्षाश्च सप्तैतदरण्यरूपम् ॥ ७
पञ्चवर्णानि दिव्यानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥
सुवर्णानि द्विवर्णानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥
सुरभीणि द्विवर्णानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥
सुरभीण्येकवर्णानि पुष्पाणि च फलानि च ।
सृजन्तः पादपास्तत्र व्याप्य तिष्ठन्ति तद्वनम् ॥
बहून्यव्यक्तवर्णानि पुष्पाणि च फलानि च ।
विसृजन्तौ महावृक्षौ तद्वनं व्याप्य तिष्ठतः ॥

२७

ननु पापचर्यादिस्वभाव एवात्मा तर्हि किं ब्रह्मचर्येणेत्याशंक्यात्मनोऽसङ्गत्वं प्रतिपादयितुं वनाध्यायमारभते—**संकल्पेति** । अध्वानं अतीत्य तन्महादुर्गं वनं प्रविष्टोऽस्मीत्यन्वय ॥ १ ॥ विषयो विशेषेण बन्धक एकेनैवात्येतव्यो न पुत्रधनादिसहायवतेत्येवंरूपोऽध्वा संसारमार्गस्तं विषयैकात्ययाध्वानं वनं ब्रह्म किंस्विद्वनं क उ स वृक्ष आसेति श्रुतौ वनवृक्षशब्दयोर्ब्रह्मदेहादिवाचित्वदर्शनात् ॥ २ ॥ वनोक्त्यैवाक्षिप्ता वृक्षादयोऽपि पृच्छ्यन्ते—**के इति** ॥ ३ ॥ षट्सु प्रश्नेषु आद्यस्योत्तरम्—**नैतदिति** । तत पृथक् भावोऽस्तीति यत् एतन्न तत्तोन्यत्किञ्चित्सुखमस्तीति यत् एतन्नेति योजना सत्ता सुखं च सर्वं ब्राह्ममेव कार्येषु दृश्यते न तत्र तद्द्वयं पृथगस्तीत्यर्थ । ननु ब्रह्मैव कार्याकारमभूत्नेत्याह—**नैतदिति**। तत अपृथक् अभेदेन भाव वियदादिपदार्थोऽस्तीति यत् एतन्न ब्रह्मजगतोर्न मृद्घटवद्धेतुहेतुमद्भावोपि तु शुक्तिरजतवदित्यतस्तयोर्भेद एव निषिध्यते न त्वभेदो विधीयते न हि रजतं शुक्तेरतिरिक्तमस्ति । नापि तया समानसत्ताकं येन तदभिन्नं स्यादिति भाव । तथा ततो वनादन्यत्स्वर्गादि दुःखतरं दुःखतारकं कर्मास्तीति यत् एतन्न । आत्यन्तिकदुःखनिवृत्तिप्सुना श्रमेणापि संसारमार्गमतीत्य तद्वनं प्रवेष्टव्यमिति भाव ॥ ४ ॥ केषाञ्चित्पञ्चम्यर्थे षष्ठी ॥ ६ ॥ ब्रह्म वन ब्रह्म स वृक्ष आसीदिति वनवृक्षयोर्मुख्यामुख्यब्रह्मभावदृष्टेस्तयोरधिष्ठानाध्यस्तभावं विवक्षन्नाह—**तस्मिन्वने इति । एतदरण्यरूपमिति च** । अत्र महदहङ्कारपञ्चतन्मात्राणि सप्त द्रुमास्तैस्तत्सङ्घातरूपो देहो लक्ष्यते । तस्य कारणं फलशब्दोदितं यागाद्यपूर्वम् । तस्यापि कारणं देवतारूपातिथिप्रीतिसाधनत्वादतिथिशब्दोक्ता यागक्रिया । तस्या कारणमाश्रमशब्दोदित क्रियाश्रय कर्ता । अस्यापि कारणं समाधय सम्यगाधीयन्ते कर्मस्वनिनिवेश्यन्ते जना यैस्ते तथाभूता रागादय । तेषा मूल धर्मान्तरपरिग्रहलक्षणा दीक्षा देहादिधर्मस्वीकाररूपोऽध्यास । एवं देहपूर्वकोऽध्यासस्तत्पूर्वकाश्च रागादिदेहान्ता एवमिदं चक्रमनिशमावर्तमानमात्मसत्तया स्फूर्जदपि नात्मा तद्धर्मैरनुरज्यते इत्यर्थ ॥ ७ ॥ पञ्चवर्णानि शब्दादिभेदात्पंचरूपाणि पुष्पाणि शब्दाद्यनुभवा फलानि तज्जा प्रीत्यादय पादपा मनांसि जीवभेदाद्वृत्तिभेदाद्वा बहुवचनम् ॥ ८ ॥ सुवर्णानि श्वेतपीतादिशोभनवर्णवन्ति । द्विवर्णानि सुखदुःखोभयहेतुत्वाद्द्विरूपाणि पादपाश्चक्षुषि इन्द्रियान्तरेष्वप्येतत्तुल्यम् ॥ ९ ॥ सुरभीणि स्वर्गादीनि द्विवर्णत्वं तत्राप्यविशेषं पादपा यज्ञादय ॥ १० ॥ सुरभीण्येकवर्णानि सुखैकरूपाणि पादपा यानादय ॥ ११ ॥ बहूनि अतीतानागतवर्तमानानि । **अव्यक्तवर्णानि** वर्ण स्वरूपम् मूढाना मनोरथमात्राणि योगिना तु संकल्पात्प्रागव्यक्तवर्णानि । महावृक्षौ बुद्धिमनसी ॥ १२ ॥

एको वह्निः सुमना ब्राह्मणोऽत्र
पञ्चेन्द्रियाणि समिधश्चात्र सन्ति ।
तेभ्यो मोक्षाः सप्त फलन्ति दीक्षा
गुणाः फलान्यतिथयः फलाशाः १३
आतिथ्यं प्रतिगृह्णन्ति तत्र तत्र महर्षयः ।
अर्चितेषु प्रलीनेषु तेष्वन्यद्रोचते वनम् ॥ १४
प्रज्ञावृक्षं मोक्षफलं शान्तिच्छायासमन्वितम् ।
ज्ञानाश्रयं तृप्तितोयमन्तःक्षेत्रज्ञभास्करम् १५
येऽधिगच्छन्ति तं सन्त-
स्तेषां नास्ति भयं पुनः ।
ऊर्ध्वं चाधश्च तिर्यक्च
तस्य नान्तोऽधिगम्यते ॥ १६
सप्त स्त्रियस्तत्र वसन्ति सद्य-
स्त्ववाङ्मुखा भानुमत्यो जनिभ्यः ।
ऊर्ध्वं रसानाददते प्रजाभ्यः
सर्वान् यथा सत्यमनित्यता च ॥ १७
तत्रैव प्रतितिष्ठन्ति पुनस्तत्रोपयन्ति च ।
सप्त सप्तर्षयः सिद्धा वसिष्ठप्रमुखैः सह ॥ १८
यशो वर्चो भगश्चैव विजयः सिद्धतेजसः ।
एतमेवानुवर्तन्ते सप्त ज्योतींषि भास्करम् १९
गिरयः पर्वताश्चैव सन्ति तत्र समासतः ।
नद्यश्च सरितो वारि वहन्त्यो ब्रह्मसम्भवम् ॥
नदीनां सङ्गमश्चैव
वैताने समुपह्वरे ।
स्वात्मतृप्ता यतो यान्ति
साक्षादेव पितामहम् ॥ २१
कृशाशाः सुव्रताशाश्च तपसा दग्धकिल्बिषाः
आत्मन्यात्मानमाविश्य ब्रह्माणं समुपासते ॥
शममप्यत्र शंसन्ति विद्यारण्यविदो जनाः ।
तदारण्यमभिप्रेत्य यथाधीरमजायत ॥ २३
एतदेवेदृशं पुण्यमरण्यं ब्राह्मणा विदुः ।
विदित्वा चानुतिष्ठन्ति क्षेत्रज्ञेनानुदर्शिना २४

बाह्यात्मा सुमना इत्यत्र मन शब्देन बुद्धिमनसी स्रुक्स्रुवस्थानीये इन्द्रियाणि समिधश्च हौम्यम् ।

' यदा पंचावातिष्ठन्ते ज्ञानानि मनसा सह ।

बुद्धिश्च न विचेष्टति तामाहु परमा गतिम् ' इति श्रुते । सर्वेषां प्रविलापनं होम तेभ्यो मनआदिभ्यो हुतेभ्य सप्त मोक्षा मुक्ति अपादानबहुत्वस्य मोक्षेष्युपचारात् मोक्ष इति बहुत्वम् । ननु मुक्तस्य दीक्षाख्योऽयासोऽस्ति न वा । नान्त्य । ज्ञानसमकालमेव देहपातापत्ते । आद्ये अध्यासवत उक्तक्रमेण देहान्तरोत्पत्तिरानिवार्येत्याशक्याह-**फलन्ति दीक्षा इति** । मुक्ताना दीक्षा फलंत्येव न तु देहान्तरमारभन्ते कुत एतत् यतो गुणा फलानि विदुष सत्यपि देहादिप्रतिभासे कर्तृत्वाभिनिवेशाभावाद्दानादिनोत्पन्नमप्यपूर्व न देहान्तरारम्भकम् । अत एव गुणभूतान्येवापूर्वाणि कृतहिं तेषामुपयोग अतिथय फलाशा अतिथयो देवता एव फलाशा ईश्वरस्येव तेषा परार्थैव क्रिया न स्वार्थेत्यर्थ । तथा च श्रुति -तस्य पुत्रा दायमुपयन्ति सुहृद साधुकृत्या द्विषन्त पापकृत्यामिति तदा विद्वान्पुण्यपापे विधूयेत्यादि ॥१३॥ महर्षय इन्द्रियाधिष्ठातारो देवा । अन्यत्तेभ्यो विलक्षणं द्वैतदर्शनाभावात् रोचते दीप्यते ॥ १४ ॥ प्रज्ञा साक्षात्कार ज्ञानं आगमाचार्योपदेशजम् ॥ १५ ॥ भयाभावे हेतुमाह-**ऊर्ध्वमिति** । तस्य प्रज्ञावृक्षस्य सर्वस्य चिन्मात्रत्वं पश्यन्मेददर्शनाभावान्न बिभेतीत्यर्थः । द्वितीयाद्वै भयं भवतीति श्रुते· ॥१६॥ जीवन्मुक्तस्यैश्वर्यमाह--**सप्त स्त्रिय इति** । तत्र वृक्षावगन्तरि स्त्रियो घ्राणादिवृत्तय सद्यो जनिभ्य इत्य ा संकल्पसिद्धा इत्यर्थ । 'संकल्पादेवास्य पितर समुत्तिष्ठन्ति' इति श्रुते । अवाङ्मुखा पुरुषं वशीकर्तुमशक्तत्वेन लज्जिता । भानुमत्यश्चिज्ज्योतिर्मया प्रजाभ्य ऊर्ध्व उत्कृष्टं यथा स्यात्तथा । सर्वान् रसान् विषयजाल्हादान् आददते भुञ्जते ऊर्ध्वत्वमेवाह दृष्टान्तेन—**यथा सत्यमनित्यता चेति** । नित्यानित्ययोर्यावदन्तरं तावद्बुद्धमूढसुखयोरित्यथ ॥ १७ ॥ प्राणा वा ऋषय इति श्रुते सप्तर्षीणामिन्द्रियाणा लयोदयस्थानं विद्वानेवेत्याह—**तत्रैवेति** । तत्रोपयन्ति तत उद्यन्ति य कश्चिद्भूतो भावी वर्तमानो वा वसिष्ठोऽतिशयेन वसुमान् ॥ १८ ॥ यशो यशस्वी वर्चो दीप्तिस्तद्वानित्यादि ते सर्वे एतं भास्करं क्षेत्रज्ञ भास्करं अनुवर्तन्त इत्यर्थ ॥ १९ ॥ यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यतीत्यस्या श्रुतेरर्थं संक्षिपति-**गिरय इत्यादिना** ॥२०॥ वितानो योगयज्ञविस्तारस्तस्येदं स्थानं वैतानं हार्दाकाश समुपह्वरे अत्यन्तगूढे ॥ २१ ॥ के यान्तीत्यत आह—**कृशाशा इति** ॥ २२ ॥ अरण्यं प्राप्यमभिप्रेत्य शमं शसन्तीति योजना शममपि शममेव विद्यारण्यविद विद्यैकप्राप्यब्रह्मविद यथा धीरं बुद्धिगतिमनतिक्रम्येत्यर्थ· ॥२३॥ विदित्वा शास्त्रतो ज्ञात्वा अनुतिष्ठन्ति शमादिपरा भवन्ति तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मण· । एवंवित् शान्तो दान्त उपरतस्तितिक्षु· समाहितो भूत्वाऽत्मन्येवात्मानं पश्येदित्यादिश्रुतिभ्यो न शुष्कज्ञानात्कृतकृत्यतेत्यर्थः ॥२४॥

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्राह्मणगीतासु सप्तविंशतितमोऽध्यायः ॥ २७ ॥



२८

ब्राह्मण उवाच ।

गन्धान्न जिघ्रामि रसान्न वेद्मि
रूपं न पश्यामि न च स्पृशामि ।
न चापि शब्दान्विविधान् शृणोमि
न चापि संकल्पमुपैमि काञ्चित् ॥ १

अर्थानिष्टान्कामयते स्वभावः
सर्वान्द्वेष्यान्प्रद्विषते स्वभावः ।
कामद्वेषावुद्भवतः स्वभावात्
प्राणापानौ जन्तुदेहान्निवेश्य ॥ २

तेभ्यश्चान्यांस्तेषु नित्यांश्च भावान्
भूतात्मानं लक्षयेरन् शरीरे ।
तस्मिंस्तिष्ठन्नास्मि सक्तः कथञ्चि-
त्कामक्रोधाभ्यां जरया मृत्युना च ३

अकामयानस्य च सर्वकामा-
नविद्विषाणस्य च सर्वदोषान् ।
न मे स्वभावेषु भवन्ति लेपा-
स्तोयस्य बिन्दोरिव पुष्करेषु ॥ ४

नित्यस्य चैतस्य भवन्ति नित्या
निरीक्ष्यमाणस्य बहुस्वभावः ।
न सज्जते कर्मसु भोगजालं
दिवीव सूर्यस्य मयूखजालम् ॥ ५

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अध्वर्युयतिसंवादं तं निबोध यशस्विनि ॥ ६
प्रोक्ष्यमाणं पशुं दृष्ट्वा यज्ञकर्मण्यथाब्रवीत् ।
यतिरध्वर्युमासीनो हिंसेयमिति कुत्सयन् ७
तमध्वर्युः प्रत्युवाच नायं छागो विनश्यति ।
श्रेयसा योक्ष्यते जन्तुर्यदि श्रुतिरियं तथा ॥ ८
यो ह्यस्य पार्थिवो भागः पृथिवीं स गमिष्यति
यदस्य वारिजं किञ्चिदपस्तत्संप्रवेक्ष्यति ॥ ९
सूर्यं चक्षुर्दिशः श्रोत्रं प्राणोऽस्य दिवमेव च ।
आगमे वर्तमानस्य न मे दोषोऽस्ति कश्चन १०

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्तविंशतितमोऽध्याय ॥ २७ ॥

२८

एको वह्निरिति श्लोके विदुषा कर्तृत्वाभिमानाभावात्कृतेनापि कर्मणा बन्धो नास्तीत्युक्तं तद्विवृणोति—**गन्धानित्यादिना** । निवृत्तक्षेत्रस्वाम्यस्य क्षेत्रिकस्य क्षेत्रवृद्धिह्रासाभ्यां दृश्यमानाभ्यामपि न हर्षविषादौ भवत एवं विविक्तात्मदर्शिनो गुणकृतै कर्मभिर्न संगोऽस्तीत्यर्थ ॥१॥ **अर्थानिति** । स्वभावो बुद्ध्यादीना तत्र दृष्टान्त— **कामेति** । यथा कामद्वेषयोरुद्भवाभावेऽपि जन्तूना देहान्प्राणापानौ प्रवेश्य प्रवेशयितर्यननुसंदधानेऽपि सुषुप्त्यादौ स्वभावादेव प्राणापानौ स्वकार्यं अन्नपाकादि कुरुत एवं बुद्ध्यादिरपि जाग्रत्स्वप्नयो स्वभावादेव अर्थेषु कामादिमान् भवति न त्वहमित्यर्थः ॥ २ ॥ **तेभ्यश्चेति** । बाह्यप्राणघ्रेयादिभ्योन्यान्स्वाप्रान्वासनामयान् घ्राणघ्रेयादीन् स्वरूपसाम्येऽपेतेषामन्यत्वमेकत्रानुभूतस्य सुखादेरन्यत्राप्रसंगात् ज्ञेयं तेषु स्वाग्रेषु नित्यानुगतान् अधिष्ठानगतान् भावान् त इमे सत्या कामा इत्यादिश्रुतिप्रसिद्धान् तेभ्योऽन्यान् तेभ्योऽप्यन्यं भूतात्मान शरीरे योगिनो लक्षयेरन् घ्राणादिदेवताभ्योऽप्यान्तरमात्मान जानन्त कथं बाह्यैर्घ्राणादिधर्मैर्लिप्येरन्नित्यर्थ । एतदेव स्पष्टयति-तस्मिन् भूतात्मनि तिष्ठन्सक्तो नास्मि । असंगो ह्ययं पुरुष इति श्रुते ॥३॥ एतस्य प्रतीचो ज्ञातस्य सत्या कामा इति शेष । सत्यकाम सत्यसकल्प इति श्रुते निरीक्ष्यमाणस्य दृश्यरूपस्य भोगजालं बहूना घ्रात्रादीना स्वभावभूतं सद्विदुषि न सज्जते सक्तं भवति कर्मसु क्रियमाणेष्वपि सत्स्विति शेष ॥ ५ ॥ अत्रात्मनोऽसंगत्वे ॥ ६ ॥ श्रुतिः पशुर्वै नीयमान स मृत्युं प्रापश्यत्स देवान्नान्वकामयतैतुं तं देवा अब्रुवन्नेहि स्वर्गं वै त्वा लोकं गमिष्याम इति स तथेत्यब्रवीदित्यादि ॥ ८ ॥ **यो ह्यस्येति** । हिशब्देन सूर्यं ते चक्षु वात प्राण. या पृष्ठं अन्तरिक्षमात्मा अङ्गैर्यज्ञं पृथिवी शरीरैरिति श्रौतीं प्रासिद्धिं द्योतयति ॥ ९ ॥ आगमे अमीषोमीयं पशुमालभेतेत्यादौ विधिस्पृष्टे निषेधानवकाशान्न हिंस्यात्सर्वा भूतानीति शास्त्रं कामकृतहिंसाविषयमित्यर्थ ॥१०॥ * 'तथापि' इति पाठः।

यतिरुवाच ।

प्राणैर्वियोगे च्छागस्य यदि श्रेयः प्रपश्यसि
छागार्थे वर्तते यज्ञो भवतः किं प्रयोजनम् ११
अत्र त्वां मन्यतां भ्राता पिता माता सखेति च
मन्त्रयस्वैनमुक्षीय परवन्तं विशेषतः ॥ १२
एवमेवानुमन्येरंस्तान् भवान्द्रष्टुमर्हति ।
तेषामनुमतं श्रुत्वा शक्या कर्तुं विचारणा १३
प्राणा अप्यस्य छागस्य प्रापितास्ते स्वयोनिषु
शरीरं केवलं शिष्टं निश्चेष्टमिति मे मतिः १४
इन्धनस्य तु तुल्येन शरीरेण विचेतसा ।
हिंसानिर्वेष्टुकामानामिधनं पशुसंज्ञितम् १५
अहिंसा सर्वधर्माणामिति वृद्धानुशासनम् ।
यदाहिंस्रं भवेत्कर्म तत्कार्यमिति विद्महे ॥ १६
अहिंसेति प्रतिज्ञेयं यदि वक्ष्याम्यतः परम् ।
शक्यं बहुविधं कर्तुं भवता कार्यदूषणम् १७
अहिंसा सर्वभूतानां नित्यमस्मासु रोचते ।
प्रत्यक्षतः साधयामो न परोक्षमुपास्महे १८

अध्वर्युरुवाच ।

भूमेर्गन्धगुणान् भुंक्षे पिबस्यापोमयान् रसान्
ज्योतिषां पश्यसे रूपं स्पृशस्यनिलजान्गुणान्
शृणोष्याकाशजान् शब्दान्
मनसा मन्यसे मतिम् ।
सर्वाण्येतानि भूतानि
प्राणा इति च मन्यसे ॥ २०
प्राणादाने निवृत्तोऽसि
हिंसायां वर्तते भवान् ।
नास्ति चेष्टा विना हिंसां
किं वा त्वं मन्यसे द्विज ॥ २१

यतिरुवाच ।

अक्षरं च क्षरं चैव द्वैधीभावोऽयमात्मनः ।
अक्षरं तत्र सद्भावः स्वभावः क्षर उच्यते २२
प्राणो जिह्वा मनः सत्त्वं सद्भावो रजसा सह
भावैरेतैर्विमुक्तस्य निर्द्वन्द्वस्य निराशिषः २३
समस्य सर्वभूतेषु निर्ममस्य जितात्मनः ।
समन्तात्परिमुक्तस्य न भयं विद्यते क्वचित् ॥

अध्वर्युरुवाच ।

सद्भिरेवेह संवासः कार्यो मतिमतां वर ।
भवतो हि मतं श्रुत्वा प्रतिभाति मतिर्मम २५
भगवन् भगवद्बुद्ध्या प्रतिपन्नो ब्रवीम्यहम् ।
व्रतं मन्त्रकृतं कर्तुर्नापराधोऽस्ति मे द्विज॥२६

ब्राह्मण उवाच ।

उपपत्त्या यतिस्तूष्णीं वर्तमानस्ततः परम् ।
अध्वर्युरपि निर्मोहः प्रचचार महामखे ॥ २७
एवमेतादृशं मोक्षं सुसूक्ष्मं ब्राह्मणा विदुः ।
विदित्वा चानुतिष्ठन्ति क्षेत्रज्ञेनार्थदर्शिना २८

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्राह्मणगीतासु अष्टाविंशोऽध्यायः ॥ २८ ॥



अन्वेनं माताऽमन्यतामनुपिताऽनु भ्रातासगर्भ्योऽनु सखा सयूथ्य इति मन्त्रलिंगात्पशोर्मात्राद्यनुमतिरपेक्षिता न च सा संभवति तदभावे च हिंसादोष स्यादेवेत्यर्थ १३ स्वयोनिषु सूर्यं चक्षुर्गमयताद्वातं प्राणमन्ववसृजतादिति लिङ्गात् ॥१४॥ अहिंसाऽप्यशक्यप्रतिज्ञा सूक्ष्महिंसाया अपरिहार्यत्वात्तथापि दृष्टबीभत्सा हिंसा त्यजेदेवेत्याह द्वाभ्या—**अहिंसेति**। ॥ १६ ॥ उपपातकमभ्यस्तं महापातकता व्रजेदिति स्मृते सूक्ष्मापि हिंसाऽभ्यासाद्बहुलीभूय बाधेतैवेत्याशयेनाध्वर्युराह—**भूमेरिति**। नानुपहत्य भूतानि भोग सम्भवतीति न्यायाज्जीवतोऽपरिहार्यैव हिंसेत्यर्थ ॥ १९ ॥ किं कथं त्व मन्यसेऽहिंसामिति शेष ॥ २१ ॥ यतिरहिंसाप्रकारमसंगितामाह–सद्भाव सद्रूपं स्वभाव सुतरामभाव. कालत्रयेऽप्यसत्त्वम् ॥ २२ ॥ प्राणादिव्यवहारस्तु रजसा मायया सह स्थित सद्भाव एव । भ्रांतिविशिष्टं सदेव व्यवहाररूपमित्यर्थ । एतै प्राणादिभिर्मुक्तस्य अत एव निर्द्वन्द्वस्य ज्ञानेन द्वैतकल्पकभ्रातिबाधात् ॥ २३ ॥ भयं प्रेत्य खादंति ते च तानिति शास्त्रोक्तम् ॥२४॥ त्वदुपदेशादहमपि मन्त्रकृतं कुर्वन्न दुष्ये इत्याह–**सद्भिरित्यादिना**॥२५॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे अष्टाविंशतितमोऽध्याय ॥ २८ ॥

२९

ब्राह्मण उवाच ।
अत्राप्युदाहरन्तीममितिहास पुरातनम् ।
कार्तवीर्यस्य संवादं समुद्रस्य च भाविनि १
कार्तवीर्यार्जुनो नाम राजा बाहुसहस्रवान् ।
येन सागरपर्यन्ता धनुषा निर्जिता मही ॥ २
स कदाचित्समुद्रान्ते विचरन्बलदर्पितः ।
अवाकिरन् शरशतैः समुद्रमिति नः श्रुतम् ३
तं समुद्रो नमस्कृत्य कृताञ्जलिरुवाच ह ।
मा मुञ्च वीर नाराचान् ब्रूहि किं करवाणि ते
मदाश्रयाणि भूतानि त्वद्विसृष्टैर्महेषुभिः ।
वध्यन्ते राजशार्दूल तेभ्यो देह्यभयं विभो ५
अर्जुन उवाच ।
मत्समो यदि संग्रामे शरासनधरः क्वचित् ।
विद्यते तं समाचक्ष्व यः समासीत मां मृधे ॥
समुद्र उवाच ।
महर्षिर्जमदग्निस्ते यदि राजन्परिश्रुतः ।
तस्य पुत्रस्तवातिथ्यं यथावत्कर्तुमर्हति ॥ ७
ततः स राजा प्रययौ क्रोधेन महता वृतः ।
स तमाश्रममागम्य राममेवान्वपद्यत ॥ ८
स रामप्रतिकूलानि चकार सह बन्धुभिः ।
आयासं जनयामास रामस्य च महात्मनः ९
ततस्तेजः प्रजज्वाल रामस्यामिततेजसः ।
प्रदहन् रिपुसैन्यानि तदा कमललोचने ॥ १०
ततः परशुमादाय स तं बाहुसहस्रिणम् ।
चिच्छेद सहसा रामो बहुशाखमिव द्रुमम् ॥
तं हतं पतितं दृष्ट्वा समेताः सर्वबान्धवाः ।
असीनादाय शक्तीश्च भार्गवं पर्यधावयन् ॥ १२
रामोऽपि धनुरादाय रथमारुह्य सत्वरः ।
विसृजन् शरवर्षाणि व्यधमत्पार्थिवं बलम् ॥
ततस्तु क्षत्रियाः केचिज्जामदग्न्यभयार्दिताः ।
विविशुर्गिरिदुर्गाणि मृगाः सिंहार्दिता इव
तेषां स्वविहितं कर्म तद्भयान्नानुतिष्ठताम् ।
प्रजा वृषलतां प्राप्ता ब्राह्मणानामदर्शनात् ॥
एवं ते द्रविडाऽऽभीराः पुण्ड्राश्च शबरैः सह ।
वृषलत्वं परिगता व्युत्थानात् क्षत्रधर्मिणः १६
ततश्च हतवीरासु क्षत्रियासु पुनः पुनः ।
द्विजैरुत्पादितं क्षत्रं जामदग्न्यो न्यकृन्तत १७
एकविंशतिमेधान्ते रामं वागशरीरिणी ।
दिव्या प्रोवाच मधुरा सर्वलोकपरिश्रुता ॥
राम राम निवर्तस्व कं गुणं तात पश्यसि ।
क्षत्रबन्धूनिमान्प्राणैर्विप्रयोज्य पुनः पुनः ॥ १९
तथैव तं महात्मानमृचीकप्रमुखास्तदा ।
पितामहा महाभाग निवर्तस्वेत्यथाब्रुवन् ॥ २०
पितुर्वधममृष्यंस्तु रामः प्रोवाच तानृषीन् ।
नार्हतीह भवन्तो मां निवारयितुमित्युत ॥ २१
पितर ऊचुः
नार्हसे क्षत्रबन्धूंस्त्वं निहन्तुं जयतां वर ।
नेह युक्तं त्वया हन्तुं ब्राह्मणेन सता नृपान् ॥

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्राह्मणगीतासु एकोनत्रिंशोऽध्यायः ॥ २९ ॥

३०

पितर ऊचुः ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
श्रुत्वा च तत्तथा कार्यं भवता द्विजसत्तम १
अलर्को नाम राजर्षिरभवत्सुमहातपाः ।
धर्मज्ञः सत्यवादी च महात्मा सुदृढव्रतः ॥ २

२९

इन्द्रियजय एव महच्छौर्यमित्युपोद्घातयत्यध्यायेन— **अत्रापीति** ॥ १ ॥ एकविंशतिमेधान्ते मेधो युद्धयज्ञ· । 'यज्ञो वै मेध·' इति श्रुते । यान्येव संग्रामनामानि तानि यज्ञनामानीति नैरुक्तवचनात् युद्धस्यैव नाम मेध इति ॥ १८ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे एकोनत्रिंशोऽध्याय ॥ २९ ॥

३०

अत्र हिंसाया अकार्यत्वे ॥ १ ॥

ससागरांतां धनुषा विनिर्जित्य महीमिमाम्
कृत्वा सुदुष्करं कर्म मनः सूक्ष्मे समादधे ॥ ३
स्थितस्य वृक्षमूलेषु तस्य चिन्ता बभूव ह।
उत्सृज्य सुमहत्कर्म सूक्ष्मं प्रति महामते ॥ ४

अलर्क उवाच।

मनसो मे बलं जातं मनो जित्वा ध्रुवो जयः
अन्यत्र बाणान्धास्यामि शत्रुभिः परिवारितः
यादृदं चापलात्कर्म सर्वान्मर्त्यांश्चिकीर्षति।
मनः प्रति सुतीक्ष्णाग्रानहं मोक्ष्यामि सायकान्

मन उवाच।

नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥ ७
अन्यान् बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि
तच्छ्रुत्वाप्यविचिन्त्याथ ततो वचनमब्रवीत् ॥

अलर्क उवाच।

आघ्राय सुबहून्गन्धां-
स्तानेव प्रतिगृध्यति।
तस्मात् घ्राणं प्रति शरान्
प्रति मोक्ष्याम्यहं शितान् ॥ ९

घ्राण उवाच।

नमे बाणास्तरिष्यंति मामलर्क कथञ्चन।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि १०
अन्यान्बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि
तच्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत् ११

अलर्क उवाच।

इयं स्वादून् रसान् भुक्त्वा
तानेव प्रतिगृध्यति।
तस्माज्जिह्वां प्रति शरान्
प्रतिमोक्ष्याम्यहं शितान् ॥ १२

जिह्वोवाच।

नेमे बाणास्तरिष्यन्ति मामलर्क कथंचन।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि १३
अन्यान्बाणान्समीक्षस्व
यैस्त्वं मां सूदयिष्यसि।
तच्छ्रुत्वा स विचिन्त्याथ
ततो वचनमब्रवीत् ॥ १४

अलर्क उवाच।

स्पृष्ट्वा त्वग्विविधान् स्पर्शां-
स्तानेव प्रतिगृध्यति।
तस्मात्त्वचं पाटयिष्ये
विविधैः कंकपत्रिभिः ॥ १५

त्वगुवाच।

नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि १६
अन्यान्बाणान्समीक्षस्व
यैस्त्वं मां सूदयिष्यसि।
तच्छ्रुत्वा स विचिन्त्याथ
ततो वचनमब्रवीत् ॥ १७

अलर्क उवाच।

श्रुत्वा तु विविधान् शब्दा-
स्तानेव प्रतिगृध्यति।
तस्माच्छ्रोत्रं प्रति शरान्
प्रतिमुंचाम्यहं शितान् ॥ १८

श्रोत्रमुवाच।

नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन।
तवैव मर्म भेत्स्यन्ति ततो हास्यसि जीवितम्
अन्यान्बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि
तच्छ्रुत्वा स विचिन्त्याथ ततो वचनमब्रवीत्

अलर्क उवाच।

दृष्ट्वा रूपाणि बहुशस्तान्येव प्रतिगृध्यति।
तस्माच्चक्षुर्हनिष्यामि निशितैः सायकैरहम् २१

चक्षुरुवाच।

नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ॥ २२
अन्यान्बाणान्समीक्षस्व
यैस्त्वं मां सूदयिष्यसि।
तच्छ्रुत्वा स विचिन्त्याथ
ततो वचनमब्रवीत् ॥ २३

अलर्क उवाच।

इयं निष्ठा बहुविधा प्रज्ञया त्वध्यवस्यति।
तस्माद्बुद्धिं प्रति शरान्प्रतिमोक्ष्याम्यहं शितान्

सूक्ष्मे विचारे ॥ ३ ॥ कर्म शत्रुजयादि उत्सृज्य सूक्ष्मं ब्रह्म प्रतिपत्तुं चिन्ता बभूवेति सम्बन्ध ॥ ४ ॥ अन्यत्र बाह्यशत्रुभ्य इति शेष। शत्रुभिरिन्द्रियवैरिभिः ॥ ५ ॥ चिकीर्षति चिक्षेप्तुमिच्छतीत्यर्थ। मन प्रति हठयोगेन वायुनिरोधादिना जेष्यामीत्यर्थ ॥ ६ ॥ नेमे इति। हठयोगे मृत्युरवश्यं सम्भवतीति भावः ॥ ७ ॥

बुद्धिरुवाच ।
नेमे बाणास्तरिष्यन्ति मामलर्क कथञ्चन ।
तवैव मर्म भेत्स्यन्ति भिन्नमर्मा मरिष्यसि ।
अन्यान्बाणान्समीक्षस्व यैस्त्वं मां सूदयिष्यसि

ब्राह्मण उवाच ।
ततोऽलर्कस्तपो घोरं तत्रैवास्थाय दुष्करम्
नाध्यगच्छत्परं शक्त्या बाणमेतेषु सप्तसु २६
सुसमाहितचेतास्तु सततोऽचिन्तयत्प्रभुः ।
स विचिन्त्य चिरं कालमलर्को द्विजसत्तम ॥
नाध्यगच्छत्परं श्रेयो योगान्मतिमतां वरः ।
स एकाग्रं मनः कृत्वा निश्चलो योगमास्थितः
इन्द्रियाणि जघानाशु बाणेनैकेन वीर्यवान् ।
योगेनात्मानमाविश्य सिद्धिं परमिकां गतः
विस्मितश्चापि राजर्षिरिमां गाथां जगाद ह
अहो कष्टं यदस्माभिः सर्वं बाह्यमनुष्ठितम् ॥
भोगतृष्णासमायुक्तैः पूर्वं राज्यमुपासितम्
इति पश्चान्मया ज्ञातं योगान्नास्ति परं सुखम्
इति त्वमनुजानीहि राम मा क्षत्रियान् जहि ।
तपो घोरमुपातिष्ठ ततः श्रेयोऽभिपत्स्यसे ३२
इत्युक्तः स तपो घोरं जामदग्न्यः पितामहैः ।
आस्थितः सुमहाभागो ययौ सिद्धिं च दुर्गमां

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्राह्मणगीतासु त्रिंशोऽध्यायः ॥ ३० ॥

३१

ब्राह्मण उवाच ।
त्रयो वै रिपवो लोके नवधा गुणतः स्मृताः
प्रहर्षः प्रीतिरानन्दस्त्रयस्ते सात्त्विका गुणाः १
तृष्णा क्रोधोऽभिसंरंभो
राजसास्ते गुणाः स्मृताः ।
श्रमस्तंद्रा च मोहश्च
त्रयस्ते तामसा गुणाः ॥ २
एतान्निकृत्य धृतिमान् बाणसंघैरतंद्रितः ।
जेतुं परानुत्सहते प्रशान्तात्मा जितेन्द्रियः
अत्र गाथाः कीर्तयन्ति पुराकल्पविदो जनाः
अम्बरीषेण या गीता राज्ञा पूर्वं प्रशाम्यता ४
समुदीर्णेषु दोषेषु बाध्यमानेषु साधुषु ।
जग्राह तरसा राज्यमम्बरीषो महायशाः ॥ ५
स निगृह्यात्मनो दोषान्साधून्समभिपूज्य च
जगाम महतीं सिद्धिं गाथाश्चेमा जगाद ह ६
भूयिष्ठं विजिता दोषा निहताः सर्वशत्रवः ।
एको दोषो वरिष्ठश्च वध्यः स न हतो मया ७
यत्प्रयुक्तो जन्तुरयं वैतृष्ण्यं नाधिगच्छति ।
तृष्णार्त इह निम्नानि धावमानो न बुध्यते ८
अकार्यमपि येनेह प्रयुक्तः सेवते नरः ।
तं लोभमसिभिस्तीक्ष्णैर्निकृतं तं निकृन्तत+९
लोभाद्धि जायते तृष्णा ततश्चिन्ता प्रवर्तते ।
स लिप्समानो लभते भूयिष्ठं राजसान्गुणान्
तदवाप्तौ तु लभते भूयिष्ठं तामसान्गुणान् १०
स तैर्गुणैः सहतदेहबन्धनः
पुनः पुनर्जायति कर्म चेहते ।
जन्मक्षये भिन्नविकीर्णदेहो
मृत्युं पुनर्गच्छति जन्मनैव ॥ ११

एवं घ्राणादीना हठेन निग्रहे तत्तदिन्द्रियाविकलोऽवसीदत्येव नतु कृतकृत्यो भवतीत्यर्थ ॥२५॥ तप आलोचनम् ॥२६॥ योगात् राजयोगात् चित्तमात्रनिग्रहरूपात् एकाग्रम् द्रष्टृदृश्योपरक्तं चित्तं सर्वार्थं तदभावे स्वरूपमात्रनिष्ठ त्वेकाग्रम् ॥ २८ ॥ आत्मानं परंब्रह्म ॥ २९ ॥ अनुजानीहि अस्मदुपदेशमनु साक्षात्कुरु योगबलेन ॥ ३२ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे त्रिंशोऽध्यायः ॥ ३० ॥

३१

दन्तास्तालु चेति श्लोकोक्तं हृदयाख्यं ब्रह्म प्रतिपाद्य हृदयबन्धनाख्यं गुणत्रयं मुमुक्षूणा हेयमाह--**त्रय इत्यादिना** । गुणा इति शेष गुणत वृत्तिभेदात् । इष्टप्राप्तिनिश्चये यत्सुखं तत्प्रहर्ष । इष्टप्राप्तौ यत्तत्प्रीतिः । इष्टभोगे यत्तत् आनन्द ॥ १ ॥ अभिसंरम्भो द्वेषाभिनिवेश ॥ २ ॥ निकृत्य च्छित्त्वा बाणसघै शमादिभि ॥ ३ ॥ दोषेषु रागादिषु साधुषु शमादिषु ॥५॥ निम्नानि नीचकर्माणि ॥८॥

+ 'निकृत्य सुखमेधते' इति पाठ ।

तस्मादेतं सम्यगवेक्ष्य लोभं
निगृह्य धृत्याऽऽत्मनि राज्यमिच्छेत्
एतद्राज्यं नान्यदस्तीह राज्य-
मात्मैव राजा विदितो यथावत् १२

इति राज्ञाऽम्बरीषेण
गाथा गीता यशस्विना ।
अधिराज्यं पुरस्कृत्य
लोभमेकं निकृन्तता ॥ १३

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्राह्मणगीतासु एकत्रिंशोऽध्यायः ॥ ३१ ॥

३२

ब्राह्मण उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
ब्राह्मणस्य च संवादं जनकस्य च भाविनि १
ब्राह्मणं जनको राजा सङ्गं कस्मिंश्चिदागसि ।
विषये मे न वस्तव्यमिति शिष्टयर्थमब्रवीत् २
इत्युक्तः प्रत्युवाचाथ ब्राह्मणो राजसत्तमम् ।
आचक्ष्व विषयं राजन् यावांस्तव वशे स्थितः
सोऽन्यस्य विषये राज्ञो वस्तुमिच्छाम्यहं विभो
वचस्ते कर्तुमिच्छामि यथाशास्त्रं महीपते ॥ ४
इत्युक्तस्तु तदा राजा ब्राह्मणेन यशस्विना ।
मुहुरुष्णं विनिःश्वस्य न किञ्चित्प्रत्यभाषत ५
तमासीनं ध्यायमानं राजानममितौजसम् ।
कश्मलं सहसाऽगच्छद्ग्रानुमन्तमिव ग्रहः ॥ ६
समाश्वास्य ततो राजा विगते कश्मले तदा
ततो मुहूर्तादिव त ब्राह्मणं वाक्यमब्रवीत् ७

जनक उवाच ।
पितृपैतामहे राज्ये वश्ये जनपदे सति ।
विषयं नाधिगच्छामि विचिन्वन् पृथिवीमहं
नाधिगच्छं यदा पृथ्व्यां मिथिला मार्गिता मया
नाध्यगच्छं यदा तस्यां स्वप्रजा मार्गिता मया
नाध्यगच्छं यदा तस्यां तदा मे कश्मलोऽभवत्
ततो मे कश्मलस्यान्ते मतिः पुनरुपस्थिता ॥
तदा न विषयं मन्ये सर्वो वा विषयो मम ।
आत्माऽपि चायं न मम सर्वा वा पृथिवी मम
यथा मम तथाऽन्येषामिति मन्ये द्विजोत्तम ।
उष्यतां यावदुत्साहो भुज्यतां यावदुष्यते १२

ब्राह्मण उवाच ।
पितृपैतामहे राज्ये वश्ये जनपदे सति ।
ब्रूहि कां मतिमास्थाय ममत्वं वर्जितं त्वया ॥
कां वै बुद्धिं समाश्रित्य सर्वो वै विषयस्तव ।
नावैषि विषयं येन सर्वो वा विषयस्तव १४

जनक उवाच ।
अन्तवन्त इहावस्था विदिताः सर्वकर्मसु ।
नाध्यगच्छमहं तस्मान्ममेदमिति यद्भवेत् १५

राज्यं आप्नोति स्वाराज्यमिति श्रुतं स्वाराज्याख्यं परमानन्दम् ॥ १२ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे एकत्रिंशोऽध्याय ॥ ३१ ॥

३२

ममेति द्व्यक्षरो मृत्युरित्युक्तं तत्र ममताया विषय एव नास्तीति जनकब्राह्मणसंवादेनाह—अत्रापीत्यादिना। अत्र लोभे निकृन्तनीये ॥ १ ॥ पितृपैतामहे इति । विषयं विशेषेण सिनोति बध्नाति तं बन्धकं ममतास्पदं नाधिगच्छामि विचिन्वन् अन्वेषमाणोऽपि । अयं भाव । पृथिवी मिथिलाप्रजोपलक्षितं राज्यं शरीरसुखादिकं सर्वं अवस्थान्तरेषु व्यभिचरन्नात्मसम्बन्धितामश्नुते । यथा नीलपीतलोहितोपाधिषु । सञ्चरन्स्फटिको नीलादिवर्जितस्तद्वत् । तस्माद्विचारतो दृश्यत्वादिना स्वप्नवन्मिथ्यात्वाद्ममभिचारित्वाच्च नात्मा तै. सम्बध्यत इति ॥ ८ ॥ आत्माऽपि देहोऽसीति प्राञ्च । वस्तुतस्तु अयमपि मम आत्मा न भवतीति सम्बन्ध । अयमिति साभासोऽहङ्कार सर्वेषामात्मत्वेन प्रसिद्धो मम आत्मा स्वरूप न भवति मुकुरमुखवत् आभासत्वात् । सर्वा वा पृथिवी सर्वं दृश्यं मम आत्मा मदनन्यत्वात् । मुकुरमुखवदेव ॥ ११ ॥ अयमेव न्यायो ब्रह्मादिपुत्तिकान्तेष्वित्याह—यथेति । मायामनइन्द्रियवद्दर्पणेषु हि प्रतिबिम्बितो ह्यदृश्य आत्मा ईशसूत्रविराडात्मना दृश्यो नात्मा च भवति न वस्तुत इत्यर्थ· ॥ १२ ॥ आढ्यत्वदरिद्रत्वादयोऽवस्था ॥ १५ ॥

कस्येदमिति कस्य स्वमिति वेदवचस्तथा ।
नाध्यगच्छमहं बुद्ध्या ममेदमिति यद्भवेत् १६
एतां बुद्धिं समाश्रित्य ममत्वं वर्जितं मया ।
शृणु बुद्धिं च यां ज्ञात्वा सर्वत्र विषयो मम ॥
नाहमात्मार्थमिच्छामि गन्धान् घ्राणगतानपि
तस्मान्मे निर्जिता भूमिर्वशे तिष्ठति नित्यदा।
नाहमात्मार्थमिच्छामि रसानास्येऽपि वर्ततः
आपो मे निर्जितास्तस्माद्वशे तिष्ठन्ति नित्यदा
नाहमात्मार्थमिच्छामि रूपं ज्योतिश्च चक्षुषः
तस्मान्मे निर्जितं ज्योतिर्वशे तिष्ठति नित्यदा
नाहमात्मार्थमिच्छामि स्पर्शांस्त्वचि गताश्च ये
तस्मान्मे निर्जितो वायुर्वशे तिष्ठति नित्यदा ॥
नाहमात्मार्थमिच्छामि शब्दान् श्रोत्रगतानपि
तस्मान्मे निर्जिताः शब्दा वशे तिष्ठन्ति नित्यदा
नाहमात्मार्थमिच्छामि मनो नित्यं मनोन्तरे
मनो मे निर्जितं तस्माद्वशे तिष्ठति नित्यदा ॥
देवेभ्यश्च पितृभ्यश्च भूतेभ्योऽतिथिभिः सह ।
इत्यर्थं सर्व एवेति समारम्भा भवन्ति वै २४
ततः प्रहस्य जनकं ब्राह्मणः पुनरब्रवीत ।
त्वज्जिज्ञासार्थमद्येह विद्धि मा धर्ममागतम् ॥
त्वमस्य ब्रह्मलाभस्य दुर्वारस्यानिवर्तिनः ।
सत्त्वनेमिनिरुद्धस्य चक्रस्यैकः प्रवर्तकः ॥ २६

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्राह्मणगीतासु द्वात्रिंशोऽध्यायः ॥ ३२ ॥



३३

ब्राह्मण उवाच ।
नाहं तथा भीरु चरामि लोके
यथा त्वं मां तर्जयसे स्वबुद्ध्या ।
विप्रोऽस्मि मुक्तोऽस्मि वनेचरोऽस्मि
गृहस्थधर्मा व्रतवांस्तथास्मि ॥ १
नाहमस्मि यथा मां त्वं पश्यसे च शुभाशुभे ।
मया व्याप्तमिदं सर्वं यत्किञ्चिज्जगतीगतम् २
ये केचिज्जन्तवो लोके जङ्गमाः स्थावराश्च ह ।
तेषां मामन्तकं विद्धि दारूणामिव पावकम् ६
राज्यं पृथिव्यां सर्वस्यामथवाऽपि त्रिविष्टपे ।
तथा बुद्धिरियं वेत्ति बुद्धिरेव धनं मम ॥ ४
एकः पन्था ब्राह्मणानां येन गच्छन्ति तद्विदः
गृहेषु वनवासेषु गुरुवासेषु भिक्षुषु ॥ ५
लिङ्गैर्बहुभिरत्यर्थैरेका बुद्धिरुपास्यते ।
नानालिङ्गाश्रमस्थानां येषां बुद्धिः शमात्मिका
ते भावमेकमायान्ति सरितः सागरं यथा ।
बुद्ध्यायं गम्यते मार्गः शरीरेण न गम्यते ।
आद्यन्तवन्ति कर्माणि शरीरं कर्मबन्धनम् ७
तस्मात्ते सुभगे नास्ति परलोककृतं भयम् ।
तद्भावभावनिरता ममैवात्मानमेष्यसि ॥ ८

कस्येदमिति । न कस्यचिदित्यर्थ । अत्र 'मा गृध कस्य स्विद्धनम्' । (ईशो० म १) इति श्रुतिं प्रमाणयति—कस्य स्वमिति ॥ १६ ॥ आद्यत्वादेरन्तवत्त्वाद्धनादिषु ममता मया त्यक्तेत्याह—एतामिति । देवाद्यर्थमेव विहितगृहीतस्येव मम गन्धादीनामिच्छा नात्मभोगार्थे अता भूम्यादय एव मम वशे तिष्ठन्ति न त्वहं तेषामित्याह—शृणु इत्यादिना ॥ १७ ॥ त्वमस्येति । अस्य चक्रस्य आत्मापि चायं न मम सर्वा वा पृथिवी ममेत्येवंरूपस्य धीसाधनकलापस्य ब्रह्मलाभस्य ब्रह्मलाभहेतो । दुर्वारस्य अनैकान्तिकस्य । अनिवर्तिन आत्यन्तिकस्य सत्त्वनेमिना सत्त्वगुणरूपेणावरणेन चक्रधारास्थानीयेन निरुद्धस्य प्रवर्तको मुख्यानुष्ठाता ॥ २६ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे द्वात्रिंशोऽध्याय ॥ ३२ ॥

३३

समाप्ता ब्रह्मविद्या ससाधना । अथ जीवन्मुक्त्यवस्थामाह—नाहमित्यादिना । तथेति यथा देहात्मवादिन· ॥ १ ॥ पश्यसे कर्मण्यतिहारे तङ् । त्वद्दृष्टरं मां त्वं स्वबुद्ध्या यथा साक्षिन पश्यसि तथा नाहमस्मीत्यर्थ· । आत्मन सर्वात्मत्वं सर्वस्य चात्ममात्रत्व ज्ञानफलं प्रतिपादयति सार्धेन—मयेति ॥ २ ॥ 'आप्नोति स्वराज्यम् ।' इत्यादिश्रुत्यर्थं संगृह्णाति-राज्यमिति ॥४॥ एक पन्थाः ज्ञानरूपो नान्य ब्राह्मणाना ब्रह्मविदाम् ॥५॥ सुभगे ईश्वरि शरीरबन्धनिर्मुक्तत्वात् । परलोक अनात्मलोक· तद्भावो मदात्मभाव. तस्य भावो भावना ॥ ८ ॥

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्राह्मणगीतासु त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

३४

ब्राह्मण्युवाच ।
नेदमल्पात्मना शक्यं वेदितुं नाकृतात्मना ।
बहु चाल्पं च संक्षिप्तं विप्लुतं च मतं मम १
उपायं तं मम ब्रूहि येनैषा लभ्यते मतिः ।
तन्मन्ये कारणं त्वत्तो यत एषा प्रवर्तते ॥ २

ब्राह्मण उवाच ।
अरणीं ब्राह्मणीं विद्धि गुरुरस्योत्तरारणिः ।
तपःश्रुतेऽभिमथ्नीतो ज्ञानाग्निर्जायते ततः ॥ ३

ब्राह्मण्युवाच ।
यदिदं ब्राह्मणो लिङ्गं क्षेत्रज्ञ इति संज्ञितम ।
ग्रहीतुं येन यच्छक्यं लक्षणं तस्य तत्क नु ॥ ४

ब्राह्मण उवाच ।
अलिङ्गो निर्गुणश्चैव कारणं नास्य लक्ष्यते ।
उपायमेव वक्ष्यामि येन गृह्येत वा न वा ॥ ५
सम्यगुपायो दृष्टश्च भ्रमरैरिव लक्ष्यते* ।
कर्मबुद्धिरबुद्धित्वाज्ज्ञानलिङ्गैरिवाश्रितम् ॥ ६
इदं कार्यमिदं नेति न मोक्षेषूपदिश्यते ।
पश्यतः शृण्वतो बुद्धिरात्मनो येषु जायते ७
यावन्त इह शक्येरंस्तावतोंशान्प्रकल्पयेत् ।
अव्यक्तान् व्यक्तरूपांश्च शतशोऽथ सहस्रशः ८

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥

३४

उक्तमर्थमाक्षिपति—**नेदमिति** ॥ १ ॥ मन्ये जानीयाम् ॥ २ ॥ ब्राह्मणीं बुद्धिं तप मननिदिध्यासनात्मकमालोचनम् । श्रुतं वेदान्तश्रवणं 'आत्मा वा अरे द्रष्टव्य श्रोतव्यो मन्तव्यो निदिध्यासितव्य' इति आत्मदर्शनानुवादेन श्रवणादिविधानात् ॥ ३ ॥ आक्षेपपूर्वकं ज्ञेयस्वरूपमाह-**यदिदमित्यादिना** । यदिदमपरोक्षं क्षेत्रज्ञ इति संज्ञितं जीवाख्यं ससङ्गं रूपं तत् ब्रह्मणोऽसङ्गस्य लिङ्गं स्वरूपमिति यत्तत्क नु न कथंचन जीवस्य ब्रह्मभाव सम्भवतीत्यर्थ । अत्रोपपत्तिमाह—**ग्रहीतुमिति**। यत् येन निग्रहीतुं शक्यं तत् निग्राह्यं तस्य निग्रहीतुर्लक्षणं स्वरूपं इति क नु दृष्टं न क्वापीत्यर्थ । 'आत्मानमन्तरो यमयति'( ) इति जीवेशयोर्नियम्य नियामकत्वश्रवणात् भृत्यभर्त्रोरिव न तयोरभेदसम्भावनापीति भाव ॥ ४ ॥ उत्तरमाह—**अलिङ्ग इति** । योऽयं क्षेत्रज्ञ उक्त स लिङ्गं एवंरूप इति निर्देशयोग्यं स्वरूपं तद्रहित । यतो निर्गुण । अस्य सगुणत्वं सलिङ्गत्वं च विनैव कारणं भ्रान्त्यैव भाति न सत्यं विद्यत इत्यर्थः । भ्रान्त्यपगमेन तदधिगमे उपायमेव वक्ष्यामि न वेति चित्तशुद्ध्यभावे॥५॥ सम्यगुपायो दृष्टश्च । पूर्वोक्ता श्रवणादयस्तैर्भ्रमरैरुपरि भ्रमद्भिरव स्थमगृहीतमपि सुरभि द्रव्यं लक्ष्यते । एवं श्रवणादिभिरात्मा लक्षणाद्वारेण लक्ष्यत इत्यर्थ । कोऽप्युपाय । कर्मबुद्धि कर्मशोधिता बुद्धि कर्मबुद्धि । कर्मभिरशोधितायां बुद्धौ श्रवणाद्यभ्यासमहत्त्वेनापि न गम्यत इति भाव । अबुद्धित्वादुक्तविबुद्धिराहित्यात् । मूढा असङ्गमपि क्षेत्रज्ञं ज्ञानलिङ्गैर्बुद्ध्यादिभिराश्रितं सङ्गिनमिव मन्यन्ते । तद्वस्तु उपायेन श्रवणादिजन्यया बुद्धया लक्ष्यत इति सम्बन्ध ॥ ६ ॥ नेदं ब्रह्मज्ञानं विधिनिषेधप्रधानम् । अहेयानुपादेयप्रत्यगात्मविषयत्वात् । तथात्वे वा स्वरूपनाशानित्यत्वे दुरपन्हवे स्याताम् । अपि तु रज्जुदर्शनदशमत्वश्रवणाभ्यां सर्पादशमत्वयोरिव बुद्धया वाक्येन वाऽविद्याध्यारोपितकार्यकारणप्रपञ्चस्य निराकरणसापेक्षमित्याह-**इदं कार्यमिति** । मोक्षेष्विति बहुवचनं मुक्त्यपादानभूतबुद्धयादितत्त्वभेदात् ॥ ७ ॥ ते च यावन्त पञ्च सप्त एकादश त्रयोदश वा तेषां प्रत्येकं वृत्तिभेदात् शतश सहस्रशो वा कल्पनीया इत्याह-**यावन्त इति** । अव्यक्तान्मायाविद्यादिरूपान् व्यक्तरूपान् शब्दादीन् उपेयप्रतिपत्त्यर्था उपाया अव्यवस्थिता इति न्यायेन शिष्यबोधार्थं मन्दमध्यमोत्तमाधिकारिभेदेन व्यष्टिमात्रकल्पनया वा समष्टिव्यष्टिद्वयकल्पनया वा समष्टिमात्रकल्पनया वा तत्त्वार्थयोरभेदं प्रत्याययन्नत्र वस्तुसन्तोऽनात्मपदार्था सन्ति । येन मोक्षोपादानानि तार्किकादिवत्संख्यया परिच्छेत्तेरन्नित्यर्थ. ॥ ८ ॥

* 'सम्यगप्युपदिष्टस्य ह्यमृतस्यव तृप्यते' इति पाठ ।

सर्वोत्पानार्थयुक्तांश्च सर्वान्प्रत्यक्षहेतुकान् ।
यतः परं न विद्येत ततोभ्यासे भविष्यति ९

श्रीभगवानुवाच ।

तत्रस्तु तस्या ब्राह्मण्या मतिः क्षेत्रज्ञसंक्षये×
क्षेत्रज्ञानेन परतः क्षेत्रज्ञेभ्यः प्रवर्तते ॥ १०

अर्जुन उवाच ।

क्व नु सा ब्राह्मणी कृष्ण क्व चासौ ब्राह्मणर्षभः
याभ्यां सिद्धिरियं प्राप्ता तावुभौ वद मेऽच्युत

श्रीभगवानुवाच ।

मनो मे ब्राह्मणं विद्धि
बुद्धिं मे विद्धि ब्राह्मणीम् ।
क्षेत्रज्ञ इति यश्चोक्तः
सोऽहमेव धनञ्जय ॥ १२

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि ब्राह्मणगीतासु चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥



३५

अर्जुन उवाच ।

ब्रह्म यत्परमं ज्ञेयं तन्मे व्याख्यातुमर्हसि ।
भवतो हि प्रसादेन सूक्ष्मे मे रमते मतिः ॥ १

वासुदेव उवाच ।

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
संवादं मोक्षसंयुक्तं शिष्यस्य गुरुणा सह २
कश्चिद्ब्राह्मणमासीनमाचार्यं संशितव्रतम् ।
शिष्यः पप्रच्छ मेधावी किंस्विच्छ्रेयः परंतप
भगवन्तं प्रपन्नोऽहं नि.श्रेयसपरायणः ।
याचे त्वां शिरसा विप्र यद्वयां ब्रूहि तन्मम ४
तमेवंवादिनं पार्थ शिष्यं गुरुरुवाच ह ।
सर्वं तु ते प्रवक्ष्यामि यत्र वै संशयो द्विज ॥ ५

इत्युक्तः स कुरुश्रेष्ठ गुरुणा गुरुवत्सलः ।
प्राञ्जलिः पारिपप्रच्छ यत्तः शृणु महामते ॥ ६

शिष्य उवाच ।

कुतश्चाहं कुतश्च त्वं तत्सत्यं ब्रूहि यत्परम् ।
कुतो जातानि भूतानि स्थावराणि चराणि च
केन जीवन्ति भूतानि तेषामायुश्च किं परम् ।
किं सत्यं किं तपो विप्र के गुणाः सद्भिरीरिताः
के पन्थानः शिवाश्च स्युः
किं सुखं किञ्च दुष्कृतम् ।
एतान्मे भगवन्प्रश्नान्
याथातथ्येन सुव्रत ॥ ९

तत इति । प्रथमार्थे तसि यत पर अन्यन्नास्ति तद्वस्तु भविष्यत्यधिकारी । अभ्यासे शमाद्यभ्यासे पुष्कले सति । अत्र कण्ठगतविस्मृतचामीकरवद्ब्रह्म प्राप्तिभवन नोत्पाद्यत्वेनानित्यत्वापत्ते । ' ब्रह्मैव सन् ब्रह्माप्येति ' ' तत्त्वमसि ' इत्यादिवाक्येभ्य सिद्धवद्ब्रह्मभावश्रवणादित्यर्थ ॥ ९ ॥ क्षेत्रज्ञसंक्षये जीवस्य परमात्मनि प्रविलापने क्षेत्रज्ञानेनैव क्षेत्रज्ञात्परं ज्ञायत इत्याह—क्षेत्रेति । क्षेत्रज्ञ एवोपाधिविलयाद्ब्रह्मैवास्तीत्यर्थ ॥ १० ॥ मनो मे चित्प्रतिबिंबगर्भ मनो जीव इत्यर्थ । मनोमुक्त क्षेत्रज्ञोहमेव ब्रह्मैवेत्यर्थ ॥ १२ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे चतुस्त्रिंशोऽध्याय ३४ × क्षेत्रज्ञसंशये इतिपा.

३५

पूर्वाध्यायान्ते—

मनो मे ब्राह्मणं विद्धि बुद्धिं मे विद्धि ब्राह्मणीम् ।
क्षेत्रज्ञ इति यश्चोक्त सोऽहमेव धनजय ॥

ति मनोबुद्धयोर्ब्रह्मावित्त्वेन तदुपलक्षितसकलकरणप्रकाश्यमर्थजातं ब्रह्मेत्युक्तं यश्च तयो साक्षी स चिदात्माहमिति च दर्शितम् । तत्र प्रपञ्च साक्षी चेत्युभयमपि परं ब्रह्म उत तयोरन्यतरत्परं ब्रह्म तन्मे वदेत्यर्जुन उवाच—ब्रह्म यदिति । आद्ये पक्षे सप्रपञ्च ब्रह्म ज्ञेय द्वितीये निष्प्रपञ्चमिति तत्र सूक्ष्मे निष्प्रपञ्च एव मे मनो रमत इति स्वतुष्टिं कथयति । तेन 'सता हि सन्देहपदेषु वस्तुषु प्रमाणमन्त -करणस्य वृतय ' इति न्यायेन निष्प्रपञ्चमेव शास्त्रार्थ इति ज्ञापयति ॥ १ ॥ मोक्षसंयुक्तं यस्मिन् श्रुते सद्यो मुक्तिरेव लभ्यत इत्यर्थ ॥ २ ॥ ब्रूया पृच्छामि ॥ ४ ॥ अहं त्वमिति शास्यशासनकर्त्रोर्जीवेश्वरयो प्रश्न । यच्च ताभ्यां परं अन्यत्सत्यमबाधितं वस्तु तदपि ब्रूहि । भूतानि वियदादीनि स्थावरादीनि भौतिकानि ॥ ७ ॥ भूतानि उभयविधानि किं परमवसानं यस्य तत् किं तेषां लयस्थानमित्यर्थ । किं सत्यं अबाधितफल कर्म तप क्रियारूपं कायिकादिभेदेन त्रिविधं गुणा सत्त्वादय किंस्वरूपा इत्यर्थः ॥ ८ ॥ सुखं मुख्यं प्रश्नान् वक्तुमर्हसीति सम्बन्ध ॥ ९ ॥

वक्तुमर्हसि विप्रर्षे यथावदिह तत्त्वतः ।
त्वदन्यः कश्चन प्रश्नानेतान्वक्तुमिहार्हति ॥ १०
ब्रूहि धर्मविदां श्रेष्ठ परं कौतूहलं मम ।
मोक्षधर्मार्थकुशलो भवाँल्लोकेषु गीयते ॥ ११
सर्वसंशयसंच्छेत्ता त्वदन्यो न च विद्यते ।
संसारभीरवश्चैव मोक्षकामास्तथा वयम् १२

वासुदेव उवाच ।

तस्मै संप्रतिपन्नाय यथावत्परिपृच्छते ।
शिष्याय गुणयुक्ताय शान्ताय प्रियवादिने ॥
छायाभूताय दान्ताय यतते ब्रह्मचारिणे ।
तान्प्रश्न नब्रवीत्पार्थ मेधावी स धृतव्रतः ।
गुरुः कुरुकुलश्रेष्ठ सम्यक्सर्वानरिन्दम ॥ १४

गुरुरुवाच ।

ब्रह्मणोक्तमिदं सर्वमृषिप्रवरसेवितम् ।
वेदविद्यां समाश्रित्य तत्त्वभूतार्थभावनम् १५
ज्ञानं त्वेव परं विद्मः संन्यासं तप उत्तमम् ।
यस्तु वेद निराबाधं ज्ञानतत्त्वं विनिश्चयात् ।
सर्वभूतस्थमात्मानं स सर्वगतिरिष्यते ॥ १६
यो विद्वान्सहसंवासं विवासं चैव पश्यति ।
तथैवैकत्वनानात्वे स दुःखात्परिमुच्यते १७
यो न कामयते किञ्चिन्न किञ्चिदभिमन्यते ।
इहलोकस्थ एवैष ब्रह्मभूयाय कल्पते ॥ १८
प्रधानगुणतत्त्वज्ञः सर्वभूतविधानवित् ।
निर्ममो निरहङ्कारो मुच्यते नात्र संशयः १९
अव्यक्तबीजप्रभवो बुद्धिस्कन्धमयो महान् ।
महाहङ्कारविटप इन्द्रियांकुरकोटरः ॥ २०
महाभूतविशेषश्च विशेषप्रतिशाखवान् ।
सदापर्णः सदापुष्पः सदा शुभफलोदयः २१
आजीवः सर्वभूतानां ब्रह्मबीजः सनातनः ।
एतज्ज्ञात्वा च तत्त्वानि ज्ञानेन परमार्षिणा ।
छित्त्वा चामरतां प्राप्य जहाति मृत्युजन्मनी
भूतभव्यभविष्यादि धर्मकामार्थनिश्चयम् ।
सिद्धसंघपरिज्ञातं पुराकल्पं सनातनम् २३
प्रवक्ष्येऽहं महाप्राज्ञ पदमुत्तममद्य ते ।
बुद्ध्वा यदिह संसिद्धा भवन्तीह मनीषिणः
उपगम्यर्षयः पूर्वं जिज्ञासन्तः परस्परम् ।
प्रजापतिभरद्वाजौ गौतमो भार्गवस्तथा २५
वसिष्ठः कश्यपश्चैव विश्वामित्रोऽत्रिरेव च ।
मार्गान्सर्वान्परिक्रम्य परिश्रान्ता स्वकर्मभिः
ऋषिमाङ्गिरसं वृद्धं पुरस्कृत्य तु ते द्विजाः ।
ददृशुर्ब्रह्मभवने ब्रह्माणं वीतकल्मषम् ॥ २७
तं प्रणम्य महात्मानं सुखासीनं महर्षयः ।
पप्रच्छुर्विनयोपेता नैःश्रेयसमिदं परम् ॥ २८

कथं कर्म क्रियात्साधु
कथं मुच्येत किल्बिषात् ।
के नो मार्गाः शिवाश्च स्युः
किं सत्यं किं च दुष्कृतम् ॥ २९

कश्च कोपि ॥ १० ॥ स्ववाक्ये श्रद्धोत्पादनार्थमाख्यायिकामुखेनोत्तरयति—**ब्रह्मणेति** । इदं त्वया पृष्टं वेदविद्यां समाश्रित्य आश्रित्य ननु स्वकल्पना तत्त्वभूतस्य अबाधितस्यार्थस्य भावनं विचारो यस्मिन् तत् ॥ १५ ॥ ज्ञानं परंब्रह्मविषयं उत्तमं तथा तपः संन्यासाख्यं उत्तमं ज्ञानतत्त्वं ज्ञानस्य तत्त्वं याथार्थ्यं घटादितत्त्वज्ञानव्यावृत्तये—**निराबाधमिति** । निर्गतं आसमंतात् बाधो यस्मात् । तद्धि ब्रह्मज्ञानबाध्यं न तथैतदित्यर्थः । यश्च 'एतत्सर्वं सर्वभूतस्थं च आत्मानं सप्रज्ञातावस्थाया वेद स सर्वगति सर्वकामभाक् भवति तेषां 'सर्वेषु लोकेषु कामचारो भवति' इति श्रुते सार्धश्लोको वाक्यम् ॥ १६ ॥ सहसंवासं चिज्जडयोरेकलोलीभावं सप्रज्ञाते । विवासं तयो पृथक्त्वं शुद्धत्वं पदार्थदर्शने । एकत्व ईश्वरादमेदं तस्यैव नानात्वं तयोर्भिन्नत्वं व्यवहारे ॥ १७ ॥ **न कामयत** इति ममकाराभाव । **नाभिमन्यत** इत्यभिमानोऽहकारस्तदभाव तयो सतोर्जीवन्नेव मुच्यत इत्यर्थः ॥१८॥ प्रधानं माया। गुणाः सत्त्वादय । तेषा तत्त्वं कल्पितत्वस्वरूपं याथात्म्यम् । सर्वभूताना विधानं विधीयते उत्पाद्यतेऽनेनेति कारण तदुभयज्ञो मुच्यते ॥ १९ ॥ अव्यक्तं अज्ञानं तदेव बीजप्रभवो मूल अकुरश्च यस्य बुद्धिर्महत्तत्त्वं तदेव स्कधा यस्य अहंकारो विटपा पञ्चा यस्य । इन्द्रियाण्येव अकुरा अनर्थवल्लीपूर्वरूपभूता कोटरेषु छिद्रेषु यस्य ॥ २० ॥ महाभूतानि वियदादीनि विशेषास्तिलक पुष्पकोरकस्थानीयो यस्य । विशेषा स्थूलकार्याणि तान्येव प्रतिशाखा उपशाखास्तद्वान् पर्ण उत्पद्यपतनशील संकल्पः पुष्प कर्मफल सुखादि ॥ २१ ॥ एतत् बीजभूतं ब्रह्म ज्ञात्वा तत्त्वानि अव्यक्तादीनि ज्ञानेन छित्त्वेति तेषामज्ञानकार्यत्वं रज्जूरगवदुक्तं **जहाति** त्यजति सार्धश्लोक । एतेन **ऊर्ध्वमूलार्थः** स्मारित ॥२२॥ **भूतेति** । भूरादय आदिपदार्थ तेषामर्थाताना निश्चय स्वरूपावधारणं यस्मिन् तं पुराकल्पं ब्रह्मकृतकमन्वाख्यानम् ॥ २३ ॥ पदं पदनीयं अधिगन्तव्यं संसिद्धा मुक्ता ॥ २४ ॥ पुराकल्पमेवाह—**उपगम्येति** ॥२५॥ मार्गान्कर्मगती परिक्रम्य पुनः पुनर्गत्वा ॥२६॥ क्रियात्कुर्वीत के नोऽस्माकम् ॥२९॥

कौ चोभौ कर्मणां मार्गौ प्राप्नुयुर्दक्षिणोत्तरौ।
प्रलयं चापवर्गं च भूतानां प्रभवाप्ययौ ॥ ३०
इत्युक्तः स मुनिश्रेष्ठैर्यदाह प्रपितामहः।
तत्तेऽहं सम्प्रवक्ष्यामि शृणु शिष्य यथागमम्॥
ब्रह्मोवाच।
सत्याद्भूतानि जातानि
स्थावराणि चराणि च।
तपसा तानि जीवन्ति
इति तद्विद्धि सुव्रताः।
स्वां योनिं समतिक्रम्य
वर्तन्ते स्वेन कर्मणा ॥ ३२
सत्यं हि गुणसंयुक्तं नियतं पञ्चलक्षणम् ३३
ब्रह्म सत्यं तपः सत्यं सत्यं चैव प्रजापतिः।
सत्याद्भूतानि जातानि सत्यं भूतमयं जगत्
तस्मात्सत्यमया विप्रा नित्यं योगपरायणाः।
अतीतक्रोधसंतापा नियता धर्मसेविनः ३५
अन्योन्यनियतान्वैद्यान्धर्मसेतुप्रवर्तकान्।
तानहं संप्रवक्ष्यामि शाश्वतान्लोकभावनान्
चातुर्विद्यं तथा वर्णाश्चातुराश्रमिकान् पृथक्
धर्ममेकं चतुष्पादं नित्यमाहुर्मनीषिणः ३७
पन्थानं वः प्रवक्ष्यामि शिवं क्षेमकरं द्विजाः।
नियतं ब्रह्मभावाय गतं पूर्वैं मनीषिभिः ॥ ३८
गदन्तस्तं मयाद्येह पन्थानं दुर्विदं परम्।
निबोधत महाभागा निखिलेन परं पदम् ३९
ब्रह्मचारिकमेवाहुराश्रमं प्रथमं पदम्।
गार्हस्थ्यं तु द्वितीयं स्याद्वानप्रस्थमतः परम्।
ततः परं तु विज्ञेयमध्यात्मं परमं पदम् ॥ ४०
ज्योतिराकाशमादित्यो वायुरिन्द्रः प्रजापतिः
नोपैति यावदध्यात्मं तावदेतान्न पश्यति ४१
तस्योपायं प्रवक्ष्यामि पुरस्तात्तं निबोधत।
फलमूलानिलभुजां मुनीनां वसतां वने ॥ ४२
वानप्रस्थं द्विजातीनां त्रयाणामुपदिश्यते।
सर्वेषामेव वर्णानां गार्हस्थ्य तद्द्वितीयते ४३
श्रद्धालक्षणमित्येवं धर्मं धीराः प्रचक्षते। ।
इत्येवं देवयाना वः पन्थानः परिकीर्तिताः
सद्भिरध्यासिता धीरैः कर्मभिर्धर्मसेतवः ४४
एतेषां पृथगध्यास्ते यो धर्मं संशितव्रतः।
कालात्पश्यति भूतानां सदैव प्रभवाप्ययौ ४५
अतस्तत्त्वानि वक्ष्यामि याथातथ्येन हेतुना।
विषयस्थानि सर्वाणि वर्तमानानि भागशः॥
महानात्मा तथाऽव्यक्तमहंकारस्तथैव च।
इन्द्रियाणि दशैकं च महाभूतानि पञ्च च ४७
विशेषाः पञ्चभूतानामिति सर्गः सनातनः।
चतुर्विंशतिरेका च तत्त्वसंख्या प्रकीर्तिता ४८
तत्त्वानामथ यो वेद सर्वेषां प्रभवाप्ययौ।
स धीरः सर्वभूतेषु न मोहमधिगच्छति ४९

प्रलयो दैनंदिनादिर्भूतलय अपवर्ग आत्यन्तिको भूतोच्छेदो मोक्षाख्य प्रभवाप्ययौ जन्ममृत्यू ॥३०॥ यथागमं वेदानुसारि ॥ ३१ ॥ सत्यात् त्रैकालिकबाधरहितात् ब्रह्मण । भूतानि अव्यक्तादीनि स्थावराणि वियदादीनि चराणि जरायुजादीनि । एतेन कुतश्चाहमिति श्लोकोक्तप्रश्नानामुत्तरमुक्तम्। तपसा कर्मणा जीवन्ति इति हेतोर्द्विजा स्वा योनिं ब्रह्म समतिक्रम्य ध्यानच्युता विक्षेपावस्थां प्राप्य स्वकर्मणा वर्तन्त इति सार्द्ध श्लोक ॥३२॥ किं सत्यमित्यस्योत्तरमाह—**सत्यमिति** । गुणसंयुक्तमित्यनेन निर्गुणं सत्यं एकमेव तत्र भेदहेतोर्गुणस्यैवाभावादिति दर्शितम् ॥ ३३ ॥ ब्रह्म ईश्वर तपो धर्म प्रजापतिर्जीवः भूतानि खादीनि जगत् जरायुजादि एतत् व्यावहारिकं गुणमयं सत्यपञ्चकम् ॥ ३४ ॥ यस्मात्तस्मात्सत्यमया सत्यप्रधानाः धर्मसेविनो भवन्ति ॥ ३५ ॥ अन्योन्यनियतान्परस्परभयेन धर्मातिक्रमशून्यान् वैद्यान्विद्यावतस्तान्विप्रान्प्रतीति शेष ॥ ३६ ॥ चतस्रो धर्मार्थकाममोक्षप्रदा विद्याश्चतुर्विद्यास्ता एव चातुर्विद्यम्। तच्च प्रतिवर्णं प्रत्याश्रमं च पृथक् प्रवक्ष्यामीत्यनुषज्यते ॥ ३७ ॥ गदन्तः भो प्रवक्तार मया वक्ष्यमाणं पंथान निबोधत तेन च पथा पर पदं निबोधत ॥ ३९ ॥ आत्मानमधिकृत्य प्रवृत्तमाश्रममध्यात्मं संन्यासं परं पदमाहुरिति पूर्वेणान्वय. ॥ ४० ॥ ज्योतिरादिकं विश्वं तावत्पश्यति यावत् अध्यात्मं संन्यासपूर्वकमात्मदर्शनं नोपैति न लभते ॥ ४१ ॥ **श्रद्धा** आस्तिक्यबुद्धि सैव धर्मस्य मुख्यं लक्षणं ज्ञापकम्। श्रद्धाहीनं सर्वं व्यर्थमित्यर्थ । देवयानाः देवयानमार्गप्राप्त्युपाया ॥ ४४ ॥ एतेषामन्यतमं धर्मं य पृथक् भिन्नं एकमेव अध्यास्ते दृढमाश्रयति स कालात्क्रमेण चित्तशुद्धिपरिपाके सति भूताना प्रभवाप्ययौ स्वनिष्ठाविति सदैव निमेषोन्मेषमात्रे कालेऽनवरत पश्यति । एतेन दृष्टिरेव सृष्टिरित्युक्तं भवति ॥ ४५ ॥ हेतुना युक्त्या विषयस्थानि बुद्धिगोचराणि बुद्धिस्थानि ॥ ४६ ॥ विशेषाः शब्दादयो विशेषगुणा. । एका चेति पुरुषग्रहणम् ॥ ४८ ॥

तत्त्वानि यो वेदयते यथातथं
गुणांश्च सर्वानखिलाश्च देवताः ।
विधूतपाप्मा प्रविमुच्य बन्धनं
स सर्वलोकानमलान्समश्नुते ॥ ५०

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥



३६

ब्रह्मोवाच ।

तदव्यक्तमनुद्रिक्तं सर्वव्यापि ध्रुवं स्थिरम् ।
नवद्वारं पुरं विद्यात्त्रिगुणं पञ्चधातुकम् ॥ १
एकादशपरिक्षेपं मनो व्याकरणात्मकम् ।
बुद्धिस्वामिकमित्येतत्परमेकादशं भवेत् ॥ २
त्रीणि स्रोतांसि यान्यस्मिन्
स्राप्यायन्ते पुनः पुनः ।
प्रनाड्यस्तैस्त्र एवैताः
प्रवर्तन्ते गुणात्मिकाः ॥ ३
तमो रजस्तथा सत्त्वं गुणानेतान्प्रचक्षते ।
अन्योन्यमिथुनाः सर्वे तथान्योन्यानुजीविनः
अन्योन्यापाश्रयाश्चापि तथान्योन्यानुवर्तिनः
अन्योन्यव्यतिषक्ताश्च त्रिगुणाः पञ्चधातवः ५
तमसो मिथुनं सत्त्वं सत्त्वस्य मिथुनं रजः ।
रजसश्चापि सत्त्वं स्यात्सत्त्वस्य मिथुनं तमः
नियम्यते तमो यत्र रजस्तत्र प्रवर्तते ।
नियम्यते रजो यत्र सत्त्वं तत्र प्रवर्तते ॥ ७

सर्वलोकान्समश्नुते सार्वात्म्यं लभते । 'य एव वेदाहं ब्रह्मास्मि' इति 'स इदं सर्वं भवति' इति श्रुते ॥ ५० ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे पञ्चत्रिंशोऽध्याय ॥ ३५ ॥

३६


उक्तान्येव तत्त्वानि विवरीतुमुत्तरो ग्रन्थ आरभ्यते— **तदिति** । तत् तत्र तेषु तत्त्वेषु व्याख्यातेषु मध्ये अनुद्रिक्तं त्रिगुणमव्यक्तं विद्यात्साम्योपेतं गुणत्रयमव्यक्तपदार्थ । तच्च सर्वकार्यव्यापि ध्रुव अविनाशि । स्थिरं अचञ्चलं निराकाङ्क्षमिति यावत् । तदेवाव्यक्तमुद्रिक्तं सत्पञ्चधातुकं भूतपञ्चकं नवद्वार पुरं च विद्यात् तेषा तत्कार्यत्वात् । **पञ्च** घ्राणादीनि । नव तु भोक्तारं प्रति विषयप्रवेशद्वाराणि । **पञ्च** श्रोत्रादीनि मनोबुद्धिप्राणोभिमानाख्योऽहंकारश्च । पुरं शरीरम् ॥ १ ॥ परित क्षिप्यते विषयभोगवासनया जीवात्मा यैस्ते परिक्षेपा इन्द्रियाणि । मनसैव व्याकरणं व्यक्तीभावो येषा ते सङ्कल्पयोनयो विषया· तदात्मकं पुरं बुद्धिस्वामिकं च पुरम् । एतदेव पुरं परं ब्रह्म तत्राध्यस्तत्वात् । एकादश इन्द्रियं मनस्तन्मात्रं च । न केवलं भोग्यमेव मनःकल्पितं अपितु भोक्ता भोग्यं भोगोपकरणं च सर्वं मनोमात्रमित्यर्थ । 'तद्वा इदं मनस्येव परमं प्रतिष्ठितं यदिदं किञ्च' इति श्रुते ॥ २ ॥ स्रोतासि चित्तनद्याः प्रवाहा त्रीणि । **शुक्लं** हिंसाशून्यधर्मप्रावण्यम् । **कृष्णं** हिंसाप्रावण्यम् । **शुक्लकृष्ण** हिंसायुक्तप्रवृत्तिधर्मप्रावण्यं चेति। एतानि यस्मिन् चित्ते विद्यमानानि तिसृभि प्रनाडीभि संस्काररूपाभिस्त्रिगुणात्मिकाभिराप्यायन्ते पूर्यन्ते ताश्च तथैव पुन पुनर्वर्धन्ते ॥ ३ ॥ तत्र त्रीन् गुणान् अव्यक्तावयवभूतान्व्याख्याति— **तम इत्यादि** । अन्योन्यमिथुनत्वं दम्पतीवदेककार्योत्पादनम्। अन्योन्योपजीवित्वं बीजाङ्कुरवत् ॥ ४ ॥ अन्योन्याश्रयत्वं त्रिदण्डविष्टंभवत् । अन्योन्यानुवर्तित्वं प्रधानगुणभावेन राजभृत्यवत् । अन्योन्यव्यतिषक्तत्वं तेजोबन्नवत् । त्रिगुणा गुणत्रयमया· पञ्चधातव पञ्चमहाभूतानि भौतिकानि चेत्यर्थ. ॥ ५ ॥ मिथुनं मथ्नातीति योगादाभिभावकं तमस उद्रेके सत्त्व नश्यति सत्त्वस्योद्रेके तम । एवं रजस उद्रेके सत्त्वं निवर्तते सत्त्वस्योद्रेके रज इति ज्ञेयं रजस्तमसोस्तु परस्परोद्दीपकत्वान्नान्योन्यमभिभावकत्वं भवतीति तन्मिथुनद्वयं नोक्तम् ॥६॥ नियम्यते कर्मकर्तरि प्रयोग । तिरोधीयते इत्यर्थ । रजसस्तिरोधाने तु तमो न प्रवर्ततेऽपि तु सत्त्वमेव अप्रवृत्तिर्हि तमसः कार्यं न तु प्रवृत्तिनिरोध इत्यर्थः ॥ ७ ॥

नैशात्मकं तमो विद्यात्त्रिगुणं मोहसंज्ञितम् ।
अधर्मलक्षणं चैव नियतं पापकर्मसु ।
तामसं रूपमेतत्तु दृश्यते चापि सङ्गतम् ॥ ८
प्रकृत्यात्मकमेवाहू रजः पर्यायकारकम् ।
प्रवृत्तं सर्वभूतेषु दृश्यमुत्पत्तिलक्षणम् ॥ ९
प्रकाशं सर्वभूतेषु लाघवं श्रद्दधानता ।
सात्त्विकं रूपमेवं तु लाघवं साधुसंमितम् १०
एतेषां गुणतत्त्वानि वक्ष्यन्ते तत्त्वहेतुभिः ।
समासव्यासयुक्तानि तत्त्वतस्तानि बोधत ॥
संमोहो ज्ञानमत्यागः कर्मणामविनिर्णयः ।
स्वप्नः स्तम्भो भयं लोभः स्वतः सुकृतदूषणम्
अस्मृतिश्चाविपाकश्च नास्तिक्यं भिन्नवृत्तिता
निर्विशेषत्वमन्धत्वं जघन्यगुणवृत्तिता ॥ १३
अचेतने कृतमानित्वमज्ञाने ज्ञानमानिता ।
अमैत्री विकृताभावो ह्यश्रद्धा मूढभावना १४
अनार्जवमसङ्गत्वं कर्म पापमचेतना ।
गुरुत्वं सन्नभावत्वमवशित्वमवाग्गतिः ॥ १५
सर्व एते गुणा वृत्ता-
स्तामसाः संप्रकीर्तिताः ।
ये चान्ये विहिता भावा
लोकेऽस्मिन्भावसंज्ञिताः ॥ १६
तत्र तत्र नियम्यन्ते सर्वे ते तामसा गुणाः ।
परिवादकथा नित्यं देवब्राह्मणवैदिकी ॥ १७
अत्यागश्चाभिमानश्च मोहो मन्युस्तथाऽक्षमा ।
मत्सरश्चैव भूतेषु तामसं वृत्तमिष्यते ॥ १८
वृथारंभा हि ये केचिद्वृथा दानानि यानि च ।
वृथा भक्षणमित्येतत्तामसं वृत्तमिष्यते ॥ १९
अतिवादोऽतिनिक्षेपश्च मात्सर्यमभिमानिता
अश्रद्दधानता चैव तामसं वृत्तमिष्यते ॥ २०
एवंविधाश्च ये केचिल्लोकेऽस्मिन्पापकर्मिणः ।
मनुष्या भिन्नमर्यादास्ते सर्वे तामसाः स्मृताः
तेषां योनीः प्रवक्ष्यामि नियताः पापकर्मिणां
अवाङ्निरयभावा ये तिर्यङ्निरयगामिनः २२
स्थावराणि च भूतानि पशवो वाहनानि च ।
कृम्यादा दंदशूकाश्च कृमिकीटविहंगमाः ॥२३
अण्डजा जन्तवश्चैव सर्वे चापि चतुष्पदाः ।
उन्मत्ता बधिरा मूका ये चान्ये पापरोगिणः
मन्नास्तमसि दुर्वृत्ताः स्वकर्म कृतलक्षणाः ।
अवाक्स्रोतस इत्येते मन्नास्तमसि तामसाः
तेषामुत्कर्षमुद्रेकं वक्ष्याम्यहमतः परम ।
यथा ते सुकृताँल्लोकाँल्लभन्ते पुण्यकर्मिणः॥२६
अन्यथा प्रतिपन्नास्तु विबुद्धा ये च कर्मणः ।
स्वकर्मनिरतानां च ब्राह्मणानां शुभैषिणाम्
संस्कारेणोर्ध्वमायांति यतमानाः सलोकतां
स्वर्गे गच्छन्ति देवानामित्येषा वैदिकी श्रुतिः
अन्यथा प्रतिपन्नास्ते विबुद्धाः स्वेषु कर्मसु ।
पुनरावृत्तिधर्माणस्ते भवन्तीह मानुषाः ॥ २९
पापयोनिं समापन्नाश्चंडाला मूकचूचुकाः ।
वर्णान्पर्यायशश्चापि प्राप्नुवन्त्युत्तरोत्तरम् ३०
शूद्रयोनिमतिक्रम्य ये चान्ये तामसा गुणाः ।
स्रोतोमध्ये समागम्य वर्तन्ते तामसे गुणे ३१
अभिष्वङ्गस्तु कामेषु महामोह इति स्मृतः ।
ऋषयो मुनयो देवा मुह्यन्त्यत्र सुखेप्सवः॥३२

नैशेति । नैशात्मकं अन्धकाररूपम् । **त्रिगुणमिति** । इतरयोरपि विशेषणं त्रयाणामन्योन्यव्यतिषक्तत्वस्योक्तत्वात् ॥ ८ ॥ पर्यायो वैपरीत्यम् ॥ ९ ॥ लाघवं धर्मज्ञानादिरूप सौष्ठवम् ॥ १० ॥ गुणतत्त्वानि कार्यस्वरूपाणि ॥ ११ ॥ स्वप्नो निद्रा स्तम्भो गर्व ॥ १२ ॥ भिन्नवृत्तिता शीलभङ्ग । निर्विशेषत्व युक्तायुक्तपरीक्षाया अभाव. । अन्धत्वं सर्वेषा करणानामयथावत्प्रतिपत्ति जघन्यगुणश्चाण्डालादिधर्मो हिंस्रत्वाशुचित्वादि । विकृतस्य विविधक्रियारूपस्याभाव अप्रवृत्ति· ॥ १३ ॥ अचेतना अबोध । गुरुत्वं आलस्यादिना गात्राणा जडत्वम् । सन्नभावत्वं नष्टभक्तित्वं देवादिषु । अवशित्वं अजितेन्द्रियत्वम् । अवाक्गतिर्नीचकर्मानुराग ॥ १५ ॥ नियम्यन्ते नियमेनोपतिष्ठन्ते देवब्राह्मणवैदिकी देवादिविषयिणी । देवब्राह्मणनिन्दिका इति पाठे स्पष्टोऽर्थ ॥ १७ ॥ अक्षमेति छेद ॥ १८ ॥ अवाक्स्रोतस अधोगमनार्हश्चित्प्रवाहो येषा ते तथा ॥ २५ ॥ उत्कर्ष आरोहक्रमम् । उद्रेकं पुण्याविर्भावम् ॥ २६ ॥ अन्यथा प्रतिपन्ना तिर्यक्स्थावरादियोनिं प्राप्ता ब्राह्मणाना ब्राह्मणै कर्मण अग्निहोत्राद्यर्थं विवृद्धा हिंसिता सन्तो वैदिकेन सस्कारेण ऊर्ध्वमायान्ति ततश्च्युताश्च ब्राह्मणादिजातिं लब्ध्वा यतमाना इत्यादि द्वयो सम्बन्ध ॥ २७ ॥ एतदेव स्पष्टयति– **अन्यथेति** ॥ २९ ॥ चूचुका स्खलद्गिर· ॥ ३० ॥ **शूद्रेति** । वैश्यादियोनिं प्राप्तौ क्रोधादयस्तामसगुणास्तमोगुणस्रोतसि आयान्ति तेभ्य आत्मानं रक्षेदित्यर्थ ॥ ३१ ॥ कामेषु स्त्र्याद्यर्थेषु अभिष्वङ्ग आसक्ति ॥३२॥

तमो मोहो महामोहस्तामिस्रः क्रोधसञ्ज्ञितः ।
मरणं त्वन्धतामिस्रस्तामिस्रः क्रोध उच्यते ३३
वर्णतो गुणतश्चैव योनितश्चैव तत्त्वतः ।
सर्वमेतत्तमो विप्राः कीर्तितं वो यथाविधि
को न्वेतद्बुध्यते साधु को न्वेतत्साधु पश्यति
अतत्त्वे तत्त्वदर्शी यस्तमसस्तत्त्वलक्षणम् ॥३५
तमोगुणा बहुविधाः प्रकीर्तिता
यथावदुक्तं च तमः परावरम् ।
नरो हि यो वेद गुणानिमान्सदा
स तामसैः सर्वगुणैः प्रमुच्यते ॥ ३६

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे षट्त्रिंशोऽध्यायः ॥ ३६ ॥



३७

ब्रह्मोवाच ।

रजोऽहं वः प्रवक्ष्यामि याथातथ्येन सत्तमाः
निबोधत महाभागा गुणवृत्तं च राजसम् ॥ १
सन्तापो रूपमायासः सुखदुःखे हिमातपौ ।
ऐश्वर्यं विग्रहः सन्धिर्हेतुवादोऽरतिः क्षमा २
बलं शौर्यं मदो रोषो व्यायामकलहावपि ।
ईर्ष्येप्सा पिशुनं युद्धं ममत्वं परिपालनम् ॥ ३
वधबन्धपरिक्लेशाः क्रयो विक्रय एव च ।
निकृन्त छिंधि भिंधीति परवर्मावकर्तनम् ॥ ४
उग्रं दारुणमाक्रोशः परच्छिद्रानुशासनम् ।
लोकचिन्तानुचिन्ता च मत्सरः परिपालनम् ५
मृषा वादो मृषा दानं विकल्पः परिभाषणम्
निन्दा स्तुतिः प्रशंसा च प्रतापः परिधर्षणम्
परिचर्यानुशुश्रूषा सेवा तृष्णा व्यपाश्रयः ।
व्यूहो नयः प्रमादश्च परिवादः परिग्रहः ॥ ७
संस्कारा ये च लोकेषु प्रवर्तन्ते पृथक्पृथक्
नृषु नारीषु भूतेषु द्रव्येषु शरणेषु च ॥ ८
सन्तापोऽप्रत्ययश्चैव व्रतानि नियमाश्च ये ।
आशीर्युक्तानि कर्माणि पौर्तानि विविधानि च
स्वाहाकारो नमस्कारः
स्वधाकारो वषट्क्रिया ।
याजनाध्यापने चोभे
यजनाध्ययने अपि ॥ १०
दानं प्रतिग्रहश्चैव प्रायश्चित्तानि मङ्गलम् ।
इदं मे स्यादिदं मे स्यात्स्नेहो गुणसमुद्भवः ॥
अभिद्रोहस्तथा माया निकृतिर्मान एव च ।
स्तैन्यं हिंसा जुगुप्सा च परितापः प्रजागरः ॥

अविद्यास्मितारागद्वेषाभिनिवेशा पञ्च क्लेशा अत्र तम आदिशब्दैरभिधीयन्ते। तेषु तामिस्रश्चतुर्थ क्रोधसञ्ज्ञितो न तु द्वेष इत्यर्थः । एवं अन्धतामिस्रोऽपि नाभिनिवेश किन्तु मरणमेव । 'तामिस्र क्रोध उच्यते' इति पुनर्वचनं परपरिभाषितार्थनिराकरणार्थम् । तामिस्रान्धतामिस्रपदाभ्या क्रोधमरणे एव प्राह्ये न तु राजसौ द्वेषाभिनिवेशाविति्यर्थ ॥ ३३ ॥ तदेवाह—**वर्णत इति** । एतत्तमआदिशब्दितमाविद्यादिकं सर्वं तम एव ज्ञेयं न तु तत्र रजोंशोऽस्ति । तत्र यथा अविद्या अतस्मिंस्तद्बुद्धिरूपविपर्ययाख्यं तम । एवं तत्प्रभवा अस्मितादयोऽपि तम एव तत्रापि अनात्मनि महत्त्वेऽस्मीत्यात्मबुद्धे सत्त्वात् । एवं रागोप्यप्रिये प्रियत्वाध्यास क्रोध शान्ते प्रतीचि अभिज्वलनाध्यासः । एवं अमृते नित्ये मरिष्यामीति बुद्धिरित्येते वर्णतः स्वरूपत पाकत इति पाठे फलत गुणत विपर्ययत्वत योनितस्तामसत्वतश्च तम एव ॥ ३४ ॥ एतत् दुर्बोधमित्युक्तिपूर्वकं सामान्यतस्तमसो लक्षणमाह—**क इति** ॥ ३५ ॥ तमोविकारा गुणास्तमोगुणा ॥ ३६ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे षट्त्रिंशोऽध्याय ॥ ३६ ॥

३७

रजोऽहमिति ॥ १ ॥ उग्रं निष्ठुरं दारुण हिंस्रत्वम् ॥ ५ ॥ परिभाषण धिक्कृत्य भाषणम् ॥ ६ ॥ व्यूह व्यवहाररचनाकौशलम् ॥ ७ ॥ शरणेषु राक्षितृषु ॥ ८ ॥ अप्रत्ययः अविश्वासः ॥ ९ ॥ परितापः स्वजनवैकल्यानिमित्तो दाहः । पाठान्तरे परिवादः सर्वनिन्दा ॥ १२ ॥

दम्भो दर्पोऽथ रागश्च भक्तिः प्रीतिः प्रमोदनम्
द्यूतं च जनवादश्च सम्बन्धाः स्त्रीकृताश्च ये
नृत्यवादित्रगीतानां प्रसंगा ये च केचन ।
सर्वे एते गुणा विप्रा राजसाः संप्रकीर्तिताः
भूतभव्यभविष्याणां
भावानां भुवि भावनाः ।
त्रिवर्गनिरता नित्यं
धर्मोऽर्थः काम इत्यपि ॥ १५
कामवृत्ताः प्रमोदन्ते सर्वकामसमृद्धिभिः ।
अर्वाक्स्रोतस इत्येते मनुष्या रजसा वृताः ॥
अस्मिँल्लोके प्रमोदन्ते जायमानाः पुनः पुनः ।
प्रेत्य भाविकमीहन्ते पेहलौकिकमेव च ।
ददति प्रतिगृह्णन्ति तर्पयन्त्यथ जुह्वति ॥ १७
रजोगुणा वो बहुधानुकीर्तिता
यथावदुक्तं गुणवृत्तमेव च ।
नरोऽपि यो वेद गुणानिमान्सदा
स राजसैः सर्वगुणैर्विमुच्यते ॥ १८

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥



३८

ब्रह्मोवाच ।
अतः परं प्रवक्ष्यामि तृतीयं गुणमुत्तमम् ।
सर्वभूतहितं लोके सतां धर्ममानन्दितम् ॥ १
आनन्दः प्रीतिरुद्रेकः प्राकाश्यं सुखमेव च ।
अकार्पण्यमसंरम्भः सन्तोषः श्रद्दधानता ॥ २
क्षमा धृतिरहिंसा च समता सत्यमार्जवम् ।
अक्रोधश्चानसूया च शौचं दाक्ष्यं पराक्रमः ३
मुधा ज्ञानं मुधा वृत्तं मुधा सेवा मुधा श्रमः ।
एवं यो युक्तधर्मः स्यात्सोऽमुत्रात्यन्तमश्नुते ४
निर्ममो निरहङ्कारो निराशीः सर्वतः समः ।
अकामभूत इत्येव सतां धर्मः सनातनः ॥ ५
विश्रम्भो ह्रीस्तितिक्षा च
त्यागः शौचमतन्द्रिता ।
आनृशंस्यमसम्मोहो
दया भूतेष्वपैशुनम् ॥ ६
हर्षस्तुष्टिर्विस्मयश्च विनयः साधुवृत्तिता ।
शान्तिकर्माणि शुद्धिश्च शुभा बुद्धिर्विमाचनम्
उपेक्षा ब्रह्मचर्यं च परित्यागश्च सर्वशः ।
निर्ममत्वमनाशीष्ट्वमपरिक्षतधर्मता ॥ ८
मुधा दानं मुधा यज्ञो मुधाऽधीतं मुधा व्रतम्
मुधा प्रतिग्रहश्चैव मुधा धर्मो मुधा तपः ॥ ९
एवंवृत्तास्तु ये केचिल्लोकेऽस्मिन्सत्त्वसंश्रयाः
ब्राह्मणा ब्रह्मयोनिस्थास्ते धीराः साधुदर्शिनः ॥
हित्वा सर्वाणि पापानि
निःशोका ह्यथ मानवाः ।
दिवं प्राप्य तु ते धीराः
कुर्वते वै ततस्तनूः ॥ ११
ईशित्वं च वशित्वं च लघुत्वं मनसश्च ते ।
विकुर्वते महात्मानो देवास्त्रिदिवगा इव १२

अर्वाक् स्वर्गादय भूमेरुपरि स्रोत प्रवाहो येषां ते तथा ॥ १६ ॥ प्रेत्यभाविकं जन्मान्तरीयं कुशलम् ॥ १७ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारत भावदीपे सप्तत्रिंशोऽध्याय ॥ ३७ ॥


३८

अत इति ॥१॥ उद्रेक उन्नति असंरम्भो निर्भयत्वम् ॥ २ ॥ **मुधेति** । शास्त्रीयज्ञानादेर्वैयर्थ्यं ज्ञात्वा युक्तधर्मो योगिधर्मा यो भवति सोऽमुत्रात्मनि अत्यन्तं अविनाशि पदमश्नुते ॥ ४ ॥ हर्ष पुत्रजन्मादिजं सुख, तुष्टि अलंबुद्धि शान्तिकर्माणि मुक्त्युपाये शुद्धि आर्जवेन प्रवृत्तिः ॥ ७ ॥ उपेक्षा औदासीन्यम् ॥ ८ ॥ दानादीना वैयर्थ्यं जानन्तो ये ब्रह्मयोनिस्था वेदकारणे ब्रह्मणि निष्ठावन्तस्त एव साधुदर्शिनो नान्ये ॥१०॥ पापानि कर्माणि राजसतामसानि तनू शरीराणि कुर्वते योगबलेनानेकशरीरस्रष्टारो भवन्ति ॥११॥ ईशित्वादिकं अणिमादीनामप्युपलक्षणम् । मनस. मन विकुर्वते अनेकाकारं कुर्वन्ति न तु निगृह्णन्तीत्यर्थ. ॥१२

ऊर्ध्वस्रोतस इत्येते देवा वैकारिकाः स्मृताः
विकुर्वन्तः प्रकृत्या वै दिवं प्राप्तास्ततस्ततः
यद्यदिच्छन्ति तत्सर्वं भजन्ते विभजन्ति च।
इत्येतत्सात्त्विकं वृत्तं कथितं वो द्विजर्षभाः।
एतद्विज्ञाय लभते विधिवद्यद्यदिच्छति ॥ १४

प्रकीर्तिताः सत्त्वगुणा विशेषतो
यथावदुक्तं गुणवृत्तमेव च।
नरस्तु यो वेद गुणानिमान्सदा
गुणान्स भुंक्ते न गुणैः स युज्यते १५

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे अष्टत्रिंशोऽध्यायः ॥ ३८ ॥



३९

ब्रह्मोवाच।

नैव शक्या गुणा वक्तुं पृथक्त्वेनैव सर्वशः।
अविच्छिन्नानि दृश्यन्ते रजः सत्त्वं तमस्तथा
अन्योन्यमथ रज्यन्ते ह्यन्योन्यं चार्थजीविनः
अन्योन्यमाश्रयाः सर्वे तथान्योन्यानुवर्तिनः॥
यावत्सत्त्वं रजस्तावद्वर्तते नात्र संशयः।
यावत्तमश्च सत्त्वं च रजस्तावदिहोच्यते ॥ ३
संहत्य कुर्वते यात्रां सहिताः संघचारिणः।
संघातवृत्तयो ह्येते वर्तन्ते हेत्वहेतुभिः ॥ ४
उद्रेकव्यतिरिक्तानां तेषामन्योन्यवर्तिनाम्।
वक्ष्यते तद्यथाऽन्यूनं व्यतिरिक्तं च सर्वशः ५
व्यतिरिक्तं तमो यत्र तिर्यग्भावगतं भवेत्।
अल्पं तत्र रजो ज्ञेयं सत्त्वमल्पतरं तथा ॥ ६
उद्रिक्तं च रजो यत्र मध्यस्रोतोगतं भवेत्।
अल्पं तत्र तमो ज्ञेयं सत्त्वमल्पतरं तथा ॥ ७
उद्रिक्तं च यदा सत्त्वमूर्ध्वस्रोतोगतं भवेत्।
अल्पं तत्र तमो ज्ञेयं रजश्चाल्पतरं तथा ॥ ८
सत्त्वं वैकारिकी योनिरिन्द्रियाणां प्रकाशिका
न हि सत्त्वात्परो धर्मः कश्चिदन्यो विधीयते
ऊर्ध्वं गच्छन्ति सत्त्वस्था
मध्ये तिष्ठन्ति राजसाः।
जघन्यगुणसंयुक्ता
यान्त्यधस्तामसा जनाः ॥ १०
तमः शूद्रे रजः क्षत्रे
ब्राह्मणे सत्त्वमुत्तमम्।
इत्येवं त्रिषु वर्णेषु
विवर्तन्ते गुणास्त्रयः ॥ ११
दूरादपि हि दृश्यन्ते सहिताः सघचारिणः।
तमः सत्त्वं रजश्चैव पृथक्त्वेनानुशुश्रुम ॥ १२
दृष्ट्वा त्वादित्यमुद्यन्तं कुचराणां भय भवेत्।
अध्वगाः परितप्येयुरुष्णतो दुःखभागिनः १३

ऊर्ध्वस्रोतस ऊर्ध्वगमनपरा प्रकृत्या भोगजसंस्कारेण पुनर्भोगार्थं चित्तं विकुर्वन्त नानाकारेण परिणामयन्त भजन्ते स्वयं प्राप्नुवन्ति विभजन्ति सकल्पितमन्येभ्योऽपि प्रयच्छन्ति सार्धं ॥ १३ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे अष्टत्रिंशोऽध्याय ॥ ३८ ॥

३९

नैवेति। अविच्छिन्नानि अपृथग्भूतानि इद सात्त्विकमिद राजसमिद तामस कार्यमिति व्यपदेशस्तु तत्तद्गुणप्राधान्यमात्रादित्यर्थ ॥ १ ॥ **यावदिति**। कियदपि विवृद्ध सत्त्वं तमसैव नियम्यतेऽतो नियम्यनियामकयोस्तयोः साम्य भवतीत्यर्थः। एवं प्रवर्तनात्मक रजो मोहप्रकाशात्मकाभ्या तमःसत्त्वाभ्यामुद्रिक्त सत्ते उभे गृणद्धि ॥ ३ ॥ सहत्य मिश्रीभूय यात्रां व्यवहार कुर्वते यत सङ्घचारिण सहतस्वभावाश्चरन्ति। एवंविधा अपि हेत्वहेतुभिर्वर्तन्ते वैषम्येणेति शेष ॥ ४ ॥ एतदेवाह—**उद्रेकेति**। उद्रेक उद्बोधकसामग्रीसत्त्वे यदाधिक्यं तदभावे अन्यूनं व्यतिरिक्त अनधिकं च सर्वश सर्वेषा रूप समानं भवतीत्यर्थ ॥ ५ ॥ व्यतिरिक्तं अधिकं यत्र श्वशूकरादौ तिर्यग्भाव च आधिक्यं गत प्राप्तम् ॥ ६ ॥ सत्त्वं इन्द्रियाणा योनि सा च वैकारिकी वैकारिकाहङ्कारसम्बन्धिनी प्रकाशिका इन्द्रियद्वारा शब्दादीनामिति शेष। धर्मो धर्महेतु। विधीयते शास्त्रे प्रकाश्यते ॥ ९ ॥ **दूरादिति**। तामसे शूद्रेऽपि रज सत्त्वयोर्दर्शनाद्गुणः सङ्घचारिण एव एवमन्यत्र ॥ १२ ॥ स्वत-प्रकाशकस्याप्यादित्यादेस्तमोरज कार्यभयसन्तापहेतुत्वात्तत्रापि त्रिगुणोद्दीपकत्वं वर्तत इत्यर्थः कुत्सितं कर्म चरन्ति ते कुचराश्चोराः ॥ १३ ॥

आदित्यः सत्त्वमुद्रिक्तं कुचरास्तु तथा तमः।
परितापोऽध्वगानां च रजसो गुण उच्यते ॥
प्राकाश्यं सत्त्वमादित्यः सन्तापो रजसो गुणः
उपप्लवस्तु विज्ञेयस्तामसस्तस्य पर्वसु ॥ १५
एवं ज्योतिष्षु सर्वेषु निवर्तन्ते गुणास्त्रयः।
पर्यायेण च वर्तन्ते तत्र तत्र तथा तथा ॥ १६
स्थावरेषु तु भावेषु तिर्यग्भावगतं तमः।
राजसास्तु विवर्तन्ते स्नेहभावस्तु सात्त्विकः
अहस्त्रिधा तु विज्ञेयं त्रिधा रात्रिर्विधीयते।
मासार्धमासवर्षाणि ऋतवः सन्धयस्तथा १८
त्रिधा दानानि दीयन्ते
त्रिधा यज्ञः प्रवर्तते।
त्रिधा लोकास्त्रिधा देवा-
स्त्रिधा विद्यास्त्रिधा गतिः ॥ १९
भूतं भव्यं भविष्यं च धर्मोऽर्थः काम एव च
प्राणापानावुदानश्चाप्येत एव त्रयो गुणाः २०
पर्यायेण प्रवर्तन्ते तत्र तत्र तथा तथा।
यत्किञ्चिदेह लोकेऽस्मिन्सर्वमेते त्रयो गुणाः
त्रयो गुणाः प्रवर्तन्ते ह्यव्यक्ता नित्यमेव तु।
सत्त्वं रजस्तमश्चैव गुणसर्गः सनातनः ॥ २२
तमो ह्यक्तं शिवं धाम रजो योनिः सनातनः
प्रकृतिर्विकारः प्रलयः प्रधानं प्रभवाप्ययौ २३
अनुद्रिक्तमनूनं वाप्यकम्पमचलं ध्रुवम्।
सदसच्चैव तत्सर्वमव्यक्तं त्रिगुणं स्मृतम्।
ज्ञेयानि नामधेयानि नरैरध्यात्मचिन्तकैः २४
अव्यक्तनामानि गुणांश्च तत्त्वतो
यो वेद सर्वाणि गतीश्च केवलाः।
विमुक्तदेहः प्रविभागतत्त्ववित्
स मुच्यते सर्वगुणैर्निरामयः ॥ २५

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे ऊनचत्वारिंशोऽध्यायः ॥ ३९ ॥

४०

ब्रह्मोवाच।
अव्यक्तात्पूर्वमुत्पन्नो महानात्मा महामतिः
आदिर्गुणानां सर्वेषां प्रथमः सर्ग उच्यते ॥ १
महानात्मा मतिर्विष्णु-
र्जिष्णुः शम्भुश्च वीर्यवान्।
बुद्धिः प्रज्ञोपलब्धिश्च
तथा ख्यातिर्धृतिः स्मृतिः ॥ २
पर्यायवाचकैः शब्दैर्महानात्मा विभाव्यते।
तं जानन्ब्राह्मणो विद्वान्प्रमोहं नाधिगच्छति
सर्वतःपाणिपादश्च सर्वतोक्षिशिरोमुखः।
सर्वतः श्रुतिमाँल्लोके सर्वं व्याप्य स तिष्ठति
महाप्रभावः पुरुषः सर्वस्य हृदि निश्चितः।
अणिमा लघिमा प्राप्तिरीशानो ज्योतिरव्ययः
तत्र बुद्धिविदो लोकाः
सद्भावनिरताश्च ये।
ध्यानिनो नित्ययोगाश्च
सत्यसन्धा जितेन्द्रियाः ॥ ६

तत्स्वरूपमपि त्रिगुणात्मकमित्याह—**प्राकाश्यमिति** ॥१५॥ 'न तदस्ति पृथिव्यां च' इत्यादिश्लोकस्यायं प्रपञ्च —**एवमित्यादि** ॥ १६ ॥ स्थावराणामतिमूढत्वात्तत्र तमस्तिर्यग्भावं आधिक्यं गतं दृश्यते। राजसा रमणीयत्व-कटुत्वाम्लत्वादय विवर्तन्ते कालेन द्रव्यान्तरयोगेन पाकादिना वा। सात्त्विकस्तु स्नेह· वह्न्यादेरुद्दीपकत्वेन प्रकाशकत्वात् ॥ १७ ॥ तमआदीनि द्वाविंशतिरव्यक्तस्य नामधेयानि ॥२४॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे ऊनचत्वारिंशोऽध्याय ॥ ३९ ॥

४०

एवं चतुर्भिरध्यायैर्व्यस्तसमस्तगुणनिरूपणद्वारा तत्साम्या-वस्थारूपमव्यक्तं प्रपञ्चितम्। इदानीं महत्तत्त्वं निरूप-यति—**अव्यक्तादित्यध्यायेन**। गुणाना गुणकार्या-णाम् ॥ १ ॥ **सर्वत इति**। गीतासु यज्ज्ञेयमुक्तं तन्म-हानात्मैवेति व्यनक्ति। मुख्यं तु ज्ञेयमव्यक्तात्परमेवेति ज्ञापयितुम् ॥ ४ ॥ अयमेव दहराद्युपासकानामुपास्य इत्याह—**तत्रेत्यादिना**। तत्र महत्यात्मनि लोका अतीता अनागता वर्तमानाश्च सन्ति 'यच्चास्येहास्ति यच्च नास्ति सर्वं तदत्र गत्वा विन्दते' इति श्रुते·। सद्भावनिरताश्च ये ते महत्त्वमुपयान्तीति तृतीयेनान्वयः ६

ज्ञानवन्तश्च ये केचिदलुब्धा जितमन्यवः ।
प्रसन्नमनसो धीरा निर्ममा निरहंकृताः ॥ ७
विमुक्ताः सर्व एवैते महत्त्वमुपयान्त्युत ।
आत्मनो महतो वेद यः पुण्यां गतिमुत्तमाम्
अहङ्कारात्प्रसूतानि महाभूतानि पञ्च वै ।
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम् ९
तेषु भूतानि युज्यन्ते महाभूतेषु पञ्चसु ।
ते शब्दस्पर्शरूपेषु रसगन्धक्रियासु च १०
महाभूतविनाशान्ते प्रलये प्रत्युपस्थिते ।
सर्वप्राणभृता धीरा महदुत्पद्यते भयम् ॥ ११
स धीरः सर्वलोकेषु न मोहमधिगच्छति ।
विष्णुरेवादिसर्गेषु स्वयंभूर्भवति प्रभुः ॥ १२
एवं हि यो वेद गुहाशयं प्रभु
परं पुराणं पुरुषं विश्वरूपम् ।
हिरण्मयं बुद्धिमतां परां गतिं
स बुद्धिमान् बुद्धिमतीत्य तिष्ठति १३

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे चत्वारिंशोऽध्यायः ॥ ४० ॥

४१

ब्रह्मोवाच ।
य उत्पन्नो महान्पूर्वमहङ्कारः स उच्यते ।
अहमित्येव सम्भूतो द्वितीयः सर्ग उच्यते १
अहङ्कारश्च भूतादिर्वैकारिक इति स्मृतः ।
तेजसश्चेतना धातुः प्रजासर्गः प्रजापतिः २
देवानां प्रभवो देवो मनसश्च त्रिलोककृत् ।
अहमित्येव तत्सर्वमभिमन्ता स उच्यते ॥ ३
अध्यात्मज्ञानतृप्तानां मुनीनां भावितात्मनाम्
स्वाध्यायक्रतुसिद्धानामेष लोकः सनातनः ४
अहङ्कारेणाहरतो गुणानिमान्
भूतादिरेवं सृजते स भूतकृत् ।
वैकारिकः सर्वमिदं विचेष्टते
स्वतेजसा रञ्जयते जगत्तथा ॥ ५

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे एकचत्वारिंशोऽध्यायः ॥ ४१ ॥

इति श्रीमहाभारते आश्वमाधक पवणि नैलकण्ठीये भारतभावदीपे चत्वारिंशोऽध्याय ॥ ४० ॥

४१

कार्यस्य कारणादनन्यत्व वदन्महान्तमेवाहंकारतामापन्नं विवृणोति—**य इति** ॥ १ ॥ भूतादिरिति तस्यैवाहङ्कारस्य तामसस्यान्वर्था संज्ञा । वैकारिक इति विकारान्महतो जात इति व्युत्पत्तेस्तस्यैव नाम । स च तेजसः प्रवृत्त्यात्मकस्य रजसो विकार· । चेतना धीयतेऽस्मिन्निति चेतनाधातुश्चेतन पुरुष इत्यर्थ । प्रजानां सर्गो यस्मात् अतः प्रजासर्गत्वात्प्रजापतिरप्ययमेव ॥ २ ॥ देवानां इन्द्रियाणां श्रोत्रादीनां मनसश्च प्रभव उत्पतिस्थानं स्वयमपि देवो दिव्यन् क्रीडन् त्रिलोककृत् । अहमिति योऽभिमन्यते सोऽहङ्कार ॥ ३ ॥ एष समष्टिरूपोऽनिरुद्धाख्य सर्वेषा सिद्धाना लोक प्राप्यं स्थानम् ॥ ४ ॥ अहङ्कारेण त्रिगुणमयेन गुणान् शब्दादीन् आहरतो भोक्तुमिच्छत पुरुषस्य भूतादिस्तामसोऽहङ्कार. सृजते भूतानि व्योमादीनि अत एव स भूतकृत् । वैकारिकः सर्वाणीन्द्रियाणि सृष्ट्वा तैर्दर्शनस्पर्शनादिका क्रिया करोति । तैजस. कर्मेन्द्रियाणि पञ्चप्राणाश्च सृष्ट्वा तद्द्वारा सर्वं भोक्तृवर्गं रञ्जयतीति ॥ ५ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे एकचत्वारिंशोऽध्याय ॥ ४१ ॥

४२

ब्रह्मोवाच ।

अहङ्कारात्प्रसूतानि महाभूतानि पञ्च वै ।
पृथिवी वायुराकाशमापो ज्योतिश्च पञ्चमम्
तेषु भूतानि मुह्यन्ति महाभूतेषु पञ्चसु ।
शब्दरूपर्शनरूपेषु रसगन्धक्रियासु च ॥ २
महाभूतविनाशान्ते प्रलये प्रत्युपस्थिते ।
सर्वप्राणभृतां धीरा महदभ्युद्यते भयम् ॥ ३
यद्यस्माज्जायते भूत तत्र तत्प्रविलीयते ।
लीयन्ते प्रतिलोमानि जायन्ते चोत्तरोत्तरम् ४
ततः प्रलीने सर्वस्मिन् भूते स्थावरजङ्गमे ।
स्मृतिमन्तस्तदा धीरा न लीयन्ते कदाचन ५
शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चमः ।
क्रियाः करणनित्याः स्युरनित्या मोहसंज्ञिताः
लोभप्रजनसम्भूता निर्विशेषा ह्यनिञ्चनाः ।
मांसशोणितसंघाता अन्योन्यस्योपजीविनः
बहिरात्मान इत्येते दीनाः कृपणजीविनः ।
प्राणापानावुदानश्च समानो व्यान एव च ८
अन्तरात्मनि चाप्येते नियताः पञ्च वायवः ।
वाङ्मनोबुद्धिभिः सार्द्धमिदमष्टात्मकं जगत्
त्वक्घ्राणश्रोत्रचक्षूषि रसना वाक्च संयताः ।
विशुद्धं च मनो यस्य बुद्धिश्चाव्यभिचारिणी
अष्टौ यस्याग्नयो ह्येते न दहन्ते मनः सदा ।
स तद्ब्रह्म शुभं याति तस्माद्भ्यो न विद्यते ११
एकादश च यान्याहुरिन्द्रियाणि विशेषतः ।
अहङ्कारात्प्रसूतानि तानि वक्ष्याम्यहं द्विजाः

श्रोत्रं त्वक्चक्षुषी जिह्वा
नासिका चैव पञ्चमी ।
पादौ पायुरुपस्थश्च
हस्तौ वाग्दशमी भवेत ॥ १३

इन्द्रियग्राम इत्येष मन एकादशं भवेत् ।
एतं ग्रामं जयेत्पूर्व ततो ब्रह्म प्रकाशते ॥ १४
बुद्धीन्द्रियाणि पञ्चाहुः पञ्चकर्मेन्द्रियाणि च ।
श्रोत्रादीन्यपि पञ्चाहुर्बुद्धियुक्तानि तत्त्वतः १५

४२

अहंकारात्तामसात् पृथिव्यादीना पाठक्रमो न विवक्षित ॥ १ ॥ एतेषु ये शब्दादय सन्ति तेषु निमित्तभूतेषु भूतानि मानुषादीनि मुह्यन्ति ते प्रसिद्धा योगिनोऽपि मुह्यतीत्यध्याहृत्य योज्यम् ॥ २ ॥ महाभूताना देहाकाराणा विनाशो मरण तदन्ते भय नारकम् । तथा प्रलये च दैनदिनादौ प्रत्युपस्थिते दाहशोषादिजं महत् प्राणभृता प्राणिना भयम् ॥ ३ ॥ तत्र मरणस्य सर्वप्रत्यक्षत्वात्तदुपेक्ष्य प्रलयमाह—**यादिति** । उत्तरोत्तर अनुलोमं आकाशवाय्वग्निसलिलपृथिवीक्रमेण ॥ ४ ॥ **तत इति** । द्विविधानि भूतानि स्थूलानि सूक्ष्माणि च तत्र यैर्योगबलेन सूक्ष्मेषु स्थूलाना प्रविलापनं कृतं ते तन्मात्रशरीरा सन्तो न स्थूलेषु भूतेषु नश्यत्सु विनश्यन्तीत्यर्थ ॥ ५ ॥ ननु कोशनाशे कोशकार इव स्थूलनाशे सूक्ष्माणि कथं न नश्यन्तीत्याशंक्याह—**शब्द इति** । शब्दादयो विषया क्रियाश्च तद्ग्रहणरूपा करणनित्याः करणात्मना मनोमात्रेण रूपेण नित्या अविनाशिन्य कारणनित्या इति पाठेऽपि कारण दहराकाशाख्यं सोपाधिब्रह्म तद्रूपेण नित्या मोहसंज्ञिता स्थूला अनित्या अनृतत्वात् । ' त इमे सत्या कामा अनृतापिधाना ' इतिश्रुतिर्हि सूक्ष्माणा सत्यत्वं तत्पिधायकाना स्थूलानामनृतत्व चाह । तस्मादुक्तमुक्तं—**धीरा न लीयन्ते कदाचनेति** ॥ ६ ॥ अनित्याना लक्षणमाह सार्द्धेन—**लोभेति** । लोभो लब्धुमिच्छा तस्य प्रजनं प्रजा फललोभपूर्वक कर्मेत्यर्थ । तस्मात्संभूता । संयुक्ता इति पाठे कर्मबद्धा निर्विशेषा सर्वेषा पाञ्चभौतिकत्वाविशेषात् । अकिंचना नास्ति किञ्चन वस्तु सत् यासु ता रज्जूरगवत्तुच्छा इत्यर्थ । अन्योन्ये तु 'जीवो जीवस्य जीवनम्' इत्यर्थान्नश्वरा ॥ ७ ॥ बहिरात्मान स्थूलशरीराणि दीना क्षुधादुपद्रुता कृपणजीविन बाह्यसाधनजीवना । नित्यानि यावन्मोक्षस्थायीनि भूतान्याह सार्धेन—**प्राणेति** ॥ ८ ॥ अन्तरात्मा चितिच्छायायुक्तोऽहंकाराख्यो जीव प्राणादिपञ्चक वाङ्मनोबुद्धित्रय चेत्यष्टावुपाधिन्वेन नियता नियमेन सम्बद्धा एतदष्टकात्मकं जगत् । अयं भाव —' मनसा ह्येव पश्यति मनसा शृणोति ' इत्यादिश्रुते चक्षुश्रोत्रात्मकं मन एव सर्वकरणरूपं करणानां च प्राणेभ्यो देवा देवेभ्यो लोका इति चक्षुरादिभ्य सूर्यादिना तेभ्यो रूपादीना चोत्पत्तिश्रवणेन सर्वात्मकत्वादेतावन्मात्रं जगदिति युक्तमेवोक्तम्—**अष्टात्मकं जगदिति** ॥ ९ ॥ त्वगादय एतेयं न दहन्ति स विद्वान् ब्रह्म याति यस्मादन्यत् भूयोधिकतर नास्ति ॥ ११ ॥ एतदेव विस्तरेण प्रपञ्चयति—**एकादशेत्यादिना** ॥ १२ ॥

आविशेषाणि चान्यानि कर्मयुक्तानि यानि तु
उभयत्र मनो ज्ञेयं बुद्धिस्तु द्वादशी भवेत् १६
इत्युक्तानीन्द्रियाण्येतान्येकादश यथाक्रमम् ।
मन्यन्ते कृतमित्येवं विदित्वा तानि पण्डिताः
अतः परं प्रवक्ष्यामि सर्वं विविधमिन्द्रियम्
आकाशं प्रथमं भूतं श्रोत्रमध्यात्ममुच्यते १८
अधिभूतं तथा शब्दो दिशस्तत्राधिदैवतम् ।
द्वितीयं मारुतो भूतं त्वगध्यात्मं च विश्रुता ॥
स्पृष्टव्यमधिभूतं च विद्युत्तत्राधिदैवतम् ।
तृतीयं ज्योतिरित्याहुश्चक्षुरध्यात्ममुच्यते २०
अधिभूतं ततो रूपं सूर्यस्तत्राधिदैवतम् ।
चतुर्थमापो विज्ञेयं जिह्वा चाध्यात्ममुच्यते २१
अधिभूतं रसश्चात्र सोमस्तत्राधिदैवतम् ।
पृथिवी पञ्चमं भूतं घ्राणश्चाध्यात्ममुच्यते २२
अधिभूतं तथा गन्धो वायुस्तत्राधिदैवतम् ।
एषु पञ्चसु भूतेषु त्रिषु यश्च विधिः स्मृतः २३
अतः पर प्रवक्ष्यामि सर्वं विविधमिन्द्रियम्
पादावध्यात्ममित्याहुर्ब्राह्मणास्तत्त्वदर्शिनः ॥
अधिभूतं तु गन्तव्यं विष्णुस्तत्राधिदैवतम् ।
अवाग्गतिरपानश्च पायुरध्यात्ममुच्यते ॥ २५
अधिभूतं विसर्गश्च मित्रस्तत्राधिदैवतम् ।
प्रजनः सर्वभूतानामुपस्थोऽध्यात्ममुच्यते ॥२६
अधिभूतं तथा शुक्रं दैवतं च प्रजापतिः ।
हस्तावध्यात्ममित्याहुरध्यात्मविदुषो जनाः
अधिभूत च कर्माणि शक्रस्तत्राधिदैवतम् ।
वैश्वदेवी ततः पूर्वा वागध्यात्ममिहोच्यते २८
वक्तव्यमधिभूतं च वह्निस्तत्राधिदैवतम् ।
अध्यात्मं मन इत्याहुः पञ्चभूतात्मचारकम् २९
अधिभूतं च सङ्कल्पश्चन्द्रमाश्चाधिदैवतम् ।
अहङ्कारस्तथाऽध्यात्मं सर्वसंसारकारकम्३०
अभिमानोऽधिभूतं च रुद्रस्तत्राधिदैवतम् ।
अध्यात्मं बुद्धिरित्याहुः षडिन्द्रियविचारिणी
अधिभूतं तु मन्तव्यं ब्रह्मा तत्राधिदैवतम् ।
त्रीणि स्थानानि भूतानां चतुर्थं नोपपद्यते ३२
स्थलमापस्तथाऽऽकाशं जन्म चापि चतुर्विधम्
अण्डजोद्भिज्जसंस्वेदजरायुजमथापि च ॥ ३३
चतुर्धा जन्म इत्येतद्भूतग्रामस्य लक्ष्यते ।
अपराण्यथ भूतानि खेचराणि तथैव च ॥ ३४
अण्डजानि विजानीयात्सर्वांश्चैव सरीसृपान्
स्वेदजाः कृमयः प्रोक्ता जन्तवश्च यथाक्रमम् ॥
जन्म द्वितीयमित्येतज्जघन्यतरमुच्यते ।
भित्त्वा तु पृथिवीं यानि जायन्ते कालपर्ययात्
उद्भिज्जानि च तान्याहुर्भूतानि द्विजसत्तमाः।
द्विपादबहुपादानि तिर्यग्गतिमतीनि च ३७
जरायुजानि भूतानि विकृतान्यपि सत्तमाः ।
द्विविधा खलु विज्ञेया ब्रह्मयोनिः सनातनी ॥
तपः कर्म च यत्पुण्यमित्येष विदुषां नयः ।
विविधं कर्म विज्ञेयमिज्या दानं च तन्मखे ॥
जातस्याध्ययनं पुण्यमिति वृद्धानुशासनम्।
एतद्यो वेत्ति विधिवद्युक्तः स स्याद्द्विजर्षभाः॥
विमुक्तः सर्वपापेभ्य इति चैव निबोधत ।
आकाशं प्रथमं भूतं श्रोत्रमध्यात्ममुच्यते ४१
अधिभूतं तथा शब्दो दिशश्चात्राधिदैवतम् ।
द्वितीयं मारुतं भूतं त्वगध्यात्मं च विश्रुतम्
स्पृष्टव्यमधिभूतं तु विद्युत्तत्राधिदैवतम् ।
तृतीयं ज्योतिरित्याहुश्चक्षुरध्यात्ममिष्यते ४३
अधिभूतं ततो रूपं सूर्यस्तत्राधिदैवतम् ।
चतुर्थमापो विज्ञेयं जिह्वा चाध्यात्ममिष्यते ॥
चन्द्रोऽधिभूतं विज्ञेयमापस्तत्राधिदैवतम् ।
यथावदध्यात्मविधेरेष वः कीर्तितो मया
ज्ञानगम्य हि धर्मज्ञाः प्राप्तं ज्ञानवतामिह ।
इन्द्रियाणीन्द्रियार्थाश्च महाभूतानि पञ्च च ।
सर्वाण्येतानि सन्धाय मनसा संप्रधारयेत्॥
क्षीणे मनसि सर्वस्मिन् न जन्मसुखमिष्यते
ज्ञानसम्पन्नसत्त्वानां तत्सुखं विदुषा मतम् ॥

उभयत्र उभयेष्वपि इन्द्रियेषु मनोनुगतमिति शेष ॥ १६ ॥ मन्यन्ते कृतकृत्या भवन्तीत्यर्थः ॥ १७ ॥ सर्वं सर्वाणीन्द्रियाणि प्रत्येकं विविधानि भूतं आकाशादि । इन्द्रियमध्यात्मम् । भूतगुण. शब्दादिरधिभूतं इन्द्रियानुग्राहिका देवता दिगादिरधिदैवं सर्वत्र ज्ञेयम् ॥ १८ ॥ त्रिषु अध्यात्माधिभूताधिदैवेषु ॥ २३ ॥ सर्वं कर्मेन्द्रियम् ॥ २४ ॥ अपराणि अनुत्कृष्टानि ॥ ३४ ॥ ब्रह्मयोनिः ब्रह्मोपलब्धिस्थानं ब्राह्मणजन्मेत्यर्थ ॥ ३८ ॥ तत्र कर्तव्यमाह— तप इति ॥ ३९ ॥ वेत्ति आपरोक्ष्येण ॥ ४० ॥ इन्द्रियाणीति । सन्धाय भूतादीनि इन्द्रियेभ्योतिरिक्तानि न सन्तीत्यनुसन्धाय तानि सर्वाणि मनसा संप्रधारयेन्मनो। मात्रेणावतिष्ठेत् ॥ ४६ ॥ क्षीणे इति । यद्येतानि मनोमात्रविलासितानि न स्युस्तर्हि स्वप्नसंप्रज्ञातयोर्न प्रतीयेरन्- अत. क्षीणं मनः कृतं चेत् निर्विकल्पे सुखमनुभवतः पुंसो


अतः परं प्रवक्ष्यामि सूक्ष्मभावकरीं शिवाम्
निवृत्तिं सर्वभूतेषु मृदुना दारुणेन च ॥ ४८
गुणागुणमनासङ्गमेकचर्यमनन्तरम् ।
एतद्ब्रह्ममयं वृत्तमाहुरेकपदं सुखम् ॥ ४९
विद्वान्कूर्म इवाङ्गानि कामान्संहृत्य सर्वशः ।
विरजाः सर्वतो मुक्तो यो नरः स सुखी सदा
कामानात्मनि सयम्य क्षीणतृष्णः समाहितः
सर्वभूतसुहृन्मित्रो ब्रह्मभूयाय कल्पते ॥ ५१
इन्द्रियाणा निरोधेन सर्वेषां विषयैषिणाम् ।
मुनेर्जनपदत्यागादध्यात्माग्निः समिध्यते ५२
यथाऽग्निरिन्धनैरिद्धो महाज्योतिः प्रकाशते
तथेन्द्रियनिरोधेन महानात्मा प्रकाशते ॥ ५३
यदा पश्यति भूतानि प्रसन्नात्मात्मनो हृदि ।
स्वयंज्योतिस्तदा सूक्ष्मात्सूक्ष्मं प्राप्नोत्यनुत्तमम्
अग्नी रूप पयः स्रोतो वायुः स्पर्शनमेव च ।
मही पङ्कधरं घोरमाकाशश्रवणं तथा ॥ ५५
रोगशोकसमाविष्टं पञ्चस्रोतः समावृतम् ।
पञ्चभूतसमायुक्तं नवद्वारं द्विदैवतम् ॥ ५६
रजस्वलमथादृश्यं त्रिगुणं च त्रिधातुकम् ।
संसर्गाभिरतं मूढं शरीरमिति धारणा ॥ ५७
दुश्चरं सर्वलोकेऽस्मिन्सत्त्वं प्रति समाश्रितम्
एतदेव हि लोकेऽस्मिन्कालचक्रं प्रवर्तते॥५८
एतन्महार्णवं घोरमगाधं मोहसंज्ञितम् ।
विक्षिपेत्क्षिपेच्चैव बोधयेत्सामरं जगत् ५९
कामं क्रोधं भयं लोभमभिद्रोहमथानृतम् ।
इन्द्रियाणां निरोधेन सततत्यजति दुस्त्यजान्
यस्यैते निर्जिता लोके त्रिगुणाः पञ्चधातवः ।
द्यौरग्निस्तस्य परं स्थानमानन्त्यमथ लभ्यते६१
पञ्चेन्द्रियमहाकूलां मनोवेगमहोदकाम् ।
नदीं मोहह्रदा तीर्त्वा कामक्रोधावुभौ जयेत्
स सर्वदोषनिर्मुक्तस्ततः पश्यति तत्परम् ।
मनो मनसि सन्धाय पश्यन्नात्मानमात्मनि६३
सर्ववित्सर्वभूतेषु विन्दत्यात्मानमात्मनि ।
एकधा बहुधा चैव विकुर्वाणस्ततस्ततः ६४
ध्रुवं पश्यति रूपाणि दीपाद्दीपशतं यथा ।
स वै विष्णुश्च मित्रश्च वरुणोऽग्निः प्रजापतिः

जन्मसुखं संसारसुखं पुत्रकलत्रपरिष्वङ्गजं न इष्यते न इदं भवति। ज्ञानेनात्मानुभवेन संपन्नं सयुक्तं सत्त्वं बुद्धिर्येषा तेषा ज्ञानसंपन्नसत्त्वानाम् ॥ ४७ ॥ **अत इति**। मनस इति शेष । सूक्ष्मभावकरीं सूक्ष्मत्वकरीं निवृत्तिं वक्ष्यामि । मृदुना छन्दत दारुणेन दृढयोगेन । सर्वभूतेषु ब्राह्मणादिषु कर्तुं योग्यामिति शेष ॥ ४८ ॥ गुणा शौर्यौदार्यविद्वत्त्व-तपस्वित्वादयो दर्पहेतुत्वादगुणा इव यस्मिन् वृत्ते तद्गुणा-गुणम् । अत एव अनासङ्गं अहं कर्ता ममेदमर्जितमित्याभि-मानशून्यं एकचर्यं एकान्तवास अनन्तरं निरस्तसमस्तभेदं अविच्छिन्नं वा ब्रह्ममयं ब्राह्मणजातिप्रधानं एकपदं सर्व-सुखगर्भम् ॥ ४९ ॥ इन्द्रियनिरोध कुर्वता कृत्स्नं ब्रह्माण्डं त्यक्तमित्यर्थ । अध्यात्माग्निर्विज्ञानम् ॥५२॥ **यथेति**। अभिसादृश्याद्विज्ञानेऽप्यग्निपदप्रयोग प्रकाशकत्वसामान्या-दिति भाव ॥५३॥ प्रसन्नात्मा निर्मलचित्त आत्मन स्वस्य हृदि यदा भूतानि पश्यति संप्रज्ञातावस्थाया नित्यं बहि-र्मुखमनस इयमेवान्तर्मुखत्वावस्थेत्याह—**तदेति** । यदेवं भवति तदायं स्वयंज्योतिर्भवति । अतीतानागतव्यवहि-तादिदर्शने सूर्यादिज्योतिषामभावात् । तदा सूक्ष्मात् हार्दात् ब्रह्मणोऽपेक्षया सूक्ष्मं परं ज्योति प्राप्नोति ॥ ५४ ॥ यन्नि-ग्रहानिग्रहाभ्या मुक्तिससारौ तन्नित्यं शरीरमुक्तम् । अथ तस्यापि नियामकं नित्यं शरीरमाह—**अग्निरिति** । अत्र यत् रूपं कृष्णं गौरं वा तदग्नि स्रोत' प्रवाह तन द्रवं लोहितादिकं प्राह्यं तत्पय जल स्पर्शनं वात यत्तु पङ्क-काष्ठादिस्थानीयघनमासास्थ्यादिधरमिदं तत् मही घोरं बीभत्सं आकाश एव श्रवणरूपेण यत्र ततथा ॥ ५५ ॥ पञ्च स्रोतांसि इन्द्रियगोलकानि नवद्वारं द्वे कर्णयोर्द्वे चक्षुषोर्द्वे नासिकयोरेकं मुखमधो द्वे चेति द्वे जीवपरमेश्वरौ दैवते यत्र ॥ ५६ ॥ अदृश्यममङ्गलत्वात् । त्रिगुणं परो दृष्टमात्रं सत्सुखदु खमोहोत्पादकम् । त्रिधातुकं वातपित्तकफमय संसर्गाभिरतं अन्नादिसंगेनैव अभिरमते नान्यथा संशयाभि-रुतमितिपाठे सशयोद्बोधकं त्रिनाशबीजमित्यर्थ । मूढं अचेतनं एवंविधं शरीरमिति धारणानिश्चय । अत्र शरीरे शब्दादीना दर्शनात्तदाश्रयाणामाकाशादिनां सत्त्व-मनुमेयमित्यर्थ ॥ ५७ ॥ दुश्चर दु समाधेयं व्याध्याद्या-क्रान्तं चेत् । सत्त्वं बुद्धिं एतदेव बाल्याद्यवस्थापन्नं काल न तु कालो नाम षष्ठ पदार्थ कश्चिदास्ति ॥ ५८ ॥ महार्णव महार्णवपमं घोरं एतदेव निमित्तभूतं सत्सृष्टिसंहार-बोधाना हेतुर्भवति ॥ ५९ ॥ इन्द्रियाणा निरोधेन इद शरीरं त्यजन् सत नित्यं विद्यमानानपि कामादींस्त्यजति ॥६०॥ एते स्थूलदेहरूपा प्रकाशप्रवृत्तिमोहनिमित्तत्वेन त्रिगुणा निर्जिता योगबलेनातिक्रामिता. परं ब्राह्मम् ॥ ६१ ॥ मनसि हृदयपुण्डरीके आत्मनि शरीरे ॥ ६३ ॥ **एकधा** त्वंपदार्थसाक्षात्कारेण **बहुधा** वैश्वरूप्येण ॥ ६४ ॥ **रूपाणि** स्वशरीराणि शतश पश्यति दीपा-दीपशतं यथा सद्य प्रवर्तते । एवं योगिसंकल्पमात्रादनेकानि

स हि धाता विधाता च
स प्रभुः सर्वतोमुखः ।
हृदयं सर्वभूतानां
महानात्मा प्रकाशते ॥ ६६

तं विप्रसंघाश्च सुरासुराश्च
यक्षाः पिशाचाः पितरो वयांसि ।
रक्षोगणा भूतगणाश्च सर्वे
महर्षयश्चैव सदा स्तुवन्ति ॥ ६७

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे द्विचत्वारिंशोऽध्यायः ॥ ४२ ॥



४३

ब्रह्मोवाच ।

मनुष्याणां तु राजन्यः क्षत्रियो मध्यमो गुणः
कुञ्जरो वाहनानां च सिंहश्चारण्यवासिनाम् ।
अविः पशूनां सर्वेषामाहिस्तु बिलवासिनाम् ।
गवां गोवृषभश्चैव स्त्रीणां पुरुष एव च ॥ २
न्यग्रोधो जम्बुवृक्षश्च पिप्पलः शाल्मलिस्तथा
शिंशपा मेषशृङ्गश्च तथा वीचक्वेणवः ॥ ३
एते द्रुमाणां राजानो लोकेऽस्मिन्नात्र संशयः
हिमवान्पारियात्रश्च सह्यो विन्ध्यस्त्रिकूटवान्
श्वेतो नीलश्च भासश्च कोष्ठवांश्चैव पर्वतः ।
गुरुस्कन्धो महेन्द्रश्च माल्यवान्पर्वतस्तथा ५
एते पर्वतराजानो गणानां मरुतस्तथा ।
सूर्यो ग्रहाणामधिपो नक्षत्राणां च चन्द्रमाः ६
यमः पितॄणामधिपः सरितामथ सागरः ।
अम्भसां वरुणो राजा मरुतामपि वृत्र उच्यते ७
अर्कोऽधिपतिरुष्णानां ज्योतिषामिन्दुरुच्यते
अग्निर्भूतपतिर्नित्यं ब्राह्मणानां बृहस्पतिः ॥ ८
ओषधीनां पतिः सोमो विष्णुर्बलवतां वरः ।
त्वष्टाधिराजो रूपाणां पशूनामीश्वरः शिवः
दीक्षितानां तथा यज्ञो देवानां मघवा तथा ।
दिशामुदीची विप्राणां सोमो राजा प्रतापवान्
कुबेरः सर्वरत्नानां देवतानां पुरन्दरः ।
एष भूताधिपः सर्गः प्रजानां च प्रजापतिः ११
सर्वेषामेव भूतानामहं ब्रह्ममयो महान् ।
भूत परतरं मत्तो विष्णोर्वाऽपि न विद्यते १२
राजाधिराजः सर्वेषां विष्णुर्ब्रह्ममयो महान् ।
ईश्वरत्वं विजानीध्वं कर्तारमकृतं हरिम् ॥१३
नरकिन्नरयक्षाणां गन्धर्वोरगरक्षसाम् ।
देवदानवनागानां सर्वेषामीश्वरो हि सः ॥१४
भगदेवानुयातानां सर्वासां वामलोचना ।
माहेश्वरी महादेवी प्रोच्यते पार्वती हि सा
उमा देवीं विजानीध्वं नारीणामुत्तमां शुभाम्
रतीनां वसुमत्यस्तु स्त्रीणामप्सरसस्तथा ॥ १६
धर्मकामाश्च राजानो ब्राह्मणा धर्मसेतवः ।
तस्माद्राजा द्विजातीनां प्रयतेत स्म रक्षणे१७
राज्ञां हि विषये येषामवसीदन्ति साधवः ।
हीनास्ते स्वगुणैः सर्वैः प्रेत्य चोन्मार्गगामिनः
राज्ञां हि विषये येषां साधवः परिरक्षिताः ।
तेऽस्मिँल्लोके प्रमोदन्ते सुखं प्रेत्य च भुञ्जते ॥
प्राप्नुवन्ति महात्मान इति वित्त द्विजर्षभाः ।
अत ऊर्ध्वं प्रवक्ष्यामि नियतं धर्मलक्षणम् २०
अहिंसा परमो धर्मो हिंसा चाधर्मलक्षणा ।
प्रकाशलक्षणा देवा मनुष्याः कर्मलक्षणाः २१

शरीराणि प्रवर्तन्ते । ' स एकधा भवति त्रिधा भवति ' इत्यादिश्रुतेः । 'प्रदीपवदावेश ' इति न्यायाच्च ॥३५॥ कथमेव योगिन सामर्थ्यमुदेतीत्याशंक्य तस्यैवेश्वरत्वानैवमित्याह—**स हीति** । अत एव चानन्याधिपतिरिति न्यायश्चात्रानुसन्धेय ॥ ६६ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे द्विचत्वारिंशोऽध्याय ४२

४३

अस्यैवानन्याधिपतेर्योगिन. ईश्वरत्वसमर्थनार्थं विभूतीराह—**मनुष्याणामित्यादिना ब्राह्मणा धर्मसेतव इत्यन्तेन** । मध्यमो गुण रजोगुणप्रधानः ॥१॥ ईश्वरत्वं ऐश्वर्यं नरादीनां हरिरेवेत्यर्थ ॥ १३ ॥ भगदेवा कामुकास्तैरनुयातानामनुसृतानां स्त्रीणा सर्वासा मध्ये माहेश्वरी वामलोचनेति सम्बन्ध ॥१५॥ रतीना प्रीतिसुखानां वसुमत्य धनवत्य धनलाभगर्वितं यत्प्रीतिसुखं तदेव महदित्यर्थ ॥ १६ ॥ एवं विद्वान् विश्वैश्वर्यं प्राप्नोतीत्युक्तम् । इदानीं विद्वत्त्वप्राप्तिसाधनान्याह—**अहिंसेति** ॥ २१ ॥

शब्दलक्षणमाकाशं वायुस्तु स्पर्शलक्षणः ।
ज्योतिषां लक्षणं रूपमापश्च रसलक्षणाः॥ २२
धारिणी सर्वभूतानां पृथिवी गन्धलक्षणा ।
स्वरव्यञ्जनसंस्कारा भारती शब्दलक्षणा २३
मनसो लक्षणं चिन्ता चिन्तोक्ता बुद्धिलक्षणा
मनसा चिन्तितानर्थान् बुद्ध्या चेह व्यवस्यति
बुद्धिर्हि व्यवसायेन लक्ष्यते नात्र संशयः ।
लक्षणं मनसो ध्यानमव्यक्तं साधु लक्षणम् २५
प्रवृत्तिलक्षणो योगो ज्ञानं संन्यासलक्षणम् ।
तस्माज्ज्ञानं पुरस्कृत्य संन्यसेदिह बुद्धिमान् ॥
संन्यासी ज्ञानसंयुक्तः प्राप्नोति परमां गतिम्।
अतीतो द्वन्द्वमभ्येति तमोमृत्युजरातिगः २७
धर्मलक्षणसंयुक्तमुक्तं वो विधिवन्मया ।
गुणानां ग्रहणं सम्यग्वक्ष्याम्यहमतः परम् २८
पार्थिवो यस्तु गन्धो वै घ्राणेन हि स गृह्यते ।
घ्राणस्थश्च तथा वायुर्गन्धज्ञाने विधीयते॥ २९
अपां धातू रसो नित्यं जिह्वया स तु गृह्यते ।
जिह्वास्थश्च तथा सोमो रसज्ञाने विधीयते३०
ज्योतिषश्च गुणो रूपं चक्षुषा तच्च गृह्यते ।
चक्षुःस्थश्च सदादित्यो रूपज्ञाने विधीयते ३१
वायव्यस्तु सदा स्पर्शस्त्वचा प्रज्ञायते च सः
त्वक्स्थश्चैव सदा वायुः स्पर्शने स विधीयते॥
आकाशस्य गुणो ह्येष श्रोत्रेण च स गृह्यते ।
श्रोत्रस्थाश्च दिशः सर्वाः शब्दज्ञाने प्रकीर्तिताः
मनसश्च गुणश्चिन्ता प्रज्ञया स तु गृह्यते ।
हृदिस्थश्चेतनो धातुर्मनोज्ञाने विधीयते॥ ३४
बुद्धिरध्यवसायेन ज्ञानेन च महांस्तथा ।
निश्चित्य ग्रहणाद्यक्तमव्यक्त नात्र संशयः॥ ३५
अलिङ्गग्रहणो नित्यः क्षेत्रज्ञो निर्गुणात्मकः ।
तस्मादलिङ्गः क्षेत्रज्ञः केवलं ज्ञानलक्षणः ३६
अव्यक्त क्षेत्रमुद्दिष्टं गुणानां प्रभवाप्ययम् ।
सदा पश्याम्यहं लीनो विजानामि शृणोमि च
पुरुषस्तद्विजानीते तस्मात्क्षेत्रज्ञ उच्यते ।
गुणवृत्तं तथा वृत्तं क्षेत्रज्ञः परिपश्यति ॥ ३८
आदिमध्यावसानान्तं सृज्यमानमचेतनम् ।
न गुणा विदुरात्मानं सृज्यमानाः पुनः पुनः॥

शब्दलक्षणमित्यादयो दृष्टान्ता ॥ २२ ॥ भारती परकीया विद्या स्वरव्यञ्जनसस्कारवती शब्देनैव लक्ष्यते ॥ २३ ॥ विधेयमाह—**मनस इति** । इदं कर्तव्यं नवेत्यादिर्विचारश्चिन्ता तया मनोनामकं तत्त्वं लक्ष्यते । चिन्तापि बुद्धया परीक्ष्यते व्यवस्यति निश्चिनोति ॥ २४ ॥ एतदेवाह—**बुद्धिर्हीति** । व्यवसायेन इदमित्थमेवेतिनिश्चयेन मनश्चिन्तस्य ध्यानं लोकत शास्त्रतो वानुभूतस्य विषयस्य पुन पुनरुद्बोधके सत्यसति वा यत्स्फुरणं तच्चित्तस्य लक्षणम् । एवं मनोबुद्धिचित्तानां व्यक्तानि लक्षणान्युक्तानि । साध्नोतीति साधु पुरुषस्तस्य लक्षणमव्यक्त न केनचिदसौ व्यज्यतेऽपि तु स्वयंप्रकाश इत्यर्थ ॥ २५ ॥ एवं मनआदिभ्यो विवेचितस्य पुरुषस्याविगमोपायमाह कर्मनिन्दापूर्वकं प्रवृत्तीति योग कर्माणि ॥ २६ ॥ द्वन्द्वं मानापमानादि अतीतोऽतिक्रान्त ॥२७॥ गुणाना भूतेन्द्रियादीना धर्मस्वरूपं लक्षणानि संयुक्तं सयोगाश्च तेषा समाहारो धर्मलक्षणसंयुक्तम् । धर्म सुषिरत्वादिकम् । लक्षण शब्दादिकम् । संयुक्तं अन्योन्यव्यातिषक्तत्वम् । इदानी तेषा ग्रहणं कया देवतयाऽनुगृहीतेन केन करणेन को वा गुणो गृह्यते इति वक्ष्यते ॥ २८ ॥ **पार्थिव इति** । विधीयते अनुग्रहं कार्यते ॥ २९ ॥ धातु· सार· रसरूप ॥ ३० ॥ **मनस इति** । यथा तेजोगुणो रूपं स्वाश्रयसहितं सूर्यानुगृहीतेन चक्षुषा गृह्यते एवं मनोगुणश्चिन्ता स्वाश्रयसहिता चेतना धातुना जीवेनानुगृहीतया प्रज्ञया प्रकृष्टज्ञप्त्या धीवृत्तिविशेषेण गृह्यते । मनोज्ञाने इति गुणगुणिनोर्मनश्चित्तयोरभेदाभिप्रायेणोक्तम् ॥ ३४ ॥ एवं बुद्धिरध्यवसायेन स्वरूपेण गृह्यते । एवं महान् ज्ञानेन शुद्धसत्त्वरूपेण स्वरूपेणैव गृह्यते न तु करणान्तरेण इन्द्रियवत्। तत्र हेतु —**निश्चित्य ग्रहणादिति** । यथा रूपदर्शनेन कार्येण चक्षुरिन्द्रियमस्तीति ज्ञायते न तु गृह्यतेऽतीन्द्रियत्वात् । एवं बुद्धिमहान्तौ इदमित्थमेवेति।अस्मीति चैव रूपेण निश्चयेन लिङ्गैनैव तयो स्वरूप व्यक्तं वस्तुतस्तव्यक्तमेव इन्द्रियत्ववदतीन्द्रियत्वात्॥३५॥ एव बुद्धेश्चक्षुर्ववदतीन्द्रियत्वं सूर्यवत्स्वप्रकाशत्वं चोक्तं यस्तु ता गृह्णाति तमाह—**अलिङ्गेति** । लिङ्गद्वारा ग्रहणं बुद्धयादेरुक्तं क्षेत्रज्ञस्य तु न तथा स्वयं ज्योतिष्ट्वादित्यर्थ । ज्ञानलक्षण उपलब्धिमात्रस्वरूप नतूपलब्धिलिङ्ग अलिङ्गत्वात् ॥ ३६ ॥ क्षेत्रज्ञपदमपि क्षेत्रोपलब्धिमात्रवाचि नतु तदुपलब्धृवाचीत्याह-**अव्यक्तमिति** । अव्यक्तं उद्दिष्टमुपक्रान्त क्षेत्रं तथा गुणाना कार्यरूपाणां उत्पत्तिप्रलयं च । प्रभवाप्ययमिति समाहार अहं साक्षी लीन स्वाध्यस्तेन कर्त्रोच्छादितत्वात् अग्राह्य क्षेत्रालिङ्गस्थमिति पाठे क्षेत्रालिङ्गे स्थूलसूक्ष्मशरीरे स्थितं गुणानां सत्त्वादीना उत्पत्त्यादिना ज्ञेयं अव्यक्तं लीनमप्यहं पश्यामि ॥ ३७ ॥ गुणवृत्तं प्रकाशप्रवृत्तिमोहादि ॥ ३८ ॥ **तदेव आदिमध्यावसानान्तं** उत्पत्त्यादिना बद्धं अन्तशब्दो बद्धत्ववाची । अति अदि बन्धने इत्यस्य रूपम् । **सृज्यमानं** च

न सत्यं विन्दते कश्चित्क्षेत्रज्ञस्त्वेव विन्दति ।
गुणानां गुणभूतानां यत्परं परमं महत् ॥ ४०
तस्माद्गुणांश्च सत्त्वं च परित्यज्येह धर्मवित् ।
क्षीणदोषो गुणातीतः क्षेत्रज्ञं प्रविशत्यथ॥ ४१
निर्द्वन्द्वो निर्नमस्कारो निःस्वाहाकार एव च
अचलश्चानिकेतश्च क्षेत्रज्ञः स परो विभुः ॥४२

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे त्रिचत्वारिंशोऽध्यायः ॥ ४३ ॥

४४

ब्रह्मोवाच ।
यदादिमध्यपर्यन्तं ग्रहणोपायमेव च ।
नामलक्षणसंयुक्त सर्वं वक्ष्यामि तत्त्वतः ॥ १
अहः पूर्वं ततो रात्रिर्मासाः शुक्लादयः स्मृताः
श्रवणादीनि ऋक्षाणि ऋतवः शिशिरादयः
भूमिरादिस्तु गन्धानां रसानामाप एव च ।
रूपाणां ज्योतिरादित्यः स्पर्शानां वायुरुच्यते
शब्दस्यादिस्तथाकाशमेष भूतकृतो गुणः ।
अतः परं प्रवक्ष्यामि भूतानामादिमुत्तमम्॥४
आदित्यो ज्योतिषामादिरग्निर्भूतादिरुच्यते
सावित्री सर्वविद्यानां देवतानां प्रजापतिः ५
ओंकारः सर्ववेदानां वचसां प्राण एव च ।
यदस्मिञ्जियतं लोके सर्वं सावित्रिरुच्यते ६
गायत्री च्छन्दसामादिः प्रजानां सर्ग उच्यते
गावश्चतुष्पदामादिर्मनुष्याणां द्विजातयः ॥ ७
श्येनः पतत्रिणामादिर्यज्ञानां हुतमुत्तमम् ।
सरीसृपाणां सर्वेषां ज्येष्ठः सर्पो द्विजोत्तमाः
कृतमादिर्युगानां च सर्वेषां नात्र संशयः ।
हिरण्यं सर्वरत्नानामोषधीनां यवास्तथा ९
सर्वेषां भक्ष्यभोज्यानामन्नं परममुच्यते ।
द्रवाणां चैव सर्वेषां पेयानामाप उत्तमाः १०
स्थावराणां तु भूतानां सर्वेषामविशेषतः ।
ब्रह्मक्षेत्रं सदा पुण्यं प्लक्षः प्रथमतः स्मृतः ॥ ११
अहं प्रजापतीनां च सर्वेषां नात्र संशयः ।
मम विष्णुरचिन्त्यात्मा स्वयंभूरिति स स्मृतः
पर्वतानां महामेरुः सर्वेषामग्रजः स्मृतः ।
दिशां च प्रदिशा चोर्ध्वं दिक्पूर्वा प्रथमा तथा
तथा त्रिपथगा गङ्गा नदीनामग्रजा स्मृता ।
तथा सरोदपानानां सर्वेषां सागरोऽग्रजः १४
देवदानवभूतानां पिशाचोरगरक्षसाम् ।
नरकिन्नरयक्षाणां सर्वेषामीश्वरः प्रभुः ॥ १५
आदिर्विश्वस्य जगतो विष्णुर्ब्रह्ममयो महान् ।
भूतं परतरं यस्माच्चैलोक्ये नेह विद्यते ॥ १६
आश्रमाणां च सर्वेषां गार्हस्थ्यं नात्र संशयः
लोकानामादिरव्यक्तं सर्वस्यान्तस्तदेव च१७
अहान्यस्तमयान्तानि उदयान्ता च शर्वरी ।
सुखस्यान्तं सदा दुःखं दुःखस्यान्तं सदा सुखं
सर्वे क्षयान्ता निचयाः पतनांताः समुच्छ्रयाः
संयोगाश्च वियोगान्ता मरणान्तं च जीवितं

गुणवृत्तमेव—सृज्यमाना इति । परिणामिन कूटस्थ न पश्यन्त्यपि तु कूटस्थ एव तान्प्रकाशयतीत्यर्थ ॥ ३९ ॥ सत्यं आत्मानं गुणभूताना भोग्याना पञ्चम्यर्थे षष्ठी तेभ्यो यत्परं सत्यमिति सम्बन्ध ॥ ४० ॥ गुणान्दृश्यान् सत्त्वं बुद्धिं दर्शने करणभूता परित्यज्य क्षेत्रज्ञ परमात्मानं विशति ॥४१॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे त्रिचत्वारिंशोऽध्याय ॥ ४३ ॥

४४

क्षेत्रज्ञप्रवेशरूपस्य मोक्षस्य नित्यत्वं स्वरूपमात्रत्व च वक्तुं यज्जन्मादिमत्तदनित्य कर्म प्राप्य चेति तत्सर्वमनुक्रामति—यदादीति । आदिमध्यपर्यन्तं जन्मादिमत् ग्रहणे उपायोऽस्यस्य तत् ग्रहणोपाय कर्मसाध्य तत्सर्व वक्ष्यामि ॥ १ ॥ अग्निर्जाठररूपी भूताना जरायुजाण्डजाना ऊष्मरूपी प्रस्वेदवृष्टिहेतुतया स्वेदजोद्भिज्जानाम् ॥ ५ ॥ सिंहावलोकनेन सावित्रीं व्याचष्टे उपासनार्थं नियतं जप्यं ब्राह्मणक्षत्रियादिम्लेच्छान्ताना तत्सर्व सावित्रीपदवाच्यम् ॥ ६ ॥ सर्ग सृष्ट्यादिकाल ॥ ७ ॥ हुतं अग्नौ ब्राह्मणे वा देवतोद्देशेन दत्तं सर्पो वासुकि ॥ ८ ॥ सरोदपानाना सरसां कूपादीना च सन्धिरार्ष ॥ १४ ॥ ईश्वरो रुद्र ॥ १५ ॥

सर्वं कृतं विनाशान्तं जातस्य मरणं ध्रुवम् ।
अशाश्वतं हि लोकेऽस्मिन्सदा स्थावरजङ्गमम् ।
इष्टं दत्तं तपोऽधीतं व्रतानि नियमाश्च ये ।

सर्वमेतद्विनाशान्तं ज्ञानस्यान्तो न विद्यते २१
तस्माज्ज्ञानेन युक्तेन प्रशान्तात्मा जितेन्द्रियः
निर्ममो निरहङ्कारो मुच्यते सर्वपाप्मभिः २२

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे चतुश्चत्वारिंशोऽध्यायः ॥ ४४ ॥

४५

ब्रह्मोवाच ।

बुद्धिसारं मनस्तम्भमिन्द्रियग्रामबन्धनम् ।
महाभूतपरिस्कन्धं निवेशपरिवेशनम् ॥ १
जराशोकसमाविष्टं व्याधिव्यसनसम्भवम्
देशकालविचारीद श्रमव्यायामनिःस्वनम् २
अहोरात्रपरिक्षेपं शीतोष्णपरिमण्डलम् ।
सुखदुःखान्तसंश्लेषं क्षुत्पिपासावकीलकम् ३
छायातपविलेखं च निमेषोन्मेषविह्वलम् ।
घोरमोहजलाकीर्णं वर्तमानमचेतनम् ॥ ४
मासार्धमासगणितं विषमं लोकसञ्चरम् ।
तमोनियमपङ्कं च रजोवेगप्रवर्तकम् ॥ ५
महाहङ्कारदीप्तं च गुणसञ्जातवर्तनम् ।
अरतिग्रहणानीकं शोकसंहारवर्तनम् ॥ ६
क्रियाकारणसंयुक्तं रागविस्तारमायतम् ।
लोभेप्सापरिविक्षोभं विचित्राज्ञानसम्भवम्
भयमोहपरीवारं भूतसम्मोहकारकम् ।
आनन्दप्रीतिचारं च कामक्रोधपरिग्रहम् ॥ ८
महदादिविशेषान्तमसक्तं प्रभवाव्ययम् ।
मनोजवं मनःकान्तं कालचक्रं प्रवर्तते ॥ ९

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे चतुश्चत्वारिंशोऽध्याय ॥ ४४ ॥

४५

अध्यायद्वयेन ज्ञानोपायान् धर्मान्विवक्षुरज्ञाना कालचक्राधीनत्वं दर्शयति—**बुद्धीत्यादिना** । अत्र नूतनत्वपुराणत्वादिवदतीतत्वानागतत्वादिरपि द्रव्यस्यैव धर्म इत्यतीतानागतादिव्यवहारहेतुर्द्रव्यमेव न तु कालो नाम षष्ठ पदार्थस्तदर्थमेष्टव्य इति मन्वानो देहरूपं द्रव्यमेव कालचक्रत्वेन वर्णयति बुद्धिसारमित्यादिविशेषणयुक्तं कालचक्र प्रवर्तत इति नवमेनान्वय । बुद्धिरेव सार उपादेयांशो यस्मिन् मनस्तम्भं मनसा स्तंभनेव धृतम् । महाभूतपरिस्कन्धं पञ्चभूतसमूहात्मकम् । स्कन्ध स्यान्नृपतौ वंशे साम्परायसमूहयो इति **मेदिनी** । निवेशपरिवेशन स्त्रयेव यत्र नेमिवदावरणभूता ॥ १ ॥ सम्भव उत्पत्तिस्थानं देशकालाभ्या विचरति तथा श्रम खेद व्यायामस्तद्धेतुर्गमनादि ॥ २ ॥ परिक्षेपश्चालक । परिमण्डलं परिवेष । अन्तसंश्लेष सन्धि । अवकीलका अन्त प्रविष्टा शङ्कव ॥ ३ ॥ छायातपौ मेघसन्तापौ विलेखावुत्खातारौ यत्र तत् च्छायातपविलेखं निमेषमात्रेण उन्मेषमात्रेण च विह्वलं व्याकुलं घोर बीभत्स मोहजल अश्रु शोकव्याप्तमित्यर्थः। वर्तमानं सदागति अचेतनं जडम् ॥४॥ मासादिना कालेन परिमितम् । विषमं कदाचिन्मनुष्याकारं कदाचित्पश्वाकार कदाचिदन्याकारमिति । लोकेषु ऊर्ध्वमध्याधोगतेषु सञ्चर सञ्चरणं यस्य। तमोनियमपङ्क तमोगुणेन यो नियम कर्मज्ञानयोर्निरोध स एव पङ्कवन्मालिन्याख्यपापहेतुर्यस्मिन्। रजोवेगप्रवर्तक तम सत्त्वसंमिश्रस्य रजसो वेग विहितानिषिद्धकर्मसु प्रवर्तको यत्र ॥५॥ अहङ्कारो दर्प । सत्त्वाहङ्कारेति पाठे बुद्धयहङ्काराभ्यां चेति तमित्यर्थ। गुणै सत्त्वादिभि सञ्जात वर्तनमवस्थान यस्य। पाठान्तरे मण्डलं सञ्जात अरतय इष्टालाभजा परितापा तान्येव ग्रहणानीकानि बन्धपट्टिका समूहो यत्र । शोक सहारो मृत्युदु खं ताभ्यामेव वर्तनं जीवन यस्य ॥६॥ लोभ ईप्सा तृष्णा ते एव परिविक्षोभो निम्नोन्नतदेशस्थानीयश्चक्रस्यास्फालनहेतुर्यत्र । विचित्रं त्रिगुणात्मकत्वात्तच्च तदज्ञानं माया तत सम्भव उत्पत्तिर्यस्य ॥ ७ ॥ आनन्दप्रीतिचार बाह्यसुखासक्त्या चरतीति तथा ॥ ८ ॥ विशेषा. स्थूलपिण्डादय असक्तं क्वचिदपि क्षणमानिरुद्ध प्रभवति ससरत्यनेन तत् प्रभवं तच्च तदव्ययं चेति अव्ययं संसारकारणमित्यर्थ ॥ ९ ॥

एतद्द्वन्द्वसमायुक्तं कालचक्रमचेतनम् ।
विसृजेत्संक्षिपेच्चापि बोधयेत्सामरं जगत् १०
कालचक्रप्रवृत्तिं च निवृत्तिं चैव तत्त्वतः ।
यस्तु वेद नरो नित्यं न स भूतेषु मुह्यति ११
विमुक्तः सर्वसंस्कारैः सर्वद्वन्द्वविवर्जितः ।
विमुक्तः सर्वपापेभ्यः प्राप्नोति परमां गतिम् ॥
गृहस्थो ब्रह्मचारी च
वानप्रस्थोऽथ भिक्षुकः ।
चत्वार आश्रमाः प्रोक्ताः
सर्वे गार्हस्थ्यमूलकाः ॥ १३
यः कश्चिदिह लोकेऽस्मिन्नागमः परिकीर्तितः
तस्यान्तगमनं श्रेयः कीर्तिरेषा सनातनी ॥१४
संस्कारैः संस्कृतः पूर्वं यथावच्चरितव्रतः ।
जातौ गुणविशिष्टायां समावर्तेत तत्त्ववित्
स्वदारनिरतो नित्यं शिष्टाचारो जितेन्द्रियः
पञ्चभिश्च महायज्ञैः श्रद्दधानो यजेदिह ॥ १६
देवतातिथिशिष्टाशी निरतो वेदकर्मसु ।
इज्याप्रदानयुक्तश्च यथाशक्ति यथासुखम् १७
न पाणिपादचपलो न नेत्रचपलो मुनिः ।
न च वाग्भ्रचपल इति शिष्टस्य गोचरः ॥ १८
नित्यं यज्ञोपवीती स्याच्छुक्लवासाः शुचिव्रतः
नियतो यमदानाभ्यां सदा शिष्टैश्च संविशेत् ॥
जितशिश्नोदरो मैत्रः शिष्टाचारसमन्वितः ।
वैणवीं धारयेद्यष्टिं सोदकं च कमण्डलुम् २०
अधीत्याध्यापनं कुर्यात्तथा यजनयाजने ।
दानं प्रतिग्रहं वापि षड्गुणां वृत्तिमाचरेत् ॥
त्रीणि कर्माणि जानीत
ब्राह्मणानां तु जीविका ।
याजनाध्यापने चोभे
शुद्धाच्चापि प्रतिग्रहः ॥ २२
अथ शेषाणि चान्यानि
त्रीणि कर्माणि यानि तु ।
दानमध्ययनं यज्ञो
धर्मयुक्तानि तानि तु ॥ २३
तेष्वप्रमादं कुर्वीत
त्रिषु कर्मसु धर्मवित् ।
दान्तो मैत्रः क्षमायुक्तः
सर्वभूतसमो मुनिः ॥ २४
सर्वमेतद्यथाशक्ति विप्रो निर्वर्तयन् शुचिः ।
एवं युक्तो जयेत्स्वर्गं गृहस्थः संशितव्रतः ॥ २५

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे पञ्चचत्वारिंशोऽध्यायः ॥ ४५ ॥

४६

ब्रह्मोवाच ।
एवमेतेन मार्गेण पूर्वोक्तेन यथाविधि ।
अधीतवान् यथाशक्ति तथैव ब्रह्मचर्यवान् १
स्वधर्मनिरतो विद्वान् सर्वेन्द्रिययतो मुनिः ।
गुरोः प्रियहिते युक्तः सत्यधर्मपरः शुचिः ॥ २
गुरुणा समनुज्ञातो
भुञ्जीतान्नमकुत्सयन् ।
हविष्यभैक्ष्यभुक् चापि
स्थानासनविहारवान् ॥ ३
द्विकालमग्निं जुह्वानः शुचिर्भूत्वा समाहितः ।
धारयीत सदा दण्डं बैल्वं पालाशमेव वा ४
क्षौमं कार्पासिकं चापि मृगाजिनमथापि वा
सर्वं काषायरक्तं वा वासो वापि द्विजस्य ह

द्वन्द्वानि मानापमानादीनि तन्मयं देहेन्द्रियादि सङ्घातचक्रं रजस्तम सत्त्वप्रधानं सत्सृष्टिसंहारतत्त्वज्ञानाना हेतुर्भवति ॥ १० ॥ प्रवृत्तिं प्रवृत्तिहेतुं निवृत्तिं निवृत्तिहेतुं वेद विदित्वा हानोपादानकृत्स मुह्यति ॥ ११ ॥ अगम विधिनिषेधशास्त्रं ॥ १४ ॥ गोचरः विषयो लक्षणमिति यावत् ॥ १८ ॥ संविद इति पाठे कुर्यादिति शेष ॥ १९ ॥ पाठान्तरे आश्वन व्रतसमाप्तिस्नानं समावर्तनाख्यं वृत्तिं वर्तनम् ॥२१॥ इति श्रीमहाभारते नैलकण्ठीये भारतभावदीपे पञ्चचत्वारिंशोऽध्याय ॥ ४५ ॥

४६

एवमेतेन मार्गेणेत्यादिरध्यायो निगदव्याख्यातः॥१

मेखला च भवेन्मौञ्जी जटी नित्योदकस्तथा।
यज्ञोपवीती स्वाध्यायी अलुब्धो नियतव्रतः
पूताभिश्च तथैवाद्भिः सदा दैवततर्पणम्।
भावेन नियतः कुर्वन्ब्रह्मचारी प्रशस्यते ॥ ७
एवं युक्तो जयेल्लोकान्वानप्रस्थो जितेन्द्रियः।
न संसरति जातीषु परमं स्थानमाश्रितः॥ ८
संस्कृतः सर्वसंस्कारैस्तथैव ब्रह्मचर्यवान्।
ग्रामान्निष्क्रम्य चारण्ये मुनिः प्रव्रजितो वसेत्
चर्मवल्कलसंवासी सायं प्रातरुपस्पृशेत्।
अरण्यगोचरो नित्यं न ग्राम प्रविशेत्पुनः १०
अर्चयन्नतिथीन्काले दद्याच्चापि प्रतिश्रयम्।
फलपत्रावरैर्मूलैः श्यामाकेन च वर्तयन् ॥ ११
प्रवृत्तमुदकं वायुं सर्वं वानेयमाश्रयेत्।
प्राश्नीयादानुपूर्व्येण यथादीक्षमतन्द्रितः ॥ १२
समूलफलभिक्षाभिरर्चेदतिथिमागतम्।
यद्भक्ष्यं स्यात्ततो दद्याद्भिक्षां नित्यमतन्द्रितः
देवतातिथिपूर्वं च सदा प्राश्नीत वाग्यतः।
अस्पर्धितमनाश्चैव लघ्वाशी देवताश्रयः॥ १४
दान्तो मैत्रः क्षमायुक्तः
केशान् श्मश्रु च धारयन्।
जुह्वन्स्वाध्यायशीलश्च
सत्यधर्मपरायणः ॥ १५
शुचिदेहः सदा दक्षो वननित्यः समाहितः।
एवं युक्तो जयेत्स्वर्गं वानप्रस्थो जितेन्द्रियः॥
गृहस्थो ब्रह्मचारी च वानप्रस्थोऽथ वा पुनः।
य इच्छेन्मोक्षमास्थातुमुत्तमां वृत्तिमाश्रयेत् ॥
अभयं सर्वभूतेभ्यो दत्वा नैष्कर्म्यमाचरेत्।
सर्वभूतसुखो मैत्रः सर्वेन्द्रिययतो मुनिः ॥ १८
अयाचितमसक्लृप्तमुपपन्नं यदृच्छया।
कृत्वा प्राह्णे चरेद्भैक्ष्यं विधूमे भुक्तवज्जने ॥ १९
वृत्ते शरावसम्पाते भैक्ष्यं लिप्सेत मोक्षवित्
लाभेन च न हृष्येत नालाभे विमना भवेत्।
न चातिभिक्षां भिक्षेत केवलं प्राणयात्रिकः
यात्रार्थी कालमाकांक्षंश्चरेद्भैक्ष्यं समाहितः।
लाभं साधारणं नेच्छेन्न भुञ्जीताभिपूजितः२१
अभिपूजितलाभाद्धि विजुगुप्सेत भिक्षुकः।
भुक्तान्यन्नानि तिक्तानि कषायकटुकानि च
नास्वादयीत भुञ्जानो रसांश्च मधुरांस्तथा।
यात्रामात्रं च भुञ्जीत केवलं प्राणधारणम् २३
असंरोधेन भूतानां वृत्तिं लिप्सेत मोक्षवित्
न चान्यमन्नं लिप्सेत भिक्षमाणः कथञ्चन २४
न सन्निकाशयेद्धर्मं विविक्ते चारजाश्चरेत्।
शून्यागारमरण्यं वा वृक्षमूलं नदीं तथा २५
प्रतिश्रयार्थं सेवेत पार्वतीं वा पुनर्गुहाम्।
ग्रामैकरात्रिको ग्रीष्मे वर्षास्वेकत्र वा वसेत्२६
अध्वा सूर्येण निर्दिष्टः कीटवच्च चरेन्महीम्।
दयार्थं चैव भूतानां समीक्ष्य पृथिवीं चरेत्२७
सञ्चयांश्च न कुर्वीत स्नेहवासं च वर्जयेत्।
पूताभिरद्भिर्नित्यं वै कार्यं कुर्वीत मोक्षवित्॥
उपस्पृशेदुद्धृताभिरद्भिश्च पुरुषः सदा।
अहिंसा ब्रह्मचर्यं च सत्यमार्जवमेव च ॥ २९
अक्रोधश्चानसूया च दमो नित्यमपैशुनम्।
अष्टस्वेतेषु युक्तः स्याद्व्रतेषु नियतेन्द्रियः ॥ ३०
अपापमशठं वृत्तमजिह्मं नित्यमाचरेत्।
जोषयेत सदा भोज्यं ग्रासमागतमस्पृहः ॥ ३१
यात्रामात्रं च भुञ्जीत केवलं प्राणयात्रिकम्।
धर्मलब्धमथाश्नीयान्न काममनुवर्तयेत् ॥ ३२
ग्रासादाच्छादनादन्यन्न गृह्णीयात्कथञ्चन।
यावदाहारयेत्तावत्प्रतिगृह्णीत नाधिकम् ॥ ३३
परेभ्यो न प्रतिग्राह्यं न च देयं कदाचन।
दैन्यभावाच्च भूतानां संविभज्य सदा बुधः ॥
नादद्दीत परस्वानि न गृह्णीयादयाचितः।
न किञ्चिद्विषयं भुक्त्वा स्पृहयेत्तस्य वै पुनः ॥
मृदमापस्तथान्नानि पत्रपुष्पफलानि च।
असंवृतानि गृह्णीयात्प्रवृत्तानि च कार्यवान्३६
न शिल्पजीविकां जीवेद्विरण्यं नोत कामयेत
न द्वेष्टा नोपदेष्टा च भवेच्च निरुपस्कृतः॥ ३७
श्रद्धापूतानि भुञ्जीत निमित्तानि च वर्जयेत्।
सुधावृत्तिरसक्तश्च सर्वभूतैरसंविदम् ॥ ३८
आशीर्युक्तानि सर्वाणि हिंसायुक्तानि यानि च
लोकसंग्रहधर्मं च नैव कुर्यान्न कारयेत् ॥ ३९
सर्वभावानतिक्रम्य लघुमात्रः परिव्रजेत्।
समः सर्वेषु भूतेषु स्थावरेषु चरेषु च ॥ ४०
परं नोद्वेजयेत्काञ्चिन्न च कस्यचिदुद्विजेत्।
विश्वास्यः सर्वभूतानामभयो मोक्षविदुच्यते॥
अनागतं च न ध्यायेन्नातीतमनुचिन्तयेत्।
वर्तमानमुपेक्षेत कालाकांक्षी समाहितः ॥ ४२
न चक्षुषा न मनसा न वाचा दूषयेत्कचित्।
न प्रत्यक्षं परोक्षं वा किञ्चिदुष्टं समाचरेत् ४३
इन्द्रियाण्युपसंहृत्य कूर्मोऽङ्गानीव सर्वशः।
क्षीणेन्द्रियमनोबुद्धिर्निरीहः सर्वतत्त्ववित् ४४

निर्द्वन्द्वो निर्नमस्कारो निःस्वाहाकार एव च
निर्ममो निरहङ्कारो निर्योगक्षेम आत्मवान्४५
निराशीर्निर्गुणः शान्तो निरासक्तो निराश्रयः
आत्मसङ्गी च तत्त्वज्ञो मुच्यते नात्र संशयः
अपादपाणिपृष्ठं तदशिरस्कमनूदरम् ।
प्रहीणगुणकर्माणं केवलं विमलं स्थिरम् ॥ ४७
अगन्धमरसस्पर्शमरूपाशब्दमेव च ।
अनुगम्यमनासक्तममांसमपि चैव यत् ॥ ४८
निश्चिन्तमव्ययं दिव्यं गृहस्थमपि सर्वदा ।
सर्वभूतस्थमात्मानं ये पश्यन्ति न ते मृताः ॥
न तत्र क्रमते बुद्धिर्नेन्द्रियाणि न देवताः ।
वेदा यज्ञाश्च लोकाश्च न तपो न व्रतानि च५०
यत्र ज्ञानवतां प्राप्तिरलिङ्गग्रहणा स्मृता ।
तस्मादलिङ्गधर्मज्ञो धर्मतत्त्वमुपाचरेत् ॥ ५१
गृहधर्माश्रितो विद्वान्विज्ञानचरितं चरेत् ।
अमूढो मूढरूपेण चरेद्धर्ममदूषयन् ॥ ५२
यथैनमवमन्येरन्परे सततमेव हि ।
तथावृत्तश्चरेच्छान्तः सतां धर्मानकुत्सयन् ॥
य एवं वृत्तसम्पन्नः स मुनिः श्रेष्ठ उच्यते ।
इन्द्रियाणीन्द्रियार्थांश्च महाभूतानि पञ्च च
मनो बुद्धिरहङ्कारमव्यक्तं पुरुषं तथा ।
एतत्सर्वं प्रसंख्याय यथावत्तत्त्वनिश्चयात् ५५
ततः स्वर्गमवाप्नोति विमुक्तः सर्वबन्धनैः ।
एतावदन्तवेलायां परिसंख्याय तत्त्ववित् ५६
ध्यायेदेकान्तमास्थाय मुच्यतेऽथ निराश्रयः
निर्मुक्तः सर्वसङ्गेभ्यो वायुराकाशगो यथा ५७
क्षीणकोशो निरातङ्कस्तथेदं प्राप्नुयात्परम् ५८

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे षट्चत्वारिंशोऽध्यायः ॥ ४६ ॥



४७

ब्रह्मोवाच ।

संन्यासं तप इत्याहुर्वृद्धा निश्चितवादिनः ।
ब्राह्मणा ब्रह्मयोनिस्था ज्ञानं ब्रह्म परं विदुः ॥१
अतिदूरात्मकं ब्रह्म वेदविद्याश्रयाश्रयम् ।
निर्द्वन्द्वं निर्गुणं नित्यमचिन्त्यगुणमुत्तमम् ॥ २
ज्ञानेन तपसा चैव धीराः पश्यन्ति तत्परम् ।
निर्धौतमनसः पूता व्युत्क्रान्तरजसोऽमलाः
तपसा क्षेममध्वानं गच्छन्ति परमेश्वरम् ।
संन्यासनिरता नित्यं ये च ब्रह्मविदो जनाः
तपः प्रदीप इत्याहुराचारो धर्मसाधकः ।
ज्ञानं वै परमं विद्यात्संन्यासं तप उत्तमम् ॥ ५
यस्तु वेद निराधारं ज्ञानं तत्त्वविनिश्चयात् ।
सर्वभूतस्थमात्मानं स सर्वगतिरिष्यते ॥ ६
यो विद्वान्सहवासं च विवासं चैव पश्यति ।
तथैवैकत्वनानात्वे स दुःखात्प्रतिमुच्यते ॥ ७
यो न कामयते किञ्चिन्न किञ्चिदवमन्यते ।
इहलोकस्थ एवैष ब्रह्मभूयाय कल्पते ॥ ८
प्रधानगुणतत्त्वज्ञः सर्वभूतप्रधानवित् ।
निर्ममो निरहङ्कारो मुच्यते नात्र संशयः ॥ ९
निर्द्वन्द्वो निर्नमस्कारो निःस्वधाकार एव च ।
निर्गुणं नित्यमद्वन्द्वं प्रशमेनैव गच्छति ॥ १०
हित्वा गुणमयं सर्वं कर्म जन्तुः शुभाशुभम् ।
उभे सत्यानृते हित्वा मुच्यते नात्र संशयः ११
अव्यक्तयोनिप्रभवो बुद्धिस्कन्धमयो महान् ।
महाहङ्कारविटप इन्द्रियाङ्कुरकोटरः ॥ १२
महाभूतविशालश्च विशेषयति शाखिनः ।
सदापत्रः सदापुष्पः शुभाशुभफलोदयः ॥ १३

आजीव्यः सर्वभूतानां
ब्रह्मवृक्षः सनातनः ।
एनं छित्त्वा च भित्त्वा च
तत्त्वज्ञानासिना बुधः ॥ १४

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे षट्चत्वारिंशोऽध्याय ॥ ४६ ॥

४७

संन्यासमित्यध्यायेऽपि मुच्यते नात्र संशय इत्यन्तो ग्रंथ पूर्वमेव गतार्थ ॥ १ ॥

हित्वा सङ्गमयान्पाशान्मृत्युजन्मजरोदयान् ।
निर्ममो निरहङ्कारो मुच्यते नात्र संशयः १५
द्वाविमौ पक्षिणौ नित्यौ संक्षेपौ चाप्यचेतनौ
ताभ्यां तु परो योऽन्यश्चेतनावान्स उच्यते
अचेतनः सत्त्वसंख्याविमुक्तः
सत्त्वात्पर चेतयतेऽन्तरात्मा ।
स क्षेत्रवित्सर्वसंख्यातबुद्धि-
र्गुणातिगो मुच्यते सर्वपापैः ॥ १७

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे सप्तचत्वारिंशोऽध्यायः ॥ ४७ ॥

४८

ब्रह्मोवाच ।
केचिद्ब्रह्ममय वृक्षं केचिद्ब्रह्मवनं महत् ।
केचित्तु ब्रह्म चाव्यक्त केचित्परमनामयम् ।
मन्यन्ते सर्वमप्येतदव्यक्तप्रभवाव्ययम् ॥ १
उच्छ्वासमात्रमपि चेद्योन्तकाले समो भवेत् ।
आत्मानमुपसङ्गम्य सोऽमृतत्वाय कल्पते ॥२
निमेषमात्रमपि चेत्संयम्यात्मानमात्मनि ।
गच्छत्यात्मप्रसादेन विदुषां प्राप्तिमव्ययाम्
प्राणायामैरथ प्राणान्संयम्य स पुनः पुनः ।
दशद्वादशभिर्वापि चतुर्विंशात्परं ततः ॥ ४

द्वाविमाविति । पक्षिणो जीवेश्वरौ साक्षिण्येते ययोस्तौ सक्षेपौ तयोरुपाधी बुद्धिमायेतौ अचेतनौ । सख्यायाविति पाठे तु अचेतनौ प्रतिबिंबत्वेन दृश्यौ यस्तु ताभ्या प्रतिबिंबरूपाभ्यामन्य बिंबस्थानीय स चेतनामात्रशरीरोपि चेतनावानित्युच्यते साक्ष्यसंसर्गात्साक्षीतिवत् ॥ १६ ॥ **अचेतन इति** । अचेतन इवाहवीगम्यो दृश्यो जीव इति यावत् । सत्त्वसख्याविमुक्त सत्त्वानि प्राणिन सख्यायन्ते पृथक्त्वेन गण्यते यैस्ते देहाद्युपाधयस्तैर्विमुक्त मन्सत्त्वात् बुद्धे पर यद्वस्तु यच्च चेतयते बुद्ध्यादीन् अचेतनानपि चैतन्ययुक्तान्कुरुते । स एव क्षेत्रमज्ञोऽन्तरात्मा कोऽसौ सर्वसंख्यातबुद्धि सर्वा सङ्ख्याता बुद्धयो येन सर्वासा बुद्धीना साक्षित्वेन संख्याता परिच्छेदक इत्यर्थ । स एव गुणगुंफित सन्सर्वैर्दोषैर्युज्यते गुणातिगस्तु तैर्मुच्यत इति ॥१७॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्तचत्वारिंशोऽध्याय ॥ ४७ ॥

४८

एवं ससाधना ब्रह्मविद्या समाप्य शिष्यबुद्धिपरीक्षार्थ व्यामिश्रैर्वाक्यैस्तामेवानुवदति—**केचिदित्यादिना** । केचित्सप्रपञ्चं ब्रह्मेति वदन्तो वृक्ष ससारं ब्रह्ममय ब्रह्मणो विकारमाहु 'ब्रह्मैव जगदाकारेण परिणमते' इति 'तदात्मान स्वयमकुरुत' 'सच्च त्यच्चाभवत्'। 'आत्मकृते परिणामात्' इत्यादिश्रुतय स्मृतयश्च । केचित्परं वस्तु अनामयं निर्विकार तत्र जगत्स्वप्नवत्कल्पितम् । स यदा स्वपिति तदैन वाक्सर्वैर्नामभि सहाप्येति चक्षु सर्वै रूपै सहाप्येति स यदा प्रतिबुद्धयेतायैतस्मादात्मन सर्वे प्राणा यथायतनं विप्रतिष्ठन्ते प्राणेभ्यो देवा देवेभ्यो लोका इति सुप्तिप्रबोधयोर्नामरूपात्मकस्यात्मन्येव लयोदयौ श्रूयेते। मायामात्रं तु कार्त्स्न्येन आत्मनि चैवं विचित्राश्च हीति स्मर्यते च। एव श्रौत मतद्वयमुक्त्वा साख्यमतमाह—**मन्यन्त इति** ॥१॥ तत्र प्रथमपक्षे उपासकाना आप्रायणादितिन्यायेन अन्त्यप्रत्ययस्यावश्यकत्वमाह उच्छ्वासमात्र तावन्मात्रकाल समो निर्विशेष सर्वो वा समशब्दस्य सर्वपर्यायत्वात् स इद सर्व भवतीति श्रुतेश्च आत्मान हार्द ब्रह्म संगम्य उपास्य अमृतत्वाय कल्पते ब्रह्मलोकप्राप्तिद्वारेत्यर्थ ॥ २ ॥ द्वितीयपक्षे अन्तकालादन्यत्रापि क्षणिकनिर्विकल्पसाक्षात्कारान्मुच्यत इत्याह—**निमेषेति** । विदुषा प्राप्तिं प्राप्य कैवल्यम् ॥ ३ ॥ तृतीयपक्षेऽपि मनोनिरोधेन मुच्यत इत्याह **—प्राणायामैरिति द्वाभ्याम्** । प्राणा इन्द्रियाणि बुद्धिमन सहितानि द्वादश ते आयम्यन्ते निगृह्यन्ते यैस्तै प्राणायामै यमनियमादिभि । ते च यमानियमासनप्राणायामप्रत्याहारधारणाध्यानसमाधयस्तर्कवैराग्याभ्या सह दश वा मैत्री करुणामुदितोपेक्षाभि सह द्वादश वा। यमा पञ्च नियमा पञ्चप्राणायामादय षट् मैत्र्यादयश्चतस्रस्तर्को वैराग्यं चेति द्वाविंशतिर्वा संयम्य निरोध्य पुन पुनरिति यावज्जीवभेवं कार्य न तु सकृत्प्रयत्नेनात्र सिद्धिरस्तीति दर्शितम् । चतुर्विंशात् अव्यक्तात्परं अन्यं पञ्चविंशं पुरुषं लभते ॥४॥

एवं पूर्वं प्रसन्नात्मा लभते यद्यदिच्छति ।
अव्यक्तात्सत्त्वमुद्रिक्तममृतत्वाय कल्पते ॥ ५
सत्त्वात्परतरं नान्यत्प्रशंसन्तीह तद्विदः ।
अनुमानाद्विजानीमः पुरुषं सत्त्वसंश्रयम् ।
न शक्यमन्यथा गन्तुं पुरुषं द्विजसत्तमाः ॥ ६
क्षमा धृतिरहिंसा च समता सत्यमार्जवम् ।
ज्ञानं त्यागोऽथ संन्यासः सात्त्विकं वृत्तमिष्यते
एतैनैवानुमानेन मन्यन्ते वै मनीषिणः ।
सत्त्वं च पुरुषश्चैव तत्र नास्ति विचारणा ॥ ८
आहुरेके च विद्वांसो ये ज्ञानपरिनिष्ठिताः ।
क्षेत्रज्ञसत्त्वयोरैक्यामित्येतन्नोपपद्यते ॥ ९
पृथग्भूतं ततः सत्त्वमित्येतदविचारितम् ।
पृथग्भावश्च विज्ञेयः सहजश्चापि तत्त्वतः १०
तथैवैकत्वनानात्वमिष्यते विदुषां नयः ।
मशकोदुम्बरे चैक्यं पृथक्त्वमपि दृश्यते॥ ११
मत्स्यो यथान्यः स्यादप्सु संप्रयोगस्तथा तयोः
सम्बन्धस्तोयबिन्दूनां पर्णे कोकनदस्य च १२
गुरुरुवाच ।
इत्युक्तवन्तस्ते विप्रास्तदा लोकपितामहम् ।
पुनः संशयमापन्नाः पप्रच्छुर्मुनिसत्तमाः ॥ १३

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे अष्टचत्वारिंशोऽध्यायः ॥ ४८ ॥



यद्यदिच्छति तदपि लभते योगसामर्थ्यात् । प्रसन्नात्मा विशुद्धसत्त्व यदा तु अव्यक्तात् अव्यक्तं प्राप्य सत्त्वं सत्त्वगुण उद्रिक्त उत्कृष्टतरं भवति पुरुषमात्राकार भवति तदाऽमृतत्वाय कल्पते पूर्ण शतसहस्र च तिष्ठंत्यव्यक्तचिन्तका इत्यव्यक्तमात्रनिष्ठाना स्वर्गकालावधिस्मरणात् । चतुर्विंशादव्यक्तात्परमिति वा सम्बन्ध ॥ ५ ॥ धर्मज्ञानवैराग्यैश्वर्यादीना आत्मप्राप्तिसाधनाना सत्त्वोत्कर्षलभ्यत्वात्सत्त्वमेव स्तौति सार्धेन—**सत्त्वादिति**—सत्त्वसंश्रयं तं पुरुषं अन्यथा सत्त्वासंश्रय इति गन्तुं न शक्यमिति योजना ॥ ६ ॥ वृत्तं परिपाक ॥ ७ ॥ पुरुषवत्स्वच्छत्वात्पुरुषोपकारित्वाच्च सत्त्वं पुरुषादभिन्नमिति मन्यन्ते **तार्किकाः** अत एव ते आत्मनि सत्त्वधर्मान्कर्तृत्वादीन्वास्तवान्मन्यन्ते इत्याह—**एतेनेति द्वाभ्याम्** । तत्रापि मन्यन्ते प्रातीतिक एकत्वं **सांख्यादयः। तार्किकास्तु** तदेव वास्तवमित्याहुरिति विवेक ॥ ८ ॥ एतदूषयति—**आहुरिति** ॥ ९ ॥ साख्यं प्रत्याह—**पृथगिति** यदि सत्त्वं तत पुरुषात्पृथक् अन्यत् भूतं नित्यनिर्वृतं च स्यात्तर्हि मुक्तमप्यात्मानं न जह्यात् । भूतत्वे तस्य निरन्वयनाशायोगात् । तस्मादनिर्मोक्षप्रसक्तेः इदं मतमविचारितं एकत्वपक्षेऽपि प्रयुक्त एव । कर्तृत्वादेर्वास्तवत्वे धर्मिनाशमन्तरेणानिवृत्तेर्नैरात्म्यमानिर्मोक्षो वा प्रसज्येत इति भाव । सिद्धान्तमाह—पृथग्भावश्च विज्ञेय सहजश्चापि तत्त्वत । सत्त्वपुरुषयोः समुद्रतरङ्गयोरिव शब्दत प्रतीतितश्च पृथग्भावोऽस्ति। सत्त्वं च समुद्रे तरङ्ग इव पुरुषे सहज, एव च विलीनतरङ्गस्येव मुक्तसत्त्वस्य पुनरुत्पत्त्ययोगान्नानिर्मोक्ष इति कल्पितभेदेन संसारयात्रानिर्वाह अकल्पिता भेदेन मोक्षोपपत्तिरित्यर्थ ॥ १० ॥ एवमपि सत्त्वपुरुषयोरैक्यजात्यापत्तेर्जडाजडविभागो न स्यादित्याशंक्याह- **तथैवेति** नय युक्तिं। तप इति पाठे आलोचनपूर्वको निश्चय । यथा उदुम्बरफलोदरे बाह्यस्थान्यस्य प्रवेशायोगात्तदवयव एव मशकदेहस्ततो विजातीय सन्नाविर्भवति । एव चिद्विलास एव सत्त्व तत पृथग्भूय जडत्वेनाविर्भवतीत्यर्थ ॥ ११ ॥ सत्त्वपुरुषयो सम्बन्धे दृष्टान्त—**पर्णे इति** । असङ्गत्वात्पुरुष सत्त्वधर्मैर्न लिप्यते तत्र लेपप्रतीतिस्त्वध्यासिकीति भाव ॥१२॥ उक्तं विद्यते येषु ते उक्तवन्त उक्तमर्थं सम्यगवधृतवन्त इत्यर्थ । सहजस्यापि सत्त्वस्य पुरुषासंसर्गित्व दुर्घट ब्रह्मणश्च वचनं न मिथ्येति तर्कश्रद्धाभ्यामुभयतो निरुद्धत्वात्सशयमापन्ना ॥ १३ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे अष्टचत्वारिंशोऽध्याय ॥ ४८ ॥

४९

ऋषय ऊचुः ।
को वा स्विदिह धर्माणामनुष्ठेयतमो मतः ।
व्याहतामिव पश्यामो धर्मस्य विविधां गतिम् ।
ऊर्ध्वं देहाद्वदन्त्येके नैतदस्तीति चापरे ।
केचित्संशयित सर्वं निःसशयमथापरे ॥ २
अनित्यं नित्यमित्येके नास्त्यस्तीत्यपि चापरे
एकरूप द्विधेत्येके व्यामिश्रमिति चापरे ॥ ३
मन्यन्ते ब्राह्मणा एव ब्रह्मज्ञास्तत्त्वदर्शिनः ।
एकमेके पृथक्चान्ये बहुत्वमिति चापरे ॥ ४
देशकालावुभौ केचिन्नैतदस्तीति चापरे ।
जटाजिनधराश्चान्ये मुण्डाः केचिदसंवृताः ५
अज्ञानं केचिदिच्छन्ति ज्ञानमप्यपरे जनाः ।
मन्यन्ते ब्राह्मणा देवा ब्रह्मज्ञास्तत्त्वदर्शिनः ॥६
आहारं केचिदिच्छन्ति केचिच्चानशने रताः ।
कर्म केचित्प्रशंसन्ति प्रशान्तिं चापरे जनाः ७
केचिन्मोक्षं प्रशसन्ति
केचिद्भोगान्पृथग्विधान् ।
धनानि केचिदिच्छन्ति
निर्धनत्वमथापरे ।
उपास्य साधन त्वेके
नैतदस्तीति चापरे ॥ ८
अहिंसानिरताश्चान्ये केचिद्धिंसापरायणाः
पुण्येन यशसा चान्ये नैतदस्तीति चापरे ॥ ९
सद्भावनिरताश्चान्ये केचित्संशयिते स्थिताः
दुःखादन्ये सुखादन्ये ध्यानमित्यपरे जनाः ॥
यज्ञमित्यपरे विप्राः प्रदानमिति चापरे ।
तपस्त्वन्ये प्रशंसन्ति स्वाध्यायमपरे जनाः ११
ज्ञानं संन्यासमित्येके स्वभावं भूतचिन्तकाः
सर्वमेके प्रशंसन्ति न सर्वमिति चापरे ॥ १२
एवं व्युत्थापिते धर्मे बहुधा विप्रबोधिते ।
निश्चय नाधिगच्छामः संमूढाः सुरसत्तम १३
इदं श्रेय इदं श्रेय इत्येवं व्युत्थितो जनः ।
यो हि यस्मिन् रतो धर्मे स तं पूजयते सदा॥
तेन नोऽविहिता प्रज्ञा मनश्च बहुलीकृतम् ।
एतदाख्यातमिच्छामः श्रेयः किमिति सत्तम
अतः परं तु यद्गुह्यं तद्भवान्वक्तुमर्हति ।
सत्त्वक्षेत्रज्ञयोश्चापि सम्बन्धः केन हेतुना १६
एवमुक्तः स तैर्विप्रैर्भगवाँल्लोकभावनः ।
तेभ्यः शशंस धर्मात्मा याथातथ्येन बुद्धिमान्

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे एकोनपञ्चाशत्तमोऽध्यायः ॥ ४९ ॥



४९

एव सदिहाना प्रथम वेदशास्त्रेषु मतभेद दर्शयन्ति— **को वेति** । निवृत्तिधर्मो वा प्रवृत्तिधर्मो वाऽनुष्ठेय — **न कर्मणेति** । 'कुर्वन्नेवेह कर्माणि' (ई, वा म १) इत्युभयविधश्रुतिदर्शनान्मुह्यामहे इति भाव ॥ १ ॥ ऊर्ध्वं देहात् देहनाशादूर्ध्वमपि आत्मास्तीत्येके वदन्तीति सम्बन्ध - **नैतदिति** । लोकायता सर्वं संशयितमिति **स्याद्वादिनः** सप्तभंगीनयज्ञा **नि सशयामिति** । प्रातिस्विकं सर्वं तैर्थिका ॥२॥ अनित्यं सर्वं सृष्टिप्रलययुक्तमिति तार्किकादय नित्यं प्रवाहनित्यमिति **मीमासकाः** नास्तीति **शून्यवादिनः** अस्ति परंतु क्षणिकमिति **सौगताः** एकरूपं विज्ञानमेव द्विधा इदमर्थाकारमहमर्थाकारमिति **योगाचाराः** व्यामिश्रं भिन्नमभिन्नं चेत् इति **उडुलोमाः** ॥ ३ ॥ एके ब्रह्मज्ञा शास्त्रज्ञा तत्त्वदर्शिनोऽपरोक्षज्ञानवन्त ब्राह्मणास्तु ब्रह्मैवैकमस्तीति मन्यन्ते सगुणोपासका पृथक् असाधारणानि कर्माण्येव कारणानीत्यन्ये **मीमांसकाः** बहुत्वमपि कारणाना प्राहु परमाणुवादिन ॥ ४ ॥ देशकालाविति **ज्योतिर्विदः** एतत् दृश्य सर्वं कालत्रयेऽपि नास्ति स्वराज्यवच्चिद्विलासमात्रमिति वृद्धा ॥ ५ ॥ अज्ञानं नैष्ठिकब्रह्मचर्यं ज्ञान गार्हस्थ्यम् ॥६॥ साधन ध्यानादिकमुपास्य कृत्वाऽपि नैतदस्तीति पश्चात्सर्वमपवदन्ति तथा च श्रुति —

न निरोधो न चोत्पत्तिर्न बद्धो न च साधक ।
न मुमुक्षुर्न वै मुक्त इत्येषा परमार्थता इति ॥ ८ ॥

पुण्येन पुण्यार्थमेव यतेतेत्यन्ये । एतत्पुण्य नास्त्येवेत्यन्ये **लोकायताः** ॥ ९ ॥ सशयिते कृतमस्ति न वेति संदिग्धे पथि दु खात् दु खनिवृत्त्यर्थं सुखात्सुखप्राप्त्यर्थं ध्यानं कर्तव्य निष्काममेवेत्यपरे ॥ १० ॥ ज्ञानं सन्यासं तन्यासिकप्राय भूतचिंतका वस्तुतत्त्वविचारका स्वभाव साधनपौष्कल्यं साधनपौष्कल्यस्वाभाव्यादेव ज्ञानमुत्पद्यते आश्रमान्तरेऽपि न संन्यासमात्रेणेत्याहु ॥ १२ ॥ अविहिता अशिक्षिता आख्यातं त्वयेति शेष ॥ १५ ॥ मुख्यं प्रष्टव्यमाह— **अतः-परमिति** ॥१६॥ इति श्रीम०आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे एकोनपञ्चाशत्तमोऽध्याय ॥ ४९ ॥

५०

ब्रह्मोवाच ।

हन्त वः संप्रवक्ष्यामि यन्मां पृच्छथ सत्तमाः
गुरुणा शिष्यमासाद्य यदुक्तं तन्निबोधत ॥ १
समस्तमिह तच्छ्रुत्वा सम्यगेवावधार्यताम् ।
अहिंसा सर्वभूतानामेतत्कृत्यतमं मतम् ॥
एतत्पदमनुद्विग्नं वरिष्ठं धर्मलक्षणम् ।
ज्ञानं निःश्रेय इत्याहुर्वृद्धा निश्चितदर्शिनः ॥ ३
तस्माज्ज्ञानेन शुद्धेन मुच्यते सर्वकिल्बिषैः ।
हिंसापराश्च ये केचिद्ये च नास्तिकवृत्तयः ।
लोभमोहसमायुक्तास्ते वै निरयगामिनः ॥ ४
आशीर्युक्तानि कर्माणि कुर्वते ये त्वतन्द्रिताः
तेऽस्मिँल्लोके प्रमोदन्ते जायमानाः पुनः पुनः
कुर्वते ये तु कर्माणि श्रद्दधाना विपश्चितः ।
अनाशीर्योगसंयुक्तास्ते धीराः साधुदर्शिनः
अतः परं प्रवक्ष्यामि सत्त्वक्षेत्रज्ञयोर्यथा ।
संयोगो विप्रयोगश्च तन्निबोधत सत्तमाः ॥ ७
विषयो विषयित्वं च सम्बन्धोऽयमिहोच्यते
विषयी पुरुषो नित्यं सत्त्वं च विषयः स्मृतः
व्याख्यातं पूर्वकल्पेन मशकोदुम्बर यथा ।
भुज्यमानं न जानीते नित्यं सत्त्वमचेतनम् ।
यस्त्वेवं तं विजानीते यो भुंक्ते यश्च भुज्यते ९
नित्यं द्वन्द्वसमायुक्तं
सत्त्वमाहुर्मनीषिणः ।
निर्द्वन्द्वो निष्कलो नित्यः
क्षेत्रज्ञो निर्गुणात्मकः ॥ १०
समं संज्ञानुगश्चैव स सर्वत्र व्यवस्थितः ।
उपभुंक्ते सदा सत्त्वमपः पुष्करपर्णवत् ॥ ११
सर्वैरपि गुणैर्विद्वान् व्यतिषक्तो न लिप्यते ।
जलबिन्दुर्यथा लोलः पद्मिनीपत्रसंस्थितः ॥
एवमेवाप्यसंयुक्तः पुरुषः स्याच्च संशयः ।
द्रव्यमात्रमभूत्सत्त्वं पुरुषस्येति निश्चयः ॥ १३
यथा द्रव्यं च कर्ता च संयोगोप्यनयोस्तथा ।
यथा प्रदीपमादाय कश्चित्तमसि गच्छति ।
तथा सत्त्वप्रदीपेन गच्छन्ति परमैषिणः ॥ १४
यावद्द्रव्यं गुणस्तावत्प्रदीपः संप्रकाशते ।
क्षीणे द्रव्ये गुणे ज्योतिरन्तर्धानाय गच्छति

५०

पृष्टेष्वेतेषु पक्षेषु यद्धेयमुपादेयं च तत्सक्षेपेणाह–**हन्त व इति** ॥ १ ॥ विषयविषयिभावो घटचक्षुषोरिव न केवलं प्रकाश्यप्रकाशकभाव अपि तु भोज्यभोक्तृभावोप्यस्तीत्याह --**व्याख्यातमिति** सार्धेन । उदुंबरवन्मत्त्व स्वात्मान भोक्तारं च न वेत्ति भोक्ता तु मशकवदुभयं वेत्तीत्यर्थ । यो विजानीते स क्षेत्रज्ञ इत्युत्तरेणान्वय ॥ ९ ॥ सत्त्वपुरुषयो संबंधस्याध्यासिकत्वमाह--**नित्यमिति** । नित्यं सर्वदा सत्त्वं द्वंद्वै सुखदु खादिपरिणामैर्युक्तं गुणात्मकत्वात्सुखदु खमोहात्मकं संहतं च तद्विपरीतत्वात् निर्द्वंद्व नित्य निष्कलो निर्गुणश्च पुरुष अतस्तयोर्विषमस्वभावत्वान्न जतुकाष्ठादिवत् संबंधो युज्यते । यथोक्तं—

नि संगस्य ससर्गेन कूटस्थस्य विकारिणा ।
आत्मनोऽनात्मना योगो वास्तवो नोपपद्यते ॥


इति ॥ १० ॥ कथं तर्हि तयोर्विषयविषयिभावसंबध उक्त इत्याह–**समामिति** । यथा सर्वत्र स्वप्नमायेंद्रजालरज्जूरगादौ अध्यस्त अधिष्ठानेन सम तुल्यं तदावरकमित्यर्थः अधिष्ठानं चाध्यस्तसंज्ञानुगत तत्र स्वकीयसत्ता स्फूर्तिसमर्पकतया तदीया संज्ञामनुसरत् दृश्यते तथा सत्त्व पुरुषेण सम सत्त्वमज्ञानुगत पुरुष उपभुक्ते तत्र दृष्टात –**अप इति** । यथा पुष्करपर्ण अद्भिरससक्तमपि अपो भुक्ते ताभिस्तस्याप्यायनात् । एवं सत्त्वेनावृत पुरुष सत्त्वसमानत्व गत सत्त्वधर्मान् आत्मन्यभिमन्वान सत्त्व भुक्ते तथा चैव कूटस्थविकारिणोरपि पुप्रकृत्योराध्यासिक सबध उपपादितो भवति ॥ ११ ॥ प्रकारान्तरेण दृष्टान्त विवृणोति—**सर्वैरिति** ॥ १२ ॥ समत्वमुपपादयति—**एवमिति** । सर्पेण रज्जुरिव सत्त्वेन असयुक्तोऽपि पुरुष स इति निश्चितमेव । तथापि सत्त्वं पुरुषश्च उभय मिलित्वा द्रव्यमात्र सत्त्वमात्रमभूत् । यथा रज्जुभुजगौ मिलित्वा भुजगमात्र भवति तद्वत् इति निश्चय । इदमेव तत्त्व कल्पनान्तर तु भ्रान्तिमात्रमिति भाव ॥१३॥ इदमेव द्वयो सत्त्वमात्रत्वमनुसृत्य सत्त्वमेवात्मेति मन्यमाना बौद्धा पुरुषमपलपति तत्प्राह–**यथेति**। सत्त्व पुरुषश्चेत्युभय यथा द्रव्यमात्रमभूत्तथा द्रव्यं इदमर्थं कर्ताहमर्थं तयो संयोगो दर्शनं चेति कृत्स्ना त्रिपुट्यपि द्रव्यमभूदित्यर्थ । कुतस्तर्हि द्रव्यात्पुरुषस्य पृथक्त्वमत आह—**प्रदीपेति** । यथा दीपेनैव दीपमन्यं च जानन्ति एव सत्त्वस्य परिणामविशेषेण विद्याख्येन सत्त्व पुरुषं च पृथक् जानीयादित्यर्थ ॥१४॥ द्रव्यं तैलं गुणो वर्तिः १५

व्यक्तः सत्त्वगुणस्त्वेवं पुरुषो व्यक्त इष्यते ।
एतद्विप्रा विजानीत हन्त भूयो ब्रवीमि वः
सहस्रेणापि दुर्मेधा न बुद्धिमधिगच्छति ।
चतुर्थेनाप्यथांशेन बुद्धिमान् सुखमेधते ॥ १७
एवं धर्मस्य विज्ञेयं संसाधनमुपायतः ।
उपायज्ञो हि मेधावी सुखमत्यन्तमश्नुते ॥ १८
यथाऽध्वानमपाथेयः प्रपन्नो मनुजः क्वचित् ।
क्लेशेन याति महता विनश्येदन्तरापि च १९
तथा कर्मसु विज्ञेयं फलं भवति वा न वा ।
पुरुषस्यात्मनिःश्रेयः शुभाशुभनिदर्शनम् ॥ २०
यथा च दीर्घमध्वानं पङ्ग्वामेव प्रपद्यते ।
अदृष्टपूर्वं सहसा तत्त्वदर्शनवर्जितः ॥ २१
तमेव च यथाऽध्वानं रथेनेहाशुगामिना ।
गच्छत्यश्वप्रयुक्तेन तथा बुद्धिमतां गतिः॥ २२
ऊर्ध्वं पर्वतमारुह्य नान्ववेक्षेत भूतलम् ।
रथेन रथिनं पश्य क्लिश्यमानमचेतनम् ॥ २३
यावद्रथपथस्तावद्रथेन स तु गच्छति ।
क्षीणे रथपदे विद्वान् रथमुत्सृज्य गच्छति ॥
एवं गच्छति मेधावी तत्त्वयोगविधानवित् ।
परिज्ञाय गुणांश्च उत्तरादुत्तरोत्तरम् ॥ २५
यथार्णवं महाघोरमप्लवः संप्रगाहते ।
बाहुभ्यामेव समोहाद्वृधं वाऽछत्यसंशयम् ॥
नावा चापि यथा प्राज्ञो विभागज्ञः स्वरित्रया
अश्रान्तः सलिले गच्छेच्छीघ्रं सन्तरते ह्रदम्
तीर्णो गच्छेत्परं पारं नावमुत्सृज्य निर्ममः ।
व्याख्यातं पूर्वकल्पेन यथा रथपदातिनोः २८
स्नेहात्संमोहमापन्नो नावि दाशो यथा तथा
ममत्वेनाभिभूतः संस्तत्रैव परिवर्तते ॥ २९
नाव न शक्यमारुह्य स्थले विपरिवर्तितुम् ।
तथैव रथमारुह्य नाप्सु चर्या विधीयते ॥ ३०
एवं कर्मकृतं चित्रं विषयस्थं पृथक् पृथक् ।
यथा कर्म कृतं लोके तथैतानुपपद्यते ॥ ३१
यन्नैव गन्धिनो रस्यं न रूपस्पर्शशब्दवत् ।
मन्यन्ते मुनयो बुद्ध्या तत्प्रधानं प्रचक्षते ३२
तत्र प्रधानमव्यक्तमव्यक्तस्य गुणो महान् ।
महत्प्रधानभूतस्य गुणोऽहङ्कार एव च ॥ ३३
अहङ्कारात्तु संभूतो महाभूतकृतो गुणः ।
पृथक्त्वेन हि भूतानां विषया वै गुणाः स्मृताः
बीजधर्मं तथा व्यक्तं प्रसवात्मकमेव च ।
बीजधर्मा महानात्मा प्रसवश्चेति नः श्रुतम् ॥
बीजधर्मस्त्वहङ्कारः प्रसवश्च पुनः पुनः ।
बीजप्रसवधर्माणि महाभूतानि पञ्च वै ॥ ३६

दार्ष्टांतिकमाह—**व्यक्त इति** । यथा तैलवर्तिभ्यामवष्टब्धो दीप आत्मानं भवनाकाश च व्याप्नोति तदभावे तु स्वयमेवातर्धीयते न तु भवनाकाश एव कर्मावष्टब्ध सत्त्वगुणश्चरमवृत्तिरूपोऽभिव्यक्त सन् स्व च पुरुष च पृथगवभासयति कर्मोपरमे तु स्वयमेवान्तर्धीयते पुरुषस्तु अव्यक्त समाधिसुषुप्तिसुखसाक्षी केवल इष्यते ॥ १६ ॥ कर्मसु ज्ञानसाधनेषु आत्मनि चित्ते श्रेयोविषये शुभाशुभदृष्टान्त पूर्णे पुण्यपापे य पूर्ण योगमाप्नोति अल्पपुण्यस्त्वतरा म्रियते इति भाव ॥ २० ॥ **यथा चेति** । शास्त्ररथेनैव संसाराध्वातिलघनीय इति भाव ॥२१॥ **ऊर्ध्वमिति** । पर पदमारुह्य शास्त्रमपि त्याज्यमिति भाव ॥२३॥ **यावदिति** । चित्तशुद्धिपर्यंतं विधिशास्त्रैकैकर्य ततस्तु योगतत्त्व जानन् उत्तरोत्तरं हंसं परमहंसं वाऽऽश्रमं सम्यगवबुध्य गच्छेदित्यर्थ ॥ २४ ॥ आचार्यरूपा नाव श्रेयेदित्याह त्रिभि —**यथेति** ॥ २६ ॥ स्वरित्रया शोभनानि अरित्राणि केनिपातनानि यस्या तया ॥२७॥**तीर्ण इति** । समावृतवत् निदिध्यासनार्थी गुरुमपि त्यजेदिति भाव । तावद्गुरु सेवेत यावद्योगारूढो न भवति रथमिव पर्वतारूढ इति पूर्वदृष्टान्त स्मारयति—**व्याख्यातमिति** । पदातिदृष्टान्तोऽपि गुर्वभावे मार्गप्राप्तिरेव न भवतीत्यत्र बोध्यः ॥ २८ ॥ **स्नेहादिति** । नात्यन्त गुरावेव स्थैर्य सति ध्यानयोग्यत्वे इति भाव ॥ २९ ॥ **नावमिति** । कर्माधिकारिणा योगो योगाधिकारिणा च कर्म नानुष्ठातु युक्त इति भाव ॥ ३० ॥ कर्मकृतं कर्मफलं चित्र नानाविधं विषयस्थं पृथक् पृथक् एकमेव कर्म गृहस्थस्य श्लाघ्यं परिव्राजकस्य पातित्यहेतु. एव व्यतिरेकोऽपि ज्ञेय विषय आश्रमस्तत्स्थ एतान्कर्तून् ॥ ३१ ॥ एव ज्ञानसाधनान्युक्त्वा ज्ञेयमाह—**यदिति** । गन्धि गन्धवत् रस्य रसवत् ॥ ३२ ॥ गुण कार्य महद्रूप यत्प्रधानभूत प्रधानकार्य तस्यापि गुणोऽहङ्कार ॥ ३३ ॥ महाभूतकृतवियदादिरूपत्वेन कल्पित तेषा गुणास्तु विषया शब्दादय एव ॥ ३४ ॥ बीजधर्मत्व कारणत्व प्रसवात्मकत्व कार्यरूपत्व, जीवेति पाठेपि जीवतो धान्यादेरेव धर्मो बीजत्वं न तु भर्जितधान्यादेरिति स एवार्थ । यद्यपि तेषा मते अव्यक्तस्य बीजत्वमेवास्ति न तु कार्यत्व तथापि अद्वैतश्रुतिविरोधात्तदुपेक्ष्यामिति भाव ॥ ३५ ॥ पुन पुनरिति दृष्टसृष्टिरुक्ता ॥ ३६ ॥

बीजधर्मिण इत्याहुः प्रसवं च प्रकुर्वते ।
विशेषाः पञ्चभूतानां तेषां चित्त विशेषणम्
तत्रैकगुणमाकाशं द्विगुणो वायुरुच्यते ।
त्रिगुणं ज्योतिरित्याहुरापश्चापि चतुर्गुणाः ॥
पृथ्वी पञ्च गुणा ज्ञेया चरस्थावरसंकुला ।
सर्वभूतकरी देवी शुभाशुभनिदर्शिनी ॥ ३९
शब्दः स्पर्शस्तथा रूपं रसो गन्धश्च पञ्चमः ।
एते पञ्च गुणा भूमेर्विज्ञेया द्विजसत्तमाः ॥ ४०
पार्थिवश्च सदा गन्धो गन्धश्च बहुधा स्मृतः ।
तस्य गन्धस्य वक्ष्यामि विस्तरेण बहून्गुणान्
इष्टश्चानिष्टगन्धश्च मधुरोऽम्लः कटुस्तथा ।
निर्हारी संहतः स्निग्धो रूक्षो विशद एव च॥
एवं दशविधो ज्ञेयः पार्थिवो गन्ध इत्युत ।
शब्दः स्पर्शस्तथा रूपं द्रवश्चापां गुणाः स्मृताः
रसज्ञानं तु वक्ष्यामि रसस्तु बहुधा स्मृतः ।
मधुरोऽम्लः कटुस्तिक्तः कषायो लवणस्तथा
एवं षड्विधविस्तारो रसो वारिमयः स्मृतः ।
शब्दः स्पर्शस्तथा रूपं त्रिगुणं ज्योतिरुच्यते ॥
ज्योतिषश्च गुणो रूपं रूपं च बहुधा स्मृतम्
शुक्लं कृष्णं तथा रक्तं नीलं पीतारुणं तथा ४६
ह्रस्वं दीर्घं कृशं स्थूलं चतुरस्रं तु वृत्तवत् ।
एवं द्वादशविस्तारं तेजसो रूपमुच्यते ॥ ४७
विज्ञेयं ब्राह्मणैर्वृद्धैर्धर्मज्ञैः सत्यवादिभिः ।
शब्दस्पर्शौ च विज्ञेयौ द्विगुणो वायुरुच्यते ४८
वायोश्चापि गुणः स्पर्शः स्पर्शश्च बहुधा स्मृतः
रूक्षः शीतस्तथैवोष्णः स्निग्धो विशद एव च
कठिनश्चिक्कणः श्लक्ष्णः
पिच्छिलो दारुणो मृदुः ।
एवं द्वादशविस्तारो
वायव्यो गुण उच्यते ॥ ५०
विधिवद्ब्राह्मणैः सिद्धैर्धर्मज्ञैस्तत्त्वदर्शिभिः ५१
तत्रैकगुणमाकाशं शब्द इत्येव च स्मृतः ।
तस्य शब्दस्य वक्ष्यामि विस्तरेण बहून्गुणान्
षड्जर्षभः स गान्धारो मध्यमः पञ्चमस्तथा ।
अतः परं तु विज्ञेयो निषादो धैवतस्तथा ।
इष्टश्चानिष्टशब्दश्च संहतः प्रविभागवान् ५३
एव दशविधो ज्ञेयः शब्द आकाशसम्भवः ।
आकाशमुत्तमं भूतमहङ्कारस्ततः परः ॥ ५४
अहङ्कारात्परा बुद्धिर्बुद्धेरात्मा ततः परः ।
तस्मात्तु परमव्यक्तमव्यक्तात्पुरुषः परः ॥ ५५
परापरज्ञो भूतानां विधिज्ञः सर्वकर्मणाम् ।
सर्वभूतात्मभूतात्मा गच्छत्यात्मानमव्ययम्५६

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे पञ्चाशत्तमोऽध्यायः ॥ ५० ॥



५१

ब्रह्मोवाच ।
भूतानामथ पञ्चानां यथैषामीश्वर मनः ।
नियमे च विसर्गे च भूतात्मा मन एव च १
अधिष्ठाता मनो नित्यं भूतानां महतां तथा ।
बुद्धिरैश्वर्यमाचष्टे क्षेत्रज्ञश्च स उच्यते ॥ २

बीजधर्मिण इति तामेवोपपादयति । विशेषा शब्दादय प्रसवं प्रकुर्वते भोगकाले कार्यरूपेण उपस्थिता अपि संस्काररूपेण कालान्तरे भोग दातुं कारणात्मनाऽवतिष्ठन्ते । अत एते कारणरूपाश्च कार्य सर्वदा कुर्वन्ति पूर्वेषा मृद्घट-न्यायेन कार्यकारणभाव । विशेषाणा तु बीजाङ्कुरन्यायेनेति भेद । तेषा विशेषाणामपि विशेषणं व्यावर्तक चित्तमेव । चित्त एव विशेषा सर्वे सन्ति न बहिरित्यर्थ ॥३७॥ तत्रैकगुणमित्यादिग्रन्थो व्याख्यातो मोक्षधर्मेषु स्पष्टार्थश्च ॥ ३८ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे पंचाशतमोऽध्याय ॥ ५० ॥

५१

विशेषा पञ्चभूतानामित्यत्र सूत्रिता सकलशास्त्ररहस्यभूता दृष्टिसृष्टिं प्रपंचयति—**भूतानामित्यादिना** । नियमे संहारे विसर्गे उत्पत्तौ च भूताना मन एव ईश्वरं समर्थं यथा तथा वक्ष्यत इति शेष । भूतात्मा स्थितिकालेऽपि मन एव भूतानामात्मा स्वरूपं कनकमिव कुण्डलादेः ॥१॥ अधिष्ठाता निमित्तकारणमपि कुलालादिस्थानीयं मन एव क्षेत्रज्ञो जीवोऽपि मन एव एवं मनस ऐश्वर्यं बुद्धिर्विवेकजा प्रज्ञैव आचष्टे स्वप्रतीतिग्राह्यं मनस ऐश्वर्यमित्यर्थ ॥ २ ॥

इन्द्रियाणि मनो युंक्ते सदश्वानिव सारथिः ।
इन्द्रियाणि मनो बुद्धिः क्षेत्रज्ञे युज्यते सदा ३
महदश्वसमायुक्तं बुद्धिसयमनं रथम् ।
समारुह्य स भूतात्मा समन्तात्परिधावति ४
इन्द्रियग्रामसंयुक्तो मनःसारथिरेव च ।
बुद्धिसंयमनो नित्यं महान्ब्रह्ममयो रथः ॥ ५
एवं यो वेत्ति विद्वान्वै सदा ब्रह्ममयं रथम् ।
स धीरः सर्वभूतेषु न मोहमधिगच्छति ॥ ६
अव्यक्तादि विशेषान्तं सह स्थावरजङ्गमम् ।
सूर्यचन्द्रप्रभालोकं ग्रहनक्षत्रमण्डितम् ॥ ७
नदीपर्वतजालैश्च सर्वतः परिभूषितम् ।
विविधाभिस्तथा चाद्भिः सततं समलंकृतम्
आर्जावं सर्वभूतानां सर्वप्राणभृतां गतिः ।
एतद्ब्रह्मवनं नित्यं तस्मिंश्चरति क्षेत्रवित् ॥ ९
लोकेऽस्मिन्यानि सत्त्वानि
त्रसानि स्थावराणि च ।
तान्येवाग्रे प्रलीयन्ते
पश्चाद्भूतकृता गुणाः ।
गुणेभ्यः पञ्चभूतानि
एष भूतसमुच्छ्रयः ॥ १०
देवा मनुष्या गन्धर्वाः
पिशाचासुरराक्षसाः ।
सर्वे स्वभावतः सृष्टा
न क्रियाभ्यो न कारणात् ॥ ११
एते विश्वसृजो विप्रा
जायन्तीह पुनः पुनः ।
तेभ्यः प्रसूतास्तेष्वेव
महाभूतेषु पञ्चसु ।
प्रलीयन्ते यथाकाल-
मूर्मयः सागरे यथा ॥ १२
विश्वसृग्भ्यस्तु भूतेभ्यो
महाभूतास्तु सर्वशः ।
भूतेभ्यश्चापि पञ्चभ्यो
मुक्तो गच्छेत्परां गतिम् ॥ १३
प्रजापतिरिदं सर्वं मनसैवासृजत्प्रभुः ।
तथैव देवानृषयस्तपसा प्रतिपेदिरे ॥ १४
तपसश्चानुपूर्व्येण फलमूलाशिनस्तथा ।
त्रैलोक्यं तपसा सिद्धाः पश्यंतीह समाहिताः
औषध्यन्नगदादीनि नानाविद्याश्च सर्वशः ।
तपसैव प्रसिद्ध्यन्ति तपोमूलं हि साधनम् १६
यद्दुरापं दुरान्नायं दुराधर्षं दुरन्वयम् ।
तत्सर्वं तपसा साध्यं 'तपो हि दुरतिक्रमम्' ॥
सुरापो ब्रह्महा स्तेयी भ्रूणहा गुरुतल्पगः ।
तपसैव सुतप्तेन मुच्यते किल्बिषात्ततः ॥ १८

मनस ऐश्वर्य योगैकगम्यमिति तदधिगमार्थं योगमाह—**इन्द्रियाणीति** । मन कर्तृ युंक्ते प्रयुंक्ते । आत्मेन्द्रियमनोयुक्तं भोक्तेति श्रुतिं व्याचष्टे—**इन्द्रियाणीति** । आत्मपदस्य प्रतिपदं बुद्धिपद भोक्तेत्यस्य प्रतिपदं क्षेत्रज्ञ इति ॥ ३ ॥ महान्त इन्द्रियाश्वास्तै समायुक्त, बुद्धया सारथिभूतया सयमन निग्रहो यस्य तं, रथं ब्रह्ममयं कारणविकारभूतं शरीररथम् । भूतात्मा देहाभिमानी,सर्वत सुखलिप्सुर्धावति ॥ ४ ॥ अयमेव रथ इन्द्रियग्रामेण वशीकृतेन संयुक्त सम्यक् समाहित । मनसा च सारथिना सयुक्त बुद्धिसयमन बुद्धिप्रतोदश्चेन्महान् भवति । बहिर्मुखानीन्द्रियबुद्धिमनासि आत्मनो जीवत्वमापादयन्ति अन्तर्मुखानि त्वस्य ब्रह्ममयत्वं आविष्कुर्वन्तीत्यर्थ ॥ ५ ॥ एव निग्राह्यत्वेन यो वेत्ति वेद धीरो ध्यानशील ॥ ६ ॥ अव्यक्तादात्मके ब्रह्मवनेऽस्मिन् चेतन संचरतीत्याह-**अव्यक्तेति त्रिभिः** ॥७ ॥ अस्मिँल्लोके आत्मलोके अग्रे निमेषमात्रेण स्थावरादिकं बाह्यं सर्वं लीयते । नेत्रानिमीलनमात्रेण भूतानि प्रलीयन्ते दृष्टिसृष्ट्यधिकारादित्यर्थ । तदनन्तरं भूतकृता गुणा शब्दादयो लीयन्ते नेत्रवत् श्रोत्रादीनामपि गुरूक्तयुक्त्या निमीलने कृते सतीत्यर्थ । गुणेभ्य लीनेभ्योऽनन्तरं पञ्चभूतानि सूक्ष्मदेह रभकाणि प्रलीयन्ते स्थूलानां प्रत्याहारेणैव सहत्वात । एष देहद्वयरूपो भूतसमुच्छ्रय इति पञ्चभूतानीत्यस्य व्याख्या भूताना लये तु निर्विशेषाचिन्मात्रेणैव रूपेणावतिष्ठत इत्यर्थ । सार्धश्लोक ॥ १० ॥ देवादय स्वाप्रदेवादिवत्स्वभावत एव उत्पन्ना न यज्ञादिना नापि ब्रह्मादिनेत्याह—**देवा इति** ॥ ११ ॥ विश्वसृजो मरीच्यादयोपि भौतिकत्वाद्भूतलये लयिन्त इत्याह—**एत इति सार्धेन** ॥ १२ ॥ विश्वसृभ्य स्थूलभूतेभ्य परे महाभूता सूक्ष्मभूतानि तेभ्योऽपि परा गतिं मुक्तो गच्छेत् । पाठान्तरे भूताना यो विश्वसृक् विराट् स स्वोपादानभूतानि महाभूतानि प्रति गच्छतीति स एवार्थ ॥ १३ ॥

मनसश्चेन्द्रियाणा च ऐकाग्र्यं परमं तप ।
इत्युक्तलक्षणतपोबलेन सर्वं मनसैव सृज्यत इत्याह—**प्रजापतिरित्यादिना** ॥ १४ ॥ तपस सकल्पस्य आनुपूर्व्येण क्रमेण समाहिता समाधियुक्ता ॥ १५ ॥ दुरापं इन्द्रपदादि दुरान्नायं वेदादि दुराधर्षं वह्वयादि दुरन्वयं असमाधेयं महाप्रलयादि ॥ १७ ॥

मनुष्याः पितरो देवाः
पशवो मृगपक्षिणः ।
यानि चान्यानि भूतानि
त्रसानि स्थावराणि च ॥ १९
तपःपरायणा नित्यं सिद्ध्यन्ते तपसा सदा ।
तथैव तपसा देवा महामाया दिवं गताः २०
आशीर्युक्तानि कर्माणि कुर्वते ये त्वतन्द्रिताः।
अहङ्कारसमायुक्तास्ते सकाशे प्रजापतेः॥ २१
ध्यानयोगेन शुद्धेन निर्ममा निरहंकृताः ।
आप्नुवन्ति महात्मानो महान्तं लोकमुत्तमम्
ध्यानयोगमुपागम्य प्रसन्नमतयः सदा ।
सुखोपचयमव्यक्तं प्रविशन्त्यात्मवित्तमाः॥२३
ध्यानयोगादुपागम्य निर्ममा निरहङ्कृताः ।
अव्यक्तं प्रविशन्तीह महतां लोकमुत्तमम् २४
अव्यक्तादेव सम्भूतः
समसंज्ञां गतः पुनः ।
तमोरजोभ्यां निर्मुक्तः
सत्त्वमास्थाय केवलम् ॥ २५
निर्मुक्तः सर्वपापेभ्यः सर्वं सृजति निष्कलम्
क्षेत्रज्ञ इति तं विद्याद्यस्तं वेद स वेदवित् २६
चित्तं चित्तादुपागम्य मुनिरासीत संयतः ।
यच्चित्तं तन्मयो वश्यं गुह्यमेतत्सनातनम्॥२७
अव्यक्तादिविशेषान्तमविद्यालक्षणं स्मृतम् ।
निबोधत तथा ह्येदं गुणैर्लक्षणमित्युत ॥ २८
द्व्यक्षरस्तु भवेन्मृत्युस्त्र्यक्षरं ब्रह्म शाश्वतम् ।
ममेति च भवेन्मृत्युर्न ममेति च शाश्वतम् २९
कर्म केचित्प्रशंसन्ति मन्दबुद्धिरता नराः ।
ये तु वृद्धा महात्मानो न प्रशंसन्ति कर्म ते ॥
कर्मणा जायते जन्तुर्मूर्तिमान्षोडशात्मकः ।
पुरुषं ग्रसते विद्या तद्ब्राह्ममृताशिनाम् ॥ ३१
तस्मात्कर्मसु निःस्नेहा ये केचित्पारदर्शिनः ।
विद्यामयोऽयं पुरुषो न तु कर्ममयः स्मृतः॥३२
य एवममृतं नित्यमग्राह्यं शश्वदक्षरम्।
वश्यात्मानमसंश्लिष्टं यो वेद न मृतो भवेत ॥
अपूर्वमकृतं नित्यं य एनमविचारिणम् ।
य एव विन्देदात्मानमग्राह्यमसृताशनम् ।
अग्राह्योऽमृतो भवति स एभिः कारणैर्ध्रुवः ॥
आयोज्य सर्वसंस्कारान्संयम्यात्मानमात्मनि
स तद्ब्रह्म शुभं वेत्ति यस्माद्भूयो न विद्यते ३५
प्रसादे चैव सत्त्वस्य प्रसाद समवाप्नुयात् ।
लक्षणं हि प्रसादस्य यथा स्यात्स्वप्नदर्शनम् ॥
गतिरेषा तु मुक्तानां ये ज्ञानपरिनिष्ठिताः ।
प्रवृत्तयश्च याः सर्वाः पश्यन्ति परिणामजाः
एषा गतिर्विरक्तानामेष धर्मः सनातनः ।
एषा ज्ञानवतां प्राप्तिरेतद्वृत्तमनिन्दितम् ॥ ३८

सुखोपचयं लौकिकाना सुखाना उपचयो वृद्धिर्यस्मात्तं सुखोपचय अखण्डमानन्दं एतस्यैवानदस्यान्यानि भूतानि मात्रामुपजीवन्तीति श्रुतिप्रसिद्धम् ॥ २३ ॥ उपागम्य परावृत्य पूर्णं ध्यानयोगमप्राप्य ये म्रियन्ते ते प्रकृतिलीना भवन्तीति ॥ २४ ॥ समसंज्ञा गत स्वयमव्यक्तत्वं प्राप्त इत्यर्थ ॥ २५ ॥ य कारणत्वं प्राप्त सर्वं सृजति तमेव निष्कलं क्षेत्रज्ञ ईश्वरमिति विद्यात् ॥ २६ ॥ चित्त सम्यग्ज्ञानं चिती सज्ञान इत्यस्माद्भावे निष्ठा । चित्तान्मनसा हेतुना उपागम्य प्राप्य सयत सतत आसीत ततश्च यच्चित्तस्तन्मयो भवति कीटकभृगन्यायेन यद्रूपं भावयति तदेवायं भवतीत्यर्थ (मन इति पाठे यच्चित्त तदेव ईश्वरस्तद्भाव्यं दातु समर्थ इत्यर्थ) ॥२७॥ तत्र हानार्थमाह–**अव्यक्तादीति** । यत्किंचिन्मदीयत्वेन कल्पितं तत्सर्वमविद्या अतो निष्कलमात्मानमेव ध्यायेदित्यर्थ ॥२८॥ षोडशात्मक पञ्चमहाभूतानि एकादशविकाराश्च तदात्मक तमेव षोडशात्मकं पुरुषं विद्या ग्रसते तदेव च ग्राह्य उपादेय अमृतं देवतादिशेषं अश्नन्ति तेऽमृताशिनस्तेषा आशिताशितमिति पाठे तृप्तानामपि तृप्तिकरम् ॥ ३१ ॥ शश्वदक्षरं सर्वदा अपचयहीन वश्यात्मा जितचित्त असश्लिष्टं असंगम् ॥३३॥ अपूर्व मानान्तरानवगतं अकृतं अकृत्रिम अविचारिण कूटस्थ अपराजितमिति पाठान्तरे स्पष्टोऽर्थ । अमृताशनं ईश्वरग्रासस्तुरीय इति श्रुते ईश्वरस्यापि संहर्तारं एभिर्वक्ष्यमाणै । सार्ध ॥ ३४ ॥ चेतस संस्कारा मैत्र्यादयस्तान् आयोज्य दृढान् कृत्वा आत्मानं चित्तं आत्मनि हृदयपुंडरीके संयम्य निरुध्य ॥ ३५ ॥ प्रसादे नैर्मल्ये प्रसादं शान्तिं चित्तप्रसादस्य लक्षणं तु यथा स्वप्ने देहासगेनावस्थानमस्ति तथा यदा योगयुक्त्या चित्तं बहि संज्ञाशून्यमन्त प्रचारि भवति तदेव प्रसादचिह्नम् ॥ ३६ ॥ एषा प्रसादरूपा गतिर्मार्ग प्रवर्तन्ते ता प्रवृत्तयं त्रैकालिका पदार्थास्तान्परिणामजान् अतीताननागताश्चात्र पश्यन्ति योगिन ॥ ३७ ॥

समेन सर्वभूतेषु निःस्पृहेण निराशिषा ।
शक्या गतिरियं गन्तुं सर्वत्र समदर्शिना ३९
एतद्वः सर्वमाख्यातं मया विप्रर्षिसत्तमाः ।
एवमाचरत क्षिप्रं ततः सिद्धिमवाप्स्यथ ४०

गुरुरुवाच ।

इत्युक्तास्ते तु मुनयो गुरुणा ब्रह्मणा तथा ।
कृतवन्तो महात्मानस्ततो लोकमवाप्नुवन् ४१
त्वमप्येतन्महाभाग मयोक्तं ब्रह्मणो वचः ।
सम्यगाचर शुद्धात्मंस्ततः सिद्धिमवाप्स्यसि॥

वासुदेव उवाच ।

इत्युक्तः स तदा शिष्यो गुरुणा धर्ममुत्तमम्
चकार सर्वं कौन्तेय ततो मोक्षमवाप्तवान् ॥
कृतकृत्यश्च स तदा शिष्यः कुरुकुलोद्वह ।
तत्पदं समनुप्राप्तो यत्र गत्वा न शोचति ॥४४

अर्जुन उवाच ।

को न्वसौ ब्राह्मणः कृष्ण कश्च शिष्यो जनार्दन
श्रोतव्य चेन्मयैतद्वै तत्त्वमाचक्ष्व मे विभो ४५

वासुदेव उवाच ।

अहं गुरुर्महाबाहो मनः शिष्यं च विद्धि मे।
त्वत्प्रीत्या गुह्यमेतच्च कथितं ते धनञ्जय ॥ ४६
मयि चदेस्ति ते प्रीतिर्नित्यं कुरुकुलोद्वह ।
अध्यात्ममेतच्छ्रुत्वा त्वं सम्यगाचर सुव्रत४७
ततस्त्वं सम्यगाचीर्णे धर्मेऽस्मिन्नरिकर्षण ।
सर्वपापविनिर्मुक्तो मोक्ष प्राप्स्यसि केवलम्
पूर्वमप्येतदेवोक्तं युद्धकाल उपस्थिते ।
मया तव महाबाहो तस्मादत्र मनः कुरु ॥ ४९
मया तु भरतश्रेष्ठ चिरदृष्टः पिता प्रभुः ।
तमहं द्रष्टुमिच्छामि संमते तव फाल्गुन ॥५०

वैशम्पायन उवाच ।

इत्युक्तवचनं कृष्णं प्रत्युवाच धनञ्जयः ।
गच्छावो नगर कृष्ण गजसाह्वयमद्य वै ॥ ५१
समेत्य तत्र राजानं धर्मात्मानं युधिष्ठिरम् ।
समनुज्ञाप्य राजानं स्वां पुरी यातुमर्हसि ५२

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि गुरुशिष्यसंवादे एकपञ्चाशत्तमोऽध्यायः ॥ ५१ ॥

गुरुशिष्यसंवादः समाप्तः ।

५२

वैशम्पायन उवाच ।

ततोऽभ्यनोदयत्कृष्णो युज्यतामिति दारुकम्
मुहूर्तादिव चाचष्ट युक्तमित्येव दारुकः॥ १
तथैव चानुयात्रादि चोदयामास पाण्डवः ।
सज्जयध्वं प्रयास्यामो नगरं गजसाह्वयम् २
इत्युक्ताः सैनिकास्ते तु सज्जीभूता विशाम्पते।
आचख्युः सज्जमित्येवं पार्थायामिततेजसे ३
ततस्तौ रथमास्थाय प्रयातौ कृष्णपाण्डवौ ।
विकुर्वाणौ कथाश्चित्राः प्रीयमाणौ विशाम्पते
रथस्थं तु महातेजा वासुदेवं धनञ्जयः ।
पुनरेवाब्रवीद्वाक्यमिदं भरतसत्तम ॥ ५
त्वत्प्रसादाज्जयः प्राप्तो राज्ञा वृष्णिकुलोद्वह ।
नियताः शत्रवश्चापि प्राप्तं राज्यमकण्टकम् ६
नाथवन्तश्च भवता पाण्डवा मधुसूदन ।
भवन्तं प्लवमासाद्य तीर्णाः स्म कुरुसागरम्
विश्वकर्मन्नमस्तेऽस्तु विश्वात्मन्विश्वसत्तम ।
तथा त्वामभिजानामि यथा चाहं भवान्मतः८

अहमिति । अह क्षेत्रज्ञो गुरु मनोमदीयं मया बोधनीय एतेन आत्मनो गुरुरात्मैवेत्युक्तं भवति ॥ ४६ ॥ सम्यगाचर यमनियमादिनिष्ठो भव॥४७॥ केवलमिति क्रममुक्तिव्यावृत्ति ॥ ४८ ॥ प्रागुक्तं स्मारयति अस्य च तस्य च एकवाक्यता कारयितुम्—**पूर्वमिति** ॥ ४९ ॥ कथामनुसंधत्ते—**मया त्विति**त्यादिना ॥ ५० ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे एकपञ्चाशत्तमोऽध्याय ॥ ५१ ॥

५२

तत इति । रथ इति रथमिति चार्धद्वयेपि शेषः ॥ १ ॥ विश्वकर्मन्नित्यादिना स्वबोधमाविष्करोति ॥ ८ ॥

त्वत्तेजःसम्भवो नित्यं भूतात्मा मधुसूदन।
रतिः क्रीडामयी तुभ्यं माया ते रोदसी विभो
त्वयि सर्वमिदं विश्वं यदिदं स्थाणु जङ्गमम्।
त्वं हि सर्वं विकुरुषे भूतग्रामं चतुर्विधम् १०
पृथिवीं चान्तरिक्षं च द्यां चैव मधुसूदन।
हसितं तेऽमला ज्योत्स्ना ऋतवश्चेन्द्रियाणि ते
प्राणो वायुः सततगः क्रोधो मृत्युः सनातनः
प्रसादे चापि पद्मा श्रीर्नित्यं त्वयि महामते॥
रतिस्तुष्टिर्धृतिः क्षान्तिर्मतिः कान्तिश्चराचरं
त्वमेवेह युगान्तेषु निधनं प्रोच्यसेऽनघ ॥ १३
स्तुतीर्घेणापि कालेन न ते शक्या गुणा मया।
आत्मा च परमात्मा च नमस्ते नलिनेक्षण ॥
विदितो मे सुदुर्धर्ष नारदादेवलात्तथा।
कृष्णद्वैपायनाच्चैव तथा कुरुपितामहात् ॥ १५
त्वयि सर्वं समासक्तं त्वमेवैको जनेश्वरः।
यच्चानुग्रहसंयुक्तमेतदुक्तं त्वयाऽनघ ॥ १६
एतत्सर्वमहं सम्यगाचरिष्ये जनार्दन।
इदं चाद्भुतमत्यन्तं कृतमस्मित्प्रयेप्सया ॥ १७
यत्पापो निहतः संख्ये कौरव्यो धृतराष्ट्रजः।
त्वया दग्धं हि तत्सैन्यं मया विजितमाहवे
भवता तत्कृतं कर्म येनावाप्तो जयो मया।
दुर्योधनस्य संग्रामे तव बुद्धिपराक्रमैः ॥ १९
कर्णस्य च वधोपायो यथावत्सम्प्रदर्शितः।
सैन्धवस्य च पापस्य भूरिश्रवस एव च २०
अहं च प्रीयमाणेन त्वया देवकिनन्दन।
यदुक्तस्तत्करिष्यामि न हि मेऽत्र विचारणा॥
राजानं च समासाद्य धर्मात्मानं युधिष्ठिरम्
चोदयिष्यामि धर्मज्ञ गमनार्थं तवानघ ॥ २२
रुचितं हि ममैतत्ते द्वारकागमनं प्रभो।
अचिरादेव द्रष्टा त्वं मातुलं मे जनार्दन ॥ २३
बलदेवं च दुर्धर्षं तथाऽन्यान्वृष्णिपुङ्गवान्।
एवं सम्भाषमाणौ तौ प्राप्तौ वारणसाह्वयम्
तथा विविशतुश्चोभौ सम्प्रहृष्टनराकुलम्।
तौ गत्वा धृतराष्ट्रस्य गृहं शक्रगृहोपमम् ॥ २५
ददृशाते महाराजं धृतराष्ट्रं जनेश्वरम्।
विदुरं च महाबुद्धिं राजानं च युधिष्ठिरम् ॥
भीमसेनं च दुर्धर्षं माद्रीपुत्रौ च पाण्डवौ।
धृतराष्ट्रमुपासीनं युयुत्सुं चापराजितम् ॥ २७
गान्धारीं च महाप्रज्ञां पृथां कृष्णां च भामिनीं
सुभद्राद्याश्च ताः सर्वा भरतानां स्त्रियस्तथा ॥
ददृशाते स्त्रियः सर्वा गान्धारीपरिचारिकाः
ततः समेत्य राजानं धृतराष्ट्रमरिन्दमौ ॥ २९
निवेद्य नामधेये स्वे तस्य पादावगृह्णताम्।
गान्धार्याश्च पृथायाश्च धर्मराजस्य चैव हि ॥
भीमस्य च महात्मानौ तथा पादावगृह्णताम्
क्षत्तारं चापि संगृह्य पृष्ट्वा कुशलमव्ययम् ३१
तैः सार्धं नृपतिं वृद्धं ततस्तौ पर्युपासताम्।
ततो निशि महाराजो धृतराष्ट्रः कुरूद्वहान् ३२
जनार्दनं च मेधावी व्यसर्जयत वै गृहान्।
तेऽनुज्ञाता नृपतिना ययुः स्वं स्वं निवेशनम् ॥
धनञ्जयगृहानेव ययौ कृष्णस्तु वीर्यवान्।
तत्रार्चितो यथान्यायं सर्वकामैरुपस्थितः ३४
कृष्णः सुष्वाप मेधावी धनञ्जयसहायवान्।
प्रभातायां तु शर्वर्यां कृत्वा पौर्वाह्णिकीं क्रियाम्
धर्मराजस्य भवनं जग्मतुः परमार्चितौ।
यत्रास्ते स महामात्यो धर्मराजो महाबलः ३६
तौ प्रविश्य महात्मानौ तद्गृहं परमार्चितम्।
धर्मराजं ददृशतुर्देवराजमिवाश्विनौ ॥ ३७
समासाद्य तु राजानं वार्ष्णेयकुरुपुङ्गवौ।
निषेदतुरनुज्ञातौ प्रीयमाणेन तेन तौ ॥ ३८
ततः स राजा मेधावी विवक्षू प्रेक्ष्य तावुभौ।
प्रोवाच वदतां श्रेष्ठो वचनं राजसत्तमः ॥ ३९

युधिष्ठिर उवाच।

विवक्षू हि युवां मन्ये वीरौ यदुकुरूद्वहौ।
ब्रूत कर्तास्मि सर्वं वां न चिरान्मा विचार्यतां
इत्युक्तः फाल्गुनस्तत्र धर्मराजानमब्रवीत्।
विनीतवदुपागम्य वाक्यं वाक्यविशारदः ४१
अयं चिरोषितो राजन् वासुदेवः प्रतापवान्।
भवन्तं समनुज्ञाप्य पितरं द्रष्टुमिच्छति ॥ ४२
स गच्छेदभ्यनुज्ञातो भवता यदि मन्यसे।
आनर्तनगरीं वीरस्तदनुज्ञातुमर्हसि ॥ ४३

युधिष्ठिर उवाच।

पुण्डरीकाक्ष भद्रं ते गच्छ त्वं मधुसूदन।
पुरीं द्वारवतीमद्य द्रष्टुं शूरसुतं प्रभो ॥ ४४
रोचते मे महाबाहो गमनं तव केशव।
मातुलश्चिरदृष्टो मे त्वया देवी च देवकी ४५

रतिः रमणं क्रीडामयी सर्गस्थित्यन्तलीलारूपा तुभ्यं तव रोदसी द्यावापृथिवी ते तव माया ॥ ९ ॥ अनुग्रहः एतत्सम्यगाचरेत्याज्ञारूपः ॥ १६ ॥ दृष्टोपकारमप्यभिनन्दति इदं चेति ॥ १७ ॥

समेत्य मातुलं गत्वा बलदेवं च मानद ।
पूजयेथा महाप्राज्ञ मद्वाक्येन यथार्हतः ॥ ४६
स्मरेथाश्चापि मां नित्यं भीमं च बलिनां वरम्
फाल्गुनं सहदेवं च नकुलं चैव मानद ॥ ४७
आमन्त्रयावलोक्य त्वं पितरं च महाभुज ।
वृष्णींश्च पुनरागच्छेर्हयमेधे ममानघ ॥ ४८
स गच्छ रत्नान्यादाय विविधानि वसूनि च ।
यच्चाप्यन्यन्मनोज्ञं ते तदप्यादत्स्व सात्वत ॥
इयं च वसुधा कृत्स्ना प्रसादात्तव केशव ।
अस्मानुपगता वीर निहताश्चापि शत्रवः ॥ ५०
एवं ब्रुवति कौरव्ये धर्मराजे युधिष्ठिरे ।
वासुदेवो वरः पुंसामिदं वचनमब्रवीत् ॥ ५१
तवैव रत्नानि धनं च केवलं
धरा तु कृत्स्ना तु महाभुजाद्य वै ।
यदस्ति चान्यद्द्रविणं गृहे मम
त्वमेव तस्येश्वर नित्यमीश्वरः ॥ ५२
तथेत्यथोक्तः प्रतिपूजितस्तदा
गदाग्रजो धर्मसुतेन वीर्यवान् ।
पितृष्वसारं त्ववदद्यथाविधि
संपूजितश्चाप्यगमत्प्रदक्षिणम् ॥ ५३
तथा स सम्यक् प्रतिनन्दितस्तत-
स्तथैव सर्वैर्विदुरादिभिस्तथा ।
विनिर्ययौ नागपुराद्गदाग्रजो
रथेन दिव्येन चतुर्भुजः स्वयम् ॥ ५४
रथे सुभद्रामधिरोप्य भामिनीं
युधिष्ठिरस्यानुमते जनार्दनः ।
पितृष्वसुश्चापि तथा महाभुजो
विनिर्ययौ पौरजनाभिसंवृतः ॥ ५५
तमन्वयाद्वानरवर्यकेतनः
स सात्यकिर्माद्रवतीसुतावपि ।
अगाधबुद्धिर्विदुरश्च माधवं
स्वयं च भीमो गजराजविक्रमः ॥ ५६
निवर्तयित्वा कुरुराष्ट्रवर्धनां-
स्ततः स सर्वान्विदुरं च वीर्यवान् ।
जनार्दनो दारुकमाह सत्वरः
प्रचोदयाश्वानिति सात्यकिं तथा ५७
ततो ययौ शत्रुगणप्रमर्दनः
शिनिप्रवीरानुगतो जनार्दनः ।
यथा निहत्यारिगणं शतक्रतु-
र्दिवं तथाऽऽनर्तपुरीं प्रतापवान् ॥ ५८

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि कृष्णप्रयाणे द्विपञ्चाशत्तमोऽध्यायः ॥ ५२ ॥



५३

वैशम्पायन उवाच ।
तथा प्रयान्तं वार्ष्णेयं द्वारकां भरतर्षभाः ।
परिष्वज्य न्यवर्तन्त सानुयात्राः परंतपाः ॥ १
पुनः पुनश्च वार्ष्णेयं पर्यष्वजत फाल्गुनः ।
आ चक्षुर्विषयाच्चैनं स ददर्श पुनः पुनः ॥ २
कृच्छ्रेणैव तु तां पार्थो गोविन्दे विनिवेशितां
सञ्जहार ततो दृष्टिं कृष्णश्चाप्यपराजितः ॥ ३
तस्य प्रयाणे यान्यासन्निमित्तानि महात्मनः
बह्वन्यद्भुतरूपाणि तानि मे गदतः शृणु ॥ ४
वायुर्वेगेन महता रथस्य पुरतो ववौ ।
कुर्वन्निःशर्करं मार्गं विरजस्कमकण्टकम् ॥ ५
ववर्ष वासवश्चैव तोयं शुचि सुगन्धि च ।
दिव्यानि चैव पुष्पाणि पुरतः शार्ङ्गधन्वनः
स प्रयातो महाबाहुः समेषु मरुधन्वसु ।
ददर्शाथ मुनिश्रेष्ठमुत्तङ्कममितौजसम् ॥ ७
स तं सम्पूज्य तेजस्वी मुनिं पृथुललोचनः ।
पूजितस्तेन च तदा पर्यपृच्छदनामयम् ॥ ८

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे द्विपञ्चाशत्तमोऽध्याय ॥ ५२ ॥

५३

तथा प्रयान्तं वार्ष्णेयमित्यादिग्रन्थः पूर्वोक्ता-सूपनिषत्सु विद्याफलं विश्वरूपदर्शन विद्यासाधनं गुरोराराधनं चेति द्वयमिहोक्तं विवरीतुं उत्तंकोपाख्यानव्याजेन प्रवर्तते तत उपरिष्टादश्वमेधव्याजेन कर्मणामप्यारादुपकारकत्वं विद्यायामुच्यत इति संगति ॥ १ ॥

स पृष्टः कुशलं तेन संपूज्य मधुसूदनम् ।
उत्तङ्को ब्राह्मणश्रेष्ठस्ततः पप्रच्छ माधवम् ॥ ९
कच्चिच्छौरे त्वया गत्वा कुरुपाण्डवसद्म तत्
कृतं सौभ्रात्रमचलं तन्मे व्याख्यातुमर्हसि १०
अपि सन्धाय तान्वीरानुपावृत्तोऽसि केशव
सम्बन्धिनः स्वदयितान्सततं वृष्णिपुङ्गव ११
कच्चित्पाण्डुसुताः पञ्च धृतराष्ट्रस्य चात्मजाः
लोकेषु विहरिष्यन्ति त्वया सह परंतप १२
स्वराष्ट्रे ते च राजानः
कच्चित्प्राप्स्यन्ति वै सुखम् ।
कौरवेषु प्रशान्तेषु
त्वया नाथेन केशव ॥ १३
या मे सम्भावना तात त्वयि नित्यमवर्तत ।
अपि सा सफला तात कृता ते भरतान्प्रति

श्रीभगवानुवाच ।

कृतो यत्नो मया पूर्वं सौशाम्ये कौरवान्प्रति
नाशकयन्त यदा साम्ये ते स्थापयितुमञ्जसा ॥
ततस्ते निधनं प्राप्ताः सर्वे ससुतबान्धवाः ।
न दिष्टमप्यतिक्रान्तुं शक्यं बुद्ध्या बलेन वा ॥
महर्षे विदितं भूयः सर्वमेतत्तवानघ ।
तेऽत्यक्रामन्मतिं मह्यं भीष्मस्य विदुरस्य च
ततो यमक्षयं जग्मुः समासाद्येतरेतरम् ।
पञ्चैव पाण्डवाः शिष्टा हतामित्रा हतात्मजाः
धार्तराष्ट्राश्च निहताः सर्वे ससुतबान्धवाः ।
इत्युक्तवचने कृष्णे भृशं क्रोधसमन्वितः ।
उत्तङ्क इत्युवाचैनं रोषादुत्फुल्ललोचनः ॥ १९

उत्तङ्क उवाच ।

यस्माच्छक्तेन ते कृष्ण न त्राताः कुरुपुङ्गवाः
सम्बन्धिनः प्रियास्तस्माच्छप्स्येहं त्वामसंशयं
न च ते प्रसभं यस्मात्ते निगृह्य निवारिताः ।
तस्मान्मन्युपरीतस्त्वां शप्स्यामि मधुसूदन ॥
त्वया शक्तेन हि सता मिथ्याचारेण माधव
ते परीताः कुरुश्रेष्ठा नश्यन्तः समुपेक्षिताः॥

वासुदेव उवाच ।

शृणु मे विस्तरेणेदं यद्वृक्ष्ये भृगुनन्दन ।
गृहाणानुनयं चापि तपस्वी ह्यसि भार्गव ॥२३
श्रुत्वा च मे तदध्यात्मं मुञ्चेथाः शापमद्य वै ।
न च मां तपसाऽल्पेन शक्तोऽभिभवितुं पुमान्
न च ते तपसो नाशमिच्छामि तपतां वर ।
तपस्ते सुमहद्दीप्तं गुरवश्चापि तोषिताः ॥ २५
कौमारं ब्रह्मचर्यं ते जानामि द्विजसत्तम ।
दुःखार्जितस्य तपसस्तस्माच्चेच्छामि ते व्ययम्

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि उत्तङ्कोपाख्याने कृष्णोत्तङ्कसमागमे त्रिपञ्चाशत्तमोऽध्यायः ॥ ५३ ॥

५४

उत्तङ्क उवाच ।

ब्रूहि केशव तत्त्वेन त्वमध्यात्ममनिन्दितम् ।
श्रुत्वा श्रेयोभिधास्यामि शापं वा ते जनार्दन

वासुदेव उवाच ।

तमो रजश्च सत्त्वं च विद्धि भावान्मदाश्रयान्
तथा रुद्रान्वसून्वापि विद्धि मत्प्रभवान् द्विज
मयि सर्वाणि भूतानि सर्वभूतेषु चाप्यहम् ।
स्थित इत्यभिजानीहि मा तेऽभूदत्र संशयः॥३
तथा दैत्यगणान्सर्वान्यक्षगन्धर्वराक्षसान् ।
नागानप्सरसश्चैव विद्धि मत्प्रभवान्द्विज ॥ ४
सदसच्चैव यत्प्राहुरव्यक्तं व्यक्तमेव च ।
अक्षरं च क्षरं चैव सर्वमेतन्मदात्मकम् ॥ ५
ये चाश्रमेषु वै धर्माश्चतुर्धा विदिता मुने ।
वैदिकानि च सर्वाणि विद्धि सर्वं मदात्मकम्
असच्च सदसच्चैव यद्विश्वं सदसत्परम् ।
मत्तः परतरं नास्ति देवदेवात्सनातनात् ॥ ७

सौशाम्ये सौरम्ये ॥ १५ ॥ मिथ्याचारेण कपटपूर्वकमविरोधच्छलेन विरोधं द्रढयता परीता परित प्राप्ता ॥ २२ ॥ अनुनयं शिक्षाम् ॥ २३ ॥ मे मत्त ॥ २४ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे त्रिपञ्चाशतमोऽध्याय ॥ ५३ ॥

५४

ब्रूहीति ॥१॥ असत् शशशृंगादि सदसत् घटादि सदसत्परं अव्यक्तं एतत्त्रयमपि तत्त्वत मत परं नास्तीत्यर्थ ॥७

ओङ्कारप्रमुखान्वेदान्विद्धि मां त्वं भृगूद्वह ।
यूपं सोमं चरुं होमं त्रिदशाप्यायनं मखे ॥ ८
होतारमपि हव्यं च विद्धि मां भृगुनन्दन ।
अध्वर्युः कल्पकश्चापि हविः परमसंस्कृतम् ९
उद्गाता चापि मां स्तौति गीतघोषैर्महाध्वरे ।
प्रायश्चित्तेषु मां ब्रह्मन् शान्तिमङ्गलवाचकाः
स्तुवन्ति विश्वकर्माणं सततं द्विजसत्तम ।
मम विद्धि सुतं धर्ममग्रजं द्विजसत्तम ॥ ११
मानसं दयितं विप्र सर्वभूतदयात्मकम् ।
तत्राहं वर्तमानैश्च निवृत्तैश्चैव मानवैः ॥ १२
बह्वीः संसरमाणो वै योनीर्वर्तामि सत्तम ।
धर्मसंरक्षणार्थाय धर्मसंस्थापनाय च ॥ १३
तैस्तैर्वेषैश्च रूपैश्च त्रिषु लोकेषु भार्गव ।
अहं विष्णुरहं ब्रह्मा शक्रोऽथ प्रभवाप्ययः १४
भूतग्रामस्य सर्वस्य स्रष्टा संहार एव च ।
अधर्मे वर्तमानानां सर्वेषामहमच्युतः ॥ १५
धर्मस्य सेतुं बध्नामि
चलिते चलिते युगे ।
तास्ता योनीः प्रविश्याहं
प्रजानां हितकाम्यया ॥ १६
यदा त्वहं देवयोनौ वर्तामि भृगुनन्दन ।
तदाऽहं देववत्सर्वमाचरामि न संशयः ॥ १७
यदा गन्धर्वयोनौ वा वर्तामि भृगुनन्दन ।
तदा गन्धर्ववत्सर्वमाचरामि न संशयः ॥ १८
नागयोनौ यदा चैव तदा वर्तामि नागवत् ।
यक्षराक्षसयोन्योस्तु यथावद्विचराम्यहम् १९
मानुष्ये वर्तमाने तु कृपणं याचिता मया ।
न च ते जातसंमोहा वचोऽगृह्णन्त मोहिताः॥
भयं च महदुद्दिश्य त्रासिताः कुरवो मया ।
क्रुद्धेन भूत्वा तु पुनर्यथावदनुदर्शिताः ॥ २१
तेऽधर्मेणेह संयुक्ताः परीताः कालधर्मणा ।
धर्मेण निहता युद्धे गताः स्वर्गं न संशयः २२
लोकेषु पाण्डवाश्चैव
गताः ख्यातिं द्विजोत्तम ।
एतत्ते सर्वमाख्यातं
यन्मां त्वं परिपृच्छसि ॥ २३

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि उत्तङ्कोपाख्याने कृष्णवाक्ये चतुष्पञ्चाशत्तमोऽध्यायः ॥ ५४ ॥

५५

उत्तङ्क उवाच ।
अभिजानामि जगतः कर्तारं त्वां जनार्दन ।
नूनं भवत्प्रसादोऽयमिति मे नास्ति संशयः१
चित्तं च सुप्रसन्नं मे त्वद्भावगतमच्युत ।
विनिवृत्तं च मे शापादिति विद्धि परंतप ॥ २
यदि त्वनुग्रहं कंचित्त्वत्तोऽर्हामि जनार्दन ।
द्रष्टुमिच्छामि ते रूपमैश्वरं तन्निदर्शय ॥ ३
वैशम्पायन उवाच ।
ततः स तस्मै प्रीतात्मा दर्शयामास तद्वपुः ।
शाश्वतं वैष्णवं धीमान्दृष्ट्वा यद्धनञ्जयः ॥ ४
स ददर्श महात्मानं विश्वरूपं महाभुजम् ।
सहस्रसूर्यप्रतिमं दीप्तिमत्पावकोपमम् ॥ ५
सर्वमाकाशमावृत्य तिष्ठन्तं सर्वतोमुखम् ।
तद्दृष्ट्वा परमं रूपं विष्णोर्वैष्णवमद्भुतम् ।
विस्मयं च ययौ विप्रस्तं दृष्ट्वा परमेश्वरम् ॥ ६
उत्तङ्क उवाच ।
विश्वकर्मन्नमस्तेऽस्तु विश्वात्मन् विश्वसम्भव
पद्भ्यां ते पृथिवी व्याप्ता शिरसा चावृतं नभः
द्यावापृथिव्योर्यन्मध्यं जठरेण तवावृतम् ।
भुजाभ्यामावृताश्चाशास्त्वमिद सर्वमच्युत ८


अधर्मेणेति च्छेद ॥ २२ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे चतुष्पञ्चाशत्तमोऽध्याय ॥ ५४ ॥

५५

यद्भगवता स्वस्य विश्वरूपत्वमुक्तं तदेव द्रष्टुमिच्छन्नुत्तङ्क उवाच—अभिजानामीत्यादिना ॥ १ ॥

संहरस्व पुनर्देवरूपमक्षय्यमुत्तमम् ।
पुनस्त्वां स्वेन रूपेण द्रष्टुमिच्छामि शाश्वतम्॥
वैशम्पायन उवाच ।
तमुवाच प्रसन्नात्मा गोविन्दो जनमेजय ।
वरं वृणीष्वेति तदा तमुत्तङ्कोऽब्रवीदिदम् १०
पर्याप्त एष एवाद्य परस्त्वत्तो महाद्युते ।
यत्ते रूपमिदं कृष्ण पश्यामि पुरुषोत्तम ॥ ११
तमब्रवीत्पुनः कृष्णो मा त्वमत्र विचारय ।
अवश्यमेतत्कर्तव्यममोघं दर्शनं मम ॥ १२
उत्तङ्क उवाच ।
अवश्यं करणीयं च यद्येतन्मन्यसे विभो ।
तोयमिच्छामि यत्रेष्टं मरुष्वेतद्धि दुर्लभम् १३
ततः संहृत्य तत्तेजः प्रोवाचोत्तङ्कमीश्वरः ।
एष्टव्ये सति चिन्त्योहमित्युक्त्वा द्वारकां ययौ
ततः कदाचिद्भगवानुत्तङ्कस्तोयकाङ्क्षया ।
तृषितः परिचक्राम मरौ सस्मार चाच्युतम् ॥
ततो दिग्वाससं धीमान्मातङ्गं मलपङ्किनम् ।
अपश्यत मरौ तस्मिन् श्वयूथपरिवारितम् १६
भीषणं बद्धनिस्त्रिंशं बाणकार्मुकधारिणम् ।
तस्याधः स्रोतसोऽपश्यद्वारि भूरि द्विजोत्तमः
स्मरन्नेव च तं प्राह मातङ्गः प्रहसन्निव ।
एह्युत्तङ्क प्रतीच्छस्व मत्तो वारि भृगूद्वह १८
कृपा हि मे सुमहती त्वां दृष्ट्वा तृट्समाश्रितम्
इत्युक्तस्तेन स मुनिस्तत्तोयं नाभ्यनन्दत १९
चिक्षेप च स तं धीमान्वाग्भिरुग्राभिरच्युतम्।
पुनः पुनश्च मातङ्गः पिबस्वेति तमब्रवीत् २०
न चापिबत्स सक्रोधः क्षुभितेनान्तरात्मना
स तथा निश्चयात्तेन प्रत्याख्यातो महात्मना॥
श्वभिः सह महाराज तत्रैवान्तरधीयत ।
उत्तङ्कस्तं तथा दृष्ट्वा ततो व्रीडितमानसः ॥ २२
मेने प्रलब्धमात्मानं कृष्णेनामित्रघातिना ।
अथ तेनैव मार्गेण शङ्खचक्रगदाधरः ॥ २३
आजगाम महाबुद्धिरुत्तङ्कश्चैनमब्रवीत् ।
न युक्तं तादृशं दातुं त्वया पुरुषसत्तम ॥ २४
सलिलं विप्रमुख्येभ्यो मातङ्गस्रोतसा विभो
इत्युक्तवचनं तं तु महाबुद्धिर्जनार्दनः ॥ २५
उत्तङ्कं श्लक्ष्णया वाचा सांत्वयन्निदमब्रवीत्
यादृशेनेह रूपेण योग्यं दातुं धृतेन वै ॥ २६
तादृशं खलु ते दत्तं यच्च त्वं नाबबुध्यथाः ।
मया त्वदर्थमुक्तो वै वज्रपाणिः पुरन्दरः॥२७
उत्तङ्कायामृतं देहि तोयरूपमिति प्रभुः ।
स मामुवाच देवेन्द्रो न मर्त्योऽमर्त्यतां व्रजेत्
अन्यमस्मै वरं देहीत्यसकृद्भृगुनन्दन ।
अमृतं देयमित्येव मयोक्तः स शचीपतिः २९
स मां प्रसाद्य देवेन्द्रः पुनरेवेदमब्रवीत् ।
यदि देयमवश्यं वै मातङ्गोऽहं महामते ॥ ३०
भूत्वाऽमृत प्रदास्यामि भार्गवाय महात्मने ।
यद्येवं प्रतिगृह्णाति भार्गवोऽमृतमद्य वै ॥ ३१
प्रदातुमेष गच्छामि भार्गवस्यामृतं विभो ।
प्रत्याख्यातस्त्वहं तेन दास्यामि न कथञ्चन
स तथा समयं कृत्वा
तेन रूपेण वासवः ।
उपस्थितस्त्वया चापि
प्रत्याख्यातोऽमृतं ददत् ॥ ३३
चाण्डालरूपी भगवा-
न्सुमहास्ते व्यतिक्रमः ।
यत्तु शक्यं मया कर्तुं
भूय एव तवेप्सितम् ॥ ३०
तोयेप्सां तव दुर्धर्षां करिष्ये सफलामहम् ।
येष्वहःसु च ते ब्रह्मन्सलिलेप्सा भविष्यति ॥
तदा मरौ भविष्यन्ति जलपूर्णाः पयोधराः
रसवच्च प्रदास्यन्ति तोयं ते भृगुनन्दन ॥ ३६
उत्तङ्कमेघा इत्युक्ताः
ख्यातिं यास्यन्ति चापि ते ।
इत्युक्तः प्रीतिमान्विप्रः
कृष्णेन स बभूव ह ।
अद्याप्युत्तङ्कमेघाश्च
मरौ वर्षन्ति भारत ॥ ३७

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि उत्तङ्कोपाख्याने पञ्चपञ्चाशत्तमोऽध्यायः ॥ ५५ ॥



एष्टव्ये जलेऽपेक्षिते सति॥१४॥मातंगं चाडालविशेषम् १६॥ अथ पाददेशे स्रोतसो दृतेर्वारीति सम्बन्ध तस्य समीपे अथ स्रोतसो भोगवत्या इति वा ॥ १७ ॥ चिक्षेप निन्दितवान् अच्युतं वरप्रद कृष्णम् ॥ २० ॥ प्रलब्धं वञ्चितम् ॥ २३ ॥

५६

जनमेजय उवाच ।
उत्तङ्कः केन तपसा संयुक्तो वै महामनाः ।
यः शापं दातुकामोऽभूद्विष्णवे प्रभविष्णवे १
वैशम्पायन उवाच ।
उत्तङ्को महता युक्तस्तपसा जनमेजय ।
गुरुभक्त स तेजस्वी नान्यत्किञ्चिदपूजयत् २
सर्वेषामृषिपुत्राणामेष आसीन्मनोरथः ।
औत्तङ्कीं गुरुवृत्तिं वै प्राप्नुयामेति भारत ।
गौतमस्य तु शिष्याणां बहूनां जनमेजय ॥ ३
उत्तङ्कोऽभ्यधिका प्रीतिः स्नेहश्चैवाभवत्तदा ।
स तस्य दमशौचाभ्यां विक्रान्तेन च कर्मणा
सम्यक्चैवोपचारेण गौतमः प्रीतिमानभूत् ।
अथ शिष्यसहस्राणि समनुज्ञातवानृषिः ॥ ५
उत्तङ्कं परया प्रीत्या नाभ्यनुज्ञातुमैच्छत ।
तं क्रमेण जरा तात प्रतिपेदे महामुनिम् ॥ ६
न चाभ्यबुध्यत तदा स मुनिर्गुरुवत्सलः ।
ततः कदाचिद्राजेन्द्र काष्ठान्यानयितुं ययौ ७
उत्तङ्कः काष्ठभारं च महान्तं समुपानयत् ।
स तद्भाराभिभूतात्मा काष्ठभारमरिन्दम ॥ ८
निचिक्षेप क्षितौ राजन्परिश्रान्तो बुभुक्षितः ।
तस्य काष्ठे विलग्नाऽभूज्जटारूप्यसमप्रभा ॥ ९
ततः काष्ठैः सह तदा पपात धरणीतले ।
ततः स भारनिष्पिष्टः क्षुधाविष्टश्च भारत ॥
दृष्ट्वा तां वयसोपेतां रुरोदार्तस्वरस्तदा ।
ततो गुरुसुता तस्य पद्मपत्रनिभानना ॥ ११
जग्राहाश्रूणि सुश्रोणी करेण पृथुलोचना ।
पितुर्निर्योगाद्धर्मज्ञा शिरसाऽवनता तदा १२
तस्या निपेततुर्दग्धौ करौ तैरश्रुबिन्दुभिः ।
न हि तानश्रुपातांस्तु शक्ता धारयितुं मही १३
गौतमस्तमब्रवीद्विप्रमुत्तङ्कं प्रीतमानसः ।
कस्मात्तात तवाद्येह शोकोत्तरमिदं मनः ॥१४
स स्वैरं ब्रूहि विप्रर्षे श्रोतुमिच्छामि तत्त्वतः ।
उत्तङ्क उवाच ।
भवद्गतेन मनसा भवत्प्रियचिकीर्षया ।
भवद्भक्तिगतेनेह भवद्भावानुगेन च ॥ १५
जरेयं नावबुद्धा मे नाभिज्ञातं सुखं च मे ।
शतवर्षोषितं मां हि न त्वमभ्यनुजानिथाः १६
भवता त्वभ्यनुज्ञाताः शिष्याः प्रत्यवरा मम ।
उपपन्ना द्विजश्रेष्ठ शतशोऽथ सहस्रशः ॥ १७
गौतम उवाच ।
त्वत्प्रीतियुक्तेन मया गुरुशुश्रूषया तव ।
व्यतिक्रामन्महाकालो नावबुद्धो द्विजर्षभ १८
किं त्वद्य यदि ते श्रद्धा गमनं प्रति भार्गव ।
अनुज्ञां प्रतिगृह्य त्वं स्वगृहान्गच्छ मा चिरम्
उत्तङ्क उवाच ।
गुर्वर्थं कं प्रयच्छामि ब्रूहि त्वं द्विजसत्तम ।
तमुपाहृत्य गच्छेयमनुज्ञातस्त्वया विभो ॥२०
गौतम उवाच ।
दक्षिणा परितोषो वै गुरूणां सद्भिरुच्यते ।
तव ह्याचरतो ब्रह्मंस्तुष्टोऽहं वै न संशयः ॥२१
इत्थं च परितुष्टं मां विजानीहि भृगूद्वह ।
युवा षोडशवर्षो हि यद्यद्य भविता भवान् २२
ददानि पत्नीं कन्यां च स्वां ते दुहितरं द्विज
एतामृतेऽङ्गना नान्या त्वत्तेजोऽर्हति सेवितुम्
ततस्तां प्रतिजग्राह युवा भूत्वा यशस्विनीम्
गुरुणा चाभ्यनुज्ञातो गुरुपत्नीमथाब्रवीत् ॥ २४
क भवत्यै प्रयच्छामि गुर्वर्थं विनियुंक्ष्व माम् ।
प्रियं हितं च कांक्षामि प्राणैरपि धनैरपि २५
यदुर्लभं हि लोकेऽस्मिन् रत्नमत्यद्भुतं महत् ।
तदानयेयं तपसा न हि मेऽत्रास्ति संशयः
अहल्योवाच ।
परितुष्टास्मि ते विप्र नित्यं भक्त्या तवानघ
पर्याप्तमेतद्भद्रं ते गच्छ तात यथेप्सितम् ॥ २७
वैशम्पायन उवाच ।
उत्तङ्कस्तु महाराज पुनरेवाब्रवीद्वचः ।
आज्ञापयस्व मां मातः कर्तव्यं च तव प्रियम्
अहल्योवाच ।
सौदासपत्न्या विधृते दिव्ये ये मणिकुण्डले
ते समानय भद्रं ते गुर्वर्थः सुकृतो भवेत् ॥ २९

५६
उत्तङ्क इति ॥ १ ॥ निचिक्षेपेत्यत्र निष्पिपेषेति पाठोऽपि स एवार्थ ॥ ९ ॥ निष्पिष्ट चूर्णीभूत इव ॥१०॥ अभ्यनुजानीथा अभ्यनुजानिथा अभ्यनुज्ञातवानसि अङ भावो ह्रस्वत्वं चार्षम् ॥ १६ ॥

स तथेति प्रतिश्रुत्य जगाम जनमेजय ।
गुरुपत्नीप्रियार्थं वै ते समानयितुं तदा ॥ ३०
स जगाम ततः शीघ्रमुत्तङ्को ब्राह्मणर्षभः ।
सौदासं पुरुषादं वै भिक्षितुं मणिकुण्डले ३१
गौतमस्त्वब्रवीत्पत्नीमुत्तङ्को नाद्य दृश्यते ।
इति पृष्टा तमाचष्ट कुण्डलार्थे गतं च सा ॥३२
ततः प्रोवाच पत्नीं स न ते सम्यगिदं कृतम् ।
शप्तः स पार्थिवो नूनं ब्राह्मणं तं वधिष्यति ॥

अहल्योवाच ।

अजानन्त्या नियुक्तः स भगवन्ब्राह्मणो मया
भवत्प्रसादान्न भयं किञ्चित्तस्य भविष्यति ॥
इत्युक्तः प्राह तां पत्नीमेवमस्त्विति गौतमः ।
उत्तङ्कोऽपि वने शून्ये राजानं तं ददर्श ह ३५

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि उत्तङ्कोपाख्याने कुण्डलाहरणे षट्पञ्चाशत्तमोऽध्यायः ॥ ५६ ॥



५७

वैशम्पायन उवाच ।

स तं दृष्ट्वा तथाभूतं राजानं घोरदर्शनम् ।
दीर्घश्मश्रुधरं नृणां शोणितेन समुक्षितम् १
चकार न व्यथां विप्रो राजा त्वेनमथाब्रवीत् ।
प्रत्युत्थाय महातेजा भयकर्तां यमोपमः ॥ २

दिष्ट्या त्वमसि कल्याण
षष्ठे काले ममान्तिकम् ।
भक्ष्यं मृगयमाणस्य
संप्राप्तो द्विजसत्तम ॥ ३

उत्तङ्क उवाच ।

राजन्गुर्वर्थिनं विद्धि चरन्तं मामिहागतम् ।
न च गुर्वर्थमुद्युक्तं हिंस्यमाहुर्मनीषिणः ॥ ४

राजोवाच ।

षष्ठे काले ममाहारो विहितो द्विजसत्तम ।
न शक्यस्त्वं समुत्सृष्टुं क्षुधितेन मयाद्य वै ५

उत्तङ्क उवाच ।

एवमस्तु महाराज समयः क्रियतां तु मे ।
गुर्वर्थमभिनिर्वर्त्य पुनरेष्यामि ते वशम् ॥ ६
संश्रुतश्च मया योऽर्थो गुरवे राजसत्तम ।
त्वदधीनः स राजेन्द्र तं त्वां भिक्षे नरेश्वर७
ददासि विप्रमुख्येभ्यस्त्वं हि रत्नानि नित्यदा
दाता च त्वं नरव्याघ्र पात्रभूतः क्षिताविह ।
पात्रं प्रतिगृहे चापि विद्धि मां नृपसत्तम ॥ ८
उपाहृत्य गुरोरर्थं त्वदायत्तमरिन्दम ।
समयेनेह राजेन्द्र पुनरेष्यामि ते वशम् ॥ ९
सत्यं ते प्रतिजानामि नात्र मिथ्या कथञ्चन ।
अनृतं नोक्तपूर्वं मे स्वैरेष्वपि कुतोऽन्यथा॥१०

सौदास उवाच ।

यदि मत्तस्त्वयायत्तो गुर्वर्थः कृत एव सः ।
यदि चास्मि प्रतिग्राह्यः सांप्रतं तद्ब्रवस्व मे ११

उत्तङ्क उवाच ।

प्रतिग्राह्यो मतो मे त्वं सदैव पुरुषर्षभ ।
सोहं त्वामनुसंप्राप्तो भिक्षितुं मणिकुण्डले १२

सौदास उवाच ।

पत्न्यास्ते मम विप्रर्षे उचिते मणिकुण्डले
वरयार्थं त्वमन्यं वै तं ते दास्यामि सुव्रत ॥ १३

उत्तङ्क उवाच ।

अलं ते व्यपदेशेन प्रमाणा यदि ते वयम् ।
प्रयच्छ कुण्डले मह्यं सत्यवाग्भव पार्थिव १४

वैशम्पायन उवाच ।

इत्युक्तस्त्वब्रवीद्राजा तमुत्तङ्कं पुनर्वचः ।
गच्छ मद्वचनाद्देवीं ब्रूहि देहीति सत्तम ॥ १५
सैवमुक्ता त्वया नूनं मद्वाक्येन शुचिव्रता ।
प्रदास्यति द्विजश्रेष्ठ कुण्डले ते न संशयः॥१६

उत्तङ्क उवाच ।

क्व पत्नी भवतः शक्या मया द्रष्टुं नरेश्वर ।
स्वयं वाऽपि भवान्पत्नीं किमर्थं नोपसर्पति ॥

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे षटपञ्चाशत्तमोऽध्याय ॥ ५६ ॥

५७

स तमिति ॥ १ ॥

सौदास उवाच ।
तां द्रक्ष्यति भवानद्य कस्मिंश्चिद्वननिर्झरे ।
षष्ठे काले न हि मया सा शक्या द्रष्टुमद्य वै ॥
वैशम्पायन उवाच ।
उत्तङ्कस्तु तथोक्तः स जगाम भरतर्षभ ।
मदयन्तीं च दृष्ट्वा स ज्ञापयत्स्वप्रयोजनम् १९
सौदासवचनं श्रुत्वा ततः सा पृथुलोचना ।
प्रत्युवाच महाबुद्धिमुत्तङ्कं जनमेजय ॥ २०
एवमेतद्यदब्रह्मन्नानृतं वदसेऽनघ ।
अभिज्ञानं तु किञ्चित्त्वं समानयितुमर्हसि २१
इमे हि दिव्ये मणिकुण्डले मे
देवाश्च यक्षाश्च महर्षयश्च ।
तैस्तैरुपायैरपहर्तुकामा-
श्छिद्रेषु नित्यं परितर्कयन्ति ॥ २२
निक्षिप्तमेतद्भुवि पन्नगास्तु
रत्नं समासाद्य परामृशेयुः ।
यक्षास्तथोच्छिष्टधृतं सुराश्च
निद्रावशाद्वा परिधर्षयेयुः ॥ २३
छिद्रेष्वेतेष्विमे नित्यं ह्रियेते द्विजसत्तम ।
देवराक्षसनागानामप्रमत्तेन धार्यते ॥ २४
स्यन्देते हि दिवा रुक्मं रात्रौ च द्विजसत्तम
नक्तं नक्षत्रतारााणां प्रभामाक्षिप्य वर्तते: २५
एते ह्यामुच्य भगवन् क्षुत्पिपासाभयं कुतः ।
विषाग्निभ्यापदेभ्यश्च भयं जातु न विद्यते २६
ह्रस्वे न चैते आमुक्ते भवतो ह्रस्वके तदा ।
अनुरूपेण चामुक्ते जायेते तत्प्रमाणके ॥ २७
एवविधे ममैते वै कुण्डले परमार्चिते ।
त्रिषु लोकेषु विख्याते तदभिज्ञानमानय ॥ २८

इति श्रीमहाभारत आश्वमेधिके पर्वणि अनुगीतापर्वणि उत्तङ्कोपाख्याने सप्तपञ्चाशत्तमोऽध्यायः ॥ ५७ ॥

५८

वैशम्पायन उवाच ।
स मित्रसहमासाद्य अभिज्ञानमयाचत ।
तस्मै ददावभिज्ञानं स चेक्ष्वाकुवरस्तदा १
सौदास उवाच ।
न चैवैषा गतिः क्षेम्या न चान्या विद्यते गतिः
एतन्मे मतमाज्ञाय प्रयच्छ मणिकुण्डले ॥ २
इत्युक्तस्तामुत्तङ्कस्तु भर्तुर्वाक्यमथाब्रवीत् ।
श्रुत्वा च सा तदा प्रादात्ततस्ते मणिकुण्डले
अवाप्य कुण्डले ते तु राजानं पुनरब्रवीत् ।
किमेतद्गृह्य वचनं श्रोतुमिच्छामि पार्थिव ४
सौदास उवाच ।
प्रजा निसर्गाद्विप्रान्वै क्षत्रियाः पूजयन्ति ह
विप्रेभ्यश्चापि बहवो दोषाः प्रादुर्भवन्ति वै ५
सोऽहं द्विजेभ्यः प्रणतो विप्रादोषमवाप्तवान्।
गतिमन्यां न पश्यामि मदयन्तीसहायवान् ६
न चान्यामपि पश्यामि गतिं गतिमतां वर ।
स्वर्गद्वारस्य गमने स्थाने चेह द्विजोत्तम ॥ ७
न हि राज्ञा विशेषेण विरुद्धेन द्विजातिभिः ।
शक्यं हि लोके स्थातुं वै प्रेत्य वा सुखमेधितुम्
तदिष्टे ते मया दत्ते एते स्वे मणिकुण्डले ।
यः कृतस्तेऽद्य समयः सफलं तं कुरुष्व मे ९
उत्तङ्क उवाच ।
राजंस्तथेह कर्तास्मि पुनरेष्यामि ते वशम् ।
प्रश्नं च कञ्चित्प्रष्टुं त्वां निवृत्तोऽस्मि परन्तप ॥

छिद्रेष्वेतेष्विमे इति पूर्वान्वयि नागाना नागै ह्रियेत इति सम्बन्ध ॥ २४ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्तपञ्चाशत्तमोऽध्याय ॥ ५७ ॥

५८

स मित्रेति । मित्रसह सौदास अभिज्ञान श्लोकरूपं ज्ञापकम् ॥ १ ॥ तदेवाह—न चेति । एषा रक्षोयोनिरूपा अन्या इतो मुक्तिरूपा अतो मम इतोगतेर्मुक्त्यर्थं प्रयच्छ देहि मणिमये कुण्डले ॥ २ ॥

सौदास उवाच ।
ब्रूहि विप्र यथाकामं प्रतिवक्तास्मि ते वचः।
छेत्ताऽस्मि संशयं तेऽद्य न मेत्रास्ति विचारणा
उत्तङ्क उवाच ।
प्राहुर्वाक्संयतं विप्रं धर्मनैपुणदर्शिनः।
मित्रेषु यश्च विषमः स्तेन इत्येव तं विदुः १२
स भवान्मित्रतामद्य संप्राप्तो मम पार्थिव ।
स मे बुद्धिं प्रयच्छस्व संमतां पुरुषर्षभ ॥ १३
अवाप्तार्थोऽहमद्येह भवांश्च पुरुषादकः ।
भवत्सकाशमागन्तुं क्षमं मम न वेति वै १४
सौदास उवाच ।
क्षमं चेदिह वक्तव्यं तव द्विजवरोत्तम ।
मत्समीपं द्विजश्रेष्ठ नागन्तव्यं कथञ्चन ॥ १५
एवं तव प्रपद्यामि श्रेयो भृगुकुलोद्वह ।
आगच्छतो हि ते विप्र भवेन्मृत्युर्न संशयः१६
वैशम्पायन उवाच ।
इत्युक्तः स तदा राज्ञा क्षमं बुद्धिमता हितम्
अनुज्ञाप्य स राजानमहल्यां प्रतिजग्मिवान्
गृहीत्वा कुण्डले दिव्ये गुरुपत्न्याः प्रियङ्करः
जवेन महता प्रायाद्गौतमस्याश्रमं प्रति ॥ १८
यथा तयो रक्षणं च मदयन्त्याभिभाषितम् ।
तथा ते कुण्डले बद्ध्वा तदा कृष्णाजिनेऽनयत्
स कस्मिंश्चित्क्षुधाविष्टः
फलभारसमन्वितम् ।
बिल्वं ददर्श विप्रर्षि-
रारुरोह च तं ततः ॥ २० ॥
शाखामासज्य तस्यैव कृष्णाजिनमरिन्दम
पातयामास बिल्वानि तदा स द्विजपुङ्गवः २१
अथ पातयमानस्य बिल्वापहृतचक्षुषः ।
न्यपतंस्तानि बिल्वानि तस्मिन्नेवाजिने विभो
यस्मिंस्ते कुण्डले बद्धे तदा द्विजवरेण वै ।
बिल्वप्रहारैस्तस्याथ ह्यशीर्यद्बन्धनं ततः २३
सकुण्डलं तदजिनं पपात सहसा तरोः।
विशीर्णबन्धने तस्मिन्पाते कृष्णाजिने महीम्
अपश्यद्भुजगः कश्चित्ते तत्र माणिकुण्डले ।
ऐरावतकुलोद्भूतः शीघ्रो भूत्वा तदा हि सः ॥
विदश्यास्येन वल्मीकं विवेशाथ स कुण्डले
ह्रियमाणे तु दृष्ट्वा स कुण्डले भुजगेन ह २६
पपात वृक्षात्सोद्वेगो दुःखात्परमकोपनः ।
स दण्डकाष्ठमादाय वल्मीकमखनत्तदा २७
अहानि त्रिंशदद्यग्रः पञ्च चान्यानि भारत ।
क्रोधामर्षाभिसंतप्तस्तदा ब्राह्मणसत्तमः २८
तस्य वेगमसह्यं तमसहन्ती वसुन्धरा ।
दण्डकाष्ठाभिनुन्नाङ्गी चचाल भृशमाकुला ॥
ततः खनत एवाथ विप्रर्षेर्धरणीतलम् ।
नागलोकस्य पन्थानं कर्तुकामस्य निश्चयात् ॥
रथेन हरियुक्तेन तं देशमुपजग्मिवान् ।
वज्रपाणिर्महातेजास्तं ददर्श द्विजोत्तमम् ३०
वैशम्पायन उवाच ।
स तु तं ब्राह्मणो भूत्वा तस्य दुःखेन दुःखितः
उत्तङ्कमब्रवीद्वाक्यं नैतच्छक्यं त्वयेति वै ३१
इतो हि नागलोको वै योजनानि सहस्रशः ।
न दण्डकाष्ठसाध्यं च मन्ये कार्यमिदं तव ॥
उत्तङ्क उवाच ।
नागलोके यदि ब्रह्मन्न शक्ये कुण्डले मया।
प्रातुं प्राणान्विमोक्ष्यामि पश्यतस्ते द्विजोत्तम
वैशम्पायन उवाच ।
यदा स नाशकत्तस्य निश्चयं कर्तुमन्यथा ।
वज्रपाणिस्तदा दण्डं वज्रास्त्रेण युयोज ह ३४
ततो वज्रप्रहारैस्तैर्दार्यमाणा वसुन्धरा ।
नागलोकस्य पन्थानमकरोज्जनमेजय ॥ ३५
स तेन मार्गेण तदा नागलोकं विवेश ह ।
ददर्श नागलोकं च योजनानि सहस्रशः ३६
प्राकारनिचयैर्दिव्यैर्मणिमुक्ताविलंकृतैः ।
उपपन्नं महाभाग शातकुम्भमयैस्तथा ॥ ३७
वापीः स्फटिकसोपाना नदीश्च विमलोदकाः
ददर्श वृक्षांश्च बहून्नानाद्विजगणायुतान् ॥ ३८
तस्य लोकस्य च द्वारं स ददर्श भृगूद्वहः ।
पञ्चयोजनविस्तारमायतं शतयोजनम् ॥ ३९
नागलोकमुत्तंकस्तु प्रेक्ष्य दीनोऽभवत्तदा ।
निराशश्चाभवत्तत्र कुण्डलाहरणे पुनः ॥ ४०
तत्र प्रोवाच तुरगस्तं कृष्णश्वेतवालधिः ।
ताम्रास्यनेत्रः कौरव्यः प्रज्वलन्निव तेजसा ॥
धमस्वापानमेतन्मे ततस्त्वं विप्र लप्स्यसे ।
ऐरावतसुतेनेह तवानीते हि कुण्डले ॥ ४२

शाखा शाखायाम् ॥ २१ ॥ आस्येन कुण्डले विदश्य धृत्वा वल्मीकं विवेशेति सम्बन्धः ॥ २६ ॥

मा जुगुप्सां कृथाः पुत्र त्वमत्रार्थे कथञ्चन ।
त्वयैतद्धि समाचीर्णं गौतमस्याश्रमे तदा ४३

उत्तङ्क उवाच ।

कथं भवन्तं जानीयामुपाध्यायाश्रमं प्रति ।
यन्मया चीर्णपूर्वं हि श्रोतुमिच्छामि तद्ग्रहम्

अश्व उवाच ।

गुरोर्गुरुं मां जानीहि ज्वलनं जातवेदसम् ।
त्वया ह्यहं सदा विप्र गुरोरर्थेऽभिपूजितः ४५
विधिवत्सततं विप्र शुचिना भृगुनन्दन ।
तस्माच्छ्रेयो विधास्यामि तवैवं कुरु मा चिरम्
इत्युक्तस्तु तथाऽकार्षीदुत्तङ्कश्चित्रभानुना ।
घृतार्चिः प्रीतिमांश्चापि प्रजज्वाल दिधक्षया
ततोऽस्य रोमकूपेभ्यो धम्यतस्तत्र भारत ।
घनः प्रादुरभूद्धूमो नागलोकभयावहः ॥ ४८
तेन धूमेन महता वर्धमानेन भारत ।
नागलोके महाराज न प्राज्ञायत किञ्चन ४९
हाहाकृतमभूत्सर्वैरावतनिवेशनम् ।
वासुकिप्रमुखानां च नागानां जनमेजय ५०
न प्राकाशन्त वेश्मानि धूमरुद्धानि भारत ।
नीहारसंवृतानीव वनानि गिरयस्तथा ॥ ५१
ते धूमरक्तनयना वह्नितेजोऽभितापिताः ।
आजग्मुर्निश्चयं ज्ञातुं भार्गवस्य महात्मनः ५२
श्रुत्वा च निश्चयं तस्य महर्षेरतितेजसः ।
सम्भ्रान्तनयनाः सर्वे पूजां चक्रुर्यथाविधि ५३
सर्वे प्राञ्जलयो नागा वृद्धबालपुरोगमाः ।
शिरोभिः प्राणिपत्योचुः प्रसीद् भगवन्निति ॥
प्रसाद्य ब्राह्मणं ते तु पाद्यमर्घ्यं निवेद्य च ।
प्रायच्छन्कुण्डले दिव्ये पन्नगाः परमार्चिते५५
ततः स पूजितो नागैस्तदोत्तङ्कः प्रतापवान् ।
अग्निं प्रदक्षिणं कृत्वा जगाम गुरुसद्म तत् ५६
स गत्वा त्वरितो राजन् गौतमस्य निवेशनम्
प्रायच्छत् कुण्डले दिव्ये गुरुपत्न्यास्तदाऽनघ
वासुकिप्रमुखानां च नागानां जनमेजय ।
सर्वं शशंस गुरवे यथावद्द्विजसत्तमः ॥ ५८
एवं महात्मना तेन त्रीँल्लोकान् जनमेजय ।
परिक्रम्याहृते दिव्ये ततस्ते मणिकुण्डले ५९
एवंप्रभावः स मुनिरुत्तङ्को भरतर्षभ ।
परेण तपसा युक्तो यन्मां त्वं परिपृच्छसि६०

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि उत्तङ्कोपाख्याने अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

५९

जनमेजय उवाच ।

उत्तङ्कस्य वरं दत्त्वा गोविन्दो द्विजसत्तम
अत ऊर्ध्वं महाबाहुः किं चकार महायशाः १

वैशम्पायन उवाच ।

उत्तङ्काय वरं दत्त्वा प्रायात्साल्वकिना सह ।
द्वारकामेव गोविन्दः शैव्यवेगैर्महाहयैः ॥ २
सरांसि सरितश्चैव वनानि च गिरींस्तथा ।
अतिक्रम्याससादाथ रम्यां द्वारवतीं पुरीम् ३
वर्तमाने महाराज महे रैवतकस्य च ।
उपायात्पुण्डरीकाक्षो युयुधानानुगस्तदा ४
अलङ्कृतस्तु स गिरिर्नानारूपैर्विचित्रितैः ।
बभौ रत्नमयैः कोशैः संवृतः पुरुषर्षभ ॥ ५
काञ्चनस्रग्भिरग्र्याभिः सुमनोभिस्तथैव च ।
वासोभिश्च महाशैलः कल्पवृक्षैस्तथैव च ६
दीपवृक्षैश्च सौवर्णैरमीक्ष्णमुपशोभितः ।
गुहानिर्झरदेशेषु दिवाभूतो बभूव ह ॥ ७

धम्यतो धम्यमानस्य ॥ ४८ ॥ एवमिति गुरुभक्तेषु देवा अप्यनुग्रहं कुर्वन्तीति भावः ॥ ६० ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे अष्टपञ्चाशत्तमोऽध्यायः ॥ ५८ ॥

५९

उत्तङ्कस्येति ॥ १ ॥ महे उत्सवे ॥ ४ ॥ दिवाभूतः दिवसवत्प्रकाशबहुलः दिवाकरतुल्य इति यावत् ॥ ७ ॥

पताकाभिर्विचित्राभिः सघण्टाभिः समंततः
पुम्भिः स्त्रीभिश्च संघुष्टः प्रगीत इव चाभवत
अतीव प्रेक्षणीयोऽभून्मेरुर्मुनिगणैरिव।
मत्तानां हृष्टरूपाणां स्त्रीणां पुंसां च भारत ९
गायतां पर्वतेन्द्रस्य दिवस्पृगिव निःस्वनः।
प्रमत्तमत्तसंमत्तक्ष्वेडितोत्कृष्टसंकुलः॥ १०
तथा किलकिलाशब्दैर्भूधरोऽभून्मनोहरः।
विपणापणवान् रम्यो भक्ष्यभोज्यविहारवान्
वस्त्रमाल्योत्करयुतो वीणावेणुमृदङ्गवान्।
सुरामैरेयमिश्रेण भक्ष्यभोज्येन चैव ह॥ १२
दीनान्धकृपणादिभ्यो दीयमानेन चानिशम्
बभौ परमकल्याणो महस्तस्य महागिरेः १३
पुण्यावसथवान्वीर पुण्यकृद्भिर्निषेवितः।
विहारो वृष्णिवीराणां महे रैवतकस्य ह १४
स नगो वेश्मसंकीर्णो देवलोक इवाबभौ।
तदा च कृष्णसान्निध्यमासाद्य भरतर्षभ १५
शक्रसद्मप्रतीकाशो बभूव स हि शैलराट्।
ततः संपूज्यमानः स विवेश भवनं शुभम्॥
गोविन्दः सात्यकिश्चैव जगाम भवनं स्वकम्
विवेश च प्रहृष्टात्मा चिरकालप्रवासतः १७
कृत्वा नसुकरं कर्म दानवेष्विव वासवः।
उपायान्तं तु वार्ष्णेयं भोजवृष्ण्यन्धकास्तथा
अभ्यगच्छन्महात्मानं देवा इव शतक्रतुम्।
स तानभ्यर्च्य मेधावी पृष्ट्वा च कुशलं तदा।
अभ्यवादयत प्रीतः पितरं मातरं तदा १९
ताभ्यां स संपरिष्वक्तः सांत्वितश्च महाभुजः
उपोपविष्टैः सर्वैस्तैर्वृष्णिभिः परिवारितः २०
स विश्रान्तो महातेजाः कृतपादावनेजनः।
कथयामास तत्सर्व पृष्टः पित्रा महाहवम् २१

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि कृष्णस्य द्वारकाप्रवेश ऊनषष्टितमोऽध्यायः॥ ५९॥

६०

वसुदेव उवाच।
श्रुतवानस्मि वार्ष्णेय संग्रामं परमाद्भुतम्।
नराणां वदतां तत्र कथं वा तेषु नित्यशः॥ १
त्वं तु प्रत्यक्षदर्शी च रूपज्ञश्च महाभुजः।
तस्मात्प्रब्रूहि संग्रामं याथातथ्येन मेऽनघ॥ २
यथा तदभवद्युद्धं पाण्डवानां महात्मनाम्।
भीष्म-कर्ण-कृप-द्रोण-शल्यादिभिरनुत्तमम्
अन्येषां क्षत्रियाणां च कृतास्त्राणामनेकशः।
नानावेषाकृतिमतां नानादेशनिवासिनाम् ४
वैशम्पायन उवाच।
इत्युक्तः पुण्डरीकाक्षः पित्रा मातुस्तदान्तिके
शशंस कुरुवीराणां संग्रामे निधनं यथा॥ ५

वासुदेव उवाच।
अत्यद्भुतानि कर्माणि क्षत्रियाणां महात्मनाम्
बहुलत्वान्न संख्यातुं शक्यान्यब्दशतैरपि॥ ६
प्राधान्यतस्तु गदतः समासेनैव मे शृणु।
कर्माणि पृथिवीशानां यथावदमरद्युते॥ ७
भीष्मः सेनापतिरभूदेकादशचमूपतिः।
कौरव्यः कौरवेन्द्राणां देवानामिव वासवः ८
शिखण्डी पाण्डुपुत्राणां नेता सप्तचमूपतिः।
बभूव रक्षितो धीमान् श्वेतवाहनसात्यकिना
तेषां तदभवद्युद्धं दशाहानि महात्मनाम्।
कुरूणां पाण्डवानां च सुमहल्लोमहर्षणम् १०

प्रमत्ता क्रीडासक्तत्यानवहिता मत्ता मद्यादिना समत्ता तृप्ता क्ष्वेडितं कूर्दनं उत्कृष्टं अन्योन्यमाकर्षण तै सकुल तच्छब्दैराकुलो निःस्वन अभूदिति शेष॥ १०॥
इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे ऊनषष्टितमोऽध्याय॥ ५९॥

६०

श्रुतवानस्मि वार्ष्णेयेति॥ १॥ पित्रा मातुरांतिके इत्युक्त पुडरीकाक्ष संग्रामे तत्कुरुवीराणा निधनं यथा यथावच्छशसेत्यन्वय॥ ५॥

ततः शिखण्डी गाङ्गेयं युध्यमानं महाहवे।
जघान बहुभिर्बाणैः सह गाण्डीवधन्वना ११
अकरोत्स ततः कालं शरतल्पगतो मुनिः।
अयनं दक्षिणं हित्वा संप्राप्ते चोत्तरायणे ॥ १२
ततः सेनापतिरभूद्द्रोणोऽस्त्रविदुषां वरः।
प्रवीरः कौरवेन्द्रस्य काव्यो दैत्यपतेरिव १३
अक्षौहिणीभिः शिष्टाभिर्नवभिर्द्विजसत्तमः।
संवृतः समरश्लाघी गुप्तः कृपवृषादिभिः १४
धृष्टद्युम्नस्त्वभूच्छेता पाण्डवानां महास्त्रवित्।
गुप्तो भीमेन मेधावी मित्रेण वरुणो यथा १५
स च सेनापरिवृतो द्रोणप्रेप्सुर्महामनाः।
पितुर्निकारान्संस्मृत्य रणे कर्माकरोन्महत् ॥
तस्मिंस्ते पृथिवीपाला द्रोणपार्षतसङ्करे।
नानादिगागता वीराः प्रायशो निधनं गताः॥
दिनानि पञ्च तद्युद्धमभूत्परमदारुणम्।
ततो द्रोणः परिश्रान्तो धृष्टद्युम्नवशं गतः १८
ततः सेनापतिरभूत्कर्णो दौर्योधने बले।
अक्षौहिणीभिः शिष्टाभिर्वृतः पञ्चभिराहवे ॥
तिस्रस्तु पाण्डुपुत्राणां चम्वो बीभत्सुपालिताः
हतप्रवीरभूयिष्ठा बभूवुः समवस्थिताः ॥ २०
ततः पार्थं समासाद्य पतङ्ग इव पावकम्।
पञ्चत्वमगमत्सौतिर्द्वितीयेऽहनि दारुणः ॥ २१
हते कर्णे तु कौरव्या निरुत्साहा हतौजसः।
अक्षौहिणीभिस्तिसृभिर्मद्रेशं पर्यवारयन् ॥ २२
हतवाहनभूयिष्ठाः पाण्डवापि युधिष्ठिरम्।
अक्षौहिण्या निरुत्साहाः शिष्टया पर्यवारयन्
अवधीन्मद्रराजानं कुरुराजो युधिष्ठिरः।
तस्मिंस्तदार्धदिवसे कृत्वा कर्म सुदुष्करम् २५
हते शल्ये तु शकुनिं सहदेवो महामनाः।
आहर्तारं कलेस्तस्य जघानामितविक्रमः॥२५
निहते शकुनौ राजा धार्तराष्ट्रः सुदुर्मनाः।
अपाक्रामद्गदापाणिर्हतभूयिष्ठसैनिकः ॥ २६
तमन्वधावत्संक्रुद्धो भीमसेनः प्रतापवान्।
ह्रदे द्वैपायने चापि सलिलस्थं ददर्श तम् २७
हतशिष्टेन सैन्येन समन्तात्पर्यवार्य तम्।
अथोपविविशुर्हृष्टा ह्रदस्थं पञ्च पाण्डवाः ॥२८
विगाह्य सलिलं त्वाशु वाग्बाणैर्भृशविक्षतः॥
उत्थाय स गदापाणिर्युद्धाय समुपस्थितः २९
ततः स निहतो राजा धार्तराष्ट्रो महारणे।
भीमसेनेन विक्रम्य पश्यता पृथिवीक्षिताम् ॥
ततस्तत्पाण्डवं सैन्यं प्रसुप्तं शिबिरे निशि
निहतं द्रोणपुत्रेण पितुर्वधममृष्यता ॥ ३१
हतपुत्रा हतबला हतमित्रा मया सह।
युयुधानसहायेन पञ्च शिष्टास्तु पाण्डवाः ३२
सहैव कृपभोजाभ्यां द्रौणिर्युद्धादमुच्यत।
युयुत्सुश्चापि कौरव्यो मुक्तः पाण्डवसंश्रयात्
निहते कौरवेन्द्रे तु सानुबन्धे सुयोधने।
विदुरः सञ्जयश्चैव धर्मराजमुपस्थितौ ॥ ३४
एवं तदभवद्युद्धमहान्यष्टादश प्रभो।
यत्र ते पृथिवीपाला निहताः स्वर्गमावसन् ॥

वैशम्पायन उवाच।

शृण्वतां तु महाराज कथां तां लोमहर्षणाम्
दुःखशोकपरिक्लेशा वृष्णीनामभवंस्तदा ३६

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि वासुदेववाक्ये षष्टितमोऽध्यायः ॥ ६० ॥

६१

वैशम्पायन उवाच।

कथयन्नेव तु तदा वासुदेवः प्रतापवान्।
महाभारतयुद्धं तत्कथान्ते पितुरग्रतः ॥ १
अभिमन्योर्वधं वीरः सोऽत्यक्रामन्महामतिः।
अप्रिय वसुदेवस्य माभूदिति महामतिः ॥ २
मा दौहित्रवधं श्रुत्वा वसुदेवो महात्ययम् ॥३

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे षष्टितमोऽध्याय ॥ ६० ॥

६१

कथयन्नेवेति ॥ १ ॥

दुःखशोकाभिसन्तप्तो भवेदिति महामतिः ।
सुभद्रा तु तमुत्क्रान्तमात्मजस्य वधं रणे ४
आचक्ष्व कृष्ण सौभद्रवधमित्यपतद्भुवि ।
तामपश्यन्निपतितां वसुदेवः क्षितौ तदा ॥ ५
दृष्ट्वैव च पपातोर्व्यां सोऽपि दुःखेन मूर्च्छितः
ततः स दौहित्रवधदुःखशोकसमाहतः ॥ ६
वसुदेवो महाराज कृष्णं वाक्यमथाब्रवीत् ।
ननु त्वं पुण्डरीकाक्ष सत्यवाग्भुवि विश्रुतः ७
यदौहित्रवधं मेऽद्य न क्षमापयसि शत्रुहन् ।
तद्भागिनेयनिधनं तत्त्वेनाचक्ष्व मे प्रभो ॥ ८
सदृशाक्षस्तव कथं शत्रुभिर्निहतो रणे ।
दुर्मरं बत वार्ष्णेय कालेऽप्राप्ते नृभिः सह ९
यत्र मे हृदयं दुःखाच्छतधा न विदीर्यते ।
किमब्रवीस्त्वां संग्रामे सुभद्रां मातर प्रति १०
मां चापि पुण्डरीकाक्ष चपलाक्षः प्रियो मम
आहवं पृष्ठतः कृत्वा कच्चिन्न निहतः परैः ११
कच्चिन्मुखं न गोविन्द तेनाजौ विकृतं कृतम्
स हि कृष्ण महातेजाः श्लाघ्यश्चिव ममाग्रतः
बालभावेन विनयमात्मनोऽकथयत्प्रभुः ।
कच्चिन्न निकृतो बालो द्रोण-कर्ण-कृपादिभिः
धरण्यां निहतः शेत तन्ममाचक्ष्व केशव ।
स हि द्रोणं च भीष्मं च कर्णं च बलिनां वरम्
स्पर्धते स्म रणे नित्यं दुहितुः पुत्रको मम ।
एवंविधं बहु तदा विलपन्तं सुदुःखितम् १५
पितरं दुःखिततरो गोविन्दो वाक्यमब्रवीत्
न तेन विकृतं वक्त्रं कृतं संग्राममूर्धनि॥१६
न पृष्ठतः कृतश्चापि संग्रामस्तेन दुस्तरः ।
निहत्य पृथिवीपालान्सहस्रशतसंघशः ॥ १७
खेदितो द्रोणकर्णाभ्यां दौःशासनिवशं गतः
एको ह्येकेन सततं युध्यमाने यदि प्रभो १८
न स शक्येत संग्रामे निहन्तुमपि वज्रिणा ।
समाहृते च संग्रामात्पार्थे संशप्तकैस्तदा १९
पर्यवार्यत संक्रुद्धैः स द्रोणादिभिराहवे ।
ततः शत्रुवधं कृत्वा सुमहान्तं रणे पितः २०
दौहित्रस्तव वार्ष्णेय दौःशासनिवश गतः ।
नूनं च स गतः स्वर्गं जाहि शोकं महामते २१
न हि व्यसनमासाद्य सीदन्ति कृतबुद्धयः ।
द्रोण-कर्णप्रभृतयो येन प्रतिसमासिताः ॥२२
रणे महेन्द्रप्रतिमाः स कथं नाप्नुयाद्दिवम् ।
स शोकं जहि दुर्धर्ष मा च मन्युवशं गमः२३
शस्त्रपूतां हि स गतिं गतः परपुरंजयः ।
तस्मिंस्तु निहते वीरे सुभद्रेयं स्वसा मम २४
दुःखार्ताऽथा सुतं प्राप्य कुररीव ननाद ह ।
द्रौपदीं च समासाद्य पर्यपृच्छत दुःखिता २५
आर्ये क्व दारकाः सर्वे द्रष्टुमेच्छामि तानहम्
अस्यास्तु वचनं श्रुत्वा सर्वास्ताः कुरुयोषितः
भुजाभ्यां परिगृह्यैनां चुक्रुशुः परमार्तवत् २७
उत्तरां चाब्रवीद्भद्रे भर्ता स क्व नु ते गतः ।
क्षिप्रमागमनं मह्यं तस्य त्वं वेदयस्व ह २८
ननु नामाद्य वैराटि श्रुत्वा मम गिरं सदा ।
भवनान्निष्पतत्याशु कस्मान्नाभ्येति ते पतिः ॥
अभिमन्यो कुशलिनो मातुलास्ते महारथाः ।
कुशलं चाब्रुवन्सर्वे त्वां युयुत्सुमिहागतम् ३०
आचक्ष्व मेऽद्य संग्रामं यथापूर्वमरिन्दम ।
कस्मादेवं विलपतीं नाद्येह प्रतिभाषसे ३१
एवमादि तु वार्ष्णेय्यास्तस्यास्तत्परिदेवितम्
श्रुत्वा पृथा सुदुःखार्ता शनैर्वाक्यमथाब्रवीत्
सुभद्रे वासुदेवेन तथा सात्यकिना रणे ।
पित्रा च लालितो बालः स हतः कालधर्मणा
ईदृशो मर्त्यधर्मोऽयं मा शुचो यदुनन्दिनि ।
पुत्रो हि तव दुर्धर्षः संप्राप्तः परमां गतिम् ॥
कुले महति जातासि क्षत्रियाणां महात्मनाम्
मा शुचश्चपलाक्षं त्व पद्मपत्रानेक्षणे ॥ ३५
उत्तरां त्वमवेक्षस्व गुर्विणीं मा शुचः शुभे ।
पुत्रमेषा हि तस्याशु जनयिष्यति भाविनी३६
एवमाश्वासयित्वैनां कुन्ती यदुकुलोद्वह ।
विहाय शोकं दुर्धर्ष श्राद्धमस्य ह्यकल्पयत३७
समनुज्ञाप्य धर्मज्ञं राजानं भीममेव च ।
यमौ यमोपमौ चैव ददौ दानान्यनेकशः ३८
ततः प्रदाय बह्वीर्गा ब्राह्मणाय यदूद्वह ।
समाहूय तु वार्ष्णेयी वैराटीमब्रवीदिदम् ३९
वैराटि नेह सतापस्त्वया कार्यो ह्यनिन्दिते।
भर्तारं प्रति सुश्रोणि गर्भस्थं रक्ष वै शिशुम्४०
एवमुक्त्वा ततः कुन्ती विरराम महाद्युते ।
तामनुज्ञाप्य चैवमा सुभद्रां समुपानयम् ४१
एवं स निधनं प्राप्तो दौहित्रस्तव मानद ।
सन्ताप त्यज दुर्धर्ष मा च शोके मनः कृथाः

इति श्रीमहाभारते आश्वमेधिक पर्वणि अनुगीतापर्वणि वसुदेवसांत्वने
एकषष्टितमोऽध्यायः ॥ ६१ ॥

६२

वैशम्पायन उवाच ।

एतच्छ्रुत्वा तु पुत्रस्य वचः शूरात्मजस्तदा ।
विहाय शोकं धर्मात्मा ददौ श्राद्धमनुत्तमम्
तथैव वासुदेवश्च स्वस्रीयस्य महात्मनः ।
दयितस्य पितुर्नित्यमकरोदौर्ध्वदेहिकम् ॥ २
षष्टिं शतसहस्राणि ब्राह्मणाना महौजसाम् ।
विधिवद्भोजयामास भोज्यं सर्वगुणान्वितम्
आच्छाद्य च महाबाहुर्धनतृष्णामपानुदत् ।
ब्राह्मणानां तदा कृष्णस्तदभूल्लोमहर्षणम् ॥ ४
सुवर्णं चैव गाश्चैव शयनाच्छादनानि च ।
दीयमानं तदा विप्रा वर्धतामिति चाब्रुवन् ५
वासुदेवोऽथ दाशार्हो बलदेवः ससात्यकिः ।
अभिमन्युस्तदा श्राद्धमकुर्वन्सत्यकस्तदा ६
अतीव दुःखसंतप्ता न शमं चोपलेभिरे ।
तथैव पाण्डवा वीरा नगरे नागसाह्वये ॥ ७
नोपागच्छन्त वै शान्तिमभिमन्युविनाकृताः
सुबहूनि च राजेन्द्र दिवसानि विराटजा ८
नाभुङ्क्त पतिदुःखार्ता तदभूत्करुणं महत् ।
कुक्षिस्थ एव तस्याथ गर्भो वै संप्रलीयत ॥ ९
आजगाम ततो व्यासो ज्ञात्वा दिव्येन चक्षुषा
समागम्याब्रवीद्धीमान् पृथां पृथुललोचनाम्
उत्तरां च महातेजाः शोकः सत्यज्यतामयम्
भविष्यति महातेजाः पुत्रस्तव यशस्विनि ११
प्रभावाद्वासुदेवस्य मम व्याहरणादपि ।
पाण्डवानामयं चान्ते पालयिष्यति मेदिनीम्
धनञ्जयं च संप्रेक्ष्य धर्मराजस्य शृण्वतः ।
व्यासो वाक्यमुवाचेदं हर्षयन्निव भारत १३
पौत्रस्तव महाभागो जनिष्यति महामनाः ।
पृथ्वीं सागरपर्यन्तां पालयिष्यति धर्मतः १४
तस्माच्छोकं कुरुश्रेष्ठ जहि त्वमरिकर्शन ।
विचार्यमत्र न हि ते सत्यमेतद्भविष्यति १५
यच्चापि वृष्णिवीरेण कृष्णेन कुरुनन्दन ।
पुरोक्तं तत्तथा भावि मा तेऽस्त्रास्तु विचारणा
विबुधानां गतो लोका-
नक्षयानात्मनिर्जितान् ।
न स शोच्यस्त्वया वीरो
न चान्यैः कुरुभिस्तथा ॥ १७
एवं पितामहेनोक्तो धर्मात्मा स धनञ्जयः ।
त्यक्त्वा शोकं महाराज हृष्टरूपोऽभवत्तदा ॥
पितापि तव धर्मज्ञ गर्भे तस्मिन्महामते ।
अवर्धत यथाकामं शुक्लपक्षे यथा शशी ॥ १९
ततः सञ्चोदयामास व्यासो धर्मात्मजं नृपम्
अश्वमेधं प्रति तदा ततः सोऽन्तर्हितोऽभवत्
धर्मराजोपि मेधावी श्रुत्वा व्यासस्य तद्वचः
वित्तस्यानयने तात चकार गमने मतिम् २१

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि वासुदेवसान्त्वने
द्विषष्टितमोऽध्यायः ॥ ६२ ॥

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे एकषष्टितमोऽध्याय ॥ ६१ ॥

६२

एतच्छ्रुत्वेति ॥ १ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे द्विषष्टितमोऽध्याय. ॥ ६२ ॥

६३

जनमेजय उवाच ।
श्रुत्वैतद्वचनं ब्रह्मन् व्यासेनोक्तं महात्मना ।
अश्वमेधं प्रति तदा किं भूयः प्रचकार ह ॥ १
रत्नं च यन्मरुत्तेन निहितं वसुधातले ।
तद्वाप कथञ्चेति तन्मे ब्रूहि द्विजोत्तम ॥ २

वैशम्पायन उवाच ।
श्रुत्वा द्वैपायनवचो धर्मराजो युधिष्ठिरः ।
भ्रातॄन्सर्वान्समानाय्य काले वचनमब्रवीत् ३
अर्जुनं भीमसेनं च माद्रीपुत्रौ यमावपि ।
श्रुतं वो वचनं वीराः सौहृदाद्यन्महात्मना ४
कुरूणां हितकामेन प्रोक्तं कृष्णेन धीमता ।
तपोवृद्धेन महता सुहृदां भूतिमिच्छता ॥ ५
गुरुणा धर्मशीलेन व्यासेनाद्भुतकर्मणा ।
भीष्मेण च महाप्राज्ञ गोविन्देन च धीमता ६
संस्मृत्य तदहं सम्यक्कर्तुमिच्छामि पाण्डवाः
आयत्यां च तदान्वे च सर्वेषां तद्धि नो हितम्
अनुबन्धे च कल्याणं यद्वचो ब्रह्मवादिनः ।
इयं हि वसुधा सर्वा क्षीणरत्ना कुरूद्वहाः ॥ ८
तच्चाचष्ट तदा व्यासो मरुत्तस्य धनं नृपाः ।
यद्येतद्वो बहुमतं मन्यध्व वा क्षमं यदि ॥ ९
तथा यथाऽऽह धर्मेण कथं वा भीम मन्यसे ।
इत्युक्तवाक्ये नृपतौ तदा कुरुकुलोद्वह ॥ १०
भीमसेनो नृपश्रेष्ठं प्राञ्जलिर्वाक्यमब्रवीत् ।
रोचते मे महाबाहो यदिदं भाषितं त्वया ११
व्यासाख्यातस्य वित्तस्य समुपानयनं प्रति
यदि तत्प्राप्नुयामेह धनमाविक्षितं प्रभो ॥ १२
कृतमेव महाराज भवेदिति मतिर्मम ।
ते वयं प्रणिपातेन गिरीशस्य महात्मनः ॥१३
तदानयाम भद्रं ते समभ्यर्च्य कपर्दिनम् ।
तद्धिनं देवदेवेशं तस्यैवानुचरांश्च तान् ॥ १४
प्रसाद्यार्थमवाप्स्यामो नूनं वाग्बुद्धिकर्मभिः ।
रक्षन्ते ये च तद्द्रव्यं किन्नरा रौद्रदर्शनाः ॥ १५
ते च वश्या भविष्यन्ति प्रसन्ने वृषभध्वजे ।
श्रुत्वैवं वदतस्तस्य वाक्यं भीमस्य भारत १६
प्रीतो धर्मात्मजो राजा बभूवातीव भारत ।
अर्जुनप्रमुखाश्चापि तथेत्येवाब्रुवन्वचः ॥ १७
कृत्वा तु पाण्डवाः सर्वे रत्नाहरणनिश्चयम् ।
सेनामाज्ञापयामासुर्नक्षत्रेऽहानि च ध्रुवे ॥ १८

ततो ययुः पाण्डुसुता
ब्राह्मणान्स्वास्ति वाच्य च ।
अर्चयित्वा सुरश्रेष्ठं
पूर्वमेव महेश्वरम् ॥ १९
मोदकैः पायसेनाथ
मांसापूपैस्तथैव च ।
आशास्य च महात्मानं
प्रययुर्मुदिता भृशम् ॥ २०

तेषां प्रयास्यतां तत्र मङ्गलानि शुभान्यथ ।
प्राहुः प्रहृष्टमनसो द्विजाम्या नागराश्च ते॥ २१
ततः प्रदक्षिणीकृत्य शिरोभिः प्रणिपत्य च ।
ब्राह्मणानाग्नेसाहितान्प्रययुः पाण्डुनन्दनाः २२
समनुज्ञाप्य राजानं पुत्रशोकसमाहतम् ।
धृतराष्ट्रं सभार्यं वे पृथां च पृथुलोचनाम् २३
मूले निक्षिप्य कौरव्यं युयुत्सुं धृतराष्ट्रजम् ।
सपूज्यमानाः पौरैश्च ब्राह्मणैश्च मनीषिभिः२४

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि द्रव्यानयनोपक्रमे त्रिषष्टितमोऽध्यायः ॥ ६३ ॥

६३

प्रासंगिकीं कथा समाप्य परमप्रकृतमश्वमेधमनुवर्तयति जनमेजयप्रश्नमुखेन श्रुत्वैतद्वचनं ब्रह्मन्नित्यादिना ॥ १ ॥ आविक्षितं अविक्षित पुत्र आविक्षितो मरुत्तस्तस्येदमाविक्षितम् ॥ १२ ॥ ध्रुवे नक्षत्रे रोहिण्यामुत्तरात्रये च अहनि वारे ध्रुवे रविवारे उत्तरार्केऽमृतसिद्धयोगे इत्यर्थः ॥ १८ ॥ मूले वंशस्याद्ये कुंतीवृत्तराज्ञ्यमीषे इत्यर्थ ॥२४॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे त्रिषष्टितमोऽध्याय ॥ ६३ ॥

६४

वैशम्पायन उवाच ।
ततस्ते प्रययुर्हृष्टाः प्रहृष्टनरवाहनाः ।
रथघोषेण महता पूरयन्तो वसुन्धराम् ॥ १
संस्तूयमानाः स्तुतिभिः सूतमागधबन्दिभिः ।
स्वेन सैन्येन संवीता यथादित्याः खरश्मिभिः
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
बभौ युधिष्ठिरस्तत्र पौर्णमास्यामिवोडुराट् ३
जयाशिषः प्रहृष्टानां नराणां पथि पाण्डवः ।
प्रत्यगृह्णाद्यथान्यायं यथावत्पुरुषर्षभः ॥ ४
तथैव सैनिका राजन् राजानमनुयान्ति ये ।
तेषां हलहलाशब्दो दिवं स्तब्ध्वा व्यतिष्ठत ५
सरांसि सरितश्चैव वनान्युपवनानि च ।
अत्यक्रामन्महाराजो गिरिं चाप्यन्वपद्यत॥ ६
तस्मिन्देशे च राजेन्द्र यत्र तद्द्रव्यमुत्तमम् ।
चक्रे निवेशनं राजा पाण्डवः सह सैनिकैः ।
शिवे देशे समे चैव तदा भरतसत्तम ॥ ७
अग्रतो ब्राह्मणान्कृत्वा
तपोविद्यादमान्वितान् ।
पुरोहितं च कौरव्य-
वेदवेदाङ्गपारगम् ।
अग्निवेश्यं च राजानो
ब्राह्मणाः सपुरोधसः ॥ ८
कृत्वा शान्तिं यथान्यायं सर्वशः पर्यवारयन् ।
कृत्वा तु मध्ये राजानममात्यांश्च यथाविधि ९
षट्पदं नवसंस्थानं निवेशं चक्रिरे द्विजाः ।
मत्तानां वारणेन्द्राणां निवेशं च यथाविधि ॥
कारयित्वा स राजेन्द्रो ब्राह्मणानिदमब्रवीत्
अस्मिन्कार्ये द्विजश्रेष्ठा नक्षत्रे दिवसे शुभे १
यथा भवन्तो मन्यन्ते कर्तुमर्हन्ति तत्तथा ।
नः कालात्ययो वै स्यादिहैव परिलम्बताम्
इति निश्चित्य विप्रेन्द्राः क्रियतां यदनन्तरम् ।
श्रुत्वैतद्वचनं राज्ञो ब्राह्मणाः सपुरोधसः ।
इदमूचुर्वचो हृष्टा धर्मराजप्रियेप्सवः ॥ १३
अद्यैव नक्षत्रमहश्च पुण्यं
यतामहे श्रेष्ठतमक्रियासु ।
अंभोभिरद्येह वसाम राज-
न्नुपोष्यतां चापि भवद्भिरद्य ॥ १४
श्रुत्वा तु तेषां द्विजसत्तमानां
कृतोपवासा रजनीं नरेन्द्राः ।
ऊषुः प्रतीताः कुशसंस्तरेषु
यथाऽध्वरे प्रज्वलिता हुताशाः ॥१५
ततो निशा सा व्यगमन्महात्मनां
संशृण्वतां विप्रसमीरिता गिरः ।
ततः प्रभाते विमले द्विजर्षभा
वचोऽब्रुवन्धर्मसुतं नराधिपम् ॥ १६

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि द्रव्यानयनोपक्रमे चतुःषष्टितमोऽध्यायः ॥ ६४ ॥

६५

ब्राह्मणा ऊचुः
क्रियतामुपहारोऽद्य त्र्यम्बकस्य महात्मनः
दत्वोपहारं नृपते ततः स्वार्थं यतामहे ॥ १
श्रुत्वा तु वचनं तेषां ब्राह्मणानां युधिष्ठिरः ।
गिरीशस्य यथान्यायमुपहारमुपाहरत् ॥ २

६४

ततस्ते इति ॥१॥ अग्निवेश्य धौम्यम् ॥८॥ षट्पदं षट्पदानि पदनीयानि राजमार्गा यत्र एको दक्षिणोत्तरस्तस्योभयतो द्वौ तादृशावेव एवं पूर्वपश्चिमे एक तस्योभयतोऽपि द्वावेवेति षट् राजमार्गा । सख्यानानि सस्थानानि नवखंडानीति यावत् । षट्पथं नवसंस्थानमिति प्राचीनपाठ स्वत्रार्थ ॥१०॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे चतुःषष्टितमोऽध्याय. ॥६४॥

६५

क्रियतामिति ॥ १ ॥

आज्येन तर्पयित्वाऽग्निं विधिवत्संस्कृतेन च
मन्त्रसिद्धं चरुं कृत्वा पुरोधाः स ययौ तदा ॥
स गृहीत्वा सुमनसो मन्त्रपूता जनाधिप ।
मोदकैः पायसेनाथ मांसैश्चोपाहरद्बलिम् ॥ ४
सुमनोभिश्च चित्राभिर्लाजैरुच्चावचैरपि ।
सर्वं स्विष्टकृतं कृत्वा विधिवद्वेदपारगः ॥ ५
किंकराणां ततः पश्चाच्चकार बलिमुत्तमम् ।
यक्षेन्द्राय कुबेराय मणिभद्राय चैव ह ॥ ६
तथान्येषां च यक्षाणां भूतानां पतयश्च ये ।
कृसरेण च मांसेन निवापैस्तिलसंयुतैः ॥ ७
ओदनं कुम्भशः कृत्वा पुरोधाः समुपाहरत् ।
ब्राह्मणेभ्यः सहस्राणि गवां दत्वा तु भूमिपः ॥ ८
भक्तंचराणां भूतानां व्यादिदेश बलिं तदा ।
धूपगन्धनिरुद्धं तत्सुमनोभिश्च संवृतम् ॥ ९
शुशुभे स्थानमत्यर्थं देवदेवस्य पार्थिव ।
कृत्वा पूजां तु रुद्रस्य गणानां चैव सर्वशः ॥
ययौ व्यासं पुरस्कृत्य नृपो रत्ननिधिं प्रति ।
पूजयित्वा धनाध्यक्षं प्रणिपत्याभिवाद्य च ॥
सुमनोभिर्विचित्राभिरपूपैः कृसरेण च ।
शंखादींश्च निधीन्सर्वान्निधिपालांश्च सर्वशः
अर्चयित्वा द्विजाग्र्यान्स
स्वस्ति वाच्य च वीर्यवान् ।
तेषां पुण्याहघोषेण
तेजसा समवस्थितः ॥ १३
प्रीतिमान्स कुरुश्रेष्ठः स्नानयामास तद्धनम् ।
ततः पात्रीः सकरका बहुरूपा मनोरमाः १४
भृंगाराणि कटाहानि कलशान्वर्धमानकान् ।
बहूनि च विचित्राणि भाजनानि सहस्रशः ॥
उद्धारयामास तदा धर्मराजो युधिष्ठिरः ।
तेषां रक्षणमप्यासीन्महान्करपुटस्तथा ॥ १६
नद्धं च भाजनं राजंस्तुलार्धमभवन्नृप ।
वाहनं पाण्डुपुत्रस्य तत्रासीत्तु विशांपते ॥१७
षष्टिरुष्ट्रसहस्राणि शतानि द्विगुणा हयाः ।
वारणाश्च महाराज सहस्रशतसंमिताः ॥ १८
शकटानि रथाश्चैव तावदेव करेणवः ।
खराणा पुरुषाणां च परिसंख्या न विद्यते १९
एतद्वित्तं तदभवद्यदुद्धे युधिष्ठिरः ।
षोडशाष्टौ चतुर्विंशत्सहस्रं भारलक्षणम् ॥ २०
एतेष्वादाय तद्द्रव्यं पुनरभ्यर्च्य पाण्डवः ।
महादेवं प्रति ययौ पुरं नागाह्वयं प्रति ॥ २१
द्वैपायनाभ्यनुज्ञातः पुरस्कृत्य पुरोहितम् ।
गोयुते गोयुते चैव न्यवसत्पुरुषर्षभः ॥ २२
सा पुराभिमुखा राजन्वाह महती चमूः ।
कृच्छ्राद्द्रविणभारार्ता हर्षयन्ती कुरूद्वहान् ॥२३

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि द्रव्यानयने पञ्चषष्टितमोऽध्यायः ॥ ६५ ॥

६६

वैशम्पायन उवाच ।
एतस्मिन्नेव काले तु वासुदेवोऽपि वीर्यवान्
उपायाद्वृष्णिभिः सार्धं पुरं वारणसाह्वयम् ॥१
समयं वाजिमेधस्य विदित्वा पुरुषर्षभः ।
यथोक्तो धर्मपुत्रेण प्रव्रजन्स्वपुरीं प्रति ॥ २

पात्री महान्ति ओदनोद्धरणपात्राणि करका अल्पघटा ॥ १४ ॥ भृंगाराणि गडुकान् वर्धमानकान् शरावाणि ॥ १५ ॥ करपुट करसंपुटाकारं द्विदलभाजन उष्ट्रादिवाह्यं संदूख इति प्रसिद्धं ॥ १६ ॥ नद्धं उष्ट्रादीनामुपरि बद्धं तुलार्धं यत्र पुरुषस्यार्धं माति उभयतो मिलित्वा तुल्यमात्रं भार वाहनं भारस्येति शेष ॥ १७ ॥ षोडशाष्टाविति यथायोग्य उष्ट्रस्य भारोऽष्टौ सहस्रं सुवर्णा शकटस्य षोडश गजस्य चतुर्विंशतिरित्येवं भारलक्षणं एवं हयखरमनुष्याणा यथासंभवं योज्यम् ॥ २० ॥ गोयुते गोयुते भाराक्रातवाहनत्वात् गव्यूतौ गव्यूतौ प्रत्यहं क्रोशद्वयप्रमाणमित्यर्थ ॥ २२ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे पंचषष्टितमोऽध्याय ॥ ६५ ॥

६६

एतस्मिन्निति ॥ १ ॥

रौक्मिणेयेन सहितो युयुधानेन चैव ह ।
चारुदेष्णेन साम्बेन गदेन कृतवर्मणा ॥ ३
सारणेन च वीरेण निशठेनोल्मुकेन च ।
बलदेवं पुरस्कृत्य सुभद्रासहितस्तदा ॥ ४
द्रौपदीमुत्तरां चैव पृथां चाप्यवलोककः ।
समाश्वासयितुं चापि क्षत्रिया निहतेश्वराः ५
तानागतान्समीक्ष्यैव धृतराष्ट्रो महीपतिः ।
प्रत्यगृह्णाद्यथान्यायं विदुरश्च महामनाः ॥ ६
तत्रैव न्यवसत्कृष्णः सर्चितः पुरुषोत्तमः ।
विदुरेण महातेजास्तथैव च युयुत्सुना ॥ ७
वसत्सु वृष्णिवीरेषु तत्राथ जनमेजय ।
जज्ञे तव पिता राजन्परिक्षित्परवीरहा ॥ ८
स तु राजा महाराज ब्रह्मास्त्रेणावपीडितः ।
शवो बभूव निश्चेष्टो हर्षशोकविवर्धनः ॥ ९
हृष्टानां सिंहनादेन जनानां तत्र निःस्वनः ।
प्रविश्य प्रदिशः सर्वाः पुनरेव व्युपारमत १०
ततः सोतित्वरः कृष्णो विवेशान्तःपुरं तदा
युयुधानद्वितीयो वै व्यथितेन्द्रियमानसः ११
ततस्त्वरितमायान्तीं ददर्श स्वां पितृष्वसाम्
क्रोशन्तीमभिधावेति वासुदेवं पुनः पुनः १२
पृष्ठतो द्रौपदीं चैव सुभद्रां च यशस्विनीम् ।
सविक्रोशं सकरुणं बान्धवानां स्त्रियो नृप ॥
ततः कृष्णं समासाद्य कुन्ती भोजसुता तदा ।
प्रोवाच राजशार्दूल बाष्पगद्गदया गिरा १४
वासुदेव महाबाहो सुप्रजा देवकी त्वया ।
त्वं नो गतिः प्रतिष्ठा च त्वदायत्तमिदं कुलम्
यदुप्रवीर योऽयं ते स्वस्रीयस्यात्मजः प्रभो ।
अश्वत्थाम्ना हतो जातस्तमुज्जीवय केशव १६
त्वया ह्येतत्प्रतिज्ञातमैषीके यदुनन्दन ।
अहं सञ्जीवयिष्यामि मृतं जातमिति प्रभो १७
सोऽयं जातो मृतस्तात पश्यैनं पुरुषर्षभ ।
उत्तरां च सुभद्रां च द्रौपदीं मां च माधव १८
धर्मपुत्रं च भीमं च फाल्गुनं नकुलं तथा ।
सहदेवं च दुर्धर्ष सर्वान्नस्त्रातुमर्हसि ॥ १९
अस्मिन्प्राणाः समायत्ताः पाण्डवानां ममैव च
पांडोश्च पिण्डो दाशार्ह तथैव श्वशुरस्य मे२०
अभिमन्योश्च भद्रं ते प्रियस्य सदृशस्य च ।
प्रियमुत्पादयाद्य त्वं प्रेतस्यापि जनार्दन २१
उत्तरा हि पुरोक्तं वै कथयत्यरिसूदन ।
अभिमन्योर्वचः कृष्ण प्रियत्वात्तन्न संशयः २२
अब्रवीत्किल दाशार्हं वैराटीमार्जुनिस्तदा ।
मातुलस्य कुलं भद्रे तव पुत्रो गमिष्यति २३
गत्वा वृष्ण्यन्धककुलं धनुर्वेदं ग्रहीष्यति ।
अस्त्राणि च विचित्राणि नीतिशास्त्रं च केवलम्
इत्येतत्प्रणयात्तात सौभद्रः परवीरहा ।
कथयामास दुर्धर्षस्तथा चैतन्न संशयः ॥ २५
तास्त्वां वयं प्रणम्येह याचामो मधुसूदन ।
कुलस्यास्य हितार्थं तं कुरु कल्याणमुत्तमम्
एवमुक्त्वा तु वार्ष्णेयं पृथा पृथुललोचना ।
उच्छ्रित्य बाहू दुःखार्ता ताश्चान्याः प्रापतन्भुवि
अब्रुवंश्च महाराज सर्वाः साश्रुविलेक्षणाः ।
स्वस्रीयो वासुदेवस्य मृतो जात इति प्रभो ॥
एवमुक्ते ततः कुन्तीं पर्यगृह्णाज्जनार्दनः ।
भूमौ निपतितां चैनां सान्त्वयामास भारत२९

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि परिक्षिज्जन्मकथने षट्षष्टितमोऽध्यायः ॥ ६६ ॥

६७

वैशम्पायन उवाच ।
उत्थितायां पृथायां तु सुभद्रा भ्रातरं तदा
दृष्ट्वा चुक्रोश दुःखार्ता वचनं चेदमब्रवीत् ॥ १
पुण्डरीकाक्ष पश्य त्वं पौत्रं पार्थस्य धीमतः
परिक्षीणेषु कुरुषु परिक्षीणं गतायुषम् ॥ २

क्षत्रियाः स्त्रियः ॥ ५ ॥ मातुलस्य अभिमन्युमातुलस्य कृष्णस्य तत्तुल्यपराक्रमस्तदर्थानश्चेत्यर्थः ॥ २३ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे षट्षष्टितमोऽध्यायः ॥ ६६ ॥

६७

उत्थितायामिति ॥ १ ॥

इषीका द्रोणपुत्रेण भीमसेनार्थमुद्यता ।
सोत्तरायां निपतिता विजये मयि चैव ह ३
सेयं विदीर्णे हृदये मयि तिष्ठति केशव ।
यन्न पश्यामि दुर्धर्ष सहपुत्रं तु तं प्रभो ॥ ४
किं नु वक्ष्यति धर्मात्मा धर्मराजो युधिष्ठिरः
भीमसेनार्जुनौ चापि माद्रवत्याः सुतौ च तौ ५
श्रुत्वाभिमन्योस्तनयं जातं च मृतमेव च ।
मुषिता इव वार्ष्णेय द्रोणपुत्रेण पाण्डवाः ६
अभिमन्युः प्रियः कृष्ण भ्रातॄणां नात्र संशयः
ते श्रुत्वा किं नु वक्ष्यन्ति द्रोणपुत्रास्त्रनिर्जिताः
भविताऽतः परं दुःखं किं तदन्यज्जनार्दन ।
अभिमन्योः सुतात्कृष्ण मृताज्जातादरिन्दम ८
साहं प्रसादये कृष्ण त्वामद्य शिरसा नता ।
पृथेयं द्रौपदी चैव ताः पश्य पुरुषोत्तम ॥ ९
यदा द्रोणसुतो गर्भान्पाण्डूनां हन्ति माधव
तदा किल त्वया द्रौणिः क्रुद्धेनोक्तोरिमर्दन१०
अकामं त्वां करिष्यामि ब्रह्मबन्धो नराधम ।
अहं सञ्जीवयिष्यामि किरीटितनयात्मजम्
इत्येतद्वचनं श्रुत्वा जानानाऽहं बलं तव ।
प्रसादये त्वां दुर्धर्ष जीवतामभिमन्युजः १२
यद्येतत्त्वं प्रतिश्रुत्य न करोषि वचः शुभम् ।
सकलं वृष्णिशार्दूल मृतां मामवधारय १३
अभिमन्योः सुतो वीर न सञ्जीवति यद्ययम् ।
जीवति त्वयि दुर्धर्ष किं करिष्याम्यहं त्वया
सञ्जीवयैनं दुर्धर्ष मृतं त्वमभिमन्युजम् ।
सदृशाक्षसुत वीर सस्यं वर्षान्निवांबुदः ॥ १५
त्वं हि केशव धर्मात्मा सत्यवान्सत्यविक्रमः
स तां वाचमृतां कर्तुमर्हसि त्वमरिन्दम ॥ १६
इच्छन्नपि हि लोकांस्त्रीन्
जीवयेथा मृतानिमान् ।
किं पुनर्दायितं जातं
स्वस्रीयस्यात्मजं मृतम् ॥ १७
प्रभावज्ञास्मि ते कृष्ण तस्मात्त्वां याचयाम्यहम्
कुरुष्व पाण्डुपुत्राणामिमं परमनुग्रहम् ॥ १८
स्वसेति वा महाबाहो हतपुत्रेति वा पुनः ।
प्रपन्ना मामियं चोते दयां कर्तुमिहार्हसि ॥ १९

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि सुभद्रावाक्ये सप्तषष्टितमोऽध्यायः ॥ ६७ ॥

६८

वैशम्पायन उवाच ।
एवमुक्तस्तु राजेन्द्र केशिहा दुःखमूर्च्छितः
तथेति व्याजहारोच्चैर्हृदयन्निव तं जनम् ॥ १
वाक्येनैतेन हि तदा तं जनं पुरुषर्षभः ।
ह्लादयामास स विभुर्धर्मार्तं सलिलैरिव ॥ २
ततः स प्राविशत्तूर्णं जन्मवेश्म पितुस्तव ।
अर्चितं पुरुषव्याघ्र सितैर्माल्यैर्यथाविधि ॥ ३
अपां कुम्भैः सुपूर्णैश्च विन्यस्तैः सर्वतोदिशम्
घृतेन तिन्दुकालातैः सर्षपैश्च महाभुज ॥ ४
अस्त्रैश्च विमलैर्न्यस्तैः पावकैश्च समन्ततः ।
वृद्धाभिश्चापि रामाभिः परिचारार्थमावृतम्
दक्षैश्च परितो धीर भिषग्भिः कुशलैस्तथा ।
ददर्श च स तेजस्वी रक्षोघ्नान्यपि सर्वशः ६
द्रव्याणि स्थापितानि स्म विधिवत्कुशलैर्जनैः
तथायुक्तं च तद्दृष्ट्वा जन्मवेश्म पितुस्तव ॥ ७
हृष्टोऽभवद्धृषीकेशः साधु साध्विति चाब्रवीत्
तथा ब्रुवति वार्ष्णेये प्रहृष्टवदने तदा ॥ ८
द्रौपदी त्वरिता गत्वा वैराटीं वाक्यमब्रवीत्
अयमायाति ते भद्रे श्वशुरो मधुसूदनः ॥ ९
पुराणर्षिरचिन्त्यात्मा समीपमपराजितः ।
साऽपि बाष्पकलां वाचं निगृह्याश्रूणि चैव ह

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्तषष्टितमोऽध्याय. ॥ ६७ ॥

६८

एवमुक्त इति ॥ १ ॥ घृतेन सिक्तैरिति शेष.॥ ४ ॥

सुसंवीताऽभवद्देवी देववत्कृष्णमीयुषी।
सा तथा दूयमानेन हृदयेन तपस्विनी ॥ ११
दृष्ट्वा गोविन्दमायान्तं कृपणं पर्यदेवयत।
पुण्डरीकाक्ष पश्यावां बालेन हि विनाकृतौ
अभिमन्युं च मां चैव हतौ तुल्यं जनार्दन १२
वार्ष्णेय मधुहन्वीर शिरसा त्वां प्रसादये।
द्रोणपुत्रास्त्रनिर्दग्धं जीवयैनं ममात्मजम्॥ १३
यदि स्म धर्मराज्ञा वा भीमसेनेन वा पुनः।
त्वया वा पुण्डरीकाक्ष वाक्यमुक्तमिदं भवेत्
अजानतीमिषीकेयं जनित्रीं हन्त्विति प्रभो।
अहमेव विनष्टा स्यां +नैतदेवंगते भवेत् ॥ १५
गर्भस्थस्यास्य बालस्य ब्रह्मास्त्रेण निपातनम्।
कृत्वा नृशंसं दुर्बुद्धिर्द्रौणिः किं फलमश्नुते ॥
सा त्वां प्रसाद्य शिरसा याचे शत्रुनिबर्हणम्
प्राणांस्त्यक्ष्यामि गोविन्द नायं सञ्जीवते यदि

अस्मिन्हि बहवः साधो ये ममासन्मनोरथाः
ते द्रोणपुत्रेण हताः क नु जीवामि केशव ॥
आसीन्मम मतिः कृष्ण पुत्रोत्सङ्गे जनार्दन।
अभिवादयिष्ये हृष्टेति तादृग्वितथीकृतम् ॥
चपलाक्षस्य दायादे मृतेऽस्मिन्पुरुषर्षभ।
विफला मे कृताः कृष्ण हृदि सर्वे मनोरथाः
चपलाक्षः किलातीव प्रियस्ते मधुसूदन।
सुतं पश्य त्वमस्यैनं ब्रह्मास्त्रेण निपातितम्॥
कृतघ्नोऽयं नृशंसोऽयं यथाऽस्य जनकस्तथा ।
यः पाण्डवीं श्रियं त्यक्त्वा गतोद्य यमसादनं
मया चैतत्प्रतिज्ञातं रणमूर्धनि केशव।
अभिमन्यौ हते वीर त्वामेष्यामीति राधेति
तच्च नाकरवं कृष्ण नृशंसा जीवितप्रिया।
इदानीं मां गतां तत्र किं नु वक्ष्यति फाल्गुनिः

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि उत्तरावाक्ये
अष्टषष्टितमोऽध्यायः ॥ ६८ ॥

६९

वैशम्पायन उवाच।
सैवं विलप्य करुणं सोन्मादेव तपस्विनी।
उत्तरा न्यपतद्भूमौ कृपणा पुत्रगृद्धिनी ॥ १
तां तु दृष्ट्वा निपतितां हतपुत्रपरिच्छदाम्।
चुक्रोश कुन्ती दुःखार्ता सर्वाश्च भरतस्त्रियः
मुहूर्तमिव राजेन्द्र पाण्डवानां निवेशनम्।
अप्रेक्षणीयमभवदार्तस्वनविनादितम् ॥ ३
सा मुहूर्तं च राजेन्द्र पुत्रशोकाभिपीडिता।
कश्मलाभिहता वीर वैराटी त्वभवत्तदा ॥४
प्रतिलभ्य तु सा संज्ञामुत्तरा भरतर्षभ।
अङ्कमारोप्य तं पुत्रमिदं वचनमब्रवीत् ॥ ५
धर्मज्ञस्य सुतः स त्वमधर्मं नावबुध्यसे।
यस्त्वं वृष्णिप्रवीरस्य कुरुषे नाभिवादनम् ६
पुत्र गत्वा मम वचो ब्रूयास्त्व पितर त्विदम्
दुर्मरं प्राणिनां वीर काले प्राप्ते कथञ्चन ॥ ७

याहं त्वया विनाद्येह पत्या पुत्रेण चैव ह।
मर्तव्ये सति जीवामि हतस्वास्तरकिञ्चना ८
अथवा धर्मराज्ञाऽहमनुज्ञाता महाभुज।
भक्षयिष्ये विष घोरं प्रवेक्ष्ये वा हुताशनम् ९
अथवा दुमरं तात यदिद मे सहस्रधा।
पतिपुत्रविहीनाया हृदयं न विदीर्यते ॥ १०
उत्तिष्ठ पुत्र पश्येमां दुःखितां प्रपितामहीम्।
आर्तामुपप्लुता दीनां निमग्नां शोकसागरे ११
आर्यां च पश्य पाञ्चाली
सात्वतीं च तपस्विनीम्।
मां च पश्य सुदुःखार्तां
व्याधविद्धां मृगीमिव ॥ १२
उत्तिष्ठ पश्य वदनं लोकनाथस्य धीमतः।
पुण्डरीकपलाशाक्षं पुरेव चपलेक्षणम् ॥ १३

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे अष्टषष्टितमोऽध्याय ॥ ६८ ॥
+ नायमेवं गतो भवेत् इति पाठ ।

६९
सैवमिति ॥ १ ॥ पुरा यथा चपलेक्षणमभिमन्युमहं पश्यामि तथा पुंडरीकपलाशाक्ष कृष्णं पश्येति संबंधः १३

एवं विप्रलपन्तीं तु दृष्ट्वा निपतितां पुनः ।
उत्तरां तां स्त्रियः सर्वाः पुनरुत्थापयंस्ततः १४
उत्थाय च पुनर्धैर्यात्तदा मत्स्यपतेः सुता ।
प्राञ्जलिः पुण्डरीकाक्षं भूमावेवाभ्यवादयत् ॥
श्रुत्वा स तस्या विपुलं विलापं पुरुषर्षभः ।
उपस्पृश्य ततः कृष्णो ब्रह्मास्त्रं प्रत्यसंहरत् १६
प्रतिजज्ञे च दाशार्हस्तस्य जीवितमच्युतः ।
अब्रवीच्च विशुद्धात्मा सर्वं विश्रावयन् जगत्
न ब्रवीम्युत्तरे मिथ्या सत्यमेतद्भविष्यति ।
एष सञ्जीवयाम्येन पश्यतां सर्वदेहिनाम् १८
नोक्तपूर्वं मया मिथ्या स्वैरेष्वपि कदाचन ।
न च युद्धात्परावृत्तस्तथा सञ्जीवतामयम् १९
यथा मे दयितो धर्मो ब्राह्मणश्च विशेषतः ।
अभिमन्योः सुतो जातो मृतो जीवत्वयं तथा
यथाहं नाभिजानामि विजये तु कदाचन ।
विरोधं तेन सत्येन मृतो जीवत्वयं शिशुः ॥
यथा सत्यं च धर्मश्च मयि नित्यं प्रतिष्ठितौ ।
तथा मृतः शिशुरयं जीवतादभिमन्युजः ॥२२
यथा कंसश्च केशी च धर्मेण निहतौ मया ।
तेन सत्येन बालोऽयं पुनः सञ्जीवतामयम् ॥
इत्युक्तो वासुदेवेन स बालो भरतर्षभ ।
शनैः शनैर्महाराज प्रास्पन्दत सचेतनः ॥ २४

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि परिक्षित्सञ्जीवने ऊनसप्ततितमोऽध्यायः ॥ ६९ ॥

७०

वैशम्पायन उवाच ।

ब्रह्मास्त्रं तु यदा राजन् कृष्णेन प्रतिसंहृतम्
तदा तद्वेश्म त्वत्पित्रा तेजसाऽभिविदीपितम्
ततो रक्षांसि सर्वाणि नेशुस्त्यक्त्वा गृहं तु तत्
अन्तरिक्षे च वागासीत्साधु केशव साध्विति
तदस्त्रं ज्वलितं चापि पितामहमगात्तदा ।
ततः प्राणान्पुनर्लेभे पिता तव नरेश्वर ॥ ३
व्यचेष्टत च बालोऽसौ यथोत्साहं यथाबलम्
बभूवुर्मुदिता राजंस्ततस्ता भरतस्त्रियः ॥ ४
ब्राह्मणा वाचयामासुर्गोविन्दस्यैव शासनात् ।
ततस्ता मुदिताः सर्वाः प्रशशंसुर्जनार्दनम् ५
स्त्रियो भरतसिंहानां नावं लब्ध्वेव पारगाः ।
कुन्ती द्रुपदपुत्री च सुभद्रा चोत्तरा तथा ॥ ६
स्त्रियश्चान्या नृसिंहानां बभूवुर्हृष्टमानसाः ।
तत्र मल्ला नटाश्चैव ग्रन्थिकाः सौख्यशायिकाः
सूतमागधसंघाश्चाप्यस्तुवंस्तं जनार्दनम् ।
कुरुवंशस्तवाख्याभिराशीर्भिर्भरतर्षभ ॥ ८
उत्थाय तु यथाकालमुत्तरा यदुनन्दनम् ।
अभ्यवादयत प्रीता सह पुत्रेण भारत ॥ ९
तस्य कृष्णो ददौ हृष्टो बहुरत्नं विशेषतः ।
तथान्ये वृष्णिशार्दूला नाम चास्याकरोत्प्रभुः
पितुस्तव महाराज सत्यसंधो जनार्दनः ।
परिक्षीणे कुले यस्माज्जातोऽयमभिमन्युजः ११
परिक्षिदिति नामास्य भवत्वित्यब्रवीत्तदा ।
सोऽवर्धत यथाकालं पिता तव जनाधिप १२
मनःप्रह्लादनश्चासीत्सर्वलोकस्य भारत ।
मासजातस्तु ते वीर पिता भवति भारत १३
अथाजग्मुः सुबहुलं रत्नमादाय पाण्डवाः ।
तान्समीपगतान् श्रुत्वा निर्ययुर्वृष्णिपुंगवाः १४

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे ऊनसप्ततितमोऽध्यायः ॥ ६९ ॥

७०

ब्रह्मास्त्रमिति ॥ १ ॥ वाचयामासुः स्वस्तीति शेषः ॥ ५ ॥ ग्रंथिका दैवज्ञा 'ग्रंथिकस्तु करीरे स्याद्दैवज्ञे गुग्गुलुद्रुमे' इति विश्वलोचनः । सुखावहं सौख्यं शयनं इति पृच्छंति ते सौख्यशायिनिका पृच्छतौ सुज्ञातादिभ्य इति ठक् अनुशतिकादि ॥ ७ ॥ कुरुवंशस्य स्तवं आचक्षते ताभिः कुरुवंशस्तवाख्याभिः ॥ ८ ॥

अलंचक्रुश्च माल्यौघैः पुरुषा नागसाह्वयम ।
पताकाभिर्विचित्राभिर्ध्वजैश्च विविधैरपि ॥
वेश्मानि समलंचक्रुः पौराश्चापि जनेश्वर ।
देवतायतनानां च पूजाः सुविविधास्तथा १६
सन्दिदेशाथ विदुरः पाण्डुपुत्रप्रियेप्सया ।
राजमार्गाश्च तत्रासन्सुमनोभिरलंकृताः ॥ १७
शुशुभे तत्पुरं चापि समुद्रौघनिभस्वनम् ।
नर्तकैश्चापि नृत्यद्भिर्गायकानां च निःस्वनैः ॥
आसीद्विश्रवणस्येव निवासस्तत्पुरं तदा ।
बन्दिभिश्च नरै राजन् स्त्रीसहायैश्च सर्वशः १९
तत्र तत्र विविक्तेषु समन्तादुपशोभितम् ।
पताका ध्रूयमानाश्च समन्तान्मातरिश्वना २०
अदृश्यन्निव तदा कुरून्वै दक्षिणोत्तरान् ।
अघोषयस्तदा चापि पुरुषा राजधूर्गताः ।
सर्वराष्ट्रविहारोऽद्य रत्नाभरणलक्षणः ॥ २१

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि पाण्डवागमने सप्ततितमोऽध्यायः ॥ ७० ॥

७१

वैशम्पायन उवाच ।
तान्समीपगतान् श्रुत्वा पाण्डवान् शत्रुकर्शनः
वासुदेवः सहामात्यः प्रययौ ससुहृद्गणः ॥ १
ते समेत्य यथान्यायं प्रत्युद्याता दिदृक्षया ।
ते समेत्य यथाधर्मं पांडवा वृष्णिभिः सह॥ २
विविशुः सहिता राजन्पुरं वारणसाह्वयम् ।
महतस्तस्य सैन्यस्य खुरनेमिस्वनेन ह ॥ ३
द्यावापृथिव्योः खं चैव सर्वमासीत्समावृतम्।
ते कोशानग्रतः कृत्वा विविशुः स्वपुरं तदा४
पाण्डवाः प्रीतमनसः सामात्याः ससुहृद्गणाः।
ते समेत्य यथान्यायं धृतराष्ट्रं जनाधिपम्॥ ५
कीर्तयन्तः स्वनामानि तस्य पादौ ववंदिरे ।
धृतराष्ट्रादनु च ते गान्धारीं सुबलात्मजाम्६
कुन्तीं च राजशार्दूल तदा भरतसत्तम ।
विदुरं पूजयित्वा च वैश्यापुत्रं समेत्य च ॥७
पूज्यमानाः स्म ते वीरा व्यरोचन्त विशाम्पते
ततस्तत्परमाश्चर्यं विचित्रं महदद्भुतम् ॥ ८
शुश्रुवुस्ते तदा वीराः पितुस्ते जन्म भारत ।
तदुपश्रुत्य तत्कर्म वासुदेवस्य धीमतः ॥ ९
पूजार्हं पूजयामासुः कृष्णं देवकिनन्दनम् ।
ततः कतिपयाहस्य व्यासः सत्यवतीसुतः१०
आजगाम महातेजा नगरं नागसाह्वयम् ।
तस्य सर्वे यथान्यायं पूजाश्चक्रुः कुरूद्वहाः ११
सह वृष्ण्यन्धकव्याघ्रैरुपासाञ्चक्रिरे तदा ।
तत्र नानाविधाकाराः कथाः समभिकीर्त्य वै
युधिष्ठिरो धर्मसुतो व्यासं वचनमब्रवीत् ।
भवत्प्रसादाद्भगवन् यदिदं रत्नमाहृतम् ॥ १३
उपयोक्तुं तदिच्छामि वाजिमेधे महाक्रतौ ।
तमनुज्ञातुमिच्छामि भवता मुनिसत्तम ।
त्वदधीना वयं सर्वे कृष्णस्य च महात्मनः१४

व्यास उवाच ।
अनुजानामि राजंस्त्वां क्रियतां यदनन्तरम्
यजस्व वाजिमेधेन विधिवद्दक्षिणावता ॥ १५
अश्वमेधो हि राजेन्द्र पावनः सर्वपाप्मनाम् ।
तेनेष्ट्वा त्वं विपाप्मा वै भविता नात्र संशयः॥

वैशम्पायन उवाच ।
इत्युक्तः स तु धर्मात्मा कुरुराजो युधिष्ठिरः
अश्वमेधस्य कौरव्य चकाराहरणे मतिम् ॥ १७
समनुज्ञाप्य तत्सर्वं कृष्णद्वैपायनं नृपः ।
वासुदेवमथाभ्येत्य वाग्मी वचनमब्रवीत् ॥१८
देवकी सुप्रजा देवी त्वया पुरुषसत्तम ।
यद्भ्यां त्वां महाबाहो तत्कृथास्त्वमिहाच्युत
त्वत्प्रभावार्जितान्भोगानश्नीम यदुनन्दन ।
पराक्रमेण बुद्ध्या च त्वयेयं निर्जिता मही २०

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्ततितमोऽध्याय ॥ ७० ॥

७१

तान्समीपगतानिति ॥ १ ॥ द्यावापृथिव्योः संबधि ख आकाशं अवकाशमिति यावत् ॥ ४ ॥ वैश्यापुत्रं युयुत्सुम् ॥ ७ ॥ पावन नाशक ॥१६॥

दीक्षयस्व त्वमात्मानं त्वं हि नः परमो गुरुः
त्वय्यीष्टवति दाशार्ह विपाप्मा भविता ह्यहम्
त्वं हि यज्ञोक्षरः सर्वस्त्व धर्मस्त्वं प्रजापतिः
त्व गतिः सर्वभूतानामिति मे निश्चिता मतिः
वासुदेव उवाच ।
त्वमेवैतन्महाबाहो वक्तुमर्हस्यरिन्दम ।
त्वं गतिः सर्वभूतानामिति मे निश्चिता मतिः
त्वं चाद्य कुरुवीराणां धर्मेण हि विराजसे ।
गुणाभूताः स्म ते राजंस्त्वं नो राजा गुरुर्मतः
यजस्व मदनुज्ञातः प्राप्य एष क्रतुस्त्वया ।
युनक्तु नो भवान्कार्ये यत्र वांछासि भारत २५
सत्यं ते प्रतिजानामि सर्वं कर्तास्मि तेऽनघ।
भीमसेनार्जुनौ चैव तथा माद्रवतीसुतौ ।
इष्टवन्तो भविष्यन्ति त्वयीष्टवति पार्थिवे २६

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि कृष्णव्यासानुज्ञायां एकसप्ततितमोऽध्यायः ॥ ७१ ॥

७२

वैशम्पायन उवाच ।
एवमुक्तस्तु कृष्णेन धर्मपुत्रो युधिष्ठिरः ।
व्यासमामन्त्र्य मेधावी ततो वचनमब्रवीत्॥१
यदा कालं भवान्वेत्ति हयमेधस्य तत्त्वतः ।
दीक्षयस्व तदा मां त्वं त्वय्यायत्तो हि मे क्रतुः
व्यास उवाच ।
अहं पैलोऽथ कौन्तेय याज्ञवल्क्यस्तथैव च
विधानं यद्यथाकालं तत्कर्तारो न संशयः ३
चैत्र्या हि पौर्णमास्यां तु तव दीक्षा भविष्यति
संभाराः संभ्रियन्तां च यज्ञार्थं पुरुषर्षभ ॥ ४
अश्वविद्याविदश्चैव सूता विप्राश्च तद्विदः ।
मेध्यमश्वं परीक्षन्तां तव यज्ञार्थसिद्धये ॥ ५
तमुत्सृज यथाशास्त्रं पृथिवीं सागराम्बराम् ।
स पर्येतु यशो दीप्तं तव पार्थिव दर्शयन् ॥ ६
वैशम्पायन उवाच ।
इत्युक्तः स तथेत्युक्त्वा पाण्डवः पृथिवीपतिः
चकार सर्वं राजेन्द्र यथोक्तं ब्रह्मवादिना ॥ ७
संभाराश्चैव राजेन्द्र सर्वे सकल्पिताऽभवन ।
स संभारान्समाहृत्य नृपो धर्मसुतस्तदा ॥ ८
न्यवेदयदमेयात्मा कृष्णद्वैपायनाय वै ।
ततोऽब्रवीन्महातेजा व्यासो धर्मात्मजं नृपम्
यथाकाल यथायोग सज्जाः स्म तव दीक्षणे ।
स्फ्यश्च कूर्चश्च सौवर्णो यच्चान्यदपि कौरव ॥
तत्र योग्य भवेत्किञ्चिद्रौक्मं तत क्रियतामिति
अश्वश्चोत्सृज्यतामद्य पृथ्यामथ यथाक्रमम् ।
सुगुप्तं चरतां चापि यथाशास्त्रं यथाविधि ११
युधिष्ठिर उवाच ।
अयमश्वो यथा ब्रह्मन्नुत्सृष्टः पृथिवीमिमाम् ।
चरिष्यति यथाकामं तत्र वै सविधीयताम्१२
पृथिवी पर्यटन्तं हि तुरगं कामचारिणम् ।
कः पालयेदिति मुने तद्भवान्वक्तुमर्हति ॥ १३
वैशम्पायन उवाच ।
इत्युक्तः स तु राजेन्द्र कृष्णद्वैपायनोऽब्रवीत्
भीमसेनादवरजः श्रेष्ठः सर्वधनुष्मताम् ॥ १४
जिष्णुः सहिष्णुर्धृष्णुश्च स एनं पालयिष्यति
शक्तः स हि महीं जेतुं निवातकवचान्तकः ॥
तस्मिन् ह्यस्त्राणि दिव्यानि दिव्यं संहननं तथा
दिव्यं धनुश्चेषुधी च स एनमनुयास्यति १६
स हि धर्मार्थकुशलः सर्वविद्याविशारदः ।
यथाशास्त्रं नृपश्रेष्ठ चारयिष्यति ते हयम् १७
राजपुत्रो महाबाहुः श्यामो राजीवलोचनः ।
अभिमन्याः पिता वीरः स एनं पालयिष्यति

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे एकसप्ततितमोऽध्याय ॥ ७१ ॥

७२

एवमुक्त इति ॥ १ ॥ स्फ्य. काष्ठखड्ग स चात्र सौवर्ण कूर्च आसनार्थं कुशमुष्टि सोप्यत्र सौवर्ण ॥१०॥
सुगुप्तं सुरक्षितं यथा स्यात्तथा ॥ ११ ॥

भीमसेनोऽपि तेजस्वी कौन्तेयोऽमितविक्रमः।
समर्थो रक्षितुं राष्ट्रं नकुलश्च विशाम्पते ॥ १९
सहदेवस्तु कौरव्य समाधास्यति बुद्धिमान्
कुटुम्बतन्त्रं विधिवत्सर्वमेव महायशाः ॥ २०
तत्तु सर्वं यथान्यायमुक्तः कुरुकुलोद्वहः।
चकार फाल्गुनं चापि सन्दिदेश हयं प्रति ॥

युधिष्ठिर उवाच।

एह्यर्जुन त्वया वीर हयोऽयं परिपाल्यताम्।
त्वमर्हो रक्षितुं ह्येनं नान्यः कश्चन मानवः २२
ये चापि त्वां महाबाहो प्रत्युद्यान्ति नराधिपाः
तैर्विग्रहो यथा न स्यात्तथा कार्यं त्वयानघ
आख्यातव्यश्च भवता यज्ञोऽयं मम सर्वशः।
पार्थिवेभ्यो महाबाहो समये गम्यतामिति२४

वैशम्पायन उवाच।

एवमुक्त्वा स धर्मात्मा भ्रातरं सव्यसाचिनं
भीमं च नकुलं चैव पुरगुप्तौ समादधत् ॥ २५
कुटुम्बतन्त्रे च तदा सहदेवं युधां पतिम्।
अनुमान्य महीपालं धृतराष्ट्रं युधिष्ठिरः ॥ २६

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि यज्ञसामग्रीसंपादने द्विसप्ततितमोऽध्यायः ॥ ७२ ॥

७३

वैशम्पायन उवाच।

दीक्षाकाले तु संप्राप्ते ततस्ते सुमहर्त्विजः।
विधिवद्दीक्षयामासुरश्वमेधाय पार्थिवम् ॥ १
कृत्वा स पशुबन्धाश्च दीक्षितः पाण्डुनन्दनः
धर्मराजो महातेजाः सहर्त्विग्भिर्व्यरोचत २
हयश्च हयमेधार्थं स्वयं स ब्रह्मवादिना।
उत्सृष्टः शास्त्रविधिना व्यासेनामिततेजसा३
स राजा धर्मराड्राजन्दीक्षितो विबभौ तदा।
हेममाली रुक्मकण्ठः प्रदीप्त इव पावकः ॥ ४
कृष्णाजिनी दण्डपाणिः क्षौमवासाः स धर्मजः
विबभौ द्युतिमान्भूयः प्रजापतिरिवाध्वरे ॥ ५
तथैवास्यर्त्विजः सर्वे तुल्यवेषा विशाम्पते।
बभूवुरर्जुनश्चापि प्रदीप्त इव पावकः ॥ ६
श्वेताश्वः कृष्णसारं तं ससाराश्वं धनञ्जयः।
विधिवत् पृथिवीपाल धर्मराजस्य शासनात्
विक्षिपन् गाण्डिवं राजन्बद्धगोधांगुलित्रवान्
तमश्व पृथिवीपाल मुदा युक्तः ससार च ॥ ८
आकुमारं तदा राजन्नागमत्तत्पुरं विभो।
द्रष्टुकामं कुरुश्रेष्ठं प्रयास्यन्तं धनञ्जयम् ॥ ९
तेषामन्योन्यसंमर्दादूष्मैव समजायत।
दिदृक्षूणां हयं तं च तं चैव हयसारिणम्॥१०
ततः शब्दो महाराज दिशः खं प्रति पूरयन्।
बभूव प्रेक्षतां नृणां कुन्तीपुत्रं धनञ्जयम् ॥ ११
एष गच्छति कौन्तेय तुरगश्चैव दीप्तिमान्।
यमन्वेति महाबाहुः संस्पृशन्धनुरुत्तमम् ॥ १२
एवं शुश्राव वदतां गिरो जिष्णुरुदारधीः।
स्वस्ति तेऽस्तु व्रजारिष्टं पुनश्चैहीति भारत १३
अथापरे मनुष्येन्द्र पुरुषा वाक्यमब्रुवन्।
नैनं पश्याम संमर्दे धनुरेतत्प्रदृश्यते ॥ १४
एतद्धि भीमनिर्ह्रादं विश्रुतं गाण्डिवं धनुः।
स्वस्ति गच्छत्वरिष्टो वै पन्थानमकुतोभयम्
निवृत्तमेनं द्रक्ष्यामः पुनरेष्यति च ध्रुवम्।
एवमाद्या मनुष्याणा स्त्रीणां च भरतर्षभ॥१६
शुश्राव मधुरा वाचः पुनः पुनरुदारधीः।
याज्ञवल्क्यस्य शिष्यश्च कुशलो यज्ञकर्मणि।
प्रायात्पार्थेन सहितः शान्त्यर्थं वेदपारगः ॥
ब्राह्मणाश्च महीपाल बहवो वेदपारगाः ॥ १८
अनुजग्मुर्महात्मानं क्षत्रियाश्च विशाम्पते।
विधिवत्पृथिवीपाल धर्मराजस्य शासनात् ॥

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे द्विसप्ततितमोऽध्याय ॥ ७२ ॥

७३

दीक्षेति ॥ १ ॥ पशुबधान् अश्वमेधस्यारभणीयरूपान् ॥ २ ॥ शिष्यः सोमश्रवा ॥ १७ ॥

पाण्डवैः पृथिवीमश्वो निर्जितामस्रतेजसा ।
चचार स महाराज यथादेशं च सत्तम ॥ २०
तत्र युद्धानि वृत्तानि
यान्यासन्पाण्डवस्य ह ।
तानि वक्ष्यामि ते वीर
विचित्राणि महान्ति च ॥ २१
स हयः पृथिवीं राजन्प्रदक्षिणमवर्तत ।
ससारोत्तरतः पूर्वं तन्निबोध महीपते ॥ २२
*अवमृद्नन्स राष्ट्राणि पार्थिवानां हयोत्तमः
शनैस्तदा परियया श्वेताश्वश्च महारथः ॥ २३
तत्र संगणना नास्ति राज्ञामयुतशस्तदा ।
येऽयुध्यन्त महाराज क्षत्रिया हतबान्धवाः ॥
किराता यवना राजन्बहवोऽसिधनुर्धराः ।
म्लेच्छाश्चान्ये बहुविधाः पूर्वं ये निकृता रणे ॥
आर्याश्च पृथिवीपालाः प्रहृष्टनरवाहनाः ।
समीयुः पाण्डुपुत्रेण बहवो युद्धदुर्मदाः ॥ २६
एवं वृत्तानि युद्धानि तत्र तत्र महीपते ।
अर्जुनस्य महीपालैर्नानादेशसमागतैः ॥ २७
यानि तूभयतो राजन्प्रतप्तानि महान्ति च ।
तानि युद्धानि वक्ष्यामि कौन्तेयस्य तवाऽनघ

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि अश्वानुसरणे त्रिसप्ततितमोऽध्यायः ॥ ७३ ॥

७४

वैशम्पायन उवाच ।
त्रिगर्तैरभवद्युद्धं कृतवैरैः किरीटिनः ।
महारथसमाख्यातैर्हतानां पुत्रबन्धुभिः ॥ १
ते समाज्ञाय संप्राप्तं यज्ञियं तुरगोत्तमम् ।
विषयान्तं ततो वीरा दंशिताः पर्यवारयन् २
रथिनो बद्धतूणीराः सदश्वैः समलंकृतैः ।
परिवार्य हयं राजन् ग्रहीतुं संप्रचक्रमुः ॥ ३
ततः किरीटी सञ्चिन्त्य तेषां तत्र चिकीर्षितम्
वारयामास तान्वीरान्सान्त्वपूर्वमरिन्दमः ४
तदनादृत्य ते सर्वे शरैरभ्यहनंस्तदा ।
तमोरजोभ्यां संछन्नांस्तान्किरीटी न्यवारयत्
तानब्रवीत्ततो जिष्णुः प्रहसन्निव भारत ।
निवर्तध्वमधर्मज्ञाः श्रेयो जीवितमेव च ॥ ६
स हि वीरः प्रयास्यन्वै धर्मराजेन वारितः ।
हतबान्धवा न ते पार्थ हन्तव्याः पार्थिवा इति
स तदा तद्वचः श्रुत्वा धर्मराजस्य धीमतः ।
तान्निवर्तध्वमित्याह न न्यवर्तन्त चापि ते ८
ततस्त्रिगर्तराजानं सूर्यवर्माणमाहवे ।
विचित्य शरजालेन प्रजहास धनञ्जयः ॥ ९
ततस्ते रथघोषेण रथनेमिस्वनेन च ।
पूरयन्तो दिशः सर्वा धनञ्जयमुपाद्रवन् ॥ १०
सूर्यवर्मा ततः पार्थं शराणां नतपर्वणाम् ।
शतान्यमुञ्चद्राजेन्द्र लघ्वस्त्रमभिदर्शयन् ॥११
तथैवान्ये महेष्वासा ये च तस्यानुयायिनः ।
मुमुचुः शरवर्षाणि धनञ्जयवधैषिणः ॥ १२
स तान् ज्यामुखनिर्मुक्तैर्बहुभिः सुबहून् शरान्
चिच्छेद पाण्डवो राजंस्ते भूमौ न्यपतंस्तदा
केतुवर्मा तु तेजस्वी तस्यैवावरजो युवा ।
युयुधे भ्रातुरर्थाय पाण्डवेन यशस्विना ॥ १४
तमापतन्तं संप्रेक्ष्य केतुवर्माणमाहवे ।
अभ्यघ्नन्निशितैर्बाणैर्बीभत्सुः परवीरहा ॥ १५
केतुवर्मण्यभिहते धृतवर्मा महारथः ।
रथेनाशु समुत्पत्य शरैर्जिष्णुमवाकिरत् ॥ १६
तस्य तां शीघ्रतामीक्ष्य तुतोषातीव वीर्यवान्
गुडाकेशो महातेजा बालस्य धृतवर्मणः ॥ १७
न संदधानं ददृशे नाददानं च तं तदा ।
किरन्तमेव स शरान्ददृशे पाकशासनिः ॥ १८

यानि तूभयत इति क्षुद्राणि तु उपेक्षितानीत्यर्थ ॥२८॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे त्रिसप्ततितमोऽध्याय ॥ ७३ ॥ * अवन् मृद्नन् इति पाठ ।

७४

त्रिगर्तैरिति महारथत्वेन सम्यगज्ञातै पाडवीयैर्हताना पुत्रबन्धुभिस्त्रिगर्तै ॥ १ ॥

स तु तं पूजयामास धृतवर्माणमाहवे ।
मनसा तु मुहूर्तं वै रणे समभिहर्षयन् ॥ १९
तं पन्नगमिव क्रुद्धं कुरुवीरः समयञ्जिव ।
प्रीतिपूर्वं महाबाहुः प्राणैर्न व्यपरोपयत् ॥२०
स तथा रक्ष्यमाणो वै पार्थेनामिततेजसा ।
धृतवर्मा शरं दीप्तं मुमोच विजये तदा ॥ २१
स तेन विजयस्तूर्णमासीद्विद्धः करे भृशम् ॥
मुमोच गाण्डिवं मोहात्तत्पपातथ भूतले २२
धनुषः पततस्तस्य सव्यसाचिकराद्विभो ।
बभूव सदृशं रूपं शक्रचापस्य भारत ॥ २३
तस्मिन्निपतिते दिव्ये महाधनुषि पार्थिवः ।
जहास सस्वनं हासं धृतवर्मा महाहवे ॥ २४
ततो रोषार्दितो जिष्णुः प्रमृज्य रुधिरं करात्
धनुरादत्त तद्दिव्यं शरवर्षैर्ववर्ष च ॥ २५
ततो हलहलाशब्दो दिवस्पृगभवत्तदा ।
नानाविधानां भूतानां तत्कर्माणि प्रशसताम्
ततः संप्रेक्ष्य संक्रुद्धं कालान्तकयमोपमम् ।
जिष्णुं त्रैगर्तका योधाः परीताः पर्यवारयन्॥
अभिसृत्य परीप्सार्थं ततस्ते धृतवर्मणः ।
परिवव्रुर्गुडाकेशं तत्राक्रुध्यद्धनञ्जयः ॥ २८
ततो योधान् जघानाशु तेषां स दश चाष्ट च
महेन्द्रवज्रप्रतिमैरायसैर्बहुभिः शरैः ॥ २९
तान्सप्रभग्नान्संप्रेक्ष्य त्वरमाणो धनञ्जयः ।
शरैराशीविषाकारैर्जघान स्वनवद्धसन् ॥ ३०
ते भग्नमनसः सर्वे त्रैगर्तकमहारथाः ।
दिशोऽभिदुद्रुवू राजन् धनञ्जयशरार्दिताः ॥
तमूचुः पुरुषव्याघ्रं संशप्तकनिषूदनम् ।
तवास्म किंकराः सर्वे सर्वे वै वशगास्तव ३२
आज्ञापयस्व नः पार्थ प्रह्वान्प्रेष्यानवस्थितान् ।
करिष्यामः प्रियं सर्वे तव कौरवनन्दन ॥ ३३
एतदाज्ञाय वचनं सर्वांस्तानब्रवीत्तदा ।
जीवितं रक्षत नृपाः शासनं प्रतिगृह्यताम् ३४

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि त्रिगर्तपराभवे चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

७५

वैशम्पायन उवाच ।
प्राग्ज्योतिषमथाभ्येत्य व्यचरत्स हयोत्तमः
भगदत्तात्मजस्तत्र निर्ययौ रणकर्कशः ॥ १
स हयं पाण्डुपुत्रस्य विषयान्तमुपागतम् ।
युयुधे भरतश्रेष्ठ वज्रदत्तो महीपतिः ॥ २
सोऽभिनिर्याय नगराद्भगदत्तसुतो नृपः ।
अश्वमायान्तमुन्मथ्य नगराभिमुखो ययौ ॥३
तमालक्ष्य महाबाहुः कुरूणामृषभस्तदा ।
गाण्डीवं विक्षिपंस्तूर्णं सहसा समुपाद्रवत् ४
ततो गाण्डीवनिर्मुक्तैरिषुभिर्मोहितो नृपः ।
हयमुत्सृज्य तं वीरस्ततः पार्थमुपाद्रवत् ॥ ५
पुनः प्रविश्य नगरं दंशितः स नृपोत्तमः ।
आरुह्य नागप्रवरं निर्ययौ रणकर्कशः ॥ ६
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
दोधूयता चामरेण श्वेतेन च महारथः ॥ ७
ततः पार्थं समासाद्य पाण्डवानां महारथम् ।
आह्वयामास बीभत्सुं बाल्यान्मोहाच्च संयुगे
स वारणं नगप्रख्यं प्रभिन्नकरटामुखम् ।
प्रेषयामास संक्रुद्धः श्वेताश्वं प्रति पार्थिवः ९
विक्षरन्तं महामेघं परवारणवारणम् ।
शास्त्रवत्कल्पितं सख्ये विवश युद्धदुर्मदम्१०
प्रचोद्यमानः स गजस्तेन राज्ञा महाबलः ।
तदांकुशेन विबभावुत्पनिष्यन्निवाम्बरम् ११
तमापतन्तं संप्रेक्ष्य क्रुद्धो राजन्धनञ्जयः ।
भूमिष्ठो वारणगतं योधयामास भारत ॥ १२
वज्रदत्तस्ततः क्रुद्धो मुमोचाशु धनञ्जये ।
तोमरानग्निसङ्काशान् शलभानिव वेगितान्

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे चतुःसप्ततितमोऽध्यायः ॥ ७४ ॥

७५
प्राग्ज्योतिषेतिसप्तत्यधिकशततमोऽध्यायः ॥ १ ॥

अर्जुनस्तानसप्राप्तान् गाण्डीवप्रभवैः शरैः ।
द्विधा त्रिधा च चिच्छेद ख एव खगमैस्तदा
स तान् दृष्ट्वा तथा छिन्नास्तोमरान्भगदत्तजः।
इषूनसक्तांस्त्वरितः प्राहिणोत्पाण्डव प्रति१५
ततोऽर्जुनस्तूर्णतरं रुक्मपुङ्खानजिह्मगान् ।
प्रेषयामास संक्रुद्धो भगदत्तात्मजं प्रति ॥ १६
स तैर्विद्धो महातेजा वज्रदत्तो महामृधे ।
भृशाहतः पपातोर्व्यां न त्वेनमजहात्स्मृतिः
ततः स पुनरुत्सृज्य वारणप्रवरं रणे ।
अदयग्रः प्रेषयामास जयार्थी विजयं प्रति १८
तस्मै बाणास्ततो जिष्णु-
र्निर्मुक्ताशीविषोपमान् ।
प्रेषयामास संक्रुद्धो
ज्वलितज्वलनोपमान् ॥ १९
स तैर्विद्धो महानागो विस्रवन् रुधिरं बभौ ।
गैरिकाक्तमिवांभोद्रिर्बहुप्रस्रवणं तदा ॥ २०

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि वज्रदत्तयुद्धे पञ्चसप्ततितमोऽध्यायः ॥ ७५ ॥

७६

एवं त्रिरात्रमभवत्तद्युद्धं भरतर्षभ ।
अर्जुनस्य नरेन्द्रेण वृद्धेनेव शतक्रतोः ॥ १
ततश्चतुर्थे दिवसे वज्रदत्तो महाबलः ।
जहास सस्वनं हासं वाक्यं चेदमथाब्रवीत् २
अर्जुनार्जुन तिष्ठस्व न मे जीवन्विमोक्ष्यसे ।
त्वां निहत्य करिष्यामि पितुस्तोयं यथाविधि
त्वया वृद्धो मम पिता भगदत्तः पितुः सखा
हतो वृद्धो मम पिता शिशुं मामद्य योधय ४
इत्येवमुक्त्वा संक्रुद्धो वज्रदत्तो नराधिपः ।
प्रेषयामास कौरव्य वारणं पाण्डवं प्रति ॥ ५
संप्रेष्यमाणो नागेन्द्रो वज्रदत्तेन धीमता ।
उत्पतिष्यन्निवाकाशमभिदुद्राव पाण्डवम् ६
अग्रहस्तसमुक्तेन सीकरेण स नागराट् ।
समौक्षत गुडाकेशं शैलं नीलमिवाम्बुदः ७
स तेन प्रेषितो राज्ञा मेघवद्विनदन्मुहुः ।
मुखाडम्बरसंह्रादैरभ्यद्रवत फाल्गुनम् ॥ ८
स नृत्यन्निव नागेन्द्रो वज्रदत्तप्रचोदितः ।
आससाद द्रुतं राजन्कौरवाणां महारथम् ९
तमायान्तमथालक्ष्य वज्रदत्तस्य वारणम् ।
गाण्डीवमाश्रित्य बली न व्यकम्पत शत्रुहा ॥
चुक्रोध बलवच्चापि पाण्डवस्तस्य भूपतेः ।
कार्यविघ्नमनुस्मृत्य पूर्ववैरं च भारत ॥ ११
ततस्तं वारण क्रुद्धः शरजालेन पाण्डवः ।
निवारयामास तदा वेलेव मकरालयम् ॥ १२
स नागप्रवरः श्रीमानर्जुनेन निवारितः ।
तस्थौ शरैर्विनुन्नाङ्गः श्वाविच्छललितो यथा
निवारितं गजं दृष्ट्वा भगदत्तसुतो नृपः ।
उत्ससर्ज शितान्बाणानर्जुनः क्रोधमूर्च्छितः
अर्जुनस्तु महाबाहुः शरैररिनिघातिभिः ।
वारयामास तान्बाणांस्तद्द्भुतमिवाभवत् ॥
ततः पुनरभिक्रुद्धो राजा प्राग्ज्योतिषाधिपः ।
प्रेषयामास नागेन्द्रं बलवत्पर्वतोपमम् ॥ १६
तमापतन्तं संप्रेक्ष्य बलवत्पाकशासनिः ।
नाराचमग्निसंकाशं प्राहिणोद्वारणं प्रति १७
स तेन वारणो राजन्मर्मस्वभिहतो भृशम् ।
पपात सहसा भूमौ वज्ररुग्ण इवाचलः ॥ १८
स पतन् शुशुभे नागो धनञ्जयशराहतः ।
विशाल्निव महाशैलो महीं वज्रप्रपीडितः १९
तस्मिन्निपतिते नागे वज्रदत्तस्य पाण्डवः ।
तं न भेतव्यमित्याह ततो भूमिगतं नृपम् २०
अब्रवीद्धि महातेजाः प्रस्थितं मां युधिष्ठिरः ।
राजानस्ते न हन्तव्या धनञ्जय कथञ्चन ॥ २१


इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे पंचसप्ततितमोऽध्याय. ॥ ७५ ॥

७६

एवमिति ॥१॥ शललित शलाकाप्रोत ॥१३॥

सर्वमेतन्नरव्याघ्र भवत्येतावता कृतम् ।
योधाश्चापि न हन्तव्या धनञ्जय रणे त्वया ॥
वक्तव्याश्चापि राजानः सर्वे सहसुहृज्जनैः ।
युधिष्ठिरस्याश्वमेधो भवद्भिरनुभूयताम् २३
इति भ्रातृवचः श्रुत्वा न हन्मि त्वां नराधिप।
उत्तिष्ठ न भयं तेऽस्ति स्वस्तिमान्गच्छ पार्थिव
आगच्छेथा महाराज परां चैत्रीमुपस्थिताम् ।
यदाऽश्वमेधो भविता धर्मराजस्य धीमतः२५
एवमुक्तः स राजा तु भगदत्तात्मजस्तदा ।
तथेत्येवाब्रवीद्वाक्य पाण्डवेनाभिनिर्जितः२६

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि वज्रदत्तपराजये षट्सप्ततितमोऽध्यायः ॥ ७६ ॥



७७

वैशम्पायन उवाच ।
सैन्धवैरभवद्युद्ध ततस्तस्य किरीटिनः ।
हतशेषैर्महाराज हतानां च सुतैरपि ॥ १
तेऽवतीर्णमुपश्रुत्य विषयं श्वेतवाहनम् ।
प्रत्युद्ययुरमृष्यन्तो राजानः पाण्डवर्षभम् २
अश्वं च तं पराकृश्य विषयान्ते विषोपमाः ।
न भयं चक्रिरे पार्थाद्भीमसेनादनन्तरात् ॥ ३
तेऽविदूराद्धनुष्पाणिं याज्ञियस्य हयस्य च ।
बीभत्सुं प्रत्यपद्यन्त पदातिनमवस्थितम् ॥ ४
ततस्ते तं महावीर्या राजानः पर्यवारयन् ।
जिगीषन्तो नरव्याघ्र पूर्वं विनिकृता युधि ५
ते नामान्यपि गोत्राणि
कर्माणि विविधानि च ।
कीर्तयन्तस्तदा पार्थं
शरवर्षैरवाकिरन् ॥ ६
ते किरन्तः शरव्रातान्वारणप्रतिवारणान् ।
रणे जयमभीप्सन्तः कौन्तेयं पर्यवारयन् ७
ते समीक्ष्य च तं कृष्णमुग्रकर्माणमाहवे ।
सर्वे युयुधिरे वीरा रथस्थास्तं पदातिनम् ॥८
ते तमाजघ्निरे वीरं निवातकवचान्तकम् ।
संशप्तकनिहन्तारं हन्तारं सैन्धवस्य च ॥ ९
ततो रथसहस्रेण हयानामयुतेन च ।
कोष्ठकीकृत्य बीभत्सुं प्रहृष्टमनसोऽभवन् १०
तं स्मरन्तो वध वीराः सिन्धुराजस्य चाहवे
जयद्रथस्य कौरव्य समरे सव्यसाचिना ११
ततः पर्जन्यवत्सर्वे शरवृष्टीरवासृजन् ।
तैः कीर्णः शुशुभे पार्थो रविर्मेघान्तरे यथा ॥
स शरैः समवच्छन्नश्चकाशे पाण्डवर्षभः ।
पञ्जरान्तरसंचारी शकुन्त इव भारत ॥ १३
ततो हाहाकृतं सर्वं कौन्तेये शरपीडिते ।
त्रैलोक्यमभवद्राजन् रविराशीच्च निष्प्रभः १४
ततो ववौ महाराज मारुतो लोमहर्षणः ।
राहुरग्रसदादित्यं युगपत्सोममेव च ॥ १५
उल्काश्च जघ्निरे सूर्यं विकीर्यन्त्यः समन्ततः ।
वेपथुश्चाभवद्राजन्कैलासस्य महागिरेः ॥ १६
मुमुचुः श्वासमत्युष्णं दुःखशोकसमन्विताः ।
सप्तर्षयो जातभयास्तथा देवर्षयोऽपि च ॥१७
शशं चाशु विनिर्भिद्य मण्डलं शशिनोऽपतत्
विपरीता दिशश्चापि सर्वा धूमाकुलास्तथा॥
रासभारुणसङ्काशा धनुष्मन्तः सविद्युतः ।
आवृत्य गगनं मेघा मुमुचुर्मांसशोणितम् १९

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे षट्सप्ततितमोऽध्याय ॥ ७६ ॥

७७

सैन्धवैरिति ॥१ ॥ विकीर्यन्त्य उल्का सूर्यं जघ्निरे ताभिश्च विकीर्यमाणाभि कैलासादीनां वेपथु सप्तर्ष्यादीना श्वासश्चाभवत् ता एव शशं चंद्रमथं विनिर्भिद्य शशिनो मंडलं प्रति पतित अपतन्निति त्रयाणा सबंध ॥ १६ ॥ ततखात्तु इति पाठे चंद्रमंडलादूर्ध्वदेशात्पतिता उल्का तत् भित्वाऽधोपतादित्यर्थ ॥ १८ ॥ रासभवर्णश्चारुणश्च तयोर्मिश्रीभावो रासभारुणो वर्णविशेष ॥ १९ ॥

एवमासीत्तदा वीरे शरवर्षेण संवृते ।
फाल्गुने भरतश्रेष्ठ तदद्भुतमिवाभवत् ॥ २०
तस्य तेनावकीर्णस्य शरजालेन सर्वतः ।
मोहात्पपात गाण्डीवमावापश्च करादपि ॥ २१
तस्मिन्मोहमनुप्राप्ते शरजालं महत्तदा ।
सैन्धवा मुमुचुस्तूर्णं गतसत्त्वे महारथे ॥ २२
ततो मोहसमापन्नं ज्ञात्वा पार्थं दिवौकसः ।
सर्वे वित्रस्तमनसस्तस्य शान्तिकृतोऽभवन् ॥
ततो देवर्षयः सर्वे तथा सप्तर्षयोऽपि च ।
ब्रह्मर्षयश्च विजयं जेपुः पार्थस्य धीमतः ॥ २४
ततः प्रदीपिते देवैः पार्थतेजसि पार्थिव ।
तस्थावचलवद्धीमान्सग्रामे परमास्त्रवित् २५
विचकर्ष धनुर्दिव्यं ततः कौरवनन्दनः ।
यन्त्रस्येवेह शब्दोऽभून्महांस्तस्य पुनः पुनः ॥
ततः स शरवर्षाणि प्रत्यमित्रान्प्रति प्रभुः ।
ववर्ष धनुषा पार्थो वर्षाणीव पुरन्दरः ॥ २७
ततस्ते सैन्धवा योधाः सर्व एव सराजकाः
नादृश्यन्त शरैः कीर्णाः शलभैरिव पादपाः ॥
तस्य शब्देन वित्रेसुर्भयार्ताश्च विदुद्रुवुः ।
मुमुचुश्चाशु शोकार्ताः शुशुचुश्चापि सैन्धवाः
तांस्तु सर्वान्नरव्याघ्रः सैन्धवान् व्यचरत् बली
अलातचक्रवद्राजन् शरजालैः समार्पयत् ॥
तदिन्द्रजालप्रतिमं बाणजालमामित्रहा ।
विसृज्य दिक्षु सर्वासु महेन्द्र इव वज्रभृत् ३१
मेघजालनिभं सैन्यं विदार्य शरवृष्टिभिः ।
विबभौ कौरवश्रेष्ठः शरदीव दिवाकरः ॥ ३२

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि सैन्धवयुद्धे सप्तसप्ततितमोऽध्यायः ॥ ७७ ॥

७८

वैशम्पायन उवाच ।
ततो गाण्डीवभृच्छूरो युद्धाय समुपस्थितः।
विबभौ युधि दुर्धर्षो हिमवानचलो यथा॥ १
ततस्ते सैन्धवा योधाः पुनरेव व्यवस्थिताः ।
व्यमुञ्चन्त सुसंरब्धाः शरवर्षाणि भारत ॥ २
तान्प्रहस्य महाबाहुः
पुनरेव व्यवस्थितान् ।
ततः प्रोवाच कौन्तेयो
मुमूर्षून् श्लक्ष्णया गिरा ।
युध्यध्वं परया शक्त्या
यतध्वं विजये मम ॥ ३
कुरुध्वं सर्वकार्याणि
महद्वो भयमागतम् ।
एष योत्स्यामि सर्वांस्तु
निवार्य शरवागुराम् ॥ ४
तिष्ठध्वं युद्धमनसो दर्पं शमयिताऽस्मि वः।
एतावदुक्त्वा कौरव्यो रोषाद्गाण्डीवभृत्तदा५
ततोऽथ वचनं स्मृत्वा भ्रातुर्ज्येष्ठस्य भारत ।
न हंतव्या रणे तात क्षत्रिया विजिगीषवः ६
जेतव्याश्चेति यत्प्रोक्तं धर्मराज्ञा महात्मना ।
चिन्तयामास स तदा फाल्गुनः पुरुषर्षभः ॥७
इत्युक्तोहं नरेन्द्रेण न हन्तव्या नृपा इति ।
कथं तन्न मृषेद् स्याद्धर्मराजवचः शुभम् ॥ ८
न हन्येरंश्च राजानो राज्ञश्चाज्ञा कृता भवेत् ।
इति सञ्चिन्त्य स तदा फाल्गुनः पुरुषर्षभः ९
प्रोवाच वाक्यं धर्मज्ञः सैन्धवान् युद्धदुर्मदान्
श्रेयो वदामि युष्माकं न हिंसेयमवस्थितान् ॥
यश्च वक्ष्यति संग्रामे तवास्मीति पराजितः ।
एतच्छ्रुत्वा वचो मह्यं कुरुध्व हितमात्मनः ॥

आवापो हस्तावाप ॥ २१ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्तसप्ततितमोऽध्याय ॥ ७७ ॥

७८
ततो गाण्डीवभृदिति ॥ १ ॥

ततोऽन्यथा कृच्छ्रगता भविष्यथ मयार्दिताः ।
एवमुक्त्वा तु तान्वीरान् युयुधे कुरुपुङ्गवः ॥
अर्जुनोऽतीव संक्रुद्धः संक्रुद्धैर्विजिगीषुभिः ।
शतं शतसहस्राणि शराणां नतपर्वणाम् १३
मुमुचुः सैन्धवा राजंस्तदा गाण्डीवधन्वनि
शरानापततः क्रूरानाशीविषविषोपमान् १४
चिच्छेद निशितैर्बाणै-
रन्तरा स धनञ्जयः ।
छित्त्वा तु तानाशु चैव
कङ्कपत्रान् शिलाशितान् ॥ १५
एकैकमेषां समरे बिभेद निशितैः शरैः ।
ततः प्रासांश्च शक्तीश्च पुनरेव धनञ्जयम् ॥ १६
जयद्रथं हतं स्मृत्वा चिक्षिपुः सैन्धवा नृपाः ।
तेषां किरीटी संकल्पं मोघं चक्रे महाबलः ॥
सर्वांस्तानन्तरा च्छित्त्वा
तदा चुक्रोश पाण्डवः ।
तथैवापतता तेषां
योधानां जयगृद्धिनाम् ॥ १८
शिरांसि पातयामास भल्लैः सन्नतपर्वभिः ।
तेषां प्रद्रवतां चापि पुनरेवाभिधावताम् ॥ १९
निवर्ततां च शब्दोऽभूत्पूर्णस्येव महोदधेः ।
ते वध्यमानास्तु तदा पार्थेनामिततेजसा ॥
यथाप्राणं यथोत्साहं योधयामासुरर्जुनम् ।
ततस्ते फाल्गुनेनाजौ शरैः सन्नतपर्वभिः २१
कृता विसंज्ञा भूयिष्ठाः क्लान्तवाहनसैनिकाः
तांस्तु सर्वान्परिग्लानान्विदित्वा धृतराष्ट्रजा
दुःशला बालमादाय नप्तारं प्रययौ तदा ।
सुरथस्य सुतं वीरं रथेनाथागमत्तदा ॥ २३
शान्त्यर्थं सर्वयोधानामभ्यगच्छत पाण्डवम् ।
साधनं जयमासाद्य रुरोदार्तस्वरं तदा ॥ २४
धनञ्जयोऽपि तां दृष्ट्वा धनुर्विससृजे प्रभुः ।
समुत्सृज्य धनुः पार्थो विधिवद्भागिनी तदा
प्राह किं करवाणीति सा च तं प्रत्युवाच ह
एष ते भरतश्रेष्ठ स्वस्रीयस्यात्मजः शिशुः २६
अभिवादयते पार्थ तं पश्य पुरुषर्षभ ।
इत्युक्तस्तस्य पितरं स पप्रच्छार्जुनस्तथा २७
कासाविति ततो राजन्दुःशला वाक्यमब्रवीत्
पितृशोकाभिसंतप्तो विषादार्तोऽस्य वै पिता
पञ्चत्वमगमद्वीरो यथा तन्मे निशामय ।
स पूर्वं पितरं श्रुत्वा हतं युद्धे त्वयाऽनघ २९
त्वामागतं च संश्रुत्य युद्धाय हयसारिणम् ।
पितुश्च मृत्युदुःखार्तोऽजहात्प्राणान्धनंजय ॥
प्राप्तो बीभत्सुरित्येव नामश्रुत्वैव तेऽनघ ।
विषादार्तः पपातोर्व्यां ममार च ममात्मजः ॥
तं दृष्ट्वा पतितं तत्र ततस्तस्यात्मजं प्रभो ।
गृहीत्वा समनुप्राप्ता त्वामद्य शरणैषिणी ॥
इत्युक्त्वाऽऽर्तस्वरं सा तु मुमोच धृतराष्ट्रजा ।
दीना दीनं स्थितं पार्थमब्रवीच्चाप्यधोमुखम् ॥
स्वसारं समवेक्षस्व स्वस्रीयात्मजमेव च ।
कर्तुमर्हसि धर्मज्ञ दयां कुरुकुलोद्वह ॥ ३४
विस्मृत्य कुरुराजानं तं च मन्दं जयद्रथम् ।
अभिमन्योर्यथा जातः परिक्षित्परवीरहा ३५
तथाऽयं सुरथाज्जातो मम पौत्रो महाभुजः ।
तमादाय नरव्याघ्र संप्राप्ताऽस्मि तवान्तिकम्
शमार्थं सर्वयोधानां शृणु चेदं वचो मम ।
आगतोयं महाबाहो तस्य मन्दस्य पुत्रकः ३७
प्रसादमस्य बालस्य तस्मात्त्वं कर्तुमर्हसि ।
एष प्रसाद्य शिरसा प्रशमार्थमरिंदम ॥ ३८
याचते त्वां महाबाहो शमं गच्छ धनञ्जय ।
बालस्य हतबन्धोश्च पार्थ किञ्चिदजानतः ३९
प्रसाद कुरु धर्मज्ञ मा मन्युवशमन्वगाः ।
तमनार्यं नृशंसं च विस्मृत्यास्य पितामहम् ॥
आगस्कारिणमत्यर्थं प्रसादं कर्तुमर्हसि ।
एवं ब्रुवत्यां करुणं दुःशलायां धनञ्जयः ॥ ४१
संस्मृत्य देवी गान्धारीं धृतराष्ट्रं च पार्थिवम्
उवाच दुःखशोकार्तः क्षत्रधर्मं व्यगर्हयत् ४२
यत्कृते बान्धवाः सर्वे मया नीता यमक्षयम् ।
इत्युक्त्वा बहु सान्त्वादिप्रसादमकरोज्जयः ॥
परिष्वज्य च तां प्रीतो विससर्ज गृहान्प्रति
दुःशला चापि तान् योधान्
निवार्य महतो रणात् ।
संपूज्य पार्थं प्रययौ
गृहानेव शुभानना ॥ ४५
एवं निर्जित्य तान्वीरान्सैन्धवान्स धनञ्जयः ।
अन्वधावत धावन्तं हयं कामविचारिणम् ॥
ततो मृगमिवाकाशे यथा देवः पिनाकधृक् ।
ससार तं तथा वीरो विधिवद्यज्ञियं हयम् ॥
स च धाजी यथेष्टेन तास्तान्देशान् यथाक्रमं
विचचार यथाकामं कर्म पार्थस्य वर्धयन् ४८
क्रमेण स हयस्तेवं विचरन्पुरुषर्षभ ।
मणिपूरपतेर्देशमुपायात्सहपाण्डवः ॥ ४९

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि सैन्धवपराजये अष्टसप्ततितमोऽध्यायः ॥ ७८ ॥



७९

वैशम्पायन उवाच ।

श्रुत्वा तु नृपतिः प्राप्तं पितरं बभ्रुवाहनः ।
निर्ययौ विनयेनाथ ब्राह्मणार्थपुरःसरः ॥ १
मणिपूरेश्वरं त्वेवमुपयातं धनञ्जयः ।
नाभ्यनन्दत्स मेधावी क्षत्रधर्ममनुस्मरन् ॥ २
उवाच च स धर्मात्मा समन्युः फाल्गुनस्तदा
प्रक्रियेयं न ते युक्ता बहिस्त्वं क्षत्रधर्मतः ॥ ३
संरक्ष्यमाणं तुरगं यौधिष्ठिरमुपागतम् ।
यज्ञियं विषयान्ते मां नायोत्सीः किं नु पुत्रक॥
धिक् त्वामस्तु सुदुर्बुद्धिं क्षत्रधर्मबहिष्कृतम् ।
यो मां युद्धाय सम्प्राप्तं साम्नैव प्रत्यगृह्णथाः ५
न त्वया पुरुषार्थो हि कश्चिदस्तीह जीवता ।
यस्त्वं स्त्रीवद्यथाप्राप्तं मां साम्ना प्रत्यगृह्णथाः ६
यद्यहं त्यस्तशस्त्रस्त्वामागच्छेयं सुदुर्मते ।
प्रक्रियेयं भवेद्युक्ता तावत्तव नराधम ॥ ७
तमेवमुक्त भर्त्रा तु विदित्वा पन्नगात्मजा ।
अमृष्यमाणा मित्त्वोर्वीमुलूपी समुपागमत् ८
सा ददर्श ततः पुत्रं विमृशन्तमधोमुखम् ।
संतर्ज्यमानमसकृत्पित्रा युद्धार्थिना प्रभो ९
ततः सा चारुसर्वांगी सर्पेन्द्रोरगात्मजा ।
उलूपी प्राह वचनं धर्म्यं धर्मविशारदम् ॥ १०
उलूपीं मां निबोध त्वमातरं पन्नगात्मजाम् ।
कुरुष्व वचनं पुत्र धर्मस्ते भविता परः ॥ ११
युध्यस्वैनं कुरुश्रेष्ठ पितरं युद्धदुर्मदम् ।
एवमेष हि ते प्रीतो भविष्यति न संशयः १२
एवं दुर्मर्षितो राजा स मात्रा बभ्रुवाहनः ।
मनश्चक्रे महातेजा युद्धाय भरतर्षभ ॥ १३
सन्नह्य काञ्चनं वर्म शिरस्त्राणं च भानुमत् ।
तूणीरशतसम्बाधमारुरोह रथोत्तमम् ॥ १४
सर्वोपकरणोपेतं युक्तमश्वैर्मनोजवैः ।
स चक्रोपस्करं श्रीमान्हेमभाण्डपरिष्कृतम् ॥
परमार्चितमुच्छ्रित्य ध्वजं सिंह हिरण्मयम् ॥
प्रययौ पार्थमुद्दिश्य स राजा बभ्रुवाहनः ॥१६
ततोऽभ्येत्य हयं वीरो यज्ञियं पार्थरक्षितम् ।
ग्राहयामास पुरुषैर्हयशिक्षाविशारदैः ॥ १७
गृहीत्वा वाजिनं दृष्ट्वा प्रीतात्मा स धनञ्जयः ।
पुत्रं रथस्थं भूमिष्ठः सन्यवारयदाहवे ॥ १८
स तत्र राजा न वीर शस्त्रमुद्यम्य कंचन ।
अर्दयामास निशितैराशीविषविषोपमैः ॥ १९
ततः समभवद्युद्धं पितुः पुत्रस्य चातलम् ।
देवासुररणप्रख्यमुभयोः प्रियमाणयोः ॥ २०
किमीदृशेन प्रोक्तेन शरेणानतपर्वणा ।
जघ्नेऽथ नरशार्दूल प्रहसन्बभ्रुवाहनः ॥ २१
सोऽभ्यगात्सह पुत्रेण बलमोकामिव पन्नगः ।
विनार्दमद्य च क्रौन्तेय प्रावेशद्य महीतलम् ॥
स गाढवेदना धीमानालक्ष्य धनुरुत्तमम् ।
दिव्य तेजः समाविश्य प्रमोह इव साऽभवत्
स सज्ञामुपलभ्याथ प्रशस्य पुरुषर्षभः ।
पुत्र शक्रात्मजो वाक्यमेदमाह महामनाः २४
साधु साधु महाबाहो वत्स चित्राङ्गदात्मज
सदृशं कर्म ते दृष्ट्वा प्रीतिमानस्मि पुत्रक ॥ २५
विपृच्छाम्येष ते बाणान्पुत्र युद्धे स्थिरो भव ।
इत्येवमुक्त्वा नाराचैरभ्यवर्षदमित्रहा २६
तान्स गाण्डीवनिर्मुक्तान्वज्राशनिसमप्रभान्
नाराचानाच्छिनद्राजा भल्लै सर्वांस्त्रिधा द्विधा
तस्य पार्थः शरैर्दिव्यैर्ध्वजं हेमपरिष्कृतम् ।
सुवर्णतालप्रतिमं क्षुरेणापाहरद्रथात् ॥ २८

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे अष्टसप्ततितमोऽध्याय ॥ ७८ ॥

—

७९

श्रुत्वेति ॥ १ ॥ प्रमीत इव मृत इव दिव्य तेजो हादीकाशाख्यमीश्वरम् ॥ २३ ॥ पुत्रं प्रशम्येति संबंध ॥२४॥ चित्रांगदा चित्रवाहनदुहिताऽर्जुनस्य द्वितीया स्त्री ॥ २५ ॥

हयांश्चास्य महाकायान्महावेगानरिन्दम ।
चकार राजन्निर्जीवान्प्रहसन्निव पाण्डवः २९
स रथादवतीर्याथ राजा परमकोपनः ।
पदातिः पितरं क्रुद्धो योधयामास पाण्डवम्
संप्रीयमाणः पार्थानामृषभः पुत्रविक्रमात् ।
नात्यर्थं पीडयामास पुत्रं वज्रधरात्मजः ३१
स मन्यमानो विमुख पितरं बभ्रुवाहनः ।
शरैराशीविषाकारैः पुनरेवार्दयद्बली ॥ ३२
ततः स बाल्यात्पितरं विव्याध हृदे पत्त्रिणा
निशितेन सुपुङ्खेन बलवद्बभ्रुवाहनः ॥ ३३
विवेश पाण्डव राजन्मर्म भित्त्वाऽतिदुःखकृत्
स तेनातिभृशं विद्धः पुत्रेण कुरुनन्दनः ३४
महीं जगाम मोहार्तस्ततो राजन् धनञ्जयः ।
तस्मिन्निपतिते वीरे कौरवाणां धुरन्धरे ३५
सोऽपि मोहं जगामाथ ततश्चित्राङ्गदासुतः ।
दृष्ट्वा च पितरं हतम् ॥
पूर्वमेव स बाणौघैर्गाढविद्धोऽर्जुनेन ह ।
पपात सोऽपि धरणीमालिंग्य रणमूर्धनि ३७
भर्तारं निहतं दृष्ट्वा पुत्रं च पतितं भुवि ।
चित्राङ्गदा परित्रस्ता प्रविवेश रणाजिरे ३८
शोकसन्तप्तहृदया रुदती वेपती भृशम् ।
मणिपूरपतेर्माता ददर्श निहतं पतिम् ॥ ३९

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि अर्जुनबभ्रुवाहनयुद्धे ऊनाशीतितमोऽध्यायः ॥ ७९ ॥

८०

वैशम्पायन उवाच ।
ततो बहुतरं भीरुर्विलप्य कमलेक्षणा ।
मुमोह दुःखसंतप्ता पपात च महीतले ॥ १
प्रतिलभ्य च सा संज्ञां देवी दिव्यवपुर्धरा ।
उलूपीं पन्नगसुता दृष्ट्वेदं वाक्यमब्रवात् ॥ २
उलूपि पश्य भर्तारं शयानं निहतं रणे ।
त्वत्कृते मम पुत्रेण बाणेन समितिञ्जयम् ॥ ३
ननु त्वमार्यधर्मज्ञा ननु चासि पतिव्रता ।
यत्त्वत्कृतेऽयं पतितः पतिस्ते निहतो रणे ४
किन्तु सर्वापराधोऽयं यदि तेऽद्य धनञ्जयः ।
क्षमस्व याच्यमाना वै जीवयस्व धनञ्जयम्॥५
ननु त्वमार्ये धर्मज्ञा त्रैलोक्यविदिता शुभे ।
यद्घातयित्वा पुत्रेण भर्तारं नानुशोचसि ॥ ६
नाहं शोचामि तनयं हतं पन्नगनन्दिनि ।
पतिमेव तु शोचामि यस्यातिथ्यमिदं कृतम् ७
इत्युक्त्वा सा तदा देवीमुलूपीं पन्नगात्मजाम्
भर्तारमभिगम्येदमित्युवाच यशस्विनी ॥ ८
उत्तिष्ठ कुरुमुख्यस्य प्रियमुख्य मम प्रिय ।
अयमश्वो महाबाहो मया ते परिमोक्षितः ९
ननु त्वया नाम विभो धर्मराजस्य यज्ञियः ।
अयमश्वोनुगन्तव्यः स शेषे किं महीतले १०
त्वयि प्राणा मयायत्ताः* कुरूणां कुरुनन्दन ।
स कस्मात्प्राणदोऽन्येषां प्राणान्संत्यक्तवानसि
उत्तरि साधु पश्येमं पार्थं निहतं रणे ।
पुत्र त्वमं समुत्साद्य घातयित्वा न शोचसि ॥
कामं खपितु बालोऽयं भूमौ मृत्युवशं गतः ।
लोहिताक्षो गुडाकेशो विजयः साधु जीवतु
नापराधोऽस्ति सुभगे नराणां बहुभार्यता ।
प्रमदानां भवत्येष मा तेऽभूद्बुद्धिरीदृशी ॥१४
सख्यं चैवत्कृतं धात्रा शश्वद्दृश्यमेव तु ।
सख्यं समभिजानीहे सत्य मङ्गतमस्तु ते १५
पुत्रेण घातयित्वैनं पार्थं यदि न मेऽद्य वै ।
जीवन्तं दर्शयिष्यद्य परित्यक्ष्यामि जीवितम्
साऽहं दुःखार्णवे घोरे पतिपुत्रविनाकृता
इहैव प्रायमासिष्ये प्रेक्षन्त्यास्ते न संशयः १७

पतिं अर्जुनम् ॥ ३९ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे ऊनाशीतितमोऽध्याय.७९

८०
तत इति ॥ १ ॥ * ममायत्ता इति पाठ. ।

इत्युक्त्वा पन्नगसुतां सपत्नी चैत्रवाहनी ।
ततः प्रायमुपासीना तूष्णीमासीज्जनाधिप १८

वैशम्पायन उवाच ।

ततो विलप्य विरता भर्तुः पादौ प्रगृह्य सा
उपविष्टाऽभवद्दीना सोल्लासं पुत्रमीक्षती १९
ततः संज्ञां पुनर्लब्ध्वा स राजा बभ्रुवाहनः ।
मातर तामथालोक्य रणभूमावथाब्रवीत २०
इतो दुःखतरं किं नु यन्मे माता सुखैधिता ।
भूमौ निपतित वीरमनुशेते मृतं पतिम् ॥ २१
निहन्तारं रणेऽरीणां सर्वशस्त्रभृतां वरम् ।
मया विनिहतं संख्ये प्रेक्षते दुर्मरं बत ॥ २२
अहोऽस्या हृदय देव्या दृढ यन्न विदीर्यते ।
व्यूढोरस्कं महाबाहुं प्रेक्षंत्या निहतं पतिम्
दुर्मरं पुरुषेणेह मन्ये ह्यध्वन्यनागते ।
यत्र नाहं न मे माता विप्रयुज्येत जीवितात्
हाहा धिक्कुरुवीरस्य सन्नाहं काञ्चनं भुवि ।
अपविद्धं हतस्येह मया पुत्रेण पश्यत ॥ २५
भो भो पश्यत मे वीरं पितरं ब्राह्मणा भुवि ।
शयानं वीरशयने मया पुत्रेण पातितम् ॥ २६
ब्राह्मणाः कुरुमुख्यस्य ये मुक्ता हयसारिणः ।
कुर्वन्ति शान्तिं कामस्य रणे योऽयं मया हतः
व्यादिशंतु च किं विप्राः प्रायश्चित्तमिहाद्य मे
अनृशंसस्य पापस्य पितृहन्तुरणाजिरे २८
दुश्चरा द्वादशसमा हत्वा पितरमद्य वै ।
ममेह सुनृशंसस्य संवीतस्यास्य चर्मणा २९
शिरःकपाले चास्यैव युञ्जतः पितुरद्य मे ।
प्रायश्चित्तं हि नास्त्यन्यद्धत्वाऽद्य पितरं मम ॥
पश्य नागोत्तमसुते भर्तारं निहतं मया ।
कृतं प्रियं मया तेऽद्य निहत्य समरेऽर्जुनम् ॥
सोऽहमद्य गमिष्यामि गतिं पितृनिषेविताम्
न शक्नोम्यात्मनात्मानमह धारयितु शुभे ३२
सा त्वं मयि मृते मातस्तथा गाण्डीवधन्वनि
भव प्रीतिमती देवि सत्येनात्मानमालभे ३३
इत्युक्त्वा स ततो राजा दुःखशोकसमाहतः
उपस्पृश्य महाराज दुःखाद्वचनमब्रवीत् ॥ ३४
शृण्वन्तु सर्वभूतानि स्थावराणि चराणि च ।
त्वं च मातर्यथा सत्यं ब्रवीमि भुजगोत्तमे ३५
यदि नोत्तिष्ठति जयः पिता मे नरसत्तमः ।
अस्मिन्नेव रणोद्देशे शोषयिष्ये कलेवरम् ॥३६
न हि मे पितरं हत्वा निष्कृतिर्विद्यते क्वचित् ।
नरकं प्रतिपत्स्यामि ध्रुवं गुरुवधार्दितः ॥ ३७
वीरं हि क्षत्रियं हत्वा गोशतेन प्रमुच्यते ।
पितरं तु निहत्यैवं दुर्लभा निष्कृतिर्मम ॥ ३८
एष एको महातेजाः पाण्डुपुत्रो धनञ्जयः ।
पिता च मम धर्मात्मा तस्य मे निष्कृतिः कुतः
इत्येवमुक्त्वा नृपते धनञ्जयसुतो नृपः ।
उपस्पृश्याभवत्तूष्णीं प्रायोपेतो महामतिः ४०

वैशम्पायन उवाच ।

प्रायोपविष्टे नृपतौ मणिपूरेश्वरे तदा ।
पितृशोकसमाविष्टे सह मात्रा परंतप ॥ ४१
उलूपी चिन्तयामास तदा सञ्जीवनं मणिम् ।
स चोपातिष्ठत तदा पन्नगानां परायणम्॥ ४२
तं गृहीत्वा तु कौरव्य नागराजपतेः सुता ।
मनःप्रह्लादनीं वाचं सैनिकानामथाब्रवीत् ४३
उत्तिष्ठ मा शुचः पुत्र नैव जिष्णुस्त्वयाजितः
अजेयः पुरुषैरेष तथा देवैः सवासवैः ॥ ४४
मया तु मोहनी नाम मायैषा संप्रदर्शिता ।
प्रियार्थं पुरुषेन्द्रस्य पितुस्तेऽद्य यशस्विनः ४५
जिज्ञासुर्ह्येष पुत्रस्य बलस्य तव कौरव ।
संग्रामे युद्ध्यतो राजन्नागतः परवीरहा ॥ ४६
तस्मादसि मया पुत्र युद्धाय परिचोदितः ।
मा पापमात्मनः पुत्र शङ्केथा ह्यपि प्रभो४७
ऋषिरेष महानात्मा पुराणः शाश्वतोऽक्षरः ।
नैनं शक्तो हि संग्रामे जेतुं शक्रोऽपि पुत्रक४८
अय तु मे मणिर्दिव्यः समानीतो विशाम्पते ।
मृतान्मृतान्पन्नगेन्द्रान् यो जीवयति नित्यदा
एनमस्योरसि त्वं च स्थापयस्व पितुः प्रभो ।
सञ्जीवितं तदा पार्थं स त्वं द्रष्टाऽसि पाण्डवम्
इत्युक्तः स्थापयामास तस्योरसि मणिं तदा ।
पार्थस्यामिततेजाः स पितुः स्नेहादपापकृत् ॥
तस्मिन्न्यस्ते मणौ वीरो जिष्णुरुज्जीवितः प्रभुः
चिरसुप्त इवोत्तस्थौ मृष्टलोहितलोचनः ॥ ५२
तमुत्थितं महात्मानं लब्धसंज्ञं मनस्विनम् ।
समीक्ष्य पितरं स्वस्थं ववन्दे बभ्रुवाहनः ५३
उत्थिते पुरुषव्याघ्रे पुनर्लक्ष्मीवति प्रभो ।
दिव्याः सुमनसः पुण्या ववृषे पाकशासनः ॥
अनाहता दुन्दुभयो विनेदुर्मेघनिःस्वनाः ।
साधु साध्विति चाकाशे बभूव सुमहान्स्वनः
उत्थाय च महाबाहुः पर्याश्वस्तो धनञ्जयः ।
बभ्रुवाहनमालिंग्य समाजिघ्रत मूर्धनि ॥ ५६
ददर्श चापि दूरेऽस्य मातरं शोककर्शिताम् ।
उलूप्या सह तिष्ठन्तीं ततोऽपृच्छद्धनञ्जय ५७

किमिदं लक्ष्यते सर्वं शोकविस्मयहर्षवत् ।
रणाजिरमामित्रघ्न यदि जानासि शंस मे ५८
जननी च किमर्थं ते रणभूमिमुपागता ।
नागेन्द्रदुहिता चेयमुलूपी किमिहागता ५९
जानाम्यहमिदं युद्धं त्वया मद्वचनात्कृतम् ।
स्त्रीणामागमने हेतुमहमिच्छामि वेदितुम् ६०
तमुवाच तथा पृष्टो मणिपूरपतिस्तदा ।
प्रसाद्य शिरसा विद्वानुलूपी पृच्छतामियम्

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि अश्वानुसरणे अर्जुनप्रत्युज्जीवने अशीतितमोऽध्यायः ॥ ८० ॥

८१

अर्जुन उवाच ।
किमागमनकृत्यं ते कौरव्यकुलनंदिनि ।
मणिपूरपतेर्मातुस्तथैव च रणाजिरे ॥ १
कच्चित्कुशलकामासि राज्ञोऽस्य भुजगात्मजे
मम वा चपलापाङ्गि कच्चित्त्वं शुभमिच्छसि
कच्चित्ते पृथुलश्रोणि नाप्रियं प्रियदर्शने ।
अकार्षमहमज्ञानादयं वा बभ्रुवाहनः ॥ ३
कच्चिन्नु राजपुत्री ते सपत्नी चैत्रवाहनी ।
चित्राङ्गदा वरारोहा नापराध्यति किञ्चन ॥ ४
तमुवाचोरगपतेर्दुहिता प्रहसन्निव ।
न मे त्वमपराद्धोऽसि न हि मे बभ्रुवाहनः ॥ ५
न जनित्री तथास्येयं मम या प्रेष्यवत् स्थिता ।
श्रूयतां यद्यथा चेदं मया सर्वं विचेष्टितम् ॥ ६
न मे कोपस्त्वया कार्यः शिरसा त्वां प्रसादये
त्वत्प्रियार्थं हि कौरव्य कृतमेतन्मया विभो ७
यत्तच्छृणु महाबाहो निखिलेन धनञ्जय ।
महाभारतयुद्धे यत्त्वया शान्तनवो नृपः ॥ ८
अधर्मेण हतः पार्थ तस्यैषा निष्कृतिः कृता ।
न हि भीष्मस्त्वया वीर युद्ध्यमानो हि पातितः
शिखण्डिना तु संयुक्तस्तमाश्रित्य हतस्त्वया ।
तस्य शान्तिमकृत्वा त्वं त्यजेथा यदि जीवितं
कर्मणा तेन पापेन पतेथा निरये ध्रुवम् ।
एषा तु विहिता शान्तिः पुत्राद्यां प्राप्तवानसि
वसुभिर्वसुधापाल गङ्गया च महामते ॥ ११
पुरा हि श्रुतमेतत्ते वसुभिः कथितं मया ।
गङ्गायास्तीरमाश्रित्य हते शान्तनवे नृप ॥ १२
आप्लुत्य देवा वसवः समेत्य च महानदीम् ।
इदमूचुर्वचो घोरं भागीरथ्या मते तदा ॥ १३
एष शान्तनवो भीष्मो निहतः सव्यसाचिना
अयुद्ध्यमानः संग्रामे संसक्तोऽन्येन भाविनि ।
तदनेनानुषङ्गेण वयमद्य धनञ्जयम् ॥ १४
शापेन योजयामेति
तथाऽस्त्विति च साऽब्रवीत् ।
तदहं पितुरावेद्य
प्रविश्य व्यथितेन्द्रिया ॥ १५
अभवं स च तच्छ्रुत्वा
विषादमगमत्परम् ।
पिता तु मे वसून् गत्वा
त्वदर्थे समयाचत ॥ १६
पुनः पुनः प्रसाद्यैतांस्त एनमिदमब्रुवन् ।
पुत्रस्तस्य महाभाग मणिपूरेश्वरो युवा ॥ १७
स एनं रणमध्यस्थः शरैः पातयिता भुवि ।
एवं कृते स नागेन्द्र मुक्तशापो भविष्यति १८
गच्छेति वसुभिश्चोक्तो
मम चेदं शशंस सः ।
तच्छ्रुत्वा त्वं मया तस्मा-
च्छापादासि विमोक्षितः ॥ १९
न हि त्वां देवराजोऽपि समरेषु पराजयेत् ।
आत्मा पुत्रः स्मृतस्तस्मात्तेनेहासि पराजितः
न हि दोषो मम मतः कथं वा मन्यसे विभो
इत्येवमुक्तो विजयः प्रसन्नात्माऽब्रवीदिदम्

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे अशीतितमोऽध्याय ॥ ८० ॥
आश्वमे० ८

८१

किमागमनेति स्पष्टार्थः ॥ १ ॥

सर्वं मे सुप्रियं देवि यदेतत्कृतवत्यसि ।
इत्युक्त्वा सोऽब्रवीत्पुत्रं मणिपूरपतिं जयः
चित्रांगदायाः श्रृण्वत्याः कौरव्यदुहितुस्तदा
युधिष्ठिरस्याश्वमेधः परिचैत्री भविष्यति २३
तत्रागच्छेः सहामात्यो मातृभ्यां सहितो नृप
इत्येवमुक्तः पार्थेन स राजा बभ्रुवाहनः ।
उवाच पितरं धीमानिदमस्त्राविलेक्षणः २५
उपयास्यामि धर्मज्ञ भवतः शासनादहम् ।
अश्वमेधे महायज्ञे द्विजातिपरिवेषकः ॥ २६
मम त्वनुग्रहार्थाय प्रविशस्व पुरं स्वकम् ।
भार्याभ्यां सहधर्मज्ञ मा भूत्तेऽत्र विचारणा॥
उषित्वेह निशामेकां सुखं स्वभवने प्रभो ।
पुनरश्वानुगमनं कर्तासि जयतां वर ॥ २८
इत्युक्तः स तु पुत्रेण तदा वानरकेतनः ।
स्मयन्प्रोवाच कौन्तेयस्तदा चित्रांगदासुतम् ॥
विदितं ते महाबाहो यथा दीक्षां चराम्यहम्
न स तावत्प्रवेक्ष्यामि पुरं ते पृथुलोचन ३०
यथाकामं व्रजत्येष यज्ञियाश्वो नरर्षभ ।
स्वस्ति तेऽस्तु गमिष्यामि न स्थानं विद्यते मम
स तत्र विधिवत्तेन पूजितः पाकशासनिः ।
भार्याभ्यामभ्यनुज्ञातः प्रायाद्धरतसत्तमः ३२

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि अश्वानुसरणे एकाशीतितमोऽध्यायः ॥ ८१ ॥

८२

वैशम्पायन उवाच ।
स तु वाजी समुद्रान्तां पर्येत्य वसुधामिमाम्
निवृत्तोऽभिमुखो राजन् येन वारणसाह्वयम् १
अनुगच्छंश्च तुरगं निवृत्तोऽथ किरीटभृत् ।
यदृच्छया समापेदे पुरं राजगृहं तदा ॥ २
तमभ्याशगतं दृष्ट्वा सहदेवात्मजः प्रभो ।
क्षत्रधर्मे स्थितो वीरः समरायाजुहाव ह ॥ ३
ततः पुरात्स निष्क्रम्य रथी धन्वी शरी तली
मेघसंधिः पदातिस्तं धनञ्जयमुपाद्रवत् ॥ ४
आसाद्य च महातेजा मेघसन्धिर्धनञ्जयम् ।
बालभावान्महाराज प्रोवाचेदं न कौशलात्
किमयं चार्यते वाजी स्त्रीमध्य इव भारत ।
हयमेनं हरिष्यामि प्रयतस्व विमोक्षणे ॥ ६
अदत्तानुनयो युद्धे यदि त्वं पितृभिर्मम ।
करिष्यामि तवातिथ्यं प्रहर प्रहरामि च ७
इत्युक्तः प्रत्युवाचैनं प्रहसन्निव पाण्डवः ।
विघ्नकर्ता मया वार्य इति मे व्रतमाहितम् ८
भ्राता ज्येष्ठेन नृपते तवापि विदितं ध्रुवम् ।
प्रहरस्व यथाशक्ति न मन्युर्विद्यते मम ॥ ९
इत्युक्तः प्राहरत्पूर्वं पाण्डवं मगधेश्वरः ।
किरन् शरसहस्राणि वर्षाणीव सहस्रदृक् १०
ततो गाण्डीवभृच्छूरो गाण्डीवप्रहितैः शरैः ।
चकार मोघांस्तान्बाणान्सयत्नान्भरतर्षभ ॥
स मोघं तस्य बाणौघं कृत्वा वानरकेतनः ।
शरान्मुमोच ज्वलितान्दीप्तास्यानिव पन्नगान्
ध्वजे पताकादण्डेषु रथे यंत्रे हयेषु च ।
अन्येषु च रथाङ्गेषु न शरीरे न सारथौ १३
संरक्ष्यमाणः पार्थेन शरीरे सव्यसाचिना ।
मन्यमानः स्ववीर्यं तन्मागधः प्राहिणोच्छरान्
ततो गाण्डीवधन्वा तु मागधेन भृशाहतः ।
बभौ वसन्तसमये पलाशः पुष्पितो यथा १५
अवध्यमानः सोऽभ्यघ्नन्मागधः पाण्डवर्षभम्
तेन तस्य स कौरव्य लोकवीरस्य दर्शने १६
सव्यसाची तु संक्रुद्धो विकृष्य बलवद्धनुः ।
हयांश्चकार निर्जीवान्सारथेश्च शिरोऽहरत् ॥
धनुश्चास्य महच्चित्रं क्षुरेण प्रचकर्त ह ।
हस्तावापं पताकां च ध्वजं चास्य न्यपातयत्

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे एकाशीतितमोऽध्याय ॥ ८१ ॥

८२

स त्विति ॥१॥ अदत्तानुनय आशिक्षित ॥७॥

स राजा व्यथितो व्यश्वो विधनुर्हतसारथिः
गदामादाय कौन्तेयमभिदुद्राव वेगवान् १९
तस्यापतत एवाशु गदां हेमपरिष्कृताम् ।
शरैश्चकर्त बहुधा बहुभिर्गृध्रवाजितैः ॥ २०
सा गदा शकलीभूता विशीर्णमणिबन्धना ।
व्याली विमुच्यमानेव पपात धरणीतले २१
विरथं विधनुष्कं च गदया परिवर्जितम् ।
सान्त्वपूर्वमिदं वाक्यमब्रवीत्कपिकेतनः २२
पर्याप्तः क्षत्रधर्मोऽयं दर्शितः पुत्र गम्यताम् ।
बह्वेतत्समरे कर्म तव बालस्य पार्थिव ॥ २३
युधिष्ठिरस्य संदेशो न हन्तव्या नृपा इति ।
तेन जीवसि राजंस्त्वमपराद्धोऽपि मे रणे ॥
इति मत्वा तदात्मानं प्रत्यादिष्टं स्म मागधः ।
तथ्यमित्यभिगम्यैनं प्राञ्जलिः प्रत्यपूजयत् २५
पराजितोऽस्मि भद्रं ते नाहं योद्धुमिहोत्सहे॥
यद्यत्कृत्यं मया तेऽद्य तद्ब्रूहि कृतमेव तु ॥ २६
तमर्जुनः समाश्वास्य पुनरेवेदमब्रवीत् ।
आगंतव्यं परां चैत्रीमश्वमेधे नृपस्य नः २७
इत्युक्तः स तथेत्युक्त्वा पूजयामास त हयम्
फाल्गुनं च युधि श्रेष्ठं विधिवत्सहदेवजः २८
ततो यथेष्टमगमत्पुनरेव स केसरी ।
ततः समुद्रतीरेण वङ्गान्पुंड्रान्सकोसलान् ॥
तत्र तत्र च भूरीणि म्लेच्छसैन्यान्यनेकशः ।
विजिग्ये धनुषा राजन्गाण्डीवेन धनञ्जयः३०

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि अश्वानुसरणे मागधपराजये द्व्यशीतितमोऽध्यायः ॥ ८२ ॥

८३

वैशम्पायन उवाच ।
मागधेनार्चितो राजन्पाण्डवः श्वेतवाहनः
दक्षिणा दिशमास्थाय चारयामास तं हयम्१
ततः स पुनरावर्त्य हयः कामचरो बली ।
आससाद पुरी रम्यां चेदीनां शुक्तिसाह्वयाम्
शरभेणार्चितस्तत्र शिशुपालसुतेन सः ।
युद्धपूर्वं तदा तेन पूजया च महाबलः ॥ ३
ततोऽर्चितो ययौ राजंस्तदा स तुरगोत्तमः ।
काशीनगान्कोसलांश्च किरातानथ तंगणान्
पूजां तत्र यथान्यायं प्रतिगृह्य धनञ्जयः ।
पुनरावृत्य कौन्तेयो दशार्णानगमत्तदा ॥ ५
तत्र चित्रांगदो नाम बलवानरिमर्दनः ।
तेन युद्धमभूत्तस्य विजयस्यातिभैरवम् ॥ ६
तं चापि वशमानीय किरीटी पुरुषर्षभः ।
निषादराज्ञो विषयमेकलव्यस्य जग्मिवान्७
एकलव्यसुतश्चैनं युद्धेन जगृहे तदा ।
तत्र चक्रे निषादैः स संग्रामं लोमहर्षणम् ॥ ८
ततस्तमपि कौन्तेयः समरेष्वपराजितः ।
जिगाय युधि दुर्धर्षो यज्ञविघ्नार्थमागतम् ॥९
स तं जित्वा महाराज नैषादिं पाकशासनिः
अर्चितः प्रययौ भूयो दक्षिणं सलिलार्णवम् ॥
तत्रापि द्रविडैरान्ध्रैः रौद्रैर्माहिषकैरपि ।
तथा कोल्लगिरेयैश्च युद्धमासीत्किरीटिनः ११
तांश्चापि विजयो जित्वा नातितीव्रेण कर्मणा
तुरङ्गमवशेनाथ सुराष्ट्रानभितो ययौ ॥ १२
गोकर्णमथ चासाद्य प्रभासमपि जग्मिवान् ।
ततो द्वारवतीं रम्यां वृष्णिवीराभिपालिताम्
आससाद हयः श्रीमान्कुरुराजस्य यज्ञियः ।
तमुन्मथ्य हयश्रेष्ठं यादवानां कुमारकाः ॥ १४
प्रययुस्तास्तदा राजन्नग्रसेनो न्यवारयत् ।
ततः पुराद्विनिष्क्रम्य वृष्ण्यन्धकपतिस्तदा ॥
सहितो वासुदेवेन मातुलेन किरीटिनः ।
तौ समेत्य कुरुश्रेष्ठं विधिवत्प्रीतिपूर्वकम् १६

गृध्रवाजितैः गृध्रपक्षयुतैः ॥ २० ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे द्व्यशीतितमोऽध्याय ॥ ८२ ॥ * स कौरव इति पाठ ।

८३

मागधेनेति ॥ १ ॥

परया भारतश्रेष्ठं पूजया समवस्थितौ ।
ततस्ताभ्यामनुज्ञातो ययौ येन हयो गतः १७
ततः स पश्चिमं देशं समुद्रस्य तदा हयः ।
क्रमेण व्यचरत्स्फीतं ततः पञ्चनदं ययौ ॥ १८
तस्मादपि स कौरव्य गन्धारविषयं हयः ।
विचचार यथाकामं कौन्तेयानुगतस्तदा १९
ततो गान्धारराजेन युद्धमासीत्किरीटिनः ।
घोरं शकुनिपुत्रेण पूर्ववैरानुसारिणा ॥ २०

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि अश्वानुसरणे व्यशीतितमोऽध्यायः ॥ ८३ ॥

८४

वैशम्पायन उवाच ।
शकुनेस्तनयो वीरो गान्धाराणां महारथः।
प्रत्युद्ययौ गुडाकेशं सैन्येन महता वृतः ॥ १
हस्त्यश्वरथयुक्तेन पताकाध्वजमालिना ।
अमृष्यमाणास्ते योधा नृपस्य शकुनेर्वधम् २
अभ्ययुः सहिताः पार्थं प्रगृहीतशरासनाः ।
स तानुवाच धर्मात्मा बीभत्सुरपराजितः ॥३
युधिष्ठिरस्य वचनं न च ते जगृहुर्हितम् ।
वार्यमाणाऽपि पार्थेन सान्त्वपूर्वममर्षिताः॥४
परिवार्य हयं जग्मुस्ततश्चुक्रोध पाण्डवः ।
ततः शिरांसि दीप्ताग्रैस्तेषां चिच्छेद पाण्डवः
क्षुरैर्गाण्डीवनिर्मुक्तैर्नातियत्नादिवार्जुनः ।
ते वध्यमानाः पार्थेन हयमुत्सृज्य संभ्रमात् ६
न्यवर्तन्त महाराज शरवर्षार्दिता भृशम् ।
निरुध्यमानस्तैश्चापि गान्धारैः पाण्डुनन्दनः
आदिश्यादिश्य तेजस्वी शिरांस्येषां न्यपातयत्
वध्यमानेषु तेष्वाजौ गान्धारेषु समंततः ॥ ८
स राजा शकुनेः पुत्रः पाण्डवं प्रत्यवारयत् ।
तं युध्यमान राजानं क्षत्रधर्मे व्यवस्थितम् ९
पार्थोऽब्रवीन्न मे वध्या राजानो राजशासनात्
अलं युद्धेन ते वीर न तेऽस्त्वद्य पराजयः १०
इत्युक्तस्तदनादृत्य वाक्यमज्ञानमोहितः ।
स शक्रसमकर्माणं समवाकिरदाशुगैः ॥ ११
तस्य पार्थः शिरस्त्राणमर्धचन्द्रेण पत्रिणा ।
अपाहरदमेयात्मा जयद्रथशिरो यथा ॥ १२
तं दृष्ट्वा विस्मयं जग्मुर्गान्धाराः सर्व एव ते ।
इच्छता तेन न हतो राजेत्यसि च तं विदुः
गान्धारराजपुत्रस्तु पलायनकृतक्षणः ।
ययौ तैरेव सहितस्त्रस्तैः क्षुद्रमृगैरिव ॥ १४
तेषां तु तरसा पार्थस्तत्रैव परिधावताम् ।
प्रजहारोत्तमाङ्गानि भल्लैः सन्नतपर्वभिः ॥ १५
उच्छ्रितांस्तु भुजान्केचिन्नाबुध्यन्त शरैर्हतान्
शरैर्गाण्डीवनिर्मुक्तैः पृथुभिः पार्थचोदितैः १६
संभ्रान्तनरनागाश्वमपतद्विद्रुतं बलम् ।
हतविध्वस्तभूयिष्ठमावर्तत मुहुर्मुहुः ॥ १७
नाभ्यदृश्यन्त वीरस्य केचिदग्रेऽस्यकर्मणः ।
रिपवः पात्यमाना वै ये सहेयुर्धनञ्जयम् ॥ १८
ततो गान्धारराजस्य मन्त्रिवृद्धपुरःसरा ।
जननी निर्ययौ भीता पुरस्कृत्यार्घमुत्तमम्१९
सा न्यवारयदव्यग्रं तं पुत्रं युद्धदुर्मदम् ।
प्रसादयामास च तं जिष्णुमक्लिष्टकारिणम् ॥
तां पूजयित्वा बीभत्सुः प्रसादमकरोत्प्रभुः
शकुनेश्चापि तनयं सान्त्वयन्निदमब्रवीत् ॥२०
न मे प्रियं महाबाहो यत्ते बुद्धिरियं कृता ।
प्रतियोद्धुममित्रघ्न भ्रातैव त्वं ममानघ ॥ २२
गान्धारीं मातरं स्मृत्वा धृतराष्ट्रकृतेन च ।
तेन जीवसि राजंस्त्वं निहतास्त्वनुगास्तव॥
मैव भूः शाम्यतां वैरं मा ते भूद्दुर्बुद्धिरीदृशी ।
गच्छेथास्त्वं परां चैत्रीमश्वमेधे नृपस्य नः २४

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे व्यशीतितमोऽध्याय ॥ ८३ ॥

८४

शुकनेस्तनय इति स्पष्टार्थः ॥ १ ॥

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि अश्वानुसरणे शकुनिपुत्रपराजये चतुरशीतितमोऽध्यायः ॥ ८४ ॥



८५

वैशम्पायन उवाच ।

इत्युक्त्वानुययौ पार्थो हयं कामविहारिणम्
न्यवर्तत ततो वाजी येन नागाह्वयं पुरम् ॥ १
तं निवृत्तं तु शुश्राव चारेणैव युधिष्ठिरः ।
श्रुत्वार्जुनं कुशलिनं स च हृष्टमनाऽभवत् २
विजयस्य च तत्कर्म गान्धारीविषये तदा ।
श्रुत्वा चान्येषु देशेषु स सुप्रीतोऽभवत्तदा ३
एतस्मिन्नेव काले तु द्वादशीं माघमासिकीम्
इष्टं गृहीत्वा नक्षत्रं धर्मराजो युधिष्ठिरः ॥ ४
समानीय महातेजाः सर्वान् भ्रातॄन्महीपतिः ।
भीमं च नकुलं चैव सहदेवं च कौरव ॥ ५
प्रोवाचेदं वचः काले तदा धर्मभृतां वरः ।
आमन्त्र्य वदतां श्रेष्ठो भीमं प्रहरतां वरम् ६
आयाति भीमसेनासौ सहाश्वेन तवानुजः ।
यथा मे पुरुषाः प्राहुर्ये धनञ्जयसारिणः ॥ ७
उपस्थितश्च कालोऽयमभितो वर्तते हयः ।
माघी च पौर्णमासीयं मासः शेषो वृकोदर ८
तत्प्रस्थाप्यं तु विद्वांसो ब्राह्मणा वेदपारगाः ।
वाजिमेधार्थसिद्ध्यर्थं देशं पश्यन्तु यज्ञियम् ९
इत्युक्तः स तु तच्चक्रे भीमो नृपतिशासनम् ।
हृष्टः श्रुत्वा गुडाकेशमायान्तं पुरुषर्षभम् १०
ततो ययौ भीमसेनः प्राज्ञैः स्थपतिभिः सह ।
ब्राह्मणानग्रतः कृत्वा कुशलान् यज्ञकर्मणि ११
तं स शालत्रयं श्रीमत्सप्रतोलीसुघट्टितम् ।
मापयामास कौरव्यो यज्ञवाटं यथाविधि १२
प्रासादशतसंबाधं मणिप्रवरकुट्टिमम् ।
कारयामास विधिवद्धेमरत्नविभूषितम् ॥ १३
स्तंभान्कनकचित्रांश्च तोरणानि बृहन्ति च ।
यज्ञायतनदेशेषु दत्वा शुद्धं च काननम् ॥ १४
अन्तःपुराणां राज्ञां च नानादेशसमीयुषाम् ।
कारयामास धर्मात्मा तत्र तत्र यथाविधि १५
ब्राह्मणानां च वेश्मानि नानादेशसमीयुषाम् ।
कारयामास कौन्तेयो विधिवत्तान्यनेकशः १६
तथा संप्रेषयामास दूतान्नृपतिशासनात् ।
भीमसेनो महाबाहो राज्ञामक्लिष्टकर्मणाम् १७
ते प्रियार्थं कुरुपतेरययुर्नृपसत्तम ।
रत्नान्यनेकान्यादाय स्त्रियोऽश्वानायुधानि च
तेषां निर्विशतां तेषु शिबिरेषु महात्मनाम् ।
नर्दतः सागरस्येव दिवस्पृगभवत्स्वनः ॥ १९
तेषामभ्यागतानां च स राजा कुरुवर्धनः ।
व्यादिदेशान्नपानानि शय्याश्चाप्यतिमानुषाः
वाहनानां च विविधाः
शालाः शालीक्षुगोरसैः ।
उपेता भरतश्रेष्ठो
व्यादिदेश स धर्मराट् ॥ २१
तथा तस्मिन् महायज्ञे धर्मराजस्य धीमतः ।
समाजग्मुर्मुनिगणा बहवो ब्रह्मवादिनः ॥ २२
ये च द्विजातिप्रवरास्तत्रासन्पृथिवीपते ।
समाजग्मुः सशिष्यांस्तान्प्रतिजग्राह कौरवः
सर्वांश्च ताननुययौ यावदावसथान्प्रति ।
स्वयमेव महातेजा दंभं त्यक्त्वा युधिष्ठिरः ॥
ततः कृत्वा स्थपतयः शिल्पिनोऽन्ये च ये तदा
कृत्स्नं यज्ञविधिं राज्ञो धर्मज्ञाय न्यवेदयन् ॥
तच्छ्रुत्वा धर्मराजस्तु कृतं सर्वमतन्द्रितः ।
हृष्टरूपोऽभवद्राजा सह भ्रातृभिरादृतः ॥ २६

वैशम्पायन उवाच ।

तस्मिन्यज्ञे प्रवृत्ते तु वाग्मिनो हेतुवादिनः ।
हेतुवादान्बहूनाहुः परस्परजिगीषवः ॥ २७
ददृशुस्तत्र नृपतयो यज्ञस्य विधिमुत्तमम् ।
देवेन्द्रस्येव विहितं भीमसेनेन भारत ॥ २८

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे चतुरशीतितमोऽध्याय ॥ ८४ ॥

८५

इत्युक्त्वेति ॥१॥ इष्टं नक्षत्रं पुष्यम् ॥४॥ प्रस्थाप्यन्तु प्रस्थापयन्तु स्वार्थे णिच् प्रतिष्ठन्त्वित्यर्थ ॥ ९ ॥

ददृशुस्तोरणान्यत्र शातकुम्भमयान्न त ।
शय्यासनविहारांश्च सुबहून् रत्नसञ्चयान् २९
घटान्पात्रीः कटाहानि कलशान्वर्धमानकान्
न हि किञ्चिदसौवर्णमपश्यन्वसुधाधिपाः३०
यूपांश्च शास्त्रपठितान्दारवान्हेममूषितान्।
उपक्लृप्तान् यथाकालं विधिवद्भूरिवर्चसः॥ ३१
स्थलजा जलजा ये च पशवः केचन प्रभो ।
सर्वानेव समानीतानपश्यंस्तत्र ते नृपाः ३२
गाश्चैव महिषीश्चैव तथा वृद्धस्त्रियोऽपि च ।
औदकानि च सत्त्वानि श्वापदानि वयांसि च
जरायुजाण्डजातानि स्वेदजान्युद्भिदानि च
पर्वतानूपजातानि भूतानि ददृशुश्च ते ॥ ३४
एवं प्रमुदितं सर्वं पशुगोधनधान्यतः ।
यज्ञवाटं नृपा दृष्ट्वा परं विस्मयमागताः ॥ ३५
ब्राह्मणानां विशां चैव बहुमृष्टान्नमृद्धिमत्।
पूर्णे शतसहस्रे तु विप्राणां तत्र भुञ्जताम् ३६
दुन्दुभिर्मेघनिर्घोषो मुहुर्मुहुरताड्यत ।
विननादासकृच्चापि दिवसे दिवसे गते ३७
एवं स ववृते यज्ञो धर्मराजस्य धीमतः ।
अन्नस्य सुबहून् राजन्नुत्सर्गान्पर्वतोपमान् ३८
दधिकुल्याश्च ददृशुः सर्पिषश्च ह्रदान् जनाः
जम्बूद्वीपो हि सकलो नानाजनपदायुतः ॥
राजन्नदृश्यतैकस्थो राज्ञस्तस्य महामखे ।
तत्र जातिसहस्राणि पुरुषाणां ततस्ततः ४०
गृहीत्वा भाजनान् जग्मुर्बहूनि भरतर्षभ ।
स्रग्विणश्चापि ते सर्वे सुमृष्टमणिकुण्डलाः४१
पर्यवेषन् द्विजातींस्तान् शतशोऽथ सहस्रशः
विविधान्यन्नपानानि पुरुषा येऽनुयायिनः ।
ते वै नृपोपभोज्यानि ब्राह्मणानां ददुश्च ह ४२

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि अश्वमेधारम्भे पञ्चाशीतितमोऽध्यायः ॥ ८५ ॥

८६

वैशम्पायन उवाच ।
समागतान्वेदविदो राज्ञश्च पृथिवीश्वरान् ।
दृष्ट्वा युधिष्ठिरो राजा भीमसेनमभाषत ॥ १
उपयाता नरव्याघ्राय एते पृथिवीश्वराः ।
एतेषां क्रियतां पूजा पूजार्हा हि नराधिपाः ॥
इत्युक्तः स तथा चक्रे नरेन्द्रेण यशस्विना ।
भीमसेनो महातेजा यमाभ्यां सह पाण्डवः ३
अथाभ्यगच्छद्गोविन्दो वृष्णिभिः सह धर्मजम्
बलदेवं पुरस्कृत्य सर्वप्राणभृतां वरः ॥ ४
युयुधानेन सहितः प्रद्युम्नेन गदेन च ।
निशठेनाथ साम्बेन तथैव कृतवर्मणा ॥ ५
तेषामपि परां पूजां चक्रे भीमो महारथः ।
विविशुस्ते च वेश्मानि रत्नवन्ति च सर्वशः॥६
युधिष्ठिरसमीपे तु कथान्ते मधुसूदनः ।
अर्जुनं कथयामास बहुसंग्रामकर्षितम् ॥ ७
स तं पप्रच्छ कौन्तेयः पुनः पुनरारिन्दमम् ।
धर्मजः शक्रजं जिष्णुं समाचष्ट जगत्पतिः ८
आगमद्वारकावासी ममाप्तः पुरुषो नृप ।
योऽद्राक्षीत्पाण्डवश्रेष्ठं बहुसंग्रामकर्षितम् ९
समीपे च महाबाहुमाचष्ट च मम प्रभो ।
कुरु कार्याणि कौन्तेय हयमेधार्थसिद्धये॥ १०
इत्युक्तः प्रत्युवाचैनं धर्मराजो युधिष्ठिरः ।
दिष्ट्या स कुशली जिष्णुरुपायाति च माधव
यदिदं सन्दिदेशास्मिन्
पाण्डवानां बलाग्रणीः ।
तदा ज्ञातमिहेच्छामि
भवता यदुनन्दन ॥ १२

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे पञ्चाशीतितमोऽध्याय. ॥ ८५ ॥

८६

समागतानिति ॥ १ ॥

इत्युक्तो धर्मराजेन
वृष्ण्यन्धकपतिस्तदा ।
प्रोवाचेदं वचो वाग्मी
धर्मात्मानं युधिष्ठिरम् ॥ १३
इदमाह महाराज पार्थवाक्यं स्मरन्नरः ।
वाच्यो युधिष्ठिरः कृष्ण काले वाक्यमिदं मम
आगमिष्यन्ति राजानः सर्वे वै कौरवर्षभ ।
प्राप्तानां महतां पूजा कार्या श्रेयस्क्षमं हि नः
इत्येतद्वचनाद्राजा विज्ञाप्यो मम मानद ।
यथा चात्ययिकं न स्याद्यद्यर्घाहरणेऽभवत् १६
कर्तुमर्हति तद्राजा भवांश्चाप्यनुमन्यताम् ।
राजद्वेषान्न नश्येयुरिमा राजन्पुनः प्रजाः १७
इदमन्यच्च कौन्तेय वचः स पुरुषोऽब्रवीत् ।
धनञ्जयस्य नृपते तन्मे निगदतः शृणु ॥ १८
उपायास्यति यज्ञं नो मणिपूरपतिर्नृपः ।
पुत्रो मम महातेजा दयितो बभ्रुवाहनः ॥ १९
तं भवान्मदपेक्षार्थं विधिवत्प्रतिपूजयेत् ।
स तु भक्तोऽनुरक्तश्च मम नित्यमिति प्रभो २०
इत्येतद्वचनं श्रुत्वा धर्मराजो युधिष्ठिरः ।
अभिनन्द्यास्य तद्वाक्यमिदं वचनमब्रवीत् २१

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि अश्वमेधारम्भे षडशीतितमोऽध्यायः ॥ ८६ ॥

८७

युधिष्ठिर उवाच ।
श्रुत प्रियमिदं कृष्ण यत्त्वमर्हसि भाषितुम् ।
तन्मेऽमृतरस पुण्यं मनो ह्लादयति प्रभो ॥ १
बहूनि किल युद्धानि विजयस्य नराधिपैः ।
पुनरासन् हृषीकेश तत्र तत्र च मे श्रुतम् ॥ २
किंनिमित्तं स नित्यं हि पार्थः सुखविवर्जितः
अतीव विजयो धीमन्निति मे दूयते मनः ३
सञ्चिन्तयामि कौन्तेयं रहो जिष्णुं जनार्दन
अतीव दुःखभागी स सततं पाण्डुनन्दनः ४
किं नु तस्य शरीरेऽस्ति सर्वलक्षणपूजिते ।
अनिष्ट लक्षणं कृष्ण येन दुःखान्युपाश्नुते ॥ ५
अतीवासुखभोगी स सततं कुन्तिनन्दनः ।
न हि पश्यामि बीभत्सोर्निन्द्य गात्रेषु किञ्चन
श्रोतव्यं चेन्मयैतद्धि तन्मे व्याख्यातुमर्हसि ६
इत्युक्तः स हृषीकेशो ध्यात्वा दुःमहदुत्तरम् ।
राजानं भोजराजन्यवर्धनो विष्णुरब्रवीत् ७
न ह्यस्य नृपते किञ्चित्संश्लिष्टमुपलक्षये ।
ऋते पुरुषसिंहस्य पिण्डिकेऽस्याधिके यतः
स ताभ्यां पुरुषव्याघ्रो नित्यमध्वसु वर्तते ।
न चान्यदनुपश्यामि येनासौ दुःखभाजनम् ९
इत्युक्तः पुरुषश्रेष्ठस्तदा कृष्णेन धीमता ।
प्रोवाच वृष्णिशार्दूलमेवमेतदिति प्रभो १०
कृष्णा तु द्रौपदी कृष्णं तिर्यक् सासूयमैक्षत ।
प्रतिजग्राह तस्यास्तं प्रणयं चापि केशिहा ॥
सख्युः सखा हृषीकेशः साक्षादिव धनञ्जयः
तत्र भीमादयस्तं तु कुरवो याजकाश्च ये १२
रेमुः श्रुत्वा विचित्रां तां धनञ्जयकथां शुभाम्
तेषां कथयतामेव पुरुषोऽर्जुनसंकथाः ॥ १३
उपायाद्वचनाद्भूतो द्विजयस्य महात्मनः ।
सोभिगम्य कुरुश्रेष्ठं नमस्कृत्य च बुद्धिमान् ॥
उपायात नरव्याघ्रं फाल्गुनं प्रत्यवेदयत् ।
तच्छ्रुत्वा नृपतिस्तस्य हर्षबाष्पाकुलेक्षणः १५
प्रियाख्यानमिमित्त वै ददौ बहुधनं तदा ।
ततो द्वितीये दिवसे महान् शब्दो व्यवर्धत
आगच्छति नरव्याघ्रे कौरवाणां धुरन्धरे ।
ततो रेणुः समुद्भूतो विबभौ तस्य वाजिनः ॥

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे षडशीतितमोऽध्याय ॥ ८६ ॥

८७

श्रुतामिति ॥ १ ॥ भोजराजन्यानां वर्धनः ॥ ७ ॥ संश्लिष्टं अविविक्तं संहृष्टमिति पाठेऽपि अतिपुष्टत्वादितरलोपादविविक्तत्वं भवति तद्रहितं पिंडिके जानुनोरधस्थः पश्चाद्भागीयो मासल प्रदेश पिंडिका ते उभे अस्याधिके स्वदेशादधोभागपर्यन्तं बहुल आलम्बमाने पाठान्तरे कायतः शरीरात् अति अतिप्रमाणे ॥ ८ ॥

अभितो वर्तमानस्य यथोच्चैःश्रवसस्तथा ।
तत्र हर्षकरी वाचो नराणां शुश्रुवेऽर्जुनः १८
दिष्ट्यासि पार्थ कुशली
धन्यो राजा युधिष्ठिरः ।
कोऽन्यो हि पृथिवीं कृत्स्नां
जित्वा हि युधि पार्थिवान् ॥ १९
चारयित्वा हयश्रेष्ठमुपागच्छेदतेऽर्जुनात् ।
ये व्यतीता महात्मानो राजानः सगरादयः ॥
तेषामपीदृशं कर्म न कदाचन शुश्रुम ।
नैतदन्ये करिष्यन्ति भविष्या वसुधाधिपाः॥
यत्त्वं कुरुकुलश्रेष्ठ दुष्करं कृतवानसि ।
इत्येवं वदतां तेषां पुंसां कर्णसुखा गिरः ॥२२
शृण्वन्विवेश धर्मात्मा फाल्गुनो यज्ञसंस्तरम्
ततो राजा सहामात्यः कृष्णश्च यदुनन्दनः
धृतराष्ट्रं पुरस्कृत्य तं प्रत्युद्ययतुस्तदा ।
सोऽभिवाद्य पितुः पादौ धर्मराजस्य धीमतः
भीमादींश्चापि संपूज्य पर्यष्वजत केशवम् ।
तैः समेत्यार्चितस्तांश्च प्रत्यर्च्यार्थ यथाविधि
विशश्राम महाबाहुस्तीरं लब्ध्वेव पारगः ।
एतस्मिन्नेव काले तु स राजा बभ्रुवाहनः २६
मातृभ्यां सहितो धीमान्कुरूनेव जगाम ह ।
तत्र वृद्धान्यथा वत्स कुरूनन्यांश्च पार्थिवान्
अभिवाद्य महाबाहुस्तैश्चापि प्रतिनन्दितः।
प्रविवेश पितामह्याः कुन्त्या भवनमुत्तमम्२८

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि अर्जुनप्रत्यागमने सप्ताशीतितमोऽध्यायः ॥ ८७ ॥

८८

वैशम्पायन उवाच ।
स प्रविश्य महाबाहुः पाण्डवानां निवेशनम्
पितामहीमभ्यवंदत्साम्ना परमवल्गुना ॥ १
ततश्चित्रांगदा देवी कौरव्यस्यात्मजापि च ।
पृथां कृष्णां च सहिते विनयेनोपजग्मतुः २
सुभद्रां च यथान्यायं याश्चान्याः कुरुयोषितः
ददौ कुन्तीततस्ताभ्यां रत्नानि विविधानि च
द्रौपदी च सुभद्रा च याश्चाप्यन्याऽदुदुः स्त्रियः
ऊषतुस्तत्र ते देव्यौ महार्हशयनासने ॥ ४
सुपूजिते स्वयं कुन्त्या पार्थस्य हितकाम्यया
स च राजा महातेजाः पूजितो बभ्रुवाहनः ५
धृतराष्ट्रं महीपालमुपतस्थे यथाविधि ।
युधिष्ठिरं च राजानं भीमादींश्चापि पाण्डवान्
उपागम्य महातेजा विनयेनाभ्यवादयत् ।
स तैः प्रेम्णा परिष्वक्तः पूजितश्च यथाविधि
धनं चास्मै ददुर्भूरि प्रीयमाणा महारथाः ।
तथैव च महीपालः कृष्ण चक्रगदाधरम् ॥ ८
प्रद्युम्न इव गोविन्दं विनयेनोपतस्थिवान् ।
तस्मै कृष्णो ददौ राज्ञे महार्हमतिपूजितम् ९
रथं हेमपरिष्कारं दिव्याश्वयुजमुत्तमम् ।
धर्मराजश्च भीमश्च फाल्गुनश्च यमौ तथा १०
पृथक् पृथक् च ते चैनं मानार्थाभ्यामयोजयन्
ततस्तृतीये दिवसे सत्यवत्यात्मजो मुनिः ११
युधिष्ठिरं समभ्येत्य वाग्मी वचनमब्रवीत् ।
अद्यप्रभृति कौन्तेय यजस्व समयो हि ते ।
मुहूर्तो यज्ञियः प्राप्तश्चोदयन्तीह याजकाः १२
अहीनो नाम राजेन्द्र क्रतुस्तेऽयं च कल्पताम्
बहुत्वात्काञ्चनाख्यस्य ख्यातो बहुसुवर्णकः १३
एवमत्र महाराज दक्षिणां त्रिगुणां कुरु ।
त्रित्वं व्रजतु ते राजन्ब्राह्मणा ह्यत्र कारणम् १४
त्रीनश्वमेधानत्र त्वं संप्राप्य बहुदक्षिणान् ।
ज्ञातिवध्याकृतं पापं प्रहास्यसि नराधिप १५
पवित्रं परमं चैतत्पावनं चैतदुत्तमम् ।
यदश्वमेधावभृथं प्राप्स्यसे कुरुनन्दन ॥ १६
इत्युक्तः स तु तेजस्वी व्यासेनामितबुद्धिना ।
दीक्षां विवेश धर्मात्मा वाजिमेधाश्रये ततः १७

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्ताशीतितमोऽध्याय ॥ ८७ ॥

८८

स प्रविश्येति ॥ १ ॥ अहीन अह्ना सोमयागानां बहूना समूहोऽहीन न हीन द्रव्यादिना इति वा ॥१३॥

ततो यज्ञं महाबाहुर्वाजिमेधं महाक्रतुम् ।
बह्वन्नदक्षिणं राजा सर्वकामगुणान्वितम् १८
तत्र वेदविदो राजंश्चक्रुः कर्माणि याजकाः ।
परिक्रमन्तः सर्वज्ञा विधिवत्साधुशिक्षितम्
न तेषां स्खलितं किंचिदासीच्चाप्यकृतं तथा ।
क्रममुक्तं च युक्तं च चक्रुस्तत्र द्विजर्षभाः २०
कृत्वा प्रवर्ग्यं धर्मोख्यं यथावद्विजसत्तमाः ।
चक्रुस्ते विधिवद्राजंस्तथैवाभिषवं द्विजाः २१
अभिषूय ततो राजन्सोमं सोमपसत्तमाः ।
सवनान्यानुपूर्व्येण चक्रुः शास्त्रानुसारिणः ॥
न तत्र कृपणः कश्चिन्न दरिद्रो बभूव ह ।
क्षुधितो दुःखितो वापि प्राकृतो वापि मानवः
भोजनं भोजनार्थिभ्यो दापयामास शत्रुहा ।
भीमसेनो महातेजाः सततं राजशासनात् २४
संस्तरे कुशलाश्चापि सर्वकार्याणि याजकाः
दिवसे दिवसे चक्रुर्यथाशास्त्रानुदर्शनात् २५
नाषडङ्गविदत्रासीत्सदस्यस्तस्य धीमतः ।
नाव्रतो नानुपाध्यायो न च वादाविचक्षणः
ततो यूपोच्छ्रये प्राप्ते षड्बैल्वान्भरतर्षभ ।
खादिरान्बिल्वसमितांस्तावतः सर्ववर्णिनः
देवदारुमयौ द्वौ तु यूपौ कुरुपतेर्मखे ।
श्लेष्मातकमयं चैकं याजकाः समकल्पयन् ॥
शोभार्थं चापरान्यूपान्काञ्चनान्भरतर्षभ ।
स भीमः कारयामास धर्मराजस्य शासनात्

ते व्यराजन्त राजर्षेर्वासोभिरुपशोभिताः ।
महेन्द्रानुगता देवा यथा सप्तर्षिभिर्दिवि ३०
इष्टकाः काञ्चनीश्चात्र चयनार्थे कृताऽभवन् ।
शुशुभे चयनं तच्च दक्षस्येव प्रजापतेः ॥ ३१
चतुश्चित्यश्च तस्यासीद्दृष्टादृशकरात्मकः ।
स रुक्मपक्षो निचितस्त्रिकोणो गरुडाकृतिः
ततो नियुक्ताः पशवो यथाशास्त्रं मनीषिभिः
तं तं देवं समुद्दिश्य पक्षिणः पशवश्च ये ३३
ऋषभाः शास्त्रपठितास्तथा जलचराश्च ये ।
सर्वांस्तानभ्ययुंजंस्ते तत्राग्निचयकर्मणि ॥३४
यूपेषु नियता चासीत्पशूनां त्रिशती तथा ।
अश्वरत्नोत्तरा यज्ञे कौन्तेयस्य महात्मनः ३५
स यज्ञः शुशुभे तस्य साक्षाद्देवर्षिसंकुलः ।
गन्धर्वगणसंगीतः प्रनृत्तोप्सरसां गणैः ३६
स किंपुरुषसंकीर्णः किंनरैश्चोपशोभितः
सिद्धविप्रनिवासैश्च समंतादभिसंवृतः ॥ ३७

तस्मिन्सदसि नित्यास्तु
व्यासशिष्या द्विजर्षभाः।
सर्वशास्त्रप्रणेतारः
कुशला यज्ञसंस्तरे ॥ ३८

नारदश्च बभूवात्र तुम्बुरुश्च महाद्युतिः ।
विश्वावसुश्चित्रसेनस्तथाऽन्ये गीतकोविदाः
गन्धर्वा गीतकुशला नृत्येषु च विशारदाः ।
रमयन्ति स्म तान्विप्रान् यज्ञकर्मान्तरेषु वै ४०

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि अश्वमेधारम्भे अष्टाशीतितमोऽध्यायः ॥ ८८ ॥

८९

वैशम्पायन उवाच ।

श्रपयित्वा पशूनन्यान्विधिवद्द्विजसत्तमाः
तं तुरङ्गं यथाशास्त्रमालभन्त द्विजातयः १

ततः संश्रप्य तुरगं विधिवद्याजकास्तदा ।
उपसंवेशयन् राजंस्ततस्तां द्रुपदात्मजाम् ॥२

अभिषव सोमवल्लथा कडनम् ॥ २१ ॥ सोमं सोमवल्लीरस सवनानि प्रात सवनादीनि ॥ २२ ॥ सस्तरे इष्टकाना चयनाख्ये स्थडिलरचने ॥ २५ ॥ वर्णिन पलाशकाष्ठमया ॥ २७ ॥ इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे अष्टाशीतितमोऽध्याय ॥ ८८ ॥

८९

श्रपयित्वेति ॥ १ ॥ संज्ञप्येति पाठे हिंसित्वा तुरगं तस्य समीपे तिस्रभि कलाभि. कलनाभि मन्त्रद्रव्यश्रद्धाख्याभिरुपेता द्रौपदीं उपसंवेशयन् । सार्ध श्लोक ॥ २ ॥

कलाभिस्तिसृभी राजन्
यथाविधि मनस्विनीम् ।
उद्धृत्य तु वपां तस्य
यथाशास्त्रं द्विजातयः ॥ ३
श्रपयामासुरव्यग्रा विधिवद्भरतर्षभ ।
तं वपाधूमगन्धं तु धर्मराजः सहानुजैः ॥ ४
उपाजिघ्रद्यथाशास्त्रं सर्वपापापहं तदा ।
शिष्टान्यङ्गानि यान्यासंस्तस्याश्वस्य नराधिप
तान्यग्नौ जुहुवुर्धीराः समस्ताः षोडशर्त्विजः
संस्थाप्यैवं तस्य राज्ञस्तं यज्ञं शक्रतेजसः ॥ ६
व्यासः सशिष्यो भगवान्वर्धयामास तं नृपम् ।
ततो युधिष्ठिरः प्रादाद्ब्राह्मणेभ्यो यथाविधि
कोटीः सहस्रं निष्काणां व्यासाय तु वसुंधराम्
प्रतिगृह्य धरां राजन् व्यासः सत्यवतीसुतः
अब्रवीद्भरतश्रेष्ठं धर्मराजं युधिष्ठिरम् ।
वसुधा भवतस्त्वेषा सन्यस्ता राजसत्तम ९
निष्क्रयो दीयतां मह्यं ब्राह्मणा हि धनार्थिनः
युधिष्ठिरस्तु तान्विप्रान्प्रत्युवाच महामनाः १०
भ्रातृभिः सहितो धीमान्
मध्ये राज्ञां महात्मनाम् ।
अश्वमेधे महायज्ञे
पृथिवी दक्षिणा स्मृता ॥ ११
अर्जुनेन जिता चेयमृत्विग्भ्यः प्रापिता मया
वनं प्रवेक्ष्ये विप्राग्र्या विभजध्वं महीमिमाम्
चतुर्धा पृथिवीं कृत्वा चातुर्होत्रप्रमाणतः ।
नाहमादातुमिच्छामि ब्रह्मस्वं द्विजसत्तमाः ॥
इदं नित्यं मनो विप्रा भ्रातॄणां चैव मे सदा ।
इत्युक्तवति तस्मिंस्तु भ्रातरो द्रौपदी च सा
एवमेतादिति प्राहुस्तदभूल्लोमहर्षणम् ।
ततोन्तरिक्षे वागासीत्साधु साध्विति भारत
तथैव द्विजसंघानां शंसतां विबभौ स्वनः ।
द्वैपायनस्तथा कृष्णः पुनरेव युधिष्ठिरम् ॥ १६
प्रोवाच मध्ये विप्राणामिदं संपूजयन्मुनिः ।
दत्तैषा भवता मह्यं तां ते प्रतिददाम्यहम् १७
हिरण्यं दीयतामेभ्यो ब्राह्मणेभ्यो धराऽस्तु ते
ततोऽब्रवीद्वासुदेवो धर्मराजं युधिष्ठिरम् ॥ १८
यथाऽऽह भगवान्व्यासस्तथा त्वं कर्तुमर्हसि
इत्युक्तः स कुरुश्रेष्ठः प्रीतात्मा भ्रातृभिः सह
कोटिकोटिकृतां प्रादाद्दक्षिणां त्रिगुणां क्रतोः
न करिष्यति तल्लोके कश्चिदन्यो नराधिपः ॥
यत्कृतं कुरुराजेन मरुत्तस्यानुकुर्वता ।
प्रतिगृह्य तु तद्रत्नं कृष्णद्वैपायनो मुनिः ॥ २१
ऋत्विग्भ्यः प्रददौ विद्वांश्चतुर्धा व्यभजंश्च ते ।
धरण्या निष्क्रयं दत्त्वा तद्धिरण्यं युधिष्ठिरः ॥
धूतपापो जितस्वर्गो मुमुदे भ्रातृभिः सह ।
ऋत्विजस्तमपर्यन्तं सुवर्णनिचय तथा ॥ २३
व्यभजन्त द्विजातिभ्यो यथोत्साहं यथासुखम्
यज्ञवाटे च यत्किंचिद्धिरण्यं सविभूषणम् २४
तोरणानि च यूपांश्च घटान्पात्रीस्तथेष्टकाः ।
युधिष्ठिराभ्यनुज्ञाताः सर्वं तद्व्यभजन् द्विजाः
अनंतरं द्विजातिभ्यः क्षत्रिया जग्हिरे वसु ।
तथा विट्शूद्रसंघाश्च तथान्ये म्लेच्छजातयः
ततस्ते ब्राह्मणाः सर्वे मुदिता जग्मुरालयान्
तर्पिता वसुना तेन धर्मराजेन धीमता ॥ २७
स्वमंशं भगवान्व्यासः कुंत्यै साक्षाद्धि मानतः
प्रददौ तस्य महतो हिरण्यस्य महाद्युतिः २८
श्वशुरात्प्रीतिदायं तं प्राप्य सा प्रीतमानसा ।
चकार पुण्यकं तेन सुमहत्संघशः पृथा ॥ २९
गत्वा त्ववभृथं राजा विपाप्मा भ्रातृभिः सह
सभाज्यमानः शुशुभे महेन्द्रस्त्रिदशैरिव ३०
पाण्डवाश्च महीपालैः समेतैरभिसंवृताः ।
अशोभन्त महाराज ग्रहास्तारागणैरिव ॥ ३१
राजभ्योऽपि ततः प्रादाद्रत्नानि विविधानि च
गजानश्वानलङ्कारान् स्त्रियो वासांसि काञ्चनं
तद्धनौघमपर्यन्तं पार्थः पार्थिवमण्डले ।
विसृजन् शुशुभे राजन् यथा वैश्रवणस्तथा
आनीय च तथा वीरं राजानं बभ्रुवाहनम् ।
प्रदाय विपुलं वित्तं गृहान्प्रास्थापयत्तदा ३४
दुःशलायाश्च तं पौत्रं
बालकं भरतर्षभ ।
स्वराज्येऽथ पितुर्धीमान्
स्वसुः प्रीत्या न्यवेशयत् ॥ ३५
नृपतींश्चैव तान्सर्वान्सुविभक्तान्सुपूजितान् ।
प्रस्थापयामास वशी कुरुराजो युधिष्ठिरः ३६
गोविन्दं च महात्मानं बलदेवं महाबलम् ।
तथान्यान्वृष्णिवीरांश्च प्रद्युम्नाद्यान्सहस्रशः ॥

अज्ञानि हृदयजिह्वावक्षआदीनि ॥५॥ संस्थाप्य समाप्य ॥६॥ तुशब्दश्चार्थो ऋत्विगतर समुच्चिनोति तेन सर्वेभ्यो वसुधरां ददाविल्यर्थ. ॥ ८ ॥ अनंतरं द्विजातिभ्य विप्रेषु गृहीत्वा निवृत्तेषु शिष्टात् क्षत्रियादयो गृहीतवंत इत्यर्थ. ॥ २६ ॥

पूजयित्वा महाराज यथाविधि महाद्युतिः ।
भ्रातृभिः सहितो राजा प्रास्थापयदरिन्दमः
एवंवभूव यज्ञः स धर्मराजस्य धीमतः ।
बह्वन्नधनरत्नौघः सुरामैरेयसागरः ॥ ३९
सर्पिःपङ्का ह्रदा यत्र बभूवुश्चान्नपर्वताः ।
रसालाकर्दमा नद्यो बभूवुर्भरतर्षभ ॥ ४०
भक्ष्यखाण्डवरागाणां क्रियतां भुज्यतां तथा
पशूनां वध्यतां चैव नान्तं ददृशिरे जनाः ४१
मत्तप्रमत्तमुदितं सुप्रीतयुवतीजनम् ।
मृदङ्गशङ्खनादैश्च मनोरममभूत्तदा ॥ ४२
दीयतां भुज्यतां चेष्टं दिवारात्रमवारितम् ।
तं महोत्सवसङ्काशं हृष्टपुष्टजनाकुलम् ॥ ४३
कथयन्ति स्म पुरुषा नानादेशनिवासिनः ।
वर्षित्वा धनधाराभिः कामै रत्नै रसैस्तथा ।
विपाप्मा भरतश्रेष्ठः कृतार्थः प्राविशत्पुरम् ४४

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि अश्वमेधसमाप्तौ ऊननवतितमोऽध्यायः ॥ ८९ ॥

९०

जनमेजय उवाच ।
पितामहस्य मे यज्ञे धर्मराजस्य धीमतः ।
यदाश्चर्यमभूत्किंचित्तद्भवान्वक्तुमर्हति ॥ १
वैशम्पायन उवाच ।
श्रूयतां राजशार्दूल महदाश्चर्यमुत्तमम् ।
अश्वमेधे महायज्ञे निवृत्ते यदभूत्प्रभो ॥ २
तर्पितेषु द्विजाग्र्येषु ज्ञातिसम्बन्धिबन्धुषु ।
दीनान्धकृपणे वापि तदा भरतसत्तम ॥ ३
घुष्यमाणे महादाने दिक्षु सर्वासु भारत ।
पतत्सु पुष्पवर्षेषु धर्मराजस्य मूर्धनि ॥ ४
नीलाक्षस्तत्र नकुलो रुक्मपार्श्वस्तदाऽनघ ।
वज्राशनिसमं नादममुंचद्भृसुधाधिप ॥ ५
सकृदुत्सृज्य तन्नादं त्रासयानो मृगद्विजान् ।
मानुषं वचनं प्राह धृष्टो बिलशयो महान् ॥६
सक्तुप्रस्थेन वो नाय यज्ञस्तुल्यो नराधिपाः
उञ्छवृत्तेर्वदान्यस्य कुरुक्षेत्रनिवासिनः ॥ ७
तस्य तद्वचनं श्रुत्वा नकुलस्य विशाम्पते ।
विस्मयं परमं जग्मुः सर्वे ते ब्राह्मणर्षभाः ॥ ८
ततः समेत्य नकुलं पर्यपृच्छन्त ते द्विजाः ।
कुतस्त्वं समनुप्राप्तो यज्ञं साधुसमागमम् ॥ ९
किं बलं परमं तुभ्यं किं श्रुतं किं परायणम् ।
कथं भवन्तं विद्याम यो नो यज्ञं विगर्हसे १०
अविलुप्यागमं कृत्स्नं विविधैर्यैश्चियैः कृतम् ।
यथागमं यथान्यायं कर्तव्यं च तथा कृतम् ११
पूजार्हाः पूजिताश्चात्र विधिवच्छास्त्रदर्शनात्
मन्त्राहुतिहुताश्चाग्नेर्दत्तं देयममत्सरम् ॥ १२
तुष्टा द्विजातयश्चात्र दानैर्बहुविधैरपि ।
क्षत्रियाश्च सुयुद्धेन श्राद्धैश्चापि पितामहाः १३
पालनेन विशस्तुष्टाः कामैस्तुष्टा वरस्त्रियः ।
अनुक्रोशैस्तथा शूद्रा दानशेषैः पृथग्जनाः
ज्ञातिसम्बन्धिनस्तुष्टाः शौचेन च नृपस्य नः
देवा हविर्भिः पुण्यैश्च रक्षणैः शरणागताः १५
यदत्र तथ्य तद्ब्रूहि सत्यं सत्यं द्विजातिषु ।
यथाश्रुतं यथादृष्टं पृष्टो ब्राह्मणकाम्यया ॥ १६
श्रद्धेयवाक्यः प्राज्ञस्त्वं दिव्यं रूपं बिभर्षि च
समागतश्च विप्रैस्त्वं तद्भवान्वक्तुमर्हति ॥ १७
इति पृष्टो द्विजैस्तैः स प्रहसन्नकुलोऽब्रवीत् ।
नैषा मृषा मया वाणी प्रोक्ता दर्पेण वा द्विजाः
यन्मयोक्तमिदं वाक्यं युष्माभिश्चाप्युपश्रुतम् ।
सक्तुप्रस्थेन वो नायं यज्ञस्तुल्यो द्विजर्षभाः १९

मैरेय वृक्षजं मद्यम् ॥ ३९ ॥ खाडवराग पिप्पलीशुंठीयुक्तो मुद्गयूष खाडव स एव शर्करायुक्तो राग खाडव ॥४१॥ इति श्रीमहाभारते आश्वमेधिके पर्वाणि नैलकण्ठीये भारतभावदीपे एकोननवतितमोऽध्याय. ॥ ८९ ॥

९०

पितामहस्येत्यादिग्रथतात्पर्य क्लेशार्जितं न्यायतः श्रद्धया सत्पात्रेऽर्पित अश्वमेधादप्यधिकमिति क्रोधजयश्च सर्वथा कर्तव्य इति ॥ १ ॥

इत्यवश्यं मयैतद्वो वक्तव्यं द्विजसत्तमाः ।
शृणुताव्यग्रमनसः शंसतो मे यथातथम् २०
अनुभूतं च दृष्टं च यन्मयाऽद्भुतमुत्तमम् ।
उञ्छवृत्तेर्वदान्यस्य कुरुक्षेत्रनिवासिनः २१
स्वर्गं येन द्विजाः प्राप्तः सभार्यः ससुतस्नुषः
यथा चार्धं शरीरस्य ममेदं काञ्चनीकृतम् २२

नकुल उवाच ।

हन्त वो वर्तयिष्यामि दानस्य फलमुत्तमम्
न्यायलब्धस्य सूक्ष्मस्य विप्रदत्तस्य यद्विजाः
धर्मक्षेत्रे कुरुक्षेत्रे धर्मज्ञैर्बहुभिर्वृते ।
उञ्छवृत्तिर्द्विजः कश्चित्कापोतिरभवत्तदा २४
सभार्यः सह पुत्रेण सस्नुषस्तपसि स्थितः ।
बभूव शुक्लवृत्तः स धर्मात्मा नियतेन्द्रियः २५
षष्ठे काले सदा विप्रो भुंक्ते तैः सह सुव्रतः ।
षष्ठे काले कदाचित्तु तस्याहारो न विद्यते ॥
भुंक्तेन्यस्मिन्कदाचित्स षष्ठे काले द्विजोत्तमः
कदाचिद्धर्मिणस्तस्य दुर्भिक्षे सति दारुणे २७
नाविद्यत तदा विप्राः सञ्चयस्तन्निबोधत ।
क्षीणौषधिसमावेशे द्रव्यहीनोऽभवत्तदा २८
काले कालेऽस्य संप्राप्ते नैव विद्येत भोजनम्
क्षुधापरिगताः सर्वे प्रातिष्ठन्त तदा तु ते २९
उञ्छं तदा शुक्लपक्षे मध्यं तपति भास्करे ।
उष्णार्तश्च क्षुधार्तश्च विप्रस्तपसि संस्थितः ३०
उञ्छमप्राप्तवानेव ब्राह्मणः क्षुच्छ्रमान्वितः ।
स तथैव क्षुधाविष्टः सार्धं परिजनेन ह ३१
क्षपयामास तं कालं कृच्छ्रप्राणो द्विजोत्तमः ।
अथ षष्ठे गते काले यवप्रस्थमुपार्जयन् ॥ ३२
यवप्रस्थं तु तं सक्तूनकुर्वन्त तपस्विनः ।
कृतजप्याह्निकास्ते तु हुत्वा चाग्निं यथाविधि
कुडवं कुडवं सर्वे व्यभजन्त तपस्विनः ।
अथागच्छद्द्विजः कश्चिदतिथिर्भुञ्जतां तदा ३४
ते तं दृष्ट्वाऽतिथिं प्राप्तं प्रहृष्टमनसोऽभवन् ।
तेऽभिवाद्य सुखप्रश्नं पृष्ट्वा तमतिथिं तदा ॥ ३५
विशुद्धमनसो दान्ताः श्रद्धादमसमन्विताः ।
*अनसूयवो विक्रोधाः साधवो वीतमत्सराः
त्यक्तमानमदक्रोधा धर्मज्ञा द्विजसत्तमाः ।
सब्रह्मचर्यं गोत्रं ते तस्य ख्यात्वा परस्परम् ॥
कुटीं प्रवेशयामासुः क्षुधार्तमतिथिं तदा ।
इदमर्घ्यं च पाद्यं च बृसी चेयं तवानघ ॥ ३८
शुचयः सक्तवश्चेमे नियमोपार्जिताः प्रभो ।
प्रतिगृह्णीष्व भद्रं ते मया दत्ता द्विजर्षभ ३९
इत्युक्तः प्रतिगृह्याथ सक्तूनां कुडवं द्विजः ।
भक्षयामास राजेन्द्र न च तुष्टिं जगाम सः ॥
स उञ्छवृत्तिस्त प्रेक्ष्य क्षुधापरिगतं द्विजम्
आहारं चिन्तयामास कथं तुष्टो भवेदिति ॥
तस्य भार्याऽब्रवीद्वाक्यं मद्भागो दीयतामिति
गच्छत्वेष यथाकामं परितुष्टो द्विजोत्तमः ४२
इति ब्रुवन्तीं तां साध्वीं भार्यां स द्विजसत्तमः
क्षुधापरिगतां ज्ञात्वा तान्सक्तूंश्चाभ्यनन्दत ॥

आत्मानुमानतो विद्वान्
स तु विप्रर्षभस्तदा ।
जानन् वृद्धां क्षुधार्तां च
श्रान्तां ग्लानां तपस्विनीम् ॥ ४४

त्वगस्थिभूतां वेपन्तीं ततो भार्यामुवाच ह ।
अपि कीटपतङ्गानां मृगाणां चैव शोभने ४५
स्त्रियो रक्ष्याश्च पोष्याश्च न त्वेवं वक्तुमर्हसि
अनुकम्प्यो नरः पत्न्या पुष्टो रक्षित एव च
प्रपतेयशसो दीप्तात्स च लोकान्न चाप्नुयात्
धर्मकामार्थकार्याणि शुश्रूषा कुलसन्ततेः ४७
दारेष्वधीनो धर्मश्च पितॄणामात्मनस्तथा ।
न वेत्ति कर्मतो भार्यारक्षणे योऽक्षमः पुमान्
अयशो महदाप्नोति नरकांश्चैव गच्छति ।
इत्युक्ता सा ततः प्राह धर्मार्थौ नौ समौ द्विज
सक्तुप्रस्थचतुर्भागं गृहाणेमं प्रसीद मे ।
सत्यं रतिश्च धर्मश्च स्वर्गश्च गुणनिर्जितः ५०
स्त्रीणां पतिसमाधीनं काङ्क्षितं च द्विजर्षभ ।
ऋतुर्मातुः पितुर्बीजं दैवतं परमं पतिः ॥ ५१
भर्तुः प्रसादान्नारीणां रतिपुत्रफलं तथा ।
पालनाद्धि पतिस्त्वं मे भर्तासि भरणाच्च मे ॥
पुत्रप्रदानाद्धरदस्तस्मात्सक्तून्प्रयच्छ मे ।
जरापरिगतो वृद्धः क्षुधार्तो दुर्बलो भृशम् ॥
उपवासपरिश्रान्तो यदा त्वमपि कर्शितः ।
इत्युक्तः स तया सक्तून्प्रगृह्येदं वचोऽब्रवीत्
द्विज सक्तूनिमान्भूयः प्रतिगृह्णीष्व सत्तम ।
स तान्प्रगृह्य भुक्त्वा च न तुष्टिमगमद्द्विजः ।
तमुञ्छवृत्तिरालक्ष्य तताश्चिन्तापरोऽभवत् ५५

ममेदं यत्रेति शेषः ॥ २२ ॥ कापोति कपोतवदेकैकं कण आदत्ते स कापोति ॥२४ ॥ उञ्छं कणश आदानं कर्तुमिति शेषः शुक्लस्य ज्येष्ठस्य पक्षे ॥ ३० ॥ अनसूया गतक्रोधा इति पाठ ।

पुत्र उवाच ।

सक्तूनिमान्प्रगृह्य त्वं देहि विप्राय सत्तमः।
इत्येव सुकृतं मन्ये तस्मादेतत्करोम्यहम् ॥ ५६
भवान्हि परिपाल्यो मे सर्वदैव प्रयत्नतः।
साधूनां कांक्षितं यस्मात्पितुर्वृद्धस्य पालनम्
पुत्रार्थो विहितो ह्येष वार्धके परिपालनम्।
श्रुतिरेषा हि विप्रर्षे त्रिषु लोकेषु शाश्वती ५८
प्राणधारणमात्रेण शक्यं कर्तुं तपस्त्वया।
प्राणो हि परमो धर्मः स्थितो देहेषु देहिनाम

पितोवाच ।

अपि वर्षसहस्री त्वं बाल एव मतो मम।
उत्पाद्य पुत्रं हि पिता कृतकृत्यो भवेत्सुतात्
बालानां क्षुद्बलवती जानाम्येतदहं प्रभो।
वृद्धोऽहं धारयिष्यामि त्वं बली भव पुत्रक ॥
जीर्णेन वयसा पुत्र न मां क्षुद्बाधतेऽपि च।
दीर्घकालं तपस्तप्तं न मे मरणतो भयम् ॥ ६२

पुत्र उवाच।

अपत्यमस्मि ते पुंस-
त्त्राणात्पुत्र इति स्मृतः।
आत्मा पुत्रः स्मृतस्तस्मा-
त्त्राह्यात्मानमिहात्मना ॥ ६३

पितोवाच ।

रूपेण सदृशस्त्वं मे शीलेन च दमेन च।
परीक्षितश्च बहुधा सक्तूनादत्स्व ते सुत ॥ ६४

इत्युक्त्वाऽऽदाय तान्सक्तून्
प्रीतात्मा द्विजसत्तमः।
प्रहसन्निव विप्राय
स तस्मै प्रददौ तदा ॥ ६५
भुक्त्वा तानपि सक्तून्स
नैव तुष्टो बभूव ह।
उञ्छवृत्तिस्तु धर्मात्मा
व्रीडामनुजगाम ह ॥ ६६
तं वै वधूः स्थिता साध्वी
ब्राह्मणप्रियकाम्यया।
सक्तूनादाय संहृष्टा
श्वशुरं वाक्यमब्रवीत् ॥ ६७
सन्तानात्तव सन्तानं मम विप्र भविष्यति।
सक्तूनिमानतिथये गृहीत्वा सम्प्रयच्छ मे ६८
तव प्रसादान्निर्वृत्ता मम लोकाः किलाक्षयाः
पुत्रेण तानवाप्नोति यत्र गत्वा न शोचति ६९
धर्माद्या हि यथा त्रेता वह्नित्रेता तथैव च।
तथैव पुत्रपौत्राणां स्वर्गस्त्रेता किलाक्षयः ७०
पितॄन् ऋणात्तारयति पुत्र इत्यनुशुश्रुम।
पुत्रपौत्रैश्च नियतं साधुलोकानुपाश्नुते ॥ ७१

श्वशुर उवाच ।

वातातपविशीर्णाङ्गीं त्वां विवर्णां निरीक्ष्य वै
कर्षितां सुव्रताचारे क्षुधाविह्वलचेतसम् ॥ ७२
कथं सक्तून् ग्रहीष्यामि भूत्वा धर्मोपघातकः
कल्याणवृत्ते कल्याणि नैवं त्वं वक्तुमर्हसि ७३
षष्ठे काले व्रतवतीं शौचशीलतपोन्विताम्।
कृच्छ्रवृत्तिं निराहारां द्रक्ष्यामि त्वां कथं शुभे
बाला क्षुधार्ता नारी च रक्ष्या त्वं सततं मया
उपवासपरिश्रान्ता त्वं हि बान्धवनन्दिनी ॥

स्नुषोवाच ।

गुरोर्मम गुरुस्त्वं वै यतो दैवतदैवतम्।
देवातिदेवस्तस्मात्त्वं सक्तूनादत्स्व मे प्रभो ७६
देहः प्राणश्च धर्मश्च शुश्रूषार्थमिदं गुरोः।
तव विप्र प्रसादेन लोकान्प्राप्स्यामहे शुभान्
अवेक्ष्या इति कृत्वाहं दृढभक्तेति वा द्विज।
चिन्त्या ममेयमिति वा सक्तूनादातुमर्हसि ७८

श्वशुर उवाच ।

अनेन नित्यं साध्वी त्वं शीलवृत्तेन शोभसे
या त्वं धर्मव्रतोपेता गुरुवृत्तिमवेक्षसे ॥ ७९
तस्मात्सक्तून् ग्रहीष्यामि वधु नार्हसि वञ्चनाम्
गणयित्वा महाभागे त्वां हि धर्मभृतां वरे ॥
इत्युक्त्वा तानुपादाय सक्तून्प्रादाद्द्विजातये।
ततस्तुष्टोऽभवद्विप्रस्तस्य साधोर्महात्मनः ८१
प्रीतात्मा स तु तं वाक्यमिदमाह द्विजर्षभम्।
वाग्मी तदा द्विजश्रेष्ठो धर्मः पुरुषविग्रहः ८२
शुद्धेन तव दानेन न्यायोपात्तेन धर्मतः।
यथाशक्ति विसृष्टेन प्रीतोऽस्मि द्विजसत्तम।
अहो दान घुष्यते ते स्वर्गे स्वर्गनिवासिभिः
गगनात्पुष्पवर्षं च पश्येदं पतितं भुवि।
सुरर्षिदेवगन्धर्वा ये च देवपुरःसराः ॥ ८४
स्तुवन्तो देवदूताश्च स्थिता दानेन विस्मिताः
ब्रह्मर्षयो विमानस्था ब्रह्मलोकचराश्च ये ॥ ८५

अवेक्ष्या पालनीया चिंत्या परीक्षणीया ॥७८॥ हे वरे श्रेष्ठे महाभागे त्वा धर्मभृता मध्ये गणयित्वा सक्तून् ग्रहीष्यामीत्यन्वय ॥ ८० ॥

कांक्षन्ते दर्शनं तुभ्यं दिवं व्रज द्विजर्षभ ।
पितृलोकगताः सर्वे तारिताः पितरस्त्वया ॥
अनागताश्च बहवः सुबहूनि युगान्युत ।
ब्रह्मचर्येण दानेन यज्ञेन तपसा तथा ॥ ८७
असङ्करेण धर्मेण तस्माद्गच्छ दिवं द्विज ।
श्रद्धया परया यस्त्वं तपश्चरसि सुव्रत ॥ ८८
तस्मादेवाश्च दानेन प्रीता ब्राह्मणसत्तम ।
सर्वमेतद्धि यस्मात्ते दत्तं शुद्धेन चेतसा ॥ ८९
कृच्छ्रकाले ततः स्वर्गो विजितः कर्मणा त्वया
क्षुधा निर्णुदति प्रज्ञां धर्मबुद्धिं व्यपोहति ९०
क्षुधापरिगतज्ञानो धृतिं त्यजति चैव ह ।
बुभुक्षा जयते यस्तु स स्वर्गं जयते ध्रुवम् ९१
यदा दानरुचिः स्याद्धि तदा धर्मो न सीदति ।
अनवेक्ष्य सुतस्नेहं कलत्रस्नेहमेव च ॥ ९२
धर्ममेव गुरुं ज्ञात्वा तृष्णा न गणिता त्वया ।
द्रव्यागमो नृणा सूक्ष्मः पात्रे दानं ततः परम् ॥
कालः परतरो दानात् श्रद्धा चैव ततः परा ।
स्वर्गद्वारं सुसूक्ष्मं हि नरैर्मोहान्न दृश्यते ॥ ९४

स्वगागर्लं लोभबीजं
रागगुप्तं दुरासदम् ।
तं तु पश्यन्ति पुरुषा
जितक्रोधा जितेन्द्रियाः ॥ ९५

ब्राह्मणास्तपसा युक्ता यथाशक्ति प्रदायिनः ।
सहस्रशक्तिश्च शतं शतशक्तिर्दशापि च ॥ ९६
दद्यादपश्च यः शक्त्या सर्वे तुल्यफलाः स्मृताः
रन्तिदेवो हि नृपतिरपः प्रादादकिञ्चनः ९७
शुद्धेन मनसा विप्र नाकपृष्ठं ततो गतः ।
न धर्मः प्रीयते तात दानैर्दत्तैर्महाफलैः ॥ ९८
न्यायलब्धैर्यथा सूक्ष्मैः श्रद्धापूतैः स तुष्यति ।
गोप्रदानसहस्राणि द्विजेभ्योऽदान्नृगो नृपः ९९
एकां दत्वा स पारक्यां नरकं समपद्यत ।
आत्ममांसप्रदानेन शिबिरौशीनरो नृपः १००

प्राप्य पुण्यकृताँल्लोका-
न्मोदते दिवि सुव्रतः ।
विभवो न नृणां पुण्यं
स्वशक्त्या स्वर्जितं सताम् ॥ १०१

नयज्ञैर्विविधैर्विप्र यथान्यायेन सञ्चितैः ।
क्रोधाद्दानफलं हन्ति लोभात्स्वर्गं न गच्छति
न्यायवृत्तिर्हि तपसा दानवित्स्वर्गमश्नुते ।
न राजसूयैर्बहुभिरिष्ट्वा विपुलदक्षिणैः ॥ ३
न चाश्वमेधैर्बहुभिः फलं समामिदं तव ।
सक्तुप्रस्थेन विजितो ब्रह्मलोकस्त्वयाऽक्षयः ४
विरजो ब्रह्मसदनं गच्छ विप्र यथासुखम् ।
सर्वेषा वो द्विजश्रेष्ठ दिव्यं यानमुपस्थितम् ५

आरोहत यथाकामं
धर्मोऽस्मि द्विज पश्य माम् ।
तारितो हि त्वया देहो
लोके कीर्तिः स्थिरा च ते ॥ ६

सभार्यः सहपुत्रश्च स नुषश्च दिवं व्रज ।
इत्युक्तवाक्ये धर्मे तु यानमारुह्य स द्विजः ७
सदारः ससुतश्चैव सस्नुषश्च दिवं गतः ।
तस्मिन्विप्रे गते स्वर्गं ससुते सस्नुषे तदा ॥ ८
भार्याचतुर्थे धर्मज्ञे ततोऽहं निःसृतो बिलात्
ततस्तु सक्तुगन्धेन क्लेदेन सलिलस्य च ॥ ९

दिव्यपुष्पविमर्दाच्च
साधोर्दानलवैश्च तैः ।
विप्रस्य तपसा तस्य
शिरो मे काञ्चनीकृतम् ॥ ११०

तस्य सत्याभिसन्धस्य सक्तुदानेन चैव ह ।
शरीरार्धं च मे विप्राः शातकुम्भमयं कृतम् ११
पश्यतेमं सुविपुल तपसा तस्य धीमतः ।
कथमेवंविधं स्याद्धि पार्श्वमन्यदिति द्विजाः ॥
तपोवनानि यज्ञाश्च दृष्टोऽभ्येमि पुनः पुनः ।
यज्ञं त्वहमिमं श्रुत्वा कुरुराजस्य धीमतः १३
आशया परया प्राप्तो न चाहं काञ्चनीकृतः ।
ततो मयोक्तं तद्वाक्यं प्रहस्य ब्राह्मणर्षभाः १४
सक्तुप्रस्थेन यज्ञोयं सम्मितो नेति सर्वथा ।
सक्तुप्रस्थलवैस्तैर्हि तदाह काञ्चनीकृतः ॥ १५
न हि यज्ञो महानेष सदृशस्तैर्मतो मम ।
इत्युक्त्वा नकुलः सर्वान्यज्ञे द्विजवरांस्तदा
जगामादर्शने तेषां विप्रास्ते च ययुर्गृहान् १७

वैशम्पायन उवाच ।

एतत्ते सर्वमाख्यातं मया परपुरञ्जय ।
यदाश्चर्यमभूत्तत्र वाजिमेधे महाक्रतौ ॥ १८
न विस्मयस्ते नृपते यज्ञे कार्यः कथञ्चन ।
ऋषिकोटिसहस्राणि तपोभिर्यै दिवं गताः १९

अद्रोहः सर्वभूतेषु
सन्तोषः शीलमार्जवम् ।
तपो दमश्च सत्यं च
प्रदानं चेति साम्मितम् ॥ १२०

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि नकुलाख्याने नवतितमोऽध्यायः ॥ ९० ॥



९१

जनमेजय उवाच ।

यज्ञे सक्ता नृपतयस्तपःसक्ता महर्षयः ।
शान्तिव्यवस्थिता विप्राः शमे दम इति प्रभो
तस्माद्यज्ञफलैस्तुल्यं न किञ्चिदिह दृश्यते ।
इति मे वर्तते बुद्धिस्तथा चैतदसंशयम् ॥ २
यज्ञैरिष्ट्वा तु बहवो राजानो द्विजसत्तमाः ।
इह कीर्तिं परा प्राप्य प्रेत्य स्वर्गमवाप्नुयुः ॥ ३
देवराजः सहस्राक्षः क्रतुभिर्भूरिदक्षिणैः ।
देवराज्यं महातेजाः प्राप्तवानखिलं विभुः ४
यदा युधिष्ठिरो राजा भीमार्जुनपुरःसरः ।
सदृशो देवराजेन समृद्ध्या विक्रमेण च ॥ ५
अथ कस्मात्स नकुलो गर्हयामास तं क्रतुम् ।
अश्वमेधं महायज्ञं राज्ञस्तस्य महात्मनः ॥ ६

वैशम्पायन उवाच ।

यज्ञस्य विधिमग्र्यं वै फलं चापि नराधिप
गदतः शृणु मे राजन्यथावदिह भारत ॥ ७
पुरा शक्रस्य यजतः सर्व ऊचुर्महर्षयः ।
ऋत्विक्षु कर्मण्यग्रेषु वितते यज्ञकर्मणि ॥ ८
हूयमाने तथा वह्नौ होत्रे गुणसमन्विते ।
देवेष्वाहूयमानेषु स्थितेषु परमर्षिषु ॥ ९
सुप्रतीतैस्तथा विप्रैः स्वागमैः सुस्वरैर्नृप ।
अश्रान्तैश्चापि लघुभिरध्वर्युवृषभैस्तथा १०
आलंभसमये तस्मिन् गृहीतेषु पशुष्वथ ।
महर्षयो महाराज बभूवुः कृपयान्विताः ॥ ११
ततो दीनान्पशून्दृष्ट्वा ऋषयस्ते तपोधनाः ।
ऊचुः शक्रं समागम्य नायं यज्ञविधिः शुभः
अपरिज्ञानमेतत्ते महान्तं धर्ममिच्छतः ।
न हि यज्ञे पशुगणा विधिदृष्टाः पुरन्दर १३
धर्मोपघातकस्त्वेष समारंभस्तव प्रभो ।
नायं धर्मकृतो यज्ञो न हिंसा धर्म उच्यते १४
आगमेनैव ते यज्ञं कुर्वंतु यदि चेच्छसि १५
विधिदृष्टेन यज्ञेन धर्मस्ते सुमहान्भवेत् ।
यज बीजैः सहस्राक्ष त्रिवर्षपरमोषितैः ॥ १६
एष धर्मो महान् शक्र महागुणफलोदयः ।
शतक्रतुस्तु तद्वाक्यमृषिभिस्तत्त्वदर्शिभिः ॥
उक्तं न प्रतिजग्राह मानान्मोहवश गतः ।
तेषां विवादः सुमहान् शक्रयज्ञे तपस्विनाम्
जङ्गमैः स्थावरैर्वाऽपि यष्टव्यमिति भारत ।
ते तु खिन्ना विवादेन ऋषयस्तत्त्वदर्शिनः १९
तदा सन्धाय शक्रेण पप्रच्छुर्नृपतिं वसुम् ।
धर्मसंशयमापन्नान्सत्यं ब्रूहि महामते ॥ २०
महाभाग कथं यज्ञेष्वागमो नृपसत्तम ।
यष्टव्यं पशुभिर्मुख्यैरथो बीजै रसैरिति ॥ २१
तच्छ्रुत्वा तु वसुस्तेषामविचार्य बलाबलम् ।
यथोपनीतैर्यष्टव्यमिति प्रोवाच पार्थिवः ॥ २२
एवमुक्त्वा स नृपतिः प्रविवेश रसातलम् ।
उक्त्वाऽथ वितथं प्रश्नं चेदीनामीश्वरः प्रभुः ॥
तस्मान्न वाच्यं ह्येकेन बहुज्ञेनापि संशये ।
प्रजापतिमपाहाय स्वयंभुवमृते प्रभुम् ॥ २४
तेन दत्तानि दानानि पापेनाशुद्धबुद्धिना ।
तानि सर्वाण्यनादृत्य नश्यन्ति विपुलान्यपि
तस्याधर्मप्रवृत्तस्य हिंसकस्य दुरात्मनः ।
दानेन कीर्तिर्भवति न प्रेत्येह च दुर्मतेः ॥२६
अन्यायोपगतं द्रव्यमभीक्ष्णं यो ह्यपण्डितः ।
धर्माभिशंकी यजते न स धर्मफलं लभेत् २७
धर्मवैतंसिको यस्तु पापात्मा पुरुषाधमः ।
ददाति दानं विप्रेभ्यो लोकविश्वासकारणम्

इति श्रीमहाभारते आश्वमधिके पर्वणि नैलकण्ठीये भारतभावदीपे नवतितमोऽध्याय ॥९०॥

९१

यज्ञे सक्ता नृपतय इत्यध्यायो हिंसामिश्रस्वधर्मस्य निंदार्थम् ॥१॥ त्रिवर्षपरमोषितै पुराणै ॥१६॥ रसै पयोघृतादिभि ॥ २१ ॥ वितथं हिंस्राहिंस्रयो क्त्वोस्तुल्यत्वापादनादनृतम् ॥ २३ ॥

पापेन कर्मणा विप्रो धनं प्राप्य निरंकुशः ।
रागमोहान्वितः सोऽन्ते कलुषां गतिमश्नुते ॥
अपि सञ्चयबुद्धिर्हि लोभमोहवशंगतः ।
उद्वेजयति भूतानि पापेनाशुद्धबुद्धिना ॥ ३०
एवं लब्ध्वा धनं मोहाद्यो हि दद्याद्यजेत वा
न तस्य स फलं प्रेत्य भुक्ते पापधनागमात् ॥३१
उञ्छं मूलं फलं शाकमुदपात्रं तपोधनाः ।
दानं विभवतो दत्त्वा नराः स्वर्यान्ति धार्मिकाः
एष धर्मो महायोगो दानं भूतदया तथा ।
ब्रह्मचर्यं तथा सत्यमनुक्रोशो धृतिः क्षमा ३२
सनातनस्य धर्मस्य मूलमेतत्सनातनम् ।
श्रूयन्ते हि पुरा वृत्ता विश्वामित्रादयो नृपाः ॥
विश्वामित्रोऽसितश्चैव जनकश्च महीपतिः ।
कक्षसेनार्ष्टिसेनौ च सिन्धुद्वीपश्च पार्थिवः ॥
एते चान्ये च बहवः सिद्धिं परामिकां गताः ।
नृपाः सत्यैश्च दानैश्च न्यायलब्धैस्तपोधनाः ॥
ब्राह्मणाःक्षत्रिया वैश्याः शूद्रा ये चाश्रितास्तपः
दानधर्माग्निना शुद्धास्ते स्वर्गं यान्ति भारत३७

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि हिंसामिश्रधर्मनिन्दायां एकनवतितमोऽध्यायः ॥ ९१ ॥

९२

जनमेजय उवाच ।
धर्मागतेन त्यागेन भगवन्स्वर्गमस्ति चेत् ।
एतन्मे सर्वमाचक्ष्व कुशलो ह्यसि भाषितुम् १
तस्योञ्छवृत्तेर्यद्वृत्तं सकृदाने फलं महत् ।
कथितं तु मम ब्रह्मंस्तथ्यमेतदसंशयम् ॥ २
कथं हि सर्वयज्ञेषु निश्चयः परमोऽभवत् ।
एतदर्हसि मे वक्तुं निखिलेन द्विजर्षभ ॥ ३

वैशम्पायन उवाच ।
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
अगस्त्यस्य महायज्ञे पुरावृत्तमरिन्दम ॥ ४
पुराऽगस्त्यो महातेजा दीक्षां द्वादशवार्षिकीम्
प्रविवेश महाराज सर्वभूतहिते रतः ॥ ५
तत्राग्निकल्पा होतार आसन्सत्रे महात्मनः ।
मूलाहाराः फलाहाराः साश्मकुट्टा मरीचिपाः
परिपृष्टिका वैघसिकाः प्रसंख्यानास्तथैव च
यतयो भिक्षवश्चात्र बभूवुः पर्यवस्थिताः ॥ ७
सर्वे प्रत्यक्षधर्माणो जितक्रोधा जितेन्द्रियाः ।
दमे स्थिताश्च सर्वे ते हिंसादम्भविवर्जिताः
वृत्ते शुद्धे स्थिता नित्यमिन्द्रियैश्चाप्यबाधिताः
उपातिष्ठन्त तं यज्ञं यजन्तस्ते महर्षयः ॥ ९
यथाशक्त्या भगवता
तदन्नं समुपार्जितम् ।
तस्मिन्सत्रे तु यद्वृत्तं
यद्योग्यं च तदाऽभवत् ॥ ११
तथा ह्यनेकैर्मुनिभिर्महान्तः क्रतवः कृताः ।
एवंविधे त्वगस्त्यस्य वर्तमाने तथाऽध्वरे ।
न ववर्ष सहस्राक्षस्तदा भरतसत्तम ॥ ११
ततः कर्मान्तरे राजन्नगस्त्यस्य महात्मनः ।
कथेयमभिनिर्वृत्ता मुनीनां भावितात्मनाम् १२
अगस्त्यो यजमानोऽसौ ददात्यन्नं विमत्सरः ।
न च वर्षति पर्जन्यः कथमन्नं भविष्यति १३
सत्रं चेदं महद्विप्रा मुनेर्द्वादशवार्षिकम् ।
न वर्षिष्यति देवश्च वर्षाण्येतानि द्वादश ॥ १४
एतद्ब्रुवन्तः साञ्जिन्त्य महर्षेरस्य धीमतः ।
अगस्त्यस्यातितपसः कर्तुमर्हन्त्यनुग्रहम् १५
इत्येवमुक्ते वचने ततोऽगस्त्यः प्रतापवान् १६
प्रोवाच वाक्यं स तदा
प्रसाद्य शिरसा मुनीन् ।
यदि द्वादशवर्षाणि
न वर्षिष्यति वासवः ॥ १७

इति श्रीमहाभारते आश्वमेधिके पर्वणि नैलकण्ठीये भारतभावदीपे एकनवतितमोऽध्याय ॥ ९१ ॥

९२

धर्मागतेनेत्यध्यायः सर्वसाधनहीना अपि महान्तो यज्ञं निर्वर्तयन्त्येवेति वक्तुमारभ्यते ॥१॥ मरीचिपाश्चन्द्रमरीचिपानमात्रतृप्ता ॥६॥ परिपृष्टं चेदेव गृह्णन्ति नान्यथा ते परिपृष्टिका पाठान्तरे परिपृच्छिका अपि त एव प्रसंख्यानास्तत्कालमात्रसग्रहा । अप्रक्षाला इति पाठे शेषहीना ॥७

चिन्तायज्ञ करिष्यामि विधिरेष सनातनः ।
यदि द्वादशवर्षाणि न वर्षिष्यति वासवः १८
स्पर्शयज्ञ करिष्यामि विधिरेष सनातनः ।
यदि द्वादशवर्षाणि न वर्षिष्यति वासवः १९
ध्येयात्मना हरिष्यामि यज्ञानेतान्यतव्रतः ।
बीजयज्ञो मयाऽयं वै बहुवर्षसमाचितः ॥ २०
बीजैर्हितं करिष्यामि नात्र विघ्नो भविष्यति
नेदं शक्यं वृथा कर्तुं मम सत्रं कथंचन ॥ २१
वर्षिष्यतीह वा देवो न वा वर्ष भविष्यति ।
अथवाभ्यर्थनामिन्द्रो न करिष्यति कामतः ॥
स्वयमिन्द्रो भविष्यामि जीवयिष्यामि च प्रजाः
यो यदाहारजातश्च स तथैव भविष्यति २३
विशेष चैव कर्तास्मि पुनः पुनरतीव हि ।
अद्येह स्वर्णमभ्येतु यच्चान्यद्वसु किञ्चन ॥२४
त्रिषु लोकेषु यच्चास्ति तदिहागम्यतां स्वयम् ।
दिव्याश्चाप्सरसां संघा गन्धर्वाश्च सकिन्नराः
विश्वावसुश्च ये चान्ये तेप्युपासन्तु मे मखम् ।
उत्तरेभ्यः कुरुभ्यश्च यत्किंचिद्वसु विद्यते २६
सर्वं तदिह यज्ञेषु स्वयमेवोपतिष्ठतु ।
स्वर्गः स्वर्गसदश्चैव धर्मश्च स्वयमेव तु ॥ २७
इत्युक्ते सर्वमेवैतदभवत्तपसा मुनेः ।
तस्य दीप्ताग्निमहसस्त्वगस्त्यस्यातितेजसः ॥
ततस्ते मुनयो दृष्ट्वा ददृशुस्तपसो बलम् ।
विस्मिता वचनं प्राहुरिद सर्वे महार्थवत् ॥२९

ऋषय ऊचुः ।

प्रीताः स्म तव वाक्येन न त्विच्छामस्तपोव्ययं
तैरेव यज्ञैस्तुष्टाः स्म न्यायेनेच्छामहे वयम् ॥
यज्ञ दीक्षां तथा होमान्यच्चान्यन्मृगयामहे ।
न्यायेनोपार्जिताहाराः स्वकर्माभिरता वयम्
वेदांश्च ब्रह्मचर्येण न्यायतः प्रार्थयामहे ।
न्यायेनोत्तरकालं च गृहेभ्यो निःसृता वयम्
धर्मदृष्टैर्विधिद्वारैस्तपस्तप्स्यामहे वयम् ।
भवतः सम्यगिष्टा तु बुद्धिर्हिंसाविवर्जिता ॥
एतामहिंसां यज्ञेषु ब्रूयास्त्वं सततं प्रभो ।
प्रीतास्ततो भविष्यामो वयं तु द्विजसत्तम ॥
विसर्जिताः समाप्तौ च सत्रादस्माद्व्रजामहे ।
तथा कथयतां तेषां देवराजः पुरन्दरः ॥ ३५
ववर्ष सुमहातेजा दृष्ट्वा तस्य तपोबलम् ।
आसमाप्तेश्च यज्ञस्य तस्यामिततपराक्रमः ॥ ३६
निकामवर्षी पर्जन्यो बभूव जनमेजय ।
प्रसादयामास च तमगस्त्यं त्रिदशेश्वरः ।
स्वयमभ्येत्य राजर्षे पुरस्कृत्य बृहस्पतिम् ॥३७
ततो यज्ञसमाप्तौ तान्विससर्ज महामुनीन् ।
अगस्त्यः परमप्रीतः पूजयित्वा यथाविधि ॥

जनमेजय उवाच ।

कोऽसौ नकुलरूपेण शिरसा काञ्चनेन वै ।
प्राह मानुषवद्वाचमेतत्पृष्टो वदस्व मे ॥ ३९

वैशम्पायन उवाच ।

एतत्पूर्वं न पृष्टोऽहं न चास्माभिः प्रभाषितम्
श्रूयता नकुलो योऽसौ यथा वाक् तस्य मानुषी
श्राद्धं सकल्पयामास जमदग्नेः पुरा किल ।
होमधेनुस्तमागाच्च स्वयमेव दुदोह ताम् ॥४१
तत्पयः स्रापयामास नवे भाण्डे दृढे शुचौ ।
तच्च क्रोधस्वरूपेण पिठरं धर्म आविशत् ॥ ४२
जिज्ञासुस्तमृषिश्रेष्ठं किं कुर्याद्धिप्रिये कृते ।
इति संचिन्त्य धर्मः स धर्षयामास तत्पयः ॥
तमाज्ञाय मुनिः क्रोधं नैवास्य स चुकोप ह ।
स तु क्रोधस्ततो राजन्ब्राह्मणीं मूर्तिमास्थितः
जिते तस्मिन् भृगुश्रेष्ठमभ्यभाषदमर्षणः ॥ ४४
जितोस्मीति भृगुश्रेष्ठ भृगवो ह्यतिरोषणाः ।
लोके मिथ्या प्रवादोयं यत्त्वयास्मि विनिर्जितः
वशे स्थितोऽहं त्वय्यद्य क्षमावति महात्मनि ।
बिभेमि तपसः साधो प्रसाद कुरु मे प्रभो ॥

जमदग्निरुवाच ।

साक्षाद्दृष्टोसि मे क्रोध गच्छ त्वं विगतज्वरः
न त्वयापकृतं मेऽद्य न च मे मन्युरास्ति वै ४७
यान्समुद्दिश्य संकल्पः पयसोऽस्य कृतो मया
पितरस्ते महाभागास्तेभ्यो बुद्ध्यस्व गम्यताम्

चिंतायज्ञ मानस यज्ञ सकल्पमात्रेणेव देवानृषींश्च तर्पयिष्यामीत्यर्थ ॥ १८ ॥ स्पर्शयज्ञ उपात्तद्रव्यस्य व्ययमकृत्वा तत्स्पर्शेनैव तास्तर्पयिष्यामि एव दृष्टियज्ञोपि ज्ञेय ॥ १९ ॥ सिद्धद्रव्याभावे ध्यानमात्रेण द्रव्याण्याहरिष्यामीत्याह-**ध्येयेति** । पाठान्तरे व्यायामेन शरीरक्लेशेन ॥२०॥ ध्येयात्मनेत्यस्य प्रपञ्चोऽर्थवेन्यादि ॥२२॥ कोसावित्यादि शेषकथा क्रोधजन्योत्कर्षवर्णनार्था ॥ ३९ ॥ **पिठरं** पात्र धर्म आविशतत्यय पीतवानित्यर्थ ॥ ४२ ॥ रोषणत्वमेव मिथ्यारोषस्य जितत्वात्तत्रया ॥ ४५ ॥ इति श्रीमहा-

इत्युक्तो जातसंत्रासस्तत्रैवान्तरधीयत ।
पितृणामभिषंगाच्च नकुलत्वमुपागतः ॥ ४९
स तान्प्रसादयामास शापस्यान्तो भवेदिति
तैश्चाप्युक्तः क्षिपन्धर्मं शापस्यान्तमवाप्स्यसि
तैश्चोक्तो यज्ञियान्देशान्धर्मारण्यं तथैव च ।
जुगुप्समानो धावन्स त यज्ञं समुपासदत ५१
धर्मपुत्रमथाक्षिप्य सक्तुप्रस्थेन तेन सः ।
मुक्तः शापात्ततः क्रोधो धर्मो ह्यासीद्युधिष्ठिरः
एवमेतत्तदा वृत्ते यज्ञे तस्य महात्मनः ।
पश्यतां चापि नस्तत्र नकुलोन्तर्हितस्तदा ५३

इति श्रीमहाभारते आश्वमेधिके पर्वणि अनुगीतापर्वणि नकुलोपाख्याने द्विनवतितमोऽध्यायः ॥ ९२ ॥

समाप्तमनुगीतापर्वाश्वमेधिकं च ।

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविन्दसूरिसूनोर्नीलकण्ठस्य कृतौ भारतभावदीपे आश्वमेधिके द्विनवतितमोऽध्यायः ॥ ९२ ॥

अतः परमाश्रमवासिकं पर्व भविष्यति तस्यायमाद्यः श्लोकः ।

प्राप्य राज्यं नरव्याघ्राः पाण्डवा मे पितामहाः ।
कथमासन्महाभागा धृतराष्ट्रे महात्मनि ॥ १

॥ इति श्रीमहाभारते *आश्वमेधिकपर्व समाप्तम् ॥

* यद्यप्यादिपर्वणि पर्वसंग्रहकथनावसरे 'इत्याश्वमेधिक पर्व प्रोक्तमेत-महाद्भुतम् । अध्यायाना शत चैव त्रयोऽध्याया-प्रकीर्तिता ॥ त्रीणि श्लोकसहस्राणि तावन्त्येव शतानि च । विंशतिश्च तथा श्लोका सख्यातास्तत्त्वदर्शिना ' इत्याख्यातम् तथापि संप्रत्यस्मिन्पर्वणि प्राय अध्याया ९२ श्लोकाश्च २८४५ एतावन्त एव दृश्यन्ते । एतत्सुधीभिर्मृग्यमित्यलम् ।

अयं ग्रन्थः श्रीकिञ्जवडेकरकुलकमलदिवाकरसोमयाजिदत्तात्रेयदीक्षिततनुज-पण्डित-रामचन्द्रशास्त्रिणा परिशोधितष्टिप्पण्यादिना परिष्कृतश्च । भारती जयतु ॥ शाकः १८५५ ॥

Shriman
MAHĀBHĀRATAM
Part VI
XV Ashramvasikparvan

WITH

Bharata Bhawadeepa By Nilkantha.

Edited by

Pandit Ramchandrashastri Kinjwadekar.

PRINTED & PUBLISHED

BY

SHANKAR NARHAR JOSHI

Chitrashala Press, 1026 Sadashiv Peth, Poona City.

Shake 1855.] *First Edition.* [*A. D. 1933.*

(All rights reserved by the publisher.)



श्रीमन्महाभारतम् ।

षष्ठभागे—आश्रमवासिकपर्व ।

चतुर्धरवंशावतंसश्रीमन्नीलकण्ठविरचित-भारतभावदीपाख्यटीकया समेतम् ।

पण्डित रामचंद्रशास्त्री किंजवडेकर इत्येतैः पाठान्तर-टिप्पण्यादियोजनया समलङ्कृतम् ।



तच्च

पुण्याख्यपत्तने

१०२६ सदाशिववीथ्यां चित्रशालाख्ये मुद्रणालये 'शंकर नरहर जोशी'

इत्येतैः संमुद्र्य प्रकाशितम् ।




शालिवाहनशकाब्दाः १८५५] प्रथमं संस्करणम् । [ख्रिस्ताब्दाः १९३३

[अस्य ग्रन्थस्य सर्वेऽधिकाराः प्रकाशयित्रा स्वायत्तीकृताः]

॥ श्रीभारती जयतु ॥

॥ महाभारतम् ॥



आश्रमवासिकपर्व ।

-१५-

विषयानुक्रमणिका ।

अ०	श्लो०	विषय	पृष्ठम्
		(१) आश्रमवासपर्व (१–३२)	
१	२७	"प्राप्य राज्यं महात्मानः पाण्डवा मे पितामहाः । कथमासन्महाराज्ञि धृतराष्ट्रे महात्मनि ॥" (१) इत्यादिके जनमेजयप्रश्ने तदुत्तरं वदन्वैशम्पायनः पाण्डवानां पृथ्वीपालनादिकं धृतराष्ट्राय राजभोग्यद्रव्यदानादिकं कुन्त्यादिकर्तृकं गान्धारीपर्युपासनं च कथयति स्म ।	२
२	३०	'एवं संपूजितो राजा' (१) इत्यादिना युधिष्ठिरादिकर्तृकं धृतराष्ट्रपर्युपासनं,तेन तत्सन्तोषं, पाण्डवानां तदनुकूलवृत्त्या वर्तनं चाभ्यधाद्वैशम्पायनः	३
३	८७	सुहृन्मध्ये भीमस्य बाहुशब्दं परुषाणि वचनानि च श्रुत्वा निर्विण्णो धृतराष्ट्रः सुहृदः समानीय तान्प्रति "विदितं भवतामेतत्" (१६) इत्याद्यभिधाय युधिष्ठिरं प्रति "भद्रं ते यादवीमातः" (३०) इत्याद्याख्याय वनगमनमयाचत । "न मां प्रीणयते राजन्" (४१) इत्यादिकं युधिष्ठिरानुनयं श्रुत्वा पुनः "तापस्ये मे मनस्तात" (५६) इति तमुक्त्वा सञ्जयादीन् प्रति च 'म्लायते मे मनो हीदम्' (६०) इत्यभिधाय मोहं जगाम । तं च युधिष्ठिरः पाणिना परस्पर्श । युधिष्ठिरेण "यस्य नागसहस्रेण" (६३) इत्यादिनाऽनुनयपूर्वकं भोजनार्थं प्रेरितो धृतराष्ट्रो यावदङ्गीकरोति तावद्व्यास आगत्य तमवोचत	६
४	२२	"युधिष्ठिर महाबाहो" (१) इत्यादिना व्यासकथितं धृतराष्ट्रस्य वनगमनमङ्गीकृत्याहारं कृत्वाऽऽश्रमं गच्छेत्युवाच युधिष्ठिरो धृतराष्ट्रं प्रति	७
५	४३	युधिष्ठिराभ्यनुज्ञातो धृतराष्ट्रो गृहं गत्वाऽऽहारं कृत्वा विदुरादिषु सर्वेषु शृण्वत्सु युधिष्ठिरं पृष्ठे पाणिना संस्पृश्य "अप्रमादस्त्वया कार्यः" (८) इत्यादिना राजनीतिमुपदिदेश ...	८

अ०	श्लो०	विषय	पृष्ठम्
६	२०	धृतराष्ट्रेण युधिष्ठिरं प्रति राजनीतिकथनम्	१०
७	२३	धृतराष्ट्रेण युधिष्ठिरं प्रति राजनीतिकथनम्	११
८	२४	" एवमेतत्करिष्यामि " (१) इत्यादिना युधिष्ठिरेणाङ्गीकृते गान्धार्यां गृहं प्रविश्य तया पृष्टो ' व्यासाद्यनुज्ञातो गन्तास्मि ' इत्युक्त्वा सर्वासां प्रकृतीनां सान्निध्यमिच्छामि तथा पुत्राणां प्रेतभावानुगं वसु च दातुमिच्छामीति निश्चित्य युधिष्ठिरमाज्ञापयति स्म । युधिष्ठिरेणानीते सर्वस्मिन्, ब्राह्मणादिषु सर्वेषु सन्निहितेषु प्रार्थनापूर्वकं " अरण्यगमने बुद्धिर्गान्धारीसहितस्य मे " (१७) इत्याद्युवाच धृतराष्ट्रः, तच्छ्रुत्वा शोकाक्रान्तेषु सर्वेषु पुनरुवाच सः	१२
९	१८	" शान्तनुः पालयामास " (१) इत्यादिना पुनर्याचिताः प्रकृतयो बाष्पव्याकुलाः परस्परं वीक्षां चक्रे	१२
१०	५३	धृतराष्ट्रवाक्यश्रवणेन मोहितांस्तूष्णींभूतान् सर्वान्प्रति वनगमनार्थमनुज्ञां याचति धृतराष्ट्रे सर्वैरुत्तरं दातुं यो बह्वृचः साम्बो नाम ब्राह्मणो " यथा वदसि राजेन्द्र " (१४) इत्यादिना धर्मराजपर्यन्तानां प्रजापालनशैलीमविगुणामुपपाद्य युद्धादिना जातस्य क्षयस्य दैवकृतत्वं प्रतिपाद्य तमनुज्ञाप्य पाण्डवान्प्रशस्य ' मानसं दुःखमपनीय कार्याणि कुरुष्व ' इत्याह । तद्वचनं श्रुत्वा धृतराष्ट्रोऽभिपूज्य सर्वाः प्रकृतीर्विसर्जयामास ...	१४
११	२५	मृतोद्देशेन श्राद्धदानं कर्तुं द्रव्ययाचनार्थं धृतराष्ट्रेण प्रेषितस्य विदुरस्य वाक्यमनुमोदमाने युधिष्ठिरे क्रुद्धो भीमो ' वयं भीष्मस्य दास्यामः ' (१६) इत्यादिकं वाक्यमुवाच ...	१५
१२	१३	" भीम ज्येष्ठो गुरुर्मे त्वम् " (१) इत्यादिकां भीमं प्रत्यर्जुनस्योक्तिं श्रुत्वा युधिष्ठिरो विदुरं प्रति ' यावदिच्छसि दातुं तावद्दद्दामि मत्कोशादिति बहु परिक्लिष्टो भीमो यन्मात्सर्यं करोति तन्मनसि नानेय ममार्जुनस्य च गृहे यद्वित्तं तस्य सर्वस्य किंबहुना मच्छरीरस्य च स्वामी भवानिति च मद्वचनाद्धृतराष्ट्रं ब्रूहि ' (१३) इत्युवाच .	१६
१३	१५	युधिष्ठिरसंदेशं विदुरेण कथितं श्रुत्वा धृतराष्ट्रस्तमभिनन्द्य कार्तिक्यां दानानि चक्रे	१६
१४	१८	प्रीतो धृतराष्ट्रो भीष्माद्युद्देशेन दानानि विधाय पुत्रपौत्राणामात्मनो गान्धार्याश्चौर्ध्वदेहिकं दत्त्वा दानानि ददद्यदा परिश्रान्तो बभूव तदा युधिष्ठिरो दानयज्ञं निवर्तयति स्म	१७
१५	१३	कार्तिक्यामिष्टिं कृत्वाऽग्निहोत्रं पुरस्कृत्य गान्धार्या सहितो वधूजनैः परिवृतो धृतराष्ट्रो वनं गन्तुं भवनान्निर्जगाम, तदा कौरवस्त्रीणामार्तनादो बभूव, युधिष्ठिरादयश्चानुययुः . .	१८
१६	३२	नगराद्बर्धमानद्वारेण निर्गतो धृतराष्ट्रो जनौघान्, कृपं, युयुत्सुं च निवर्त्य विदुरेण सञ्जयेन च सह जगाम । धृतराष्ट्राज्ञया निवृत्तो युधिष्ठिरः कुन्तीं प्रति ' अहं राजानमन्विष्ये ' (७) इत्याद्युवाच । तच्छ्रुत्वा ' सहदेवे महाराज ' (१०) इत्याद्युक्तवतीं तां प्रति युधिष्ठिरः ' किमिदं ते	

अ०	श्लो०	विषय	पृष्ठम्
		व्यवसितम् ' (१९) इत्यादिना विदुलापुत्रसंवादाख्यायिकाकथनपूर्वकमस्मान्प्रोत्साह्यैतावत्कारयित्वेदानीं कथं गच्छसीत्याह स्म । ' यदा राज्यमिदम् ' (२१) इत्याद्युक्तवन्तं भीमं सुभद्रया सहानुगच्छन्तीं द्रौपदीं रुदतः पुत्रांश्च केवलमीक्षमाणा कुन्ती वनवासकृतनिश्चया जगामैव । एवमप्यनुयातान्पुत्रान्प्रत्यब्रवीत्	१९
१७	२१	' एवमेतन्महाबाहो ' (१) इत्यादिना विदुलापुत्रसंवादकथनादिना कृतस्य प्रोत्साहनस्य कारणं प्रदर्श्य ' नाहं राज्यफलं पुत्राः ' (१९) इत्यादिना स्वस्य वैराग्यं प्रदर्शयति स्म कुन्ती	२०
१८	२५	कुन्तीवाक्यं श्रुत्वा पाण्डवेषु निवृत्तेषु धृतराष्ट्रानुज्ञातया गान्धार्या बोधितायामप्यनिवृत्तायां कुन्त्यां पाण्डवेषु पुरं प्रविष्टेषु गच्छन्धृतराष्ट्रो भागीरथीतीरे प्रथमं निवासमकरोत्	२१
१९	१८	द्वितीयेऽहनि सर्वमाह्निकं निर्वर्त्य भागीरथीतीरान्निर्गत्य कुरुक्षेत्रे व्यासाश्रममागत्य व्यासानुमत्या केकयराजेन शतयूपेनारण्यकं विधिं प्रत्युपदिष्टो गान्धार्या सहितो धृतराष्ट्रस्तपश्चचार	२२
२०	३८	धृतराष्ट्रं प्रति नारदपर्वतदेवलादिष्वृषिष्वागतेषु नारदः सहस्रचित्यप्रभृतीनां राज्ञां तपश्चर्यया स्वर्गगमनं तत्प्रसङ्गेन धृतराष्ट्रादीनां सामान्यतो गतिं कथयन् शतयूपप्रश्नानुरोधेन वर्षत्रयावधिकथनपूर्वकं धृतराष्ट्रस्य कुबेरलोकगमरूपां विशेषतो गतिं कथयति स्म	२३
२१	१६	धृतराष्ट्रे वनं गते पाण्डवेषु पौरजनेषु च शोचत्सु ब्राह्मणेषु च	

अ०	श्लो०	विषय	पृष्ठम्
		' कथ नु राजा वृद्धः सः ' (३) इत्यादि तर्कपूर्वकं शोचत्सु सत्सु हतान् वीरान् संस्मृत्य नातिप्रमनसोऽपि पाण्डवाः परीक्षितं दृष्ट्वा प्राणान् धारयन्ति स्मेत्याह वैशम्पायनः	२४
२२	२६	कुन्त्यादिस्मरणपूर्वकं शोचन्युधिष्ठिरः सहदेवेन द्रौपद्या चानुज्ञातो धृतराष्ट्रादिदिदृक्षया वनं गन्तुमुद्यतः सेनापत्यादीनादिश्य नगराद्बहिः पञ्च दिनानि न्यवसत् ...	२५
२३	१८	ततो निर्गतो युधिष्ठिरो नगररक्षणार्थं युयुत्सुं धौम्यसहितं नियोज्य यमुनामुत्तीर्य धृतराष्ट्रस्याश्रमं जगाम	२६
२४	२०	तत्र धृतराष्ट्रादीनपश्यन्तो युधिष्ठिरादयस्तत्रत्यैस्तापसैः कथितेन पथा यमुनां प्रति स्नानाद्यर्थं गतान् द्रष्टुं पादचारिणो गत्वा कुन्त्याद्यभिवादनानन्तरं तैः सह पुनराश्रममाजग्मुः	२७
२५	१९	पाण्डवैः सह धृतराष्ट्रे स्थिते पाण्डवान्द्रष्टुमागतैस्तापसैः ' कतमो युधिष्ठिरः कतमौ भीमार्जुनौ ' इत्यादि पृष्टः सञ्जयो ' य एष जाम्बूनदशुद्धगौरः ' (५) इत्यादिना तत्तत्स्वरूपकथनपूर्वकं सर्वानाचख्यौ । तान्बुद्ध्वा गतेषु तापसेषु धृतराष्ट्रः सर्वान्प्रति कुशलं पप्रच्छ	२८
२६	३८	' युधिष्ठिर महाबाहो ' (१) इत्यादिना धृतराष्ट्रस्य कुशलप्रश्नानन्तर युधिष्ठिरः ' कच्चित्ते वर्धते राजन् ' (११) इत्यादिना कुशलं पृच्छन् ' क चासौ विदुरो राजन्नेम पश्यामहे वयम् ' (१५) इति पप्रच्छ । धृतराष्ट्रे विदुरस्य स्थितिं कथयति तत्कथितलक्षणैर्युतं तमालक्ष्य तत्पृष्ठतो गच्छन्यु-	

अ०	श्लो०	विषय	पृष्ठम्
		धिष्ठिर एकान्ते वृक्षमूलमाश्रित्य तस्याग्रे 'युधिष्ठिरोऽहमस्मि' (२४) इत्युक्त्वा तस्थौ। ततः सोऽपि स्वाग्रवर्तिनं युधिष्ठिरं दृष्ट्वा योगधारणया तच्छरीरं प्रविश्य स्थूलं शरीरं तत्याज विदुरः। युधिष्ठिरोऽपि तत्प्रवेशेनात्मानं बलवन्तं बुद्ध्वा मृतं तच्छरीरं संस्कर्तुमुद्यतोऽशरीरिण्या वाण्या निवारितो धृतराष्ट्रमागत्य तस्मै तद्वृत्तं कथयति स्म। ततस्तेन दत्तं फलमूलादि भुक्त्वा तत्रैव सर्वे पाण्डवा न्यवसन्	३०
२७	२६	विंचित्रा धर्मार्थलक्षणाः कथाः कथयन्तः पाण्डवाः कुन्तीमभितस्तस्यां राज्यां सुषुपुः। उत्थितो युधिष्ठिरः प्रातराह्निकं विधायाश्रमं पश्यन् ब्राह्मणेभ्यो धनं वितीर्य कृताह्निकं धृतराष्ट्रं मात्रादीश्च दृष्ट्वा तदनुज्ञात उपविवेश। एवं भीमादयोऽप्युपविविशुः। एवं सर्वेषूपविष्टेषु शतयूपप्रभृतयो महर्षयः सशिष्यो व्यासश्च समाजग्मुः	३१
२८	२५	व्यासाज्ञया पाण्डवेषु समुपविष्टेषु सत्यवतीपुत्रो व्यासो "धृतराष्ट्र महाबाहो" (२) इत्याद्यभिधाय विदुरस्य युधिष्ठिरशरीरप्रवेशादिकं चाख्याय 'त्वां चापि श्रेयसा योक्ष्ये' (२३) इत्याद्युक्त्वा 'न कृतं यैः पुरा कैश्चित्' (२४) इत्याद्युवाच	३२
		(२) पुत्रदर्शनपर्व ३२-४२	
२९	५५	'वनवासं गते विप्र' (१) इत्यादिना व्यासेन प्रतिज्ञातमाश्चर्यप्रदर्शनं कथय, तथा युधिष्ठिरस्य कति दिनानि वने निवासः इत्यादिके जनमेजयप्रश्ने वैशम्पायनः 'तेऽनुज्ञातास्तदा राजन्'	

अ०	श्लो०	विषय	पृष्ठम्
		(६) इत्यादिनोत्तरं कथयति स्म। नारदपर्वतप्रभृतिष्वागतेषु पाण्डवसहिते धृतराष्ट्रे स्थिते गान्धारीप्रभृतिषु च स्त्रीषु स्थितासु धार्मिकं विषयं पुरस्कृत्य प्रवृत्तासु कथासु तदन्ते व्यासो 'विदित मम राजेन्द्र' (१६) इत्याद्यभिधाय संशयच्छेदनार्थमागतोऽस्मि, देवगन्धर्वादयो मत्तपसो वीर्यं पश्यन्तु, क ते कामं प्रददामि, ब्रूहि इत्युवाच। व्यासवाक्यं श्रुत्वा धृतराष्ट्रो 'ब्रह्मकल्पैर्भवद्भिर्यत्' (२५) इत्यादिना मम परलोकभयं नास्तीत्युक्त्वा दुर्योधनापनयनेन हतान् सर्वाननुस्मृत्य 'न शान्तिमधिगच्छामि' (३३) इत्याद्युवाच। एतच्छ्रवणेनोद्बुद्धशोका गान्धार्यपि 'षोडशेमानि वर्षाणि' (३८) इत्यादिना धृतराष्ट्रस्थितिं प्रदर्श्य 'तपसा सर्वान् लोकान् स्रष्टुं समर्थस्य तव लोकान्तरगतान् पुत्रादीन् राज्ञो दर्शयितुं किं दुःशकम्?' (४०) इत्याद्युवाच। तच्छ्रुत्वा प्रच्छन्नजातं पुत्रं कर्णं स्मरन्ती कुन्ती व्यासेनानुज्ञाता प्रवक्तुमुपचक्रमे	३३
३०	२४	'भगवन्श्वशुरो मेऽसि' (१) इत्यादिना दुर्वासोवरदानप्रभृति कर्णविसर्जनान्तं कन्यावस्थासंबंधि वृत्तमनूद्य कर्णदर्शनं प्रार्थयति स्म कुन्ती। व्यासः 'साधु सर्वमिदं भाव्यम्' (२०) इत्यादिना तां समाश्वासयति स्म	३४
३१	२५	'भद्रे द्रक्ष्यसि गान्धारि! पुत्रान् भ्रातॄन्सखींस्तथा। वधूश्च पतिभिः सार्धं निशि सुप्तोत्थिता इव। कर्णं द्रक्ष्यति कुन्ती च सौभद्रं चापि यादवी। द्रौपदी पञ्च पुत्रांश्च(१-२)	

अ०	श्लो०	विषय	पृष्ठम्
		इत्याद्यभिधाय ' अथतेरुस्ततः सर्वे ' (५) इत्यादिनांशावतरणमभिधाय सर्वे भवन्तो भागीरथीं गच्छन्त्विति व्यासेनाज्ञप्ताः सर्वे गङ्गातीरं गत्वा सायंकालपर्यन्तं तत्र निवासं चक्रु.	३५
३२	२१	' ततो निशायां प्राप्तायां ' (१) पाण्डवैः सहितो धृतराष्ट्रः सर्वस्त्रीसहिता गान्धारी,इतरपौरजानपदाश्च व्याससंनोधमाजग्मुः। व्यासश्च गङ्गाजलमवगाह्य सर्वानाह्वयति स्म। व्यासेनाहूता भीष्मद्रोणपुरोगमा विराटपुत्राद्यः कर्णदुर्योधनादयोऽन्ये च राजानो राजपुत्राश्च स्वस्ववेषादिसहिता निर्वैराः सन्तः समुत्तस्थुः। तता व्यासदत्तदिव्यदृष्टिर्धृतराष्ट्रो गान्धारी चान्ये जनाश्च तान् दृष्ट्वाऽऽश्चर्यवन्तो मुमुदिरे ...	३६
३३	३१	निर्गतास्ते परस्परं सङ्गम्य मुदिताः सन्तो रात्रौ यथेच्छं विहृत्यान्योन्यमामन्त्र्य व्यासेन विसर्जिताः स्वस्वलोकं जग्मुः। जलस्थितस्य व्यासस्याज्ञया मृतपतिकाः स्त्रियो जान्हवीजलमवगाह्य पतिलोक जग्मुः	३८
३४	१८	एतच्छ्रुत्वा हृष्टेन जनमेजयेन 'कथं नु त्यक्तदेहानां पुनस्तद्रूप दर्शनम् ' (२) इति पृष्टो वैशम्पायनः ' अविप्रणाशः सर्वेषाम् ' (४) इत्यादिनाऽध्यायशेषेण तदुत्तरं कथयति स्म	३९
३५	१८	' अदृष्ट्वा तु नृपः पुत्रान् ' (१) इत्यादिना विदुरस्तपोबलात्सिद्धिं प्राप्तो धृतराष्ट्रश्च व्यासप्रसादादिति वैशम्पायनेनोक्ते जनमेजयो 'व्यासो यदि मम पितरं दर्शयेत्तर्हि तव वचनं श्रद्धेयं जानीयाम् ' इत्युवाच। इत्युक्तवाऽजनमेजयो व्यासेन प्रदर्शितं परिक्षितं दृष्ट्वाऽवभृथस्नानं विधाय ' ऋषिर्द्वैपायनो यत्र ' (१२) इत्यास्तीकवाक्यं श्रुत्वा वैशम्पायनं संपूज्य वनवासकथावशेषं पप्रच्छ . .	४०
३६	५३	'पुत्रान्पौत्रान्दृष्ट्वा धृतराष्ट्रः किमकरोत् युधिष्ठिरश्च किमकरोत् ' इति जनमेजयप्रश्ने वैशम्पायनस्तदुत्तरमाचख्यौ । आश्रममागतो धृतराष्ट्रो युधिष्ठिरविसर्जनार्थं व्यासेन प्रेरितो युधिष्ठिरं प्रति 'अजातशत्रो भद्रं ते ' (१४) इत्याद्यब्रवीत्। युधिष्ठिरश्च ' न मामर्हसि धर्मज्ञ परित्यक्तुम् ' (२३) इत्याद्युवाच। गान्धार्या च गम्यतामित्युक्तः कुन्तीं प्रति ' विसर्जयति मां राजा ' (२८) इत्याद्यवादीत्। सहदेवेन युधिष्ठिरं प्रति 'नोत्सहेऽहं परित्यक्तुं मातरं भरतर्षभ ' (३७) इत्याद्युक्तं श्रुतवत्या कुन्त्या 'गम्यतां पुत्र मैवं त्वं' (४०) इत्यादिना बोधिते तस्मिन्गन्तुमुद्यतेन युधिष्ठिरेणाभिवादनपुरःसरमनुज्ञां याचितो धृतराष्ट्रः सर्वालिङ्गनपूर्वक सान्त्वयन्ननुजज्ञे। तथैव गान्धारीकुन्तीभ्यामनुज्ञातो युधिष्ठिरो भ्रातृभिर्द्रौपदीप्रभृतिभिर्योषिद्भिश्च सह हास्तिनपुरं जगाम	४२

(३) नारदागमनपर्व ४२-४६

३७	४५	निवृत्तेषु पाण्डवेषु वर्षद्वयानन्तरमागतो नारदो युधिष्ठिरेण सत्कारपूर्वकं धृतराष्ट्रवृत्तान्तं पृष्टः 'स्थिरीभूय महाराज शृणु वृत्तं यथातथम् ' (९) इत्यभिधाय तं कथयति स्म। भवत्सु निवृत्तेषु गङ्गाद्वारं गतो धृतराष्ट्रो गान्धारीकुन्तीसहितस्तपस्यन्	

अ०	श्लो०	विषय	पृष्ठम्
		कदाचिद्गङ्गायामाप्लुत्य निवृत्तोऽग्रे दावाग्निना दह्यमाने वने निराहारतया ततो निर्गन्तुमसमर्थः सञ्जयं प्रति 'दावाग्निरहितं प्रदेशं गच्छ' इत्यनुज्ञाप्य सञ्जयोपदेशेनेन्द्रियग्रामं निरुद्ध्य च काष्ठोपमः स्थितो दावाग्निना दग्धोऽभूत्। तमनु गान्धारी कुन्ती च दग्धे बभूवतुः। सञ्जयश्च ततो निर्गतो हिमालयं जगाम। एतद्वृत्तं श्रुत्वा युधिष्ठिरादिष्वाक्रोशपूर्वकं रुदत्सु महान् स्वन आसीत्। तस्मिन्मुहूर्ताग्निवृत्ते सति धर्मराजो नारदमब्रवीत्	४४
३८	२१	'तथा महात्मनस्तस्य' (१) इत्यादिकं युधिष्ठिरस्य विलापवाक्यम्	४४
३९	२७	'नासौ वृथाग्निना दग्धः' (१) इत्यादिना वनं गच्छता धृतराष्ट्रेणोत्सर्गेष्टिं कारयित्वोत्सृष्टा अग्नयो याजकैर्वने परित्यक्तास्त एव दावरूपेण वनं दहन्तस्तं दहुरित्याद्यभिधाय नारदेनोदकदानादि कर्तुं प्रेरितो युधिष्ठिरो गङ्गाद्वारे नरान् संप्रेष्य द्वादशेऽहनि गङ्गातीरे श्राद्धादीनि विधाय नगरं प्रविवेश। नारदश्च युधिष्ठिरमाश्वास्य यथेप्सितं देशं जगाम	४५

॥ इत्याश्रमवासपर्वविषयानुक्रमणिका समाप्ता ॥





॥ महाभारतम् ॥

आश्रमवासिकपर्व

-१५-

आश्रमवास पर्व १

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

जनमेजय उवाच ।
प्राप्य राज्यं महात्मानः
पाण्डवा मे पितामहाः ।
कथमासन्महाराज्ञि
धृतराष्ट्रे महात्मनि ॥ १
स तु राजा हतामात्यो हतपुत्रो निराश्रयः ।
कथमासीद्धतैश्वर्यो गान्धारी च यशस्विनी॥
कियन्तं चैव कालं ते
मम पूर्वपितामहाः ।
स्थिता राज्ये महात्मान-
स्तन्मे व्याख्यातुमर्हसि ॥ २

वैशम्पायन उवाच ।
प्राप्य राज्यं महात्मानः
पाण्डवा हतशत्रवः ।
धृतराष्ट्रं पुरस्कृत्य
पृथिवीं पर्यपालयन् ॥ ४
धृतराष्ट्रमुपातिष्ठद्विदुरः सञ्जयस्तथा ।
वैश्यापुत्रश्च मेधावी युयुत्सुः कुरुसत्तम ॥ ५
पाण्डवाः सर्वकार्याणि
संपृच्छन्ति स्म तं नृपम् ।
चक्रुस्तेनाभ्यनुज्ञाता
वर्षाणि दश पञ्च च ॥ ६

श्रीगणेशाय नमः ।

श्रीनारायणलक्ष्मणौ ततपदं धीरेशगङ्गाधरौ
गोपालं च निधाय चेतसि शिवं चिन्तामणिं चाददत् ।
पर्वस्वाश्रमवासिकादिषु चतुर्ष्वारभ्यते भारते
पूर्वाचार्यमतानुगेन विदुषा भावप्रदीपोऽद्भुत ॥ १॥

पूर्वत्र अङ्गोपाङ्गसहिता ब्रह्मविद्या समापिता, तत्र सर्वभोग-त्यागपूर्वकं शमाद्युपसम्पत्तिर्वनवासिनामेव भवतीति धृतराष्ट्रा-द्याचारप्रदर्शनेन सूचयंस्ततोऽधिगन्तव्य जगज्जीवेश्वरतत्त्वं चाश्चर्यप्रदर्शनव्याजेन प्रतिपादयिष्यन्नुत्तरग्रंथमारभते—**प्राप्य राज्यं महात्मान इति** ॥ १ ॥ उपातिष्ठत् आराधि-तवान् ॥ ५ ॥

सदा हि गत्वा ते वीराः
पर्युपासन्त तं नृपम् ।
पादाभिवादनं कृत्वा
धर्मराजमते स्थिताः ॥ ७
ते मूर्ध्नि समुपाघ्रातः सर्वकार्याणि चक्रिरे ।
कुन्तिभोजसुता चैव गान्धारीमन्ववर्तत ॥ ८
द्रौपदी च सुभद्रा च
याश्चान्याः पाण्डवस्त्रियः ।
समां वृत्तिमवर्तन्त
तयोः श्वश्वोर्यथाविधि ॥ ९
शयनानि महार्हाणि वासांस्याभरणानि च ।
राजार्हाणि च सर्वाणि भक्ष्यभोज्यान्यनेकशः
युधिष्ठिरो महाराज धृतराष्ट्रेऽभ्युपाहरत् ।
तथैव कुन्ती गान्धार्या गुरुवृत्तिमवर्तत ॥ ११
विदुरः सञ्जयश्चैव युयुत्सुश्चैव कौरव ।
उपासते स्म तं वृद्धं हतपुत्रं जनाधिपम् ॥ १२
स्यालो द्रोणस्य यश्चासी-
दयितो ब्राह्मणो महान् ।
स च तस्मिन्महेष्वासः
कृपः समभवत्तदा ॥ १३
व्यासश्च भगवान्नित्यमासांचक्रे नृपेण ह ।
कथाः कुर्वन्पुराणर्षिर्दैवर्षिपितृरक्षसाम् ॥ १४
धर्मयुक्तानि कार्याणि व्यवहारान्वितानि च
धृतराष्ट्राभ्यनुज्ञातो विदुरस्तान्यकारयत् १५
सामन्तेभ्यः प्रियाण्यस्य कार्याणि सुबहून्यपि
प्राप्यन्तेऽर्थैः सुलघुभिः सुनयाद्विदुरस्य वै ॥
अकरोद्बन्धमोक्षं च वध्यानां मोक्षण तथा ।
न च धर्मसुतो राजा कदाचित्किञ्चिदब्रवीत्
विहारयात्रासु पुनः कुरुराजो युधिष्ठिरः ।
सर्वान्कामान्महातेजाः प्रददावम्बिकासुते ॥
आरालिकाः सूपकारा
रागखाण्डविकास्तथा ।
उपातिष्ठन्त राजानं
धृतराष्ट्रं यथा पुरा ॥ १९
वासांसि च महार्हाणि
माल्यानि विविधानि च ।
उपाजह्रुर्यथान्यायं
धृतराष्ट्रस्य पाण्डवाः ॥ २०
मैरेयमत्स्यमांसानि पानकानि मधूनि च ।
चित्रान्भक्ष्यविकारांश्च चक्रुस्तस्य यथा पुरा
ये चापि पृथिवीपालाः समाजग्मुस्ततस्ततः ।
उपातिष्ठन्त ते सर्वे कौरवेन्द्रं यथा पुरा ॥ २२
कुन्ती च द्रौपदी चैव सात्वती च यशस्विनी
उलूपी नागकन्या च देवी चित्राङ्गदा तथा ॥
धृष्टकेतोश्च भगिनी जरासन्धसुता तथा ।
एताश्चान्याश्च बह्व्यो वै योषितः पुरुषर्षभ २४
किंकराः पर्युपातिष्ठन्सर्वाः सुबलजा तथा ।
यथा पुत्रवियुक्तोऽयं न किञ्चिद्दुःखमाप्नुयात्
इति तानन्वशाद्भ्रातृन्नित्यमेव युधिष्ठिरः ।
एवं ते धर्मराजस्य श्रुत्वा वचनमर्थवत् ॥ २६
सविशेषमवर्तन्त भीममेकं तदा विना ।
न हि तत्तस्य वीरस्य हृदयादपसर्पति ।
धृतराष्ट्रस्य दुर्बुद्धा यद्वृत्तं द्यूतकारितम् ॥ २७

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

वैशम्पायन उवाच ।
एवं संपूजितो राजा पाण्डवैरम्बिकासुतः । विजहार यथापूर्वमृषिभिः पर्युपासितः ॥ १

तस्मिन्धृतराष्ट्रे समभवत्तन्निकटे अभवत् ॥ १३ ॥ **आरालिकाः** अरया शस्त्रविशेषेण लूनं छिन्नं शाकादि आरालु तत्संस्कुर्वन्ति ते आरालिका शाकविशेषकर्तारः । **रागखाण्डवम्** पिप्पलीशुण्ठीशर्करोपेतो मुद्गयूषस्तत्कर्तारो राग खाण्डविका. ॥ १९ ॥ अन्वशात् अनुशिक्षितवान् ॥ २६ ॥

इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे प्रथमोऽध्याय ॥ १ ॥

२


एवमिति ॥ १ ॥

ब्रह्मदेयाग्रहारांश्च प्रददौ स कुरूद्वहः ।
तच्च कुन्तीसुतो राजा सर्वमेवान्वपद्यत× ॥२
आनृशंस्यपरो राजा प्रीयमाणो युधिष्ठिरः ।
उवाच स तदा भ्रातॄनमात्यांश्च महीपतिः ३
मया चैव भवद्भिश्च मान्य एष नराधिपः ।
निदेशे धृतराष्ट्रस्य यस्तिष्ठति स मे सुहृत् ॥४
विपरीतश्च मे शत्रुर्नियम्यश्च भवेन्नरः ।
पितृवृत्तेषु चाहःसु पुत्राणां श्राद्धकर्मणि ॥ ५
सुहृदां चैव सर्वेषा यावदस्य चिकीर्षितम् ।
ततः स राजा कौरव्यो धृतराष्ट्रो महामनाः
ब्राह्मणेभ्यो यथार्हेभ्यो ददौ वित्तान्यनेकशः ।
धर्मराजश्च भीमश्च सव्यसाची यमावपि ॥ ७
तत्सर्वमन्ववर्तन्त तस्य प्रियचिकीर्षया ।
कथं नु राजा वृद्धः स पुत्रपौत्रवधार्दितः ॥ ८
शोकमस्मत्कृतं प्राप्य न म्रियेतेति चिन्त्यते
यावद्धि कुरुवीरस्य जीवत्पुत्रस्य वै सुखम् ९
बभूव तदवाप्नोति भोगाञ्छेति व्यवस्थिताः ।
ततस्ते सहिताः पञ्च भ्रातरः पाण्डुनन्दनाः॥
तथाशीलाः समातस्थुर्धृतराष्ट्रस्य शासने ।
धृतराष्ट्रश्च तान्सर्वान्विनीताक्रियमे स्थितान्
शिष्यवृत्तिं समापन्नान्गुरुवत्प्रत्यपद्यत ।
गान्धारी चैव पुत्राणा विविधैः श्राद्धकर्मभिः
आनृण्यमगमत्कामान्विप्रेभ्यः प्रतिपाद्य सा
एवं धर्मभृतां श्रेष्ठो धर्मराजो युधिष्ठिरः॥ १३
भ्रातृभिः सहितो धीमान् पूजयामास तं नृपम्

वैशम्पायन उवाच ।

स राजा सुमहातेजा वृद्धः कुरुकुलोद्वहः
न ददर्श तदा किञ्चिदप्रियं पाण्डुनन्दने ।
वर्तमानेषु सद्वृत्तिं पाण्डवेषु महात्मसु ॥ १५
प्रीतिमानभवद्राजा धृतराष्ट्रोऽम्बिकासुतः ।
सौबलेयी च गान्धारी पुत्रशोकमपास्य तम्
सदैव प्रीतिमत्यासीत्तनयेषु निजेष्विव ।
प्रियाण्येव तु कौरव्यो नाप्रियाणि कुरूद्वहः
वैचित्रवीर्ये नृपतौ समाचरत वीर्यवान् ।
यद्यद्भूते च किञ्चित्स धृतराष्ट्रो जनाधिपः १८
गुरु वा लघु वा कार्यं गान्धारी च तपस्विनी
तं स राजा महाराज पाण्डवानां धुरन्धरः
पूजयित्वा वचस्तत्तदकार्षीत्परवीरहा ।
तेन तस्याभवत्प्रीतो वृत्तेन स नराधिपः २०
अन्वतप्यत सस्मृत्य पुत्रं तं मन्दचेतसम् ।
सदा च प्रातरुत्थाय कृतजप्यः शुचिर्नृपः २१
आशास्ते पाण्डुपुत्राणां समरेष्वपराजयम् ।
ब्राह्मणान्स्वस्ति वाच्याथ हुत्वा चैव हुताशनम्
आयूंषि पाण्डुपुत्राणामाशसत नराधिपः ।
न तां प्रीतिं परामाप पुत्रेभ्यः स कुरूद्वहः २३
यां प्रीतिं पाण्डुपुत्रेभ्यः सदाऽवापनराधिपः
ब्राह्मणानां यथावृत्तः क्षत्रियाणां यथाविधः ॥
तथा विट्शूद्रसंघानामभवत्स प्रियस्तदा ।
यच्च किञ्चित्तदा पापं धृतराष्ट्रसुतैः कृतम् २२
अकृत्वा हृदि तत्पापं तं नृपं सोऽन्ववर्तत ।
यश्च कश्चिन्नरः किञ्चिदप्रियं वाम्बिकासुते ॥
कुरुते द्वेष्यतामेति स कौन्तेयस्य धीमतः ।
न राज्ञो धृतराष्ट्रस्य न च दुर्योधनस्य वै २७
उवाच दुष्कृतं कञ्चिद्युधिष्ठिरभयान्नरः ।
धृत्या तुष्टो नरेन्द्रः स गान्धारी विदुरस्तथा
शौचेन चाजातशत्रोर्न तु भीमस्य शत्रुहन् ।
अन्ववर्तत भीमोऽपि निश्चितो धर्मजं नृपम् ॥
धृतराष्ट्रं च संप्रेक्ष्य सदा भवति दुर्मनाः ।
राजानमनुवर्तन्तं धर्मपुत्रममित्रहा ।
अन्ववर्तत कौरव्यो हृदयेन पराङ्मुखः ३०

इति श्रीमहाभारते आश्रमवासिकेपर्वणि आश्रमवासपर्वणि
द्वितीयोऽध्यायः ॥ २ ॥



पितृवृत्तेषु पिता वृत्त प्रमीतो येषु तेषु क्षयाहेषु ॥ ५ ॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे द्वितीयोऽध्याय ॥ २ ॥

× 'सर्वमेवान्वमोदत' इति पाठ.

* सन्क्रुद्ध' इति पाठ

३

वैशम्पायन उवाच ।

युधिष्ठिरस्य नृपतेर्दुर्योधनपितुस्तदा ।
नान्तरं ददृशू राज्ये पुरुषाः प्रणयं प्रति ॥ १
यदा तु कौरवो राजा पुत्रं सस्मार दुर्मतिम् ।
तदा भीमं हृदा राजन्नपध्याति स पार्थिवः ॥
तथैव भीमसेनोऽपि धृतराष्ट्रं जनाधिपम् ।
नामर्षयत राजेन्द्र सदैव दुष्टवद्धृदा ॥ ३
अप्रकाशान्यप्रियाणि चकारास्य वृकोदरः ।
आज्ञां प्रत्यहरच्चापि कृतज्ञैः पुरुषैः सदा ॥ ४
स्मरन्दुर्मन्त्रितं तस्य वृत्तान्यप्यस्य कानिचित्
अथ भीमः सुहृन्मध्ये बाहुशब्दं तथाऽकरोत्
संश्रवे धृतराष्ट्रस्य गान्धार्याश्चाप्यमर्षणः ।
स्मृत्वा दुर्योधनं शत्रुं कर्णदुःशासनावपि ६
प्रोवाचेदं सुसंरब्धो भीमः स परुषं वचः ।

अन्धस्य नृपतेः पुत्रा मया परिघबाहुना ७
नीता लोकममुं सर्वे नानाशस्त्रास्त्रयोधिनः ।
इमौ तौ परिघप्रख्यौ भुजौ मम दुरासदौ ८
ययोरन्तरमासाद्य धार्तराष्ट्राः क्षयं गताः ।
ताविमौ चन्दनेनाक्तौ चन्दनार्हौ च मे भुजौ
याभ्यां दुर्योधनो नीतः क्षयं ससुतबान्धवः ।
एताश्चान्याश्च विविधाः शल्यभूता नराधिपः
वृकोदरस्य ता वाचः श्रुत्वा निर्वेदमागमत् ॥
सा च बुद्धिमती देवी कालपर्यायवेदिनी ११
गान्धारी सर्वधर्मज्ञा तान्यलीकानि शुश्रुवे ।
ततः पञ्चदशे वर्षे समतीते नराधिपः ॥ १२
राजा निर्वेदमापेदे भीमवाग्बाणपीडितः ।
नान्वबुध्यत तद्राजा कुन्तीपुत्रो युधिष्ठिरः ॥

श्वेताश्वो वाऽथ कुन्ती वा
द्रौपदी वा यशस्विनी ।
माद्रीपुत्रौ च धर्मज्ञौ
चित्तं तस्यान्ववर्तताम् ॥ १४

राज्ञस्तु चित्तं रक्षन्तौ नोचतुः किञ्चिदप्रियम्
ततः स मानयामास धृतराष्ट्रः सुहृज्जनम् १५
बाष्पसन्दिग्धमत्यर्थमिदमाह च तान्भृशम् ॥

धृतराष्ट्र उवाच ।

विदितं भवतामेतद्यथा वृत्तः कुरुक्षयः॥१६
ममापराधात्तत्सर्वमनुज्ञातं च कौरवैः ।
योऽहं दुष्टमतिं मन्दो ज्ञातीनां भयवर्धनम् ॥
दुर्योधनं कौरवाणामाधिपत्येऽभ्यषेचयम् ।
यच्चाहं वासुदेवस्य नाश्रौषं वाक्यमर्थवत् १८
वध्यतां साध्वयं पापः सामात्य इति दुर्मतिः
पुत्रस्नेहाभिभूतस्तु हितमुक्तो मनीषिभिः १९
विदुरेणाथ भीष्मेण द्रोणेन च कृपेण च ।
पदे पदे भगवता व्यासेन च महात्मना २०
सञ्जयेनाथ गान्धार्या तदिदं तप्यते च माम् ।
यच्चाहं पाण्डुपुत्रेषु गुणवत्सु महात्मसु ॥ २१
न दत्तवान् श्रियं दीप्तां पितृपैतामहीमिमाम्
विनाशं पश्यमानो हि सर्वराज्ञां गदाग्रजः ॥
एतच्छ्रेयस्तु परममन्यत जनार्दनः ।
सोऽहमेतान्यलीकानि निवृत्तान्यात्मनस्तदा
हृदये शल्यभूतानि धारयामि सहस्रशः ।
विशेषतस्तु पश्यामि वर्षे पञ्चदशेऽद्य वै २४
अस्य पापस्य शुद्ध्यर्थं नियतोऽस्मि सुदुर्मतिः
चतुर्थे नियते काले कदाचिदपि चाष्टमे २५
तृष्णाविनयनं भुञ्जे गान्धारी वेद तन्मम ।
करोत्याहारमिति मां सर्वः परिजनः सदा ॥
युधिष्ठिरभयादेति भृशं तप्यति पाण्डवः ।
भूमौ शये जप्यपरो दर्भेष्वजिनसंवृतः ॥ २७
नियमव्यपदेशेन गान्धारी च यशस्विनी ।
हतं शतं तु पुत्राणां ययोर्युद्धेऽपलायिनाम् ॥
नानुतप्यामि तच्चाहं क्षत्रधर्मं हि ते विदुः ।
इत्युक्त्वा धर्मराजानमभ्यभाषत कौरवः २९

भद्रं ते यादवीमातर्वच्मश्चेदं निबोध मे ।
सुखमस्म्युषितः पुत्र त्वया सुपरिपालितः ३०
महादानानि दत्तानि श्राद्धानि च पुनः पुनः ।
प्रकृष्टं च यया पुत्र पुण्यं चीर्णं यथाबलम् ३१
गान्धारी हतपुत्रेयं धैर्येणोदीक्षते च माम् ।
द्रौपद्या ह्यपकर्तारस्तव चैश्वर्यहारिणः ॥ ३२
समतीता नृशंसास्ते स्वधर्मेण हता युधि ।
न तेषु प्रतिकर्तव्यं पश्यामि कुरुनन्दन ॥ २३
सर्वे शस्त्रभृतां लोकान् गतास्तेऽभिमुखं हताः
आत्मनस्तु हितं पुण्यं प्रतिकर्तव्यमद्य वै ॥३४

३

युधिष्ठिरस्येति ॥ १ ॥ तृष्णाविनयनं तृषामात्रापहं मण्डादि न तु क्षुद्व्याधिहरम् ॥ २६ ॥

गान्धार्याश्चैव राजेन्द्र तदनुज्ञातुमर्हसि ।
त्वं तु शस्त्रभृतां श्रेष्ठः सततं धर्मवत्सलः ३५
राजा गुरुः प्राणभृतां तस्मादेतद्ब्रवीम्यहम् ।
अनुज्ञातस्त्वया वीर संश्रयेयं वनान्यहम् ३६
चीरवल्कलभृद्राजन् गान्धार्या सहितोऽनया
तवाशिषः प्रयुञ्जानो भविष्यामि वनेचरः ३७
उचितं नः कुले तात सर्वेषां भरतर्षभ ।
पुत्रेष्वैश्वर्यमाधाय वयसोऽन्ते वनं नृप ॥ ३८
तत्राहं वायुभक्षो वा निराहारोऽपि वा वसन्
पत्न्या सहानया वीर चरिष्यामि तपः परम्
त्वं चापि फलभाक्तात तपसः पार्थिवो ह्यसि
फलभाजो हि राजानः कल्याणस्येतरस्य वा

युधिष्ठिर उवाच ।

न मां प्रीणयते राज्यं त्वय्येवं दुःखिते नृप
धिङ्मामस्तु सुदुर्बुद्धिं राज्यसक्तं प्रमादिनम्
योऽहं भवन्तं दुःखार्तमुपवासकृशं भृशम् ।
जिताहारं क्षितिशयं न विन्दे भ्रातृभिः सह
अहोऽस्मि वञ्चितो मूढो भवता गूढबुद्धिना
विश्वासयित्वा पूर्वं मां यदिदं दुःखमश्नुथाः ॥
किं मे राज्येन भोगैर्वा किं यज्ञैः किं सुखेन वा
यस्य मे त्वं महीपाल दुःखान्येतान्यवाप्तवान्
पीडितं चापि जानामि राज्यमात्मानमेव च
अनेन वचसा तुभ्यं दुःखितस्य जनेश्वर ४५
भवान्पिता भवान्माता भवान्नः परमो गुरुः
भवता विप्रहीणा वै क्व नु तिष्ठामहे वयम् ४६
औरसो भवतः पुत्रो युयुत्सुर्नृपसत्तम ।
अस्तु राजा महाराज यमन्यं मन्यते भवान्
अहं वनं गमिष्यामि भवान् राज्यं प्रशासतु
न मामयशसा दग्धं भूयस्त्वं दग्धुमर्हसि ।
नाहं राजा भवान् राजा भवतः परवानहम्
कथं गुरुं त्वां धर्मज्ञमनुज्ञातुमिहोत्सहे ॥ ४९
न मन्युर्हृदि नः कश्चित्सुयोधनकृतेऽनघ ।
भवितव्यं तथा तद्धि वयं चान्ये च मोहिताः
वयं पुत्रा हि भवतो यथा दुर्योधनादयः ।
गान्धारी चैव कुन्ती च निर्विशेषे मते मम ॥
स मां त्वं यदि राजेन्द्र परित्यज्य गमिष्यसि
पृष्ठतस्त्वनुयास्यामि सत्यमात्मानमालभे ५२
इयं हि वसुसंपूर्णा मही सागरमेखला ।
भवता विप्रहीणस्य न मे प्रीतिकरी भवेत् ५३
भवदीयामिदं सर्वं शिरसा त्वां प्रसादये ।
त्वद्धीनाः स्म राजेन्द्र व्येतु ते मानसो ज्वरः
भवितव्यमनुप्राप्तो मन्ये त्वं वसुधाधिप ।
दिष्ट्या शुश्रूषमाणस्त्वां मोक्षिष्ये मनसो ज्वरं

धृतराष्ट्र उवाच ।

तापस्ये मे मनस्तात वर्तते कुरुनन्दन ।
उचितं च कुलेऽस्माकमरण्यगमनं प्रभो ॥ ५६
चिरमस्म्युषितः पुत्र चिरं शुश्रूषितस्त्वया ।
वृद्धं मामप्यनुज्ञातुमर्हसि त्वं नराधिप ॥ ५७

वैशम्पायन उवाच ।

इत्युक्त्वा धर्मराजानं वेपमानं कृताञ्जलिम्
उवाच वचनं राजा धृतराष्ट्रोऽम्बिकासुतः ॥
सञ्जयं च महात्मानं कृपं चापि महारथम् ।
अनुनेतुमिहेच्छामि भवद्भिर्वसुधाधिपम् ५९
म्लायते मे मनो हीदं मुखं च परिशुष्यति ।
वयसा च प्रकृष्टेन वाग्व्यायामेन चैव ह ६०
इत्युक्त्वा स तु धर्मात्मा वृद्धो राजा कुरूद्वहः
गान्धारीं शिश्रिये धीमान् सहसैव गतासुवत्
तं तु दृष्ट्वा समासीनं विसंज्ञमिव कौरवम् ।
आर्तिं राजाऽगमत्तीव्रां कौन्तेयः परवीरहा ॥

युधिष्ठिर उवाच ।

यस्य नागसहस्रेण शतसख्येन वै बलम् ।
सोऽय नारीं व्यपाश्रित्य शेते राजा गतासुवत्
आयसी प्रतिमा येन भीमसेनस्य सा पुरा ।
चूर्णीकृता बलवता सौबलामाश्रितः स्त्रियम्
धिगस्तु मामधर्मज्ञं धिग्बुद्धिं धिक् च मे श्रुतं
यत्कृते पृथिवीपालः शेतेऽयमतथोचितः ६५
अहमप्युपवत्स्यामि यथैवायं गुरुर्मम ।
यदि राजा न भुंक्तेऽयं गान्धारी च यशस्विनी

वैशम्पायन उवाच ।

ततोऽस्य पाणिना राजन्जलशीतेन पाण्डवः
उरो मुखं च शनकैः पर्यमार्जत धर्मवित् ॥६७
तेन रत्नौषधिमता पुण्येन च सुगन्धिना ।
पाणिस्पर्शेन राज्ञः स राजा संज्ञामवाप ह ६८

धृतराष्ट्र उवाच ।

स्पृश मां पाणिना भूयः परिष्वज च पाण्डव
जीवामीवातिसंस्पर्शात्तव राजीवलोचन ६९
मूर्धानं च तवाघ्रातुमिच्छामि मनुजाधिप ।
पाणिभ्यां हि परिस्प्रष्टुं प्रीणनं हि महन्मम ॥
अष्टमो ह्यद्य कालोयमाहारस्य कृतस्य मे ।
येनाहं कुरुशार्दूल शक्नोमि न विचेष्टितुम् ७१
व्यायामश्चायमत्यर्थं कृतस्त्वामभियाचता ।
ततो ग्लानमनास्तात नष्टसंज्ञ इवाभवम् ७२

*तवामृतरसप्रख्यं हस्तस्पर्शमिमं प्रभो ।
लब्ध्वा संजीवितोऽस्मीति मन्ये कुरुकुलोद्वह ७३

वैशम्पायन उवाच ।

एवमुक्तस्तु कौन्तेयः पित्रा ज्येष्ठेन भारत ।
पस्पर्श सर्वगात्रेषु सौहार्दात्तं शनैस्तदा ७४
उपलभ्य ततः प्राणान् धृतराष्ट्रो महीपतिः ।
बाहुभ्यां सपरिष्वज्य मूर्ध्न्याजिघ्रत पाण्डवं ७५
विदुरादयश्च ते सर्वे रुरुदुर्दुःखिता भृशम् ।
अतिदुःखात्तु राजानं नोचुः किञ्चन पाण्डवं ७६
गान्धारी त्वेव धर्मज्ञा मनसोद्वहती भृशम् ।
दुःखान्यधारयद्राजन्मैवमित्येव चाब्रवीत् ॥ ७७
इतरास्तु स्त्रियः सर्वाः कुन्त्या सह सुदुःखिताः
नेत्रैरागतविक्लेदैः परिवार्य स्थिताऽभवन् ७८
अथाब्रवीत्पुनर्वाक्यं धृतराष्ट्रो युधिष्ठिरम् ।
अनुजानीहि मां राजंस्तापस्ये भरतर्षभ ७९
ग्लायते मे मनस्तात भूयो भूयः प्रजल्पतः ।
न मामतः परं पुत्र परिक्लेष्टुमिहार्हसि ॥ ८०

तस्मिंस्तु कौरवेन्द्रे तं तथा ब्रुवति पाण्डवम्
सर्वेषामेव योधानामार्तनादो महानभूत् ८१
दृष्ट्वा कृशं विवर्णं च राजानमतथोचितम् ।
उपवासपरिश्रान्तं त्वगास्थिपरिवारणम् ॥ ८२
धर्मपुत्रः स्वपितरं परिष्वज्य महाप्रभुम् ।
शोकजं बाष्पमुत्सृज्य पुनर्वचनमब्रवीत् ८३

न कामये नरश्रेष्ठ जीवितं पृथिवीं तथा ।
यथा तव प्रियं राजंश्चिकीर्षामि परंतप ८४
यदि चाहमनुग्राह्यो भवतो दयितोऽपि वा ।
क्रियतां तावदाहारस्ततो वेत्स्याम्यहं परम् ॥
ततोऽब्रवीन्महातेजा धृतराष्ट्रो युधिष्ठिरम् ।
अनुज्ञातस्त्वया पुत्र भुञ्जीयामिति कामये ८६

इति ब्रुवति राजेन्द्रे
धृतराष्ट्रे युधिष्ठिरम् ।
ऋषिः सत्यवतीपुत्रो
व्यासोऽभ्येत्य वचोऽब्रवीत् ॥ ८७

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि धृतराष्ट्रनिर्वेदे तृतीयोऽध्यायः ॥ ३ ॥



४

व्यास उवाच ।

युधिष्ठिर महाबाहो यथाह कुरुनन्दनः ।
धृतराष्ट्रो महातेजास्तत्कुरुष्वाविचारयन् १
अयं हि वृद्धो नृपतिर्हतपुत्रो विशेषतः ।
नेदं कृच्छ्रं चिरतरं सहेदिति मतिर्मम ॥ २
गान्धारी च महाभागा प्राज्ञा करुणवेदिनी ।
पुत्रशोकं महाराज धैर्येणोद्वहते भृशम् ॥ ३
अहमप्येतदेव त्वां ब्रवीमि कुरु मे वचः ।
अनुज्ञां लभतां राजा मा वृथेह मरिष्यति ४
राजर्षीणां पुराणानामनुयातु गतिं नृपः ।
राजर्षीणां हि सर्वेषामन्ते वनमुपाश्रयः ॥ ५

वैशम्पायन उवाच ।

इत्युक्तः स तदा राजा व्यासेनाद्भुतकर्मणा ।
प्रत्युवाच महातेजा धर्मराजो महामुनिम् ६
भगवानेव नो मान्यो भगवानेव नो गुरुः ।
भगवानस्य राज्यस्य कुलस्य च परायणम् ७
अहं तु पुत्रो भगवन् पिता राजा गुरुश्च मे ।
निदेशवर्ती च पितुः पुत्रो भवति धर्मतः ॥ ८

वैशम्पायन उवाच ।

इत्युक्तः स तु तं प्राह व्यासो वेदविदां वरः
युधिष्ठिरं महातेजाः पुनरेव महाकविः ॥ ९
एवमेतन्महाबाहो यथा वदसि भारत ।
राजाऽयं वृद्धतां प्राप्तः प्रमाणे परमे स्थितः १०

इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे तृतीयोऽध्यायः ॥ ३ ॥

* 'अमृतमुखस्पर्शम्' इति पाठः ।

४

युधिष्ठिरेति ॥१॥ अहमिति पौत्रोऽपि । 'आत्मा वै पुत्रनामासि'इति पुत्राभिन्नत्वात्पुत्र एवाहं ते तत्र राजा तु मे मम पिता गुरुश्च ॥८॥ परमे प्रमाणे उपनिषन्मते ॥१०॥

सोऽयं मयाऽभ्यनुज्ञात-
स्त्वया च पृथिवीपतिः ।
क्रियतु स्वमभिप्रायं
माऽस्य विघ्नकरो भव ॥ ११
एष एव परो धर्मो राजर्षीणां युधिष्ठिर ।
समरे वा भवेन्मृत्युर्वने वा विधिपूर्वकम् १२
पित्रा तु तव राजेन्द्र पाण्डुना पृथिवीक्षिता
शिष्यवृत्तेन राजायं गुरुवत्पर्युपासितः ॥ १३
क्रतुभिर्दक्षिणावद्भी रत्नपर्वतशोभितैः ।
महद्भिरिष्टं गौर्भुक्ता प्रजाश्च परिपालिताः ॥
पुत्रसंस्थ च विपुल राज्यं विप्रोषिते त्वयि ।
त्रयोदशसमा भुक्तं दत्तं च विविधं वसु १५
त्वया चायं नरव्याघ्र गुरुशुश्रूषयाऽनघ ।
आराधितः सभृत्येन गान्धारी च यशस्विनी
अनुजानीहि पितरं समयोऽस्य तपोविधौ ।
न मन्युर्विद्यते चास्य सुसूक्ष्मोऽपि युधिष्ठिर

वैशम्पायन उवाच ।

एतावदुक्त्वा वचनमनुमान्य च पार्थिवम्।
तथाऽस्त्विति च तेनोक्तः कौन्तेयेन ययौ वनम्
गते भगवति व्यासे राजा पाण्डुसुतस्तदा ।
प्रोवाच पितरं वृद्धं मन्दं मन्दमिवानतः ॥ १९
यदाह भगवान्व्यासो यच्चापि भवतो मतम् ।
यथाऽऽह च महेष्वासः कृपो विदुर एव च
युयुत्सुः सञ्जयश्चैव तत्कर्तास्म्यहमञ्जसा ।
सर्व एव हि मान्या मे कुलस्य हि हितैषिणः
इदं तु याचे नृपते त्वामह शिरसा नतः ।
क्रियतां तावदाहारस्ततो गच्छाश्रमं प्रति २२

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि व्यासानुज्ञायां चतुर्थोऽध्यायः ॥ ४ ॥

५

वैशम्पायन उवाच ।

ततो राज्ञाऽभ्यनुज्ञातो धृतराष्ट्रः प्रतापवान्।
ययौ स्वभवनं राजा गान्धार्याऽनुगतस्तदा १
मन्दप्राणगतिर्धीमान् कृच्छ्रादिव समुद्वहन् ।
पदातिः स महीपालो जीर्णो गजपतिर्यथा २
तमन्वगच्छद्विदुरो विद्वान् सूतश्च सञ्जयः ।
स चापि परमेष्वासः कृपः शारद्वतस्तथा ३
स प्रविश्य गृहं राजन्कृतपूर्वाह्णिकक्रियः ।
तर्पयित्वा द्विजश्रेष्ठानाहारमकरोत्तदा ॥ ४
गान्धारी चैव धर्मज्ञा कुन्त्या सह मनस्विनी
वधूभिरुपचारेण पूजिताऽभुंक्त भारत ॥ ५
कृताहारं कृताहाराः सर्वे ते विदुरादयः ।
पाण्डवाश्च कुरुश्रेष्ठमुपातिष्ठन्त तं नृपम् ॥ ६
ततोऽब्रवीन्महाराज कुन्तीपुत्रमुपह्वरे ।
निषण्णं पाणिना पृष्ठे सस्पृशन्नम्बिकासुतः ७
अप्रमादस्त्वया कार्यः सर्वथा कुरुनन्दन ।
अष्टाङ्गे राजशार्दूल राज्ये धर्मपुरस्कृते ॥ ८
तत्तु शक्यं महाराज
रक्षितुं पाण्डुनन्दन ।
राज्यं धर्मेण कौन्तेय
विद्धानसिं निबोध तत् ॥ ९
विद्यावृद्धान् सदैव त्वमुपासीथा युधिष्ठिर ।
शृणुयास्ते च यद्ब्रूयुः कुर्याश्चैवाविचारयन् १०
प्रातरुत्थाय तान् राजन्
पूजयित्वा यथाविधि ।
कृत्यकाले समुत्पन्ने
पृच्छेथाः कार्यमात्मनः ॥ ११
ते तु संमानिता राजंस्त्वया कार्यहितार्थिना
प्रवक्ष्यन्ति हितं तात सर्वथा तव भारत १२
इन्द्रियाणि च सर्वाणि वाजिवत्परिपालय ।
हितायैव भविष्यन्ति रक्षितं द्रविणं यथा १३

तपोविधौ तप करणे ॥ १७ ॥ इति श्रीमहाभारते आश्रमवासिकपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्थोऽध्याय ४

५

तत इति ॥ १ ॥ अभुंक्त भुक्तवती ॥ ५ ॥ अष्टांगे स्वाम्यमात्यादियुते ॥ ८ ॥

अमात्यानुपधा*तीतान्
पितृपैतामहान् शुचीन् ।
दान्तान् कर्मसु पुण्यांश्च
पुण्यान् सर्वेषु योजयेः ॥ १४
चारयेथाश्च सततं चारैरविदितः परैः ।
परीक्षितैर्बहुविधैः स्वराष्ट्रप्रतिवासिभिः ॥ १५
पुरं च ते सुगुप्तं स्याद्दृढप्राकारतोरणम् ।
अट्टाट्टालकसम्बाधं षट्पदं सर्वतोदिशम् १६
तस्य द्वाराणि सर्वाणि पर्याप्तानि बृहन्ति च
सर्वतः सुविभक्तानि यन्त्रैराराक्षितानि च ॥
पुरुषैरलमर्थस्ते विदितैः कुलशीलतः ।
आत्मा च रक्ष्यः सततं भोजनादिषु भारत ॥
विहाराहारकालेषु माल्यशय्यासनेषु च ।
स्त्रियश्च ते सुगुप्ताः स्युर्वृद्धैरात्तैरधिष्ठिताः १९
शीलवद्भिः कुलीनैश्च विद्वद्भिश्च युधिष्ठिर ।
मन्त्रिणश्चैव कुर्वीथा द्विजान्विद्याविशारदान्
विनीतांश्च कुलीनांश्च धर्मार्थकुशलान्नृजून् ।
तैः सार्धं मन्त्रयेथास्त्वं नात्यर्थं बहुभिः सह ॥
समस्तैरपि च व्यस्तैर्व्यपदेशेन केनचित् ।
सुसंवृतं मन्त्रगृहं स्थलं चारुह्य मन्त्रयेः ॥ २२
अरण्ये निःशलाके वा न च रात्रौ कथञ्चन ।
वानराः पक्षिणश्चैव ये मनुष्यानुसारिणः २३
सर्वे मन्त्रगृहे वर्ज्या ये चापि जडपङ्गवः ।
मन्त्रभेदे हि ये दोषा भवन्ति पृथिवीक्षिताम्
न ते शक्याः समाधातुं कथंचिदिति मे मतिः
दोषांश्च मन्त्रभेदस्य ब्रूयास्त्व मन्त्रिमण्डले ॥
अभेदे च गुणा राजन् पुनः पुनरिन्दम ।
पौरजानपदानां च शौचाशौचे युधिष्ठिर ॥
यथा स्याद्विदितं राजंस्तथा कार्यं कुरूद्वह ।
व्यवहाराश्च ते राजन्नित्यमात्तैरधिष्ठितः ॥२७
योज्यस्तुष्टैर्हितै राजन्नित्यं चारैरनुष्ठितः ।
परिमाणं विदित्वा च दण्डं दण्ड्येषु भारत ॥
प्रणयेयुर्यथान्यायं पुरुषास्ते युधिष्ठिर ।
आदानरुचयश्चैव परदाराभिमर्शिनः ॥ २९
उग्रदण्डप्रधानाश्च मिथ्या व्याहारिणस्तथा ।
आक्रोष्टारश्च लुब्धाश्च हर्तारः साहसप्रियाः ॥
सभाविहारभेत्तारो वर्णानां च प्रदूषकाः ।
हिरण्यदण्ड्या वध्याश्च कर्तव्या देशकालतः
प्रातरेव हि पश्येथा ये कुर्युर्व्ययकर्म ते ।
अलङ्कारमथो भोज्यमत ऊर्ध्वं समाचरेः ॥ ३२
पश्येथाश्च ततो योधान्
सदा त्वं प्रातिहर्षयन् ।
दूतानां च चराणां च
प्रदोषस्ते सदा भवेत् ॥ ३३
सदा चापररात्रान्ते
भवेत्कार्यार्थनिर्णयः ।
मध्यरात्रे विहारस्ते
मध्याह्ने च सदा भवेत् ॥ ३४
सर्वे त्वौपयिकाः कालाः कार्याणां भरतर्षभ
तथैवालंकृतः काले तिष्ठेथा भूरिदक्षिण ॥ ३५
चक्रवत्तात कार्याणां पर्यायो दृश्यते सदा ।
कोशस्य निचये यत्नं कुर्वीथा न्यायतः सदा
विविधस्य महाराज विपरीतं विवर्जयेः ।
चारैर्विदित्वा शत्रूंश्च ये राज्ञामन्तरैषिणः ३७
तानात्तैः पुरुषैर्दूराद्घातयेथा नराधिप ।
कर्म दृष्ट्वाऽथ भृत्यास्त्व वरयेथाः कुरूद्वह ३८
कारयेथाश्च कर्माणि युक्तायुक्तैरधिष्ठितैः ।
सेनाप्रणेता च भवेत्तव तात दृढव्रतः ॥ ३९
शूरः क्लेशसहश्चैव हितो भक्तश्च पूरुषः ।
सर्वे जनपदाश्चैव तव कर्माणि पाण्डव ॥ ४०
गोवद्रासभवच्चैव कुर्युर्ये व्यवहारिणः ।
स्वरन्ध्रं पररन्ध्रं च स्वेषु चैव परेषु च ॥ ४१

कर्मसु पुण्यान् जन्मना च पुण्यान् अमात्याश्चारयेथा इत्युत्तरेणान्वय ॥ १४ ॥ अट्टाः दुर्गोपरिभागे सञ्चारस्थानानि, षट्पदं षड्भि पदै पदनीयै स्थानैर्युक्तं तेन सप्तप्राकारमिति गम्यते । तत्र सप्तमस्यान्त पुरत्वात् षडेवान्येषां पदनीयानि स्थानानि ॥१६॥ नि शलाके अतृणे सतृणे त्वासन्न परचारो ज्ञातुमशक्य इति २३ परिमाणं दण्ड्यधनस्यापराधस्य च ॥२८॥ आदानरुचय उत्कोचोपजीविनश्चौरा वा ॥ २९ ॥ हिरण्यदण्ड्या वध्या पूर्वोक्ता सर्वे देशकालानुरोधेन दण्ड्या वा वध्या वेति ज्ञेयम् ॥३१॥ प्रदोषो रजनीमुख, दूतादीना दर्शनकाल ॥३३॥ तेभ्य श्रुतानामर्थानां निर्णये अपररात्र ॥ ३४ ॥ गवादिवत् आहारमात्रवेतनाः विष्टिगृहीतानामप्याहारमात्रं देयमित्यर्थ । व्यवहारिणः कारुशिल्पिप्रभृतय ॥ ४१ ॥

* ' भिया धर्मार्थकामैश्च परीक्षा या तु सोपधा ' इत्यभिधानचिन्तामणि ।

उपलक्षयितव्यं ते नित्यमेव युधिष्ठिर ।
देशजाश्चैव पुरुषा विक्रान्ताः स्वेषु कर्मसु ४२
यात्राभिरनुरूपाभिरनुग्राह्या हितास्त्वया ।
गुणार्थिनां गुणः कार्यो विदुषा वै जनाधिप
अविचार्याश्च ते ते स्युरचला इव नित्यशः ४३

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि धृतराष्ट्रोपदेशे पञ्चमोऽध्यायः ॥ ५ ॥



६

धृतराष्ट्र उवाच ।

मण्डलानि च बुध्येथाः परेषामात्मनस्तथा
उदासीनगणानां च मध्यस्थानां च भारत १
चतुर्णां शत्रुजातानां सर्वेषामाततायिनाम् ।
मित्रं चामित्रमित्रं च बोद्धव्यं तेऽरिकर्शन २ ॥
तथाऽमात्या जनपदा दुर्गाणि विविधानि च
बलानि च कुरुश्रेष्ठ भवत्येषां यथेच्छकम् ३
ते च द्वादश कौन्तेय राज्ञां वै विषयात्मकाः
मन्त्रिप्रधानाश्च गुणाः षष्टिर्द्वादश च प्रभो ४
एतन्मण्डलमित्याहुराचार्या नीतिकोविदाः ।
अत्र षाड्गुण्यमायत्तं युधिष्ठिर निबोध तत्
वृद्धिक्षयौ च विज्ञेयौ स्थान च कुरुसत्तम ।
द्विसप्तत्यां महाबाहो ततः षाड्गुण्यजा गुणाः
यदा स्वपक्षो बलवान् परपक्षस्तथाऽबलः ।
विगृह्य शत्रून्कौन्तेय जेयः क्षितिपतिस्तदा ७
यदा परे च बलिनः
स्वपक्षश्चैव दुर्बलः ।
सार्धं विद्वांस्तदा क्षीणः
परैः सन्धिं समाश्रयेत् ॥ ८
द्रव्याणां सञ्चयश्चैव कर्तव्यः सुमहांस्तथा ।
यदा समर्थो यानाय न चिरेणैव भारत ॥ ९
तदा सर्वं विधेयं स्यात्स्थानेन स विचारयेत् ।
भूमिरल्पफलादेया विपरीतस्य भारत ॥ १०
हिरण्यं कुप्यभूयिष्ठं मित्रं क्षीणमथो बलम् ।
विपरीताश्निगृह्णीयात्स्वं हि सन्धिविशारदः
सन्ध्यर्थं राजपुत्रं वा लिप्सेथा भरतर्षभ ।
विपरीतं न तच्छ्रेयः पुत्र कस्याचिदापदि १२
तस्याः प्रमोक्षे यत्नं च
कुर्याः सोपायमन्त्रवित् ।
प्रकृतीना च राजेन्द्र
राजा दीनान्विभावयेत् ॥ १३
क्रमेण युगपत्सर्वं व्यवसायं महाबलः ।
पीडनं स्तंभनं चैव कोशभंगस्तथैव च ॥ १४
कार्यं यत्नेन शत्रूणां स्वराज्यं रक्षता स्वयम् ।
न च हिंस्योऽभ्युपगतः सामन्तो वृद्धिमिच्छता
कौन्तेय तं न हिंसेत्स यो महीं विजिगीषते
गणाना भेदने योगमीप्सेथाः सह मन्त्रिभिः
साधुसंग्रहणाच्चैव पापनिग्रहणात्तथा ।
दुर्बलाश्चैव सततं नान्वेष्टव्या बलीयसा १७

इति श्रीमहाभारते आश्रमवासिकपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चमोऽध्याय ॥ ५ ॥

६

मण्डलानीति । अरिमित्रमित्यादीनि। उदासीनादन्यो मध्यमो द्वयोरपि इष्टाकाङ्क्षी ॥१॥ चतुर्णां शत्रुपक्षे जातानां शत्रु शत्रुमित्रं उभयोर्जयार्थी पराजयार्थी चेति॥२॥यथेच्छकं परैर्भेद्यत्वमभेद्यत्वं च भवति तस्मादवहितास्तिष्ठेत् । यथा भेदो न भवेदिति ॥ ३ ॥ द्वादश चत्वार शत्रुजाता षट् आततायिन , मित्रं आमित्रामित्र चेति षष्टिर्गुणा । कृष्यादीन्यष्टौ सन्धानकर्माणि बालादयो विंशतिरसन्धेया । नास्तिक्यादयश्चतुर्दश दोषा मन्त्रादीन्यष्टादश तीर्थानीति एतेषु केचित् हानार्थं ज्ञातव्या केचिदुपादानार्थम् ॥ ४ ॥ षाड्गुण्यादय प्रागेव व्याख्याता ॥ ५ ॥ सन्ध्यर्थमिति सार्धं । य सन्धिं करोति तस्य पुत्रं स्वनिकटे स्थापयेदित्यर्थ । तदकरणे महत्यापदायाति कदाचित्तस्यामप्यागतायाममोक्षे तत्परिहारे यत्नोऽपि कर्तव्य ॥ १२ ॥ दीनान् अन्यबाधितादीन् विभावयेत्पूजयेत् ॥ १३ ॥ युगपद्वेति कुर्यादिति च शेष ॥ १४ ॥ तेन हिंसेत्स जिगीषुरिति शेष ॥ १६ ॥ नान्वेष्टव्या नोच्छेदनीया ॥ १७ ॥

तिष्ठेथा राजशार्दूल वैतसीं वृत्तिमास्थितः ।
यद्येनमभियायाच्च बलवान् दुर्बलं नृपः ॥ १८
सामादिभिरुपायैस्तं क्रमेण विनिवर्तयेः ।
अशक्तुवंश्च युद्धाय निष्पतेत्सह मन्त्रिभिः १९
कोशेन पौरैर्दण्डेन ये चास्य प्रियकारिणः ।
असंभवे तु सर्वस्य यथा मुख्येन निष्पतेत् ।
क्रमेणानेन मुक्तिः स्याच्छरीरामिति केवलम्

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवास पर्वणि धृतराष्ट्रोपदेशे षष्ठोऽध्यायः ॥ ६ ॥



७

धृतराष्ट्र उवाच ।

सन्धिविग्रहमप्यत्र पश्येथा राजसत्तम ।
द्वियोनिं विविधोपायं बहुकल्पं युधिष्ठिर ॥१
कौरव्य पर्युपासीथाः स्थित्वा द्वैविध्यमात्मनः
तुष्टपुष्टबलः शत्रुरात्मवानिति च स्मरेत् ॥ २
पर्युपासनकाले तु विपरीतं विधीयते ।
आमर्दकाले राजेन्द्र व्यपसर्पेत्ततः परम् ॥ ३
व्यसनं भेदनं चैव शत्रूणां कारयेत्ततः ।
कर्षणं भीषणं चैव युद्धे चैव बलक्षयम् ॥ ४
प्रयास्यमानो नृपतिस्त्रिविधां परिचिन्तयेत् ।
आत्मनश्चैव शत्रोश्च शक्तिं शास्त्रविशारदः ५
उत्साहप्रभुशक्तिभ्यां मन्त्रशक्त्या च भारत
उपपन्नो नृपो यायाद्विपरीतं च वर्जयेत् ॥ ६
आददीत बलं राजा मौलं मित्रबलं तथा ।
अटवीबलं भृतं चैव तथा श्रेणीबलं प्रभो ॥ ७
तत्र मित्रबलं राजन्मौलं चैव विशिष्यते ।
श्रेणीबलं भृतं चैव तुल्ये एवेति मे मतिः ॥ ८
तथाऽऽचारबलं चैव परस्परसमं नृप ।
विज्ञेयं बहुकालेषु राज्ञा काल उपस्थिते ॥ ९
आपदश्चापि बोद्धव्या बहुरूपा नराधिप ।
भवन्ति राज्ञा कौरव्य यास्ताः पृथगतः शृणु
विकल्पा बहुधा राजन्नापदां पाण्डुनन्दन
सामादिभिरुपन्यस्य गणयेत्तान्नृपः सदा ॥११
यात्रां गच्छेद्बलैर्युक्तो राजा सान्द्रः परतप ।
युक्तश्च देशकालाभ्यां बलैरात्मगुणैस्तथा ॥१२
हृष्टपुष्टबलो गच्छेद्राजा वृद्धशुदये रतः ।
अकृशश्चाप्यथो यायादनृतावपि पाण्डव १३

तृणाश्मानं वाजिरथप्रवाहां
ध्वजद्रुमैः संवृतकूलरोधसम् ।
पदातिनागैर्बहुकर्दमां नदीं
सपत्ननाशे नृपतिः प्रयोजयेत् ॥ १४

अथोपपत्त्या शकट पद्मवज्र च भारत ।
उशना वेद यच्छास्त्र तत्रैतद्विहित विभो १५
चारयित्वा परबल कृत्वा स्वबलदर्शनम् ।
स्वभूमौ योजयेद्युद्ध परभूमौ तथैव च ॥ १६
बल प्रसादयेद्राजा निक्षिपेद्बलिनो नरान् ।
ज्ञात्वा स्वविषय तत्र सामादिभिरुपक्रमेत् १७
सर्वथैव महाराज शरीर धारयेदिह ।
प्रेत्य चेह च कर्तव्यमात्मनिःश्रेयसं परम् १८


वैतसीं वृत्तिं प्रबलेष्विति शेष । एनं त्वाम् ॥१८॥ असंभवे उपायान्तरस्य मुख्येन शरीरेणैव युद्धाय निष्पतेत् एव शरीरमोक्षणे मुक्तिं शूरस्य स्यादित्यर्थ ॥ २० ॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे षष्ठोऽध्याय ॥ ६ ॥

७

संधीति । प्रबलप्रतियोगिकौ दुर्बलप्रतियोगिकौ चेति द्वियोनी सन्धिविग्रहौ ॥ १ ॥ स्थित्वा स्थिरो भूत्वा द्वैविध्यं बलाबलं ज्ञात्वा शत्रु पर्युपास्वेति भाव । स्मरेज्जयोपायं विचारयेन्न त्वकस्मात्प्रयायात् ॥ २ ॥ विपरीत अतुष्टपुष्टबलं प्रयायादित्यर्थ ॥ ३ ॥ स्मरेदित्युक्तं विस्पष्टयति–**व्यसनमिति** ॥ ४ ॥ त्रिविधा शक्तिम् ॥ ५ ॥ तामेवाह— **उत्साहेति** ॥ ६ ॥ मौल धनबलम् ॥ ७ ॥ विकल्पा ईतिप्रभृतय तान् उपन्यस्य गणयेत् न तु गोपयित्वाऽवहेलयेत् ॥ ११ ॥ अनृतौ अकालेऽपि शिशिरादौ ॥ १३ ॥ शकटादयो व्यूहविशेषा' ॥ १५ ॥

एवमेतन्महाराज राजा सम्यक् समाचरन्।
प्रेत्य स्वर्गमवाप्नोति प्रजा धर्मेण पालयन् १९
एवं त्वया कुरुश्रेष्ठ वर्तितव्यं प्रजाहितम्।
उभयोर्लोकयोस्तात प्राप्तये नित्यमेव हि २०
भीष्मेण सर्वमुक्तोऽसि कृष्णेन विदुरेण च।
मयाऽप्यवश्यं वक्तव्यं प्रीत्या ते नृपसत्तम २१
एतत्सर्वं यथान्यायं कुर्वीथा भूरिदक्षिण।
प्रियस्तथा प्रजानां त्वं स्वर्गे सुखमवाप्स्यसि॥
अश्वमेधसहस्रेण यो यजेत्पृथिवीपतिः।
पालयेद्वापि धर्मेण प्रजास्तुल्यं फल लभेत् २३

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि धृतराष्ट्रोपसवादे सप्तमोऽध्यायः॥ ७॥



८

युधिष्ठिर उवाच।
एवमेतत्करिष्यामि यथाऽऽत्थ पृथिवीपते।
भूयश्चैवानुशास्योऽहं भवता पार्थिवर्षभ॥ १
भीष्मे स्वर्गमनुप्राप्ते गते च मधुसूदने।
विदुरे संजये चैव कोऽन्यो मां वक्तुमर्हति २
यत्तु मामनुशास्तीह भवानद्य हिते स्थितः।
कर्ताऽस्मि तन्महीपाल निर्वृतो भव पार्थिव
वैशम्पायन उवाच।
एवमुक्तः स राजर्षिर्धर्मराजेन धीमता।
कौन्तेय समनुज्ञातुमियेष भरतर्षभ॥ ४
पुत्र संशाम्यतां तावन्ममापि बलवान् श्रमः।
इत्युक्त्वा प्राविशद्राजा गान्धार्या भवनं तदा
तमासनगतं देवी गान्धारी धर्मचारिणी।
उवाच काले कालज्ञा प्रजापतिसमं पतिम् ६
अनुज्ञातः स्वयं तेन व्यासेन त्वं महर्षिणा।
युधिष्ठिरस्यानुमते कदाऽऽरण्यं गमिष्यसि ७
धृतराष्ट्र उवाच।
गान्धार्यहमनुज्ञातः स्वय पित्रा महात्मना।
युधिष्ठिरस्यानुमते गन्ताऽस्मि न चिराद्वनम्
अहं हि तावत्सर्वेषां तेषां दुर्वृत्तदेविनाम्।
पुत्राणा दातुमिच्छामि प्रेतभावानुगं वसु॥ ९
सर्वप्रकृतिसान्निध्यं कारयित्वा स्ववेश्मनि।
वैशम्पायन उवाच।
इत्युक्त्वा धर्मराजाय प्रेषयामास वै तदा॥
स च तद्वचनात्सर्वं समानिन्ये महीपतिः।
ततः प्रतीतमनसो ब्राह्मणाः कुरुजाङ्गलाः ११
क्षत्रियाश्चैव वैश्याश्च शूद्राश्चैव समाययुः।
ततो निष्क्रम्य नृपतिस्तस्मादन्तःपुरात्तदा १२
ददृशे तं जनं सर्वं सर्वाश्च प्रकृतीस्तथा।
समवेतांश्च तान्सर्वान्पौरान् जानपदांस्तथा॥
तानागतानभिप्रेक्ष्य समस्त च सुहृज्जनम्।
ब्राह्मणांश्च महीपाल नानादेशसमागतान् १४
उवाच मतिमान् राजा धृतराष्ट्रोऽम्बिकासुतः
भवन्तः कुरवश्चैव चिरकाल सहोषिताः १५
परस्परस्य सुहृदः परस्परहिते रताः।
यदिदानीमहं ब्रूयामस्मिन्काल उपस्थिते १६
तथा भवद्भिः कर्तव्यमविचार्य वचो मम।
अरण्यगमने बुद्धिर्गान्धारीसहितस्य मे॥ १७
व्यासस्यानुमते राज्ञस्तथा कुन्तीसुतस्य मे।
भवन्तोऽप्यनुजानन्तु मा च वोऽभूद्विचारणा
अस्माकं भवता चैव येय प्रीतिर्हि शाश्वती।
न च साऽन्येषु देशेषु राज्ञामिति मतिर्मम १९
शान्तोऽस्मि वयसाऽनेन तथा पुत्रविनाकृतः
उपवासकृशश्चास्मि गान्धारीसहितोऽनघाः
युधिष्ठिरगते राज्ये प्राप्तश्चास्मि सुख महत्।
मन्ये दुर्योधनैश्वर्याद्विशिष्टमिति सत्तमाः २१
मम चान्धस्य वृद्धस्य हतपुत्रस्य का गतिः।
ऋते वनं महाभागास्तन्माऽनुज्ञातुमर्हथ॥ २२

इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्तमोऽध्याय॥ ७॥

८

एवमिति॥ १॥

तस्य तद्वचनं श्रुत्वा सर्वे ते कुरुजाङ्गलाः।
बाष्पसंदिग्धया वाचा रुरुदुर्भरतर्षभ ॥ २३
तानविब्रुवतः किञ्चित्सर्वान् शोकपरायणान्
पुनरेव महातेजा धृतराष्ट्रोऽब्रवीदिदम् ॥ २४

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि धृतराष्ट्रकृतवनगमनप्रार्थने अष्टमोऽध्यायः ॥ ८ ॥



९

धृतराष्ट्र उवाच।

शान्तनुः पालयामास यथावद्वसुधामिमाम्।
तथा विचित्रवीर्यश्च भीष्मेण परिपालितः १
पालयामास नस्तातो विदितार्थो न संशयः।
यथा च पाण्डुर्भ्राता मे दयितो भवतामभूत् २
स चापि पालयामास यथावत्तच्च वेत्थ ह।
मया च भवतां सम्यक् शुश्रूषा या कृताऽनघाः
असम्यग्वा महाभागास्तत्क्षन्तव्यमतन्द्रितैः।
यदा दुर्योधनेनेदं भुक्तं राज्यमकण्टकम् ॥ ४
अपि तत्र नवो मन्दो दुर्बुद्धिरपराद्धवान्।
तस्यापराधाद्दुर्बुद्धेरभिमानान्महीक्षिताम् ॥ ५
विमर्दः सुमहानासीदनयात्स्वकृतादथ।
तन्मया साधु वाऽपीदं यदि वा साधु वै कृतम्
तद्वो हृदि न कर्तव्यं मया बद्धोऽयमञ्जलिः।
वृद्धोऽयं हतपुत्रोऽयं दुःखितोऽयं नराधिपः ७
पूर्वराज्ञां च पुत्रोऽयमिति कृत्वाऽनुजानथ।
इयं च कृपणा वृद्धा हतपुत्रा तपस्विनी ॥ ८
गान्धारी पुत्रशोकार्ता युष्मान्याचति वै मया
हतपुत्राविमौ वृद्धौ विदित्वा दुःखितौ तथा
अनुजानीत भद्रं वो व्रजाव शरणं च वः।
अयं च कौरवो राजा कुन्तीपुत्रो युधिष्ठिरः ॥
सर्वैर्भवद्भिर्द्रष्टव्यः समेषु विषमेषु च।
न जातु विषमं चैव गमिष्यति कदाचन ११
चत्वारः सचिवा यस्य भ्रातरो विपुलौजसः
लोकपालसमा ह्येते सर्वधर्मार्थदर्शिनः ॥ १२
ब्रह्मेव भगवानेष सर्वभूतजगत्पतिः।
युधिष्ठिरो महातेजा भवतः पालयिष्यति १३
अवश्यमेव वक्तव्यमिति कृत्वा ब्रवीमि वः।
एष न्यासो मया दत्तः सर्वेषां वो युधिष्ठिरः

भवन्तोऽस्य च वीरस्य
न्यासभूताः कृता मया।
यदेव तैः कृतं किञ्चि-
द्वलीक वः सुतैर्मम ॥ १५
यदन्येन मदीयेन तदनुज्ञातुमर्हथ।
भवद्भिर्न हि मे मन्युः कृतपूर्वः कथञ्चन १६
अत्यन्तगुरुभक्तानामेषोऽञ्जलिरिद नमः।
तेषामस्थिरबुद्धीना लुब्धानां कामचारिणाम्
कृते याचेऽद्य वः सर्वान्
गान्धारीसहितोऽनघाः।
इत्युक्तास्तेन ते सर्वे
पौरजानपदा जनाः।
नोचुर्बाष्पकलाः किञ्चि-
द्वीक्षां चक्रुः परस्परम् ॥ १८

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि धृतराष्ट्रप्रार्थने नवमोऽध्यायः ॥ ९ ॥



इति श्रीमहाभारते आश्रमवासिके पर्वाण नैलकण्ठीये भारतभावदीपे अष्टमोऽध्याय ॥ ८ ॥

९

शान्तनुरिति ॥१॥ अन्येन भृत्येन अनुज्ञातुं क्षन्तुम् ॥१६॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे नवमोऽध्याय ॥ ९ ॥

१०

वैशम्पायन उवाच ।

एवमुक्तास्तु ते तेन पौरजानपदा जनाः ।
वृद्धेन राज्ञा कौरव्य नष्टसंज्ञा इवाभवन् ॥ १
तूष्णींभूतांस्ततस्तांस्तु बाष्पकण्ठान्महीपतिः
धृतराष्ट्रो महीपालः पुनरेवाभ्यभाषत ॥ २
वृद्धं च हतपुत्रं च धर्मपत्न्या सहानया ।
विलपन्तं बहुविध कृपणं चैव सत्तमाः ॥ ३
पित्रा स्वयमनुज्ञातं कृष्णद्वैपायनेन वै ।
वनवासाय धर्मज्ञा धर्मज्ञेन नृपेण ह ॥ ४
सोऽहं पुनः पुनश्चैव शिरसावनतोऽनघाः ।
गान्धार्या सहितं तन्मां समनुज्ञातुमर्हथ ॥ ५

वैशम्पायन उवाच ।

तच्छ्रुत्वा कुरुराजस्य वाक्यानि करुणानि ते
रुरुदुः सर्वशो राजन्समेताः कुरुजाङ्गलाः ६
उत्तरीयैः करैश्चापि संच्छाद्य वदनानि ते ।
रुरुदुः शोकसंतप्ता मुहूर्तं पितृमातृवत् ॥ ७
हृदयैः शून्यभूतैस्ते धृतराष्ट्रप्रवासजम् ।
दुःखं सन्धारयन्तो हि नष्टसंज्ञा इवाभवन् ८
ते विनीय तमायासं धृतराष्ट्रवियोगजम् ।
शनैः शनैस्तदाऽन्योन्यमब्रुवन्संमतान्युत ९
ततः सन्धाय ते सर्वे वाक्यान्यथ समासतः
एकस्मिन्ब्राह्मणे राजन्निवेश्योचुर्नराधिपम् ॥
ततः स्वाचरणो विप्रः समतोऽर्थविशारदः ।
साम्नाख्यो बह्वृचो राजन्वक्तुं समुपचक्रमे ॥
अनुमान्य महाराजं तत्सदः सप्रसाद्य च ।
विप्रः प्रगल्भो मेधावी स राजानमुवाच ह ॥
राजन्वाक्यं जनस्यास्य मयि सर्वं समर्पितम्
वक्ष्यामि तदहं वीर तज्जुषस्व नराधिप १३
यथा वदासि राजेन्द्र सर्वमेतत्तथा विभो ।
नात्र मिथ्या वचः किञ्चित्सुहृत्त्वं नः परस्परम्
न ज्ञात्वस्य च वंशस्य
राज्ञां कश्चित्कदाचन ।
राजाऽऽसीद्यः प्रजापालः
प्रजानामप्रियोऽभवत् ॥ १५
पितृवद्भ्रातृवच्चैव भवन्तः पालयन्ति नः ।
न च दुर्योधनः किञ्चिदयुक्तं कृतवान्नृपः ॥ १६
यथा ब्रवीति धर्मात्मा मुनिः सत्यवतीसुतः ।
तथा कुरु महाराज स हि नः परमो गुरुः १७
त्यक्ता वयं तु भवता दुःखशोकपरायणाः ।
भविष्यामश्चिरं राजन् भवद्गुणशतैर्युताः ॥ १८
यथा शान्तनुना गुप्ता राज्ञा चित्राङ्गदेन च ।
भीष्मवीर्योपगूढेन पित्रा तव च पार्थिव १९
भवदुद्वीक्षणाश्चैव पाण्डुना पृथिवीक्षिता ।
तथा दुर्योधनेनापि राज्ञा सुपरिपालिताः २०
न स्वल्पमपि पुत्रस्ते व्यलीकं कृतवान्नृप ।
पितरीव सुविश्वस्तास्तस्मिन्नपि नराधिपे ॥
वयमास्म यथा सम्यक् भवतो विदितं तथा
तथा वर्षसहस्राणि कुन्तीपुत्रेण धीमता २२
पाल्यमाना धृतिमता सुखं विन्दामहे नृप ।
राजर्षीणां पुराणानां भवतां पुण्यकर्मणाम् ॥
कुरुसंवरणादीनां भरतस्य च धीमतः ।
वृत्तं समनुयात्येष धर्मात्मा भूरिदक्षिणः ॥ २४
नात्र वाच्यं महाराज सुसूक्ष्ममपि विद्यते ।
उषिताः स्म सुखं नित्यं भवता परिपालिताः
सुसूक्ष्मं च व्यलीकं ते सपुत्रस्य न विद्यते ।
यत्तु ज्ञातिविमर्देऽस्मिन्नात्थ दुर्योधनं प्रति २६
भवन्तमनुनेष्यामि तत्रापि कुरुनन्दन ।

ब्राह्मण उवाच ।

न तद्दुर्योधनकृतं न च तद्भवता कृतम् ॥ २७
न कर्णसौबलाभ्यां च कुरवो यत् क्षयं गताः
दैवं तत्तु विजानीमो यन्न शक्यं प्रबाधितुम् ॥
दैवं पुरुषकारेण न शक्यमपि बाधितुम् ।
अक्षौहिण्यो महाराज दशाष्टौ च समागताः
अष्टादशाहेन हताः कुरुभिर्योधपुङ्गवैः ।
भीष्मद्रोणकृपाद्यैश्च कर्णेन च महात्मना ३०
युयुधानेन वीरेण धृष्टद्युम्नेन चैव ह+ ।
चतुर्भिः पाण्डुपुत्रैश्च भीमार्जुनयमैस्तथा ॥ ३१
न च क्षयोऽयं नृपते ऋते दैवबलादभूत् ।
अवश्यमेव संग्रामे क्षत्रियेण विशेषतः ॥ ३२
कर्तव्यं निधनं काले मर्तव्यं क्षत्रबन्धुना ।
तैरियं पुरुषव्याघ्रैर्विद्या बाहुबलान्वितैः ॥ ३३
पृथिवी निहता सर्वा सहया सरथद्विपा ।
न स राज्ञां वधे सूनुः कारणं ते महात्मनाम्

१०

एवमिति ॥ १ ॥ + ' चाहवे ' इति पा०

न भवान्न च ते भृत्या न कर्णो न च सौबलः
यद्विशस्ताः कुरुश्रेष्ठ राजानश्च सहस्रशः॥ ३५
सर्वं दैवकृतं विद्धि कोऽत्र किं कर्तुमर्हति।
गुरुर्मतो भवानस्य कृत्स्नस्य जगतः प्रभुः ३६
धर्मात्मानमतस्तुभ्यमनुजानीमहे सुतम्।
लभतां वीरलोकं स ससहायो नराधिपः ॥
द्विजाग्र्यैः समनुज्ञातस्त्रिदिवे मोदतां सुखम्।
प्राप्स्यते च भवान्पुण्यं धर्मं च परमां स्थितिं
वेदधर्मं च कृत्स्नेन सम्यक् त्वं भव सुव्रतः।
दृष्टिप्रदानमपि ते पाण्डवान्प्रति नो वृथा ३९
समर्थास्त्रिदिवस्थापि पालने किं पुनः क्षितेः
अनुवर्त्स्यन्ति वा धीमन्समेषु विषमेषु च ४०
प्रजाः कुरुकुलश्रेष्ठ पाण्डवान् शीलभूषणान्।
ब्रह्मदेयाग्रहारांश्च पारिबर्हांश्च पार्थिवः ॥ ४१
पूर्वराजाभिपन्नाश्च पालयत्येव पाण्डवः।
दीर्घदर्शी मृदुर्दान्तः सदा वैश्रवणो यथा ४२
अक्षुद्रसचिवश्चायं कुन्तीपुत्रो महामनाः।
अथ मित्रे दयावांश्च शुचिश्च भरतर्षभः ॥ ४३
ऋजु पश्यति मेधावी पुत्रवत्पालितः सदा।
विप्रियं च जनस्यास्य ससर्गाद्धर्मजस्य वै ॥
न करिष्यन्ति राजर्षे तथा भीमार्जुनादयः।
मंदा मृदुषु कौरव्य तीक्ष्णेष्वाशीविषोपमाः॥
वीर्यवन्तो महात्मानः
पौराणां च हिते रताः।
न कुन्ती न च पाञ्चाली
न चोलूपी न सात्वती ॥ ४६
अस्मिन् जने करिष्यन्ति
प्रतिकूलानि कर्हिचित्।
भवत्कृतमिमं स्नेहं
युधिष्ठिरविवर्धितम् ॥ ४७
न पृष्ठतः करिष्यन्ति पौरा जानपदा जनाः।
अधर्मिष्ठानपि सतः कुन्तीपुत्रा महारथाः॥ ४८
मानवान्पालयिष्यन्ति भूत्वा धर्मपरायणाः।
स राजन्मानसं दुःखमपनीय युधिष्ठिरात् ४९
कुरु कार्याणि धर्म्याणि नमस्ते पुरुषर्षभ।

वैशम्पायन उवाच।

तस्य तद्वचनं धर्म्यमनुमान्य गुणोत्तरम्॥
साधु साध्विति सर्वः स जनः प्रतिगृहीतवान्
धृतराष्ट्रश्च तद्वाक्यमभिपूज्य पुनः पुनः ॥ ५१
विसर्जयामास तदा प्रकृतीस्तु शनैः शनैः।
स तैः संपूजितो राजा शिवेनावेक्षितस्तथा
प्राञ्जलिः पूजयामास त जनं भरतर्षभ।
ततो विवेश भवनं गान्धार्या सहितो निजम्
द्युष्टायां चैव शर्वर्यां यच्चकार निबोध तत्५३

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि प्रकृतिसान्त्वने दशमोऽध्यायः ॥ १० ॥



११

वैशम्पायन उवाच।

ततो रजन्यां द्युष्टायां धृतराष्ट्रोऽम्बिकासुतः
विदुरं प्रेषयामास युधिष्ठिरनिवेशनम् ॥ १
स गत्वा राजवचनादुवाचाच्युतमीश्वरम्।
युधिष्ठिर महातेजाः सर्वबुद्धिमतां वरः ॥ २
धृतराष्ट्रो महाराजो वनवासाय दीक्षितः।
गमिष्यति वनं राजन्नागतां कार्तिकीमिमाम्
स त्वां कुरुकुलश्रेष्ठ किञ्चिदर्थमभीप्सति।
श्राद्धमिच्छति दातु स गाङ्गेयस्य महात्मनः ४
द्रोणस्य सोमदत्तस्य बाह्लीकस्य च धीमतः।
पुत्राणां चैव सर्वेषां ये चान्ये सुहृदो हताः ५
यदि चाप्यनुजानीषे सैन्धवापसदस्य च।
एतच्छ्रुत्वा तु वचन विदुरस्य युधिष्ठिरः॥६

दृष्टिप्रदानमपि अस्मदवेक्षार्थं पाडवेष्वस्माकं समर्पणम् ॥ ३९ ॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे दशमोऽध्याय ॥ १० ॥

११

तत इति ॥ १ ॥ किंचिदर्थं किंचित्कार्यं कर्तुं त्वामभीप्सति द्रष्टुमिति शेष। तदेवाह—**श्राद्धमिति** ॥ ४ ॥

हृष्टः संपूजयामास गुडाकेशश्च पाण्डवः ।
न च भीमो दृढक्रोधस्तद्वचो जगृहे तदा ॥ ७
विदुरस्य महातेजा दुर्योधनकृतं स्मरन् ।
अभिप्रायं विदित्वा तु भीमसेनस्य फाल्गुनः
किरीटी किञ्चिदानम्य तमुवाच नरर्षभम् ।
भीम राजा पिता वृद्धो वनवासाय दीक्षितः
दातुमिच्छति सर्वेषां सुहृदामौर्ध्वदेहिकम् ।
भवता निर्जितं वित्तं दातुमिच्छति कौरवः
भीष्मादीनां महाबाहो तदनुज्ञातुमर्हसि ।
दिष्ट्या त्वद्य महाबाहो धृतराष्ट्रः प्रयाचते ॥
याचितो यः पुराऽस्माभिः
पश्य कालस्य पर्ययम् ।
योऽसौ पृथिव्याः कृत्स्नाया
भर्ता भूत्वा नराधिपः ॥ १२
परैर्विनिहतामात्मो वनं गन्तुमभीप्सति ।
मा तेऽन्यत्पुरुषव्याघ्र दानाद्भवतु दर्शनम् १३
अयशस्यमतोऽन्यत्स्याद्धर्मश्च महाभुज ।
राजानमुपशिक्षस्व ज्येष्ठं भ्रातरमीश्वरम् १४
अर्हस्त्वमपि दातुं वै नादातुं भरतर्षभ ।
एवं ब्रुवाणं बीभत्सु धर्मराजोऽप्यपूजयत् १५
भीमसेनस्तु सक्रोधः प्रोवाचेदं वचस्तदा ।
वयं भीष्मस्य दास्यामः प्रेतकार्यं तु फाल्गुन
सोमदत्तस्य नृपतेर्भूरिश्रवस एव च ।
बाह्लीकस्य च राजर्षेर्द्रोणस्य च महात्मनः ॥
अन्येषां चैव सर्वेषां कुन्ती कर्णाय दास्यति ।
श्राद्धानि पुरुषव्याघ्र मा प्रादात्कौरवो नृपः
इति मे वर्तते बुद्धिर्मा नो निन्दन्तु शत्रवः ।
कष्टात्कष्टतरं यान्तु सर्वे दुर्योधनादयः ॥ १९
यैरियं पृथिवी कृत्स्ना घातिता कुलपांसनैः
कुतस्त्वमसि विस्मृत्य वैरं द्वादशवार्षिकम्
अज्ञातवास गहनं द्रौपदीशोकवर्धनम् ।
क्व तदा धृतराष्ट्रस्य स्नेहोऽस्मद्गोचरो गतः २१
कृष्णाजिनोपसवीतो हृताभरणभूषणः ।
सार्धं पाञ्चालपुत्र्या त्वं राजानमुपजग्मिवान्
क्व तदा द्रोणभीष्मौ तौ
सोमदत्तोऽपि वाऽभवत् ।
यत्र त्रयोदशसमा
वने वन्येन जीवथ ॥ २३
न तदा त्वा पिता ज्येष्ठः पितृत्वेनाभिवीक्षते
किं ते तद्विस्मृतं पार्थ यदेष कुलपांसनः ॥२४
दुर्बुद्धिर्विदुरं प्राह द्यूते किं जितमित्युत ।
तमेवंवादिनं राजा कुन्तीपुत्रो युधिष्ठिरः ।
उवाच वचनं धीमान् जोषमास्वेति भर्त्सयन्

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि
एकादशोऽध्यायः ॥ ११ ॥

१२

अर्जुन उवाच ।
भीम ज्येष्ठो गुरुर्मे त्वं नातोऽन्यद्वक्तुमुत्सहे
धृतराष्ट्रस्तु राजर्षिः सर्वथा मानमर्हति ॥ १
न स्मरन्त्यपराद्धानि स्मरन्ति सुकृतान्यपि ।
असंभिन्नार्यमर्यादाः साधवः पुरुषोत्तमाः ॥२
इति तस्य वचः श्रुत्वा फाल्गुनस्य महात्मनः
विदुरं प्राह धर्मात्मा कुन्तीपुत्रो युधिष्ठिरः
इदं मद्वचनात्क्षत्तः कौरवं ब्रूहि पार्थिवम् ।
यावदिच्छति पुत्राणां श्राद्धं तावद्ददाम्यहम्
भीष्मादीनां च सर्वेषां सुहृदामुपकारिणाम् ।
मम कोशादिति विभो मा भूद्भीमः सुदुर्मनाः
वैशम्पायन उवाच ।
इत्युक्त्वा धर्मराजस्तमर्जुनं प्रत्यपूजयत् ।
भीमसेनः कटाक्षेण वीक्षां चक्रे धनञ्जयम् ६
ततः स विदुरं धीमान्वाक्यमाह युधिष्ठिरः
भीमसेने न कोपं स नृपतिः कर्तुमर्हति ॥ ७
परिक्लिष्टो हि भीमोऽपि हिमवृष्ट्यातपादिभिः
दुःखैर्बहुविधैर्धीमानरण्ये विदितं तव ॥ ८

कुतो हेतोर्वैरं विस्मृत्य असि जीवसि ॥ २० ॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे एकादशोऽध्याय ॥ ११ ॥

१२

भीमेति ॥ १ ॥

किं तु मद्वचनाद्ब्रूहि राजानं भरतर्षभ ।
यद्यदिच्छसि यावच्च गृह्यतां मद्गृहादिति ९
यन्मात्सर्यमयं भीमः करोति भृशदुःखितः ।
न तन्मनसि कर्तव्यमिति वाच्यः स पार्थिवः
यन्ममास्ति धनं किञ्चिदर्जुनस्य च वेश्मनि ।
तस्य स्वामी महाराज इति वाच्यः स पार्थिवः
ददातु राजा विप्रेभ्यो यथेष्टं क्रियतां व्ययः ।
पुत्राणां सुहृदां चैव गच्छत्वानृण्यमद्य सः १२
इदं चापि शरीरं मे तवायत्तं जनाधिप ।
धनानि चेति विद्धि त्वं न मे तत्रास्ति संशयः


इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि युधिष्ठिरानुमोदने द्वादशोऽध्यायः ॥ १२ ॥



१३

वैशम्पायन उवाच ।
एवमुक्तस्तु राज्ञा स विदुरो बुद्धिसत्तमः ।
धृतराष्ट्रमुपेत्यैवं वाक्यमाह महार्थवत् ॥ १
उक्तो युधिष्ठिरो राजा भवद्वचनमादितः ।
स च संश्रुत्य वाक्यं ते प्रशशंस महाद्युतिः २
बीभत्सुश्च महातेजा निवेदयति ते गृहान् ।
वसु तस्य गृहे यच्च प्राणानपि च केवलान् ३
धर्मराजश्च पुत्रस्ते राज्यं प्राणान् धनानि च
अनुजानाति राजर्षे यच्चान्यदपि किंचन ॥ ४
भीमश्च सर्वदुःखानि संस्मृत्य बहुलान्युत ।
कृच्छ्रादिव महाबाहुरनुजज्ञे विनिःश्वसन् ५
स राजन् धर्मशीलेन राज्ञा बीभत्सुना तथा ।
अनुनीतो महाबाहुः सौहृदे स्थापितोऽपि च
न च मन्युस्त्वया कार्य इति त्वां प्राह धर्मराट्
संस्मृत्य भीमस्तद्वैरं यदन्यायवदाचरत् ॥ ७
एवंप्रायो हि धर्मोऽयं क्षत्रियाणां नराधिप ।
युद्धे क्षत्रियधर्मे च निरतोऽयं वृकोदरः ॥ ८
वृकोदरकृते चाहमर्जुनश्च पुनः पुनः ।
प्रसीद याचे नृपते भवान्प्रभुरिहास्ति यत् ९
तद्ददातु भवान्वित्तं यावदिच्छसि पार्थिव ।
त्वमीश्वरोऽस्य राज्यस्य प्राणानामपि भारत
ब्रह्मदेयाग्रहारांश्च पुत्राणामौर्ध्वदेहिकम् ।
इतो रत्नानि गाश्चैव दासीदासमजाविकम्
आनयित्वा कुरुश्रेष्ठो ब्राह्मणेभ्यः प्रयच्छतु ।
दीनान्धकृपणेभ्यश्च तत्र तत्र नृपाज्ञया ॥ १२
बह्वन्नरसपानाढ्याः सभा विदुर कारय ।
गवां निपानान्यन्यच्च विविधं पुण्यकं कुरु ॥
इति मामब्रवीद्राजा पार्थश्चैव धनञ्जयः ।
यदत्रानन्तरं कार्यं तद्भवान्वक्तुमर्हति ॥ १४
इत्युक्ते विदुरेणाथ धृतराष्ट्रोऽभिनन्द्य तान् ।
मनश्चक्रे महादाने कार्तिक्यां जनमेजय ॥ १५

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि विदुरवाक्ये त्रयोदशोऽध्यायः ॥ १३ ॥



इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे द्वादशोऽध्याय ॥ १२ ॥

१३

एवमिति ॥ १ ॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे त्रयोदशोऽध्यायः ॥ १३ ॥

१४

वैशम्पायन उवाच ।

विदुरेणैवमुक्तस्तु धृतराष्ट्रो जनाधिपः ।
प्रीतिमानभवद्राजन् राज्ञो जिष्णोश्च कर्मणि
ततोऽभिरूपान् भीष्माय ब्राह्मणानृषिसत्तमान्
पुत्रार्थे सुहृदश्चैव स समीक्ष्य सहस्रशः ॥ २
कारयित्वान्नपानानि यानान्याच्छादनानि च
सुवर्णमणिरत्नानि दासीदासमजाविकम् ३
कम्बलानि च रत्नानि
ग्रामान् क्षेत्रं तथा धनम् ।
सालङ्कारान् गजानश्वान्
कन्याश्चैव वरस्त्रियः ॥ ४
उद्दिश्योद्दिश्य सर्वेभ्यो ददौ स नृपसत्तमः ।
द्रोणं संकीर्त्य भीष्मं च सोमदत्तं च बाह्लिकम्
दुर्योधनं च राजानं पुत्राश्चैव पृथक् पृथक् ।
जयद्रथपुरोगांश्च सुहृदश्चापि सर्वशः ॥ ६
स श्राद्धयज्ञो वर्तते बहुशो धनदक्षिणः ।
अनेकधनरत्नौघो युधिष्ठिरमते तदा ॥ ७
अनिशं यत्र पुरुषा गणका लेखकास्तदा ।
युधिष्ठिरस्य वचनादपृच्छन्त स्म तं नृपम् ८
आज्ञापय किमेतेभ्यः प्रदाय दीयतामिति ।
तदुपस्थितमेवात्र वचनान्ते ददुस्तदा ॥ ९
शतदेये दशशतं सहस्रे चायुते तथा ।
दीयते वचनाद्राज्ञः कुन्तीपुत्रस्य धीमतः १०
एवं स वसुधाराभिर्वर्षमाणो नृपाम्बुदः ।
तर्पयामास विप्रांस्तान्वर्षन् सस्यमिवाम्बुदः
ततोऽनन्तरमेवात्र सर्ववर्णान्महामते ।
अन्नपानरसौघेण प्लावयामास पार्थिवः ॥ १२
स वस्त्रधनरत्नौघो मृदङ्गनिनदो महान् ।
गवाश्वमकरावर्तो नानारत्नमहाकरः ॥ १३
ग्रामाग्रहारद्वीपाढ्यो मणिहेमजलार्णवः ।
जगत्संप्लावयामास धृतराष्ट्रोडुपोद्धतः ॥ १४
एवं स पुत्रपौत्राणां पितॄणामात्मनस्तथा ।
गान्धार्याश्च महाराज प्रददावौर्ध्वदेहिकम् ॥
परिश्रान्तो यदासीत्स ददानान्यनेकशः ।
निवर्तयामास तदा दानयज्ञं नराधिपः ॥ १६
एवं स राजा कौरव्य चक्रे दानमहाक्रतुम् ।
नटनर्तकलास्याढ्य ब्रह्मन्नरसदक्षिणम् ॥ १७
दशाहमेवं दानानि दत्वा राजाम्बिकासुतः ।
बभूव पुत्रपौत्राणामनृणो भरतर्षभ ॥ १८

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि दानयज्ञे चतुर्दशोऽध्यायः ॥ १४ ॥

१५

वैशम्पायन उवाच ।

ततः प्रभाते राजा स धृतराष्ट्रोऽम्बिकासुतः।
आहूय पाण्डवान्वीरान् वनवासे कृतक्षणः १
गान्धारीसहितो धीमानभ्यनन्दद्यथाविधि।
कार्तिक्यां कारयित्वेष्टिं ब्राह्मणैर्वेदपारगैः २
अग्निहोत्रं पुरस्कृत्य वल्कलाजिनसंवृतः ।
वधूजनवृतो राजा निर्ययौ भवनात्ततः ॥ ३
ततः स्त्रियः कौरवपाण्डवानां
याश्चापराः कौरवराजवंश्याः ।
तासां नादः प्रादुरासीत्तदानीं
वैचित्रवीर्ये नृपतौ प्रयाते ॥ ४
ततो लाजैः सुमनोभिश्च राजा
विचित्राभिस्तद्गृहं पूजयित्वा ।
संपूज्यार्थैर्भृत्यवर्गं च सर्वं
ततः समुत्सृज्य ययौ नरेन्द्रः ॥ ५

१४

विदुरेणेति ॥ १ ॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे चतुर्दशोऽध्याय ॥१४॥

१५

तदनेन प्रबन्धेन प्रव्रजिष्यता कुटुम्बानुमति पितृतर्पणं चावश्यकम्। तदन्यतराकरणे प्रव्रज्याफलानिष्पत्तिरिति च प्रदर्श्य धृतराष्ट्रप्रव्रज्या वर्णयति—**ततः प्रभाते इत्यादिना** ॥१॥ इष्टिं उदवसनीयाख्याम् ॥ २ ॥

ततो राजा प्राञ्जलिर्वेपमानो
युधिष्ठिरः सस्वरं बाष्पकण्ठः।
विमुच्योच्चैर्महानादं हि साधो
क्व यास्यसीत्यपतत्तात भूमौ ॥ ६
तथाऽर्जुनस्तीव्रदुःखाभितप्तो
मुहुर्मुहुर्निःश्वसन् भारताग्र्यः।
युधिष्ठिरं मैवामित्येवमुक्त्वा
निगृह्याथो दीनवत्सीदमानः ॥ ७
वृकोदरः फाल्गुनश्चैव वीरौ
माद्रीपुत्रौ विदुरः सञ्जयश्च।
वैश्यापुत्रः सहितो गौतमेन
धौम्यो विप्राश्चान्वयुर्बाष्पकण्ठाः ८
कुन्ती गान्धारी बद्धनेत्रां व्रजन्ती
स्कन्धासक्तं हस्तमथोद्वहन्ती।
राजा गान्धार्याः स्कन्धदेशेऽवसज्य
पाणिं ययौ धृतराष्ट्रः प्रतीतः ॥ ९
तथा कृष्णा द्रौपदी सात्वती च
बालापत्या चोत्तरा कौरवी च।
चित्राङ्गदायाश्च काश्चित्स्त्रियोऽन्याः
सार्धं राज्ञा प्रस्थितास्ता वधूभिः १०
तासां नादो रुदतीनां तदासी-
द्राजन् दुःखात्कुररीणामिवोच्चैः।
ततो निष्पेतुर्ब्राह्मणक्षत्रियाणां
विट्शूद्राणां चैव भार्याः समंतात् ॥
तन्निर्याणे दुःखितः पौरवर्गो
गजाह्वये चैव बभूव राजन्।
यथापूर्वं गच्छतां पाण्डवानां
द्यूते राजन्कौरवाणां सभायाः ॥ १२
या नापश्यंश्चन्द्रमसं न सूर्यं
रामाः कदाचिदपि तस्मिन्नरेन्द्रे।
महावनं गच्छति कौरवेन्द्रे
शोकेनार्ता राजमार्गे प्रपेदुः ॥ १३

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि धृतराष्ट्रनिर्याणे पञ्चदशोऽध्यायः ॥ १५ ॥

१६

वैशम्पायन उवाच।
ततः प्रासादहर्म्येषु वसुधायां च पार्थिव।
नारीणां च नराणां च निःस्वनः सुमहानभूत् १
स राजा राजमार्गेण नृनारीसंकुलेन च।
कथञ्चिन्निर्ययौ धीमान् वेपमानः कृताञ्जलिः
स वर्द्धमानद्वारेण निर्ययौ गजसाह्वयात्।
विसर्जयामास च तं जनौघं स मुहुर्मुहुः ॥ ३
वनं गन्तुं च विदुरो राज्ञा सह कृतक्षणः।
सञ्जयश्च महामात्रः सूतो गावल्गणिस्तथा ॥ ४
कृपं निवर्तयामास युयुत्सुं च महारथम्।
धृतराष्ट्रो महीपालः परिदाप्य युधिष्ठिरे ॥ ५
निवृत्ते पौरवर्गे च राजा सान्तःपुरस्तदा।
धृतराष्ट्राभ्यनुज्ञातो निवार्तितुमियेष ह ॥ ८
सोऽब्रवीन्मातरं कुन्तीं वनं तमनुजग्मुषीम्।
अहं राजानमन्विष्ये भवती विनिवर्तताम् ७
वधूपरिवृता राज्ञि नगरं गन्तुमर्हसि।
राजा यात्वेष धर्मात्मा तापस्ये कृतनिश्चयः
इत्युक्ता धर्मराजेन बाष्पव्याकुललोचना।
जगामैव तदा कुन्ती गान्धारीं परिगृह्य ह ९

कुन्त्युवाच।
सहदेवे महाराज माऽप्रसाद कृथाः क्वचित्
एष मामनुरक्तो हि राजंस्त्वां चैव सर्वदा १०
कर्णं स्मरेथाः सततं संग्रामेष्वपलायिनम्।
अवकीर्णो हि समरे वीरो दुष्प्रज्ञया तदा ११
आयसं हृदयं नूनं मन्दाया मम पुत्रक।
यत्सूर्यजमपश्यन्त्याः शतधा न विदीर्यते १२

कुन्ती गान्धारीं अनयदिति शेष। किंभूता अर्थाद्गान्धार्या हस्तं स्कन्धाय सक्तं उद्वहन्ती ॥ ९ ॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे पञ्चदशोऽध्याय ॥ १५ ॥

१६

तत इति ॥ १ ॥ माप्रसाद अप्रसादमिति च्छेदः १०

एवं गते तु किं शक्यं मया कर्तुमरिन्दम ।
मम दोषोऽयमत्यर्थं ख्यापितो यन्न सूर्यजः १३
तन्निमित्तं महाबाहो दानं दद्यास्त्वमुत्तमम् ।
सदैव भ्रातृभिः सार्धं सूर्यजस्यारिमर्दन १४
द्रौपद्याश्च प्रिये नित्यं स्थातव्यमरिकर्शन ।
भीमसेनोऽर्जुनश्चैव नकुलश्च कुरूद्वह ॥ १५
समाधेयास्त्वया राजंस्त्वय्यद्य कुलधूर्गता ।
श्वश्रूश्वशुरयोः पादान् शुश्रूषन्ती वने त्वहम्
गान्धारीसहिता वत्स्ये तापसी मलपङ्किनी

वैशम्पायन उवाच ।

एवमुक्तः स धर्मात्मा भ्रातृभिः सहितो वशी
विषादमगमद्धीमान्न च किञ्चिदुवाच ह १७
मुहूर्तमिव तु ध्यात्वा धर्मराजो युधिष्ठिरः ।
उवाच मातरं दीनश्चिन्ताशोकपरायणः १८
किमिदं ते व्यवसितं नैवं त्वं वक्तुमर्हसि ।
न त्वामभ्यनुजानामि प्रसाद कर्तुमर्हसि १९
पुरोद्यतान्पुरा ह्यस्मानुत्साह्य प्रियदर्शने ।
विदुलाया वचोभिस्त्वं नास्मान्संत्यक्तुमर्हसि
निहत्य पृथिवीपालान् राज्यं प्राप्तमिदं मया
तव प्रज्ञामुपश्रुत्य वासुदेवान्नरर्षभात् ॥ २१
क्व सा बुद्धिरियं चाद्य
भवत्या यच्छ्रुतं मया ।
क्षत्रधर्मे स्थितिं चोक्त्वा
तस्याश्च्यावितुमिच्छसि ॥ २२
अस्मानुत्सृज्य राज्यं च
स्नुषा हीमा यशस्विनि ।
कथं वत्स्यसि दुर्गेषु
वनेष्वद्य प्रसीद मे ॥ २३

इति बाष्पकला वाचः कुन्ती पुत्रस्य शृण्वती
सा जगामाश्रुपूर्णाक्षी भीमस्तामिदमब्रवीत् ॥
यदा राज्यमिदं कुन्ति भोक्तव्यं पुत्रनिर्जितम्
प्राप्तव्या राजधर्माश्च तदेयं ते कुतो मतिः २५
किं वयं कारिताः पूर्वं भवत्या पृथिवीक्षयम् ।
कस्य हेतोः परित्यज्य वनं गन्तुमभीप्ससि
वनाच्चापि किमानीता भवत्या बालका वयम्
दुःखशोकसमाविष्टौ माद्रीपुत्राधिमौ तथा ॥
प्रसीद मातर्मा गास्त्व वनमद्य यशस्विनि ।
श्रिय यौधिष्ठिरीं मातर्भुङ्क्ष्व तावद्बलार्जिताम्
इति सा निश्चितैवाशु वनवासाय भाविनी ।
लालप्यता बहुविध पुत्राणा नाकरोद्वचः २९
द्रौपदी चान्वयाच्छ्रीमं विषण्णवदना तदा ।
वनवासाय गच्छन्ती रुदती भद्रया सह ३०
सा पुत्रान् रुदतः सर्वान् मुहुर्मुहुरवेक्षती ।
जगामैव महाप्राज्ञा वनाय कृतनिश्चया ॥ ३१
अन्वयुः पाण्डवास्तां तु
सभृत्यान्तःपुरास्तथा ।
तत. प्रमृज्य साऽश्रूणि
पुत्रान्वचनमब्रवीत् ॥ ३२

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि कुन्तीवनप्रस्थाने षोडशोऽध्याय. ॥ १६ ॥

१७

कुन्त्युवाच ।

एवमेतन्महाबाहो यथा वदसि पाण्डव ।
कृतमुद्धर्षणं पूर्वं मया वः सीदतां नृपाः ॥ १
द्यूतापहृतराज्यानां पतितानां सुखादपि ।
ज्ञातिभिः परिभूताना कृतमुद्धर्षणं मया ॥ २
कथ पाण्डोर्न नश्येत सन्ततिः पुरुषर्षभाः ।
यशश्च वो न नश्येत इति चोद्धर्षणं कृतम् ३

श्वश्रूश्वशुरयो ज्येष्ठत्वात् धृतराष्ट्र पाण्डो पितृसमस्तेन कुन्त्या स श्वशुर इति ॥ १६ ॥ पुरोद्यतान् पुराद्वहिर्गन्तुमुद्यतान् विदुलाया वचोभि उत्साह्य उत्साहयुक्तान् कृत्वा ॥ २० ॥ भद्रया सुभद्रया ॥ ३० ॥ इति श्रीमहाभारते आश्रमवा० नैलकण्ठीये भारतभावदीपे षोडशोऽध्याय १६॥

१७

एवमेतदिति, कुन्त्यास्त्विति,ततो भागीरथी तीर इति चत्रय स्पष्टार्था अध्याया ॥ १ ॥

यूयमिन्द्रसमाः सर्वे देवतुल्यपराक्रमाः ।
मा परेषां मुखप्रेक्षाः स्थेत्येवं तत्कृतं मया ॥४
कथं धर्मभृतां श्रेष्ठो राजा त्वं वासवोपमः ।
पुनर्वने न दुःखी स्या इति चोद्धर्षणं कृतम् ५
नागायुतसमप्राणः ख्यातविक्रमपौरुषः ।
नायं भीमोऽत्ययं गच्छेदिति चोद्धर्षणं कृतम्
भीमसेनादवरजस्तथाऽयं वासवोपमः ।
विजयो नावसीदेत इति चोद्धर्षणं कृतम् ॥ ७
नकुलः सहदेवश्च तथेमौ गुरुवर्तिनौ ।
क्षुधा कथं न सीदेतामिति चोद्धर्षणं कृतम् ८
इयं च बृहती श्यामा तथाऽत्यायतलोचना ।
वृथा सभातले क्लिष्टा माभूदिति च तत्कृतम्
प्रेक्षतामेव वो भीम वेपन्ती कदलीमिव ।
स्त्रीधर्मिणीमरिष्टाङ्गी तथा द्यूतपराजिताम् ॥
दुःशासनो यदा मौर्ख्याद्dहासीवत्पर्यकर्षत ।
तदैव विदितं मह्यं पराभूतमिदं कुलम् ॥ ११
निषण्णाः कुरवश्चैव तदा मे श्वशुरादयः ।
सा दैवं नाथमिच्छन्ती व्यलपत्कुररी यथा
केशपक्षे परामृष्टा पापेन हतबुद्धिना ।
यदा दुःशासनेनैषा तदा मुह्याम्यहं नृपाः १३
युष्मत्तेजोविवृद्ध्यर्थं मया ह्युद्धर्षणं कृतम् ।
तदार्नो विदुलावाक्यैरिति तद्वित्त पुत्रकाः ॥
कथं न राजवंशोऽयं नश्येत्प्राप्य सुतान्मम ।
पाण्डोरिति मया पुत्रास्तस्मादुद्धर्षणं कृतम् ॥
न तस्य पुत्राः पौत्रा वा क्षतवंशस्य पार्थिव ।
लभन्ते सुकृताँल्लोकान् यस्माद्वंशः प्रणश्यति
भुक्तं राज्यफलं पुत्रा भर्तुर्मे विपुलं पुरा ।
महादानानि दत्तानि पीतः सोमो यथाविधि
नाहमात्मफलार्थं वै वासुदेवमचूचुदम् ।
विदुलायाः प्रलापैस्तैः पालनार्थं च तत्कृतम्
नाहं राज्यफलं पुत्राः कामये पुत्रनिर्जितम् ।
पतिलोकानहं पुण्यान्कामये तपसा विभो १९
श्वश्रूश्वशुरयोः कृत्वा शुश्रूषां वनवासिनोः ।
तपसा शोषयिष्यामि युधिष्ठिर कलेवरम् २०
निवर्तस्व कुरुश्रेष्ठ भीमसेनादिभिः सह ।
धर्मे ते धीयता बुद्धिर्मनस्तु महदस्तु च ॥ २१

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि कुन्तीवाक्ये सप्तदशोऽध्यायः ॥ १७ ॥

१८

वैशम्पायन उवाच ।
कुन्त्यास्तु वचनं श्रुत्वा
पाण्डवा राजसत्तम ।
व्रीडिताः संन्यवर्तन्त
पाञ्चाल्या सहिताऽनघाः ॥ १
ततः शब्दो महानेव सर्वेषामभवत्तदा ।
अन्तःपुराणां रुदतां दृष्ट्वा कुन्ती तथागताम् २
प्रदक्षिणमथावृत्य राजान पाण्डवास्तदा ।
अभिवाद्य न्यवर्तन्त पृथां तामनिवर्त्य वै ३
ततोऽब्रवीन्महातेजा धृतराष्ट्रोऽम्बिकासुतः ।
गान्धारीं विदुरं चैव समाभाष्यावगृह्य च ४
युधिष्ठिरस्य जननी देवी साधु निवर्त्यताम् ।
यथा युधिष्ठिरः प्राह तत्सर्वं सत्यमेव हि ॥ ५
पुत्रैश्वर्यं महदिदमपास्य च महाफलम् ।
का नु गच्छेद्वनं दुर्गं पुत्रानुत्सृज्य मूढवत् ६
राज्यस्थया तपस्तप्तुं कर्तुं दानव्रतं महत् ।
अनया शक्यमेवाद्य श्रूयतां च वचो मम ७
गान्धारि परितुष्टोऽस्मि वध्वाः शुश्रूषणेन वै
तस्मात्त्वमेनां धर्मज्ञे समनुज्ञातुमर्हसि ॥ ८
इत्युक्ता सौबलेयी तु राज्ञा कुन्तीमुवाच ह ।
तत्सर्वं राजवचनं स्वं च वाक्यं विशेषवत् ९

इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्तदशोऽध्याय ॥ १७ ॥

१८

कुन्त्या इति ॥ १ ॥

न च सा वनवासाय देवी कृतमतिं तदा ।
शक्नोत्युपावर्तयितु कुन्तीं धर्मपरां सतीम् १०
तस्यास्तां तु स्थितिं ज्ञात्वा
व्यवसायं कुरुस्त्रियः ।
निवृत्ताश्च कुरुश्रेष्ठान्
दृष्ट्वा प्ररुरुदुस्तदा ॥ ११
उपावृत्तेषु पार्थेषु सर्वास्वेव वधूषु च ।
ययौ राजा महाप्राज्ञो धृतराष्ट्रो वनं तदा १२
पाण्डवाश्चातिदीनास्ते दुःखशोकपरायणाः ।
यानैः स्त्रीसहिताः सर्वे पुरं प्रविविशुस्तदा ॥
तद्दृष्ट्वा पुनरानन्दं गतोत्सवमिवाभवत् ।
नगरं हास्तिनपुरं सस्त्रीवृद्धकुमारकम् ॥ १४
सर्वे चासन्निरुत्साहाः
पाण्डवा जातमन्यवः ।
कुन्त्या हीनाः सुदुःखार्ता
वत्सा इव विनाकृताः ॥ १५
धृतराष्ट्रस्तु तेनाह्ना गत्वा सुमहदन्तरम् ।
ततो भागीरथीतीरे निवासमकरोत्प्रभुः १६
प्रादुष्कृता यथान्यायमग्नयो वेदपारगैः ।
उपरुजन्त द्विजश्रेष्ठैस्तत्र तत्र तपोवने ॥ १७
प्रादुष्कृताग्निरभवत्
स च वृद्धो नराधिपः ।
स राजाऽग्नीन् पर्युपास्य
हुत्वा च विधिवत्तदा ॥ १८
सन्ध्यागतं सहस्रांशुमुपातिष्ठत भारत ।
विदुरः सञ्जयश्चैव राज्ञः शय्यां कुशैस्ततः १९
चक्रतुः कुरुवीरस्य गान्धार्याश्चाविदूरतः ।
गान्धार्याः सन्निकर्षे तु निषसाद कुशे सुखम्
युधिष्ठिरस्य जननी कुन्ती साधुव्रते स्थिता ।
तेषां संश्रवणे चापि निषेदुर्विदुरादयः ॥ २१
याजकाश्च यथोद्देशं द्विजा ये चानुयायिनः ।
प्राधीतद्विजमुख्या सा संप्रज्वलितपावका ॥
बभूव तेषां रजनी ब्राह्मीव प्रीतिवर्धिनी ।
ततो रात्र्यां व्यतीतायां कृतपूर्वाह्णिकक्रियाः
हुत्वाऽग्निं विधिवत्सर्वे
प्रययुस्ते यथाक्रमम् ।
उदङ्मुखा निरीक्षन्त
उपवासपरायणाः ॥ २४
स तेषामतिदुःखोऽभून्निवासः प्रथमेऽहनि ।
शोचतां शोचमानानां +पौरजानपदैर्जनैः २५

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि
अष्टादशोऽध्यायः ॥ १८ ॥



१९

वैशम्पायन उवाच ।
ततो भागीरथीतीरे मेध्ये पुण्यजनोचिते ।
निवासमकरोद्राजा विदुरस्य मते स्थितः १
तत्रैनं पर्युपातिष्ठन् ब्राह्मणा वनवासिनः ।
क्षत्रविट्शूद्रसंघाश्च बहवो भरतर्षभ ॥ २
स तैः परिवृतो राजा
कथाभिः परिनन्द्य तान् ।
अनुजज्ञे सशिष्यान्वै
विधिवत्प्रतिपूज्य च ॥ ३
सायाह्ने स महीपाल-
स्ततो गङ्गामुपेत्य च ।
चकार विधिवच्छौचं
गान्धारी च यशस्विनी ॥ ५
ते चैवान्ये पृथक् सर्वे
तीर्थेष्वाप्लुत्य भारत ।
चक्रुः सर्वाः क्रियास्तत्र
पुरुषा विदुरादयः ॥ ५

इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे अष्टादशोऽध्यायः १८ ॥ + 'वदतां चापि' इति पा०

१९

तत इति ॥ १ ॥

कृतशौचं ततो वृद्धं
श्वशुरं कुन्तिभोजजा ।
गान्धारीं च पृथा राजन्
गङ्गातीरमुपानयत् ॥ ६
राज्ञस्तु याजकैस्तत्र कृतो वेदीपरिस्तरः ।
जुहाव तत्र वह्निं स नृपतिः सत्यसङ्गरः ॥ ७
ततो भागीरथीतीरात्कुरुक्षेत्रं जगाम सः ।
सानुगो नृपतिर्वृद्धो नियतः सयतेन्द्रियः ॥ ८
तत्राश्रमपदं धीमानभिगम्य स पार्थिवः ।
आससादाथ राजर्षिं शतयूपं मनीषिणम् ९
स हि राजा महानासीत्केकयेषु परंतपः ।
स्वपुत्रं मनुजैश्वर्ये निवेश्य वनमाविशत् ॥ १०
तेनासौ सहितो राजा ययौ व्यासाश्रमं प्रति ।
तत्रैनं विधिवद्राजा प्रत्यगृह्णात्कुरूद्वहः ॥ ११
स दीक्षां तत्र संप्राप्य राजा कौरवनन्दनः ।
शतयूपाश्रमे तस्मिन्निवासमकरोत्तदा ॥ १२
तस्मै सर्वं विधिं राज्ञे
राजाऽऽचख्यौ महामतिः ।
आरण्यकं महाराज
व्यासस्यानुमते तदा ॥ १३
एवं स तपसा राजन्
धृतराष्ट्रो महामनाः ।
योजयामास चात्मानं
तांश्चाप्यनुचरांस्तदा ॥ १४
तथैव देवी गान्धारी वल्कलाजिनधारिणी ।
कुन्त्या सह महाराज समानव्रतचारिणी १५
कर्मणा मनसा वाचा चक्षुषा चैव ते नृप ।
सन्नियम्येन्द्रियग्राममास्थिते परमं तपः ॥ १६
त्वगस्थिभूतः परिशुष्कमांसो
जटाजिनी वल्कलसंवृताङ्गः ।
स पार्थिवस्तत्र तपश्चचार
महर्षिवत्तीव्रमपेतमोहः ॥ १७
क्षत्ता च धर्मार्थविदप्रबुद्धिः
ससञ्जयस्तं नृपतिं सदारम् ।
उपाचरद् घोरतपो जितात्मा
तदा कृशो वल्कलचीरवासाः ॥ १८

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि शतयूपाश्रमनिवासे एकोनविंशोऽध्यायः ॥ १९ ॥

२०

वैशम्पायन उवाच ।
ततस्तत्र मुनिश्रेष्ठा राजानं द्रष्टुमभ्ययुः ।
नारदः पर्वतश्चैव देवलश्च महातपाः ॥ १
द्वैपायनः सशिष्यश्च सिद्धाश्चान्ये मनीषिणः
शतयूपश्च राजर्षिर्वृद्धः परमधार्मिकः ॥ २
तेषां कुन्ती महाराज पूजां चक्रे यथाविधि ।
ते चापि तुतुषुस्तस्यास्तापसाः परिचर्यया ३
तत्र धर्म्याः कथास्तात चक्रुस्ते परमर्षयः ।
रमयन्तो महात्मानं धृतराष्ट्रं जनाधिपम् ॥ ४
कथान्तरे तु कस्मिंश्चिद्देवर्षिर्नारदस्ततः ।
कथामिमामकथयत्सर्वप्रत्यक्षदर्शिवान् ॥ ५
नारद उवाच ।
केकयाधिपतिः श्रीमान्
राजाऽऽसीदकुतोभयः ।
सहस्रचित्य इत्युक्तः
शतयूपपितामहः ॥ ६
स पुत्रे राज्यमासज्य ज्येष्ठे परमधार्मिके ।
सहस्रचित्यो धर्मात्मा प्रविवेश वनं नृपः ७
स गत्वा तपसः पारं दीप्तस्य वसुधाधिपः ।
पुरंदरस्य संस्थानं प्रतिपेदे महाद्युतिः ॥ ८
दृष्टपूर्वः स बहुशो राजन्संपतता मया ।
महेन्द्रसदने राजा तपसा दग्धकिल्बिषः ॥ ९
तथा शैलालयो राजा भगदत्तपितामहः ।
तपोबलेनैव नृपो महेन्द्रसदनं गतः ॥ १०
तथा पृषध्रो राजाऽऽसीद्राजन्वज्रधरोपमः ।
स चापि तपसा लेभे नाकपृष्ठमितो गतः ११
अस्मिन्नरण्ये नृपते मान्धातुरपि चात्मजः ।
पुरुकुत्सो नृपः सिद्धिं महतीं समवाप्तवान् ॥

इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे एकोनविंशोऽध्याय ॥ १९ ॥

२०
तत इति ॥ १ ॥

भार्या समभवद्यस्य नर्मदा सरितां वरा ।
सोऽस्मिन्नरण्ये नृपतिस्तपस्तप्त्वा दिवं गतः
शशलोमा च राजाऽऽसी-
द्राजन् परमधार्मिकः
सम्यगस्मिन्वने तप्त्वा
ततो दिवमवाप्तवान् ॥ १५
द्वैपायनप्रसादाच्च त्वमपीदं तपोवनम् ।
राजन्नवाप्य दुष्प्रापां गतिमग्र्यां गमिष्यसि ॥
त्वं चापि राजशार्दूल
तपसोऽन्ते श्रिया वृतः ।
गान्धारीसहितो गन्ता
गतिं तेषां महात्मनाम् ॥ १६
पाण्डुः स्मरति ते नित्यं बलहन्तुः समीपगः ।
त्वां सदैव महाराज श्रेयसा स च योक्ष्यति
तव शुश्रूषया चैव गान्धार्याश्च यशस्विनी ।
भर्तुः सलोकतामेषा गमिष्यति वधूस्तव १८
युधिष्ठिरस्य जननी स हि धर्मः सनातनः ।
वयमेतत्प्रपश्यामो नृपते दिव्यचक्षुषा ॥ १९
प्रवेक्ष्यति महात्मानं विदुरश्च युधिष्ठिरम् ।
सञ्जयस्तदनुध्यानादितः स्वर्गमवाप्स्यति २०
वैशम्पायन उवाच ।
एतच्छ्रुत्वा कौरवेन्द्रो महात्मा
सार्धं पत्न्या प्रीतिमान् संबभूव ।
विद्वान् वाक्यं नारदस्य प्रशस्य
चक्रे पूजां चातुलां नारदाय ॥ २१
ततः सर्वे नारदं विप्रसंघाः
संपूजयामासुरतीव राजन् ।
राज्ञः प्रीत्या धृतराष्ट्रस्य ते वै
पुनः पुनः सम्प्रहृष्टास्तदानीम् ॥ २२
वैशम्पायन उवाच ।
नारदस्य तु तद्वाक्यं शशंसुर्द्विजसत्तमाः ।
शतयूपस्तु राजर्षिर्नारदं वाक्यमब्रवीत् ॥ २३

अहो भगवता श्रद्धा कुरुराजस्य वर्धिता ।
सर्वस्य च जनस्यास्य मम चैव महाद्युते २४
अस्ति काचिद्विवक्षा तु तां मे निगदतः शृणु
धृतराष्ट्रं प्रति नृपं देवर्षे लोकपूजित ॥ २५
सर्ववृत्तान्ततत्त्वज्ञो भवान् दिव्येन चक्षुषा ।
युक्तः पश्यसि विप्रर्षे गतिर्या विविधा नृणाम्
उक्तवान्नृपतीनां त्वं महेन्द्रस्य सलोकताम् ।
न त्वस्य नृपतेर्लोकाः कथितास्ते महामुने ॥
स्थानमप्यस्य नृपतेः श्रोतुमिच्छाम्यहं विभो ।
त्वत्तः कीदृक्तदा चेति तन्ममाख्याहि तत्त्वतः
इत्युक्तो नारदस्तेन वाक्य सर्वमनोनुगम् ।
व्याजहार सभामध्ये दिव्यदर्शी महातपाः ॥
नारद उवाच ।
यदृच्छया शक्रसदो गत्वा शक्र शचीपतिम्
दृष्टवानस्मि राजर्षे तत्र पाण्डु नराधिपम्३०
तत्रैव धृतराष्ट्रस्य कथा समभवन्नृप ।
तपसो दुष्करस्यास्य यदय तपते नृपः ॥ ३१
तत्राहमिदमश्रौषं शक्रस्य वदतः स्वयम् ।
वर्षाणि त्रीणि शिष्टानि राज्ञोऽस्य परमायुषः
ततः कुबेरभवनं गान्धारीसहितो नृपः ।
प्रयाता धृतराष्ट्रोऽयं राजराजाभिसत्कृतः ३३
कामगेन विमानेन दिव्याभरणभूषितः।
ऋषिपुत्रो महाभागस्तपसा दग्धकिल्बिषः ३४
संचरिष्यति लोकांश्च देवगन्धर्वरक्षसाम् ।
स्वच्छन्देनेति धर्मात्मा यन्मां त्वमनुपृच्छसि
देवगुह्यमिदं प्रीत्या मया वः कथितं महत् ।
भवन्तो हि श्रुतधनास्तपसा दग्धकिल्बिषाः
वैशम्पायन उवाच ।
इति ते तस्य तच्छ्रुत्वा देवर्षेर्मधुरं वचः ।
सर्वे सुमनसः प्रीता बभूवुः स च पार्थिवः ३७
एवं कथाभिरन्वास्य धृतराष्ट्रं मनीषिणः ।
विप्रजग्मुर्यथाकामं ते सिद्धगतिमास्थिताः ३८

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि नारदवाक्ये विंशोऽध्यायः ॥ २० ॥



ऋषिपुत्रो व्यासपुत्र ॥ ३४ ॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे विंशोऽध्याय ॥२०॥

२१

वैशम्पायन उवाच ।
वनं गते कौरवेन्द्रे दुःखशोकसमन्विताः ।
बभूवुः पाण्डवा राजन्मातृशोकेन चान्विताः
तथा पौरजनः सर्वः शोचन्नास्ते जनाधिपम्
कुर्वाणाश्च कथास्तत्र ब्राह्मणा नृपतिं प्रति २
कथं नु राजा वृद्धः स
वने वसति निर्जने ।
गान्धारी च महाभागा
सा च कुन्ती पृथा कथम् ॥ ३
सुखार्हः स हि राजर्षिरसुखी तद्वन महत् ।
किमवस्थः समासाद्य प्रज्ञाचक्षुर्हतात्मजः ॥ ४
सुदुष्कृतं कृतवती कुन्ती पुत्रानपश्यती ।
राज्यश्रियं परित्यज्य वनं सा समरोचयत् ५
विदुरः किमवस्थश्च भ्रातुः शुश्रुवुरात्मवान् ।
स च गावल्गणिर्धीमान्भर्तृपिण्डानुपालकः ६
आकुमारं च पौरास्ते चिन्ताशोकसमाहताः
तत्र तत्र कथाश्चक्रुः समासाद्य परस्परम् ॥ ७
पाण्डवाश्चैव ते सर्वे भृशं शोकपरायणाः ।
शोचन्तो मातरं वृद्धामूषुर्नातिचिरं पुरे ॥ ८
तथैव वृद्धं पितरं हतपुत्रं जनेश्वरम् ।
गान्धारीं च महाभागां विदुरं च महामतिम्
नैषां बभूव संप्रीतिस्तान्यिचिन्तयतां तदा ।
न राज्ये न च नारीषु न वेदाध्ययनेषु च १०
परं निर्वेदमगमंश्चिन्तयन्तो नराधिपम् ।
तं च ज्ञातिवधं घोरं संस्मरन्तः पुनः पुनः ११
अभिमन्योश्च बालस्य विनाशं रणमूर्धनि ।
कर्णस्य च महाबाहो सग्रामेष्वपलायिनः १२
तथैव द्रौपदेयानामन्येषां सुहृदामपि ।
वधं संस्मृत्य ते वीरा नातिप्रमनसोऽभवन्
हतप्रवीरां पृथिवीं हतरत्नां च भारत ।
सदैव चिन्तयन्तस्ते न शमं चोपलेभिरे ॥ १४
द्रौपदी हतपुत्रा च सुभद्रा चैव भाविनी ।
नातिप्रीतियुते देव्यौ तदाऽऽस्तामप्रहृष्टवत्
वैराट्यास्तनयं दृष्ट्वा पितरं ते परीक्षितम् ।
धारयन्ति स्म ते प्राणास्तव पूर्वपितामहाः १६

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि
एकविंशतितमोऽध्यायः ॥ २१ ॥



२२

वैशम्पायन उवाच ।
एवं ते पुरुषव्याघ्राः पाण्डवा मातृनन्दनाः ।
स्मरन्तो मातरं वीरा बभूवुर्भृशदुःखिताः ॥ १
ये राजकार्येषु पुरा व्यासक्ता नित्यशोऽभवन्
ते राजकार्याणि तदा नाकार्षुः सर्वतः पुरे २
प्रविष्टा इव शोकेन नाभ्यनन्दन्त किञ्चन ।
संभाष्यमाणा अपि ते न किञ्चित्प्रत्यपूजयन्
ते स्म वीरा दुराधर्षा गांभीर्ये सागरोपमाः
शोकोपहतविज्ञाना नष्टसज्ञा इवाभवन् ॥ ४
अचिन्तयंश्च जननीं ततस्ते पाण्डुनन्दनाः ।
कथं नु वृद्धामिथुनं वहत्यतिकृशा पृथा ॥ ५
कथं च स महीपालो हतपुत्रो निराश्रयः ।
पत्न्या सह वसत्येको वने श्वापदसेविते ॥ ६
सा च देवी महाभागा गान्धारी हतबान्धवा
पतिमन्धं कथं वृद्धमन्वेति विजने वने ॥ ७
एवं तेषां कथयतामौत्सुक्यमभवत्तदा ।
गमने चाभवद्बुद्धिर्धृतराष्ट्रदिदृक्षया ॥ ८
सहदेवस्तु राजानं प्रणिपत्येदमब्रवीत् ।
अहो मे भवतो दृष्टं हृदयं गमनं प्रति ॥ ९
न हि त्वां गौरवेणाहमशक वक्तुमञ्जसा ।
गमनं प्राते राजेन्द्र तदिदं समुपस्थितम् ॥ १०

२१

वनमिति ॥ १ ॥ इति श्रीमहाभारते आश्रमवा० नैलकण्ठीये भारतभावदीपे एकविंशतितमोऽध्याय ॥ २१ ॥

२२

एवमिति ॥ १ ॥

दिष्ट्या द्रक्ष्यामि तां कुन्तीं
वर्तयन्तीं तपस्विनीम् ।
जटिलां तापसीं वृद्धां
कृशकाशपरिक्षताम् ॥ ११
प्रासादहर्म्यसंवृद्धामत्यन्तसुखभागिनीम् ।
कदा तु जननीं श्रान्तां द्रक्ष्यामि भृशदुःखितां
अनित्याः खलु मर्त्यानां गतयो भरतर्षभ ।
कुन्ती राजसुता यत्र वसत्यसुखिता वने १३
सहदेववचः श्रुत्वा द्रौपदी योषितां वरा ।
उवाच देवी राजानमभिपूज्याभिनन्द्य च ॥
कदा द्रक्ष्यामि तां देवीं यदि जीवति सा पृथा
जीवन्त्या ह्यद्य मे प्रीतिर्भविष्यति जनाधिप
एषा तेऽस्तु मतिर्नित्यं
धर्मे ते रमतां मनः ।
योऽद्य त्वमस्मान् राजेन्द्र
श्रेयसा योजयिष्यसि ॥ १६
अग्रपादस्थितं चेमं विद्धि राजन्वधूजनम् ।
काङ्क्षन्तं दर्शनं कुन्त्या गान्धार्याः श्वशुरस्य च

इत्युक्तः स नृपो देव्या द्रौपद्या भरतर्षभ ।
सेनाध्यक्षान् समानाय्य सर्वानिदमुवाच ह
निर्यातयत मे सेनां प्रभूतरथकुञ्जराम् ।
द्रक्ष्यामि वनसंस्थं च धृतराष्ट्रं महीपतिम् १९
स्वयध्यक्षांश्चाब्रवीद्राजा यानानि विविधानि मे
सज्जीक्रियन्तां सर्वाणि शिबिकाश्च सहस्रशः
शकटापणवेशाश्च कोशः शिल्पिन एव च ।
निर्यान्तु कोषपालाश्च कुरुक्षेत्राश्रमं प्रति ॥ २१
यश्च पौरजनः कश्चिद्द्रष्टुमिच्छति पार्थिवम् ।
अनावृतः सुविहितः स च यातु सुरक्षितः २२
सूदाः पौरोगवाश्चैव सर्वे चैव महानसम् ।
विविधं भक्ष्यभोज्यं च शकटैरुह्यतां मम २३
प्रयाणं घुष्यतां चैव श्वोभूत इति मा चिरम् ।
क्रियतां पथि चाप्यद्य वेश्मानि विविधानि च
एवमाज्ञाप्य राजा स भ्रातृभिः सहपाण्डवः ।
श्वोभूते निर्ययौ राजन् सस्त्रीवृद्धपुरःसरः ॥
स बहिर्दिवसानेव जनौघं परिपालयन् ।
न्यवसन्नृपतिः पञ्च ततोऽगच्छद्वनं प्रति ॥२६

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि युधिष्ठिरयात्रायां द्वाविंशोऽध्यायः ॥ २२ ॥

२३

वैशम्पायन उवाच ।
आज्ञापयामास ततः सेनां भरतसत्तमः ।
अर्जुनप्रमुखैर्गुप्तां लोकपालोपमैर्नरैः ॥ १
योगो योग इति प्रीत्या ततः शब्दो महानभूत
क्रोशतां स्यादिनां तत्र युज्यतां युज्यतामिति २
केचिद्यानैर्नरा जग्मुः केचिदश्वैर्महाजवैः ।
काञ्चनैश्च रथैः केचिज्ज्वलितज्वलनोपमैः ॥३
गजेन्द्रैश्च तथैवान्ये केचिदुष्ट्रैर्नराधिप ।
पदातिनस्तथैवान्ये नखरप्रासयोधिनः ॥ ४
पौरजानपदाश्चैव यानैर्बहुविधैस्तथा ।
अन्वयुः कुरुराजानं धृतराष्ट्रं दिदृक्षवः ॥ ५
स चापि राजवचनादाचार्यो गौतमः कृपः ।
सेनामादाय सेनानीः प्रययावाश्रमं प्रति ॥ ६
ततो द्विजैः परिवृतः कुरुराजो युधिष्ठिरः ।
संस्तूयमानो बहुभिः सूतमागधबन्दिभिः ॥७
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ।
रथानीकेन महता निर्जगाम कुरूद्वहः ॥ ८
गजैश्चाचलसंकाशैर्भीमकर्मा वृकोदरः ।
सञ्जयन्त्रायुधोपेतैः प्रययौ पवनात्मजः ॥ ९

अग्रपादस्थितं प्रयाणार्थं पुरस्कृतेनैव पादेन स्थितम् । अत्यन्तमुत्सुकामित्यर्थः ॥१७॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे द्वाविंशोऽध्यायः ॥ २२ ॥

२३

आज्ञापयामासेति ॥ १ ॥ यानैर्मनुष्यवाह्यैः ॥३॥ नखरप्रास व्याघ्रनखवत्पराचीनफलककुक्षिर्य ॥४॥

माद्रीपुत्रावपि तथा हयारोहौ सुसंवृतौ ।
जग्मतुः शीघ्रगमनौ सन्नद्धकवचध्वजौ ॥ १०
अर्जुनश्च महातेजा रथेनादित्यवर्चसा ।
वशी श्वेतैर्हयैर्युक्तैर्दिव्येनान्वगमन्नृपम् ॥ ११
द्रौपदीप्रमुखाश्चापि स्त्रीसंघाः शिबिकायुताः ।
स्त्यध्यक्षगुप्ताः प्रययुर्विसृजन्तोऽमितं वसु १२
समृद्धरथहस्त्यश्वं वेणुवीणानुनादितम् ।
शुशुभे पाण्डव सैन्यं तत्तदा भरतर्षभ ॥ १३
नदीतीरेषु रम्येषु सरःसु च विशांपते ।
वासान् कृत्वा क्रमेणाथ जग्मुस्ते कुरुपुङ्गवाः
युयुत्सुश्च महातेजा धौम्यश्चैव पुरोहितः ।
युधिष्ठिरस्य वचनात्पुरगुप्तिं प्रचक्रतुः ॥ १५
ततो युधिष्ठिरो राजा कुरुक्षेत्रमवातरत् ।
क्रमेणोत्तीर्य यमुनां नदीं परमपाविनीम् ॥१६
स ददर्शाश्रमं दूराद्राजर्षेस्तस्य धीमतः ।
शतयूपस्य कौरव्य धृतराष्ट्रस्य चैव ह ॥ १७
ततः प्रमुदितः सर्वो जनस्तद्वनमञ्जसा ।
विवेश सुमहानादैरापूर्य भरतर्षभ ॥ १८

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि धृतराष्ट्राश्रमगमने त्रयोविंशोऽध्यायः ॥ २३ ॥



२४

वैशम्पायन उवाच ।

ततस्ते पाण्डवा दूरादवतीर्य पदातयः ।
अभिजग्मुर्नरपतेराश्रमं विनयानताः ॥ १
स च योधजनः सर्वो ये च राष्ट्रनिवासिनः ।
स्त्रियश्च कुरुमुख्यानां पद्भिरेवान्वयुस्तदा २ ॥
आश्रमं ते ततो जग्मुर्धृतराष्ट्रस्य पाण्डवाः ।
शून्यं मृगगणाकीर्णं कदलीवनशोभितम् ॥ ३
ततस्तत्र समाजग्मुस्तापसा नियतव्रताः ।
पाण्डवानागतान् द्रष्टुं कौतूहलसमन्विताः ४
तानपृच्छत्ततो राजा वासौ कौरववंशभृत् ।
पिता ज्येष्ठो गतोऽस्माकमिति बाष्पपरिप्लुतः
ते तमूचुस्ततो वाक्यं यमुनामवगाहितुम् ।
पुष्पाणामुदकुंभस्य चार्थे गत इति प्रभो ॥ ६
तैराख्यातेन मार्गेण ततस्ते जग्मुरञ्जसा ।
ददृशुश्चाविदूरे तान्सर्वानथ पदातयः ॥ ७
ततस्ते सत्वरा जग्मुः पितुर्दर्शनकांक्षिणः ।
सहदेवस्तु वेगेन प्राधावद्यत्र सा पृथा ॥ ८
सुस्वरं रुरुदे धीमान्मातुः पादावुपस्पृशन् ।
सा च बाष्पाकुलमुखी ददर्श दयितं सुतम् ९
बाहुभ्यां संपरिष्वज्य समुन्नाम्य च पुत्रकम् ।
गान्धार्याः कथयामास सहदेवमुपस्थितम् १०
अनन्तरं च राजानं भीमसेनमथार्जुनम् ।
नकुलं च पृथा दृष्ट्वा त्वरमाणोपचक्रमे ॥ ११
सा ह्यग्रे गच्छति तयोर्दम्पत्योर्हतपुत्रयोः ।
कर्षन्ती तौ ततस्ते तां दृष्ट्वा सन्यपदन्भुवि १२
राजा तान्स्वरयोगेन स्पर्शेन च महामनाः ।
प्रत्यभिज्ञाय मेधावी समाश्वासयत प्रभुः ॥
ततस्ते बाष्पमुत्सृज्य गान्धारीसहितं नृपम् ।
उपतस्थुर्महात्मानो मातरं च यथाविधि १४

सर्वेषा तोयकलशान्
जगृहुस्ते स्वयं तदा ।
पाण्डवा लब्धसंज्ञास्ते
मात्रा चाश्वासिताः पुनः ॥ १५

तथा नार्यो नृसिंहानां सोऽवरोधजनस्तदा ।
पौरजानपदाश्चैव ददृशुस्तं जनाधिपम् ॥ १६
निवेदयामास तदा जनं तन्नामगोत्रतः ।
युधिष्ठिरो नरपतिः स चैनं प्रत्यपूजयत १७
स तैः परिवृतो मेने हर्षबाष्पाविलेक्षणः ।
राजाऽऽत्मानं गृहगतं पुरेव गजसाह्वये ॥ १८

इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे त्रयोविंशोऽध्याय ॥ २३ ॥

२४

तत इति ॥ १ ॥

अभिवादितो वधूभिश्च
कृष्णाद्याभिः स पार्थिवः ।
गान्धार्या सहितो धीमा-
न्कुन्त्या च प्रत्यनन्दत ॥ १९

ततश्चाश्रममागच्छ-
त्सिद्धचारणसेवितम् ।
दिदृक्षुभिः समाकीर्णं
नभस्तारागणैरिव ॥ २०

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि युधिष्ठिरादिधृतराष्ट्रसमागमे चतुर्विंशोऽध्यायः ॥ २४ ॥

२५

वैशम्पायन उवाच ।
स तैः सह नरव्याघ्रैर्भ्रातृभिर्भरतर्षभ ।
राजा रुचिरपद्माक्षैरासांचक्रे तदाश्रमे ॥ १
तापसैश्च महाभागै-
र्नानादेशसमागतैः ।
द्रष्टुं कुरुपतेः पुत्रान्
पाण्डवान्पृथुवक्षसः ॥ २
तेऽब्रुवन् ज्ञातुमिच्छामः कतमोऽत्र युधिष्ठिरः
भीमार्जुनौ यमौ चैव द्रौपदी च यशस्विनी ३
तानाचख्यौ तदा सूतः सर्वांस्तानभिनामतः
सञ्जयो द्रौपदी चैव सर्वाश्चान्याः कुरुस्त्रियः

सञ्जय उवाच ।
य एष जाम्बूनदशुद्धगौर-
स्तनुर्महार्सिंह इव प्रवृद्धः ।
प्रचण्डघोणः पृथुदीर्घनेत्र-
स्ताम्रायताक्षः कुरुराज एषः ॥ ५
अयं पुनर्मत्तगजेन्द्रगामी
प्रतप्तचामीकरशुद्धगौरः ।
पृथ्वायतासः पृथुदीर्घबाहु-
र्वृकोदरः पश्यत पश्यतेमम् ॥ ६
यस्त्वेष पार्श्वेऽस्य महाधनुष्मान्
श्यामो युवा वारणयूथपाभः ।
सिंहोन्नतांसो गजखेलगामी
पद्मायताक्षोऽर्जुन एष वीरः ॥ ७

कुन्तीसमीपे पुरुषोत्तमौ तु
यमाविमौ विष्णुमहेन्द्रकल्पौ ।
मनुष्यलोके सकले समोऽस्ति
ययोर्न रूपे न बले न शीले ॥ ८
इयं पुनः पद्मदलायताक्षी
मध्ये वयः किञ्चिदिव स्पृशन्ती ।
नीलोत्पलाभा सुरदेवतेव
कृष्णा स्थिता मूर्तिमतीव लक्ष्मीः ९
अस्यास्तु पार्श्वे कनकोत्तमाभा
यैषा प्रभा मूर्तिमतीव सौम्या ।
मध्ये स्थिता सा भगिनी द्विजाम्या-
श्चक्रायुधस्याप्रतिमस्य तस्य ॥ १०
इयं च जाम्बूनदशुद्धगौरी
पार्थस्य भार्या भुजगेन्द्रकन्या ।
चित्राङ्गदा चैव नरेन्द्रकन्या
यैषा सवर्णार्द्रमधूकपुष्पैः ॥ ११
इयं स्वसा राजचमूपतेश्च
प्रवृद्धनीलोत्पलदामवर्णा ।
पस्पर्ध कृष्णेन सदा नृपो यो
वृकोदरस्यैष परिग्रहोऽग्र्यः ॥ १२
इय च राज्ञो मगधाधिपस्य
सुता जरासन्ध इति श्रुतस्य ।
यवीयसो माद्रवतीसुतस्य
भार्या मता चम्पकदामगौरी ॥ १३

इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे चतुर्विंशोऽध्याय ॥ २४ ॥

२५

स तैरिति ॥ १ ॥ सवर्णा समानजातीया पाण्डवकन्या आर्द्रमधूकपुष्पैरुपलक्षिता ॥ ११ ॥ य कृष्णेन पस्पर्ध पस्पर्धे तस्य शल्यस्य परिग्रहो भार्या ॥ १२ ॥

इंदीवरश्यामतनुः स्थिता तु
यैषा परासन्नमहीतले च ।
भार्या मता माद्रवतीसुतस्य
ज्येष्ठस्य सेयं कमलायताक्षी ॥ १४
इयं तु निष्टप्तसुवर्णगौरी
राज्ञो विराटस्य सुता सपुत्रा ।
भार्याऽभिमन्योर्निहतो रणे यो
द्रोणादिभिस्तैर्विरथो रथस्थैः ॥ १५
एतास्तु सीमन्ताशिरोरुहायाः
शुक्लोत्तरीया नरराजपत्न्यः ।
राज्ञोऽस्य वृद्धस्य परं शताख्याः
स्नुषा नृवीरा हतपुत्रनाथाः ॥ १६
एता यथामुख्यमुदाहृता वो
ब्राह्मण्यभावादजुबुद्धिसत्त्वाः ।
सर्वा भवद्भिः परिपृच्छ्यमाना
नरेन्द्रपत्न्यः सुविशुद्धसत्त्वाः ॥ १७

वैशम्पायन उवाच ।

एवं स राजा कुरुवृद्धवर्यः
समागतस्तैर्नरदेवपुत्रैः ।
पप्रच्छ सर्वं कुशलं तदानी
गतेषु सर्वेष्वथ तापसेषु ॥ १८
योधेषु चाप्याश्रममण्डलं त
मुक्त्वा निविष्टेषु विमुच्य पत्रम् ।
स्त्रीवृद्धबाले च सुसंनिविष्टे
यथाऽर्हतस्तान्कुशलान्यपृच्छत् १९

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि ऋषीन् प्रति युधिष्ठिरादिकथने पञ्चविंशोऽध्यायः ॥ २५ ॥



२६

धृतराष्ट्र उवाच ।

युधिष्ठिर महाबाहो कच्चित्त्वं कुशली ह्यसि ।
सहितो भ्रातृभिः सर्वैः पौरजानपदैस्तथा १
ये च त्वामनुजीवन्ति कच्चित्तेऽपि निरामयाः
सचिवा भृत्यवर्गाश्च गुरवश्चैव ते नृप ॥ २
कच्चित्तेऽपि निरातंका वसन्ति विषये तव ।
कच्चिद्वर्तसि पौराणीं वृत्तिं राजर्षिसेविताम् ३
कच्चिद्व्ययाननुच्छिद्य कोशस्तेऽभिप्रपूर्यते ।
अरिमध्यस्थमित्रेषु वर्तसे चानुरूपतः ॥ ४
ब्राह्मणानग्रहारैर्वा यथावदनुपश्यसि ।
कच्चित्ते परितुष्यन्ति शीलेन भरतर्षभ ॥ ५
शत्रवोऽपि कुतः पौरा
भृत्या वा स्वजनोऽपि वा ।
कच्चिद्यजसि राजेन्द्र
श्रद्धावान् पितृदेवताः ॥ ६
अतिथीनन्नपानेन कच्चिदर्चसि भारत ।
कच्चिन्नयपथे विप्राः स्वकर्मनिरतास्तव ॥ ७
क्षत्रिया वैश्यवर्गा वा शूद्रा वाऽपि कुटुम्बिनः
कच्चित्स्त्रीबालवृद्धं ते न शोचति न याचते ८
जामयः पूजिताः कच्चित्तव गेहे नरर्षभ ।
कच्चिद्राजर्षिवंशोऽयं त्वामासाद्य महीपतिम्

आसन्नमहीतले समीपभूमौ ॥ १४ ॥ सीमन्तमात्रेण उपलक्षिता न त्वलंकारादिना तादृशा शिरोरुहा केशा यासां ताः सीमन्ताशिरोरुहा असीमन्तेति पाठो युक्त ॥ १६ ॥ ब्राह्मण्येत्यादिपाद सम्बोधनम् । परिपृच्छ्यमाना कथयतां मत्तो वेदितव्या इति शेष ॥ १७ ॥ पत्रं वाहनम् ॥१९॥

इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे पञ्चविंशोऽध्याय ॥ २५ ॥

२६

युधिष्ठिरेति ॥ १ ॥ जामय सौभाग्यवत्य ॥९॥

यथोचितं महाराज यशसा नावसीदति ।
वैशम्पायन उवाच ।
इत्येवंवादिनं तं स न्यायवित् प्रत्यभाषत१०
कुशलप्रश्नसंयुक्तं कुशलो वाक्यकर्मणि ।
युधिष्ठिर उवाच ।
कच्चित्ते वर्धते राजंस्तपो दमशमश्च ते॥११
अपि मे जननी चेयं शुश्रूषुर्विगतक्लमा ।
अथास्याः सफलो राजन्वनवासो भविष्यति
इयं च माता ज्येष्ठा मे शीतवाताध्वकर्शिता ।
घोरेण तपसा युक्ता देवी कच्चिन्न शोचति १३
हतान्पुत्रान्महावीर्यान् क्षत्रधर्मपरायणान् ।
नापध्यायति वा कच्चिदस्मान्पापकृतः सदा ॥
क्व चासौ विदुरो राजन्नेमं पश्यामहे वयम् ।
सञ्जयः कुशली चायं कच्चिन्नु तपसि स्थिरः१५
वैशम्पायन उवाच ।
इत्युक्तः प्रत्युवाचेदं धृतराष्ट्रो जनाधिपम् ।
कुशली विदुरः पुत्र तपो घोरं समाश्रितः १६
वायुभक्षो निराहारः
कृशो धमनिसन्ततः ।
कदाचिद् दृश्यते विप्रैः
शून्येऽस्मिन्कानने क्वचित् ॥ १७
इत्येवं ब्रुवतस्तस्य जटी वीटामुखः कृशः ।
दिग्वासा मलदिग्धाङ्गो वनरेणुसमुक्षितः १८
दूरादालक्षितः क्षत्ता तत्राख्यातो महीपतेः ।
निवर्तमानः सहसा राजन् दृष्ट्वाऽऽश्रमं प्रति ॥
तमन्वधावन्नृपतिरेक एव युधिष्ठिरः ।
प्रविशन्तं वनं घोरं लक्ष्यालक्ष्यं क्वचित् क्वचित्
भो भो विदुर राजाऽहं दयितस्ते युधिष्ठिरः
इति ब्रुवन्नरपतिस्तं यत्नादभ्यधावत ॥ २१
ततो विविक्त एकान्ते तस्थौ बुद्धिमता वरः ।
विदुरो वृक्षमाश्रित्य कञ्चित्तत्र वनान्तरे ॥ २२
तं राजा क्षीणभूयिष्ठमाकृतीमात्रसूचितम् ।
अभिजज्ञे महाबुद्धिं महाबुद्धिर्युधिष्ठिरः ॥ २३
युधिष्ठिरोऽहमस्मीति
वाक्यमुक्त्वाऽग्रतः स्थितः ।
विदुरस्य श्रवे राजा
तं च प्रत्यभ्यपूजयत् ॥ २४
ततः सोऽनिमिषो भूत्वा राजानं तमुदैक्षत ।
संयोज्य विदुरस्तस्मिन् दृष्टिं दृष्ट्वा समाहितः
विवेश विदुरो धीमान् गात्रैर्गात्राणि चैव ह ।
प्राणान्प्राणेषु च दधदिन्द्रियाणीन्द्रियेषु च ॥
स योगबलमास्थाय विवेश नृपतेस्तनुम् ।
विदुरो धर्मराजस्य तेजसा प्रज्वलन्निव ॥ २७
विदुरस्य शरीरं तु तथैव स्तब्धलोचनम् ।
वृक्षाश्रितं तदा राजा ददर्श गतचेतनम् २८
बलवन्तं तथाऽऽत्मानं मेने बहुगुणं तदा ।
धर्मराजो महातेजास्तच्च सस्मार पाण्डवः २९
पौराणमात्मनः सर्वं विद्यावान् स विशांपते ।
योगधर्मं महातेजा व्यासेन कथितं यथा ३०
धर्मराजश्च तत्रैव सञ्चस्कारयिषुस्तदा ।
दग्धुकामोऽभवद्विद्वानथ वागभ्यभाषत ॥ ३१
भो भो राजन्न दग्धव्यमेतद्विदुरसंज्ञकम् ।
कलेवरमिहैवं ते धर्म एष सनातनः ॥ ३२
लोकाः सान्तानिका नाम
भविष्यन्त्यस्य भारत ।
यतिधर्ममवाप्तोऽसौ
नैष शोच्यः परंतप ॥ ३३
इत्युक्तो धर्मराजः स विनिवृत्य ततः पुनः ।
राज्ञो वैचित्रवीर्यस्य तत्सर्वं प्रत्यवेदयत ॥ ३४
ततः स राजा द्युतिमान् स च सर्वो जनस्तदा
भीमसेनादयश्चैव परं विस्मयमागताः ॥ ३५
तच्छ्रुत्वा प्रीतिमान् राजा
भूत्वा धर्मजमब्रवीत् ।
आपो, मूलं, फलं चैव
ममेदं प्रतिगृह्यताम् ॥ ३६

वीटा पाषाणकवल ॥ १८ ॥ विदुरस्य श्रवे विदुरे शृण्वति सति राजा धृतराष्ट्रस्तं युधिष्ठिरं प्रत्यभ्यपूजयत् स्तुतवान्२४ **ततः स इति**। दृष्टिं दृष्ट्वा पवनं पवनेन च सयोज्य तत्रैव संयमं कृत्वा स्वशरीरात्प्राणेन्द्रियाणि निष्कास्य तदीयप्राणेन्द्रियैश्च सह एकत्वं प्रापय्य स्वशरीरं त्यक्तवान् । यथा घटान्तरस्थं जल घटान्तरे सिच्यते तद्वदिदं द्रष्टव्यम्। प्राणसन्धानेनैवेन्द्रियाणा गात्राणा च सन्धान भवति न तदर्थं पृथग्यत्नोऽपेक्षित ॥ २५ ॥ तच्च स्वस्य विदुरस्य एकस्यैव धर्मस्याशाजातत्व सस्मार॥२९॥योगधर्म सस्मारेत्यनुषज्यते ॥३०॥ संचस्कारयिषु संस्कारं लंभयितुमिच्छु ॥३१॥**लोका इति**। यतिधर्मो दाहायोग्यत्वम्। एतेन **शूद्रयोनौ जातानामपि यतिधर्मोऽस्तीति दर्शितम्** ३३

यदर्थो हि नरो राजं-
स्तदर्थोऽस्यातिथिः स्मृतः ।
इत्युक्तः स तथेत्येवं
प्राह धर्मात्मजो नृपम् ॥ ३७

फलं, मूलं च बुभुजे राज्ञा दत्तं सहानुजः ।
ततस्ते वृक्षमूलेषु कृतवासपरिग्रहाः ।
तां रात्रिमवसन्सर्वे फलमूलजलाशनाः ॥ ३८

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि विदुरनिर्याणे षड्विंशोऽध्यायः ॥ २६ ॥

२७

वैशम्पायन उवाच ।
ततस्तु राजन्नेतेषामाश्रमे पुण्यकर्मणाम् ।
शिवा नक्षत्रसंपन्ना सा व्यतीयाय शर्वरी १
ततस्तत्र कथाश्चासंस्तेषां धर्मार्थलक्षणाः ।
विचित्रपदसञ्चारा नानाश्रुतिभिरन्विताः ॥ २
पाण्डवास्त्वभितो मातुर्धरण्यां सुषुपुस्तदा ।
उत्सृज्य तु महार्हाणि शयनानि नराधिप ३
यदाहारोऽभवद्राजा धृतराष्ट्रो महामनाः ।
तदाहारा नृवीरास्ते न्यवसंस्तां निशां तदा ४
व्यतीतायां तु शर्वर्यां कृतपौर्वाह्णिकक्रियः ।
भ्रातृभिः सहितो राजा ददर्शाश्रममण्डलम् ५
सान्तःपुरपरीवारः सभृत्यः सपुरोहितः ।
यथासुखं यथोद्देशं धृतराष्ट्राभ्यनुज्ञया ॥ ६
ददर्श तत्र वेदींश्च संप्रज्वलितपावकाः ।
कृताभिषेकैर्मुनिभिर्जुह्वाग्निभिरुपास्थिताः ॥ ७
वानेयपुष्पनिकरैराज्यधूमोद्गमैरपि ।
ब्राह्मेण वपुषा युक्ता युक्ता मुनिगणस्य ताः ८
मृगयूथैरनुद्विग्नैस्तत्र तत्र समाश्रितैः ।
अशंकितैः पक्षिगणैः प्रगीतैरिव च प्रभो ॥ ९
केकाभिर्नीलकण्ठानां दात्यूहानां च कूजितैः
कोकिलानां कुहुरवैः सुखैः श्रुतिमनोहरैः १०
प्राधीतद्विजघोषैश्च क्वचित्क्वचिदलंकृतम् ।
फलमूलसमाहारैर्महद्भिश्चोपशोभितम् ॥ ११

ततः स राजा प्रददौ तापसार्थमुपाहृतान् ।
कलशान्काञ्चनान् राजंस्तथैवौदुम्बरानपि ॥
अजिनानि प्रवेणीश्च लुक्कुवं च महीपतिः ।
कमण्डलूंश्च स्थालीश्च पिठराणि च भारत १३
भाजनानि च लौहानि पात्रीश्च विविधा नृप
यद्यदिच्छति यावच्च यच्चान्यदपि भाजनम् ॥
एवं स राजा धर्मात्मा परीत्याश्रममण्डलम् ।
वसु विभाज्य तत्सर्वं पुनरायान्महीपतिः ॥१५
कृताह्निकं च राजानं धृतराष्ट्रं महीपतिम् ।
ददर्शासीनमव्यग्रं गान्धारीसहितं तदा ॥ १६
मातरं चाविदूरस्थां शिष्यवत्प्रणतां स्थिताम् ।
कुन्ती ददर्श धर्मात्मा शिष्टाचारसमन्विताम्
स तमभ्यर्च्य राजानं नाम संश्राव्य चात्मनः
निषीदेत्यभ्यनुज्ञातो वृस्यामुपविवेश ह ॥ १८
भीमसेनादयश्चैव पाण्डवा भरतर्षभ ।
अभिवाद्योपसंगृह्य निषेदुः पार्थिवाज्ञया ॥ १९
स तैः परिवृतो राजा शुशुभेऽतीव कौरवः ।
बिभ्रद्ब्राह्मीं श्रियं दीप्तां देवैरिव बृहस्पतिः २०
तथा तेषूपविष्टेषु समाजग्मुर्महर्षयः ।
शतयूपप्रभृतयः कुरुक्षेत्रनिवासिनः ॥ २१
व्यासश्च भगवान्विप्रो देवर्षिगणसेवितः ।
वृतः शिष्यैर्महातेजा दर्शयामास पार्थिवम् ॥

इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे षोडशोऽध्याय ॥ २६ ॥

२७

तत इति ॥ १ ॥ मुनिगणस्य मुनिगणेन ता वैदिक्यो लौकिक्यश्च ॥ ८ ॥ मृगयूथादिभिरलंकृतमाश्रमम् ॥ ९ ॥ औदुम्बरान् कलशान् ॥१२ ॥ प्रवेणी कुथा· प्रवेणि स्त्री कुथावेण्योरिति मेदिनी ॥ १३ ॥

ततः स राजा कौरव्यः कुन्तीपुत्रश्च वीर्यवान्
भीमसेनादयश्चैव प्रत्युत्थायाभ्यवादयन् ॥ २३
समागतस्ततो व्यासः शतयूपादिभिर्वृतः ।
धृतराष्ट्रं महीपालमास्यतामित्यभाषत ॥ २४
वरं तु विष्टरं कौश्यं कृष्णाजिनकुशोत्तरम् ।
प्रतिपेदे तदा व्यासस्तदर्थमुपकल्पितम् ॥ २५
ते च सर्वे द्विजश्रेष्ठा विष्टरेषु समन्ततः ।
द्वैपायनाभ्यनुज्ञाता निषेदुर्विपुलौजसः ॥ २६

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि व्यासागमने सप्तविंशोऽध्यायः ॥ २७ ॥

२८

वैशम्पायन उवाच ।

ततः समुपविष्टेषु पाण्डवेषु महात्मसु ।
व्यासः सत्यवतीपुत्र इदं वचनमब्रवीत् ॥ १
धृतराष्ट्र महाबाहो कच्चित्ते वर्तते तपः ।
कच्चिन्मनस्ते प्रीणाति वनवासे नराधिप ॥ २
कच्चिद्धृदि न ते शोको राजन्पुत्रविनाशजः ।
कच्चिज्ज्ञानानि सर्वाणि सुप्रसन्नानि तेऽनघ ३
कच्चिद्बुद्धिं दृढां कृत्वा चरस्यारण्यकं विधिम्
कच्चिद्धृष्श्च गान्धारी न शोकेनाभिभूयते ४
महाप्रज्ञा बुद्धिमती देवी धर्मार्थदर्शिनी ।
आगमापायतत्त्वज्ञा कच्चिदेषा न शोचति ५
कच्चित्कुन्ती च राजंस्त्वां शुश्रूषत्यनहंकृता ।
या परित्यज्य स्वं पुत्रं गुरुशुश्रूषणे रता ॥ ६
कच्चिद्धर्मसुतो राजा त्वया प्रत्यभिनन्दितः ।
भीमार्जुनयमाश्चैव कच्चिदेतेऽपि सान्त्विताः
कच्चिन्नन्दसि दृष्ट्वैतान् कच्चित्ते निर्मलं मनः ।
कच्चिच्च शुद्धभावोऽसि जातज्ञानो नराधिप
एतद्धि त्रितय श्रेष्ठं सर्वभूतेषु भारत ।
निर्वैरता महाराज सत्यमक्रोध एव च ॥ ९
कच्चित्ते न च मोहोऽस्ति वनवासेन भारत ।
स्ववशे वन्यमन्नं वा उपवासोऽपि वा भवेत्
विदितं चापि राजेन्द्र विदुरस्य महात्मनः ।
गमनं विधिनाऽनेन धर्मस्य सुमहात्मनः ॥ ११
माण्डव्यशापाद्धि स वै धर्मो विदुरतां गतः
महाबुद्धिर्महायोगी महात्मा सुमहामनाः १२
बृहस्पतिर्वा देवेषु शुक्रो वाप्यसुरेषु च ।
न तथा बुद्धिसंपन्नो यथा स पुरुषर्षभः ॥ १३
तपोबलव्ययं कृत्वा सुचिरात्सभृतं तदा ।
माण्डव्येनर्षिणा धर्मो ह्यभिभूतः सनातनः ॥
नियोगाद्ब्रह्मणः पूर्वं मया स्वेन बलेन च ।
वैचित्रवीर्यके क्षेत्रे जातः स सुमहामतिः १५
भ्राता तव महाराज देवदेवः सनातनः ।
धारणान्मनसा ध्यानाद्यं धर्मं कवयो विदुः ॥
सत्येन संवर्धयति यो दमेन शमेन च ।
अहिंसया च दानेन तप्यमानः सनातनः १७
येन योगबलाज्जातः कुरुराजो युधिष्ठिरः ।
धर्म इत्येष नृपते प्राज्ञेनामितबुद्धिना ॥ १८
यथा वह्निर्यथा वायुर्यथाऽऽपः पृथिवी यथा ।
यथाऽऽकाश तथा धर्म इह चामुत्र च स्थितः
सर्वगश्चैव राजेन्द्र सर्वं व्याप्य चराचरम् ।
दृश्यते देवदेवैः स सिद्धैर्निर्मुक्तकल्मषैः २०

यो हि धर्मः स विदुरो
विदुरो यः स पाण्डवः ।
स एष राजन् दृश्यस्ते
पाण्डवः प्रेष्यवत्स्थितः ॥ २१

प्रविष्टः स महात्मानं भ्राता ते बुद्धिसत्तमः
दृष्ट्वा महात्मा कौन्तेयं महायोगबलान्वितः ॥
त्वां चापि श्रेयसा योक्ष्ये न चिराद्भरतर्षभ ।
संशयच्छेदनार्थाय प्राप्तं मां विद्धि पुत्रक २३

इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्तविंशोऽध्याय ॥ २७ ॥

२८

ततः समुपविष्टेष्वित्यादि ॥ १ ॥ स्ववशे इति मूलभर्त्रं स्पष्टम् ॥ १० ॥

न कृतं यैः पुरा कैश्चित्कर्म लोके महर्षिभिः ।
आश्चर्यभूतं तपसः फलं तद्दर्शयामि वः ॥ २४

किमिच्छसि महीपाल मत्तः प्राप्तुमभीप्सितम्
द्रष्टुं स्प्रष्टुमथ श्रोतुं तत्कर्ताऽस्मि तवानघ २५

इति श्रीमहाभारते आश्रमवासिके पर्वणि आश्रमवासपर्वणि व्यासवाक्ये अष्टाविंशोऽध्यायः ॥ २८ ॥

समाप्तं चाश्रमवासपर्व



अथ पुत्रदर्शनपर्व २

२९

जनमेजय उवाच ।
वनवासं गते विप्र धृतराष्ट्रे महीपतौ ।
सभार्ये नृपशार्दूले वध्वा कुन्त्या समन्विते १
विदुरे चापि ससिद्धे धर्मराज व्यपाश्रिते ।
वसत्सु पाण्डुपुत्रेषु सर्वेष्वाश्रममण्डले ॥ २
यत्तदाश्चर्यमिति वै करिष्यामीत्युवाच ह ।
व्यासः परमतेजस्वी महर्षिस्तद्वदस्व मे ॥ ३
वनवासे च कौरव्यः कियन्तं कालमच्युतः
युधिष्ठिरो नरपतिर्न्यवसत्सजनस्तदा ॥ ४
किमाहाराश्च ते तत्र ससैन्या न्यवसन्प्रभो ।
सान्तःपुरा महात्मान इति तद्ब्रूहि मेऽनघ ५

वैशम्पायन उवाच ।
तेऽनुज्ञातास्तदा राजन्कुरुराजेन पाण्डवाः ।
विविधान्यन्नपानानि विश्राम्यानुभवन्ति ते
मासमेकं विजह्रुस्ते ससैन्यान्तःपुरा वने ।
अथ तत्रागमद्व्यासो यथोक्तं ते मयाऽनघ ॥ ७
तथा च तेषां सर्वेषां कथाभिर्नृपसन्निधौ ।
व्यासमन्वास्यतां राजन्नाजग्मुर्मुनयो परे ८
नारदः पर्वतश्चैव देवलश्च महातपाः ।
विश्वावसुस्तुम्बुरुश्च चित्रसेनश्च भारत ॥ ९
तेषामपि यथान्यायं पूजां चक्रे महातपाः ।
धृतराष्ट्राभ्यनुज्ञातः कुरुराजो युधिष्ठिरः १०
निषेदुस्ते ततः सर्वे पूजां प्राप्य युधिष्ठिरात्
आसनेषु च पुण्येषु बर्हिणेषु वरेषु च ॥ ११
तेषु तत्रोपविष्टेषु स तु राजा महामतिः ।
पाण्डुपुत्रैः परिवृतो निषसाद कुरूद्वह ॥ १२

गान्धारी चैव कुन्ती च
द्रौपदी सात्वती तथा ।
स्त्रियश्चान्यास्तथाऽन्याभिः
सहोपविविशुस्ततः ॥ ११

तेषां तत्र कथा दिव्या धर्मिष्ठाश्चाभवन्नृप ।
ऋषीणां च पुराणानां देवासुरविमिश्रिताः ॥
ततः कथान्ते व्यासस्तं प्रज्ञाचक्षुषमीश्वरम् ।
प्रोवाच वदतां श्रेष्ठः पुनरेव स तद्वचः ॥ १५
प्रीयमाणो महातेजाः सर्ववेदविदां वरः ।
विदितं मम राजेन्द्र यत्ते हृदि विवक्षितम् ॥
दह्यमानस्य शोकेन तव पुत्रकृतेन वै ।
गान्धार्याश्चैव यद्दुःखं हृदि तिष्ठति नित्यदा
कुन्त्याश्च यन्महाराज द्रौपद्याश्च हृदि स्थितम्
यच्च धारयते तीव्रं दुःखं पुत्रविनाशजम् १८
सुभद्रा कृष्णभगिनी तच्चापि विदितं मम ।
श्रुत्वा समागममिमं सर्वेषां वस्ततो नृप १९
संशयच्छेदनार्थाय प्राप्तः कौरवनन्दन
इमे च देवगन्धर्वाः सर्वे चेमे महर्षयः ॥ २०

इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे अष्टाविंशोऽध्याय ॥ २८ ॥

२९

वनवासमिति ॥ १ ॥ विश्राम्य विश्रान्तिं प्राप्य ॥ ६ ॥ बर्हिणेषु पक्षिबर्हजतूलिकामयेषु ॥ ११ ॥ संशयाः मृतानां सत्त्वमस्ति न वा सत्त्वमपिण्डादेर्घटीभूतस्येव पूर्वरूपमुपमृद्यानुपमृद्य वा उपमर्दे सोऽयं दशरथ स्वर्गस्थो मम पितेति प्रत्यभिज्ञानुपपत्तिः अनुपमर्दे भस्मीभावस्य प्रत्यक्षदर्शनं नोपपद्यत इत्यादयस्तेषां छेदनायेत्यर्थः ॥२०॥

पश्यन्तु तपसो वीर्यमद्य मे चिरसंभृतम् ।
तदुच्यतां महाप्राज्ञ कं कामं प्रददामि ते २१
प्रवणोऽस्मि वरं दातुं पश्य मे तपसः फलम् ।
एवमुक्तः स राजेन्द्रो व्यासेनामितबुद्धिना ॥
मुहूर्तमिव सञ्चिन्त्य वचनायोपचक्रमे ।
धन्योऽस्म्यनुगृहीतश्च सफलं जीवितं च मे
यन्मे समागमोऽद्येह भवद्भिः सह साधुभिः ।
अद्य चाप्यवगच्छामि गतिमिष्टामिहात्मनः ॥
ब्रह्मकल्पैर्भवद्भिर्यत्समेतोऽहं तपोधनाः ।
दर्शनादेव भवतां पूतोऽहं नात्र संशयः ॥ २५
विद्यते न भयं चापि परलोकान्ममानघाः ।
किं तु तस्य सुदुर्बुद्धेर्मन्दस्यापनयैर्भृशम् २६
दूयते मे मनो नित्यं स्मरतः पुत्रगृद्धिनः ।
अपापाः पाण्डवा येन निकृताः पापबुद्धिना
घातिता पृथिवी येन सहया सनरद्विपा ।
राजानश्च महात्मानो नानाजनपदेश्वराः २८
आगम्य मम पुत्रार्थे सर्वे मृत्युवशं गताः ।
ये ते पितॄंश्च दारांश्च प्राणांश्च मनसः प्रियान्
परित्यज्य गताः शूराः प्रेतराजनिवेशनम् ।
का नु तेषां गतिर्ब्रह्मन् मित्रार्थे ये हता मृधे ।
तथैव पुत्रपौत्राणां मम ये निहता युधि ।
दूयते मे मनोऽभीक्ष्णं घातयित्वा महाबलम्
भीष्मं शान्तनवं वृद्धं द्रोणं च द्विजसत्तमम् ।
मम पुत्रेण मूढेन पापेनाकृतबुद्धिना ॥ ३२
क्षयं नीतं कुलं दीप्तं पृथिवीराज्यमिच्छता ।
एतत्सर्वमनुस्मृत्य दह्यमानो दिवानिशम्
न शान्तिमधिगच्छामि दुःखशोकसमाहतः॥
इति मे चिन्तयानस्य पितः शान्तिर्न विद्यते
वैशम्पायन उवाच ।
तच्छ्रुत्वा विविधं तस्य राजर्षेः परिदेवितम्
पुनर्नवीकृतः शोको गान्धार्या जनमेजय ३५
कुन्त्या द्रुपदपुत्र्याश्च सुभद्रायास्तथैव च ।
तासां च वरनारीणां वधूनां कौरवस्य ह ॥
पुत्रशोकसमाविष्टा गान्धारी त्विदमब्रवीत् ।
श्वशुरं बद्धनयना देवी प्राञ्जलिरुत्थिता ३७
षोडशेमानि वर्षाणि गतानि मुनिपुङ्गव ।
अस्य राज्ञो हतान्पुत्रान् शोचतो न शमो विभो
पुत्रशोकसमाविष्टो निःश्वसन् ह्येष भूमिपः ।
न शेते वसतीः सर्वा धृतराष्ट्रो महामुने ३९
लोकानन्यान्समर्थोऽसि
स्रष्टुं सर्वांस्तपोबलात् ।
किमु लोकान्तरगतान्
राज्ञो दर्शयितुं सुतान् ॥ ४०
इयं च द्रौपदी कृष्णा हतज्ञातिसुता भृशम् ।
शोचत्यतीव सर्वासां स्नुषाणा दयिता स्नुषा
तथा कृष्णस्य भगिनी सुभद्रा भद्रभाषिणी ।
सौभद्रवधसंतप्ता भृशं शोचति भाविनी ४२
इयं च भूरिश्रवसो भार्या परमसंमता ।
भर्तृव्यसनशोकार्ता भृशं शोचति भाविनी ॥
यस्यास्तु श्वशुरो धीमान् बाह्लिकः स कुरूद्वहः
निहतः सोमदत्तश्च पित्रा सह महारणे ४४
श्रीमतोऽस्य महाबुद्धेः संग्रामेष्वपलायिनः ।
पुत्रस्य ते पुत्रशतं निहतं यद्रणाजिरे ॥ ४५
तस्य भार्याशतमिदं दुःखशोकसमाहतम् ।
पुनः पुनर्वर्धयानं शोकं राज्ञो ममैव च ।
तेनारंभेण महता मामुपास्ते महामुने ।
ये च शूरा महात्मानः श्वशुरा मे महारथाः
सोमदत्तप्रभृतयः का नु तेषां गतिः प्रभो ।
तव प्रसादाद्भगवन् विशोकोऽय महीपतिः
यथा स्याद्धविता चाहं कुन्ती चेयं वधूस्तव ।
इत्युक्तवत्यां गान्धार्यां कुन्ती व्रतकृशानना॥
प्रच्छन्नजातं पुत्रं तं सस्मारादित्यसन्निभम् ।
तामृषिर्वरदो व्यासो दूरश्रवणदर्शनः ॥ ५०
अपश्यद्दुःखितां देवीं मातरं सव्यसाचिनः ।
तामुवाच ततो व्यासो यत्ते कार्यं विवक्षितं
तद्ब्रूहि त्वं महाभागे यत्ते मनसि वर्तते ।
श्वशुराय ततः कुन्ती प्रणम्य शिरसा तदा ।
उवाच वाक्यं सव्रीडा विवृण्वाना पुरातनम्

इति श्रीमहाभारते आश्रमवासिके पर्वणि पुत्रदर्शनपर्वणि धृतराष्ट्रादिकृतप्रार्थने एकोनत्रिंशोऽध्यायः ॥ २९ ॥

आरभेण शोकोद्यमेन मामुपास्ते भार्याशत रोदनं कुर्वत् मामेव परिवार्य तिष्ठतीत्यर्थ । आरंभ उद्यमे दर्पे त्वराया च वधेऽपि चेति वध एवात्र ग्राह्य. ॥ ४७ ॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे एकोनत्रिंशोऽध्याय ॥ २९ ॥

३०

कुन्त्युवाच ।

भगवन् श्वशुरो मेऽसि दैवतस्यापि दैवतम्
स मे देवातिदेवस्त्वं शृणु सत्यां गिरं मम १
तपस्वी कोपनो विप्रो दुर्वासा नाम मे पितुः ।
भिक्षामुपागतो भोक्तुं तमहं पर्यतोषयम् ॥ २
शौचेन त्वागसस्त्यागैः शुद्धेन मनसा तथा
कोपस्थानेष्वपि महत्स्वकुप्यन्न कदाचन ॥ ३
स प्रीतो वरदो मेऽभूत्कृतकृत्यो महामुनिः ।
अवश्यं ते गृहीतव्यमिति मां सोऽब्रवीद्वचः॥
ततः शापभयाद्विप्रमवोचं पुनरेव तम् ।
एवमस्त्विति च प्राह पुनरेव स मे द्विजः ५
धर्मस्य जननी भद्रे
भवित्री त्वं शुभानने ।
वशे स्थास्यन्ति ते देवा
यांस्त्वमावाहयिष्यसि ॥ ६
इत्युक्त्वाऽन्तर्हितो विप्र-
स्ततोऽहं विस्मिताऽभवम् ।
न च सर्वास्ववस्थासु
स्मृतिर्मे विप्रणश्यति ॥ ७
अथ हर्म्यतलस्थाहं रविमुद्यन्तमीक्षती ।
संस्मृत्य तदृषेर्वाक्यं स्पृहयन्ती दिवानिशम्
स्थिताऽहं बालभावेन तत्र दोषमबुद्ध्यती ।
अथ देवः सहस्रांशुर्मत्समीपगतोऽभवत् ॥ ९
द्विधा कृत्वाऽऽत्मनो देहं भूमौ च गगनेऽपि च
तताप लोकानेकेन द्वितीयेनागमत्स माम् १०
स मामुवाच वेपन्तीं वरं मत्तो वृणीष्व ह ।
गम्यतामिति तं चाहं प्रणम्य शिरसाऽवदम्
स मामुवाच तिग्मांशुर्वृथाऽऽह्वानं न मे क्षमम्
धक्ष्यामि त्वां च विप्रं च येन दत्तो वरस्तव
तमहं रक्षती विप्रं शापादनपकारिणम् ।
पुत्रो मे त्वत्समो देव भवेदिति ततोऽब्रुवम् ॥
ततो मां तेजसाऽऽविश्य
मोहयित्वा च भानुमान् ।
उवाच भविता पुत्र-
स्तवेत्यभ्यगमद्दिवम् ॥ १४
ततोऽहमन्तर्भवने पितुर्वृत्तान्तरक्षिणी ।
गूढोत्पन्नं सुतं बालं जले कर्णमवासृजम् १५
नूनं तस्यैव देवस्य प्रसादात्पुनरेव तु ।
कन्याऽहमभवं विप्र यथा प्राह स मामृषेः ॥
स मया मूढया पुत्रो ह्ययाचानोऽप्युपेक्षितः ।
तन्मां दहति विप्रर्षे यथा सुविदितं तव ॥ १७
यदि पापमपापं वा यदेतद्विद्वनं मया ।
तं द्रष्टुमिच्छामि भगवन्नयनेतुं त्वमर्हसि ॥
यच्चास्य राज्ञो विदितं हृदिस्थं भवतोऽनघ ।
तं चायं लभतां कामपद्यैव मुनिसत्तम ॥ १९
इत्युक्तः प्रत्युवाचेदं व्यासो वेदविदां वरः ।
साधु सर्वमिदं भाव्यमेवमेतद्यथ ऽऽत्थ माम्
अपराधश्च ते नास्ति कन्याभावं गता ह्यसि
देवाश्चैश्वर्यवन्तो वै शरीराण्याविशन्ति वै
सन्ति देवनिकायाश्च संकल्पाज्जनयन्ति ये ।
वाचा दृष्ट्या तथा स्पर्शात्संयोगेति पञ्चधा
मनुष्यधर्मो दैवेन धर्मेण हि न दुष्यति ।
इति कुन्ति विजानीहि व्येतु ते मानसो ज्वरः
सर्वं बलवतां पथ्यं सर्वं बलवतां शुचे ।
सर्वं बलवतां धर्मः सर्वं बलवतां स्वकम्॥ २४

इति श्रीमहाभारते आश्रमवासिके पर्वणि पुत्रदर्शनपर्वणि व्यासकुन्तीसंवादे त्रिंशत्तमोऽध्यायः ॥ ३० ॥



३०

भगवन्निति ॥ १ ॥ आगसस्त्यागै अपराधत्यागै ॥ ३ ॥संघर्षेण रत्या ॥ २२ ॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे त्रिंशत्तमोऽध्यायः ॥३०॥

३१

व्यास उवाच ।
भद्रे द्रक्ष्यसि गान्धारि
पुत्रान् भ्रातॄन्सखींस्तथा ।
वधूश्च पतिभिः सार्धं
निशि सुप्तोत्थिता इव ॥ १
कर्णं द्रक्ष्यति कुन्ती च सौभद्रं चापि यादवी
द्रौपदी पञ्च पुत्रांश्च पितॄन्भ्रातॄंस्तथैव च ॥ २
पूर्वमेवैष हृदये व्यवसायोऽभवन्मम ।
यदाहमि चोदितो राज्ञा भवत्या पृथयैव च ॥
न ते शोच्या महात्मानः सर्व एव नरर्षभाः
क्षत्रधर्मपराः सन्तस्तथा हि निधनं गताः ४
भवितव्यमवश्यं तत्सुरकार्यमनिन्दिते ।
अवतेरुस्ततः सर्वे देवभागा महीतलम् ॥ ५
गन्धर्वाप्सरसश्चैव पिशाचा गुह्यराक्षसाः ।
तथा पुण्यजनाश्चैव सिद्धा देवर्षयोऽपि च ॥६
देवाश्च दानवाश्चैव तथा देवर्षयोऽमलाः ।
त एते निधनं प्राप्ताः कुरुक्षेत्रे रणाजिरे ॥ ७
गन्धर्वराजो यो धीमान् धृतराष्ट्र इति श्रुतः
स एव मानुषे लोके धृतराष्ट्रः पतिस्तव ॥ ८
पाण्डुं मरुद्गणाद्विद्धि विशिष्टतममच्युतम् ।
धर्मस्यांशोऽभवत्क्षत्ता राजा चैव युधिष्ठिरः
कलिं दुर्योधनं विद्धि
शकुनिं द्वापरं तथा ।
दुःशासनादीन्विद्धि त्वं
राक्षसान् शुभदर्शने ॥ १०
मरुद्गणाद्भीमसेनं बलवन्तमरिन्दमम् ।
विद्धि त्वं तु नरर्षिमिमं पार्थं धनञ्जयम् ११
नारायणं हृषीकेशमश्विनौ यमजौ तथा ।
यः स वै पार्थादुद्भूतः संहर्षजननस्तथा ॥ १२
यश्च पाण्डवदायादो हतः षड्भिर्महारथैः ।
स सोम इह सौभद्रो योगादेवाभवद्द्विधा १३
द्विधा कृत्वाऽऽत्मनो देहमादित्यं तपतां वरम्
लोकांश्च तापयानं वै विद्धि कर्णं च शोभने
द्रौपद्या सह संभूतं धृष्टद्युम्नं च पावकात् ।
अग्नेर्भागं शुभं विद्धि राक्षसं तु शिखण्डिनम्
द्रोणं बृहस्पतेर्भागं विद्धि द्रौणिं च रुद्रजम् ।
भीष्मं च विद्धि गाङ्गेयं वसुं मानुषतां गतम् ॥
एवमेते महाप्रज्ञे देवा मानुष्यमेत्य हि ।
ततः पुनर्गताः स्वर्गं कृते कर्मणि शोभने॥ १७
यच्च वै हृदि सर्वेषां दुःखमेताद्यिरं स्थितम् ।
तदद्य व्यपनेष्यामि परलोककृताद्भयात् १८
सर्वे भवन्तो गच्छन्तु नदीं भागीरथीं प्रति ।
तत्र द्रक्ष्यथ तान्सर्वान् ये हतास्मिन् रणाजिरे

वैशम्पायन उवाच ।
इति व्यासस्य वचनं श्रुत्वा सर्वो जनस्तदा
महता सिंहनादेन गङ्गामभिमुखो ययौ ॥ २०
धृतराष्ट्रश्च सामात्यः प्रययौ सह पाण्डवैः ।
सहितो मुनिशार्दूलैर्गन्धर्वैश्च समागतैः ॥ २१
ततो गङ्गां समासाद्य क्रमेण स जनार्णवः ।
निवासमकरोत्सर्वो यथाप्रीति यथासुखम् ॥
राजा च पाण्डवैः सार्धमिष्टे देशे सहानुगः।
निवासमकरोद्धीमान् सस्त्रीवृद्धपुरःसरः २३
जगाम तदहश्चापि तेषां वर्षशतं यथा ।
निशां प्रतीक्ष्यमाणानां दिदृक्षूणां मृताञ्नृपान्
अथ पुण्यं गिरिवरमस्तमभ्यगमद्रविः ।
ततः कृताभिषेकास्ते नैशं कर्म समाचरन्२५

इति श्रीमहाभारते आश्रवासिके पर्वणि पुत्रदर्शनपर्वणि गङ्गातीरगमने एकत्रिंशोऽध्यायः ॥ ३१ ॥

३२

वैशम्पायन उवाच ।
ततो निशायां प्राप्तायां कृतसायाह्निक क्रियाः । व्यासमभ्यगमन्सर्वे ये तत्रासन्समागताः ॥१

३१

भद्रे द्रक्ष्यसीति ॥ १ ॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे एकत्रिंशोऽध्याय ॥ ३१ ॥

३२

ततो निशायामित्यस्मिन्नध्यायद्वये मृताना पुनर्दर्शनमुक्तम्

धृतराष्ट्रस्तु धर्मात्मा पाण्डवैः सहितस्तदा।
शुचिरेकमना सार्धमृषिभिस्तैरुपाविशत् ॥ २
गान्धार्या सह नार्यस्तु
सहिताः समुपाविशन्।
पौरजानपदश्चापि
जनः सर्वो यथावयः ॥ ३
ततो व्यासो महातेजाः
पुण्यं भागीरथीजलम्।
अवगाह्याजुहावाथ
सर्वान् लोकान् महामुनिः ॥ ४
पाण्डवानां च ये योधाः कौरवाणां च सर्वशः
राजानश्च महाभागा नानादेशनिवासिनः॥५
ततः सुतुमुलः शब्दो जलान्ते जनमेजय।
प्रादुरासीद्यथापूर्वं कुरुपाण्डवसेनयोः ॥ ६
ततस्ते पार्थिवाः सर्वे भीष्मद्रोणपुरोगमाः।
ससैन्याः सलिलात्तस्मात्समुत्तस्थुः सहस्रशः
विराटद्रुपदौ चैव सहपुत्रौ ससैनिकौ।
द्रौपदेयाश्च सौभद्रो राक्षसश्च घटोत्कचः ८
कर्णदुर्योधनौ चैव शकुनिश्च महारथः।
दुःशासनादयश्चैव धार्तराष्ट्रा महाबलाः ॥ ९
जारासन्धिर्भगदत्तो जलसन्धश्च वीर्यवान्।
भूरिश्रवाः शलः शल्यो वृषसेनश्च सानुजः॥
लक्ष्मणो राजपुत्रश्च धृष्टद्युम्नस्य चात्मजाः।
शिखण्डिपुत्राः सर्वे च धृष्टकेतुश्च सानुजः११
अचलो वृषकश्चैव राक्षसश्चाप्यलायुधः।
बाह्लिकः सोमदत्तश्च चेकितानश्च पार्थिवः ॥
एते चान्ये च बहवो बहुत्वाद्ये न कीर्तिताः।
सर्वे भासुरदेहास्ते समुत्तस्थुर्जलात्ततः ॥ १३
यस्य वीरस्य यो वेषो यो ध्वजो यच्च वाहनं
तेन तेन व्यदृश्यन्त समुपेता नराधिपाः॥ १४
दिव्याम्बरधराः सर्वे सर्वे भ्राजिष्णुकुण्डलाः
निर्वैरा निरहंकारा विगतक्रोधमत्सराः ॥१५
गन्धर्वैरुपगीयन्तः स्तूयमानाश्च बन्दिभिः।
दिव्यमाल्याम्बरधरा वृताश्चाप्सरसां गणैः॥
धृतराष्ट्रस्य च तदा दिव्यं चक्षुर्नराधिप।
मुनिः सत्यवतीपुत्रः प्रीतः प्रादात्तपोबलात् ॥
दिव्यज्ञानबलोपेता
गान्धारी च यशस्विनी।
ददर्श पुत्रांस्तान् सर्वान्
ये चान्येऽपि मृधे हताः ॥ १९
तदद्भुतमचिन्त्यं च सुमहल्लोमहर्षणम्।
विस्मितः स जनः सर्वो ददर्शानिमिषेक्षणः॥
तदुत्सवमहोदग्रं हृष्टनारीनराकुलम्।
आश्चर्यभूतं ददृशे चित्रं पटगतं यथा ॥ २०
धृतराष्ट्रस्तु तान् सर्वान् पश्यन्दिव्येन चक्षुषा
मुमुदे भरतश्रेष्ठ प्रसादात्तस्य वै मुनेः ॥ २१

इति श्रीमहाभारते आश्रमवासिके पर्वणि पुत्रदर्शनपर्वणि भीष्मादिदर्शने द्वात्रिंशोऽध्यायः ॥ ३२ ॥

तेन तेषा सत्त्वमस्तीति स्पष्टमुक्तम्। अतो मृताना सत्त्वमस्ति न वेति संशय परास्त। अथ भस्मीभूताना कथं प्रत्यक्षेण दर्शनं स्वप्नवदिति चेत् व्यासस्यैन्द्रजालिकत्वापत्त्या संशयोच्छेदकत्वानुपपत्ति। अथ देवताभावं गताना तेषा पुनर्भीष्मादिभावेन योगबलादभिव्यक्तिर्भवति। तर्हि भस्मीभूतस्य देहस्य पुनरुदयायोगात्तत्सदृशैर्देहान्तरैरुपेतानामेव तेषा दर्शनमिति वाच्यम्। तथाऽपि देहान्तरे ममायं भर्तेति बुद्धिमतीना स्त्रीणा भ्रातिरिव पूर्वदेहनाशस्य दृढतरस्मरणात् अस्मरणे पुन स्वप्नतुल्यतेति तुल्यम्। अत्र ब्रूम। हार्दविद्या प्रकृत्य श्रूयते-त इमे सत्या कामा अनृतापिधाना इति। तस्माद्दहराकाशं प्रकृत्य एतत्सत्य ब्रह्मपुरमस्मिन्सर्वे कामा समाहिता इति। तथा यो यो ह्यस्येत प्रैति न तमिह दर्शनायोपलभते इत्युपक्रम्य ये चास्येह जीवा ये च प्रेत्य यच्चान्यदिच्छन्न लभते सर्वे तदत्र गत्वा विन्दत इत्यादि। सत्यं ब्रह्मपुर हृदम्बरमित्यर्थ। समस्त सदा सन्नेवास्त्यत एव तत्र मुनय पश्यन्त्यतीतादिकं मिथ्याब्रह्मपुर शरीरममुना सत्यपुरं छादितं सर्पेण स्त्रगेवेत्यमुष्य विलये सत्यं पुरं प्रकाशते तस्मादविद्याप्रत्युपस्थापितमपारमार्थिकं जैवं रूपम्। कर्तृभोक्तृरागद्वेषाद्यनेकानर्थकलुषितं तद्विलयनेन तद्विपरीतमपहतपाप्मत्वादिविशिष्टं पारमेश्वरं रूपं विद्यया प्रतिपद्यते सर्पादिविलयने रज्ज्वादिवदिति भाष्याच्च। ब्राह्मलौकिका एव सत्या भीष्मादयोऽकृतैर्जन्मादिभिर्भावविकारैरविर्भूय तिरोभूता सन्तो महर्षिविद्ययाऽऽविर्भूय स्त्र्यादिभिश्च याथात्म्येन गृहीता सन्तस्ताभि सह रेमिरे इति युक्तमुत्पश्याम। विशेषस्त्वस्मत्कृते वेदान्तकतके दहराधिकरणे द्रष्टव्य। अक्षरार्थस्तु स्पष्ट एव ॥ १ ॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे द्वात्रिंशोऽध्याय. ॥ ३२ ॥

३३

वैशम्पायन उवाच ।
ततस्ते पुरुषश्रेष्ठाः समाजग्मुः परस्परम् ।
विगतक्रोधमात्सर्याः सर्वे विगतकल्मषाः १
विधिं परममास्थाय ब्रह्मर्षिविहितं शुभम् ।
संहृष्टमनसः सर्वे देवलोक इवामराः ॥ २
पुत्रः पित्रा च मात्रा च
भार्याश्च पतिभिः सह ।
भ्रात्रा भ्राता सखा चैव
सख्या राजन्समागताः ॥ ३
पाण्डवास्तु महेष्वासं कर्णं सौभद्रमेव च ।
संप्रहर्षात्समाजग्मुर्द्रौपदेयांश्च सर्वशः ॥ ४
ततस्ते प्रीयमाणा वै कर्णेन सह पाण्डवाः ।
समेत्य पृथिवीपाल सौहृद्ये च स्थिताऽभवन्
परस्परं समागम्य योधास्ते भरतर्षभ ।
मुनेः प्रसादात्ते ह्येवं क्षत्रिया नष्टमन्यवः ॥ ६
असौहृदं परित्यज्य सौहृदे पर्यवस्थिताः ।
एवं समागताः सर्वे गुरुभिर्बांधवैः सह ॥ ७
पुत्रैश्च पुरुषव्याघ्राः कुरवोऽन्ये च पार्थिवाः ।
तां रात्रिमखिलामेवं विहृत्य प्रीतमानसाः ८
मेनिरे परितोषेण
नृपाः स्वर्गसदो यथा ।
नात्र शोको भयं त्रासो
नारतिर्नोयशोऽभवत् ॥ ९
परस्परं समागम्य योधाना भरतर्षभ ।
समागतास्ताः पितृभिर्भ्रातृभिः पतिभिः सुतैः
मुदं परमिकां प्राप्य नार्यो दुःखमथात्यजन् ।
एकां रात्रिं विहृत्यैव ते वीरास्ताश्च योषितः
आमन्त्र्यान्योन्यमाश्लिष्य ततो जग्मुर्यथागतं
ततो विसर्जयामास लोकास्तान्मुनिपुङ्गवः ॥
क्षणेनान्तर्हिताश्चैव प्रेक्षतामेव तेऽभवन् ।
अवगाह्य महात्मानः पुण्या भागीरथीं नदीम्
सरथाः सध्वजाश्चैव स्वानि वेश्मानि भेजिरे
देवलोकं ययुः केचित्केचिद्ब्रह्मसदस्तथा १४
केचिच्च वारुणं लोकं केचित्कौबेरमाप्नुवन्
ततो वैवस्वतं लोकं कोचिच्चैवाप्नुवन्नृपाः ॥ १५
राक्षसानां पिशाचानां
केचिच्चाप्युत्तरान्कुरून् ।
विचित्रगतयः सर्वे
यानवाप्यामरैः सह ॥ १६
आजग्मुस्ते महात्मानः सवाहाः सपदानुगाः
गतेषु तेषु सर्वेषु सलिलस्थो महामुनिः१७
धर्मशीलो महातेजाः कुरूणां हितकृत्तथा ।
ततः प्रोवाच ताः सर्वाः क्षत्रिया निहतेश्वराः
या याः पतिकृतान् लोका-
निच्छन्ति परमस्त्रियः ।
ता जाह्नवीजलं क्षिप्र-
मवगाहन्त्वतन्द्रिताः ॥ १९
ततस्तस्य वचः श्रुत्वा श्रद्दधाना वरांगनाः ।
श्वशुरं समनुज्ञाप्य विविशुर्जाह्नवीजलम् २०
विमुक्ता मानुषैर्देहैस्ततस्ता भर्तृभिः सह ।
समाजग्मुस्तदा साध्व्यः सर्वा एव विशांपते
एवं क्रमेण सर्वास्ताः शीलवत्यः पतिव्रताः ।
प्रविश्य क्षत्रिया मुक्ता जग्मुर्भर्तृसलोकताम्
दिव्यरूपसमायुक्ता दिव्याभरणभूषिताः ।
दिव्यमाल्याम्बरधरा यथाऽऽसां पतयस्तथा
ताः शीलगुणसपन्ना विमानस्था गतक्लमाः ।
सर्वाः सर्वगुणोपेताः स्वस्थानं प्रतिपेदिरे २४
यस्य यस्य तु यः कामस्तस्मिन्काले बभूव ह ।
तं तं विसृष्टवान्व्यासो वरदो धर्मवत्सलः ॥
तच्छ्रुत्वा नरदेवानां पुनरागमन नराः ।
जहृषुर्मुदिताश्चासन्नानादेशगता अपि ॥ २६
प्रियैः समागमं तेषां यः सम्यक् शृणुयान्नरः
प्रियाणि लभते नित्यमिह च प्रेत्य चैव सः
इष्टबान्धवसंयोगमनायासमनामयम् ।
यश्चैतच्छ्रावयेद्विद्वान् विदुषो धर्मवित्तमः २८
स यशः प्राप्नुयाल्लोके परत्र च शुभां गतिम् ।
स्वाध्याययुक्ता मनुजास्तपोयुक्ताश्च भारत ॥
साध्वाचारा दमोपेता दाननिर्धूतकल्मषाः ।
ऋजवः शुचयः शान्ता हिंसानृतविवर्जिताः
आस्तिकाः श्रद्दधानाश्च धृतिमन्तश्च मानवाः
श्रुत्वाऽऽश्चर्यमिदं पर्व ह्यवाप्स्यन्ति परां गतिं

३३
तत इति ॥ १ ॥

इति श्रीमहाभारते आश्रमवासिके पर्वणि पुत्रदर्शनपर्वणि स्त्रीणां स्वस्वपतिलोकगमने त्रयस्त्रिंशोऽध्यायः ॥ ३३ ॥



३४

सौतिरुवाच ।

एतच्छ्रुत्वा नृपो विद्वान् हृष्टोऽभूज्जनमेजयः
पितामहानां सर्वेषां गमनागमनं तदा ॥ १
अब्रवीच्च मुदा युक्तः पुनरागमनं प्रति ।
कथं नु त्यक्तदेहानां पुनस्तद्रूपदर्शनम् ॥ २
इत्युक्तः स द्विजश्रेष्ठो व्यासशिष्यः प्रतापवान्
प्रोवाच वदतां श्रेष्ठस्तं नृपं जनमेजयम् ॥ ३

वैशम्पायन उवाच ।

अविप्रणाशः सर्वेषां कर्मणामिति निश्चयः।
कर्मजानि शरीराणि तथैवाकृतयो नृप ॥ ४
महाभूतानि नित्यानि भूताधिपतिसंश्रयात् ।
तेषां च नित्यसंवासो न विनाशो वियुज्यतां
अनायासकृतं कर्म सत्यः श्रेष्ठः फलागमः ।
आत्मा चैभिः समायुक्तः सुखदुःखमुपाश्नुते ६
अविनाश्यस्तथायुक्तः क्षेत्रज्ञ इति निश्चयः ।
भूतानामात्मको भावो यथाऽसौ न वियुज्यते
यावन्न क्षीयते कर्म तावत्तस्य स्वरूपता ।
क्षीणकर्मा नरो लोके रूपान्यत्वं नियच्छति
नानाभावास्तथैकत्वं शरीर प्राप्य संहताः ।
भवन्ति ते तथा नित्याः पृथग्भाव विजानतां

इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे त्रयस्त्रिंशोऽध्याय ॥ ३३ ॥

३४

पूर्वाध्यायद्वयोक्तमेवार्थं प्रश्नोत्तराभ्या निरूपयति—**एतच्छ्रुत्वेत्यादिना** ॥ १॥ कथं नु त्यक्ता भस्मीभूता ये देहास्तेषा तद्रूपेणैव पूर्वरूपेणैव दर्शनं कथमित्यर्थ ॥ २ ॥ अवीति युग्मम् । सर्वेषा देवासुरमनुष्याणा कर्माणि कुर्वता कर्मणा भोगमन्तरेण कदाचिदपि विप्रणाशो नास्ति । यथा स्वप्ने शुभाशुभै कर्मभि शुभमशुभं वा स्वाप्न देहं प्राप्य तद्वारा कर्मफलं सुखदु खादिक भुक्त्वा कर्मोपरतौ सत्या त देहं संहरति । जाग्रद्देहस्तु तदानीमविकृत एव तिष्ठति । एवं कर्मजेषु मानुषादिदेहेषु नश्यत्स्वपि हार्दाकाशस्था पित्रादिदेहा अविनष्टा एव सन्ति । अत एवाथ य इहात्मानमनुविद्य व्रजन्त्येता२श्च सत्यान् कामा२स्तेषा२सर्वेषु लोकेषु कामचारो भवति स यदि पितृलोककामो भवति संकल्पादेवास्य पितर समुत्तिष्ठन्ति तेन पितृलोकेन संपन्नो महीयते इति श्रुति । सत्याना पित्रादीनामुत्थान दर्शयति ॥ ४ ॥ तदेतदाह—**महाभूतानीति** । भूताना प्राणिनामधिपतेरीश्वरस्य संश्रयान्महाभूतान्यस्मदादिशरीरापेक्षया अविनाशित्वादियोगान्महाभूतानि हार्दाकाशस्था पित्रादयस्तस्यैव सम्बधान्नित्यानि । कर्मजानि तु भूतानि कर्मक्षये विलीयन्त इति भाव । तेषा च महाभूताना नित्याना शरीराणामनित्यै· शरीरै सह सवासस्तादात्म्येनावस्थान संसारदशायामस्ति । वियुज्यता अनित्याना नाशे तै सह वियुज्यमानाना तेषा नित्याना विनाशो न। नास्य जरयैतज्जीर्यति न वधेनास्य हन्यत एतत्सत्य ब्रह्मपुरमिति श्रुते । तस्मा न्कर्मजाना नाशेऽप्यकर्मजाना हार्दाकाशस्थाना पित्रादिदेहानामविनाशात्पुनस्तद्रूपेण तेषा दर्शनं युक्तमेव ॥ ५ ॥ कथमेतदवाप्यते इत्यत आह—**अनायासेति** । प्रवृत्तिरूपं कर्म आयासकृतं तद्विपरीत तु निवृत्तिरूप कर्म अनायासकृतम् । तस्मादयं सत्य श्रेष्ठश्च उक्तविध फलागमो भवति । एभिरायासयुक्तै कर्मभि ॥ ६ ॥ तर्हि कर्मसम्बन्धादात्मा नश्यति नेत्याह—**अविनाश्य इति** । यद्यपि तु खयोग आत्मनोऽस्ति तथापि क्षेत्रज्ञ आत्मा तैर्तु खैरविनाश्य एव अविकार्य एव असंगत्वात् । वधस्य चाध्यासिकत्वात् । अत्र दृष्टान्तमाह—**भूतानामिति** । यथामौ भूताना अस्मदादिशरीराणाम् । आत्मकः आत्मन प्रतिकृतिर्दर्पणादौ प्रतिबिम्बो दर्पणधर्मान् मलिनत्वादीननुकुर्वाणोऽपि तन्नाशान्नश्यति । न वियुज्यत इत्यस्य न नश्यतीत्यर्थ । एवं क्षेत्रक्षेत्रज्ञयोगेऽपि द्रष्टव्यम् ॥७॥ यावत्कर्म देहारंभकमस्ति तावत्तस्य देहस्य स्वरूपता तन्नात्मत्वाध्यास इत्यर्थ । कर्मक्षये तु देहान्तरे आत्मत्वाध्यासो भवतीत्याह—**क्षीणेति** ॥८॥ ये नानाभावा भूतेन्द्रियादयो भिन्ना पदार्था शरीर प्राप्य एकत्वं देवदत्तोऽह मनुष्यपुत्र इति देहादितादात्म्य संहता सप्राप्तास्ते एव भावा देहादीनामात्मन पृथक्त्व विजानता योगिना नित्या भवन्ति । अज्ञानिना ये अनित्या भावास्त एव ज्ञानिना नित्यात्मरूपा भवन्तीत्यर्थ ॥ ९ ॥

अश्वमेधे श्रुतिश्चेयमश्वसंज्ञपनं प्रति ।
लोकान्तरगता नित्यं प्राणा नित्यं शरीरिणां
अहं हितं वदाम्येतत्प्रियं चेत्तव पार्थिव ।
देवयाना हि पथानः श्रुतास्ते यज्ञसंस्तरे ११
आहूतो यत्र यज्ञस्ते तत्र देवा हितास्तव ।
यदा समन्विता देवाः पशूना गमनेश्वराः १२
गतिमन्तश्च तेनेष्टा नान्ये नित्या भवन्त्युत ।
नित्येऽस्मिन्पञ्चके वर्गे नित्ये चात्मनि पूरुषः
अस्य नानासमायोगं यः पश्यति वृथामतिः
वियोगे शोचतेऽत्यर्थं स बाल इति मे मतिः
वियोगे दोषदर्शी यः संयोगं स विसर्जयेत् ।
असंगे संगमो नास्ति दुःख भुवि वियोगजम्
परापरज्ञस्त्वपरो नाभिमानादुदीरितः ।
अपरज्ञः परां बुद्धिं ज्ञात्वा मोहाद्विमुच्यते ॥
अदर्शनादापतितः पुनश्चादर्शनं गतः ।
नाहं तं वेद्मि नासौ मां न च मेऽस्ति विरागता
येन येन शरीरेण करोत्ययमनीश्वरः ।
तेन तेन शरीरेण तदवश्य मुपाश्नुते ।
मानसं मनसाऽऽप्नोति शरीरं च शरीरवान्१८

इति श्रीमहाभारते आश्रमवासिके पर्वणि पुत्रदर्शनपर्वणि जनमेजयं प्रति वैशम्पायनवाक्ये चतुस्त्रिंशोऽध्यायः ॥ ३४ ॥

३५

वैशम्पायन उवाच ।

अदृष्ट्वा तु नृपः पुत्रान् दर्शनं प्रतिलब्धवान् ।
ऋषेः प्रसादात्पुत्राणां स्वरूपाणां कुरूद्वह ॥ १
स राजा राजधर्मांश्च ब्रह्मोपनिषदं तथा ।
अवाप्तवान्नरश्रेष्ठो बुद्धिनिश्चयमेव च ॥ २

संज्ञपनं मारणं तदा हि सूर्य ते चक्षु वात प्राण इत्यादयो मन्त्रा पठ्यन्ते ततो लिंगाद्गम्यते यत् शरीरिणा प्राणा इन्द्रियाणि नित्यं निश्चितं नित्य सर्वदा लोकान्तरे गता इति । तेन सर्व शरीरी विभुरेवास्ति न तूपाधिपरिच्छिन्न परिच्छिन्नत्वाभिमानस्त्वस्याविद्यक इति भाव ॥ १० ॥ तव तु ज्ञानेऽधिकाराभावात् सोपासनकर्मप्राप्यं देवयानमार्गमेवाश्रयेत्याह—**अहमिति** । ते तव योग्या इति शेष ॥ ११ ॥ यत्र काले ते त्वया यज्ञ आहूत कृतस्तत्र तदैव देवास्तव हिता सखायो जाता यदैवं तदैव देवा । पशूना जीवाना गमने तत्तल्लोकप्राप्तौ ईश्वरा निग्रहानुग्रहकरा ॥१२॥ यस्मादेवं तस्मान्नित्या जीवा देवानिष्ठा गतिमन्तो भवान्ति नान्ये अयजमाना एव सार्धेन कर्मनिष्ठामुक्त्वा ज्ञाननिष्ठामाह सार्धेन—**नित्ये इति** । पाञ्चभौतिको देववर्ग सर्वोऽपि नित्य पुरुषश्च तद्दृष्टा नित्य ॥ १३ ॥ उभयोरपि नित्ययो सतोर्योऽस्य नानायोगं अनेकदेहसम्बन्धं पश्यति स वृथामतिर्वियोगे पितृपुत्रादिनाशे शोचति मौढ्यात् । उक्तरीत्या न देहो नश्यति नाप्यात्मेति निर्निमित्तस्तेषा शोक इति भाव ॥१४॥ यदि स्त्र्यादिनाशाद्दु ख पश्यति तर्हि स्त्र्यादीना पत्रिग्रह एव न कर्तव्यः। न हि वन्ध्याया. पुत्रशोकार्तिरास्ति वस्तुतस्त्वसंगे आत्मनि वियोगज दु ख वा स्त्र्यादिसंगमो वा नास्तीत्याह—**असग इति**।१५। **परेति**। अपरस्तु उक्तविधा ज्ञाननिष्ठामप्राप्तस्तु परापरज्ञो नित्यानित्यविभागमात्रज्ञ अभिमानादेहादितादात्म्यात् उपासनाबलेन उदीरित उत्क्षिप्त अपरज्ञः सगुणब्रह्मवित् भूत्वा पश्चात्परा बुद्धिं निर्विशेषवस्तुज्ञानं प्राप्य मोहान्मूलाज्ञानाद्विमुच्यते ॥ १६ ॥ मुक्तस्य लक्षणमाह—**अदर्शनादिति** । कर्मकर्तुरभावाददर्शनं प्रत्यक् चैतन्य तस्मादापतितस्तत्रैव च लीनोऽतस्त मुक्तमहं न वेद्मि । अगोचरत्वात् असौ च मा न वेति करणाभावात् तर्हि त्वमपि तादृक्तो न भवसीत्याह—**न च मेऽस्ति विरागतेति** । परं वैराग्यमेव मुख्यं मोक्षसाधनमित्यर्थ ॥१७॥ **येनेति** । मनसा कृतं पापं मानसतापेनैवानुभूयते एवं शरीरेण कृतं शारीरेणोपतापेनेति कायवाङ्मनसा चापल त्यक्त्वा वायुनिरोधं कुर्यादिति सार्धश्लोकार्थ ॥ १८ ॥

इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे चतुस्त्रिंशोऽध्याय ॥ ३४ ॥

३५

अदृष्ट्वेति ॥१॥ स धृतराष्ट्रो राजा विदुरश्च सिद्धिं **ययौ** इति द्वयो सबध । तत्रापि विदुरस्तपोबलात् धृतराष्ट्रो व्यासं समासाद्येति सम्बन्ध ॥ २ ॥

विदुरश्च महाप्राज्ञो ययौ सिद्धिं तपोबलात् ।
धृतराष्ट्रः समासाद्य व्यासं चैव तपस्विनम् ३

जनमेजय उवाच ।

ममापि वरदो व्यासो दर्शयेत्पितरं यदि ।
तदुपवेषवयसं श्रद्दध्यां सर्वमेव ते ॥ ४
प्रियं मे स्यात्कृतार्थश्च स्यामहं कृतनिश्चयः ।
प्रसादाद्दषिमुख्यस्य मम कामः समृध्यताम् ५

सौतिरुवाच ।

इत्युक्तवचने तस्मिन्नृपे व्यासः प्रतापवान् ।
प्रसादमकरोद्धीमानानयच्च परिक्षितम् ॥ ६
ततस्तदुपवयसमागतं नृपतिं दिवः ।
श्रीमन्तं पितरं राजा ददर्श जनमेजयः ॥ ७
शमीकं च महात्मानं पुत्रं तं चास्य शृंगिणम् ।
अमात्या ये बभूवुश्च राज्ञस्ताश्च ददर्श ह ॥ ८
ततः सोऽवभृथे राजा मुदितो जनमेजयः ।
पितरं ज्ञापयामास स्वयं सख्यौ च पार्थिवः ९
ज्ञात्वा स नृपतिर्विप्रमास्तीकमिदमब्रवीत् ।
यायावरकुलोत्पन्नं जरत्कारुसुतं तदा ॥ १०
आस्तीक विविधाश्चर्या यज्ञोऽयमिति मे मतिः
यद्ह्ययं पिता प्राप्तो मम शोकप्रणाशनः ॥११

आस्तीक उवाच ।

ऋषिर्द्वैपायनो यत्र पुराणस्तपसो निधिः ।
यज्ञे कुरुकुलश्रेष्ठ तस्य लोकावुभौ जितौ १२
श्रुतं विचित्रमाख्यान त्वया पाण्डवनन्दन ।
सर्पाश्च भस्मसान्नीता गतश्च पदवीं पितुः १३
कथंचित्तक्षको मुक्तः सत्यत्वात्तव पार्थिव ।
ऋषयः पूजिताः सर्वे गतिर्दृष्टा महात्मनः१४
प्राप्तः सुविपुलो धर्मः श्रुत्वा पापविनाशनम् ।
विमुक्तो हृदयग्रन्थिरुदारजनदर्शनात् ॥ १५
ये च पक्षधरा धर्मे सद्वृत्तरुचयश्च ये ।
यान् दृष्ट्वा हीयते पापं तेभ्यः कार्या नमस्क्रिया

सौतिरुवाच ।

एतच्छ्रुत्वा द्विजश्रेष्ठात्स राजा जनमेजयः।
पूजयामास तमृषिमनुमान्य पुनः पुनः ॥ १७
पप्रच्छ तमृषिं चापि वैशम्पायनमच्युतम् ।
कथावशेषं धर्मज्ञो वनवासस्य सत्तम ॥ १८

इति श्रीमहाभारते आश्रमवासिके पर्वणि पुत्रदर्शनपर्वणि जनमेजयस्य स्वपितृदर्शने पञ्चत्रिंशोऽध्यायः ॥ ३५ ॥



३६

जनमेजय उवाच ।

दृष्ट्वा पुत्रांस्तथा पौत्रान् सानुबन्धान् जनाधिपः
धृतराष्ट्रः किमकरोद्राजा चैव युधिष्ठिरः ॥ १
वैशम्पायन उवाच ।
तद्दृष्ट्वा महदाश्चर्यं पुत्राणां दर्शनं नृप ।
वीतशोकः स राजर्षिः पुनराश्रममागमत ॥२
इतरस्तु जनः सर्वस्ते चैव परमर्षयः ।
प्रतिजग्मुर्यथाकामं धृतराष्ट्राभ्यनुज्ञया ॥ ३
पाण्डवास्तु महात्मानो लघुभूयिष्ठसैनिकाः।
पुनर्जग्मुर्महात्मानं सदारास्तं महीपतिम् ॥ ४
तमाश्रमपदं धीमान् ब्रह्मर्षिर्लोकपूजितः ।
मुनिः सत्यवतीपुत्रो धृतराष्ट्रमभाषत ॥ ५
धृतराष्ट्र महाबाहो शृणु कौरवनन्दन ।
श्रुतं ते ज्ञानवृद्धानामृषीणां पुण्यकर्मणाम् ६
अद्धाभिजनवृद्धानां वेदवेदाङ्गवेदिनाम् ।
धर्मज्ञानां पुराणानां वदतां विविधाः कथाः
मा स्म शोके मनः कार्षीर्दिष्टेन व्यथते बुधः ।
श्रुतं देवरहस्यं ते नारदाद्देवदर्शनात् ॥ ८
गतास्ते क्षत्रधर्मेण शस्त्रपूतां गतिं शुभाम् ।
यथा दृष्टास्त्वया पुत्रास्तथा कामविहारिणः ९
युधिष्ठिरः स्वयं धीमान् भवन्तमनुरुध्यते ।
सहितो भ्रातृभिः सर्वैः सदारः ससुहृज्जनः ॥

ज्ञापयामास आलोचितवान् ज्ञापयामासेति पाठ स्पष्ट ॥९॥ पापविनाशनं इतिहासमिति शेष. ॥ १५ ॥ पक्षधरा पक्षस्थापका ॥ १६॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे पञ्चत्रिंशोऽध्याय ॥ ३५ ॥

३६

दृष्ट्वेति ॥ १ ॥ आश्रमपदं आश्रमं प्राप्तम् ॥ ५ ॥

विसर्जयैनं यात्वेष स्वराज्यमनुशासताम् ।
मासः समधिकस्तेषामतीतो वसतां वने ११
एतद्धि नित्यं यत्नेन पदं रक्ष्यं नराधिप ।
बहुप्रत्यर्थिकं ह्येतद्राज्यं नाम कुरुद्वह ॥ १२
इत्युक्तः कौरवो राजा व्यासेनातुलतेजसा ॥
युधिष्ठिरमथाहूय वाग्मी वचनमब्रवीत् ॥ १३
अजातशत्रो भद्रं ते शृणु मे भ्रातृभिः सह ।
त्वत्प्रसादान्महीपाल शोको नास्मान्प्रबाधते
रमे चाहं त्वया पुत्र पुरेव गजसाह्वये ।
नाथेनानुगतो विद्वन्प्रियेषु परिवर्तिना ॥ १५
प्राप्तं पुत्रफलं त्वत्तः प्रीतिर्मे परमा त्वयि ।
न मे मन्युर्महाबाहो गम्यतां पुत्र मा चिरम् ॥
भवन्तं चेह संप्रेक्ष्य तपो मे परिहीयते ।
+तपोयुक्तं शरीरं च त्वां दृष्ट्वा धारितं पुनः१७
मातरौ ते तथैवेमे शीर्णपर्णकृताशने ।
मम तुल्यव्रते पुत्र न चिरं वर्तयिष्यतः ॥ १८
दुर्योधनप्रभृतयो दृष्ट्वा लोकान्तरं गताः ।
व्यासस्य तपसो वीर्याद्भवतश्च समागमात् ॥
प्रयोजनं च निर्वृत्तं जीवितस्य ममानघ ।
उग्रं तपः समास्थास्ये त्वमनुज्ञातुमर्हसि २०

त्वय्यद्य पिण्डः कीर्तिश्च
कुलं चेदं प्रतिष्ठितम् ।
श्वो वाऽद्य वा महाबाहो
गम्यतां पुत्र माचिरम् ॥ २१

राजनीतिः सुबहुशः श्रुता ते भरतर्षभ ।
संदेष्टव्यं न पश्यामि कृतं मे भवता विभो
वैशम्पायन उवाच ।

इत्युक्तवचनं तं तु नृपो राजानमब्रवीत् ।
न मामर्हसि धर्मज्ञ परित्यक्तुमनागसम् ॥ २३
कामं गच्छन्तु मे सर्वे भ्रातरोऽनुचरास्तथा ।
भवन्तमहमन्विष्ये मातरौ च यतव्रतः ॥ २४
तमुवाचाथ गान्धारी मैवं पुत्र शृणुष्व च ।
त्वय्यधीनं कुरुकुलं पिण्डश्च श्वशुरस्य मे २५
गम्यतां पुत्र पर्याप्तमेतावत्पूजिता वयम् ।
राजा यदाह तत्कार्यं त्वया पुत्र पितुर्वचः ॥
वैशम्पायन उवाच ।

इत्युक्तः स तु गान्धार्या कुन्तीमिदमभाषत।
स्नेहबाष्पाकुले नेत्रे ×प्रमृज्य रुदतीं वचः॥२७

विसर्जयति मां राजा
गान्धारी च यशस्विनी ।
भवत्यां बद्धचित्तस्तु
कथं यास्यामि दुःखितः ॥ २८

न चोत्सहे तपोविघ्नं कर्तुं ते धर्मचारिणि ।
तपसो हि परं नास्ति तपसा विन्दते महत्
ममापि न तथा राज्ञि राज्ये बुद्धिर्यथा पुरा ।
तपस्येवानुरक्तं मे मनः सर्वात्मना तथा ॥ ३०
शून्येयं च मही कृत्स्ना न मे प्रीतिकरी शुभे ।
बान्धवा नः परिक्षीणा बलं नो न यथा पुरा
पञ्चालाः सुभृशं क्षीणाः कथामात्रावशेषिताः
न तेषां कुलकर्तारं कञ्चित्पश्याम्यहं शुभे ३२
सर्वे हि भस्मसाद्गीतास्ते द्रोणेन रणाजिरे ।
अवशिष्टाश्च निहता द्रोणपुत्रेण वै निशि ३३
चेदयश्चैव मत्स्याश्च दृष्टपूर्वास्तथैव नः ।
केवलं वृष्णिचक्रं च वासुदेवपरिग्रहात् ॥ ३४
यद्दृष्ट्वा स्थातुमिच्छामि धर्मार्थं नार्थहेतुतः ।
शिवेन पश्य नः सर्वान् दुर्लभं तव दर्शनम् ॥
अविषह्यं च राजा हि तीव्रं चारप्स्यते तपः ।
एतच्छ्रुत्वा महाबाहुः सहदेवो युधां पतिः ॥
युधिष्ठिरमुवाचेदं बाष्पव्याकुललोचनः ।
नोत्सहेऽहं परित्यक्तुं मातरं भरतर्षभ ॥ ३७

प्रतियातु भवान् क्षिप्रं
तपस्तप्स्याम्यहं विभो ।
इहैव शोषयिष्यामि
तपसेदं कलेवरम् ॥ ३८

पादशुश्रूषणे रक्तो राज्ञो मात्रोस्तथाऽनयोः ।

तमुवाच ततः कुन्ती परिष्वज्य महाभुजम्
गम्यतां पुत्र मैवं त्वं वोचः कुरु वचो मम ।
आगमा वः शिवाः सन्तु स्वस्था भवत पुत्रकाः
उपरोधो भवेदेवमस्माकं तपसः कृते ।
त्वत्स्नेहपाशबद्धा च हीयेयं तपसः परात् ४१
तस्मात्पुत्रक गच्छ त्वं शिष्टमल्पं च नः प्रभो
एवं संस्तंभितं वाक्यैः कुन्त्या बहुविधैर्मनः ॥
सहदेवस्य राजेन्द्र राज्ञश्चैव विशेषतः ।
ते मात्रा समनुज्ञाता राज्ञा च कुरुपुङ्गवाः ४३

बहव. प्रत्यर्थिन· प्रार्थयाना शत्रवो यत्र तत् ॥ १२ ॥ नाथेन त्वया ॥ १५ ॥ अन्विष्ये सेविष्ये ॥ २४ ॥ शिष्टमायुरिति शेष ॥ ४२ ॥ + ' उपयुक्तं शरीरं च ' इति पा० × ' परिमृज्य विनीतवत् ' इति पा०

अभिवाद्य कुरुश्रेष्ठमामन्त्रयितुमारभन्।
युधिष्ठिर उवाच।
राज्यं प्रतिगमिष्यामः शिवेन प्रतिनन्दिताः
अनुज्ञातास्त्वया राजन्
गमिष्यामो विकल्मषाः।
एवमुक्तः स राजर्षि-
र्धर्मराज्ञा महात्मना॥ ४५
अनुजज्ञे स कौरव्यमभिनन्द्य युधिष्ठिरम्।
भीमं च बलिनां श्रेष्ठं सान्त्वयामास पार्थिवः
स चास्य सम्यङ्मेधावी प्रत्यपद्यत वीर्यवान्।
अर्जुनं च समाश्लिष्य यमौ च पुरुषर्षभौ ४७
अनुजज्ञे स कौरव्यः परिष्वज्याभिनन्द्य च।
गान्धार्या चाभ्यनुज्ञाताः कृतपादाभिवादनाः
जनन्या समुपाघ्राताः परिष्वक्ताश्च ते नृपम्
चक्रुः प्रदक्षिणं सर्वे वत्सा इव निवारणे॥४९
पुनः पुनर्निरीक्षन्तः प्रचक्रुस्ते प्रदक्षिणम्।
द्रौपदीप्रमुखाश्चैव सर्वाः कौरवयोषितः॥ ५०
न्यायतः श्वशुरे वृत्तिं प्रयुज्य प्रययुस्ततः।
श्वश्रूभ्यां समनुज्ञाताः परिष्वज्याभिनन्दिताः
संदिष्टाश्चेति कर्तव्यं प्रययुर्भर्तृभिः सह।
ततः प्रजज्ञे निनदः सूतानां युज्यतामिति ५२
उष्ट्राणां क्रोशतां चापि हयानां हेषतामपि।
ततो युधिष्ठिरो राजा सदारः सहसैनिकः।
नगरं हास्तिनपुरं पुनरायात्सबान्धवः॥ ५३

इति श्रीमहाभारते आश्रमवासिके पर्वणि पुत्रदर्शनपर्वणि युधिष्ठिरप्रत्यागमे षट्त्रिंशोऽध्यायः॥ ३६॥

समाप्तं चेदं पुत्रदर्शनपर्व॥ २॥



अथ नारदागमनपर्व।

३७

वैशम्पायन उवाच।
द्विवर्षोपनिवृत्तेषु पाण्डवेषु यदृच्छया।
देवर्षिर्नारदो राजन्नाजगाम युधिष्ठिरम्॥ १
तमभ्यर्च्य महाबाहुः कुरुराजो युधिष्ठिरः।
आसीनं परिविश्वस्तं प्रोवाच वदतां वरः॥२
चिरात्तु नानुपश्यामि भगवन्तमुपस्थितम्।
कच्चित्ते कुशलं विप्र शुभं वा प्रत्युपस्थितम् ३
के देशाः परिदृष्टास्ते किं च कार्यं करोमि ते।
तद्ब्रूहि द्विजमुख्यस्त्वं त्वं ह्यस्माकं परा गतिः
नारद उवाच।
चिरदृष्टोऽसि मेऽत्येवमागतोऽहं तपोवनात्
परिदृष्टानि तीर्थानि गङ्गा चैव मया नृप॥५
युधिष्ठिर उवाच।
वदन्ति पुरुषा मेऽद्य गङ्गातीरनिवासिनः।
धृतराष्ट्रं महात्मानमास्थितं परमं तपः॥ ६
अपि दृष्टस्त्वया तत्र कुशली स कुरूद्वहः।
गान्धारी च पृथा चैव सूतपुत्रश्च संजयः॥७
कथं च वर्तते चाद्य पिता मम स पार्थिवः।
श्रोतुमिच्छामि भगवन्यदि दृष्टस्त्वया नृपः ८
नारद उवाच।
स्थिरीभूय महाराज शृणु वृत्तं यथातथम्।
यथा श्रुतं च दृष्टं च मया तस्मिंस्तपोवने॥९
वनवासनिवृत्तेषु भवत्सु कुरुनन्दन।
कुरुक्षेत्रात्पिता तुभ्यं गंगाद्वारं ययौ नृप १०

नृपं प्रदक्षिणं चक्रुः। निवारणे स्तनपानादिति शेषः॥४९॥
इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे षट्त्रिंशोऽध्यायः॥ ३६॥

३७

द्विवर्षोपेति॥ १॥ मे मयाऽतिचिरं दृष्टोऽसीत्यर्थः॥ ५॥

गान्धार्या सहितो धीमान्
वध्वा कुन्त्या समन्वितः ।
संजयेन च सूतेन
साग्निहोत्रः सयाजकः ॥ ११
आतस्थे स तपस्तीव्रं पिता तव तपोधनः ।
वीटां मुखे समाधाय वायुभक्षोऽभवन्मुनिः
वने स मुनिभिः सर्वैः पूज्यमानो महातपाः ।
त्वगस्थिमात्रशेषः स षण्मासानभवन्नृपः ॥१३
गान्धारी तु जलाहारी
कुन्ती मासोपवासिनी ।
सञ्जयः षष्ठभुक्तेन
वर्तयामास भारत ॥ १४
अग्नीस्तु याजकास्तत्र जुहुवुर्विधिवत्प्रभो ।
दृश्यतोऽदृश्यतश्चैव वने तस्मिन्नृपस्य वै ॥ १५
अनिकेतोऽथ राजा स बभूव वनगोचरः ।
ते चापि सहिते देव्यौ सञ्जयश्च तमन्वयुः १६
सञ्जयो नृपतेर्नेता समेषु विषमेषु च ।
गान्धार्याश्च पृथा चैव चक्षुरासीदनिन्दिता
ततः कदाचिद्गङ्गायाः कच्छे स नृपसत्तमः ।
गंगायामाप्लुतो धीमानाश्रमाभिमुखोऽभवत्
अथ वायुः समुद्भूतो दावाग्निरभवन्महान् ।
ददाह तद्वनं सर्वं परिगृह्य समन्ततः ॥ १९
दह्यत्सु मृगयूथेषु द्विजिह्वेषु समंततः ।
वराहाणां च यूथेषु संश्रयत्सु जलाशयान् २०
समाविद्धे वने तस्मिन्प्राप्ते व्यसन उत्तमे ।
निराहारतया राजन्मन्दप्राणविचेष्टितः ॥ २१
असमर्थोऽपसरणे सुकृशे मातरौ च ते ।
ततः स नृपतिर्दृष्ट्वा वह्निमायान्तमन्तिकात् २२
इदमाह ततः सूत सञ्जयं जयतां वरः ।
गच्छ सञ्जय यत्राग्निर्न त्वां दहति कर्हिचित्
वयमत्राग्निना युक्ता गमिष्यामः परां गतिम्
तमुवाच किलोद्विग्नः सञ्जयो वदतां वरः २४
राजन्मृत्युरनिष्टोऽयं भविता ते वृथाग्निना ।
न चोपाय प्रपश्यामि मोक्षणे जातवेदसः २५
यदत्रानन्तरं कार्यं तद्भवान्वक्तुमर्हति ।
इत्युक्तः संजयेनेदं पुनराह स पार्थिवः ॥ २६
नैष मृत्युरनिष्टो नो निःसृतानां गृहात्स्वयम् ।
जलमग्निस्तथा वायुरथवाऽपि विकर्षणम् २७
तापसानां प्रशस्यन्ते गच्छ सञ्जय माचिरम्
इत्युक्त्वा सञ्जयं राजा समाधाय मनस्तथा
प्राङ्मुखः सह गान्धार्या
कुन्त्या चोपाविशत्तदा ।
सञ्जयस्तं तथा दृष्ट्वा
प्रदक्षिणमथाकरोत् ॥ २९
उवाच चैनं मेधावी युंक्ष्वात्मानमिति प्रभो ।
ऋषिपुत्रो मनीषी स राजा चक्रेऽस्य तद्वचः
सन्निरुध्येन्द्रियग्राममासीत्काष्ठोपमस्तदा ।
गान्धारी च महाभागा जननी च पृथा तव
दावाग्निना समायुक्ते स च राजा पिता तव ।
सञ्जयस्तु महामात्रस्तस्माद्दावादमुच्यत ॥ ३२
गङ्गाकूले मया दृष्टस्तापसैः परिवारितः ।
स तानामन्त्र्य तेजस्वी निवेद्यैतच्च सर्वशः ॥
प्रययौ सञ्जयो धीमान् हिमवन्तं महीधरम् ।
एव स निधनं प्राप्तः कुरुराजो महामनाः ३४
गान्धारी च पृथा चैव जनन्यौ ते विशांपते
यदृच्छयाऽनुव्रजता मया राज्ञः कलेवरम् ३५
तयोश्च देव्योरुभयोर्मया दृष्टानि भारत ।

ततस्तपोवने तस्मिन् समाजग्मुस्तपोधनाः
श्रुत्वा राज्ञस्तदा निष्ठां न त्वशोचन् गतीश्च ते
तत्राश्रौषमहं सर्वमेतत्पुषरुसत्तम ॥ ३७
यथा च नृपतिर्दग्धो देव्यौ ते चेते पाण्डव ।
न शोचितव्य राजेन्द्र स्वर्गतः स पृथिवीपतिः
प्राप्तवानग्निसयोगं गान्धारी जननी च ते ।

वैशम्पायन उवाच ।

एतच्छ्रुत्वा च सर्वेषां पाण्डवानां महात्मनां
निर्याणं धृतराष्ट्रस्य शोकः समभवन्महान् ।
अन्तःपुराणां च तदा महानार्तस्वरोऽभवत्
पौराणां च महाराज श्रुत्वा राज्ञस्तदा गतिम्
अहो धिगिति राजा तु विक्रुश्य भृशदुःखितः
ऊर्ध्वबाहुः स्मरन्मातुः प्ररुरोद युधिष्ठिरः ।
भीमसेनपुरोगाश्च भ्रातरः सर्व एव ते ॥ ४२
अन्तःपुरेषु च तदा सुमहान् रुदितस्वनः ।
प्रादुरासीन्महाराज पृथां श्रुत्वा तथागताम्
तं च वृद्धं तथा दग्धं हतपुत्रं नराधिपम् ।
अन्वशोचन्त ते सर्वे गान्धारीं च तपस्विनीं

दृश्यतोऽदृश्यत इति पश्यन्तमपश्यन्तं चानादृत्येत्यर्थ । नियमेन सान्निध्याभावात् ॥ १५ ॥ विकर्षणं अनशनम् ॥ २७ ॥ ऋषिपुत्रो व्यासपुत्र इति योगसामर्थ्यं सूचितम् ॥ ३० ॥ १ ' अग्निं ' इति पा० २ ' स्वर्गस्थ ' इति पा० ।

तस्मिन्नुपरते शब्दे मुहूर्तादिव भारत । निगृह्य बाष्पं धैर्येण धर्मराजोऽब्रवीदिदम् ॥ ४५

इति श्रीमहाभारते आश्रमवासिके पर्वणि नारदागमनपर्वणि दावाग्निना धृतराष्ट्रादिदाहे सप्तत्रिंशोऽध्यायः ॥ ३७ ॥



३८

युधिष्ठिर उवाच ।

तथा महात्मनस्तस्य तपस्युग्रे च वर्ततः । अनाथस्येव वचने तिष्ठत्स्वस्मासु बन्धुषु ॥ १
दुर्विज्ञेया गतिर्ब्रह्मन्पुरुषाणां मतिर्मम । यत्र वैचित्रवीर्योऽसौ दग्ध एवं वनाग्निना २
यस्य पुत्रशतं श्रीमदभवद्बाहुशालिनः । नागायुतबलो राजा स दग्धो हि दवाग्निना
यं पुरा पर्यवीजन्त तालवृन्तैर्वरस्त्रियः । तं गृध्राः पर्यवीजन्त दावाग्निपरिकालितम् ४
सूतमागधसंघैश्च शयानो यः प्रबोध्यते । धरण्यां स नृपः शेते पापस्य मम कर्मभिः ५
न च शोचामि गान्धारीं हतपुत्रां यशस्विनीं पतिलोकमनुप्राप्तां तथा भर्तृव्रते स्थिताम् ॥ ६
पृथामेव च शोचामि या पुत्रैश्वर्यमृद्धिमत् । उत्सृज्य सुमहद्दीप्तं वनवासमरोचयत् ॥ ७
धिग्राज्यमिदमस्माकं धिग्बलं धिक्पराक्रमम् क्षत्रधर्मं च धिग्यस्मान्मृता जीवामहे वयम्
सुसूक्ष्मा किल कालस्य गतिर्द्विजवरोत्तम । यत्समुत्सृज्य राज्यं सा वनवासमरोचयत् ९
युधिष्ठिरस्य जननी भीमस्य विजयस्य च । अनाथवत्कथं दग्धा इति मुह्यामि चिन्तयन्
वृथा सन्तर्पितो वह्निः खाण्डवे सव्यसाचिना उपकारमजानन्स कृतघ्न इति मे मतिः ॥ ११
यत्रादहत्स भगवान् मातरं सव्यसाचिनः । कृत्वा यो ब्राह्मणच्छद्म भिक्षार्थी समुपागतः
धिगग्निं धिक् च पार्थस्य विश्रुतां सत्यसन्धतां इदं कष्टतरं चान्यद्भगवन्प्रतिभाति मे ॥ १३
वृथाग्निना समायोगो यदभूत्पृथिवीपतेः । तथा तपस्विनस्तस्य राजर्षेः कौरवस्य ह ॥
कथमेवंविधो मृत्युः प्रशास्य पृथिवीमिमाम् । तिष्ठत्सु मन्त्रपूतेषु तस्याग्निषु महावने ॥ १५
वृथाग्निना समायुक्तो निष्ठां प्राप्तः पिता मम मन्ये पृथा वेपमाना कृशा धमनिसंतता ॥ १६
हा तात ! धर्मराजेति समाक्रन्दन्महाभये । भीम ! पर्याहि भयादिति चैवाभिवाशती १७
समन्ततः परिक्षिप्ता माताऽभून्मे दवाग्निना सहदेवः प्रियस्तस्याः पुत्रेभ्योऽधिक एव तु ॥
न चैनां मोक्षयामास वीरो माद्रवतीसुतः । तच्छ्रुत्वा रुरुदुः सर्वे समालिंग्य परस्परम् ॥
पाण्डवाः पञ्च दुःखार्ता 'भूतानीव युगक्षये' । तेषां तु पुरुषेन्द्राणां रुदतां रुदितस्वनः ॥ २०
प्रासादाभोगसंरुद्धे अन्वरौत्सीत्स रोदसी २१

इति श्रीमहाभारते आश्रमवासिके पर्वणि नारदागमनपर्वणि युधिष्ठिरविलापे अष्टत्रिंशोऽध्यायः ॥ ३८ ॥



इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे सप्तत्रिंशोऽध्याय ॥ ३७ ॥

३८

तथेति ॥१॥ इति श्रीमहाभारते आश्रमवासिके पर्वणि नैलकण्ठीये भारतभावदीपे अष्टत्रिंशोऽध्याय. ॥ ३८ ॥

३९

नारद उवाच ।

नासौ वृथाग्निना दग्धो यथा तत्र श्रुतं मया
वैचित्रवीर्यो नृपतिस्तत्ते वक्ष्यामि सुव्रत ॥ १
वनं प्रविशताऽनेन वायुभक्षेण धीमता ।
अग्नयः कारयित्वेष्टिमुत्सृष्टा इति नः श्रुतम् २
याजकास्तु ततस्तस्य तानग्नीन्निर्जने वने ।
समुत्सृज्य यथाकामं जग्मुर्भरतसत्तम ॥ ३
स विवृद्धस्तदा वह्निर्वने तस्मिन्नभूत्किल ।
तेन तद्वनमादीप्तमिति ते तापसाऽब्रुवन् ॥ ४
स राजा जाह्नवीतीरे यथा ते कथितं मया ।
तेनाग्निना समायुक्तः स्वेनैव भरतर्षभ ॥ ५
एवमावेदयामासुर्मुनयस्ते ममानघ ।
ये ते भागीरथीतीरे मया दृष्टा युधिष्ठिर ॥ ६
एवं स्वेनाग्निना राजा समायुक्तो महीपते ।
मा शोचिथास्त्वं नृपतिं गतः स परमां गतिं
गुरुशुश्रूषया चैव जननी ते जनाधिप ।
प्राप्ता सुमहतीं सिद्धिमिति मे नात्र संशयः ८
कर्तुमर्हसि राजेन्द्र तेषां त्वमुदकक्रियाम ।
भ्रातृभिः सहितः सर्वैरेतदत्र विधीयताम् ॥९

वैशम्पायन उवाच ।

ततः स पृथिवीपालः पाण्डवानां धुरंधरः ।
निर्ययौ सहसोदर्यः सदारश्च नरर्षभः ॥ १०
पौरजानपदाश्चैव राजभक्तिपुरस्कृताः ।
गंगां प्रजग्मुरभितो वाससैकेन संवृताः ॥ ११
ततोऽवगाह्य सलिले सर्वे ते नरपुंगवाः ।
युयुत्सुमग्रतः कृत्वा ददुस्तोयं महात्मने ॥१२
गान्धार्याश्च पृथायाश्च विधिवन्नामगोत्रतः ।
शौचं निवर्तयन्तस्ते तत्रोषुर्नगराद्बहिः ॥ १३
प्रेषयामास स नरान् विधिज्ञानाप्तकारिणः ।
गंगाद्वारं नरश्रेष्ठो यत्र दग्धोऽभवन्नृपः ॥ १४
तत्रैव तेषां कृत्यानि गंगाद्वारेऽन्वशात्तदा ।
कर्तव्यानीति पुरुषान् दत्तदेयान्महीपतिः १५
द्वादशेऽहनि तेभ्यः स कृतशौचो नराधिपः ।
ददौ श्राद्धानि विधिवद्दक्षिणावन्ति पाण्डवः
धृतराष्ट्रं समुद्दिश्य ददौ स पृथिवीपतिः ।
सुवर्णं रजतं गाश्च शय्याश्च सुमहाधनाः १७
गान्धार्यार्थैव तेजस्वी पृथायाश्च पृथक् पृथक्
संकीर्त्य नामनी राजा ददौ दानमनुत्तमम् ॥
यो यदिच्छति यावच्च तावत्स लभते नरः ।
शयनं भोजनं यानं मणिरत्नमथो धनम् ॥ १९
यानमाच्छादनं भोगान् दासीश्च समलंकृताः
ददौ राजा समुद्दिश्य तयोर्मात्रोर्महीपतिः २०
ततः स पृथिवीपालो दत्त्वा श्राद्धान्यनेकशः
प्रविवेश पुरं राजा नगरं वारणाह्वयम् ॥ २१
ते चापि राजवचनात्पुरुषा ये गताऽभवन् ।
संकल्प्य तेषां कुल्यानि पुनः प्रत्यागमंस्ततः
माल्यैर्गन्धैश्च विविधैरर्चयित्वा यथाविधि ।
कुल्यानि तेषां संयोज्य तदाचख्युर्महीपतेः ॥
समाश्वास्य तु राजानं धर्मात्मानं युधिष्ठिरम्
नारदोऽप्यगमद्राजन् परमर्षिर्यथेप्सितम् २४
एवं वर्षाण्यतीतानि धृतराष्ट्रस्य धीमतः ।
वनवासे तथा त्रीणि नगरे दश पञ्च च ॥ २५
हतपुत्रस्य संग्रामे दानानि ददतः सदा ।
ज्ञातिसम्बन्धिमित्राणां भ्रातॄणां स्वजनस्य च
युधिष्ठिरस्तु नृपतिर्नीतिप्रीतमनास्तदा ।
धारयामास तद्राज्यं निहतज्ञातिबान्धवः२७

इति श्रीमहाभारते आश्रमवासिके पर्वणि नारदागमनपर्वणि श्राद्धदाने ऊनचत्वारिंशोऽध्यायः ॥ ३९ ॥

समाप्तं नारदागमनपर्व ।



३९

नासाविति ॥ १ ॥ संकल्प्य एकीकृत्य कुल्यानि अस्थीनि कुल्य स्यात्कीकसेऽपि चेति मेदिनी प्रत्यागमन् गंगामिति शेष ॥ २२ ॥ संयोज्य गंगयेति शेष ॥ २३॥

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरधरचतुर्धरवंशावतंसश्रीगोविन्दसूरिसूनोः श्रीनीलकण्ठस्य कृतौ भारतभावदीपे आश्रमवासिकार्थप्रकाशे ऊनचत्वारिंशोऽध्यायः ॥ ३९ ॥

अस्यानन्तरं मौसलपर्व, तस्यायमाद्यः श्लोकः ।

वैशम्पायन उवाच ।

षट्त्रिंशे त्वथ संप्राप्ते वर्षे कौरवनन्दनः ।
ददर्श विपरीतानि निमित्तानि युधिष्ठिरः ॥ १

॥ इति श्रीमहाभारते *आश्रमवासिकपर्व समाप्तम् ॥

* यद्यप्यादिपर्वणि पर्वसंग्रहकथनावसरे ' एतदाश्रमवासाख्यं पर्वोक्तं महदद्भुतम् । द्विचत्वारिंशदध्याया पर्वैतदभिसंख्यया । सहस्रमेकं श्लोकाना पंच श्लोकशतानि च । षडेव च तथा श्लोका संख्यातास्तत्त्वदर्शिना ' इत्याख्यातम् । तथापि संप्रत्यास्मिन्पर्वणि प्राय अध्याया ३९ श्लोकाश्च १०८८ एतावन्त एव दृश्यते । एतत्सुधीभिर्मृग्यामित्यलम् ।

अयं ग्रन्थः श्रीकिञ्जवडेकरकुलकमलदिवाकरसोमयाजिदत्तात्रेयदीक्षिततनुज-पण्डित-रामचन्द्रशास्त्रिणा परिशोधितष्टिप्पण्यादिना परिष्कृतश्च । भारती जयतु ॥ शाकः १८५४ ॥

Shriman
MAHĀBHĀRATAM
Part VI
XVI
Mausala parvan

WITH

Bharata Bhawadeepa By Nilkantha.

Edited by

Pandit Ramachandrashastri Kinjawadekar.

PRINTED & PUBLISHED

BY

SHANKAR NARAHAR JOSHI

Chitrashala Press, 1026 Sadashiv Peth, Poona City

Shake 1855] *First Edition* [*A D 1933*

All Rights Reserved by the Publisher.



श्रीमन्महाभारतम्।

षष्ठभागे—मौसलपर्व।

चतुर्धरवंशावतंसश्रीमन्नीलकण्ठविरचित-भारतभावदीपाख्यटीकया समेतम्।

पण्डित रामचंद्रशास्त्री किंजवडेकर इत्येतैः पाठान्तर-टिप्पण्यादियोजनया समलङ्कृतम्।



तच्च

पुण्याख्यपत्तने

१०२६ सदाशिववीथ्यां चित्रशालाख्ये मुद्रणालये 'शंकर नरहर जोशी'

इत्येतैः संमुद्र्य प्रकाशितम्।



शालिवाहनशकाब्दाः १८५५] प्रथमं संस्करणम्। [ख्रिस्ताब्दाः १९३३

अस्य ग्रन्थस्य सर्वेऽधिकाराः प्रकाशयित्रा स्वायत्तीकृताः ।

॥ श्रीभारती जयतु ॥

॥ महाभारतम् ॥



मौसलपर्व ।


—१६—

विषयानुक्रमणिका ।

अ०	श्लो०	विषय	पृष्ठम्
१	३१	राज्यप्राप्त्यनन्तरं षट्त्रिंशत्तमे वर्षे सनिर्घातवाय्वादीनि दुर्निमित्तान्यालोच्य चिन्तयन्युधिष्ठिरो मौसले रामकृष्णरहितानां वृष्णीनां कदनं रामकृष्णयोर्निधनं च श्रुत्वा भ्रातॄनानीय 'किं करिष्यामः' (८) इत्यवादीत् । ततः सर्वे दुःखशोकसमन्विताः समुपाविशन् 'कथं विनष्टा भगवन्' (१२) इत्यादिके जनमेजयप्रश्ने 'षट्त्रिंशेऽथ ततो वर्षे' (१३) इत्यादिनोत्तरमभिधाय केनानुशास्तास्ते वीराः' (१४) इत्यादिके पुनर्जनमेजयप्रश्ने 'विश्वामित्रं च कण्वं च' (१५) इत्यादिना तदुत्तरमभिदधद्वैशम्पायनो यदुकुमारकृतं विश्वामित्राद्युपहासं तदत्त शापं मुसलस्य चूर्णीकरणपूर्वकं समुद्रे प्रक्षेपं सुरापानवर्जनविषये घोषणं च कथयति स्म..	२
२	२४	द्वारकायां नानोत्पातप्रादुर्भावः। तद्दर्शनात्कृष्णेन गान्धारीं शापदानानुस्मरणेन तस्य सत्यताचिकीर्षया भटैः सर्ववृष्ण्यादीनां तीर्थयात्रोद्घोषणम्	३
३	४७	काल्याः स्त्रिया द्वारकाधावनादिषु दुर्निमित्तेषु प्रादुर्भूतेषु कृष्णस्य चक्रादिषु च दिवं गतेषु वृष्ण्यन्धकादयो भक्ष्यभोज्यादिसंग्रहपूर्वकं निर्गत्य प्रभासे न्यवसन् । तत्र कालपरीतास्ते मद्यपानं विधाय मत्ता बभूवुः । तदा प्रथमं सात्यकिकृतवर्मणोः परस्परमर्माण्युद्घाट्यतोः सात्यकिना कृतवर्मणि हते क्षुब्धेषु सर्वेषु सात्यकिप्रभृतीनां नाशेऽवशिष्टान् निघ्नन्तं केशव बभ्रुदारुकौ 'रामस्य पदमान्विच्छ तत्र गच्छाम यत्र सः' (४७) ...५	
४	२८	बभ्रुदारुकसहितः कृष्णो राममन्विच्छन्वृक्षमूले स्थितं चिन्तयन्तं तमेकान्ते दृष्ट्वा अर्जुनानयनार्थं दारुकमादिश्य मदागमनं प्रतीक्षस्वेति बलरामं प्रत्युक्त्वा द्वारकामेत्यार्जुनागमनपर्यन्तं स्त्रियो रक्षणीया इति पितरमभिधाय रामसंनिधावागतो नागरूपेण समुद्रं प्रविष्टं तं दृष्ट्वा चिन्तयन्नेकान्ते इन्द्रियादिनिरोधनपूर्वकं शयितो जराख्यव्याधेन मृगबुद्ध्या पादे विद्ध-	

मौसलं ते समाश्रित्य
दुःखशोकसमन्विताः ।
विषण्णा हतसकल्पाः
पाण्डवाः समुपाविशन् ॥ ११
जनमेजय उवाच ।
कथ विनष्टा भगवन्नन्धका वृष्णिभिः सह ।
पश्यतो वासुदेवस्य भोजाश्चैव महारथाः १२
वैशम्पायन उवाच ।
षट्त्रिंशेऽथ ततो वर्षे
वृष्णीनामनयो महान् ।
अन्योन्यं मुसलैस्ते तु
निजघ्नुः कालचोदिताः ॥ १३
जनमेजय उवाच ।
केनानुशप्तास्ते वीराः
क्षय वृष्ण्यन्धका गताः ।
भोजाश्च द्विजवर्य त्वं
विस्तरेण वदस्व मे ॥ १४
वैशम्पायन उवाच ।
विश्वामित्रं च कण्वं च
नारदं च तपोधनम् ।
सारणप्रमुखा वीरा
दृष्ट्वाद्वारका गतान् ॥ १५
ते तान्साम्बं पुरस्कृत्य
भूषयित्वा स्त्रिय यथा ।
अब्रुवन्नुपसंगम्य
दैवदण्डनिपीडिताः ॥ १६
इयं स्त्री पुत्रकामस्य बभ्रोरमिततेजसः ।
ऋषयः साधु जानीत किमियं जनयिष्यति ॥
इत्युक्तास्ते तदा राजन्विप्रलभप्रधर्षिताः ।
प्रत्यब्रुवस्तान्मुनयो यत्तच्छृणु नराधिप॥ १८
वृष्ण्यन्धकविनाशाय मुसलं घोरमायसम् ।
वासुदेवस्य दायादः साम्बोऽयं जनयिष्यति
येन यूयं सुदुर्वृत्ता नृशसा जातमन्यवः ।
उच्छेत्तारः कुलं कृत्स्नमृते रामजनार्दनौ॥२०
समुद्रं यास्यति श्रीमांस्त्यक्त्वा देहं हलायुधः
जरा कृष्णं महात्मानं शयानं भुवि भेत्स्यति
इत्यब्रुवन्त ते राजन्प्रलब्धास्तैर्दुरात्मभिः ।
मुनयः क्रोधरक्ताक्षाः समीक्ष्याथ परस्परम्॥
तथोक्त्वा मुनयस्ते तु ततः केशवमभ्ययुः ।
अथाब्रवीत्तदा वृष्णीन् श्रुत्वैवं मधुसूदनः २३
अन्तज्ञो मतिमांस्तस्य भवितव्यं तथेति तान्
एवमुक्त्वा हृषीकेशः प्रविवेश पुरं तदा ॥२४
कृतान्तमन्यथा नैच्छत्कर्तुं स जगतः प्रभुः ।
श्वोभूतेऽथ ततः साम्बो मुसलं तदसूत वै२५
येन वृष्ण्यन्धककुले पुरुषा भस्मसात्कृताः ।
वृष्ण्यन्धकविनाशाय किंकरप्रतिमं महत् २६
असूत शापजं घोरं तच्च राज्ञे न्यवेदयन् ।
विषण्णरूपस्तद्राजा सूक्ष्मं चूर्णमकारयत् २७
तच्चूर्णं सागरे चापि प्राक्षिपन्पुरुषा नृप ।
अघोषयंश्च नगरे वचनादाहुकस्य ते ॥ २८
जनार्दनस्य रामस्य बभ्रोश्चैव महात्मन. ।
अद्यप्रभृति सर्वेषु वृष्ण्यन्धककुलेष्विह ॥ २९
सुरासवो न कर्तव्यः सर्वैर्नगरवासिभिः ।
यश्च नो विदितं कुर्यात्पेयं कश्चिन्नरः क्वचित्
जीवन्स शूलमारोहेत्स्वयं कृत्वा सबान्धवः ।
ततो राजभयात्सर्वे नियमं चक्रिरे तदा ।
नराः शासनमाज्ञाय रामस्याक्लिष्टकर्मणः ३१

इति श्रीमहाभारते मौसलपर्वणि मुसलोत्पत्तौ
प्रथमोऽध्यायः ॥ १ ॥



मौसल मुसलकृत कदन समाश्रित्य मनसि कृत्वा ॥ ११ ॥ मुसलैः एरकालक्षैर्मुसलकणै ॥ १३ ॥ जरानामा काश्चित्कैवर्त ॥ २१ ॥ अन्ययुर्मनसाऽस्माभिर्दत्त शापस्त्वया क्षन्तव्य इति ॥ २३ ॥ किंकरो यमदूतस्तत्तुल्यम् ॥२६॥ स्वयंकृत्वा स्वयंकर्ता ॥ ३१ ॥ इति श्रीमहाभारते मौसलपर्वणि नैलकण्ठीये भारतभावदीपे प्रथमोऽध्याय ॥ १ ॥

२

वैशम्पायन उवाच ।
एवं प्रयतमानानां वृष्णीनामन्धकैः सह ।
कालो गृहाणि सर्वेषां परिचक्राम नित्यशः
करालो विकटो मुण्डः
पुरुषः कृष्णपिङ्गलः ।
गृहाण्यावेक्ष्य वृष्णीनां
नादृश्यत क्वचित् क्वचित् ॥ २
तमघ्नन्त महेष्वासाः
शरैः शतसहस्रशः ।
न चाशक्यत वेद्धुं स
सर्वभूतात्ययस्तदा ॥ ३
उत्पेदिरे महावाता दारुणाश्च दिने दिने ।
वृष्ण्यन्धकविनाशाय बहवो लोमहर्षणाः ४
विवृद्धमूषिका रथ्या विभिन्नमणिकास्तथा ।
केशा नखाश्च सुप्तानामद्यन्ते मूषिकैर्निशि॥ ५
चीचीकूचीति वाशन्ति
सारिका वृष्णिवेश्मसु ।
नोपशाम्यति शब्दश्च
स दिवारात्रमेव हि ॥ ६
अन्वकुर्वन्नुलूकानां सारसा विरुतं तथा ।
अजाः शिवानां विरुतमन्वकुर्वत भारत ॥ ७
पाण्डुरा रक्तपादाश्च विहगाः कालचोदिताः ।
वृष्ण्यन्धकानां गेहेषु कपोता व्यचरंस्तदा ८
व्यजायन्त खरा गोषु करभाऽश्वतरीषु च ।
शुनीष्वपि बिडालाश्च मूषिका नकुलीषु च ९
नापत्रपन्त पापानि कुर्वन्तो वृष्णयस्तदा ।
प्राद्विषन् ब्राह्मणांश्चापि पितॄन्देवांस्तथैव च ॥
गुरूंश्चाप्यवमन्यन्ते न तु रामजनार्दनौ ।
पत्न्यः पतीनुच्चरन्त पत्नीश्च पतयस्तथा ॥ ११
विभावसुः प्रज्वलितो वामं विपरिवर्तते ।
नीललोहितमञ्जिष्ठा विसृजन्नर्चिषः पृथक् १२
उदयास्तमने नित्यं पुर्यां तस्यां दिवाकरः ।
व्यदृश्यतासकृत्पुंभिः कबन्धैः परिवारितः ॥
महानसेषु सिद्धेषु संस्कृतेऽतीव भारत ।
आहार्यमाणे क्रमयो व्यदृश्यन्त सहस्रशः १४
पुण्याहे वाच्यमाने तु जपत्सु च महात्मसु ।
अभिधावन्तः श्रूयन्ते न चादृश्यत कश्चन १५
परस्परं च नक्षत्रं हन्यमानं पुनः पुनः ।
ग्रहैरपश्यन्सर्वे ते नात्मनस्तु कथञ्चन ॥ १६
नदन्तं पाञ्चजन्यं च वृष्ण्यन्धकनिवेशने ।
समन्तात्पर्यवाशन्त रासभा दारुणस्वराः १७
एवं पश्यन् हृषीकेशः
संप्राप्तं कालपर्ययम् ।
त्रयोदश्याममावास्यां
तान् दृष्ट्वा प्राब्रवीदिदम् ॥ १८
चतुर्दशी पञ्चदशी कृतेयं राहुणा पुनः ।
प्राप्ते वै भारते युद्धे प्राप्ता चाद्य क्षयाय नः १९
विमृशन्नेव कालं तं परिचिन्त्य जनार्दनः ।
मेने प्राप्तं स षट्त्रिंशं वर्षं वै केशिसूदनः २०
पुत्रशोकाभिसन्तप्ता गान्धारी हतबान्धवा ।
यदनुव्याजहारार्ता तदिदं समुपागमत् ॥ २१
इदं च तदनुप्राप्तमब्रवीद्युधिष्ठिरः ।
पुरा व्यूढेष्वनीकेषु दृष्ट्वोत्पातान् सुदारुणान्
इत्युक्त्वा वासुदेवस्तु चिकीर्षुः सत्यमेव तत्
आज्ञापयामास तदा तीर्थयात्रामरिन्दमः २३
अघोषयन्त पुरुषास्तत्र केशवशासनात् ।
तीर्थयात्रा समुद्रे वः कार्येति पुरुषर्षभाः ॥ २४


इति श्रीमहाभारते मौसलपर्वणि उत्पातदर्शने
द्वितीयोऽध्यायः ॥ २ ॥

२

एवमिति । कालः कपोतोलूकादिरूपेण ॥ १ ॥ स एव क्वचित्करालादिरूपोऽदृश्यत । क्वचिन्न आवेक्ष्य परिक्रामन्निति शेषः ॥ २ ॥ सर्वभूतानां अत्ययो नाशो यस्मात् ॥ ३ ॥ मणिका मृत्पात्राणि ॥ ५ ॥ उच्चरन्त वक्ष्यितवत्यः ॥ ११ ॥ आहार्यमाणे अन्ने ॥ १४ ॥ **परेति** । स्वनक्षत्रादर्शनमपि स्वमृत्युसूचकमित्यर्थः॥ १६ ॥ **एवमिति** । त्रयोदशदिवसः कृष्णपक्षोऽभूदित्यर्थः ॥ १८ ॥ एवं सत्यग्रिमपक्षे वृद्ध्या भाव्यं तन्न जातं प्रत्युत एका तिथिः क्षीणा तत्र ग्रहणं च जातमित्याह—**चतुर्दशीति** ॥ १९ ॥
इति श्रीमहाभारते मौसलपर्वणि नैलकण्ठीये भारतभावदीपे द्वितीयोऽध्यायः ॥ २ ॥

मौसलपर्व

१६





॥ महाभारतम् ॥

मौसलपर्व

-१६-

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

वैशम्पायन उवाच ।
षट्त्रिंशे त्वथ संप्राप्ते वर्षे कौरवनन्दनः ।
ददर्श विपरीतानि निमित्तानि युधिष्ठिरः १
चवुर्वाताश्च निर्घाता रूक्षाः शर्करवर्षिणः ।
अपसव्यानि शकुना मण्डलानि प्रचक्रिरे २
प्रत्यगृह्णुर्महानद्यो दिशो नीहारसंवृताः ।
उल्काश्चाङ्गारवर्षिण्यः प्रापतन्गगनाद्भुवि ३
आदित्यो रजसा राजन् समवच्छन्नमण्डलः
विरश्मिरुदये नित्यं कबन्धैः समदृश्यत ॥ ४
परिवेषाश्च दृश्यन्ते दारुणाश्चन्द्रसूर्ययोः ।
त्रिवर्णिः श्यामरूक्षान्तास्तथा भस्मारुणप्रभाः
एते चान्ये च बहव उत्पाता भयशंसिनः ।
दृश्यन्ते बहवो राजन् हृदयोद्वेगकारकाः ॥ ६
कस्यचित्त्वथ कालस्य कुरुराजो युधिष्ठिरः ।
शुश्राव वृष्णिचक्रस्य मौसले कदनं कृतम् ७
विमुक्तं वासुदेवं च श्रुत्वा रामं च पाण्डवः ।
समानीयाब्रवीद्भ्रातॄन्किं करिष्याम इत्युत ८

परस्परं समासाद्य
ब्रह्मदण्डबलात्कृतान् ।
वृष्णीन्विनष्टांस्ते श्रुत्वा
व्यथिताः पाण्डवाभवन् ॥ ९

निधनं वासुदेवस्य समुद्रस्येव शोषणम् ।
वीरा न श्रद्दधुस्तस्य विनाशं शार्ङ्गधन्वनः ॥

१

श्रीगणेशाय नमः । एवमादिपर्वाणि सूत्रितानां धर्मार्थिकाममोक्षाणां मध्ये सभावनयोर्यज्ञसत्यधृतिगुरुसत्तीर्थसेवनादीनां धर्मं प्रतिपादितं । **विराटाद्यष्टके** सेवानीतिहिंसानृतकुलक्षयादीनामर्थं शोकप्रदो निरूपितः । द्वादशेऽर्थफलभूतं काम सोपसर्गो निरुपप्लवं च मोक्षपदं निरूपितम् । **त्रयोदशादित्रये** मोक्षहेतून् दानविद्यावनवासांश्च निरूप्य **षोडशे** धृतराष्ट्रबन्धनमनाश्रित्य केवलमर्थकामसक्तास्ते मदिरादिकलहेन व्यसनेन विनश्यन्तीति प्रतिपाद्यते । **सप्तदशे** निष्कामधर्मस्य फलं गृहादेस्त्यागोऽष्टादशे तत्पूर्विका स्वर्गप्राप्तिश्च निरूपयिष्यते।तत्र राज्यप्राप्त्यनन्तरं **षट्त्रिंशत्तमे** वर्षे सर्वनाशसूचकानुत्पातानाह वैशम्पायन·—**षट्त्रिंश इति** ॥ १ ॥ भवन् अभवन् ॥ २ ॥

मौसलं ते समाश्रित्य
दुःखशोकसमन्विताः ।
विषण्णा हतसंकल्पाः
पाण्डवाः समुपाविशन् ॥ ११
जनमेजय उवाच ।
कथं विनष्टा भगवन्नन्धका वृष्णिभिः सह ।
पश्यतो वासुदेवस्य भोजाश्चैव महारथाः १२
वैशम्पायन उवाच ।
षट्त्रिंशेऽथ ततो वर्षे
वृष्णीनामनयो महान् ।
अन्योन्यं मुसलैस्ते तु
निजघ्नुः कालचोदिताः ॥ १३
जनमेजय उवाच ।
केनानुशास्तास्ते वीराः
क्षय वृष्ण्यन्धका गताः ।
भोजाश्च द्विजवर्य त्वं
विस्तरेण वदस्व मे ॥ १४
वैशम्पायन उवाच ।
विश्वामित्रं च कण्वं च
नारदं च तपोधनम् ।
सारणप्रमुखा वीरा
ददृशुर्द्वारकां गतान् ॥ १५
ते तान्साम्बं पुरस्कृत्य
भूषयित्वा स्त्रियं यथा ।
अब्रुवन्नुपसंगम्य
दैवदण्डनिपीडिताः ॥ १६
इयं स्त्री पुत्रकामस्य वभ्रोरमिततेजसः ।
ऋषयः साधु जानीत किमियं जनयिष्यति ॥
इत्युक्तास्ते तदा राजन्विप्रलंभप्रधर्षिताः ।
प्रत्यब्रुवंस्तान्मुनयो यत्तच्छृणु नराधिप॥ १८
वृष्ण्यन्धकविनाशाय मुसलं घोरमायसम् ।
वासुदेवस्य दायादः साम्बोऽयं जनयिष्यति
येन यूयं सुदुर्वृत्ता नृशसा जातमन्यवः ।
उच्छेत्तारः कुलं कृत्स्नमृते रामजनार्दनौ॥२०
समुद्रं यास्यति श्रीमांस्त्यक्त्वा देहं हलायुधः
जरा कृष्णं महात्मानं शयानं भुवि भेत्स्यति
इत्यब्रुवन्त ते राजन्प्रलब्धास्तैर्दुरात्मभिः ।
मुनयः क्रोधरक्ताक्षाः समीक्ष्याथ परस्परम्॥
तथोक्त्वा मुनयस्ते तु ततः केशवमभ्ययुः ।
अथाब्रवीत्तदा वृष्णीन् श्रुत्वैवं मधुसूदनः २३
अन्तश्चो मतिमांस्तस्य भवितव्यं तथेति तान्
एवमुक्त्वा हृषीकेशः प्रविवेश पुरं तदा ॥२४
कृतान्तमन्यथा नैच्छत्कर्तुं स जगतः प्रभुः ।
श्वोभूतेऽथ ततः साम्बो मुसलं तदसूत वै२५
येन वृष्ण्यन्धककुले पुरुषा भस्मसात्कृताः ।
वृष्ण्यन्धकविनाशाय किंकरप्रतिमं महत् २६
असूत शापजं घोरं तच्च राज्ञे न्यवेदयन् ।
विषण्णरूपस्तद्राजा सूक्ष्मं चूर्णमकारयत् २७
तच्चूर्णं सागरे चापि प्राक्षिपन्पुरुषा नृप ।
अघोषयंश्च नगरे वचनादाहुकस्य ते ॥ २८
जनार्दनस्य रामस्य वभ्रोश्चैव महात्मनः ।
अद्यप्रभृति सर्वेषु वृष्ण्यन्धककुलेष्विह ॥ २९
सुरासवो न कर्तव्यः सर्वैर्नगरवासिभिः ।
यश्च नो विदितं कुर्यात्पेयं कश्चिन्नरः क्वचित्
जीवन्स शूलमारोहेत्स्वयं कृत्वा सबान्धवः ।
ततो राजभयात्सर्वे नियमं चक्रिरे तदा ।
नराः शासनमाज्ञाय रामस्याक्लिष्टकर्मणः ३१

इति श्रीमहाभारते मौसलपर्वणि मुसलोत्पत्तौ
प्रथमोऽध्यायः ॥ १ ॥

मौसलं मुसलकृतं कदन समाश्रित्य मनसि कृत्वा ॥ ११ ॥ मुसलैः एरकालक्षणैर्मुसलकणै ॥ १३ ॥ जरानामा काश्चित्कैवर्त ॥ २१ ॥ अभ्ययुर्मनसाऽस्माभिर्दत्त शापस्त्वया क्षन्तव्य इति ॥ २३ ॥ किंकरो यमदूतस्तत्तुल्यम् ॥२६॥ स्वयंकृत्वा स्वयंकर्ता ॥ ३१ ॥ इति श्रीमहाभारते मौसलपर्वणि नैलकण्ठीये भारतभावदीपे प्रथमोऽध्याय ॥ १ ॥

२

वैशम्पायन उवाच ।
एवं प्रयतमानानां वृष्णीनामन्धकैः सह ।
कालो गृहाणि सर्वेषां परिचक्राम नित्यशः
करालो विकटो मुण्डः
पुरुषः कृष्णपिङ्गलः ।
गृहाण्यावेश्य वृष्णीनां
नादृश्यत क्वचित् क्वचित् ॥ २
तमघ्नन्त महेष्वासाः
शरैः शतसहस्रशः ।
न चाशक्यत वेद्धुं स
सर्वभूतात्ययस्तदा ॥ ३
उत्पेदिरे महावाता दारुणाश्च दिने दिने ।
वृष्ण्यन्धकविनाशाय बहवो लोमहर्षणाः ४
विवृद्धमूषिका रथ्या विभिन्नमणिकास्तथा ।
केशा नखाश्च सुप्तानामद्यन्ते मूषिकैर्निशि॥ ५
चीचीकूचीति वाशन्ति
सारिका वृष्णिवेश्मसु ।
नोपशाम्यति शब्दश्च
स दिवारात्रमेव हि ॥ ६
अन्वकुर्वन्शुलूकानां सारसा विरुतं तथा ।
अजाः शिवानां विरुतमन्वकुर्वत भारत ॥ ७
पाण्डुरा रक्तपादाश्च विहगाः कालचोदिताः ।
वृष्ण्यन्धकानां गेहेषु कपोता व्यचरंस्तदा ८
व्यजायन्त खरा गोषु करभाऽश्वतरीषु च ।
शुनीष्वपि बिडालाश्च मूषिका नकुलीषु च ९
नापत्रपन्त पापानि कुर्वन्तो वृष्णयस्तदा ।
प्राद्विषन् ब्राह्मणांश्चापि पितॄन्देवांस्तथैव च ॥
गुरूंश्चाप्यवमन्यन्ते न तु रामजनार्दनौ ।
पत्न्यः पतीनुच्चरन्त पत्नीश्च पतयस्तथा ॥ ११
विभावसुः प्रज्वलितो वामं विपरिवर्तते ।
नीललोहितमञ्चिष्ठा विसृजन्नर्चिषः पृथक् १२
उदयास्तमने नित्यं पुर्यां तस्यां दिवाकरः ।
व्यदृश्यतासकृत्पुंभिः कबन्धैः परिवारितः ॥
महानसेषु सिद्धेषु संस्कृतेऽतीव भारत ।
आहार्यमाणे कृमयो व्यदृश्यन्त सहस्रशः १४
पुण्याहे वाच्यमाने तु जपत्सु च महात्मसु ।
अभिधावन्तः श्रूयन्ते न चादृश्यत कश्चन १५
परस्परं च नक्षत्रं हन्यमानं पुनः पुनः ।
ग्रहैरपश्यन्सर्वे ते नात्मनस्तु कथञ्चन ॥ १६
नदन्तं पाञ्चजन्यं च वृष्ण्यन्धकनिवेशने ।
समन्तात्पर्यवाशन्त रासभा दारुणस्वराः १७
एव पश्यन् हृषीकेशः
सप्राप्तं कालपर्ययम् ।
त्रयोदश्याममावास्यां
तान् दृष्ट्वा प्राब्रवीदिदम् ॥ १८
चतुर्दशी पञ्चदशी कृतेय राहुणा पुनः ।
प्राप्ते वै भारते युद्धे प्राप्ता चाद्य क्षयाय नः १९
विमृशन्नेव कालं तं परिचिन्त्य जनार्दनः ।
मेने प्राप्तं स षट्त्रिंशं वर्षं वै केशिसूदनः २०
पुत्रशोकाभिसन्तप्ता गान्धारी हतबान्धवा ।
यदनुव्याजहारार्ता तदिद समुपागमत् ॥ २१
इद च तदनुप्राप्तमब्रवीद्यधुधिष्ठिरः ।
पुरा व्यूढेष्वनीकेषु दृष्ट्वोत्पातान् सुदारुणान्
इत्युक्त्वा वासुदेवस्तु चिकीर्षुः सत्यमेव तत्
आज्ञापयामास तदा तीर्थयात्रामरिन्दमः २३
अघोषयन्त पुरुषास्तत्र केशवशासनात् ।
तीर्थयात्रा समुद्रे वः कार्येति पुरुषर्षभाः ॥ २४

इति श्रीमहाभारते मौसलपर्वणि उत्पातदर्शने
द्वितीयोऽध्यायः ॥ २ ॥



२

एवमिति । काल कपोतोलूकादिरूपेण ॥ १ ॥ स एव क्वचित्करालादिरूपोऽदृश्यत । क्वचिन्न आवेश्य परिक्रामन्निति शेष ॥ २ ॥ सर्वभूताना अत्ययो नाशो यस्मात् ॥ ३ ॥ मणिका मृत्पात्राणि ॥ ५ ॥ उच्चरन्त वाञ्छितवत्य ॥ ११ ॥ आहार्यमाणे अन्ने ॥ १४ ॥ **परेति** । स्वनक्षत्रादर्शनमपि स्वमृत्युसूचकमित्यर्थ ॥ १६ ॥ **एवमिति** । त्रयोदशदिवस कृष्णपक्षोऽभूदित्यर्थ ॥ १८ ॥ एवं सत्यग्रिमपक्षे वृद्ध्या भाव्यं तन्न जात प्रत्युत एका तिथि क्षीणा तत्र ग्रहण च जातामित्याह—**चतुर्दशीति** ॥ १९ ॥

इति श्रीमहाभारते मौसलपर्वणि नैलकण्ठीये भारतभावदीपे द्वितीयोऽध्याय ॥ २ ॥

३

वैशम्पायन उवाच ।
कालीस्त्री पाण्डुरैर्दन्तैः प्रविश्य हसती निशि ।
स्त्रियः स्वप्नेषु मुष्णन्ती द्वारकां परिधावति १
अग्निहोत्रनिकेतेषु वास्तुमध्येषु वेश्मसु ।
वृष्ण्यन्धकानखादन्त स्वप्ने गृध्रा भयानकाः
अलङ्काराश्च छत्रं च ध्वजाश्च कवचानि च ।
स्निह्यमाणान्यदृश्यन्त रक्षोभिः सुभयानकैः ३
तच्चाग्निदत्तं कृष्णस्य वज्रनाभमयोमयम् ।
दिवमाचक्रमे चक्रं वृष्णीनां पश्यतां तदा ॥ ४

युक्तं रथं दिव्यमादित्यवर्णं
हया हरन्पश्यतो दारुकस्य ।
ते सागरस्योपरिष्टादवर्त-
न्मनोजवाश्चतुरो वाजिमुख्याः ॥ ५
तालः सुपर्णश्च महाध्वजौ तौ
सुपूजितौ रामजनार्दनाभ्याम् ।
उच्चैर्जह्रुरप्सरसो दिवानिशं
वाचश्चोचुर्गम्यतां तीर्थयात्रा ॥ ६

ततो जिगमिषन्तस्ते वृष्ण्यन्धकमहारथाः ।
सान्तःपुरास्तदा तीर्थयात्रामैच्छन्नरर्षभाः ॥ ७
ततो भोज्यं च भक्ष्य च पेयं चान्धकवृष्णयः ।
बहु नानाविधं चक्रुर्मद्यं मांसमनेकशः ॥ ८
ततः सैनिकवर्गाश्च निर्ययुर्नगराद्बहिः ।
यानैरश्वैर्गजैश्चैव श्रीमन्तस्तिग्मतेजसः ॥ ९
ततः प्रभासे न्यवसन्यथोद्दिष्टं यथागृहम् ।
प्रभूतभक्ष्यपेयास्ते सदारा यादवास्तदा ॥ १०
निविष्टांस्तान्निशम्याथ समुद्रान्ते स योगवित्
जगामामन्त्र्य तान्वीरानुद्धवोऽर्थविशारदः
तं प्रस्थितं महात्मानमभिवाद्य कृताञ्जलिम् ।
जानन्विनाशं वृष्णीनां नैच्छद्वारयितुं हरिः
ततः कालपरीतास्ते वृष्ण्यन्धकमहारथाः ।
अपश्यन्नुद्धवं यान्तं तेजसाऽऽवृत्य रोदसी १३
ब्राह्मणार्थेषु यत्सिद्धमन्न तेषां महात्मनाम् ।
तद्वानरेभ्यः प्रददुः सुरागन्धसमन्वितम् १४
ततस्तूर्यशताकीर्णं नटनर्तकसंकुलम् ।
अवर्तत महापानं प्रभासे तिग्मतेजसाम् १५
कृष्णस्य सन्निधौ रामः सहितः कृतवर्मणा ।
अपिबद्युयुधानश्च गदो बभ्रुस्तथैव च ॥ १६
ततः पारिषदो मध्ये युयुधानो मदोत्कटः ।
अब्रवीत्कृतवर्माणमवहास्यावमन्य च ॥ १७
कः क्षात्रियो हन्यमानः सुप्तान्हन्यान्मृतानिव
तन्न मृष्यन्ति हार्दिक्य यादवा यत्त्वया कृतम्
इत्युक्ते युयुधानेन पूजयामास तद्वचः ।
प्रद्युम्नो रथिनां श्रेष्ठो हार्दिक्यमवमन्य च १९
ततः परमसंक्रुद्ध· कृतवर्मा तमब्रवीत् ।
निर्दिशन्निव सावज्ञं तदा सत्येन पाणिना ॥
भूरिश्रवाश्छिन्नबाहुर्युद्धे प्रायगतस्त्वया ।
वधेन सुनृशंसेन कथं वीरेण पातितः ॥ २१
इति तस्य वचः श्रुत्वा केशवः परवीरहा ।
तिर्यक्सरोषया दृष्ट्या वीक्षांचक्रे स मन्युमान्

मणिः स्यमन्तकश्चैव
यः स सत्राजितोऽभवत् ।
तां कथां श्रावयामास
सात्यकिर्मधुसूदनम् ॥ २३

तच्छ्रुत्वा केशवस्याङ्कमगमद्रुदती तदा ।
सत्यभामा प्रकुपिता कोपयन्ती जनार्दनम् ॥
तत उत्थाय सक्रोधः सात्यकिर्वाक्यमब्रवीत्
पञ्चानां द्रौपदेयानां धृष्टद्युम्नशिखण्डिनोः २५
एष गच्छामि पदवीं सत्येन च तथा शपे ।
सौप्तिके ये च निहताः सुप्ता येन दुरात्मना ॥
द्रोणपुत्रसहायेन पापेन कृतवर्मणा ।
समाप्तमायुरस्याद्य यशश्चैव सुमध्यमे ॥ २७
इत्येवमुक्त्वा खड्गेन केशवस्य समीपतः ।
अभिद्रुत्य शिरः क्रुद्धश्चिच्छेद कृतवर्मणः २८
तथाऽन्यानपि निघ्नन्तं युयुधानं समन्ततः ।
अभ्यधावद्वृषीकेशो विनिवारयितुं तदा २९
एकीभूतास्ततः सर्वे कालपर्यायचोदिताः ।
भोजान्धका महाराज शैनेयं पर्यवारयन् ३०
तान्दृष्ट्वा पततस्तूर्णमभिक्रुद्धाञ्जनार्दनः ।
न चुक्रोध महातेजा जानन्कालस्य पर्ययम्॥

३

कालीति। मुष्णन्ती स्त्रीणा मङ्गलसूत्रादिकं चोरयन्ती ॥१॥ निशम्य दृष्ट्वा अर्थविशारद मोक्षपण्डित ॥ ११ ॥

ब्राह्मणार्थेष्विति । ब्राह्मणार्थद्रव्यस्यान्यत्र विनियोजनमायु क्षयकरमित्यर्थ ॥ १४ ॥

ते तु पानमदाविष्टाश्चोदिताः कालधर्मणा ।
युयुधानमथाभ्यघ्नन्नुच्छिष्टैर्भोजनैस्तदा ॥ ३२
हन्यमाने तु शैनेये क्रुद्धो रुक्मिणिनन्दनः ।
तदनन्तरमागच्छन्मोक्षयिष्यन् शिनेः सुतम्
स भोजैः सह संयुक्तः सात्यकिश्चान्धकैः सह
व्यायच्छमानौ तौ वीरौ बाहुद्रविणशालिनौ
बहुत्वान्निहतौ तत्र उभौ कृष्णस्य पश्यतः ।
हतं दृष्ट्वा च शैनेयं पुत्रं च यदुनन्दनः ॥ ३५
एरकानां ततो मुष्टिं कोपाज्जग्राह केशवः ।
तदभून्मुसलं घोरं वज्रकल्पमयोमयम् ॥ ३६
जघान कृष्णस्तांस्तेन ये ये प्रमुखतोऽभवन् ।
ततोन्धकाश्च भोजाश्च शैनेया वृष्णयस्तथा ॥
जघ्नुरन्योन्यमाक्रन्दे मुसलैः कालचोदिताः ।
यस्तेषामेरकां कश्चिज्जग्राह कुपितो नृप ॥ ३८
वज्रभूतेव सा राजन्नदृश्यत तदा विभो ।
तृणं च मुसलीभूतमपि तत्र व्यदृश्यत ॥ ३९
ब्रह्मदण्डकृत सर्व-
मिति तद्विद्धि पार्थिव ।

अविध्यान् विध्य ते राजन्
प्रक्षिपन्ति स्म यत्तृणम् ॥ ४०
तद्वज्रभूतं मुसलं व्यदृश्यत तदा दृढम् ।
अवधीत्पितरं पुत्रः पिता पुत्रं च भारत ॥ ४१
मत्ताः परिपतन्ति स्म योधयन्तः परस्परम् ।
पतङ्गा इव चाग्नौ ते निपेतुः कुकुरान्धकाः ४२
नासीत्पलायने बुद्धिर्वध्यमानस्य कस्यचित् ।
तत्रापश्यन्महाबाहुर्जानन्कालस्य पर्ययम् ॥४३
मुसलं समवष्टभ्य तस्थौ स मधुसूदनः ।
साम्बं च निहतं दृष्ट्वा चारुदेष्णं च माधवः ४४
प्रद्युम्नं चानिरुद्धं च ततश्चुक्रोध भारत ।
गदं वीक्ष्य शयानं च भृशं कोपसमन्वितः ४५
स निःशेष तदा चक्रे शार्ङ्गचक्रगदाधरः ।
तान्निघ्नन्तं महातेजा बभूः परपुरञ्जयः ॥ ४६
दारुकश्चैव दाशार्हमूचतुर्यन्निबोध तत् ।
भगवन्निहताः सर्वे त्वया भूयिष्ठशो नराः ।
रामस्य पदमन्विच्छ तत्र गच्छाम यत्र सः४७

इति श्रीमहाभारते मौसलपर्वाणि कृतवर्मादीनां परस्परहनने
तृतीयोऽध्यायः ॥ ३ ॥

४

वैशम्पायन उवाच ।
ततो ययुर्दारुकः केशवश्च
बभ्रुश्च रामस्य पद पतन्तः ।
अथापश्यन् राममनन्तवीर्यं
वृक्षे स्थितं चिन्तयानं विविक्ते ॥ १
ततः समासाद्य महानुभावं
कृष्णस्तदा दारुकमन्वशासत् ।
गत्वा कुरून्सर्वमिमं महान्तं
पार्थाय शंसस्व वधं यदूनाम् ॥ २
ततोऽर्जुनः क्षिप्रमिहोपयातु
श्रुत्वा मृतान् यादवान्ब्रह्मशापात् ।

इत्येवमुक्तः स ययौ रथेन
कुरूंस्तदा दारुको नष्टचेताः ॥ ३
ततो गते दारुके केशवोऽथ
दृष्ट्वाऽन्तिके बभ्रुमुवाच वाक्यम् ।
स्त्रियो भवान् रक्षितुं यातु शीघ्रं
नैता हिंस्युर्दस्यवो वित्तलोभात् ॥ ४
स प्रस्थितः केशवेनानुशिष्टो
मदातुरो ज्ञातिवधार्दितश्च ।
त विश्रान्तं सन्निधौ केशवस्य
दुरन्तमेकं सहसैव बभ्रुम् ॥ ५


विधस्ताडन तदनर्हान् तौदादिकाद्विधेरिगुपधलक्षण कस्ततोऽर्हार्थे यत् । विध्य विध्वा ॥ ४० ॥ तत्र यन्मुसलमपश्यत्तदेवावष्टभ्य तस्थौ इत्यन्वय ॥ ४३ ॥ इति श्रीमहाभारते मौसलपर्वाणि नैलकण्ठीये भारतभावदीपे तृतीयोऽध्याय ॥ ३ ॥

४

तत इति । पतन्त शीघ्र गच्छन्त ॥ १ ॥

ब्रह्मानुशप्तमवधीन्महद्वै
कूटे युक्तं मुसलं लुब्धकस्य ।
ततो दृष्ट्वा निहतं बभ्रुमाह
कृष्णोऽग्रजं भ्रातरमुग्रतेजाः ॥ ६
इहैव त्वं मां प्रतीक्षस्व राम
यावत् स्त्रियो ज्ञातिवशाः करोमि ।
ततः पुरीं द्वारवतीं प्रविश्य
जनार्दनः पितरं प्राह वाक्यम् ॥ ७
स्त्रियो भवान् रक्षतु नः समग्रा
धनञ्जयस्यागमनं प्रतीक्षन् ।
रामो वनान्ते प्रतिपालयन्मा-
मास्तेऽद्याहं तेन समागमिष्ये ॥ ८
दृष्टं मयेदं निधनं यदूनां
राज्ञां च पूर्वं कुरुपुङ्गवानाम् ।
नाहं विना यदुभिर्यादवानां
पुरीमिमामशकं द्रष्टुमद्य ॥ ९
तपश्चरिष्यामि निबोध तन्मे
रामेण सार्धं वनमभ्युपेत्य ।
इतीदमुक्त्वा शिरसा च पादौ
संस्पृश्य कृष्णस्त्वरितो जगाम ॥ १०
ततो महाञ्निनदः प्रादुरासी-
त्सस्त्रीकुमारस्य पुरस्य तस्य ।
अथाब्रवीत्केशवः सन्निवर्त्य
शब्दं श्रुत्वा योषितां क्रोशतीनाम् ॥
पुरीमिमामेष्यति सव्यसाची
स वो दुःखान्मोचयिता नराभ्यः ।
ततो गत्वा केशवस्तं ददर्श
रामं वने स्थितमेकं विविक्ते ॥ १२
अथापश्यद्योगयुक्तस्य तस्य
नागं मुखान्निश्चरन्तं महान्तम् ।
श्वेतं ययौ स ततः प्रेक्ष्यमाणो
महार्णवो येन महानुभावः ॥ १३
सहस्रशीर्षः पर्वताभोगवर्ष्मा
रक्ताननः स्वां तनुं तां विमुच्य ।
सम्यक् च तं सागरः प्रत्यगृह्णा-
न्नागा दिव्याः सरितश्चैव पुण्याः १४
कर्कोटको वासुकिस्तक्षकश्च
पृथुश्रवा अरुणः कुञ्जरश्च ।
मिश्री शङ्खः कुमुदः पुण्डरीक-
स्तथा नागो धृतराष्ट्रो महात्मा ॥१५
ह्रादः क्राथः शितिकण्ठोऽग्रतेजा-
स्तथा नागौ चक्रमन्दातिषण्डौ ।
नागश्रेष्ठो दुर्मुखश्चाम्बरीषः
स्वयं राजा वरुणश्चापि राजन् ॥ १६
प्रत्युद्गम्य स्वागतेनाभ्यनन्द-
स्तेऽपूजयंश्चार्घ्यपाद्यक्रियाभिः ।
ततो गते भ्रातरि वासुदेवो
जानन् सर्वा गतयो दिव्यदृष्टिः ॥१७
वने शून्ये विचरंश्चिन्तयानो
भूमौ चाथ संविवेशाप्ततेजाः ।
सर्वं तेन प्राक्तदा चिन्तमासी-
द्गान्धार्या यद्वाक्यमुक्तः स पूर्वम् १८
दुर्वाससा पायसोच्छिष्टलिप्ते
यच्चाप्युक्तं तच्च सस्मार वाक्यम् ।
स चिन्तयन्नन्धकवृष्णिनाशं
कुरुक्षयं चैव महानुभावः ॥ १९
मेने ततः संक्रमणस्य कालं
ततश्चकारेन्द्रियसन्निरोधम् ।
तथा च लोकत्रयपालनार्थ-
मात्रेयवाक्यप्रतिपालनाय ॥ २०
देवोऽपि सन् देहविमोक्षहेतो-
र्निर्णीतमैच्छत्सकलार्थतत्त्ववित् ।
स सन्निरुद्धेन्द्रियवाङ्मनास्तु
शिश्ये महायोगमुपेत्य कृष्णः ॥ २१
जराऽथ तं देशमुपाजगाम
लुब्धस्तदानीं मृगलिप्सुरुग्रः ।
स केशवं योगयुक्तं शयानं
मृगासक्तो लुब्धकः सायकेन ॥ २२
जराऽविध्यत्पादतले त्वरावां-
स्तं चाभितस्तज्जिघृक्षुर्जगाम ।
अथापश्यत्पुरुषं योगयुक्तं
पीताम्बरं लुब्धकोऽनेकबाहुम् ॥ २३
मत्वाऽऽत्मानं त्वपराद्धं स तस्य
पादौ जरा जगृहे शंकितात्मा ।
आश्वासयंस्तं महात्मा तदानीं
गच्छन्नूर्ध्वं रोदसी व्याप्य लक्ष्म्या २४

कूटे लोहमुद्गरे युक्तं बद्धं मुसल ब्राह्मणशप्तं बभ्रुं स्वयमेव निपत्यावधीत् स इत्यादि सार्ध श्लोक ॥ ६ ॥



ततो गत्वा केशवस्त ददर्श रामं वने स्थितमेक विविक्ते। अथापश्यद्योग-
युक्तस्य तस्य नाग मुखान्निस्सरन्तं महान्तम्। —मौसलपर्व पृ० ६



अथापश्यत्पुरुष योगयुक्त पिताम्बर लुब्धको - - - मत्वाऽऽत्मानं त्वपराद्ध स तस्य पादौ जरा जग्रहे शंकितात्मा ।

—मौसलपर्व पृ० ६

दिवं प्राप्तं वासवोऽथाश्विनौ च
रुद्रादित्या वसवश्चाथ विश्वे ।
प्रत्युद्ययुर्मुनयश्चापि सिद्धा
गन्धर्वमुख्याश्च सहाप्सरोभिः ॥ २५
ततो राजन्भगवानुग्रतेजा
नारायणः प्रभवश्चाव्ययश्च ।
योगाचार्यो रोदसी व्याप्य लक्ष्म्या
स्थानं प्राप स्वं महात्माऽप्रमेयम् २६

ततो देवैर्ऋषिभिश्चापि कृष्णः
समागतश्चारणैश्चैव राजन् ।
गन्धर्वाद्यैरप्सरोभिर्वराभिः
सिद्धैः साध्यैश्चानतैः पूज्यमानः ॥२७
तं वै देवाः प्रत्यनन्दन्त राज-
न्मुनिश्रेष्ठा ऋग्भिरानर्चुरीशम् ।
तं गन्धर्वाश्चापि तस्थुः स्तुवन्तः
प्रीत्या चैनं पुरुहूतोऽभ्यनन्दत् ॥ २८

इति श्रीमहाभारते मौसलपर्वणि श्रीकृष्णस्य स्वलोकगमने
चतुर्थोऽध्यायः ॥ ४ ॥

५

वैशम्पायन उवाच ।
दारुकोऽपि कुरून्गत्वा दृष्ट्वा पार्थान्महारथान्
आचष्ट मौसले वृष्णीनन्योन्येनोपसंहृतान् ॥१
श्रुत्वा विनष्टान्वार्ष्णेयान्
सभोजान्धककौकुरान् ।
पाण्डवाः शोकसन्तप्ता
वित्रस्तमनसोऽभवन् ॥ २
ततोऽर्जुनस्तानामन्त्र्य केशवस्य प्रियः सखा
प्रययौ मातुलं द्रष्टुं नेदमस्तीति चाब्रवीत् ॥ ३
स वृष्णिनिलयं गत्वा दारुकेण सह प्रभो ।
ददर्श द्वारकां वीरो मृतनाथामिव स्त्रियम् ॥ ४
या स्म ता लोकनाथेन नाथवन्त्यः पुराऽभवन्
तास्त्वनाथास्तदा नाथं पार्थं दृष्ट्वा विचुक्रुशुः ५
षोडश स्त्रीसहस्राणि वासुदेवपरिग्रहः ।
तासामासीन्महाह्लादो दृष्ट्वार्जुनमागतम् ॥ ६
तास्तु दृष्ट्वैव कौरव्यो बाष्पेणापिहितेक्षणः ।
हीनाः कृष्णेन पुत्रैश्च नाशकत्सोऽभिवीक्षितुम्

स ता वृष्ण्यन्धकजला हयमीना रथोडुपाम् ।
वादित्ररथघोषां वेश्मतीर्थमहाह्रदाम् ॥ ८
रत्नशैवलसंघातां वज्रप्राकारमालिनीम् ।
रथ्यास्रोतोजलावर्तां चत्वरास्तिमितह्रदाम् ९
रामकृष्णमहाग्राहां द्वारकां सरितं तदा ।
कालपाशग्रहां भीमां नदीं वैतरिणीमिव ॥ १०
ददर्श वासविधौतान्विहीनां वृष्णिपुङ्गवैः ।
गतश्रियं निरानन्दां पद्मिनीं शिशिरे यथा ११
तां दृष्ट्वा द्वारकां पार्थस्ताश्च कृष्णस्य योषितः
सस्वनं बाष्पमुत्सृज्य निपपात महीतले ॥ १२
साम्राजिती ततः सत्या रुक्मिणी च विशांपते
अभिपत्य प्ररुरुदुः परिवार्य धनञ्जयम् ॥ १३
ततस्तं काञ्चने पीठे समुत्थाप्योपवेश्य च ।
अब्रुवन्त्यो महात्मानं परिवार्योपतस्थिरे ॥ १४
ततः संस्तूय गोविन्दं कथयित्वा च पाण्डवः
आश्वास्य ताः स्त्रियश्चापि मातुलं द्रष्टुमभ्यगात्

इति श्रीमहाभारते मौसलपर्वणि अर्जुनागमने
पञ्चमोऽध्यायः ॥ ५ ॥

इति श्रीमहाभारते मौसलपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्थोऽध्याय ॥ ४ ॥

५

दारुक इति ॥ १ ॥ इति श्रीमहाभारते मौसलपर्वणि नैलकण्ठीये भारतभावदीपे पञ्चमोऽध्याय ॥ ५ ॥

६

वैशम्पायन उवाच ।

तं शयानं महात्मानं वीरमानकदुन्दुभिम् ।
पुत्रशोकेन संतप्तं ददर्श कुरुपुङ्गवः ॥ १
तस्याश्रुपरिपूर्णाक्षो व्यूढोरस्को महाभुजः ।
आर्तस्यार्ततरः पार्थः पादौ जग्राह भारत २
तस्य मूर्धानमाघ्रातुमियेषानकदुन्दुभिः ।
स्नुषायस्य महाबाहुर्न शशाक च शत्रुहन् ॥ ३
समालिंग्यार्जुनं वृद्धः स भुजाभ्यां महाभुजः
रुदन्पुत्रान्स्मरन्सर्वान् विललाप सुविह्वलः ४
भ्रातॄन्पुत्रांश्च पौत्रांश्च दौहित्रान् ससखीनपि ।

वसुदेव उवाच ।

यैर्जिता भूमिपालाश्च दैत्याश्च शतशोऽर्जुन
तान् दृष्ट्वा नेह पश्यामि जीवाम्यर्जुन दुर्मरः ।
यौ तावर्जुन शिष्यौ ते प्रियौ बहुमतौ सदा ६
तयोरपनयात्पार्थ वृष्णयो निधनं गताः ।
यौ तौ वृष्णिप्रवीराणां द्वावेवातिरथौ मतौ
प्रद्युम्नो युयुधानश्च कथयन्कत्थसे च यौ ।
तौ सदा कुरुशार्दूल कृष्णस्य प्रियभाजनौ ८
तावुभौ वृष्णिनाशस्य मुखमास्तां धनञ्जय ।
न तु गर्हामि शैनेयं हार्दिक्यं चाहमर्जुन ॥ ९
अक्रूरं रौक्मिणेयं च शापो ह्येवात्र कारणम् ।
केशिनं यस्तु कंसं च विक्रम्य जगतः प्रभुः ॥
विदेहावकरोत्पार्थ चैद्यं च बलगर्वितम् ।
नैषादिमेकलव्यं च चक्रे कालिङ्गमागधान् ११

गान्धारान्काशिराजं च
मरुभूमौ च पार्थिवान् ।
प्राच्यांश्च दाक्षिणात्यांश्च
पार्वतीयांस्तथा नृपान् ॥ १२

सोभ्युपेक्षितवानेतमनयान्मधुसूदनः ।
त्वं हि तं नारदश्चैव मुनयश्च सनातनम् ॥१३
गोविन्दमनघं देवमभिजानीध्वमच्युतम् ।
प्रत्यपश्यच्च स विभुर्नातिक्षयमधोक्षजः ॥ १४
समुपेक्षितवान्नित्यं स्वयं स मम पुत्रकः ।
गान्धार्या वचनं यत्तदृषीणां च परंतप ॥ १५
तच्चानमन्यथा कर्तुं नैच्छत्स जगतः प्रभुः ।
प्रत्यक्षं भवतश्चापि तव पौत्रः परंतप ॥ १६
अश्वत्थाम्ना हतश्चापि जीवितस्तस्य तेजसा
इमांस्तु नैच्छत्स्वान्ज्ञातीन् रक्षितुं च सखा तव
ततः पुत्रांश्च पौत्रांश्च भ्रातॄनथ सखींस्तथा ।
शयानान्निहतान्दृष्ट्वा ततो मामब्रवीदिदम् १८
संप्राप्तोऽद्यायमस्यान्तः कुलस्य भरतर्षभ ।
आगमिष्यति बीभत्सुरिमां द्वारवतीं पुरीम्
आख्येय तस्य यद्वृत्तं वृष्णीनां वैशसं महत् ।
स तु श्रुत्वा महातेजा यदूनां निधनं प्रभो २०
आगन्ता क्षिप्रमेवेह न मेऽत्रास्ति विचारणा
योऽहं तमर्जुनं विद्धि योऽर्जुनः सोऽहमेव तु
यद्ब्रूयात्तत्तथा कार्यमिति बुद्ध्यस्व भारत ।
स स्त्रीषु प्राप्तकालासु पाण्डवो बालकेषु च
प्रतिपत्स्यति बीभत्सुर्भवतश्चौर्ध्वदेहिकम् ।
इमां च नगरीं सद्यः प्रतियाते धनञ्जये ॥ २३
प्राकाराट्टालकोपेतां समुद्रः प्लावयिष्यति ।
अहं देशे तु कस्मिंश्चित्पुण्ये नियममास्थितः ॥
कालं कर्ता सत्य एव रामेण सह धीमता ।
एवमुक्त्वा हृषीकेशो मामचिन्त्यपराक्रमः ॥

हित्वा मां बालकैः सार्धं
दिशं कामप्यगात्प्रभुः ।
सोऽहं तौ च महात्मानौ
चिन्तयन् भ्रातरौ तव ॥ २६

घोरं ज्ञातिवधं चैव
न भुञ्जे शोककर्शितः ।
न मोक्ष्ये न च जीविष्ये
दिष्ट्या प्राप्तोऽसि पाण्डव ॥ २७

६

तं शयानमिति ॥ १ ॥ शिष्यौ प्रद्युम्नसात्यकी ॥ ६ ॥ ॥ काशिराज पौंड्रकम् ॥ १२ ॥ एत वंशक्षयम् अनयात् बालानामपराधात् सत्यपि सामर्थ्ये उपेक्षाकरणमनयस्तस्माद्वा सामर्थ्यमेवाह—**त्वमिति** ॥ १३ ॥ **योऽहमिति** । नरनारायणयोर्जीवपरमात्मनोर्व्यतिहारेण भगवताऽभेद उक्तस्तं ज्ञात्वाऽनुवदन्नपि वसुदेवो न शोकं मुञ्चतीत्याश्चर्यं भगवन्मायाबलमिति भाव· ॥ २१ ॥कालं मृत्युं आत्मन कर्ता कारयिष्यामि सत्य इत्यनेन मद्वाक्ये संशयो न कर्तव्य इत्युक्तम् ॥ २५ ॥

यदुक्तं पार्थ कृष्णेन तत्सर्वमखिलं कुरु ।
एतत्ते पार्थ राज्यं च स्त्रियो रत्नानि चैव हि
इष्टान्प्राणानहं हीमांस्त्यक्ष्यामि रिपुसूदन २८

इति श्रीमहाभारते मौसलपर्वणि अर्जुनवसुदेवसंवादे
षष्ठोऽध्यायः ॥ ६ ॥

७

वैशम्पायन उवाच ।
एवमुक्तः स बीभत्सुर्मातुलेन परंतप ।
दुर्मना दीनवदनो वसुदेवमुवाच ह ॥ १
नाहं वृष्णिप्रवीरेण बन्धुभिश्चैव मातुल ।
विहीनां पृथिवीं द्रष्टुं शक्यामीह कथञ्चन २
राजा च भीमसेनश्च सहदेवश्च पाण्डवः ।
नकुलो याज्ञसेनी च षडेकमनसो वयम् ॥ ३
राज्ञः संक्रमणे चापि कालोऽयं वर्तते ध्रुवम् ।
तमिमं विद्धि संप्राप्तं कालं कालविदां वर ४
सर्वथा वृष्णिदारास्तु बालं वृद्धं तथैव च ।
नयिष्ये परिगृह्याहमिन्द्रप्रस्थमरिन्दम ॥ ५
इत्युक्त्वा दारुकमिदं
वाक्यमाह धनञ्जयः ।
अमात्यान्वृष्णिवीराणां
द्रष्टुमिच्छामि मा चिरम् ॥ ६
इत्येवमुक्त्वा वचनं सुधर्मां यादवीं सभाम् ।
प्रविवेशार्जुनः शूरः शोचमानो महारथान् ७
तमासनगतं तत्र सर्वाः प्रकृतयस्तथा ।
ब्राह्मणा नैगमास्तत्र परिवार्योपतस्थिरे ॥ ८
तान्दीनमनसः सर्वान्विमूढान्गतचेतसः ।
उवाचेदं वचः काले पार्थो दीनतरस्तथा ॥ ९
शक्रप्रस्थमहं नेष्ये वृष्ण्यन्धकजनं स्वयम् ।
इदं तु नगरं सर्वं समुद्रः प्लावयिष्यति ॥ १०
सज्जीकुरुत यानानि रत्नानि विविधानि च ।
वज्रोऽयं भवतां राजा शक्रप्रस्थे भविष्यति ॥
सप्तमे दिवसे चैव रवौ विमल उद्गते ।
बहिर्वत्स्यामहे सर्वे सज्जीभवत मा चिरम् ॥
इत्युक्तास्तेन ते सर्वे पार्थेनाक्लिष्टकर्मणा ।
सज्जमाशु ततश्चक्रुः स्वासिद्ध्यर्थं समुत्सुकाः ॥
तां रात्रिमवसत्पार्थः केशवस्य निवेशने ।
महता शोकमोहेन सहसाऽभिपरिप्लुतः १४

श्वोभूतेऽथ ततः शौरि-
र्वसुदेवः प्रतापवान् ।
युक्त्वाऽऽत्मानं महातेजा
जगाम गतिमुत्तमाम् ॥ १५
ततः शब्दो महानासी-
द्वसुदेवनिवेशने ।
दारुणः क्रोशतीनां च
रुदतीनां च योषिताम् ॥ १६

प्रकीर्णमूर्धजाः सर्वा विमुक्ताभरणस्रजः ।
उरांसि पाणिभिर्घ्नन्त्यो व्यलपन् करुणं स्त्रियः
तं देवकी च भद्रा च रोहिणी मदिरा तथा ।
अन्वारोहन्त च तदा भर्तारं योषितां वराः ॥
ततः शौरिं नृयुक्तेन बहुमूल्येन भारत ।
यानेन महता पार्थो बहिर्निष्कामयत्तदा १९
तमन्वयुस्तत्र तत्र दुःखशोकसमन्विताः ।
द्वारकावासिनः सर्वे पौरजानपदा हिताः ॥
तस्याश्वमेधिकं छत्रं दीप्यमानाश्च पावकाः ।
पुरस्तात्तस्य यानस्य याजकाश्च ततो ययुः ॥
अनुजग्मुश्च तं वीरं देव्यस्ता वै स्वलंकृताः ।
स्त्रीसहस्रैः परिवृता वधूभिश्च सहस्रशः २२
यस्तु देशः प्रियस्तस्य जीवतोऽभून्महात्मनः
तत्रैनमुपसङ्कल्प्य पितृमेधं प्रचक्रिरे ॥ २३
तं चिताग्निगतं वीरं शूरपुत्रं वराङ्गनाः ।
ततोऽन्वारुरुहुः पत्न्यश्चतस्रः पतिलोकगाः ॥

इति श्रीमहाभारते मौसलपर्वणि नैलकण्ठीये भारतभावदीपे
षष्ठोऽध्याय ॥ ६ ॥

७

एवमिति ॥ १ ॥

तं वै चतसृभिः स्त्रीभिरन्वितं पाण्डुनन्दनः ।
अदाहयद्वृन्दनैश्च गन्धैरुच्चावचैरपि ॥ २५
ततः प्रादुरभूच्छब्दः समिद्धस्य विभावसोः ।
सामगानां च निर्घोषो नराणां रुदतामपि २६
ततो वज्रप्रधानास्ते वृष्ण्यन्धककुमारकाः ।
सर्वे चैवोदकं चक्रुः स्त्रियश्चैव महात्मनः २७
अलुप्तधर्मस्तं धर्मं कारयित्वा स फाल्गुनः ।
जगाम वृष्णयो यत्र विनष्टा भरतर्षभ ॥ २८
स तान् दृष्ट्वा निपतितान्क्रदने भृशदुःखितः ।
बभूवातीव कौरव्यः प्राप्तकालं चकार ह २९
यथा प्रधानतश्चैव चक्रे सर्वास्तथा क्रियाः ।
ये हता ब्रह्मशापेन मुसलैरेरकोद्भवैः ॥ ३०
ततः शरीरे रामस्य वासुदेवस्य चोभयोः ।
अन्विष्य दाहयामास पुरुषैराप्तकारिभिः ३१

स तेषां विधिवत्कृत्वा
प्रेतकार्याणि पाण्डवः ।
सप्तमे दिवसे प्राया-
द्रथमारुह्य सत्वरः ॥ ३२
अश्वयुक्तै रथैश्चापि
गो-खरोष्ट्रयुतैरपि ।
स्त्रियस्ता वृष्णिवीराणां
रुदत्यः शोककर्शिताः ३३

अनुजग्मुर्महात्मानं पाण्डुपुत्रं धनञ्जयम् ।
भृत्याश्चान्धकवृष्णीनां सादिनो रथिनश्च ये
वीरहीनं वृद्धबालं पौरजानपदास्तथा ।
ययुस्ते परिवार्याथ कलत्रं पार्थशासनात् ३५
कुञ्जरैश्च गजारोहा ययुः शैलनिभैस्तथा ।
सपादरक्षैः संयुक्ताः सान्तरायुधिका ययुः
पुत्राश्चान्धकवृष्णीनां सर्वे पार्थमनुव्रताः ।
ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव महाधनाः
दश षट् च सहस्राणि वासुदेवावरोधनम् ।
पुरस्कृत्य ययुर्वज्रं पौत्रं कृष्णस्य धीमतः ३८
बहूनि च सहस्राणि प्रयुतान्यर्बुदानि च ।
भोजवृष्ण्यन्धकस्त्रीणां हतनाथानि निर्ययुः
तत्सागरसमप्रख्यं वृष्णिचक्रं महर्धिमत् ।
उवाह रथिनां श्रेष्ठः पार्थः परपुरञ्जयः ॥ ४०
निर्याते तु जने तस्मिन्सागरो मकरालयः ।
द्वारकां रत्नसंपूर्णां जलेनाप्लावयत्तदा ॥ ४१
यद्यद्धि पुरुषव्याघ्रो भूमेस्तस्या व्यमुञ्चत ।
तत्तत्संप्लावयामास सलिलेन स सागरः ४२
तदद्भुतमभिप्रेक्ष्य द्वारकावासिनो जनाः ।
तूर्णात्तूर्णतरं जग्मुरहो दैवमिति ब्रुवन् ४३
काननेषु च रम्येषु पर्वतेषु नदीषु च ।
निवसन्नानयामास वृष्णिदारान् धनञ्जयः ४४
स पञ्चनदमासाद्य धीमानतिसमृद्धिमत् ।
देशे गोपशुधान्याढ्ये निवासमकरोत्प्रभुः ४५
ततो लोभः समभवद्दस्यूनां निहतेश्वराः ।
दृष्ट्वा स्त्रियो नीयमानाः पार्थेनैकेन भारत ४६
ततस्ते पापकर्माणो लोभोपहतचेतसः ।
आभीरा मन्त्रयामासुः सामात्याः शुभदर्शनाः
अयमेकोऽर्जुनो धन्वी वृद्धबालं हतेश्वरम् ।
नयत्यस्मानतिक्रम्य योधाश्चेमे हतौजसः ४८
ततो यष्टिप्रहरणा दस्यवस्ते सहस्रशः ।
अभ्यधावन्त वृष्णीनां तं जनं लोप्त्रहारिणः
महता सिंहनादेन त्रासयन्तः पृथग्जनम् ।
अभिपेतुर्वधार्थं ते कालपर्यायचोदिताः ॥ ५०
ततो निवृत्तः कौन्तेयः सहसा सपदानुगः ।
उवाच तान्महाबाहुर्र्जुनः प्रहसन्निव ॥ ५१
निवर्तध्वमधर्मज्ञा यदि जीवितुमिच्छथ ।
इदानीं शरनिर्भिन्नाः शोचध्वं निहता मया ॥
तथोक्तास्तेन वीरेण कदर्थीकृत्य तद्वचः ।
अभिपेतुर्जनं मूढा वार्यमाणाः पुनः पुनः ५३
ततोऽर्जुनो धनुर्दिव्यं गाण्डीवमजरं महत् ।
आरोपयितुमारेभे यत्नादिव कथंचन ॥ ५४
चकार सज्जं कृच्छ्रेण संभ्रमे तुमुले सति ।
चिन्तयामास शस्त्राणि न च सस्मार तान्यपि
वैकृत्यं तन्महद्दृष्ट्वा भुजवीर्यं तथा युधि ।
दिव्यानां च महास्त्राणां विनाशाद्व्रीडितोभवत्
वृष्णियोधाश्च ते सर्वे गजाश्वरथयोधिनः ।
न शेकुरावर्तयितुं ह्रियमाणं च तं जनम् ॥५७
कलत्रस्य बहुत्वाद्धि संपतत्सु ततस्ततः ।
प्रयत्नमकरोत्पार्थो जनस्य परिरक्षणे ॥ ५८
मिषतां सर्वयोधानां ततस्ताः प्रमदोत्तमाः ।
समन्ततोऽवकृष्यन्त कामाच्चान्याः प्रवव्रजुः
ततो गाण्डीवनिर्मुक्तैः शरैः पार्थो धनञ्जयः ।
जघान दस्यून् सोद्वेगो वृष्णिभृत्यैः सहस्रशः
क्षणेन तस्य ते राजन्क्षयं जग्मुरजिह्मगाः ।
अक्षया हि पुरा भूत्वा क्षीणाः क्षतजभोजनाः
स शरक्षयमासाद्य दुःखशोकसमाहतः ।
धनुष्कोट्या तदा दस्यूनवधीत्पाकशासनिः
प्रेक्षतस्त्वेव पार्थस्य वृष्ण्यन्धकवरस्त्रियः ।
जग्मुरादाय ते म्लेच्छाः समंताज्जनमेजय ६३

धनञ्जयस्तु दैवं तन्मनसाऽचिन्तयत्प्रभुः ।
दुःखशोकसमाविष्टो निःश्वासपरमोऽभवत् ॥
अस्त्राणां च प्रणाशेन बाहुवीर्यस्य संक्षयात् ।
धनुषश्चाविधेयत्वाच्छराणां संक्षयेण च ॥ ६५
बभूव विमनाः पार्थो दैवमित्यनुचिन्तयन् ।
न्यवर्तत ततो राजन्नेदमस्तीति चाब्रवीत् ६६
ततः शेषं समादाय कलत्रस्य महामतिः ।
हृतभूयिष्ठरत्नस्य कुरुक्षेत्रमवातरत् ॥ ६७
एवं कलत्रमानीय वृष्णीनां हृतशेषितम् ।
न्यवेशयत कौरव्यस्तत्र तत्र धनञ्जयः ॥ ६८
हार्दिक्यतनयं पार्थो नगरं मार्तिकावतम् ।
भोजराजकलत्रं च हृतशेषं नरोत्तमः ॥ ६९
ततो वृद्धांश्च बालांश्च स्त्रियश्चादाय पाण्डवः
वीरैर्विहीनान् सर्वांस्तान् शक्रप्रस्थे न्यवेशयत्
यौयुधानिं सरस्वत्या पुत्रं सात्यकिनः प्रियम्
न्यवेशयत धर्मात्मा वृद्धबालपुरस्कृतम् ॥७१
इन्द्रप्रस्थे ददौ राज्यं वज्राय परवीरहा ।
वज्रेणाक्रूरदारास्तु वार्यमाणाः प्रवव्रजुः ॥७२
रुक्मिणी त्वथ गान्धारी शैव्या हैमवतीत्यपि
देवी जाम्बवती चैव विविशुर्जातवेदसम् ७३
सत्यभामा तथैवान्या देव्यः कृष्णस्य संमताः
वन प्रविविशू राजंस्तापस्ये कृतनिश्चयाः ७४
द्वारकावासिनो ये तु पुरुषाः पार्थमभ्ययुः ।
यथार्हं संविभज्यैनान्वज्रे पर्यददज्जयः ॥७५
स तत्कृत्वा प्राप्तकालं बाष्पेणापिहितोऽर्जुनः
कृष्णद्वैपायनं व्यासं ददर्शासीनमाश्रमे ॥ ७६

इति श्रीमहाभारते मौसलपर्वणि वृष्णिकलत्राद्यानयने
सप्तमोऽध्यायः ॥ ७ ॥

८

वैशम्पायन उवाच ।

प्रविशन्नर्जुनो राजन्नाश्रमं सत्यवादिनः ।
ददर्शासीनमेकान्ते मुनिं सत्यवतीसुतम् ॥ १
स तमासाद्य धर्मज्ञमुपतस्थे महाव्रतम् ।
अर्जुनोऽस्मीति नामास्मै निवेद्याभ्यवदत्ततः २
स्वागतं तेऽस्त्विति प्राह मुनिः सत्यवतीसुतः
आस्यतामिति होवाच प्रसन्नात्मा महामुनिः
तमप्रतीतमनसं निःश्वसन्तं पुनः पुनः ।
निर्विण्णमनसं दृष्ट्वा पार्थं व्यासोऽब्रवीदिदम् ।
नखकेशदशाकुम्भवारिणा किं समुक्षितः ।
आवीरजानुगमनं ब्राह्मणो वा हतस्त्वया ॥५
युद्धे पराजितो वाऽसि गतश्रीरिव लक्ष्यसे ।
न त्वां प्रभिन्नं जानामि किमिदं भरतर्षभ ॥६
श्रोतव्यं चेन्मया पार्थ क्षिप्रमाख्यातुमर्हसि ।

अर्जुन उवाच ।

यः स मेघवपुः श्रीमान् बृहत्पंकजलोचनः७
स कृष्णः सह रामेण त्यक्त्वा देहं दिवं गतः
मौसले वृष्णिवीराणां विनाशो ब्रह्मशापजः
बभूव वीरान्तकरः प्रभासे लोमहर्षणः ।
एते शूरा महात्मानः सिंहदर्पा महाबलाः ॥९
भोजवृष्ण्यन्धका ब्रह्मन्नन्योन्यं तैर्हतं युधि ।
गदापरिघशक्तीनां सहाः परिघबाहवः ॥ १०
त एरकाभिर्निहताः पश्य कालस्य पर्ययम् ।
हतं पञ्चशतं तेषां सहस्रं बाहुशालिनाम् ११
निधनं समनुप्राप्तं समासाद्येतरेतरम् ।
पुनः पुनर्न मृष्यामि विनाशममितौजसाम् ॥
चिन्तयानो यदूनां च कृष्णस्य च यशस्विनः
शोषणं सागरस्येव पर्वतस्येव चालनम् ॥१३

इति श्रीमहाभारते मौसलपर्वणि नैलकण्ठीये भारतभावदीपे सप्तमोऽध्याय ॥ ७ ॥

८

प्रविशन्निति ॥१॥ नखोदकं, केशोदकं, वस्त्रप्रान्तोदशा तदुदकं, कुंभमुखोदकं च, आवीरजा नारी रजस्वला तस्या रज प्रस्रवकाले दिनत्रयादर्वाक् अनुगमनं तस्या मैथुन, ब्राह्मणस्य वधो, युद्धे पराजयश्चेति सप्तभिर्निमित्तै पुरुषो भ्रष्टश्रीर्भवति ॥ ५ ॥ प्रभिन्न पराजितं त्वा कदाचिदपि न जानामि ॥ ६ ॥ हतं मृतं मारितवन्त इत्यर्थ ॥१०॥ पंचशतं सहस्र सहस्रगुणितं पञ्चलक्षाणीत्यर्थ ॥११॥ न केवलं हतं ताडितं अपि तु निधन प्राप्तमित्यर्थ ॥१२॥

नभसः पतनं चैव शैत्यमग्नेस्तथैव च ।
अश्रद्धेयमहं मन्ये विनाशं शार्ङ्गधन्वनः ॥ १४
न चेह स्थातुमिच्छामि लोके कृष्णविनाकृतः
इतः कष्टतरं चान्यच्छृणु तद्वै तपोधन ॥ १५
मनो मे दीर्यते येन चिन्तयानस्य वै मुहुः
पश्यतो वृष्णिदाराश्च मम ब्रह्मन् सहस्रशः ॥
आभीरैरनुसृत्याजौ हृताः पञ्चनदालयैः ।
धनुरादाय तत्राहं नाशकं तस्य *पूरणे ॥ १७
यथा पुरा च मे वीर्यं भुजयोर्न तथाऽभवत् ।
अस्त्राणि मे प्रनष्टानि विविधानि महामुने ॥
शराश्च क्षयमापन्नाः क्षणेनैव समन्ततः ।
पुरुषश्चाप्रमेयात्मा शङ्खचक्रगदाधरः ॥ १९
चतुर्भुजः पीतवासाः श्यामः पद्मदलेक्षणः ।
यश्च याति पुरस्तान्मे रथस्य सुमहाद्युतिः २०
प्रदहन् रिपुसैन्यानि न पश्याम्यहमच्युतम् ।
येन पूर्वं प्रदग्धानि शत्रुसैन्यानि तेजसा २१
शरैर्गाण्डीवनिर्मुक्तैरहं पश्चाच्च नाशयम् ।
तमपश्यन्विषीदामि घूर्णामीव च सत्तम २२
परिनिर्विण्णचेताश्च शान्तिं नोपलभेऽपि च
विना जनार्दनं वीरं नाहं जीवितुमुत्सहे॥२३
श्रुत्वैव हि गतं विष्णुं ममापि मुमुहुर्दिशः ।
प्रनष्टज्ञातिवीर्यस्य शून्यस्य परिधावतः ॥ २४
उपदेष्टुं मम श्रेयो भवानर्हति सत्तम।

व्यास उवाच ।

ब्रह्मशापविनिर्दग्धा वृष्ण्यन्धकमहारथाः२६
विनष्टाः कुरुशार्दूल न तान् शोचितुमर्हसि ।
भवितव्यं तथा तच्च दिष्टमेतन्महात्मनाम् ॥
उपेक्षितं च कृष्णेन शक्तेनापि व्यपोहितुम् ।
त्रैलोक्यमपि गोविन्दः कृत्स्नं स्थावरजङ्गमम्
प्रसहेदन्यथा कर्तुं कुतः शापं महात्मनाम् ।
रथस्य पुरतो याति यः स चक्रगदाधरः ॥२८
तव स्नेहात्पुराणर्षिर्वासुदेवश्चतुर्भुजः ।
कृत्वा भारावतरणं पृथिव्याः पृथुलोचनः ॥
मोक्षयित्वा तनुं प्राप्तः कृष्णः स्वस्थानमुत्तमम्
त्वयाऽपीह महत्कर्म देवानां पुरुषर्षभ ॥ ३०
कृतं भीमसहायेन यमाभ्यां च महाभुज ।
कृतकृत्यांश्च वो मन्ये संसिद्धान्कुरुपुङ्गव ३१
गमनं प्राप्तकालं व इदं श्रेयस्करं विभो ।
एवं बुद्धिश्च तेजश्च प्रतिपत्तिश्च भारत ॥ ३२
भवन्ति भवकालेषु विपद्यन्ते विपर्यये ।
कालमूलमिदं सर्वं जगद्बीजं धनञ्जय ॥ ३३
कालः एव समादत्ते पुनरेव यदृच्छया ।
स एव बलवान्भूत्वा पुनर्भवति दुर्बलः ३४
स एवेशश्च भूत्वेह परैराज्ञाप्यते पुनः ।
कृतकृत्यानि चास्त्राणि गतान्यद्य यथागतम् ॥
पुनरेष्यन्ति ते हस्ते यदा कालो भविष्यति।
कालो गन्तुं गतिं मुख्यां भवतामपि भारत
एतच्छ्रेयो हि वो मन्ये परमं भरतर्षभ।

वैशम्पायन उवाच ।

एतद्वचनमाज्ञाय व्यासस्यामिततेजसः ॥३७
अनुज्ञातो ययौ पार्थो नगरं नागसाह्वयम् ।
प्रविश्य च पुरीं वीरः समासाद्य युधिष्ठिरम्
आचष्ट तद्यथावृत्तं वृष्ण्यन्धककुलं प्रति ॥३८

इति श्रीमहाभारते मौसलपर्वणि व्यासार्जुनसंवादे
अष्टमोऽध्यायः ॥ ८ ॥

पश्यत अनादरे षष्ठी । मा पश्यन्तमनादृत्येत्यर्थ ॥१६॥ **पुरुषश्चेति** । इदमेव रूपं चतुर्भुजं नित्यमर्जुनदृग्गोचरमस्ति अत एव विश्वरूपदर्शनानन्तरमुक्तं ' तेनैव रूपेण चतुर्भुजेन सहस्रबाहो भव विश्वमूर्ते ' इति । अन्यथा द्विभुजेनेत्यवक्ष्यत् । चतुर्भुजेनेति नावक्ष्यच्च ॥ १९ ॥ **बुद्धि**रुपस्थितकार्यावधारणं, **तेजः** प्रागल्भ्यं, **प्रतिपत्ति**रनागतावेक्षणम् ॥ ३२ ॥ भवन्ति उत्पद्यन्ते भवकालेषु ऐश्वर्याद्यभिसमयेषु विपर्यये विनाशकाले विपद्यन्ते विनश्यन्ति। काल ईश्वर जगद्बीजं वियदादिपञ्चकम्॥३३॥ समादत्ते संहरति यदा भूतानामपि संहारो भवति किंपुनस्तत्र भौतिकाना नाश इति तदर्थं शोकोऽनुचित इति भावः य एव बलवान्स एव दुर्बलो भवत्येव विपर्ययोऽपि कालमूलो ज्ञेय ॥३४॥ **कृतेति** । भवन्तोऽपि अस्त्रवत्कृतकृत्या इति भाव ॥३५॥ पुनर्युगान्तरे मुख्यां गतिं स्वर्गं गन्तुम्॥३६ एतत् प्रस्थानं श्रेय ॥३७॥

* आरोपणे इत्यर्थ ।

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविन्दसूरिसूनोः
श्रीनीलकण्ठस्य कृतौ भारतभावदीपे मौसलपर्वणि अष्टमोऽध्यायः ॥ ८ ॥
मौसलं पर्व समाप्तम् ।

अस्यानन्तरं महाप्रस्थानिकं पर्व भविष्यति तस्यायमाद्यः श्लोकः ।

जनमेजय उवाच ।

एवं वृष्ण्यन्धककुले श्रुत्वा मौसलमाहवम् ।
पाण्डवाः किमकुर्वन्त तथा कृष्णे दिवं गते ॥ १

॥ इति श्रीमहाभारते *मौसलपर्व समाप्तम् ॥

* यद्यप्यादिपर्वणि पर्वसंग्रहकथनावसरे 'इत्येतन्मौसलं पर्व षोडशं परिकीर्तितम् । अध्यायाष्टौ समाख्याता श्लोकाना च शतत्रयम् । श्लोकानां विंशतिश्चैव संख्याता तत्त्वदर्शिना इति प्रोक्तम् । तथापि संप्रति अध्याया ८ श्लोका. परं २८७ एव दृश्यन्ते ।

अथ ग्रन्थः श्रोकिञ्जवडेकरकुलकमलदिवाकरसोमयाजिदत्तात्रेयदीक्षिततनुज-पण्डितराम-चन्द्रशास्त्रिणा परिशोधिताधिष्पण्यादिना परिष्कृतश्च ॥ भारती जयतु ॥ शाके १८५४ ॥

Shriman
MAHĀBHĀRATAM
Part VI
XVII .
Mahāprasthānika parvan

WITH

Bharata Bhawadeepa By Nilkantha.

Edited by

Pandit Ramachandrashastri Kinjawadekar.

PRINTED & PUBLISHED

BY

SHANKAR NARAHAR JOSHI

Chitrashala Press, 1026 Sadashiv Peth, Poona City

Shake 1855.] *First Edition.* [*A. D 1933*

All Rights Reserved by the Publisher.



श्रीमन्महाभारतम्।

षष्ठभागे—महाप्रस्थानिकपर्व।

चतुर्धरवंशावतंसश्रीमन्नीलकण्ठविरचित-भारतभावदीपाख्यटीकया समेतम्।

पण्डित रामचंद्रशास्त्री किंजवडेकर इत्येतैः पाठान्तर-टिप्पण्यादियोजनया समलङ्कृतम्।



तच्च

पुण्याख्यपत्तने

१०२६ सदाशिववीथ्यां चित्रशालाख्ये मुद्रणालये 'शंकर नरहर जोशी'

इत्येतैः संमुद्र्य प्रकाशितम्।



शालिवाहनशकाब्दाः १८५५] प्रथमं संस्करणम्। [ख्रिस्ताब्दाः १९३३

अस्य ग्रन्थस्य सर्वेऽधिकाराः प्रकाशयित्रा स्वायत्तीकृताः ।

॥ श्रीभारती जयतु ॥

॥ महाभारतम् ॥

महाप्रस्थानिकपर्व ।

—१७—


विषयानुक्रमणिका ।


अ०	श्लो०	विषय	पृष्ठम्
		महाप्रस्थानिकपर्व १–७	
१	४६	पूर्वं मौसले हतेषु वृष्ण्यन्धकेषु दिवं गते च भगवति श्रीकृष्णे पण्डुपुत्रा. किमकुर्वतेति जनमेजयप्रश्ने वैशम्पायनस्योत्तरम । युधिष्ठिरो महाप्रस्थानगमन निश्चित्य भ्रातृभिर्द्रौपद्या च सह स्वर्गं जगमिषू राज्यभारं युयुत्सौ निक्षिप्यार्जुनानुमत्या परीक्षितं चाभिषिच्य सुभद्रां प्रति 'एष पुत्रस्य पुत्रस्ते कुरुराजो भविष्यति । यदूनां परिशेषश्च' (८) इत्याद्यादिश्य श्रीकृष्णप्रभृतीनामुदकदानपूर्वक श्राद्धानि कृत्वा परीक्षितं शिष्यत्वेन कृपाचार्याय ददौ। ततः कुच्छ्रात्पौरानुमतिसंपादनेन वल्कलधारणादि कृत्वोत्सर्गेष्टिपूर्वकमग्नीनुत्सृज्य भ्रातृभिर्द्रौपद्या शुना च सह प्रस्थितो लौहित्यं सलिलार्णवं ययौ । तत्र पुरुषविग्रहमग्निं दृष्ट्वा तदाज्ञयाऽर्जुनेनाक्षय्येषुधिसहिते गाण्डीवे वरुणोदेशेनार्णवे त्यक्ते दक्षिणामुखा निर्गताः पृथिवीं प्रदक्षिणीकृत्योत्तरां दिशं पाण्डवा ययुः	३
२	२६	उदीच्यां दिशि हिमालयं प्राप्य तमप्यतिक्रामत्सु तेषु प्रथमं भूमौ पतितां द्रौपदीं दृष्ट्वा भीमेन पतनकारणं पृष्टो युधिष्ठिरोऽर्जुने तस्या विशेषेण पक्षपातं कारणत्वेनोवाच । एवं क्रमेण सहदेवादिषु पतत्सु भीमप्रश्नानुरोधेन तत्तत्पतनकारणान्यभिदधानो युधिष्ठिरो भीमपतनानन्तरमेकेन शुना सहाग्रे जगाम	४
३	३८	शुना सह गच्छन्तं युधिष्ठिरं स्वर्गं नेतुं रथेन सहागतं रथमारोहेत्युक्तवन्तं चेन्द्रं प्रति 'न विना भ्रातृभिः स्वर्गमिच्छे गन्तुं सुरेश्वर' (३) इत्याद्युवाच युधिष्ठिरः।ततः 'मानुषं देहं त्यक्त्वा स्वर्गं गतान्भ्रातॄंस्त्वमनेनैव शरीरेण तत्र गतो द्रक्ष्यसि' इत्याह शक्रः। शुना सह स्वर्गं जिगमिषोर्युधिष्ठिरस्येन्द्रेण सहोक्तिप्रत्युक्तथोः प्रचलितयोः शुना विना रथारोहणमरोचयमानस्य युधिष्ठिरस्य निश्चयं दृष्ट्वा सुप्रसन्नः साक्षाद्धर्मो निजस्वरूपप्रकाशनेन युधिष्ठिरं प्रशस्य 'अभिजातोऽसि राजेन्द्र पितुर्वृत्तेन मेधया । अनुक्रोशेन चानेन' (१८) इत्याद्युवाच। ततो धर्मादयो युधिष्ठिरं रथमारोप्य स्वैः स्वैर्विमानैर्युधिष्ठिरोऽपि स्वर्गं गतो नारदेन स्तुतो तत्र भीमादिभ्रातॄणामदर्शनाद्देवानामन्य 'यत्र मे भ्रातरो द्रौपदी च गतास्तत्रैव गन्तुमिच्छामि' इत्याद्यब्रवीत् .	७

महाप्रस्थानिकपर्वणो विषयानुक्रमणिका समाप्ता ॥ शुभं भवतु ॥

महाप्रस्थानिकपर्व

१७







॥ महाभारतम् ॥

महाप्रस्थानिकपर्व ।

-१७-

श्रीगणेशाय नमः ।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

जनमेजय उवाच ।
एवं वृष्ण्यन्धककुले श्रुत्वा मौसलमाहवम्।
पाण्डवाः किमकुर्वन्त तथा कृष्णे दिव गते १

वैशम्पायन उवाच ।
श्रुत्वैवं कौरवो राजा वृष्णीनां कदनं महत्
प्रस्थाने मतिमाधाय वाक्यमर्जुनमब्रवीत् ॥ २
कालः पचति भूतानि सर्वाण्येव महामते ।
कालपाशमहं मन्ये त्वमपि द्रष्टुमर्हसि ॥ ३
इत्युक्तः स तु कौन्तेयः कालः काल इति ब्रुवन्
अन्वपद्यत तद्वाक्यं भ्रातुर्ज्येष्ठस्य धीमतः ॥ ४
अर्जुनस्य मतं ज्ञात्वा भीमसेनो यमौ तथा ।
अन्वपद्यन्त तद्वाक्यं यदुक्तं सव्यसाचिना ॥ ५
ततो युयुत्सुमानाय्य प्रव्रजन् धर्मकाम्यया ।
राज्यं परिददौ सर्वं वैश्यापुत्रे युधिष्ठिरः ॥ ६
अभिषिच्य स्वराज्ये च
राजानं च परिक्षितम् ।
दुःखार्तश्चाब्रवीद्राजा
सुभद्रां पाण्डवाग्रजः ॥ ७
एष पुत्रस्य पुत्रस्ते कुरुराजो भविष्यति ।
यदूना परिशेषश्च वज्रो राजा कृतश्च ह ॥ ८
परिक्षिद्धास्तिनपुरे शक्रप्रस्थे च यादवः ।
वज्रो राजा त्वया रक्ष्यो मा चाधर्मे मनः कृथाः
इत्युक्त्वा धर्मराजः स वासुदेवस्य धीमतः ।
मातुलस्य च वृद्धस्य रामादीनां तथैव च १०

श्रीगणेशाय नम ॥ कृतकृत्यानां दु सहदु खप्रस्ताना महाप्रस्थानादिना उपायेन देहत्यागो युक्त इति पाण्डवाचरेण प्रदर्शयन् महाप्रस्थानिकं पर्वारभते । प्रसंगाच्च स्वर्गतिहेतून् गुणान् स्वर्गतिप्रबन्धकाश्च दोषान् दर्शयति संक्षेपेण—एवं वृष्ण्यन्धककुले इत्यादिना ॥१॥ प्रस्थाने स्वर्गे गन्तु गृहान्नि सरणे ॥ २ ॥ पाशं तत्कृतमाकर्ष मरणमिति यावत् । तदहं मन्ये अंगीकरोमि । त्वमप्येतद्द्रष्टु आलोचितुम् ॥ ३ ॥ काल. काल इति नित्यार्थे द्वित्वम् । अपरिहार्य कालो मृत्यु सोऽद्यैवास्तु किं चिरेणेत्याशय ॥४॥धर्मकाम्यया प्रव्रजनतूद्वेगेन।परिददौ तदधीनं कृतवान् तस्याभिषेकेऽनधिकारात्॥६॥स्वराज्ये हास्तिनपुरे ॥ ७ ॥ अधर्मे परिक्षिद्वज्रयोर्बालयोररक्षणजे महाप्रस्थानमियं मा कुर्यादिति भाव. ॥ ९ ॥

भ्रातृभिः सह धर्मात्मा कृत्वोदकमतन्द्रितः ।
श्राद्धान्युद्दिश्य सर्वेषां चकार विधिवत्तदा
द्वैपायनं नारदं च मार्कण्डेयं तपोधनम् ।
भारद्वाजं याज्ञवल्क्यं हरिमुद्दिश्य यत्नवान् ॥
अभोजयत्स्वादु भोज्यं
कीर्तयित्वा च शार्ङ्गिणम् ।
ददौ रत्नानि वासांसि
ग्रामानश्वान् रथांस्तथा ॥ १३
स्त्रियश्च द्विजमुख्येभ्यस्तदा शतसहस्रशः ।
कूपमभ्यर्च्य च गुरुमथ पौरपुरस्कृतम् ॥ १४
शिष्यं परीक्षितं तस्मै ददौ भरतसत्तमः ।
ततस्तु प्रकृतीः सर्वाः समानाय्य युधिष्ठिरः
सर्वमाचष्ट राजर्षिश्चिकीर्षितमथात्मनः ।
ते श्रुत्वैव वचस्तस्य पौरजानपदा जनाः १६
भृशमुद्विग्नमनसो नाभ्यनन्दन्त तद्वचः ।
नैवं कर्तव्यमेते ते तदोचुस्तं जनाधिपम् ॥
न च राजा तथाऽकार्षीत्कालपर्यायधर्मवित्
ततोऽनुमान्य धर्मात्मा पौरजानपदं जनम् १८
गमनाय मतिं चक्रे भ्रातरश्चास्य ते तदा ।
ततः स राजा कौरव्यो धर्मपुत्रो युधिष्ठिरः ॥
उत्सृज्याभरणान्यङ्गाज्जगृहे वल्कलान्युत ।
भीमार्जुनयमाश्चैव द्रौपदी च यशस्विनी २०
तथैव जगृहुः सर्वे वल्कलानि नराधिप ।
विधिवत्कारयित्वेष्टिं नैष्ठिकीं भरतर्षभ २१
समुत्सृज्याप्सु सर्वेऽग्नीन् प्रतस्थुर्नरपुङ्गवाः ।
ततः प्रारुरुदुः सर्वाः स्त्रियो दृष्ट्वा नरोत्तमान्
प्रस्थितान् द्रौपदीषष्ठान्
पुरा द्यूताजितान् यथा ।
हर्षोऽभवच्च सर्वेषां
भ्रातॄणां गमनं प्रति ॥ २३
युधिष्ठिरमथ ज्ञात्वा वृष्णिक्षयमवेक्ष्य च ।
भ्रातरः पञ्च कृष्णा च षष्ठी श्वा चैव सप्तमः
आत्मना सप्तमो राजा निर्ययौ गजसाह्वयात्
पौरैरनुगतो दूरं सर्वैरन्तःपुरैस्तथा ॥ २५
न चैनमशकत्कश्चिन्निवर्तस्वेति भाषितुम् ।
न्यवर्तन्त ततः सर्वे नरा नगरवासिनः ॥ २६
कृपप्रभृतयश्चैव युयुत्सु पर्यवारयन् ।
विवेश गङ्गां कौरव्य उलूपी भुजगात्मजा २७
चित्राङ्गदा ययौ चापि मणिपूरपुरं प्रति ।
शिष्टा परिक्षितं त्वन्या मातरः पर्यवारयन् ॥
पाण्डवाश्च महात्मानो
द्रौपदी च यशस्विनी ।
कृतोपवासाः कौरव्य
प्रययुः प्राङ्मुखास्ततः ॥ २९
योगयुक्ता महात्मानस्त्यागधर्ममुपेयुषः ।
अभिजग्मुर्बहून्देशान्सारितः सागरांस्तथा ३०
युधिष्ठिरो ययावग्रे भीमस्तु तदनन्तरम् ।
अर्जुनस्तस्य चान्वेव ययौ चापि यथाक्रमम् ॥
पृष्ठतस्तु वरारोहा श्यामा पद्मदलेक्षणा ।
द्रौपदी योषितां श्रेष्ठा ययौ भरतसत्तम ॥ ३२
श्वा चैवानुययावेकः
प्रस्थितान्पाण्डवान्वनम् ।
क्रमेण ते ययुर्वीरा
लौहित्यं सलिलार्णवम् ॥ ३३
गाण्डीवं तु धनुर्दिव्यं न मुमोच धनञ्जयः ।
रत्नलोभान्महाराज ते चाक्षय्ये महेषुधी ३४
अग्निं ते ददृशुस्तत्र स्थितं शैलमिवाग्रतः ।
मार्गमावृत्य तिष्ठन्तं साक्षात्पुरुषविग्रहम् ॥ ३५
ततो देवः ससर्पार्चिः पाण्डवानिदमब्रवीत् ।
भो भो पाण्डुसुता वीराः पावकं मां निबोधत
युधिष्ठिर महाबाहो भीमसेन परंतप ।
अर्जुनाश्विसुतौ वीरौ निबोधत वचो मम ३७
अहमग्निः कुरुश्रेष्ठा मया दग्धं च खाण्डवम् ।
अर्जुनस्य प्रभावेण तथा नारायणस्य च ॥ ३८
अयं वः फाल्गुनो भ्राता गाण्डीवं परमायुधम्
परित्यज्य वने यातु नानेनार्थोऽस्ति कश्चन ॥
चक्ररत्नं तु यत्कृष्णे स्थितमासीन्महात्मनि ।
गतं तच्च पुनर्हस्ते कालेनैष्यति तस्य ह ॥ ४०
वरुणादाहृतं पूर्वं मयैतत्पार्थकारणात् ।
गाण्डीवं धनुषां श्रेष्ठं वरुणायैव दीयताम् ४१
ततस्ते भ्रातरः सर्वे धनञ्जयमचोदयन् ।
स जले प्राक्षिपच्चैतत्तथाऽक्षय्ये महेषुधी ४२
ततोऽग्निर्भरतश्रेष्ठ तत्रैवान्तरधीयत ।
ययुश्च पाण्डवा वीरास्ततस्तेदक्षिणामुखाः ॥

स्त्रिय दासी ॥ १४ ॥ अनुमान्य अनुमतिप्रद कृत्वा ॥ १८ ॥ नैष्ठिकीं पार्यंतिकीं उत्सर्गेष्टिमित्यर्थ ॥ २१ ॥ आत्मन्यग्नीन्समारोप्याप्स्वग्नीनुत्सृज्येति ज्ञेयम् ॥ २२ ॥ अन्या युधिष्ठिरादीना भार्या श्रुतसोमादीना मातर ॥ २८ ॥ लौहित्यं उदयाचलप्रातस्थ समुद्रम् ॥ ३३ ॥ अनेन गाण्डीवेन अर्थ प्रयोजनम् ॥ ३९ ॥ कालेन अवतारान्तरे ॥ ४० ॥

ततस्ते तूत्तरेणैव तीरेण लवणाम्भसः ।
अगमुर्भरतशार्दूल दिशं दक्षिणपश्चिमाम् ॥ ४४
ततः पुनः समावृत्ताः पश्चिमां दिशमेव ते ।
ददृशुर्द्वारकां चापि सागरेण परिप्लुताम् ४५
उदीचीं पुनरावृत्य ययुर्भरतसत्तमाः ।
प्रादक्षिण्यं चिकीर्षन्तः पृथिव्या योगधर्मिणः

इति श्रीमहाभारते महाप्रस्थानिके पर्वणि
प्रथमोऽध्यायः ॥ १ ॥

२

वैशम्पायन उवाच ।

ततस्ते नियतात्मान उदीची दिशमास्थिताः
ददृशुर्योगयुक्ताश्च हिमवन्तं महागिरिम् ॥ १
तं चाप्यतिक्रमन्तस्ते ददृशुर्वालुकार्णवम् ।
अवैक्षन्त महाशैलं मेरुं शिखरिणां वरम् ॥ २
तेषां तु गच्छतां शीघ्रं सर्वेषां योगधर्मिणाम् ।
याज्ञसेनी भ्रष्टयोगा निपपात महीतले ॥ ३
तां तु प्रपतितां दृष्ट्वा भीमसेनो महाबलः ।
उवाच धर्मराजानं याज्ञसेनीमवेक्ष्य ह ॥ ४
नाधर्मश्चरितः कश्चिद्राजपुत्र्या परंतप ।
कारणं किं नु तद्ब्रूहि यत्कृष्णा पतिता भुवि ५

युधिष्ठिर उवाच ।

पक्षपातो महानस्या विशेषेण धनञ्जये ।
तस्यैतत्फलमद्यैषा भुक्ते पुरुषसत्तम ॥ ६

वैशम्पायन उवाच ।

एवमुक्त्वाऽनवेक्ष्यैनां ययौ भरतसत्तमः ।
समाधाय मनो धीमान् धर्मात्मा पुरुषर्षभः ७
सहदेवस्ततो विद्वान्निपपात महीतले ।
तं चापि पतितं दृष्ट्वा भीमो राजानमब्रवीत् ८
योऽयमस्मासु सर्वेषु शुश्रूषुरनहंकृतः ।
सोऽयं माद्रवतीपुत्रः कस्मान्निपतितो भुवि ९

युधिष्ठिर उवाच ।

आत्मनः सदृशं प्राज्ञं नैषोऽमन्यत कञ्चन ।
तेन दोषेण पतितस्तस्मादेष नृपात्मजः ॥ १०

वैशम्पायन उवाच ।

इत्युक्त्वा तं समुत्सृज्य सहदेवं ययौ तदा ।
भ्रातृभिः सह कौन्तेयः शुना चैव युधिष्ठिरः
कृष्णां निपतितां दृष्ट्वा सहदेवं च पाण्डवम् ।
आर्तो बन्धुप्रियः शूरो नकुलो निपपात ह १२
तस्मिन्निपतिते वीरे नकुले चारुदर्शने ।
पुनरेव तदा भीमो राजानमिदमब्रवीत् ॥ ११
योऽयमक्षतधर्मात्मा भ्राता वचनकारकः ।
रूपेणाप्रतिमो लोके नकुलः पतितो भुवि १४
इत्युक्तो भीमसेनेन प्रत्युवाच युधिष्ठिरः ।
नकुलं प्रति धर्मात्मा सर्वबुद्धिमतां वरः ॥ १५
रूपेण मत्समो नास्ति कश्चिदित्यस्य दर्शनम् ।
अधिकश्चाहमेवैक इत्यस्य मनसि स्थितम् १६
नकुलः पतितस्तस्मादागच्छ त्वं वृकोदर ।
'यस्य यद्धितं वीर मोऽवश्यं तदुपाश्नुते' १७
तांस्तु प्रपतितान् दृष्ट्वा पाण्डवः श्वेतवाहनः ।
पपात शोकसन्तप्तस्ततो नु परवीरहा ॥ १८
तस्मिंस्तु पुरुषव्याघ्रे पतिते शक्रतेजसि ।
म्रियमाणे दुराधर्षे भीमो राजानमब्रवीत् १९
अनृतं न स्मराम्यस्य स्वैरेष्वपि महात्मनः ।
अथ कस्य विकारोऽयं येनायं पतितो भुवि ।

युधिष्ठिर उवाच ।

एकाह्ना निर्दहेयं वै शत्रूनित्यर्जुनोऽब्रवीत् ।
न च तत्कृतवानेष शूरमानी ततोऽपतत् ॥ २१

इति श्रीमहाभारते महाप्रस्थानिके पर्वणि नैलकण्ठीये भारतभावदीपे प्रथमोऽध्याय ॥ १ ॥

२

तत इति । तत दिक्त्रयप्रदक्षिणीकरणानन्तरं योगयुक्ताः समाहितमनस्क ॥ १ ॥ भ्रष्टयोगा ध्यानात् स्खलितमानसा ॥ ३ ॥ **पक्षेति**। तुल्येषु वैषम्येण पूजा न कार्येति भाव ॥ ६ ॥ अनवेक्ष्य स्वर्गान्तरायरूप स्नेहो माभूदिति भाव ॥ ७ ॥ **आत्मन इति** । प्राज्ञत्वाभिमानोऽपि पतनहेतुरिति भाव ॥ १० ॥ **रूपेणेति** । रूपगर्वान्नकुल पपातेत्यर्थ ॥ १६ ॥ **एकाह्नेति** । शौर्यगर्वादर्जुनोऽपि मिथ्याप्रतिज्ञत्वाच्च पपातेत्यर्थ ॥ २१ ॥

अवमेने धनुर्ग्राहानेष सर्वांश्च फाल्गुनः ।
तथा चैतन्न तु तथा कर्तव्यं भूतिमिच्छता ॥ २२

वैशम्पायन उवाच ।

इत्युक्त्वा प्रस्थितो राजा
भीमोऽथ निपपात ह ।
पतितश्चाब्रवीद्भीमो
धर्मराजं युधिष्ठिरम् ॥ २३

भो भो राजन्नवेक्षस्व पतितोऽहं प्रियस्तव ।
किंनिमित्तं च पतनं ब्रूहि मे यदि वेत्थ ह २४

युधिष्ठिर उवाच ।

अतिभुक्तं च भवता प्राणेन च विकत्थसे ।
अनवेक्ष्य परं पार्थ तेनासि पतितः क्षितौ ॥२५
इत्युक्त्वा तं महाबाहुर्जगामानवलोकयन् ।
श्वाऽप्येकोऽनुययौ यस्ते बहुशः कीर्तितो मया

इति श्रीमहाभारते महाप्रस्थानिके पर्वणि द्रौपद्यादिपतने द्वितीयोऽध्यायः ॥ २ ॥



३

वैशम्पायन उवाच ।

ततः सन्नादयन् शक्रो दिवं भूमिं च सर्वशः ।
रथेनोपययौ पार्थमारोहेत्यब्रवीच्च तम् ॥ १

स्वभातॄन् पतितान् दृष्ट्वा
धर्मराजो युधिष्ठिरः ।
अब्रवीच्छोकसंतप्तः
सहस्राक्षमिदं वचः ॥ २

भ्रातरः पतिता मेऽत्र गच्छेयुस्ते मया सह ।
न विना भ्रातृभिः स्वर्गमिच्छे गन्तुं सुरेश्वर ३
सुकुमारी सुखार्हा च राजपुत्री पुरंदर ।
साऽस्माभिः सह गच्छेत तद्भवाननुमन्यताम्

शक्र उवाच ।

भ्रातॄन् द्रक्ष्यसि स्वर्गे त्वमग्रतस्त्रिदिवं गतान् ।
कृष्णया सहितान्सर्वान्मा शुचो भरतर्षभ ५
निक्षिप्य मानुषं देहं गतास्ते भरतर्षभ ।
अनेन त्वं शरीरेण स्वर्गं गन्ता न संशयः ॥ ६

युधिष्ठिर उवाच ।

अयं श्वा भूतभव्येश भक्तो मां नित्यमेव ह ।
स गच्छेत मया सार्धमानृशंस्या हि मे मतिः

शक्र उवाच ।

अमर्त्यत्वं मत्समत्वं च राजन्
श्रियं कृत्स्नां महतीं चैव सिद्धिम् ।
सम्प्राप्तोऽद्य स्वर्गसुखानि च त्वं
त्यज श्वानं नात्र नृशंसमस्ति ॥ ८

युधिष्ठिर उवाच ।

अनार्यमार्येण सहस्रनेत्र
शक्यं कर्तुं दुष्करमेतदार्य ।
मा मे श्रिया सङ्गमनं तयाऽस्तु
यस्याः कृते भक्तजनं त्यजेयम् ॥ ९

इन्द्र उवाच ।

स्वर्गे लोके श्ववतां नास्ति धिष्ण्य-
मिष्टापूर्ते क्रोधवशा हरन्ति ।
ततो विचार्य क्रियतां धर्मराज
त्यज श्वानं नात्र नृशंसमस्ति ॥ १०

युधिष्ठिर उवाच ।

भक्तत्यागं प्राहुरत्यन्तपापं
तुल्यं लोके ब्रह्मवध्याकृतेन ।
तस्मान्नाहं जातु कथं च नाद्य
त्यक्ष्याम्येनं स्वसुखार्थी महेन्द्र ॥ ११

अत्यशनाद्बलगर्वाच्च भीमसेन पपातेत्याह—**अतिभुक्तमिति**॥ २५ ॥ इति श्रीमहाभारते महाप्रस्थानिके पर्वणि नीलकण्ठीये भारतभावदीपे द्वितीयोऽध्यायः ॥ २ ॥

३

ततः सन्नादयन्नित्यस्य बान्धवभोज्यैव लक्ष्मीः श्रेयसी न स्वमात्रभोज्येति तात्पर्यम् ॥ १ ॥ अयं श्वेत्यादेर्निचतरमपि सन्निहित प्रथमं स्वसुखविभागेन संभावयेत्पश्चात्त्वय तद्भोक्तव्यमिति तात्पर्यम् ॥ ७ ॥ **नात्रेति**। अस्पृश्यस्य सगत्यागे नृशंसं निर्दयत्वं नास्ति ॥ ८ ॥ श्ववतामशुचित्वात् धिष्ण्यं स्थानं स्वर्गे नास्ति क्रोधवशा नाम देवगणाः अशुचेरिष्टापूर्तफलं घ्नन्ति ॥ १० ॥

भीतं भक्तं नान्यदस्तीति चार्तं
प्राप्तं क्षाणं रक्षणे प्राणलिप्सुम् ।
प्राणत्यागादप्यहं नैव मोक्तुं
यतेयं वै नित्यमेतद्व्रतं मे ॥ १२

इन्द्र उवाच ।

शुना दृष्टं क्रोधवशा हरन्ति
यद्दत्तमिष्टं विवृतमथो हुतं च ।
तस्माच्छुनस्त्यागमिमं कुरुष्व
शुनस्त्यागात्प्राप्स्यसे देवलोकम् ॥ १३
त्यक्त्वा भ्रातॄन् दयितां चापि कृष्णां
प्राप्तो लोकः कर्मणा स्वेन वीर ।
श्वानं चैनं न त्यजसे कथं नु
त्यागं कृत्स्नं चास्थितो मुह्यसेऽद्य १४

युधिष्ठिर उवाच ।

न विद्यते सन्धिरथापि विग्रहो
मृतैर्मर्त्यैरिति लोकेषु निष्ठा ।
न ते मया जीवयितुं हि शक्या-
स्ततस्त्यागस्तेषु कृतो न जीवताम् ॥
*भीतिप्रदानं शरणागतस्य
स्त्रिया वधो ब्राह्मणस्वापहारः ।
मित्रद्रोहस्तानि चत्वारि शक्र
भक्तत्यागश्चैव समो मतो मे ॥ १६

वैशम्पायन उवाच ।

तद्धर्मराजस्य वचो निशम्य
धर्मस्वरूपी भगवानुवाच ।
युधिष्ठिरं प्रीतियुक्तो नरेन्द्रं
श्लक्ष्णैर्वाक्यैः संस्तवसप्रयुक्तैः ॥ १७

धर्मराज उवाच ।

अभिजातोऽसि राजेन्द्र पितुर्वृत्तेन मेधया ।
अनुक्रोशेन चानेन सर्वभूतेषु भारत ॥ १८
पुरा द्वैतवने चासि मया पुत्र परीक्षितः ।
पानीयार्थे पराक्रान्ता यत्र ते भ्रातरो हताः १९
भीमार्जुनौ परित्यज्य यत्र त्वं भ्रातरावुभौ ।
मात्रोः साम्यमभीप्सन्वै नकुलं जीवमिच्छसि
अयं श्वा भक्त इत्येवं त्यक्तो देवरथस्त्वया ।
तस्मात्स्वर्गे न ते तुल्यः कश्चिदस्ति नराधिपः
अतस्त्वाक्षया लोकाः स्वशरीरेण भारत ।
प्राप्तोऽसि भरतश्रेष्ठ दिव्यां गतिमनुत्तमाम् २२

वैशम्पायन उवाच ।

ततो धर्मश्च शक्रश्च मरुतश्चाश्विनावपि ।
देवा देवर्षयश्चैव रथमारोप्य पाण्डवम् ॥ २३
प्रययुः स्वैर्विमानैस्ते सिद्धाः कामविहारिणः
सर्वे विरजसः पुण्याः पुण्यवाग्बुद्धिकर्मिणः
स तं रथं समास्थाय राजा कुरुकुलोद्वहः ।
ऊर्ध्वमाचक्रमे शीघ्रं तेजसाऽऽवृत्य रोदसी २५
ततो देवनिकाय्यस्थो नारदः सर्वलोकवित् ।
उवाचोच्चैस्तदा वाक्यं बृहद्बाहुर्बृहत्तपाः २६
येऽपि राजर्षयः सर्वे ते चापि समुपस्थिताः ।
कीर्तिं प्रच्छाद्य तेषां वै कुरुराजाऽधितिष्ठति
लोकानावृत्य यशसा तेजसा वृत्तसंपदा ।
स्वशरीरेण संप्राप्त नान्यं शुश्रुम पाण्डवात् ॥
तेजांसि यानि दृष्टानि भूमिष्ठेन त्वया विभो ।
वेश्मानि भुवे देवानां पश्यामूनि सहस्रशः ॥
नारदस्य वचः श्रुत्वा राजा वचनमब्रवीत् ।
देवानामन्त्र्य धर्मात्मा स्वपक्षांश्चैव पार्थिवान्
शुभ वा यदि वा पापं भ्रातॄणां स्थानमद्य मे ।
तदेव प्राप्तुमिच्छामि लोकानन्यान्न कामये ३१
राज्ञस्तु वचनं श्रुत्वा देवराजः पुरंदरः ।
आनृशंस्यसमायुक्तं प्रत्युवाच युधिष्ठिरम् ॥३२
स्थानेऽस्मिन्वस राजेन्द्र कर्मभिर्निर्जिते शुभैः
किं त्वं मानुष्यकं स्नेहमद्यापि परिकर्षसि ३३
सिद्धिं प्राप्तोऽसि परमां
यथा नान्यः पुमान् क्वचित ।
नैव ते भ्रातरः स्थानं
संप्राप्ताः कुरुनन्दन ॥ ३४
अद्यापि मानुषो भावः
स्पृशते त्वां नराधिप ।
स्वर्गोऽयं पश्य देवर्षीन्
सिद्धांश्च त्रिदिवालयान् ॥ ३५
युधिष्ठिरस्तु देवेन्द्रमेवंवादिनमीश्वरम् ।
पुनरेवाब्रवीद्धीमानिदं वचनमर्थवत् ॥ ३६
तैर्विना नोत्सहे वस्तुमिह दैत्यनिबर्हण
गन्तुमिच्छामि तत्राहं यत्र ते भ्रातरो गताः ॥

अभिजातोऽतिकुलीनोऽसि पितुः पाण्डो १८, निकाय्यस्थो निवासस्थ ॥ २६ ॥ वाक्यमेवाह—येऽपीति । समुपस्थिता स्मृतिविषया सन्ति ॥२७॥ यदेव भ्रातॄणां स्थानं तदेव प्राप्तुमिच्छामि ॥ ३० ॥ * 'प्रतिप्रदानम्' इति पाठ ।

यत्र सा बृहती श्यामा बुद्धिसत्त्वगुणान्विता । द्रौपदी योषितां श्रेष्ठा यत्र चैव गता मम ३८

इति श्रीमहाभारते महाप्रस्थानिके पर्वणि युधिष्ठिरस्वर्गारोहे
तृतीयोऽध्यायः ॥ ३ ॥

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरंधरचतुर्धरवंशावतंसश्रीगोविन्दसूरिसूनोः
श्रीनीलकण्ठस्य कृतौ भारतभावदीपे महाप्रस्थानिके पर्वणि तृतीयोऽध्यायः ॥ ८ ॥

महाप्रस्थानिकं पर्व समाप्तम् ।

अतः परं स्वर्गारोहणपर्व ।

तस्यायमाद्यः श्लोकः ।

जनमेजय उवाच—
स्वर्गं त्रिविष्टपं प्राप्य मम पूर्वपितामहाः ।
पाण्डवा धार्तराष्ट्राश्च कानि स्थानानि भेजिरे ॥

॥ इति श्रीमहाभारते *महाप्रस्थानिकपर्व समाप्तम् ॥

* यद्यपि आदिपर्वणि पर्वसंग्रहकथनावसरे ' एतत्सप्तदश पर्व महाप्रस्थानिकं स्मृतम् । यत्राभ्यायाश्चत्वा- श्लोकाना च शतत्रयम् । विंशतिश्च तथा श्लोका ' इति कथित तथापि संप्रति अ० ३ श्लोका ११० एव दृश्यन्ते ।

अयं ग्रन्थः श्रीकिञ्जवडेकरकुलकमलदिवाकरसोमयाजिदत्तात्रेयदीक्षिततनुज-पण्डितराम-चन्द्रशास्त्रिणा परिशोधिताष्टिप्पण्यादिना परिष्कृतश्च ॥ भारती जयतु ॥ शाके १८५४ ॥

Shriman
MAHĀBHĀRATAM
Part VI
XVIII
Swargārohana parvan

WITH

Bharata Bhawadeepa By Nilkantha.

Edited by

Pandit Ramachandrashastri Kinjawadekar.

PRINTED & PUBLISHED

BY

SHANKAR NARAHAR JOSHI

Chitrashala Press, 1026 Sadashiv Peth, Poona City

Shake 1855.] *First Edition* [*A. D 1933*

All Rights Reserved by the Publisher



श्रीमन्महाभारतम्।

षष्ठभागे—स्वर्गारोहणपर्व।

चतुर्धरवंशावतंसश्रीमन्नीलकण्ठविरचित-भारतभावदीपाख्यटीकया समेतम्।

पण्डित रामचंद्रशास्त्री किंजवडेकर इत्येतैः पाठान्तर-टिप्पण्यादियोजनया समलङ्कृतम्।



तच्च

पुण्याख्यपत्तने

१०२६ सदाशिववीथ्यां चित्रशालाख्ये मुद्रणालये 'शंकर नरहर जोशी'

इत्येतैः संमुद्र्य प्रकाशितम्।



शालिवाहनशकाब्दाः १८५५] प्रथमं संस्करणम्। [ख्रिस्ताब्दाः १९३३

अस्य ग्रन्थस्य सर्वेऽधिकाराः प्रकाशयित्रा स्वायत्तीकृताः ।

॥ श्रीभारती जयतु ॥

॥ महाभारतम् ॥



स्वर्गारोहणपर्व

—१८—

विषयानुक्रमणिका ।

अ०	श्लोका	विषय	पृष्ठम्
१	२६	'स्वर्गं गत्वा पाण्डवा धार्तराष्ट्राश्च कानि स्थानानि भेजिरे' इति जनमेजयेन पृष्टो वैशम्पायनः 'स्वर्गं प्राप्य युधिष्ठिरादयो यदकुर्वत तच्छृणु' इत्युवाच। स्वर्गं गतो युधिष्ठिरो 'दुर्योधनं श्रिया जुष्टं दृष्ट्वा नाहमनेन सह वस्तुमिच्छामि किंतु यत्र मम भ्रातरस्तिष्ठन्ति तत्र यातुम्' इति वदन्नुपदिशन्त महामुनिं नारद प्रति भ्रातृणां कर्णधृष्टद्युम्नादीना च के लोका इत्याद्यपृच्छत्।	२
२	५४	स्वर्गे कर्णादिबन्धुजनानपश्यता युधिष्ठिरेण देवान्प्रति यत्र कुत्रापि बन्धुजनैः सहैव स्वस्य निवासेच्छानिवेदनम्। देवैर्युधिष्ठिराय बन्धुजनप्रदर्शनं चोदितेन देवदूतेन तस्य नरकप्रदेशप्रापणम्। दुर्दर्शनरकदर्शनासहिष्णुतया दूतेन सह प्रतिनिवर्तमानेन युधिष्ठिरेण श्रुतपूर्वकण्ठध्वनिश्रवणम्। ततो युधिष्ठिरपृष्टैस्तैस्तं प्रति स्वेषां कर्णभीमादित्वकथनम्। ततस्तेन दूतं प्रति इन्द्रे स्वस्य तत्समीप प्रत्यनागमनचोदना। दूतेनेन्द्रे युधिष्ठिरविचिकीर्षितनिवेदनम्।	४
३	४४	दूतवाक्यं श्रुत्वा इन्द्रप्रभृतयो देवाः युधिष्ठिरमाजग्मुः। तत इन्द्रो 'युधिष्ठिर महाबाहो' इत्यादिना त्वया सिद्धिः प्राप्ता तवाक्षया लोकाः, तव त्याजेन नरको दर्शित', एहि भ्रातॄन् स्वपक्ष्यांश्च स्वस्थानस्थान् पश्य, स्वर्गगामाप्लुतस्य तव मानुषो भावो गमिष्यति इत्याद्यवदत। इन्द्रोक्त्यनन्तरं साक्षाद्धर्मेण 'भो भो राजन् महाप्राज्ञ' इत्यादिना 'द्वैतवने प्रश्नद्वारा प्रथमा परीक्षा तव, द्वितीया च स्वर्गगमनकाले श्वरूपधारिणा कृता, तृतीया चेयम्' इत्युक्त्वा 'न च ते भ्रातरः पार्थ नरकार्हा विशांपते' इत्यादिना बोधितो युधिष्ठिरो गंगामवगाह्य दिव्यवपुर्भूत्वा धर्मेण सहितो महर्षिभिः स्तूयमानो निर्वैरो यत्र दुर्योधनादयः स्वानि स्थानानि भेजिरे तत्र जगाम	५
४	२३	सभायां गतो युधिष्ठिरोऽर्जुनेन	


अ०	श्लोका	विषय	पृष्ठम्
		सेव्यमानं गोविन्दं, द्वादशादित्यसहितं कर्णं, मरुद्गणसहितं भीमं, अश्विभ्यां सहितौ नकुलसहदेवौ, द्रौपदीं च कमलमालिनीं स्वर्गमाक्रम्य तिष्ठन्तीं च ददर्श। दृष्ट्वा च तेन पृष्ट इन्द्रः 'श्रीरेषा द्रौपदीरूपा त्वदर्थे मानुषं गता। अयोनिजा' इत्यादिना प्रत्येकं सर्वान् व्याजहार।	६
५	६८	भीष्मद्रोणौ महात्मानौ इत्यादिना भीष्मादीनामनुक्तानामन्येषां च स्वर्गे कियन्तं कालं स्थितिराहोस्वित्तेषां तत्र शाश्वतं स्थानं कर्मणामन्ते वा कां गतिं प्राप्ता इति जनमेजयप्रश्ने व्यासेनानुज्ञातो वैशम्पायनस्तत्प्रश्नमभिनन्द्य कर्मणामन्ते स्वैः स्वैरंशिभिस्तादात्म्यं प्राप्तं योग्यान् भीष्मादीन् 'वसूनेव महातेजाः' इत्यादिनाऽऽख्याय एतत्ते सर्वमाख्यातं इत्यादिना कौरवपाण्डवचरितकथनमुपसंजहार। सौतिः शौनकादिप्रति 'एतच्छ्रुत्वा द्विजश्रेष्ठाः' इत्यादिना वैशम्पायनकथितामेतां कथां श्रुतवतो जनमेजयस्य यज्ञसमाप्तिपूर्वकं तक्षशिलातो हस्तिनापुरगमनमाख्याय 'एतत्ते सर्वमाख्यातम्' इत्यादिनोपसंहृत्य महाभारत श्रवणपठनानां फलानि प्रातःपठनयोग्यं भारतसारसंग्रहं 'मातापितृसहस्राणि' इत्यादि श्लोकचतुष्टयात्मकं भारतसावित्रीरूपं चाख्याय तन्माहात्म्यं व्याजहार।	९

अथ हरिवंशोक्तमहाभारतश्रवणमाहात्म्याध्यायस्य विषयानुक्रमः।

'भगवन् केन विधिना' इत्यादिना केन विधिना श्रोतव्यं, किं फलं, के च देवाः पूज्याः, पर्वाणि पर्वाणि समाप्ते च किं देयं, वाचकः कीदृशः इति पप्रच्छ जनमेजयः। 'शृणु राजन् विधिमिमम्' इत्यादिना श्रवणविधिं कथयन् वैशम्पायनः 'अत्र रुद्रास्तथा साध्याः' इत्यादिना भारतस्था देवताः, श्रवणानन्तरं देयानि महादानानि, तथा गवादीनां दानानि चाख्याय 'सत्यार्जवरतो दान्तः' इत्यादिना वाचकस्य लक्षणान्यभ्यधात्। 'पारणं प्रथमं प्राप्य' इत्यादिना दशपर्यंतानां पारणानां प्रत्येकं फलानि, प्राप्यौल्लोकांश्चाख्याय वाचकस्य गुरुवत्पूजनं, तस्मै हस्त्यश्वादिदानानि तस्य देववत्पूजनं चाचष्ट। प्रतिपर्वसमाप्तौ भोज्यविशेषेण ब्राह्मणभोजनं वाचकपूजनादिकं सर्वसमाप्तौ क्षौमवस्त्रवेष्टितस्य भारतस्य पूजनं, वाचकपूजनं, ब्राह्मणभोजनादिकं ससुवर्णपुस्तकदानादिकं चाकथयद्वैशम्पायनः। 'इत्येष विधिरुद्दिष्टः' इत्यादिना उपसंहृत्य महाभारतप्रशंसापूर्वकं तच्छ्रवणफलादिकं च श्रद्धोत्पादनार्थं पुनर्व्याजहार वैशम्पायन इत्योम्॥ श्रीकृष्णार्पणमस्तु॥ शुभं भवतु। भारतीजयतु॥

स्वर्गारोहणपर्व

१८





॥ महाभारतम् ॥

स्वर्गारोहणपर्व ।

-१८-

श्रीगणेशाय नमः ।

नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ॥
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥

जनमेजय उवाच ।
स्वर्गं त्रिविष्टपं प्राप्य मम पूर्वपितामहाः ।
पाण्डवा धार्तराष्ट्राश्च कानि स्थानानि भेजिरे
एतदिच्छाम्यहं श्रोतुं सर्वविच्चासि मे मतः ।
महर्षिणाऽभ्यनुज्ञातो व्यासेनाद्भुतकर्मणा २
वैशम्पायन उवाच ।
स्वर्गं त्रिविष्टपं प्राप्य तव पूर्वपितामहाः ।
युधिष्ठिरप्रभृतयो यदकुर्वत तच्छृणु ॥ ३
स्वर्गं त्रिविष्टपं प्राप्य धर्मराजो युधिष्ठिरः ।
दुर्योधन श्रिया जुष्टं ददर्शासीनमासने ॥ ४
भ्राजमानमिवादित्यं वीरलक्ष्म्याऽभिसंवृतम्
देवैर्भ्राजिष्णुभिः साध्यैः सहितं पुण्यकर्मभिः
ततो युधिष्ठिरो दृष्ट्वा दुर्योधनममर्षितः ।
सहसा सन्निवृत्तोऽभूच्छ्रियं दृष्ट्वा सुयोधने ६
ब्रुवद्भिर्वैचरस्तान्वै नाह दुर्योधनेन वै ।
सहितः कामये लोकाँहुब्धेनादीर्घदर्शिना ७
यत्कृते पृथिवी सर्वा सुहृदो बान्धवास्तथा ।
हताऽस्माभिः प्रसह्याजौ क्लिष्टैः पूर्वं महावने
द्रौपदी च सभामध्ये पाञ्चाली धर्मचारिणी
पर्याकृष्टाऽनवद्याङ्गी पत्नी नो गुरुसन्निधौ ॥९
अस्ति देवा न मे कामः सुयोधनमुदीक्षितुम्
तत्राहं गन्तुमिच्छामि यत्र ते भ्रातरो मम १०

१

श्रीगणेशाय नम ॥ पूर्वस्मिन् पर्वणि धर्मस्य फलभूतास्त्यागानृशंस्यादयो युधिष्ठिरदृष्टान्तेन दर्शिता । इदानीं तस्य मुख्यं फलं दर्शयितुं स्वर्गारोहणपर्वारभते-**स्वर्गं त्रिविष्टपमिति** । यथा भूयस्या संख्यायामल्पसंख्यान्तर्भवति एवं त्रीणि विष्टपानि भुवनान्यपि फलोत्कर्षवशाद्यत्रान्तर्भवन्ति तादृशमपि स्वर्गं प्राप्य । 'विष्टपं भुवनं जगत्' इत्यमर ॥ १ ॥ **तत इति** । स्वर्गेऽप्यमर्षो दुस्त्यज इति संस्काराणा प्राबल्यमुक्तम् ॥ ६ ॥ हता अस्माभिः सन्धिरार्ष ॥ ८ ॥

नैवमित्यब्रवीत्तं तु नारदः प्रहसन्निव ।
स्वर्गे निवासे राजेन्द्र विरुद्धं चापि नश्यति
युधिष्ठिर महाबाहो मैवं वोचः कथञ्चन ।
दुर्योधनं प्रति नृपं शृणु चेदं वचो मम ॥ १२
एष दुर्योधनो राजा पूज्यते त्रिदशैः सह ।
सन्निश्च राजप्रवरैर्यं इमे स्वर्गवासिनः ॥ १३
वीरलोकगतिं प्राप्ता युद्धे हुत्वाऽऽत्मनस्तनुम्
यूयं सर्वे सुरसमा येन युद्धे समासिताः ॥१४
स एष क्षत्रधर्मेण स्थानमेतदवाप्तवान् ।
भये महति योऽभीतो बभूव पृथिवीपतिः १५
न तन्मनसि कर्तव्यं पुत्र यद्द्यूतकारितम् ।
द्रौपद्याश्च परिक्लेशं न चिन्तायेतुमर्हसि १६
ये चान्येऽपे परिक्लेशा
युष्माकं ज्ञातिकारिताः ।
संग्रामेष्वथ वाऽन्यत्र
न तान्संस्मर्तुमर्हसि ॥ १७
समागच्छ यथान्यायं राज्ञा दुर्योधनेन वै ।
स्वर्गोऽयं नेह वैराणि भवन्ति मनुजाधिप ॥
नारदेनैवमुक्तस्तु कुरुराजो युधिष्ठिरः ।
भ्रातॄन्पप्रच्छ मेधावी वाक्यमेतदुवाच ह १९
यदि दुर्योधनस्यैते वीरलोकाः सनातनाः ।
अधर्मज्ञस्य पापस्य पृथिवी सुहृदद्रुहः ॥ २०
यत्कृते पृथिवी नष्टा सहया सनरद्विपा ।
वयं च मन्युना दग्धा वैरं प्रतिचिकीर्षवः २१
ये ते वीरा महात्मानो भ्रातरो मे महाव्रताः
सत्यप्रतिज्ञा लोकस्य शूरा वै सत्यवादिनः ॥
तेषामिदानीं के लोका द्रष्टुमिच्छामि तानहं
कर्णं चैव महात्मानं कौन्तेयं सत्यसंगरम् ॥
धृष्टद्युम्नं सात्यकिं च धृष्टद्युम्नस्य चात्मजान्
ये च शस्त्रैर्वधं प्राप्ताः क्षत्रधर्मेण पार्थिवाः २४
क्व नु ते पार्थिवान् ब्रह्मन्नैतान्पश्यामि नारद
विराटद्रुपदौ चैव धृष्टकेतुमुखाश्च तान् ॥ २५
शिखण्डिनं च पाञ्चाल्य द्रौपदेयांश्च सर्वशः
अभिमन्युं च दुर्धर्षं द्रष्टुमिच्छामि नारद २६

इति श्रीमहाभारते स्वर्गारोहणपर्वणि स्वर्गे नारदयुधिष्ठिरसंवादे
प्रथमोऽध्यायः ॥ १ ॥



२

युधिष्ठिर उवाच ।

नेह पश्यामि विबुधा राधेयमितौजसम्
भ्रातरौ च महात्मानौ युधामन्यूत्तमौजसौ
जुहुवुर्ये शरीराणि रणवन्हौ महारथाः ।
राजानो राजपुत्राश्च ये मदर्थे हता रणे ॥ २
क्व ते महारथाः सर्वे शार्दूलसमविक्रमाः ।
तैरप्ययं जितो लोकः कच्चित्पुरुषसत्तमैः ॥ ३
यदि लोकानिमान्प्राप्तास्ते च सर्वे महारथाः
स्थितं वित्त हि मां देवाः सहितं तैर्महात्मभिः
कच्चिन्न तैरवाप्तोऽयं नृपैर्लोकोऽक्षयः शुभः ।
न तैरहं विना रंस्ये भ्रातृभिर्ज्ञातिभिस्तथा ५
मातुर्हि वचनं श्रुत्वा तदा सलिलकर्मणि ।
कर्णस्य क्रियतां तोयमिति तप्यामि तेन वै ६
इदं च परितप्यामि पुनः पुनरहं सुराः ।
यन्मातुः सदृशौ पादौ तस्याहमभितात्मनः ७
दृष्ट्वैव तौ नानुगतः कर्णं परबलार्दनम् ।
न ह्यस्मान्कर्णसहितान् जयेच्छक्रोऽपे संयुगे
तमहं यत्रतत्रस्थं
द्रष्टुमिच्छामि सूर्यजम् ।
अविज्ञातो मया योऽसौ
घातितः सव्यसाचिना ॥ ९
भीमं च भीमविक्रान्तं प्राणेभ्योऽपि प्रियं मम
अर्जुनं चेन्द्रसंकाशं यमौ चैव यमोपमौ ॥ १०

विरुद्धं वैरादिकं नश्यति अन्तर्धीयते ॥ ११ ॥ अभीत इति च्छेदः ॥ १५ ॥ स्मृद इत्यदन्त शब्द ॥ २० ॥ इति श्रीमहाभारते स्वर्गारोहणपर्वणि नैलकण्ठीये भारतभावदीपे प्रथमोऽध्याय ॥ १ ॥

२

नेहेति ॥ १ ॥

द्रष्टुमिच्छामि तां चाहं पाञ्चालीं धर्मचारिणीं
न चेह भ्रातृमिच्छामि सत्यमेवं ब्रवीमि वः ॥
किं मे भ्रातृविहीनस्य स्वर्गेण सुरसत्तमाः ।
यत्र ते मम स स्वर्गो नायं स्वर्गो मतो मम १२

देवा ऊचुः ।

यदि वै तत्र ते श्रद्धा गम्यतां पुत्र माचिरम्
प्रिये हि तव वर्तामो देवराजस्य शासनात्

वैशम्पायन उवाच ।

इत्युक्त्वा त ततो देवा देवदूतमुपादिशन्
युधिष्ठिरस्य सुहृदो दर्शयेति परंतप ॥ १४
ततः कुन्तीसुतो राजा देवदूतश्च जग्मतुः ।
सहितौ राजशार्दूल यत्र ते पुरुषर्षभाः ॥ १५
अग्रतो देवदूतश्च ययौ राजा च पृष्ठतः ।
पन्थानमशुभं दुर्गं सेवितं पापकर्मभिः ॥ १६
तमसा संवृतं घोरं केशशैवलशाद्वलम् ।
युक्तं पापकृतां गन्धैर्मांसशोणितकर्दमम् १७
दंशोत्पातकभल्लूकमक्षिकामशकावृतम् ।
इतश्चेतश्च कुणपैः समन्तात्परिवारितम् ॥ १८
अस्थिकेशसमाकीर्णं कृमिकीटसमाकुलम् ।
ज्वलनेन प्रदीप्तेन समन्तात्परिवेष्टितम् ॥ १९
अयोमुखैश्च काकाद्यैर्गृध्रैश्च समभिद्रुतम् ।
सूचीमुखैस्तथा प्रेतैर्विन्ध्यशैलोपमैर्वृतम् ॥ २०
मेदोरुधिरयुक्तैश्च च्छिन्नबाहूरुपाणिभिः ।
निकृत्तोदरपादैश्च तत्र तत्र प्रवेरितैः ॥ २१
स तत्कुणपदुर्गन्धमशिवं लोमहर्षणम् ।
जगाम राजा धर्मात्मा मध्ये बहु विचिन्तयन्
ददर्शोष्णोदकैः पूर्णां नदीं चापि सुदुर्गमाम् ।
असिपत्रवनं चैव निशितं क्षुरसंवृतम् ॥ २३
करम्भवालुकास्तप्ता आयसीश्च शिलाः पृथक्
लोहकुम्भीश्च तैलस्य काथ्यमानाः समन्ततः
कूटशाल्मलिकं चापि
दुःस्पर्शं तीक्ष्णकण्टकम् ।
ददर्श चापि कौन्तेयो
यातनाः पापकर्मिणाम् ॥ २५
स त दुर्गन्धमालक्ष्य देवदूतमुवाच ह ।
कियद्ध्वानमस्माभिर्गन्तव्यमिममीदृशम् २६
क च ते भ्रातरो मह्यं तन्ममाख्यातुमर्हसि ।
देशोऽयं कश्च देवानामेतदिच्छामि वेदितुम्
स संनिवृत्ते श्रुत्वा धर्मराजस्य भाषितम् ।
देवदूतोऽब्रवीच्चैनमेतावद्गमनं तव ॥ २८
निवर्ततां तव्यो हि मया
तथाऽस्युक्तो दिवौकसैः ।
यदि श्रान्तोऽसि राजेन्द्र
त्वमथागन्तुमर्हसि । २९
युधिष्ठिरस्तु निर्विण्णस्तेन गन्धेन मूर्च्छितः ।
निवर्तने धृतमनाः पर्यावर्तत भारत ॥ ३०
स संनिवृत्तो धर्मात्मा दुःखशोकसमाहतः
शुश्राव तत्र वदतां दीना वाचः समन्ततः ३१
भो भो धर्मज राजर्षे पुण्याभिजन पाण्डव
अनुग्रहार्थमस्माकं तिष्ठ तावन्मुहूर्तकम् ॥ ३२
आयाति त्वयि दुर्धर्षे वाति पुण्यः समीरणः
तव गन्धानुगस्तात येनास्मान् सुखमागमत् ॥
ते वयं पार्थ दीर्घस्य कालस्य पुरुषर्षभ ।
सुखमासादयिष्यामस्त्वां दृष्ट्वा राजसत्तम ॥
संतिष्ठस्व महाबाहो मुहूर्तमपि भारत ।
त्वयि तिष्ठति कौरव्य यातनास्मान्न बाधते
एवं बहुविधा वाचः कृपणा वेदनावताम् ।
तस्मिन्देशे स शुश्राव समन्ताद्रुदता नृप ३६
तेषां तु वचनं श्रुत्वा दयावान्दीनभाषिणाम्
अहो कृच्छ्रमिति प्राह तस्थौ स च युधिष्ठिरः
स ता गिरः पुरस्ताद्वै श्रुतपूर्वा पुनः पुनः ।
ग्लानानां दुःखितानां च नाभ्यजानत पांडवः
अबुध्यमानस्ता वाचो धर्मपुत्रो युधिष्ठिरः ।
उवाच के भवन्तो वै किमर्थमिह तिष्ठथ ३९
इत्युक्तास्ते ततः सर्वे समन्तादवभाषिरे ।
कर्णोऽहं भीमसेनोऽहमर्जुनोऽहमिति प्रभो ॥
नकुलः सहदेवोऽहं धृष्टद्युम्नोऽहमित्युत ।
द्रौपदी द्रौपदेयाश्च इत्येवं ते विचुक्रुशुः ॥ ४१
ता वाचः स तदा श्रुत्वा तद्देशसदृशीर्नृप ।
ततो विममृशे राजा किन्त्विदं दैवकारितम्
किं तु तत्कलुषं कर्म कृतमेभिर्महात्मभिः ।
कर्णेन द्रौपदेयैर्वा पाञ्चाल्या वा सुमध्यया ॥
य इमे पापगन्धेऽस्मिन्देशे सन्ति सुदारुणे ।
नाहं जानामि सर्वेषां दुष्कृतं पुण्यकर्मणाम् ॥
किं कृत्वा धृतराष्ट्रस्य पुत्रो राजा सुयोधनः ।
तथा श्रिया युतः पापैः सह सर्वैः पदानुगैः ॥

प्रवेरितैरितस्तत पातितै ॥ २१ ॥ करम्भवालुका- श्वेतसूक्ष्मवालुका भ्राष्ट्रवालुका इत्यर्थ ॥२४॥

महेन्द्र इव लक्ष्मीवानास्ते परमपूजितः ।
कस्येदानीं विकारोऽयं य इमे नरकं गताः ॥
सर्वधर्मविदः शूराः सत्यागमपरायणाः ।
क्षत्रधर्मरताः सन्तो यज्वानो भूरिदक्षिणाः ॥
किं नु सुप्तोऽस्मि जागर्मि चेतयामि न चेतये
अहो चित्तविकारोऽयं स्याद्वा मे चित्तविभ्रमः
एव बहुविधं राजा विममर्श युधिष्ठिरः ५०
दुःखशोकसमाविष्टश्चिन्ताव्याकुलितेन्द्रियः ॥
क्रोधमाहार्यचैव तीव्रं धर्मसुतो नृपः ।
देवांश्च गर्हयामास धर्मं चैव युधिष्ठिरः ॥ ५०

स तीव्रगन्धसन्तप्तो देवदूतमुवाच ह ।
गम्यतां तत्र येषां त्वं दूतस्तेगमुपान्तिकम् ॥
न ह्यहं तत्र यास्यामि
स्थितोऽस्मीति निवेद्यताम् ।
मत्संश्रयादिमे दूनाः
सुखिनो भ्रातरो हि मे ॥ ५२
इत्युक्तः स तदा दूतः पाण्डुपुत्रेण धीमता ।
जगाम तत्र यत्रास्ते देवराजः शतक्रतुः ॥ ५३
निवेदयामास च तद्धर्मराजविकीर्षितम् ।
यथोक्तं धर्मपुत्रेण सर्वमेव जनाधिप ॥ ५४

इति श्रीमहाभारते स्वर्गारोहणपर्वणि युधिष्ठिरनरकदर्शने
द्वितीयोऽध्यायः ॥ २ ॥



३

वैशम्पायन उवाच ।
स्थिते मुहूर्तं पार्थे तु धर्मराजे युधिष्ठिरे ।
आजग्मुस्तत्र कौरव्य देवाः शक्रपुरोगमाः १
स च विग्रहवान्धर्मो राजान प्रसमीक्षितुम् ।
तत्राजगाम यत्रासौ कुरुराजो युधिष्ठिरः २
तेषु भासुरदेहेषु पुण्याभिजनकर्मसु ।
समागतेषु देवेषु व्यगमत्तत्तमो नृप ॥ ३
नादृश्यन्त च तास्तत्र यातनाः पापकर्मिणाम्
नदी वैतरणी चैव कूटशाल्मलिना सह ॥ ४
लोहकुम्भ्यः शिलाश्चैव नादृश्यन्त भयानकाः ।
विकृतानि शरीराणि यानि तत्र समन्ततः ५
ददर्श राजा कौरव्यस्तान्यदृश्यानि चाभवन्
ततो वायुः सुखस्पर्शः पुण्यगन्धवहः शुचिः ६
ववौ देवसमीपस्थः शीतलोऽतीव भारत ।
मरुतः सह शक्रेण वसवश्चाश्विनौ सह ॥ ७
साध्या रुद्रास्तथाऽऽदित्या
ये चान्येऽपि दिवौकसः ।
सर्वे तत्र समाजग्मुः
सिद्धाश्च परमर्षयः ॥ ८

यत्र राजा महातेजा धर्मपुत्रः स्थितोऽभवत् ।
ततः शक्रः सुरपतिः श्रिया परमया युतः ॥ ९
युधिष्ठिरमुवाचेदं सान्त्वपूर्वमिदं वचः ।
युधिष्ठिर महाबाहो लोकाश्चाप्यक्षयास्तव ॥
पश्येहि पुरुषव्याघ्र
कृतमेतावता विभो ।
सिद्धिः प्राप्ता महाबाहो
लोकाश्चाप्यक्षयास्तव ॥ ११
न च मन्युस्त्वया कार्यः शृणु चेदं वचो मम
अवश्यं नरकस्तात द्रष्टव्यः सर्वराजभिः १२
शुभानामशुभानां च द्वौ राशी पुरुषर्षभ ।
यः पूर्वं सुकृतं भुंक्ते पश्चान्निरयमेव सः ॥ १३
पूर्वं नरकभाग्यस्तु पश्चात्स्वर्गमुपैति सः ।
भूयिष्ठं पापकर्मा यः स पूर्वं स्वर्गमश्नुते ॥ १४
तेन त्वमेवं गमितो मया श्रेयोर्थिना नृप ।
व्याजेन हि त्वया द्रोण उपचीर्णः सुतं प्रति
व्याजेनैव ततो राजन् दर्शितो नरकस्तव ।
यथैव त्वं तथा भीमस्तथा पार्थो यमौ तथा

विममर्श विचारं कृतवान् ॥ ४९ ॥ दूना खिन्ना ॥५२॥
इति श्रीमहाभारते स्वर्गारोहणपर्वणि नैलकण्ठीये भारतभाव-
दीपे द्वितीयोऽध्याय ॥ २ ॥

३

स्थित इति ॥ १ ॥ शत्रूणा स्वर्गो भ्रातृणा नरक
इति युधिष्ठिरस्य ईर्ष्याविषादावपनयति—य इति ॥१३॥
हत कुञ्जर इति अश्वत्थामवधे द्रोण उपचीर्णा वञ्चिन गज-
वाची शब्दो मनुष्यपरत्वेन ज्ञापित इत्युपचारच्छलेनेत्यर्थ १५

द्रौपदी च तथा कृष्णा त्यजेन नरकं गताः
आगच्छ नरशार्दूल मुक्तास्ते चैव कल्मषात्
स्वपक्ष्यांश्चैव ये तुभ्यं पार्थिवा निहता रणे ।
सर्वे स्वर्गमनुप्राप्तास्तान्पश्य भरतर्षभ ॥ १८
कर्णश्चैव महेष्वासः सर्वशस्त्रभृतां वरः ।
स मतः परमां सिद्धिं यदर्थं परितप्यसे १९
तं पश्य पुरुषव्याघ्रमादित्यतनयं विभो ।
स्वस्थानस्थं महाबाहो जहि शोकं नरर्षभ ॥
भ्रातॄंश्चान्यांस्तथा पश्य
स्वपक्ष्यांश्चैव पार्थिवान् ।
स्वं स्वं स्थानमनुप्राप्तान्
त्यजेतु ते मानसो ज्वरः ॥ २१
कृच्छ्रं पूर्वं चानुभूय इतःप्रभृति कौरव ।
विहरस्व मया सार्धं गतशोको निरामयः २२
कर्मणां तात पुण्यानां जितानां तपसा स्वयम्
दानानां च महाबाहो फलं प्राप्नुहि पार्थिव ॥
अद्य त्वां देवगन्धर्वा दिव्याश्चाप्सरसो दिवि
उपसेवन्तु कल्याणं विरजोम्बरभूषणाः ॥ २४
राजसूयजिताँल्लोकान्
स्वयमेवासिऋद्धितान्+ ।
प्राप्नुहि त्वं महाबाहो
तपसश्च महाफलम् ॥ २५
उपर्युपरि राज्ञां हि तव लोका युधिष्ठिर ।
हरिश्चन्द्रसमाः पार्थ येषु त्वं विहरिष्यसि ॥
मांधाता यत्र राजर्षिर्यत्र राजा भगीरथः ।
दौष्यन्तिर्यत्र भरतस्तत्र त्वं विहरिष्यसि २७
एषा देवनदी पुण्या पार्थ त्रैलोक्यपावनी ।
आकाशगङ्गा राजेन्द्र तत्राप्लुत्य गमिष्यसि ॥
अत्र स्नातस्य भावस्ते मानुषो विगमिष्यति ।
गतशोको निरायासो मुक्तवैरो भविष्यसि ॥
एवं ब्रुवति देवेन्द्रे कौरवेन्द्रं युधिष्ठिरम् ।
धर्मो विग्रहवान् साक्षादुवाच सुतमात्मनः ॥
भो भो राजन्महाप्राज्ञ प्रीतोऽस्मि तव पुत्रक
मद्भक्त्या सत्यवाक्यैश्च क्षमया च दमेन च
एषा तृतीया जिज्ञासा तव राजन् कृता मया
न शक्यसे चालयितुं स्वभावात्पार्थ हेतुतः ॥
पूर्वं परीक्षितो हि त्वं प्रश्नाद्वैतवने मया ।
अरणीसहितस्यार्थे तच्च निस्तीर्णवानसि ३३
सोदर्येषु विनष्टेषु द्रौपद्या तत्र भारत ।
स्वरूपधारिणा तत्र पुनस्त्वं मे परीक्षितः ३४
इदं तृतीयं भ्रातॄणामर्थे यत्स्थातुमिच्छसि ।
विशुद्धोऽसि महाभाग सुखी विगतकल्मषः
न च ते भ्रातरः पार्थ नरकार्हा विशांपते ।
मायैषा देवराजेन महेन्द्रेण प्रयोजिता ॥ ३६
अवश्यं नरकास्तात द्रष्टव्याः सर्वराजभिः ।
ततस्त्वया प्राप्तमिदं मुहूर्तं दुःखमुत्तमम् ॥ ३७
न सव्यसाची भीमो वा यमौ वा पुरुषर्षभौ
कर्णो वा सत्यवाक् शूरो नरकार्हाश्चिरं नृप
न कृष्णा राजपुत्री च नरकार्हा कथञ्चन ।
एह्येहि भरतश्रेष्ठ पश्य गङ्गां त्रिलोकगाम् ३९
एवमुक्तः स राजर्षिस्तव पूर्वपितामहः ।
जगाम सह धर्मेण सर्वैश्च त्रिदिवालयैः ॥ ४०
गङ्गां देवनदीं पुण्यां पावनीमृषिसंस्तुताम् ।
अवगाह्य ततो राजा तनुं तत्याज मानुषीम् ॥
ततो दिव्यवपुर्भूत्वा धर्मराजो युधिष्ठिरः ।
निर्वैरो गतसंतापो जले तस्मिन्समाप्लुतः४२
ततो ययौ वृतो देवैः कुरुराजो युधिष्ठिरः ।
धर्मेण सहितो धीमांस्तूयमानो महर्षिभिः ॥
यत्र ते पुरुषव्याघ्राः शूरा विगतमन्यवः ।
पाण्डवा धार्तराष्ट्राश्च स्वानि स्थानानि भेजिरे

इति श्रीमहाभारते स्वर्गारोहणपर्वणि युधिष्ठिरतनुत्यागे
तृतीयोऽध्यायः ॥ ३ ॥

तुभ्यं तव ॥ १८ ॥ असिऋद्धितान् खड्गबलेन ऋद्धिं प्रापितान् ॥ २५ ॥ जिज्ञासा परीक्षा ॥ ३२ ॥ स्वर्गाधिरोहणे द्रौपद्या सह सोदर्येषु विनष्टेषु सत्सु स्वरूपधारिणा शुनकरूपिणा । द्रौपद्या इति पञ्चमीपाठे तामारभ्येत्यर्थ ॥ ३४ ॥ यत्र ते पाण्डवास्तत्र देवै सह यथाविति द्वयो सम्बन्ध ॥ ४३ ॥ इति श्रीमहाभारते स्वर्गारोहणपर्वणि नैलकण्ठीये भारतभावदीपे तृतीयोऽध्याय ॥ ३ ॥

+ ' अश्वमेधाभिनिर्मितान् ' इत्यपि पाठ ।

४

वैशम्पायन उवाच ।

ततो युधिष्ठिरो राजा देवैः सर्षिमरुद्गणैः ।
स्तूयमानो ययौ तत्र यत्र ते कुरुपुङ्गवाः ॥ १
ददर्श तत्र गोविन्दं ब्राह्मेण वपुषाऽन्वितम् ।
तेनैव दृष्टपूर्वेण सादृश्येनैव सूचितम् ॥ २
दीप्यमानं स्ववपुषा दिव्यैरस्त्रैरुपस्थितम् ।
चक्रप्रभृतिभिर्घोरैर्दिव्यैः पुरुषविग्रहैः ॥ ३
उपास्यमान वीरेण फाल्गुनेन सुवर्चसा ।
तथास्वरूपं कौन्तेयो ददर्श मधुसूदनम् ॥४
तावुभौ पुरुषव्याघ्रौ समुद्वीक्ष्य युधिष्ठिरम् ।
यथावत्प्रतिपेदाते पूजया देवपूजितौ ॥ ५
अपरस्मिन्नथोद्देशे कर्णं शस्त्रभृतां वरम् ।
द्वादशादित्यसहित ददर्श कुरुनन्दनः ॥ ६
अथापरस्मिन्नुद्देशे मरुद्गणवृतं विभुम् ।
भीमसेनमथापश्यत्तेनैव वपुषाऽन्वितम् ॥ ७
वायोर्मूर्तिमतः पार्श्वे दिव्यमूर्तिसमन्वितम् ।
श्रिया परमया युक्तं सिद्धिं परमिकां गतम् ८
अश्विनोस्तु तथा स्थाने दीप्यमानौ स्वतेजसा
नकुलं सहदेवं च ददर्श कुरुनन्दनः ॥ ९
तथा ददर्श पाञ्चाली कमलोत्पलमालिनीम् ।
वपुषा स्वर्गमाक्रम्य तिष्ठन्तीमर्कवर्चसम् १०
अखिलं सहसा राजा प्रष्टुमैच्छद्युधिष्ठिरः ।
ततोऽस्य भगवानिन्द्रः कथयामास देवराट्
श्रीरेषा द्रौपदीरूपा त्वदर्थे मानुषं गता ।
अयोनिजा लोककान्ता पुण्यगन्धा युधिष्ठिर
रत्यर्थं भवतां ह्येषा निर्मिता शूलपाणिना ।
द्रुपदस्य कुले जाता भवद्भिश्चोपजीविता १२
एते पञ्च महाभागा गन्धर्वाः पावकप्रभाः ।
द्रौपद्यास्तनया राजन् युष्माकममितौजसः ॥
पश्य गन्धर्वराजानं धृतराष्ट्रं मनीषिणम् ।
एनं च त्वं विजानीहि भ्रातरं पूर्वजं पितुः ॥
अयं ते पूर्वजो भ्राता कौन्तेयः पावकद्युतिः ।
सूतपुत्राग्रजः श्रेष्ठो राधेय इति विश्रुतः ॥ १६
आदित्यसहितो याति पश्यैनं पुरुषर्षभम् ।
साध्यानामथ देवानां विश्वेषां मरुतामपि १७
गणेषु पश्य राजेन्द्र वृष्ण्यन्धकमहारथान् ।
सात्यकिप्रमुखान्वीरान्भोजाश्चैव महाबलान्
सोमेन सहितं पश्य सौभद्रमपराजितम् ।
अभिमन्युं महेष्वासं निशाकरसमद्युतिम् १९
एष पाण्डुर्महेष्वासः कुन्त्या माद्र्या च संगतः
विमानेन सदाऽभ्येति पिता तव ममान्तिकम्
वसुभिः सहितं पश्य भीष्मं शान्तनवं नृपम् ।
द्रोणं बृहस्पतेः पार्श्वे गुरुमेनं निशामय २१
एते चान्ये महीपाला योधास्तव च पाण्डव
गन्धर्वसहिता यान्ति यक्षपुण्यजनैस्तथा २२

गुह्यकानां गतिं चापि
केचित्प्राप्ता नराधिपाः ।
त्यक्त्वा देहं जितः स्वर्गः
पुण्यवाग्बुद्धिकर्मभिः ॥ २३

इति श्रीमहाभारते स्वर्गारोहणपर्वणि द्रौपद्यादिस्वस्वस्थानगमने चतुर्थोऽध्यायः ॥ ४ ॥

५

जनमेजय उवाच ।

भीष्मद्रोणौ महात्मानौ धृतराष्ट्रश्च पार्थिवः । विराटद्रुपदौ चोभौ शङ्खश्चैवोत्तरस्तथा ॥ १

४

तत इति ॥ १ ॥ ब्राह्मेण ब्रह्मणा आराध्येन ॥ २ ॥ उपस्थित सेवितं अस्त्रै ॥ ३ ॥ मानुषं मानुषभावम् ॥१२॥ इति श्रीमहाभारते स्वर्गारोहणपर्वणि नैलकण्ठीये भारतभावदीपे चतुर्थोऽध्याय ॥ ४ ॥

५

पूर्वस्मिन्नध्याये यो यो योधो यस्य यस्य देवस्यांशः स स्वर्गं गत्वा स्वस्य स्वस्याशिन सान्निध्य प्रापेत्युक्तम् । तत्र संशय किमेते अशा काण्डरुहाणा वृक्षाणामशा इव पृथक् संसारित्वं प्राप्ता उत तेष्वेवाशिषु लीयन्ते । आद्ये कर्मजदेह-

धृष्टकेतुर्जयत्सेनो राजा चैव स सत्यजित्।
दुर्योधनसुताश्चैव शकुनिश्चैव सौबलः ॥ २
कर्णपुत्राश्च विक्रान्ता राजा चैव जयद्रथः।
घटोत्कचादयश्चैव ये चान्ये नानुकीर्तिताः ३
ये चान्ये कीर्तिता वीरा राजानो दीप्तमूर्तयः
स्वर्गे कालं कियन्तं ते तस्थुस्तदपि शंस मे ४
अहो स्विच्छाश्वतं स्थानं तेषां तत्र द्विजोत्तम।
अन्ते वा कर्मणा कां ते गतिं प्राप्ता नरर्षभाः
एतदिच्छाम्यहं श्रोतुं प्रोच्यमानं द्विजोत्तम।
तपसा हि प्रदीप्तेन सर्वं त्वमनुपश्यसि ॥ ६

सौतिरुवाच।

इत्युक्तः स तु विप्रर्षिरनुज्ञातो महात्मना।
व्यासेन तस्य नृपतेराख्यातुमुपचक्रमे ॥ ७

वैशम्पायन उवाच।

न शक्यं कर्मणामन्ते सर्वेण मनुजाधिप।
प्रकृतिं किं नु सम्यक्ते पृच्छैषा संप्रयोजिता
शृणु गुह्यमिदं राजन्देवाना भरतर्षभ।
यदुवाच महातेजा दिव्यचक्षुः प्रतापवान् ९
मुनिः पुराणः कौरव्य पाराशर्यो महाव्रतः।
अगाधबुद्धिः सर्वज्ञो गतिज्ञः सर्वकर्मणाम् ॥
तेनोक्तं कर्मणामन्ते प्रविशन्ति स्विकां तनुम्
वसूनेव महातेजा भीष्मः प्राप महाद्युतिः ११
अष्टावेव हि दृश्यन्ते वसवो भरतर्षभ।
बृहस्पतिं विवेशाथ द्रोणो ह्याङ्गिरसां वरम् ॥
कृतवर्मा तु हार्दिक्यः प्रविवेश मरुद्गणान्।
सनत्कुमारं प्रद्युम्नः प्रविवेश यथागतम् ॥ १३
धृतराष्ट्रो धनेशस्य लोकान्प्राप दुरासदान्।
धृतराष्ट्रेण सहिता गान्धारी च यशस्विनी ॥
पत्नीभ्यां सहितः पाण्डुर्महेन्द्रसदनं ययौ।
विराटद्रुपदौ चोभौ धृष्टकेतुश्च पार्थिवः १५
निशठा क्रूरसाम्बाश्च भानुः कम्पो विदूरथः।
भूरिश्रवाः शलश्चैव भूरिश्च पृथिवीपतिः १६
कंसश्चैवोग्रसेनश्च वसुदेवस्तथैव च।
उत्तरश्च सह भ्रात्रा शङ्खेन नरपुङ्गवः ॥ १७
विश्वेषां देवतानां ते विविशुर्नरसत्तमाः।
वर्चा नाम महातेजाः सोमपुत्रः प्रतापवान् ॥
सोऽभिमन्युर्नृसिंहस्य
फाल्गुनस्य सुतोऽभवत्।
स युध्वा क्षत्रधर्मेण
यथा नान्यः पुमान् क्वचित् ॥ १९
विवेश सोमं धर्मात्मा कर्मणोऽन्ते महारथः।
आविवेश रविं कर्णो निहतः पुरुषर्षभ ॥ २०
द्वापरं शकुनिः प्राप धृष्टद्युम्नस्तु पावकम्।
धृतराष्ट्रात्मजाः सर्वे यातुधाना बलोत्कटाः
ऋद्धिमन्तो महात्मानः शस्त्रपूता दिवं गताः
धर्ममेवाविशत्क्षत्ता राजा चैव युधिष्ठिरः २२
अनन्तो भगवान्देवः प्रविवेश रसातलम्।
पितामहनियोगाद्वै यो योगाद्गामधारयत् २३
यः स नारायणो नाम देवदेवः सनातनः।
तस्यांशो वासुदेवस्तु कर्मणोऽन्ते विवेश ह।
षोडश स्त्रीसहस्राणि वासुदेवपरिग्रहः।
अमज्जंस्ताः सरस्वत्यां कालेन जनमेजय २५
तत्र त्यक्त्वा शरीराणि दिवमारुरुहुः पुनः।
ताश्चैवाप्सरसो भूत्वा वासुदेवमुपाविशन् ॥
हतास्तस्मिन्महायुद्धे ये वीरास्तु महारथाः।
घटोत्कचादयश्चैव देवान्यक्षांश्च भेजिरे २७
दुर्योधनसहायाश्च राक्षसाः परिकीर्तिताः।
प्राप्तास्ते क्रमशो राजन् सर्वलोकाननुत्तमान्
भवनं च महेन्द्रस्य कुबेरस्य च धीमतः।
वरुणस्य तथा लोकान्विविशुः पुरुषर्षभाः ॥

परंपरायास्तत्त्वज्ञानमन्तरेणोच्छेदायोगात्तेषा नित्यससारित्वमस्मदादिवत्स्यात्। द्वितीये मानुष्यभावे तै कृताना कर्मणा नाशापत्तिरिति सदिहानो जनमेजय पृच्छति—**भीष्मद्रोणाविति** ॥ १ ॥ ते अन्ते का गतिं पुण्यभोगान्ते अंशिना सह ऐक्यं वा सालोक्य वा शाश्वतं प्राप्नुवन्ति उत भूमाववतरन्तीति प्रश्न ॥ ५ ॥ अत्रोत्तरमाह—**न शक्यमिति**। कर्मणामन्ते सर्वेण प्रकृतिं प्रति गन्तुं न शक्यमित्यध्याहृत्य योज्यम्। यदि सर्वोऽपि जन्तु प्रारब्धकर्मान्ते स्वा प्रकृतिं गच्छेत्तर्हि सर्वेऽपि मुक्ता स्यु ससारश्चादिमान् भवेत्। ततश्च कृतहानाकृताभ्यागमप्रसगो विधिप्रतिषेधशास्त्रानर्थक्य च। तस्मात्केचिदेव कर्मणामन्ते स्वा प्रकृतिं भजन्ते न सर्वे इति किं तर्हि ये प्रकृतिं न प्राप्तास्तानुद्दिश्य ते त्वयैषा पृच्छा सम्यक् प्रयोजिता ॥८॥ तत्र काश्चित् स्वर्गप्रापककर्मणामन्ते स्वैस्वैरंशिभिस्तादात्म्य प्राप्तु योग्यान् योगजदृष्ट्या पश्यन्परिगणयति—**शृण्वित्यादिना**। अर्थादितरे स्वर्ग गता अपि पुनश्च्यवन्ते एते तु उत्तरामुत्तरामूर्ध्वोर्ध्वक्रमेण गतिं प्राप्य अन्ते ब्रह्मणा सह मुच्यन्ते। तेन देवत्वप्राप्तये कर्माणि यज्ञदानतपआदीनि कर्तव्यान्येव न चोक्तदोष इति सर्वमनवद्यम् ॥ ९ ॥

एतत्ते सर्वमाख्यातं विस्तरेण महाद्युते ।
कुरूणां चरितं कृत्स्नं पाण्डवानां च भारत
सौतिरुवाच ।
एतच्छ्रुत्वा द्विजश्रेष्ठाः स राजा जनमेजयः
विस्मितोऽभवदत्यर्थं यज्ञकर्मान्तरेऽथ ॥ ३१
ततः समापयामासुः कर्म तत्तस्य याजकाः ।
आस्तीकश्चाभवत्प्रीतः परिमोक्ष्य भुजंगमान्
ततो द्विजातीन्सर्वांस्तान्
दक्षिणाभिरतोषयत् ।
पूजिताश्चापि ते राज्ञा
ततो जग्मुर्यथागतम् ॥ ३३
विसर्जयित्वा विप्रांस्तान् राजापि जनमेजयः
ततस्तक्षशिलायाः स पुनरायाद्गजाह्वयम् ३४
एतत्ते सर्वमाख्यातं वैशम्पायनकीर्तितम् ।
व्यासाज्ञया समाज्ञातं सर्पसत्रे नृपस्य हि ३५
पुण्योऽयमितिहासाख्यः पवित्रं वेदमुत्तमम् ।
कृष्णेन मुनिना विप्र निर्मितं सत्यवादिना ॥
सर्वज्ञेन विधिज्ञेन धर्मज्ञानवता सता ।
अतीन्द्रियेण शुचिना तपसा भावितात्मना
ऐश्वर्ये वर्तता चैव सांख्ययोगवता तथा ।
नैकतन्त्रविबुद्धेन दृष्ट्वा दिव्येन चक्षुषा ॥ ३८
कीर्तिं प्रथयता लोके पाण्डवानां महात्मनां
अन्येषां क्षत्रियाणां च भूरिद्रविणतेजसाम्
यश्चेदं श्रावयेद्विद्वान्सदा पर्वणि पर्वणि ।
धूतपाप्मा जितस्वर्गो ब्रह्मभूयाय कल्पते ४०
कार्ष्णं वेदमिमं सर्वं शृणुयाद्यः समाहितः ।
ब्रह्महत्यादिपापानां कोटिस्तस्य विनश्यति
यश्चेदं श्रावयेच्छ्राद्धे ब्राह्मणान्पादमन्ततः ।
अक्षय्यमन्नपानं वै पितॄंस्तस्योपतिष्ठते ॥ ४२
अन्हा यदेनः कुरुते इन्द्रियैर्मनसाऽपि वा ।
महाभारतमाख्याय पश्चात्संध्यां प्रमुच्यते ॥
यद्रात्रौ कुरुते पापं ब्राह्मणः स्त्रीगणैर्वृतः ।
महाभारतमाख्याय पूर्वां संध्यां प्रमुच्यते ४३
महत्त्वाद्भारवत्त्वाच्च महाभारतमुच्यते ।
निरुक्तमस्य यो वेद सर्वपापैः प्रमुच्यते ॥ ४५
अष्टादशपुराणानि धर्मशास्त्राणि सर्वशः ।
वेदाः सांगास्तथैकत्र भारतं चैकतः स्थितम्
श्रूयतां सिंहनादोऽयमृषेस्तस्य महात्मनः ।
अष्टादशपुराणानां कर्तुर्वेदमहोदधेः ॥ ४७
त्रिभिर्वर्षैरिदं पूर्णं कृष्णद्वैपायनः प्रभुः ।
अखिलं भारतं चेदं चकार भगवान् मुनिः
आकर्ण्य भक्त्या सततं
जयाख्यं भारतं महत् ।
श्रीश्च कीर्तिस्तथा विद्या
भवन्ति सहिताः सदा ॥ ४९
धर्मे चार्थे च कामे च मोक्षे च भरतर्षभ ।
यदिहास्ति तदन्यत्र यन्नेहास्ति न कुत्रचित्
जयो नामेतिहासोऽयं
श्रोतव्यो मोक्षमिच्छता ।
ब्राह्मणेन च राज्ञा च
गर्भिण्या चैव योषिता ॥ ५१
स्वर्गकामो लभेत्स्वर्गं जयकामो लभेज्जयम् ।
गर्भिणी लभते पुत्रं कन्यां वा बहुभागिनीम्
अनागतश्च मोक्षश्च कृष्णद्वैपायनः प्रभुः ।
संदर्भं भारतस्यास्य कृतवान्धर्मकाम्यया ५३
षष्टिं शतसहस्राणि चकारान्यां स संहिताम्
त्रिंशच्छतसहस्राणि देवलोके प्रतिष्ठितम् ५४
पित्र्ये पञ्चदशं ज्ञेयं यक्षलोके चतुर्दश ।
एकं शतसहस्रं तु मानुषेषु प्रभाषितम् ॥ ५५

एवं पाण्डवाना कथा समाप्य जनमेजयस्य यज्ञे वैशम्पायन एता कथामुक्तवानिति प्रकृतमनुसन्धान सौतिरुवाच-- **एतच्छ्रुत्वेत्यादि** ॥३१॥ समाज्ञातं मया सूतेन व्यासाज्ञया वैशम्पायनेन कीर्तितं च ॥ ३५ ॥ विधिज्ञेन दैवज्ञेन अतीन्द्रियेण इंद्रियाण्यतिक्रान्तेन योगबलादेव सर्वदर्शनसिद्धेरित्याह-**तपसेति** । भावितात्मना शोधितचित्तेन ॥३७॥ सर्वेषा तृतीयान्ताना निर्मितमित्यनेनान्वय । अन्येषामपि कीर्तिं प्रथयतेति सम्बन्ध ॥ ३८ ॥ ब्रह्मभूयाय मोक्षाय कल्पते तत्रोक्तसाधनानुष्ठानक्रमेण ॥ ४० ॥ अन्तत निकटे ॥ ४२ ॥ **अन्हेति** । महाभारतस्य अल्पमपि पश्चिमाया सन्ध्याया पठ्यते चेद्दिनकृतं पाप नश्यति । एव प्रातः संध्याया रात्रिकृतमित्यर्थ ॥ ४३ ॥ निरुक्तं नामनिर्वचनम् ॥ ४५ ॥ **धर्मे चेति** । चकारचतुष्टयादर्थादिचतुष्टयमप्यत्रोक्तं हानार्थमिति बोध्यम् ॥ ५० ॥ अनागतोऽनागन्तुको नित्यसिद्ध इति यावत् एवंविधो यो मोक्ष कैवल्यं तदेव स्वरूपं यस्य स मोक्ष । यद्वा मोक्तुमिच्छन् मुचोऽकर्मकस्य गुणो वेति सनि गुणोऽभ्यासलोपश्च । मुमुक्षुरित्यर्थः लोकहित इति भाव ॥ ५३ ॥ अन्यां वेदचतुष्टयसंहिताभ्यः पृथग्भूता तदर्थवतीम् ॥ ५४ ॥

नारदोऽश्रावयद्देवानसितो देवलः पितॄन् ।
रक्षो यक्षान् शुको मर्त्यान्वैशंपायन एव तु
इतिहासमिमं पुण्यं महार्थं वेदसंमितम् ।
व्यासोक्तं श्रूयते येन कृत्वा ब्राह्मणमग्रतः ५७
स नरः सर्वकामांश्च कीर्तिं प्राप्येह शौनक
गच्छेत्परमिकां सिद्धिमत्र मे नास्ति संशयः
भारताध्ययनात्पुण्यादपि पादमधीयतः ।
श्रद्धया परया भक्त्या श्राव्यते चापि येन तु
य इमां संहितां पुण्यां पुत्रमध्यापयच्छुकम् ॥
मातापितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि यान्ति यास्यन्ति चापरे
हर्षस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम्
ऊर्ध्ववाहुर्विरौम्येष न च कश्चिच्छृणोति मे
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥ ६२
न जातु कामान्न भयान्न लोभा-
द्धर्मं त्यजेज्जीवितस्यापि हेतोः ।
नित्यो धर्मः सुखदुःखे त्वनित्ये
जीवो नित्यो हेतुरस्य त्वनित्यः ६३
इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत्
स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ६४
यथा समुद्रो भगवान्यथा हि हिमवान् गिरिः
ख्यातावुभौ रत्ननिधी तथा भारतमुच्यते ॥
कार्ष्णं वेदमिमं विद्वान् श्रावयित्वाऽर्थमश्नुते
इदं भारतमाख्यानं यः पठेत्सुसमाहितः ।
स गच्छेत्परमां सिद्धिमिति मे नास्ति संशयः
द्वैपायनोष्ठपुटनिःसृतमप्रमेयं
पुण्यं पवित्रमथ पापहरं शिवं च ।
यो भारतं समधिगच्छति वाच्यमानं
किं तस्य पुष्करजलैरभिषेचनेन ६७
यो गोशतं कनकशृङ्गमयं ददाति
विप्राय वेदविदुषे सुबहुश्रुताय ।
पुण्या च भारतकथा सततं शृणोति
तुल्यं फलं भवति तस्य च तस्य चैव

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासक्यां स्वर्गारोहणपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥



समाप्तं स्वर्गारोहणपर्व ।

॥ इति महाभारतं समाप्तम् ॥



श्रूयते येन य शृणोतीत्यर्थ उभयत्र विभक्तिव्यत्यय आर्ष ॥ ५७ ॥ भारताध्ययनादिति सार्धश्लोक । य व्यास इमा सहिता शुकं पुत्रं अध्यापयत् तस्य अधीयतो भारताख्यमितिहास स्मरत स्मृत्वा च ग्रथरूपेण प्रणयत. मक्त्या परया श्रद्धया च व्यास एव पूज्यस्तस्य वाक्यं प्रमाणमेवेत्यास्तिक्यबुद्ध्या येन पुसा इदं श्राव्यते स पुण्यात् पुण्यकरात् अपि पाद श्लोकपाद ग्रन्थपादं वा भारतस्याध्ययनात्परमिका सिद्धिं गच्छेदिति पूर्वेणान्वय. । व्यासे श्रद्धा बध्वा भारतमध्येतव्यमित्यर्थ ॥ ५९ ॥ सन्ध्याया भारतं पठनीयमित्युक्तम् । तत्र पठनयोग्यं भारतमाख्यं चतु श्लोकीरूपमाह—मातेति ॥ ६० ॥

इति श्रीमत्पदवाक्यप्रमाणमर्यादाधुरन्धरचतुर्धरवंशावतंसगोविंदसूरिसूनोर्नीलकण्ठस्य कृतौ भारतभावदीपे स्वर्गारोहणपर्वणि पञ्चमोऽध्यायः ॥ ५ ॥

महाभारतश्रवणमहिमा* ।

जनमेजय उवाच ।
भगवन्केन विधिना श्रोतव्यं भारतं बुधैः ।
फलं किं के च देवाश्च पूज्या वै पारणेष्विह
देयं समाप्ते भगवन्किं च पर्वणि पर्वणि ।
वाचकः कीदृशश्चात्र एष्टव्यस्तद्ब्रवीहि मे २
वैशम्पायन उवाच ।
शृणु राजन् विधिमिमं फलं यच्चापि भारतात्
श्रुताद्भवति राजेन्द्र यत्त्वं मामनुपृच्छसि॥ ३
दिवि देवा महीपाल क्रीडार्थमवनिं गताः ।
कृत्वा कार्यमिदं चैव ततश्च दिवमागताः॥ ४
हन्त यत्ते प्रवक्ष्यामि तच्छृणुष्व समाहितः ।
ऋषीणां देवतानां च संभवं वसुधातले ॥ ५
अत्र रुद्रास्तथा साध्या
विश्वेदेवाश्च शाश्वताः ।
आदित्याश्चाश्विनौ देवौ
लोकपाला महर्षयः ॥ ६
गुह्यकाश्च सगन्धर्वा नागा विद्याधरास्तथा ।
सिद्धा धर्मः स्वयंभूश्च मुनिः कात्यायनो वरः
गिरयः सागरा नद्यस्तथैवाप्सरसां गणाः ।
ग्रहाः संवत्सराश्चैव अयनान्यृतवस्तथा ॥ ८
स्थावरं जङ्गमं चैव जगत्सर्वं सुरासुरम् ।
भारते भरतश्रेष्ठ एकस्थमिह दृश्यते ॥ ९
तेषां श्रुत्वा प्रतिष्ठानं नामकर्मानुकीर्तनात् ।
कृत्वाऽपि पातकं घोरं सद्यो मुच्येत मानवः
इतिहासमिमं श्रुत्वा यथावदनुपूर्वशः ।
संयतात्मा शुचिर्भूत्वा पारं गत्वा च भारते
तेषां श्राद्धानि देयानि श्रुत्वा भारत भारतम्
ब्राह्मणेभ्यो यथाशक्त्या भक्त्या च भरतर्षभ
महादानानि देयानि रत्नानि विविधानि च
गावः कांस्योपदोहाश्च कन्याश्चैव स्वलंकृताः
सर्वकामगुणोपेता यानानि विविधानि च ।
भवनानि विचित्राणि भूमिर्वासांसि काञ्चनम्
वाहनानि च देयानि हया मत्ताश्च वारणाः ।
शयनं शिबिकाश्चैव स्यन्दनाश्च स्वलंकृताः१५
यद्यद्गृहे वरं किंचिद्यद्यदस्ति महद्धसु ।
तत्तद्देयं द्विजातिभ्य आत्मा दाराश्च सूनवः
श्रद्धया परया युक्तं क्रमशस्तस्य पारगः ।
शक्तितः सुमना हृष्टः शुश्रूषुरविकल्पकः ॥१७
सत्यार्जवरतो दान्तः शुचिः शौचसमन्वितः
श्रद्दधानो जितक्रोधो यथा सिध्यति तच्छृणु
शुचिः शीलान्विताचारः
शुक्लवासा जितेन्द्रियः
संस्कृतः सर्वशास्त्रज्ञः
श्रद्दधानोऽनसूयकः ॥ १९
रूपवान् सुभगो दान्तः सत्यवादी जितेन्द्रियः
दानमानगृहीतश्च कार्यो भवति वाचकः ॥२०
अविलम्बमनायस्तमद्रुतं धीरमूर्जितम् ।
असंरुक्ताक्षरपदं स्वरभावसमन्वितम् ॥ २१
त्रिषष्टिवर्णसंयुक्तमष्टस्थानसमीरितम् ।
वाचयेद्वाचकः स्वस्थः स्वासीनः सुसमाहितः
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ २३
ईदृशाद्वाचकाद्राजन् श्रुत्वा भारत भारतम् ।
नियमस्थः शुचिः श्रोता शृण्वन्स फलमश्नुते२४
पारणं प्रथम प्राप्य द्विजान्कामैश्च तर्पयन् ।
अग्निष्टोमस्य यज्ञस्य फलं वै लभते नरः॥ २५
अप्सरोगणसंकीर्णं विमानं लभते महत् ।
प्रहृष्टः स तु देवैश्च दिवं याति समाहितः २६
द्वितीय पारणं प्राप्य सोऽतिरात्रफलं लभेत्
सर्वरत्नमयं दिव्यं विमानमधिरोहति ॥ २७
दिव्यमाल्याम्बरधरो दिव्यगन्धविभूषितः ।
दिव्याङ्गदधरो नित्य देवलोके महीयते ॥ २८
तृतीयं पारणं प्राप्य द्वादशाहफल लभेत् ।
वसत्यमरसंकाशो वर्षाण्ययुतशो दिवि ॥२९
चतुर्थे वाजपेयस्य पञ्चमे द्विगुणं फलम् ।
उदितादित्यसंकाश ज्वलन्तमनलोपमम्॥३०
विमान विबुधैः सार्धमारुह्य दिवि गच्छति ।
वर्षायुतानि भवने शक्रस्य दिवि मोदते ॥३१
षष्ठे द्विगुणमस्तीति सप्तमे त्रिगुणं फलम् ।
कैलासशिखराकारं वैदूर्यमणिवेदिकम् ॥ ३२
परिक्षिप्तं च बहुधा मणिविद्रुमभूषितम् ।
विमानं समधिष्ठाय कामगं साप्सरोगणम्३३
सर्वाँल्लोकान्विचरते द्वितीय इव भास्करः ।
अष्टमे राजसूयस्य पारणे लभते फलम् ३४
चन्द्रोदयनिभं रम्यं विमानमधिरोहति ।
चन्द्ररश्मिप्रतीकाशैर्हयैर्युक्तं मनोजवैः ॥ ३५

* भगवन्नित्यादि फलाध्यायो व्यासेन हरिवंशान्ते उक्त । अत्र तु श्रोतृप्ररोचनार्थमुक्त इति ज्ञेयम् ॥ १ ॥

सेव्यमानो वरस्त्रीणां चन्द्रात्कान्ततरैर्मुखैः ।
मेखलानां निनादेन नूपुराणां च निःस्वनैः ३६
अंके परमनारीणां सुखसुप्तो विबुध्यते ।
नवमे क्रतुराजस्य वाजिमेधस्य भारत ॥ ३७
काञ्चनस्तंभनिर्यूहवैदूर्यकृतवेदिकम् ।
जाम्बूनदमयैर्दिव्यैर्गवाक्षैः सर्वतो वृतम् ॥ ३८
सेवितं चाप्सरःसङ्घैर्गन्धर्वैर्दिविचारिभिः ।
विमानं समधिष्ठाय श्रिया परमया ज्वलन् ॥
दिव्यमाल्याम्बरधरो दिव्यचन्दनरूषितः ।
मोदते दैवतैः सार्धं दिवि देव इवापरः ॥४०
दशमं पारणं प्राप्य द्विजातीनभिवन्द्य च ।
किंकिणीजालनिर्घोषं पताकाध्वजशोभितम्
रत्नवेदिकसम्बाधं वैदूर्यमणितोरणम् ।
हेमजालपरिक्षिप्तं प्रवालवलभीमुखम् ॥ ४२
गंधर्वैर्गीतकुशलैरप्सरोभिश्च शोभितम् ।
विमानं सुकृतावासं सुखनैवोपपद्यते ॥ ४३
मुकुटेनाग्निवर्णेन जाम्बूनदविभूषिणा ।
दिव्यचन्दनदिग्धाङ्गो दिव्यमाल्यविभूषितः
दिव्यान् लोकान् विचरति
दिव्यैर्भोगैः समन्वितः ।
विबुधानां प्रसादेन
श्रिया परमया युतः ॥ ४५
अथ वर्षगणानेव स्वर्गलोके महीयते ।
ततो गन्धर्वसहितः सहस्राण्येकविंशतिम् ४६
पुरन्दरपुरे रम्ये शक्रेण सह मोदते ।
दिव्ययानविमानेषु लोकेषु विविधेषु च ४७
दिव्यनारीगणाकीर्णो निवसत्यमरो यथा ।
ततः सूर्यस्य भवने चन्द्रस्य भवने तथा ॥४८
शिवस्य भवने राजन्
विष्णोर्याति सलोकताम् ।
एवमेतन्महाराज
नात्र कार्या विचारणा ॥ ४९
श्रद्धानेन वै भाव्यमेवमाह गुरुर्मम ।
वाचकस्य तु दातव्यं मनसा यद्यदिच्छति ५०
हस्त्यश्वरथयानानि वाहनानि विशेषतः ।
कटके कुण्डले चैव ब्रह्मसूत्रं तथा परम् ॥ ५१
वस्त्रं चैव विचित्रं च गन्धं चैव विशेषतः ।
देववत्पूजयेत्तं तु विष्णुलोकमवाप्नुयात् ॥ ५२
अतः परं प्रवक्ष्यामि यानि देयानि भारते ।
वाच्यमाने तु विप्रेभ्यो राजन् पर्वणि पर्वणि
जातिं देशं च सत्यं च माहात्म्यं भरतर्षभ ।
धर्मं वृत्तिं च विज्ञाय क्षत्रियाणां नराधिप ॥
स्वस्ति वाच्य द्विजानादौ ततः कार्यं प्रवर्तते
समाप्ते पर्वणि ततः स्वशक्त्या पूजयेद्द्विजान्
आदौ तु वाचकं चैव वस्त्रगन्धसमन्वितम् ।
विधिवद्भोजयेद्राजन् मधु पायसमुत्तमम् ॥५६
ततो मूलफलप्रायं पायसं मधुसर्पिषा ।
आस्तीके भोजयेद्राजन् दद्याच्चैव गुडौदनम्
अपूपैश्चैव पूपैश्च मोदकैश्च समन्वितम् ।
सभापर्वणि राजेन्द्र हविष्यं भोजयेद्द्विजान्
आरण्यके मूलफलैस्तर्पयेत्तु द्विजोत्तमान् ।
अरणीवर्प चासाद्य जलकुम्भान्प्रदापयेत् ॥ ५९
तर्पणानि च मुख्यानि वन्यमूलफलानि च ।
सर्वकामगुणोपेतं विप्रेभ्योऽन्नं प्रदापयेत् ॥ ६०
विराटपर्वणि तथा वासांसि विविधानि च ।
उद्योगे भरतश्रेष्ठ सर्वकामगुणान्वितम् ॥ ६१
भोजन भोजयेद्विप्रान्गन्धमाल्यैरलंकृतान् ।
भीष्मपर्वणि राजेन्द्र दत्वा यानमनुत्तमम् ६२
ततः सर्वगुणोपेतमन्नं दद्यात्सुसंस्कृतम् ।
द्रोणपर्वणि विप्रेभ्यो भोजनं परमार्चितम् ६३
शराश्च देया राजेन्द्र चापान्यसिवरास्तथा ।
कर्णपर्वण्यपि तथा भोजनं सार्वकामिकम् ६४
विप्रेभ्यः सस्कृत सम्यग्दद्यात्सयतमानसः ।
शल्यपर्वणि राजेन्द्र मोदकैः सगुडौदनैः ॥ ६५
अपूपैस्तर्पणैश्चैव सर्वमन्नं प्रदापयेत् ।
गदापर्वण्यपि तथा मुद्गमिश्रं प्रदापयेत् ॥ ६६
स्त्रीपर्वणि तथा रत्नैस्तर्पयेत्तु द्विजोत्तमान् ।
घृतौदन पुरस्ताच्च पैषीके दापयेत्पुनः ॥ ६७
ततः सर्वगुणोपेतमन्नं दद्यात्सुसंस्कृतम् ।
शान्तिपर्वण्यपि तथा हविष्यं भोजयेद्द्विजान्
आश्वमेधिकमासाद्य भोजनं सार्वकामिकम् ।
तथाश्रमनिवासे तु हविष्यं भोजयेद्द्विजान् ६९
मौसले सार्वगुणिकं गन्धमाल्यानुलेपनम् ।
महाप्रास्थानिके तद्वत्सर्वकामगुणान्वितम् ७०
स्वर्गपर्वण्यपि तथा हविष्यं भोजयेद्द्विजान् ।
हरिवंशसमाप्तौ तु सहस्रं भोजयेद्द्विजान् ७१
गामेकां निष्कसंयुक्तां ब्राह्मणाय निवेदयेत् ।
तदर्धेनापि दातव्या दरिद्रेणापि पार्थिव ॥ ७२
प्रतिपर्वसमाप्तौ तु पुस्तकं वै विचक्षणः ।
सुवर्णेन च संयुक्त वाचकाय निवेदयेत् ॥ ७३
हरिवंशे पर्वणि च पायसं तत्र भोजयेत् ।
पारणे पारणे राजन्यथावद्भरतर्षभ ॥ ७४

समाप्य सर्वाः प्रयतः संहिताः शास्त्रकोविदः
शुभे देशे निवेश्याथ क्षौमवस्त्राभिसंवृताः ७५
शुक्लाम्बरधरः स्रग्वी शुचिर्भूत्वा स्वलंकृतः।
अर्चयेत यथान्यायं गन्धमाल्यैः पृथक् पृथक्
संहितापुस्तकान् राजन्प्रयतः सुसमाहितः।
भक्ष्यैर्माल्यैश्च पेयैश्च कामैश्च विविधैः शुभैः॥
हिरण्यं च सुवर्णं च दक्षिणामथ दापयेत्।
सर्वत्र त्रिपलं स्वर्णं दातव्यं प्रयतात्मना॥ ७८
तदर्धं पादशेषं वा वित्तशाठ्यविवर्जितम्।
यद्यदेवात्मनोऽभीष्टं तत्तद्देयं द्विजातये॥ ७९
सर्वथा तोषयेद्भक्त्या वाचकं गुरुमात्मनः।
देवताः कीर्तयेत्सर्वा नरनारायणौ तथा॥ ८०
ततो गन्धैश्च माल्यैश्च स्वलंकृत्य द्विजोत्तमान्
तर्पयेद्विविधैः कामैर्दानैश्चोच्चावचैस्तथा॥ ८१
अतिरात्रस्य यज्ञस्य फलं प्राप्नोति मानवः।
प्राप्नुयाच्च क्रतुफलं तथा पर्वणि पर्वणि॥ ८२
वाचको भरतश्रेष्ठ व्यक्ताक्षरपदस्वरः।
भविष्यं श्रावयेद्विद्वान् भारतं भरतर्षभ॥ ८३
भुक्तवत्सु द्विजेन्द्रेषु यथावत्संप्रदापयेत्।
वाचकं भरतश्रेष्ठ भोजयित्वा स्वलंकृतम् ८४
वाचके परितुष्टे तु शुभा प्रीतिरनुत्तमा।
ब्राह्मणेषु तु तुष्टेषु प्रसन्नाः सर्वदेवताः॥ ८५
ततो हि वरणं कार्यं द्विजानां भरतर्षभ।
सर्वकामैर्यथान्यायं साधुभिश्च पृथग्विधैः ८६
इत्येष विधिरुद्दिष्टो मया ते द्विपदां वर।
श्रद्दधानेन वै भाव्यं यन्मां त्वं परिपृच्छसि॥
भारतश्रवणे राजन्पारणे च नृपोत्तम।
सदा यत्नवता भाव्य श्रेयस्तु परमिच्छता ८८
भारतं शृणुयान्नित्यं भारत परिकीर्तयेत्।
भारतं भवने यस्य तस्य हस्तगतो जयः॥ ८९
भारतं परमं पुण्यं भारते विविधाः कथाः।
भारतं सेव्यते देवैर्भारत परमं पदम्॥ ९०
भारतं सर्वशास्त्राणामुत्तम भरतर्षभ।
भारतात्प्राप्यते मोक्षस्तत्त्वमेतद्ब्रवीमि तत् ९१
महाभारतमाख्यानं क्षितिं गां च सरस्वतीम्
ब्राह्मणान् केशवं चैव कीर्तयन्नावसीदति॥ ९२
वेदे रामायणे पुण्ये भारते भरतर्षभ।
आदौ चान्ते च मध्ये च हरिः सर्वत्र गीयते
यत्र विष्णुकथा दिव्याः श्रुतयश्च सनातनाः।
तच्छ्रोतव्यं मनुष्येण परं पदमिहेच्छता॥ ९४
एतत्पवित्रं परममेतद्धर्मनिदर्शनम्।
एतत्सर्वगुणोपेतं श्रोतव्य भूतिमिच्छता ९५
कायिकं वाचिकं चैव मनसा समुपार्जितम्।
तत्सर्वं नाशमायाति तमः सूर्योदये यथा ९६
अष्टादशपुराणानां श्रवणाद्यत्फलं भवेत्।
तत्फल समवाप्नोति वैष्णवो नात्र संशयः॥
स्त्रियश्च पुरुषाश्चैव वैष्णवं पदमाप्नुयुः।
स्त्रीभिश्च पुत्रकामाभिः श्रोतव्यं वैष्णवं यशः
दक्षिणा चात्र देया वै निष्कपञ्चसुवर्णकम्।
वाचकाय यथाशक्त्या यथोक्तं फलमिच्छता
स्वर्णशृङ्गी च कपिलां सवत्सां वस्त्रसंवृताम्
वाचकाय च दद्याद्धि आत्मनः श्रेय इच्छता
अलङ्कारं प्रदद्याच्च पाण्योर्वै भरतर्षभ।
कर्णस्याभरणं दद्याद्धनं चैव विशेषतः॥ १
भूमिदान समादद्याद्वाचकाय नराधिप।
भूमिदानसमं दानं न भूतं न भविष्यति २
शृणोति श्रावयेद्वापि सततं चैव यो नरः।
सर्वपापविनिर्मुक्तो वैष्णवं पदमाप्नुयात्॥ ३
पितॄनुद्धरते सर्वानेकादशसमुद्भवान्।
आत्मानं ससुतं चैव स्त्रियं च भरतर्षभ॥ ४
दशांशश्चैव होमोऽपि कर्तव्योऽत्र नराधिप।
इद मया तवाग्रे च प्रोक्तं सर्वं नरर्षभ॥ १०५

इति श्रीमहाभारते शतसाहस्र्यां संहितायां वैयासक्यां
हरिवंशोक्तभारतश्रवणविधावध्यायः समाप्तः॥

॥ शुभं भवतु ॥

॥ इति स्वर्गारोहणपर्व समाप्तम् ॥



भारततात्पर्यरूपा भारतसावित्री ।

मातापितृसहस्राणि पुत्रदारशतानि च ।
संसारेष्वनुभूतानि यान्ति यास्यन्ति चापरे ॥ १
हर्षस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति न पण्डितम् ॥ २
ऊर्ध्वबाहुर्विरौम्येष न च कश्चिच्छृणोति मे ।
धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥ ३
न जातु कामान्न भयान्न लोभा-
द्धर्मं त्यजेज्जीवितस्यापि हेतोः ।
नित्यो धर्मः सुखदुःखे त्वनित्ये
जीवो नित्यो हेतुरस्य त्वनित्यः ॥ ४

इमां भारतसावित्रीं प्रातरुत्थाय यः पठेत् ।
स भारतफलं प्राप्य परं ब्रह्माधिगच्छति ॥

॥ इति श्रीमहाभारते *स्वर्गारोहणपर्व समाप्तम् ॥

* यद्यप्यादिपर्वणि पर्वसंग्रहकथनावसरेऽष्टादशे स्वर्गारोहणपर्वणि अध्याया पञ्च श्लोकाश्च नवोत्तरे द्विशते इत्युक्तम् । अत्र अध्यायसंख्याविषये नैव वैषम्य परं श्लोकसंख्या तु संप्रत्यास्मिन् पर्वणि ३२० एवती दृश्यते । परमयं न्यूनाधिकभावो लेखकादिप्रमादज स्यादिति भाति ।

अयं ग्रन्थः श्रीकिञ्जवडेकरकुलकमलदिवाकरसोमयाजिदत्तात्रेयदीक्षिततनुज-पण्डितराम-चन्द्रशास्त्रिणा परिशोधितः परिष्कृतश्च । भारती जयतु ॥ शाके १८५४ ॥

इति श्रीमहाभारतं समाप्तम्